एवमेव सुश्रुतसंहिता शल्यतन्त्रोपदेशप्रधानाष्टाङ्गमयी धन्वन्तरिसम्प्रदायस्य आदिमा चरकादधस्तना च। अस्यां काशिराजरूपेणावतीर्णो भगवान् धन्वन्तरिर्वक्ता विश्वामित्रमहर्षिसुतः सुश्रुतः श्रोता, परमरासायनिकः सिद्धनागार्ज्जुनश्च प्रतिसंस्कर्त्ता। सूत्रादिपञ्चस्थानात्मके पूर्व्वतन्त्रे चिकित्सितागदरसायनवाजीकरणतन्त्रैः सह सचिकित्सितशल्यतन्त्रं प्रधानतो वर्णितम्। कल्पे सचिकित्सितविषतन्त्रं। चिकित्सिते च स्थाने रसायनवाजीकरणतन्त्रे वर्णिते। उत्तरे च तन्त्रे शालाक्यकायचिकित्साकौमारभृत्यभूतविद्या वर्णिताः।

एकदा सुश्रुताचार्य्यः पितुर्विश्वामित्रस्याज्ञया सहोत्तायिमुनिकुमारैः सह वाराणसीमागत्य काशिराजदिवोदासादायुर्व्वेदं यजुर्वेदाङ्गभूतं शल्यतन्त्रप्रधानमष्टाङ्गमयमधीत्य सहोत्तायिगणशतसर्व्वतन्त्रप्रधानं सविंशाध्यायशतसम्पन्नं तन्त्रं स्वनाम्ना प्रणिनाय। अथ यदा बौद्धाः प्रबला भूत्वा वादेन बुधान् पराभूय वैदिकाः क्रिया विलोपयितुमारब्धवन्तः, तस्मिन्नेव बौद्धसङ्क्रामसमये (खृः सहस्राधिकवर्षपूर्व्वं) जगति विश्रुतः परमरासायनिको बौद्धपालकः सिद्धनागार्ज्जुनः सौश्रुतं नाम तन्त्रं प्रतिसंस्करणमुखेन सूत्रादिपञ्चसु स्थानेषु अर्थवशाद्विभज्य सविस्तरं विशदञ्च व्याख्याय परिशिष्टभूते उत्तरे तन्त्रे शिष्टानर्थान् व्याकृत्य एकामभिनवां संहितां व्यरचयत्, सा सुश्रुतसंहितेति लोके गीयते। इति डल्हणाचार्य्यमतम्। अस्या भाषा प्राञ्जला, रचनारीतिश्च यथाभागमानुपूर्व्विकी। अस्याञ्च वर्णितं शारीरास्थिमालाव्याकरणसङ्ग्विनिश्चयव्रणचिकित्सितादिविज्ञानं तदा परां कोटिमधिरूढमित्यनिर्विकल्पं स्वीकार्य्यम्। तस्य च मूढ़गर्भाश्मरीप्रकरणमतीव प्रशस्तमुपादेयञ्च निदर्शनभूतम्। किमधिकं, डाक्तार् (Charles) साहेबमहोदयः श्रीकुचबेहारमहाराणी-चिकित्सकेन डाक्तार्दुर्गादासगुप्तेन मत्साहाय्येनानूद्य विलायतभाषया प्रदत्तं मूढ़गर्भादिप्रकरणं समालोच्य सविस्मयं प्रशशंस।

अत्रिसंहिता—कुत्रचित् पञ्चनदादिप्रदेशे सुप्रसिद्धा अत्रिमुनिप्रणीता चरकादिवत् प्राचीना च। संहितेयं नातिसङ्क्षिप्ता नातिविस्तृता च। अयमेवादौ प्रामाणिकः स्मृतिसंहिताकार आसीत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाभटसंहितापि—आत्रेयसम्प्रदायस्य धन्वन्तरिसम्प्रदायस्य च नानाचिकित्सातन्त्रेभ्य आदावेव स्वयं संगृह्योताद्दष्टाङ्गहृदयसंग्रहादाकृष्य वाभटाचार्य्येण विरचिता। यदुक्तं तत्रैव—

"अष्टाङ्गवैद्यकमहोदधिमन्थनेन
योऽष्टाङ्गसंग्रहमहामृतराशिराप्तः।
तस्मादनल्पफलमल्पसमुद्यमानां
प्रीत्यर्थमेतदुदितं पृथगेव तन्त्रम्॥" वा. उ. ४०अ.।

एवमेवासौ स्वनाम्नालङ्कारादिनानाशास्त्रं रचितवान्। श्रूयते च यदसावादौ ब्राह्मणधर्म्मावलम्बी नियतमेव वैदिकाचारमनुतिष्ठतिस्म। अथ कदाचिदसौ बौद्धधर्म्मतत्त्वं जिज्ञासमानः कमपि बौद्धाचार्य्यं गुरुत्वेनाङ्गीचकार। एवं कियन्तं कालमविचलितचित्तेन तमनुशीलयन् तस्य धर्म्मस्य परमरहस्यमवगच्छन् तस्मिन्नतीव श्रद्दधानो यदा पूर्व्वाचार्य्यसमीपमाजगाम, तदा गुरुणा तस्य तद्धर्म्मानुरक्तिमवधारयता तद्धर्म्मावलम्बनायैवासौ समुपदिष्टः। इति दाक्षिणात्यविदुषां किंवदन्ती (Aufrecht's catalogue)। दाक्षिणात्यपण्डिता इममेव वाभटममरसिंहं ख्यापयन्ति। परं काश्मीरराजतरङ्गिणीसमालोचनया एवमवगम्यते यथा—सिंहगुप्तसुतः परमबौद्धो वाभटाचार्य्यः काश्मीरनरपतिजयसिंहस्य प्रजापालनसमये (खृः द्वादशशताब्द्यां, शक ११११—४०) वर्त्तमान आसीत्। तथा विजयनगराधिपस्य बुक्कराजस्य सभासामयिकेन माधवेन स्वग्रन्थे वाभट उद्धृतः। इदमपि नववर्षशतमतीतम्। अतस्तस्मिन्नेव समये वाभटः संहितामकरोदिति श्राद्दशां मतम्। अतः वाभटसंहिता नातिप्राचीना चरकसुश्रुतयोरधस्तना इत्यनुमीयते। अत्र सर्व्वविधान्येव चिकित्सिताङ्गानि तुल्यं व्याख्यातानि। अस्या मुष्टियोगरोगलक्षणादिकञ्च विशेषतः प्रशंसनीयम्। अस्या भाषा विशुद्धा रचनारीतिश्च मार्जिता। वाभटस्य जन्मनि नाना किंवदन्ती श्रूयते यथा—केचित्तं धन्वन्तरिमाह, केचिच्च तं सागरमन्थनादुद्भूतमेकतमं रत्नम्, केचिच्च तं कलियुगस्य प्रधानऋषिं गौतमबुद्धमाह।

"अत्रिः कृतयुगे चैव द्वापरे सुश्रुतो मतः।
कलौ वाग्भटनामा च.....॥" अत्रिः।

स्वरचिते तु अष्टाङ्गहृदयसंग्रहे स सिन्धुदेशज इति स्वयमेवोक्तम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा—

"भिषग्वरो वाभट इत्यभून्मे
पितामहो नामधरोऽस्मि यस्य।
सुतोऽभवत्तस्य च सिंहगुप्तः
तस्याप्यहं सिन्धुषु जातजन्मा ॥"

अरुणदत्तो मृगाङ्कदत्तस्य तनयो वैद्यवंशे जातश्च। असौ हि सुप्रसिद्ध-वाभटसंहिताया: सर्व्वाङ्गसुन्दर्य्याख्यटीकाया विरचयिता।

हेमाद्रिरतिप्रसिद्धो ग्रन्थकार:। असौ वाभटसंहिताया: सूत्रस्थानस्य आयुर्वेदरसायनाख्यां टीकामकरोत्। चतुर्वर्गचिन्तामणिनामक: स्मृतिसंग्रहश्च तस्यैवेति गीयते।

चक्रदत्तसंग्रह:—चक्रपाणिदत्तविरचितो रोगाणाम् चिकित्सासंग्रह:। अत्रासौ माधवकरप्रणीतरुग्विनिश्चयग्रन्थस्यानुपूर्व्विकरोगानुक्रमेण ज्वरादि-रोगाणां चिकित्सा वर्णिता। तत्र रोगाणां तत्प्रणीतसिद्धयोगा: परमदृष्ट-फला इति संग्रहोऽयं सर्व्वत्र समादरेण परिगृहीतो लोकहितं संसाधयति।

चक्रपाणिदत्तो वीरभूमिदेशवास्तव्यो विश्रुतरोध्रबलसंज्ञकदत्तकुले जातो नारायणदत्तपुत्रो नरदत्तशिष्यश्च। स च विद्याकुलसम्पन्नस्य भिषजो भानु-दत्तस्यान्तरङ्गभावात् तदनु गौड़राजस्य पाकशालाध्यक्षोऽभूत्। अतस्तत्रादु-र्भावो द्वादशशताब्द्यामनुमीयते। श्रूयते च यथा तस्य जन्मभूमावद्यापि तत्-प्रतिष्ठापितश्चक्रपाणीश्वर इति शिवोऽस्ति। अतोऽसौ धर्मेण शैव आसीदिति बुध्यते। स्वसंग्रहस्य मङ्गलाचरणेऽपि आत्मन: शैवत्वं विज्ञापितम्।

"गौड़ाधिनाथरसवत्यधिकारिपात्रं
नारायणस्य तनय: सुनयोऽन्तरङ्गात्।
भानोरनु प्रथितरोध्रबलो कुलीन:
श्रीचक्रपाणिरिह कर्त्तृपदाधिकारी ॥
य: सिद्धयोगलिखिताधिकसिद्धयोगां-
स्तत्रैव नि:क्षिपति केवलमुद्धरेद्वा ॥"

सिद्धयोग:—द्वन्द्वकुण्डकृतोऽतिप्रामाणिकचिकित्सासंग्रह:। तस्य च कुसुमा-वलो नाम टीका श्रीकण्ठकृता। यतश्चक्रपाणि: स्वग्रन्थे एतस्य ग्रन्थस्य समु-ल्लेखं चकार, अतोऽयं चक्रपाणेरूर्द्ध्वतन इत्यवगन्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसकौमुदी—भिषजा माधवेन कृता। माधवेनात्र रसघटितानि दृष्ट-फलानि औषधानि नानारसग्रन्थेभ्यः समाहृत्य स्वरचितानि च समायोज्यायं चिकित्सौषधसंग्रहः कृतः, रोगविशेषेषु च विविधयोगाः स्वयमपि व्यवस्था-पिताः। ग्रन्थकारोऽयं निदानसंग्रहकारो माधवकर इति वृद्धपरम्परया श्रूयते। परं माधवाभिधेन केनापि भिषजा कृतेति प्रसिद्धिरलोकेवेत्यपि सहसा प्रतिपत्तुं न शक्यते। यतो माधवकरस्य समये फणिफेणप्रयागरसादि-जारणमारणादिपुरःसरं रसप्रयोगस्य प्रचारो नासीत्।

रसरत्नाकरो—नित्यनाथविरचितो महान् रसग्रन्थः। तेनात्र रसजारणा-दिकं सविस्तरं प्रदर्श्य स्वरचितानि संगृहीतानि च तैलौषधादीनि बहूनि सन्निवेशितानि। नित्यनाथो न वङ्गदेशवासी, ग्रन्थकृत् परं पश्चिमदेशज इत्यनुमीयते।

योगचिन्तामणिः—श्रीहर्षसूरिविरचितः। अत्र सिद्धाः चिकित्सोपयोगिनो बहवो योगा वर्त्तन्ते। तस्य समयः खृः एकादशो द्वादशो वा शताब्दौ। रा.तर.।

योगतरङ्गिनी—नाम वैद्यकरसग्रन्थः चिमल्लभट्टविरचितः प्रामाणिकश्च। ग्रन्थोऽयं नास्मदीये देशे तथाद्रियते यथा पश्चिमदेश इति।

वैद्यजीवनम्—हि लोलिम्बराजविरचितं नातिप्राचीनञ्च। तेनात्र काव्य-करणच्छलेन चिकित्सोपकरणौषधानुपानादिकमुपदिष्टम्।

वैद्यवृन्द-वैद्यामृते—नारायणकृतरसग्रन्थौ। वङ्गदेशीयवैद्यैरनयोः सविशेष-समादरो न क्रियते। (समयोऽष्टादशशताब्दौ)।

सारकौमुदी—नाम आनन्दवर्म्मकृतार्वाचीनवैद्यकसंग्रहः, न्यूनाधिकसार्द्ध-शतवर्षाभ्यन्तरे विरचितः। अत्र मूढानां सुखबोधार्थमौषधादीनि वङ्गभाषया पद्यौक्तानि। अतः स्वल्पबुद्धीनामियं व्यवहाराय परमोपयोगिनी जाता।

भैषज्यरत्नावली—शताधिकवर्षपूर्व्वं गोविन्ददाससेनेन सङ्कलिता। अर्व्वा-चीनोऽयं रसग्रन्थोऽस्मदीये देशे कैश्चिदेव वैद्यैः व्यवह्रियते।

नाड़ीप्रकाशो—नाड़ीविज्ञानग्रन्थः शङ्कृगोत्रजानन्दसेनवंशजेन शङ्करसेनेन विरचितः। वैद्यविनोदो रसशङ्करस्य तेनैव प्रणीतौ।

रसेन्द्रचिन्तामणिः—राधाविनोदकाव्यकृद्-रामचन्द्रकविकृतो रसग्रन्थः। ग्रन्थोऽयं सर्व्वरसग्रन्थेषु प्राचीन इति लोके गीयते। अस्मिन् रसग्रन्थे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसजारणादिकं सविस्तरं वर्णितम्। रसपारिजातोऽपि रामचन्द्ररचितः। अन्योऽपि रसेन्द्रचिन्तामणिः ढुण्ढुकनाथविरचितो वर्त्तते। परं नास्माभिर्दृष्टः।

अमरकोषोऽमरसिंहविरचितः। अमरसिंहोऽमरदेवो वा विक्रमादित्यस्य समये प्रादुबभूवेति निश्चय एव। परं विक्रमादित्यानां त्रयाणां कस्य समये जात इत्यत्र नानामतं दृश्यते। उइल्फोर्डसाहबमते नव विक्रमादित्याः। सर्व्वेऽपि ते शालिवाहनादिभिर्युद्धमकुर्व्वन्। (Dr. K. M. B. विद्याकल्पद्रुमे) परमाधुनिकैतिहासिकरहस्यानुसन्धित्सुभिः कारणप्रदर्शनपुरःसरं कदाचिदसौ (खृः पूः ५६) प्रथमविक्रमादित्यनरपतेः सभायां नवरत्नेषु* एकतमत्वेन, कदाचित् भोजप्रबन्धं समालोच्य (A.D. ६६५—७०८ Dr. Mitra and A.D. ५७८ Prof. Wilson) धारानगराधिपतेः द्वितीयस्य वृद्धभोजस्य सभायां तथाविधरत्नेषु अन्यतमत्वेन चोपस्थाप्यते। परमेषु कल्पत्रयेषु कः कल्पो मुख्य इति विनिश्चेतुं न शक्यते। अस्माकन्तु संवत्प्रवर्त्तयिता विक्रमादित्यः A D. ५६ अब्दे एवासीदिति विश्वासः। अमरसिंहो लोके बौद्धमतावलम्बीति सुप्रसिद्धः। तदीयः कोषः प्राचीनरीत्या छन्दोबद्धः सर्व्वकोषश्रेष्ठः परमोपादेयतया जगति सर्व्वत्रैव समादृतः। स कोषमिमं स्वर्गादिकतिपयैर्वर्गैर्विभज्य वर्गमध्ये चान्तरान्तरा वर्णानुक्रमरीत्या विरचितवान्।

अमरकोषस्य प्रचलितटीकाकृतां मध्ये—

मथुरेशः प्राचीनः शकस्य नरपतेः षष्ठशताब्द्यां प्रादुरासीत्। असौ कस्यचित् मुसलमानवीरस्य साहाय्येन सदैव शास्त्रानुशीलनमकरोत् इति उइल्सनसाहेबमतम्। शब्दरत्नावलीकारश्च स एव।

क्षीरस्वामी काश्मीरपतिललितादित्यस्य राजत्वसमये प्रादुरासीत्। जयापीड़ो नाम कश्चिन्नृपतिः अस्मादेव शब्दविद्यामधिगत्य अन्ते ललितादित्यपण्डित इति प्रसिद्धिमगात्। (खृः ७०५—७३१) रा.तर.४त.।

रायमुकुटः (१४३० खृः अब्दे) प्रादुरासीत्। रा.तर.।

गौराङ्गमल्लिकात्मजो भरतमल्लिको नातिप्राचीनो ग्रन्थकारष्टीकाकारश्च।

---

* धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य॥
काव्यसंग्रहः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असौ वर्द्धमानप्रदेशस्य पाटलिपल्लीग्रामे सुकुलीनवैद्यवंशे न्यूनाधिकसार्द्ध-शतवर्षपूर्व्वं जातः। कविरयं सुप्रसिद्धः ज्याोतिष्कः, कारकोल्लासस्य रचयिता, रघुवंशभट्टिकाव्यकुमारसम्भवादीनां टीकाकारश्च। तत्कृतयामरकोषस्य टीकयैव तस्य महती कीर्त्तिर्भारते चिरं स्थास्यति।

धन्वन्तरिनिघण्टुरपि अमरसिंहविरचितामरकोषसमसामयिक एवेति प्रमाणतो लभ्यते। असौ तु षट्शतवर्षपूर्व्वतनः इति मधुसूदनगुप्तस्य मतमुदयचन्द्रेण स्वग्रन्थे समुद्धृतम्। तत्प्रणेतो निघण्टुः प्रसिद्धः प्रामाणिकश्च, काश्मीरप्रदेशे च समधिकं समालोचितो भवति।

हेमचन्द्राभिधानमभिधानचिन्तामणिनाम्ना ख्यातं विशिष्टरीत्या भागद्वयेन विभज्य हेमचन्द्राचार्य्येण विरचितम्। तयोः प्रथमः स्वर्गादिभिः षड्भिर्भागैर्विभक्तः, शब्दानां श्रेणीविभागश्च अन्त्यक्रमेण कृतः। द्वितीयश्च नानार्थघटितः। परं हेमचन्द्रोऽवतरणिकायां स्वाभिधानस्य केवलं प्रथमभागस्य शब्दरचनाप्रणालीमुपवर्ण्य द्वितीयस्य न किमप्युक्तवान्। तथा प्रथमस्येव द्वितीयस्य टीकापि न दृश्यते। अतो द्वितीयस्य हेमचन्द्रकृतित्वमाशङ्कमानैर्विद्वद्भिर्महेश्वरकृतस्य नानार्थवर्गस्य सन्निवेशनं तर्क्यते।

हेमचन्द्रः हेमाचार्य्ययतिर्वा प्राचीनजैनग्रन्थलेखको जैनधर्म्मावलम्बी चासीत्। असौ संवत्नयोदशशताब्द्यां (खृः द्वादशशताब्द्यां) पाटलिपुत्रनगरे स्वजीवनस्यार्द्धिमं भागं नानाशास्त्ररचनया यापयित्वा अन्तिमे वयसि गुजराठदेशं गत्वा तत्र जैनधर्म्मससालोचनया परां प्रतिष्ठामलभत, तत्रत्यञ्च सप्रकृतिं नरपतिं जैनधर्म्मं ग्राहयामास। श्रूयते च पार्श्वनाथमतावलम्बी हेमाचार्य्ययतिः अस्मिन्नेव समये रजःपूतनरपतिं गुणभरपालमपि जैनधर्म्मे दीक्षितवान्। एवमपि प्रसिद्धिरस्ति यथासौ हलायुधगुरुः लक्ष्मणसेनस्य सभायामासीत्। (संवत् १२३०) इति उद्दलसनसाहवस्य उद्दङ्कनम्।

शब्दमाला—च रामेश्वरशर्म्मकृतातिसंक्षिप्ताभिधानसंग्रहः अमरकोषस्य परिशिष्टभूता वङ्गभाषायां व्याख्याता च। इयं मेदिनीकरस्य पूर्व्वतन इति उद्दलसन्साहवमतम्।

नाममाला—धनञ्जयकृता। तत्र श्रेणीविभागस्यासङ्गावात् प्राचीनैवेयमित्यनुमीयते। धनञ्जयश्च दशमशताब्द्यां वर्त्तमान आसीत् इति बडुयामतम्।

भूरिप्रयोगो—दामोदरदत्तपुत्रेण सुप्रसिद्धसुपद्मव्याकरणकारेण पद्मनाभ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्तेन विरचितो भागत्रयेन विभक्तश्च। पद्मनाभो मेदिनीकरस्याधस्तनः आसीदिति स्वयमेव स्वग्रन्थे मेदिन्याः उल्लेखात् प्रमाणीकृतम्।

शब्दरत्नावली—मुग्धखानाभिधेयस्य कस्यचित् मुग्धलमानवीरस्याश्रयेण अमरटीकाकृन्मथुरेशेनामरकोषस्यैव प्रणाल्या विरचिता। तत्र शब्दानां भिन्न रूपाः पाठाः निर्णीताः।

जटाधरकोषः—चट्टग्रामवासिजटाधरेण विरचितः। जटाधरश्च अमर-कोषादर्शेन स्वनाम्ना कोषं प्रणिनाय। अयं नातिप्राचीन इत्यनुमीयते।

अभिधानरत्नमाला—हलायुधप्रणीता। इयं संक्षिप्ता स्वर्गभूनरकवारि-मिश्राख्यैः पञ्चभिर्भागैर्विभक्ता। हलायुधो भट्टभास्करशिष्यः केरलदेशीयो ब्राह्मणोऽतिप्राचीनो बौद्धधर्मावलम्बी च खृः द्वादशशताब्द्यां वर्त्तमान आसीत्। तस्य चाभिधाने उद्भिज्जद्रव्यखनिजद्रव्याणां मनोरमा सूची वङ्गभाषया व्याख्याता। एवञ्च श्रूयते यथा हलायुधो लक्ष्मणसेनस्य सभापण्डित आसीदिति।

राजनिघण्टुः—अभिधानचूड़ामण्यपरनामधेयो वैद्यपतिनरहरिपण्डितेन वैद्यकसंहितामरविश्वहलायुध-धन्वन्तरिनिघण्टु-मदनपालनिघण्टुभोजराजशेष-राजादिकृतग्रन्थेभ्यः उपादानानि समाकलय्य आनूपभूमिगुड़ूच्यादिभिस्त्रयो-विंशतिवर्गैः संविभज्य महाराष्ट्रकर्णाटादिभाषाभिर्द्रव्यादीनि व्याख्याय च रचितः।

"धन्वन्तरीयमदनादिहलायुधादीन्
विश्वप्रकाश्यमरकोषसशेषराजान्।
आलोक्य लोकविदितांश्च विचिन्त्य शब्दान्
द्रव्याभिधानगणसंग्रह एष सृष्टः॥"

असौ कस्माच्चित् कश्मीरपरिवाराज्जात इति स्वयमेव स्वग्रन्थे स्वीचकार। मतान्तरे त्वसौ दाक्षिणात्यनिवसतिर्ब्राह्मण इत्यभिधीयते। अत्र तेन शारीर-रोगनामौषधद्रव्यद्रव्यगुणादिकं नानायुर्वेदीयाशेषविषयान् सविस्तरमुपवर्ण्य चिकित्सकानां महानुपकारः साधितः। असौ नरहरिपण्डितो मदनपालादी-नामधस्तनो, मदनपालादयश्च तदूर्द्धतना आसन्। तत्रादुर्भावसमयः (संवत् १७२५) सार्द्धद्विशतवर्षपूर्व्वं वासीत्। इति उदयचन्द्रः। नघण्टुरयं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्करणानन्तरमस्मदीये देशे समादरेण परिगृहीतः सर्व्वत्रैवानुशीलितो भवति।

भावप्रकाशो—लटकमिश्रात्मजभावमिश्रविरचितः। अयमतिविस्तृतः सरुग्विनिश्चयचिकित्सितश्चिकित्सासङ्ग्रहो नानाप्राचीनसंहितासङ्ग्रह-कोष-निघण्टु-समालोचनेन स्वकल्पनया च रोगलक्षणचिकित्सितपथ्यापथ्यद्रव्यद्रव्यगुणरस-वीर्य्यविपाकजारणमारणशोधनादीनि समाकलय्य लिखितः। असौ भावमिश्रो वैदेशिकपर्टुगीजदेशीयैरानीतमुपदंशरोगस्यैव प्रकारान्तरलक्षणसम्पन्नं फरङ्ग-रोगं स्वग्रन्थे सचिकित्सितं वर्णितवान्। अभिनवानि च तोपचीनीसोहारा-दीनि कतिचित् वैदेशिकद्रव्याणि सगुणानि तत्र सन्निवेशितानि। तेषु उपदंशहरं तोपचीनीमूलं चीनदेशीयैर्भारतवर्षस्य गोयाप्रदेशे शतचयाधिक-वर्षादूर्द्ध्वं खृः (१५३५) समानीतम्। इति ओयाइजसावस्य मतम्। सुतरा-मेव भावमिश्रस्याविर्भावस्तत्काले तदनन्तरकाले वासीत्। भावप्रकाशसङ्ग्रहः काशीप्रदेशे वङ्गदेशे च चिकित्सकैरधिकं पठ्यते।

माधवनिदानं—माधवकरविरचितम्। अत्र माधवेन विविधप्राचीन-तन्त्रवैद्यकसंहितादिभ्यः क्वचिदादर्शोद्धरणेन क्वचिच्च स्वरचितभाषया सारसंग्रह-हेण पर्य्यायानुक्रमतो विविधरोगनिदानलक्षणादिकं लिपिषु सन्निबध्य भार-तस्य चिकित्साशास्त्राध्यायिनां छात्राणां महानुपकारः साधितः। इदं माधवाचार्य्यविरचितमिति केषाञ्चित् मतम्। तन्न साधु, माधवकरः कर इत्युपाधिकोऽतिपुराकालीनो वैद्यजातीयो ग्रन्थकार आसीदिति प्रसिद्धिः। अन्यच्च चक्रपाणिदत्तो माधवीयनिदानस्य रोगानुक्रमणीमनुसृत्य स्वसङ्ग्रहं रचितवानित्यसौ ग्रन्थकारश्चक्रपाणिदत्तस्योर्द्ध्वंतन आसीदिति प्रतीयते। तथासौ चक्रपाणिः द्वादशशताब्दां गौड़राजस्य पाकशालाध्यक्षत्वं स्वसंग्रहे लिखित-वान्। अपिच माधवः स्वग्रन्थोपसंहारे—यो गोविन्दः वृद्धभोजस्य पात-ञ्जलवृत्तिकारस्य समये (सप्तमशताब्दां) वर्त्तमान आसीत् तत्कृतिसूक्ति-कर्णामृतनामग्रन्थस्य मुक्तावलोकारं गोविन्दाधस्तनं गुरुमङ्गीकृत्यात्मानं तत् समसामयिकं तदधस्तनं वा प्रतिपादितवान्। तस्य निदानमष्टमशताब्दा-मारवीयभाषगानुवादितमारवीयैश्चिकित्सकैरधीतमिति पुरातत्त्वविद उद्ल्-सनसाहबस्य मतम्।

व्याख्यामधुकोषो—(माधवीयनिदानस्य टीका) वैद्यवरश्रीविजयरक्षितेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकण्ठदत्तेन च विरचितः। तत्र द्वयोरेव नामदर्शनात् द्वयोरेव टीकाकर्त्तृत्वमनुमीयते। श्रीकण्ठः द्वन्द्वकृतसिद्धयोगस्यापि टीकाकारः। कुसुमावली नाम्ना च सा प्रसिद्धा।

अर्कप्रकाशो—नाम चिकित्सासंग्रहो रावणेन प्रणीतः। रावणेनात्राभिनवा रोगाणां चिकित्साप्रणाली केवलेनैवार्केण प्रवर्त्तिता।

उणादिकोषः—सिद्धान्तकौमुदीप्रभृतीनामध्यायविशेषः। यत्र शब्दाः 'उण्' इत्यादिप्रत्ययप्रयोगेन सिध्यन्ति।

चिकित्साक्रमकल्पवल्ली—काशीनाथद्विवेदिविरचिता; अयं वैद्यकचिकित्सासंग्रहः पाश्चात्यप्रदेशे प्रचलति।

जयदत्तसूरिर्नातिप्राचीनोऽश्ववैद्यकप्रणेता। जयदत्तः शालिहोत्र-नकुलभोजराजादिकृताश्वशास्त्रेभ्योऽश्वानां शुभाशुभलक्षणं सम्यग्विनिश्चितं चिकित्सितञ्च समाकलय्य स्वग्रन्थं रचितवान्। अस्य प्रादुर्भावसमयनिरूपणमतीव दुरूहमिति न चेष्टा कृता। ग्रन्थोऽयं वाङ्गालादेशस्य आसियाटिकसोसाइटीसभानुमत्या तत्कृतव्ययेन च संक्षिप्तटीकासमेतो मया संस्कृतः।

शार्ङ्गधरसंग्रहः—सुप्रसिद्धशार्ङ्गधरपद्धतिकारेण शार्ङ्गधरेण विरचितः। ग्रन्थोऽयं नातिसङ्क्षिप्तः नातिविस्तरश्च, बहुषु पाश्चात्यप्रदेशेषु प्रचलितः। अयञ्च ग्रन्थकारः विश्वप्रकाशकृन्महेश्वरादधस्तन आसीत्। (Burnel's catalogue.)

रसेन्द्रसारसंग्रहः—प्रामाणिकरसग्रन्थः गोपालभट्टेन विरचितः। अत्र रसजारणमारणादिपुरःसरं रोगाणामशेषविधरसघटितयोगाः सङ्कलिताः। एतद्ग्रन्थकारः त्रयोदशशताब्द्यां वर्त्तमान आसीत्। (Aufrecht's catalouge.)

डल्वणाचार्य्यो निबन्धसंग्रहाख्यायाः सुश्रुतटीकाया रचयिता। एष श्रीभादालकदेशस्य विश्रुतमथुरानगरीसन्निहिते अङ्कोलानाम्नि वैद्यस्थाने सौरवंशीयद्विजान्वये जातः। असौ गोविन्दपालस्य प्रपौत्रः जयपालस्य पौत्रः नृपालभूपतेः प्रियतमस्य श्रीभरतपालस्य च पुत्र आसीत्। तेन जेज्जटगयदासभास्करश्रीमाधवब्रह्मदेवादीनां टीकापञ्जिकाटिप्पनीः उपजीव्य निबन्धसंग्रहो रचित इति स्वयमेव स्वकृतटीकायामभिहितम्।

परिभाषाप्रदीपः—श्रीकृष्णवल्लभसेनपुत्रश्रीगोविन्ददासेनविरचितः।

प्रयोगामृतम्—अतिसुविस्तृतो वैद्यकचिकित्साग्रन्थो नृसिंहधन्वन्तरिशिष्य-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्यचिन्तामणिकृतः। अयं ग्रन्थकारः औखण्डसमाजान्तर्गते नोरोलग्रामे शताधिकवर्षपूर्वं जातः। अस्मिन् समालोचिते चिकित्सकानां नानायोगादिषु सम्यगधिकारो जायते।

शब्दचन्द्रिका—नाम द्रव्यगुणादिसंग्रहः चक्रपाणिदत्तेन प्रणीतः प्रसिद्धश्च। इयमुड्डिज्ञखनिजप्राणिपथ्यापथ्यादीनां कार्य्योपयोगितया समाकलनात् सर्व्वत्र समादरणीया। अत्र द्रव्यनामानि वङ्गभाषया व्याख्यातानि।

भोजराजशेषराजमदनपाला दशमशताब्द्यां वर्त्तमाना आसन् इति प्रमाणतो लभ्यते। एषु आद्यद्वयस्य ग्रन्थावस्माभिर्न दृष्टौ। मदनपालनिघण्टुस्तु सर्व्वत्र प्रसिद्धो विस्तृतः प्रशस्तश्च। निघण्टुरयं मदनपालस्य नरपतेर्विनोदनार्थं केनापि विरचितः। अधुनोत्तरपश्चिमप्रदेशे क्षात्रैरधिकतरमालोच्यते। अत्र सनामद्रव्यगुणाः सविस्तरं वर्णिताः। द्रव्यनामानि च हिन्दीभाषया कथितानि।

विश्वप्रकाशो—नाम प्राचीनतरकोषो यदा कान्यकुब्जे विद्योत्साहिताया अतीव समादरस्तदा महेश्वरेण खृः द्वादशशताब्द्यां सङ्कलितः (शक १०३३) (A.D. १११९) (११५० वङ्गया)। महेश्वरो गाधिपुरवास्तव्यस्य साहसाङ्कनरपतेः चिकित्साधिकृतस्य श्रीकृष्णस्यान्वये जातः। इति पुरातत्त्वविदुडुल् मनसाहवमतम्।

अजयपालकृतसंग्रहः—संक्षिप्तः परं बहुप्रमाणभूयिष्ठः। अजयपालो मेदिनीकरादधस्तनो जैनश्चासीत्। उडुल्सनसाहवमतम्।

धरणिकोषः—कान्यकुब्जदेशीयेन द्विजधरणिदासेन कृतः। स मल्लिनाथादूर्द्ध्वतन आसीत्। उडुल्सनसाहवमतम्।

त्रिकाण्डशेषः—परमजैनपुरुषोत्तमदेवविरचितः अध्यायत्रयात्मकश्च। ग्रन्थोऽयं अमरादिकोषपरिशिष्टमात्र एवाप्रसिद्धशब्दैः परिपूर्णः।

हारावल्यपि—संक्षिप्ताप्रसिद्धासाधारणशब्दैः ग्रथिता भागद्वयेन विभक्ता च। तयोः प्रथमो भागः पर्य्यायसंग्रहः। द्वितीयश्च नानार्थसंग्रहः (समयः नवमो दशमो वा शताब्दौ) इति उडुल्सनसाहवमतम्।

मेदिनीकोषः—प्राणकरसुतमेदिनीकरप्रणीतः अभिधानरत्नमालेत्यपरनाम्ना लोके विदितः। मेदिनीकरो महेश्वरादधस्तनः चतुर्दशशताब्द्या अन्ते महेश्वररायमुकुटयोर्मध्यवर्त्तिसमये (A.D. IIII—1430) प्रादुरासीत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोषोऽयमन्यादिक्रमेण सुलभगम्यसुप्रशस्तसुष्ठुरीत्या विरचितः। कर इत्यु-पाधिना वैद्यजातीयोऽयं वङ्गदेशवासी चेत्यनुमीयते। उद्दल्सनसाहवमतम्।

रत्नावली—नाम द्रव्याभिधानं वङ्गदेशवासिना रसकौमुदीकारेण माधवेन विरचितम्। तस्यां द्रव्यनामानि वङ्गभाषया कथितानि।

राजवल्लभीयद्रव्यगुणः—राजवल्लभकृतः परं श्रीनारायणदासकविराजेन सविस्तरं व्याख्याय प्रतिसंस्कृतश्च। राजवल्लभश्चवैद्यपरम्परागतश्रुत्या अष्टादश-शताब्द्यां (१७६०) वर्त्तमान आसीत्। ग्रन्थोऽयं परिच्छेदषट्कैः अतीवसुष्ठुश्रेण्या विभक्तः प्रयोजनोपयोगी च। अयं वङ्गदेशे प्रायेणायुर्वेदपाठार्थिभिः पठ्यते।

रत्नमाला—नाम द्रव्याभिधानं केनापि वङ्गीयग्रन्थकाररचितमिति प्रतीयते। तस्यामुङ्खिज्जखनिजद्रव्याणि सपर्य्यायाणि वङ्गभाषया व्याख्यातानि। उद्दल्सनसाहवस्तु बौद्धग्रन्थकाररचितमित्याह।

उपसंहारसमये मदनुकूल-महाराजाधिराजश्रीश्रीश्रीश्रीश्रीविजयनगराधि-पतिमहोदयसमीपे विज्ञप्तिरियम्—

महाराजाधिराज!

सामग्रीषु सुसज्जितास्वपि यथाभीष्टानुकूलासु च
श्रीविष्णोरिव लोकरञ्जनरतेः राजाधिराजस्य ते।
आशास्यो यदि नाघटिष्यत कृपासंयोग एव प्रभोः
सिन्धोरन्तरलेष्यतैव मथनस्याशालता सा चिरम्॥

आशंसमानो देवस्य राजन्वत्तामविच्युताम्।
आयुष्मत्ताञ्च विनयनिवेदनपुरःसरम्।
याचतेऽयं जनो नित्यं कृतज्ञत्वमनुस्मरन्।
देवपादाब्जमूलेषु देहस्यैव विसर्ज्जनम्॥

साधुहृदय-डाक्तार-श्रीमहेन्द्रलालसरकारमहोदयसमीपेऽपि चिरकृतज्ञता-पाशेन बद्धोऽस्मि। अत्र चाभिधाने प्रेसिडेन्सिकलेजे संस्कृताध्यापकेन श्रीयुक्त-नीलमणिन्यायालङ्कारेण मच्छुभाकाङ्क्षिणा महोपकारः साधितः। तथा तत्रैव सहकारिसंस्कृताध्यापकेन श्रीयुक्तहरिश्चन्द्रकविरत्नेन एतस्य मुद्रणे संशोधने च महान् परिश्रमः कृतः। अतस्तयोरुभयोः सकाशे कृतज्ञोऽस्मि इत्यलं पल्लवितेन।

सङ्कलयितुः
श्रीउमेशचन्द्रगुप्तस्य।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयसंस्करणस्य विज्ञापनम्।

इह खलु जगति "कीर्त्तिर्यस्य स जीवतीति" यदुच्यते तत् सर्व्वथा सत्यमेवानुभावयति अस्मान् महानुभवस्य लोकोत्तरविहारिणो विद्यारत्नोपनामकस्योमेशचन्द्रस्य क्लेशबहुला कृतिः वैद्यकशब्दसिन्धुनामकमभिधानम्। अतीतेष्वपि बहुतिथेषु दिवसेषु एतदेवास्माननिशमनुस्मारयति आयुर्व्वेदे कृतविद्यस्य विद्वद्वरस्य तस्य विद्यारत्नस्य विद्यावत्वं गुणगौरवम् पाण्डित्यं ज्ञानगाम्भीर्य्यञ्च। न खल्ववगतमनेन महात्मना यदेकेन एव अवदानेन जगतां कीदृङ्महान् उपकारः कृतः इति मन्ये। पुरा तु अभिधानेन विना आयुर्व्वेदस्य अध्येतृणामध्यापकानामनुरागिणाञ्च आयुःशास्त्रालोचना नितरामसुखकरी आसीत्। इदानीमुमेशचन्द्रेनायुर्व्वेदमनुशीलयतां दुर्गमं वर्त्म प्रसन्नीकृतम्।

ग्रन्थस्यास्य रचनाकाले श्रीमता उमेशचन्द्रेण कलिकाता-संस्कृतविद्यामन्दिरस्थ पुस्तकालयस्याध्यक्षपदमलङ्कृतमासीत्। तत्रस्थ एवायमायुर्व्वेदाध्ययनकाले आवाल्यमनुभूतस्याभावस्य पूरणार्थमभिधानमेकं रचयितुकामः पुस्तकालयस्थान् बहून् आयुर्व्वेदग्रन्थानवलोक्य बहुपरिश्रमेण पाण्डुलिपिं सङ्कलय्य विजयनगराधिपतेरर्थानुकूल्येन मुद्रितवान्। अस्मद्देशीयायुर्व्वेदव्यवसायिनां भाग्यवशाद् वा नियतेरवश्याभावित्वात् वा लोकान्तरमुपागते उमेशचन्द्रे अभिधानस्यास्य मुद्रणाशा व्यलुपत्। इदानीं पूर्व्वमुद्रितपुस्तकानामभावात् सर्व्वेषामेवायुर्व्वेदाध्यायिनां महान्तमसुयोगं मन्यमानैरपि च जीवति वङ्गदेशीय-चिकित्सकसम्प्रदाये वङ्गीयजनकीर्त्तिग्रन्थरत्नमिदं बहुमूल्यं विलुप्तं चेत् तर्हि चिकित्सकसम्प्रदायानां वङ्गदेशवासिनाञ्च तत् कलङ्करमिति चिन्तयद्भिरस्माभिरेव तत्पुत्राणां सकाशात् ग्रन्थस्यास्य वैद्यकशब्दसिन्धुनाम्नः स्वत्वं मुद्रणार्थं क्रीतम्।

ततश्चैनं संशोध्य सर्व्वाङ्गसम्पूर्णं कृत्वा पुनर्मुद्रणार्थं यत्ने कृतेऽपि बहुसम्बत्सरा व्यतीताः। कार्य्यबहुलतया अनवकाशत्वात् अभिधानसंस्करणस्य बहुग्रन्थसाध्यत्वात् शरीरस्यापि व्याधिमन्दिरत्वात् सत्वरं प्रकाशयितुं नाशक्यत।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमसंस्करणे ग्रन्थकृता द्रव्याणां पर्य्यायाः न प्रदत्ताः। किन्तु चिकित्साशास्त्रे पर्य्यायपरिचयं विना द्रव्याणां सम्यक् ज्ञानं न भवतीत्यऽस्माभिरस्मिन् संस्करणे अतीव प्रयोजनीयतया सन्निवेशिताः पर्य्यायाः। अपिच प्रमादादप्रदत्तं शब्दार्थादिकमपि सप्रमाणमस्मिन् संयोजितम्। सर्व्वेषामिव वैद्यकशब्दरत्नाणां लाभावबोधार्थं ग्रन्थान्तरस्य साहाय्यमनपेक्षैव यथायुर्व्वेदव्यवसायिनः कुशलिनोविद्यार्थिनश्च वैद्यकशब्दसिन्धुमेवाश्रित्य वर्त्तेरन् तथैनं चिकीर्षुः सर्व्वथा अचेष्टे। साम्प्रतमाशास्महे मनीषिणामयं हृदयहारी ममापि अर्थश्रमसाफल्यकारी भवेदित्यलं संस्कर्त्तुः प्रपञ्चेन।

उपसंहारकाले सकृतज्ञमेतत् अवश्यं स्वीकर्त्तव्यं—मदीयप्रियसुहृदा सर्व्वशास्त्रार्थतत्त्वज्ञेन सुचिकित्सकेन श्रीमता हरिपदसेनशास्त्रिणा पुस्तकस्यास्य संस्करण-संशोधनविषये मे यथोचितं साहाय्यं कृतमतस्तत्सकाशे चिरकृतज्ञतापाशेन बद्धोऽस्मीति।

कलिकाता
शकाब्दाः १८३५।

सम्पादकस्य—
श्रीनगेन्द्रनाथसेनवैद्यशास्त्रिणः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्यकशब्दसिन्धुः ।

VAIDYAKAS´ABDASINDHU.

अ

अः । पुं । शिवे । विष्णौ । ए. की. ।

अंशः । पुं । भुजशिरसि, स्कन्धे । Shoulder. काँध । अम. । विभागे च । भाग ।

अंशमर्म्म । क्ली । स्कन्धसन्धिस्थमर्म्मणि । स्कन्धमर्म्म । सु.शा.६अ. ।

अंशलः । वि । सांसले । श्लक्ष्ण ।

अंशवान् । पुं । The moonplant or Acid Sarcostema (S. Viminalis.) सोमलतायाम् । सु.चि. २९अ. । See सोमः ।

अंशुः । पुं । तृणायाम् । सूर्य्ये । किरणे च । मे. शङ्किकम् ।

अंशुकम् । क्ली । (The leaf of Laurus cassia.) तेजपत्रे । तेजपात । हिं तज । मं दालचिनि । गुणाः—लघु मधुरं पित्तिलं किञ्चित्तीक्ष्णोष्णं कफवातार्शीहृल्लासारुचिपीनसघ्नञ्च । भा. पू.१भ. । विषघ्नं वस्तिशूलघ्नं मुखमस्तकशोधनञ्च । रा.नि.व.६ । श्लक्ष्णवस्त्रे । मे. कविकम् ।

अंशुकायः । पुं । प्रवालादौ ।

अंशुपर्णिका } स्त्री । शालपर्ण्याम् । शालपाणि ।
अंशुपर्णी } श.र. । See अंशुमती ।

अंशुमती । स्त्री । (Hedysarum gangeticum) शालपर्ण्याम् । शालपाणि, छालानी । हिं सरिवण् । मं सालवण भूँइशेवगा । तें सप्पाकुपीव । उत् शारपणि । गुणाः—कासघ्नी ग्राहिणी कफपित्तघ्नी च । च.द. । रसे तिक्ता गुरुणा वातघ्नी विषमज्वरप्रमेहार्शःशोफसन्तापहरी च । रा. नि.व. ४। गुरुः कृमिज्वरश्वासातिसारघ्नी शीषदीषवयहरा [illegible]यनी च । मद.व.१ । धातुवर्द्धनी । भा.पू.गु. व. । "मेचकं चांशुमत्याः ।" चि.क्र.क.वल्ली ।

अंशुमतीफला । स्त्री । कदलीवृक्षे । कला. गाछ । भा.पू.१भ.फ.व ।

अंशुमत्फला । स्त्री । कदलीवृक्षे । रा. नि.व. ११ See कदली ।

अंशुमान् । पुं । सूर्य्ये । सीमवल्लुगे सीमलतायाम् । सोमलता । See सोमः ।

अंशूदकम् । क्ली । हंसोदके । तच्चाहीरावं रविचन्द्रकिरणजुष्टत्वात् निर्म्मलं शैत्यगुणयुक्तं भौमं जलं शरदि प्रशस्तम् । "शस्तं शरदि नादेयं नीरमंशूदकं परम् । दिवार्ककिरणैर्जुष्टं निशायामिन्दुरश्मिभिः ॥ अरुचमनभिष्यन्दि तत्तुल्यं गगनाम्बूना ॥" सु.सू.४६अ. वारिव. । भा.पू. १भ. । गुणाः —बल्यं रसायनं शीतलं लघुच । मद प्व. । श्रमघ्नं पित्तीषणदाहविषमूर्च्छारक्तमदात्ययेषु हितम् ॥ रा.नि.व.१४ ।

अंसः । पुं, क्ली । स्कन्धे । रा. नि. व.१८ । भुजशिरसि । काँध् । ग्रीवाया उभयपार्श्वस्थे द्वे स्नायु अंसावुच्येते । "ग्रीवासुभयतः स्नायौ ग्रीवाबाहुशिरोऽन्तरे ।" वा.शा.४अ. । नि.१५अ. ।

अंसकूटः । पुं । स्कन्धफलके । वा. शा ४ अ. । कक्षादि । षाँड़ेर झूँटि ।

अंसपारिकः । पुं । महानिम्बवृक्षे । महानिम् । हिं बकाइनि । वै.निघ. ।

अंसफलकम् । क्ली । स्कन्धफलके । प्रशस्त स्कन्ध । भुजे । अंसमर्म्मणि । सु.शा.६अ. ।

अंसशोषः । पुं । तन्नामकवातव्याधिविशेषे । येनांसस्थो वायुः स्कन्धबन्धनभूतकफं विशोष्य तमुत्पादयति । स्कन्धस्थकफधातुशोषक वातरोग । लक्षणम्—"अंसदेशस्थितो वायुः शोषयेदंसबन्धनम् ।" मा.नि. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अंहतिः। स्त्री। रोगे। मे तविकं। पीड़ायाम्। अम.। रा नि.।

अंह्रिः। पुं। पादे। तरुमूले। अम.।

अंह्रिपः। पुं। वृक्षे। हला.।

अंह्रिस्कन्धः। पुं। गुल्फे। पायेर गुल्ले, गुड़मूड़ो। हे.च.।

अकचः। वि। केशशून्ये। यार माथा नेड़ा।

अकरा। स्त्री। आमलकीवृक्षे। आमला गाछ। श.च.। See आमलकी।

अकराकरभः। पुं। अकर्करे। आकर्‌करा। शार्ङ्गः अकारादिचू.६अ.।

अकराभ्रकः। पुं। अकर्करे। आकर्‌करा। वै. निघ.।

अकर्करः } पुं। स्वनामख्याते पण्यद्रव्ये।
अकल्करः } आकर्‌करा। फा. अकर्करहा। प्र. अकल्करा। गुणाः—वीर्य्योष्णः बलकरः कटुः प्रतिश्यायशीथवातघ्नश्च। वै.निघ.

अकर्णः। वि। बधिरे। कालो। हे.च।

अकर्त्तनः। वि। वामने। वाँओन।

अकल्यः। वि। रुग्णे।

अकल्लः। पुं। अकर्करे। आकर्‌करा। अ.टी. सा.। वै.निघ.२भ.वा.व्या.।

अकालकुष्माण्डः। पुं। अकालजकुष्माण्डे। असमये जात कुमड़ा।

अकालजम्। वि। असमयोत्पन्ने। Unseasonable. यथा—"अकालजन्तु विरसं न धान्यं गुणवत् स्मृतम्।" राज.।

अकालभोजनम्। क्ली। अप्राप्ते काले, अतिप्राक्, कालेऽतीते वा, भोजनम्। असमये भोजन। तच्च गुणैरसामर्थ्यकरं शिरःपीड़ाविसूचिकादिव्याधिजनकम्। यथा "अप्राप्तकाले भुञ्जानो ह्यसमर्थतनुर्नरः। तांस्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति॥" भा. पू.१भ.।

अकालशयनम्। क्ली। न यथायोग्यकाले शयनम्। असमये शयन। वा.सू.८अ.। गुणाः "अकालशयनात् श्लेष्मा प्रतिश्यायः प्रपीनसः। चयः शीफः शिरोऽर्त्तिश्च जायते चाग्निमन्दता॥" हा. अवि: १ स्थाने २३ अ.।

अकुप्यम्। क्ली। स्वर्णे। रौप्ये। हेला.।

अकुलः। वि। निरस्थिद्रव्ये। बीजशून्ये। च. चि.१अ.। लम्बकर्णजटाहीनमध्यमाग्रे। यथा "लम्बकर्णोऽजटश्चैव अकुलः परिकीर्त्तितः॥" जयद. ६अ.।

अकूटः। पुं। फलवृक्षविशेषे। आगड़ फल इति लोके। रत्ना.।

अकूपारः। पुं। कच्छपे। विका.।

अक्षताख्ययूषः। पुं। लवणशैहिकट्वादिपदार्थवर्जित-यूषे। स लघुरिति वै.निघ.।

अकोटः। पुं। (Areca catechu), (Areca-nut, The betel-nut tree. गुवाकवृक्षे। शुपारिगाछ। हिं उत् गुया, सुपारी छोटी। मं पीकल। विका। फलगुणाः—गुरु हिमं रूक्षं कषायं कफपित्तहरं मोहनं दीपनं रुच्यं मुखवैरस्यहरञ्च। आर्द्रं तत्—गुरु अभिष्यन्दि अग्निघ्नं दृष्टिघ्नञ्च। क्षिन्नं तत्—विदोषघ्नम्। पुष्पं—कषायं मधुरं गुरु च। मद। गुवाकशिरः—भेदनं मदकरञ्च। च.द.। स्वादु तिक्तं कषायं बल्यं शुक्रलं मूत्ररोगघ्नञ्च। राज.। निर्यासः—हिमी गुरुः विपाके उष्णः वातघ्नः पित्तकरः क्षारः अम्लः मोहनश्च। ता.। हिमी गुरुः वातघ्नः कृमिहृत्पित्तलश्चेति। रा.नि.व.११। पूगं सङ्कोचकं कृमिघ्नञ्च। आमं तत्—कषायं मुखकण्ठशोधनं सरम् उदराध्मानहरं श्लेष्मपित्तरक्तामशमनञ्च। शुष्कं पूगं—कण्ठशोधनं रेचनं पाचनं रुचिकरञ्च। पर्णेन विना खादितं—माण्डुवातशीषादिरोगजनकं भवति। रा, नि.व. ११। स एव पूगस्याष्टभेदानङ्गीकरोति—शैली-तैल्वण-गौल्य-घोण्टा-चेउल-वल्लि-गुल-चन्द्रापुरीय-चौल्यइति। तेषु शैली—मधुरा रुच्या कटुकषायाम्ला। तैल्वणं—मधुरं लघु दीपनं रसालञ्च। गौल्यं—कटु कषायं पाचनं द्रावकं लघु च। घोण्टा—कटु-कषायोष्णा दीपनी च। चेउल-कोंकणे प्रसिद्धं—सुगन्धि दीपनं [illegible] नि. रसाढ्यञ्च। वल्लिगुलमपि कोंकणाधिकं जले विदोषहरं ग्राम्यं दीपनञ्च। चन्द्रापुरः। भा. कटु कषायं रुच्यं दीपनं पाचनञ्च। चौलः आन्ध्रदेशीयं कषायमधुरम्।

आक्रान्ता। स्त्री, पुं। (Solanum Indicum) The egg-plant, बृहतीक्षुपे। विरुति, व्याकुड़। हिं बरहण्टा, भटकटायी। मं कं डोरली पांढरी, वनभण्टी। उत्, अक्रान्ति। ते व्राकुरु-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेट्टु। र.मा.। गुणाः—उष्णवीर्य्या पाचनी संग्राहिणी च। चक्र.द.। राज। कटुतिक्तरसा उष्णा लघुः वातघ्नी ज्वरघ्नी अरोचकामकासघ्नी श्वासहृद्रोगहरी च। रा.नि.व.४।

अक्षथितक्षीरम्। क्ली। आमदुग्धे। काँचा दूध। तत् श्लेष्मप्रकोपि गुरु च। वै.निघ.।

अक्षिका। स्त्री। The Indigoplant (Indigofera tinctoria). नीलीवृक्षे। श.च.। नीलगाछ। हिं नीली। मं नीलीचे झाड, कं नीली, तें नल्लपिट्टु गेरिट, पेट्टनीलिचेट्टु। सा द्विधा, नीली महानीली च। गुणाः—कटुतिक्तोष्णा केश्या कासकफामघ्नी लघुः वातविषोदरगुल्मकृमिज्वरघ्नी। रा.नि.व.४। रेचनी मोहभ्रमामवातोदावर्त्तघ्नी च। भा.पू.१भ.। मद.१व.। "महानीली गुणाढ्या स्यात् रङ्गश्रेष्ठा सुवीर्य्यदा। पूर्व्वोक्तनीलिका देश्या सगुणा सर्व्वकर्म्मसु॥" रा.नि.व.४।

अक्षिन्नवर्त्म। क्ली। नेत्ववर्त्मजरोगविशेषे। अत्र रोगे नेत्रयोः पक्ष्माभावेऽपि धौतमधौतं वा नेत्रं पुनः पुनर्लगति। यथा "यस्य धौतान्यधौतानि सम्बध्यन्ते पुनः पुनः। वर्त्मान्यपरिपक्वानि विद्यादक्षिन्नवर्त्म तत्॥" मा.नि.।

अक्षीका। स्त्री। नीलीवृक्षे। नीलगाछ। श.च.।

अखट्टः। पुं। (Buchanania latifolia.) पियालवृक्षे। पेयाशाल, पेयाल। इहार बीजके पेयालबीज ओ चारदाना कहे। हिं चिरौञ्जी। मं चारोली। गुणाः—कफपित्तास्रघ्नः, तत् फलगुणाः—मधुरं स्निग्धं बृंहणं वातपित्तघ्नं गुरु सरं ज्वरदाहतृष्णाहरञ्च। तन्मज्ज—मधुरं हृद्यं बृंह्यं वातपित्तहरं दुर्जरं स्निग्धं विष्टम्भि आमवर्द्धकं पक्वं फलं—बृंह्यं गौल्यं अम्लकं गुरु च ज्वलनोत्तेजनं बृंह्यं पित्तदाहघ्नञ्च। रा.नि.व.११। व्यञ्जनमपित्तकफास्रघ्नस्तत्-फलं मधुरं गुरु। स्निग्धं तत् मरुत्पित्तदाहज्वरतृषापहम्॥ पियालमज्जा मधुरो बृंह्यः पित्तानिलापहः। हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्द्धनः॥" भा. आम्रादि-व.।

अखलः। पुं। उत्तमवैद्ये। वै.निघ.।

अखातम्। क्ली। देवखाते। देवखाद। हे च.का.४। पुष्करिण्याम्। अम.।

अखिलिका। स्त्री। A kind of gourd (Momordica charantia.) क्षुद्रकारवेल्याम्। उच्छे। हिं करैली छोटी। See कारवल्ली।

अखोटः। पुं। आखोटे। आखरोट्।

अगः। पुं। पर्व्वते। हिं पाहाड़। अगौ द्विविधआग्नेयसौम्यभेदेन। तयोर्विन्ध्य आग्नेयः, हिमालयः सौम्यः। आग्नेयगिरिजान्यौषधानि अग्निगुणभूयिष्ठानि, सौम्यगिरिजानि च सोमगुणभूयिष्ठानि। "आग्नेया विन्ध्यशैलाद्याः सौम्यौ हिमगिरिः स्मृतः। अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः॥" भा.। वृक्षे। सर्पे। सूर्य्ये। हे.च.।

अगजः। पुं। तुम्बुरौ। आर्द्रधान्ये। काँचा धने,। हिं आर्द्रधनिया। मद.। विशेषस्तुम्बूरुशब्दे द्रष्टव्यः। वन्द्यायाम्। बान्ध्ड़ा, परगाछा।

अगजम्। क्ली। Bitumen. शिलाजतुनि। र,मा.।

अगदः। पुं। रोगे। A medicament. औषधे। रा.नि.व.२०। वा.उ.३५अ.। दद्रुघ्नवृक्षे। दादगर्दन। त्रि। रोगमुक्ते। रा.नि.व.२०।

अगदम्। क्ली। आरोग्ये। रा.नि.व.२०। वा. उ.३५अ.।

अगदङ्करः(ङ्कारः)। पुं। वैद्ये। रा.नि.व.२०। A physician. चिकित्सक।

अगदतन्त्रम्। क्ली। विषचिकित्साविषयकतन्त्रे। अगदतन्त्रं नाम शल्याद्यष्टविधतन्त्रान्तर्गतवैद्यकाङ्गविशेषः। तच्च सर्पकीटलूताद्यश्चिकमूषिकादिदष्टविषव्यञ्जनार्थं विविधविषसंयोगविषोपहतोपशमनार्थम्। सु.सू.१अ.।

अगदनस्यम्। क्ली। सर्पदष्टादौ नस्यविशेषे। सु.कल्प.।

अगदाञ्जनम्। क्ली। विषमूर्च्छितादौ अञ्जने। सु.कल्प.।

अगन्धिकम्। क्ली। Sochal salt. सौवर्चललवणे। सचल लवण। भा.। मद.। See सौवर्चलम्।

अगरा (री)। स्त्री। A kind of grass, Deotár देवदाल्याम्। देयातांड़ा। अ.टी. भ.। पीतदेवदाल्याम्। भा.। रा.नि.व.३। See देवदाली।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अगरु । क्ली । अगुरुचन्दने । कृष्णागुरुणि । अगरांई चन्दन । वा.उ.२७अ. । See अगुरु ।

अगरुसारः । पुं । कृष्णागुरौ । Aloe wood, the black variety. काल अगुरु ।

अगस्तिः । पुं । (Sesbana grandiflora.) बकनामकपुष्पशाकवृक्षे । मे, तविकं । बकफूलेर गाछ । हिं हतिया, बकुल, बृहत् बौलसरी । ते. लक्षयविसेचेट्टु । मं अगस्ता हदगा । अगस्तिः श्वेतरक्तनीलपीतभेदेन चतुर्विधः । गुणाः—पित्तकफहारित्वं, ग्रीष्मशमनत्वं हिमत्वं योनिगूलव्रणाकुष्ठशीथनाशित्वम् । अन्यच्च—वकोऽतिशिशिरस्तिक्तः मधुरः मदगन्धिः पित्तदाहकफश्वासश्रमघ्नोदीपनश्च । रा.नि.व.१० । अपरच्च "सुनिशिण्वी सरा प्रोक्ता बुद्धिदा रुचिरा लघुः । पाककाले तु मधुरा तिक्ता चैव स्मृतिप्रदा ॥ विदोषशूलकफहृत्पाण्डुरोगविषापनुत् । शीफगुल्महरा प्रोक्ता सा पक्वा रुचपित्तला ॥" पर्णन्तु मुनिवृक्षस्य—कटु तिक्तं गुरु मधुरं किञ्चिदुष्णं कृमिकफकण्डूविषरक्तपित्तघ्नञ्च । वै, निघ । पुष्पगुणाः—शीतलं गौल्यं विदोषघ्नं श्रमघ्नं वलासकासवैवर्ण्यभूतहरं बलघ्नञ्च ॥ रा.नि.व. १० । शीतवीर्य्यं चातुर्थकज्वरहरं नक्तान्ध्यघ्नं तिक्तं कषायं कटु पीनसकफपित्तवातघ्नञ्च । भा.पू.१भ. शा.व. ।

अगस्तिकुसुमः । पुं । वकपुष्पे । बकफूल । विका. ।

अगस्तिद्रुः
अगस्तिद्रुमः } पुं । वकवृक्षे । विका. ।

अगस्त्यः । पुं । वकवृक्षे । विका. ।

अगस्त्यरसः । पुं । उदररोगघ्ने रसे । रसगन्धक-जैपालवीज-लौह-शिलाजतु-ताम्र - हरिद्राणां प्रत्येकं समभागः, एकत्र विकटुभृङ्गराजार्द्रकनिम्बनिर्गुण्डीस्वर्णुलीक्वाथैरेकवारं मर्द्यः । अनुपा. गुड़हरीतकी, कम्पिल्लचूर्ण वा । र.सा.सं. ।

अगस्त्यहरीतकी । स्त्री । कासे हिता । तत्पाकविधिः—दशमूलादिक्वाथद्रव्याणि प्र. २ पयवाः ८श. हरीतकीशतं । हरीतकीयवान् पीडलीकृतान् एकत्र ८०श.जले पक्वा पादशिष्टः क्वाथः कर्त्तव्यः । अथ गुड़ (१२॥श) उक्तक्वाथेन गोलयित्वा कुड़वमितघृततैलभर्जितनिरस्थिहरीतकीसहितं पक्वाच पादशिष्टेऽवतार्य्य शीते पिप्पलीचूर्णं ॥० श. प्रक्षिपेत् । शीतले मधु ॥०श. मिश्रयेत् । मात्रा—हरीतकीद्वयं लेहस्य च ती. २ प्रत्यहं खादेत् । एतदन्तर्गता चीरपुष्पी = दन्तखड़िका । च.द.कास. । मतान्तरे दशमूलद्रव्यं प्र. ४ ती. । दशमूलीं स्वयंगुप्तां शङ्खपुष्पीं शटीं बलाम् । हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् भार्गी-पुष्करमूलञ्च द्विपलांशं यवाढकम् ॥ हरीतकीशतञ्चैकं जलपञ्चाढके पचेत् । यवस्विन्नकषायन्तं पूतं तच्चाभयाशतम् । पचेद्गुड़तुलां दत्त्वा कुड़वञ्च पृथक् घृतात् । तैलात् सर्पिष्पलीचूर्णात् सिद्धशीते च माक्षिकात् । लिह्याद्वै चाभये व्यहं खादेन्नित्यं रसायनात् ॥ इति पाठः । रस.र. । प्रयोगा. हा. अवि: ३।९ अ. ।

अगाधम् । क्ली । जले । हे.च. ४ का.। छिद्रौ । मे ।

अगारधूमः । पुं । गृहधूमे । झूल । वा. उ. ३८ अ. ।

अगिरः । पुं । चित्रकवृक्षे । जटा । See चित्रकः ।

अगुरु । क्ली । (Aquilaria agallocha) A fragrant wood. स्वनामप्रसिद्धसुगन्धिकाष्ठविशेषे । अगुरुचन्दन । हिं अगर । ते हरुगुहचेट्टु । मं शिशवाचे झाड, कृष्णागरू । तत्पर्य्यायाः—वंशिकं, राजार्हं, लौहं, क्रमिजं, क्रिमिजं, जोङ्गकं (अ), अनार्य्यजं (हे), वंशकं (हा), लघुः, पिक्किलं (के), भृङ्गजं, कृष्णं, लौहाख्यं (र), रातकं, वर्णप्रसादनं, अनार्य्यकं, असारं, अग्निकाष्ठं, क्रिमिजग्धं, काष्ठकं । तच्च कृष्ण-दाह-स्वादु-भङ्गल्य-काष्ठागुरु-भेदेन पञ्चविधम् । रा. नि.व.१२ । तेषां विशेषास्तत्तत्पर्य्याये मृग्याः । अस्य सामान्यगुणाः—तिक्तता, उष्णता, कटुता, लेपे रूक्षता, व्रणकफवायुवान्तिमुखरोगनाशित्वं, त्वच्यं, पित्तलं, लघु, तीक्ष्णं, कर्णाक्षिरोगघ्नञ्च । रा—व १२; वा.चि.४अ. । कृष्णागुरु—गुण ; नि. मज्जति च । एतत्स्नेहः—कृष्णागुरुसमगुण ते क.व. ।

अगुरुः । पुं । Aloe wood (or agallocha.) अगुरुवृक्षे । अगुरु गाछ । वा.सू.१५अ. एलादिव. । "अगुरुः शीवासकं कुङ्कुमम्" । कपिलशिंशपायाम् । हिं कपिलवर्ण शीसव । भा.पू १भ. वटादि व. । शिंशपावृक्षे । शिशुगाछ । मे रविकम् ।

अगुरुगन्धम् । क्ली । हिङ्गुनि । हिङ् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अगुरुसारः । पुं । कृष्णागुरुवृक्षे । काल अगुरु । See कृष्णागुरुः । खोहे । रत्ना.एकार्थः ।

अगुरुसारा । स्त्री । शिंशपावृक्षे । भा.

अगुरुशिंशपा । स्त्री । (Dalbergia Sisu.) शिंशपावृक्षे । शिशु । हि शीसव । अ.टी. स्वामी ।

अगूढः । पुं । The castor-oil plant (Ricinus communis.) श्वेतैरण्डे । श्वेत-भेरेन्डा । हिं एरण्ड । वै.निघ. । See एरण्डः ।

अगूढगन्धम् । क्ली । (Ferula assafœtida.) हिङ्गुनि । रा.नि.व.६ । See हिङ्गु । पलाण्डौ । भृगनाभौ । लशुने ।

अगृद्धिः । स्त्री । अभिलाषे । वा. चि. ७ अ. ।

अगोकाः । पुं । A fabulous animal with eight legs. शरभे । पक्षिणि । सिंहे । मे. ।

अग्निः । पुं । The fire of the stomach. जाठराग्नौ । स चतुर्विधः—मन्दतीक्ष्णविषमसमभेदेन । यथा "मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः । कफपित्तानिलाधिक्यात् तत्साम्याज्जाठरोऽनलः ॥ विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तकान् । करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥ समा समाग्नेरशिता माचा सम्यग्विपच्यते । स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ॥ कदाचित् पचते सम्यक् कदाचिच्च न पचते । तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते" ॥ मा.नि. । तल्लक्षणं—"वामपार्श्वाश्रितं नाभेः किञ्चित् सोमस्य मण्डलम् । तन्मध्ये मण्डलं सौम्यं तन्मध्येऽग्निर्व्यवस्थितः । जरायुभावप्रच्छन्नः काचकीशस्थदीपवत् ॥" भा. । अपरञ्च—"सूर्यो दिवि यथा तिष्ठन् तेजोयुक्तैर्गभस्तिभिः । विशोषयति सर्व्वाणि पल्वलानि सरांसि च ॥ तद्वच्छरीरिणां भुक्तं ज्वलनोनाभिमाश्रितः । मयूखैः पचते क्षिप्रं नानाव्यञ्जनसंस्कृतम् । स्थूलकायेषु सत्वेषु यवमात्रः प्रमाणतः । कृमिकीटपतङ्गेषु बालमात्रोऽवतिष्ठते ॥" रस. प्र. । "पाचकं रञ्जकञ्चापि साधकालोचके तथा । भ्राजकञ्चेति पित्तस्य नामानि स्थानभेदतः ॥ अग्न्याशये यकृत्-प्लीह्नोः हृदये लोचनद्वये । त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात् । पाचकं पचते भुक्तमिति ।" निदा. । तेजःपदार्थविशेषे । आगुन । हिं आग । अस्य पर्य्यायाः—वैश्वानरः, वह्निः, वीतिहोत्रः, धनञ्जयः, कृपीटयोनिः, ज्वलनः, जातवेदाः, तनूनपात्, तनूनपाः, वर्हिशुष्मा, वह्निः, शुष्मा, कृष्णवर्त्मा, शुचिष्केशः, उषर्बुधः, आशयाशः, आशयाशः, बृहद्भानुः, कृशानुः, पावकः, अनलः, रोहितार्चिः, वायुसखा, वायुसखः, शिखावान्, शिखी, आशुशुक्षणिः, हिरण्यरेताः, हुतभुक्, हव्यभुक्, दहनः, हव्यवाहनः, सप्तार्चिः, दमुनाः, शुक्रः, चित्रभानुः, विभावसुः, सुचिः, अप्पित्तं, (अटी), वृषाकपिः, जुह्वानः, कपिलः, पिङ्गलः, अरणिः, अगिरः, पाचनः, विश्वप्सुः, छागवाहनः, कृष्णार्चिः, भास्करः, जुहुवारः, उदर्चिः, वसुः, शुष्मः, हिमारातिः, तमीनुत्, सुशिखः, सप्तजिह्वः, अपपरिकः, सर्व्वदेवमुखः (ज) । अग्नितापगुणाः—वातकफस्रंसता-शीतकम्यघ्नः, आमाशयकरः रक्तपित्तकोपनश्च । राज. भा. । चित्रके, चित्तेगांछ । सियो. ग्रहणीचि, विल्वाद्यघृते । वा.सू.१५अ. आरग्वधादि-व. । अग्निजारवृक्षे । रा.नि.व.२३ । पीतवालके । केशरे । पित्ते अन्ने । निम्बुके । रा.नि.व. २१ । स्वर्णे । रा.नि.व. १३ । भल्लातके । रा.नि.व. ११ । रक्तचित्रके । रा.नि.व.६ । च.द. ग्रहणी-चि.कपित्थाष्टके ।

अग्निकः । पुं । An insect of scarlet colour. इन्द्रगोपकीटविशेषे । आषाढ़ेपोका । सु.सि.अ. ; हे.च.४का. । चित्रकवृक्षे । वा.चि.७ अ. । भल्लातकवृक्षे । भा.पू.१भ.ह.व. ।

अग्निकर्णी । स्त्री । वृक्षविशेषे । वै. निघ.२भ. अभिन्यास-ज्वर-चि. ।

अग्निकर्म । क्ली । ग्रन्थ्यादिरोगेषु दग्धशलाकादिभिः प्रयोज्ये दाहकार्य्ये । तच्च चारदाहाङ्गरीयः क्रियासु, न गुणेषु । तच्चतुर्विधं रोगाधिष्ठानभेदात्, यथा—वलयविन्दुविलेखगुप्तशलाकावघर्षणानि । तस्य च कालः शरद्ग्रीष्माभ्यामन्यत्र सर्व्वर्त्तुषु प्रशस्तः । तस्य पात्रं—दुर्व्वलवालवृद्धभीरुप्रभृतिभिन्नाः । तदुपकरणं—पिप्पल्यजशृङ्गीदन्तशरशलाकाजाम्बवौष्ठेतरलौहाः क्षौद्रगुडस्नेहाश्च । सु.सू.१२अ. । वा.चि.१५अ. ।

अग्निकाष्ठम् । क्ली । (Agallochum) अगरौ । "अग्निकाष्ठं करीरे स्यात् । "रा.नि.व.२३ । शमीकाष्ठे । रा.नि.व.१२ ।

अग्निकीलः । पुं । अग्निशिखायाम् । अग्निज्वाला ।

अग्निकुक्कुटः । पुं । जलदग्निदग्धोल्कायाम् । जलन्त लूड़ो ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निकुमारः। पुं। अजीर्णाधिकारोक्तरसायनवटीविशेषे। यथा—"टङ्कणं रसगन्धौ च समभागं त्रयं विषात्। कपर्दः सर्जिका चारी (यवचारः) मागधी विश्वभेषजम्॥ पृथक् पृथक् कर्षमात्रं वसुभागमिहौषधम्। जम्बीरार्द्रैर्दिनं घृष्टो भवेदग्निकुमारकः। विसूचीशूलवातादिवह्निमाद्यौपशान्तये॥" रस.प्र. रसेन्द्रचि। भैष. प्रयोगा.सा. कौ.रसा.सं.। द्वितीयः ग्रहण्यधिकारे। पटुपञ्चकं पञ्चलवणम्। भृङ्गराजादिना प्रत्येकं त्रिधा मर्द्दनम्। र.सा.सं.१११ योगः। तृतीयो ग्रहण्याम्। अजमोदा वनयमानी। र.सा.सं.१२२योगः, भैष.। चतुर्थः सन्निपातज्वरे हितः। पारदः ४तो. गन्ध.४ तो. हंसपादी (गोरखानिया) रसे दिनैकं मर्द्दयित्वा वटीकरणेन २ तो. विषेण सह काचकूप्यां निधाय मुखमवरुध्य बालुकायन्त्रेण १२ प्रहरदीपशिखावदग्नौ पाचयेत्। शीते विषं॥०तो. मरिचचूर्णं॥० तो. मिश्रयेत्। मात्रा रक्तिमिता। भा.म.ख. १ भ.। पञ्चमः अजीर्णे, अत्र भागत्रयमिति एकभागापेक्षया, एवं सर्व्वत्र। कपर्द-शङ्खं दग्ध्वा जम्बीररसे शोधनीयम्। षष्ठी बृहदग्निकुमारः। अत्र रसापेक्षया द्विगुणं गन्धं टङ्कणञ्च देयम्। पटूनि लवणानि। द्वादशैतानीति फलत्रयादिपञ्चपट्वन्तानि द्रव्याणि रसतुल्यानि। र. सा. सं. १३८ योगः, प्रयोगा.। सप्तमोऽप्यपरबृहदग्निकुमारः। अत्र जातीफलं जातीफलजातीकोषौ। वराङ्गं = गुडत्वक्। १३९योगः। अष्टमेऽग्निकुमारे समभागमिति प्रत्येकं भागैकं, वसुभागमिति भागाष्टकम्। र.सा.सं. १५६ योगः। रस.र.उदरे.।

अग्निकुमारलौहम्। क्ली। प्लीहाधिकारे रसः। रामठं = हिङ्गु। तुल्यहिङ्गुटङ्कणसैन्धव-धान्यजीरकयमानीमरीचशुण्ठीलवङ्गैलाविड़ङ्गानां प्रत्येकं १ तो. लौहं सर्व्वसमं रसस्य ४ तो. गन्धकस्य च ४ तो.। अनु. घृतं मधु च। र. सा. सं. ३३४ योग.।

अग्निगर्भः। पुं। अग्निजारवृक्षे। रा.नि.व.६।

अग्निगर्भा। स्त्री। (Acacia suma.) शमीवृक्षे। शाँई गाछ। हिं, मं शमी। गुणाः—तिक्ता, कटुः, कषाया, शीता, लघुः, रेचनी, कफकासश्रमश्वासकुष्ठार्शःकृमिघ्नी। भा.पू.१भ.। See शमी। महाज्योतिष्मतीलतायाम्। रड़ लता-कटकी। रा.नि.।

अग्निघृतम्। क्ली। अग्निमान्द्ये घृतम्। घृतं ४ श. पिप्पल्यादिकल्कद्रव्यं प्रत्येकं ४ तो. दधि ४ श. काञ्जिकं ४ श. शुक्तं ४ श. आर्द्रकरसः ४ श.। एभिः यथाविधि घृतं पचेत्। च.द अग्निमा.चि.। पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली। हिङ्गुचव्याजमोदे च पञ्चैव लवणानि च। द्वौ चारौ हपुषा चैव दद्यादर्द्धपलोन्मितम्। दधिकाञ्जिकशुक्तानि स्नेहभावासमानि च। आर्द्रकस्य रसप्रस्थं घृतप्रस्थं विपाचयेत्॥ इति पाठः।

अग्निचूड़ः। पुं। ताम्रचूड़पक्षिणि। कुकड़ा। दा.हिं कोम्ड़ा, हिं मुर्गा। स द्विविधः वन्यग्राम्यभेदेन। तयोर्ग्राम्यः—वृंहणः, हृष्यः, बल्यः, गुरुः, शुक्रकफकृत्, स्निग्धः, उष्णवीर्य्यः, कषायरसश्च। आरण्यः—स्निग्धः, वृंहणः, श्लेष्मलः, गुरुः, वातपित्तक्षतवस्तिविषमज्वरनाशकश्च। भा। हृद्यं श्लेष्मघ्नं लघु च। रा नि व ११। रूक्षं स्वादु कषायं शीतलञ्च। राज.।

अग्निजः। पुं। अग्निजारवृक्षे। रा. नि. व. ६। भल्लातके। सुवर्णे। मांसधातौ।

अग्निजननी। स्त्री। भैषज्यमेतत् अग्निमान्द्योपशमनम्। रस.चि.। पलैकं मूर्च्छितं सूतं मरिचं हिङ्गु जीरकम्। प्रतिकर्षं वचां शुण्ठीं तत्सर्व्वं मार्कवद्रवैः। दिनं पिष्ट्वा लिहेन्माषं मधुना वह्निदीप्तये। कर्षैकं भक्षयेच्चानु दाड़िमं नागरं गुड़ैः॥ मार्कवद्रवैः भृङ्गराजरसैः। प्रयोगा.।

अग्निजातः। पुं। अग्निजारवृक्षे। रा.नि.व ६।

अग्निजारः। पुं। A plant used in medicine of stimulant properties. पश्चिमसमुद्रप्रसिद्धे खनामख्याते सागरसम्भूतौषधविशेषे। अस्य पर्य्यायाः,—अग्निनिर्य्यासः, अग्निगर्भः, अग्निजः, वड़वाग्निमलः, जरायूः, अर्णवोद्भवः, अग्निजातः, सिन्धुमलः। स चतुर्वर्णः। तेषु लोहितवर्णः श्रेष्ठः। "जाराभो दहनस्पर्शी पिच्छिलः सागरे भवः। जरायुस्तच्चतुर्वर्णः तेषु श्रेष्ठः सलोहितः" इति तल्लक्षणम्। गुणाः—कटुरसः, उष्णवीर्य्यः, लघुपाकः, कफ-वायु-सन्निपात-शूलरोगघ्नः, पित्तकरश्च। "स्यादग्निजारः कटुरुष्णवीर्य्यः गुदामय-वातकफामयघ्नः। पित्तप्रदः सोऽधिकसन्निपातशूलातिशीतामयनाशकश्च॥" रा.नि.व.६।

अग्निजालः। पुं। अग्निजारे। रा.नि.व. ६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नि-जिह्वा (जिह्विका)। स्त्री। (Gloriosa Superba.) लाङ्गलीवृक्षे। रत्ना.। ईषलाङ्गूलिया। हिं करिहारी। मं कलावी। गुणाः—सरा, तिक्ता, कटुका, तुवरा, तीक्ष्णा, उष्णा, पित्तला, सक्षारा, गर्भपातिनी, कुष्ठशोफार्शोव्रणशूलश्लेष्मकृमिजित्, कफवातघ्नी अन्तःशल्यनिष्कासिनी च। भा.पू.१भ.गु.व.।

अग्निज्वाला। स्त्री। Pothos officinalis. गजपिप्पल्याम्। गजपिपुल। सा चविकायाः फलमिति प्राज्ञाः। "चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली।" भा.पू.१भ.। गुणाः—कटुः, उष्णा, वातश्लेष्महृत्, दीपनी, अतीसारश्वासकण्ठामयकृमिघ्नी। लाङ्गलीवृक्षे। अग्निजारि। जलपिप्पल्याम्। काँचड़ा। मं जलपिप्पली। धातकीवृक्षे। रा.नि.व.२३।

अग्नितुण्डीरसः। पुं। अजीर्णाधिकारे रसः। "गुडमूतं विषं गन्धमजमोदा फलत्रिकम्। सर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम्॥ सौवर्चलं विडङ्गानि साधुद्रं चूर्णयेत् तथा। विषदुष्टिसमं सर्व्वं जम्बीराद्रेण मर्दयेत्। मरिचाभां वटीं खादेत् वह्निमान्द्यप्रशान्तये॥" अत्र वह्निशिखकः, अजमोदा यमानी। विषदुष्टिः, महानिम्बः, अस्य त्वक् पत्रं वा सर्व्वसमम्। र.सा.सं. १३३ योगः। द्वितीयः—अमृतवराटकसरिचैः द्विपञ्चनवभागिकैः क्रमशः। वटिका मुद्गसमाना कफपित्ताग्निमान्द्याजीर्णहरा॥ अत्र लिम्बाकरसैः वटिका कार्य्या। प्रयोगा अजीर्णे। अमृतवटीति भैष.।

अग्निदमनकः, अग्निदमनी } पुं, स्त्री। (Medicinal plant stimulant and stomachic, considered as a small species of Cantacárica) क्षुद्रकण्टकवृक्षविशेषे। गणिकारीति प्रसिद्धा गणिरी। दुरालभाभेदे। दुरालभाभेद। मं [illegible]सभेद, अगिदवणा। वै. निघ.। शोला। [illegible]रति केचित्। अस्याः पर्य्यायाः—वह्निदमनी, वह्निकण्टकी, वल्लिकण्टकाढ्या, गुच्छफला, क्षुद्रफला, क्षुद्रकण्टकारी, क्षुद्रदुष्पर्शा, क्षुद्रकण्टकारिका, सर्व्वेन्द्रमाता, दमनी। गुणाः—कटूष्णरूक्षत्वं, रुचिकरत्वं, अग्निदीपकत्वम्। रा.नि.व. ४। वातगुल्मकफघ्नत्वं, प्लीहघ्नत्वञ्च। वै.निघ.।

अग्निदीपनः। पुं। वरुणवृक्षे। वरुणगाछ। भा.पू.१भ.। [वर्द्धक।

अग्निदीपनी। वि। अग्निवर्द्धिकर्य्याम्। अग्नि-

अग्निदीप्ता। स्त्री। महाज्योतिष्मती-लतायाम्। लताफट्‌की। मं थोड़ मालकाङ्गनी। हिं उमिजिनि। रा.नि.व. ३। भा.पू. १भ.।

अग्निधमनः। पुं। कटुनिम्बे। कटुनिम्, घोड़ानिम्। मं कडुनिम्ब। See महानिम्बः।

अग्निनिर्य्यासः। पुं। अग्निजारवृक्षे। रा.नि. व ६। [लीकि।

अग्निपत्री। स्त्री। अग्निवल्याम्। आगिया इति

अग्निपाली (माली)। पुं। चित्रकक्षुपे। चिते। मद.व.।

अग्निप्रस्तरः। पुं। अग्निजनकपाषाणे। चकमकिर पाथर। मं गार।

अग्निफला। स्त्री। महाज्योतिष्मतीलतायाम्। वड़ लताफट्‌की। मं थोड़ मालकांनी। रा.नि. व.३।

अग्निभः। पुं। सुवर्णे। रा. नि व. १३।

अग्निभा। स्त्री। ज्योतिष्मतीलतायाम्। लताफट्‌की। मं क्षुद्रमालकाङ्गनी। हिं कवुइ। See ज्योतिष्मती।

अग्निभु। क्ली। स्वर्णे। जले। रा.नि.व. १३।

अग्निमणिः। पुं। सूर्य्यकान्तमणौ।

अग्निमथनः। पुं। गणिकारिकायाम्। गणिरी वा आग्‌गन्त। रा.नि.व.९। See गणिकारिका, अग्निमन्थः।

अग्निमन्थः। पुं। (Premna Seratifolia) स्वनामख्यातवृक्षे। गणिरी, आग्‌गान्त। हिं इरणि, अगेथ, गणिआरि। उत् अगिवथ। तें, चिरिनेल्लु चेट्टु। अस्य पर्य्यायाः,—गणिकारिका, श्रीपर्णी, कर्णिका, जमा, तेजोमन्थः, हविर्मन्थः, ज्योतिष्कः, पावकः, अरणिः, वह्निमन्थः, मथनः, (र) जयः (भा), गिरिकर्णिका (द्रव्याभि), पावकारणि (शब्दमा), अग्निमथनः, तर्करी, वैजयन्तिक

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरणीकेतुः श्रीपर्णी, कर्णिका, नादेरी, विजया, अनला, नदीजा। अग्निमन्थौ द्विधा क्षुद्रबृहद्भेदेन। तदुभयगुणाः—वीर्य्योष्णः, कटुः, तिक्तः, तुवरः, मधुरः, अग्निदः, श्वयथुपाण्डुकफवातहरः, मलरोधविषामभेदीरोगहरश्च। लघुस्तु लेपने उपनाहे शीते च हितः। वै. निघ.। भा. पू. १भ. गु. व.। च. सू. ४अ. २६ दश। अग्निवधू इति पूर्व्वदेशे, इति उ.। सु. सू. ३६ अ संशोधने। वा उ. २०अ। सर्जवृक्षे।

अग्निमयः। पुं। श्वेतबृहदारके। श्वेत विचतांड़क। मं श्वेत वरधारा। वै निघ.। श्वेतवृक्षायाम्।

अग्निमान्द्यम्। क्ली। मन्दाग्निनामकरोगविशेषे। मन्दाग्नि। तस्य कारणमत्यम्बुपानादिसम्भूतमजीर्णम्। तत्र स्वल्पापि मात्रा न पच्यते, कफजरोगाश्च विविधा जायन्ते। तत्राग्नेः समानतास्थापनं, विषमाग्नौ वायोरुपशमः, तीक्ष्णाग्नौ पित्तस्य, मन्दे च श्लेष्मणः शीघ्रनं प्रतीकारः। च.द.। निदानं यथा—"अत्यम्बुपानाद् विषमाशनाच्च संधारणात् स्वप्नविपर्य्ययाच्च। कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य॥" तत्र अजीर्णं, षट्—कफादाभाजीर्णं, पित्ताद्विदग्धाजीर्णं, वाताच्च विष्टब्धाजीर्णं, रसशेषात् रसशेषाजीर्णम्। दिवारात्रेण जीर्णात् दिनपाकि। षष्ठञ्च प्राकृतमिति। "तत्रामे गुरुतोत्क्लेदः शीथौ गण्डाक्षिकूटगः। उद्गारस्य यथाभुक्तमविदग्धः प्रवर्त्तते॥ विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः। मलवातप्रवृत्तिश्च स्तम्भो मोहाङ्गपीड़नम्॥ विदग्धे भ्रमतृण्मूर्च्छा पित्ताच्च विविधा रुजः। उद्गारस्य सधूमाम्लः स्वेदो दाहश्च जायते॥ रसशेषेऽन्नविद्वेषः हृदयाशुद्धिगौरवे। मूर्च्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः। उपद्रवा भवन्त्येते मरणं वाप्यजीर्णतः॥" मा. नि.। पथ्यं यथा—श्लैष्मिके वमनं पूर्व्वं पैत्तिके मृदु रेचनं। वातिके स्वेदनञ्चाथ यथावस्थं हितञ्च यत्॥ नानाप्रकारो व्यायामो दीपनानि लघूनि च। बहुकालसमुत्पन्नाः सूक्ष्मा लौहितशालयः॥ विलेपी लाजमण्डश्च मण्डो सुङ्गरसः सुरा। एणी वर्हीं शशी लावः क्षुद्रमत्स्याश्च सर्व्वशः॥ शालिच्छाकं वेतायं वास्तूकं बालमूलकं। लशुनं बृहत्कुष्माण्डं नवीनकदलीफलम्॥ शीघ्राञ्जनं पटोलञ्च वार्त्ताकुं नलदञ्च। कर्कोटकं कारवेल्लं वार्हतञ्च बृहार्द्रकम्। प्रसारणीं मेषशृङ्गं चाङ्गेरीं सुनिषण्णकं। जीफलं नागरङ्गं दाड़िमं यवपर्पटाः॥ अम्लवेतसजम्बीरमातुलुङ्गानि साक्षिकं। नवनीतं-घृतं तक्रं सौवीरकतुषोदके॥ धान्याम्लं कटुतैलञ्च रामठं लवणार्द्रकं। यमानी मरिचं मेथी धान्यकं जीरकं दधि॥ ताम्बूलं तप्तसलिलं कटुतिक्तौ रसावपि। मन्दानलेऽप्यजीर्णेऽपि पथ्यमेतन्नृणां भवेत्॥ अपथ्यमाह। विरेचनानि विण्मूत्रं वायुवेगविधारणं। अतिरिक्तञ्चाध्यशनं जागरी विषमाशनम्। रक्तस्रुतिं श्रमोधार्द्धं मद्यं मांसमुपोदिकां। जलपानं पिष्टकञ्च जाम्बवं सर्व्वमालुकम्॥ कूर्च्चिकां मीरटं क्षीरं किलाटञ्च प्रपानकं। तालास्थि-शस्यं तद्वालं स्नेहनं दुष्टवारि च॥ विरुद्धासात्म्यपानान्नं विष्टम्भीनि गुरूणि च। अग्निमान्द्येऽप्यजीर्णे च सर्व्वाणि परिवर्जयेत्॥

अग्निमुखम्। क्ली। कुसुम्भपुष्पे। कुंकुमे।

अग्निमुखः। पुं। चित्रकवृक्षे। चितेगाछ। भल्लातकवृक्षे। भेला गाछ। वि.।

अग्निमुखचूर्णम्। अग्निमान्द्ये हितम्। हिङ्गु. १भ. वचा १ भ. पिप्पली ३ भ. शुण्ठी ४ भ. यमानी ५ भ. हरीतकी ६ भ. चित्रकं ७ भ. कुष्ठं ८ भ.। च.द अग्निमा. धि। प्रयोगा.। अजीर्णे। भैष.। सा.कौ। अन्यत् स्वल्पं वृहच्च उदरे। सा.कौ.रस रा।

अग्निमुखताम्रः। पुं। रसोऽयमम्लपित्ताधिकारे। "गन्धकेनाक्षमात्रेण मततुल्येन निर्म्मिता। कज्जली या तया क्षिप्तं ताम्रपत्रन्तु तक्रमम्॥ अर्ज्जुनत्वग्रसैः सार्द्धं पक्वोदुम्बरपल्लवैः। आच्छाद्य कृष्णलवणैर्मृण्मयेऽपि च भस्मनि। अम्लसूषागतं धातं तस्मिन्नं भक्षयेन्नरः। शाणकं रक्तिकाबद्धा मासमात्रं प्रयोगतः। अम्लपित्तं क्षयं शूलं जरत्पित्तं सुदारुणम्। सप्तरात्रप्रयोगेण शरीरं निर्म्मलं भवेत्॥ रस र.। पञ्चलवणैरिति प्रयोगा.।

अग्निमुखमण्डुरम्। क्ली। शोथाधिकारे। मण्डुरस्य १२प, गोमूत्रस्य १२भ.। प्रक्षेपार्थं—पञ्च कोलं देवदारु मुस्तकं त्रिकटु त्रिफला विड़ङ्गञ्च। प्रत्येकं चूर्णं १प.। मात्रा १तो.। अनु तक्रम्। भष.।

अग्निमुखरसः। पुं। रसोऽयं शूलरोगेऽमनः। अत्र पारदगन्धकौ समौ पारदार्द्धं ताम्रम्, एकत्र शाकपत्ररसैः (सेगुन) तीरसैश्च दिनैकं मर्द्दयित्वा लघुपुटेन पचेत्। अनुपो यमान्यादिचूर्णमुष्णोदकेन पेयम्। रस.र.। द्वितीयोऽपि शूलाधिकारे। अयञ्च रसरत्नाकरधृतेन प्रायः तुल्य एव। अत्र बलिः गन्धः। गगनम् अभ्रे, अर्कः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताम्रं। वेतसाम्लम् अम्लवेतसं। सवरमिति विफलया सहितम्। भुजगवल्ली पर्णं। सलिलं बालकं (बाला)। कनकः धुस्तूरः। पटुगणः पञ्चलवणानि। वज्री स्नुही। सुष्टिः घण्टापाटलायां ऋद्धौ वा। र. सा. सं. २८२ योगः। रसरत्नाकरधृते द्वितीये। मुण्डितिका मुण्डीरी। महाराष्ट्री वृक्षयष्टिः वामूनशंटी।

अग्निमुखलवणम्। क्ली। अग्निमान्द्ये। अच—चित्रकमूलं, विफला, दन्तीमूलं, चित्रन्मूलं कुष्ठम्; एषां प्रत्येकं चूर्णं समं, सर्व्वसमं सैन्धवं एकत्र स्नुहीक्षीरैः संभाव्य तत्काण्डमध्ये दत्त्वा पङ्केनालिप्य मृदावह्नौ क्षिपेत्॥ भैष.।

अग्निमुखलौहः। पुं, क्ली। अर्शसि हितः। चित्रन्मूलादीनां ८ पलम्। वारि द्रोणमितं (३२ शु.)। पादावशिष्टः क्वाथः कर्त्तव्यः। अथ लौहपात्रे २४प. घृतमुष्णीकृत्य तत्र लौहस्य १२ प. दत्त्वा क्वाथेन सह पचेत्। घनीभूते अवतार्य्य विड़ङ्गचूर्णस्य ३प. विकटुचूर्णस्य प्रत्येकं २प. विफलाचूर्णस्य च ५प. शिलाजतोः १प. मधुनः २४प. शर्करायाः २४प. मिश्रयेत्। रसेन्द्र. चि.। चक्रमते चित्रतादीनां प्रत्येकं पलाष्टकं ६४शु. जले पक्त्वा पादशिष्टः क्वाथो विज्ञेयः। अत्र अजशृङ्गी भूम्यामलकी। जटेति पाठे मूलकम्। अथ विड़ङ्गस्य पलत्रयं व्योषस्य च प्रत्येकं षट् तोलकं कल्कीकृत्य तत्, तथा स्वर्णमाक्षिकेण मनःशिलया विकङ्कत[illegible] जारितं लौहचूर्णं १२प. घृतञ्च २४ प. [illegible]न। क्वाथे दत्त्वा एकत्र पाच्यम्। घनीभूते हितः। शर्करायाः मधुनश्च शरावत्रयं मिश्र[illegible]ण्ठ्याः १० पेयम्। च.द. अर्शः चि.। अग्नि, हरीतक्याः ५

अग्निमुखा। स्त्री। भल्लातक्यां एकत्र विमिश्रलाङ्गलिकायाम् (वि) [illegible]।

अग्निमुखी। स्त्री [illegible]. र.।

[illegible]चतुष्कं। रत्ना विजयायाम्। भङ्गा सिद्धिरिति [illegible]कायां, [illegible]न। [रहिते।

अतिरूक्षः। वि। स्नेहशून्ये, कङ्गुकीद्रवादौ।

अतिरेचकः। पुं। काकोल्याम्। काँकला। वै. निघ.।

अतिरोगः। पुं। क्षयरोगे। राजयक्ष्मणि। रा. नि. व. २०।

अतिरोमशः। पुं। वन्यछागे। हारा.।

अतिरोमशा। स्त्री। नीलवृक्षायाम्। छागल वेँटे। प. मु.।

अतिलङ्घितम्। क्ली। अत्युपवासे। तल्लक्षणं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—पर्व्वभेदी ऽङ्गमर्द्दश्च कासः शीर्षी सुखस्य च। क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रीवनेत्रयोः। मनसः सम्भ्रमो-ऽभीक्ष्णं मूर्द्ध वात-स्तमी हृदि। देहाग्निबल-हानिश्च लङ्घनेऽतिकृते भवेत्॥ च. द.।

अतिलम्बी। स्त्री। शताह्वायाम्। भा पू. १भ.।

अतिलोहितगन्धः। पुं। दमनकवृक्षे। दना। प. मु.।

अतिवर्त्तुलः। पुं।(Sida rhombifolia.) कलायविशेषे। गटर, वाटूना, कड़ाई। र. मा.।

अतिविदाही। त्रि। राजसर्षपादौ।

अतिविद्धा। स्त्री। दुष्टव्यधनविशेषे। प्रमाणा-तिरिक्तविद्धायाम्। सु. शा. ८।

अतिविषः(षा)। स्त्री। (A conitum heterophyllum.) स्वनामख्यातौषधिजातीयपञ्चद्रव्ये। आतईच्। हिं आतइष। अतिविषा सर्व्वत्र भाषा। तें अतिवसचेट्टु। तत्पर्य्यायाः,—घुण-वल्लभा (भा.)। शृङ्गिका (शब्दर.) विश्वा विषा प्रति-विषा उपविषा अरुणा शृङ्गी महौषधं (अ) काश्मीरा श्वेता (र) प्रविषा (के) श्वेतकन्दा भृङ्गा भङ्गुरा विरूपा श्यामकन्दा विषरूपा वीरा मात्री श्वेतवचा अमृता। अतिविषा शुक्लकृष्णारुण-भेदात् त्रिधा रसवीर्य्यविपाकेषु तुल्या। गुणाः—कटूष्णा तिक्ता कफपित्तज्वरघ्नी आमातीसारकासघ्नी विषघ्नी कृमिघ्नी च। रा. नि. व. ६। वा. सू. ३५अ. वचादि.। नागरातिविषाभयाः। च. द. ज्व. चि. पिप्पल्याद्यघृते। मदनपालस्तु श्यामकन्दोपविषयो-श्चतुर्भेदानाह श्वेत-रक्त-कृष्ण-पीतत्वात् ते तासां यथापूर्व्वं श्रेष्ठा गुणोत्तमा सर्व्वदोषहरा शीतघ्नी श्लैष्मिक-रोगघ्नी रसायनी च। मद. व. १। अति-विषाकटुकी-प्रभृतीनां गुणगौमयजलेन शुद्धिर्ज्ञातव्या। सा. कौ.।

अतिवीजः। पुं। वव्वूलवृक्षे। बाव्लागाछ। वै. निघ.।

अतिवृहत्फलः। पुं। पनसवृक्षे। काँटाल गाछ। भा. पू. १भ.।

अतिव्यथा। स्त्री। अतिशयितयन्त्रणायाम्। पीड़ायाम्।

अतिव्यायामः। पुं। व्यायामाधिक्ये। अधिक कुस्ति करा। अतिव्यायामी न पथ्यः। अति-व्यायामतः कासो ज्वरश्छर्द्दिः श्रमः क्लमः। तृष्णा क्षय प्रतमकः रक्तपित्तञ्च जायते॥ भा. पू. १भ.।

अतिशुष्कुली। स्त्री। तिलकृतरोटिकायाम्। गुणाः—रूक्षा श्लेष्मपित्तास्रघ्नी गुरुः विष्टम्भिनी न चक्षुष्या च। भा. पू. कृतान्नव.।

अतिशारिवा। स्त्री। अनन्तायाम्। अनन्त-मूल। र. मा.।

अतिशूकः। पुं। यवे। यव। प. मु.।

अतिशूकजः। पुं। गोधूमे। गम। Wheat.

अतिश्रृतक्षीरम्। क्ली। अतिक्वथिते दुग्धे कवलभोज्यवत् सञ्जाते। डेला क्षीर। तद्गुरु-तरम्। स्यान्निर्जलं श्रृतं तद्विचिक्वतुरष्टांशशेषितम्। तथा श्रृततमं सारं गुरु बल्यतमं पयः॥ वा. सू. ५अ. अरु. टी. खरनादः।

अतिशोषः। पुं। क्षयरोगे। See क्षयः।

अतिसक्थ्या। स्त्री। वल्लीयष्टिमधुनि।

अतिसर्जनम्। क्ली। वेधे। मे. नपञ्चकं।

अतिसान्द्रः। पुं। राजमाषे। बाँशी, बरबटी। रत्ना.।

अतिसाम्या। स्त्री। कृष्णमुखगुञ्जावल्लाम्। लतायष्टिसधुनि।

अतिसारः। पुं। पर्पटके। मद. व. १। हिं पापड़ा। उदरामयरोगविशेषे। See अतीसारः।

अतिसारकी। त्रि। अतिसाररोगिणि।

अतिसारघ्नः। पुं। क्षेत्रपर्पटके। क्षेत्पापड़ा। वै. निघ.।

अतिसारघ्नी। स्त्री। अतिविषायाम्। वै. निघ.।

अतिसारभेषजम्। क्ली। लोध्रे। तद्रोगनिवारके औषधे।

अतिसारवारणरसः। पुं। अतिसारे रसः। "दरदं कृतकर्पूरं कुसेन्द्रयवसंयुतम्। सर्व्वाति-सारशमनं खाखसीचीरभावितम्॥" भै.। अत्र कृतकर्पूरं पक्वकर्पूरम्। खाखसीचीरं अहि-फेनम्। र. सा. सं.।

अतिसारस्था। स्त्री। रास्नायाम्। वै. निघ.।

अतिसूक्ष्मः। त्रि। अतिशयसूक्ष्मे।

अतिसेवनम्। क्ली। अधिकमात्रया सेवने।

अतिसौम्या। स्त्री। वल्लीयष्टिमधुके। रा. नि. व. ६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिसौरभः । पुं। आम्रवृक्षे। भा. पू. फ. व.।

अतिस्कन्धा । स्त्री। रक्तकुलत्थके। वै. निघ.।

अतिस्थूलवर्त्मा । पुं। दुष्टव्रणविशेषे। च.।

अतिस्निग्धः । त्रि। अत्यन्तस्निग्धे। तस्य लक्षणम्—कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः। लक्षणं तदतिस्निग्धे रूक्षं तत्र प्रदापयेत्॥ वै. निघ.। नस्यचि.।

अतिस्रवा । स्त्री। मयूरवल्ल्याम्। मूगवां। वै. निघ.।

अतिच्छिद्रसन्धिः । पुं। सन्धेरतिशयविश्लेषे। सन्धिच्युतं सदुच्चैरवस्थानं। तेन सन्ध्यस्थीरुभयोरेवातिक्रान्तता वेदना च। सु. नि. १५ अ। See भग्नः।

अतीसारः । पुं। Diarrhœa or dysentry.

अतीव सरति, प्रकृतिमतिक्रम्य गुदमार्गेण सरतीति अतीसारः। स्वनामख्यातोदरामयरोगे, बहुद्रवमलनिःसरणरोगे। तस्य निदानं गुरुभोजनादिकम्। तस्य निरुक्तिः—रसादिद्रवधातूनामग्निं मन्दीकृत्य मलेन सह मिश्रितानां वायुना चाधः-प्रणुन्नानां अतिनिःसरणादतीसार उच्यते। तस्य च पूर्व्वरूपं—हृदयनाभिगुह्योदरादिस्थानेषु सूचीविद्धवद्वेदना, कायावसादवायुमलविबन्धतोदोदराध्मानापरिपाकादिकञ्च। स षड्विधः वातपित्तकफसन्निपातशोकापरिपाकजभेदाद्भवति। तत्र वातजे मलस्यारुणता फेनिलता रुक्षता पक्वता तथा गुदे सशब्दवेदनमल्पशोमुहुर्निःसरणञ्च लक्षणं भवति। पित्तजे च मलस्य हरितपीतलोहितवर्णता तृष्णामूर्च्छादाहाः मलद्वारि ज्वाला चतञ्च लक्षणम्; कफजे च शुक्लगाढ़सकफामगन्धिशीतलमला निःसरन्ति, रोगी सरीमाञ्च भवति। सान्निपातिके च वातजादि-लक्षणानि दृश्यन्ते, प्रायशश्चाच मलाः शूकरवसा-मांसधावनवारिवद्भवन्ति। शोकजे च गुञ्जाफलसदृशशोणितं केवलं मलमिश्रितं मलरहितं वा सरति, तत्र मलसहितं चेत् दुर्गन्धं मलरहितं चेन्निर्गन्धं भवति। आमातिसारे च नानावर्णं वारंवारञ्चातिसार्य्यते, तथा तदोदरशूलमतीव जायते। अतीसारस्य चासाध्यलक्षणं—मलस्य कृष्ण-स्निग्धता, यकृत्खण्डवत् कृष्ण-रक्तवर्णता, घृततैलवसामज्जदधिदुग्धमांसधावनवारिसदृशता, कृष्ण-नीलवर्णता, ईषत्कृष्णरुक्षचिक्कणता, शिखिपुच्छवत् विविधवर्णचन्द्रकयुक्तता, घनशवगन्धिमस्तिष्काभता, सुगन्धपूतिगन्धबहुलता च, तथा तृष्णादाहात्यकारदर्शनं, हिक्काश्वासपार्श्वशूलेन्द्रियचित्तमोहाः गुह्याभ्यन्तरवलिपाकः प्रलापश्च, तथा गुदसंवरणाक्षमता बलमांसहीनता अतीवोदराध्मानं शोथः, मलद्वारस्य पक्वता सत्त्वेऽपि गात्रस्य शीतलता उपद्रवाश्च। चिकित्सा-स्वस्वपर्य्याये प्रदर्शनीया। अतीसारे नानाविधद्रवधातुनिःसरणम् अन्यच केवलमेव कफनिःसरणमित्यतिसारप्रवाहिकयोर्भेदः। इति माधवकरसंग्रहादतीसारसंग्रहः। शार्ङ्गधरस्तु भयजमुक्त्वा सप्तविधमाह। तत्र सम्प्राप्तिः संशम्यापां धातुरग्निः क्लोम्नानु बर्चोमिश्री मारुतेन प्रणुन्नः। द्रवीऽतीवाधः सरत्येव यस्मादाद्यं घोरं तं त्वतीसारमाहुः॥ हृन्नाभिपायूदरकुक्षितोदगात्रावसादानिलसन्निरोधाः। विट्सङ्ग आध्मानमथाविपाको भविष्यतस्तस्य पुरःसराणि॥ तत्र निदानम्—गुर्व्वतिस्निग्धरुक्षोष्णद्रवस्थूलातिशीतलैः। विरुद्धाध्यशनाजीर्णैरसात्म्यैरपि भोजनैः॥ स्नेहादैरतियुक्तैश्च मिथ्यायुक्तैर्विषादृयात्। शोकाद्दुष्टाम्बुसेव्यातिपानात् सात्म्यर्त्तुपर्य्ययात्॥ जलाभिरमणैर्वेगविधातैः क्लमिदोषतः। नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते॥ सु. उ. ४० अ। स च वातपित्तकफसन्निपातशोकामजभेदात् षड्विध इति। अथातिसार-लक्षणम्—अनिलेनाथ पित्तेन श्लेष्मणा चापि वाजिनः। अतीसारस्तथा चान्यः सन्निपातेन जायते॥ सङ्कोचिताङ्गः स्वनेन सकफं योऽतिसार्य्यते। अल्पं तनु सशब्दञ्च पुरीषं बहु वा हयः॥ तत्र वातात्मकं विद्यादतीसारं विचक्षणः। पित्तजञ्चैव वक्ष्यामि श्लेष्मजञ्च समासतः। स्वेददाहपरीतानां लक्षयेन्मतिमान् भिषक्। स्रावेण नीलरक्तेन विस्रगन्धेन पित्तजम्॥ मन्दाहारस्तथा वाही हृष्टरोमातिपीड़ितः। श्यामैः सपिच्छिलैर्भिन्नैर्विद्यात् श्लेष्मसमुद्भवम्॥ सन्निपातात्मकञ्चैव सर्व्वेषां लक्षणैर्युतम्। द्विरूपं द्वन्द्वजं ज्ञेयमतीसारं विचक्षणैः। अतीसाराः समुद्दिष्टाः शालिहोत्रादिभिः पुरा॥ ज द. ४२ अ.।

अतुलः । पुं। कफे। तिलकवृक्षे। शु.च.।

अतृप्तिः । स्त्री। तृप्तिशून्यत्वे। अपरितोषे।

अतेजाः । स्त्री। छायायाम्। रा.नि व.२१।

अत्कः । पुं। अङ्गे। उणा.।

अत्रः । पुं। सूर्य्ये। वै.निघ.।

अत्यः । पुं। अश्वे।

अत्यग्निः । पुं। क्षुधाधिक्ये। च. द. अग्निमा. चि.। भस्मके। विज.र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्यन्तपद्मा । स्त्री । कमलिन्याम् । वै. निघ. ।

अत्यन्तशोणितः । वि. । अतिरक्ते । क्ली । सुवर्णगैरिके । वै निघ. ।

अत्यन्तसुकुमारः । पुं । (Panicum Italicum) कन्दलीवृक्षे । कङ्गुण्याम् । रा.नि.व.१६ ।

अत्यम्बुपानम् । क्ली. । मात्रातिरिक्तवारिपाने । तद्दोषो यथा—अत्यम्बुपानान्न विपच्यतेऽन्नं अनम्बुपानाच्च स एव दोषः । तस्मान्नरो वह्निविवर्द्धनार्थं मुहुर्मुहुर्वारि पिबेदभूरि ॥ इति जलपानलक्षणम् । रा.नि.व. १४ ।

अत्यम्लः । पुं, क्ली. । (Spondias mangifera.) वृक्षाम्ले । तेँतुल । रा.नि.व.६ । See तिण्डिड़ी । वनमातुलुङ्गे । मातुलुङ्गे । वि.अत्यन्ताम्लरसयुक्ते ।

अत्यम्ला । स्त्री । मातुलुङ्गवृक्षे । वनबीजपूरे । मधूरलेबु, मधुटाबा वा मधूलेबु । रा.नि.व ११ । गशाकाँकड़ी । रत्ना. तिन्तिड्याम् । श.र. ।

अत्यम्लपर्णी । स्त्री । वह्निशूरणे लताविशेषे । कड़वड़वेनि । हिंग्गोलि । रा.नि.व.३ । तत्पर्य्यायः, —तीक्ष्णा, कण्डूरा, वह्निशूरणः, करवड़वल्ली, वह्निशिखा, अरण्यवासिनी । अम्लवेतस्याम् । आमरुल । गुणाः—अत्यम्लपर्णी तीक्ष्णाम्ला प्लीहशूलविनाशिनी । वातहृद्दीपनी रुच्या गुल्मश्लेष्मामयापहा ॥ रा.नि व.३ । भावा. ३ भाग ।

अत्ययः । पुं । नाशे, दोषे, कृच्छ्रे । रत्ना. अने. व. । मे. यतिकं ।

अत्यर्कः । पुं । शुक्लार्कवृक्षे । श्वेत आकन्द गाछ । रा. नि. व. १० ।

अत्यानन्दा । स्त्री । कफजन्ययोनिरोगविशेषे, येन स्त्री ग्राम्यधर्म्मेण सन्तोषं न लभते । अत्यानन्दा न सन्तोषं ग्राम्यधर्म्मेण विन्दति । भा. म. ख. ४भ. योनिरोगचि. ।

अत्यारक्ता । स्त्री । जवापुष्पवृक्षे ।

अत्यालः । पुं । रक्तचिवक-वृक्षे । रा. ।

अत्युग्रम् । क्ली. । हिङ्गुनि । मद. व. २ ।

अत्युग्रगन्धा । स्त्री । कृष्णगोकर्ण्याम् । कृष्णापराजितायाम् । अजमोदायाम् । मद. व. २ ।

अत्युदीर्णा । स्त्री । दुष्टव्यधनविशेषे । यत्र तीक्ष्णमहासुखशस्त्रेण वेधो भवति । सु. शा. ८अ. ।

अत्यूहः । पुं । कालकण्ठपक्षिणि । दात्यूहे । मे. हविकं ।

अत्यूहा । स्त्री । नीलशिफालिकायाम् । नीलिकायाम् । मे. हविकं ।

अत्रिः । पुं । ऋषिविशेषे ।

अत्रिगृजातः । पुं । चन्द्रे । हे. ।

अदनम् । क्ली. । भक्षणे ।

अदन्तः । वि. । दन्तहीने ।

अदलः । पुं । हिज्जलवृक्षे । श.च. । घृते ।

अदला । स्त्री । घृतकुमार्य्याम् । रा.नि. ।

अदंशः । पुं । महामूलके । बड़ मूला ।

अदारिका । स्त्री । वृक्षकमले, वृक्षोत्पले । ओलट् कम्बल । वै. निघ. ।

अदितिः । स्त्री । गवि । के. ।

अदृक् । वि. । अन्धे ।

अदृग् । पुं । घृते । उ. ।

अदृढः । वि. । अस्थिरे । क्ली. । तृणविशेषे । वै. निघ. ।

अद्गुतसारः । पुं । खदिरसारे । रा. नि. व. ८ ।

अद्यम् । क्ली । धान्ये ।

अद्यतनः । वि । अद्यभवे । आजिकार ।

अद्यनिः । पुं । अग्नौ । उ. ।

अद्यश्विना
अद्यश्वीना } स्त्री । आसन्नप्रसवायां गवि ।

अद्रकः । पुं । महानिम्बवृक्षे । वै.निघ. ।

अद्रिः । पुं । पर्व्वते । शैलवृक्षे । मे. रद्विकं । परिमाणविशेषे ।

अद्रिकर्णी । स्त्री । अपराजितायाम् । श्वेतापराजितायाम् । रा.नि.व.२३ ।

अद्रिका । स्त्री । धान्यके । धने' । महानिम्बे । भा. पू. १ग. व. ।

अद्रिजः । वि । गिरिजाते । क्ली । शिलाजतुनि । रत्ना. । तुम्बुरुवृक्षे । रा.नि.व. ११ । गैरिके ।

अद्रिजतु । क्ली । शिलाजतुनि । हेमा. । भा. ।

अद्रिजा । स्त्री । सैंहलपिप्पलीवृक्षे । रा. नि. व. ६ ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्रिभूः । स्त्री । आखुकर्णीलतायाम् । रा. नि. व. ३ । पार्व्वतीय-लतायाम् ।

अद्रिमाषा । स्त्री । वनमाषे । गांयाणी । वै. निघ. ।

अद्रिसानुजा । स्त्री । वायमाणायाम् वनाडुमूर । वै. निघ. ।

अद्रिसारः । पुं । लौहे । रत्ना. ।

अद्रेष्कः(ष्का) । पुं, स्त्री । निम्बविशेषे । हिं वकाइननिम्ब । पाहाड़े निम् । भैष. कुष्ठचि. ।

अधः । अव्ययं । अधोभागे । यौनौ । वै. निघ. ।

अधःकुन्तलः । पुं । अन्तर्लोम्नि ।

अधःपातनम् । क्ली । पारदस्य यन्त्रमार्गेणाधःक्षेपणे । यथा—नवनीताह्वयगन्धकं (लाऊया गन्धक) सूतञ्च समभागं गृहीत्वा जम्बीररसेन मर्द्दयित्वा, शुकशिम्बीमूलं शिग्रुमूलापामार्गश्वेतसर्षपसैन्धवकल्केन समभागेन संमिश्र्य यन्त्रस्यैकभाण्डाभ्यन्तरतले कल्कमिश्रितं तं सूतं लेपयेत् । अथ जलयुक्तमधोभाण्डं भुवि पूरयित्वा तस्य मुखे रसयुक्तं भाण्डमधोमुखं संस्थाप्य च दृयोः सन्धिमुखं लेपयेत् । अथ उपरिष्टात् पुटे दत्ते पारदो जले पतति । इत्यधःपातनं । "नवनीताह्वयं सूत"मित्यादि । र. सा. सं. ।

अधःपुटः । पुं । चारीलौहे । वै. निघ. ।

अधःपुष्पी । स्त्री । (Hicracinm.) गोजिह्वा क्षुपे । रा नि.व. ४ । चीरपुष्पीतृणविशेषे । तत्पर्य्यायः,—अवाक्पुष्पी, मङ्गल्या, अमरपुष्पिका । रा. । চোর কাঁটকী, চোরখড়িকা, ভাঁটুই, উকৃণে, বাটিয়া, লেঙরা। হেটাহুলীতি গৌড়ীয়াঃ। सततञ्च. ब्रह्मदण्डी वैनिघ

अधःप्रस्तरः । पुं । तृणासने । वै. निघ. ।

अधःशल्यः । पुं । अपामार्गक्षुपे । रा. नि व. ४ । भा. पू. १भ. । श्वेतापामार्गे ।

अधःशाखः । पुं । संसाराश्वत्थवृक्षे ।

अधःशेखरः । पुं । श्वेतापामार्गे ।

अधमः । पुं । अम्लवेतसे ।

अधमाङ्गम् । क्ली । चरणे । श. च. ।

अधरः । पुं । ओष्ठे । ঠোঁট । रा. नि. व. १८ । क्ली । स्त्रीयोनौ ।

अधरकण्टकः । पुं । दुरालभायाम् । वै. निघ. ।

अधरकण्टिका । स्त्री । क्षुद्रशतावर्य्यां । वै. निघ. ।

अधरा । स्त्री । नीचदिशि । वै. निघ. ।

अधामार्गः } पुं । अपामार्गे । धामार्गवद्वृक्ष ।
अधामार्गवः } गड়গণ্ড । হিং কাইচ। অ.টী।

अधिकण्टकः । पुं । यासक्षुपे । दुरालभाविशेष । रा. नि. व. ४ ।

अधिकप्रियम् । क्ली । त्वचि । दारचिनि । वै. निघ. ।

अधिकरणम् । क्ली । यत्र कुर्व्वन्ति तदधिकरणम् । सु. सू. ४१ अ. । 'यमर्थमधिकृत्योच्यते ।' यथा रसं दीर्घं वा । सु. उ. ६५अ. ।

अधिकारी । पुं । पुरुषे । वै. निघ. ।

अधिजिह्वः । पुं । A tumour on the tongue. कण्ठगतमुखरोगे । सु.नि.१६अ. । अयं द्विजिह्वोऽप्युच्यते । तल्लक्षणं यथा,—जिह्वाग्ररूपः श्वयथुः कफात्तु जिह्वाप्रवन्त्रीपरि रक्तमिश्रः । ज्ञेयोऽधिजिह्वः खलु रोग एष विवर्जयेदागत-पाकमेनम् ॥ सुश्रुतः ।

अधिजिह्वकः । पुं । जिह्वागतरोगविशेषे । See अधिजिह्वा ।

अधिजिह्वा } स्त्री । जिह्वारोगविशेषे कफ-
अधिजिह्विका } शोणितजे । अत्र जिह्वोपरि जिह्वाग्रवत् शोथो जायते । पक्वश्चेदसाध्यः । उपजिह्वा निम्नती भवतीत्यनयोर्भेदः । लक्षणम्—जिह्वाग्ररूपः श्वयथुः कफात्तु जिह्वाप्रवन्त्रीपरि रक्तमिश्रः । सु. नि. १६ अ. । अस्य जिह्वागतरोगे जिह्वोपरि शोफरूपे । लक्षणम्—"अधिजिह्वाभिधानन्तु उपरिष्टाद्विनिर्द्दिशेत् ॥" ज.द.२९अ।

अधिदन्तः (कः) । पुं । A tooth growing over another. दन्तमूलगतरोगविशेषे । गजदन्ते । গজদাঁত । अस्य दन्तोपरि षड्धिकदन्तनिर्गमरूपरोगे । तेन चाश्वस्य ग्रासग्रहणेऽनिच्छा भवति । सप्तदन्तविशिष्टोऽष्टदन्तविशिष्टश्चाश्वोऽधिदन्त इत्युच्यते । "सप्तभिश्चाष्टभिर्दन्तैः ख्यातश्चाधिकदन्तकः ।" ज.द.३अ ।

अधिदैवतम् । क्ली । अधिदेवतायाम् । आधिदैविकरोगे । सु.शा. १अ. ।

अधिपतिः । पुं । मर्म्मस्थानविशेषे । तच्च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोमावर्त्तस्थानं मस्तकाभ्यन्तरे सर्व्वशिरासम्मिलनस्थानञ्च। सु.शा.६ह्रे.।

अधिभूतः। पुं। यमधिकृत्य योवर्त्तते स एव तस्याधिभूतो नाम। यथा यस्य नामेन्द्रियस्य यत् कार्य्यभूतं तदेव कार्य्यं तस्येन्द्रियस्याधिभूतविषयः। सु. शा १अ.।

अधिमन्थः। पुं। Acute pains in the balls of the eyes with pain and swelling of one side of the head. अभिष्यन्दीत्यनेत्ररोगविशेषे। स च वातजपित्तजकफजरक्तजभेदेन चतुर्विधः। सर्व्वेषेव लक्षणं तीव्रवेदना। अभिष्यन्दे (चोक उठो वा नेत्रशूल) उपेक्षिते अधिमन्थो जायते। लक्षणम्—द्वन्द्वैरेतैरभिष्यन्दैर्नराणामक्रियावताम्। तावन्तस्त्वधिमन्थाः सुदारुणे तीव्रवेदनाः॥ उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा। शिरसीऽर्द्धञ्च तं विद्यादधिमन्थं स्वलक्षणैः। हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधिमन्थो रक्तजः पञ्चरात्रात्। षड्रात्राद्वा वातिकी वै निहन्यात् मिथ्याचारात् पैत्तिकः सद्य एव॥ अधिमन्थेषु सर्व्वेषु ललाटे वेधयेच्छिरां। अशान्ते सर्व्वथा मन्थे भुञ्जीत्तु परिदाहयेत्॥ सु. उ. ६अ.।

अधिमांसम्। क्ली, पुं। नेत्ररोगविशेषे। मा. नि. री.। See नेत्रमांसार्म्म।

अधिमांसकः। पुं। Inflammation of the tonsils. कफजन्यदन्तवेष्टजरोगविशेषे। हनुभवान्त्यदन्ते अतिवेदनमहाशोथो लालास्रावश्च भवति। हानव्ये पश्चिमे दन्ते महाशोथोमहारुजः। लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः। भा. म. ख. ४भ. सु. री. चि.। मा. नि.। सु. नि. १६ अ.।

अधिमांसार्म्म। क्ली, पुं। Fleshy excrescence on the eye, cancer of the eye. दृष्टिशुक्लगतरोगविशेषे मांसदुष्टीतिख्याते। लक्षणम्—पद्माभं मृदु रक्तार्म्म यन्मांसं चीयते सिते। पृथु मृदधिमांसार्म्म बहुलञ्च यकृन्निभम्॥ मा. नि.।

अधिमुक्तकः। पुं। माधवीलतायाम्। वै.निघ.।

अधिमुक्तिका। स्त्री। मुक्ताग्रहे, शुक्तौ। मुक्ताझिणुक। वै. निघ.।

अधिरूढ़ा। स्त्री। प्रौढ़ायाम्। प्रोढ़ा स्त्री।

अधिरोहिणी। स्त्री। वंशकाष्ठादि-निर्म्मितरोहणमार्गे। सिँड़ि, गई। तत्पर्य्यायः,—निःश्रेणी (अ. टी.), निःश्रेनिः (अ)।

अधिश्रयणी। स्त्री। चुल्याम्। चूलो, उनून।

अधिष्ठानम्। क्ली। स्थाने। ग्रामे। नगरे।

अधीरः। पुं। धीरताहीने। अयोग्यवैद्ये। वै. निघ.।

अधोऽंशुकम्। क्ली। परिधेयवस्त्रे। अम.।

अधोगतः। पुं। अस्थिभङ्गरोगे। वै. निघ.।

अधोघण्टा। स्त्री। अपामार्गे। आपाङ्। रत्ना.।

अधोऽङ्गम्। क्ली। मलद्वारे। योनौ।

अधोजिह्विका। स्त्री। तालुमूलस्थक्षुद्रजिह्वायाम्। आलजिव। हारा.। जिह्वाधःशोथरोगे। कफादधस्तादधिजिह्विका चेति। च.।

अधोद्वारम्। क्ली। मलद्वारे। योनौ। हे. च.।

अधोभागहरः। वि। विरेचनकर्म्मणि हित करे। च।

अधोमर्म्म। क्ली। गुदे। गुह्यद्वारे। हे. च.।

अधोमुखा। स्त्री। गोजिह्वायाम्। रा.नि.व. ४।

अधोयन्त्रम्। क्ली। वकयन्त्रे।

अधोवायुः। पुं। अपानवायौ।

अधोरेचनः। पुं। आरग्वधवृक्षे।

अधोऽस्रपित्तम्। क्ली। अधोगतरक्तपित्तरोगे। See रक्तपित्तम्।

अधाखण्डा (व्यखण्डा)। स्त्री। कपिकच्छुलतायाम्। आलकुशी। See आत्मगुप्ता। भूम्यामलक्याम्। रत्ना.। कोकिलाक्षे। तालमाखना। मद. व. १। भा. पू.। प. सु.।

अधार्व्वुदम्। क्ली। अर्व्वुदोपरि जातार्व्वुदरोगे। आवेर उपर आव। लक्षणं—यज्जायतेऽन्यत् खलु पूर्व्वजाते ज्ञेयं तदध्यर्व्वुदमर्व्वुदज्ञैः। सु. नि. ११अ.।

अधाशनम्। क्ली। अजीर्णोपरि भोजने। लक्षणम्—"अजीर्णे भुज्यते यत्तु, तदध्यशनमुच्यते। प्राग्भुक्ते त्वनले मन्दे द्विरन्नो न समाहरेत्। प्रातराशे त्वजीर्णे तु सायमाशी न दूष्यति। पूर्व्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम्। सायमाशे त्वजीर्णे तु प्रातर्भुक्तं विषोपमम्"। वै. निघ. दि. चर्य्या। भुक्तस्योपरि भूयोभोजने। भा. म. ख.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो. सा. चि.। विरुद्धाध्यशनाजीर्णैः।" वा. सू. ८ अ।

अधश्चत्तः। पुं। चौरिकावृक्षे। श. र.। महार्कवृक्षे। त्रि। प्रत्येकं कर्षाईमाने। सि.य. र.पि-चि. एलादि-गुटिकायां वृन्दः।

अधूढा। स्त्री। विवाहितायां स्त्रियाम्। विवाहिता स्त्री।

अधुषितः। पुं। सर्व्वाक्षिरोगे। त्रि। उपविष्टे।

अध्रुषः। पुं। तन्नामकतालुगतमुखरोगे। अत्र तालुदेशे रक्तदोषजन्यलोहितानतिस्थूलशोथः, तेन च ज्वरस्तीव्रवेदना च भवति। मा. नि.। तल्लक्षणं —शीघ्रस्रष्टी लोहितस्तालुदेशे रक्ताज्ज्ञेयः सोऽध्रुषी रुग्ज्वराढ्यः। सु.नि. १६ अ.।

अध्वः। पुं। वर्त्मनि। पंथ।

अध्वगः। पुं। उष्ट्रे। अश्वतरे। हे. च.।

अध्वगभोज्यः(ग्यः)। पुं। आम्रातकवृक्षे। त्रिका.।

अध्वगवृक्षः। पुं। आम्रातकवृक्षे।

अध्वगक्षमी। पुं। खेचरे, पक्षिणि। वै. निघ.।

अध्वजा। स्त्री। स्वर्णुलीक्षुपे। रा. नि. व. ४।

अध्वनिषेवणम्। क्ली। अध्वचलने। वै. निघ.। See चंक्रमणं।

अध्वरा। स्त्री। मेदायाम्। भा. पू. १ ह. व.।

अध्वशल्यः। पुं।। अपामार्गे। रा.।

अध्वशोषः। पुं। पथिश्रमजन्यशीषरोगे अध्वप्रशीषी खलाङ्गः संभ्रष्टपरुषच्छविः। प्रसुप्तगात्रावयवः शुष्कक्लोमगलानलः॥ नि.।

अध्वसिद्धकः। पुं। सिन्धुवारवृक्षे। रा.नि.व.४।

अध्वाण्डशाखवः। पुं। श्योणाकवृक्षे। शोणा गाछ। हिं नाउया श्योणाल। श. च.।

अध्वान्तं। क्लीं। सायंकाले।

अनंशुमत्फला। स्त्री। कदलीवृक्षे। जटा.।

अनः। क्ली। अन्ने। उषण.

अनग्ना। स्त्री। कार्पास्याम्। कार्पास। वै.।

अनघः। पुं। गौरसर्षपे। रा. नि. व. १६।

अनघ्नः। पुं। गौरसर्षपे। वै. निघ.।

अनङ्गम् (कम्)। क्ली। मनसि। श. र.।

अनङ्गसुन्दररसः। पुं। वाजीकरणाधिकारे रसः। सूतस्य पलं गन्धकस्य च पलं रक्तकुमुदरसैः दिनत्रयं भावयेत्। ततो बालुकायन्त्रे प्रहरमात्रं पचेत्। अवतार्य्य रक्तवकपुष्पस्वरसेन दिनैकं भावयेत्। र. सा. सं.।

अनडुज्जिह्वा। स्त्री। गोजिह्वायाम्। गोजिह्वाशाक। रा. नि. व. ४।

अनडुही। स्त्री। स्त्रीगवि। See अनड्वाही।

अनड्वान्। पुं। वृषे। भा. पू.। रत्ना.।

अनड्वाही। स्त्री-गवि। गाई। हला.।

अनणुः। पुं, क्ली। सूक्ष्मधान्ये। सरुधान। वै.निघ.

अनद्यः। पुं। गौरसर्षपे। रा.।

अनन्तः। पुं। दुरालभायाम्। वै. निघ. २स. अनन्तादिचूर्णे, सर्व्वज्वरे। सिन्धुवारवृक्षे। अभ्रकधातौ। रा. नि. व. १३।

अनन्तकः। पुं। मूलके। नलतृणे। हिं नरकट। मद. व. १।

अनन्तमूलम्। क्ली। करालाख्यौषधे। सुगन्धायां। वचाभेदे। श. चि.। अनन्तायाम्।

अनन्तमूली। स्त्री। दुरालभायाम्। रक्तदुरालभायाम्। वै. निघ.।

अनन्तरन्ध्रका। स्त्री। खर्परपोलिकायाम्। आस्के पिटे। वै. निघ.।

अनन्तवातः। पुं। तन्नामकशिरोरोगविशेषे। लक्षणं—दोषास्तु दुष्टास्त्वय एव मन्यां सम्पीड्य घाटासु रुजां सुतीव्राम्। कुर्व्वन्ति योऽक्षिभ्रुविशङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु॥ गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान्। अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम्॥ मा. नि.।

अनन्ता। स्त्री। स्वनामख्यातलतायां। अनन्तमूल। हिं अनन्तमूल। सु. मिश्र. अ.। शारिवेति उत्तरापथे प्रसिद्धा। रा. नि. व. १२। See सारिवा। च. द. पि. ज्व. चि. शिरीलेपे। "कालीयचन्दनानन्ता।" भा. म. ख. ४ भ. गर्भ-चि.। "अनन्ता शारिवा राज्ञा"। भा. म. ख. १भ. ज्वरे शारिवादौ। "अनन्ता बालकं सुखम्"। च. सू. ४. ३१ दश.। दूर्व्वायां। हे. च. ४। स्वर्णक्षीर्य्यां। प. सु.। लाङ्गल्यां। प. सु.। भा. पू. १ग. व.। दुरालभायां। प. सु.। भा. म. ख. ४भ.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सु. री. चि.। "कल्कैरनन्ता खदिरारिमेद.....।" वा. १५अ. प्रियङ्ग्वादि-व.। प्रियङ्ग्वादि-दूर्व्वादि-व. हेमा. अरुणश्च। "दूर्व्वानन्ता निम्बवासामगुप्ता पद्माद्रजी योजनवल्ल्यनन्ता।" नीलदुर्व्वायाम्। भा. पू. १। रा. नि. व. २३। गोलीभ्यां। श्वेतदूर्व्वा। रा. नि. व. ८। यवासायाम्। भा. म. ४भ. काकोल्यादिव., "अनन्तां कुक्कुटीं विस्त्रीम्।" दुरालभाभावे यवासा ग्राह्या। अग्निसन्यङ्गे। गुड़च्याम्।

अनभिलाषः। पुं। अन्नविद्वेषे। अरोचके। रा. नि. व. २०।

अनलः। पुं। चित्रकचुपे। रा.नि.व.६। भा. पू. १भ. ह व.। च. द. संग्रहणी-चि. पाठाद्यचूर्णे। रक्तचित्रके। र. सा. सं.। भल्लातकवृक्षे। रा.नि.व.११। पित्ते। रा. नि. व. २१। देवधान्ये। मद. व.१०। अग्नौ।

अनलम्। क्ली। भल्लातकबीजे। "अनलसरिच-दूर्व्वा।" भैष. कुष्ठ-चि.।

अनलनामा। पुं। चित्रकवृक्षे।

अनलप्रभा। स्त्री। ज्योतिष्मतीलतायाम्। रा. नि. व. ३।

अनलविवर्द्धनी। स्त्री। कर्कटिकायाम्। काँकुड़गाछ।

अनली (लिन्) लिः। पुं। चित्रकवृक्षे। विका.।

अनवस्थानः। पुं। वायौ। रा।

अनवस्थितचित्तत्वम्। क्ली। वायुरोगे। वै. निघ.। चित्तचाञ्चल्ये।

अनशनम्। क्ली। लङ्घने। मा. नि.। उपवास।

अनक्षः। वि। अन्ध।

अनक्षि। क्ली। कुत्सितचक्षुषि। कुत्सित चक्षु।

अनाक्रान्ता। स्त्री। कण्टकार्य्याम्। र. मा.।

अनागतार्त्तवा। स्त्री। कन्यायाम्। अजातरजस्कायाम्। रा. नि. व १८। तत्पर्य्यायः;—अरजस्का, गौरी, नग्निका। (अ)।

अनागतावेक्षणम्। क्ली। एतत् वक्ष्यतीत्यर्थे। सु. उ. ६५ अ.।

अनाचारः। पुं। असत्कर्म्मणि। वै. निघ.।

अनातङ्कः। वि। अरोगिणि।

अनातपः। पुं। आतपाभावे। छाया।

अनातुरः। वि। अरोगिणि।

अनामकम्। क्ली। अर्शोरोगे। श्र. र.।

अनामयम्। क्ली। आरोग्ये। रा.नि. व. २०।

अनामा। पुं। अनामिकाङ्गुली। श्र. र.।

अनामिका। स्त्री। तन्नामकाङ्गुलौ, अङ्गुष्ठाच्चतुर्थाङ्गुलौ। रा. नि. व. १८।

अनार्जवः। पुं। रोगे। रा. नि. व. २०।

अनार्त्तः। वि। अकातरे।

अनार्त्तवजलम्। क्ली। पौषादिमासचतुष्टयभवे वृष्टिजले। तच्च वातादिदोषत्रयकोपनं। यथा —अनार्त्तवं प्रसुवन्ति वारि वारिधरास्तु यत्। तच्चिदोषाय सर्व्वेषां देहिनां परिकीर्त्तितं। भा. पू. वारिव.।

अनार्त्तवा स्त्री। रजःशून्यायां। तन्नामकयोनिव्यापदि रोगे। अनार्त्तवास्तनी षण्ढी खरस्पर्शा च मैथुने। मा. नि.।

अनार्य्यकम्। क्ली। Aloe wood. अगुरुकाष्ठे। हला.। काष्ठागुरुणि। रा. नि. व. १२। भा.पू. १भ. क. व.।

अनार्य्यजम्। क्ली। Aloe wood. अगुरुणि। रा. नि.।

अनार्य्यतिक्तः (क्तः)। पुं। (Gentiana cherayta Rox.) भूनिम्बे। चिरातो। अम.।

अनावंशः। पुं। मर्म्मविशेषे। के।

अनाविलः। वि। निर्म्मले।

अनासिकः। वि। नासिकाहीने।

अनाहः। पुं। आनाहरोगे। See आनाहः।

अनाहतम्। वि। नूतन-वस्त्रे। अ।

अनाहारः। पुं। आहाराभावे।

अनिच्छः। वि। तृप्ते। वै. निघ.।

अनिमिषः } पुं। मत्स्ये। विका. मे. षचतुष्कं।
अनिमेषः } वि। निमेषशून्ये।

अनिरुद्धम्। क्ली। पश्वादिबन्धन-रज्जुविशेषे। दड़ा।

अनिरुद्धपथम्। क्लीं। आकाशे। श्र.।

अनिर्माल्या। स्त्री। (Medicago esculenta. Rox.) पिण्डिकायाम्। पृक्कायाम्। पिड़िं। रत्ना.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिर्वाणः । पुं । कफे । वै. निघ. ।

अनिलः । पुं । वायौ । शाकतरौ । शेगुन गाछ । रा. नि. व. २३ ।

अनिलकपित्थकः । पुं । स्थूलाम्लातके । वै. निघ. ।

अनिलकारकः । पुं । कार्श्यकरभेदे । वै. निघ. ।

अनिलघ्नः(कः) । पुं । (Terminalia belerica.) विभीतकवृक्षे । रा. नि. व. ११ ।

अनिलज्वरः । पुं । वातिकज्वरे । स च सामनिरामभेदात् द्विविधः । च. द. । See ज्वरः ।

अनिलनिर्यासः । पुं । पियालवृक्षे । पियाशाल । सं विवला । वै. निघ. ।

अनिलपर्य्ययः । पुं । वायुरोगे ।

अनिलभुक् । पुं । सर्पे । वै. निघ. ।

अनिलरसः । पुं । रसौऽयं पाण्डुरोगे हितः । रस. र. ।

अनिलरिपुः । पुं । एरण्डवृक्षे । वै. निघ. २भ. सन्धि-ज्व. चि. राहादिः ।

अनिलहरम् । क्ली । कृष्णागुरुणि । वै. निघ. ।

अनिला । स्त्री । नद्याम् । खटिकायाम् । फूलखड़ि । र. ना. ।

अनीलाजीर्णम् । क्ली । वाताजीर्णे । वा. सू. ८अ. ।

अनिलाटिका । स्त्री । रक्तपुनर्नवायाम् ।

अनिलान्तकः । पुं । इङ्गुदीवृक्षे । जियापूती । हिं इङ्गोट् । रा. नि. व. ८ ।

अनिलापहा । पुं । रक्तकुलत्थके । लालकर्त्ति । वै. निघ. ।

अनिलामयः । पुं । वायुरोगे । वातव्याधौ ।

अनिलारिरसः । पुं । वातव्याध्यधिकारे रसः । "रसेन गन्धं द्विगुणं विमर्द्य वातारिनिर्गुण्डिरसैर्दिनैकं । निवेशयेत्ताम्रमये पुटे तत् सर्व्वं मृदाविष्ट्य च बालुकाखेऽ । यन्त्रे पुटे गौमयचूर्णवह्नौ स्वभावशीतं तु समुद्धरेत्तत् ॥ निर्गुण्डिकावृंतहरात्रितोयैः संचूर्ण्य यत्नेन विभावयेत्तत् ॥" अत्र वातारिरसैः एरण्डमूलरसैः । अग्निः चित्रकः । तोयैः क्वाथैः । र. सा. सं.

अनिलोचितः । पुं । नीलमाषके । वै. निघ. ।

अनिष्टा (ष्ठा) । स्त्री । नागबला । रा. नि. ।

अनिःसारा । स्त्री । कदलीवृक्षे । कलागाछ । रा. नि. व. ११ । वै. निघ. ।

अनिक्षुः । पुं । (Chaccharum spontaneus.) इक्षुविशेषे । थागड़ा । र. मा. । आनाखौ । रत्ना.

अनीकस्थः । त्रि । हस्तिश्चित्राविचक्षणे । मे. यचतुष्कं ।

अनीली । स्त्री । काशतृणे । र. मा. ।

अनुकः । पुं । कामुके । अ ।

अनुकदली । स्त्री । कदलीविशेषे । सं लोम्नडीकेल ।

अनुकर्णम् । क्ली । कर्णसमीपे । वा. शा. ४अ. ।

अनुकर्षणम् । क्ली । पानपात्रे । हारा. ।

अनुकल्पः । पुं । An alternative. अभावे तद्गुणद्रव्यान्तरग्रहणे ।

अनुकूलका । स्त्री । लघुदन्त्याम् । वै. निघ. ।

अनुकूला । स्त्री । ह्रस्वदन्तीवृक्षे । रा. नि. व. ६ ।

अनुकूलिनी । स्त्री । क्षुद्रदन्त्याम् ।

अनुगः । पुं । परिचारके । रत्ना. ।

अनुच्छ्वासः । पुं । श्वासरोधे ।

अनुज्जम् । स्त्री । प्रपौण्डरीक-नाम-गन्धद्रव्यविशेषे पूण्डरिया । रा. नि व. १२ ।

अनुज्ञा । स्त्री । वायमाणलतायाम् । गोंओया-लिया लता । रा. नि. व. ५ । वला-डुमुर । भा.पू. १भ गु. व ।

अनुतक्रम् । क्ली । तक्रानुपाने । जग्ध्वा तक्रं पिबेदनु । सि. यो. पाण्डु चि. वृन्दः ।

अनुतर्षः । पुं । तृष्णा । सुरापानपात्रे । भैष. मे. षचतुष्कं ।

अनुत्क्लेशः । पुं । उत्क्लेशाभावे । च. सं. विमूची. ।

अनुत्थितविद्धा (शिरा) । स्त्री । दुःस्थानबन्धनात् वेपमानायाः यस्याः शिरायाः शोणितसम्मोही भवति । सु. शा. ८ अ. ।

अनुपजः । त्रि । अनुपदेशजाते । ते च कुलिचरकीषस्थसत्यप्लवपादिनो भवन्ति । See अनूपवर्गः ।

अनुपदीना । स्त्री । उपनहि । जूता, खड़म इत्यादि । हला. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुपशयः । पुं। What increases the disease. उपशयविपरीते व्याध्यसात्म्यौषधान्नविहारादौ। यथा—हेतुव्याधिविपर्य्यसविपर्य्यसार्थकारिणां। औषधान्नविहाराणामुपयोगं सुखावहं। विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः॥ विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः। मा. नि. पञ्चनिदाने।

अनुपानम् । क्ली। औषधाङ्गपेयविशेषे। अनुपीनं। तच्च औषधपानानन्तरं विलम्ब्य प्रयोज्यं, रात्रौ पुनः पाचनमेव व्यवस्थेयम्। "विलम्ब्य च क्रामणमेतदीरितं रात्रौ पुनः पाचनमेतदूचिरे।" रा. नि. व. २०। वातेऽनुपानं स्निग्धोष्णं, श्लेष्मणि रूक्षोष्णं, पित्ते स्निग्धं, स्नेहपाने उष्णोदकमित्यादि। सद. व. १३। "चूर्णावलेहगुडिकाकल्कानामनुपानकं। वातपित्तकफीद्रेके विद्रेकपलमाहरेत्"। शार्ङ्ग. म. ख. ६ अ.।

अनुपालुः । पुं। पानीयालुके। वन आलू। रा. नि. व ७।

अनुपुष्पः । पुं। (Saccharum sara.) शरतृणे। शा. च.। खड्गतृणे। वेतसे।

अनुबन्धी । स्त्री। तृणायां। हिक्कायां। मे.।

अनुभासः । पुं। काकविशेषे। वै. निघ.।

अनुभूतिः । स्त्री। चिन्तायाम्। तेऊड़ी। हिं निसीत्तर। See चिन्तत्।

अनुमतम् । क्ली। "परमतमप्रतिषिद्धम्। यथान्धो ब्रूयात् सप्तरसा" इति सु. उ. ६५ अ.।

अनुयवः । पुं। यवान्यूनोऽनुयवः। वा.। निःशूकयवे। हेमा.। गुणाः—वृष्यः स्थैर्य्यकरः सूचमेदःपित्तकफघ्नः पीनसश्वासकासोरुस्तम्भकण्ठरोगघ्नश्च। वा. शूकधान्यवर्गे।

अनुरुहा । स्त्री। नागरमुस्तायां। नागरमूता।

अनुरेवती । स्त्री। क्षुद्रदन्त्याम्। रा. नि. व. ६।

अनुलासः । पुं। मयूरपक्षिणि। मयूर।

अनुलास्यः । पुं। मयूरपक्षिणि।

अनुलेपः / **अनुलेपनम्** । पुं, क्ली। चन्दनादौ। गन्धद्रव्यादिलेपने। चन्दनादि-लेपन।

गुणाः — अनुलेपस्तृषामूर्च्छादौर्गन्ध्यश्रमवातजित्। सौभाग्यतेजस्त्वग्वर्णप्रीत्योजोबलवर्द्धनः॥ मद.व. १३। अपिच—अनुलेपनकं बल्यं तेजःसौभाग्यदायकम्। लघ्वं प्रीतिप्रदं प्रोक्तं तृन्मूर्च्छाश्रमनाशनं। दौर्गन्ध्यवातहृत् प्रोक्तं पूर्व्वाचार्य्यैरिदं स्मृतम्॥ वै. निघ.। प्रीतिकरं, ओजस्करं, शुक्रवर्द्धनं, दौर्गन्ध्यहरं, श्रमपापतन्द्राहरञ्च। राज.।

अनुलोमनम् । क्ली। अनुलोमकरणे। मलादिधातूनां यथामार्गं गमनोपाये। मलादि धातुर यथापथे गमनोपाय। यथा—कृत्वा पाकं मलानाञ्च भित्त्वा बन्धमधो नयेत्। तच्चानुलोमनं प्रोक्तं यथा प्रोक्ता हरीतकी॥ भा.।

अनुल्की । स्त्री। हिक्कायाम्। तृणायाम्। मे.।

अनुवासः / **अनुवासनः** / **अनुवासनकः** । पुं, क्ली। सौरभ्ये। स्नेहवस्तौ। स्नेहने। धूपने। मे.। "यः स्नेही दीयते सः स्यादनुवासननामकः"। तस्य मात्रा च पलद्वयं तदर्द्धं वेति। भा.।

अनुवासनवस्तिः । पुं। स्नेहवस्तौ। मात्रावस्तौ। "अनुवासनभेदश्च मात्रावस्तिरुदीरितः"। भा.। स च तैलादिस्नेहोपकरणैः स्नेहक्काथादिना वा साध्यते गोपुच्छाकारेण स्वर्णादि-निर्म्मितेन गजदन्तादिकृतेन वा नेत्रेण (पिचकारी वा नल)। नेत्र-परिमाणं वयोभेदेन विविधम्। एकवर्षीयात् षड्वर्षपर्य्यन्तं षडङ्गुलं। अष्टवर्षे अष्टाङ्गुलं। षोड़शवर्षे द्वादशाङ्गुलं। प्रत्येकञ्च परिणाही यथाक्रमं कनिष्ठिकानामिकामध्यमाङ्गुलि-परिमितः। एतेषाञ्च प्रत्येकं यथाक्रमं सार्द्धाङ्गुलं सार्द्धद्व्यङ्गुलं सार्द्धत्र्यङ्गुलञ्च वस्तिमुखे सन्निवेश्यम्। वस्तिद्वारप्रवेशनीयनेत्रमुखञ्च यथाक्रमं कङ्कपक्षेनमयूरपुच्छमध्यनाड़ीवत् स्थूलं भाव्यम्। नेत्रेण च द्रव्यक्षेपस्थापनं तत्परिमाणं पूर्व्वोक्तवयोऽनुरूपमेव यथाक्रमं रोगिणो द्व्यञ्जलिपरिमाणं चतुरञ्जलिमितमष्टाञ्जलिमितञ्च भाव्यम्। एवमुत्तरोत्तरं वयोऽनुरूपं नेत्रादिमानं वर्द्धनीयम्। द्वितीयञ्च—पञ्चविंशतेरूर्द्धं नेत्रदैर्घ्यं द्वादशाङ्गुलं मूलपरिणाहश्च अङ्गुष्ठोदरसन्निभो भाव्यः। गृधिनीपत्रनाड़िकावच्चाग्रभागः, बदरास्थिमितं वा कलायपरिमितं वा छिद्रवर्त्म भाव्यम्। वस्तिबन्धनार्थञ्च नेत्रमूले कर्णिकाद्वयं (कानि) कार्य्यम्। द्रव्यमानञ्च रोगिणी द्वादशाञ्जलि। अत्र कल्पे माधुकतैलं ग्राह्यम्। सु. चि. ३८ अ.। एतत्प्रकरणं सु. चि. ३५।३६।३७ अ. दृश्यं। विरेचनात्यत्तरात्रे गते जातबलाय च। भुक्तान्नायानुवास्याय वस्तिर्देयोऽनुवासनः॥ अथानुवास्यं स्वभ्यक्तं उष्णाम्बु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वदितं शनैः। भोजयित्वा यथाशास्त्रं कृतचंक्रमणं ततः। उत्सृष्टानिलविण्मूत्रं भोजयेत् स्नेहवस्तिना। सुतस्य वामपार्श्वेन वामजङ्घाप्रसारिणः। कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत्। बद्धा वस्तिमुखे सूत्रं वामहस्तेन धारयेत्। पीड़येद्दक्षिणेनैव सव्यवेगेन धीरधीः। जृम्भाकासक्षवादींश्च वस्तिकाले न कारयेत्॥ वै. निघ. वस्तिविधिः। अथाभ्यङ्ग यथा—अथानुवासनविस्रंसेवास्थापनं च। प्रवक्ष्यामि यथायोगं शास्त्रदृष्टेन वर्त्मना॥ काष्ठैर्दग्धैरयोभिश्च शृङ्गवंशनलादिभिः। द्वादशाङ्गुलदीर्घन्तु परिणाहे षडङ्गुलम्॥ कोलास्थिमात्रच्छिद्रन्तु कुर्य्यान्नेत्रं विचक्षणः। मूलाद्दनुक्रमश्लक्ष्णसृणन्तु विशेषतः। त्यक्त्वाङ्गुलानि चत्वारि कर्णिकान्तस्य कारयेत्। पुटकस्य प्रबन्धाय सूत्रं दे चापि कर्णिके॥ अनेनास्थापनं कुर्य्यादनुवासनमेव च। यथायोग्यं भिषक् प्राज्ञः सर्व्वरोगोपशान्तये॥ अनुवासनविवरणम्—विरावं पञ्चरात्रं वा सप्तरात्रमथापि वा। भोजयित्वा हयं प्राज्ञो रसकृसरभोजनैः॥ भोजितं भोजनोक्तेन दिनान्ते चानुवासयेत्। निरूहदिनाहारभपरान्हे विचक्षणः॥ विभिर्वारैः प्रदातव्यो निरूहः शास्त्रकोविदैः। ईषत्तीक्ष्णः प्रयोक्तव्यः प्रथमं पुटकोविदैः॥ द्वितीयश्च तृतीयश्च तीक्ष्णौ चैव प्रकीर्त्तितौ॥ ज. द १६ अ।

अनुवासनोपगवर्गः। पुं। षड्विंशदशकनाम-कषायवर्गे। यथा—रास्नामुरदारुबिल्वसदनशतपुष्पबलीरपुनर्नवास्वदंष्ट्राग्निमन्थश्योणाका इति दशमानि...॥ बलीरः श्वेतपुनर्नवा। च. सू. ४अ.।

अनुवास्यः। पुं। अनुवासने। वै. निघ.।

अनुवेल्लितम्। क्ली। शास्त्रास्त्र क्षेपणबन्धनभेदे। सु. सू. १८अ।

अनुशयी। स्त्री। क्षुद्ररोगान्तर्गत-पादरोगविशेषे। तल्लक्षणं यथा—गम्भीरामल्पशोथाञ्च सवर्णामुपरिस्थिताम्। पादे विद्यादनुशयीं तान्तु क्रियया श्लेष्मविद्रधेः। भा. पाद. री. चि.।

अनुशस्त्रम्। क्ली। त्वक्सारस्फटिकवज्रलौहाग्निचारनखादिरूपशस्त्रेषु। तानि च शिशुभीरुप्रभृत्यर्थम्। सु. सू. ८अ.।

अनुष्णम्। क्ली। उत्पले। नीलपद्मे। रा. नि.।

अनुष्णवल्लिका / **अनुष्णवल्ली** स्त्री। नीलदूर्व्वायाम्। रा. नि. व. ८।

अनुसार्य्यकम्। क्ली। सुगन्धद्रव्यविशेषे। भं क्कड़ीला।

अनूचानः। पुं। उत्तमवैद्ये साङ्गवेदाध्यायिनि।

अनूपः। पुं। महिषे। मे. पत्निकं। अम्बुप्रायदेशे। मे.। तल्लक्षणं यथा—"बलवन्बहुबृहद्वक्षवातश्लेष्मामयान्वितः। दीर्घोऽनूप इति ख्यातः॥ तथा नदीपल्वलशैलाब्जफुल्लोत्पलकुलैर्युतः। हंससारसकारण्डचक्रवाकादिसेवितः। सरी वराहमहिषरुरुरीहिकलाकुलः। प्रभूतदुग्धमुख्याद्यो नानाशस्यफलान्वितः। अनेकशालिकेदारकदलीचुविभूषितः। अनूपदेशो ज्ञातव्यो वातश्लेष्मामयार्त्तिमान्"। भा.। गुणाः—गुरुः, स्निग्धः, पिच्छिलः, मधुरः, श्लेष्मलः, स्निग्धः, प्रमेहगलगण्डश्लीपदकृद्धिकरश्च। रा. नि.। राजवल्लभस्तु स्निग्धं शीतलं वातश्लेष्मलं गुरुञ्चाह।

अनूपजम्। क्ली। आर्द्रके। रा. नि. व ६। वि. अनूपदेशोत्पन्नद्रव्यमात्रे। पुं। वृक्षविशेषे। आमरुस गाछ। वै. निघ.।

अनूपदेशः। पुं। अनूपलक्षणयुक्तप्रदेशे। See अनूपः।

अनूपमांसम्। क्ली। अनूपदेशस्थजन्तुमांसे। See आनूपमांसम्।

अनूषणम्। क्ली। उत्पले। शुन्दिफूल, शालुक। रा नि. व. १०।

अनृजुः। त्रि। शठे। असरले। पुं। तगरपुष्पवृक्षे।

अनेकदिग्वायुः। पुं। नानादिग्भवविसंष्ठुलवाते। एलो मेलो वातास।

अनेकपः। पुं। गजे। हाती। मद. व. ११।

अनेकान्तः। पुं। क्वचित्तथा क्वचिदन्यथेति यः सः। सु. उ. ६५ अ।

अनेड़मूकः। वि। वाक्श्रुतिरहिते। मे.। अन्धे।

अनोकहः। पुं। वृक्षे। गाछ।

अन्तःकण्ठशल्यावलोकिनी। स्त्री। नाड़ीयन्त्रविशेषे। सा च दशाङ्गुला भवति। अवि.।

अन्तःकरणम्। क्ली। अन्तरिन्द्रिये, मनसि।

अन्तःकुटिलः। पुं। शल्के। शाँक।

अन्तःकोटरपुष्पी (ष्पिका)। स्त्री। नीलवृक्षायाम्। छागलबेँटे। प. मु.। रत्ना.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्तःपदवी । स्त्री । सुषुम्नाख्यनाड़िकायाम् ।

अन्तःसत्त्वा । स्त्री । भल्लातकवृक्षे । गर्भिण्याम् । शु. च ।

अन्तकः । पुं । काञ्चनारवृक्षे । रक्तकाञ्चन । भा. गु. व । यमे । सन्निपातज्वरविशेषे । तल्लक्षणं—यथा—दाहं करोति परितापनमातनोति, शीर्षं ददाति विदधाति शिरःप्रकम्पं । हिक्कां करोति कसनञ्च समाचुहीति, जानीहि तं विबुधवर्जित-मन्तकाख्यम् । भा म १भ ।

अन्तरम् । क्ली । अवकाशे । छिद्रे । मध्ये । मे. रत्निकं ।

अन्तरापत्या । स्त्री । गर्भिण्याम् ।

अन्तरायामः । पुं । आक्षेपकभेदे । लक्षणं यथा —अङ्गुलीगुल्फजठरहृद्वङ्क्षणगलसंश्रितः । स्नायु-प्रतानमनिलस्तब्धः क्षिपति वेगवान् ॥ विष्टब्धाङ्गः स्तब्धहनुर्भग्नपार्श्वः कफं वमन् । अभ्यन्तरे धनुरिव यदा नमति मानवः । तदा सोऽभ्यन्तरायामं कुरुते मारुतो बली ॥ भा । मा. नि. ।

अन्तरिक्षम् । क्ली । आकाशे । रा. नि. व १३ ।

अन्तरिक्षजलम्) क्ली । आकाशजले । वृष्टिर
अन्तरीक्षजलम्) जल । See गगनाम्बु ।

अन्तरुहा । स्त्री । श्वेतदूर्व्वायाम् ।

अन्तर्जठरम् । क्ली । कोष्ठे । कुक्षिमध्ये । अम ।

अन्तर्दधनम् । क्ली । सुरावीजे । शु. च ।

अन्तर्दाहः । पुं । शरीराभ्यन्तरदाहे । गात्रेर भितरे ज्वाला । कोष्ठसन्तापे । रा. नि. व. २० । सन्निपातज्वरविशेषे । लक्षणं यथा—अन्तर्दाहः शैत्यं बहिः श्वयथुररतिरपि श्वासः । अङ्गमपि दग्धकल्पं सोऽन्तर्दाहार्दितः कथितः ॥ भा. म १भ ।

अन्तर्धूमः । त्रि । बह्निमुखहण्डिकाभ्यन्तरे अग्नि-दग्धे । च. द. ग्रहणी-चि. चिचकत्वारि ।

अन्तर्मलः । पुं । मलान्तरे । कश्चिदतिः ।

अन्तर्महानादः । पुं । शब्दे ।

अन्तर्मुखम् । क्ली । व्रणविस्रावणास्त्रविशेषे । लक्षणं यथा—तद्वदन्तर्मुखं तस्य मध्यमध्यर्द्धमङ्गु-लम् । अर्द्धचन्द्राननं चैतत् तथाध्यर्द्धाङ्गुलं फले ॥ कश्चिदतिः ।

अन्तर्मुखी । स्त्री । स्त्रीयोनिरोगविशेषे । तल्ल-क्षणं—व्यवायसंतप्तायां भजत्यासन्न पीड़ितः । वायुर्मिथ्यास्थिताङ्गाया योनिसीतसि संश्रितः ॥ वक्रयत्याननं योन्याः साश्रिमांसानिलार्त्तिभिः । भृशार्त्तिर्मैथुनासक्ता योनिरन्तर्मुखी मता ॥ च. चि. ।

अन्तर्वत्नी । स्त्री । गर्भिण्याम् । अम. ।

अन्तर्वमिः । स्त्री । अपरिपाके । त्रिका. ।

अन्तर्विद्रधिः । पुं । जठरान्तरस्थविद्रधिरोगे । लक्षणं यथा—पृथक् समूय वा दोषाः कुपिता गुल्म-रूपिणं । वल्मीकवत् समुन्नद्धमन्तः कुर्व्वन्ति विद्रधिम् ॥ गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा । वुक्क्योः प्लीह्नि यकृति हृदि वा क्लोम्नि चाप्यथ । एषां लिङ्गानि जानीयादान्त्रविद्रधिलक्षणैः ॥ भा. ।

अन्तर्वृद्धिः । पुं । अन्त्रवृद्धिरोगे ॥ See अन्त्र-वृद्धिः ।

अन्तर्वेधः । पुं । मर्म्मवेधे । मर्म्मपीड़ायाम् ।

अन्तश्छद्या । स्त्री । वमने । मे. ।

अन्तश्लेहफला । स्त्री । श्वेतकण्टकार्य्याम् ।

अन्तावसायी । (न्) । पुं । नापिते । मे. ।

अन्तिका । स्त्री । मातलायाम् । छागरकर्षा । चुल्लाम् । मे. कन्निकं ।

अन्त्यः । पुं । कुलायाम् । मे ।

अन्त्यपुष्पा । स्त्री । धातकीवृक्षे । वै. निघ. ।

अन्त्रम् । क्ली । पुरीतति । नाड़ीभूँड़ि । रा. नि. व. १८ । उक्ताः सार्द्धत्रयो व्यामाः पुंसामन्त्राणि सूरिभिः । अर्द्धव्यामेन हीनानि योषितीऽन्त्राणि निर्द्दिशेत् ॥ सार्द्धत्रिव्यामान्यन्त्राणि पुंसां स्त्रीणा-मर्द्धव्यामहीनानि । सु. शा. ५अ. । अस्रजः श्लेष्म-णश्चापि यः प्रसादः परो मतः । तं पच्यमानं पित्तेन वायुश्चान्वनुधावति । ततोऽन्त्राण्याजायन्ते गुदं वस्तिञ्च देहिनः ॥ इति तदुत्पत्तिः । सु. शा. ४अ ।

अन्त्रकूजः । पुं । वायुरोगविशेषे । नाड़ीशब्दे । सु. नि. १अ. ।

अन्त्रकूजनम् । क्ली । अन्त्रध्वनौ । आँऽड़ाका, वाक्लेधरा इति भाषा । नि. ।

अन्त्रपाचम् । क्ली । स्थावरविषान्तर्गतत्वक्सार-निर्य्यासविशेषे । सु. कल्प. २अ. ।

अन्त्रवल्लिका । स्त्री । सहिष्णुवल्ल्यां । रा. नि. व. ३ ।

अन्त्रवल्ली । स्त्री । सीमवल्लीलतायाम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्त्रवृद्धिः। स्त्री। Hernia. स्वनामख्यातरोगविशेषे। तल्लक्षणं यथा—वातकोपिभिराहारैः शीततोयावगाहनैः। धारणैरणभाराध्वविषमाङ्गप्रवर्त्तनैः॥ क्षोभणैः क्षोभितोऽत्यैश्च क्षुद्रान्त्रावयवं यदा। पवनो विगुणीकृत्य स्वनिवेशादधो नयेत्। कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्राभं श्वयथुं तदा॥ उपेक्ष्यमाणस्य च सुष्कवृद्धिम् आध्मानरुक्स्तम्भवतीं स वायुः। प्रपीड्तिोऽन्तः स्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः॥ अन्त्रवृद्धिरसाध्योऽयं वातवृद्धि समाकृतिः। मा. नि.।

अन्त्रादः। पुं। आभ्यन्तरकृमौ। मा. नि.। शार्ङ्ग. ७ अ.। See कृमिः।

अन्त्रालजी (मा.) } स्त्री। वातश्लेष्मजन्यक्षुद्ररोगविशेषे। तल्लक्षणं—
अन्त्रोलजी (सु.) } घनामवक्त्रां पिड़कामुन्नतां परिमण्डलां। अन्त्रालजीमल्पपूयां तां विद्यात्कफवातजाम्॥ मा. नि.।

अन्त्री। स्त्री। वृद्धदारकलतायाम्। अ. टी.।

अन्त्यकम्। क्ली। अङ्गारे। रत्ना.।

अन्दिका। स्त्री। क्षुद्रग्राम्। अ. टी.।

अन्धः। त्रि। नेत्रहीने। क्ली। तिमिरे। मे. घटिकं। (न्धस्) अन्ने। रा. नि. व. २०। जले। भरतः।

अन्धकः। पुं। तुम्बुरौ। काँचाधनेर। भा. पू. १भ. ह. व.।

अन्धकाक्षः। पुं। काकाकारे पक्षिणि। प्रांणकोड़ि। मं भेदजुया। विका.।

अन्धकारः। पुं। आलोकाभावे। तत्पर्य्यायः,—ध्वान्तं तमिस्रं तिमिरं तमः (अ), भूच्छायं (रा), अन्धतमासं अन्धतामसं सन्तमसं अवतमसं। गुणाः—भयदृष्टितेजोऽवरोधकरः रोगजनकश्च। राज.।

अन्धकूपः। पुं। मोहे।

अन्धता। स्त्री। पित्तरोगे। वै. निघ.।

अन्धपूतना। स्त्री। बालकग्रहपीड़ाविशेषे। लक्षणम्—यो हृष्टि स्तनमतिसारकासहिक्काच्छर्दीभिर्ज्वरसहिताभिरर्द्यमानः। दुर्वर्णः सततमधःशयोऽन्नगन्धिस्तं ब्रूयुर्भिषजोऽन्धपूतनार्त्तम्॥ चि.—तिक्तद्रुमपत्रसिद्धजलैः स्नानं। सुरादिसाधिततैलम्। पिप्पल्यादिसिद्धघृतादिकञ्च। सु. उ. २७।३२ अ.।

अन्धमूषा। स्त्री। वज्रमूषापरनामके औषधपाकार्थे यन्त्रविशेषे। तस्य लक्षणं यथा—अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा। सैव च्छिद्रान्विता मध्ये गम्भीरा सारणीचिता॥ द्वौ भागौ तुषदग्धस्य एका वल्मीकमृत्तिका। लौहकिट्टस्य भागैकं श्वेतपाषाणभागिकम्। नरकेशसमं किञ्चित् छागीक्षीरेण पेषयेत्॥ यामद्वयं दृढं मर्द्यं तेन मूषां सुसम्पुटाम्। शोषयित्वा रसं क्षिप्त्वा तत्कल्कैः संनिरोधयेत्। वज्रमूषा समाख्याता सम्यक्पारदसाधिका। र. सा. सं.। कश्चिदपि:.।

अन्धमूषिका। स्त्री। देवताड़वृक्षे। देयातोड़ा। तृणविशेषे। श. च.।

अन्धाहिः। पुं। कुँचिया-मीने। कूँचेगाछ, जलमेटे। विका.।

अन्धाहुली। स्त्री। आहुल्यनामकशिम्बीफलवनस्पतिविशेषे।

अम्बिका। स्त्री। सर्षप्यां। स्त्रीविशेषे। मे कविकं। नेत्ररोगविशेषे। श. र.।

अम्बुः। पुं। कूपे। विका.।

अम्बुलः। पुं। शिरीषवृक्षे। श. च.।

अन्नम्। क्ली। शस्ये। व्रीहियवादौ खाद्यद्रव्यमात्रे। चर्व्यचोष्यलेह्यपेयभेदेन अन्नं चतुर्विधम्। केऽपि च निष्पेयचर्व्वणचोष्यखाद्यभेदेनाष्टधा वदन्ति। राजनिघण्टुकारोऽपि अन्नमष्टविधमाह चर्व्यादिभेदेन। व. २०। भक्ते। भात। तत्पर्य्यायः,—भक्तं अन्धः भिक्षा (अटी), अन्नं कसिपुः जीवातुः (ज), क्रूरं (रा), जीवनकं (हे), क्रूरं आपूष्टिकं जीवनि प्रसादनं (शब्द. र.)। तच्च तण्डुलपरिमाणापेक्षया पञ्चगुणजले सिद्धम्। अन्नं पञ्चगुणे साध्यम्। च. द. ज्व. चि। प. प्र. २ख। स्विन्नतण्डुले यथा—शस्यचैत्रगतं प्राहुः सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतम्॥ वशिष्ठः। तथा जलदानप्रमाणतोऽन्नं चतुर्विधम्। चतुर्विधं भवेदन्नं जलदानप्रमाणतः। तत्र भक्तं विलेपी च यवागूः पेयया सह॥ प्रयोगरत्नाकरः। अन्नगुणाः—अग्निकरं पथ्यं तर्पणं मूत्रलं लघु च। तत्र अधौतमन्नमसुतञ्चान्नं—शीतलं गुरु वृष्यं कफजनकं। सुधौतमन्नं उष्णं विशदं गुणकरञ्च। भृष्टतण्डुलजमन्नं—रुच्यं सुगन्धि कफघ्नं लघु च। अतिक्लिन्नं—श्लानिकरं, तण्डुलान्वितं—दुर्जरम्। मद. व. ११।९। धान्यास्ले पाचितं भक्तं लघु अग्निप्रदीपकं रुचिप्रदञ्च॥ वै. निघ.। मथितयुक्तं भक्तं—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वादु शीतलं रूक्षं अग्निदीपनं पाचकं पुष्टिकरं ग्रहण्यर्शःशूलघ्नं। रात्रौ भक्षितं—रूक्षं तृप्तिकरं दीपनमर्शोघ्नञ्च। मुद्गयूषयुक्तं—कफज्वरे, शर्करामिश्रितं—पित्तज्वरे हितम्। लाजभक्तं—लघु शीतलमग्निकरं मधुरं हृद्यं निद्रारुचिकरं व्रणशोधनञ्च। यावकान्नं—गुरु स्वादु हृद्यं स्निग्धं गुल्मज्वरकण्ठरोगकासमेहघ्नञ्च। खेचरान्नं—तर्पणं गुरु हृद्यं धातुवर्द्धकम्। यौगन्धरान्नं—गुरु घनं कासश्वासघ्नञ्च। कौद्रवान्नं—रुचिकरं मधुरं प्रमेहघ्नं मूचदोषघ्नं तृष्णाघ्नं छर्दिकफवातासदाहघ्नञ्च। श्यामाकान्नं—रूक्षं लघु रूक्षं दीपनं बल्यं वातकरं मेहगलरोगमूत्रकृच्छ्रघ्नञ्च। नीवारान्नं—रुचिरं लघु दीपनं गुरुवातकृत् यकृत्प्लीहश्वासव्रणघ्नञ्च। कुलत्थान्नं—मधुरं रूक्षम् उष्णं लघु कटुपाकि दीपनं कफवातकृमिश्वासहरञ्च। माषान्नं—दुर्जरं मांसवृद्धिकरं गुरुवातघ्नं हृद्यञ्च। शिम्बान्नं—मधुरं रूक्षं वातपित्तकोपनञ्च। वैदलान्नं—गुरु रुचिकरं। आढ़कयन्नं—गुरु कफपित्तघ्नञ्च। मत्स्योदनं—कफकरं विदोषकरं अग्निमान्द्यकरञ्च। शाकान्नं—लेखनं रूक्षमुष्णं दीपद्रावकञ्च। मांसौदनं—धातुवर्द्धकं स्निग्धं गुरु च। फलान्नं (फलान्नं)—रूक्षं गुरु फलसमगुणञ्च। षष्टिक-साधारणशाल्यन्नं—दीपनं बल्यं पाचनं विदोषघ्नं त्रयविषघ्नञ्च। नवान्नं मधुरं स्निग्धं गुरु मलस्तम्भनं रक्तपित्तघ्नञ्च। उष्णान्नं—दीपनं लघु श्रमकरं मदात्ययरक्तपित्तप्रमेहवातकरं कासश्वासकृम्याध्मानगुल्मजाड्यघ्नतकासहरञ्च। शीतान्नं—शीतलं लालास्रावकम् अग्निमान्द्यमेहमूर्च्छादिहरञ्च। वै. निघ.। क्लिन्नान्नं—दुर्जरं ग्लानिकरञ्च।

अन्नकालः। पुं। भोजनसमये। तल्लक्षणं,—"क्षुत् सम्भवति पक्वेषु रसदोषमलेषु च। काले वा यदिवाकाले सोऽन्नकाल उदाहृतः॥" भा.।

अन्नकोष्ठः। पुं। तण्डुलधान्यादिरक्षणाधारे। गोला, मराई।

अन्नगन्धिः। पुं। अतिसाररोगे। विका.। मलभेद। मं हृगवण।

अन्नजम्। क्ली। वैदिवसिकान्नमण्डे। मं तिनदिवसाचीं शिलीपेज।

अन्नजा। स्त्री। हिक्काभेदे। पलान्नैरतिसंयुक्तैः सहसा पीड़ितोऽनिलः। हिक्कयत्यूर्द्धगो भूत्वा तां विद्यादन्नजां भिषक्॥ भा.।

अन्नद्रवशूलः। पुं, क्ली। परिणामशूले। तल्लक्षणं यथा,—यदा जीर्य्यत्यजीर्णे वा यच्छूलमुपजायते। पथ्यापथ्यप्रयोगेन भोजनाभोजनेन च। नश्यं याति नियमात् सोऽन्नद्रव उदाहृतः॥ मा. नि. See परिणामशूलम्।

अन्नद्रवाख्यः। पुं। अन्नद्रवशूले। मा. नि.।

अन्ननाड़ी। स्त्री। अन्नपाकनाड्याम्। सा च २० हस्तमिता कलापेशीनिर्म्मिता। तदुक्तं—हस्तविंशतिप्रमाणा कलापेशीविनिर्म्मिता। अन्नपाकक्रियार्था च पाकनाड़ी प्रकीर्त्तिता॥ ऊर्द्धांशी मुखनामास्य अधोऽंशी गुदनामकः। कण्ठादामाशयं यावदन्ननाड़ी तु कथ्यते॥ ततश्चामाशयस्तस्मात् स्थूलान्तः स्थूलमस्तकः। आमाशयात् समारभ्य भागः प्रथम आन्त्रिकः। ग्रहणी चाग्न्यधिष्ठानं बुधैराद्यैः प्रकीर्त्तितः। ततः पक्वाशयः प्रोक्तः पक्वान्नपरिधारणात्॥ स्थूलान्त्रस्याप्यधोभागः सरलोगुदसंज्ञकः। अन्नकिट्टं मलं सर्व्वं वहिर्निःसारयत्ययम्॥ श्वासनाड्याः स्थिता पश्चादन्ननाड्यन्नवाहिनी। अधस्तात् कण्डलीभूता नाड़ी चोदरमध्यगा॥ कण्ठादधोगतिर्नाड़ी भित्त्वा वक्षःस्थलाश्रयां। पेशीसुखह्रयवर्तीं प्रविष्टेयमधोगुहाम्। इत्यादि। आवेयः।

अन्नप्राशनम्। क्ली। षष्ठे अष्टमे वा मासि बालस्यान्नभोजने। भा.।

अन्नमण्डः। पुं। भक्तमण्डे। भातेर माड़। गुणाः—क्षुद्दोषघ्नो वस्तिविशोधनश्च प्राणप्रदः शोणितवर्द्धनश्च। ज्वरापहारी कफपित्तहन्ता वायुञ्जयेदष्टगुणो हि मण्डः॥ च. द. अग्निमा. चि.।

अन्नमयः। पुं। स्थूलशरीरे।

अन्नमयकोशः। पुं। शरीरे।

अन्नमलम्। क्ली। पुरीषे। मदे।

अन्नरसः। पुं। भक्तमण्डे।

अन्नलिप्सा। स्त्री। अन्नभोजनेच्छायाम्। क्षुधायाम्। वै. निघ.। प्रकृतिगामिमनोऽन्नलिप्सा। च. द.।

अन्नवहा। स्त्री। धमनीयुगले। याभ्यां भुक्तमन्नमुदरं नीयते। सु. शा. ९अ.। तयोर्मूलमामाशयः, अन्नवाहिधमन्यश्च।

अन्नवाहिस्रोतः। क्ली। गलनाड्याम्। गलार ननी।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्नविकारः। पुं। Seminal secretion. भक्तविकृतौ।

अन्नविपाकनाड़ी। स्त्री। अन्ननाड्याम्। यथा—विचित्तविधिना पक्वमन्नं सत्त्वानि जीवयेत्। अन्नयासी रसैः पिष्टो लालाक्लिन्नोऽन्ननाड़िकाम्॥ श्वासरन्ध्रं नासारन्ध्रञ्चातिक्रम्य सुखं विशेत्॥ निरुणद्धुप्रजिह्वा सा सर्व्वथा श्वासनाड़िकां। जिह्वा प्रयाति पश्चाच्च पाकनाड़ीं ततोऽभितः॥ किञ्चिदूर्द्ध्वमुखी भूत्वा पिण्डं ग्रसति यत्नतः। आदारस्त्रप्रविष्टं चेदन्नं कासैर्विनिःसरेत्॥ द्वितीयगं त्वधुना त्वणेन प्रकृतेर्बलात्। अतो नैवातित्वरणं श्रेयः पानान्नकर्म्मणि॥ आचेयः।

अन्नशेषः। उच्छिष्टान्ने। एँटो भात।

अन्नाजीर्णम्। क्ली। अन्नं भुक्तं तदजीर्णञ्चेति अन्नाजीर्णम्। भा. स. १अ. आमातीसा.। "अन्नाजीर्णान्मृतः क्षीभयन्तः।" तन्नामकगुल्मरोगे।

अन्नाद्यम्। क्ली। अन्ने। भात। रा. नि. व. २०। धान्ये।

अन्नाशयः। पुं। उदरे।

अन्यकारुका। स्त्री। शुक्लकीटे। हारा.।

अन्यतोवातः। पुं। सर्व्वाङ्गिगतरोगे। अत्र वा अन्यत्रावस्थितस्य वायोरन्यत्र वेदनोत्पादकत्वात्तथाभिधानम्। लक्षणं यथा—"यस्यावटूकर्णशिरोहनुस्थः मन्यागतो वाप्यनिलोऽन्यतो वा। कुर्य्यादृजुं वै भुवि लोचने च तमन्यतोवातमुदाहरन्ति॥" मा. नि.।

अन्यपुष्टः। पुं। कोकिले। कोकिल।

अन्यभृत्। पुं। कोकिले। हला.। काके। हे. च.

अन्यभृतः। पुं। कोकिले। रत्ना.।

अन्यलोहम्। क्ली। कांस्यधातौ। वै. निघ.।

अन्या। स्त्री। हरीतक्याम्। वै. निघ.।

अन्येद्युष्कः। पुं। उरःस्थश्लेष्मजन्ये विषमज्वरविशेषे। तल्लक्षणं—"अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते" इति। मा. नि.।

अन्वाशनम्। क्ली। कर्म्मशालायाम्। हला.। सेहवस्तौ।

अन्वासनम्। क्ली। अनुवासने। स्नेहवस्तौ।

अन्वाहिकः। त्रि। प्रात्यहिके।

अप्। स्त्री। जले।

अपः(स्)। क्ली। जले।

अपक्वः। त्रि। आमे, अशृते। काँचा। तत्पर्य्यायः,—असिद्धं आमं अशृतं (र)। तैले विपर्य्ययं विद्यात् पक्वे चापक्व एव च। प. प्र.।

अपक्वकदली। स्त्री। अपक्वरम्भायाम् काँचकला। सं. गुण केले। गुणाः—अपक्वकदलञ्चैव मलस्तम्भकरं मतम्। तिक्तं कषायं रुचञ्च रक्तपित्ततृषाहरं। स्नेहाग्निरोगरक्तातिसारज्वरविनाशकृत्॥ वै. निघ.।

अपक्वमांसम्। क्ली। असिद्धमांसे। काँचा मांस। गुणाः—अपक्वन्तु भवेन्मांसं रक्तदोषकरं मतम्। वातादिदोषजनकमिति मांसविदां मतम्। वै. निघ.।

अपक्ववस्तु। क्ली। असिद्धे अशृते च वस्तुनि र. मा.।

अपक्वक्षीरम्। क्ली। अपक्वदुग्धे। काँचा दूध। गुणाः—अभिष्यन्दि गुरु च।

अपघनः। पुं। शरीरावयवे। अङ्गे। अम.।

अपघातः। पुं। अस्वाभाविक-मरणे।

अपचायितः। पुं। रोगे।

अपचारः। पुं। अजीर्णे।

अपची। स्त्री। गण्डमालाख्यगलरोगविशेषे। तस्या लक्षणम्—हन्वस्थिकाक्षाक्षकबाहुसन्धिमन्यागलेषूपचितस्तु मेदः। ग्रन्थिं स्थिरं वृत्तमथायतं वा स्निग्धं कफश्चाल्परुजं करोति॥ तं ग्रन्थिभिश्चामलकास्थिमात्रैर्मसूराण्डजालप्रतिमैस्तथान्यैः। अनन्यवर्णैरुपचीयमानं चयप्रकर्षादपचीं वदन्ति॥ कण्डूयुतास्तेऽल्परुजः प्रभिन्नाः स्रवन्ति नश्यन्ति भवन्ति चान्ये। मेदःकफाभ्यां खलु रोग एष सुदुस्तरो वर्षगणानुबन्धी॥ सु. नि. ११अ.।

अपटुः। त्रि। रोगिणि। रा. नि. व. २०।

अपतन्त्रः } पुं। स्नायुसंख्यातवातव्याधिरोगे।
अपतन्त्रकः } अत्र कुपितो वायुरूर्द्ध्वं चरन् हृदयशिरःशङ्खसंश्रितस्तत्स्थानं पीड़यन् देहं धनुरिव नतमाक्षिपत्यञ्च करोति। तेन मूर्च्छा स्तब्धता निःसंज्ञता श्वासकाठिन्यं कपोतवत्कूजनं च जायते। लक्षणं—क्रुद्धः स्वैः कोपनैर्वायुः स्थानादूर्द्ध्वं प्रपद्यते। पीड़यन् हृदयं गत्वा शिरःशङ्खौ च पीड़यन्॥ धनुर्वन्नमयेद्गात्राण्याक्षिपेन्मोहयेत्तदा। स लब्धादुच्छ्वसेच्चापि स्तब्धाक्षोऽथ निमीलकः॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपीत इव कूजेच्च निःसङ्गः सीऽपतन्त्रकः। भा. नि: वा. व्या.। अशापतन्त्रकेनार्त्तमातुरं नापतर्पयेत्। निरूहवस्तिं वमनं सेवयेन्न कदाचन॥ इत्यादि चिकित्सा।

अपतर्पणम्। क्ली। तृप्त्यभावे। लङ्घने। हारा. च. द. रक्तपित्त चि.। व्रणीक्षायीपशाल्यर्थमाद्ये उपक्रमे। सु. चि. १अ.।

अपतानः } पुं। वातव्याधिविशेषे। अत्र
अपतानकः } दृष्टिनाशः संज्ञानाशश्च भवति; कण्ठस्थानमन्यक्तं कूजति; वायुर्यदा हृदयमाक्रामति तदा मूर्च्छा, यदा च हृदयाच्चलति तदा स्वास्थ्यं जायते। लक्षणम्—दृष्टिं संस्तभ्य संज्ञाञ्च हृत्वा कण्ठेन कूजति। हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः। वायुना हारुणं प्राहुरेके तमपतानकम्। मा. नि. वा. व्या.। गर्भपातादिनिमित्तः सः न सिध्यति। अपतानकिने शस्तं दशमूलीश्रृतं जलम्। तैलेन मर्दनं स्वेदः तथा तीक्ष्णेश्च नावनम्। स्नेहविशेषधनं पयात् सर्पिःपानं हितं स्मृतम्॥ साधारणचि.।

अपत्यम्। क्ली। पुत्रे।

अपत्यजीवः। पुं। पुत्रजीववृक्षे। जिया पूता गाछ। रा. नि. व. ९।

अपत्यदा। स्त्री। पुत्रदालतायाम्। रा. नि. व. ४।

अपत्यपथः। पुं। योनौ। हे. च.।

अपत्यशत्रुः। पुं। कर्कटे। श्र. च.।

अपत्यसिञ्जित्। पुं। पुत्रजीववृक्षे। वै. निघ.।

अपत्रवल्लिका। स्त्री। अहिपत्रवल्ल्यां। सोमलतोविशेष। सं ल्ल्सोमवल्ली। रा. नि. व. ३।

अपत्रा। स्त्री। पुष्पवृक्षविशेषे। नेवतीति ख्याते॥ वै. निघ.।

अपथम्। क्ली। योनौ। श्र. र.।

अपथ्यम्। क्ली। अहिते वस्तुनि।

अपथ्यज्वरः। पुं। कुपथ्याजन्यज्वरे। अपथ्याजे मद्यभवे च हेतुर्हेतुर्ज्वरे पित्तमुदाहरन्ति। दाहश्च तत्रैव शिरोव्यथा च कीष्ठाभिवृद्धिः कथितोदकक्लेदसलातिपातस्वतिबहुता च अपथ्यादोषेण भवेज्ज्वरे च॥ वै. निघ. २भा. ज्व.।

अपदः। त्रि। पादहीने, पक्षिणि। पुं। सर्पे।

अपदकन्दा } स्त्री। वन्दायाम्। वान्दरा।
अपदरोहिणी } सं वादांगुल। वै. निघ.।

अपदेवता। स्त्री। पिशाचादौ।

अपदेशः। पुं। अनेन कारणेनेत्यपदेशः। यथोपदिश्यते अधुरिण श्रेष्ठाभिवर्द्धते। सु. उ. ६५ अ.।

अपबाहुकः। पुं। वातकफजे असगतवातव्याधिविशेषे। लक्षणम्—अंसदेशश्रितौ वायुः शीघ्रवेदशबन्धनं। शिरोबाहुग्रहं तत्रैव जनयेदपबाहुकम्॥ भा. नि.।

अपरम्। क्ली। गजपर्यादर्द्धे। मे. रत्निकं।

अपरा। स्त्री। जरायौ। हिं आंवर्। भा. पू. ४ भ प्रसवोपद्रवचि.। जठरादपरा यदि। पञ्चतत्त्वावसनीबुद्बुदाकारा एवापरेत्युच्यते, तेषामेव प्रकृतेरुपत्वात्।

अपराजितधूपः। पुं। धूपीद्रव्यं सर्व्वज्वरघ्नः। स च गुग्गुलुशल्लकीसर्जनिम्बार्कागुरुदेवदारुकृतः। पुरुषाभवचासर्जेत्यादि। च. द ज्व. चि.।

अपराजिता। स्त्री। खनामख्यातलतायाम्। (Clitoria Ternatea.) अपराजिता। हिं विष्णुक्रान्ति। तें नलनेलगुम्मिरि। विष्णुक्रान्ता। नक्तविष्णुक्रान्ता। तत्पर्य्यायः,—आस्फोता, गिरिकर्णी विष्णुक्रान्ता (अ), गिरिशालिनी (के), दुर्गा (श), अस्फोटा (अ. टी.), गवाची अश्वखुरी श्वेता श्वेतभण्टा गवादनी (र), अद्रिकर्णी कटभी दधिपुष्पिका गर्द्दभी सितपुष्पी श्वेतस्पन्दा भद्रा सुपुत्री विषहन्त्री नगपर्य्यायकर्णी अश्वाह्वादिखुरी। गुणः —कटुः तिक्ता कफवातघ्नी शीघ्रघ्नी कासघ्नी कण्ठ्या च। राज.। त्रिदोषशमनी चक्षुष्या विषदोषघ्नी पित्तघ्नी हिमा तिक्ता च। रा. नि. व. ५। भा. पू. १भ. गु. व.। एषा श्वेतनीलभेदेन द्विधा, तयोर्विशेषाः श्वेतनीलापराजिताशब्दे वक्ष्यन्ते। पीतनिर्गुण्ड्याम्। जयन्तीवृक्षे। श्वेतापराजितायाम्। रा. नि. व. २३। शालपर्ण्याम्। भा. पू. २भ.। श्वेतसिन्धुवारे। श्वेतनिर्गुण्डी। ब्राह्मयां। शमीभेदे। रा. नि व. ८। जयन्तीवृक्षे। रा. नि. व. ४। शेफालिकायां। रा. नि. व. ४। शङ्खिन्यां। वपुषभेदे। वपुषाभेदे। रा. नि. व. ४।

अपराह्णः। पुं। दिवसशेषभागे। अत्रच प्राह्णलक्षणं। सु. सू. ६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरिम्लानः। पुं। रक्ताम्लानपुष्पवृक्षे। रा. नि. व. १०।

अपरेद्युः। अव्ययं। परदिने।

अपर्व्वदण्डः। पुं। रामशरे। रामबाण। रा. नि. व. ८।

अपलापः। पुं। तन्नामकशिरामर्म्मणि। अंसकूटाधोभागे पार्श्वोपरि च तस्य स्थानं। सु. शा. ६अ.।

अपलाषिका। स्त्री। पिपासायाम्। हे. च.।

अपवनम्। क्ली। क्लविसवने। हे. च.।

अपवरकः। पुं। गर्भगृहे। हला.।

अपवर्गः। पुं। अभिव्याप्यापकर्षणे। यथा—स्नेह्या विषोपसृष्टा अन्यत्र कीटविषादिति। सु. उ. ६५ अ.।

अपविषा। स्त्री। निर्विषवृक्षे। रा. नि.।

अपशोकः। पुं। अशोकवृक्षे। रा. नि. व. १०।

अपसव्यः। वि। दक्षिणे। प्रतिकूले। मे.।

अपस्करः। पुं। मलद्वारे। पुरीषे। धर.।

अपस्तभ(म्ब)मर्म्म। क्ली। तन्नामकशिरामर्म्मणि। तस्य स्थानं वक्षस उभयत वायुवाहिन्यौ नाड्यौ। "उभयतोरसी नाड्यौ वातवहे अपस्तम्भौ नाम।" सु. शा. ६अ.।

अपस्तम्भिनी। स्त्री। शिवलिङ्गिनीलतायाम्। वै. निघ.।

अपस्वरम्। अव्ययं। स्वभावस्वरादपगते। हीनस्वरे। वा. शा. ५अ. ४० श्लो.।

अपस्मारः (-स्मृतिः)। पुं। Epilepsy. स्वतामप्रसिद्धवातव्याधौ। अपस्मार, मृगी। मं फेफ्रे। स चतुर्विधः वातवित्तकफसन्निपातैः। अस्य च साधारणलक्षणं ज्ञानाभावसंस्मादिकम्। यथा—तमःप्रवेशः संस्मृतौ दीर्घोद्रेकहतस्मृतेः। अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः॥ तस्य सनिदानसम्प्राप्तिः—चिन्ताशोकादिभिः क्रुद्धा दोषा हृत्स्रोतसि स्थिताः। कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्व्वते। हृत्कम्पः शून्यता खेदो ध्यानं मूर्च्छा प्रमूढ़ता। निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यथ॥ इति सा. पूर्व्वरूपम्। वातिकरूपम्—कम्पते प्रदशेदृन्तान् फेणोद्गमौ श्वसित्यपि। परूषारुणकृष्णानि पश्येद्रूपाणि चानिलात्॥ पीतफेनाङ्गवक्त्राक्षः पीतापैत्तिकः। श्लेष्मफेनाङ्गवक्त्राक्षः शीतहृष्टाङ्गजो गुरुः। पश्यन् शुक्लानि रूपाणि श्लैष्मिको सुच्यते चिरात्॥ सर्व्वैरेभिः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः। स चासाधोमतीयः स्यात् क्षीणस्यानवकश्च यः इत्यादि। सा. नि.। पथ्यापथ्यं यथा—वस्तिर्वातोल्बणे पूर्व्वं पैत्तिके च विरेचनम्। वमनं श्लेष्मके चापि परं धूपनमञ्जनम्॥ नस्यं शिराव्यधोदानं वासनं बन्धनं भयम्। तर्जनं ताड़नं हर्षो धूमपानञ्च विस्मयः। धीधैर्य्यादि विज्ञानं स्नानमभ्यञ्जनानि च। लोहितः शालयो रूक्षा गोधूमाः प्रतनं हविः। कूर्म्माभिषं धन्वरसा दुग्धं ब्रह्मीदलं वचा। पटोलं वृन्ताकुष्माण्डं वार्त्ताकं स्वादु दाड़िमम्। शीताञ्जनं पयःपेटी द्राक्षा धात्री परूषकम्। तैलं खराश्वमूत्रञ्च गगनाम्बु हरीतकी। अपस्मारगदे नृणां पथ्यमेतदुदीरितम्। चिन्तां शोकं भयं क्रोधमशुचीन्यशनानि च। सर्व्वं मद्यं विरुद्धान्नं तीक्ष्णोष्णं गुरु भोजनं। अश्वापस्मारि जयदत्तः यथा—"पतत्यकस्माद्यो भूमौ सञ्ज्ञाच्युतो गतचेतनः। स्वस्थाश्वयोऽपि यः शीघ्रं सोऽपस्मारीति कीर्त्तितः॥ उन्मादोक्तक्रियां सर्व्वां ततः कुर्य्याद्विचक्षणः। घृतस्यातिपुराणस्य तस्य पानञ्च शस्यते॥"

अपांधातुः। पुं। रसजलमूत्रस्वेदमेदःकफपित्तरक्तादौ। भा. म. १भ. अतिसा. चि.। "संशम्यापांधातुरग्निः प्रवृद्धः।"

अपांपित्तम्। क्ली। चित्रकवृक्षे। अम.।

अपाकः। पुं। अजीर्णे। पाकाभावे। उदरामये।

अपाकशाकम्। क्ली। आर्द्रके। आदा। मं आलें। रा. नि. व. ६।

अपाङ्गः। वि। अङ्गहीने। मे। पुं। नेत्रप्रान्ते। रा. नि. व १८। तिलके। मे. गविकम्। तन्नामकमर्म्मणि। तत्स्थवैकल्यकरमर्म्मान्यतममर्म्मद्वये वा। सु. सा. ६अ.।

अपाङ्गकः। पुं। अपामार्गवृक्षे। आपाङ्। भ्रू.र.।

अपाटवम्। क्ली। रोगे। जाड्ये। रा. नि. व. २०।

अपानः। पुं। गुदापानवायौ। अम.। अपान पवनो मन्यापृष्ठपृष्ठान्तपार्श्विगः। हे. च. ४। वृषणौ वस्तिमेढ्रञ्च नाभ्यूरुवङ्क्षणौ गुदं। अपानस्थानयन्त्रस्थः शुक्रमूत्रशकृन्ति सः। सृजत्यार्त्तवगर्भौ च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युक्ताः स्थानस्थिताश्च ये। स्वकर्म्म कुर्व्वते देही धार्य्यते तेरनामयः॥ च। क्ली। गुदे। गलद्वारं। रा. नि. व. १८। वा. सू. ११ अ.।

अपानदेशः। पुं। गुददेशे। वै. निघ.।

अपामार्गः। पुं। (Achyranthis aspera; Bidentata.) खनामख्यातवृक्षे। आपांङ्। हिं लटजीरा, चिरचिरा। अन्यकुड़क इति। सु. सू. ३९। शिरो. चि.। तें उत्तरिणी। मं आघाड़ा। तत्पर्य्यायः,—शैखरिकः धामार्गवः मयूरकः प्रत्यक्पर्णी कोशपर्णी किनिही खरमञ्जरी (अ), अपाङ्कः किनिः कीशपर्णः चमत्कारः (शब्दर), शैखरेयः अधामार्गवः केशपर्णी (अ. टी.), स्थलमञ्जरी प्रत्यपुष्पी चारमधाः अधीघण्टा शिखरी (र), दुर्ग्रहा (भा), दुर्ग्रहः अश्वशल्यः कान्तीरकः मर्कटी दुरभिग्रहः वासिरः पराक्पुष्पी कण्टी कर्कटपिप्पली कटुमञ्जरिका अघाटः चरकः पाण्डूकण्टकः नालाकण्टः कुब्जः मालाकण्टः आघाटः। स द्विधा—श्वेतकृष्णरक्तभेदात् भिन्नोऽपि गुणैः समश्च। गुणाः तिक्तोष्णः कटुः कफघ्नः अर्शःकण्डूदुरामघ्नो रक्तघ्नः ग्राही वान्तिकृत्। रा. नि. व. ४। सरस्तीक्ष्णो। वा. सू. १५ अ.। शिरोविरेचने। च द. सन्निपातज्वरचि.। "पृश्निपर्णी त्वपामार्गः।" दीपनः तिक्तः कटुः पाचकी रोचनः हृद्रोगाध्मानार्शःकण्ड्वादिकं हन्ति। भा. पू. १भ.। तत्त्वं रक्तपित्तघ्नम्। मद. व १। श्वेतश्चापामार्गकस्तु तिक्तोष्णो ग्राहकः सरः। किञ्चित्कटुः कान्तिकरो पाचकोऽग्निप्रदीपकः। नस्ये वान्तौ प्रशस्तः स्यात्कफकण्डूदरापहः। दुर्नामानं रक्तरुजं मेदोरुगुदरे तथा। वातसिध्मापची-दद्रुवाल्यामानां विनाशकः। रक्तापामार्गकः किञ्चित्कटुकः शीतलः स्मृतः। मन्यावष्टम्भवस्तिक्तहातविष्टम्भकारकः। रुचौ व्रणे विषे वातं कफं कण्डूञ्च नाशयेत्। बीजमस्य रसे पाके दुर्जरं स्वादु शीतलं। मलावष्टम्भकं रुच्यं वान्तिकृत् रक्तपित्तजित्। तीयापामार्गकश्चीक्तः कटुः शीथकफापहः। कासं वातञ्च शीषञ्च नाशयेदिति च स्मृतः। वै. निघ.।

अपामार्गजटा। स्त्री। अपामार्गमूले। सि. यो. तृतीयकज्वर. श्रीकण्ठः। "अपामार्गजठाकीर्य्यां॥" च. द सन्निपातज्व. चि.। एतद्बन्धनं तृतीयकज्वरे हितम्। अपामार्गस्य मूलञ्च सम्यगुच्चालितानन। बध्नीयाद्दामहस्तेन सर्व्वज्वरविमोचणम्॥ वैद्यकम्।

अपामार्गतण्डुलः। पुं। अपामार्गबीजे। च. सू. ४ अ.। See अपामार्गः।

अपामार्गतैलम्। क्ली। शिरोरोगे। अस्य पाठः—अपामार्गफलव्योषनिशाचवकरामठैः। सविड़ङ्गैः शृतं मूत्रे तैलं नस्यं कृमीन् जयेत्॥ अत्र चवकः=हेँचेता। तैलं ४ श. कल्कः १ श.। प्रयोगा.। च. द.।

अपामार्गक्षारः। पुं। अष्टविधक्षारान्यतमक्षारे। एष गुल्मशूलघ्नः। भा. पू. १भ. हृ. व.।

अपामार्गक्षारतैलम्। क्ली। कर्णरोगे। तिलतैलं ४श. अपामार्गक्षारः २श. वारि १६श. एकविंशतिवारान् परिस्राव्य क्षारवारि कुर्य्यात्। (मतान्तरे तु क्षारपरिमाणं २६प. वारि च १६श.। कल्कद्रव्यं शरावमितं। च. द. भैष. कर्ण-रो. चि.। अपामार्गक्षारजले तत्कृतकल्केन साधितं तिलजं। अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः॥ अपामार्गक्षारस्य १६ श. जलस्य २४ श. एकविंशतिवारान् परिस्राव्य तैः १६ श. तैलशीषभयात् जलेनालीञ्चापामार्गक्षारकल्की देयः, पिण्डीभूतात् कल्कात् पृथग्भूतं तैलं ग्राह्यं न तु गालनीयम्। इति प्रयोगा.।

अपालापमर्म्म। क्ली। पृष्ठवंशवक्षःस्थलयोरन्तरालभागे। तथा तयोरेव च पृष्ठोरसोर्य्ये पार्श्वे, तयोरुपरिभागयोरंसकूटयोरधोऽपालापाख्ये द्वे मर्म्मणीति ज्ञेयम्। वा. शा. ४अ.।

अपासनम्। क्ली। मारणे। अम.।

अपीनसः। पुं। नासारोगविशेषे। पीनसरोग। लक्षणं यथा—"आनह्यते यस्य विधूयते च पाच्यते क्लिद्यति चापि नासा। न वेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं व्यवस्येत् तमपीनसेन॥ तच्चानिलश्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गं" मिति। सु. चि. २अ.। तथा "यो मस्तुलुङ्गाद्दनपीतपक्वं कफं स्रवेन्नाढ़मपीनसः सः।" च. चि.।

अपुच्छा। स्त्री। शिंशपावृक्षे। श. र.।

अपुष्टः। त्रि। अपरिपक्वे। कचि।

अपुष्पः। पुं। उदुम्बरवृक्षे। यज्ञडुमूर गाछ।

अपुष्पफलदः। पुं। पनसवृक्षे। काँठालगाछ। मं फणस। रा. नि. व. ११। अपुष्पजातफलवृक्षमात्रे। रा. नि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपूपः। पुं। पिष्टके। हला। पूलि पिटे। मं धारणे। गोधूमसूक्ष्मपिष्टं गुड़ेन युक्तं जलेन संस्रुदितं। तद्वेल्यी वर्त्तुलनिभा घृते विपक्वा भवन्ति चापूपाः। बल्या हृद्या रुचिदा गुरवी हृष्याश्च तुष्टिदाः प्रीक्ताः। पित्तानिलश्रमनकरा मधुराः प्रीक्ताः.....। वै. निघ। पाँउरुटी। इति च केचिदाहुः। गोधूमे। रा. नि. व. १६।

अपूप्यः। पुं। गोधूमे। गोधूमचूर्णे। मय्दा।

अपूरणी। स्त्री। शाल्मलीवृक्षे। शिमूलगाछ। भ्र. च.। कार्पासवृक्षे।

अपेकः। पुं। दुरालभायाम्।

अपेतराक्षसी। स्त्री। तुलसीवृक्षे। रा. नि. व. १०। कृष्णतुलस्यां। काल तूलसी। मं कालीतुलस। भा. पू. १भ. गु. व. वर्ब्बर्य्यां। बाबुई। र. मा.।

अपोगण्डः। त्रि। बलिभे। विकलाङ्गे। पुं। शिशौ। मे. डचतुष्कं।

अपोदिका। स्त्री। पूतिकाशाके। पूई। अ. टी।

अप्सम् (स्)। क्ली। जले।

अप्पित्तम्। क्ली। चित्रकवृक्षे। अम.।

अप्रकाण्डः। पुं। काण्डरहितवृक्षे, भिण्ठिकादौ। अम.।

अप्रकृष्टः। पुं। काके। भ्र. र.। त्रि। अधमे।

अप्रतिकार्य्यः। त्रि। दुश्चिकित्स्ये।

अप्रसवधर्म्मी। त्रि। यः पुरुषः प्रसवधर्म्मी न भवति। "बह्वस्तु पुरुषाश्चेतनावन्तोऽगुणा अवीजधर्म्मिणोऽप्रसवधर्म्मिणो मध्यस्थधर्म्मिणश्चेति" सु. शा. १अ.।

अप्रहतः। त्रि। मालचेचे। केदार भूमि। मं मालभूमि। खिलभूमौ। रा. नि. व. २।

अप्रिया। स्त्री। शङ्खीमत्स्ये। शिंडी गाछ। बोदालिमत्स्ये। बोओयाल गाछ।

अप्रेतराक्षसी। स्त्री। तुलसीवृक्षे। र. मा.।

अप्रोटः। पुं। भारद्वाजाख्यपक्षिणि। वै. निघ.।

अफलः। पुं। फलहीनवृक्षे। झाउ गाछ। मं वांझवृक्ष। हे. च. ४का.। त्रि। यो न फलति। भ्र. च.।

अफला। स्त्री। भूम्यामलक्यां। काष्ठधात्रीवृक्षे। भा. रा. नि. व. ११। लघुकारवेल्लके। आमलकीवृक्षे। भा. पू. १भ.। कुमार्य्याम्। घृतकुमारी। भ्र. च.।

अफेनम्। क्ली। अहिफेने।

अफेनफलम्। क्ली। अहिफेनफले। पोस्त ढेंड़ि। भैष. स्त्री-रोग चि.।

अफेलम्। क्ली। आफ़ीके। आफ़िं। मं अफू कड़री। फा. कफफून। हिं अफीम। आं लव्नुस्खास्। वै. निघ। See अहिफेनम्।

अबरम्। क्ली। अन्तर्वस्त्रे। मे. रत्निकं।

अबलः। पुं। वरुणवृक्षे। भ्र. च.।

अबालुकः। पुं। पानीयालुके। रा. नि. व. ७।

अबिला। स्त्री। मेष्याम्। भेड़ी।

अबेद्यः। पुं। मत्स्ये।

अब्जः। पुं। निचुलवृक्षे। शङ्ख। धन्वन्तरौ। हिज्जलवृक्षे। सर्व्वत्र मे. जह्निकं।

अब्जम्। क्ली। पद्मे। प. मु.। रा. नि. व. १०। See कमलम्।

अब्जकर्णिका। स्त्री। कमलबीजकोशे। वै. निघ.।

अब्जकेशरः। पुं। पद्मकेशरे। च. द.।

अब्जभोगः। पुं। कमलकन्दे। भ्र. च.।

अब्जबीजभृत्। पुं। श्वेतकरवीरवृक्षे। वै. निघ.।

अब्जाह्वम्। क्ली। बालके। बाला। मं बाला। वै. निघ.।

अब्जिनी। स्त्री। पद्मिन्यां। पद्मेर झाड़। रा. नि. व. १०। पद्मसमूहे।

अब्दः। पुं। मुस्तायां। सि. यो. ज्वर. किरातादि। च. द. वातज्व. चि.। "किराताब्दास्तदीदीच्या।" नागरमुस्तायां। नागरमूता। मं नागरमोथ। भद्रमुस्तायां। मं भद्रमोथ। मद. १व.। मेघे। मे. दन्तिकं। क्ली। अभ्रके। र. मा.।

अब्दनादः। पुं। मेघनादवृक्षे। काँटानटे। स्त्री। शङ्खिन्यां, भेक्यां। मं तान्दुजल। ब्र. निघ.।

अब्दसारः। पुं। कर्पूरभेदे। रा नि.।

अब्धिः। पुं। समुद्रे। रत्ना.।

अब्धिकफः। पुं। समुद्रफेने। समुद्रेर फेना। भा. पू. १भ. ह. व.। गुणाः—रुचिकरः लेखन

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तुवरी लघुः।" "चक्षुष्यः शीतलश्चैव पटलादिरुजाहरः। सरश्च विषदोषघ्नः कर्णशूलहरः परः। कफञ्च कण्ठरोगञ्च पित्तञ्चैव विनाशयेत्॥" वै. निघ.।

अब्धिजः। पुं। समुद्रफेने। रत्ना. (-जौ)। अश्विनीकुमारौ।

अब्धिजा। स्त्री। सुरायां। हे. च.।

अब्धिडिण्डीरः। पुं। समुद्रफेने। वै. निघ.।

अब्धिफलम्। क्ली। समुद्रजातफले। महाराष्ट्रादौ ख्याते औषधविशेषे। समुद्रफल इति लोके। गुणाः—फलं समुद्रस्य कटूष्णकारि वातापहं भूतनिरोधकारि। चिदोषदावानलदोषहारि कफामयश्वासविरोधकारि। रा. नि.।

अब्धिफेनः। पुं। समुद्रफेने। रा. नि.।

अब्धिमण्डुकी। स्त्री। मुक्तास्फोटे, शुक्तिकायां। झिनुक। मद. व. ४। मं मोतीसीप। हे. च. ४ का.।

अब्धिवृक्षः। पुं। शाखिमूलवृक्षे। काकातीदालीति लोके।

अब्धिसारः। पुं। रत्ने। वै. निघ.।

अब्धिहिण्डीरः। पुं। समुद्रफेने। रा. नि.।

अभ्रम्। क्ली। अभ्रधातौ। सुवायाम्। रा. नि.

अब्रह्मचर्य्यकम्। क्ली। मैथुने। विका.।

अभक्तच्छन्दः। पुं। अरोचकभेदे। यत्र नान्ने भवेच्छ्रद्धा सोऽभक्तच्छन्द उच्यते। See अरोचकः।

अभयम्। क्ली। उशीरे। वीरणमूले। वेणार मूल। रा. नि. व. १२। मद. व. ३। अम.। भैष. कुष्ठचि. कन्दर्पसारतैले।

अभयदा। स्त्री। भूम्यामलक्यां। भूँई आंवला। मं भूम आंवली। वै. निघ.।

अभयनृसिंहरसः। पुं। रसौषधं अतीसारग्रहणीगदयोर्हितः। मात्रा १ गुञ्जा। अनुपानं जीरकचूर्णं मधु च। द्रव्याणि हिङ्गुलचिकटुविषजीरक-टङ्कण-रसगन्धकाभ्राणि प्रत्येकं समभागानि सर्व्वसन्नमहिफेनम्। निम्बुकरसेन मर्द्दनं। भैष.।

अभया। स्त्री। (Terminalia chebula ; chebulic myrobalan.) हरीतकीभेदे। प. सु.। "पञ्चास्या चाभया ज्ञेया।" रा. नि. व. ११। इयं बाहुल्येन चम्पायां जायते। गुणाः—चक्षुष्या। भा. पू. १भ.। अमृतापरनाम्नीति अरुणः, वा. सू. ३५ अ. वचादिव.। "नागरातिविषाभयाः।" च. द. कफज्व. चि. आमलक्यादिः। "आमलक्यभया कृष्णा।" See हरीतकी। श्वेतनिर्गुण्ड्यां। मञ्जिष्ठायां। जयन्त्यां। जयायां। सिद्धि। मृणाले। काञ्जिके। काञ्चनवृक्षद्वये। रा. नि. व. १७।

अभयाद्यमोदकः। पुं। विरेचनाधिकारे। अत्र हरीतक्यादीनां चूर्णं प्रत्येकं पलमितं दत्त्वा ६ तोलकानि, शर्करा १२ पलानि, चित्रतायाश्च पलद्वयमेकत्र मधुना मोदकं कुर्य्यात्। च. द. विरेचनाधिकारे।

अभयारिष्टः। पुं। अर्शोऽधिकारे अरिष्टः। अत्र हरीतकी १२॥० श. द्राक्षा ६।० श. मधूकपुष्पं १० प. विड्ङ्गञ्च १० प. वारि २५६ श. शेषः ६४ श. गुडः १२॥० श.। गोक्षुरादीनां प्र. चूर्णं २प. प्रक्षेपः। भैष.।

अभयालवणम्। क्ली। औषधमिदं यकृत्प्लीहाधिकारे देयम्। पालिधा, पलाश, आकन्द, सिजू, आपांग, वरुण, आग्गन्त, वासक, गोक्षुर, वृहती, कण्टकारी, नाटाकरञ्ज वा गन्धभाद्दलि, हापरमाली, कुड़चि, घोषा, पुनर्नवा, एषां प्रत्येकं समूलपत्रशाखं समभागं कुट्टयित्वा चर्ष्टिकाभ्यन्तरे स्थापयित्वा च तिलनालाग्निना दहेत्। ततो भस्म १६ प. जलं ६४ श. शेषः १६ श. क्षारविधिना एकविंशतिवारं निःस्राव्य क्षारः कार्य्यः। ततः स क्षारः, गोमूत्रं १६ श. सैन्धवं १६ प. हरीतकीचूर्णं ८ प. सर्व्वमेकीकृत्य पक्तव्यं। पाकसिद्धौ घनीभूते च प्रक्षेपः—कृष्णजीरकं हिङ्गु विकटु यमानी कुष्ठं शटी च, एषां प्रति ४ तो.। सा. कौ. रस. र.। भैष. प्रयोगा.।

अभयावटी। स्त्री। गुल्माधिकारे। "अभयामरिचं कृष्णा टङ्कनञ्च समांशिकम्। सर्व्वचूर्णसमं भागं दद्यात् कानकजं फलम्॥ स्नुहीक्षीरेण संकुर्य्याद्वटीं स्विन्नकलायवत्। वटीद्वयं शिवामेकां पिष्ट्वा तण्डूलवारिणा॥" अत्र कानकजं फलं जैपालम्। शिवा हरीतकी। र. सा. सं.। एषा वटी भैषज्यरत्नावल्यामुदरे धृता।

अभयाष्टकम्। क्ली। अष्टहरीतकीभक्षणे। यथा—"हे पूर्व्वमद्यादशनादितो हे हे चापि भुक्तान्तु तथा स्वपत्सु। अस्य प्रयोगादभयाष्टकस्य विस्मृ-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रावेण पुनर्युवा स्यात् ॥" इत्यादि प्रयोगा. रसायन.।

अभावः। पुं। मरणे। असत्त्वे। मे. वत्रिकं।

अभिघातः। पुं। आघाते। शस्त्रमुष्टिलगुड़ादिभिर्हननें। भा. म. १भ. आगन्तु-ज्वर-लक्षणे। "अभिघाताभिषङ्गाभ्याम्।"

अभिघातज्वरः। पुं। आघातजन्यागन्तुकज्वरे। "अभिघाताभिचाराभ्यां—आगन्तुर्जायते ·।" मा. नि. ज्व.। अपिच—"तत्राभिघातजो वायुः प्रायो रक्तं प्रदूष्य च। सद्यव्याशीफवैवर्ण्यं करोति सरुजं ज्वरमिति॥" च.। अत्र ज्वरे दोषा नारम्भकाः परन्तु पश्चादनुबध्निनः स्युः।

अभिघारः। पुं। घृते। मं तूप। रा. नि. व. १५।

अभिचारः। पुं। मन्त्रादिना मारणादिप्रयोगे। मन्त्रादिद्वारा पीड़ायां वा। र. मा.। कृत्याद्युत्पादने वा। भा. म. १भ. आगन्तुज्व। "अभिचाराभिशापतः।" यत्तमन्त्राद्यवपीड़ने। "अभिचाराभिशापोत्थैः।" रत्ना.। श्येनादियागकृतज्वरे। "अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते।" मा. नि. ज्व.।

अभिज्ञः। त्रि। कुशले।

अभितापः। पुं। सर्व्वाङ्गतापे। अश्वज्वरे। गज. वै.।

अभिनवकामेश्वरः। पुं। वाजीकरणमिदं भेषजम्। "तीलकैकं समादाय पृथग्गन्धकसूतयोः। रक्तोत्पलदलाम्भोभिर्मर्दयेत् दिवसत्रयं। मर्दयित्वा पुनर्देयं गन्धं माषचतुष्टयम्। तस्यैव पत्रतोयेन पुनर्दत्वा च गन्धकम्। शङ्खिन्याश्चापि तोयेन रुद्वा काचघटे दृढ़े। ततस्तु बालुकायन्त्रे पचेद्यामत्रयं ततः। काचकूप्याः समाकृष्य सिद्धसूतमतःपरं॥" रत्तिकापत्रकं खादेत्। रस. र.।

अभिन्यासः (कः)। पुं। सन्निपातज्वरविशेषे। तल्लक्षणम्—"त्रयः प्रकुपिता दोषा उरःस्रोतोऽनुगामिनः। आमाभिवृद्ध्या ग्रथिता बुद्धीन्द्रियमनोगताः। जनयन्ति महाघोरमभिन्यासं ज्वरं दृढ़म्॥ श्रुतौ नेत्रे प्रसुप्तिः स्यान्न चेष्टां काञ्चिदीहते। न च दृष्टिर्भवेत्तस्य समर्थां रूपदर्शने। न घ्राणं न च संस्पर्शं शब्दं वा नैव बुध्यते। शिरो लोठयतेऽभीक्ष्णमाहारं नाभिनन्दति। कूजति तुद्यते चैव परिपूर्णमीक्षते। अल्पं प्रभाषते किञ्चिदभिन्यासः स उच्यते॥ प्रत्याख्यातः स भूयिष्ठः कश्चिदेव प्रमुच्यते॥ मा. नि. ज्व.। अस्य तन्त्रान्तरोक्तलक्षणं भावप्रकाशे द्रष्टव्यम्।

अभिपीड़नम्। क्ली। अभिचारे।

अभिमन्यः (न्युः)। पुं। नेवरीगे। त्रिका.। See अधिमन्यः।

अभिमर्दः। पुं। अवमर्दे।

अभिमर्षणम्। क्ली। यक्षपिशाचादिभूतकृतपीड़ायां। र. मा.।

अभिमानितम्। क्ली। मैथुने। त्रिका.।

अभिरूपः। पुं। बुधे। रम्ये। मे. पचतुष्कं।

अभिलकपित्थः। पुं। आम्रातकवृक्षे। आंगड़ा गाछ।

अभिलावः। पुं। छेदे। अम.।

अभिलाषः। पुं। रमणेच्छायाम्। रत. र.।

अभिशापः। पुं। द्विजातिभिः क्रोधाद्दुःखातिभारधारणे। र. मा.। ब्राह्मणगुरुवह्निसिद्धादिदत्ते शापे। भा. म. १भ.। तज्जातागन्तुज्वरलक्षणं—"अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते।" मा. नि. ज्व.।

अभिशापज्वरः। पुं। तज्जन्यज्वरे। See ज्वरनिदानम्।

अभिषङ्गः। पुं। भूतविषादिसम्बन्धे। यक्षपिशाचादिकर्त्तृकपीड़ायां। र. मा.। कामशोकभयक्रोधभूतादीनाम् आवेशे। भा. म. १भ. आगन्तुज्व. लक्षणं। रत्नः प्रभृतिभिरभिधर्षणे। रत्ना.।

अभिषङ्गज्वरः। पुं। ज्वरविशेषे। स च भूताद्यावेशतो भवति। स कामादिजभेदेन षड्विधः। शार्ङ्ग.। लक्षणं यथा—"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः। आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्॥" मा. नि. ज्व.। कामशोकभयक्रोधैरभिषक्तस्य यो ज्वरः। सोऽभिषङ्गज्वरो ज्ञेयः यश्च भूताभिषङ्गजः। च. ज्व. नि.।

अभिषवम्। क्ली। काञ्जिके। रा नि. व. १५। ताड़ीनामसुरायाम्। ताड़ी। मं ताड़ाचीदारु। पुं। स्नाने। मद्यसन्धाने। मे. वचतुष्कं।

अभिषुकम्। क्ली। कावेलादौ प्रसिद्धे फलविशेषे। पेस्ता। च. चि. च्यवनप्राशः। पुं। तद्वृक्षे। सु.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिषुतम्। क्ली। षण्ढाक्याम्। शंढाकी-काञ्जिके। अम.।

अभिषुविक्रान्तम्। पुं। माधवी-सुरायाम्। वै. निघ.।

अभिषेकः पुं
अभिषेचनम् क्ली } स्नाने।

अभिष्यन्दः। पुं। नेत्रशूलरोगे। चोक ओठा। स चतुर्विधो वातादिभेदेन। See नेत्राभिष्यन्दः। अतिद्रवौ। अस्रावे। मे. दचतुष्कं।

अभिष्यन्दी। वि। दोषधातुमलस्रोतसां क्लेद-जनने। कुसुमा. टी. ज्वरे। स्रोतःस्राविद्रव्ये। वा. टी. हेमा.। कफक्लत्यर्थे दध्यादिके। तल्लक्षणं यथा,—पैच्छिल्याद् गौरवाद् द्रव्यं रुद्ध्वा रसवहाः शिराः। धत्ते यद् गौरवं तत् स्यादभिष्यन्दि यथा दधि। भा. मि.।

अभिसरः। परिचारके। रत्ना। प्राणाभिसर-उच्यते। च. सू. ९अ।

अभिसारः। पुं। शुक्लीमत्स्ये। शोल गाछ। मद. व. १२। बले। बल। धर.। मत्स्ये।

अभिहिता। स्त्री। जलपिप्पल्यां। वै. निघ.।

अभीकः। पुं। कामुके। मे. कचिकं।

अभीरणी। स्त्री। दुन्दुभसर्पे। वै. निघ.।

अभीरुः। स्त्री। Asparagus racemosus. शतमूल्याम्। हिं शतावर। वा. सू. १५ अ.। दूर्वा-दिव.। गुन्द्रा भीरुः शतपाकी प्रियङ्गु। अश्वगन्धा-मृताभीरुः। सि यो. यक्ष्म-चि. वयोदशाङ्गे। महा-शतावर्याम्। रसे. चि. ८अ.। "प्रलम्बाभीरुवेवा-यम्।"

अभीरुपत्री(त्रिका)। स्त्री। शतावर्याम्। अम.।

अभीशुः (षुः)। पुं। प्रग्रहे। लागाम। मे.।

अभीषङ्गः। पुं। आक्रीडे।

अभीष्टः। पुं। तिलकवृक्षे। तिल गाछ। रा. नि. व. १०।

अभीष्टगन्धकः। पुं। माधवीलतायाम्। मद. व. ३।

अभीष्टा। स्त्री। रेणुक-गन्धद्रव्ये। रेणुक। श. च.।

अभुक्तः। वि। कृतोपवासे। अभुक्त्वा दिवा निद्रा पाषाणमपि जीर्य्यति। वै. निघ.।

अभुग्णः। वि। अरोगिणि।

अभेद्यम्। क्ली। हीरके। रा. नि. व. १३। See वज्रम्।

अभेषजम्। क्ली। विपरीतौषधे। उल्टो ओषध। तच्च द्विविधं बाधनं सानुबाधनञ्च। "अभेषजमिति ज्ञेयं विपरीतं यदौषधम्।" च चि. १अ.।

अभोजनम्। क्ली। उपवासे असात्मभोजने वा उपोष वा अमात्र आहार। "अजीर्णे भोजनं येषां जीर्णे येषामभोजनम्। रात्रावभोजनं येषां तेषां नश्यन्ति धातवः॥" संग्रहः।

अभ्यङ्गः। पुं। तिलकल्के।

अभ्यङ्गः। पुं। तैलादिमर्द्दने। आभांग करे' तेल माखा। "मूर्द्धि दत्तं यदा तैलं भवेत्सर्व्वाङ्ग-सङ्गतम्। स्रोतोभिस्तर्पयेद्वायू अभ्यङ्गः स उदा-हृतः"। च द. ज्व. चि.। गुणाः—जलसिक्तस्य वर्द्धन्ते यथामूलेऽङ्कुरास्तरोः। तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते। शिरासुखे रोमकूपैर्वमनीभिश्च तर्पणम्॥ सुश्रु.। स जराश्रमवातघ्नः। दृष्टिप्रसाद-पुष्ट्यायुःस्वप्नसुत्वक्त्वदार्ढ्यकृत्। वा. सू. १अ.। स च शिरःश्रवणपादेषु विशेषेणानुशीलनीयः। र. मा.। अभ्यङ्गी वातरोगघ्नः धातुसाम्यं बलं सुखं। निद्रा-वर्णस्पर्शदुःखानि कुरुते दृष्टिपुष्टिकृत्। शिरोऽभ्यङ्गः शिरस्तृप्तिकेशदार्ढ्यरुचिपुष्टिकृत्। केशप्रसाधनः केश्यः रजोजन्यमलापहः। मद. व. ३। तैलेन शिरोमर्द्दने। भा.। सदोषस्य व्रणस्य दोषोपशम-नार्थं मार्द्दवार्थञ्च उपक्रमविशेषे। सु. चि. १अ.।

अभ्यञ्जनम्। क्ली। तैले। हे. च.। तैलमर्द्दने। रा. नि. व १५।

अभ्यन्तः। वि। आतुरे। अम.।

अभ्यन्तरायामः। पुं। तन्नामकधनुस्तम्भरोग-विशेषे, अन्तरायामे। येन कुपितोबलवान् वायुः अङ्गुलिवक्षीहृदयगलदेशादिकमभिप्रपन्नः स्नायुसमूह-माकर्षन् मानवं क्रीड़ानतं करोति। तत्र चाचि-स्तब्धता हनुस्तम्भादि च जायते। लक्षणम्—"अङ्गुलीगुल्फजठरहृद्वक्षीगलसंश्रितः। स्नायुप्रतान-मनिलो यदाक्षिपति वेगवान्। विष्टब्धाक्षस्तब्धहनु र्भग्नपार्श्वः कफं वमन्। अभ्यन्तरं धनुरिव [illegible]

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमति मानवः। तदास्याभ्यन्तरायामं कुरुते मारुती बली॥" मा. नि. वा. व्या.।

अभ्यमितः। त्रि। आतुरे। अम.।

अभ्यवकर्षणम्। क्ली। शल्यादुत्पाटने। शेल तोला, काँटा तोला। अम.।

अभ्यवहरणम्। क्ली। भोजने।

अभ्यवहारः। पुं। आहारे। रत्ना.।

अभ्यान्तः। त्रि। रोगिणि। अम.।

अभ्याहारः। पुं। भक्षणे। स च चर्व्यचोष्य-लेह्यपेयभेदेन चतुर्विधः। सु.।

अभ्यूषः। पुं। ईषत्पक्वकलायादौ। तत्पर्य्यायः—अभ्योषः। (अटी. भ.) अम.।

अभ्रम्। क्ली। सुस्तायां। मेघे। रा. नि. व. ६। अभ्रकधातौ। रा. नि. व. १३।

अभ्रकम्। स्त्री। भद्रसुस्तायाम्। कर्पूरे। सुवर्णे। वेत्रे। Talc. खनामख्यातधातौ। अभ्रक। हिं आभ्र। तत्पर्य्यायः—गिरिजं अभ्रलं (अ), गिरिजामलं गौर्य्यामलं (स्वामी), गिरिजाबीजं गरजध्वजं (के), निर्म्मलं मे), शुभ्रं (ज), घनं व्योम अब्दं (र), अभ्रं भृङ्गं अम्बरं अन्तरीक्षं आकाशं बहुपत्रं खं अनन्तं गौरीजं गौरीजेयं (रा)। गुणाः—गुरु हिमं बल्यं कुष्ठमेहविदोषघ्नञ्च। मद. व. ४। रसायनं स्निग्धं बलवर्णाग्निवर्द्धकत्वञ्च। राजः। अभ्रकं चतुर्विधं—श्वेतपीतलोहितनील-भेदात् भिन्नभिन्नक्रियायां प्रयुज्यते। यथा—श्वेतं तारे, पीतरक्ते काञ्चने, नीलञ्च व्याधौ प्रजोज्यं यथोत्तरं गुणाढ्यञ्च। तेषु नीलाभ्रं दर्दुरनागपिनाक-वज्रभेदेन चतुर्भेदम्। परीक्षा गुणाश्च यथा—अग्नौ क्षिप्तं दर्दुरं भेकरवं नागं फूत्कारं पिनाकं धनुःस्वनं वज्रञ्च न विकारं धत्ते। एषां सेवनेन गुल्मी व्रणी कुष्ठी च नीरोगी भवति। रा. नि व. १३। कुष्ठ-प्रदं पिनाकं स्यात् दर्दुरं मरणप्रदं। नागं देहगतं नित्यं व्याधिं कुर्य्यादगन्धरम्। रसे रसायने चैव योज्यं वज्राभ्रकं प्रिये। तस्माद्वज्राभ्रकं ग्राह्यम्। र. सा. सं.। अशोधिताभ्रदोषाः,—पीड़ां विधत्ते विविधां नराणां कुष्ठं क्षयं पाण्डुगदञ्च धीर्यं। हृत्पार्श्व-पीड़ाञ्च करोत्यशुद्धमभ्रं ह्यसिद्धं गुरुता-गदं स्यात्॥ अभ्रशोधनम्—१। वकपुष्परसेन पिष्ट-मभ्रकं वन्यशूरणकन्दमध्ये निरुध्य गोग्रहभूमितले रसं स्थाप्यम्। २। विफलाक्वाथगोमूत्रदुग्ध-काञ्जिकेषु भस्त्राग्नौ पुनः पुनः तप्तं तप्तं सेचितं शुद्धं भवति। ३। अभ्रं सप्तवारं तप्तं तप्तं वदरीक्वाथे निःक्षिप्तं शुद्धं भवति। र. सा. सं.। अभ्रपत्राणि पृथक्कृत्य चूर्णयित्वा चूर्णयेत् दिनैकं तानि काञ्जिक-पर्य्युषितानि काञ्जिकेन पुनः पेषयेत्। ततो माष-कादिरसेन प्रत्येकमेकञ्च पुनः पुनर्भावयित्वा संपिष्य च पुटपाकेन पुनः पुनः दहेत् यावन्न निश्च-न्द्रतामागच्छन्ति इति। विशेषशुद्धिः अस्मत्प्रिये। "आम्र-भल्लीदकैः पिष्टसभ्रकं तत्र संस्थितम्। कन्द-माणास्थिसंहार-खण्डकर्ण-रसैस्तथा॥ तण्डु-लीयञ्च शालिञ्च कालमारीपञ्जेन च। क्षीर-बृहती-भृङ्ग-लक्षणा-केशराजजैः॥ पेषणं भावनं कुर्य्यात् पुटञ्चानेकशो भिषक्। यावन्नि-श्चन्द्रकं तत् स्यात् शुद्धिरेवं विहायसः॥" च. द.। अस्य पाठे कन्दं ओल्। कालमारिषः वृहत्पत्र चाँपानटे। अभ्रमारणं—१। अभ्रकं स्थालिकामध्ये संस्थाप्य कदलीक्षारेण गोमयाग्निना तावत् पचेत् यावत् स्थाल्यवहिः सिन्दूरं न भवेत्। तत अवतार्य्य दुग्धैः संसिच्य सूक्ष्मं चूर्णयेत्। २। सुस्ता-क्वाथेन, पुनर्णवाक्वाथेन, कासमर्द्दक्वाथेन, पर्णरसेन, अर्कक्षीरेण च प्रत्येकं मर्द्दयित्वा प्रत्येकं पुटत्रयं देयम्। तथा वटजटाक्वाथेन संमर्द्य पुटत्रयं देयं। ततो मूषलीक्वाथेन त्रिः पुटेत्। ततो गोक्षुर-क्वाथेन त्रिः, शुक्लशिम्बीक्वाथेन त्रिः पचेत्। ततः सुचुकुन्दकोकिलाक्षक्वाथेन प्रत्येकं दिरात्रं पचेत्। ततः लोध्रक्वाथेन दुग्धेन दध्ना घृतेन मधुना शर्करया च प्रत्येकमेकैकं पुटं दत्त्वाभ्रं मारयेत्। ३। रम्भादि-क्षारजलेन पिष्ट्वा चक्रीकृतं कदलीदलमध्ये संस्थाप्य व्यजनानिलेन ज्वालितेषु दग्धेन्धनेषु क्षुद्रार्कमूला-जलेन पुटेत्। र. सा. सं.। अथ विविधाधिकारे अभ्रकविधिः यथा—कृष्णाभ्रपत्राणि पृथक्कृत्य चूर्ण-येत्। अथ तच्चूर्णं शिलायां पिष्ट्वा वस्त्रपूतं कार्य्यम्। ततो भेकपर्णी (थूलकुड़ि) रसे आपीथ्य दिनत्रयं स्थापयेत्। अथ तदुद्धृत्य हैमन्तिकधान्यकाञ्जि-केन संपिष्य पुनर्भेकपर्णीरसेनालोड्य स्थाल्यां पचेत्। अथ तदुद्धृत्य पिण्डकृत्वा तालादिपत्रमध्ये निधाय भस्त्राग्नौ दहेत् यावदग्निर्नीलवर्णो न लक्ष्यते। अथ दुग्धे निर्वाप्य दुग्धेन तदनन्तरं जलेन धावयेत्। धावनानन्तरं सुपेषितं निश्चन्द्रकं कुर्य्यात्। च. द. रसायने।

अभ्रङ्कषः। पुं। वायौ। पाणिः।

अभ्रनामकः। पुं। सुस्तायाम्। श. र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्रपटलः । पुं, क्ली । अभ्रके । अभ्रपटल । वै. निघ. ।

अभ्रपुष्पः । पुं । वेतसलतायाम् । भा. पू. १भ. गु. व. । वारिवेतसे । अम. । क्ली । जले ।

अभ्रमांसी । स्त्री । आकाशमांसीलतायाम् । सूक्ष्म जटामांसी । रा. नि. ।

अभ्ररोहः । पुं, क्ली । वैदूर्यमणौ । रा. नि. व. १३ ।

अभ्रवटिका । स्त्री । रसविशेषोऽयं ज्वरातिसारगदे प्रयोज्यः । अत्र व्योषचूर्णं कर्षमानम् । केशराजादीनां स्वरसः सप्तीन्मिती देयः । ग्रीष्मसुन्दरकः (गीमा शाक, । मण्डूकपर्णी (थूलकुड़ि)। तस्यायं पाठः—"अथ सूतस्य शुद्धस्य गन्धकस्याभ्रकस्य च । प्रत्येकं कर्षमेकन्तु ग्राह्यं रसगुणैषिणा ।" ततः कज्जलिकाकृत्वा व्योषचूर्णं प्रदापयेत् । "केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चैवकस्य च । ग्रीष्मसुन्दरकस्याथ जयन्त्याः स्वरसं तथा । मण्डूकपर्ण्याः स्वरसं तथा शक्राशनस्य च । श्वेतापराजितायाश्च स्वरसं पर्णसम्भवं । दापयेत्तत्र तुल्यञ्च विधिज्ञः कुशली भिषक् । रसतुल्यं प्रदातव्यं चूर्णं मरिचसम्भवं । देयं रसार्द्धभागेन चूर्णं टङ्कणसम्भवम् ॥" मर्दयित्वा कलायप्रमाणा वटी कार्य्या । रस. र. र. सा. सं. । भैषज्यरत्नावल्यामियमेव ग्रहण्यां महाभ्रवटिका उक्ता । इयमेव प्रयोगामृते ग्रहण्यां रसाभ्रवटी । शुद्धरसः २ तो. शुद्धगन्धः २ तो. कज्जलीं कृत्वा जारिताभ्रं २ तो. मरिचचूर्णं २ तो. टङ्कणं १ तो. केशराजादिरसस्य प्रत्येकं १ तो., वटी कार्य्या । अन्या ग्रहण्याम्—पक्वेष्टकाहरिद्राभ्यामगारधूमकेन च । शोधितं पारदञ्चैव कर्षार्द्धं तुलया धृतम् ॥ भृङ्गराजरसैः शुद्धं गन्धकं रससम्मितम् । द्वाभ्यां कज्जलिकां कृत्वा भावयेत्तत्तु भेषजैः । सिन्दुवारदलरसे मण्डूकपर्णिकारसे । केशराजरसे चैव ग्रीष्मसुन्दरजे रसे । रसेऽपराजितायाश्च सोमराजीरसे तथा । रक्तचित्रकपत्रीये रसे च परिभावितं । रसमानसमानेन छायायां शोषयेद्भिषक् ॥ वटी सर्षपसिता । हरिद्रा, इष्टकचूर्ण ও গৃহধূমশোধিত রস ১ তোলা, ভীমরাজ-শোধিত গন্ধক ১ তোলা, কজ্জলি কর। নিশিন্দা, থুলকুড়ি, গিমা, কেশুর, অপরাজিতা, সোমরাজ, লালচিতের রসে ভাবনা। ভৈষ. গ্রহণী। প্রয়োগামৃতীক্তাभ्रवटिकायामभ्रकस्यकी भागः पारदसम इति विशेषः ।

अभ्रवाटकः । पुं । आम्रातकवृक्षे । আমড়া গাছ । रा. नि. व. ११ ।

अभ्रवाटिकः । पुं । आम्रातके । जटा. ।

अभ्रसारः । पुं । भीमसेनीकर्पूरे । वै. निघ. ।

अभ्राङ्गम् । क्ली । कुङ्कुमे । मद. व. ३ ।

अभ्रूषः । पुं । तालुरोगविशेषे । तेन स्रस्रलोहितः शीर्णितीव्रः शीर्षः ज्वरतीव्रवेदनायुक्तो भवति । तदुक्तं शीर्षस्रस्री लोहितः शीर्णितीव्रो ज्ञेयोऽभ्रूषः सज्वरस्तीव्ररुक् च । भा. म. ४भ. मुखरो चि. ।

अमः । पुं । रोगे । वि । पक्वफलादौ । शु. र. ।

अमङ्गलः । पुं । एरण्डवृक्षे । शु. च. ।

अमण्डः । पुं । एरण्डवृक्षे । प. मु । हारा. ।

अमन्दः । पुं । वृक्षे । शु. ।

अमध्यस्थधर्म्मिणी । वि । या चेतनजड़ीभूयधर्म्ममध्यवर्त्तिनी न भवति । तस्याः केवलं जड़मयत्वात् पुरुषस्य च तथात्वात् । सु. शा. १अ. ।

अमरः । पुं । अस्थिसंहारे । হাড়ভাঙা । रत्ना. । वज्रीद्रुमे । सिजू । मे. रविकं । रुद्राक्षे । शु. र. । पारदे । रा. नि. व. १३ । हस्तिनि । क्ली । सुवर्णे । वै निघ. ।

अमरकणा । स्त्री । गजपिप्पल्याम् । वै. निघ. । २भ. पाण्डु-चि. भूनिम्बादिगुटी ।

अमरकर्कटिका । स्त्री । शतावर्य्याम् । रा. नि. व. ४ ।

अमरकन्दः । पुं । कन्दविशेषे । वै. निघ. ।

अमरकालिकः । पुं । वृश्चिकाल्याम् । বিছাতী । भैष. वा. व्या. सिंहना. गुग्गुलौ ।

अमरकाष्ठम् । क्ली । देवकाष्ठे । দেবদারু ।

अमरकुसुमम् । क्ली । लवङ्गे । वै निघ. चयरी. त्रैलोक्य-चि. रसे ।

अमरजः । पुं । दुष्खदिरवृक्षे । গুয়েবাব্লা । रा. नि. । देवदारुणि । नदीवटे । वै. निघ. २भ. । गन्ध्यादिः ज्व. ।

अमरतरुः । पुं । देवदारौ । वै. निघ. सा. ज्व. । अर्कादिः । "किरातामरतरुरसना ।"

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमरदारु । पुं, क्ली । तैलदेवदारुणि । रा. नि. व. १२ । चि. क्र. क. वल्ली-स्त्रीरी. चि. । तैलदेवदारुवृक्षे । मलयाद्देवदारु ।

अमरद्रुः । पुं । विट्खदिरवृक्षे । गुयेबाव्ला ।

अमरपुष्पम् । पुं, क्ली । पूगफले । काशतृणे । आम्रे । केतके । मे. पपच्चकं ।

अमरपुष्पकः । पुं । काशतृणे । केशे । प. मु. । काशभेदे । र. मा. ।

अमरपुष्पिका } स्त्री । चीरपुष्पीतृणे । चोर
अमरपुष्पी } काचकी, चोर खड़िका । रसा. । काशतृणे ।

अमर(ल)रत्नम् । क्ली । स्फटिके । रा. नि. । काचे ।

अमरवल्ली । स्त्री । आकाशवल्ल्याम् । मं अमरवेल । हिं अमरवेलि । आलोकलता । भा. पू. १भ. गु. व. । मद. व. १ । सालशैतिख्यातलतायां । गुणाः—वृष्यवल्ली बलकरी परं वृष्या रसायनी । मूत्रकृत् स्वेदजननी पुष्टिदा कार्श्यवारिणी । औपदंशिकरोगांश्च रक्तदोषं हरेदियम् ॥ वैद्यकम् ।

अमरसर्षपः । पुं । देवसर्षपे । राई । वै. निघ. ।

अमरसुन्दरी । स्त्री । ज्वराधिकारि रसः । पाठो यथा—त्रिकटु त्रिफला चैव ग्रन्थिकं रेणुकानलम् । चातुर्जातं मृतं लौहं पारदो विषगन्धकम् । समभागमिदं चूर्णं तस्माच्च द्विगुणो गुड़ः । कोलप्रमाणां गुड़िकां प्रातरुत्थाय सेवयेत् ॥ इत्यादि । प्रयोगा. ।

अमरा । स्त्री । दूर्व्वायाम् । मे. रविकं । गुड़च्यां । र. मा. । इन्द्रवारुणीलतायां । राखालशशा । रा. नि. व. ३ । नीलदूर्व्वायां । गृहकन्यायाम् । रा. नि. व. ५ । नीलीवृक्षे । मेषशृङ्ग्याम् । वृश्चिकाल्यां । विछाति गाछ । रा. नि. व. ९ । नदीवटे । रा. नि. व. ११ । जरायौ । मे. रविकं । गर्भनाड्याम् । फूल । भैष. स्त्रीरो. । नाभिनालायाम् ।

अमराह्वम् । क्ली । देवदारुकाष्ठे । वा. सू. १५ एलादि. अरुणः । "शुक्तिर्व्याघ्रनखोऽमराह्वमगुरुः ।"

अमरी । स्त्री । नीलदूर्व्वायाम् । कृष्णनिर्गुण्ड्यां । सूर्व्वायाम् । मूर्गा । वै. निघ. ।

अमरुफलम् । क्ली । उत्तरदेशप्रसिद्धफले । गुणाः—अमरीश्च फलं शीतं मलद्रवकरं मतम् । सरं दाहं रक्तपित्तं कामलां मूत्रकृच्छ्रकम् । मूत्राश्मरीञ्च हन्तीति ऋषिभिः परिकीर्त्तितम् । वै. निघ. ।

अमरेन्द्रतरुः । पुं । देवदारुवृक्षे । वै. निघ. २भ. ज्व. निर्गुण्ड्यौषधे ।

अमलम् । क्ली [illegible]के । मे. लवित्रकं । समुद्रफेने । र. मा. [illegible] । वै. निघ. २भ. अपस्मा. चि । रौप्यमाक्षिकं । पित्तं । कतकवृक्षे । गन्धद्रव्यविशेषे ।

अमलदीप्तिः । पुं । कर्पूरे । च. द. ।

अमलपत्री । (इन्) पुं । हंसे ।

अमलमणिः । पुं । स्फटिके । रा. नि. व. १३ । कर्पूरमणौ । कर्पूरगन्धकमणिविशेष ।

अमलरत्नम् । क्ली । स्फटिके । रा. नि. व. १३ ।

अमला । स्त्री । महानील्याम् । बड़ नील । रा. नि. व. ४ । सेहुण्डभेदे । रा. नि. । भूम्यामलक्याम् । अम. । नाभिनालायाम् । आमलक्याम् । आम्ला । प्रयोगा. क्षुद्ररोग-चि ।

अमलाञ्झटा । स्त्री । भूधात्र्याम् । भूँई आम्ला । अ ठी. भ. ।

अमसः । पुं । रोगे । उ. ।

अमानस्यम् । क्ली । पीड़ायाम् । दुःखे ।

अमिलातकम् । क्ली । वेलाख्ये पुष्पे । हला. ।

अमिलातका । स्त्री । महाराजतरुणीपुष्पवृक्षे । वेल । रा. नि. व. १० ।

अमूला । स्त्री । अग्निशिखावृक्षे । इष्लाङुनिया । वै. निघ. । अर्कपत्र्याम् । के ।

अमृणालम् । क्ली । लामज्जके । श्वेत-उशीर । रा. नि. व. १२ । भा. पू. १भ. क. व. । मद. व. ३ । उशीरे । वेणार मूल । रत्ना. । रा. नि. व. १२ । च. द. अर्शचि. प्राणदागुड़िका ।

अमृतः । पुं । पारदे । रा. नि. व. १३ । वनमुद्गे । रा. नि. व. १६ । See मकुष्ठकः । अवि. २ स्थानं. २ अ. । धन्वन्तरौ । ना धन्वन्तरिदेवयोः । मे. तद्विकं । वाराहीनामसहाकन्दशाके । शुयार आलू । रा. नि. व. ७ । क्ली । पीयूषे । सलिले । रा. नि. व. १४ । घृते । मे. रा. नि. व. १५ । वै. निघ. वा. व्या. भुजङ्गीगुटी. । "अमृतं यज्ञशेषे स्यात्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीयूषे सलिल घृते।" मे। विषसामान्ये। दुर्धर्षे। रा नि. व. १५। अन्ने। हे. च.। औषधे। रा. नि. व. २०। शृङ्गीविषे। स्वर्णे। भक्ष्यद्रव्ये। हे च.।

अमृतकन्दा। स्त्री। कन्दगुडूच्याम्। मे कन्दगुलवेल। वै. निघ.। See कन्दगुडूची।

अमृतकल्परसः। पुं। वैद्यकोक्ताधिकारे रसः। शुद्धौ पारदगन्धौ च समानौ कज्जलीकृतौ। तयोरर्द्धं विषं शुद्धं तत्समं टङ्कणं भवेत्। भृङ्गराजद्रवैर्भाव्यं दिनं यत्नतः पुनः॥ माषा सुक्ष्माणा। अत्र तत्समिति विषसमम्। र. सा. सं.।

अमृतगुडिका। स्त्री। भैषज्यमिटं अजीर्णे हितम्। कुर्य्याद्गन्धविषव्योषविफलापारदैः समैः। भृङ्गाम्बुमर्दितैर्मुद्गमात्रामृतवटीं शुभाम्॥ रसे. चि.।

अमृतजटा। स्त्री। जटामांस्याम्। रा.।

अमृतजा। स्त्री। हरीतक्याम्। वै. निघ.।

अमृतप्राशघृतम्। क्ली। राजयक्ष्मणि प्रशस्तम्। "जीवकर्षभकौ वीरां जीवन्तीं नागरं शटीं। चतस्रः पर्णिनीर्मेदे काकोल्यौ द्वे निदिग्धिकाम्। पुनर्नवे द्वे मधुकमात्मगुप्तां शतावरीम्। ऋद्धिं परूषकं भार्गीं मृद्वीकां द्वृहतीं तथा। शृङ्गाटक मामलकीं पयस्यां पिप्पलीं बलाम्। बदराचीड़वातादखर्जूराभिषुकाणि च। फलानि चैवमादीनि कल्कान् कुर्व्वीत कार्षिकान्। धात्रीफलविदारीक्षुछागमांसरसान् पयः। दत्त्वा प्रस्थोन्मितान् भागान् घृतप्रस्थं विपाचयेत्। प्रसृतिं मधुनः शीते शर्करार्द्धतुलां तथा। पलार्द्धकञ्च मरिचत्वगेलापत्रकेशरम्। विनीय चूर्णयेत् तन्मात्रिल्ह्यान्मात्रां यथाबलम्। अमृतप्राश इत्येष नराणाममृतोपमः। सुराघृतमद्यं पथ्यं क्षीरमांसरसाशिनः। नष्टशुक्रक्षतक्षीणदुर्ब्बलव्याधिपीड़ितान्। स्त्रीप्रसक्तानकुशलान् स्वरहीनांश्च हंहयेत्। कासहिक्काज्वरश्वासदाहतृष्णाक्षपित्तनुत्। पुंस्त्वदो वृद्धि...दाहशूलक्षयापहः॥" अस्य पत्नी यथा, मूर्च्छितगव्यघृतं ४ श.। कल्कार्थद्रव्याणि प्रत्येकं कर्षमितानेकत्र कल्कीकृत्य तैः धात्र्यादिरसैः प्रत्येकं प्रस्थमितैश्च घृतं यथाविधि पाच्यम्। पाकसिद्धौ क्षानयित्वा मधुनः प्रसृतिं शर्करायाः ५० पलानि, मरिचस्य गुड़त्वचः एलायाः तेजपत्रस्य नागकेशरस्य च प्रत्येकं चूर्णमर्द्धपलं (४तो.) मिश्रणीयम्। कल्कद्रव्याणि यथा—जीवकर्षकौ (अभावे गुड़ूची, वंशलोचना) क्षीरविदारी (भूँइकुमड़ा) महाबला वा जीवन्ती शृङ्गी शटी शालपर्णी पृश्निपर्णी मुद्गपर्णी माषपर्णी मेदा (अभावे अश्वगन्धा) महामेदा (अभावे शारिवा) काकोली क्षीरकाकोली कण्टकारी बृहती रक्तपुनर्णवा श्वेतपुनर्णवा यष्टीमधु कपिकच्छुः (आलकुशी-मूल) शतावरी ऋद्धिः (अभावे बला वेड़ेला) परूषकफलं भार्गी मृद्वीका शृङ्गाटकं भूम्यामलकी शुक्लभूमिकुष्माण्ड पिप्पली वाट्यालकं बदरफलं अक्षीटफलं वातादं (वादाम) खर्जूरं अभिषुकं (पेस्ता) च। एवंविधानि अन्यानि फलानि च। रसाश्च यथा—आमलकीरसः भूमिकुष्माण्डरसः इक्षुरसः छागमांसरसः दुग्धञ्च। प्रयोगा. यक्ष्म-चि.। अन्यत् ध्वजभङ्गाधिकारे। तस्यायं पाठः—"छागमांसं बलाचैव बाजिगन्धा तथैव च। जलद्रोणे विपक्तव्यं कुर्य्यात् पादावशेषितं। घृतप्रस्थं पचेत्तेन अजाक्षीरं चतुर्गुणं। मूर्च्छनार्थं प्रदातव्यं कुङ्कुमञ्च द्विकार्षिकं। बलामूलञ्च गोधूमं चाश्वगन्धा तथामृता। गोक्षुरञ्च कशेरुञ्च विकटुञ्च सधान्यकः। तालाङ्कुरस्त्वेफलञ्च कस्तुरी बीजवानरी। मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शटी। दार्व्वी प्रियङ्गुर्मञ्जिष्ठा नतं तालीशपत्रकं। एलापत्रत्वचं नागं जातीकुसुमरेणुकं। सरलं जातिकोषञ्च सूक्ष्मैलोत्पलसारिवे। मूलं बिल्वस्य जीवन्ती ऋद्धिर्द्वौ उडुम्बरम्। प्रत्येकं कर्षमात्रन्तु पेषयित्वा विनिक्षिपेत्। वस्त्रपूते सुशीते च सितां दद्याच्छरावकम्॥ भैष.। हा. अवि. ३स्था. ९अ.।

अमृतप्राशावलेहः। पुं। अयं राजयक्ष्माधिकारे उक्तः। तस्य पाठः—"क्षीरे धात्री च मञ्जिष्ठा क्षीरिणाञ्च तथा रसैः। पचेत्सर्पिर्घृतप्रस्थं मधुरैः कर्षसम्मितैः। द्राक्षाद्विचन्दनोशीरैः शर्करीत्पलपद्मकैः। मधूककुसुमानन्ताकाश्मरीत्वक्षसंज्ञकैः। प्रस्थार्द्धं मधुनः शीते शर्करार्द्धतुलां तथा। पलार्द्धिकांश्च संचूर्ण्य त्वगेलापत्रकेशरान्। विनीय तत्र संलिह्यान्मात्रां नित्यं सुयन्त्रितः। अमृतप्राशमित्येतदश्विभ्यां परिकीर्त्तितम्॥ भा. म. ख. २भ.। क्षीरे काकोलीक्षीरकाकोल्यौ। क्षीरिणः वटाश्वत्थोदुम्बरप्लक्षपारीशाः तेषां त्वक्। तृणं गन्धतृणं। क्षीरादीनां क्वाथैः द्राक्षादीनाञ्च कल्कैः पचेत्।

अमृतफलम्। क्ली। (Nák. Pyrus communis.) The pear tree. लवलिका

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षतौ नास्तीति प्रसिद्धे काबुलदेशजफलविशेषे। पञ्चावे च नाक् इति ख्याते। गुणाः—गुरु वातघ्नं स्वाद्लं रुचिकृत् शुक्रकृच्च। मद. व. ६। अमृतस्य फलं धातुवर्द्धकं मधुरं गुरु। रुच्यञ्चाम्लं वातहरं त्रिदोषस्य च शामकम्॥ वै. निघ.। लघु हृद्यं स्वादु त्रिदोषहरञ्च। इदञ्च सुश्रुतदेशे प्रचुरं लभ्यते। भावमिश्रः। पुं। पारदे। हिङ्गिनाभकौषधे। पटोलवृक्षे। रा. नि. व. ३। धात्रीवृक्षे। आमलागाछ। मद.।

अमृतफला। स्त्री। द्राक्षायाम्। किस्मिस्। हिं किस्मिस्। आमलक्याम्। रा. नि. व. ११। लघुखर्ज्जूरीवृक्षे। छोटि खेजूरेर गाछ। श्वेतद्राक्षायां। कीङ्गणे उत्तरा उत्तरीति च ख्याता।

अमृतबन्धुः। पुं। अश्वे। वै. निघ.।

अमृतभल्लातकावलेहः। पुं। कुष्ठाधिकारिऽवलेहः। यथा भल्लातकप्रस्थयुगं (४श.) क्षिप्त्वा द्रोणजले (६४श.) क्षिपेत्। प्रस्थद्वयं गुड़च्याश्च (४ श.) क्वथं तत्रास्मिन् क्षिपेत्। शरावमात्रकं सर्पिः (१ श.) दुग्धं स्यादाढ़कं (१६ श.) तथा। सितां प्रस्थमितां (२ श) दद्यात्प्रस्थार्द्धं (१ श.) माक्षिकं क्षिपेत्। सर्व्वाण्येकत्र भाण्डे तु पचेन्मृदग्निना शनैः। सर्व्वद्रवे घनीभूते पावकादवतारयेत्। तत्र क्षेप्यानि चूर्णानि ब्रूमो विम्बविषामृताः। वाकुची चाथ दद्रुघ्नः पिचुमर्दो हरीतकी। अक्षी धात्री च मञ्जिष्ठा मरिचं नागरं कणा। यमानी सैन्धवं मुस्तं त्वगेला नागकेशरम्। पर्पटं पत्रकं बालमुशीरं चन्दनं तथा। गोक्षुरस्य च बीजानि कच्छूरी रक्तचन्दनं। पृथक् पलार्द्धमानानां (प्र. ४ती) चूर्णमेषामिह क्षिपेत्। पलमात्रमिदं प्रातः समश्नीयाज्जलेन हि॥ विषा = अतिविषा, अमृता = गुड़ची। वाकुची = सोमराजी। अक्षः = विभीतके। पत्रकं = तेजपत्रम्। बालं (बाला)। कर्च्चूरः शटी एकाङ्गी वा। भा. म. ४भ. कुष्ठ-चि.।

अमृतभल्लातकी। स्त्री। रसायनोऽयं योगः। रस. र.। अत्र पक्वभल्लातकफलं, विदलमिष्टकाचूर्णं घृष्टं प्रक्षालितञ्च शुष्कं कृत्वा पुनस्तद्विदलीकृत्य ६४ प. वारि ५१२ प. शेषः १२८ प. शीतले क्षीरं १२८ प तत्क्षीरादशेषे शीते च घृतं ३२प. ततश्च मुद्रापाकेऽवतार्य्य, खण्डस्य १६प. मिश्रयित्वा दिनसप्तकं स्थापयेत्। भल्लातकानां पवनीडृतानां हन्ताक्षुण्णाच्च यदाढ़कं स्यात्। तच्चेष्टका-चूर्णकणैर्विघृष्य प्रक्षालयित्वा विसृजेत्प्रवाते। शुष्कं पुनस्तद्विदलीकृतञ्च ततः पचेदप्सु चतुर्गुणासु। तत्क्वाथशेषं परिपूतशीतं क्षीरेण तुल्येन पुनः पचेत्तम्। तत्क्वाथशेषं पुनरेव शीतं घृतेन तुल्येन पुनः पचेत्तम्। तदर्द्धया शर्करया विमिश्रं ततः खञ्जेनोन्मथितं विधाय। तत्सप्तरात्रादुपजातवीर्य्यं सुधासृतादप्यधिकत्वमेति। रस. र. रसायन.। सां कौ.। भैष. कुष्ठाधिकारे। अन्या च विविधाधिकारे—सुपक्वभल्लातकफलं द्विखण्डितं प्रश. वारि ३२श. (जले हैगुण्याभावात्) पादशेषः प्रश. क्वाथो ग्राह्यः। अथ दुग्धं ३२ श. घृतञ्च शरावद्वयं (४ श.) दत्त्वा तावत्पचेत् यावद्घनतां न गच्छेत्। घनीभूते शर्करायाः १६ पलानि मिश्रयित्वा दिनसप्तकं स्थापयेत्। च. द. रसायने। पाठो यथा—सुपक्वभल्लातफलानि सम्यक् द्विधा विदार्याढ़कसम्मितानि। विपाच्य तोयेन चतुर्गुणेन चतुर्थशेषे व्यपनीय तानि। पुनः पचेत् क्षीरं चतुर्गुणेन घृतांशकल्केन घनं यथा स्यात्। शितौ पलाशीड़शभिः पलैस्तं विमिश्र्य संस्थाप्य दिनानि सप्त इत्यादि। घृताच्चतुर्गुणं क्षीरं घृतस्य प्रक्षेप्यते इति। च. द. विविधाधिकारे।

अमृतमञ्जरी। स्त्री। गोरक्षदुग्धीवृक्षे। रा. नि. व. ५। सामान्यज्वरे रसविशेषः। "हिङ्गुलं मरिचं टङ्कं पिप्पलीं विषमेव च। जातीकोषं समं सर्व्वं जम्बीराद्भिर्विमर्द्दयेत्॥ मात्रा २ वा ३ गुञ्जा। अत्र जातीकोषं (जयित्री)। अन्या कासाधिकारे, पाठस्तुल्य एव। र. सा. सं.।

अमृतमण्डुरः। पुं। परिणामशूले देयः। पाठः—"मण्डुरस्य पलान्यष्टौ शतावर्य्यारसस्तथा। क्षीराज्यं दधि प्रत्येकं पिष्ट्वा चतुःपलं पचेत्।" इत्यादि। लौह प्र. शतावर्य्यादीनां प्रत्येकं चतुःपलञ्च एकत्र पचेत्। रस. र.।

अमृतमन्थः। पुं। दुग्धादिपरिगोलिते मन्थे। प. सु. २० व.।

अमृतयोगः। पुं। नक्षत्रयोगविशेषे दिनकरकरयुक्तः सोमसौम्येन वापि तुरगसहितभौमः सोमपुत्रोऽनुराधा। सुरगुरुरपि पुष्ये रेवती शुक्रवारे दिनकरसुतयुक्ता रोहिणी सौख्यहेतुः। अवि. २ स्था. ६अ.।

अमृतरसा। स्त्री। कपिलद्राक्षायाम्। आङ्गूर। इति लोके। मं कालेद्राख। रा.नि. व. ११।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमृतलता । स्त्री । गुड़ूच्याम् । रा. नि. व. ३ । हा. अवि. ।

अमृतलतादिघृतम् । क्ली । पाण्डुरोगाधिकारे घृतम् । तस्य पाठः—अमृतलतारसकल्कं प्रसाधितं तुरगविड्दिषः सर्पिः । क्षीरं चतुर्गुणमेतद्वितरेच्च हलीमकार्त्तेभ्यः ॥ भा. म. २भ. ।

अमृतवटकः । पुं । सन्निपातातिसारे हितः । हा. अवि. ३ स्था. ३ अ. । पाण्डु-चि. ।

अमृतवटी । स्त्री । अग्निसान्ये रसविशेषः । अमृतवराटकमरिचैः द्विपञ्चनवभागिकैः क्रमशः । विष २ कड़ि ५ मरिच ९ तो. । जलेन मुद्गसमाना वटी कार्य्या । भैष. ।

अमृतवर्त्तिका । स्त्री । सप्त्यु ञ्जयतन्त्रोक्तरसायनवर्त्ती । तत्साधनं यथा—त्रिकटु-त्रिफला-ब्राह्मी-गुड़ूची - चित्रक-नागकेशर - शुण्ठी-भृङ्गराज-निर्गुण्डी-हरिद्रा-दारुहरिद्रा-शक्राशन (सिन्धि) त्वगेला-गाम्भारीत्वक्-विड़ङ्ग-वचानां चूर्णं प्रत्येकं २प. कामरूपदेशीयगुड़स्य च ५० प. एकत्र संमर्द्य ३६० वर्त्तिकाः कार्य्याः । प्रत्यहं भोजनात् प्राक् सन्ध्यायां वा शीतलजलेन एकैकं सेव्यम् । भैष. ।

अमृतवल्लरी । स्त्री । गुड़ूच्याम् । भा. पू. १भ. गु. व. । उपोदक्याम् । वड़ पूँई ।

अमृतवल्लिका } स्त्री । चित्रकूटप्रसिद्ध गुड़ू-
अमृतवल्ली } च्याम् । र. मा. । रा. नि. व. ३ । अवि. २ स्था. २ अ. । अमृतस्य च वल्ली सा हितकारिणी विषापहा । किञ्चित्तिक्ता जराव्याधिहरी कुष्ठामनाशिनी । कामलव्रणशोथघ्नी ऋषिभिः परिकीर्त्तिता । वै. निघ. जीर्णज्व. हरीतकीपाके ।

अमृतसङ्गमः । पुं । खर्परिकायाम् । खापड़ा । मं कलखापरी । वै. निघ. ।

अमृतसञ्जीवनी । स्त्री । गौरवचदुग्धीनामवृक्षे । रा. नि व. ५ ।

अमृतसम्भवा । स्त्री । गुड़ूच्याम् । रा.नि. व. ५ ।

अमृतसहोदरः । पुं । घीटके । जयद. ।

अमृतसारजः । पुं । गुड़े । गुड़ । मं काकवी । रा. नि. व. १४ । तवराजखण्डे । नवीते । रा. नि. व. १४ । तृष्णाज्वरदाहरक्तपित्तघ्नः ।

अमृतसारजा । स्त्री । शर्करायाम् । चिनि । मं खड़े साकर ।

अमृतसारतास्त्रम् । क्ली । रसायनाधिकारे ।

अमृतसोदरः । पुं । घीटके । रा. नि. व. १९ ।

अमृतस्रवा । स्त्री । चित्रकूटदेशे स्वनामप्रसिद्धलतायां । कदली लता । अमृतवल्ली । तत्पर्य्यायः,—वृक्षरुहा उपवल्लिका घनवल्ली सितलता । गुणाः—दुष्पत्तिक्तरसायनी, विषघ्नी, व्रणकुष्ठामकामलाशीफजिच्च । रा. नि. व. ३ । चायमाणायाम् । रा. नि. व. ५ । लाचा ३ भाषा ।

अमृतहरीतकी । स्त्री । अजीर्णे । यथा—"धान्यकं जीरकञ्चैव सुस्तकं पटुपञ्चकं । यमान्यामठपञ्चञ्च खवङ्गं विकटुन्तथा । प्रत्येकं समभागन्तु श्लक्ष्णचूर्णानि कारयेत् । सर्व्वचूर्णसमं दद्यादभयाचूर्णं संस्कृतम् ॥" सा. कौ. । तक्रे समुत्क्विन्नशिवाशतानि तद्बीजमुद्धृत्य च कीशलेन । षड्भूषणं पञ्चपटूनि हिङ्गुक्षारावजाजीमजमोदकञ्च । चुक्रेण सभाव्य लचा समानं क्षिपेत् शिवाबीजनिवाससध्ये ॥ प्रयोगा. ।

अमृतक्षारः । पुं । नवसागरे । वै. निघ. ।

अमृता । स्त्री । गुड़ूच्याम् । रा. नि. व. ३ । र. मा. । आमलक्यां । रा. नि. व. ११ । हरीतक्यां । प. मु । "स्थूलमांसामृता स्मृता ।" द्वयं चल्याजाता । रा. नि. व. ११ । तुलस्यां । काष्ठधात्रीवृक्षे । भा. । मदिरायां । रा. नि. व. १४ । इन्द्रवारुण्यां । रा. नि. व. ३ । पारावतपद्यां । लता फटकी । रा. नि. व. ३ । गोरक्षदुग्धायां । कृष्णातिविषायाम् । रक्तविल्वतायां । रा. नि. व. ६ । दूर्व्वायां । पिप्पल्याम् । मे. । लिङ्गिन्यां । रा. नि. व. ३ । नीलदूर्व्वायां । रा. नि. व. ८ । श्वेतदूर्व्वायाम् । नागवल्ल्याम् । पान । रास्नायाम् । गरुड़वल्ल्याम् । वै. निघ. क्षय. चि. । सूर्य्यप्रभायाम् । खर्ब्बूजेतिख्यातलतायाम् । कन्दगुड़ूच्याम् । खाटिकारिकायाम् । मद. व. ४ । प्रयोगा । गुड़ूचीति चित्रकगुड़े । वा. सू. १५, आरग्वधादिः । निम्बामृता मधुरसा युवद्वयपाटाः, पञ्चकादौ अरुणः । शृङ्गग्रहता दश जीवनसंज्ञाः । चि. १ अ. किरातादिः । किराततिक्तममृता । च. द. वातज्व. चि. । किरातार्ब्दामृतीदीच्य—। च. द. पित्तज्व. खीब्रादिः । च. सू. ४ अ. ।

अमृताख्यगुग्गुलुः । पुं । वातरक्ते । गुड़ूची २ भ. गुग्गुलु; १ भ. त्रिफला प्रत्येकं १ भ. वा ६४ भ. सङ्कुच्य पाच्यम् । पादशिष्टे क्वाथे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावत्पुनः पाच्यं यावत् न घनीभूतं भवति। घनीभूते दन्त्यादिचूर्णं प्रत्येकं ४ तो. चित्रकचूर्णञ्च २ तो. ईषदुष्णतासत्वे प्रक्षिप्य मर्द्दयेत्। बलाबलं वीक्ष्य मात्रा देया। च. द. वातरो. चि.।

अमृताद्यलौहः। पुं, क्ली। रक्तपित्ताधिकारे लौहः। पाठो यथा—अमृता विश्वता दन्ती श्यावणी खदिरो वृषः। चित्रकी भृङ्गराजश्च कोकिलाक्षः सपुष्करः। पुनर्णवा बलाकाशशिगुमीरटदारकाः। मवाची पौवरी कन्दश्वविका तालमूलिका। नागबला कणामूलं कुष्ठं ब्राह्मणयष्टिका। पलोन्मितानि चैतानि जलद्रोणे विपाचयेत्। अष्टभागावशेषन्तु कषायमवतारयेत्। त्रिफलायास्तथा प्रस्थं जलाष्टगुणपाचितं। तस्मादष्टावशेषन्तु कषायं सुपरिस्रुतम्। माक्षिकेण हतस्यापि पुटितस्य यथाविधि। अयसश्चूर्णितं पूतं पलषोड़शसम्मितम्। पलान्यभ्रस्य तावन्ति तावन्ति गन्धकस्य च। द्वे द्वे पले रसस्यापि खल्लितस्य विधानतः। गुड़स्य च पलान्यष्टौ सितायाश्च पैत्तिके। रक्तपित्ते तु खण्डेन मत्स्यण्डाया वापि कासवे। गुग्गुलोर्द्विपलं दत्त्वा प्रस्थमेकन्तु सर्पिषः। एवं पाकविधिज्ञस्तु पचेल्लौहं समाहितः। शीतेऽवताप्य मधुनः क्षिपेदष्टपलं भिषक्। माक्षिकस्य विशुद्धस्य द्विपलं रजसः क्षिपेत्। शिलाजतोस्तथा चूर्णं पलार्द्धसम्मितं भिषक्। तथैषां प्रक्षिपेच्चूर्णं पलमात्रं पृथक् पृथक्॥ इत्यादि। अमृतादिब्राह्मणयष्ट्यन्तानां प्रत्येकं पलमितं, वारि ३२ श. शेषः ८ श.। त्रिफला मि. २ श. वारि. ३२ श. शेषः ८ श। शोधितलौहं १६ प. अभ्रं ४ प. रसगन्धकौ ४ प., खण्डः ८ प. गुग्गुलुः २ प. घृतं २ श.। एकत्र लौहपाकः कार्य्यः। शीतले प्रक्षे. मधु ८ प. स्वर्णमाक्षिकं २प. शिलाजतु ४ तो.। अत्र श्यावणी सुण्डिकिका। मीरटमिक्षुमूलं। दारकी वृद्धदारकः। दर्भः उलुमूलं। पौवरी शतावरी। गवाची गोरक्षकर्कटी। नागबला गोरक्षचाकुलिया। कुष्ठपुष्कराभ्यां काण्डग्रन्थिभेदेन ग्रहणम्। अथवा भागद्वयग्रहणम्। माक्षिकेण हतस्य निरुत्थमारितस्येत्यर्थः। पुटितस्य सामान्यविशेषपुटितस्य। पलान्यभ्रस्येत्यत्रापि पुटितस्येति सम्बध्यते। तेन प्रथमपरिच्छेदोक्तक्रमेण रसायनाधिकारे वक्ष्यमाण-वृहदमृतसारोक्त-लौहाभ्रसमभिहित-विधिनैव वा चूर्णितपुटितस्येत्यर्थः। ...वन्ति गन्धकस्येति चत्वारि पलानीत्यर्थः। गन्धक...विधिश्च यथा—गन्धकन्तु समानीय नवनीता-मलच्छवि। तत्सर्पिषि विपक्तव्यं यावत्तैलनिभं भवेत्। वस्त्रेणान्तरितङ्कृत्वा ढालयेच्छिफलाम्भसि। एवं गन्धाश्मसंशुद्धं तत्तत्कर्म्मसु योजयेत्। अथ रसस्येति पारदरसस्य पलद्वयं। खल्लितस्य मूर्च्छितस्येत्यर्थः। मूर्च्छनं खल्वशिलादिषु औषधचूर्णं रसं वा दत्त्वा विमर्द्य निर्म्मलीकरणमभिधीयते। तत्र तावत् पारदे सिद्धदोषवयनिवारणार्थं विभिर्द्रवैः प्रत्येकं सप्तधा मूर्च्छनं कार्य्यम्। पटु लवणं अलम्बुषः कुलाहलं किण्वं सुरावीजं। माक्षिकस्य विशुद्धस्येति स्वरूपतः शोधितया ज्ञेयम्। चित्रकाण्डचूर्णानि प्रत्येकं पलमात्राणि। चतुर्जातकादीनां प्रत्येकमर्द्धपलम्। रस. र. रक्तपि. चि.।

अमृतागुग्गुलुः। पुं। राजयक्ष्मणि हितः। प्रस्थं गुड़ूच्याः प्रस्थार्द्धं प्रत्येकं त्रिफलापुरं। पक्त्वा द्रोणेऽम्भसः शिष्टे पाकाहृते ततः क्षिपेत्। कीर्षे दन्त्यमृताव्योषविड़ङ्गत्रिफलारजः। प्रत्येकमर्द्धपलिकं वृहच्चूर्णञ्च कार्षिकम्॥ रस. र. वा. र. चि.। चक्रपाणिमते तु गुड़ूची ४ श. गुग्गुलुः २ अ. आमलकी २ श. विभीतकः २ श. पुनर्णवा २ श. हरीतकी २ श. एकत्र कुट्टयित्वा ६४ शरावबारिणि पक्त्वा १६ शरावावशिष्टः क्वाथः कार्य्यः। अथ गालयित्वा पुनः पक्त्वा घनीभूते तत्र दन्त्यादिचूर्णं प्रत्येकं ४ तो. वृहतः २ तो. प्रक्षेप्यम्। प्रक्षेपश्च ईषदुष्णतायां देयः। मात्रा च यथाग्निबलं देया। च. द. वा. र. चि.। पाठो यथा—अमृतायाश्च द्विप्रस्थं प्रस्थमेकन्तु गुग्गुलोः। प्रत्येकं त्रिफलाप्रस्थं वर्षाभूप्रस्थमेव च। सर्व्वमेकत्र सङ्कुट्य क्वाथयेन्नखण्डेऽम्भसि। पुनः पचेत्यादशेषं यावत्सान्द्रत्वमागतं। दन्ती-चित्रकमूलानां कणा-विश्वफलत्रिकं। गुड़ूचीत्वग्विड़ङ्गानां प्रत्येकार्द्धपलीन्मितं। वृहतः कर्षमेकन्तु सर्व्वमेकत्र चूर्णयेत्। सिद्धे क्षीणं क्षिपेत्तत्र अमृतागुग्गुलोः परमिति॥ च.द.। अयं भावप्रकाशेऽपि वातरक्ते उक्तः। पाठस्य मर्म्मार्थस्तुल्य एवेति पाठो न लिखितः। भा. म. ३भ.।

अमृताङ्कुरलौहः। पुं, क्ली। उपदंशे लौहविशेषः। तत्रायं पाठः—"पारदं गन्धकं लौहमभ्रं ताम्रं सगुग्गुलुं। भल्लातं पलिकं सर्व्वं धात्र्याः सार्द्धं षड़्द्रवैः। द्वात्रिंशं पथ्याहरीतकीलौहात् षोड़शिकं हविः। पचेत्प्रस्थ वराक्वाथे लौहपाके विधानवित्। सुसिद्धं तत्समश्नीयात् सम्पूज्य गुरुदेवतां। संमर्द्य मधुसर्पिर्भ्यां गुञ्जाद्वयद्वया

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिने दिने। अवानुपानं पयसा नारिकेलोदकेन वा। कुष्ठीक्तामृतक्काङ्कुरलौहादस्य त्रिफलाभागभेदः, अतः पाठद्वयम्। प्रयोगा. उ. द चि.। भेषजमिदं कुष्ठरोगे हितम्। अत्र पलमेकं रसस्येति रससिन्दूरमिति केचित्। अपरे हिङ्गुलोत्थपारदं व्यवहरन्ति। वृद्धास्तु रससिन्दूरमेव व्यवहरन्ति। रसादिसर्व्वमेकीकृत्य लौहपात्रे त्रिफलाक्काथेन पचेत्। पाकशेषे त्रिफलाचूर्णं देयम्। र. सा. सं. रस. र.। कुष्ठीक्तो यथा—"हुताशसुखसंशुद्धं पलमेकं रसस्य वै। पलं लौहस्य ताम्रस्य पलं भल्लातकस्य च। गन्धकस्य पलञ्चैकमभ्रकस्य च गुग्गुलोः। हरीतकीविभीतक्योश्चूर्णं कर्षद्वयं द्वयोः। अष्टमाषाधिकं तत्र धात्र्याः पाणितलानि षट्। घृतं द्वाष्टगुणं लौहात् द्वात्रिंशत्त्रिफलाजलम्। एकीकृत्य पचेत्पात्रे लौहे तद्विधिपूर्व्वकम्। पाकमेतस्य जानीयात् पाकज्ञः कुशली भिषक्"। इत्यादि। हुताशसुखसंशुद्धिः यथा रसार्णवे—रसस्य पञ्चमांशेन गन्धेन लौहपात्रके। लौहदण्डेन च तथा दत्त्वैषन्नवनीतकं। मर्द्दनात्काज्जलिङ्कृत्वा पिष्टं शालिञ्चिकाद्रवैः। वृहत्यीच्यास्तु पित्तेन वेष्टयित्वा निधापयेत्। हण्डिकाया मुखं लिप्त्वा शनैर्मृद्वग्निना पचेत्। गन्धगन्धञ्च यावत्स्यात् तद्धुताशसुखं विदुः॥ कश्चित्तु हुताशसुखसंशुद्धमिति गुग्गुलुपर्य्यन्तं संबध्नाति। तेन शोधनजारणादिक्रमेण सर्व्वेषामग्नौ शोधनमाह हरीतकीविभीतक्योः सार्द्धं कर्षद्वयं पृथगिति वचनात्। हरीतक्यास्तु ५ तो. विभीतक्याश्च आमलक्याः षट् पाणितलं १२ तो.। मिलितत्रिफला १६ प. पाकार्थजलं १६ श. शेषः ४श. घृतं १६ प. लौहपात्रे पाच्यम्। वस्त्रपीड़ितं यदा न निःसरति मुद्रा च भवति तदावतार्य्य चूर्णप्रक्षेपः। अत्र पाके सावधानेन भाव्यम्। अमृतसारलौहवदस्य क्रिया ज्ञेया। वृहदपि अमृताङ्कुरलौहं कुष्ठे उक्तम् यथा—घृतं हिङ्गुलसम्भूतं ताम्रं तद्विगुणं भवेत्। सुजीर्णलौहं तत्तुल्यमभ्रं भल्लातकं तथा। ताम्रद्विगुणगन्धञ्च गुग्गुलुस्तद्विधा मतः। त्रिफलायास्तथा चूर्णं प्रत्येकं सूततुल्यकं। ताम्राच्चतुर्गुणं सर्पिः तैलमेरण्डजं द्विधा। रसाञ्जनञ्चाभ्रतुल्यं पक्त्वा चैवामृतद्रवैः। चतुर्गुणेघृतात्तैलान्निस्नीयमवतारयेत्"। इत्यादि। भेष. प्रयोगा कुष्ठचि.। अस्य रसेन्द्रसारसंग्रहोक्तः पाठः प्रायेण तुल्य एव। केवलं गन्धकस्य पलञ्चैकमित्यत्र—"अभ्रकस्य पलञ्चैकं गन्धकस्य चतुःपलमिति।" कर्षद्वयं द्वयोरिति प्रत्येकं कर्षद्वयमिति। घृतं द्वाष्टगुणमित्यत्र—"घृतञ्चाष्टगुण" मितिभेदः। अभ्रकस्य पलञ्चैव गन्धकस्य चतुःपलमित्यत्र प्रयोगामृतपाठं न साधु मन्यन्ते भट्टादयो विशिष्टवैद्याश्चेति। र.सा.सं.टी.। रसरत्नाकरः प्रयोगामृतेन तुल्य एव केवलं द्वाष्टमाषाधिकमित्यत्र अष्टमाषाधिकमिति भेदः। रसेन्द्रचिन्तामणौ च "अष्टमाषाधिकानि" घृतं त्वष्टगुणमिति पाठभिन्नतास्ति। रसे.चि.कुष्ठ.। सा.कौ.। अन्य दग्धपित्ते उक्तम्।

अमृतादिः। पुं। कषायद्रव्यसमूहे यथा—अमृतावृषपटोलं सुस्तकं सप्तपर्णं खदिरमसितवेत्रं निम्बकं द्वे हरिद्रे" इत्यादि। अयं विसर्पविस्फोटके हितः। असितवेत्रं श्यामा लता। रस.र.। च.द.विसर्प-चि.। सा.कौ.। प्रयोगा.। अपरः सूतवक्त्रे यथा—अमृतं नागरं धात्री वाजिगन्धा त्रिकण्टकं। प्रपिबेद्वातरोगार्त्तः सशूली सूतवक्त्रवान्॥ भैष.।

अमृतादिवटी। स्त्री। विषं २ भा. कपर्दभस्म ५ भा. मरिचं ९ भा. जलेन सूक्ष्मामा वटीकार्य्या। इयं कफे विदीपेऽग्निमान्द्ये च हिता। भा.म.१भ ज्वरचि.।

अमृताद्यगुग्गुलुः। पुं। अयं मेदोरोगे हितः। यथा—"अमृता त्रुटिवेल्लवत्सकं कलिपथ्यामलकानि गुग्गुलुम्। क्रमवृद्धमिदं मधुप्लुतं पिड़कास्थौल्यभगन्दरं जयेत्।" अत्र त्रुटिः सूक्ष्मैला। वेल्लं विड़ङ्गं। वत्सकं कुटजत्वक्। एषां क्रमवृद्ध्या भागो ग्राह्यः। भैष.मेद.। भा.म.३भ.मेदचि.।

अमृताद्यघृतम्। क्ली। वातरक्ते हितं। घृत ४ श. कल्कद्रव्यं १ श.। पाककाले आमलकीरसं ४ श. वारि १२ श. दत्त्वा पाच्यम्। आरग्वधः शीर्णालुफलमज्जा। क्षीरः श्वेतपुनर्णवा। चुरकः कीकिलाक्षमूलम्। गन्धर्व्वः एरण्डमूलं। घनः सुस्ता। च.द.वातरोग-चि.। भा.म २भ।

अमृताद्यचूर्णम्। क्ली। आमवाते। गुड़ूचीनागरगोक्षुरशुण्ठितिकावरुणचूर्णानि प्रत्येकं समभागानि। भा.म.२भ.।

अमृताद्यतैलम्। क्ली। गलगण्डादौ हितम्। मूर्च्छिततिलतैलं ४ श. गुड़ूच्यादीनां शतपलं वारि ६३ श शेषः १६ श.। उक्तद्रव्याणां मिलितकल्कः १श.। तैलपाकविधिना पाच्यम् च.द गलगण्ड-चि.। अथवा गुड़ूच्यादीनां प्रत्येकं १ प. वारि १२ प. तैलं पिबेच्चामृतवल्लिनिम्बहिंसाद्वयीवत्सक

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिप्पलीभिः। सिद्धं बलावेतसदेवदारु हिताय नित्यं गलगण्डरोगी॥ तैल ४ श. कल्कार्थ—गुलञ्च, निमछाल, गुड़कांउली, केलेकड़ा, कुटजत्वक्, पिपूल, वेड़ेला, वेतस, देवदारु। मिलित १ श.। भैष.। सिद्धं बलाभ्यामिति। च.द.।

अमृताफलः। पुं, क्ली। पटोले। भा. पू. १ भ.। कावेलप्रसिद्धफलवृक्षविशेषे, रुचिफले वा, नास्यांती इति स्त्रीके। मद.व.७।

अमृतारिष्टम्। क्ली। अरिष्टमिदं विषमज्वरादौ हितं। अत्र गुड़ूच्याः पलशतं दशमूलस्य तथा एकत्र द्रोणचतुष्टयजले पक्त्वा पादशेषं ग्राह्यं। अथ तत्र क्वाथे गुड़स्य तुलावयं (७१॥० सेर) गोलयित्वा, क्वथितजीरस्य १६ प. पर्पटस्य २ प.। तथा सप्तपर्ण-विकटु-मुस्तक-नागकेशर-कटुकत्रितिविषेन्द्रयवादीनाञ्च प्रत्येकं चूर्णपलं निक्षिप्य आवृतपात्रे मासमात्रं स्थापयेत्। तेनान्तरुत्सेकेनारिष्टं जायते। भैष.।

अमृतार्णवः। पुं। रसोऽयं अतिसारे ज्वरातिसारे च हितः। मात्रा १ मा.। अनुपानं धान्यजीरक-शालबीजानां यथालाभं देयम्। द्रव्याणि यथा हिङ्गुलीत्थरस-लौह-गन्धक-टङ्कण-शुटी-धान्यक-क्षीवेर-मुस्तकाम्बष्ठाजीरकातिविषाजीरकाणि छागीक्षीरेण मर्द्दयेत्। भैष.। रस.र.। अजाजी जीरकम्। घृणप्रिया अतिविषा। धान्यजीरकयूषेणेति यूषैः प्रतरतरं मुद्गां ज्ञेयम्। र.सा.सं.अतिसा.चि.।

अमृतार्णवरसः। पुं। कासहरोऽयं रसः। अत्र अमृता गुड़ूची। पद्मकं पद्मकाष्ठं। र.सा.सं. कासचि.। रस र.। भैष.। द्वितीयो रसः वाजीकरणाधिकारे। अत्र सूतभस्म रससिन्दूरम्। र. सा.सं.। अन्यः कासे—"राज्ञा-विड़ङ्ग-त्रिफला-रसगन्धकटुत्रिकं। अमृता पद्मकं क्षौद्रं विषतुल्यं सुचूर्णितम्॥" मात्रा २ गुञ्जा। रस.र.कासचि.। अन्यः राजयक्ष्मणि—"पारदं गन्धकं गुद्धं सूतलौहञ्च टङ्कणं। राज्ञा विड़ङ्ग-त्रिफला-देवदारु-कटुत्रयम्। अमृता पद्मकं तुल्यं विषञ्चापि विचूर्णयेत्। मधुनाच वटी कार्य्या।" प्रयोगा.। अन्यः रसेन्द्रसारधृते रसायनाधिकारे। "सूतभस्म चतुर्भागं लौहभस्म तथाष्टकं। अभ्रभस्म च षड्भागं गन्धकस्य च पञ्चमं। भावयेत्त्रिफलाक्वाथैस्तत्सर्व्वं भृङ्गजद्रवैः। शिग्रुवह्नि-कटुक्वाथैर्भावयेत् सप्तधा पृथक्। सर्व्वतुल्या कणा यौज्या गुड़ैर्मिश्यं पुरातनैः॥" मात्रा निरूपिता। र सा सं प्रयोगा.रसायने।

अमृतार्णवलौहम्। क्ली। कुष्ठाधिकारे "त्रिकटुत्रिफलालौहं समभागं विचूर्णितं। सर्व्वेषामपि चूर्णानामर्द्धभागं शिलाजतु। गुड़ूचीस्वरसैर्देया भावना रविरश्मिभिः। वारत्रयं ततः पिष्टं घृतेन सह मर्द्दयेत्॥" मात्रा १ मा.मधुना लीढ्वा। रस.र. प्रयोगा.। अयम् अमृतार्णवरस इति केचिदप्युक्तः। प्रयोगाः।

अमृतावटिका (गुग्गुलुः)। स्त्री। व्रणघ्नी वटिका। व्रणशोथे इति च.द.। "अमृतापटोलमूलत्रिफलात्रिकटुकृमिघ्नानाम्। समभागानां चूर्णं सर्व्वसमो गुग्गुलुर्भागः॥ * प्रतिदिवसमेकैकां गुड़िकां खादेदक्षप्रमाणाम्। रस.र.।" अक्षमात्रं दधिकं न कर्त्तव्यं कोष्ठादिकवृद्ध्याल्पमपि। प्रयोगा.। द्वितीया बृहदभिधाना व्रणे हिता। यथा—"अमृतायाः पलशतं दशमूलशतं तथा। पाठा मूर्व्वा बला द्वे च तथा गन्धर्व्वहस्तकः॥ पृथग्दशपलानेतान् नभयानां शतं तथा। विभीतकशते द्वे च धात्र्याः शतचतुष्टयं॥ गुग्गुलोः प्रस्थसंयुक्तं जलद्रोणद्वयं निशाम्। एकां पर्य्युषितां पक्त्वा चतुर्थांशावशेषितं॥ क्वाथे गुग्गुलुमालोड्य लौहपात्रे पचेद्घनं। शीते चैतानि संचूर्ण्य प्रक्षिपेत्पलिकानि तु। त्रिफलाद्वितयादन्तीव्योषक्षिन्नाश्वगन्धकान्। विड़ङ्गं चित्रकं चोचं सूक्ष्मैलां नागकेशरम्॥" इत्यादि। पीतलिबद्धगुग्गुलुना सह पर्य्युषितं कर्त्तव्यं। ततः परदिने क्वाथकरणम्। कैशोरगुग्गुलुवत् सर्व्वमपरं ज्ञेयम्। प्रयोगा. व्रणचि.। रसरत्नाकरधृतपाठस्तुल्यएव। तत्र अस्य पत्री यथा—घृतपिष्टितगुग्गुलुः १६ प क्वाथार्थं गुड़ूची १०० प. दशमूल १०० प. आकनादी, मूर्व्वा, वाड़ियाला, श्वेत वाड़ियालामूलं, एरण्डमूलं, प्रत्येकं १० प. साधितहरीतकी १००, बहेड़ा १००, आमलकी ४००, पाकार्थं देयं जलं द्रोणत्रयमितं (१९२श.) अत्रैव पीतलीबद्धं गुग्गुलुं दत्त्वा पाकशेषजलं ४८ श. कर्त्तव्यम्। अत्रैव क्वाथे क्वाथस्थापितगुग्गुलुं पिष्ट्वा पाचनीयम्। सिद्धे प्रक्षेपार्थं त्रिफला बृहन्मूलं विकटु दन्तीमूलं गुड़ूची अश्वगन्धा विड़ङ्गं तेजपत्रं गुड़त्वक् सूक्ष्मैला नागेश्वरः गुण्डा, एषां प्रत्येकं १ प एकीकृत्य स्निग्धभाण्डे स्थाप्यम्। मात्रा ८ माषा। उष्णोदकमनुपेयम्। रस र. व्रणशोथचि.। भा.२भ.। अन्या कुष्ठरोगे वातरक्ते च हिता। तथा अयं पाठः—अमृतायाः पलशतं दशमूल्यास्तथाशतं। पाठा मूर्व्वा बला तिस्रो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दार्वी गन्धर्व्वहस्तकाः। एषां दशपलान् भागान् विभीतक्याः शतं हरेत्। वे शते च हरीतक्याः आमलक्यास्तथा शतम्। जलद्रोणत्रये पक्वा अष्टभागावशेषितं। प्रस्थं गुग्गुलुमाहृत्य प्रस्थार्द्धञ्च घृतं पचेत्। पाकसिद्धौ प्रदातव्यं गुड़ूच्याः सत्त्वमेव च पलद्वयं तथा शुण्ठ्याः पिप्पल्याश्च पलद्वयम्॥ इत्यादि। भैष॰कुष्ठ-चि॰।

अमृताष्टकः। पुं, क्ली। गुड़ूच्याद्यष्टद्रव्यसिद्धकषाये। एष पित्तश्लेष्मज्वरे हितः। च॰द॰चि॰। "गुड़ूचीन्द्रयवारिष्टपटोलं कटुरोहिणी। नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम्। अमृताष्टकइत्येष पित्तश्लेष्मज्वरापहः॥" अरिष्टं निम्बत्वक्। रोहिणी कटुकी। एषां प्रति २० रक्तिकं वारि ३२ तो॰ शेषः ८ तो॰। प्रक्षेपार्थं पिप्पलीचूर्णं ॥० तो॰। सा॰कौ॰। [व ४।

अमृतासङ्गम्। क्ली। खर्परिकातुल्ये। तत्पर्य्यायः,—कर्परिकातुल्यं, अञ्जनं (हे)। मद॰।

अमृतासङ्गमः। पुं। खर्परीतुल्ये। तूँते। भं मीरचूत। वैनिघ।

अमृताह्वम्। क्ली। अमृतफले, नास्पातीति लोके। हिं अपी। मद॰व॰६। गुणाः—गुरु वातघ्नं स्वादु चिदीषघ्नञ्च। 'नास्पाती' मुङ्गलदेशे प्रचुरं लभ्यते। भा॰। खर्बूजे। मद व॰६।

अमृताह्वयतैलम्। क्ली। वातरक्ते तैलम्। पाठो यथा—"गुड़ूची मधुकं ह्रस्वपञ्चमूलं पुनर्णवा। रास्ना सैरण्डमूला च जीवनीयानि लाभतः। पलानां शतिकैर्भागैर्वैला पञ्चशतं भवेत्। कोलं विल्वं यवान् माषान् कुलत्थांश्चाढ़कीन्मितान्। काश्मर्य्याणाञ्च शुष्कानां द्रोणं द्रोणशतेऽम्भसः। साधयेज्जर्जरं पूतं चतुर्द्रोणञ्च शेषयेत्। तैलद्रोणं पचेत्तेन दत्त्वा पञ्चगुणं पयः। पिष्ट्वा त्रिफलिकाञ्चैव चन्दनोशीरकेशरम्। पत्रैलागुरुकुष्ठानि तगरं मधुयष्टिकां। मञ्जिष्ठार्द्धपलञ्चैव तत्सिद्धं सर्व्वयोगिकम्॥" भा॰म॰२भ॰वातरोगचि॰।

अमृतिः। स्त्री। जलपात्र-विशेषे।

अमृतेश्वररसः। पुं। अयं रसो यक्ष्मणि हितः। रसभस्मामृतासत्वं लौहं मधुघृतान्वितम्। अमृतेश्वरनामायं षड्गुञ्जो राजयक्ष्मणि॥ भा॰म॰२भ। रसेचि॰। प्रयोगा॰।

अमृतोत्था। स्त्री। सुधामूलायाम्, सालमिश्रीति भाषा। अत्रि॰।

अमृतोत्पन्नम्। क्ली। तुत्थे। खर्परीतुत्थे। खापर। मं कालखापरी। रा॰नि॰व॰१३। [नि॰च॰।

अमृतोत्पन्ना। स्त्री। गृहमक्षिकायाम्। रा॰

अमृतोद्भवः। पुं। धन्वन्तरौ। रत्ना॰। क्ली। तुत्थे। रा॰नि॰व॰१३। खर्परीतुत्थे। खापर। रा॰नि॰व॰। आमलक्याम्।

अमृतोपमम्। क्ली। खर्परीतुत्थे। तूँते। मं मीरचूत। वैनिघ॰। द्रव्ये। वैनिघ॰।

अमृतोपहिता। स्त्री। तोपचिनी इति ख्याते।

अमेध्यम्। क्ली। पुरीषे। शब्दर॰।

अमोघा। स्त्री। पाटलावृक्षे। भा॰। श्वेतपाटलायाम्। हरीतक्याम्। विड़ङ्गे। मे॰। श्वेतपाटलायाम्। पद्मभेदे। रा॰नि॰व॰२३।

अम्बकः। पुं। वकुलवृक्षे। जटा॰। क्ली। नेत्रे। हे॰च॰। ताम्रे। रा॰नि॰व॰१३।

अम्बरम्। क्ली। कार्पासे। कार्पास। र॰मा॰। अभ्रधातौ। अम्बर। रा॰नि॰व॰१३। भैष॰। वसन्तकुसुमाकरे। तन्नामकगन्धद्रव्ये। विश्वः।

अम्बरदः। पुं। कार्पासवृक्षे। वैनिघ॰।

अम्बरा। स्त्री। कार्पासवृक्षे। प॰सु॰।

अम्बरातकः (रीयः)। पुं। आम्रातकवृक्षे। आमड़ा गाछ। जटा॰।

अम्बरिः(रीषः)। पुं, क्ली। आम्रातकवृक्षे। भर्जनपात्रे। अम॰।

अम्बष्ठः। पुं। देशविशेषे। स्त्रीढ़ायां वैश्यकन्यायां ब्राह्मणाज्जाते ब्राह्मणविशेषे।

अम्बष्ठका (की) अम्बष्ठा (ष्ठिका) स्त्री। (Stephania hernandifolia, Syn cissampelas hexandra.) पाठायां। निमूका। आकनादि। रा॰नि॰व॰६। पटांङ इति हिमालये। भार्य्यां। र॰मा॰। लक्षणामूले। भैष॰स्त्रीरोग॰चि॰पुष्यानुगचूर्णे। अम्लवेतस्याम्। आम्रवृक्ष। रा॰नि॰व॰५। भा॰पू॰१भ। यूथिकायाम्। यूँई। प॰सु॰। मयूरशिखायाम्। वा॰सू॰प्रियङ्ग्वादिः। "अम्बष्ठामधुकं नमस्कारी।" आम्रातके। आमड़ा। क्षुद्रक्षुपविशेषे। अम्बाड़ा, अम्बरी इतिच दक्षिणापथे। हिं मीहुया। साचिका, साकरुण्ड इति च पश्चिमदेशे ख्याता। पूदिना।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्य्यायः,—वालिका वाला शठाम्बा अम्बालिका अम्बिका अम्बा माचिका दृढ़वल्का मयूरिका गन्धपत्री चित्रपुष्पी श्रेयसी सुखवाचिका छिन्नपत्री भूरिमल्ली। सु. सू. ३८अ.। रस.र पुष्पानुगचूर्णे। गुणाः—कषायाम्ला कफघ्नी कण्ठरोगघ्नी वातरोगहरी रुच्या दीपनी च। रा.नि.व.४।

अम्बष्ठादिः। पुं। पाठादिगणविशेषे। यथा—अम्बष्ठा-धातकीकुसुमसप्तसङ्गाकट्वङ्गमधुशविल्वपेशी-रौद्रसावररौद्रपलाशनन्दीवृक्षपद्मकेशराणीति।गुणाः-"गणौ प्रियङ्ग्वम्बष्ठादी पक्वातिसारनाशनौ। सन्धानीयौ हितौ पित्ते व्रणानाञ्चापि रोपणौ॥" सु.सू.-३८अ।

अम्बष्ठी। स्त्री। कटुकाभेदे। कटुकी विशेष। यथा—"रक्तकाण्डेक्षुहाम्बष्ठी कटुका चापरा स्मृता।" द्रव्याभि.।

अम्बा (लिका)। स्त्री। अम्बष्ठायाम्। पूंदिना। पाठायाम्। आकृनादि। रा.नि.व.४।

अम्बिका। स्त्री। अम्बष्ठायाम्। पूंदिना। भा पू.१भ.। मायाफलवृक्षे। हिं मयनफल। मद व ४। कटुक्याम्। श.च.

अम्बु। क्लीं। जले। रा.नि.व.१४। बालके। च. द.ज्वरातिसार-चि.। "किरातास्त्र्यूषणाम्बुकम्।" भैष श्वीथ-चि-पुनर्णवातैले।

अम्बुकः। पुं। श्वेतार्कमन्दारे। रक्तैरण्डे।

अम्बुकण्टकः। पुं। नक्रे। त्रिका।

अम्बुकन्दः। पुं। शृङ्गाटके। वै.निघ।

अम्बुकिरातः (टः)। पुं। नक्रे। त्रिका.।

अम्बुकोशः। पुं। गोधायाम्। शिशुमारे। त्रिका.।

अम्बुकुक्कुटी (टिका)। स्त्री। जलकुक्कुट्यां। पानकउड़ी। मं पानकोंवड़ी। See प्लवः।

अम्बुकूर्म्मः। पुं। गोधायाम्। वै.निघ।

अम्बुकृष्णा। स्त्री। जलपिप्पल्यां। काँचड़ा दाम्। वै.निघ।

अम्बुकेशरः। पुं। क्षोलवृक्षे। नेवु। रा. सा.सं.।

अम्बुचरः। पुं। जलचरे। कच्छटे। वै.निघ.।

अम्बुचामरम्। क्लीं। शैवाले। जटा.।

अम्बुचारिणी। स्त्री। स्थलपद्मिन्यां। हिं थलपद्म। वै.निघ.।

अम्बुजः। पुं। हिज्जलवृक्षे। अम.। मत्स्यादौ। भा.। जलवेतसे। कच्छटे। वै.निघ.। त्रि। जल-जातमात्रे। क्लीं। कमले। मे.जत्रिकं। [वै.निघ।

अम्बुजः। पुं। हिज्जलवृक्षे। अम.। मत्स्यादौ। भा.। जलवेतसे। कच्छटे। वै.निघ.। त्रि जल-जातमात्रे। क्लीं। कमले। मे.जत्रिकं।

अम्बुजामलकी। स्त्री। पानीयामलके।

अम्बुटः। पुं। अम्लवृक्षे। आवुटा। अपटा। रा.नि.व.९।

अम्बुतालः। पुं। शैवाले। त्रिका.।

अम्बुदः। पुं। मुस्तायां। सि.यो.कामला-चि. मूर्व्वाद्यतं द्वन्द्वः। "पटोलाम्बुददारुभिः।"

अम्बुधरः। पुं। नागरमुस्तायां। भद्रमुस्तायां। वै.निघ.।

अम्बुधिः। पुं। सागरे।

अम्बुधिफेनः। पुं।समुद्रफेने। भा.।

अम्बुधिश्रवाः। स्त्री। गृहकन्यायाम्। गृहकुमारी। मं कोड़फल.। रा.नि.व.५।

अम्बुनाम। क्लीं। क्षीरविरे। वांला। भा.। बालके

अम्बुपः। पुं। चक्रमर्दे। चाकुन्दे। (वां श.। कच्छटे। के.।

अम्बुपत्रा (त्रिका) (त्री)। स्त्री। उदुम्बरायाम्। रत्ना.।

अम्बुप्रसादः
अम्बुप्रसादनः } पुं। निर्म्मलीफलवृक्षे। रा. नि. व.११। See कतकः

अम्बुप्रसादनफलम्। क्लीं। निर्म्मलीफले। वै निघ.।

अम्बुभृत्। पुं। मेघे। मुस्तके। अ.। समुद्रे। के

अम्बुमयूरकः। पुं। जलापामार्गे। वै निघ.।

अम्बुमातृजः। पुं। शम्बूके। हे.च.।

अम्बुमुक् (च्)। पुं। मुस्तके। मेघे। के।

अम्बुयष्टिका। स्त्री। भार्य्यं। वांगनहाटी। रत्ना.।

अम्बुरः। पुं। हाराधःकाष्ठे। गोवराट्। (वां

अम्बुरु (रो) हः। पुं, क्लीं। पद्मे। रा.।

अम्बुरुहा। स्त्री। पद्मिन्यां। स्थलपद्मिन्याम् वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अम्बुवल्लिका। स्त्री। कारवेल्लाम्। वै.निघ.।

अम्बुवल्ली। स्त्री। क्षुद्रकारवेल्लां। जलपिप्पल्यां। वै.निघ.।

अम्बुवारिणी। स्त्री। स्थलकमलिन्याम्। वै.निघ.।

अम्बुवासिनी। स्त्री। रक्तपाटलि।

अम्बुवासी। पुं। रक्तपाटलि। वै.निघ.।

अम्बुवाहः। पुं। मुस्तके। चि.क्र.क.वल्ली प्रदर-चि.।

अम्बुवेतसः। पुं। जलवेतसे। सं खल्लाला बत्पर्य्यायः,—परिव्याधः विदुलः नादेयी (अ)।

अम्बुशिरीषिका } स्त्री। जलशिरीषे। वै.
अम्बुशिरीषी } निघ.। तत्पर्य्यायः,—शिरीषिका टिण्टिनिका दुर्ब्बला वारिशिरीषिका। अस्या गुणाः,—विदीषविषकुष्ठार्शीनाशिनी। भा.।

अम्बुशुक्तिः। स्त्री। जलशुक्तौ। झिनुक। भं जलशिंपी। वै. निघ.।

अम्बुसर्पिणी। स्त्री। जलौकसि। जोंक।

अम्बुसाधनम्। क्ली। निर्म्मलीबीजे। वै. निघ.।

अम्बुसारा। स्त्री। कदलीवृक्षे। भा. पू.१भ.फ.व।

अम्बुसाह्वः। पुं। कुन्दपुष्पचुपे। वै.निघ.।

अम्बूकः। पुं। लकुचवृक्षे। के.।

अम्भः। पुं। जले। रा.नि.व.१४। वालनामौषधविशेषे। अ.।

अम्भःपा। पुं। चातकपक्षिणि।

अम्भःसारः। पुं। मुक्तायां। वै.निघ.।

अम्भःसूः। स्त्री। शम्बूके। सं शुंके। धूसे। हे।

अम्भोजम्। क्ली। पद्मे। वारिवेतसे। पुं। पुष्कराह्वये। सारसपक्षिणि। के.।

अम्भोजनालः। पुं। पद्मनाले। वै.निघ.।

अम्भोजा। स्त्री। वल्लीयष्टीसधुनि। वै.निघ.।

अम्भोदः। पुं। भद्रमुस्तायाम्। रा. नि. व.: ६। च. द. यक्ष्म-चि. एलादिमन्थे। प्रपौण्डरीके। प.मु.। क्ली। कांसे।

अम्भोधरः। पुं। मुस्तके। मेघे। समुद्रे। शब्दर.।

अम्भोधिपल्लवः। पुं। प्रवाले। सं पोंवळें। रा.नि.व.१३।

अम्भोरुहम्। क्ली। पद्मे। च.द.र.पि.चि.। पुं। सारसपक्षिणि। अ.।

अम्भोरुहकेशरम्। क्ली। पद्मकेशरे। च. द. र.पि.चि.।

अम्रः। पुं। आम्रवृक्षे। आंबागाछ। रा. नि.। See आम्रः। साचिकायां। पुदिना। हिं सोहया। अम्लवेतसे। रा.नि.।

अम्रम्। क्ली। आम्रफले।

अम्रगन्धहरिद्रा। स्त्री। (Curcuma reclinata.) आम्रहरिद्रायाम्। आंबहळद। हिं आमहल्दी।

अम्लवेतसः। पुं। अम्लवेतसे।

अम्लसारः। पुं। अम्लवेतसे। रा, नि.।

अम्लातः (कः)। पुं। (Spandias mangifera) Hogplum. आम्रातकवृक्षे। आंबाडागाछ। हिं अम्बाड़ा। सं अंबाडाचे झाड़। श. मा.। त्रिका.। See आम्रातकः।

अम्लः। पुं। षड्रसान्यतमरसे। अम्ल रस। स च जम्बीरमातुलुङ्गफलादिषु व्यक्तः। गुणाः—लघुः उष्णः, रुचिकरः, दीप्तिकरः, हृदयतर्पणः, वातानुलोमनः, बल्यः, कण्ठहृत्करश्च। रा.नि.व.२०। तद्विपाकोऽम्लः तद्विपाकगुणस्तु पित्तकृत् वातश्लेष्मरोगघ्नश्च। सु.सू.। प्रीतिकरः पाचनः मार्दवकरश्च। अतिसेवनात् भ्रान्तिकुष्ठकफपाण्डुकार्श्यकासजनकः। रा.नि.व १२। पाचनः रुचिकरः पित्तलः कफजनकः रक्तवर्द्धकः लघुः लेखनः उष्णवीर्य्यः स्पर्शशीतलः सङ्कोचनः क्लेदनी वातघ्नः स्निग्धः तीक्ष्णः सारकः शुक्रविबन्धानाहदृष्टिघ्नः हर्षणश्च। अतिसेवने—श्रमतृड्दाहतिमिरज्वरघ्नः, शीथविस्फोटकुष्ठपाण्डुत्वकृच्च। भा. पू. १भ.। लघुत्वं पाचकत्वं पित्तश्लेष्मवान्तिक्लेदत्वसुष्णत्वं वातघ्नत्वच्च। राज.।

अम्लम्। क्ली। अम्लवेतसफले। काञ्जिके। घोले। रा. नि.। बदरफले। सि. यो. अरोचक-चि.। वर्वरचन्दने रा. नि. व. १२।

अम्लकः। पुं। लकुचवृक्षे। श.र.।

अम्लकरञ्जः। पुं। करञ्जविशेषे। टेकूकरञ्ज। तत्फलगुणाः—पिपासाघ्नं गुरु रुचिकरं पित्तकरञ्च। राज.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अम्लका। स्त्री। पालङ्कशाके। पालं शाक। प.मु.। पलाशीलतायाम्। रा. नि. व. ४।

अम्लकाञ्जिकम्। क्ली। काञ्जिके। काँजि। च.द.ग्रहणी-चि.महाषट्पलघृते।

अम्लकाण्डः। पुं। शुक्लरसोने। वै.निघ.। क्ली। लवणतृणे। लोणा घास। रा.नि.व.८।

अम्लकूचिः। पुं। वृक्षविशेषे।

अम्लकेशरः। पुं। मातुलुङ्गे। टाबालेबू-गाछ। प.मु.। दाड़िम्ववृक्षे।

अम्लकेशरी। पुं। अम्लरसनिम्बुकवृक्षे। गोंड़ालेबू। वै.निघ.।

अम्लकोशः (शाकः)। पुं। तिन्तिड़ीवृक्षे। मद.व.६।

अम्लगोरसः। पुं। अम्लतक्रे। टक् घोल। मं अंबटताक। वै.निघ.।

अम्लचाङ्गेरी। स्त्री। चाङ्गेरीभेदे। टक् आमरुल। च.चि.३अ.अग.तैले.।

अम्लचुक्रिका। स्त्री। चिञ्चाम्ले। तेँतुलेर अम्बल। रा.नि.व.११। See चिञ्चासारः।

अम्लचूड़ः। पुं। शाकाम्ले। चिञ्चासारे। तेँतुलेर अम्बल। रा.नि.व.११। अम्लशाके। चुका पालङ। रा.नि.।

अम्लजम्बीरः। पुं। अम्लरसनिम्बूकवृक्षे। टक् लेबू गाछ। मं इडनिंबू। रा.नि.व.११। See निम्बूकः।

अम्लटकः। पुं। अश्मन्तकवृक्षे। अम्ल कुचाई।

अम्लत्वक्। पुं। प्रियालवृक्षे। मं चारीली।

अम्लदोलकः। पुं। चुक्रे। चुका पालङ्। मं अंबोती। वै.निघ.।

अम्लद्रवः। पुं। बीजपूरादिरसे। भा.म. १भ.जिह्वाकज्व.चि.। "अम्लद्रवः संज्ञमयेद्रसज्ञां।"

अम्लद्रव्यम्। क्ली। अम्लवेतसे। थैकल। मं आम्लवेतस। रा.नि.व.६।

अम्लनिम्बूकः। पुं। महाम्लनिम्बुके। गोड़ा लेबू। मं सीटिं इरनिम्बू। वै.निघ.।

अम्लनिशा। स्त्री। शठ्याम्। शटी। रा.नि.।

अम्लपञ्चकम्। क्ली। १ कीलदाड़िमवृक्षाम्लचुक्रिकाम्लवेतसेषु। २ जम्बीरनारङ्गाम्लवेतसतिन्तिड़ीबीजपूरेषु। रा.नि.व.२१। See पञ्चाम्लम्।

अम्लपत्रः। पुं। दण्डालुके। थाम् आलू। वै. निघ.। अश्मन्तकवृक्षे। रा.नि.व.९। क्षुद्रपत्रतुलसीवृक्षे। र. मा.।

अम्लपत्रम्। क्ली। चुक्रशाके। रा.नि.व ७।

अम्लपत्रकः। पुं। भेण्डायाम्। अश्मन्तकवृक्षे। अम्ल कुचाई, आबूटा। रा.नि.व ९। मद.व.१। अम्लक्षीणिकायाम्। आमरुल। भा. पू.१व.।

अम्लपत्रा। स्त्री। शुक्लायां। ओक्ड़ा। प.मु.।

अम्लपत्रिका। स्त्री। चाङ्गेर्याम्। क्षुदे नुनी। नुनी इति लोके। आविता इति हिन्दी। रा.नि.व.५।

अम्लपत्री। स्त्री। पलाशीलतायाम्। रा.नि.व ४। चाङ्गेर्यां। रा नि.व.५। क्षुद्राम्लिकायाम्। खूदे नुनी।

अम्लपनसः। पुं। लिकुचवृक्षे। डेलो, मान्दार गाछ। मं ओटीचे झाड़। वै.निघ.।

अम्लपर्णिका } स्त्री। वृक्षविशेषे। सुरपर्ण्याम्।
अम्लपर्णी } भा.। गुणाः—अम्लपर्णी वातकफशूलस्य च विनाशिका। वै.निघ.।

अम्लपादपः। पुं। वृक्षाम्ले। तेँतुल गाछ। मं कोवंवी। वै.निघ.।

अम्लपित्तम्। क्ली। रोगविशेषे। तल्लक्षणम्—विरुद्ध-दुष्टाम्लविदाहि-पित्तप्रकोपि-पानान्नभुजो विदग्धं पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः॥ अविपाकः क्रमोत्क्लेशः तिक्ताम्लोद्गारगौरवैः। हृत्कण्ठदाहारुचिभिरम्लपित्तं वदेद्भिषक्॥ तच्च द्विधा—अधोगमूर्द्धगञ्चेति। मा.नि.।

अम्लपित्तान्तकमोदकः। पुं। अम्लपित्ते रोगविशेषः। अव शुण्ठी ८ प. पिप्पली ८ प. गुवाकचूर्णं ८ प. घृतं ४श. एकत्र पाकः। पाकसिद्धौ एषां प्रक्षेपः यथा लवङ्गचूर्णं वचाचूर्णं कुष्ठचूर्णं नागकेशरचूर्णं यमानीचूर्णं रक्तचन्दनचूर्णं रास्नाचूर्णं कृष्णजीरकचूर्णं यष्टिमधुचूर्णं देवदारुचूर्णं त्रिफलाचूर्णं तेजपत्रत्वगेलाचूर्णं सैन्धवं हपुषाफलचूर्णं शटीमदनकट्फलचूर्णं जटामांसीचूर्णं अभ्रं रङ्गं रौप्यं तालीशचूर्णं पद्मकाष्ठचूर्णं सूर्व्वाचूर्णं वराहक्रान्ताचूर्णं वंशलोचनं पिप्पलीमूलचूर्णं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतावरीचूर्णं जातीफलचूर्णं काकोलीद्वयकपिप्पली-कर्पूर-विड़ङ्ग-वनयमानीनां चूर्णं बलागुड़ूच्यपामार्गवीजगोक्षुरवीजचन्दनदेवताड़ानां चूर्णं लौहं कांस्यञ्चेति द्रव्यजातं प्रत्येकं २ तो. स्वर्णं १ तो.। भैष.।

अम्लपित्तान्तकरसः। पुं। रसोऽयमम्लपित्तघ्नः। रसे.चि.। अत्र तुल्यां पथ्यामिति सर्व्वचूर्णसमां हरीतकीम्। र.सा.सं.। शतसूतार्कलौहानां तुल्यां पथ्यां विमर्द्दयेत्। माषमात्रं लिहेत् क्षौद्रैरम्लपित्तप्रशान्तये॥ भैष.।

अम्लपूरम्। क्ली। वृक्षाम्ले। रा.नि.व.६।

अम्लपुष्पिका। स्त्री। आरण्यशणवृक्षे। वन्य शण। सं राणताग। वै.निघ.।

अम्लपूरम्। क्ली। तिन्तिड्याम्। तेँतुल। सं कोकम्बी। रा.नि.व.६।

अम्लफलः। पुं। आम्रवृक्षे। रा.नि.व.११।

अम्लफलम्। क्ली। वृक्षाम्ले। तेँतुल। रा.नि.व.६।

अम्लफला। स्त्री। कत्थारिकायाम्। सं लघुकत्थारी। वै.निघ.।

अम्लबदरः। पुं। अम्लकोलिकायाम्। टेक कुल। च.सू.४अ।

अम्लभेदनः। पुं। अम्लवेतसे। रा.नि.। चुक्रे।

अम्लमारीषः। पुं। अम्लशाकविशेषे। अम्बल नटिया। हिं सारा। गुणाः—"अम्लमारीषकी दोषकोपनी मधुरः पटुः।" वै.निघ.।

अम्लमूलकम्। क्ली। व्युषितकाञ्जिकपक्वमूलके। "काञ्जिकं व्युषितं पक्वं मूलकं त्वम्लमूलकम्।" प.प्र.३ख। च.द.संग्रहणी-चि.वृहच्चु क्र.।

अम्लमेहः। पुं। पित्तजन्यमेहरोगभेदे। अत्र रोगी अम्लरसगन्धं मेहति। सु.नि. ६अ।

अम्लरुहा। स्त्री। मालवदेशप्रसिद्धनागवल्लीभेदे। गुणाः—रुचिकरी दाहघ्नी गुल्महरी मदकरी अग्निबलवर्द्धिनी आध्मानहरी च। रा.नि.।

अम्ललोणिका / अम्ललोणी स्त्री। (Oxalis corniculata.) चाङ्गेर्य्याम्। आंगरुलशाक। सं चुका। अ.टी.। तत्पर्य्यायः—चाङ्गेरी चुक्रिका दन्तशठा अम्लवेष्टा (अ)। गुणाः—दीपनी रुच्या रुचीष्णा कफवातघ्नी पित्तला अम्ला ग्रहण्यर्शःकुष्ठातीसारघ्नी च। भा.पू. १ भ.। मात्रा २—३ माषा। पालङ्क्यविशेषे। चुकापालङ। र.मा.।

अम्लवती। स्त्री। चाङ्गेर्य्याम्। आंगरुल। रा.नि.व.५। क्षुद्राम्लिकायां। खूदे अमली।

अम्लवर्गः। पुं। चाङ्गेरी-लकुचा-अम्लवेतस-जम्बीरक-वीजपूरक-नागरङ्ग-दाड़िम-कपित्थाम्लवीजाम्लकाम्लवेष्टाकरमर्द्दकतिन्दुककोलतिन्तिड़ीष। अम्लवेष्टासहितं हरितदुरितं पञ्चाम्लकं तद्वयं, विज्ञेयं करमर्द्दनिम्बुकयुतं स्यादम्लवर्गाह्वयम्। रा.नि.व. २२। अम्लवेतसजम्बीरलकुचाम्लचणकाम्लकाः। नागरङ्गं तिन्तिड़ी च चिञ्चाफलञ्च निम्बुकम्। चाङ्गेरी दाड़िमञ्चैव करमर्द्दं तथैव च। एष चाम्लगणः प्रोक्तो वेतसाम्लससायुतः॥ र.सा.सं.।

अम्लवल्ली (ल्लिका)। स्त्री। विषपर्णीकन्दे।

अम्लवाटकः। पुं। आम्रातकवृक्षे। सं आंवाटा। वै.निघ.।

अम्लवाटा / अम्लवाटिका / अम्लवाटी स्त्री। अम्लरसयुक्त-नागवल्लीभेदे। अम्लरसविशिष्टे पानविशेष। सं अंबाडे पर्ण। रा.नि.व.११। अस्या गुणाः,—अम्ल-तिक्त-कटुरसा-रुच्या-उष्णा मुखपाककारिणी विदाहिनी रक्तपित्तप्रकोपकरी विष्टम्भिनी वायुनाशिनी। रा. See नागवल्ली।

अम्लवातकः (वाड़कः)। पुं। आम्रातकवृक्षे। आम्ड़ा गाछ।

अम्लवाष्पः। पुं। चाङ्गेर्य्याम्। आम्रुल। सं चुका। वै.निघ.।

अम्लवास्तु(स्तू)कम्। क्ली। चुक्रनामपवशाके। अम्लवेतुया टाङ्गावेतो इति भाषा। रा.नि.व ७।

अम्लविदुलः। पुं। अम्लवेतसे। वै.निघ.।

अम्लवीजम्। क्ली। वृक्षाम्ले। तेँतुल। रा.नि.व.६। See तिन्तिड़ी।

अम्लवृक्षं (कम्)। क्ली,पुं। वृक्षाम्ले। तेँतुल। भा.पू. १भ.।

अम्लवेतसः (कः)। पुं, क्ली। (Ruxem vesicarius) country sorrel. स्वनामख्यातवृक्षे। अम्लवेतस। हिं आमलटास्। धैक

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति च.द.। च.द.ज्व.चि.। सिन्धुचूषणैः साम्ल-वेतसैः। च.सू.२अ.। तत्पर्य्यायः,—अम्लः वीधिः रसाम्लः आम्लवेतसः वेतसाम्लः अम्लसारः शतवेधी वेधकः भीमः भेदनः अम्लाङ्कुशः भेदी राजाम्लः अम्लभेदनः रक्तसारः फलाम्लः अम्लनायकः सहस्र-वेधी वीराम्लः गुल्मकेतुः वराभिधः शङ्खद्रावी मांस-द्रावी (रा), वराङ्गी (र), चुक्रः (अ)। गुणाः—अत्यम्लः कषायोष्णः वातघ्नः कफार्शोगुल्मारोचक-हरश्च। भोटदेशे प्रसिद्धः। रा. नि. व. ६। लघु दीपनमत्यम्लं भेदनं हृद्रोगशूलगुल्मघ्नं पित्तलं लोम-हर्षणं रुच्यं विष्मूत्रदोषहरं प्लीहोदावर्त्तघ्नं हिक्का-नाहारुचि-श्वास-कासाजीर्ण-वान्तिहरं वातकफज-रोगघ्नं छागमांसद्रवकरं चणकाम्लतुल्यगुणं लौहमूची-द्रावकञ्च। भा.पू. १भ.। तत्फलगुणाः—दीपघ्नं गुरु दारकञ्च। राज.। चुक्रे। चूका पालङ्। हिं चुकेका शाक। प. मु.। अम्लतीक्ष्णाम्। च.द. काङ्गाय. गु.।

अम्लशाकम्। क्ली। वृक्षाम्ले। तेँतुल। रा. नि. व. ६। पुं। चुक्रनामसपत्रशाके। अम्लकुचाई, -टक पालङ्, चूका पालङ्। तत्पर्य्यायः,—शाकाम्लं गुल्माम्लः अम्लचुक्रिका चिञ्चाम्लं अम्लचूडः चिञ्चासारः। गुणाः—अत्यम्लं वातघ्नं दाहश्लेष्मघ्नञ्च। सशर्करस्य तस्य गुणः—दाहपित्तकफहरत्वम्। रा नि. व. ७।

अम्लशाकाख्यम्। क्ली। चुक्रनामकपत्रशाके। टक पालङ्। मं थीरचुका। रा. नि. व. ७।

अम्लष्टा। स्त्री। चाङ्गेर्य्याम्। मं आंवीती।

अम्लसरा। स्त्री। नागवल्लीभेदे। रा.नि.व.६।

अम्लसारः। पुं। अम्लवेतसे। रा. नि. व. ६। निम्बुके। रा. नि. व. ११। हिन्तालवृक्षे। रा. नि. व. ९।

अम्लसारं (कम्)। क्ली। काञ्जिके। चुक्र-नामककाञ्जिकभेदे। रा.नि.व.१५।

अम्लस्कन्धः। पुं। अम्लरसान्वित-द्रव्यसमूहे। "अम्ली धात्रीफलाम्लीका मातुलुङ्गाम्लवेतसम्। दाड़िमं रजतं तक्रं चुक्रं पारिवतं दधि॥ आम्र-मामातकं भव्यं कपित्थं करमर्दकम्।" वा. सू. १०।२२५।

अम्लस्तम्भनिका। स्त्री। तिन्तिड्याम्। वै.निघ.।

अम्लहरिद्रा। स्त्री। शठ्याम्। रा. नि. व. ६।

अम्ला। स्त्री। चाङ्गेर्य्याम्। आमरुल। रा. नि. व.५। वनमातुलुङ्गे। अम्लवेतसे। रा. नि. व. ६। श्रीवल्लीवृक्षे। वर्षाभल्लिका। रा. नि. व. ८। तिन्तिड्याम्। रा. नि. व. ११। भा. पू. १भ. फलव.।

अम्लाङ्कुशः। पुं। अम्लवेतसे। रा.नि.व.६।

अम्लाटनः। पुं। महासहावृक्षे। मे ঝाँটি विशेष। आयना इति च भाषा। हिं कट्सरया लालगुलसख्खन। आयनाट् इति दक्षिणदेशे। वाणपुष्प इति च गौड़े ख्यातः। गुणाः—कषायो मधुरस्निग्ध उष्णवीर्य्यः स्निग्धश्च। भा.पू.१भ.पु.व। ४ख.म.भ.योनिरो.चि.। चि.क्र.क.वल्ली.गर्भवेदना-हरयोगे।

अम्लाढ्यः। पुं। करुणनिम्बुके। नारांगा-लेबूर गाछ। प.मु.।

अम्लातः (कः)। पुं। अम्लाटनवृक्षे। भा.पू. १भ पु.व.।

अम्लातकी। स्त्री। पलाशीलतायां। रा.नि.व.।

अम्लादानः। पुं। कुरण्टकवृक्षे। पीयावांसा इति प्रसिद्धे। वाणपुष्प इति गौड़े।

अम्लादिः। पुं। तिन्तिड्याम्। रा. नि. व. ६। चुक्रनामकपत्रशाके। रा.नि.व.७।

अम्लाध्युषितः। पुं, क्ली। सर्व्वगताक्षिरोगे। लक्षणम्—"श्यावं लोहितपर्य्यन्तं सर्व्वञ्चाक्षि प्रप-द्यते। सदाहशीथं सास्रावमम्लाध्युषितमम्लतः॥" मा.नि.। करुणनिम्बुके।

अम्लानः। पुं। (Gomphrena globosa.) वन्धुजीवकवृक्षे। वाकूलीवृक्ष। त्रिका.। झिण्टिका भेदे। अम्लानी झिण्टिकाभेदे। विश्व.। अम्ला-टनवृक्षे। आयना इति भाषा। भा.म.४भ. योनिरो. चि.। "श्वदंष्ट्रमधुकक्षुद्राम्लाणैः।" महा-सहायाम्। मे.नक्षिकं। महाराजतरणीवृक्षे। रा. नि. व. १०।

अम्लानम्। क्ली। पद्मे। श. र.।

अम्लाना। स्त्री। महासेवतीपुष्पवृक्षे। वड़ वन-सेउती। मं थीर राणशेवंती। वै.निघ.।

अम्लानिनी। स्त्री। पद्मसमूहे। पद्मिन्याम्। त्रिका.।

अम्लाम्ला। स्त्री। चाङ्गेर्य्यां। आमरुल शाक।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अम्लायनी। स्त्री। मल्लिकाभेदे। सं नेवाली। वै.निघ।

अम्लिका। स्त्री। तिन्तिड़ीवृक्षे। प. सु. रा. नि. व ११। आम्रे। रा.नि.व. ३। पलाशीलतायाम्। माचिकायाम्। पूदिना। रा नि.व. २३। श्वेताम्लिकायाम्। चाङ्गेर्याम्। रा.नि व.२३। अम्लीङ्गारे। मे.। अर्शोरोगे तिन्तिड्यर्थे, एवं सर्व्वत्र दीपनयोगे। पुरीषसंग्रहणादौ पुनरम्लिका श्यासच्छदवृक्षदारके। सि.यो. अग्निमुखचूर्णे वृन्दः। सि. यो. अरोच.चि.।

अम्लिकाकन्दः। पुं। सं अम्लनालिकायाम्। वै निघ.।

अम्लिकापानम्। क्ली। तिन्तिड़ीपानके। तेँतूलपानी। पक्वतिन्तिड़ीकं वारिमर्द्दितं शर्करासरिचलवङ्गकर्पूरमिश्रितं पानकमुच्यते। "अम्लिकायाः फलं पक्वं मर्द्दितं वारिणा दृढ़म्। शर्करासरिचैर्मिश्रं लवङ्गैन्दुसुवासितम्। अम्लिकाफलसम्भूतं पानकम् वातनाशनम्।" भा.पू.पानकवर्गः।

अम्लिकावटकः। वटकविशेषे। अमबड़ा। भोतीवरा इति लोके। "अम्लिकां स्वेदयित्वा तु जलेन सह मर्द्दयेत्। तन्नीरे क्वतसंस्कारे वटकान् मज्जयेज्जनः। अम्लिकावटकास्ते तु रुच्या वह्निप्रदीपनाः॥" भा.।

अम्ली। स्त्री। जलवेतसे। वै.निघ. २भ. मदात्ययचि. खर्जूरादिमद्ये। चुक्रिकायां। टेकपालङ्। तिन्तिड्याम्। रा.नि.व.११। भा.पू.१भ.फलव.। चाङ्गेर्य्याम्। मे.लड्डिकं।

अम्लोका। स्त्री। तिन्तिड्याम्। अ.टी। "अम्लीङ्गारे। सु. नि. ६ अ।

अम्लीकाफलम्। क्ली। तिन्तिड़ीफले। तद्गुणाः—शुष्कं सन्दीपनं भेदनं लघ्वग्नं लघु कफवातयोः पथ्यञ्च। वा.सू ६अ। "अम्ली हि चाम्लफलमविपक्वं तदम्लपित्तामकरं विदाहि। वातामये शूलगदे प्रशस्तं पक्वं तथा शीतगुणोपपन्नं॥" अवि. १७अ।

अम्लीयः। पुं। अम्लवेतसे। वै. निघ.।

अम्लोटकः। पुं। अश्मन्तकवृक्षे स्वनामैव प्रसिद्धे। हिं आमरोडा। अम्लकुचाई। रत्ना.।

अम्लोटजः। पुं। चाङ्गेर्य्याम्। र (गरुल-पर्णी)। च.द.चातुर्थ-ज्व चि.। "अम्लोटजसहस्रेण दलेन।"

अम्लोत्तमम्। क्ली। दाड़िमे। प.सु.।

अयनम्। क्ली। माषषट्कं व्याप्य भानोरुदग्दक्षिणतो वा गतौ। मे.नवकं। तच्च द्विविधम्—उत्तरायणं दक्षिणायनञ्च। तयोराद्यं वर्षाशरद्धेमन्तात्मकं, तत्र भगवानाप्यायते सोमोऽम्लवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते। द्वितीयञ्च शिशिरवसन्तग्रीष्मात्मकं तत्र भगवानाप्यायतेऽर्कः तिक्तकषायकटुकाश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमपहीयते। सु. सू.।

अयस् } क्ली। लौहसामे। रत्ना.। च. द.
अयसम् } पाण्डु-चि.। कान्तलौहे। प. सु.। सुण्डलौहे। रा नि.व.१३।

अयस्कान्तः। पुं। कान्तलौहे। रा.नि.व.१२। लौहचुम्बुके। कान्तपाषाणे। चुम्बक पाथर। गुणाः—लेखनः शीतो मेदोविषघ्नश्च। मद.व ४।

अयस्कान्तशिला। स्त्री। लौहचुम्बुके। चुम्बुकपाथर। वै निघ.

अयस्कारः। पुं। जङ्घाग्रभागे। विका.।

अयस्कोटः। पुं। लौहकिट्टे। वै.निघ.।

अयानम्। क्ली। स्वभावे। हारा.।

अयाद्यम्। क्ली। कांस्यधातौ। काँसा। वै.निघ.।

अयुक्छदः। पुं। सप्तपर्णवृक्षे। छातिम गाछ। हे.च.।

अयुग्मकः। पुं। सप्तपर्णवृक्षे। वै. निघ.।

अयुग्मच्छदः। पुं। सप्तपर्णवृक्षे। छातिम गाछ। अ.टी.।

अयुग्मपत्रः } पुं। सप्तपर्णवृक्षे। वै.निघ.।
अयुग्मपर्णः }

अयोगः। पुं। विश्लेषे। कठिनोद्यमे। कूटे। मे.गलिकं।

अयोगुड़ः। पुं। लौहगुड़िकायां। "वरमाशीविषविषं कथितं तामसेव वा। पीतमत्यग्निसन्तप्तं भक्षितो वाप्ययोगुड़ः॥" च.।

अयोग्रम्। क्ली। मूषले। बाणादौ। अस

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयोवनः। पुं। एकीभूत-लौहपुञ्जे। हातुड़ी। तत्पर्य्यायः—लौहकूटम्।

अयोच्छिष्टम्। क्ली। लौहकिट्टे। मण्डूर। वै. निघ.।

अयोमलम्। क्ली। लौहमले। लोहार का गुवा मण्डूर। प.मु.। "अयोमलन्तु सन्तप्तं।" सि.यो. पाण्डु-चि. वृन्दः। च. द. पाण्डु-चि.।

अयोरजः। क्ली। लौहकिट्टे। मण्डूर। लौह-चूर्णे। च. द. पाण्डु-चि, नवायसचूर्णे।

अयोवस्तिः। पुं, स्त्री। वस्तिकर्म्मविशेषे। यथा—एरण्डमूलं निःक्वाथ्य मधुतैलं ससैन्धवम्। एष युक्त अयोवस्तिः सवचापिप्पलीफलः॥" भा।

अरकः। पुं, क्ली। शैवाले। हारा.। वै.निघ.। चेवपर्पटे। रा.।

अरक्तः। पुं। लाक्षायाम्। लो। रा.नि. व. ६। See अलक्तः।

अरग्वधः। पुं। (Cassiafistula.) महाकर्णिकारवृक्षे। बड़ सोन्दालि, लड़िया शोणाल, राखाल नड़ी, वानर नड़ी इति। मं वड़िलु वाहव्याचे झाड़। कं हेग्गके। तें रेल्लचेट्टु। उत्. सुनारि। हिं आमलटा, धनवहेड़ा। गुणाः—अतिमधुरः शीतलः शूलघ्नः ज्वरकण्डूकुष्ठमेहकफविष्टम्भघ्नश्च। रा.नि.व.९। संसनः गुरुः हृद्रोगतीदोदावर्त्तघ्नश्च। एतत्फलं संसनगुणयुक्तं रुच्यं पित्तकुष्ठकफघ्नं कीष्ठशुद्धिकरं ज्वरे हितञ्च। भा.पू. १भ.। "पर्णानि रेचकानि स्युः कफमेदोहराणि च। पुष्पानि स्वादुशीतानि तिक्तानि ग्राहकाणि च। तुवराणि विजानीयात्...। मज्जा च मधुरा पाके स्निग्धा चाग्निविवर्द्धनी। रेचका पित्तवातानां नाशका समुदाहृता।" द्रव्य.गु.वै.निघ.। See आरग्वधः।

अरग्वधम्। क्ली। स्वर्णालुफले। सि.यो.वृहदग्निमुखचूर्णे।

अरङ्गः (गा) (गी)। पुं, स्त्री। मत्स्यविशेषे। वै.निघ.। मधुश्रियुः। रत्ना.।

अरङ्गरः। पुं। क्रविमविषे। वै.निघ.।

अरङ्गुदी। स्त्री। माधवीलतायाम्। वै.निघ.।

अरजा। स्त्री। घृतकुमार्य्याम्।

अरन्...। पुं। अरलुवृक्षे। शोणा गाछ। अ.टी.।

अरणः। पुं। चित्रकवृक्षे। व.निघ.।

अरणिः। पुं। क्षुद्राग्निमन्थवृक्षे। छोट गणिरि। वा.टी.१५अ.। हेमा. वीरतर्व्वादौ। अरणिर्वह्निमन्थे ना इयौर्निर्मथ्यदारुणि। मे.णत्रिकं। श्योणाकवृक्षे। चित्रकवृक्षे। सूर्य्ये। अग्न्युत्पादक-काष्ठयन्त्रे।

अरणिका। स्त्री। अग्निमन्थवृक्षे। वा.सू. १५अ. वेल्लन्तरादिव.। "वेल्लन्तरारणिरुवूकवृषाग्निभेद...।"

अरणी। स्त्री। क्षुद्राग्निमन्थे। छोट गणिरि। मं लघुऐरण। रा. नि. व. ९।

अरणीकेतुः। पुं। महाग्निमन्थवृक्षे। बड़ गणिरि। मं थोरऐरण। रा.नि.व.९।

अरण्यः। पुं। कट्फलवृक्षे। कट्फलेर गाछ। श्र.च.। शालभेदे। वै.निघ.।

अरण्यम्। क्ली। कानने। वन। मं राण। कं अटवि। उद्यान-महावनीपवन-प्रमदवनभेदात् तच्चतुर्विधम्। तत्रोद्यानं यत्र रागिणः क्रीड़न्ति। नृपालयेषु अन्तःपुरीचितं वनं प्रमदवनम्। उपवनं पुरः प्रान्तस्थवनम्। रा.नि व.२। पुं। कट्फलवृक्षे।

अरण्यकः। पुं। महानिम्बे। महानिम्। मं वकाननिम्ब। वै.निघ.।

अरण्यकणा। स्त्री। कटुजीरके। जीरा विशेष। वै. निघ.। वनपिप्पल्याम्।

अरण्यकदली। स्त्री। गिरिकदल्याम्। वनकदल्याम्। वीचेकला, वुनो कला, दया कला इति च भाषा। मं राणकेल। रा.नि.व.११। गुणाः—शीतला मधुरा बल्या वीर्य्यवर्द्धनी रुच्या दुर्जरा गुरुः दाहशीषपित्तनाशिनी। तत्फलं तुवरं मधुरं गुरु च। वै.निघ.।

अरण्यकर्कटी। स्त्री। वनजातकर्कट्याम्। वुनो काँकुड़। मं राणतवसे। गुणाः—"अरण्यकर्कटी चोष्णा रसे तिक्ता च भेदका। पाके कटुः कफक्लमीपित्तकण्डूज्वरापहा। वै.निघ.।

अरण्यकाकः। पुं वनकाके। दाँड़काक। मं राणकावला। द्रव्य. गु. वै. निघ.।

अरण्यकार्पासी। स्त्री। The wild cotton. वनकार्पासे। वनकापासी। मं राणकापासी। तें पत्ति। गुणाः—व्रणघ्नी शस्त्रचक्षघ्नी रुक्षा च। रा. नि. व. ४।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरण्यकुक्कुटः। पुं। वनकुक्कुटे। वनकुकड़ा। हिं कीमड़ा वनमोर्गा। मं राणकोंबड़ें। तन्मांसगुणाः—हृद्यं लघु श्लेष्महरञ्च। रा. नि. व. १७। हृंहणं स्निग्धं वीर्य्योष्णं वातघ्नं गुरु च। मद व.१२।

अरण्यकुलित्थिका (त्था) (त्थी)। स्त्री। कुलत्थायाम्। वन कुर्त्तिकलाय। रा.नि.व.५। A blue stone used as a collyrium. कुलत्थाञ्जने। कृत्रिमाञ्जनविशेष। रा.नि.व १३। हिं कालशुर्मा। See कुलत्थाञ्जनं।

अरण्यकुसुम्भः। पुं। वनकुसुम्भवृक्षे। वन कुसुंग। मं राणकर्डई, राणकुसुम्भ। गुणाः—पाककटुः श्लेष्मघ्नः दीपनश्च। रा.नि.व.४।

अरण्यकोलिः। स्त्री। वनबदरे। वनकुल।

अरण्यगवयः। पुं। वनगवये। अयं कूलचरजातीयः। सु.सू.४६अ.। कूलिचरशब्दं पश्य।

अरण्यघोली (लिका)। स्त्री। वनघोलीति प्रसिद्धपत्रशाकविशेषे। घोलीशाके। रा.नि.व ६। मन्यनदण्डे।

अरण्यचटकः। पुं। वनचटकपक्षिणि। वन चटा पाखि, गुड़गुड़े, नागरभड़ुई, छातार इति च। तत्पर्य्यायः—धूसरः भूमिशयः। तन्मांसं—लघु स्निग्धं शीतलं शुक्रबृद्धिकारि बलप्रदं चटकसमगुणञ्च। वै.निघ. द्रव्यगु.।

अरण्यचम्पकः। पुं। वनचम्पके। वनचाँपा। गुणाः—शीतलं लघु शुक्रबृद्धिकरं बलकरञ्च। रा. नि. व १०।

अरण्यछागः। पुं। वनछागे। बूनो छागल।

अरण्यजः। पुं। तिलकक्षुपे। हे.च.।

अरण्यजार्द्रिका। स्त्री। Wild ginger. वनार्द्रके। वन आदा। मं राणआलें। गुणाः—कटु अम्लं रुचिकरं बल्यं आग्नेयञ्च। रा.नि.व ६।

अरण्यजीरम् (कम्)। क्ली। वनजीरके, कटुजीरके। वनजीरा। मं कडुजीरें। तें जीरकवर्ग गुणाः—"अरण्यजीरकश्चीर्णं तुवरं कटुकं मतम्। लम्बवातं कफञ्चैव व्रणञ्चैव विनाशयेत्।" वै.निघ. द्रव्य. गु.।

अरण्यतुलसी। स्त्री। वनतुलस्यां, कृष्णवर्व्वर्य्याम्। वनतुलसी। हिं कालावावरो। मं राणतुलस, वैजयन्ती-तुलसी। सा द्विधा ह्रस्व-दीर्घभेदात्। गुणाः—"आरण्यतुलसी चोष्णा कटुका च सुगन्धिका। वात-कफोष वीसर्प-विषञ्चैव विनाशयेत्॥ आरण्यतुलसी क्षुद्रा कटुी चोष्णा च तिक्तका। रुच्याग्निदीपनी हृद्या विदाही लघुपित्तला। रुच्या कण्डू विषच्छर्दिकुष्ठज्वरविनाशिनी। वातं कृमीन् कफं दद्रु रक्तदोषञ्च नाशयेत्। बीजञ्चास्या दाहशोषनाशकं परिकीर्त्तितम्।" वै. निघ.। द्रव्य.गु.।

अरण्यत्रपुसकः। पुं। वन्यत्रपुषे। वनकाँकुड़, वनशशा। मं गोड़शेंदनी। वै.निघ.।

अरण्यत्रपुसी। स्त्री। इन्द्रवारुण्याम्। राखालशशा। महाकाललतायाम्। गाकालफल। वै. निघ. अपस्मा. चि. नस्ये।

अरण्यदमनः। पुं। वनदमनबृक्षे। के।

अरण्यधान्यम्। क्ली। नीवारे। उड़िधान। मं देवभात। रा. नि. व. १६।

अरण्यधेनुः। वनजातायां गवि।

अरण्यपलाण्डुः। पुं। वनजातपलाण्डौ। वनपेँयाज। गुणाः—मूत्रवेरेचनः श्लेष्महरणीत्युग्र एव च। मात्रातिरेकाद्भवति वान्तिक्लम्लभेदनः। अतिमात्रं प्रयुक्तोऽसौ विषवन्मारयेन्नरं। शीघ्रं श्वासे च कासेच सूचसङ्गे प्रयुज्यते॥ अवि:।

अरण्यपिप्पली। स्त्र। वनपिप्पलीनामवृक्षे। वनपिपूल। रा.नि.व ६।

अरण्यमक्षिका। स्त्री। Gad fly. वनमक्षिकायाम्। डाँशमाछि। श.र.।

अरण्यमुद्गः। पुं। वनमुद्गे। घोड़ामूग। रा. नि.व.१६। See मकुष्ठकः। मुद्गपर्ण्याम्।

अरण्यमुद्गा। स्त्री। मुद्गपर्ण्याम्। मूगानि। रा. नि.व.३।

अरण्यमेथी। स्त्री। वनमेथिकायाम्। वनमेति। मं राणमेथि। वै.निघ.।

अरण्यरजनी। स्त्री। वनहरिद्रायां। वनहलूद। मं राणहलद। वै.निघ.।

अरण्यवायसः। पुं। Raven. अरण्यकाके। डोमकाक। मं डोमकाव्ला। रा.नि.व.१९।

अरण्यवासिनी। स्त्री। अल्पस्वपर्णीलतायां अमर बेल इति लोके। रा. नि.व.३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरण्यवास्तुकः। पुं। कृष्णञ्जरक्षुपे। वनबेतो। मं राणचाकवत। रा. नि. व.५। See कृष्णञ्जरः।

अरण्यशालिः। पुं। Wild rice. नीवारधान्ये। उड़िधान। मं देवभात। रा.नि.व.२३।

अरण्यशुनः। पुं। वनकुक्कुरे। नेकड़ेबाघ। वै.निघ.।

अरण्यशूरणः। पुं। वनजशूरणे। बुनो ओल। मं गीड़ासूरण। रा.नि व. ७।

अरण्यश्वा। पुं। कपौ। बानर। हे.च.। चिचकव्याघ्रे।

अरण्यसम्भूतः। पुं। कर्कटके। काँकरोल।

अरण्यहलदीकन्दः। पुं। वनहरिद्रायाम्।

अरण्यहरिद्रा (स्त्री)। वनहलूद। हिं वनहर्दि। गुणाः—कुष्ठघ्नः वातरक्तघ्नश्च। भा.पू.१भ. ह. व.। कटुः मधुरा रूक्षा अग्निदीपनी तिक्ता कुष्ठवातहा रक्तदोषविषश्वासकासहिक्काश्च नाशयेत्। वै. निघ.।

अरतिः। स्त्री। अनिच्छायाम्। अस्वास्थ्यं चिन्तयात्यर्थमरतिः कथ्यते बुधैः। भा.। औदासीन्ये। पित्तरोगे।

अरत्निः। पुं। निष्कनिष्ठसुष्ठौ। वितत कनिष्ठाङ्गुलि मुष्टि। रा. नि. व. १८।

अरमः। पुं। नेवरीगविशेषे। वै.निघ.। अर्म्म शब्दं पश्य।

अरलः। पुं। श्योणाकवृक्षे। शोणा गाछ। अम।

अरला। स्त्री। हंसपद्याम्।

अरलुः (कः)। पुं। श्योणाकवृक्षे। शोणा गाछ। हिं अर्लु। मं टेंटु. दिंड़ा। श्योणापाठा इति भा.म.१भ.अतिसा.चि.गङ्गाधरचूर्णे। "नागरपाठारलुधातकीकुसुमैः।" च. द. गर्भज्वरे। वै. निघ. अतिसा. चि. अम्बष्ठादिः। वेतसवृक्षे।

अरलुपुटपाकः। पुं। श्योणाकत्वक्कृतपुटपाके। साधनविधिः कुटजपुटपाकवत्। "अरलुत्वक्कृतश्चैव पुटपाकोऽग्निदीपनः। मधुमीचरसाभ्याञ्च युक्तः सर्व्वातिसारजित्॥" शार्ङ्ग.म.ख.१अ.।

अरविन्दम्। स्त्री। पद्मे। प.मु.। रा.नि.व. १०। ताम्रे। रा.नि.व.१३। कोकनदे। रक्तकमले। नीलोत्पले। रा.नि.व.१०। पुं। सारसपक्षिणि। अम.।

अरविन्ददलप्रभम्। क्ली। ताम्रे। ताम्र। वै. निघ.।

अरविन्दिनी। स्त्री। पद्मसमूहे। र. मा.।

अरालः। पुं। Resin. सर्जरसे। धूना। हिं धुना। मं राल। शालवृक्षे। मत्तहस्तिनि। मे.।

अरिः। स्त्री। खनामख्यातखदिरे। खदिरविशेषे। सं आरि। कं श्रीगुरि। तत्पर्य्यायः,—सन्दानिका, दाली, खदिरपत्रिका। गुणाः—कषाया कटुका तिक्ता रक्तपित्तघ्नी च। रा. नि. व. ८।

अरिपूरिमः। पुं। विट्खदिरे। गुयेबाव्ला। मं गंधीहिंवर। वै. निघ.।

अरिमः। पुं। विट्खदिरे। गुयेबाव्ला। रत्ना.। भैष.सुखरी.चि.।

अरिमर्दः। पुं। कासमर्दवृक्षे। कालकाशन्दा। मं कासविंदा। रा. नि. व. ४। एतत्पत्रं रुचिकरं वृष्यं विषकासरक्तघ्नं मधुरं वातकफघ्नं पाचकं कण्डूशीधनं विशेषेण कासहरं विषघ्नं धारकं लघु च। भा. पू.१भ.।

अरिमेदः (कः)। पुं। (Accacia farnesiana, syn. mimosa.) विट्खदिरवृक्षे। विट् खयेर, गुयेबाव्ला, दुर्गन्धखदिर। मं गन्धीहिंवर। कं करञ्जवेलु। हिं गन्धाबुल। प.मु.। तत्पर्य्यायः,—इरिमेदः, रिमेदः, गोधास्कन्धः, अरिमेदकः, अहिभारः, पूतिमेदः, अहिमेदः, विट्खदिरः। गुणाः—कषायः उष्णः तिक्तः भूतघ्नः शीघ्रातिसारकासघ्नः विसर्पघ्नश्च। रा. नि. व. ८। सुखदन्तरोगघ्नः कण्डूविषश्लेष्मकृमिकुष्ठव्रणघ्नश्च। मदः व. ५। कषायः उष्णः तिक्तः भूतविनाशी सुखरीगदन्तरोगरक्तदोषकण्डूकृमिकफशीघातिसारकासविसर्प-विषकुष्ठव्रणघ्नश्च। भा.पू.१भ.वटादिः। भैष. सुखरी. चि.। च.सू.४अ.। मात्रा १ तो.।

अरिमेदाद्यतैलम्। क्ली। सुखरीगे हितम्। सूर्च्छिततिलतैलं द्रव्य. क्वाथार्थं खण्डीकृतारिमेदत्वक् (विट्खदिर, काँटानागेश्वर वा गुयेबाव्ला) १२॥ द्रव. वारि ६४ द्रव. पादशेषः १६ द्रव.। कल्कद्रव्याणां मञ्जिष्ठादीनां प्रत्येकं २ तो.। ततो वस्त-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूतक्वाथकल्काभ्यां तैलपाकविधिना तैलं पचेत्। च.द.सुखरी.चि.।

अरिष्टः। पुं। Soapberry plant. (Sapindus trifoliatus.) रीठावृक्षे। रीठाकरञ्जे। रा.नि.व.९। रिटे गाछ। मे.। गुणाः—"अरिष्टः कटुकः पाके तीक्ष्णश्चोष्णश्च लेखनः। गर्भपातकरः प्रोक्तो लघुः क्रिमिवस्तिदीपहा। ग्रहपीड़ादाहशूलनाशनश्च प्रकीर्त्तितः। वै.निघ.। लसुने।। प.सु.। रा.नि.व.२३। प.सु.वा.सू.१भ.। निम्बवृक्षे। रा.नि.व.२३। प.सु. वा.सू. १५ अ. गुड़ूच्यादिः। "गुड़ूची पञ्चकारिष्ट—।" च.द.पित्तश्लेष्मज्व. अमृताष्टके—। "गुड़ूचीन्द्रयवारिष्ट—।" सु.सू. ४३अ संशोधने। काके। हारा.। कङ्कपक्षिणि। मे.। सुराविशेषे। "औषधयुक्तैर्मद्याकारैः कृतं मद्यमासवः। स एव क्वथितौषधैरिरष्टः।" वा टी.हेमाद्रिः। क्वाथसिद्धौ वारिष्टः। शार्ङ्गः। अरिष्टः क्वाथसिद्धः स्यात्। प.प्र ३। तद्गुणाः—यथाद्रव्यगुणोऽरिष्टः सर्व्वो मद्यगुणाधिकः। ग्रहणीपाण्डुकुष्ठार्शःशोषशोफोदरज्वरघ्नः। गुल्मकृमिघ्नः कषायः कटुवातलश्च। वा. मद्यव.। इक्षुविकारसंहिताभया-चित्रक-दन्ती-पिप्पल्यादि - भूरिभेषजक्वाथादिसंस्कारवानरिष्टोऽभिधीयते। गुणः—अर्शःशोथग्रहणीश्लेष्मरोगहरत्वम्। राज.। आप्लाव्य सुरयाऽसम्यक् द्रव्याणि विविधानि च। सप्ताहान्ते परिस्राव्य रसं वस्त्रेण गालयेत्। एषोऽरिष्टोऽभिधानेन भिषग्भिः परिकीर्त्तितः॥ अवि.। पक्वौषधाम्बुसिद्धं यत् मद्यं तत्स्यादरिष्टकम् चिरदीपघ्नं गर्भस्रावकं ग्रहदीषघ्नञ्च। भा.पू.मद्य.व.। क्ली। पादजलेन विभागदधिकृते तक्रे। घोल। रा.नि.व.१५। सूतिकागारे। रत्ना.। आसवे। मरणचिह्ने। त्रि। अशुभे। सर्व्वत्र मे.। मद्यसामान्ये। रा. नि. व. १४।

अरिष्टकः। पुं। फेनिलवृक्षे। सि.यो.दाहज्वरे, श्रीकण्ठः। "फेनेनारिष्टकस्य च।" निम्बवृक्षे। अत्र निम्बकोमलपल्लवः। च. द. पित्त-ज्व. शिरीलिपे। रीठाकरञ्जे। मद.व.५। सरलद्रुमे। रत्ना.। क्ली। मद्ये। भ.।

अरिष्टत्रयम्। क्ली। स्वस्थारिष्टं वेधारिष्टं कीटारिष्टञ्चेति अश्वारिष्टत्रये। तत्र स्वस्थारिष्टं पञ्चविधं तद्यथा—भोजनारिष्ट-छायाद्यरिष्ट-दर्शनेन्द्रियाद्यरिष्ट-श्रवणेन्द्रियारिष्ट - रसनेन्द्रियारिष्टाः। तत्र प्रथमे रोगं विना हीनवर्णता दुर्मनस्कता भोजनानिच्छा च भवति। द्वितीये छायापराङ्मुखता द्विगता सच्छिद्रता वा भवति। तृतीयादौ नासामेढ्राक्षिपायुभ्योऽकस्मात् रक्तस्रावः, श्रवणादिबाधिर्य्यं जिह्वा कठिना स्तब्धा च भवति। वेधारिष्टः वेधाख्योपसर्गजः। स च शरदि रवितापेन, प्रावृषि शाद्वलाभावाच्च जायते। तस्मिंश्च जाते सज्वरता अधीमुखता श्वासकासौ स्तब्धाङ्गतादि भवति। कीटारिष्टे वाजिनां जठरे कीटगुच्छा जायन्ते, तेन, वाजिनः सीदन्ति। जयदत्तः २३-२५ अ.।

अरिष्टफलः। पुं। कटुनिम्बवृक्षे। रा.नि.व.९।

अरिष्टलक्षणम्। क्ली। मृत्युलक्षणे। "रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते। तल्लक्षणमरिष्टं स्याद्रिष्टञ्चापि तदुच्यते।" भा.।

अरिष्टा। स्त्री। कटुक्याम्। रा.नि.व.९। च. सू.४अ.। प.सु.। र.मा.। वै.निघ.२भ.। विषमज्व. पटोलादौ। नागबलायां। रा.नि.व ४। मद्ये।

अरिष्टाह्वः। रीठाकरञ्जे। रीटे। वै. निघ. २भ. उन्मा. चि.।

अरुः (स्)। पुं। आरग्वधवृक्षे। सोनालगाछ। रक्तखदिरे। क्षतव्रणे। मर्म्मणि। सन्धिस्थाने। उ.।

अरुक्। त्रि। सुस्थे।

अरुग्णः। त्रि। सुस्थे।

अरुङ्मेषः। स्त्री। नेत्ररोगविशेषे।

अरुचिः। स्त्री। स्वनामख्यातरोगे। अरुचि, अरोचक रोग। सत्यामपि बुभुक्षायां भोजनासामर्थ्यं। भोजनानिच्छायाम्। भा.म. १म. श्लेष्मज्व.। See अरोचकः।

अरुजः। पुं। आरग्वधवृक्षे। वड़ सोणालू। रा.नि.व.९। क्ली। कुङ्कुमे। सिन्दूरे।

अरुणः। पुं। कोकिलाक्षभेदे। कूलेखाड़ा। अतिविषायाम्। श्योणाकवृक्षे। प.सु.। मञ्जिष्ठायां। अर्कवृक्षे। मे.। पुन्नागवृक्षे। रा.नि.व.१०। गुडे। रा.नि.व.१४। चित्रकचुपे। मद.व.२। रक्तापामार्गे। रक्तकरवीरे। वै. निघ.। कुष्ठभेदे। लक्षणम्—वातेनारुणाभानि तनूनि बिसर्पीणि तीव्रभेदस्रावयुक्तानि अरुणानि। सु.नि.५अ.। त्रि। रक्तवर्णे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरुणम्। क्ली। अहिफेने। वै.निघ.। रक्तोत्पले। रक्तत्ववृतायाम्। वा.टी. हेमाद्रिः। कुङ्कुमे। रा.नि. व. १२। सिन्दूरे। रा.नि.व.१२। माणिक्यभेदे। वै. निघ.२भ. क्षयरोग. चेलोक्य-चिन्तामणिरसे।

अरुणकपिशः। पुं। द्राक्षाभेदे। किस्मिस्-विशेष। मं फकीरीद्राक्ष। वै. निघ.।

अरुणकमलम्। क्ली। कोकनदे। रक्तकमल। रा.नि.व. १०।

अरुणचूडः। पुं। ताम्रचूडपक्षिणि। कुकुड़ा। वै. निघ.।

अरुणतण्डुलीयम्। क्ली। रक्ततण्डुलीयशाके। राङ्गा नटे'। च. द.।

अरुणनागः। पुं। सुद्राशङ्खे। अचि.।

अरुणनेत्रः। पुं पारावते। पायरा। कोकिले। वै. निघ.।

अरुणपुष्पी। स्त्री। बन्धुजीवकवृक्षे। बांधुलि फूल। मं रक्तदुपारी। वै. निघ.।

अरुणमक्षिका। स्त्री। रक्तमक्षिकायाम्। लाल माछि। वै. निघ.।

अरुणलोचनः। पु.। पारावते। पायरा हिं:कबूतर। रा.नि.व.१९। कोकिले। वै. निघ.।

अरुणसर्षः। पुं। तक्षकसर्षे। वै. निघ.।

अरुणसारः। पुं। हिङ्गुले। वै. निघ.।

अरुणा। स्त्री। अतिविषायाम्। मे.। रा.नि.व. ६। भा.४भ. बाल. ज्व.चि.महाभल्ला. गुड़ी। "घन-कृष्णारुणाश्रङ्गी।" भैष. प्रदरारिरसे। कुष्ठ. चि.। मञ्जिष्ठायां। मे.। रा.नि.व.३। भा.म.१भ. ज्व. चि.लाक्षातैले। "लाक्षा दशाक्षा त्वरुणा षड़क्षा।" प्रपौण्डरीके। प.मु.। विद्रुतायां। मे.। जवायाम्। मद.व.२। अरुणातिविषा श्यामा मञ्जिष्ठा विद्रुता च। श्यामालतायाम्। मे.। इन्द्रवारुणीलतायाम्। गुञ्जालतायाम्। रा.नि.व ३। पुनर्णवायां। मुरडी-र्य्याम्। रत्ना.।

अरुणात्मिका। स्त्री। कुमरिचे। लङ्कागरिच। मं लांक। वै. निघ.।

अरुणाभम्। क्ली। वज्रलौहे।

अरुणार्कः। पुं। रक्तार्के। प. मु। मं मन्दार। कं मन्दार अक्क। रा.नि व.१०। गुणाः—सरः वातकुष्ठकण्डूविषव्रणघ्नः प्लीहगुल्मार्शःकफोदरमल-कृमिहरश्च। कटुतिक्तोष्णः कफघ्नो मेदघ्नो विषघ्नः वातकुष्ठव्रणघ्नः शोथकण्डूविसर्पहरश्च। पुष्पं मधुरं तिक्तं धारकं कृमिकुष्ठकफार्शोविषरक्तपित्तघ्नं गुल्म-शोथहरञ्च। भा. पू. १म.।

अरुणोपलः। पुं। अरुणवर्णमणिविशेषे। चुनि इति भाषा। पद्मरागमणौ। हे.च.।

अरुन्धती। स्त्री। जिह्वाग्रे। वै. निघ.।

अरुषः। पुं। व्रणे। घीटके। वै. निघ.।

अरुंषिका। स्त्री। क्षुद्ररोगान्यतमकपालरोगे। शिरोव्रणे। अयं कफरक्तकृमिकोपतो भवति। "अरुंषि बहुवक्त्राणि बहुक्लेदीनि मूर्द्धनि तु। कफासृक्कृमिकोपेन नृणां विद्यादरुंषिकाम्" ॥ मा. नि.।

अरुष्कः। पुं। भल्लातकवृक्षे। भेलागाछ। मं विवला। भा. पू. १भ.। रा नि व. ११।

अरुष्करः। पुं। भल्लातकवृक्षे। प. मु.। रा. नि. व. ११। भा. पू. १भ.। मद. व. १। अरुंषिका-याम्। वि। व्रणकृति। मे. रचतुष्कं।

अरुष्करम्। क्ली। भल्लातकफले। च. द. अर्शचि.। भैष. कुष्ठ-चि. पञ्चतिक्तघृते। "सना-गरारुष्करव्रद्दारकम्"। सि. यो. चतुःसमलौहे। च. सू. ४अ. कुष्ठघ्नव.।

अरुषा (टा)। स्त्री। भूम्यामलक्याम्। भूँई-आमला। रा. नि. व. ५।

अरोकदन्तः। वि। कृष्णदन्ते। वै. निघ.।

अरोचकः। पुं। अरुचिरोगे। तत्पर्य्यायः,—अरुचिः, अश्रद्धा, अनभिलाषः। रा.। स पञ्च-विधः—वातपित्तकफसन्निपातागन्तुभेदेन। मा. नि। मनस्तापज आगन्तुक इति शार्ङ्ग. पू. ७अ.। लक्षणं यथा—प्रक्षिप्तन्तु मुखे चान्नं जन्तोर्न स्वदते मुहुः। अरोचकः स विज्ञेयो भक्त-द्वेषमथो शृणु ॥ चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वा तु भोजनं। द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥ यस्यान्ने न भवेच्छ्रद्धा स भक्तच्छन्द उच्यते। विजयरक्षिते भोजः। एते विविधा अपि रोगा चरकसुश्रुताभ्यां एक एव धृताः। वातादिभिः शोकभयातिलोभक्रोधमनोघ्नाशनरूप-गन्धैः। अरोचकाः स्युः परिदृष्टदन्तः कषायवक्त्रश्च मतोऽनिलेन ॥ मा. नि.। पथ्यं यथा—वस्तिः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समीरणे पित्ते विरेकी वमनं कफे। सर्व्वजे सर्व्वकामार्थं हर्षणं स्यादरोचके॥ भा.। वस्तिर्विरेकी वमनं यथाबलं धूमोपसेवाकवड़ग्रहस्तथा। तिक्तानि काष्ठानि च दन्तघर्षणं चिरान्नपानानि हितैः कृतानि। गोधूमसुद्गारुणशालिषष्टिका मांसं वराहाजशशैणसम्भवं। चिङ्गी झषाण्डं मधुरालिकैलिशः प्रोष्टी खलेशः कवयी च रोहितः। कर्कारुवेतायनवीनमूलकं वार्त्ताकुशीभाङ्गनमीचदाड़िमं। भव्यं पटोलं रुचकं घृतं पयो बालानि तालानि रसोनशूरणम्। द्राक्षा रसालं नलदस्रुकाङ्किकं मद्यं रसाला दधितक्रमार्द्रकम्। कक्कोलखर्जूरपियालतिन्दुकं पक्वं कपित्थं वदरं विकङ्कतम्। तालास्थिमज्जा हिमवालुका सिता पथ्या यमानी मरिचानि रामठम्। स्वादम्लतिक्तानि च देहमार्জ্জना वर्गोऽयमुक्तोऽरुचिरोगिणे हितः। इति पथ्यम्। कासीक्षारक्षुधानेववायुवेगविधारणम्। अहृद्यान्नमसद्भोज्यं क्रोधं लोभं भयं शुचम्। दुर्गन्धरूपसेवा च न कुर्य्यादरुचौ नरः॥ इति अपथ्यम्।

अर्कः। पुं (Calotropis gigantea, Syn, Asclepias gigantea.) स्वनामख्यातोपविषजातीयवृक्षे। आकन्द गाछ। हिं मान्दार। मं रुइ। कं अर्क्क। तें जिल्लेडुचेट्टु। अर्कः श्वेतरक्तभेदेन द्विविधः। तयोर्विशेषास्तत्तत्पर्य्यायेषु दृश्याः। गुणाः—कटुः उष्णः वातजित् दीपनीयः शोफघ्नः व्रणघ्नः कण्डूकुष्ठकृमिघ्नश्च। रा नि. व. १०। सारकः वातघ्नः कुष्ठकण्डूव्रणप्लीहगुल्मार्शःकफोदरमलकृमिघ्नश्च। पुष्पं—मधुरं तिक्तं धारकं कुष्ठकृमिककफार्शोविषरक्तपित्तगुल्मशोथघ्नञ्च। भा. पू. १भ.। अर्कदुग्धं शूलवातकुष्ठकण्डूक्षयव्रणान्। निहन्ति प्लीहगुल्मार्शोयकृत्प्लीहोदरकृमीन्। मद. व. १। मात्रा २-३ रक्तिः। इति रावणकृतचिकित्साशास्त्रे। ताम्रं। मे. कद्विकं। वैलीक्यडम्बररसे। वै. निघ. वा. व्या. चि. चिन्तामणिरसे। स्फटिके। मे. कद्विकं। अरुणार्के। प. सु. भा. पू. १भ.। आदित्यपत्रवृक्षे। रा. नि. व. ४। "अर्कोरक्तपुष्पः प्रसिद्धः। "सु. सू. ३७ अ. अर्कादिव.। ३९ अ. शिरो. चि। यन्त्रनिष्काश्रिते द्रव्याणां सारभागे। आरक्।

अर्ककान्ता। स्त्री। आदित्यभक्तायाम्। हुड़हुड़िया। रा. नि. व. ४। मद. व. १।

अर्कगन्धिका। स्त्री। चीरविदार्य्याम्। कृष्ण भृंगिकुशांश्च। प. मु.।

अर्कचन्दनम्। क्ली। रक्तचन्दने। रा. नि. व. १२।

अर्कच्छन्नम्। क्ली। अर्कमूले।

अर्कतैलम्। क्ली। कुष्ठाधिकारे। अथ कटुतैलं पलाष्टकं अर्कपत्ररसस्य पलाष्टकं निशायाः पलं मनःशिलायाश्च पलम्। च.द. कुष्ठ-चि.। सा. कौ.।

अर्कदलः। पुं। आदित्यपत्रवृक्षे। रा. नि. व. ४। अर्कवृक्षे।

अर्कनामा। पुं। रक्तार्के। लाल आकन्द। भा.।

अर्कपत्रः। पुं। आदित्यपत्रवृक्षे। रा. नि. व. ४। च. द.। अर्कवृक्षे।

अर्कपत्रा (त्री) (त्रिका)। स्त्री। ईश्वरमूलवृक्षे। ज्येशेर मूल। प. मु. र. मा.।

अर्कपर्णः। पुं। रक्तार्कवृक्षे। लाल आकन्द। मं सूर्य्यमन्दार। भा. पू. १भ.।

अर्कपर्णिका (र्णी)। स्त्री। माषपर्ण्याम्। माषाणी।

अर्कपादः। पुं। सूर्य्यकान्तमणौ। निम्बवृक्षे। वे. निघ.।

अर्कपादपः। पुं। निम्बवृक्षे। त्रिका। अर्कवृक्षे।

अर्कपुष्पा। स्त्री। चीरकाकोल्याम्। क्षीरकाँकला। See चीरकाकोली।

अर्कपुष्पिका } स्त्री। (Gygandropsis
अर्कपुष्पी } centa-phylla, Syn, Cleome pentaphylla.) सूर्य्यवल्ल्याम्। श्वेत हुड़हुड़िया। अर्कहुलीति भाषा। अर्कसदृशपुष्पीलता। हिं अस्थाहुली दधियार् चीरवम्। मं शिरदोड़ी। तत्पर्य्यायः,—पयस्या, सूर्य्यवल्ली, सितपर्णी, शीतपर्णी। र.। भा. ४म. बालरोग-चि.। गुणाः—अर्कपुष्पी कृमिश्लेष्म-मेहपित्तविकारनुत्। मद. व. ९। कृमिकफमेहमनोविकारघ्नी। भा. पू. १भ.। रक्तापराजितायाम्। रत्ना.। चीरकाकोल्यां। र. मा.।

अर्कप्रभागुड़िका। स्त्री। रसायनाधिकारे। अस्याः पाठः यथा—रसं निष्कार्धं शुद्धं निष्कं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताम्रचूर्णकं। चिञ्चामूलफलक्काथे यामं खल्ले विमर्द्दयेत्। तक्रीलं बध्नयेद्वस्त्रे दोलायन्त्रेषु तक्रके। चिञ्चाफलयुते पच्याच्चतुर्यामात् समुद्धरेत्। वटिकार्कप्रभा नाम जरामृत्युविनाशिनी। संवत्सर-प्रयोगेषु सूर्य्यतुल्यो भवेन्नरः। पलाशबीजतैलञ्च कर्षमेकं गवां पयः। अनुपानमिदं पाता दशनाग-बली भवेत्॥ प्रयोगा. रसायना.।

अर्कप्रिया। स्त्री। आदित्यभक्तायाम्। हुड़-हुड़िया गाछ। जवायाम्। रा. नि. व. १०।

अर्कभक्ता। स्त्री। ब्राह्म्यां। ब्राह्मीशाक। आदित्य-भक्तायाम्। हुड़हुड़िया, शुन्टे इति च भाषा। हिं हुलहुल। मं सूर्य्यफुलवल्ली। रा. नि. व. ४। र. मा.।

अर्कभूतिः। स्त्री। ताम्रभस्मनि। वै. निघ. २भ. चीरताम्ररसे, संग्रहणी-चि.।

अर्कमूर्त्तिरसः। पुं। रसौऽयं सान्निपातिक-ज्वरे प्रयोज्यः। द्रव्याणि चास्य रसगन्धकलौह-विषाणि। अत्र लौहस्याष्टौ भागाः पारदस्य भाग-द्वयं, गन्धकी द्विगुणः, विषस्य च षोड़शांशो ग्राह्यः। अयमेव विदोषदावानलः कथ्यते यदायं ताम्रपात्र-स्थापितः पुनः निम्बुकरसपित्तवर्गकण्टकार्य्यार्द्रक-रसैर्भाव्यते। भैष. ज्व. चि.।

अर्कमूलम्। क्ली। तन्नामकवृक्षमूले। च. द. अग्निसा. चि. चारगुड़े।

अर्कमूला। स्त्री। (Aristolochia Indica.) ईश्वरमूल्याम्। ऐशेर मूल। रत्ना.।

अर्कलवणम्। क्ली। अर्कक्षारे। वै. निघ.।

अर्कवल्लभः। पुं। बन्धुजीववृक्षे। बान्धूलिवृक्ष, दुपूरे चण्डी। मं दुपारी। रा. नि. व. १०।

अर्कवल्ली। स्त्री। आदित्यभक्तायां। हुड़हुड़े। वै. निघ.।

अर्कवेदम् (धम्)। क्ली। तालीशपत्रे। प. मु.। रा. नि. व. ६।

अर्कसुता। स्त्री। कृष्णापराजितायां। वै. निघ.।

अर्कसुधा। स्त्री। अर्कीत्यसुधायाम्। आक-न्देर चूण। गुणः—गुल्मरोगस्य नाशिनी। वै. निघ.।

अर्कहिता। स्त्री। आदित्यभक्तायाम्। हुड़-हुड़िया। मं सूर्य्यफुलवल्ली। रा. नि. व. ४।

अर्कक्षीरम्। क्ली। अर्कवृक्षनिर्य्यासे। आक-न्देर आटा। गुणः—कृमिघ्नं व्रणघ्नं कुष्ठार्शो-दरेषु च हितम्। राज.। तिक्तलवणसुषणवीर्य्यं लघु स्निग्धं गुल्मोदरकुष्ठहरं विरेचने हितञ्च। भा. पू. १भ.। च. द अर्श-चि.।

अर्कादिगणः। पुं। अर्कालर्कनागदन्तीविशल्या-भार्गी-राक्षाह्वश्विकालीप्रकीर्य्या - प्रत्यक्पुष्पी - पीत-तैलीदकीर्य्याश्वेतायुग्मतापसवृक्षा इति। अर्कालर्क-करञ्जद्वयनागदन्तीमयूरकभार्गीराक्षेन्द्रपुष्पीक्षुद्रश्वेता-महाश्वेताह्वश्विकाल्यलवणास्तापसवृक्षश्चेति॥ सु. सू. ३८अ.। गुणाः—कफमेदोविषघ्नः कृमिकुष्ठघ्नः विशेषाद्व्रणशोधनश्च। वा. सू. १५ अ.।

अर्काश्मा। पुं। सूर्य्यकान्तमणौ। चुनी, पान्ना इति च लोके। हला.।

अर्काह्वः। पुं। तालीशपत्रे। सूर्य्यकान्तमणौ। अर्कवृक्षे। अम.।

अर्की। पुं। मयूरे। मयूर। मं मोरी। वै निघ।

अर्कीश्वररसः। पुं। रसौऽयं वातव्याध्युपशमनो द्विविधश्च। तृतीयो रक्तपित्ते, चतुर्थश्च कुष्ठाधिकारे। "रसस्य भागाश्चत्वारो गन्धकस्य दशैव तु। ताम्रस्य वाटिकायाश्च दत्त्वा चैनामधोमुखीम्। सम्यक् निरुध्य तस्याश्च दद्यादूर्द्धं शरावकं। भाण्डे निरुध्य यत्नेन भस्मनापूर्य्य भाण्डकम्। अग्निं प्रज्वालयेद्यामं मुखं तस्य निरुध्य च। स्वाङ्गशीतं समुद्धृत्य तत्ताम्रं चूर्णयेद्भृशम्। भावयेदर्कदुग्धेन पुटित्वा दशधा पुनः॥" रसे. चि.। रसेन्द्रसार-संग्रहे अयमेव कुष्ठे धृतः। विशेषस्तु—तत्र गन्ध-कस्य ताम्रचक्रिकायाश्च १२ भागा उक्ताः। इति प्रथमः॥ "रसेन गन्धं द्विगुणं विमर्द्य ताम्रस्य चक्रेण सुतापितेन। आच्छादयित्वाथ ततः प्रयत्नात् चक्रे विलग्नञ्च ततः प्रगृह्य। सञ्चूर्ण च द्वादश-धार्कदुग्धैः पुटेत वह्निन्निफलाजलैश्च।" मात्रा २र.। इति द्वितीयः॥ रसे. चि.। "सूतार्कं मृततामञ्च मृताभञ्च समाचिकम्। अमृताम्बुरसैर्भाव्यं त्रिसप्तक-पुटे पचेत्। वासाक्षीरविदारीभ्यां चतुर्गुञ्जाप्रमा-णतः। भक्षणम्।" अत्र अर्कः ताम्रम्। अमृता गुड़ूची। माक्षिकं स्वर्णमाक्षिकम्। र.सा.सं.रक्त-पित्तचि.। इति तृतीयः॥ चतुर्थः कुष्ठाधिकारे। "पलानीशस्य चत्वारि बलेर्द्वादश तावती। ताम्रस्य चक्रिका देया रससौर्द्धं शरावकं। दत्त्वा विबद्ध-भाण्डस्थं पूरयेद्भस्मना दृढं। अग्निं प्रज्वालयेद्याम-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं शीतं विचूर्णयेत्। पुटेष्वादशधा सूर्य्यादुग्धेनालोड़ितं पुनः। वराषावकभङ्गानां द्रवैस्त्रिभिर्विभावयेत्। अयमर्केश्वरी नाम्ना रक्तमण्डलकुष्ठजित्॥" अत्र ईशः पारदः, तस्य चत्वारि पलानि। बलिर्गन्धकस्य च द्वादशपलानि। र. सा. सं.।

अर्कोत्तमा। स्त्री। वर्वर्य्याम्। बाबुईतुलसी।

अर्कोपलः। पुं। सूर्य्यकान्तमणौ। आतसपाथर इति लोके। रा. नि. व. १३।

अर्गटः। पुं। आर्त्तगल इति प्रसिद्धे कण्टकवृक्षविशेषे। नीलझाँटी। हिं आर्त्तगल। मं एरवणी। गुणाः—शीतं व्रणशोधनरोपणञ्च। मद. व. ५। तथा। "अर्गटस्तुवरः शीतवीर्य्यो व्रणविशोधनः। व्रणरोपणकृच्चैव पुष्पमस्य मधु स्मृतम्। तिक्तञ्च ज्वरपित्तघ्नं कफरक्तरुजापहम्।" वै. निघ.।

अर्गलम्। क्ली। मांसे। वै. निघ.।

अर्घटम्। क्ली। भस्मनि। हारा.।

अर्घ्यम्। क्ली। आर्घ्यमधुनि। See मधु।

अर्घ्याटः (लः)। पुं। शुक्रलायाम्। ओकड़ा, चेँचरुका। शुक्रला चालुपत्रः स्यादर्घ्यतोऽर्घ्याटकी मतः, इति द्रव्याभि.।

अर्घ्यातः। पुं। अर्घ्याटे। ओकड़ा। द्रव्याभि.।

अर्घ्यार्हः। पुं। सुचुकुन्दवृक्षे। रा. नि. व. १०।

अर्चिः। स्त्री, क्ली। काष्ठाग्निज्वालायाम्।

अर्जकः। पुं। क्षुद्रतुलसीवृक्षभेदे। बाबुई तुलसी। हिं बावरी। अज्वला। कं गर्गेर। तें तेल्लगगिरचेट्टु। तत्पर्य्यायः,—श्वेतच्छदः गन्धपत्रः पाता कुठेरकः। "वर्वरिकाकारी लघुमञ्जरीकः सूक्ष्मपत्रः निर्गन्धः श्वेतकुठेरकः (बाबुई)।" सु. सू. ३८अ. सुरसादौ ड.। श्वेतवर्वर्य्याम्। शादा बाबुई। भा.पू.१भ.। श्वेतपर्णासः तोकमारी इति लोके। सि.यो. विसूची-चि.वमनशान्तौ। अर्जकः श्वेतकृष्णरक्तभेदात्त्रिभेदः तुल्यगुणश्च। गुणाः—कटूष्णः वातकफरोगघ्नः नेत्ररोगहरः रुच्यः मुखप्रसवकरश्च। रा. नि. व. १०। श्वेतपलाशवृक्षे। See वर्वरी।

अर्जकर्जः। पुं। असनवृक्षे। आसना, पियाशाल।

अर्जुनः। पुं। (Tarminalia Arjuna, or Pentaptera arjuna.) स्वनामख्यातवृक्षे। अर्ज्जून गाछ। हिं कहू, कौह। मं अर्जुनसादड़ा। कं सारद्दारु। तें मद्दिचेट्ट। तत्पर्य्यायः,—नदीसर्ज्जः वीरतरुः इन्द्रद्रुः ककुभः (अ), इन्द्रद्रुमः (शब्दर.), शम्बरः, पार्थः चित्रयोधी धनञ्जयः वैरातङ्गः किरीटी गाण्डीवी कर्णारिः करवीरकः कौन्तेयः इन्द्रसूनुः गण्डीरी शिवमल्लकः सव्यसाची वीरद्रुः कृष्णसारथिः पृथाजः फाल्गुनः धन्वी। गुणाः—कषायीणः कफघ्नः व्रणशोधनः पित्तश्रमतृष्णाहरः वातकोपनश्च। रा. नि. व. ९। शीतलः हृद्यः क्षतक्षयविषरक्तहरः मेदोमेहव्रणघ्नः तुवरः कफपित्तघ्नश्च। भा. पू. १भ. वटादिव.। वा. सू. १५ अ. न्यग्रोधादिः। "जम्ब्वर्जुनकपीतनसीमवल्कः।" मात्रा २ ती.। नेत्ररुक्षगतरोगे। लक्षणम्—"एकी यः शशरुधिरोपमश्च बिन्दुः शुक्लस्थौ भवति तमर्जुनं वदन्ति।" मा. नि.। मयूरे। मे. तत्रिकं। वि.। श्वेतवर्णे।

अर्जुनम्। क्ली। तृणमात्रे। हला.। सुवर्णे। मे. नवत्रिकं। कासतृणे। र. मा.। दर्भभेदे।

अर्जुनघृतम्। क्ली। हृद्रोगे हितम्। अत्र क्वाथार्थमर्जुनत्वक् ६४ प. पाकार्थं जलं ६४ श. शेषः १६श. कल्कार्थं श. घृतं ४ श.। मूर्च्छितघृतं ४श. अर्जुनरसः १६श. अर्जुनत्वक्कल्कः १श. एकत्र पक्त्वा। च. द हृद्रोग-चि.। "पार्थस्य कल्कस्वरसेन सिद्धं शस्तं घृतं सर्व्वहृदामयेषु।" घृतं ४ श. अर्जुनखरसः ४ श. कल्कार्थं अर्जुनत्वक् १ श.। सा. कौ.। भैष. भा. रस. र.।

अर्जुनत्वक्। स्त्री। अर्जुनवल्कले। अर्ज्जूनछाल। च. द. अ. सा. चि. शल्क्यादिः।

अर्जुननामाख्यः। पुं। अर्जुनवृक्षे। भा.।

अर्जुनसुधा। स्त्री। अर्जुनीत्यसुधायां। अर्ज्जूनकाठेर चूण। गुणाः—"सुधा ह्यर्जुनजा प्रोक्ता कफस्य च विनाशिनी।" वै. निघ.। द्रव्यगुणे।

अर्जुनाख्यः। पुं। काशतृणे। र. मा.। अर्जुनवृक्षे।

अर्जुनादः। त्रि। दर्भकाशखादके। च. चि. २ अ.।

अर्जुनाद्यघृतम्। क्ली। प्रमेहे घृतम्। यथा—"अर्जुनपठोलनिम्बैः सवचादीप्यकरञ्जासमञ्जिष्ठैः। भल्लातकागुरुघनैः सगदानलचन्दनोशीरैः। गोचुरक सीमवल्कैः नवपटोलैर्हरिद्रया त्रिफलाः। अन्तकार्जुनाभ्यां दीप्यकयुक्तेन चैव लोध्रेण। मद्धि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिविषाभ्यां कल्ककषायैः पचेत्तैलम्। कफवातोत्थे मेहे पित्तकृते साधयेत्सर्पिः॥" भा. म. ३भ. मेह-चि.।

अर्जुनी। स्त्री। गवि। गाई। मे. नचिकं।

अर्जुनोपमः। पुं। शाकद्रुमे। शेंगुण-गाछ। र. मा.। शालवृक्षे। रत्ना.।

अर्णः। पुं। शाकवृक्षे। शेंगुण। श. च.।

अर्णः (स्)। क्ली। जले। रा. नि. व. १४।

अर्णभवः। पुं। शङ्खे। वै. निघ.।

अर्णवः। पुं। समुद्रे। रत्ना.।

अर्णवजः
अर्णवजमलः } पुं। समुद्रफेने। रत्ना.।

अर्णवफेनः। पुं। समुद्रफेने। रत्ना.।

अर्णवमलः। पुं। समुद्रफेने। रत्ना.।

अर्णवोद्भवः। पुं। अग्निजारवृक्षे। रा. नि. व. ६।

अर्णोदः। पुं। मुस्तके। रा. नि. व. ६।

अर्णोभवः। पुं। शङ्खे। रा. नि. व. १३।

अर्त्तगलः। पुं। नीलझिण्ट्याम्। नीलझाँटी। सु. द्रव्यसं. अ.। आगड इति ख्याते फलवृक्षे। रत्ना.।

अर्त्तिः। स्त्री। रोगे। रा. नि. व. २०।

अर्थः। पुं। विषये। धने। याचने। कारणे। वस्तुनि। अभिधेये। निवृत्तौ। प्रयोजने। मे. यद्विकं।

अर्थचम्पिका। स्त्री। कर्कटशृङ्ग्याम्। काँकड़ा-शृङ्गी। वै. निघ.।

अर्थप्रसादनी। स्त्री। धामनवृक्षे। वै. निघ.।

अर्थसाधकः। पुं। पुत्रजीववृक्षे। पुत्रजीवा। मद. व. १भा.।

अर्थसाधनः। पुं। पुत्रजीववृक्षे। मद. व. १। रोठाकरञ्जे। मद. व. ५।

अर्थसिद्धः (कः)। पुं। पुत्रजीववृक्षे। श्वेत-निर्गुण्ड्यां। कृष्णनिर्गुण्ड्याम्। रा. नि. व. ४।

अर्थापत्तिः। स्त्री। 'यदकीर्त्तितमर्थादापद्यते।' सा. सु. उ. ६५अ.।

अर्थ्यम्। क्ली। शिलाजतुनि। मे. यद्विकं।

अर्दनिः। पुं। अग्निरोगे। अ. टी.।

अर्दितम्। क्ली। तन्नामकवातव्याधौ। पक्षाघातविशेष। तस्य लक्षणम्—"उच्चैर्व्याहरतीत्यर्थं खादतः कठिनानि च। हसतो जृम्भतो भाराद्विषमाच्छयनाशनात्। शिरोनासौष्ठचिबुक-ललाटेक्षणसन्धिगः। अर्द्यत्यनिलो वक्त्रमर्दितं जनयेत्ततः॥ वक्त्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यप-वर्त्तते। शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम्। ग्रीवाचिबुकदन्तानां तस्मिन् पार्श्वे च वेदना। तमर्दितमिति प्राहुः।" मा. नि.। अत्र रोगे यस्मिन् पार्श्वे अर्दितं तस्मिन्नेव पार्श्वे ग्रीवा-दीनां वेदना भवतीति बोध्यम्। त्रिवर्षातीते अतिक्षीणे निमेषशून्ये च रोगिणि तदसाध्यं भवति। अत्रौषधं—तिलकल्कयुक्तरसोनकल्कादिकम्। "स्नेह-पानानि नस्यञ्च भोज्यान्यनिलहन्ति च। उप-नाहाश्च शस्यन्ते स्वेदनञ्च तथार्दिते॥" "तन्नाम-काश्वरोगविशेषे। लक्षणं—हनुग्रहस्य विक्षेपात् घ्राणाभेदाच्च बुद्धिमान्। नासापुटविकाराच्च अर्दितं रोगमादिशेत्॥" जयद. ५५अ.।

अर्द्धम्। क्ली। समांशे। पुं। खण्डे। मे.।

अर्द्धकः। पुं। जलसर्पे। वै. निघ.।

अर्द्धकपाटसन्धिकः। पुं। वाह्यदीर्घैकपा-लीतरालपालि-कर्णबन्धनाकृतिविशेषे। सु. सू. १६ अ.।

अर्द्धकैशिकी। स्त्री। छेदनार्थं शस्त्रधारा-विशेषे। सु. सू. ८अ.।

अर्द्धखारी। स्त्री। खारीमानार्द्धे १२८ अ.।

अर्द्धचन्द्रः। पुं। मयूरपिच्छे। मयूरपुच्छेर चाँद। हे. च.।

अर्द्धचन्द्रम्। क्ली। अङ्गुलितीरणे। हारा.।

अर्द्धचन्द्रा। स्त्री। त्रिवृति। रा. नि. व. ६। कृष्णत्रिवृति। कालतेउड़ी। भा. पू. १भ.।

अर्द्धचन्द्राननः। पुं। अन्तर्मुखनामकविस्रा-वणास्त्रे। अम.।

अर्द्धचन्द्रिका। स्त्री। कर्णस्फोटालतायां। रा. नि. व. ३। कृष्णत्रिवृति। मद. व. १।

अर्द्धचोलकः। पुं। कूर्पासे। काँचुली। हारा.

अर्द्धतिक्तः। पुं। किराततिक्तके। नेपालदेशज-निम्बविशेषे। रा.। भा. पू. १भ.।

अर्द्धधारकम्। क्ली। अस्त्रविशेषे। तच्च छेदन-भेदनार्थम्। सु. सू. ८ अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्द्धनारीश्वररसः। पुं। रसौऽयं सान्निपातिकज्वरे गुञ्जामात्रं नस्यकर्म्मणि योज्यः। अपरे जीर्णविषमज्वरे नस्यमित्याहुः। तेन तत्क्षणमेव वामाङ्गज्वरी नश्यति। अस्य द्रव्याणि रसगन्धकविषटङ्कणानि समभागानि कज्जलीवत् कृत्वा कृष्णसर्पमुखाभ्यन्तरे स्थापयित्वा तन्मुखं मृदा संलिप्य मृद्गाण्डे स्थापयेत्। ऊर्द्धाधो लवणदानपूर्व्वकं तती भाण्डमावृत्य तीव्राग्नौ ४ प्रहरं पचेत्। भैष। अत्र "द्विकं ग्राह्यञ्च तत्समं" मिति मिलितरसगन्धकयोः समम्। "जैपालं तत्सममिति" विषतुल्यं जैपालं देयम्। "मरिचञ्च चतुर्गुणमिति" एकभागापेक्षया मरिचस्य चातुर्गुण्यम्। श्रीकण्ठः। सीमेश्वरस्तु मिलितरसगन्धकापेक्षया चातुर्गुण्यमित्याह। व्यवहारोऽप्यनेनैव। "रसगन्धौ समौ शुद्धौ विषं ग्राह्यञ्च तत्समं। जैपालं तत्समं ग्राह्यं मरिचञ्च चतुर्गुणम्। विफलायाः रसैर्मर्द्द्यं भावना पञ्चधा स्मृता॥" र. सा. सं. जीर्ण-विषम-ज्व. चि.। अन्यः पाठः शुद्धसूतं तथा गन्धं विषं ताम्रस्य भस्म च। समभागेन संगृह्य वारिणा पेषयेद्दृढं। चक्राकारसमङ्कृत्वा सर्पतुण्डेन संन्यसेत्। तत्तुण्डलेपनङ्कृत्वा रौद्रे दद्याद्विचक्षणः। स्याल्यन्ते लवणं किञ्चित्तस्योपरि च गोलकं। ततो लवणकं दत्त्वा सिकताभिः प्रपूरयेत्। चतुर्भिः प्रहरैर्ज्वालामन्दमध्यखरक्रमात्। शीते तङ्गोलकं नीत्वा दूरीकृत्य च लेपनं। भस्म संगृह्य यत्नेन खल्वे कुर्य्याद्विमर्द्दनं। यवमात्रन्तु तच्चूर्णं नस्ये दद्यात् सुरेश्वरि॥" प्रयोगा. ज्व. चि.।

अर्द्धपलम्। क्ली। कर्षद्वये। ४ तो.। स्यात्कर्षाभ्यामर्द्धपलम्। प. प्र. १ख.।

अर्द्धपादा। स्त्री। भूम्याललक्याम्। वै. निघ.।

अर्द्धपारावतः। पुं। वनकुक्कुटे। चित्रकण्ठपारावते। भूक्तिपाय्यरा। तित्तिरपक्षिणि। अमि.।

अर्द्धपुष्पा। स्त्री। महाबलायाम्। पीतवेड़ेला। वै. निघ.।

अर्द्धभोजनम्। क्ली। अर्द्धाशने। आद्‌पेटो खाओया।

अर्द्धमात्रिकः। पुं। निरूहणाधिकारे तन्नामकवस्तौ। "दशमूलीकषायेण शताह्वाचं प्रपेषयेत्। सैन्धवाच्च मधुनी द्विपलं द्विपलं तथा। तैलस्य पलमेकन्तु फलस्येकत्र योजयेत्। अर्द्धमात्रिकसंज्ञोऽयं वस्तिर्देयो निरूहवत्। न च स्नेहो न च स्वेदः परिहारविधिर्न च। आवेयानुमतो ह्येष सर्व्वरोगनिबर्हणः। इति च. द.।

अर्द्धमासूरी। स्त्री। लेखनार्थमस्त्रधाराविशेषे। सु. सू. ८ अ.।

अर्द्धरात्रः। पुं। रात्र्यर्द्धभागे। दुपुर रात्रि।

अर्द्धवीरच्छा। स्त्री। कृष्णदूर्व्वायाम्।

अर्द्धश(स)फरः। पुं। दण्डपालाख्यक्षुद्रमत्स्यविशेषे। दाँड़िका वा डानकोणा माछ। हारा.।

अर्द्धशरावः (कः)। पुं। प्रसृतिद्वये। ३२ ती.। प. प्र. १ख.। भा.।

अर्द्धसहः। पुं। पेचके। प्याँचा। मंघुवड़।

अर्द्धांशोनजलम्। क्ली। अर्द्धांशेन हीने पक्वजले। इदं वातपित्तघ्नम्। रा. नि. व. १४।

अर्द्धालिगः। पुं। जलसर्पे। वै. निघ.।

अर्द्धावभेदकः। पुं। शिरोरोगभेदे। आधकपाले धरा। निदानलक्षणे—"रूक्षाशनाध्यशनप्राग्वातावश्यायमैथुनैः। वेगसन्धारणायासव्यायामैः कुपितोऽनिलः। केवलः सकफो वार्द्धं गृहीत्वा शिरसो बली। मन्याभ्रूशङ्खकर्णाक्षिललाटार्द्धेऽतिवेदनां। शस्त्रारणिनिभां कुर्य्यात्तीव्रां सोऽर्द्धावभेदकः॥" मा. नि.। अपिच यस्योत्तमाङ्गार्द्धमतीव जन्तोः सम्भेदतोदभ्रमशूलजुष्टं। पक्वादृशाहादथवाप्यकस्मात्तस्यार्द्धभेदं वितथादवस्येत्॥ सु. उ. २५ अ.।

अर्द्धाशनम्। क्ली। अर्द्धभोजने। शु. च.।

अर्द्धेन्दुः। पुं। नखचिह्ने। अतिप्रौढ़स्त्रीयोनौ अङ्गुलियोजने। मे. दविकं।

अर्द्धेन्दुशकला। स्त्री। नासारोगविशेषे। कपालरोगभेदे। ओष्ठरोगे। अर्व्बुदरोगे। गलरोगे। तालुरोगे। कर्णरोगे। वै. निघ.।

अर्द्धोदकक्षीरम्। क्ली। अर्द्धोदकशृतदुग्धे। अर्द्धजले सिद्ध दुग्ध। "अर्द्धोदकं पयः शिष्टमाल्पघृतरं शृतम्।" हेमाद्रौ चारपाणिः।

अर्भः (कः)। पुं। बालके। रा. नि. व. १८। कृशे। मे. कविकं। पचजातशिशौ। रा. नि. व. १८।

अर्भा। स्त्री। गुग्गुलौ। गुग्गुल। "अर्भाच सहयुतम्।" प्रयोगा. भग्न-चि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्मणः। पुं। द्रोणपरिमाणे (३२ सेर)। प. प्र. १ख.। च. द. अ. सा. चि. कुटजावलेहे।

अर्म्मन्। क्ली। नेत्ररोगविशेषे। चक्षूरोग। तच्च पञ्चविधम्—प्रस्तार्य्यर्म्म, शुक्लार्म्म, रक्तार्म्म, मांसार्म्म, स्नायुर्म्म चेति। लक्षणं स्वस्वपर्य्याये द्रष्टव्यम्।

अर्यमा। पुं। अर्कवृक्षे। रा. नि. व. १०। सूर्य्ये।

अर्व्वणः
अर्व्वा (न्) } पुं। अश्वे। भा. पू.।

अर्व्वती। स्त्री। वड़वायाम्। कुम्भदास्याम्। मे. तद्विकं।

अर्व्वुदः। पुं, क्ली। पुरुषे। दशकोटिपरिमाणे। मे. द्विकं। मांसकीलकाकाररोगविशेषे। आर्व्। हिं रसौली। वातजपित्तजकफजरक्तजमांसजमेदोजाध्यर्व्वुदद्विरर्व्वुदभेदेनाष्टौ। लक्षणं—गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदूष्य। वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकं। कुर्व्वन्ति मांसीच्छ्रयमत्यगाधं तदर्व्वुदं शास्त्रविदो वदन्ति। वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा वा तज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि तदा भवन्ति॥ मा. नि.। सु. नि. ११ अ.। "दोषः प्रदुष्टो रुधिरं शिरास्तु सम्पीड्य सङ्कोच्य गतस्तु पाकम्। संस्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरैराचितमाशु वृद्धिं। स्रवत्यजस्रं रुधिरं प्रदुष्टमसाध्यमेतद्रुधिरात्मकं स्यात्॥" इति दन्तरोगभेदे। नेत्ररोगभेदे। तालुरोगे तल्लक्षणं—तालुमध्ये रक्तजं पित्तलक्षणं पद्मकर्णिकावत्केसरैरिव पार्श्वतो दीर्घमांसाङ्कुरैर्वेष्टितं शोथं अर्व्वुदं विद्यात्। "पद्माकारं तालुमध्ये तु शोथं विद्याद्रक्तादर्व्वुदं पित्तलिङ्गम्।" भा. म. ४भ. मुखरो. चि.।

अर्व्वुदाकारः। पुं। वहुवारवृक्षे। चालिता गाछ। वै. निघ।

अर्व्वुदाद्रिजः। पुं। मेषशृङ्ग्याम्। मेढ़ाशिङा। मं सुरदारशृंग। वै. निघ.।

अर्व्वूरम्। क्ली। आहुल्यनामचुपे। काश्मीरे तड़वड़ु इति प्रसिद्धे। म, तड़वड़। वै. निघ. २भ. संग्रहणी-चि. तालीशादिचूर्णे।

अर्शः (स्)। क्ली। The piles or hoemorrhoids. स्वनामख्यातगुदरोगविशेषे। तत्पर्य्यायः,—दुर्नामकं (अ), दुर्नाम, गुदकीलः, गुदाङ्कुरः (रा), अनामकं (शब्दर.)। लक्षणम्—दोषास्त्वङ्मांसगुदमुखादभ्यन्तरतः साङ्गुलचतुरङ्गुलिमिता या नाड़ी गुदमिति कथ्यते, सा गुदनाड़ी शङ्खावर्त्तनिभवलिवययुक्ता। तस्याः साङ्गुलि-मितांशौ गुदौष्ठः। गुदौष्ठादङ्गुलिमितोऽंशः सम्वरणी नाम प्रथमा वलिः, तदुपरि साङ्गुलिमितोऽंशो विसर्ज्जनीनाम द्वितीया, तदूर्द्ध्वं साङ्गुलि-मितोऽंशः प्रवाहनीनाम तृतीया वलिरुच्यते। तास्वेव मांसाङ्कुरा जायन्ते। तच्चार्शः षड्विधं वातजादिभेदात्। प्रकरणमिदं गुदार्शःपरं बोध्यम्। तन्निदानं यथा—"दोषास्त्वङ्मांसमेदांसि सन्दूष्य विविधाकृतीन्। मांसाङ्कुरानपानादौ कुर्व्वन्त्यर्शांसि तां जगुः।" इति। "पृथग्दोषैः समस्तैश्च शोणितात् सहजानि च। अर्शांसि षट्प्रकाराणि विद्याद्गुदवलिवये।" साधारणचिकित्सा—अत्र तथान्नपानौषधादिकं सेव्यं येन वायोरनुलोमः अग्निवलवृद्धिश्च जायते। "दत्त्वाथ वेतनं योऽध्येत्यादायापि च वेतनं। अध्यापयेच्च जुहुयाज्जपेद्वार्शीयुतो भवेत्॥" इति कर्म्मविपाकः। पथ्यं—"विरेचनं लेपनमस्रमोक्षः क्षाराग्निशस्त्राचरितञ्च कर्म्म। पुरातना लोहितशालयश्च सषष्टिकाश्चापि यवाः कुलत्थाः। गोधाखुसर्पानगजोष्ट्रकूर्म्म-श्वावित्-कुलिङ्गाजखरीतुकीणाः। तरक्षुचाषाश्वशृगालकाका येऽन्येऽपि मांसाः प्रसहाश्च तेऽपि॥ पटोलपत्तूररसोनवह्निपुनर्णवाशूरणवास्तुकानि। जीवन्तिका दन्तशठा सुरा च चुटिर्वयस्थानवनीततक्रं। कक्कीलधाचीरुचकं कपित्थमौष्ट्रादिमूत्राद्यपयांसि चापि। भल्लातकं सर्षपजञ्च तैलं गोमूत्रसौवीरतुषोदकानि। वातापहं यच्च यदग्निकारि तदन्नपानं हितमर्शसेभ्यः॥" इति। अपथ्यं—आनूपमामिषं मत्स्यं पिण्याकं दधि पिष्टकं। माषान् करीरं निष्पावं विल्वं तुम्बीमुपोदिकां। पक्वान्नं शालुकं सर्व्वं विष्टम्भीनि गुरूणि च। आतपं जलपानानि वमनं वस्तिकर्म्मच। विरुजानि च सर्व्वाणि मारुतं पूर्व्वदिग्भवम्। वेगरोधं स्त्रियं पृष्ठयानमुत्कटूकासनं। यथास्वं दोषलञ्चान्नमर्शसः परिवर्ज्जयेत्। यत्पथ्यं यदपथ्यञ्च वक्ष्यते रक्तपित्तिनां। रक्तार्शोरोगिणां तत्तदपि विद्याद्विशेषतः॥" इति।

अर्शःकुठाररसः। पुं। रसोऽयं अर्शसि हितः। पाठः—"शुद्धसूतं पलञ्चैकं द्विपलं शुद्धगन्धकं। मृततास्रञ्च लौहञ्च प्रत्येकञ्च पलत्रयम्। विकटुं लाङ्गलीं दन्तीं चित्रकं पुष्करं तथा। प्रत्येकं द्विपलं योज्यं यवक्षारञ्च टङ्कणं। उभौ पञ्चपलौ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योज्यौ सैन्धवं पलपञ्चकं। द्वाविंशच्च गवां मूत्रं स्नुहीक्षीरं तदर्द्धकं। सर्व्वं मृद्वग्निना पाच्यं यावन्नायाति पिण्डताम्॥" इति मात्रा माषद्वयम् रस. र. प्रयोगा.। रसेन्द्रचिन्तामणौ रसगन्धौ न घृतौ। स्नुहीक्षीरञ्च गोमूत्रसमं दत्तम्। पुष्करस्थाने पिलुकमिति उक्तम्। अन्यः—"शुद्धसूतं द्विधागन्धं मृतलौहञ्च ताम्रकं। प्रत्येकं द्विपलं दन्ती चूर्णनं शूरणं तथा। शुभाटङ्कणवच्चारसैन्धवं पलपञ्चकं। पलाष्टकं स्नुहीक्षीरं द्वाविंशच्च गवां जलैः। आपिण्डितं पचेदग्नौ खादेन्माषद्वयं ततः॥" र. सा. स.। शुभा वंशलोचना।

अर्शःसूदनः। पुं। शूरणे। ओल।

अर्शस्। क्ली। अर्शोरोगे। श. र.।

अर्शसः। त्रि। अर्शोयुक्ते।

अर्शी। त्रि। अर्शोयुक्ते। श. र.।

अर्शोघ्नः। पुं। शूरणे। ओल। रा. नि. व ७। भल्लातके। भेला। सर्जिक्षारे। साजिमाटी। तेजवले। तेजबल। श्वेतसर्षपे। श्वेत सरिषा। कटुशूरणे। वुनो ओल। वै. निघ.।

अर्शोघ्नवर्गः। पुं। कुटजविल्वचित्रकनागरातिविषाभयाधन्वयासकदारुहरिद्रावचाचव्यानीति। अयं द्वादशदशकः प्रभावादर्शोघ्नः। च. सू. ४।

अर्शोघ्नवल्कला। स्त्री। तेजवले। तेजबल। वै. निघ.।

अर्शोघ्नी। स्त्री। तालमूल्याम्। रत्ना.। मे. नविकं। भल्लातके। वै. निघ.।

अर्शोजः। पुं। भगन्दररोगे।

अर्शोयन्त्रम्। क्ली। अर्शोदर्शनाय गोस्तनाकारयन्त्रे। "अर्शसां गोस्तनाकारं यन्त्रकं चतुरङ्गुलं। नाहे पञ्चाङ्गुलं पुंसां प्रसदानां षडङ्गुलं। द्विच्छिद्रं दर्शने व्याधेः कैचिच्छिद्रन्तु कर्म्मणि।" अवि.। जयद. ५३ अ.।

अर्शोवर्त्मन्। क्ली। नेत्रवर्त्मगतरोगविशेषे। नेत्रवर्त्मनि कर्कटीबीजवत् मन्दवेदनमस्रवतीक्षणा या पिड़का भवति तत्। "एवा तवीजप्रमिताः पिड़का मन्दवेदनाः। शुक्लाः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते॥" एषा सन्निपातजा। मा. नि.। तदुक्तं—पिड़का सन्निपातेन तदर्शोवर्त्म निर्दिशेत्। इति विजयरक्षिते—निमिः।

अर्शोहररसः। पुं। रसोऽयं अर्शसि हितः। पाठी यथा—"रसवैक्रान्तशुद्धाभ्रकान्तभस्म समन्वितं। तुल्यांशं मर्द्दयेच्चार्द्रदाड़िमीत्वैः रसैस्ततः। भक्षयेन्माषमेकन्तु अर्शसां नाशने रसः॥" रस र.।

अर्शोहितः। पुं। भल्लातकवृक्षे। त्रिका.।

अर्हम्। क्ली। सुवर्णे। सोणा। वै निघ.।

अर्हा। स्त्री। वायमाणालतायाम्। वलानता। वै. निघ.।

अलम् (कम्)। क्ली। हरितालके। रा. नि. व. १३। सि. यो. कास-चि. मनःशिलादिधूमपाने. द्वन्द्व.। "मनःशिलालि मरिच" इति। वृश्चिकपुच्छकण्टके। विच्छेर हुल। हे. च.। कङ्कोले। वै. निघ. २भ. वा. व्या. प्रत्यष्ठीला. चि.। भङ्गीयुक्तकेशे।

अलकः। पुं। चित्र-कुक्कुरे। पागलाकुकुर। चूर्णकुन्तले।

अलकप्रियः। पुं। कृष्णभल्लातके। काल भेला। मं विवलाजटा। बीजकवृक्षे। हिं विजयसार। मद. व. ५।

अलका। स्त्री। वसायाम्। चर्व्वि। वै. निघ.।

अलकाह्वयः। पुं। कटुनिम्बे। कटु निम्। वै. निघ.।

अलक्तः (कः)। पुं, क्ली। Lac, the red animal dye so called. लाक्षायाम्। आल्ता, लाहा, जो, गोला। हिं लाही। मं अलिता। कं अलतगे। तत्पर्य्यायः,—राक्षा याव द्रुमालयः रक्षा अरक्तः जतुकं यावकः अलक्तकः रक्तः (शब्दर), पलङ्कषा क्रिमिः वरवर्णिनी। गुणाः—"तिक्तोष्णः कफवातामयघ्नः रुच्यो व्रणघ्नश्च। रा. नि. व. ६। वर्णकरः हिमः बल्यः स्निग्धः लघुस्तुवरः अनुष्णः कफ-पित्त-रक्त-हिक्का-कास-ज्वरघ्नः व्रणोरःक्षतवीसर्पकृमिकुष्ठहरः। अलक्तको विशेषेण व्यङ्गघ्नः।" भा. पू. १भ.। अलक्तको रजोरोधी रक्तपित्तक्षयापहः। प्रदरक्षाप्यतीसारं सरक्तं क्षपयेद्ध्रुवम्॥" अवि.।

अलगण्डः। पुं। नेत्ररोगविशेषे। वै. निघ.।

अलगर्दः। पुं। सर्पविशेषे। जलढोंड़ा, जल बोड़ा।

अलगर्दा। स्त्री। सविषजलायुकायाम्। वि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जोंक। सा रोमशा महापार्श्वा कृष्णमुखी च। See जलायुका। सु. सू. १३अ.।

अलगर्धः। पुं। अलगर्दे। अम.।

अलङ्कारसुवर्णम्। क्ली। शङ्खीकनके। हारा.।

अलजी। स्त्री। प्रमेहपिड़कारोगे। लक्षणम्—"रक्ता सिता स्फोटवती दारुणा त्वलजी भवेत्। सु. नि. प्रमेहचि. ६अ.। नेत्रसन्धिजरोगे। स च नेत्रसन्धौ प्रमेहाधिकारोक्तालजीलक्षणः ग्रीथः। लक्षणम्—"जाता सन्धौ कृष्णशुक्लेऽलजी स्यात् तस्मिन्नेव ख्यापिता पूर्व्वलिङ्गैः।" मा. नि.। शुक्रदोषविशेषे। एषापि प्रमेहपिड़काया लक्षणयुक्ता। "अलजीलक्षणैर्युक्तामलजीञ्च वितर्कयेत्॥" सु. नि. शु. दो. चि. १४ अ.।

अलञ्जरः। पुं। बहुजलधर-मृण्मयपात्रे। जाला। तत्पर्य्यायः—अलिञ्जरः माणिकं (अटीभ.)।

अलम्बमुष्कः। पुं। सुष्ककक्षचे। घण्टापारुल।

अलम्बा। स्त्री। तिक्तालाब्वाम्। तिएलाउ। स्थावरविषान्तर्गतपत्रविषे। सु. कल्प. २अ.। See पत्रविषम्।

अलम्बुजा। स्त्री। गोरक्षतुण्ड्यां। वै. निघ।

अलम्बुदम्। क्ली। बालके। बाला। वै. निघ. क्षय. चि. शिवगुटी.।

अलम्बुषः। पुं। वान्तिरोगे। मे. षचतुष्कं। भूकदम्बे। कुकशिमे गाछ। र. मा. रत्ना।

अलम्बुषा (सा)। स्त्री। A sort of sensitive plant. लज्जालुकाभेदे। फुल शोला। तत्पर्य्यायः,—खरलक् मेदः गला। गुणाः—मधुरा लघुः कृमिकफपित्तघ्नी च। भा. पू. १भ. गु. व.। अलम्बुषायाः स्वरसः पीतो द्विपलमात्रया। अपचीगण्डमालानां कामलायाश्च नाशनः। भूकदम्बे। कुकशिमे। महाश्रावण्याम्। वड़ थूनकुड़ि। रा. नि. व. ५। वै. निघ. २भ. वा. व्या. षड़शीति-गुग्गुलौ, वृषणाद्यलौहे च। लौहमले। मण्डूर। च. द. १भ. आमवाते अलम्बुषाद्यचूर्णे।

अलम्बुषाद्यचूर्णम्। क्ली। आमवातघ्नचूर्णभेदम्। प्रयो.—"अलम्बुषां गोक्षुरकं गुड़चीं वृद्धदारकम्। पिप्पलीं त्रिवृतां मुस्तं वरुणं सपुनर्णवम्। त्रिफलां नागरञ्चैव श्लक्ष्णचूर्णानि कारयेत्॥" मण्डूरादिचूर्णं प्रत्येकं समभागमादाय एकत्र संमिश्रणीयं। अनुपानं—दधिमण्ड काञ्जिकं दुग्धं तक्रं मांसरसं वा यथालाभं ददात्। च. द. आमवा. चि.। द्वितीयं यथा—अलम्बुषा गोक्षुरकं त्रिफलानागरास्ताः। यथोत्तरं भागवृद्ध्या श्यामाचूर्णञ्च तत्समम्। इति। अलम्बुषा लौहमलं। मतान्तरे मुण्डीरी। श्यामाचूर्णं वृद्धदारकमूलचूर्णम्। च. द. भा.। तृतीयमपि आमवाते। "अलम्बुषा गोक्षुरकं मूलं वरुणकस्य च। गुड़ूची नागरञ्चेति समभागानि कारयेत्॥" भा.। रस. र.।

अलम्बोर्द्धस्तनी। वि। यस्याः स्तनौ न लम्बौ नोर्द्ध्वमुखौ च। सु. शा. १० अ.।

अलम्बौष्ठी। वि। यस्याः ओष्ठौ लम्बमानौ न भवति। सु. शा. १० अ.।

अलमोसः। पुं। मत्स्यभेदे। वै. निघ.।

अलर्कः। पुं। (Calotropis gigantea or Procera; अर्क of white flowers.) श्वेतार्के। श्वेत आकन्द। हिं मादार। भा. पू. १भ.। मे. कचिकं। मन्दार इति हेमा. अलर्कादिव.। मन्दारार्के। रा. नि. व. १०। अलर्कीमन्दारार्कः यस्य क्षीरं न विनश्यति। सु. सू. ३८अ अर्कादि. ड.। मन्दाराख्यः श्वेतपुष्पः। वा. सू. १५अ. अर्कादिव. अरुणः। "अर्कालर्कौ नागदन्ती विशल्या।" योगीन्द्रादितकुक्कुरे। मे. कचिक। कुक्कुरज्वरे। हा. अचि. २स्था. २अ.।

अलवणा। स्त्री। ज्योतिष्मत्यां। लताफट्‌की। वर्त्तुलपक्वरक्तफला पीततैला काकमर्दिका। सु. सू. ३८ अर्कादिव. ड.। गुणाः—तीव्रा चालवणा सा स्यात् कफ-मेदः-कृमिप्रणुत्। अवि.। हरीतक्याम्। मद. व. १।

अलसः (कः)। पुं। पादरोगविशेषे। पाँकुई तल्लक्षणं—"क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुगन्वितौ। दुष्टकर्दमसंस्पर्शादलसं तं विनिर्दिशेत्॥" सु. नि. १३अ.। विसूचिकाया अवस्थाभेदे। सा त्रिधा—विषाजीर्णं रसादेकं दोषैः स्यादलसस्त्रिधा। शार्ङ्गः। प्रयाति नोर्द्ध्वं नाधस्तात् आहारो न विपच्यते। आमाशयेऽलसीभूतः तेनासौ अलसी मतः॥ इति निरुक्तिः। वा. सू. ८। तल्लक्षणं यथा—"कुचिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति। निरुद्धो मारुतश्चैव कुक्षावुपरि धावति॥" See

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निमा. । क्ली । क्षुद्रकुष्ठरोगभेदे । लक्षणम्—कण्डूसन्निः सरागेश्च गण्डं रक्तसकं चितम् ।" मा. नि. । व्यालजातिज्वरे । गज-वै. । जिह्वारोगे । वै. निघ. । वृक्षभेदे ।

अलसा । स्त्री । हंसपदीलतायाम् । गोयालेलता । मे. सचिवं ।

अलसी । स्त्री । अतस्याम् । तिसि, मसिना । वै. निघ. ।

अलसेलुका । स्त्री । रक्तलज्जालुकायाम् । फूल सोला । वै. निघ. ।

अलातम् । क्ली । अङ्गारे । कयला । रत्ना. ।

अलाबु । क्ली । (बुः,बूः) । स्त्री । (Cagenaria vulgaris, Syn, Cucurbita lagenaria.) स्वनामख्यातफलशाकलतायाम् । लाउ गाछ । हिं लौका, मिठितुम्बी, लवलौआ, गठ्ठलौआ । मं दुध्याभोपला । सा द्विधा दीर्घा वर्त्तुला च तत्पर्य्यायः,—तुम्बः तुम्बकः तुम्बा तुम्बी पिण्डफला महाफला आलाबूः एलाबूः लाबुः लाबुका (अटौ), तुम्बिका आलाबुः तुम्बिः अलाबुः तुम्बुकः (शब्दरः)। तत्फलगुणाः—मिष्टं हृद्यं पित्तश्लेष्मघ्नं हृद्यं रुचिकरं धातुपुष्टिविवर्द्धनम् । भा. पू. १भ. । मिष्टतुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु । हृद्यं रुचिकरं प्रीतमिति च । द्रव्यगु. । गुरु मधुरं मलभेदकं वातश्लेष्मकारि रुच्यं शीतलं पित्तनाशित्वञ्च (राजः) । कटुतुम्ब्यां । तिएलाउ । श. र. ।

अलाबुकः । पुं । अश्वघ्ने सुखरोगे । अत्र सुखदौर्गन्ध्यं तालुशोफः ग्रासग्रहणे विद्वेषश्च भवति । ज. द. ।

अलाबुका । स्त्री । कटुदुग्धालाबुनि । भा. ।

अलाबूनी । स्त्री । कटुदुग्धालाबुनि । तेँत श्वेतलाउ । कटुतुम्ब्याम् । तिएलाउ । मिष्टतुम्बीलतायाम् । मिष्टेलाउ गाछ । हिं मीठितुम्बी । मद. व. ७ ।

अलाबुविधिः । पुं । अलाब्वा रक्तमोक्षणे । "अलाबु कटुकं रुच्यं तीक्ष्णञ्च परिकीर्त्तितम् । तस्मात् श्लेष्मोपसृष्टे तु हितं तदवसेचने ।" सु. सू. १३अ. ।

अलाबुसृहत् । पुं । अम्लवेतसे । वै. निघ. ।

अलाबूयन्त्रम् । क्ली । यन्त्रविशेषे । लक्षणं—"स्याद्दशाङ्गुलाऽलाबुर्नाहे त्वष्टादशाङ्गुला । चतुस्त्र्यङ्गुलवक्त्रास्यादीषदाऽन्तःश्लेष्मरक्तहृत् ॥" कश्चित् अधि. ।

अलासः । पुं । जिह्वास्फोटे । जिह्वागतमुखरोगे । अत्र दुष्टकफशोणितेन जिह्वातले दारुणः शोथो भवति । वृद्धिं गते जिह्वास्तम्भो जिह्वामूले पाकश्च भवति । लक्षणं जिह्वातले यः स्रवथुः प्रगाढः सोऽलाससंज्ञः कफरक्तमूर्च्छितः । जिह्वां स तु स्तभयति प्रवृद्धो मूले तु जिह्वा भृशमेति पाकम् ॥ सु. नि. १६ अ. ।

अलिः । पुं । भ्रमरे । रत्ना. । मद्ये । मे. लक्षिकं । वृश्चिके । हारा. । काके । कोकिले । श. र. ।

अलिकः । पुं, क्ली । कपोले । रा. नि. व. १८ । ललाटे । रत्ना. ।

अलिका । स्त्री । पाटल्याम् ।

अलिकमत्स्यः । पुं । अङ्गारे । भिन्नतिले । तैलभृष्टमांसे । पिष्टकविशेषे ।

अलिकुलप्रिया । स्त्री । काष्ठशेवल्यां । काठ गोलाप । वै. निघ. ।

अलिकुलसङ्कुला । स्त्री । कण्टकशेवल्यां । काँटाशेउती । कुलकाहचे । कोकणदेशीय पुष्पवृक्ष । रा. नि. व. १० । भा. पू. १भ. ।

अलिगर्दः । पुं । जलसर्पे । आलाध, खरा, गेँड़िभाङ्गा इति च लोके । श. र. ।

अलिजिह्वा (ह्विका) । स्त्री । क्षुद्रजिह्विकायाम् । आल्जिव इति लोके । श. र. ।

अलिञ्जरम् । क्ली । फलविशेषे । फूटीविशेष । चिरफोटीति महाराष्ट्रे । गुणाः—अलिञ्जरं तु रुच्यं स्याच्छीतलं भेदकं सरं । तुवरं मधुरं चारं तिक्तं पाके कटु स्मृतम् । स्वादिष्ठं वातकृच्छ्वासकासश्लेष्मविनाशनम् ॥ वै. निघ. । बहुजलधर-सञ्चय-पात्रविशेषे ।

अलिता । स्त्री । अलक्तके । आलता । गुणाः—"अलितीर्णा तिक्तका स्यात्कफदोषव्रणापहा । व्यङ्गारुचीकण्डरुजं व्रणदोषञ्च नाशयेत् । अन्ये गुणाश्च लाक्षावत्प्रोक्ताः पूर्व्वमहर्षिभिः ।" वै. निघ

अलिदूर्व्वा । स्त्री । मालादूर्व्वायां । रा. नि. व. ८ ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलिपकः। पुं। भ्रमरे। कोकिले। कुक्कुरे। सर्व्वत्र मे. कचतुष्कं।

अलिपत्रिका। स्त्री। वृश्चिकाख्यां। विछाती। रा. नि. व. ५।

अलिपर्णिका (र्णी)। स्त्री। वृश्चिकाख्यां। विछाति, विछूटी। रा. नि. व. ९।

अलिप्रियम्। क्ली। रक्तोत्पले। त्रिका.। पुं। धाराकदम्बवृक्षे। आमवृक्षे। श. र.। कदम्बवृक्षे। भा. पू. १भ.।

अलिप्रिया। स्त्री। पाटलावृक्षे। पारुल गाछ। प. मु.। भूजम्बूवृक्षे। वै. निघ.।

अलिप्सा। स्त्री। अनिच्छायाम्।

अलिमकः। पुं। भेके। कोकिले। भ्रमरे। पद्मकेशरे। मधूकवृक्षे। मे. कचतुष्कं।

अलिमोदा। स्त्री। गणिकारिकायां। गणिरि। रा. नि. व. ९।

अलिमोहिनी। स्त्री। केविकापुष्पवृक्षे। रा. नि. व. १०। केविकां पश्य।

अलिम्पकः (म्बकः)। पुं। कोकिले। मधुमक्षिकायाम्। कुक्कुरे। पद्मकेशरे। वै. निघ.।

अलिवल्लभा। स्त्री। रक्तपाटलायां। भा. पू. १ भ.।

अलिवाहिनी। स्त्री। कोकणदेशप्रसिद्धे केविकावृक्षे। केवेर इति भाषा। रा. नि. व. १०।

अलिसमाकुलः। पुं। पुष्पवृक्षविशेषे। दवणसेवन्तीति महाराष्ट्रादौ। वै. निघ.।

अली (इन्)। पुं। वृश्चिके। भ्रमरे। मे.।

अलीकम्। क्ली। ललाटे। हे. च.।

अलीकमत्स्यः। पुं। अङ्गारस्विन्नतिलतैलभृष्टमाषपिष्टके। यथा—"माषपिष्टिकया लिप्तं नागवल्लीदलैर्महत्। ततु संस्वेदयेदुक्ता स्थाल्यामङ्गारकोपरि। ततो निष्काशितं खण्डं तिलतैलेन भर्जयेत्। अलीकमत्स्य उक्तोऽयं प्रकारः पाकपण्डितैः। तं वल्लाकभटित्रेण वासुकेन च भक्षयेत्॥ भा. पू. २भ.।

अलीकम्। क्ली। वह्नौ। हे. च.।

अलीकलोष्टः। पुं। तिलकवृक्षे। तिल गाछ। वै. निघ. व.।

अलुः। पुं। स्त्री। गलन्तिकायाम्। आलो। तुलसीवृक्षे। क्ली। मूले। मे. कद्विकं।

अलुकम्। क्ली। आलुकसाधारणे। आलु। गुणाः—आलुकं शीतलं आग्नेयं मलसम्भव मधुरं जड़ं रूक्षं हृष्यं दुर्जरं बलवर्द्धनं स्तन्यवर्द्धनं मलमूत्रकफवातवर्द्धिकरं रक्तपित्तघ्नञ्च। वै. निघ.। एतच्च राजालुरक्तराजालुश्चेक्षणवन्यकांस्यालुभेदेन बहुविधम्। विशेषः पर्य्यायेऽस्मिन्। आलुबोखार इति प्रसिद्धे काबेलदेशीयफले। आमिषे।

अलोमशः। पुं। मत्स्यविशेषे। तल्लक्षणं—वितस्तिपरिमितः श्वेताङ्गः सूक्ष्मशल्कश्च। तन्मांसं बलकरं वीर्य्यकरं पुष्टिकरञ्च। रा. नि. व. १७।

अलोमशा। स्त्री। वृक्षविशेषे। मं कांगभाड़। वै. निघ.।

अलोहितम्। क्ली। रक्तपद्मे। ईषद्रक्तपद्मे।

अल्कः। पुं। वृक्षविशेषे। शरीरावयवे। वै. निघ.।

अल्पकः। पुं। यासचुपे, दुरालभायाम्। रा.।

अल्पकेशिका } स्त्री। भूतकेश्यां। छोटकेशी।
अल्पकेशी } प. मु.। र. मा. रत्ना.।

अल्पगन्धम्। क्ली। रक्तकैरवे। रक्तकमले। वै. निघ.।

अल्पगोधूमः। पुं। तृणगोधूमे। प. मु.। भद. व. १०।

अल्पघण्टिका। क्ली। क्षुद्रशणपुष्प्याम्। लघु शणगाछ। मं लहुताग।

अल्पतनुः। त्रि। खर्व्वे। अम.।

अल्पनायिकाचूर्णम्। क्ली। औषधमिदं ग्रहण्यां हितम्। पाठः—"त्रिफलाणं पञ्चलवणं प्रत्येकं वृषयं पिचु। गन्धकान्माषकानष्टौ चतुरो माषकान् रसात्। इन्द्राशनात्पलं शाणचित्रयाधिकमिष्यते। खादेन्निश्रीकृताच्छाणमनुपेयञ्च काङ्क्षिकं॥" र. चि.।

अल्पनिद्रता। स्त्री। पित्तजन्यनिद्राल्पतारोगे। वै. निघ.।

अल्पपत्रः। पुं। क्षुद्रपत्रतुलसीवृक्षे। र. मा.। क्ली। रक्तपद्मे। र. मा.।

अल्पपत्रकः। पुं। गिरिजमधूकवृक्षे। पाहाड़े मोल गाछ। रत्ना.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अल्पपत्रिका। स्त्री। रक्तापामार्गवृक्षे। रा. नि. व ४।

अल्पपत्रा। स्त्री। सिध्रेयायाम्। सुपत्र्याम्। तालमूली। वै. निघ.।

अल्पपद्मम्। क्ली। रक्तपद्मे, रक्तोत्पले। वै. निघ. द्रव्यगु.।

अल्पपर्णिका } स्त्री। क्षुद्रपर्ण्याम्। मुगानी।
अल्पपर्णी } वै. निघ।

अल्पपुष्पिका। स्त्री। पीतकरवीरे। पीतपुष्प करदो। वै. निघ.।

अल्पप्रमाणकः। पुं। लतापनसे। रा. मा.। चिलानके। चेला तरमुज, खरमुज इति भाषा। वै. निघ.।

अल्पमस्तकः। पुं। चिवकवृक्षे। वै. निघ.।

अल्पमक्षिका। स्त्री। मक्षिकाविशेषे। छोट माछी। वै. निघ.।

अल्पमानकः। पुं। बिल्वगन्ध-तुलस्याम्। र.।

अल्पमारिषः। पुं। क्षुद्रमारिषे। काँटानटिया, वा चाँपानटिया। हिं अल्पमरुषा। मं धोरतांडुलजा। अस्य। तत्शाकगुणाः—लघु शीतवार्द्धकृच्चं पित्तघ्न कफनाशनं। मलमूत्रनिःसारकं कृच्च दीपनं विषघ्नञ्च। भा. पू. १भ.। See तण्डुलीयं।

अल्परसा। स्त्री। हैतवयाम्। रा. नि. व. २३।

अल्पवर्त्तकः। पुं। तित्तिरपक्षिणि। मद व. १२।

अल्पशुक्रता। स्त्री। पित्तजन्यशुक्राल्पतारोगे। वै. निघ.।

अल्पशोफः। पुं। सर्व्वाङ्गिरोगे। वै. निघ.।

अल्पक्षुपा। स्त्री। क्षुखलज्जालुकायां। वै. निघ.।

अल्पायुः। पुं। छागे। त्रि.। छागल।

अल्पास्थि। क्ली। परूषकफले। फलसा। रा. नि. व ११। भा. पू. १भ।

अल्पिका। स्त्री। वनमल्लिकाजातौ। हे. च ४। क्षुद्रपर्ण्याम्। भा. पू. १भ.।

अल्लकः। पुं। कक्कीलविशेषे। ककथल। धान्यके। धने'। वै. निघ।

अल्लका। स्त्री। धान्यके। धने'। वै. निघ.।

अल्ला। स्त्री। मातरि। धान्यके। धने'।

अल्लु। क्ली। आलूके। आलूबोखारा इति लोके। मद व ६।

अवकरः। पुं। सम्मार्ज्जनादिनिक्षिप्त-धूल्यादौ। जञ्जाल। तत्पर्य्यायः—सङ्करः (अ), अवस्करः (अटी सङ्कारः (शब्दर)।

अवकुट्टनम्। क्ली। आर्त्तनादे।

अवकुप्यः। पुं। गोलाङ्गूलवानरे। अयं पर्णमृगजातीयः। सु सू. ४६ अ.।

अवकूलनम्। क्ली। अग्निवुणीकरणे। च. द. अतिसा. चि.। "अङ्गारेष्ववकूलयेत्।"

अवकेशी। त्रि। अफलवृक्षे। हे. च.।

अवक्रः। पुं। सरलवृक्षे। सरल गाछ।

अवगण्डः। पुं। गण्डदेशस्थव्रणे। वयेस-फोँड़ा। मं पुटकुली। त्रिका.।

अवगथः। पुं। प्रातःस्नाने।

अवगाहः। पुं। स्नाने। स्नानगृहे।

अवगाहनम्। क्ली। स्नाने। मज्जनपूर्व्वकस्नाने। तत्पर्य्यायः,—अवगाहः वगाहः निमज्जनं शिरःस्नानं अम्भसि मज्जनं (के.)।

अवगाहस्वेदः। पुं। अवगाहनेन स्वेदे। वा. सू. १७अ।

अवगोर्णः। पुं। अपानान्निर्गते द्रव्ये।

अवगुण्ठनम्। क्ली। योषित्शिरःप्रावरणे, स्त्रीमुखाच्छादने।

अवगुण्ठितम्। क्ली। चूर्णिते। गुँड़ा। त्रिका.

अवग्रहः। पुं। गजललाटदेशे। हारा.।

अवग्राहः। पुं। अवहारके। शङ्कर इति लोके।

अपघातः। पुं। आघात-विशेषे। तण्डुलादिकण्डने, हिं। चालकाँड़ा। अपस्थौ।

अवचूर्णम्। क्ली। स्थूलचूर्णे। मोटा गुँड़ा।

अवचूर्णितः। त्रि। चूर्णिते। तत्पर्य्यायः—अवध्वंसः अपध्वस्तः। अटी.।

अवचूलकम्। क्ली। चामरे। त्रि।

अवञ्चकः। पुं। भक्तिमति रोगिणि। वै. निघ.

अवटः (टी)। पुं। नाड़ीव्रणे। कूपे। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवटीट: । वि । नतनासिके । थोन्दा । अम. । तत्पर्याय:,—अवनाट: अवभट: । अ. ।

अवटु: । स्त्री । स्त्री । ग्रीवापश्चाद्भागे । रत्ना. रा. नि. व. १८ । पुं । वृक्षविशेषे । उ. । रन्ध्रे । कूपे । हे. ।

अवड: । पुं । मत्स्यापृष्ठभागे । वै. निघ. ।

अवतंस: । पुं, क्ली । कर्णभूषणे । अ. ।

अवतमसम् । क्ली । अल्पान्धकारे । अ. ।

अवतानम् । क्ली । चन्द्रातपे । चाँदोया ।

अवताप: । पुं । अजाविज्वरे । गजवै. ।

अवतारणम् । क्ली । भूतादिग्रहे । वस्त्राञ्चले । मे. वपवर्गः ।

अवतारणिका । स्त्री । नौकायाम् ।

अवतोका (दा) । स्त्री । स्रवद्गर्भायां गवि, पतितगर्भायां गवि । हला. ।

अवदन्त: । पुं । बालके । बाला । वै. निघ. ।

अवदंश: । पुं । सुरापानरुचिजनकभक्ष्यद्रव्ये । चाट । हला. । शिग्रुवृक्षे । कृष्णशिग्रौ । सजिना । वै. निघ. ।

अवदलनम् । क्ली । मर्दनक्रियायाम् ।

अवदात: । पुं । श्वेतवर्णे । पीतवर्णे च । अ. ।

अवदानम् । क्ली । उशीरे । अ, टी. । खनित्रे । खोन्ता ।

अवदान्त: । पुं । शिग्रुवृक्षे । वै निघ. ।

अवदारणम् । क्ली । खनित्रे ।

अवदाहं (कम्) । क्ली । लामज्जकतृणे । वेणार ग्राम्य शाला तृण । भा पू. १व. । वीरणमूले । गन्धवेणा । मं पिंवलावाला । वै. निघ. ।

अवदाहेष्टम् । क्ली । वीरणमूले । गन्धवेणा । अ. टी. ।

अवदाहेष्टकापथम् । क्ली । उशीरे । अ. टी. भ. ।

अवदीर्णम् । वि । द्रवीभूतघृतादौ । विदारिते । फाटा ।

अवदोह: । पुं । दुग्धे । चिका. ।

अवध्वंस: । पुं । अवचूर्णने । गुँड़ा करण । मे. ।

अवध्वस्त: । वि । अवचूर्णिते । मे. तत्रतुल्यं ।

अवनम् । क्ली । प्रीणने । अ. ।

अवना (ना) । स्त्री । वाद्यमाणायां । गोओ-यालिया, वला लता । रा. नि. व. ५ ।

अवनाट: । वि । नतनासिके । थोन्दा । अम. ।

अवनीसारा । स्त्री । कदल्याम् । वै. निघ. ।

अवन्ति(न्ती)सोमम् । क्ली । काञ्जिके । प. सु. । हारा. । रा. नि. व. १५ ।

अवपाटिका । स्त्री । क्षुद्ररोगान्तर्गतशूकरोगे । "अल्पीय:खां यदा हर्षाद्विलाङ्गच्छेत् स्त्रियं नर:। हस्ताभिघातादथवा चर्म्मण्युद्वर्त्तिते बलात् । यस्यावपाट्यते चर्म्म तां विद्यादवपाटिकाम्" ॥ मा. नि. ।

अवपीड: । पुं । पञ्चविधनस्यकर्म्मान्यतमे शिरोनस्ये । स च शीघनस्यभेदेन द्विविध: । अवपीड्यते यस्मात् स अवपीड इति । "वपीड्य दीयते यस्मात् अवपीड़स्तत: स्मृत:। कल्कीकृतादौषधाद्य: पीड़ितो निस्रुतीरस:। सोऽवपीड़: समुद्दिष्ट: तीक्ष्णद्रव्यसमुद्भव:। स गलरोगादौ शस्त:।" प. प. ४ख. । "गलरोगे सन्निपाते निद्रायां विषमज्वरे। मनोविकारे कृमिषु युज्यते चावपीड़नम् ॥" वै. निघ. नस्यवि. ।

अवबाहुक: । पुं । See अपबाहुक: ।

अवभासिका (नी) । स्त्री । वर्णच्छायाप्रकाशिकायां त्वचि । सा च व्रीहिरष्टादशभागप्रमाणा । शरीरेर बाहिरेर चर्म्म । सु. शा. ५अ. ।

अवभ्रट: । वि । नतनासिके । थाँदा । इति लोके । अम. ।

अवमन्य: (क:) । पुं । शूकरीरोगभेदे । लक्षणम्—"दीर्घा बह्वस्तु पिड़का दीर्य्यन्ते मध्यतस्तु या:। सोऽवमन्य: कफासृग्भ्यां वेदना रोमहर्षकृत् ॥ सु. नि. १४अ. । कर्णपालीरोगभेद । सु. सू. १६ अ. ।

अवमर्द: (नम्) । पुं, क्ली । पीड़ने । अम. ।

अवमोटनम् । क्ली । आमोटने । मोचड़ाओन । मा. नि. वा. व्या. ।

अवयव: । पुं । शरीरावयवे । रा. नि व. १८ ।

अवयवस्थानम् । क्ली । शरीरे । वै. निघ. ।

अवयवी । पुं । पचिणि । वै. निघ. ।

अवरम् । क्ली । गजपश्चाज्जङ्घादौ । अम. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवरदारुकम्। क्ली। तन्नामकाख्यावरविषान्तर्गतपत्रविषे। सु. कल्प २अ.। See पत्रविषम्।

अवरिका। स्त्री। धन्याके। धने'। रा. नि. व. ६।

अवरोहः। पुं। वटादिवृक्षस्याधोविलम्बि-काण्डाकारावयवविशेषे। वटादिर नागाल्।

अवरोहकः। पुं। अश्वगन्धायां। मद. व. १।

अवरोहशाखी। पुं। प्लक्षवृक्षे। पाकुड़ गाछ। रा. नि. व ११।

अवरोहिका। स्त्री। अश्वगन्धायां। रा. नि.।

अवरोही (हिन्)। पुं। वटवृक्षे। वटगाछ। रा. नि. व ११।

अवलग्नः। पुं। मध्यप्रदेशे। माजा।

अवलम्बनः (नः)। पुं। श्लेष्मविशेषे। तस्य स्थानं हृदयं, तत्कर्म्म च स्वशक्त्या हृदयालम्बनं विकसन्धारणञ्च। भा.।

अवलग्नः। पुं। श्वेतवर्णे। स्वामिनि।

अवला। स्त्री। नार्य्याम्। रत्ना.। प्रियङ्गौ। प्रयोगा. गलगण्डे। "मधुस्त्रीभावलासर्ज।"

अवलुञ्चनम्। क्ली। सुप्तौ। शैथिल्ये। सु. सू. २५ अ.।

अवलेपः। पुं। गर्व्वे। लेपने। भूषणे। मे. पचतष्क।

अवलेपनम्। क्ली। लेपने। मलणे। लेपा, माखान।

अवलेहः / **अवलेहिका** } पुं. स्त्री। लेह्यौषधे। चाटिवार औषध। जिह्वया आस्वादने। सायं स्यादवलेहिका। च. द ज्वर-चि.। क्वाथादेः पुनः पाकात् घनत्वमवलेहः। "क्वाथार्द्धं पुनः पाकाद्घनत्वं सा रसक्रिया।" प प्र. १अ.। मात्रा च तस्य पलमिता। "सोऽवलेहश्च लेहः स्यात्तन्मात्रा स्यात्पलोन्मिता। सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुड़ः। द्रवं चतुर्गुणं दद्यात्...। सुपक्के तन्तुमत्त्वं स्यादवलेहोऽप्सु मज्जति। दुग्धमिक्षुरसं यूषं पञ्चमूलकषायजं। वासाक्वाथं यथायोग्यमनुपानं प्रशस्यते।" भा.। अयमूर्द्ध्वक्वगदहरः सायञ्च प्रयोज्यः। ऊर्द्ध्वजत्रुगदघ्नी या सा सायमवलेहिका। च.।

अवलेहनम्। क्ली। लेहने। चाटा।

अवल्कः। पुं। मेषरङ्गायाम्। मेड़ाशिङे, गाड़लशिङे। वे. निघ.।

अवल्गजा। स्त्री। कृष्णसोमराज्याम्। हाकुच। भैष. भल्ला. गुड़.।

अवल्गुजः (जा)। पुं, स्त्री। कृष्णसोमराज्यां। सु. चि २५ अ.। सोमराज्याम्। हाकुच। भा. पू. १ भ. भैष. कुष्ठ-चि.।

अवल्गुजबीजम्। क्ली। सोमराजबीजे।

अवल्गुजीजम्। क्ली। सोमराजीबीजे।

अवश्यकुथिका। स्त्री। जानुदेशे। पदबन्धनवस्त्रविशेषे।

अवश्यः / **अवश्या** } पुं, स्त्री। तुषारे। भा. म. ४भ. शिरोरोग-अर्बुदभेदके। प्राग्वातावश्यायमैथुनैः। भल्ला. गुड़.।

अवश्यायः। पुं। शिशिरे। च द. पि. ज्व स्त्रीकादि.। "अवश्यायश्चित पाकम्।" तुषारे। भा. म. ४भ. नासारो.। "अवश्यायकर्मैथुनवास्यसेकैः।"

अवश्याया। स्त्री। कुज्झटिकायाम्।

अवष्टम्भः। पुं। स्वर्णे। मे.।

अवष्वाणम्। क्ली। भक्षणे। हे. च।

अवसक्थिका। स्त्री। खट्टायाम्। खाट। तत्पर्य्यायः,—पर्य्यस्तिका परिकरः पर्य्यङ्कः। हे।

अवसादः। पुं। अवसन्नतायाम्।

अवसादनम्। क्ली। उन्नतव्रणस्य निम्नीकरणे। सु. चि १अ.।

अवसादनी। स्त्री। महाकरञ्जे।

अवसितम्। क्ली। मर्दितधान्ये।

अवसेकः। पुं। रक्तमोक्षणे। च. चि. ३अ.।

अवसेकिमः। पुं। वटके। वड़ा। वे. निघ.।

अवसेचनम्। क्ली। जलसेचने। सु.।

अवस्कन्दः। पुं। अवगाहनस्नाने।

अवस्कयनी। स्त्री। बहुदिनानन्तरप्रसूतायां गवि। केलेन गाई।

अवस्करः। पुं। विष्ठायाम्। गुह्यदेशे। मे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रचतुष्कं । सम्मार्ज्जनादि-निक्षिप्त-धूल्यादौ । आवर्ज्जना ।

अवस्करकः । पुं । सम्मार्ज्जन्याम् । झाँटि ।

अवहस्तः । पुं । हस्तपृष्ठे । हस्तोपरिभाग । हे. च. ।

अवहारः (कः) । पुं । ग्राहाख्यजलजन्तौ । शाङ्गर, जलहस्ती । मे. रचतुष्कं ।

अवहालिका । स्त्री । प्राचीरे । पाँचिर ।

अवक्षिप्तसन्धिः । पुं । सन्धिविश्लेषे । सन्धिच्युतं सत् नीचत्वेनावस्थानम् । सन्ध्यस्थीरतिक्रान्तता वेदना च । सु. नि. १५ अ. ।

अवक्षेपणी । स्त्री । वल्गायाम् । लागाम । हे. च. ।

अवाक्पुष्पी । स्त्री । हेमपुष्प्यां । र. मा. । मधुरिकायाम् । गोरी । रत्ना. । रा नि व. ४ । शतपुष्पायाम् । शुल्फा । मं वड़ीशोंफ । रा नि व ४ । च. द. अर्श-चि. सुनिषण्ण-चाङ्गेरीघृते । चीरपुष्प्याम् । चोरहुली चोरथड़्की । रत्ना. ।

अवाक्शीराः (म्) । पुं । निम्नशिरस्के ।

अवाचीनः । त्रि । विपर्य्यस्त । मे. नचतुष्क ।

अवाच्यदेशः । पुं । यौनौ । विका ।

अवानम् । क्ली । शुष्कफलादौ । भ. र. ।

अवारम् । क्ली । नद्यादेः पूर्व्वपारे । ओपार ।

अवारपारः । पुं । समुद्रे ।

अविः । पुं । मेषे । भा. पू. । मूषिकें । कम्बलें । मे. । मत्स्यभेदे । प्राचीरे । वायौ । स्त्री । कुलत्थिकायां । वनकुनथ । अविः कुलाली चञ्चुष्या कुम्भकारी कुलत्थिका । र. मा. । मेष्याम् । विका. । ऋतुमत्यां । अम. ।

अविकम् । क्ली । हौरके । रा. नि. ।

अविकमांसम् । क्ली । मेषमांसे । वै. निघ. ।

अविगन्धनी
अविगन्धिका
अविगन्धी । स्त्री । अजगन्धायाम् । वनयमान । तिलोणीवर्ब्बरीति च लोके रा. नि. व ४ ।

अविग्नः (घ्नः) । पुं । पानीयामलके । सा. सु. । करमर्द्दवृक्षे । करम्चा गाछ । मं करवंद । अम. ।

अवितक्रम् । क्ली । मेषीतक्रे । भेड़ार दूधेर घोल । गुणाः—अवितक्रमपथ्यं स्यादग्नं दुर्गन्धकारकं । दीपनं कटुकञ्चोष्णं लेखनं ल पित्तजित् । रक्तदोषकरञ्चैव कफवातविनाशकम् ॥ द्रव्यगु. ।

अवित्यजः । पुं । पारदे । शब्दकल्पद्रुमः । रा. नि. व. १३ । अत्र अचित्यज इत्येवं पाठो राजनिघण्टौ दृश्यते ।

अविदग्धः । त्रि । अनम्ले । विजयर. अजीर्णचि ।

अविदग्धम्
अविदुग्धम् । क्ली । मेषीदुग्धे । हला । See आविकक्षीरम् ।

अविदु(दू)ग्धम् । क्ली । मेषीदुग्धे । भेड़ार दूध । हला. ।

अविद्धकर्णा । स्त्री । पाठायाम् । आकनादि । अ टी. । सा. कौ. । जातीफलावल्ल्याम् । भृङ्गराजे । भीमराज । अ टी. ।

अविद्धकर्णिका (र्णी) । स्त्री । पाठायाम् । आकनादि । अ टी. । जातीफलावल्ल्याम् ।

अविद्धा । स्त्री । दुष्टशिराव्यधने । "बहुशश्चता हीनशस्त्रप्रणिधानेनोपविद्धा ।" सु. शा. ८ अ. ।

अविन्दनः । पुं । वाड़ानले ।

अविपक्ति (त्ति) करचूर्णम् । क्ली । अम्लपित्ताधिकारे हितकरं चूर्णम् । पाठः—"त्रिकटु त्रिफला मुस्तं वीरञ्चैव विडङ्गजम् । एलापत्रञ्च सर्व्वञ्च समभागं विचूर्णयेत् । यावत्येतानि चूर्णानि लवङ्गं तत्समं भवेत् । सर्व्वचूर्णद्विगुणितं त्रिवृच्चूर्णञ्च दापयेत् । सर्व्वमेकीकृतं यावत्तावच्छर्करयान्वितम् । सर्व्वमेकीकृतं पात्रे स्निग्धभाण्डे निधापयेत् । भोजनादौ ततोऽग्ने च मध्वाज्याभ्यामिदं शुभम् ॥" र. सा. सं. । भैष. । प्रयोगा. सा कौ. । त्रिकटुादि प्रत्येकं १ तो. लवङ्गचूर्णं ११ तो. त्रिवृन्मूलचूर्णं ४४ तो. शर्करा ६६ तो. ।

अविपटः । पुं । ऊर्णामयवस्त्रे, कम्बलादौ ।

अविपाकः । पुं । अपरिपाके ।

अविप्रियः । पुं । श्यामाकतृणे । शामा घास । रा. नि. व. १६ ।

अविप्रिया । स्त्री । श्यामालतायाम् । रा. नि. । श्वेतालतायाञ्च । रा. नि. व. ५ ।

अविभुक् । पुं । व्याघ्रे । मं लांड़गा । वै. निघ. ।

CC-0. Gurukul K... Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अविमरोष(स)म्। क्ली। आविचीरे। भेड़ीर दूध्। हला. हे. च.।

अविमुक्तकः। पुं। माधवीलतायां। वै. निघ.।

अविमुक्तका। स्त्री। तिन्दुकवृक्षे। तेँद। हिं केंदु। सं टेभुरणी। काकतिन्दुके। वै. निघ.।

अविमोचम्। क्ली। आविकचीरे। र. मा.।

अविला। स्त्री। मेष्याम्। हे. च.।

अविशृङ्गः। पुं। मेषशृङ्गाम्। मेढ़ाशिङ्गे।

अविशिरम्। क्ली। सूर्यावर्त्तफले। हुड़हुड़ेर फल। वै. निघ.।

अविश्वासा। स्त्री। चिरप्रसूतगवि। श्र. च।

अविषः। पुं। समुद्रे। आकाशे।

अविषा। स्त्री। अतिविषायाम्। रा. नि. व. ६। निर्विषतृणे। निर्विषी घास। वै. निघ.।

अविसोढ़म्। क्ली। अविचीरे। भेड़ीर दूध्।

अविस्रम्। त्रि। पूतिगन्धरहिते। च. चि. २अ.।

अवी। स्त्री। वनकुलशब्दे। र. मा.। ऋतुमत्यां स्त्रियाम्। हे. च.।

अवीजधर्म्मी। त्रि। यो बीजधर्म्मी न भवति। सु. शा. १अ.।

अवीजा। स्त्री। गोस्तनीसदृशगुणद्राक्षायाम्। किसमिस् वेदाना इति लोके। "अवीजात्वा स्वल्पगुणा गोस्तनीसदृशी गुणैः।" भा.।

अवोदुग्धम्। क्ली। मेषीदुग्धे। अ. द.।

अवोमूत्रम्। क्ली। मेषीमूत्रे। च. द.।

अवुकः। पुं। छागे। श्र. र.।

अवृद्धः। पुं। पुष्पवृक्षभेदे। सं पत्थरफुल। वै. निघ.।

अवेद्यः। पुं। गोवत्से। श्र. र.।

अवेला। स्त्री। पूगचर्च्चिते। चिबन सुपारि।

अवोदम्। क्ली। आर्द्रके। जटा.।

अब्दः। पुं। वत्सरे। मुस्तके। मेघे। (अटौ रा.)। क्ली। अभ्रे।

अब्दसारः। पुं। कर्पूरभेदे। रा.।

अव्यक्तम्। क्ली। प्रकृतौ। "अखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम।" सु. शा. १अ.। आत्मनि। ह. च.।

अव्यक्तरागः। पुं। ईषल्लोहितवर्णे। तत्पर्य्यायः,—अरुणः (अ) ताम्रः गौरः। (ज)।

अव्यक्ता। स्त्री। कृष्णगोकर्ण्याम्। काल अपराजिता। सं काली गोकर्णी। वै. निघ.।

अव्यङ्गः। अविकलाङ्गे। स्त्री। शूकशिम्बयाम्। आलाकुशी।

अव्यञ्जनः। त्रि। शुक्रहीने। हला.।

अव्यण्डः (ण्डा)। पुं, स्त्री। भूम्यामलक्याम्। भुँई आमला। कपिकच्छौ। आलाकुशी। च. चि. ३अ.।

अव्यथा। स्त्री। स्थलकमलिन्याम्। स्थलपद्म। भा. पू. १भ.। रा. नि. व. ११। हरीतक्याम्। महाश्रावण्यां। मुण्डिरी। भा. पू. १भ. गु. व.। आमलक्यां। लक्षणायां। लक्ष्मणामूल।

अव्यथिः (थी)। पुं। अग्नौ। वा. सू. ४अ. प्रज्ञास्था.।

अव्यथिषः। पुं। समुद्रे। सूर्य्ये। सि. कौ.।

अव्यथिषी। स्त्री। पृथिव्याम्। अर्द्धरात्रे।

अव्यथ्या। स्त्री। हरीतक्याम्। भा. पू. १भ.।

अव्यधा। स्त्री। दुष्टशिराविधने। "अशस्त्रकृता अव्यधा।" सु. शा. ८अ.।

अव्यया। स्त्री। गोरक्षमुण्ड्याम्। गोरक्षचाकुलि। सं. गोरखमुंडी। वै. निघ.।

अव्रणशुक्रः। पुं। नेत्रस्य कृष्णभागगतरोगविशेषे। अयमभिष्यन्दजः ज्वालायुक्तः शङ्खेन्दुकुन्दसदृशवर्णः नभस्थतनुमेघाकृतिश्च सुसाध्यः। लक्षणम्—दृष्टेः समीपे न भवेत्तु यच्च न चावगाढं न संस्पर्शवेद्यि। न वेदनावच्च च युग्मशुक्रं तत्सिद्धिमाप्नोति कदाचिदेव। सितं यदा भात्यसितप्रदेशे स्यन्दात्मकं नातिरुगसुयुक्तं। विहायसीवाभ्रदलानुकारि तदव्रणं साध्यतमं वदन्ति॥ सु. उ. ५ अ.। स्यन्दात्मकं कृष्णगतं सचीषं शङ्खेन्दुकुन्दप्रतिमावभासं। वैहायसाभ्रप्रतनुप्रकाशमथाव्रणं साध्यतमं वदन्ति। गम्भीरजातं बहुलञ्च शुक्लं चिरोत्थितञ्चापि वदन्ति कृच्छ्रम्। विच्छिन्नमध्यं पिशितावृतं वा चलं शिरासूक्ष्ममदृष्टिकञ्च। द्विलागतं लोहितमल्पतश्च चिरोत्थितञ्चापि विवर्ज्जनीयम्॥ मा. नि.

अशकुम्भी। स्त्री। पानीयोपरिजन्तुके। पा. र. मा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अशनम्। क्ली। भोजने। अन्ने। रा. नि. व. २०। पुं। पीतशाले। च. सू. ४अ. ४३ दशकं। चिवक-वृक्षे। भल्लातकवृक्षे। वै. निघ.।

अश(स)नकः। पुं। असनपुष्पाकारधान्यविशेषे। सु. सू. ४६ अ.।

अशनपर्णी। पुं, स्त्री। विजयसार इति प्रसिद्धे वृक्षे। माराटी इति च पश्चिमदेशे। तत्पर्यायः,—वातकः शीतलः शीतलवातकः असनपर्णी सनपर्णी शणपर्णी शीतः शीतकः। गोकर्णीलतायां। अपराजिता। अम.।

अशनपुष्पः। पुं। अशनपुष्पाकारशाली। षष्टिक-धान्यविशेष। सु. सू. ४६अ.।

अशनमल्लिका। स्त्री। आस्फोतायाम्। हापर-माली। च. द.।

अशना (या)। स्त्री। क्षुधायाम्। हला.। शुक्लनिष्पावे। श्वेत वर्बटि वा श्वेत शिम्। रा. नि. व. ७।

अशनिः। पुं, स्त्री। हीरके। हीरे। वै निघ।

अशाका (खा)। स्त्री। शूलीतृणे। शाखा-शून्यलतायाम्। रा. नि. व. ८।

अशान्तगन्धाढ्या। स्त्री। आमहरिद्रायाम्। आम आदा। मं आंबेहलद। वै. निघ.।

अशितम्। क्ली। भक्षणे। खादने। हे. च.।

अशितम्भवः। पुं। अन्ने। भात।

अशितलता। स्त्री। नीलदूर्व्वायाम्। नील-दूर्व्वा। वै. निघ.।

अशिरम्। क्ली। हीरके। रा. नि. व १३। See वज्रम्।

अशिशिम्बो। स्त्री। स्वनामख्यातशिम्बीविशेषे। श्वेत शिम्। मं थोरश्वेतआवे। गुणाः—मधुरा कषाया श्लेष्मपित्तघ्नी व्रणदोषघ्नी शीतला रुचिकरी च। रा. नि. व. ७।

अशिश्विका। स्त्री। अनपत्यायाम्। ज्या स्त्रीस संतान नाई। श. र.।

अशीता, **अशुक्ला** } स्त्री। भूमिकुष्माण्डे। वै. निघ.।

अशुक्लजा। स्त्री। वीरीधान्ये। वै. निघ.।

अशुचिः। वि। अपवित्रे।

अशूकजः (कः)। पुं। सुरुडशालौ। रा. नि. व. १६।

अशूतम्। क्ली। अपक्के।

अशोकः। पुं। (Saraca Indica, Jonesia Asoka.) स्वनामख्यातवृक्षे। अशोकगाछ। मे.। हिं अशोगी। स लोहितकुसुम इति। सु. सू. ३८ लोध्रादिः। तत्पर्याय,—अङ्गनाप्रियः वीतशोकः शब्द. मा.), शोकनाशः विशोकः वञ्जुलद्रुमः वञ्जुलः मधुपुष्पः अपशोकः कङ्केल्लिः केलिकः रक्तपल्लवः चित्रः विचित्रः कर्णपूरः सुभगः दोहली ताम्रपल्लवः रोगितरुः हेमपुष्पः वामाङ्घ्रि-यातनः पिण्डीपुष्पः नटः रामा पल्लवद्रुः (रा), कान्ताङ्घ्रिदोहदः (वि), चक्रगुच्छः (श)। अशोकवृक्षगुणाः—शीतलः हृद्यः पित्तदाहघ्नः गुल्म-शूलोदरार्शानघ्नं रक्तरोधकः कृमिघ्नश्च। रा. नि. व. १०। तिक्तः ग्राही वर्ण्यः कषायः अपची-व्रणदाहकृमिसर्पविषरक्तघ्नश्च। भा पू. १भ.। मावा २ ती.। वेतसे। तिनिशे। वै. निघ.। क्ली। पारदे। मे.।

अशोकघृतम्। क्ली। प्रदराधिकारे प्रयोज्यं। पाठः—अशोकवल्कलप्रस्थं तीयाढ़कविपाचितम्। पादस्थेन घृतप्रस्थं जीरककाथसंयुतम्। तण्डुलाम्बु खजाचीरं घृततुल्यं प्रदापयेत्। तथैव केशराजस्य प्रस्थमेकं भिषग्वरः। जीवनीयैः पियालैस्तु परुषैः सरसाञ्जनैः। यष्त्याह्वाशोकमूलञ्च मृद्वीका च शतावरी। तण्डुलीयकमूलञ्च कल्कैरेभिः पलार्द्धकैः। शर्करायाः पलान्यष्टौ सिद्धशीते प्रदापयेत्। जीवकर्षभकौ मेदे काकोल्यौ सूर्पपर्णिके। जीवन्ती मधुकञ्चेति दशकी जीवनी गणः॥ भैष.। प्रयोगः अस्रप्रदर-चि.। गव्यघृतं ४ श. क्वाथार्थम् अशोकमूलत्वक् २ श. जलं १६ श, शेषः ४ श.। तथा जीरकं २ श. जलं १६ श. शेषः ४ श. केश-राजरसः ४श. तण्डुलीदकं ४श. छागदुग्धं ४ श.। कल्कार्थं जीवकर्षभक मेदा महामेदा काकोली क्षीरकाकोली मुद्गपर्णी माषपर्णी जीवन्ती यष्टि-मधु पियालबीजं परुषकफलं रसाञ्जनं यष्टिमधु अशोकमूलं द्राक्षा शतावरी तण्डुलीयकमूलञ्चेत्येषां प्रत्येकं ४ तो.। पाकान्ते शर्करा मिश्रणीया। भैष.। सा. कौ.।

अशोकरोहिणी। स्त्री। कटुतिक्तायाम्। कटकी। रा. नि. व. ६। च. सू. ४अ. संज्ञा-

CC-0. Gurukul Kangri Vishwavidyalaya, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थापने। See कटुकी। लताशीके, स च अशोक-दलसदृशदलः। रत्ना.।

अशोका। स्त्री। कटुरोहिण्याम्। कटकी। मे.। भा. पू. १भ.।

अशोकारिः। पुं। कदम्बवृक्षे। कदमगाछ। सं कलम्ब। शु. च.।

अशोधनेचपाकः। पुं। विनाशोधं नेत्रपाके। लक्षणम्—शोधहीनानि लिङ्गानि नेत्रपाके लक्षीयते। मा नि.। कण्डूपरीहार्युयुक्तः पक्वोदुम्बरनिभः संरम्भी च भवति।

अश्म। क्ली। स्वर्णमाक्षिके। वै. निघ.।

अश्मकदली। स्त्री। कदलीविशेषे। पाहाड़े कला। सं लोखंडकील। रा. नि. व. ११।

अश्मकरम्। क्ली। स्वर्णे। रत्ना.।

अश्मकृच्छ्रहा। स्त्री। वेल्लतरवृक्षे। सं वेल्लतूर। वै. निघ.।

अश्मकेतुः। स्त्री। क्षुद्रपाषाणभेदक्षुपे। पाथरचूर। रा. नि. व. ५।

अश्मगर्भः। पुं। हरिन्मणौ। पान्ना इति लोके। भा पू. १भ.। क्ली। मरकतमणौ। हे. च.।

अश्मगर्भकः। पुं। तिनिशवृक्षे। मद. व. ५।

अश्मगर्भजम्। क्ली। मरकतमणौ। पान्ना। रा. नि. व. १३।

अश्मघ्नः। पुं। पाषाणभेदक्षुपे। पाथरकुचा। रा. नि. व. ५। भा. पू. १भ.।

अश्मजम्। क्ली। मुण्डलौहे। रा. नि. व. १३। च. द. पाण्डु-चि.। शिलाजतुनि। मद. व. ४। हेमा.। प. मु.। र. मा.। रा. नि. व. १३। गैरिके।

अश्मजतु (कम्)। क्ली। शिलाजतुनि। च. द. पाण्डु-चि. योगराजे। रा. नि. व. १३। सि. यो. र. पि. चि. खण्डखाद्ये। "शुभाश्मजतुकं लवचम्।"

अश्मन्। पुं। प्रस्तरे।

अश्मन्तः (कः)। पुं। पाषाणभेदे। च. सू. १अ.। कोविदारवृक्षसदृशेऽम्लपत्रे अम्लोट इति लोकप्रसिद्धे वृक्षे। भा. म. ४भ. गर्भ-चि.। "अश्मन्तकस्त्रिलाः कृष्णाः।". च. सू. ४ अ.। उद्दालकवृक्षे। भा. पू. १भ.। कोविदारवृक्षे। भा. पू. २भ.। चुके। चूका। र. मा.। तृणविशेषे। अम्लकुचाई। सु. चि २५अ। स्वनामख्यातवृक्षे। आवुटा इति च लोके प्रसिद्धे। सं अश्मर। तत्पर्य्यायः,—इन्दुकः कुवाली अम्लपत्रः श्लक्ष्णत्वक् नीलपत्रः यमलपत्रकः। गुणाः—मधुरकषायः शीतलः पित्तघ्नः भूतनिवारणश्च। रा. नि. व. ९।

अश्मन्त(क)म्। क्ली। चुल्लयाम्। मे. नत्रिकं। दीपाधारच्छादने। आंकारिया। मे.।

अश्मपुष्पम्। क्ली। शैलजे। शिलारस। अम.।

अश्मभाण्डम्। क्ली। लौहभाण्डविशेषे। हांगामदिस्ता। शु. च.। खल्ल। थल इति भाषा।

अश्मभित्। पुं। पाषाणभेदे। पाथरकुचा। प. सु. रत्ना.। कवाठवक्षवृक्षे। कराड़िया इति लोके। र. मा.। कवाटचक्रमिति। रत्ना.।

अश्मभेदः (कः)। पुं। (Coleusamboinicus, Syn, Coleus aromaticus.) क्षुपविशेषे। पाथरकुचा, हिंगसागर, हांताजो इति भाषा। सु. सू. ३८, ३९ अ.। हिं पाथरचुर। तत्पर्य्यायः,— अश्मभेदः अश्मभित् (र), अश्मघ्नः शिलाभेदः अश्मभेदकः श्वेता उपलभेदी उपलभित् शिलागर्भजः नगभित्। संशोधनः। वा. सू. १५, ३९ अ.। "वल्लन्तरारणिक-वृक्कवृषाश्मभेदः।" गुणाः—शीतलः त्रुवरः वस्तिशोधनः सारकः तिक्तः प्रमेहार्शःकृच्छ्राश्मरीघ्नश्च। मद. व. १। मधुरस्निग्धः मेहलशादाहमूवकृच्छ्राश्मरीहरः शीतलश्च। रा. नि. व. ५।

अश्मयोनिः (नी)। पुं, स्त्री। नीलमणौ। अ. टी.। अश्मन्तकवृक्षे। आपटा। मद. व. १०।

अश्मरी। स्त्री। Stone or Gravel. वस्तिपाषाणरोगे। झिले, पाथूरी। सं मूत्रखड़ा। सा चतुर्विधा श्लेष्माधिष्ठाना च—श्लेष्मणा वातेन पित्तेन शुक्रेण चेति। तवासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसंवृक्तोऽनुप्रविश्य वस्तिमश्मरीं जनयति। तासां पूर्व्वरूपाणि वस्तिपीड़ारीचकौ मूत्रकृच्छ्रं वस्तिशिरीसुष्कशेफसां वेदना कृच्छ्रा ज्वरात्सादौ वस्तगन्धित्वं मूत्रस्येति। जाता नाभिवस्तिसेवनीमेहनेष्वन्यतमस्मिन् मेहती वेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिर

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोमेदकप्रकाश्मनाविलं ससिकतं विसृजति। धावन-लङ्घनप्लवनपृष्ठयानाध्वगमनैश्चास्य वेदना भवति। अत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्थिती निरुणद्धि। तस्य मूत्रप्रतीघाताद्व्यथते भिद्यते निस्तुद्यत इव च वस्तिर्गुरुः शीतश्च भवति। अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डाभा मधूक-पुष्पवर्णाभा च भवति। पित्ताश्मरी सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा। वाताश्मरी श्यामा परुषा विषमा खरा कदम्बपुष्पवत्कण्टकाचिता च भवति। शुक्राश्मरी शुक्रनिमित्ता भवति तेन सा मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च श्वयथुमापादयति पीड़ितमात्रञ्च तत्रैव विलयं गच्छति। प्रतिक्रिया, अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः। तरुणी भेषजैः साध्यः प्रवृद्धश्छेदमर्हति। तस्य पूर्व्वेषु रूपेषु स्नेहादिक्रम इष्यते। सु. नि. ३ अ.।

अश्मरीकृच्छ्रः। पुं। मूत्रकृच्छ्रे। वै. निघ.।

अश्मरीघ्नः। पुं। वरुणवृक्षे। वरुण गाछ। मं वायवरणा। विका.।

अश्मरीप्रियः। पुं। महाशालिधान्ये। रा. नि.।

अश्मरीभेदः। पुं। पाषाणभेदवृक्षे। मद. व. १।

अश्मरीभेदनः। पुं। पाषाणभेदके। पाथरकुचा। वै. निघ.।

अश्मरीरिपुः। पुं। वृहच्चणके। वड़ चणा। रत्ना.। चेवेचौ। जनार। हिं भुट्टा।

अश्मरीशर्करा। स्त्री। तन्नामकरोगविशेषे। शर्करा सिकता मेही भस्माख्योऽश्मरीवैकृतम्। अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना। पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः। सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते। हृत्पीड़ासक्थिसदनं कुक्षिशूलः सवेपथुः। तृष्णोद्गीऽनिलः कार्ष्ण्यं दौर्ब्बल्यं पाण्डुगाविता। अरोचकाविपाकौ तु शर्करार्त्तं भवन्ति च। मूत्रमार्गप्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान्॥ दौर्ब्बल्यं सदनं कार्ष्ण्यं कुक्षिशूलमरोचकं। इत्यादि। सु. नि. ३अ.।

अश्मरीहरः। पुं। देवधान्ये। देधान। वरुणवृक्षे। मं वायवरणा। र. मा.।

अश्मर्य्याहरणयन्त्रम्। क्ली। तदाहरणयन्त्रे। अश्मर्य्याहरणं सर्पफणावद्यन्त्रमग्रतः। कश्चिदन्यः।

अश्मलाक्षं (क्षा)। क्ली, स्त्री। शिलाजतुनि। रा. नि. व. १३।

अश्मसम्भवम्। क्ली। शिलाजतुनि। र. सा. सं।

अश्मसारः। पुं, क्ली। लौहे। अम.। लौहादिधातौ। सारलौहे। ईप्पात।

अश्मसारा। स्त्री। काष्ठकदल्याम्। पाँहाड़े कला। वै. निघ.।

अश्मसुता। स्त्री। पाठायाम्। आकनादि। मं पहाड़मूल। वै. निघ.।

अश्महा (हन्)। पुं। पाषाणभेदके। पाथर कुची।

अश्महृत्। पुं, क्ली। कवाटवक्षुपे। करांड़िया। रत्ना.। शिलाजतुनि।

अश्मोरः। पुं। मूत्रकृच्छ्रे। उणा।

अश्मोत्थम्। क्ली। शिलाजतुनि। रा. नि. व. १३।

अश्यामा। स्त्री। श्वेतचित्रतायाम्।

अश्रम्। क्ली। रुधिरे। रक्त। अ. टी.। नेवोदके।

अश्रद्धा। स्त्री। अरोचके। रा. नि. व. २०।

अश्रु। क्ली। नेत्रजले। चक्षेर जल। अम.। तत्पर्य्यायः,—नेत्राम्बु रोदनं अश्रं अस्रं अस्रु, वास्रं (अ), लोचं (ज)।

अश्रुनाली। स्त्री। भगन्दररोगे। वै. निघ.।

अश्रुपातः। पुं। अश्रुस्य चक्षुषोरधःप्रदेशे। "अश्रुपातः समुद्दिष्टः प्रदेशश्चक्षुषोरधः। तत्रावर्त्तो भवेद्रोमः स्वामिनः कुलनाशनः।" जयद. ३ अ.।

अश्वः। पुं। घोटके। घोड़ा। तन्मांसगुणाः—उष्णं वातघ्नं लघु बलकरं पित्तदाहजनकमतिसेवनाद्भवति। रा. नि. व. १७। लवणं वह्निकफपित्तकरं वातहृत् हृद्यं बल्यं चक्षुष्यं लघु मधुरञ्च। भा. पू.। अश्वेन भ्रमणगुणाः—वातकोपनाङ्गस्थैर्य्यबलाग्निकारित्वम्। राज.। "दासी लुब्धी दयालुश्च विप्रः स परिकीर्त्तितः। शूरश्च दृढ़मन्युश्च क्षत्रियस्तुरगः स्मृतः॥ पापिनः कर्कशा रूक्षा दुष्टा वैश्याः प्रकीर्त्तिताः। विरूपा विषमाश्चैव शूद्राश्चण्डा उदाहृताः॥" उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे। चतुर्धा वाजिनो भूमौ जायन्ते

CC-0. Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृश्यसंश्रयात् ॥ ताजिकाः खरशाणाश्च उत्तराश्चोत्तमा हयाः। गौजिकाणाश्च कैकाणाः प्रौढ़ाहाराश्च मध्यमाः॥ भाण्डजाश्चोत्तमांसाश्च राजशूलाश्च मध्यमाः। गोह्वराः शावराश्चैव सिन्धुपाराः कनीयसः॥ अन्यदेशोद्भवा ये च नीचनीचाश्च ते स्मृताः। वाजिनो जलजाः केचिदङ्गिजातास्तथापरे॥ समीरप्रभवाश्चान्ये उलूकमृगजास्तथा। जलोद्भवा द्विजातीयाः क्षत्रिया वह्निसम्भवाः॥ समीरप्रभवा वैश्या एणोलूकाश्च शूद्रजाः। विवेकी सघृणी विप्रस्तेजस्वी क्षत्रियो बली॥ दुष्टभावस्तथा वैश्यः शूद्रो निःसत्वकातरः। ब्राह्मणः सामवाही च भद्रवाही च क्षत्रियः॥ उपादानेन वैश्यः स्याच्छूद्रो दण्डेन ताड़ितः। पुष्पगन्धः सदा विप्रः क्षत्रियोऽगुरुगन्धकः॥ घृतगन्धः सदा वैश्यो मीनामोदी च शूद्रकः। विप्रार्हा वाजिनः सर्व्वे क्षत्रियो भूपतेः सदा॥ द्वौ वैश्यस्याथ शूद्रस्य शूद्र एव सुखावहः। केचिदिच्छन्ति भूपानां सर्व्वेष्वा वाहनोचिताः॥ तदर्थं भूतले यस्माच्छालिहोत्रेण निर्म्मिताः। ब्राह्मणाः चेमकृत्येषु सिद्धिं गच्छन्ति वाजिनः॥ क्षत्रिया युद्धकार्य्येषु वैश्या वित्तार्ज्जने सदा। शूद्राश्चान्येषु कृत्येषु ज्ञात्वेवं वाजिनः सदा॥ आरोहेत्सर्व्वकार्य्येषु यदीच्छेच्छाश्वतीं श्रियम्।" इति अश्वजातिः। नकुल. २अ.। "सप्त वर्णा भवन्तीह सर्व्वेषां वाजिनां ध्रुवं। तानहं कीर्तयिष्यामि भेदैर्जातानानेकधा॥ सितोरक्तस्तथा पीतः सारङ्गः पिङ्ग एव च। नीलः कृष्णोऽथ सर्व्वेषां श्वेतः श्रेष्ठतमः स्मृतः। पट्टार्हो भूपतेर्वाजी सर्व्वश्वेतः प्रशस्यते। तदभावे यथा प्रोक्तास्तथा श्रेष्ठाः क्रमेण च॥ श्वेतः प्रालेयसङ्काशो रक्तः कुङ्कुमसन्निभः। हरिद्रासदृशः पीतः सारङ्गः कर्व्वुरः स्मृतः॥ पिङ्गः कपिलकाकारो नीलो दूर्व्वायसन्निभः। कृष्णो जम्बूफलाकारः शास्त्रज्ञैः समुदाहृतः॥ पीताभः श्वेतपादो यस्तथा स्यादतिलोचनः। चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः॥ सर्व्वश्वेतो हयो यस्तु भवेन्नीलकर्णकः। स वाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्त्तितः॥ सुवि चन्द्रकसम्वीतो जम्बूफलसमाकृतिः। श्वेतपादः स विज्ञेयो मन्त्रिगाह्यः स पूजितः॥" नकुल. ३अ.। "सार्द्धं यववयं प्रोक्तमङ्गुलस्य तपोधनैः। प्रमाणं शालिहोत्रेयैर्व्वाजिशास्त्रविशारदैः॥ हस्तीऽङ्गुलानां विंशत्या चतुरुत्तरया स्मृतः। चतुर्हस्तस्तु विख्यातः शास्त्रोक्तैरुत्तमो हयः॥ अर्द्धहस्तेन हीनस्तु भवेन्मध्यस्तुरङ्गमः। मुष्टिशून्येन हस्तेन हीनश्चाप्यधमः स्मृतः॥ ऊर्द्धमानप्रमाणन्तु परिणाहं विनिर्द्दिशेत्। उत्तमाणां च मध्यानां हीनानाञ्चैव वाजिनाम्॥ अर्द्धसप्तमहस्तन्तु श्रेष्ठं दैर्घ्येण निर्द्दिशेत्। षड्भिर्मुष्टिविहीनैश्च मध्यमञ्च विचक्षणः॥ पञ्चहस्तप्रमाणस्तु जघन्यः समुदाहृतः। द्वात्रिंशदङ्गुलं वक्त्रमुत्तमायस्य कीर्त्तितम्॥ पृष्ठं वक्षः कटिश्चैव सुखतुल्यं समादिशेत्। अङ्गुलद्वयहीनन्तु सुखादि मध्यमाधमम्॥ निर्द्दिशेन्मतिमांश्चैव वाजिशास्त्रविशारदः। सप्ताङ्गुलखुरश्चैव उत्तमाश्वस्य कीर्त्तितं॥ षड़ङ्गुली भवेन्मध्यो जघन्यश्चतुरङ्गुलः। षोड़शाङ्गुलदीर्घा तु जङ्घा चैवोत्तमा स्मृता॥ चतुर्द्दशः तथा मध्ये हीने च द्वादशाङ्गुलः। एवंविधप्रमाणन्तु निर्द्दिष्टं शास्त्रशालिभिः॥ अपाङ्गात्पुच्छमूलन्तु दैर्घ्येणाश्वं प्रमाणयेत्। खुरान्तात्कुकुदं यावद्दैर्घ्यमानेन बुद्धिमान्॥" इति परिमाणादि। जयद. ३अ.। "अश्वानां जन्मदेशांस्तु प्रवक्ष्याम्यनुपूर्व्वशः। उत्तमानाञ्च मध्यानां हीनानां यत्र सम्भवः॥ उत्तमास्ताजिकाः प्रोक्तास्तथा पारसिकाश्च ये। कैकाणाश्चैव ये वाहाः पृष्ठजा ये च कीर्त्तिताः॥ तुरो जाताश्च कीराश्च भूरुष्टामाण्डजाश्च ये। पार्व्वताः सैन्धवा मध्यास्तथा सारस्वता हयाः॥ सम्भलाश्चाकुलाश्चैव जटदेशोद्भवाश्च ये। अधमाष्टङ्गणैः सार्द्धं हये प्राग्दक्षिणोद्भवाः॥ वृत्तदीर्घान्वितग्रीवा ह्रस्वकर्णा महाजवाः। महाकाया महीरस्का निश्वासास्ताजिका मताः॥ अत्यन्तविनतं येषां निर्मांसञ्च मुखं भवेत्। पीनेन कटिदेशेन सुखराश्च भवन्ति ते॥ अध्वन्याश्च महासाराः संग्रामे चैव पूजिताः। अपि शस्त्रहताङ्गाश्च नैव मुञ्चन्ति सादिनम्॥ पारसीकाः ताजिकाभाः कैकाणाः केचिदुन्नताः। स्थूलाः श्लक्ष्णशरीराश्च प्रधाना दीर्घपृष्ठकाः॥ कैकणदेशजातानां मध्यमानाञ्च वाजिनाम्। ताजिकैः सदृशं वक्त्रं बाहुल्येन विनिर्द्दिशेत्॥ सुवृत्तदीर्घग्रीवाश्च सप्रमाणेन मध्यमः। तुरुजातः समुद्दिष्टः किञ्चित्स्थूली मनाग्जवः॥ अतिस्थूलोऽतितीक्ष्णश्च ह्रस्वग्रीवस्तुरुस्तथा। तुरुष्कः कीर्त्तितो वाजी स्थूलवक्त्रसुखश्च यः॥ कैकाणाकारदेहस्तु भवेन्माण्डविकः हयः। शास्त्र्या चैव प्रमाणेन केवलं नैव तत्र[illegible] सिन्धुदेशोद्भवो वाजी पृष्ठन्यश्चारुकीरकः। [illegible] चापि दीर्घश्च तस्य पृष्ठं प्रकीर्त्तितम्॥ [illegible] चैव जवेनापि रणशूरस्त्वजाघनः। सादिभक्ते

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

याति ताजिकादधिकस्तथा ॥ परिमण्डलदेहास्तु तीक्ष्णकर्णमुखा हयाः। पक्वदेशीङ्गवा दृष्टास्तथा सारस्वताश्च ये ॥ लम्बकर्णोऽजटश्चैव आकुलः परिकीर्त्तितः। साम्भलः श्लिष्टजानुश्च जटालश्चा कुलोपमः ॥ वर्त्तुलश्चापि रूक्षश्च टङ्कणः परिकीर्त्तितः। दाक्षिणात्यो भवेद्दुष्टो गौडधन्यः सर्व्ववाजिनाम् ॥ जवहीना महादुष्टाः पूर्व्वदेशसमुद्भवाः। वाजिवैद्येश्वराणाञ्च देशं विन्द्याद्विचक्षणः ॥" इति जन्मदेशः। "काकुदी कृष्णजिह्वश्च कृष्णश्मश्रुताल्वोष्ठकः। करालो हीनदन्तश्च श्वङ्गी चाधिकदन्तकः ॥ एकाण्डश्चैव जाताण्डः कच्चुकी चिसरी तथा। मार्जारपादो व्याघ्राभस्त्रिकर्णो हिखुरी स्तनी ॥ यमजो वामनश्चैव कुञ्जस्तित्तिरसन्निभः। (काकतित्तिरसन्निभः। इति वा पाठः)। वानराची विड़ालाची सुषली चेन्द्रवङ्कः ॥ येषां पृष्ठे हतो भर्त्ता जातदन्तस्तथैव च। एते दोषान्विता वाहा न ग्राह्या मतिमिच्छता ॥ धनप्राणहरा ह्येते बन्धुवियहकारकाः। एषां चिह्नं प्रवक्ष्यामि येन जानन्ति सादिनः ॥ पूर्व्वशास्त्रानुसारेण मुनीनां वचनं यथा। आवर्त्ता यस्य ककुदि काकुदी स उदाहृतः ॥ करालो चाधरे दन्तो जायते यस्य चोत्तरा। चतुर्भिः पञ्चभिश्चैव हीनदन्तः प्रकीर्त्तितः ॥ सप्तभिश्चाष्टभिर्दन्तैः ख्यातश्चाधिकदन्तकः। अङ्गुष्ठपर्व्वसङ्काशः छागशृङ्गोपमस्तथा ॥ जम्बूबदररूपश्च तथाचामलकोपमः। आस्थिसदृशश्चापि हरीतक्याः फलोपमः ॥ दग्धचर्म्मनिभश्चापि बालुसंस्थान एव च। कीलः कर्णान्तरे यस्य केशान्ते चापि दृश्यते ॥ धौरेयः सर्व्वपापानां श्वङ्गी वाहः स कीर्त्तितः। एवंविधेन श्वङ्गेन श्वङ्गी राष्ट्रेन वासयेत् ॥ एकेन लम्बमानेन मुष्केणैकाण्डसंज्ञकः। अत्यन्तरोमशाभ्यान्तु ताभ्यां जाताण्ड उच्यते ॥ स्तब्धे वक्षसि बाह्वीश्च अंसदेशे तथैव च। अन्यवर्णो भवेद्वाजी कच्चुकी स प्रकीर्त्तितः ॥ यस्यान्यवर्णरेखा स्यात् पार्श्वे कूर्चे च वाजिनः। मार्जारपादः प्रीतोऽसौ न धन्यः कुलनाशनः ॥ अन्यवर्णस्य वाहस्य शिरः कृष्णं यदा भवेत्। तिसरी नाम स प्रीतो भर्त्तुः कुलविनाशनः ॥" इत्यादि। सुखरीगोऽचिरोगश्च लिङ्गितः। कर्णरोगश्च कासश्च श्वासो हिक्का व्रणस्था ॥ ज. द. ३अ.।

अश्वकः। पुं। कुलिङ्गपक्षिणि। वै. निघ.।

अश्वकन्दकः। पुं। अश्वगन्धायाम्। रत्ना.।

अश्वकन्दिका। स्त्री। वनस्पतिविशेषे। अश्वगन्धायाम्। र. मा.।

अश्वकर्णः (कः) (र्णिका)। पुं, स्त्री। Shorea robusta.) शालवृक्षे। शाल गाछ। सु. सू. ३८अ.। च. सू. ४अ.। सर्जरसभेदे। सर्जशाल—विशेष। रा. नि. व. २३। शा॰ इति च लोके। तत्पर्य्यायः,—जरणद्रुमः तार्क्ष्यप्रसवः शस्यसम्वरणः धन्यः दीर्घपर्णः कुशिकः कौशिकः। भा. म. ४भ. रेवतीचि.। धवाश्वकर्णककुभः। गुणाः—कटुः तिक्तः स्निग्धः रक्तपित्तघ्नः ऊरीविस्फोटकण्डूघ्नः। रा. नि. व. ९। कषायः व्रणस्वेदकफक्लमिघ्नः व्रध्नविद्रधिवाधिर्य्ययोनिकर्णरोगघ्नश्च। भा. पू. १भ. वटादिव.। मांचा २ मा४। पलाशभेदे। सु. सू. ३६अ.। शरीरे। लताशाले। शिरीषड़ि लता। प. मु.।

अश्वकर्णम्। क्ली। काण्डभग्ननामास्थिभङ्गविशेषे। यत्रास्थि अश्वकर्णवदुन्नतं तिष्ठति। सु. नि. १५अ.। See भग्नम्।

अश्वकातरा (रिका) } स्त्री। हयकातरा-
अश्वकाथरिका } याम्। घोड़ा काथरा। मं घोड़ेकाथर। गुणाः—तिक्ता वातघ्नी दीपनी। काथरा हयपर्य्यायैः काथरा वै प्रकीर्त्तिता। रा. नि.।

अश्वखरजः। पुं। अश्वतरे। खच्चोर। रा. नि.।

अश्वखुरः। पुं। नखीनामगन्धद्रव्ये। नखी। रत्ना.। घोटकखुरे। रा. नि.।

अश्वखुरा (री)। स्त्री। श्वेतापराजितायाम्। रा. नि. व. ३।

अश्वगन्धा (न्धिका)। स्त्री। (Withania somnifera or physalis flexuosa.) स्वनामख्यातक्षुपविशेषे। अश्वगन्धा। हिं असगन्ध, वाराहीगेठी। मं आसंध, आसांदु, अंगुर, आसंधिका। रा. नि. व. ४। तत्पर्य्यायः,—अश्वकन्दिका काम्बूका अश्वावरोहकः (र, अश्वारोहा (हे), हयगन्धा वाजिगन्धा अश्वगन्धिका वल्या तुरगगन्धा कम्बुका अश्वावरोहिका तुरगी बलजा वाजिनी अवरोहिका वराहकर्णी हया पुष्टिदा बलदा पुष्टिः पीवरा पलाशपर्णी वातघ्नी श्यामला कामरूपिणी काला प्रियकरी गन्धपत्री हरप्रिया

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाराहपत्री वाराहकर्णी। गुणाः—सा शुक्रवृद्धिकरत्वात् शुक्रला। तथा कटूष्णा तिक्ता बल्या वातहरी कासश्वासक्षयव्रणघ्नी च। रा. नि. व. ४। रसायनी वातश्लेष्मश्चित्रशीघ्रघ्नी च। भा. म. ख. १भ.। अश्वगन्धानिलश्लेष्मशीफश्चित्रक्षयापहा। बल्या रसायनी तिक्ता कषायोष्णातिशुक्रला॥ रा. व. १। वातकफघ्नी श्वित्रशीघ्रक्षयरोगघ्नी बल्या रसायना तिक्ता कषाया उष्णा अतिशुक्रला च। भा. पू. १भ.। सावा २ ती.। तत्शीधनं यथा प्रयोगा.—पक्वपल्लवतोयेन गात्रानं क्षालनं तथा। शीधणक्षापि संस्कारो विशेषश्च वक्ष्यते॥

अश्वगन्धाघृतम्। क्ली। प्रथमं बालरोगाधिकारे। पाठः—"पादकल्केऽश्वगन्धाया क्षीरे दशगुणे पचेत्। "घृतं ४श. अश्वगन्धाकल्कः १श. दुग्धं ४श. जलं १६ श.। सा कौ.। मतान्तरे दुग्धं ४० श.। भैष.। द्वितीयं वातव्याधौ—"अश्वगन्धाकषाये च कल्के क्षीरे चतुर्गुणे। घृतं पक्वन्तु वातघ्नं।" अश्वगन्धा ६।० श. वारि ६४ श. शेषः १६ श. घृतं ४ श. दुग्धं १६ श. यथाविधि पाचयम्। च. द. वा. व्या. चि.। मतान्तरे घृतं ४श. आर्द्राश्वगन्धामूलं ६४ प. जलं ६४श. शेषः १६श. दुग्धं १६श. अश्वगन्धाकल्कः ८ प.। प्रयोगा. वा. व्या. चि.। तृतीयचतुर्थे बृहदभिधाने वातव्याधौ क्षये च उक्तौ। पाठौ—"अश्वगन्धापलशतं जलद्रोणे विपाचयेत्। अष्टांशशेषं गृह्णीयात् सुपूतं तं रसं तथा। जलद्रोणद्वये छागमांसात्पलशतद्वयं। पक्वैकाहेन कर्त्तव्यः क्वाथः पाकावशेषितः। क्वाथद्वये तथा गव्यक्षीरप्रस्थचतुष्टये। काकोल्यौ मधुकं मेदे जीवन्ती जीवकं बला। एला शतावरी द्राक्षा विदारी क्षीरजीरकं। मुद्गपर्णी शूकशिम्बी पिप्पल्यृषभकं तथा। एतेषां कार्षिकैर्भागैः घृतप्रस्थं विपाचयेत्। सिता चतुष्पलं क्षीरे क्षिपेन्मधु पलाष्टकम्॥" प्रयोगा.। "अश्वगन्धापलशतं शुभदेशसमुद्भवं। पुष्येऽहनि समुद्धृत्य साधयेत् श्लक्ष्णकुट्टितम्। द्रोणेऽम्भसि शनैस्तावत् यावत्पादावशेषितं। सर्पिःप्रस्थं पचेत्तेन गव्यं क्षीरं चतुर्गुणम्। कषायं छागमांसस्य दद्याच्छतद्वयस्य च। कल्कानि श्लक्ष्णपिष्टानि कर्षमात्राणि दापयेत्। काकोलीयुग्ममृद्वीके द्वे द्वे मेदे द्व च जीरके। स्वयंगुप्ता ऋषभकौ एला मधुकमेव च। मृद्वीकाशूर्पपर्ण्यौ च जीवन्ती चपला बला। नारायणी विदारी च दत्त्वा सम्यग्विपाचयेत्। सिताक्षौद्रं क्षिपेत्तत्र तैलं गृह्णीयात् कुडवं पृथक्। लिह्यात्प्राणितलम्.....॥ अत्र छागमांसशतद्वये जलद्रोणद्वयं, तुलाद्वये जलद्रोण इति वचनात्। घृतं ४ श. अश्वगन्धा १२॥० श. जलं ६४ श. शेषः १६ श. छागमांसं २५ श. जलं १२८ श. शेषः ३२ श. गव्यदुग्धं १६ श.। कल्कार्थं काकोल्यादिकस्य मिलितस्य शरावः। शूर्पपर्ण्यौ मुद्गपर्णी माषपर्णी च। पाकसिद्धौ क्षीरे च शर्करा॥० श. मधुनश्च शरावौ देयः। रस. र.। भैष.।

अश्वगन्धातैलम्। क्ली। प्रथमं वातव्याधौ हितम्। तिलतैलं ४श. क्वाथार्थमश्वगन्धा १२॥० श. वारि ६४श. शेषः १६श. दुग्धं १६श. मृणालादिकल्कद्रव्याणां मिलित्वा १श. यथाविधि पाचयम्। च. द. प्रयोगा.। मिश्रभावेनेदं कार्य्याधिकारे उक्तम्। द्वितीय रसायणाधिकारे—अत्र कल्कार्थाश्वगन्धादीनां मिलितशरावमितं, दुग्धं १६ श. तिलतैलं ४ श.। "अश्वगन्धावरीकुष्ठमांसीसिंहीफलान्वितं। चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत्॥ च. द.।

अश्वगन्धाद्यचूर्णम्। क्ली। स्वरभङ्गनाशनमिदं। यथा—"अश्वगन्धाजमोदा च पाठा चित्रकटुकं त्रिकं। शतपुष्पं ब्रह्मबीजं सैन्धवञ्च समं समम्। एतदर्द्धं वचा चैव चूर्णितं मधुसर्पिषा। भक्षयेत्कर्षमात्रन्तु जीर्णोपरि क्षीरभोजनम्॥" अत्र ब्रह्मबीजं पलाशबीजं सर्व्वचूर्णार्द्धं ग्राह्यम्। रस. र.।

अश्वगन्धिका। स्त्री। अश्वगन्धा। रा.।

अश्वगोष्ठम्। क्ली। वाजिशालायाम्। आस्तावल।

अश्वघ्नः। पुं। श्वेतकरवीरवृक्षे। श्वेतकरवी गाछ। रा. नि. व. १०।

अश्वजीवनः। पुं। चणके। छोला। हिं चना। वै. निघ.।

अश्वतरः। पुं। अश्वखरजे। स च अश्वायां गर्द्दभाज्जातः। खच्चर घोड़ा। तन्मांसं बल्यं बृंहणं कफपित्तकरञ्च। भद. व. १२।

अश्वत्थः। पुं। (Ficus religiosa, Syn, Urustigmareligiosum.) खनामख्यातवृक्षे। आशोथ गाछ। हिं पिपर। मं पिंपल। रा. चेट्ट। तें कुलुजुव्विचेट्टु। प. मु.। सु. सू. ३८ त्र्यूषणादिव.। तत्पर्य्यायः,—कैशवालयः चैत्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(वि), बोधितरुः कृष्णावासः (हे), चैत्यवृक्षः (र), नागबन्धुः, देवात्मा महाद्रुमः (श), कपीतनः (मे), बोधिद्रुमः चलदलः पिप्पलः कुञ्जराशनः (अ), अच्युतावासः चलपत्रः पवित्रकः शुभदः बोधिवृक्षः याज्ञिकः गजभक्षकः शौमान् क्षीरद्रुमः विप्रः मङ्गल्यः श्यामलः गुह्यपुष्पः सेव्यः सत्यः शुचिद्रुमः धनुर्वृक्षः। गुणाः—मधुरः कषायः शीतलः कफपित्तघ्नः रक्तदाहशमनः योनिदोषघ्नः अश्वत्थवृक्षस्य फलानि पक्वान्यतीव हृद्यानि च शीतलानि। कुर्वन्ति पित्तास्रविषार्त्तिदाहं विच्छर्दिशीषारुचिदोषनाशम्॥ रा. नि व. ११। दुर्जरः शीतः। मद. व. ५। पित्तश्लेष्मव्रणास्रजित् गुरुः तुवरकः योनिशोधनः वर्ण्यश्च। भा. पू. १भ वटादिव.।

अश्वत्थकम्। क्ली। मल्लिकापुष्पदले। मल्लिकाफूलेर पापड़ी। वै. निघ.।

अश्वत्थफलका (ला)। स्त्री। हवुषायां। हबूष वृक्ष। हिं हौहवेर। मं लघुशिरणी। भा पू. १भ.।

अश्वत्थभित् (भेदः)। पुं। नन्दीवृक्षे। हिं वालियापीपर। भा. पू. १भ. वटादिव.।

अश्वत्थसन्निभा। स्त्री। अश्वत्थिकायाम्। गया अश्वत्थ। रा. नि. व. ११।

अश्वत्था (त्थी)। स्त्री। क्षुद्राश्वत्थवृक्षे। गया अश्वत्थ। रा. नि व. १। श्रीवल्लीवृक्षे। रा. नि. व. ८।

अश्वत्थिका (त्थी)। स्त्री। क्षुद्रपत्राश्वत्थवृक्षे। गया अश्वत्थ। हिं पिप्ली। मं अश्वथी। कं हिनरखि। तत्पर्य्यायः,—लघुपत्री पवित्रा ह्रस्वपत्रिका पिप्पलीका वनस्था। गुणाः—मधुरा कषाया रक्तपित्तघ्नी विषघ्नी दाहघ्नी गर्भिण्यां हिता च। रा. नि. व. ११।

अश्वदंष्ट्रकः। पुं। गोचुरवृक्षे। व. निघ। हिंस्रजन्तुविशेषे। सु.।

अश्वदंष्ट्रा। स्त्री। गोचुरके। भा. पू. १भ.।

अश्वनाला। स्त्री। ब्रह्मसर्पनामक-सर्पविशेषे। वि।

अश्वनाशः (कः) (नः)। पुं। श्वेतकरवीरे। रा. नि. व. १०।

अश्वपर्णिका (र्णी)। स्त्री। भूतकेशीलता-

अश्वपालः। पुं। अश्वरक्षके। सहिस इति भाषा।

अश्वपुच्छकः। पुं। खड्गलतायाम्। ग्र. च.। तरवांलेर खाप।

अश्वपुच्छा। स्त्री। पृश्निपर्ण्यां। चाकुलिया। माषपर्ण्याम्। रा. नि. व.।

अश्वपुच्छिका (च्छी)। स्त्री। माषपर्णीलतायाम्। मांषाणी। रा. नि. व. ४।

अश्वपुटभावना। स्त्री। द्वाविंशत्यलपरिमितद्रव्यस्य भावनायाम्। वै. निघ।

अश्वपुत्री। स्त्री। सप्तकीवृक्षे। रत्ना.। द्रवन्त्यां। इन्दुरकाणी। वै. निघ.।

अश्वबला। स्त्री। मेथिकायाम्। नारीशाके। नारीशाक। गुणाः—शाकमाश्वबलं रूक्षं बद्धविण्मूत्रमारुतम्। सु। See नारी।

अश्वबालः। पुं। काशतृणे। त्रिका.।

अश्वभा। स्त्री। सौदामन्याम्। विद्युत्।

अश्वमारकः। पुं। श्वेतकरवीरे। श्वेत करवी। उपोदिकायां। पूँई। पालङ्कशाके। सु. चि. १अ.। करवीरे। सु सू. ३८। लाक्षादिव.। भा पू १भ। श्वेतकरवीरमूले। इदञ्च स्थावरविषान्तर्गतमूलविषम्। एवं सुगन्धरोहिषमपि। सु. कल्प. २अ.। See मूलविषम्।

अश्वमाराख्यः। पुं। (Nerium odorum.) श्वेतकरवीरवृक्षे। श्वेतकरवी गाछ ... नि. व. १०।

अश्वमालः। पुं। सर्पविशेषे। वै. निघ.।

अश्वमूत्रम्। क्ली। घोटकमूत्रे। घोड़ार मूत। गुणाः—तिक्तोष्णं तीक्ष्णं विषघ्नं वातकोपशमनं पित्तकरं दीपनञ्च। रा. नि. व. १५। भेदि कफदद्रुकृमिघ्नञ्च। मद. व. ८।

अश्वमूत्रिका (त्री)। स्त्री। शल्लकीवृक्षे। जटा।

अश्वमोहकः। पुं। श्वेतकरवीरे। ...व.।

अश्वयानम्। क्ली। अश्वेन भ... घोड़ाय चड़ा। गुणाः—घोटकारोहणं वातपित्तास्रिश्रमक्लान्मतं। मेदोवर्णकफघ्नञ्च हितं तद्वलिनां वरम्॥ हिंसायां।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्वयुजः । पुं । आश्विनमासि । सु. सू. ६अ. ।

अश्वरक्षकः । पुं । अश्वपाले । घोड़ार सहिस ।

अश्वरिपुः । पुं । करवीरवृक्षे । महिषे । भा. ।

अश्वरोधकः । पुं । श्वेतकरवीर-वृक्षे । श्वेत-करवी गाछ । रा. नि. व. १० ।

अश्वरोहका (हा) । स्त्री । अश्वगन्धायां ।

अश्वलम् । क्ली । क्षुद्रतृणविशेषे । घोड़ेसर । "अश्वलञ्च तृणं बल्यं रूच्यं पशुहितावहम् ।" वै. निघ. ।

अश्वलोमा । पुं । सर्पविशेषे । चिका. ।

अश्ववराहः । पुं । वाराहीकन्दे । वै. निघ. ।

अश्ववर्चः (स्) । क्ली । अश्वविष्ठायाम् । घोड़ार नाद ।

अश्ववहः (वाहः) । पुं । अश्ववाहके । जटा. ।

अश्ववारणः । पुं । गवये । हे. च. । [हीवादौ ।

अश्ववैद्यः । पुं । अश्वशास्त्र-प्रणेतरि शालि-

अश्ववैद्यकम् । क्ली । अश्वचिकित्साशास्त्रे । तच्च बहुविधं शालिहोत्रनकुलभोजजयदत्तादिप्रणीतम् ।

अश्वशाला । स्त्री । मन्दुरायाम् । हला. ।

अश्वहनः । पुं । करवीरवृक्षे । रत्ना. । भैष. भग्न. चि. निशाद्यतैले ।

अश्वहा । पुं । श्वेतकरवीरवृक्षे । मद. व. १ ।

अश्वक्षुरा (रिका) (री) । स्त्री । श्वेतापराजितायाम् । कृष्णापराजितायाम् । वै. निघ. । नखीनामगन्धद्रव्यविशेषे ।

अश्वा । स्त्री । अजमोदायां । अश्वगन्धायां । अपामार्गे । इन्द्रवारुण्यां । राखालशशा । घोटक्यां ।

अश्वातक्रम् । क्ली । घोटकीतक्रे । घोड़ार दुधेर घोल । गुणः—अश्वातक्रन्तु तुवरं किञ्चिद्वातकरं मतं । अग्निदीप्तिकरं रूच्यं नेत्र्यं मूर्च्छाकफापहरं ॥ भै. निघ. ।

अ क्ली । श्वेतकरवीरे । रा नि.व. १० ।

अश्वारिः । करवीरवृक्षे । भैष. कुष्ठ-चि. । मरिचा षे । जटा. ।

अश्वारोहः (कः) । पुं । अश्वगन्धायां । रत्ना. ।

अश्वारोहा । स्त्री । इन्द्रवारुण्यां । राखालशशा । अश्वगन्धायां । मे. ।

अश्वालः । पुं । उशीरे । क्षुद्रकाशतृणे । रा. नि. व. ८ ।

अश्वावरोहकः (हिका) । पुं, स्त्री । अश्वगन्धायां । र. मा. ।

अश्वासना । स्त्री । झण्टी । घोटक्याम् । वै. निघ. ।

अश्वाह्वा । स्त्री । अश्वगन्धायाम् । व. निघ. वा. व्या. शतावरीतैले, नारायणतैले ।

अश्वाह्वादिखुरा (री) । स्त्री । श्वेतापराजितायाम् । रा. नि. व. ३ ।

अश्वाह्वः । पुं । देवसर्षपवृक्षे । अम. । वृक्षभेदे । रा. नि. ।

अश्विजौ । पुं । अश्विनीकुमारौ ।

अश्विनी । स्त्री । जटामांस्याम् । वै. निघ. ।

अश्विनौ । पुं । अश्विनीकुमारद्वये । रत्ना. ।

अश्विभेषजम् । क्ली । लघुभेषग्द्वयां । मेढ़ाशिङे । वै. निघ. ।

अश्वोघृतम् । क्ली । घोटकीक्षीरीत्यनवनीतजघृते । गुणः— कटु मधुरं कषायम् ईषद्दीपनं गुरु मूर्च्छाहरं वातालक्ष्यकरञ्च । रा. नि. व. १५ ।

अश्वोदधि । क्ली । घोटकीदुग्धजातदधि । घोड़ीर दई । मं घोड़िचेदहि । कं कुदिरेयसो सरु । गुणः—"मधुरकषायरूच्यं कफरोगमूर्च्छाहरं ईषद्वातलं दीपनं नेत्रदोषघ्नञ्च ।" रा. नि. व. १५ ।

अश्वोनवनीतम् । क्ली । घोटकीदुग्धजातनवनीते । घोड़ार दुधेर ननी । गुणः—कषायं वात-कफघ्नं चक्षुष्यं कटु उष्णं ईषद्वातलञ्च । रा. नि. व. १५ ।

अश्वोयम् । क्ली । अश्वसमूहे । वि । अश्वहिते । मे. यत्रिकं ।

अश्वोक्षीरम् । क्ली । घोटकीदुग्धे । गुणः— उष्णं रूच्यं बल्यं वात-कफघ्नं—एकशफक्षीरमावं लवणाम्लं लघु स्वादु च । मद. व. ८ ।

अश्वेता । स्त्री । कृष्णापराजितायाम् । कृष्णातिविषायाम् । वै. निघ. । गाम्भारीवृक्षे । रा. नि. ।

अष्टकटुरतैलम् । क्ली । तैलमिदं वातरक्तेऽरुस्तम्भे च हितम् । तैलं ४ श. दधि ४श. तक्रं ३२ श. पिप्पलीशुण्ठीः प्रत्येकं पलद्वयं (मसाल-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिलितपलद्वयम्)। यथाविधि पाच्यम्। च. द. ऊ. स. चि.। अस्नेहदधि अष्टतक्रं ग्राह्यम्। रस. र.।

अष्टकर्म्म। क्ली। अष्टादश रसकर्म्मणां मध्ये स्वेदनादि-दीपनपर्य्यन्ते मृतस्याष्टविधसंस्करणे। स्वेदनं मर्द्दनञ्चैव मूर्च्छनोत्थापनन्तथा। पातनं बोधनञ्चैव नियामनमतःपरम्। दीपनञ्चेति संस्काराः मृतस्याष्टौ प्रकीर्त्तिताः॥ र. सा. सं.। चिकटु-विफला चित्रककन्यायुक्ते काञ्जिके चतुर्गुणवस्त्रेण दिनं स्वेदनम्। गृहधूमेष्टकाजाजीदग्धोर्णागुड़-सैन्धवैः षोड़शांशैः सकाञ्जिकैः त्रिदिनं मर्द्दयेत्। त्रिफला चित्रककन्या वा मूर्च्छना। इत्यादि।

अष्टका। स्त्री। वृक्षभेदे। हे. च.।

अष्टगाधः। पुं। ऊर्णनाभे। माकड़शा। शरभे।

अष्टगुणमण्डः। पुं। भृष्टमुद्गतण्डुलान् चतुर्दशगुणे तोये पक्त्वा, तत्र हिङ्गुसैन्धवधान्यशुण्ठी-मरिचपिप्पलीचूर्णानि संमिश्र्य असिक्थके गृहीत्वा मण्डे। गुणाः—क्षुधावर्द्धनः बलकरः वस्ति-शोधनश्च। वै. निघ.। अत्र तण्डुलस्याष्टभागाः मुद्गस्य च चत्वारः।

अष्टधातुः। पुं। स्वर्णरौप्यताम्रशीषपित्तलरङ्ग-कान्तलौहमुण्डलौहतीक्ष्णलौहेषु। र. सा. सं. टी.।

अष्टपदी। स्त्री। वेल इति ख्याते पुष्पक्षुपे। वेलफूलेर गाछ। गुणाः—शीता लघु कफपित्त-विषघ्नी च। मद. व. ३।

अष्टपलम्। क्ली। शरावमाने। एक सेर। भा.।

अष्टपलघृतम्। क्ली। ग्रहणीरोगे। पाकविधिः—मरिचादि १ प. गुड़ १ प. घृतं ८ प. वारि ३२ प. एकत्र पाच्यम्। च. द.।

अष्टपात् (दः)। पुं। काश्मीरदेशीयशरभे। मद. व. १२। ऊर्णनाभे। हे. च. ४का.।

अष्टपादपः। पुं। वृक्षभेदे। वै. निघ.।

अष्टपादिका। स्त्री। शारदमल्लिकायाम्। काठेमल्लिका। रत्ना.। आस्फोतायां। शंपर-गाछी। प. मु. व. ११।

अष्टभावः। पुं। स्तब्ध-स्वेद-रोमाञ्च-स्वरभङ्ग-वैस्वर्य्य-कम्प-वैवर्ण्याश्रुपातेषु। वै. निघ.।

अष्टमङ्गलः। पुं। पुच्छीरःखरकेशास्यैः शुक्ले वाजिनि। हे. च.। यस्य पादाः सिताः सर्व्वे पुच्छं वक्त्रं मुखं तथा। मूर्द्धनाञ्च सिता यस्य तं विद्या-दष्टमङ्गलम्॥ ज. द. ३अ.। क्ली। ब्राह्मणगवाग्नि स्वर्णघृतसूर्य्याम्बुनृपचारुचर्य्यासु। वै. निघ.।

अष्टमङ्गलघृतम्। क्ली। बालरोगशमने सर्पिषि। तत्राष्टौषधिपक्वं बालानां हितम्। वचाकुष्ठ-ब्राह्मीसर्षपशारिवासैन्धवपिप्पलीकल्केनाष्टमं घृतं घृतपाकविधिना पाच्यम्। घृतं ४ प्र. कल्कद्रव्य-वचादीनां मिलितशरावं दत्त्वा जलाढकेन पाच्यं। च. द. बाल. चि.। भा. रस. र.।

अष्टमधुजातिः। स्त्री। माक्षिक-भ्रामर-क्षौद्र-पौत्तिक-छात्रकार्घ्यौद्दालदालेषु। वै. निघ.।

अष्टमानम्। क्ली। प्रसृतिद्वये, ३२ तो.। अर्द्ध सेर। प. प्र. १ख.।

अष्टमिका। स्त्री। तोलचतुष्टयपरिमाणे। प.।

अष्टमी। स्त्री। क्षीरकाकोल्याम्। वै. निघ.।

अष्टमूत्रम्। क्ली। गोच्छागमेषमहिषाश्वहस्त्युष्ट्र-गर्द्दभीमूत्रेषु। वै. निघ.।

अष्टमूलम्। वि। त्वङ्मांसशिरास्नायुस्थिसन्धि-कोष्ठामर्म्ममूलेषु। सु. चि. १अ.।

अष्टमौक्तिकस्थानम्। क्ली। शङ्खहस्तिसर्प-मत्स्यमेघवंशशूकरशुक्तिषु। वै निघ.।

अष्टलौहकम्। क्ली। स्वर्णरौप्यताम्ररङ्गशीष-पित्तलकान्तलौहमुण्डलौहतीक्ष्णलौहेषु। पञ्चलौह-समायुक्तं कान्तमुण्डकतीक्ष्णकम्। कल्पितः कथितो धीरैरष्टलौहाभिधो गणः॥ रा. नि. व. २२।

अष्टवर्गः। पुं। A class of eight principal medicaments, Rishabhaka &c. मेदाद्यष्टौषधिगणे। यथा—मेदामहामेदाजीवकर्षभ-कऋद्धिवृद्धिकाकोलीक्षीरकाकोलीषु। प. मु.। जीवकर्षभकौ मेदे काकोल्यावृद्धिवृद्धिकौ। एकत्र मिलितैरेतैरष्टवर्गः प्रकीर्त्तितः॥ रा. नि. व. २२। गुणाः—"शीतलोऽतिशुक्रलः बृंहणः दाहपित्तरक्त-श्लेष्मघ्नः स्तन्यकृत् गर्भदायकः।" मद. व. १। "रक्तपित्तव्रणवायुपित्तनाशकश्च।" राज.। "हिमः स्वादुः बृंहणः गुरुः भग्नसन्धानकृत् कामबलासबल-वर्द्धनः क्षतादाहज्वरमेहक्षयहरश्च।" भा. पू. १भ.।

अष्टवर्गप्रतिनिधिः। पुं। मेदादीनामभावे तत्तुल्यगुणद्रव्यग्रहणे। तत्र मेदामहामेदाभावे शतावरी, जीवकर्षभकस्थाने भूमिकुष्माण्डमूलं, काकोलीक्षीरकाकोल्यभावे अश्वगन्धामूलं, ऋद्धि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हद्विस्थाने वाराहीकन्दं तत्तुल्यगुणं क्षिपेत्। भा. पू. १ भ.। "मेदाभावे अश्वगन्धा महामेदे च शारिवा। जीवकर्षभकाभावे गुडूची वंशलोचना। ऋद्ध्यभावे बला देया वृद्ध्यभावे महाबला।" इति च मतान्तरम्।

अष्टविधान्नम्। क्ली। चर्व्यचोष्यलेह्यपेयखाद्य-भोज्यभक्ष्यनिष्पेयरूपे भोजनद्रव्ये।

अष्टाङ्गम्। क्ली। आयुर्व्वेदस्य स्थानाष्टके। तद्यथा—शल्यं, शालाक्यं, कायचिकित्सा, भूत-विद्या, कौमारभृत्यं, अगदतन्त्रं, रसायनं, वाजी-करणञ्चेति। कायबालग्रहोर्द्ध्वाङ्गशल्यदंष्ट्राजरा-वृषान्। अष्टावङ्गानि तस्याहुः। वा. सू. १ अ। द्रव्याभिधान-गदनिग्रय-शल्य-काय-भूतनिग्रह विष-निग्रह-रसायन-बालचिकित्सासु च। वैद्यकम्।

अष्टाङ्गघृतम्। क्ली। वाजीकरणमिदं घृतम्।

अष्टाङ्गधूपः। पुं। ज्वरघ्नोऽयं धूपः गुग्गुलु-निम्बपत्र-वचा-कुष्ठ-हरीतकी-यव-श्वेतसर्षप-घृतक्लृतः। पलङ्कषा निम्बपत्रं वचा कुष्ठं हरीतकी। सर्षपाः सयवाः सर्पिर्धूपनं ज्वरनाशनम्॥ च. द.।

अष्टाङ्गयोगः। पुं। योगविशेषे। तद्यथा—कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी। इति संग्रहः।

अष्टाङ्गरसः। पुं। अर्शोऽधिकारे। लोहकिट्टं मण्डूरं फलत्रयं त्रिफला। र. सा. सं.। गन्धं रसेन्द्रं घृतलौहकिट्टं फलत्रयं चूर्णगवङ्गभङ्गम्। कृत्वा समं शर्करिकागुडूचीरसेन यामत्रितयं विमर्द्यः॥ माता निष्क्रमिता। र.सा.सं.।

अष्टाङ्गलवणम्। क्ली। कफजन्यमदात्यये योगविशेषे। यथा—"सौवर्चलमजाजी च वृक्षाम्लं साम्लवेतसं। त्वगेलामरिचार्द्धांशं शर्कराभागयोजि-तम्। एतल्लवणमष्टाङ्गमग्निसन्दीपनं परं। मदात्यये कफप्राये दद्यात्शीतोदविशोधनम्॥" चर. मदात्यय-चि.। अजाजी जीरकं वृक्षाम्लं महार्द्रकम्। र.सा. सं.। सौवर्चलकृष्णजीरकाम्लवेतसाम्लवेतसानां प्र. चूर्णं समं त्वगेलामरिचानां प्रत्येकमर्द्धभागः। शर्करायाः भागैकं एकत्र मिश्रयेत्। च.द.मदात्यय-चि.।

अष्टाङ्गवैद्यकम्। क्ली। शालाक्यकायभूता-गदबालविषवाजीरसायनेषु अष्टाङ्गवैद्यकेषु।

अष्टाङ्गहृदयम्। क्ली। वाभट-विरचिते वैद्यक-ग्रन्थे। अष्टौ च तानि अङ्गानि तेषां प्रत्येकं हृदयं सारतरसंग्रहणात्। 'क्रियतेऽष्टाङ्गहृदयम्।' वा. सू. १अ.।

अष्टाङ्गावलेहः (हिका) पुं. स्त्री। सन्नि-पातज्वरहिक्काश्वासादौ हितः। कट्फलं कुष्ठं कर्कटशृङ्गी गुरुची पिप्पली मरिचं दुरालभा कृष्ण-जीरकं, एषां समभागचूर्णं आर्द्रकरसेन लिह्यं। भैष. ज्वर. चि.। लिह्यो न मधुना तस्य शीतापचारित्वात्। "सन्निपातेषु सर्व्वेषु न क्षौद्रमवचारयेत्। शीतोप-चारि क्षौद्रं स्याच्छीतत्वात् विरुध्यते॥" भा म. १ भ.। सा.कौ.। च.द.।

अष्टादशधान्यम्। क्ली। कलायगोधूमाढकी-यवयावनालशालिचणकमसूरातसीसुक्षतिलकुलत्थ-श्यामाकमाषराजमाषवर्त्तुलहरिकाकङ्गुतरणीषु। वै. निघ.।

अष्टादशमूलम्। क्ली। विल्वाग्निमन्थश्योणाक-गाम्भारीपाठापुनर्णवावाट्यालकमाषपर्णीजीवकैरण्ड-र्षभक-जीवन्ती-शतावरी-शरेक्षुदर्भकास-शालिधान्य-मूलेषु। वै. निघ.।

अष्टादशशतिकमहाप्रसारणीतैलम्। क्ली। वातव्याधौ हितं। समूलपत्रप्रसारणी ३७॥० श. शतावरी १२॥० श. अश्वगन्धा १२॥० श. केतकी १२॥० श. दशमूलं प्रत्येकं १२॥० श. वाट्यालकं १२॥० श. भिण्टी १२॥० श. एकत्र शतद्रोणे जले पक्त्वा द्रोणावशिष्टे क्वाथेऽवतार्य्यः। काञ्जिकस्य द्रोण-द्वयं। दधिदुग्धशुक्तिक्षुरसच्छागमांसरसानां प्रत्येकं ८ श. एकत्र कल्केन सह तैलद्रोणं ३२ श. पाच्यम्। कल्कद्रव्यं प्रत्येकं पलत्रयम्। श्रीवासो नवनीत-खोटी। कुन्दुरुः कुन्दुरुखोटी। च.द.वा.व्या.चि.।

अष्टादशाङ्गः। पुं। सन्निपातज्वरे कषाय-विशेषे। स चतुर्विधः—दशमूल्यादिः भूनिम्बादिः द्राक्षादिः मूलकादिश्चेति। तत्र प्रथमः—"दश-मूली शटी शृङ्गी पौष्करं सदुरालभा। भार्गी कुटज-बीजञ्च पटोलं कटुरोहिणी। अष्टादशाङ्ग इत्येषः सन्निपातज्वरापहः—॥ "द्वितीयो यथा—"भूनिम्ब-दारुदशमूलमहौषधाब्द-तिक्तेन्द्रबीज-धनिकेभकणा-कषायः। तन्द्राप्रलापकसनारुचिदाहमोहश्वासादि-रक्तमखिलं ज्वरमाशु हन्ति॥" तृतीयो यथा— "द्राक्षासृता शटी शृङ्गी मुस्तकं रक्तचन्दनं। नागरं कटुका पाठा भूनिम्बं सदुरालभम्। उशीरं पद्मकं धान्यं बालकं करटकारिका। पुष्करं पिचुमर्दश्च सद्यो जीर्णज्वरापहः॥" चतुर्थो यथा—"मुस्त-पर्पटकोशीरदेवदारुमहौषधं। त्रिफला धन्वयास

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नौली कम्पिल्लकं विडङ्गं। किराततिक्तकं पाठा बला कटुकरोहिणी। मधूकपिप्पलीमूलं सुस्ताद्यो गण उच्यते॥" च.द.। भैष.।

अष्टादशाङ्गलौहम्। क्ली। पाण्ड्वधिकारे लौहं। तस्य पाठः—"किराततिक्ता सुरदारु दार्वी सुस्ता गुडूची कटुका पटोलम्। दुरालभा पर्पटकं सनिम्बं कटुत्रिकं वह्नि फलत्रिकञ्च। फलं विड़ङ्गस्य समांशिकानि सर्व्वैः समं चूर्णमथायसञ्च। सर्पिर्मधुभ्यां वटिका विधेया तक्रानुपानाङ्गिषजा प्रयोज्या। निहन्ति पाण्डुञ्चे"त्यादि। भा.म.२भ.।

अष्टापदः। पुं। शरभे। मर्कटे। महासिंहे। धुस्तूरे। रा.नि.व. १९। क्ली। सुवर्णे। रा.नि.व. १३। स्त्री (दी)। चन्द्रमल्लिकायां।

अष्टावक्ररसः। पुं। रसायनाधिकारे रसः—पारदस्य १ भ. गन्धकस्य २ भ. स्वर्णस्य १ भ. रौप्यस्य ॥० भ, शीषकस्य ।० भ. रङ्गस्य ।० भ. ताम्रस्य ।० भ. खर्परस्य च।० भ. वटाङ्कुररसेन कुमारीरसेन च प्रहरं मर्द्दयित्वा रससिन्दूरवत् पाच्यं। माचा २ र. नागवल्लीरसेन सेव्यम्। भैष.।

अष्टिः (ष्टिः)। स्त्री। अष्ठ्यां। आँटी।

अष्टौषधिः। स्त्री। ब्रह्मसुवर्चलादित्यपर्णीनारीकाश्मगोधासर्पासोमपद्माजनीत्य इत्यष्टौ। च.चि. १अ.। इत्यासामष्टानामोषधीनां यां यामेवौषधिं लभेत तस्यास्तस्याः स्वरसस्य सौहित्यं गत्वा स्नेहभावितायामार्द्रपलाशद्रोण्यां सपिधानायां शयीत। तत्र प्रलीयते षण्मासेन पुनः पुनः सम्भवति। तस्याजं पयः प्रत्यवस्थापनम्। षण्मासेन देवतानुकारी भवति वयोवर्णस्वराकृतिबलप्रभाभिः। स्वयं चास्य सर्व्ववाचीगतानि प्रादुर्भवन्ति। दिव्यञ्चास्य चक्षुः श्रोत्रं भवति योजनसहस्रगति दशवर्षसहस्राण्यायुरनुपद्रवञ्च। च.चि.१अ.।

अष्ठिला अष्ठीला अष्ठीलिका स्त्री। वायुरोगविशेषे। उत्तरापथप्रसिद्धे वर्त्तुलाकारपाषाणखण्डे (जिज्वरः)। कर्म्मकारादिरलोहदाण्डि वा (गयदासः)। नाभेरधस्तदाकारग्रन्थिभूतरोगे। स च चली वाचली वा ऊर्द्ध विसृतोन्नतश्च। तेन च वातादिरोधो भवति। लक्षणम्—"नाभेरधस्तात्सञ्जातः सञ्चारी यदि वाचल। अष्ठीलावद्वनो ग्रन्थिरूर्द्धमायत उन्नतः। वाताष्ठीलां विजानीयाद्बहिर्मार्गानुरोधिनीम्॥" मा.नि.वा.व्या.।

अष्ठि(ष्ठी)वान्। पुं। शूकरीगर्भविशेषे। लक्षणं यथा—"कठिना विषमैरण्डैर्मारुतस्य प्रकोपतः। शूकैश्च विषसंयुक्तैः पिड़काष्ठीलिका भवेत्॥" सु. नि.१४अ.। जानुनि। रा.नि.व.१८।

असंक्लिन्नः। त्रि। न सम्यगार्द्रे। भा. पू.१भ.। "पिण्डीकृतमसंक्लिन्नम्।"

असनः। पुं। (Termenalia tomentosa Syn. Pentaptera tomentosa.)क्षागकर्णवत्पत्रशालवृक्षविशेषे। पीतशाल इति प्रसिद्धे। प. मु.। विजयसार इति प्रसिद्धे। भा.पू.१भ. वटादि व.। असन इति प्रसिद्धे। र.सा.रत्ना.। पिण्डशाल। हिं असना। मं असणा, वड़िलुरिया। तत्पर्य्यायः,—परमायुधः (श) महासर्ज्जः सौरिः वधूकपुष्पः प्रियकः बीजवृक्षः नीलकः प्रियसालकः अजकर्णः वनेसर्ज्जः। "असनोबीजकः कटाख्यः स्वनामख्यातः।" सु.सू ३८अ.। गुणाः—कटुरुष्णः तिक्तः वातघ्नः सारकः गलदोषघ्नश्च। रा.नि.व.९।२३। कुष्ठ-विसर्प-श्वित्र-प्रमेह-गुल्मकृमि-कफरक्तपित्तघ्नः त्वचः केश्यः रसायनश्च। भा.पू.१भ. वटादिव.। सि.यो.रा.य.चि.एलादिमन्थे. वृन्दः। "निम्बासनशालसारान्।" वा.सू.१५अ.असनादिव.। "असनतिनिशभूर्जः।" भा.म.४भ.योनिरोग-चि.। "स्वर्जिकोग्रासनं वाहम्।" जीवकद्रुमे। मे. नक्तिकं। वकवृक्षे। वीरतर्वादौ। क्ली। क्षेपणे मे. नक्तिकं।

असनपर्णिका (र्णी)। स्त्री। अपराजितायाम्। अपराजिता। मारोटीति अ.टी.भः।

असनपुष्पः (कः)। पुं। षष्टिकधान्यजातिभेदे। सु.सू.४६अ.।

असनादिगणः। पुं। असनतिनिशभूर्जश्वेतवाहप्रकीर्य्यखदिरकदरभण्डी-शिंशपामेषशृङ्गीचन्दनत्रयतालपलाशजीङ्गाशाकशालक्रमुकधवकुलिङ्गक्षागकर्णाश्वकर्णात्मकौ गणः। अस्य श्वित्रकुष्ठकफक्रिमिहरः पाण्डुप्रमेहमेदोघ्नश्च। वा.सू.१५अ.।

असरुः। पुं। भृकदर्भे। कुकुरशौंडा। श.च.।

असलम्। क्ली। लौहे। अस्त्रे। वै.निघ.।

असात्म्यः। त्रि। प्रकृत्यसुखावहे। क्ली। सात्म्यविपरीते।

असारम्। पुं, क्ली। काष्ठागुरुणि। रा. नि.व १२। अगुरुणि। जैपाल। ऐरण्डवृक्षे। श.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असारदधि । क्ली । गृहीतनवनीत-दधनि । गुणाः—असारदधि संग्राहि शीतलं वातलं लघु । विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् ॥ भा.पू. दधिव. ।

असारा । स्त्री । कदलीवृक्षे । वै.निघ. ।

असिकम् । क्ली । चिबुकोष्ठमध्यभागे । हे.च. ।

असिक्निका (क्नी) । स्त्री । अवद्वान्तःपुर-प्रेष्यायाम् । मे. नक्निकं । दास्याम् । जटा. ।

असिगण्डः । पुं । क्षुद्रोपाधाने । छोटे वालिस । जटा.

असितः । पुं । धववृक्षे । धाओया गाछ । र. मा. । रत्ना. । क्ली । काष्ठागुरुणि । वै.निघ. । त्रि । कृष्णवर्णे ।

असितजफलः । पुं । नारिकेलवृक्षे । वै.निघ ।

असिततिलः । पुं । कृष्णतिले । च.द. अर्शचि. ।

असितद्रुमः । पुं । कृष्णताले । वै. निघ. ।

असितपल्लवा । स्त्री । भूमिजम्ब्वाम् । नदी-जम्बूवृक्षे ।

असितफलः । पुं । मधुनारिकेले ।

असितवल्ली । स्त्री । नीलदूर्व्वायां । वै.निघ. ।

असितवेत्रम् । क्ली । श्यामालतायाम् । वा.र. अमृतादिकषाये । [तेँद गाछ । वै.निघं ।

असितसारः (कः) । पुं । तिन्दुकवृक्षे ।

असिता । स्त्री । ह्रस्वनीलीवृक्षे । रा.नि.व.४ । See अम्बिका । कालातिविषायाम् ।

असिताञ्जनी । स्त्री । कृष्णकार्पास्याम् । रा. नि.व.४ । See कालाञ्जनी ।

असितानन । पुं । कपौ । हे.च. ।

असिताबलमोटा । स्त्री । कृष्णजयन्त्याम् । काल जयन्ती । गुणाः—असिताबलमोटातु रसायनकरी मता । गुणाश्चान्ये जयन्तीवत् । वै.निघ. ।

असिताभ्रशेखरः । पुं । नीलीवृक्षे । त्रिका. ।

असितालया । स्त्री । नीलदूर्व्वायाम् । श्यामालतायाम् । वै.निघ. ।

असितालुः । पुं । नीलालौ । रा.नि.व.७ ।

असितोत्पलम् । क्ली । नीलोत्पले । शुन्दि । रा.नि.व.१० ।

असिदंष्ट्रः (कः) । पुं । मकरे । त्रिका. ।

असिदन्तः । पुं । मकरे । कुम्भीरे । वै.निघ. ।

असिद्धः । त्रि । आमे । काँचा । अपक्वे । सिद्ध करा नय । रत्ना. [हे.च. ।

असिधेनुः (का) । स्त्री । क्षुरिकायां । हला.

असिपत्रः । पुं । सैहुण्डवृक्षे । मनसा गाछ । मद.व.१ । इन्दो । आंथ् । प. मु. । त्रिका. । गुण्डतृणविशेषे । रा.नि.व.८ । (का) श्वेतदर्भे । रा.नि १४ ।

असिपत्रतृणम् । क्ली । गुण्डातृणे । तृण-विशेष । सं गुण्डागवत । रा.नि.व.८ । गुणाः—शीतं मधुरं कफवातनुत् । रक्तदोषातिसाराणां नाशकं दाहनुत्परं । द्विप्रकारं दीर्घलघुभेदैः दीर्घं गुणाधिकम् ॥ वै. निघ. ।

असिपुच्छः (कः) । पुं । जलचरविशेषे । शुशुक । हारा. ।

असिमेदः । पुं । खदिरवृक्षे । विट्खदिरे । गुयेबाबला । सं खैराचेझाड । श.र. ।

असितकम् । क्ली । काष्ठागुरुणि । भा.म.२भ. आ.वा. ।

असितका । स्त्री । कृष्णापराजितायाम् । नील अपराजिता । सं कालीगोकर्णी । वै.निघ. ।

असितकादिचूर्णम् । क्ली । आमवातघ्नं चूर्णं । पाठः—"असीतकं मागधिका गुडूची श्यामा वराही गजकर्णशुण्ठ्यौ । समा धृताः कृत्स्नमिदं तु चूर्णं पिबेत्तदुष्णोदकमण्डयूषैः ॥" मा.नि.म २भ. ।

असुः । पुं । प्राणे । अम. । क्ली । चित्ते । उणा. ।

असुखम् । क्ली । दुःखे । हे.च. । [अम. ।

असुधारणम् । क्ली । जीवने, जीवनधारणे ।

असुभृत् । पुं । प्राणिमात्रे ।

असुरम् । क्ली । सामुद्रलवणे मद.व.२ । पुं । दैवदानवृक्षे । वै.निघ. । जीर्णज्व. लवङ्गादि. ।

असुरग्रहः । पुं । भूतग्रहविशेषे । मा. नि. । तदावेशलक्षणं यथा—"संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षी विगतभयो विमार्गदृष्टिः । सन्तुष्टो न भवति चान्नपानजातैर्दुष्टात्मा भवति स देवजुष्टः ॥ मा.नि. । [र.

असुरसा । स्त्री । वर्व्वर्य्याम् । बाबुई तुल

Digitized by Arya Samaj Foundation Chennai and eGangotri

असुरा। स्त्री। रजन्याम्। रात्रि। हरिद्रायां। मे. रविकं।

असुराह्वम् (ह्वा)। क्ली, स्त्री। कांस्ये। हे.च.।

असुराह्वपतङ्गः। पुं। तेलपायिपतङ्गे। तेलापोका आर्शोला। "असुराह्वपतङ्गस्य विट्चूर्णं मधुसंयुतम्।" वैद्यकम्।

असुराह्वविट्। पुं। कांस्यमले। वै.निघ.२भ. ज्व. असुराद्यञ्जने। [अ.टी.भ.।

असुरी। स्त्री। राजिकायां। राईसरिषा।

असुस्थः। त्रि। रोगयुक्ते।

असृक्। क्ली। सृक्कानामग्रद्रव्ये। कुङ्कुमे। रा. नि.व.१२। रक्ते। रा.नि.व.१८।

असृक्करः। पुं। शरीरस्थरसधातौ। हे.च.।

असृक्पः(पा)। पुं,स्त्री। जलौकायाम्।अ.टी.भ.।

असृगुत्थः। पुं, क्ली। केशरे।

असृग्गदः। पुं। कीष्ठे। वै.निघ.।

असृग्दरः। पुं। असृग्दार्य्यते च्यव्यते अनेनेति भा.रक्तप्रदरे। प्रदररोग। हिं परदीला। लक्षणं "विरुद्धमद्याध्यशनादजीर्णाङ्गभंप्रपातादतिमैथुनाच्च। यानाध्वशीकादतिकर्षणाच्च भाराभिघाताच्छयनाद्दिवा च॥ असृग्दरं भवेत्सर्व्वं साङ्गमर्द्दं सवेदनम्। तत्रातिवृत्तौ दार्ब्बल्यं भ्रमो मूर्च्छा मदस्तृषा। दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः।" मा.नि.। वातजादिभेदात् स चतुर्व्विधः। ऋतुकालभिन्नान्यकालेऽपि अधिकार्त्तवस्रावोऽसृग्दर एव। सु.शा.२अ.। यत्पथ्यं यदपथ्यं वा रक्तपित्तेषु कीर्त्तितं। प्रदरेऽपि तथा दोषं तत्तन्नारी भजेत्यजेत्॥ इति पथ्यापथ्यम्।

असृग्दरशैलेन्द्ररसः (सर्व्वाङ्गसुन्दरः)। पुं। रक्तप्रदरोक्तरसे। पाठो यथा—गगनं शोधितं ग्राह्यं पलैकमिष्टकासमं। टङ्कणं स्याच्चतुर्थांशं शाणार्द्धं विसुगन्धिकं। कर्पूरनलदञ्चैव जातीकोषं फलं घनं। नागेश्वरं लवङ्गञ्च कुष्ठं सचिफलं तथा। जलेन वटिका कार्य्या छायायां शोषयेत्तु ताम्। ...प्रदरस्य विनाशाय दृष्टः सर्व्वाङ्गसुन्दरः॥ प्रयोगा. अ.दर-चि.।

असृग्ध(ग्धा)रा। स्त्री। चर्म्मणि। अ.टी.भ.। वैस्रा

असृष्टरणम्। क्ली। स्वर्णगैरिके। सुवर्ण गिरि-वाजिनि

असृतम्। त्रि। असिद्धे। अपक्के। रत्ना.।

असृपाटी। स्त्री। रक्तधारायाम्। अ.टी.सा.।

अस्तम्। क्ली। मृत्यौ। हे.च.।

अस्तमती। स्त्री। शालपर्ण्याम्। श.र.।

अस्त्रम्। क्ली। आयुधे, चापे। करवाले। मे. रत्निकं। व्याघ्रनखे।

अस्त्रचिकित्सकः। पुं। अस्त्रवैद्ये। सु.।

अस्त्रचिकित्सा। स्त्री। अस्त्रादिना व्रणक्षतादिप्रतिकारे। सु। [इति भाषा। रत्ना.।

अस्त्रजित्। पुं। कवाटवक्षत्रे। कवाटवेटु

अस्त्रवैद्यः। पुं। अस्त्रचिकित्सके। वै.निघ.।

अस्त्राघातः। पुं। अस्त्रप्रयोगे। अस्त्रकरा। वै.निघ.।

अस्थि (कम्)। क्ली। बीजे। मेदोजधातौ। हाड़। रा.नि.व.१८। अस्थिस्वरूपं—मेदो यत् स्वाग्निना पक्वं वायुना चातिशोधितम्। तदस्थिसंज्ञां लभते स सारः सर्वविग्रहे॥" तत्कर्म्म च धारणं। तत्संख्या च मानवदेहे ३००। तेषां १२० शाखासु, ११७ श्रोणिपार्श्वपृष्ठोदरोरःसु, ६३ ग्रीवायां प्रत्यूर्द्ध्वे ति। एकैकस्यान्दादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश। तलकूर्चगुल्फसंश्रितानि दश। पाष्ण्यार्मेक, जङ्घायां द्वे, जानुन्यकं एकमूरावितिं। विंशदेवमेकस्मिन् सक्थिनि भवन्ति। एतेनेतरसक्थिबाहू च व्याख्यातौ। श्रोण्यां पञ्च तेषां गुदभगनितम्बेषु चत्वारि त्रिकसंश्रितमेकं, पार्श्वे षट्त्रिंशत्, एवमेकस्मिन्; द्वितीयेऽप्येवं। पृष्ठे त्रिंशत्। अष्टावुरसि। द्वे अक्षकसंज्ञे। ग्रीवायां नवकं। कण्ठनाड्यां चत्वारि, हे हन्वोः, दन्ता द्वात्रिंशत्, नासायां त्रीणि, एकं तालुनि, गण्डकर्णशङ्खेषु एकैकं, षट् शिरसि। तच्च पञ्चविधम्—कपाल-रुचक-तरुण-वलय-नलकभेदेन। तत्र जानुनितम्बस्कन्धतालुशङ्खमस्तकास्थीनि कपालपदवाच्यानि। दन्तास्थि रुचकमिति, नासाग्रीवाकर्णनेत्रास्थीनि तरुणमिति, हस्तपादपार्श्वपृष्ठोदरवक्षोऽस्थीनि वलयमिति, अवशिष्टानि च नलकमिति उच्यते। सु.शा.५अ.।

अस्थिकृत्। पुं। मेदोधातौ। हे.च.।

अस्थिगतज्वरः। पुं। तदाश्रितज्वरे। लक्षणं यथा—भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च। विक्षेपणञ्च गात्राणां विद्यादस्थिगते ज्वरे॥"

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वै.निघ । वान्तिन्नौषधं, वस्तिकर्म्म, अभ्यङ्गोद्वर्त्तने च प्रतीकारः।

अस्थिग्रन्थिः । पुं, स्त्री । ग्रन्थिरोगे ।

अस्थिच्छलितम् । क्ली । तन्नामककाण्डभग्नास्थिविशेषे । बृहदस्थ्नः क्षुद्रखण्डच्युतौ । 'पार्श्वयोरस्थि हीनोन्नतम् ।' सु.नि.१५अ. । See भग्नम् ।

अस्थिजः । पुं । मज्जायाम् । रा.नि.व.१८ ।

अस्थिजननौ । स्त्री । वसाधातौ । मेदोधातौ वै. निघ. ।

अस्थितुण्डः । पुं । पक्षिविशेषे । श्र मा. ।

अस्थितोदः । पुं । अस्थिनि सूचीविद्धवद्वेदनायाम् । अस्थिपीड़ायाम् । वै.निघ. ।

अस्थिपञ्जरः । पुं । कङ्काले । रा.नि.व.१८ ।

अस्थिफलः । पुं । पनसवृक्षे ।

अस्थिभङ्गः । पुं, क्ली । तन्नामधेयरोगे । अस्थिविश्लेषे । स द्विविधः सन्धिमुक्तकाण्डभग्नभेदेन । तयोः सन्धिमुक्तः षड्विधः । काण्डभग्नश्च द्वादशविधः । सु.चि.३अ. । विशेषाः स्वस्वपर्य्याये मुख्याः । अस्थिसंहारे । हाड़भाङ्गा । See भग्नम् ।

अस्थिभक्षः । पुं । कुक्कुरे । शृगाले । हारा. ।

अस्थिभक्षा । स्त्री । ओषधिविशेषे । घायमारी इति महाराष्ट्रादौ । वै.निघ. ।

अस्थिमर्म्म । क्ली । तदष्टसंख्यकम् । तत्र कटौ तरुणसंज्ञके द्वे, नितम्बे द्वे, अंसफलके द्वे, शङ्खयोश्च द्वे इति । सु. शा. ६अ. ।

अस्थिराङ्घ्रिकः । पुं । हिन्तालवृक्षे ।

अस्थिशृङ्खला (लिका) । स्त्री । अस्थिसंहारे । हाड़जोड़ा । हिं अस्थिशृङ्खल । गुणाः —वृष्या श्लेष्मला मधुरा पित्तरक्तानिलघ्नी च । मद.व.७.१ ।

अस्थिसङ्घातः । पुं । अस्थिमेलनस्थलेषु । तानि अष्टादश—"गुल्फे पञ्च जानुन्येकम् वङ्क्षणे कटिदेशे मस्तके चैकैकम् । चतुर्दशास्थां सङ्घाताः । तेषां त्रयो गुल्फजानुवङ्क्षणेषु । ऐतेनेतरसक्थिबाहू च व्याख्यातौ । त्रिकशिरसोरेकैकः ।" सु.शा.५अ. ।

अस्थिसन्धानकरः । पुं । लशुने । वै.निघ. ।

अस्थिसन्धानजननी । स्त्री । अस्थिसंहारे । हाड़जोड़ा । वै.निघ. ।

अस्थिसन्धिः । पुं । अस्थिसंमेलनस्थाने । मर्म्मस्थानेषु । ते द्विधा स्थिरा अचलाश्चेति । सु. शा. ५अ. । See सन्धिः ।

अस्थिसन्धिकः । पुं । अस्थिसंहारे । भैष. ।

अस्थिसमुद्भवः । पुं । मज्जनि । वै. निघ. ।

अस्थिसम्बन्धनः । पुं । राल्लि । धूनो । वै. निघ. ।

अस्थिसम्भवः । पुं, क्ली । मज्जनि । शुक्रधातौ । वै. निघ. ।

अस्थिसम्भवस्नेहः । पुं । मज्जनि । वै.निघ. ।

अस्थिसंहतिः । पुं । अस्थिसंहारे । मद.व.७ ।

अस्थिसंहारः (कः) । पुं । Vitis quadrangularis, Syn. Cissusquadrangularis.) खनामख्यातवृक्षे । हाड़ोच, हाड़जोड़ा, हाड़भाङ्गा हिं हरसङ्करी, हरजोड़ी, हरसङ्हारि । तत्पर्य्यायः—वज्रवल्ली ग्रन्थिमान् कुलिशं अमरः (र), शिरालकः (श), अस्थिसंहारी वज्राङ्गी अस्थिशृङ्खला । गुणाः—शीतलः वृष्यः वातघ्नः अस्थिसन्धानकृच्च । मद व.१ । अस्थियोजनः वातश्लेष्महरः उष्णः सरः कृमिघ्नः नेत्ररोगघ्नः रुच्यः स्वादुः वृष्यः लघुः पित्तलश्च । भा.पू. म. । काण्डत्वग्विरहितमस्थिशृङ्खलायाः मांषार्द्धं द्विदलमकच्चुकं तदर्द्धम् सम्पिष्टं तदनु ततस्तिलस्य तैले सम्पक्वं वटकमतीव वातहारि ॥ भा. । च.द.अ.पि.अभ गुड़ौ । माचा शुष्कचूर्ण १८ र. । हस्तिशुण्डाम् । हाती शुँड़े । इति लोके ।

अस्थिसंहारिका (री) । स्त्री । अस्थिसंहारे । भ. पू. १म. ।

अस्थिसंहृत् । पुं । अस्थिसंहारे । च.द. । भैष. भग्न.चि. ।

अस्थिसारः । पुं । मज्जायाम् । रा.नि.व.१८ ।

अस्थिसारस्थिता । स्त्री । मज्जायां ।

अस्थिस्नेहः । पुं । मज्जनि । रा.नि.व.१८ ।

अस्थिस्नेहसंज्ञः । पुं । मज्जायाम् । मगज इति लोके । रा.नि.व.१७ ।

अस्थिस्नेहसञ्चारः । पुं । मज्जनि । मज्जा ।

अस्निग्धदारु (कम्) । क्ली । देवदारुणि । देवदारुविशेषे । रा.नि.व.१२ ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असर्शा। स्त्री। आकाशवल्ल्यां। आलोकलता। रा.नि.व.२।

असीतः। पुं। काञ्चनवृक्षे। वै.निघ.।

असमन्तम्। क्ली। चुल्ल्याम्। उनन, आका। इति लोके। मं चुल। अ.टी.भ.।

असमितः। त्रि। विकसिते। फूटेल। वै.निघ.।

असम्। क्ली। शोणिते। रा.नि.व.१८। केशरे। कुम्कुम्। च.द.। नयनजले। रत्ना.। पुं। आसवे। विज.र.। कोणे। कोपे। मे.।

असकण्टः। पुं। बाणे। हे.। बाण।

असखदिरः। पुं। रक्तखदिरवृक्षे। लाल खयेर। मं रक्तखैर। रा.नि.व.८।

असघ्नः। पुं। तेजवल्लै। तेजवल। वै.निघ.

असजम्। क्ली। मांसे। रा. नि. व. १७।

असजित्। पुं। वनस्पतिविशेषे। कपाटवेटु इति भाषा। र.मा.।

असपः। पुं। जलौकायाम्। जोंक। मत्कुणे। छारपोका, उकुन। रा.नि.व.२३।

असपत्रः (कः)। पुं। भेण्डावृक्षे। रा.नि.व.४।

असपा। स्त्री। जलौकायाम्। जोंक। मे.।

असफला (ली)। स्त्री। शाल्मलीवृक्षे। शालुई गाछ। रा.नि.व.११।

असमाटका। स्त्री। रसधांतौ। रा.नि.व.१८।

असरेणुः। पुं। सिन्दूरे। मे.।

असरोधिका (नी)। स्त्री। लज्जालुकालतायाम्। लज्जावती लता। रा.नि.व.५।

असविन्दुच्छदा। स्त्री। लक्षणाकन्दे। रा.नि.व.५। [वै.निघ.।

असशिम्बी। स्त्री। रक्तशिम्ब्यां। राङाशिम्।

असायकः। पुं। नाराचास्त्रे। लोहार बाण।

असासुतो। स्त्री। रक्तस्रावे। वै.निघ.।

असार्जकः। पुं। रक्ततुलसीवृक्षे। राङाज तुलसी। श्वेततुलस्याम्। शादा तुलसी। मं पांड़री ...तुलस। वै.निघ.।

असाह्नः। पुं, क्ली। कुङ्कुमे। मद.व.३।

असृग्। क्ली। नेववारिणि। असुनिरीधात् पीनसा

असृग्। पत्तिः। वा.सू.४अ.।

वाजिनी।

असुकः। पुं। अर्जीरवृक्षे। आउच गाछ। रत्ना.।

असुवाहिनी। स्त्री। असुवाहके धमनीद्वये। सु.शा.९अ.।

असन्तः। पुं। चुल्ल्याम्। उनन।

असास्थ्यम्। क्ली। पीड़ायाम्।

अहः। क्ली। दिवसे। अम.।

अहङ्कारः। पुं। क्षेत्रज्ञपुरुषस्य चेतने, इन्द्रियादिनिखिलशरीरव्यापी योऽहंभावस्तद्विशिष्टप्रवृत्तिरेव। स च त्रिविधः वैकारिकतैजसभूतभेदेन। "तल्लिङ्गाच्च महतस्तल्लिङ्ग एवाहङ्कार उत्पद्यते। तत्र वैकारिकादहङ्कारात् तैजससहायात्तल्लक्षणान्येव एकादशेन्द्रियाणि उत्पद्यन्ते। भूतादेरपि तैजससहायात्तल्लक्षणान्येव पञ्चतन्मात्राणि उत्पद्यन्ते।" सु.शा.१अ.।

अहतम्। क्ली। नूतनवस्त्रे। हला.।

अहरट्टक्। पुं। गृध्रे। शकुनि। वै.निघ.।

अहर्ज्जवः। पुं। सम्वत्सरे। के.।

अहर्पणः। पुं। मांसे। हारा.।

अहर्बान्धवः। पुं। अर्कवृक्षे। हे.च.। [हे.च.।

अहर्मणिः। पुं। अर्कवृक्षे। आकन्द गाछ।

अहर्मुखम्। क्ली। प्रातःकाले।

अहल्यः। त्रि। अनाकृष्टभूमौ।

अहस्करः। पुं। अर्कवृक्षे। हे.च.।

अहस्पतिः। पुं। अर्कवृक्षे। सूर्य्ये। अम.।

अहिः। पुं। शीषके। शीषा। प्रयोगा, वसन्तकुसुमाकररसे। र.सा.सं.। सर्पे। मद.व.२२। उदरावर्त्ते। हारा.। वज्रीवृक्षे। नगशा शिजू। हे.च.

अहिंसा। स्त्री। (Capparis sepiaria) कण्टकपालीवृक्षे। काँटा गुड़काँटली। रत्ना.। आमवातप्रलेपे। गुणाः—विषशीथहरत्वं। राज.।

अहिकः (का)। पुं, स्त्री। शाल्मलीवृक्षे। शिमूल गाछ। मं सांवरी। श.च.।

अहिकान्तः। पुं। वायौ। हे.च.।

अहिकुटी। पुं। भारद्वाजपक्षिणि। वै.निघ.।

अहिगन्धफला। स्त्री। सल्लकीवृक्षे। रा.नि. व.११। [मं सापगंध। वै.निघ.।

अहिगन्धा। स्त्री। सर्पगन्धायाम्। राम्नाविशेष।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहिच्छत्रः। पुं। मेषशृङ्ग्यां। मेढ़ाशिङ्गे। हे. च.।

अहिच्छत्रा। स्त्री। शताह्वायाम्। शुल्फा। रा. नि. व. ४। शर्करायाम्। चिनि। रा.नि.व.१४। [वै.निघ.।

अहिजाहकः। पुं। कृकलासे। काँकलास।

अहिजिह्विका। स्त्री। महाशतावर्य्याम्। वड़ शतमूली। वै.निघ.।

अहितद्रव्यम्। क्ली। स्वभावत एवाहितद्रव्येषु। यथा—शिम्बीधान्येषु ग्रीष्मे माषकलायः फलेषु डहकः, शाकेषु सर्षपशाकम्, मांसेषु गोमांसं, वसासु साहिषी, दुग्धेषु मेषीदुग्धं, तैलेषु कुसुम्भतैलं, इक्षुविकारेषु फाणितञ्च। भा.पू.१भ.।

अहितपदार्थः। पुं। ह्रस्वरम्भायां, पूतिमांसे, प्रभातनिद्रायां, मैथुने, दधनि चेत्यादौ।

अहिताहारः। पुं। अहितकरद्रव्यभक्षणे। गुणः—पीड़ाजनकत्वम्। वा.सू.९अ.।

अहित्थः। पुं। वनमेथिकायाम्। वनमेथि। अहित्थोऽल्पगुणस्त्वद्वाजिनां स तु पूजितः। मद. ब.२।

अहिद्विट्। पुं। नकुले। मयूरे। मे. षचतुष्कं।

अहिनिर्मोकः। पुं। सर्पनिर्मोके। भा.।

अहिपत्रकः। पुं। निर्विष-सर्पविशेषे।

अहिपुत्रकः। पुं। तरालौ। हारा.। नौकाविशेषे।

अहिपुष्पम्। क्ली। नागकेशरपुष्पे। च.द.। कुम्भीकातैले। सु.चि.३७अ.।

अहिपूतनः (ना)। पुं, स्त्री। बालरोगान्यतमे रोगविशेषे। शिशुर शुश्रुते। यथा—"शुक्रन्यूनसमायुक्तेऽधौतेऽपाने शिशोर्भवेत्। खिन्ने वासाप्यमाने वा कण्डूरक्तकफोद्भवा॥ कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते। एकीभूतं व्रणं घोरं तं विद्यादहिपूतनं॥" मा.नि. क्षुद्ररोगः।

अहिफलः (ला)। पुं, स्त्री। दीर्घकर्कटिकायाम्। लम्बा काँकुड़। मटरकांकड़ी।

अहिफेनम् (कम्)। पुं, क्ली। Opium poppy, Papaver somniferum. स्वनामख्यातसारजवर्गौषधिविषे। प. मु.। आफिम्। हिं अफिम्। मं अफूकड़री, अफून। आफन इति सालवे प्रसिद्धं। तें नलमंडु। "उक्तं खसफलक्षीरमाफूकमहिफेनकम्।" भा.पू.१भ.। अहिफेनं चतुर्विधं जारण-मारण-धारण-सारणभेदात्। तत्र श्वेतवर्णं जारणं, कृष्णवर्णं मारणं, पीतवर्णं धारणं, कर्व्बूरं सारणञ्च। जारणमत्र जाड्ययेत्, मारणं मृत्युं कारयेत्, धारणं वयस्तम्भं, सारणं मलसारणञ्च करोति। सामान्यतो गुणाः—सन्निपातघ्नं हृद्यं बल्यं मोहदञ्च। रा.नि.६। आफूकं शीघ्रं याहि श्लेष्मघ्नं वातपित्तकरञ्च। मद.व.१।

अहिफेनवटिका। स्त्री। योगोऽयं रक्तातिसारे। खर्ज्जूरं पिण्डखर्ज्जूरम्। र.सा.सं। [खाक्षि।

अहिफेनवीजम्। क्ली। खस्खसे। पोस्त,

अहिफेनासवः। पुं। आसवोऽयमतीसारविसूच्योर्हितः। मात्रार्द्धमाषकमिता। अत्र मधूकमद्यस्य (महुयार गद) पलशतं (१२॥० सेर)। अहिफेनं ४ प. सुस्तकं जातीफलेन्द्रयवैलानां प्रत्येकं पलमेकत्राहृतपात्रे मासमेकं स्थापयेत्। भैष.।

अहिभयदा। स्त्री। भूम्यामलक्याम्। भूँई आम्ला। रा.नि.व.५।

अहिभुक्। पुं। मयूरे। रा.नि.व.१९। तार्क्ष्ये। मे.। क्षुद्रसापसंद इति प्रसिद्धे वृक्षे। नाकुलीनामसहाकन्दशाके। रा.नि.व.७। गन्धनाकुल्याम्। रा.नि.व.७। See नाकुली।

अहिमर्द्दनी। स्त्री। गन्धनाकुल्याम्। व्रात्यविशेष। अहिलताविशेषे। सापसंद इति पाश्चात्ये। रा.नि.व.७। See नाकुली।

अहिमारः (कः)। पुं। विट्खदिरे। गुह्ये बाव्‌ला। मं गन्धीहिंवर। रा.नि.व.८।

अहिमेदः (कः)। पुं। विट्खदिरे। गुह्ये बाव्‌ला। मं गन्धीहिंवर। रा.नि.व.८।

अहिरिपुः। पुं। मयूरे। रत्ना.।

अहिलता। स्त्री। सापसंद इति ख्यातलतायाम्। गन्धनाकुल्याम्। रा.नि.व.७। See नाकुली। ताम्बूल्याम्। पान गाछ। रा.नि.व.११

अहिलोकिका। स्त्री। भूम्यामलक्याम्। भूँई आम्ला। वै.निघ। [वै.निघ.

अहिल्या। स्त्री। वनमेथिकायां। वनमेथि

अहिवल्ली। स्त्री। नागवल्ल्यां। भैष.ध्व.भ.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहिविषापहा। स्त्री। अहिलतायाम्। सासंद। वै.निघ.।

अहिस्कन्धः। पुं। गुल्फे। पायेर गुल्ले।

अही। स्त्री। गवि। गाभी।

अहीन्द्रः। पुं। शारिवायाम्। अनन्तमूल। च. द.यक्ष्म.चि. लवङ्गादिचूर्णे।

अहीरणिः। पुं। द्विमुखसर्पे। शङ्खिनी इति लोके। हारा.।

अहीरुहः। पुं। शाकवृक्षे।

अहेरुः। स्त्री। शतमूल्याम्। अम.।

अहोरात्रम्। क्ली। दिवारात्रे।

अह्याटः। पुं। ओकड़ा इति प्रसिद्धे क्षुपे। प.मु.।

अह्वला। स्त्री। भल्लातकवृक्षे। भेला गाछ। शु.च.।

अच्चः। पुं। (Teminalia belerica.) A tree bearing medicinal fruit. विभीतकवृक्षे। बयड़ा गाछ। हिं तिनाश। रा. नि.व.९। भा.म.४भ. अञ्जने, "जग्ध्वाच्चकाष्ठं मलमायसन्तु।" सि.यो. सिद्धमतयोगे कु.काम.द्वन्द्व.। यक्ष्मा. एलादिमन्थे द्वन्द्व.। कर्षपरिमाणे। प.प्र.। इन्द्राक्षे। सर्पे॥ मे.। रुद्राक्षवृक्षे। भा.अने.व.। श्वासे। ऋषभके। देवशिरीषवृक्षे। शिरीषविशेष। रा.नि.व.९। क्ली। विषयेन्द्रिये। रा.नि.व.१८। वा.शा.३अ.। सौवर्चललवणे। तुत्थके। तूँते। मे.षडिकं। पद्मबीजे। विभीतकफले। रा.नि. व.११।

अच्चकः। पुं। विभीतकवृक्षे। भा.पू.१भ.। तिनिशवृक्षे। र.मा.। "विश्वमच्चसमं पिबेत्।" च. द.ज्वरातिसा.चि.। रुद्राक्षवृक्षे। शु.र.। इन्द्राक्षवृक्षे। सर्पे। तोलकद्वयपरिमाणे। मे.षडिकं।

अच्चकारका। स्त्री। घृतकुमार्याम्। घृतकुमारी। वै.निघ.। [पाण्डु.चि.।

अच्चकाष्ठम्। क्ली। विभीतककाष्ठे। च.द.

अच्चगणः। पुं। श्रोत्रादीन्द्रियसङ्घाते।

अच्चगन्धिनी। स्त्री। अतिबलायां। वै.निघ.।

अच्चतः। पुं। यवे। (बहु.) आतपतण्डुले। रा. नि.व.१६। शस्यमात्रे। अ.टी.भानुः। क्ली। लाजेषु। खई। मे.। यवे। प.मु.। "लाजेषु विष्वक्षिते। यवेऽपि क्वचित्।" मे.तद्विकं। केचित्तु लाजि-

अखण्डतण्डुला अच्चतमित्याहुः। त्रि। अव्रणे। अक्षिंसिते। मे.। अखण्डिते। शु.र.। [व.४।

अच्चतण्डुला। स्त्री। महासमङ्गाक्षुपे। रा.नि.

अच्चतरोगः। पुं। उपनखरोगे। आंङुल-हाड़ा। लक्षणं—"कुर्यात्पित्तानिलं पाकं नखमांसे सरुग्ज्वरं। चिप्पमच्चतरोगञ्च विद्यादुपनखञ्च तम्॥" वा.उ.३१अ.। [शु.च.।

अच्चता। स्त्री। कर्कटशृङ्ग्यां। काँकड़ाशृङ्गी।

अच्चतैलम्। क्ली। विभीतकतैले। बयड़ा-बीजेर तैल। वा.उ.१३अ.। See विभीतकतैलम्।

अच्चधरः। पुं। (Trophis aspera,) शाखोटवृक्षे। शेओड़ा गाछ। भूरिप्र.।

अच्चधूर्त्तः (र्त्तिलः)। पुं। षाँड़। हिं बैल। हारा.।

अच्चपाकः। पुं। सचललवणे। वै.निघ.।

अच्चपिण्डः। पुं। शङ्खपुष्प्याम्। वै. निघ.।

अच्चपीड़ः। पुं। श्वेतवृक्षायां। श्वेतवृक्षामूले। रसेन्द्र.चि.९अ.। दुरालभायां। सु.चि.९अ.।

अच्चपीड़का (ड़ा)। स्त्री। श्वेतवृक्षायां। प. मु.। यवतिक्तलतायाम्। रा.नि.व.३।

अच्चमः। पुं। स्थूलमूलके। वनचटके। वै. निघ.। स्त्री (मा)। अचान्तौ। ईर्ष्यायाम्। शु.र.।

अच्चरः। पुं। अपामार्गे। हे.च.। क्ली। जले।

अच्चरुचकम्। क्ली। मृत्तिकालवणे। सोरा। मं सीरमिट। वै.निघ.।

अच्चवीर्य्यवान्। पुं। श्वेतकरवीरे। वै.निघ.।

अच्चशिरोधिजा। स्त्री। मन्यास्थशिरायां। वै.निघ.।

अच्चसस्यम्। क्ली। कपित्थफले। मं कंविठ। वै.निघ.।

अच्चारलवणम्। क्ली। अक्षविमसैन्धवादौ। यथा—"गोक्षीरं गोघृतञ्चैव धान्यं मुद्गास्तिला यवाः। सामुद्रं सैन्धवञ्चैव अच्चारलवणं स्मृतम्।" हारलता।

अच्चि। क्ली। नेत्रे। रा.नि.व.१८।

अच्चिकः। पुं। (Dalbergia oujeinensis.) रञ्जनवृक्षे। आउच गाछ। रक्ता।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्षिकूटः (कः)। पुं। Eye ball. ईषिकायां। चक्के'र तारा। वा.सू.२अ.। गजाक्षिपुटके। हे.च.।

अक्षिकूणितम्। क्ली। अपाङ्गदृष्टौ।

अक्षिगोलः। पुं। The ball or globe of the eye. नेत्रतारके।

अक्षिच्छादनम्। क्ली। अक्षिवर्त्मनि। रत्ना.।

अक्षिपञ्चकम्। क्ली। श्रोत्रं त्वक् रसना नेत्रं नासा चेति। रा.नि.व.१८।

अक्षिपटलम्। क्ली। A coat of the eye. नेत्रपटले।

अक्षिपक्ष्म। क्ली। The eye-lash. नेत्रलोमनि। चक्षेर पाँतार लोम।

अक्षिपाकात्ययः। पुं। क्षणगते अक्षिरोगविशेषे। लक्षणम्—"उष्णाश्रुपातः पिडका च नेत्रे यस्मिन् भवेत् सुप्तनिभञ्च शुक्लम्। तदप्यसाध्यं प्रवदन्ति केचित् अन्यच्च यत्तिमिरपक्वतुल्यम्। श्वेतं समाक्रामति सर्व्वतो हि दीर्घेण यत्नासितमण्डलञ्च। तमक्षिपाकात्ययमक्षिरोगं सर्व्वात्मतां वर्ज्जयितव्यमाहुः॥" मा.नि.।

अक्षिपोलुः। पुं। महानिम्बे। वै.निघ.।

अक्षिभेषजम्। क्ली। श्वेतलोध्रे। मद.व.१। पट्टिकारोध्रे। रा.नि.व.६।

अक्षिरोगः। पुं। नेत्ररोगे। See नेत्ररोग।

अक्षिवः। पुं। (Guilandina or Hyperanthera morunga,)शोभाञ्जनवृक्षे। शजना। हिं शिगु। मरिचे। रा.नि.व.७। क्ली। सामुद्रलवणे। अ.टी.भ.।

अक्षिविचूर्णितम्। क्ली। अपाङ्गदृष्टौ। हे.च.।

अक्षिवैराग्यम्। क्ली। नेत्रविरक्ततायां। "चक्षीरस्याक्षिवैराग्यम्।" वा.सू.७अ.। [अ.।

अक्षिसेचनम्। क्ली। नेत्रनिर्लोदे। वा.सू.२३

अक्षिहुण्डनम्। क्ली। नेत्रव्युदासे। मा.नि. विज.र.। [रत्ना.।

अक्षीकः। पुं। वृक्षविशेषे। आऊच। इति लोके।

अक्षीवः। पुं। वर्चिरे। वक। शोभाञ्जनवृक्षे। सजिना। मे. वर्चिकं। च.सू.४अ. क्रमिघ्न.व.। चि. ३अ.। महानिम्बे। भा.पू.१भ.। त्रि। अमत्ते। मे.। क्ली। सामुद्रलवणे। पाँङा। भा.पू.१भ.। मरिचे।

अक्षेयः। पुं। रक्तार्के। अर्कमन्दारे। वै.निघ.।

अक्षोटः (कः) (की)। पुं, स्त्री। (Juglans regia.) गिरिजपीलौ। आक्रोट इति लोके। आखोट इति हिमवति प्रसिद्धः। प्रा. अक्रोड़। कों अखोड़। हिं खरीटनासपाती। तत्पर्य्यायः,—अचीटः, अचोटकः, आखेटः, पर्व्वतपीलुः, कर्परालः कन्दरालः आचीड़ः (ख), आस्फोठकः (शा.र.)। गुणाः—मधुरः बल्यः स्निग्धोष्णः वातपित्तघ्नः रक्तदोषहरः शीतलः कफकोपनश्च। रा.नि.व.११। मधुरं बल्यं गुरु उष्णं सारकं वातघ्नञ्च। मद.व.६। अक्षोटकोऽपि वातादसदृशः कफपित्तकृत्। भा.मि.।

अक्षोटतैलम्। क्ली। अक्षोटफलोत्थतैले। आक्रोटेर तेल। गुणाः मूलकतैलवत्।

अक्षोड़कः। पुं। अक्षोटवृक्षे। र.मा.।

अक्षोहारः। पुं। मधुखर्जूर्य्याम्। वै. निघ.।

अक्ष्यम्। क्ली। सौवर्चललवणे।

आ।

आकरः। पुं। खनौ। खनि। अम.।

आकरजम्। क्ली। रत्ने। वै.निघ.।

आकर्णनम्। क्ली। श्रवणे। कान, शोना।

आकर्षः। पुं। इन्द्रिये। मे. षत्रिकं।

आकर्षकः। पुं। शिलाभिदे। चूम्बुक-पाथर। शब्दमा.।

आकली। स्त्री। चटकायां। चड़ाई। वै निघ.।

आकल्पः। पुं। रोगे। हे.च.।

आकल्पकः। पुं। तमसि। सीहे। यन्त्रौ उत्क्लिकायाम्। मे. कचतुष्कं।

आकल्लः (कः)। पुं। अकर्करायां। आकरा वै.निघ.२भ.अरी.चि.आकल्लकादिचूर्णे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकषः । पुं । निकषप्रस्तरे । भ.र. ।

आकारः । पुं । आकृतौ । मूर्त्तौ । अम. ।

आकारकरभः (भा) । पुं, स्त्री । अकराभके । आकरकरा । भा.म.१भ. ज्वरघ्नीवटी. (शार्ङ्ग.) ।

आकाशः । पुं, क्ली । अभ्रधातौ । रा.नि.व. १३ । पञ्चभूतान्यतमभूते । शून्य, आकाश । तत्पर्य्यायः—द्यौः द्यौः अभ्रं व्योम पुष्करं अम्बरं नभः अनन्तं सुरवर्त्म अन्तरीक्षं अन्तरिक्षं गगनं खं वियत् विष्णुपदं विहायः (अ), नाकः अनङ्गं नभसं मेघवेश्म महाविलं (ज), मरुद्वर्त्मन् मेघवर्त्म विपिष्टं (शब्दर.)। अस्य विशेषगुणः शब्दः, स नित्यः अशरीरी च, तस्येन्द्रियं कर्णः ।

आकाशपटलम् । क्ली । अभ्रधातौ । वै.निघ. ।

आकाशमांसी । स्त्री । Small veriety of जटामांसी produced in Kedára mountain. सूक्ष्मजटामांस्याम् । आकाशजटामांसी । तत्पर्य्यायः,—निरालम्बा खसम्भवा सूक्ष्मपत्री गौरी पर्व्वतवासिनी अभ्रमांसी । अस्या उत्पत्तिः केदारभूमौ । गुणाः—शीतला शीफघ्नी व्रणनाड़ीघ्नी लूतागर्दभजालादिरोगघ्नी वर्णकरी च । रा.नि.व.१२ । प.मु. ।

आकाशमूली । स्त्री । जलौषधौ । पानी । हारा. ।

आकाशवल्लरी (ल्लिका) (ल्ली) । स्त्री । Cassayta filiformis. खवल्लीविशेषे । आलोक लता, आकाशवेल । कीं अमरवेल् । आकाशवेलि, नलहुदवेलि इति च पाश्चात्ये । खवल्ली दुःस्पर्शा व्योमवल्लिका अमरवल्लरी । गुणाः—ग्राहिणी तिक्ता पिच्छिला नेत्ररोगघ्नी अग्निवर्द्धनी हृद्या पित्तश्लेष्मनाशिनी च । भा.पू. १भ. । मद.व.१ । मधुरा कटुः पित्तघ्नी शुक्रहृद्विकरी रसायनी बल्या । रा.नि.व.३ ।

आकाशसलिलम् । क्ली । आन्तरीक्षजले । वर्षोदके । वृष्टिर जल । मं पावसाचेपाणी । गुणाः—मधुरं रूक्षं दीपनं पथ्यदं तृष्णाघ्नं श्रमघ्नं मेहघ्नञ्च । तथा "सद्यो हृष्ट्यब्भुमिस्थं कलुषं दोषदायकं । चिरस्थितं लघु स्वच्छं पथ्यं स्वादु सुखावहम् ।" रा.नि व १४ ।

आकुञ्चनम् । क्ली । सङ्कोचने । सु.सू.२५अ. ।

आकुलः । पुं । अश्वभेदे । See अश्वः ।

आकुलकृत् । स्त्री । अकर्करायाम् । आकरकरा । भा.म.१भ. जिह्मकज्व.चि. । "किराततिक्ताकुलकृत्-कुलिञ्ज ।"

आकुला । स्त्री । तप्तापक्वगोधूमादौ । हरा-पोड़ा । इति भाषा । "तप्तैरपक्वगोधूमैराकुला परिकीर्त्तिता । आकुला गुरवी हृष्या मधुरा बलकारिणः ।" रा.नि.व.१६ ।

आकृतिः । स्त्री । रूपे । शरीरे । लक्षणे । मे. तत्त्रिकं ।

आकृतिच्छत्रा (त्री) । स्त्री । जलौषधौ । पानी । कीषातकीलतायां । श्वेत घोषा । र.मा. ।

आक्रन्दः । पुं । क्रन्दने । आह्वाने । मे.दत्रिकं ।

आक्रीड़ः । पुं । ग्रामान्तोद्याने । अम. ।

आक्रोषः (नम्) । पुं, क्ली । अभिषङ्गे । शापे । हे.च. । अम. ।

आक्लेदिभावः । पुं । आर्द्रकारित्वगुणहेतौ । च.द.विदग्धाजीर्ण-चि. ।

आखनिकः । पुं । शूकरे । मूषिके । मे. ।

आखुकः । पुं । मूषिके । रत्ना. । वन्यमूषिके । मद.व.१२ । शूकरे । हे.च. । देवताड़वृक्षे । र.मा. ।

आखुकर्णपर्णिका । स्त्री । क्षुद्रमूषिककर्ण्यां । इन्दूरकाणी, मूषाकाणी । मं लघुउंदीरकाणी । वै.निघ. ।

आखुकर्णी । स्त्री । Salvinia cucullata. जलजमूषिककर्ण्याम् । इन्दूरकाणी पानी, मूषाकाणी इति भाषा । हिं मं भीपली । वं वल्लीहरुहे । तत्पर्य्यायः,—क्षुपिका द्रवन्ती उन्दुरुकर्णी न्यग्रोधी मूषिकपर्णी हस्तिकर्णी बहुकर्णिका माता भूमीचरी चण्डा शम्बरी बहुपादिका प्रत्यक्श्रेणी हृषा पुच्छेणी अद्रिभूः चित्रा सुवर्णी शतमूलिका आखुकर्णिका मूषिकपर्णी प्रतिपर्णशिका सहस्रमूषी विक्रान्ता पत्रश्रेणी । सा द्विधा ह्रस्वा दीर्घा च । ह्रस्वगुणाः—कटूष्णा कफपित्तहरी आनाहज्वरशूलार्शिहरी पाचनी च । रा.नि.व.३ । द्रवन्तीक्षुपे । कालदन्ती । रा.नि.व.५ । दन्तीभेदे वड़दन्ती । गुणाः—कटुतिक्तकषाया शीता लघुः कटुविपाका मूत्रकफकृमिघ्नी च । भा.पू.१भ. । कटुका तिक्ता उष्णा शीतला रसायनी सरा लघुः कषाया कृमिग्रन्थिमूत्रकृच्छ्रप्रमेह कुष्ठघ्नी च । बृहती शीतला मधुरा रसवत्सनी चक्षुष्या रसायन शूलघ्नी ज्वर-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृमिव्रणाखुविषघ्नी च। वै.निघ.। राज.। सि. यो कृमि.चि. कृमिघ्नगुटिकायां श्रीकण्ठ.।

आखुगन्धो। स्त्री। कर्पूरहरिद्रायां। वै.निघ.।

आखुजित्। स्त्री। भूम्यामलक्याम्।

आखुपर्णी (र्णिका) (र्णी)। स्त्री। स्थूल-मूषिककर्ण्यां। बड़ इन्दुरकानी। हिं मूषाकाणी वा उन्दुरकन्नी। रत्ना.। ह्रस्वदन्त्यां। क्षुद्र दन्ती। कृष्णदन्त्यां। काल दन्ती। र.मा.। वृहद्दन्त्याम्। भा.पू.१भ.। मण्डूकपर्ण्याम् (थूलकुड़ि)। च.द. कृमि.चि.।

आखुपाषाणः (कः)। पुं। A kind of mineral, loadstone. लौहचुम्बुकं। चुम्बुक-पाथर। आखुपाषाणनामाऽयं लौहसङ्करकारकः। रा.नि.व.१३ गुणाः—स्निग्धः पारदस्य नियामकः। लौहभेदकरश्चैव वीर्य्यकृत् कान्तिवर्द्धनः। त्रिदोषसर्व्व-व्याधीनां नाशकः परिकीर्त्तितः। अयुग्मं स तु विज्ञेयः सप्तधातुविनाशकृत्। दाहं चित्तभयञ्चैव लालास्रावं तथा भृतिं। अनेकवेदनाश्चैव बहु-व्याधिं तृषां तथा। करोत्यती मूर्खहस्ते न दातव्यः कदाचन। तत्समीपे नैव वाच्यः प्राणघातकरो ह्यसौ॥ वै.निघ.।

आखुफला। स्त्री। ह्रस्वदन्त्याम्। वै.निघ.।

आखुभुक्। पुं। रक्तापामार्गे। विड़ाले। मद. व १२। [मूषिकः।

आखुमांसम्। क्ली। मूषिकमांसे। See

आखुविषम्। क्ली। दारुमीचे। दारुमुज। प.मु.।

आखुविषजित्। पुं। सप्तपर्णवृक्षे।

आखुविषहा (षापहा)। पुं। देवताड़-वृक्षे। प.मु.। पीतदेवदालीलतायां। रा.नि.व.३।

आखुश्रुतिः। स्त्री। क्षुद्रमूषिककर्ण्यां। छोट इन्दुरकानी। रा.नि.व.३।

आखेटः (क)। पुं। मृगयायां। अम.। भ्र.र.।

आखेटशीर्षकं। क्ली। कुट्टिमभेदे। सूड़ङ्ग।

आखोटः (ड़ः)। पुं। अक्षोटवृक्षे। आक्-रोट। रा.नि.व.११। See अक्षोटः।

आखोटकः। पुं। मृगयाकुशल-कुक्कुरे। शिकारी कुकुर। तत्पर्य्यायः—विश्वकद्रुः। हा.।

आगतिः। स्त्री। सम्प्राप्तौ। मा.नि.।

आगन्तुः (कः)। त्रि। आगमनशीले। अम.।

आगन्तुकज्वरः। पुं। अभिघाताद्युत्पन्ने ज्वरे। "एव गणित आगन्तुज इति। आगन्तुजशब्दे नाभि-घातादयो हेतव उच्यन्ते। कुत्रचिद्व्याधयः कार्य्य-कारणयोरभेदोपचारादागन्तुजा अभिघाताद्यनेक-कारणयोगादनेके भवन्ति। तथाप्यागन्तुजत्वेन साम्यादागन्तुकीऽप्यत्रैक एव गणितः। अभिघाता-भिषङ्गाभ्यामभिचाराभिशापतः। आगन्तुर्जायते दोषैर्यथा स्वं तं विभावयेत्॥ ये भूतविषवायुग्नि-क्षतभङ्गादिसम्भवाः। रागद्वेषभयार्त्तैश्च ते स्युरागन्तवो गदाः॥ भा.म.१भ.ज्व.चि। आगन्तुर्हि व्यथापूर्व्वो जायते पश्चान्निजैर्दोषैरनुबध्यते इति। चर.।

आगन्तुव्रणः। पुं। सद्योव्रणे।

आगमः। पुं। शास्त्रे। "आगमनादागमः शास्त्रम्।" सु.सू.४०अ.।

आगमावर्त्ता। स्त्री। वृश्चिकालीवृक्षे। बिछाँति गाछ। रा.नि.व.४। क्षुद्रमेषशृङ्ग्याम्। वै.निघ.।

आगस्त्यम्। क्ली।. वकपुष्पे।

आगारम्। क्ली। गृहे। अ.टी.। [सु.चि.१अ.।

आगारगोधिका। स्त्री। गृहगोधिकायां।

आगारधूमः। पुं। गृहधूमे। झूल। वै.निघ. २भ.वा.व्या.त्वक्सुप्ततायाम्।

आगारधूमाद्यतैलम्। क्ली। उपदंशे हितं। गृहधूमः १भ. हरिद्रा २भ. सुराकिट्टं (मदेर छाँका) ३भ. एभिः पलत्रयं तैलं पचेत्। च.द. उ.द.चि। [वामुनहाटी। सु.चि.१अ.भ.।

आगारलोमिका। स्त्री। गृहलोमिकायां।

आग्नेयम्। क्ली। सुवर्णे। रा.नि.व.१३। घृते। पाणिनिः। रक्ते। हे.च.। पुं। वासायां। वै.निघ. ज्व.लाजातैले। त्रि। पित्तोद्दीपके, क्षुधाजनने। तच्च कटुम्ललवणम्। सु.सू.।

आग्नेयवायुः। पुं। अग्निकोणस्थसमीरणे। अग्निकोणेर वायु। "आग्नेयदाहकृदुचः।" भा.।

आग्नेयी। स्त्री। अश्वस्य शुभसूचकच्छायायाम्। "पद्मरागारुणा चैवमाग्नेयी परिकीर्त्तिता।" ज.द.।

आग्रमासः। पुं। चिचकवृक्षे। [अम.

आग्रहायणिकः। पुं। अग्रहायणमासे

आघट्टकः। पुं। रक्तापामार्गवृक्षे। रा.नि.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आघाटः। पुं। अपामार्गे। रा.नि.व.४।

आघातः। पुं। हनने। छेदने। चोट् लागा।

आघातज्वरः। पुं। अभिघातजन्यज्वरे। See आगन्तुज्वरः।

आघारः। पुं। घृते। हला.।

आघ्राणम्। क्ली। नासया घ्राणग्रहणे। सूँघना। हसौ। है.च.।

आघ्रातः। त्रि। शिङ्घिते। मे.। हसे। है.च.।

आङ्गम्। त्रि। कीमलाङ्गे। त्रिका.।

आङ्गारम्। क्ली। अङ्गारसमूहे। अ.टी.रा.।

आङ्गिकः। पुं। अश्वत्थवृक्षे। रा.नि.व.११।

आङ्गुष्ठिः। स्त्री। अङ्गुरीयके। आंटी।

आचः। पुं। आच्छक-पुष्पवृक्षे।

आचमनम्। क्ली। क्रीवेरे। वाला। भोजनान्तमुखक्षालने। आँचान। मद.व.३।

आचमनकः। पुं। निष्ठीवनपात्रे। पिकदानि, डाबर।

आचान्तः। त्रि। कृताचमने।

आचामः। पुं। आचमने। श.र.। भक्तमण्डे। रत्ना.।

आचामनकः। पुं। कटकीले। पिकदानि। तत्पर्य्यायः,—प्रीष्यः कठकीलः पतद्ग्रहः, (हा.)। हारा.।

आचारः। पुं। सदाचरणे। "मैत्री सद्भिः समं कुर्य्यात् स्नेहं सत्सु च सर्व्वथा। संसर्गं साधुभिः कुर्य्यादित्यादि।" भा.।

आचारी। स्त्री। छिलमोचिकायाम्। शिक्षेशाक। हरहर इति लोके। गुणः—शोथकुष्ठकफपित्तघ्नी। भा.पू.१भ.।

आचितम्। क्ली। दशभारसंमितमानविशेषे। २५ मण। अम.। द्व्यायुतपले। "पलानामयुतद्वये।" मे. तद्विकं।

आचुः। पुं। आच्छुकवृक्षे। आचफूलेर गाछ। मैष. कन्दर्पसारतैले। [र.मा.

आच्छकः। पुं। रञ्जकद्रुमे। आचफूलेर गाछ।

आच्छादः। पुं। वस्त्रे। कापड़।

आच्छादनम्। क्ली। कार्पासे। वस्त्रे। रत्ना.। धाने। मे.नचतुष्कं।

आच्छादनफला। स्त्री। रक्तकार्पासे।

आच्छादनी। स्त्री। कार्पास्याम्।

आच्छुकः। पुं। (Morinda letrofolia, and morinda citrifolia, and morinda tinctoria.) स्वनामख्यातवृक्षे। आच्, आउच, गाछ। हिं आल। र.मा.।

आच्छोदनम्। क्ली। मृगयायाम्। अम.।

आजम् (कम्)। क्ली। घृते। जटा.। छागघृते। च.चि.र.पि.।

आजनवनीतम्। क्ली। छागदुग्धजातनवनीते। गुणाः—मधुरं कषायं विदोषघ्नं चक्षुष्यं दीपनं बल्यञ्च। रा.नि.व.१५। नवौत्थं नवनीतं त्रय कासघ्नं बल्यं नेत्ररोगघ्नं कफघ्नं दीपनञ्च। अवि. ८म.। See छागनवनीतम्।

आजन्मसुरभिपत्रः (त्रा)। पुं,स्त्री। मरुवकवृक्षे। गन्धतुलसी। नागदना इति च लोके। रा.नि.व.१०।

आजमूत्रम्। क्ली। छागमूत्रे। मद.व.८।

आजरसः। पुं। छागमांसक्वाथे। च.द.यक्ष्म.।

आजवल्लः। पुं। वनतुलस्याम्। वनतुलसी। हि श्वेतबबरी। मं राणतुलसभेद। प्रा.आजवला। गुणाः—"आजवल्लः कटुश्चोष्णः शीतो दाहकरः प्रियः। रुचौ रुच्यो दीपकः स्याल्लघुः पाके च पित्तलः। तिक्तश्च मधुरश्चैव सुखप्रसवकारकः। व्रण्यो वातहरश्चैव कफनेत्ररुजापहः। मूत्रकृच्छ्रारुचिविषकामलाकुष्ठकामलाः। आनाहवातशूलाग्निमान्द्यरुग्विषरुक्क्रिमीन्। रक्तदोषश्वासकासदद्रुहृत्पार्श्वरुग्ज्वरान्। कण्डूकुष्ठवमीश्चैव नाशयेदिति कीर्त्तितः। सुगन्धाजवल्लः प्रोक्तः कटुश्चोष्णश्च तद्गुणकृत्। सुगन्धः पित्तकृन्निद्राजनकः वान्तिवातनुत्। ग्रहबाधापार्श्वशूल-कासश्वास-कफाञ्जयेत्। शोथञ्चाङ्गस्य दौर्गन्ध्यं नाशयेदिति कीर्त्तितः॥" वै.निघ.।

आजक्षीरम्। स्त्री। छागदुग्धे। गुणाः—आजं गव्यगुणं ग्राही दीपनं लघु त्रयार्शोऽतीसारप्रदरास्रभ्रमज्वरघ्नं। एतच्च दुग्धं सर्व्वरोगघ्नम्। मद.व.८। छागं कषायं मधुरञ्च शीतं ग्राहि लघु पित्तत्रयापहारि। कामज्वराणां रुधिरातिसारे हितं पयश्छागलजं विदोषजित्। अवि.८म.। वा.टी. हेमा.।

आजानेयः। पुं। कुलीनाश्वे। है.च.। तदुक्तं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—"शक्तिभिर्भिन्नहृदया: स्खलन्तीऽपि पदे पदे। आजानन्ति यत: संज्ञामाजानेयास्तत: स्मृता:।" शालिहोत्र:।

आज्यम्। क्ली। घृते। रा.नि.व.५। श्रीवासे। टार्पिन तैल इति कश्चित्। शब्दकल्प.।

आञ्जिनेय:। पुं। जन्तुविशेषे। आञ्जनाई, आञ्जुनि। भ.मा.।

आटरूष: } पुं। (Justicia adha-
आटरूष: (षक:) } toda. Adhatoda. vasica) वासकक्षुपे। छोट वासक, मधु वासक वा वासन्ती। हिं. अरूषा। मं. अडुलसा:। रा.नि.व.४भा.पू.१भ.। सि. यो. र.पि.चि.स्तम्भन योगे। "अटरूषकनिर्य्यूहे।" "राजहृच्चाटरूषकै:।" सि.यो.ज्वरे। See वासक:।

आटि: (ठी)। पुं, स्त्री। (Turdus ginginianus) शरारिपक्षिणि। शराल-पाखि। मं वगलीपक्षीण। मद.व.१३। See आड़ी।

आटीकर:। पुं। द्वषे। वै.निघ.।

आठीमुखम् (वदनम्)। क्ली। व्रणविस्रावणाय अस्त्रविशेषे। सु.सू.८अ.। शरारिचञ्चुवदाकारत्वात् तथाभिधीयते। "कुशाटीवदने साध्ये द्व्यङ्गुलं स्यात्तयो: फलम्।" अत्रि:।

आटोप:। पुं। उदरमध्ये सवेदनगुड़गुड़ाशब्दे। स च वायुजन्यो भवति। मा.नि.। "आटोपो गुड़गुड़ाशब्द: प्रोक्तो जठरसम्भव:।" भा.।

आड़म्बर:। पुं। Eyelid. नेवच्छद। च'केर पाता।

आड़ि:। पुं। शरारिपक्षिणि। शराल-पाखी। मद.व.१२। मत्स्यविशेषे। आड़ माछ। गुण:—गुरु: स्निग्ध: वातश्लेष्मकोपन: बलकर: शुक्राग्निवर्द्धकश्च। राज.।

आड़िका (ड़ी) (ड़ीको)। स्त्री। शरालिपक्षिणि। मद.व.१२। गुण:—"आड़ी वातविकारकासहननी बल्या हृषा दीपनी।" अत्रि. २२अ.।

आढ़क:। पुं, क्ली। शमीधान्यविशेषे। अरहर। हिं टीर। प.मु.। अष्टशरावमिते धान्यमानविशेषे। आड़ि। मं पायली। प्रस्थचतुष्टये। "चतु:-प्रस्थमथाढकम्' पुष्कलचतुष्टयमिते माने। पुष्कलानि तु चत्वारि आढक: परिकीर्त्तित:। तत्पर्य्याय:,—भाजनं पात्रं कांसपात्रं चतु:षष्टिपलम् भा.)।

आढ़का। स्त्री। सुराभ्रन-आढ़कीविशेषे। टुमुर। तत्पर्य्याय:—कंसोद्भवा। द्रवद्रोणचतुर्थभागे (८ वा १६ सेर)। See आढ़की।

आढ़किक: (कीन:)। त्रि। आढ़कमितवपनयोग्यक्षेत्रे। अम.।

आढ़किका। स्त्री। आड़कां। वै.निघ.।

आढकी। स्त्री। (Cajanus indicus, syn. cytisus cajan.) शिम्बीधान्यविशेषे। अड़र, आईरि। हिं रहर, टर, तुवरी, टुमुर। हैमा.। तत्पर्य्याय:,—तुवरीवर्य्या करवीरभूजा वृत्तबीजा पीतपुष्पा (रा), सृक्काल (शब्दर.), काची सृक्का तुवरिका सृक्कालकं सुराष्ट्रजं (अ), सृक्कालकं (अ.टी.)। सा श्वेतरक्तपीतभेदात्त्रिधा। तत्र साधारणाढकीगुण:—कषाया मधुरा कफपित्तजित् ईषद्वातकरी रूक्षा गुरु: ग्राहिणी च। इति विदलाढकीगुण:। रा.नि.व.१६। "आढ़की तुवरा रूक्षा मधुरा शीतला लघु:। ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्॥" भा.पू.१भ.। "मृदु: कषाया च सरक्तपित्तं क्षतं कफं हन्ति मुखव्रणञ्च। गुल्मज्वरारोचककासच्छर्द्दिहृद्रोगदुर्नामहराढ़की स्यात्"। अत्रि.१५अ.। श्वेताढ़की दोषकरी। रक्ता—बल्या रूक्षा पित्तताप्रनी च। पीता—दीपनी पित्तदाहघ्नी च। रा.नि.व.१६। परिमाणभेदे। आड़ि। मे. कविकं। सौराष्ट्रमृत्तिकायाम्। हे.च.। गोपीचन्दने। तन्नामकगन्धद्रव्ये। अ.टी.।

आढ़कीयूष:। पुं, क्ली। तुवरीयूषे। अड़रेर झोल। गुण:—बल्यम्। रा.नि.व.१६। "भवेदाढ़क्या मधुरञ्च यूषं विशोषणं वातनिवारणञ्च। श्लेष्मापहं पित्तहरं नराणां॥" अत्रि. १३अ। [हरिद्रादौ।

आढ्यपवन:। पुं। ऊरुस्तम्भरोगे, वा वचा-
आढ्यवात:। पुं। वातरक्ते, वातरोगभेदे। लक्षणं—"चल: स्निग्धे मृदु: शीते शीफोऽङ्गेषु मृदुस्तथा। आढ्यवात इति ज्ञेय: सक्थ्नो मेदसावृत:॥ च.।

आढ्या। स्त्री। अजमोदायाम्। राजानी। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आणिः। पुं, स्त्री। तन्नामकमर्म्मस्थाने। इदं स्नायुमर्म्म। तस्य च स्थानम् जानूर्ध्वोभयपार्श्वतो ऽङ्गुलित्रयमितम्। सु.शा.६अ.।

आतङ्कः। पुं। ज्वरे। रोगे। रत्ना.। सन्तापे। शङ्कायाम्। मे.कत्रिकं।

आतञ्चनम्। क्ली। तर्पणे। अम.। उपद्रवे। निचेपे। सु.प्रतीवापे।

आतनम्। क्ली। दर्शने।

आतपः। पुं। रौद्रे। तत्पर्य्यायः,—किरणं तेजः (नि.), रौद्रं प्रकाशः द्योतः (ख), दिनज्योतिः सूर्य्यालोकः दिनप्रभा रविप्रकाशः प्रद्योतः तमारिः तापनः द्युतिः। एतन्नेवनं स्वेदमूर्च्छारक्तदाहश्रमकरं पित्तवैवर्ण्यकरञ्च। मद.व.१२। कटुः रूक्षः नेत्ररोगप्रकोपनश्च। रा.नि.।

आतपतण्डुलः। पुं। असिद्धतण्डुले। आलो चाल।

आतपत्रम् (कम्)। क्ली। छत्रे। रत्ना.।

आतपर्णिका (र्णी)। स्त्री। क्षीरिकायाम्।

आतर्पणम्। क्ली। तृप्तौ। मे.।

आतपशुष्कः। त्रि। रौद्रशुष्के।

आतपाभावः। पुं। छायायाम्।

आतापिः (पी)। पुं। चिल्लपक्षिणि। चिल-पक्षी। मं शशमारी। हला.॥

आतायी। पुं। चिल्लपक्षिणि। चिल। अम.।

आतिः। पुं। शरारि-पक्षिणि। हला.।

आतुः। पुं। उड्डूपे। भेला, मार।

आतुरः। त्रि। रोगिणि। रा.नि.व.२०। स्मृति-निर्देशकारित्वमभीरुत्वमथापि वा। ज्ञापकत्वञ्च रोगाणामातुरस्य गुणा मताः॥ भैष.।

आत्मप्यः। पुं। (Annona reticulata.) The custard apple tree. आता इति प्रसिद्धफलवृक्षे। आता गाछ। हिं सरीफा। मं सिताफलीचेझाड़। क्ली। तत्फले। फलगुणाः —तृप्तिजनकं रक्तवर्द्धकं स्वादु शीतलं हृद्यं बल्यं मांसकरं दाहरक्तपित्तवातघ्नञ्च। राज.।

आत्मगन्धकः। पुं। गन्धवीले। मं रत्यावील। निघ.।

आत्मगन्धिहरिद्रा। स्त्री। कर्पूरहरिद्रायाम्। मं कापूरहलदी। वै. निघ.।

आत्मगुप्ता। स्त्री। (Mucuna pruriens, Carpopogon prurieus.) कपिकच्छौ। आलाकुशी, दयाल, धुनार गुड़, शुयाशिम्बी इति च। हिं कौंच। मं कुहिरी। तें दुलगुड़ि।। गुणाः —शुक्रवर्द्धनी मधुरतिक्ता मांसवर्द्धका गुरुः वातघ्नी बल्या कफपित्तरक्तघ्नी च। तद्बीजं—वातघ्नम् अतिशुक्रवर्द्धकञ्च। भा.पू १भ मद.व.१। तत्फलं स्त्रीषु हर्षजनकत्वात् वाजीकरणम्। वा.सू. १५अ. दूर्व्वादिव.। स्वादुः हृद्या वातघ्नी शीतपित्तास्रघ्नी व्रणघ्नी च। रा.नि.व.३। दूर्व्वानन्तानिम्बवासात्मगुप्ता। शतावर्य्याम्। रा.नि.व.३।

आत्मग्राही। त्रि। कुक्षिम्भरी, स्वोदरपूरके।

आत्मघोषः (षा)। पुं, स्त्री। काके। हारा.।

आत्मजः। कुक्कुटे। श.च.।

आत्मजा। स्त्री। कन्यायाम्। शूकशिम्ब्याम्। च.चि.३अ.।

आत्मनोनः। पुं। पथ्ये। रा.नि.व.३०। पुं। प्राणधारे। पुत्रे।

आत्ममूली। स्त्री। दुरालभायां। मं धामासा। श.मा.।

आत्मम्भरिः। त्रि। आत्मने। अम.।

आत्मरक्षा। स्त्री। महेन्द्रवारुणीलतायां। बड़ माकाल फल लता। रा.नि.व. ३। मद.द.व.१।

आत्मवत्। त्रि। यत्नवति, धृतिमति।

आत्माविज्ञानम्। क्ली। योगाभ्याससमाधिना परमात्मस्वरूपविज्ञाने। वा.सू.१अ.।

आत्मशल्या। स्त्री। शतावर्य्यां। शतमूली। रा.नि.व.४।

आत्महत्या। स्त्री। स्वेनैव स्वकीयप्राणनाशे। आत्मघाते।

आत्मा। पुं। शरीरे। मे.मत्रिकं। जीवे। वायौ। अग्नौ। हे.च.। मनसि। मे.।

आत्माशी (इन्)। पुं। मत्स्यविशेषे। त्रिका.।

आत्मोद्भवा। स्त्री। (Glycine debilis.) माषपर्णी। माषाणी। वनमुद्गे। रा.नि.व.३। कन्यायाम्।

आत्यूकः। पुं। वङ्गे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्यूहः । पुं। Gallinule. दात्यूहपक्षिणि।

आत्रेयः । पुं। An essential juice of the body. शरीरस्थ रसधातौ। हे.च.।

आत्रेयिका (यी) । स्त्री। ऋतुमत्यां स्त्रियां। हला.। मे. यत्रिका

आदर्शः । पुं। दर्पणे। टीकायां। प्रतिपुत्रके। मे. शत्रिकं।

आदर्शमण्डलः । पुं। सण्डलिजातीयसर्पविशेषे। सु.कल्प.५अ.। See सर्पः।

आदानम् । क्ली। अश्वालङ्कारविशेषे। हे.च.। निदाने। रोगलक्षणे। रा.नि.व.२०।

आदाना (नी) । स्त्री। हस्तिग्रीषायाम्। धुन्दूल। हिं खोणा नलुवा। र.मा.। भैष.क्षुद्ररो. चि.महानीलतैले।

आदिकारणम् । क्ली। निदाने। अम.।

आदित्यः । पुं। अर्कवृक्षे। श्वेतार्कवृक्षे। आकन्द गाछ। सूर्ये। अम.।

आदित्यकान्ता । स्त्री। आदित्यभक्तायाम्। छड़छड़िया। वै.निघ.

आदित्यतेजा । स्त्री। आदित्यभक्तायां। ब्राह्मीशाके।

आदित्यपत्रः (त्रः) (त्रा) । पुं, स्त्री। आदित्यभक्ताभेदे। छड़छड़िया भेद। गुणाः—कटुः उष्णवीर्यः कफघ्नः वातरोगघ्नः दीपनः जाठरगुल्मघ्नः अरोचकघ्नश्च। रा.नि.व.४। अर्कवृक्षे।

आदित्यपर्णिका (नी) (र्णी) । स्त्री। आदित्यभक्तायाम्। छड़छड़िया। तन्नामकौषधिविशेषे। राधापत्र। "या सूर्यकान्तेति भक्ष्यते, क्षीरञ्च यस्याः सुवर्णाभं, पुष्पाणि च सूर्यमण्डलाकाराणि।" च.चि.१अ.सु.चि.१५अ.। तथा "सपञ्चकोमलदलहिमालयजमूलप्रधानचुपे। सूर्यक्षुखीति लोके।" सूर्यक्षुखीलक्षणं यथा—"मूलिनी पञ्चभिः पत्रैः सुरक्ताग्रककोमलैः। आदित्यपर्णिनी ज्ञेया सदादित्यानुवर्त्तिनी। आदित्यपर्णिनी ज्ञेया तथैव हि हिमत्यये॥" सु.चि.३०अ.।

आदित्यपाक (गुडूची) तैलम् । क्ली। एतत्तैलं कुष्ठहरं। मञ्जिष्ठा.लाक्षा-दिफला-हरिद्रा-मनःशिला-हरिताल-गन्धकचूर्णैः समभागैः तैलं पाच्यम्। अत्र जलं विना पाकानुपपत्तेः तैलसमं जलं दत्वा जलशीषपर्य्यन्तं सचूर्णं तैलमातन्त्रे स्थाप्यम्। तैलं १श. द्रव्यं।० शरावांशः। च.द.क्षुद्ररो.चि.। अत्यन्त कैशरीपत्रे हितम्। तैलमिदं वटाङ्कुर-भृङ्गराजीचूर्णेन गुडूचीस्वरसेन रौद्रपक्वं कारणीयम्। रस.र.क्षुद्ररो.चि.।

आदित्यपुष्पा । स्त्री। धातकीपुष्पवृक्षे। धाईफूल। क्षीरकाकोल्यां।

आदित्यपुष्पिका (ष्पी) । स्त्री। अर्कवृक्षे। लोहितार्कवृक्षे। रक्तार्कन्द। सं अर्कपुष्पी। र.मा.।

आदित्यबन्धुः (न्धवा) । पुं, स्त्री। पद्मे। सूर्यावर्त्ते। छड़छड़े।

आदित्यभक्ता । स्त्री। (Cleome viscosa. Polanisia icosandra.) खनामख्यातवृक्षे। वन भलूते गाछे, छड़छड़े इति भाषा। हिं हुलहुल। सं सूर्यफुलवल्ली। आदिता आदित्यभक्ति इति च देशविशेषभाषा। तत्पर्य्यायः,—वरदा अर्कभक्ता सुवल्ली सूर्यलता सूर्य्यावर्त्ता अर्ककान्ता सण्डूकपर्णी सुरसम्भवा सौरि सुतेजा अर्कहिता वरिष्ठा सण्डकी सप्तनामा देवी मार्त्तण्डवल्लभा विक्रान्ता भास्करेष्टा। सा श्वेतपीतभेदेन द्विधा। गुणाः—शीतला तिक्ता कटुः कफघ्नी त्वग्दोषकण्डूव्रण-कुष्ठ-भूतग्रह-शीतज्वरघ्नी च। रा.नि.व.४। तथा स्वादुपाकरसत्वं गुरुत्वं क्षाररसत्वं अग्नित्ववर्द्धकत्वं विष्टम्भित्वं वातहरत्वञ्च। कर्णगूलघ्नी च.द.। हिमा रूक्षा स्वादुपाका सरा गुरुः कटुरपित्तला क्षारा विष्टम्भकफवातघ्नी। अपरा च तिक्ता कषाया उष्णा सरा रूक्षा लघुः कटुः कफपित्तरक्तश्वासकासकृच्छ्रज्वरघ्नी। विस्फोटकुष्ठमेहास्रयोनिरोगक्लमिपाण्डुघ्नी च। भा.।

आदित्यवल्लभा (ल्लिका) (ल्ली) । स्त्री। आदित्यभक्तायाम्। वै. निघ.।

आदिबलप्रवृत्तः । त्रि। शुक्रशोणितान्वयजे। ये रोगाः शुक्रशोणितान्वयाः कुष्ठार्शःप्रभृतयः। तेऽपि पुनर्द्विविधा मातृजाः पितृजाश्चेति। सु.सू.२४अ.। एते आध्यात्मिकाः इति कथ्यन्ते।

आदिमा । स्त्री। भूमौ।

आदिवृक्षः । पुं। आमलकवृक्षे। सं आपटा वै.निघ.।

आदीनवः । पुं। दोषे। हारा.। क्लेशे। अम

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आद्यः। पुं। अङ्गुष्ठे। रत्ना.। क्ली। धान्ये। रा. नि.व.१६। त्रि। भक्षणीयद्रव्ये।

आद्यधातुः। पुं। शरीरस्थरसधातौ। वै.निघ.।

आद्यपुष्पम्। क्ली। त्रिभागकुङ्कुमीपेतकीवेरचन्दने। "त्रिभागकुङ्कुमीपेतं तदुक्तञ्चाद्यपुष्पकम्।" रा.नि.व.२२।

आद्यमाषकः। पुं। पञ्चगुञ्जापरिमितमाषमाणे। ५ रत्ति। अम.। ८० गुञ्जायां। वै.निघ.।

आद्यमाषा। स्त्री। माषपर्णीलतायाम्। माषाणी।

आद्या। स्त्री। भूमौ। वै.निघ.।

आद्यूनः। त्रि। औदरीके। अम.।

आर्द्र (कम्)। क्ली। (Zingiber officinale.) Common ginger. मूलविशेषे। आदा। हिं अदरख्। ते. अल्ल। गुणाः—"कफवातघ्नं स्वरकरं विबन्धानाहशूलघ्नं लघूष्णं रुच्यं हृद्यं ह्रष्यञ्च।" सु.सू.४५अ.। पुं। जलमार्जारे।

आधमनम्। क्ली। स्फीतौ।

आधानम्। क्ली। गर्भाधाने। [का.।

आधानिकम्। क्ली। गर्भधारणसंस्कारे। त्रि.

आधारः। पुं। अधिकरणे। आलवाले। मे.।

आधिः। पुं। मनोव्यथायां। प्रत्याशायां। मे.।

आधिदैविकः। त्रि। दैवताधिकृते।

आधिभोगः। पुं। अश्वगवादुपभोगे।

आधिभौतिकः। त्रि। चित्यादिसम्भूते।

आधिमन्यवः। पुं। ज्वराग्नौ। हारा.।

आधिशमी। स्त्री। शमीभेदे। वै.निघ.।

आधोरणः। पुं पुं। हस्तिपके। हला.।

आध्मातः। पुं। वायुरोगभेदे। मे.तद्विकं। क्ली। उदरस्फीतौ। च.द.अग्निमा.चि.पथ्यादिके। त्रि। दग्धे। स्फीते।

आध्मानः। पुं,क्ली। वातव्याधिविशेषे। आनाह उदरस्फीतौ। पेट फाँपा। स्वरूपं यथा—साटोपमत्युरुजमाध्मातमुदरं भृशम्। आध्मानमिति जानीयाद्घोरं वातनिरोधजम्। आध्माने लङ्घनं पूर्व्वं दीपनं पाचनं ततः। फलवर्त्तिक्रियां व्यौहस्तिकर्म्म च शोधनम्॥ सु.नि.१अ.।

आध्मानी। स्त्री। नलिकानामवणिग्द्रव्ये। रा. नि.व.१२।

आध्या (नम्)। स्त्री, क्ली। स्मृतौ। चिन्तायाम्। अम.शब्द.।

आध्यात्मिकः। त्रि। आत्मसम्बन्धीये।

आनः। पुं। अन्तर्मुखश्वासे। उच्छ्वासे। बहिर्मुखश्वासे। हे.च। [भा.।

आनन्दः। पुं। सम्मदे। मद्ये। राजजम्बूवृक्षे।

आनन्दपटम्। क्ली। नवौढ़ावस्त्रे। हारा.।

आनन्दप्रभवम्। क्ली। रेतसि। वीर्य्ये। हे.च.।

आनन्दभैरवः। पुं। शीताङ्गसन्निपाते रसः। व्योषं विकटु, पिप्पल्या मरिचस्य च पृथग्भागद्वयम् ग्राह्यम्। "हिङ्गुलञ्च विषं व्योषं मरिचं टङ्गणं तथा। जातीकोषं समं चूर्णं जम्बीरद्रवमर्द्दितम्। रक्तिमानां वटीं कुर्य्यात्...।" द्वितीयः ज्वरातिसारे। "हिङ्गुलञ्च विषं व्योषं टङ्गणं गन्धकं समं। जम्बीररससंयुक्तं मर्द्दयेद्यामकद्वयम्॥" मात्रा १र.। तृतीयः प्रमेहाधिकारे। अत्र रसः पारदभस्म। "वङ्गभस्म मृतं स्वर्णं रसं चौद्रे विमर्द्दयेत्। द्विगुञ्जं भक्षयेन्नित्यम्...।" र.सा.सं.।

आनन्दभैरवी (वटी)। स्त्री। शीताङ्गसन्निपाते रसः। हिङ्गुलं विषं विकटु मरिचं टङ्गणं (सोहागा) पिप्पली जातीकोषं (जयित्री) द्रव्याणि समभागानि। विषं विकटुकं गन्धं टङ्गणं मृतशुल्वकं। धुस्तूरस्य च बीजानि हिङ्गुलं नवमं स्मृतम्। एतानि समभागानि दिनैकं विजयाद्रवैः मर्द्दयेच्चणकाभान्तु वटीञ्चानन्दभैरवीं। भक्षयेच्च पिबेच्चानु वरीमूलकषायकं॥" र.सा.सं.।

आनन्दमयकोषः। पुं। कारणशरीरे। सुषुप्तौ।

आनन्दा। स्त्री। विजयायां। सिद्धि। हिं भाङ्। वार्षिकीपुष्पवृक्षे। वेलफूल। हिं बेला। भा.पू.१भ.पुव.। आरामशीतलतायाम्। रा.नि.व. १०। सुक्लपर्ण्याम्। वै.निघ.।

आनन्दी। स्त्री। आकन्द पाठा इति प्रसिद्धे वृक्षे। शब्दच.। आरामशीतलतायाम्। रा.नि.व.१०।

आनन्दोदयरसः। पुं। पाण्डुरोगे रसः। "पारदं गन्धकं लौहमभ्रकं विषमेव च। समांशं मरिचं चाष्ट टङ्गणञ्च चतुर्गुणम्। भृङ्गराजरसैः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्त भावनाश्चास्यदाड़िमैः। गुञ्जाद्वयं पर्णखण्डे खादेत्ततः।" भैष० पाण्डु०चि०।

आननम्। क्ली। मुखे। रा.नि.व.१८।

आनयः। पुं। उपनयने।

आनर्त्तः। पुं। जले। मे.तत्रिकं।

आनाखुः। पुं। इक्षुतुल्यायाम्। प.सु.।

आनाहः। पुं। विण्मूत्ररोधकव्याधौ। भूदो। तस्य लक्षणं—"आमं शुष्कञ्च निचितं क्रमेण भूयो विबद्धं विगुणानिलेन। प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति।" भा.। मा.नि।

आनीलः। पुं। नीलवर्णाश्वे। रङ्गे। मं कथिल। हे.च.। त्रि। ईषन्नीलवर्णे।

आनुलोमनः। त्रि। अनुलोमकारिणि। च. द.अर्श.चि.।

आनुलोम्यम्। क्ली। सारल्ये। च.द अर्शः।

आनुवासनिकम्। क्ली। अनुवासनवस्तौ। च. चि.३अ.। See अनुवासनवस्तिः।

आनूपः। पुं। महिषे। जटा। अनारस इति ख्याते वृक्षे। हिज्जलवृक्षे। देशजलगोहे। प.सु.। अनूपदेशवासिप्राणिमात्रे। देशविशेषे। क्ली। भौमजलविशेषे। तन्निरुक्तिगुणाः——रहस्वबहुवृक्षस्य वातश्लेष्मामयान्वितः। देशोऽनूप इति ख्यातः आनूपं तद्भवं जलम्॥ इति। See अनूपः।जले। रा.नि.व.१४। See जलम्।

आनूपजलम्। क्ली। अनूपदेशस्थजले। तद्गुणाः—स्वादु स्निग्धं गुरु पित्तहरं पामाकण्डूवातकफज्वरकरञ्च। रा.नि.व.१४।

आनूप-जाङ्गल-साधारणमांसम्। क्ली। रुरु-हरिण-मृगक्रोड़ सारङ्गाणां मांसेषु। तच्च लघु स्वादु बल्यं वृष्यं रुच्यञ्च। रा.नि.व.१७।

आनूपपक्षिमांसम्। क्ली। सारसहंसचक्रवाकादिमांसे। गुणाः—शीतलं स्निग्धं वात-कफघ्नं गुरुच। रा.नि.व. १७।

आनूपभूमिः। स्त्री। सजलभूमौ। See अनूपः।

आनूपमांसम्। क्ली। कूलेचर-प्लव-कोशस्थ-पादिमत्स्थानां मांसेषु। ते च गवय रुरु-च्छागक्रोड़-गण्डकादयः। रा.नि.व.१७। गुणाः—मधुरं स्निग्धं गुरु अग्निमान्द्यकरं कफकरं मांसपीषकं अभिष्यन्दि प्रायेण हितञ्च। भा.पू.१भ.। सि.यो.वा.व्या. श्लेष्म-स्वेदः।

आनूपवर्गः। पुं। तद्देशस्थप्राणिवर्गे। आनूपवर्गस्तु पञ्चविधः। तद्यथा—कूलचराः प्लवाः कोशस्थाः पादिनो मत्स्याश्चेति। तत्र गजगवयादयः कूलचराः पशवः। तन्मांसं वातहरं वृष्यं मधुरमित्यादिगुणयुक्तम्। हंससारसादयः प्लवाः सङ्घातचारिणश्च—तन्मांसं रक्तपित्तादिहरम्। शल्लशल्लकादयः कोशस्थाः—तन्मांसं स्वादुरसपाकत्वादिगुणम्। कूर्म्मकुम्भीरादयः पादिनश्च। सु. सू.४६अ.। आनूपास्तेषु विज्ञेयाः श्लेष्मला वातकोपनाः। अष्टा.२०अ.।

आन्तरि (री) क्षजलम्। क्ली। आकाशसलिले। तच्चतुर्विधं भवति धार-कार-तौषार-हैमभेदात्। तेषु धारं वर्षोद्भवं, वर्षोपलीद्भवं कारम्, नीहारतोयं तौषारं, तथा प्रातर्हिमोद्भवं हैममिति। धारमपि द्विविधं सामुद्रगाङ्गभेदात्—तयोर्गाङ्गं गुणाढ्यमदोषं पाचनञ्च। तदुक्तं आश्विने स्वातिविशाखस्थे रवौ मेघो यद्वर्षति वारि तद्गाङ्गं, तथा मार्गशिर्षादिनक्षत्रेषु मेघो यद्वर्षति तोयं तत्सामुद्रं ज्ञेयम्। तत्परीक्षा दधिलिप्ते रौप्यपात्रे शाल्योदनपिण्डं विन्यस्य वर्षायां धृतेन विकारमेति मुहूर्त्तेन तदा गाङ्गं ज्ञेयम्। तच्च जलं गाङ्गं स्वादु शीतलं रुचिप्रदं कफ-पित्तघ्नं निर्दोषं स्वच्छं लघु नित्यगुणाधिकञ्च। तथा सामुद्रजलं शीतं गुरु कफवातकरं। यथा चित्रानक्षत्रे पतितं तद्गुणाढ्यं गाङ्गवद्भवति, तथोभयविधमेव वारि रसाश्रयवशाद्भुवि पतितं नानारसत्वं याति। रा.नि.व.१४। See गगनाम्बु।

आन्त्रम्। क्ली। अन्त्रे।

आन्त्रिकः। त्रि। अन्त्रसम्बन्धीये।

आन्दोलनम्। क्ली। कम्पे।

आन्ध्रसिकः। त्रि। पाचके। अम.।

आन्ध्रदेशपूगम्। क्ली। तद्देशीयपूगफले। गुणाः—पाके मधुरं किञ्चिदम्लं तुवरं वातकफघ्नं सुखजाड्यकरञ्च। वै.निघ.।

आपः। (स) क्ली। जलसमूहे। पुं। अष्टवसुभेदे। स्त्री। शालके। वीणा। अम.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आपक्वम् । त्रि । ईषत्पक्वे कलायादौ । अम. । रोटिका इति कश्चित् ।

आपगाजलं (वारि) (सलिलम्) । क्ली । नदीजले । गुणाः—"नादेयं दीपनं रूक्षं वातलं लघु लेखनं" । मद.व.८ । See नदी ।

आपणः । पुं । हट्टे । पण्यविक्रयस्थाने । अम. ।

आपतिकः । पुं । श्येनपक्षिणि । बाजपक्षी ।

आपनम् । क्ली । मदिरे । श.च. ।

आपनिकः । पुं । इन्द्रनीलरत्नौ ।

आपन्नसत्वा । स्त्री । गर्भवतीनाम्न्यां । रा.नि व१८ ।

आपस्तम्भिनी । स्त्री । त्रिङ्गिनीलतायाम् । रा.नि.व.३ ।

आपाकः । पुं । दीयान् इति कुम्भकारस्य आर्द्र-शुष्कसूत्यावदाहस्थाने । जटा. ।

आपानम् । क्ली । पानभूमौ । हला. ।

आपालिः । पुं । केशकीटे । ऊकुण । अम. ।

आपिञ्जरम् । क्ली । स्वर्णे । सोणा । रा.नि. व.१३ ।

आपीतः । पुं । तृणवृक्षे । डूँद गाछ । गुणाः—कटुः कषायो मधुरः लघुः तिक्तः ग्राही हिमो हृद्यः व्रण-कुष्ठ-रक्तपित्तघ्नश्च । भा.पू.१भ. । क्ली । रौप्यमाक्षिकधातौ । स्वर्णमाक्षिके । रा.नि. व.१३ । पद्मकेशरे । मद.व.३ ।

आपीनम् । क्ली । उधसि । हला. । सुवर्ण-सूक्ष्याम् । सोणामूथी । अम. । पुं । कूपे ।

आपुपः (पूपः) । पुं । पिष्टके । रत्ना. । आनूपजन्तुमात्रे । राज. ।

आपूप्यः । पुं । शष्कुलि । चूर्णके । छातू, मयदा वेशम् । विका ।

आपूर्य्यमाणः । पुं । शुक्लपक्षे ।

आपूषम् । क्ली । रङ्गे । राङ, रङ्ग । रा.नि.व.१३ ।

आप्तः । त्रि । विश्वस्तवाचि । "रजस्तमोभ्यां निर्मुक्ता तपोज्ञानबलेन ये । येषां त्रिकालममलं ज्ञानमव्याहतं सदा । आप्ताः शिष्टा विबुधास्ते तेषां वाक्यमसंशयम् ॥" चर. ।

आप्ता । स्त्री । जटायाम् । हारा. ।

आप्यम् । क्ली । कण्ठौषधौ । कुड़ । अ.टी. । भा.पू.१भ. । त्रि । जलविकारजे फेनादौ ।

आप्यायनम् । क्ली । तर्पणे । प्रीणने । रा.नि. ।

आप्रु(प्लु)वः (प्लुतम्) । पुं. क्ली । स्नाने । अम. । हे. च. ।

आफिङ्गम् । क्ली । अहिफेने । श.चि. ।

आफोनम् । क्ली । अहिफेने । वै.निघ ।

आफु(फू)क्कम् । क्ली । अहिफेने । आफिम् । भा.पू.१भ. ।

आबाधा । स्त्री । पीड़ायाम् ।

आब्दिका । स्त्री । तिन्तिड्याम् । श.र. ।

आभा । स्त्री । वल्लूरे । वाबला । सं बाभूल । भा.पू.१भ.वटादिव. । च.द.भग्न.चि.वा.व्या.एरण्ड-पाके । भा.त्रिकशूल-चि. । महाश्रतावर्य्याम् । See बर्बूरः ।

आभागुग्गुलुः । पुं । भग्नाधिकारे, भग्नस्थाने च हितकरः । आभावल्लूरे । वाबला । "आभा-फलत्रिकवर्योघैः सर्व्वैरेभिः समीकृतैः । तुल्यो गुग्गुलुरायोज्यो भग्नसन्धिप्रसाधकः ॥ च.द.भग्न.चि. ।

आभोगम् । क्ली । शरीरपीड़ायाम् । वै.निघ. ।

आमः । पुं । व्याधिभेदे । मे. । मलवैषम्यरोगे । रा.नि.व.२० । अपक्वान्नजरसे । स्त्री.ङी.-अजी.चि. हृन्दः । तल्लक्षणं यथा—"आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात् । आमसंज्ञां स लभते बहु-व्याधिसमाश्रयः । आमसङ्घरसं केचित् केचित्तु मल-सञ्चयम् । प्रथमां दोषदुष्टिं वा केचिदामं प्रचक्षते ॥ उष्णोऽल्परसत्वेन धातुमाद्यमपाचितम् । दुष्ट-मामाशयगतं रसमामं प्रचक्षते ॥" इति । विज.र. । षट्प्रकाराजीर्णरोगेषु । See अजीर्णम् ।

आमकः । पुं । कृष्माण्डे ।

आमगन्धिः । त्रि । विस्रगन्धयुक्ते । आँस्टे-गन्धयुक्त । अम. ।

आमगन्धिहरिद्रा । स्त्री । (Curcuma reclinata.) आम आदा । हिं आमहलदी । वै.निघ. ।

आमघ्नी । स्त्री । कटुकायाम् । रा.नि.व.६ ।

आमचनकः । पुं । अपक्वचणके । काँचा छोला । सं कंचे शीदे, शीलेहरभरे । कं रहिला.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्तियवकली। गुणाः—शीतलः रूक्षः सन्तर्पणः तृष्णादाहहरः गौल्यः अम्लरोगोपघ्नः कषायः ईषत्कटुवीर्य्यश्च। रा.नि.व.१६।

आमज्वरः। पुं। अपक्वज्वरे। काँचा ज्वर। "खलाम्लसेकी हृल्लासहृदयागुल्मरोचकम्। तल्लालस्याविपाकाय वैरस्यं गुरुगावता"...इत्यादि आमज्वरस्य लिङ्गम्॥ मा.नि.।

आमण्डः (कः)। पुं। एरण्डवृक्षे। प.मु.। गुल्फैरण्डे। रा.नि.व.८। भा.पू.१भ.।

आमण्डवासः। पुं। आसवे। वै.निघ.।

आमतिन्तिड़िः (ड़ी)। स्त्री। अपक्वतिन्तिड्याम्। काँचा तेँतूल।

आमनस्यम्। क्ली। वैसनस्ये। दुःखे, पीड़ायाम्। अम.।

आमपत्रिका। स्त्री। चिल्लीशाके। सं चिविड़ि। वै.निघ.।

आमपीनसम्। क्ली। कफे। कफाक्रमणे। सन्धि ६ ओन।

आमयः। पुं, क्ली। व्रणामुकरणे। र.मा.। कुष्ठे। कुड़। रा.नि.व.११। सि.यो.अप.चि। "शिरीषस्वगुनाम्बयैः।" भा.म.१भ.ज्व.चि. शालूरपर्ण्यादिसूक्ष्मामयमधुघृता। रोगे। उष्ट्रे। रा.नि.व.२०।

आमयव्याप्तः। त्रि। रोगिणि।

आमयावी। त्रि। रोगिणि। रा.नि.व.२०।

आमरक्तम्। क्ली। रक्तामाशयरोगे। मा.नि.। See अतिसारः।

आमरसः। पुं। अपक्वरसे। सि.यो.अजी.चि. श्रीकण्ठः।

आमलः (कः)। स्त्री। आमलक्यां। आमलागाछ। वासकवृक्षे। वासक गाछ। भ.च.। काष्ठधात्रीफले। काठ आमला। See काष्ठधात्रीफलम्। पक्वकाष्ठे।

आमलकचूर्णम्। क्ली। रसायनाधिकारे। च.चि.१अ.।

आमलकशुण्ठः। पुं। काष्ठामलके। "सुद्गामलकशुण्ठयौ।" अ.हृ.ज्व.पञ्चदुष्टिः।

आमलका (की)। स्त्री। (Phyleanthus emblica. Syn. Emblica officinalis.) स्वनामख्यातवृक्षे। आमला-गाछ। हिं अंवीरा। सं आंवले। कं नेल्लि। उत्, कड़ा। तत्पर्य्यायः,—तिष्यफला अक्षता वयस्था वयःस्था काश्यस्था (अ), अकरा (श), बहुफली (मे), धात्रिका शिवा धात्री अक्षतफला वृष्या वृत्तफला रोचनी (रा), पञ्चरसा (शब्दभा.), कर्षफला तिष्या (र)। आमलकीगुणाः हरीतकीतुल्याः। विशेषस्तु रक्तपित्तप्रमेहशान्तिकरी स्वास्थ्यकरी रसायनी अम्लरसा च। सद.व.१। भा.पू.१भ.। कषायाम्ला मधुरा शीतला लघुः दाह-पित्त-वमि-मेह-शोषघ्नी रसायनी च। रा.नि.व११। अम्लाः फलजपि अम्लत्वाद्वायुं माधुर्य्येण पित्तं रूक्ष-कषायत्वात् कफञ्च हन्ति इति विद्दीपघ्नं। सद.व.१। आमलक्य फलं शुष्कं तिक्तमम्लं कटु स्मृतम्। मधुरं तुवरं कैश्यं भग्नसन्धानकारकम्। तथा आमलक्यास्तु वृक्षस्य सञ्जातु तुवरा मधुः। वमिरक्तपित्तघ्नी चान्ये तु फलवद्गुणाः। वै.निघ.। अम्लसामलकं लघुशीतवीर्य्यत्वात् पित्तं शमयति। सु.सू.४५अ.। तान् गुणांस्तानि कर्म्माणि विद्याद्दामलकेष्वपि। यान्युक्तानि हरीतक्यां वीर्य्यस्य तु विपर्य्ययः॥ च.चि.१अ.। काष्ठधात्रीफलं स्वादु कषायं कटु शीतपित्तास्रदोषघ्नञ्च। भूम्यामलक्याम्।

आमलकायसम्। क्ली। रसायनविशेषे। इदं ब्रह्मरसायनमपि कथ्यते। आमलकं निरस्थि यथोक्तविधिना शुष्कं ८भ, जीवनीयादिकं मिलितं ८भ, दशगुणवारिणा क्वाथयित्वा पादशेषे पूतं क्वाथं गृह्णीयात्। तेन चूर्णं यथाविहिताग्निना साध्यम्। च.चि.१अ.।

आमलकावलेहः। पुं। रसायनविशेषे। च.चि.१अ. रसायनाधिकारे।

आमलकीपत्रम्। क्ली। तालीशपत्रे। वै.निघ.।

आमलक्यादिः। पुं। तदादिवर्गे। आमलकी हरीतकी पिप्पली विभीतकश्चेति। आमलक्यादिरित्येष गणः सर्व्वज्वरापहः। चक्षुष्यो दीपनो वृष्यः कफारोचकनाशनः॥ सु.सू.३८अ.।

आमलक्यादिचूर्णम्। क्ली। सर्व्वज्वरे हितं भेदि दीपनञ्च। आमलं चित्रकं पथ्या पिप्पली सैन्धवं तथा। चूर्णितोऽयं गणो ज्ञेयः सर्व्वज्वरहरः परः॥ भा.म.२भ.ज्व.चि.।

आमलच्छदः। पुं। तालीशपत्रे। वै.निघ.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आमलाद्यलौहम्। क्ली। रक्तपित्ते रसविशेषः। अत्र लौहं सर्व्वचूर्णसमं। आमलापिप्पलीचूर्णं तुल्यया सितया सह। रक्तपित्तहरं लौहं योगराजमिदं स्मृतम्॥ र.सा.सं.।

आमली। स्त्री। भूम्यामलक्याम्। वै.निघ.।

आमवातः। पुं। Acute rheumatism. स्वलक्षणविशिष्टवातरोगविशेषे। आमवात। "अङ्गमर्दोऽरुचिस्तृष्णा चालस्यं गौरवं ज्वरः। अपाकः शूलताङ्गानामामवातस्य लक्षणमिति तल्लान्तरम्। विरुद्धाहारचेष्टाभ्यां मन्दाग्नेर्निश्चलस्य च। स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्व्वतस्तथा॥ वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति। तेनात्यर्थं विदग्धोऽसौ धमनीः प्रतिपद्यते। वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः। स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः। जनयत्याशु दौर्ब्बल्यं गौरवं हृदयस्य च। व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः। युगपत्कुपितावन्तस्त्रिकसन्धिप्रवेशकौ। स्तब्धं वा कुरुतो गात्रं आमवातः स उच्यते।" मा.नि.।

आमवातगजसिंहमोदकः। पुं। आमवाते हितकरः। अवादौ खण्डं किञ्चिज्जलञ्च संमिश्र्य मृद्वग्निसन्तापे उष्णीकृत ततश्चूर्णादि सर्व्वं प्रक्षिप्य मोदकवत्पचेत्। ततो घृतं मधु च प्रक्षिपेत्। "शुण्ठीचूर्णस्य प्रत्येकं यमान्याश्च पलाष्टकं। जीरकस्य पले द्वे च धान्यकञ्च पलद्वयं। पलैकं शतपुष्पायाः लवङ्गस्य पलं तथा। टङ्कणस्य पलं भृष्टं मरिचस्य पलानि च। त्रिवृतात्रिफलाचारपिप्पलीनां पलं तथा। शर्क्करा तेजपत्रञ्च चविकानां पलं तथा। अभ्रं लौहं तथा वङ्गं प्रत्येकञ्च पलं पलम्। एतेषां सर्व्वचूर्णानां खण्डं दद्यात् गुणत्रयं। घृतेन मधुना मिश्रं कर्षमात्रन्तु मोदकं"॥ र.सा.सं.।

आमवातारिगुड़िका (वटिका)। स्त्री। आमवाते रसः। रस गन्धक सोहागा सैन्धव लौह ताम्र शङ्खभस्म—एषां प्रति १ तो. गुग्गुलोः १४ तो. त्रिफलाचूर्ण ३॥ तो. चित्रकचूर्ण ३॥ तो. सर्व्वं घृतेन विमर्द्य वटी कार्य्या। सा.कौ.। रस.र.। रसगन्धकलौहाभ्रं तुल्यं टङ्कणसैन्धवं। समभागं विचूर्ण्याथ चूर्णाद्विगुणगुग्गुलुः॥ गुग्गुलोः पादिकं दद्यात् त्रिवृतामूलवल्कलम्। तत्समं चित्रकं देयं घृतेन परिमर्दयेत्॥ खादेन्माषद्वयं चास्य त्रिफलाचूर्णयोगतः॥ इति। रसगन्धौ वरावङ्गिर्गुग्गुलुः क्रमवर्द्धितः। एतदैरण्डतैलेन मर्द्दयेदतिचिक्कणम्॥ इति च। र.सा.सं.। पाठान्तरे—रसगन्धकलौहार्कतुल्यटङ्कणसैन्धवान् इति। तथा—रसगन्धकलौहार्कशङ्कटङ्कणसैन्धवान् इति च।

आमवातेश्वररसः। पुं। आमवाते रसः। अत्र गन्धकादिसर्व्वं द्रव्यं पञ्चाङ्गुलरसे इति एरण्डमूलरसे। पुनः पुनरिति सप्तवारं भावयेत्। ततः सञ्चूर्ण्य पञ्चकोलक्वाथैः २० वारान् भावयेत्। ततः टङ्कणादिसर्व्वं योज्यम्। पाठः—शुद्धगन्धं पलार्द्धञ्च मृततास्रञ्च तत्समं। ताम्रार्द्धं पारदं शुद्धं रसतुल्यं मृतायसं। सर्व्वं पञ्चाङ्गुलीनैव भावयेच्च पुनः पुनः। संचूर्ण्य पञ्चकोलीयैः क्वाथैः सर्व्वं विभावयेत्। रौद्रे विंशतिवारांश्च गुडूचीनां रसैर्दश। भृष्टटङ्कणचूर्णेन तुल्येन सह मेलयेत्। टङ्कणार्द्धं विड़ं देयं मरिचं विड़तुल्यकं। तिन्तिड़िक्षारतुल्यञ्च मृततुल्यञ्च दन्तिकं। त्रिकटु त्रिफलञ्चैव लवङ्गं चार्द्धभागिकं। आमवातेश्वरो नाम विष्णुना परिकीर्त्तितः॥ र.सा.सं.।

आमशूलः। पुं। The cholic pain arising from indigestion. आमजन्यशूलरोगभेदे। तल्लक्षणं यथा—"आटोपहृल्लासवमीगुरुत्वस्तैमित्यमानाहकफप्रसेकैः। कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति॥" इति निदानम्।

आमाजीर्णम्। क्ली। आमरसाजीर्णे।

आमातीसारः। पुं। Dysentery. षड्विधातीसारान्यतमे रोगविशेषे। अस्य सम्प्राप्तिः—अन्नाजीर्णात्प्रदुताः क्षोभयन्तः कोष्ठं दोषा धातुसङ्घान् मलांश्च। नानावर्णं नैकशः सारयन्ति शूलोपेतं षष्ठमेनं वदन्ति॥ संसृष्टमेभिर्दोषैश्च न्यस्तमप् स्वसीदति। पुरीषं भृशदुर्गन्धि पिच्छिलञ्चामसंज्ञितम्।" मा.नि.।

आमानुबन्धः। पुं। आमसातत्ये। सर्व्वदा आमसञ्चये। च.द.ग्रह-चि.गुल्मादिः।

आमान्नम्। क्ली। अपक्वान्ने। काँचा वा आतप चाउल।

आमाम्रम्। क्ली। बालाम्रे। कचि आम्। गुणाः—"कषायमम्लरसं रूक्षं वातपित्तवर्द्धकञ्च।" भा.पू.१भ.।

आमावस्था। स्त्री। अपक्वावस्थायाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आमाशयः। पुं। आमस्थाने। स च नाभिस्तनयोर्मध्यभागे। "नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः।" रा.नि.व.१८। च.। प्रवाहिकारोगे। आमाशा रोग। See प्रवाहिका।

आमिषम्। क्ली। मांसधातौ। मांसे। रा.नि. व.१७। भोग्यवस्तुनि। मे.षविकं। विका.।

आमिषकरम्। क्ली। शोणिते।

आमिषगन्धिनी। स्त्री। पूतन्यां। पूदिना।

आमिषप्रियः। पुं। कङ्कपक्षिणि। वाज पक्षी, काकपक्षी। रा.नि.व.१९। वि। मांसभक्षके।

आमिषभूक्(क्षाशी)। वि। सत्यमांसभक्षके।

आमिषस्नेहः। पुं। वसायाम्।

आमिषी। स्त्री। जटामांस्याम्। अ टी.भ.।

आमि(मी)क्षा। स्त्री। चीरसायाम्। छानां इति लोके। तक्रकूर्चिकायां। सन्तानिकायाम्। "तप्ते पक्वे च पयसि दधियोगेन जातायां दुग्धविकृतौ। घृते चीरे दधि चित्तमामिक्षा कथ्यते बुधैः।" हेमा.।

आमिक्षीयम्। क्ली। दधनि।

आमुषः। पुं। (Bambusa Spinosa.) कण्टकयुक्त-वंशविशेषे। वेऊड़ बाँश। श.च.

आमोदः। पुं। दूरगामिगन्धे। शतावर्य्याम्।

आमोदकः। पुं। यवानिकायां। वै.निघ.।

आमोदजननी। स्त्री। नागवल्ल्यां। पान। वै निघ.।

आमोदा। स्त्री। शतावर्य्याम्। शुल्फायाम्।

आमोदी। वि। सुखवासने। कर्पूरादिवटिकाकृतसुखगन्धे। अ. टी.।

आम्बोली। स्त्री। रक्तकुरण्टकभेदे, कोङ्कणदेशे स्वनाम्ना ख्याते। रक्तझाँटीविशेष। (प्राकृतशब्दः)।

आम्भसिकः। पुं। मत्स्ये। वि। जलसम्बन्धीये।

आम्रः। पुं। (Mangifera indica) Mango tree, स्वनामख्यातवृक्षे। आम् गाछ। मं आंवाफल। कं माविनफल। तें माविड़ि। तत्पर्य्यायाः,—चूतकः (मे), पिकवल्लभः (भा), अमः (शब्द. र.), फलश्रेष्ठः फलोत्पतिः सुषालकः (श), चूतः रसालः सौरभश्चेत् सहकारः (अ), आकन्दः षट्पदातिथिः मधुदूतः वसन्तदूतः पिकप्रियः स्त्रीप्रियः गन्धबन्धुः अलिप्रियः (शब्द-र.), अरिष्टः मदिरासखः (ज), पिकबन्धुः (वि), कैशवायुधः कीर्षी परपुष्ट-सहोत्सवः (शब्दमा.) कामशरः कामवल्लभः कामाङ्गः कौरिष्टः माधवद्रुमः भृङ्गाभीष्टः सीधुरसः माधुली कोकिलोत्सवः वसन्तदूतः अम्लफलं मोदाख्यः मन्मथालयः मधुवासः सुमदनः पिकरागः नृपप्रियः प्रियम्बु कोकिलावासः। आम्रः पञ्चविधः साधारणाम्र-कोशाम्र-राजाम्र महाराजाम्र-रसालाम्राश्च। एषां विशेषाः स्वस्वपर्य्याये मुख्याः। बालाम्रादिगुणाः यथा—कषायाम्लरसं सुगन्धि कण्ठरोगघ्नम् अग्निकरञ्च। ग्राहि मेहरक्तकफपित्तव्रणघ्नञ्च। मद. व. ६। पित्तप्रकोपवातरक्तकरं लवणादिना रुचिकरञ्चेति। बद्धास्थि पित्तानिलकफकरं बालवदेव। पक्वं तच्चिरदोषशमनं स्वादु पुष्टिकरं गुरु धातुवृद्धिकरं सन्तर्पणं कान्तिकारि तृष्णाश्रमघ्नञ्च। रा. नि. व. ११। वा. सू. १५ अ. न्यग्रोधादिः। तरुपक्वाम्रं गुरु वातहरं मधुराम्लं पित्तप्रकोपनञ्च। कृत्रिमपक्वं पित्तघ्नम्। पर्य्युषिताम्रं रुच्यं बल्यं वीर्य्यकरं लघु शीतलं वातपित्तहरं सारकञ्च। गालिताम्ररसः बल्यः गुरुः वातहरः सारकः अहृद्यः अतितर्पणः बृंहणः कफवर्द्धनश्च। आम्रखण्डं गुरु अतिरोचनं दुर्जरञ्च। दुग्धाम्रं हृद्यं वर्ण्यं स्वादु गुरु शीतलं रुच्यं बृंहणं बल्यञ्च। आमातियोगे मन्दाग्नित्वं विषमज्वरं रक्तामयं वङ्क्षणोदरं नेत्रामयञ्च करोति। भा. पू. १ भ.। अपक्वाम्रं फलमेव ग्राह्यं संग्राहि पित्तास्रजि कोपनञ्च। तथा विपक्वं मधुरञ्च चाम्लं भेद्यं सपित्तामयनाशनञ्च॥ अवि. १७अ.। क्ली। आम्रफले। पले, ८ तो.। प. प्र. १ ख.।

आम्रगन्धकः (धृत्)। पुं। समष्ठीलचुपे। मं कीतुंवा। रा. नि. व. ४।

आम्रगन्धा। स्त्री। कर्पूरहरिद्रायाम्। आम्-आदा। हिं कर्पूरहर्दि। भा. पू. १भ.।

आम्रगन्धिहरिद्रा। स्त्री। आम्रहरिद्रायां।

आम्रतैलम्। क्ली। आम्रास्थितैले। आमेर कुशीर तैल। गुणाः—ईषत्तिक्तं मधुरं नातिपित्तकृत् वातकफहरं रुच्यं सुगन्धं विशदञ्च। मद व. ८। सहकारतैलमीषत्तिक्तमतिसुगन्धि वातकफहरं सूक्ष्मं मधुरं कषायमेवंवातरक्तपित्तकरञ्च अवि: १४ अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आम्रत्वचा । स्त्री । आम्रवल्कले । आंबेर छाल । गुण:—कषाया । रा. नि. व. ११ ।

आम्रनिशा । स्त्री । आम्रहरिद्रायां । वै. निघ. ।

आम्रपल्लव: । पुं. क्ली । आम्रकिसलये । च. सू. छर्द्यां । गुणा:—रूक्ष: कफपित्तघ्न्य । भा. पू. १भ. ।

आम्रपुष्पम् । क्ली । आम्रमुकुले । आंबेर बोल । गुणा:—रूच्यं दीपनञ्च । रा. नि. व. ११ । अतीसार-कफपित्तप्रमेहघ्नं रक्तदुष्टिकरं शीतं वातलञ्च । भा. पू. १भ. ।

आम्रपेशिका (ष्टी) । स्त्री । गुल्कामखण्डे । आमचूर, आम्शी । सं आंबीशी । गुणा:—अम्लमधुरा कषायरसा भेदिका वातकफघ्नी च । भा. पू. १ भ. ।

आम्रफलम् । क्ली । आम्बे ।

आम्रफलपानकम् । क्ली । आम्रफलकृत पानकविशेषे । आंबेर पाना । "आम्रसारं जले स्विन्नं सर्द्दितं दृढ़पाणिना । सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितं । प्रपाणकमिदं श्रेष्ठं भीमसेनेन निर्म्मितं । सद्यो रुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम् ॥" भा. पू. १भ. ।

आम्रमय: । त्रि । आम्रकृते ।

आम्रमूलम् । क्ली । आम्रशिफायां । आंबेर शिकड़ । गुणा:—सुगन्धि रूच्यं संग्राहि शीतलञ्च । रा. नि. व. ११ ।

आम्ररसाकृति: । पुं । रसालाभेदे । किञ्चित्कुङ्कुमसंयुक्ता विमस्तुदधिगालिता । सशर्करं भवेत्पीता पक्वाम्ररससन्निभा ॥ पीता शिखरिणी या सा लघ्वी वर्णवती हि सा । सुरुच्या मधुरा बल्या वातपित्तहरापरेति ॥

आम्रलेह: । पुं । आम्रकृतलेहे । हिं रायता । आंबेर चाट । "तरुणाम्रं भर्ज्जयित्वा सर्द्दयेद्गुड़शर्करे । सैन्धवं मरिचं हिङ्गु भर्जितं तत्र निःक्षिपेत् । रुचिकृच्चाम्रलेहोऽयं मधुरस्तृप्तिकारक: । हृद्य: स्निग्धो गुरुश्चोक्त: पाकविद्याविशारदै: ॥" वै. निघ. ।

आम्रवन्द: । पुं । आम्रवन्दायाम् । आम्रगाछेर वान्दरा । वै. निघ. २भ. ज्व. चि ।

आम्रव(वा)ट: । पुं । आम्रातके । मद. व. ६ ।

आम्रवीजम् । क्ली । आम्रास्थिनि । आंबेर आँटी वा कुशी । हिं बीइलीया । गुणा:—कषायं ग्रहणीसारघ्नं ईषदम्लं मधुरं हृदयदाहघ्नञ्च । भा. ।

आम्रवेतस: । पुं । अम्लवेतसे । रा. नि. व. ६ ।

आम्रहरिद्रा । स्त्री । आम्रनिशायाम् । आम्रहलूद । गुणा:....."तिक्ता चाम्ला रुचिप्रदा । लघ्वग्निदीपनी चोष्णा त्रुवरा च सरा मता । कफस्त्रीव्रणं कासं श्वासं हिक्कां ज्वरं तथा । मुखरोगं रक्तदोषं नाशयेत् ।" वै. निघ. ।

आम्रात: (क:) । पुं । The hogplum (Spondias mangifera.) स्वनामप्रसिद्धे वृक्षविशेषे । आमड़ा गाछ । हिं आम्बाड़ा । सं इरम्मालआंबा, आंबाड़े । तत्पर्य्याय:,—पीतन: कपीतन: वर्षपाकी (र), मधुराम्लक: (ग), पीतनक: कपीचूता अम्बाटिक: खड्गीफल: रसाढ्य: तनुचीर: कपिप्रिय: अम्बरातक: कपिचूत: अम्बरीष: (ज), आम्रात: अम्रात: (शब्द मा.) अम्रातक: अध्वगभोग्य: (त्रि) । फलगुणा:—"आम्रातमल्पवातघ्नं गुरुणं रुचिकृत्परं । पक्वन्तु तुवरं स्वादुरसपाकं हिमं स्मृतं । तर्पणं श्लेष्मलं स्निग्धं वृंहणं विष्टम्भि दुर्जरं । गुरु बल्यं मरुत्पित्तक्षत-दाह-क्षयाञ्जयेत् । आमं फलं कषायाम्लं । पक्वं तत् मधुराम्लं स्निग्धं पित्तकफघ्नञ्च । रा. नि. व. ११ । आम्रावर्त्त । आमोट्, आमसत्व इति ख्याते । "पक्वस्य सहकारस्य कटे विस्तारितो रस: । घर्म्मशुष्को मुहुर्दत्त आम्रातक इति स्मृत: ॥" क्ली । आम्रातकफले । आमड़ा । राजाम्र । भा. पू १भ. ।

आम्रातक: । पुं । पलाशिकायाम् । रा. नि व. २३ । च. सू. ४ अ. ।

आम्रावर्त्त: । पुं । Inspissated mango juice. आम्रातके । आमोट्, आमोट, अमावट इति च प्रसिद्धे । हिं अम्बट । सं आंबेरसाचींपीलो । विधि:—पक्वाम्ररस: पटे विस्तारित: रौद्रशुष्क: आम्रावर्त्त उच्यते । गुणा:—तृष्णाच्छर्द्दिवातपित्तघ्न: सारक: रुच्य: लघुश्च । भा. पू. १भ. ।

आम्रास्थि । क्ली । आम्रवीजशस्ये । आंबेर आँटी । च. सू. ४अ. ।

आम्ल: पुं । तिन्तिड्याम् । तेँतुल गाछ । अम्लवेतसे । मद. व. ६ । वै. निघ. २भ. वा. व्या. प्रत्य-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीला-चि. वि.। अम्लरसे। "अम्लस्तु पाचकी रुच्यः लघुः पित्त-कफप्रदः। क्षुधनीशः क्लेदनश्च वाह्नि शीतलताकरः। निर्धीशः सारकश्च स्यात् भ्रमसङ्कोचनकारकः। द्विजरोमृणां हर्षदश्च वातनाशकरो मतः। अम्लातेसिद्धनेनैव तिमिरं दाहलड्भमाः। ज्वरकण्डुपाण्डुरोगविसर्पक्लोटकुष्ठहृत्।" वै.निघ.।

आम्लका। स्त्री। नागरदेशप्रसिद्ध-पलाशीलतायाम्। वै.निघ.।

आम्लटकः। पुं। चुक्रवृक्षे। चूको। र.मा.।

आम्लपञ्चकम्। क्ली। अम्लरसयुक्तफलपञ्चके। यथा —कोल-दाडिम-हिन्तालु-चुक्रिकाम्लवेतसैः पञ्चाम्लफलम्। कुल, डालिम, तेँतुल, चूकापालंग ओ वैकल एই पाँचटी अम्लद्रव्य। जम्बीर-नारिङ्गाम्लवेतस-तिन्तिड़ी-बीज-पूरकमिति वा फलाम्लपञ्चकम्। रा. नि. व २२ पञ्चाम्ल।

आम्लपत्रकः। पुं। चुक्रायां। टक पालङ्। वै. निघ.।

आम्लपर्णी। स्त्री। पलाशीलतायां। वै.निघ.।

आम्लपित्तम्। क्ली। स्वनामख्यातरोगविशेषे। See अम्लपित्तं।

आम्लफलम्। क्ली। कपित्थफले। वै. निघ.।

आम्लबोठिका। स्त्री। क्षुद्रचिञ्चायाम्। वै. निघ.।

आम्लबोणिका। स्त्री। अम्लबोणिकायाम्। आमरुल।

आम्लवक्त्वम्। क्ली। पित्तजन्यरोगविशेषे।

आम्लवती। स्त्री। अम्लबोणिकायाम्। मं आंबवली। वै. निघ.।

आम्लवर्गः। पुं। आम्लवर्गे। See आम्लवर्गः।

आम्लवल्ली। स्त्री। आंवटवेल इति महाराष्ट्रप्रसिद्धलतायाम्। गुणाः —"आम्लवल्ली दीपनी स्वात्तीक्ष्णाम्ला रुचिदा मता।" वै.निघ.।

आम्लवास्तुकः। पुं चुक्रिकायां। चूका वेतो। वै.निघ.।

आम्लवेतसः। पुं। अम्लवेतसे। See अम्लवेतसः।

आम्ला। स्त्री। तिन्तिड़ीकायाम्। लिङ्गिनीलतायाम्। श.र.। श्रीवल्ल्याम्। रा.नि.व.८।

आम्लातकः। पुं। आम्रातके। रत्ना.।

आम्लातकी। स्त्री। पलाशीलतायाम्। रा. नि.व.४।

आम्लानिकः। पुं। पीतभिण्टीवृक्षे। र.मा.।

आम्लि (म्ली)का। स्त्री। अम्लिकायाम्। तेँतुल गाछ। अम्लीसारे। श.मा.।

आयतः। वि। दीर्घे। विस्तृते।

आयतच्छदा। स्त्री। कदलीवृक्षे मद.व.५।

आयतनम्। क्ली। अधिष्ठाने। आश्रये। हेतौ। भा.।

आयतपत्रा(त्री)। स्त्री। कदलीवृक्षे। वि.का.।

आयसम्। क्ली। तीक्ष्णलौहे। रा.नि.व.१३। लौहसामान्ये। रत्ना.।

आयसमलम्। क्ली। मण्डूरलौहे। च.द.पाण्डुचि.। लौहमले।

आयस्तः। वि। तेजिते। क्षिप्ते। मे. तच्चिकं।

आयामः। पुं। वातरोगभेदे। स द्विविधः, अभ्यन्तरायामः, बाह्यान्तरायामश्चेति। दैर्घ्ये। अम.। सङ्कुचितायदेशस्य व्रणस्य दीर्घीकरणे। सु.चि.१७अ.।

आयामकाञ्जिकम्। क्ली। ग्रहण्यधिकारे निस्तुषदरदलितयवे। चतुर्गुणजलसाधितयवमण्डे १६ श. (यवः ८ प. जलं ६४ श. शे. १६ श.) यवशक्तु ८श. मध्यविल्वमूलकानि ६४, वारि ६४ श. एकत्र स्थापनीयम्। ततो यवचारादिकं प्रत्येकं पलद्वयं (१६ तो.) तथा पिप्पल्यादीनां प्रत्येकं पलमितं (८ तो.) तच्च दत्त्वा विशुद्धघटे पञ्चदशदिनं यावत् स्थापयेत्। च.द.ग्रह.चि.। भैष.।

आयासः। पुं। श्रान्तौ। हे. च.।

आयुः। पुं, क्ली। जीवितकाले। जटा.। औषधे। घृते। रा.नि.व.१५। वसायाम्। रा.नि.व.१८।

आयुश्शेषः। पुं। मृत्यौ।

आयुधदीर्घपृष्ठः। पुं। सर्पे। हारा.।

आयुधधार्म्मणी। स्त्री। जयन्तीवृक्षे। श.च.।

आयुर्द्रव्यम्। क्ली औषधे। र.मा.।

आयुर्योगः। पुं। औषधे। रा.नि. व.२०।

आयुर्व्वेदः। पुं ऋग्वेदस्योपवेदविशेषे, अथर्व्ववेदाषाङ्गे शब्दादिस्थानाष्टकसम्पन्ने धन्वन्तर्य्यादिप्रणीतचिकित्साशास्त्रे। "इह खल्वायुर्व्वेदो नाम यदुपाङ्गमथर्व्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्यायसहस्रञ्च कृतवान् स्वयम्भूः।" तन्निरुक्तिः यथा—आयुरस्मिन् विद्यते, अनेन वा आयुर्विन्दतीत्यायुर्व्वेद इति। सु.सू.१अ.। आयुर्हिताहितं व्याधेः निदानं शमनं तथा। विद्यते यत्र विद्वद्भिः स आयुर्व्वेद उच्यते॥ वैद्यशास्त्रे। हिताहितं सुखं दुःखमायुस्तस्य हिताहितं। मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते॥ च.सू. अ.।

आयुर्व्वेदमयः। त्रि। आयुर्व्वेदाभिज्ञे।

आयुर्व्वेदी। पुं। वैद्ये। रा.नि.व.२०।

आयुष्करः। त्रि। परमायुर्जनके।

आयुष्मान्। पुं। तृतीयर्योगे। जीवकमहाऋषौ। रा.नि.व.५। त्रि। दीर्घजीविनि।

आयुष्यम्। त्रि। पथ्ये। आयुर्हितकरे। रा.नि.व.२०।

आयुस्। क्ली। जीवितकाले। अम.।

आरः (कः)। पुं। हरितालं। रेफल इति गौड़देशख्याते मधुराम्लफलवृक्षे। र.मा.। क्ली। सुरुलौहे। रा.नि.व.१३। 'आरं कांस्यम् मृतं ताम्रं।' मेघनादरसे। पित्तले। भा.।

आरकूटः। पुं. क्ली। ताम्रयशदयोरुपधातौ, पित्तले। पितल। हिं पीतरी। रा.नि.व.१३।

आरक्तम्। क्ली। रक्तचन्दने। त्रि। ईषत् सम्यक् वा रक्तवर्णे।

आरक्तपुष्पी। स्त्री। बन्धुजीवकवृक्षे। बाकुली।

आरग्वधः। पुं। Cassia fistula.) अरग्वधवृक्ष। बड़ शोन्दाल, सोणालू, राखालनड़ी, वानरनड़ी। हिं आमलटास, बनवहेड़ा, शीशहालो। मं शीरवाहावा। तें रेलखिदु। सुवर्णालुफले वा पत्रे। तत्पर्य्यायाः—चक्रपरिव्याधः (वै), जठरनुत् (शे), राजवृक्षः सम्यकः चतुरङ्गुलः शम्याकः आरेवतः व्याधिघातः कृतमालः सुवर्णकः (रत्न), मत्स्यानः रोचनः दीर्घफलः नृपद्रुमः प्रग्रहः हिमपुष्पः राजतरुः कृतघ्नः महाकर्णिकारः ज्वरान्तकः अरुजः स्वर्णपुष्पः स्वर्णद्रुः कुष्ठसूदनः कर्णाभरणकः महाराजद्रुमः कर्णिकारः खर्णाङ्गः। तत्र अन्तःपरिमार्জ্জने फलं, बहिःपरिमार्জ্জने कुष्ठादौ पत्रं ग्राह्यम्। सि.को.पित्त.ज्व.राजादौ औषधः। सुवर्णालुफले। च.द.पित्त.ज्व.चि.। "द्राक्षारग्वधयोश्चापि।" च.द.वात.श्लेष्म.ज्व. आरग्वधादिः। "आरग्वध-ग्रन्थिक-मुस्त-तिक्ताः।"

आरग्वधः चिरमालकः। ड.। सु.सू.३८अ.। आरग्वधपत्रं। च.सू.३अ.१म.पत्रे.। See अरग्वधः।

आरग्वधपञ्चकम्। क्ली। वातकफज्वरे कषाय विशेषे। यथा—आरग्वधस्त्रिकरीहिणी च हरीतकीपिप्पलिमूलमुस्ताः। हा.अचि. २स्थानं २अ.।

आरग्वधादिः। पुं। आरग्वधेन्द्रयव-पाटलकाकतिक्ता-निम्बामृता-मधुरसा-सुवहचपाठाः। भूनिम्ब-सैन्धव-पटोल-करञ्जयुग्मं सप्तच्छदाग्नि-सुषवी-फल-वाणघोण्टा। इत्यात्मकौ गणः कृष्टिं कुष्ठविषमज्वरघ्नः कफकण्डूतिप्रमेहदुष्टव्रणशोधनः, विशेषतो बलासघ्नश्च। वा.सू. १५अ.। सु.सू. ३८अ.। आरग्वधादिपञ्चद्रव्यकृतकषाये। वातश्लेष्मज्वरे, च.द.। आरग्वध ग्रन्थिकमुस्ततिक्ताहरीतकीभिः कथितः कषायः।

आरग्वधाद्यतैलम्। क्ली। योनिव्यापदधिकारे तैलम्। सर्षपतैलं ४श. गर्दभमूत्रं ४श. आरग्वधमूलत्वक् १प.शङ्खचूर्णं २प. हरितालं २प.एकत्र पाचयेत्। च.द.योनिव्या.चि.। कुष्ठरोगे च तैलं। आरग्वधत्वक् वटत्वक् कुष्ठं हरितालं मनःशिला हरिद्रा दारुहरिद्रा च, एषां मिलितपादिककल्केन तैलप्रस्थं विपचेत्। च.द.कुष्ठ.चि.।

आरट्टजः। पुं। तद्देशीयाश्वे। आरबी घोड़ा। जटा.।

आरणालम्(कम्)। क्ली। काञ्जिके। आमानी-काँजि। यत्र निस्तुषीकृतैः आमैर्गोधूमैः संहितं तदारणालमुच्यते। प.प.३ख.। आरणालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः। पक्वैरासन्नितं तत्तु सौवीरसदृशं गुणैः। भा.पू.सन्धानव.।

आरणिः। पुं। कुलहस्तके आवर्त्ते। हारा.।

आरण्यगोमयः। पुं। वन्यगोमये। वनघूटे। च.चि.१अ.।

आरण्यपशुः। पुं। वनजपशौ। स सप्तधा,—ऋक्ष-महिष-वानर-सरीसृप-कृष्ण पृषत-मृगाः।

आरण्यमक्षिका। स्त्री। दंशके। डाँशमाछि। रत्ना:।

आरण्यमुद्गा। स्त्री। मुद्गपर्य्याम्। मुगानी। रा.नि.व.३।

आरण्यविम्बिका। स्त्री। तुण्डीकायाम्। बुनो तेलाकुचा। रा.नि.व.२३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आरण्योपलभस्म। क्ली। वनकरीषभस्मनि। बिलघुँटेर छाई। व.निघ.२भ ज्व. भस्मशब्दरसे।

आरतिः। स्त्री। स्वस्थचित्तत्वे।

आरम्भः। पुं। उद्यमे। वधे। दर्पे। मे.।

आरवः। पुं। शब्दे। ध्वनौ।

आरस्यम्। क्ली। विखादे।

आरत्तः। पुं। गजकुम्भाधोभागे। हला.। हे.च.। गजकुम्भसन्धिभागे। त्रिका.।

आरा। स्त्री। चर्मभेदकास्त्रे। सा व्यधनप्रयोजना। लक्षणं—"आरार्द्राङ्गुलहस्ता स्यात्तत्प्रवेशात्तथोर्ध्वतः चतुरस्रा—॥ अग्नि. सु.चि. ३अ.। आरामुखी नाम जलपक्षिणि। अम.।

आरायम्। क्ली। अर्द्धचन्द्राद्यस्त्रमुखे। "आरा यन्तु मुखं तेषाम्। पुष्यपत्रादिभेदतः...॥" हला.।

आराधनम्। क्ली। पवने। मे नवतुष्कं।

आरामः। पुं। उपवने। "नगरान्नातिदूरेण यः सद्भिरुपरोपितः। तरुषण्डः स आरामस्तथोपवनमुच्यते॥" हला.।

आरामघोलिः (लिका)। स्त्री। पत्रशाकविशेषे, पश्चिमदेश-प्रसिद्धे। गुणाः—"आरामघोलिका चाम्लरूक्षा रुच्यानिलापहा। पित्तश्लेष्मकरी चान्या सूक्ष्मा जीर्णज्वरापहा॥" रा.नि.व.७।

आरामवल्लिका। स्त्री। मल्लिकाविशेषे। रा.नि.व.२३।

आरामशीतला (ली)। स्त्री। रामशाखीति महाराष्ट्रख्याते सुगन्धपत्रशाकविशेषे। आरामशीतलापि पश्चिमदेशे कथ्यते। वर्वर्यादिगणे धृता। गुणाः—तिक्ता शीतला पित्तघ्नी दाह-शीषहरा व्रणविस्फोटकघ्नी च। रा.नि.व.१०। शीता कटुः पित्तकफास्रघ्नी च। मद.व.१।

आरामुखम्। क्ली। व्यधनार्थशस्त्रविशेषे। सु.सू. ८अ.।

आरालिकः। पुं। पाचके। अम.।

आरिः (री)। पुं। कण्टकवृक्षे। खदिरसारे। खयेर। गुणाः—कटुः तिक्तः कफवातघ्नोष्णः व्रणकण्डूरीगघ्नः रुच्यः दीपनश्च। रा.नि.व.८।

आरुः। पुं। (Lager stroemia rigia) वृक्षविशेषे। कर्कटे। शूकरे। मे.रत्नि.कं। कुष्माण्डलतायाम्। अलाब्वाम्।

आरुकम्। क्ली। हिमालयदेशजाते। खनामख्याते ओषधिविशेषे। आड़ इति भाषा। तत्पर्य्यायः—वीरसेनं वीरं वीरुरुकं। पत्रपुष्पादिभिः न तस्य चातुर्जात्यं, सर्व्वाण्येव गुणैः तुल्यानि। गुणाः—"जारुकं वातमेहार्शःकफघ्नञ्च। मद.व.६। मधुरं हिमं अर्शःप्रमेह श्मरकृदीषघ्नञ्च। रा.नि.व.११। पुं। काबेलदेशे आलुबुखार इति ख्याते खाद्यद्रव्ये। गुणाः—"आरुकी ग्राही तुवरी हृद्यः शीती गुरुः स्मृतः। मन्दावष्टम्भकी ग्राही भेदी चोष्णः कफापहः। पित्तहृत्पाचकश्चास्त्री मधुरश्च सुखप्रियः। सुखस्वच्छकरश्चैव मेहगुल्मार्शोनुत्परः। रक्तवातरुजां हन्ता स पक्वो मधुरो गुरुः। कफपित्तकरश्चोष्णो रुच्यो धातुविवर्द्धकः। वै.निघ.।

आरुष्करः। पुं। भल्लातवृक्षे। वै.निघ.।

आरूटषकः। पुं। वासायां। च.चि.३अ.।

आरेवतः। पुं। स्थूलारग्वधवृक्षे। वड़सोणालू। रा.नि.व.९। भा.म.१भ.चित्तभ्रमज्व. घि.। "पथ्या रेवतरामसेनकरजो।" सु.सू. ३८अ. लाक्षादिव.। क्ली। आरेवतवृक्षफले। खेजूरविशेषे। अम.।

आरोग्यम्। क्ली। रोगनिर्मुक्तौ। आरोग्यवद्भिर्वर्द्धनं रा.नि.व.२०। "बलाधिष्ठानमारोग्यं।" चर.।

आरोग्यपञ्चकम्। क्ली। पथ्यारग्वधतिक्ता चित्रकामलकेषु। एतत्सिद्धं पाचनं सामे जीर्णज्वरे हितम्। भा.म.१भ.ज्व.चि।

आरोग्यशाला। स्त्री। चिकित्सालये।

आरोग्यशिम्बी। स्त्री। आरग्वधवृक्षे। सोंदाल। हिं धनवहेड़ा। मं खघु बाहावा। मद.व.१।

आरोग्याम्बु। क्ली। पादशेषोष्णजले। "पादशेषन्तु यत्तोयं आरोग्याम्बु तदुच्यते।" भाः।

आरोहः। पुं। अवरोहे। वरस्त्रियाः श्रोण्यां। रा.नि.व.२७। परिमाणविशेषे। हे.च.। गजाद्यारोहके। मे.हस्तिकं।

आर्ग्वधः। पुं आरग्वधवृक्षे।

आर्घ्यम्। क्ली। तन्नामप्रसिद्धमधुभेदे। "मधूकद्रवनिर्य्यासं जरत्कार्व्वाश्रमौकसः। श्रवन्त्यार्घ्यं तदाख्यातं शीतकं मालवे पुनः। तीक्ष्णतुण्डास्तु या पीता मक्षिकाः षट्पदीपमाः। आर्घ्यास्तासां कृतं यत्तदार्घ्यमित्यपरे जगुः।" गुणाः—"चक्षुष्यं कफपित्तघ्नं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कटु कषायं पाके तिक्तं बलपुष्टिकरञ्च। अस्र दोषहमिति"। भा.। मक्षिकास्त्रीक्षतुण्डा यास्तथा षट्पदसन्निभाः। तदुद्भूतं यदार्घ्यं हि तदार्घ्यं मधु वर्ण्यते। एतत्पिङ्गलवर्णम्। रा.नि.व.१४।

आर्घ्यशर्करा। स्त्री। आर्घ्यमधुद्भूतशर्करायां। इयं गुरुरार्घ्यमधुतुल्या। रा.नि.व.१४।

आर्घ्या। स्त्री। मधुमक्षिकाविशेषे। सा च पीत तुण्डा भ्रमरसदृशा। रा.नि.व.१४ See आर्घ्य।

आर्त्तः। त्रि। पीड़िते।

आर्त्तगलः (ला)। पुं, स्त्री। (Barleria coerulea.) नीलझिण्टयां। नीलझाँटी। हिं कटसेरुया। मं कालाकोराण्टा। रा.नि.व.१०। च.द. अश्म.चि.कषायघृते। सु.सू.३३८,३९ संशोधने। See नीलाख्यान.। गुणाः—"उष्णः तिक्तः कटुः वात-कफघ्नः शीथकण्डूशूलकुष्ठव्रणघ्नश्च।" वै. निघ.। भैष. रुखरी.चि.। रक्तझिण्टीवत्। भा.पू.१भ.।

आर्त्तवम्। क्ली। स्त्रीपुष्पे। तस्य प्रवृत्तिनिवृत्तिकालः द्वादशवर्षादिपञ्चाशद्वर्षमितः। तच्च प्रति मासमुपचितं वायुर्योनिमुखं नयेत् धमनीद्वयेन। सु.शा.३अ.। तत्स्वरूपं—"रसादेव रजः स्त्रीणां मासि मासि च्यहं स्रवेत्। तद्वर्षाद्द्वादशाद्ऊर्द्धं याति पञ्चाशतः क्षयं॥ मासेनोपचितं काले धमनीभ्यस्तदार्त्तवं। ईषद्विवर्णं कृष्णञ्च वायुर्योनिमुखं नयेत्॥ शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमं। तदार्त्तवं प्रशंसन्ति यदासौ न विरूक्षयेत्॥' इति गर्भार्त्तवलक्षणम्। मा.। पुष्पे। त्रि। ऋतुजे। मे.रक्तिकं।

आर्त्तवी। स्त्री। घोटक्याम्। रा.नि.व.१९।

आर्त्तिः। स्त्री। पीड़ायां, वेदनायां। रा.नि.व.।

आर्द्रः। त्रि। सजले वस्तुनि। भिजा। हिं गीला गीला। मं ओलें। तच्च सरसनीरसभेदेन द्विधा। तयोर्वास्तूकाद्यम आर्द्रम्। नीरसमपि सदुग्धगुप्तरसभेदात् द्विधा। तयोः वटाश्वत्थाद्यं नीरसम्। सदुग्धमपि द्विधा मृदुतीक्ष्णभेदेन। तयोः क्षीरातलाद्याक्षीरिणाः दुग्धिकाद्याः मृदव इति। यथा—"आर्द्रद्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा। सदुग्धं गुप्तरसकं द्विधा नीरसमुच्यते। वास्तूकं सार्षपं शाकं निर्गुण्डीरण्डसार्षरम्। धन्याद्यमिद सर्व्वमार्द्रं सरसमुच्यते। वटाश्वत्थकरीराद्यं आर्द्रद्रव्यन्तु नीरसम्। सदुग्धन्तु द्विधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात्। क्षीरातला-बज्र-र्कुहण्ड सौरिण्याद्यास्तु तीक्ष्णकाः। दुग्धिकार्कक्षीरीकाद्या मृदुदुग्धाः प्रकीर्त्तिताः।" प्र.प्र.। क्लिन्ने। मे.।

आर्द्रकम्। क्ली (Zingiber officinale) Common Ginger, स्वनामख्यातकन्दशाकविशेषे। आदा। हि आदरख। मं आले। कं अल्ल, अद्रका। तत्पर्य्यायाः—शृङ्गवेरं कटुभद्रं कटत्कटं (क), रत्नमूलं मूलजं कन्दर वरं महीजं कैकतेष्टं अनूपजं अपाकशाकं चान्द्राख्यं राहुकृतं सुशाकं शार्ङ्गं आर्द्रशाकं सच्छाकं। गुणाः—शुण्ठीसमानं कटुकमपि पाके मधुरं; प्राग्भोजनम् सलवणं रुचितं अग्निदीपनं रुचिकरं जिह्वाकण्ठशोधनञ्च भवति। ग्रीष्मे शरदि च न सेव्यम्। भा.पू.१भ, वा.। आर्द्रकं नागरवत् गुणं भेदन दीपनं गुरु। मद.व.२९।

आर्द्रकस्वरसः। पुं। आर्द्रकस्य स्वरसे। आदार रस। च.द.ज्व.चि.कवलधारणे।

आर्द्रचिक्कणम्। क्ली। आमचिक्कणगुवाके। काँचा चिकिणुपारि। रा.नि.व.२३।

आर्द्रजम्। क्ली। शुण्ठ्याम्। रा.नि.व.६।

आर्द्रदाड़िमनिर्य्यासः। पुं। आर्द्रदाड़िम फलस्वरसे। सि.यो.अरोच.चि.श्रीकण्ठः।

आर्द्रमरिचम्। क्ली। आममरिचे। काँचा गरिच। गुणाः—"आर्द्रन्तु मरिचं किञ्चिद्वीर्य्यं पाके रसे मधु। अपित्तलञ्च कटुकं गुरु चाग्निप्रदीपनम्। तिक्तञ्च रुचकं स्वादु कफवातहरं परं। हृद्रोगञ्च कृमीश्चैव नाशयेत्...।" वै.निघ.।

आर्द्रमाषा। स्त्री। Leguminus shrub, (Glicine debilis.) वनमुद्गे, माषपर्य्याम। रा.नि.व.३।

आर्द्रवटकः। पुं। आदावड़ा इति प्रसिद्धे भोज्यद्रव्ये। तत्प्रकरणं यथा—मुद्गपिष्टरचितान् वटकांस्तैलपाचितान् हस्तचूर्णितान् कृत्वा तच्च भृष्ट-हिङ्गुमरिचार्द्रकजीरकचूर्णं निस्नुरसं यवानीञ्च युक्त्या दत्त्वा मिश्रयेत्। अथ तद्द्रव्यसंपूरकं दत्त्वा मुद्गपिष्टानि पचेत्। तानि च पिष्टकानि क्वथितजले निमज्यानि। मुद्गपिष्टया विरचितान् वटांस्तैलेन पाचितान्। हस्तेन चूर्णयेत् सम्यक् तस्मिं श्चूर्णं विनिक्षिपेत्। भृष्टं हिङ्ग्वार्द्रकं सूक्ष्मं मरिचं जीरकं तथा। निस्नुरसं यवानीञ्च युक्त्या सर्व्वं विमिश्रयेत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतपिष्टं पचेत् सम्यक् स्थाल्यामास्तारकोपरि। तस्यास्तु गोलकं कुर्य्यात् तन्मध्ये पूरणं क्षिपेत्। तैलेतान् गोलकान् पक्वा क्वथितायां निमज्जयेत्। गुणाः—गोलकाः पाचकाः प्रोक्तास्तेनार्द्रवटका अपि।" भा.पू.१भ.।

आर्द्रशाकम् क्ली। आर्द्रके। रा.नि.व.६।

आर्द्रा स्त्री। क्रूरातिविषायाम्। षष्ठनक्षत्रे। आर्द्रके। रा.नि.व.६।

आर्द्रास्थम्। क्ली। आर्द्रके।

आर्द्रिका। स्त्री। क्षुद्रार्द्रके। भा.पू.१भ.। आर्द्रधनिकायाम्। काँचा धने'। गुणाः—"तिक्तमधुरा सूक्ष्मा पित्तञ्च न करोति।" आर्द्रिका भेदिनी गर्व्वी तीक्ष्णोष्णा दीपनी च सा। कटुका मधुरा पाके रूक्षा वातकफापहा।" वा.सू.६अ.।

आर्षभी। स्त्री। कपिकच्छुलतायाम्। आलाकुशी। रा.नि.व.३। See आत्मगुप्ता।

आलम् (क्लम्)। क्ली। हरितालं। प.मु.। शाङ्गः।

आलगर्दः। पुं। Species of cobra. अलगर्द। जलसर्प।

आलदूषकः। पुं। तन्नामकप्रतुदपक्षिणि। सु.सू.४६अ.।

आलवालं। क्ली। तरुमूलादौ जलसेचनार्थं उच्चवेष्टनविशेषे। आल्।

आलविषः। पुं। यस्य आलं (लूता) विषमस्ति। ते च ह्यस्थिकविश्वम्भरराजीवमत्स्योचिचिङ्गाः समुद्रह्यस्थिकाश्च। सु.कल्प.३अ.।

आलविषा। स्त्री। क्लेशसाध्यलूताभेदे। असाध्यविष मांकड़शा विशेष। सु.कल्प.८अ.।

आलस्यम्। क्ली। अलसतायाम्। सामर्थ्येऽपि कर्म्मण्यनुत्साहे। तत्पर्य्यायाः,—अलसता तन्द्रा कौसीद्य (हे), मन्दता काय्यप्रद्वेषः। तल्लक्षणं यथा—"शक्तस्य चाप्यनुत्साहः कर्म्मस्वालस्यमुच्यते।" भा.भ.१भ.ज्व.चि.। "आलस्यं मधुरास्यता।"

आलातम्। क्ली। अङ्गारे। रा.नि.व.२०।

आलानम्। क्ली। गजबन्धनस्तम्भे। हला.। रज्जौ। मे।

आलाबूः (बू)। स्त्री। अलाबूम्। लाउ ও লাউয়ের লতা। श.र.।

आलावर्त्तम्। क्ली। वस्त्रव्यजने। कापड़ের পাখা। हे.च.।

आलास्यः। पुं। कुम्भीरे। हे.च.।

आलिः। पुं। द्वयिके। भ्रमरे। मे.लद्विकं।

आलिङ्गनम्। क्ली। आश्लेषे रत्या.।

आलिञ्जरः। पुं। अलिञ्जरे। জালা। चिका.।

आलिम्पना। स्त्री। लेपौ चिका.।

आलिवङ्गः। स्त्री। हालिम् इति लोके। আশালবীজ इति गुर्জরे। वै.निघ.२भ.वा.व्या.कटीवा.चि.।

आली। स्त्री। कर्फीणौ। मे.लद्विकं। द्वयिके। अटी.भ.। सेतौ। शब्दर.।

आलोढम्। क्ली। लेहने। অবলেহ।

आलोनकम्। क्ली। रङ्गे। রাঙ্। हे.च.।

आलुः। पु। कीङ्कणदेशप्रसिद्धकन्दविशेषे। कांसालू। मं कांसालु। शूरणे। आलुके। पेचके। रा.नि.व.७ स्त्री। क्षुद्रजलाधारे। गलन्तिकायां। चिका.। क्ली। भेलके। मूले। चिका.। गोल आलू इति ख्याते कन्दविशेषे। मे.। गुणाः—रक्तपित्तघ्नं गुरु स्वादु शीतलं स्नेह्य-शुक्रकरञ्च। द्रव्याभि.।

आलु लू)कः। पुं, क्ली। An esculent root, (Arum campanulatum.) कन्दशाकविशेषे। আলু গাছ। स बहुधा—काठालुक-शृङ्गालु-हस्तालु-रक्तालु-पिण्डालु-मध्वालु-भेदात्। तत्र काठालुकं काठिन्ययुक्तं (हि कठारु), शृङ्गालुकं श्वेततायुक्तं (शृङ्गारु इति लोके), हस्तालुकं दीर्घतायुक्तं महाशरीरम्, रक्तालुकञ्च (रक्ताकरतरु), पिण्डालुकं (हिं वर्त्तुलसुथनी), मध्वालुकं मिष्टं रोमयुक्तं (हि दीर्घसुथनी) इति च। गुणाः—मलमूत्रनिःसारकं रूक्षं दुर्जरं रक्तपित्तघ्नं वातकफघ्नं बल्यं हृद्यं स्नेयवर्द्धनञ्च। भा.पू.१भ.। आलूकं शीतलं सर्व्वं विष्टम्भि मधुरं गुरु। राज.।

आलुकी। स्त्री। रक्तालुभेदे। রাঙা আলু। हि अरुई। या-दीर्घा कठिना तन्वी च। गुणा.—बलकृत्। स्निग्धा गुर्व्वी हृदयकफघ्नी विष्टम्भिनी तैलभर्जिताऽत्यन्तरुचिकरी च। भा.पू.१भ.शा.व.।

आलुकम्। क्ली। एलवालुके। আলুকে। नि.व.४।

Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आलेपः(नम्)। पुं, क्ली। जातमात्रशीथव्रणादौ यथौषधलेपे। सु.चि.१अ.।

आलेयम्। क्ली। पद्मकाष्ठे। वै.निघ.।

आलेशः। पुं। अश्वमुखरोगे। तत्र हनुर्दती न सम्यगुद्गच्छन् यन्त्रणामुत्पादयति, तेन श्वीऽस्वस्थः अनिच्छया स्तोकं खादति भग्नकासी क्षीणबलश्च भवति। "हनुदेशे यदा दन्ती भवत्यभ्यन्तराश्रयः। आलेश इति तं विद्यात् श्लेष्मरक्तसमुद्भवम्॥ तेनाश्वी दुर्मनात्यर्थं मन्दं पिबति खादति। जर्जरं कासते चैव बलाच्च परिहीयते॥" ज.द.२९अ.।

आलोकः(नम्)। पुं, क्ली। दर्शने। देखा। दीपे। मे.।

आलोचकः। पुं। तन्नामकाग्नौ। तस्य स्थानं नेत्रं। स च रूपादि दर्शयति। सु.पू.११अ.। क्ली। तन्नामकपित्ते। भा.।

आलोचनम्। क्ली। दर्शने।

आलोड़नम्। क्ली। मिश्रणे। उत्तेजने।

आलोलः। पुं। कम्पे। वि। कम्पिते। लम्बमाने।

आलूकम्। क्ली। आलुके। आलू। हिं आलु, आलुबोखार। गुणाः—रसतः शीतं स्वादम्लं वातपित्तकरञ्च। मद.व.६।

आवट्टजः। पुं। उत्तमाश्वे। पारसीकाश्वे। पारसी घोड़ा। चिका.।

आवपनम्। क्ली। भाण्डे। बीजवपने। अम.।

आवरकः। वि। आच्छादके।

ईहा। स्त्री। चेष्टायां। वाञ्छायां। चिका.।

ईहामृगः (ह्वकः)। पुं। वृके। रत्ना.। कुक्कुर-वद्वरिणघातिकपिलवर्णजन्तुविशेषे। घोंगं। रा. नि. व. १८। (ह्वकः)। श. र.।

ईक्षणम्। क्ली। नेत्रे। रा. नि. व. १८। दर्शने। मे. णिचिकं।

ईक्षणिकः। पुं, स्त्री। हस्तरेखाद्यवलोकनेन शुभाशुभकथनजीविनि।

ईक्षा। स्त्री। दृष्टौ।

उ।

उकनाहः। पुं। पीतरक्तवर्णघोटके। हे. च.। लक्षणं—"रक्तपीतकषायोष्ठवर्णजो यस्य दृश्यते। उकनाहः स विख्यातो वर्णो वाहस्य दैहजः॥" ज. द. ३अ.।

उकुणः। पुं। शिरःकीटे। माथार उकून।

उक्लेदः। पुं। वमौ।

उख(ष)रम्। क्ली। क्षारभूमौ। यवीयं बीजं न रोहति। क्षारमृत्तिकायाम्। सोरा। वै. निघ.। रा. नि. व. २।

उख(ष)रजम्। क्ली। पांशुलवणे। सोरा। रोमकनाम्नि अयस्कान्तभेदे। लवणे। रा. नि. व. २०।

उखर्व्वलः। पुं। गर्त्ते। हिं उखल।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्पर्य्यायः,—उखलः भूरिपवः सुतृणः तृणोत्तमः। गुणाः—बलदः रुचिजनकः। पशूनां सदा हितश्च। रा. नि. व. ८।

उखलः। पुं। उखव्यंलतृणे। रा. नि. व. ८।

उखा। स्त्री। रत्नेनस्थाल्याम्। राँधिवार हाँड़ी। हिं भरघियाभाचू। अम.।

उख्यः। त्रि। उखासंस्कृते, मांसादौ। हिं हाण्डि-कावाव। अम.।

उग्रम्। क्ली। वस्त्रनाभनामकविषे। रा. नि. व. ६। पुं। श्रीभाञ्जनवृक्षे। श. च.। पृक्तग्रन्थौ। त्रि। उत्कटे। कटुके। तीक्ष्णे। रौद्रे। मे.।

उग्रकाण्डः (कः)। पुं। कारवेल्लके। करेलो गाछ। रा. नि. व. ३, मद. व. ७। काण्डवल्ल्यां। See काण्डवल्ली।

उग्रगन्धः। पुं। शुक्लरसोने। रा. नि. व. ७। कट्फलवृक्षे। रा. नि. व. ६। रक्तरसोने। अर्जक-वृक्षे, क्षुद्रतुलसीवृक्षे। रा. नि. व. १०। रसोनभाचे। भा. पू. १भ. हृ. व.। चम्पकवृक्षे। श. च.। क्ली। हिङ्गुनि। रा. नि. व. ६। त्रि। उत्कटगन्धयुक्ते।

उग्रगन्धा (न्धिका)(न्धी)। स्त्री। वन-यमान्याम्। वनयओयान। भा. पू. १भ., मद. व. २। अजमोदायाम्। राँधुनी। भा. पू. १भ.। वचायां। वच। प. मु., रा. नि. व. ६. भा. अने., वै. निघ. सा. ज्व. अर्कादौ। महाभरीवचायाम्। हिं कुलि-ञ्जन। भा. पू. १भ. हृ. व.। इयं सुगन्धवचाप्युच्यते। क्रिक्किकायां। हँचेता। मे.। अजगन्धायां। रा. नि. व. ४। (गन्धिका) अजमोदायां। वन यओयान। रा. नि. व. ६। सि. यो. यक्ष्म-चि. एलादिमन्थे। (गन्धी) शुक्लरसोने। मद. व. ७।

उग्रनासिकः। त्रि। दीर्घनासिके। नेकी। हे. च.।

उग्रपत्रकः। पुं। महानील्याम्। वै. निघ.।

उग्रभा। स्त्री। गोणसवल्लाम्। वै. निघ.।

उग्रवीर्य्यम्। क्ली। हिङ्गुनि। रा. नि. व. ६।

उग्रा। स्त्री। धन्याके। धने'। रत्ना.। यमान्यां। रा. नि. व. ४। संविदामञ्जर्य्याम्। गाँजा। अवि.। वचायाम्। भा. म. १भ. कर्णकज्व. चि.। "कटु-त्रिकीयाघनकुष्ठलोभिः।" वै. निघ. उ. चि. वचादिचूर्णे, कुटजलेहे। क्रिक्किकायाम्। हँचेता। हे. च.।

उङ्गुणः। पुं। उत्कुणे। उकुण। श. मा.।

उचितः। त्रि। अभ्यस्ते। परिमिते। मे. तत्रिकं।

उच्चः। पुं। नारिकेलवृक्षे। रा. नि. व. ११। सरलदेवदारौ। त्रि। उन्नते।

उच्चटः। पुं। वह्नौ। वै. निघ.।

उच्चटा। स्त्री। (Abrus precatorius.) स्वनामख्यातक्षुपे। ओकड़ा, उच्चटा-मूल, कुँच-गाछ। इति च प्रसिद्धे। तें गुंड़तुंगसुसे। रत्ना.। महाभल्लातकगुड़े। लशुनभेदे। हे. च. सु. चि. २६ अ.। रक्तगुञ्जायाम्। रा. नि. व. ३, वै. निघ. २भ. क्षय.चि. इक्ष्वादिसीदके। भूधात्र्याम्। भूँई आंगला। रा. नि. व. ५। नागरमुस्तायाम्। रा. नि. व. ६। श्वेतगुञ्जायां। "श्वेतगुञ्जीच्चटा प्रोक्ता।" भा. म. १भ. गु. व.। तृणविशेषे। निर्विषी वा चेँचुया। तत्पर्य्यायः,—चूड़ाला चक्रला (अ), अम्बुपचा जटिला शुक्रला उत्तानकः शुक्लला (र.)। अ. टी. भ.।

उच्चटापत्रः। पुं। क्षुद्रतालीशपत्रे। वै. निघ.। क्ली। चिच्चीटकपत्रे।

उच्चटाफलम्। क्ली। रक्तगुञ्जायां। लालकुँच, ओकड़ा फल। भैष. कुष्ठ-चि. महाभल्लातकगुड़े।

उच्चटामूलम्। क्ली। चिच्चीटकमूले। चेँच-कोर मूल, ओकड़ार मूल। सु. चि. २६ अ.।

उच्चतरुः। पुं। नारिकेलवृक्षे। रा. नि. व. ११।

उच्चन्द्रः। पुं। निशाचतुर्थप्रहरे। श. र.।

उच्चयः। पुं। परिधानवस्त्रग्रन्थौ। हे. च.। राशौ।

उच्चलम्। क्ली। मनसि। हे. च.।

उच्चललाटा (टिका)। स्त्री। मरुण्डायां। हारा.। उच्चललाटविशिष्टायाम्। त्रिका.।

उच्चाठनम्। क्ली। उत्खातने। उदासकरण। षट्कर्म्मान्तर्गताभिचारकर्म्मविशेषे। तत्त्वम्।

उच्चारः। पुं। विष्ठायाम्। रत्ना.।

उच्चिङ्गटः। पुं। उच्चिटिङ्गनामकीटे। उच्छिंड़े। तृणगड़मत्स्ये। मे. टचतुष्कं।

उच्चिटिङ्गः। पुं। A sort of cricket. उच्चिङ्गटे। उच्छिंड़े। रा. नि. व. १९। वा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृति कीटविशेषे। तद्दिष-लक्षणम्—"हृष्टलोमी-क्षिटिङ्गेन स्तब्धलिङ्गो भृशार्त्तिमान्। दष्टः शीतोदकेनैव सिक्तान्यङ्गानि मन्यते॥" तद्दष्टे वातजन्य-रोगा भवन्ति। सु. कल्प. ८अ.।

उच्चूलः। पुं। ध्वजोड्डीमुखकूर्चे। हे. च।

उच्चैःश्रवाः। त्रि। वधिरे। पुं। घोटकभेदे।

उच्छादनम्। क्ली। गन्धद्रव्येण शरीरमार्ज्जने। अ. टी.। तत्पर्य्यायः,—उत्सादनं उद्वर्त्तनम्।

उच्छिलीन्ध्रम्। क्ली। गोमयच्छत्राके। कोंड़क छाती। भागवते।

उच्छिष्टमोदनम्। क्ली। सिक्थके। रा.नि.व.।

उच्छीर्षकम्। क्ली। उपाधाने। तकिया। हला.। पुं। शय्यादोषविशेषे। सु. चि. २६ अ.।

उच्छूनः। त्रि। स्फीते। वर्द्धिते।

उच्छेदः। पुं। उन्मूलने।

उच्छ्(च्छ्रा)यः। पुं। उच्चतायां। अम.।

उच्छ्रितः। पुं। सरलदेवदारुवृक्षे। वै. निघ.।

उच्छ्वसितः। त्रि। प्रफुल्ले, विकसिते। हे. च.।

उच्छ्वासः। पुं। प्राणने। मे. सन्निकं। अन्तर्मुख-श्वासे। हे च.।

उज्जासनम्। क्ली। मारणे। अम.।

उज्जृम्भितः। त्रि। प्रफुल्ले। क्ली। चेष्टायां। अम.।

उज्ज्वल(न)म्। क्ली। सुवर्णे। रा. नि. व. १३। पुं। धान्यभेदे। च.।

उज्ज्वला। स्त्री। कुमरिचे। नक्षांगरिच। अचि.।

उज्झटा। स्त्री। भूम्यामलक्यां। भूँई आम्‌ला।

उज्झः। पुं। उज्झशिल्ले। शटा.।

उटः। पुं। शुल्कदाने। वै. निघ.।

उटजा। स्त्री। पानीयशालायां। पर्णशालायां। वै. निघ.।

उटि:(ड़ि:)का। पुं, स्त्री। नीवारधान्ये। उड़िधान। मद. व. १०। गुणाः—"उड़िका तव कथिता बल्या श्लेष्मविवर्द्धनी।" राज.।

उट्टङ्कम्। क्ली। मूत्रे। अस्त्रभेदे।

उडु। क्ली। उदके। अ. टी. भ.।

उड्डपः। पुं, क्ली। भेलके। भेला, माड़। तत्-पर्य्यायः,—प्लवः, कीलः, (अ), भेलकः, उड्डूपः, तरणः, तारणः, तारकः, (शब्दर.)। पुं। चन्द्रे।

उडुपतिः। पुं। सोमलतायां। सु. चि. २६ अ.। See सोमः। चन्द्रे।

उडुपप्रिया। स्त्री। कमलिन्यां। पद्मेर झाड़। मद. व ३।

उडुपर्थं। क्ली। आकाशे। (हे)।

उड़ुम्बरः। पुं, क्ली। उड़ुम्बरवृक्षे। यज्ञडुमुर गाछ। अम.। तत्पर्य्यायः,—कृमिकण्टकं कृमि-कण्टकं क्रिमिकण्टकं (मे), पानिभुक् पुष्पहीना (श), जन्तुफलः यज्ञाङ्गः हेमदुग्धकः (अ), ब्रह्मवृक्षः (र), हेमदुग्धी यज्ञफलः यज्ञीडुम्बरः (शब्दर.), सदाफलः क्षीरवृक्षः सुचक्षुः श्वेतवल्कलः (ज)। अस्य गुणाः हिमः रुक्षः गुरुः पित्तकफासनुत् मधुरः तुवरः वर्ण्यः व्रणशोधनरोपणः। कुष्ठरोगविशेषे। मे.। लक्षणम्—"उड़ुम्बरफलाभासं कुष्ठमौड़ुम्बरं वदेत्॥" मा. नि.। ताम्रे। प. मु. कर्षमाने (२ तो.)। प. प्र.।

उड़ुम्बरदला। स्त्री। दन्तीवृक्षे। रा. नि. व.६।

उड़ुम्बरपर्णी। स्त्री। दन्तीवृक्षे। श. च.।

उड्डामरं। त्रि। श्रेष्ठे।

उड्डामररसः। पुं। पित्तगुल्माधिकारे रसः। पाठः—"गुडसूतं समं गन्धं सूतांशं सततात्रवं। पञ्चांशं शाकवृक्षस्य द्रवैर्मर्द्यं दिनद्वयम्। सर्षाख्योत्थै-र्द्रवैश्चाङ्गि रुद्धा गजपुटे पचेत्। पञ्चधा भूधरे वाथ चूर्णं जैपालतुल्यकं। चिरुङ्गं भक्षयेच्चाज्यैः पित्तगुल्मप्रशान्तये। द्राक्षाहरीतकीक्वाथमनुपानं प्रकल्पयेत्॥" रस. र. गुल्म-चि.। पारा १ भ. गन्धक १भ. ताम्र।० सिकि भ.। शेगुण वा शिरीष एवं नागेश्वरेर रस मर्द्दनीय द्रव्येर पञ्चमांश द्वारा दुई दिन मर्द्दनपूर्व्वक गज-पुटे भूधरयन्त्रे पाक करिया दिवाभागे चूर्ण कर। शीतल हइले परे औषध-समभाग जय-पालचूर्णेर सहित मिश्रित करिया ३ कुँच मात्राय घृते माड़िया सेवन करिबे।

उड्रः(पुष्पः)। पुं, क्ली। जवापुष्पवृक्षे। जवा-पुष्पे। वै. निघ.।

उद्रः। पुं, क्ली। जपापुष्पवृक्षे। जवापुष्पे। जवा, चीनदेशीय गोलाप। Wil.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्कुकः । पुं । सलाशये । सु. शा. ५अ. । स चान्त्रदेशस्थः श्लेष्मशोणितकिट्टप्रभवः । सु. शा. ४अ. । "फुस्फुसस्यावरण्यौ द्वे ऊर्ध्वतस्तद्वयं तथा । उक्कुकः शेफसि मध्ये मध्यान्ते महतां न हि ॥" अमि. ।

उत्कटः । पुं । (Sachharum sara.) शरकाण्डे । शर गाछ । रा. नि. व. ८ । क्षुद्रतृणविशेषे । ओकड़ा, कालिग्राविषय । प. मु. । इक्षौ । रक्तेक्षौ । रा. नि. व. १४ । मदे । शु. र., भैष. ने. री. चि. । सत्तहस्तिनि । हारा. । क्ली । Woody cassia or its bark. वृक्षभेदे । लताविशेषे । शालसा । Wil. गुडत्वचि । दारुचिनि । प. मु., रा. नि. व. ६ । हारा. । गण्डकुसुमे । हारा. । तेजपत्रे । अ. टी. भ. । ति । उत्तालि । तीव्रे ।

उत्कटा । स्त्री । सिंहलीपिप्पल्याम् । वनपिप्पुल । हिं श्वेतवसुची । मं रानपिंपलि, उटकटारा । गुणाः—"सिंहली कटुरुष्णा च जन्तुघ्नी दीपनी परा । कफश्वाससमीरार्त्तिशमनी कीटशोधनी ॥" रा. नि. व. ६ । "उत्कटा रुचिदा चोष्णा तिक्ता वृष्याप्युदाहृता । मूत्रकृच्छ्रं पित्तवातं मेहं व्रणाञ्च हृद्रुजं । विस्फोटकं नाशयति बीजमस्यास्तु शीतलं । वृष्यं वृतिकरञ्चैव मधुरञ्च प्रकीर्त्तितम् ॥" वै. निघ. ।

उत्कटा(टुका)सनम् । क्ली । कठिनासने । निरासनस्थितौ । सु. चि. ६ अ. ।

उत्कण्टकम् । क्ली । ओकड़ा इति ख्याते वृक्षभेदे । च. चि. ३ अ. ।

उत्कण्ठा । स्त्री । इष्टलाभे कालक्षेपासहिष्णुतायां । अम. ।

उत्कता । स्त्री । (Pothos officinalis.) गजपिप्पल्याम् । श. च. । उत्कण्ठायाम् ।

उत्करः । पुं । रक्तेक्षौ । रक्त इक्षुः । रा. नि. व. १४ । धान्यादिराशौ । अम. । उत्कारिकायाम् । पुष्टिशं । भैष. शूल. चि. ।

उत्कर्णः । पुं । वायुजन्याश्वरोगे । अश्वस्य कर्णपुच्छगात्राणि स्तब्धीभवन्ति । "कर्णौ स्तब्धौ तथा पुच्छं स्तब्धं गात्रमकिञ्चनं । वातात्मकेन वाहस्य भवेदुत्कर्णकेन हि ॥" ज. द. ५४ अ. ।

उत्कर्षनम् । क्ली । अधोगतस्य ऊर्द्धाकर्षणे । सु. चि. १५अ. ।

उत्कलिका । स्त्री । उत्कण्ठायाम् । हारा. । कलिकायाम् । कुँड़ि । त्रिका. ।

उत्काका । स्त्री । प्रतिवर्षप्रसूतायां गवि । श. च. ।

उत्कारिका । स्त्री । रोटिकायां । रुटी । वा. टी. हेमा. । यवमाषैरखण्डबीजातसीकुसुम्भबीजादिभिः पिष्टस्निग्धैर्लम्बिकाकृतिर्यः स्वेदनोपायः स उत्कारिका । पुल्टिश । अरुणः, वा. सू. १७अ. । गुटिकायाम् । वड़ि । सु. चि. २६ अ. । लम्बिकायां । काई, मोहनभोग । सु. चि. १४अ. ।

उत्कासः (सम्) । पुं, क्ली । कासे । उत्कासि । च. द. यक्ष्म. चि. ।

उत्कुञ्चिः (का) । पुं, स्त्री । (Nigella indica. स्थूलकृष्णजीरके । मोटा कृष्णजीरे । रत्ना. । कुलिञ्जनवृक्षे । शशाभरी वच ।

उत्कुटम् । क्ली । उत्तानशयने । चित् हइया शयन । हारा. ।

उत्कुणः । पुं । केशकीटे । उकुण । हे. च. ।

उत्कूटः । पुं । उपवारणे । हारा. । छाता ।

उत्कोठः । पुं । कोठरोगभेदे । लक्षणं यथा—"असम्यग्वमनोदीर्णपित्तश्लेष्मानिलत्रयैः । मण्डलानि सकण्डूनि रागवन्ति बहूनि च । सानुबन्धस्तु स प्राज्ञैरुत्कोठ इति कथ्यते ।" भा. म. ४भ. शी. पि. चि. ।

उत्क्रान्तिः । स्त्री । मृत्यौ ।

उत्क्रोशः । पुं । पेचके । वै. निघ. । मत्स्यघातिपक्षिणि । गाछराङा पाखी । रत्ना. । गुणाः—कृमिपित्तघ्नः शीतलः स्निग्धः वृष्यः वातकरः रसे पाके च मधुरः । सु. सू. ४६ अ. । कुररपक्षिणि । कर्कटे पाखी । हला. ।

उत्क्लिष्टवर्त्म । क्ली । क्लिष्टवर्त्मनामरोगविशेषे । See क्लिष्टवर्त्म ।

उत्क्लेशः (दः) । पुं । शरीरस्थदोषस्य उपस्थितवमनत्वमिव । वमनेच्छायां । च. द. ज्व. चि. । "उत्क्लेशश्चोपशाम्यति ।" वमनोपस्थितिरिव । भा. म. भ्रमे. ज्व. चि. । "गौरवं शीतमुत्क्लेशः ।" "उत्क्लिष्टान्नं न निर्गच्छेत्प्रसेकष्ठीवनेरितं । हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेत् ॥" सु. शा. ४ अ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्क्लेशकः । पुं । अग्निप्रकृतिकीटविशेषे । तेन दष्टे पित्तजन्यरोगा भवन्ति । सु. कल्प. ८अ. ।

उत्क्लेशनवस्तिः । पुं, स्त्री । वस्तिभेदे । यः पूर्व्वम् एरण्डवीजादिकल्केन उत्क्लेशनार्थं दीयते । "दद्यादुत्क्लेशनं पूर्व्वम्—एरण्डवीजं मधुकं पिप्पली सैन्धवं वचा । हवुषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः ॥" वै. निघ. वस्तिविधिः ।

उत्खला । स्त्री । सुरानामगन्धद्रव्ये । मूरागांसी । भ. च. ।

उत्तः । त्रि । आर्द्रद्रव्ये । भिजा द्रव्य । अम. ।

उत्तमम् । क्ली । शुष्कमांसे । त्रि । तप्ते । स्राते । मे. ।

उत्तमः । त्रि । उत्कृष्टे । पुं । अश्वविशेषे । लक्षणं—"अध्वन्याश्च महासाराः संग्रामे चैव पूजिताः । अपि शस्त्रहताङ्गाश्च नैव मुञ्चन्ति सादिनं ॥" ज. द. ३अ. ।

उत्तमफलिनी । स्त्री । (Aclepias rasea.) दुग्धिकायाम् । छोटि थिरुई । प. मु. ।

उत्तमवारि । क्ली । तप्तजलोदके । च द. मधुकादौ । उत्कृष्टजले ।

उत्तमवैद्यः । पुं । कृतसाङ्गवेदाध्ययने वैद्ये ।

उत्तमा । स्त्री । दुग्धिकायाम् । छोटथिरुई । प. मु, रत्ना. । मनःशिलायाम् । प. मु. । भूम्यामलक्याम् । वै. निघ. । चिफलायां । भा. म. १भ. सन्धिकर्ज्ज. चि. । "शटीसुरतरुत्तमा ।" सुस्तायां । हे. च. । तन्नामकशूकदोषविशेषे । "सुद्गमाषोपमा रक्ता पिड़का रक्तपित्तजा । उत्तमैषा तु विज्ञेया शूकाजीर्णनिमित्तजा ॥" सु. नि. शू. दी. चि. १४अ. ।

उत्तमाङ्गम् । क्ली । मस्तके । रा. नि. व. १८ । त्रि । उत्कृष्टाङ्गे ।

उत्तमारणी । स्त्री । इन्दीवरालतायाम् । इन्द्रचिर्भिट्यां । रा. नि. व. ३ । इन्द्रवारुण्याम् । वा. उ. ३७अ. । योधामल्लिकायां । यूँई । सु. चि. ६अ. ।

उत्तरकालः । पुं । भाविकाले ।

उत्तरङ्गम् । क्ली । द्वारस्योपरितिर्य्यक्काष्ठविशेषे । "उत्तरङ्गं मतं तिर्य्यक् द्वारस्योपरि दारु यत् ।" हला. ।

उत्तरच्छदः । पुं । उत्तरीये । आच्छादनवस्त्रे ।

उत्तरवस्तिः । स्त्री । निरूहोत्तरदेयवस्तौ । निरूहस्य पर देय पिछकिरि । निरूहादुत्तरं दानादुत्तरवस्तिसंज्ञा । तत्र नेत्रपरिमाणं १२ अङ्गुलम् । तच्छिद्रं मालतीवृन्तच्छिद्रपरिमितं । स्नेहमात्रा पञ्चवर्षीये बाले अर्द्ध प. तदूर्द्ध १ प. । स्त्रीणाञ्च कनिष्ठिकास्थूलं दशाङ्गुलं नेत्रं । स्नेहमात्रा च. २ प. । तदुक्तं—"द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकं । मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमं । बालानां पञ्चवर्षाणामर्द्धमात्राऽपि सा मता । तदूर्द्ध पलमात्रा च स्नेहस्योक्ता भिषग्वरैः । अथास्थापनशुद्धस्य तप्तस्य स्नानभोजनैः । स्थितस्य जानुमात्रेण चापि स्निग्धशलाकया । स्निग्धया मेढ्रमार्गञ्च ततो नेत्रं नियोजयेत् । शनैः शनैर्घृताभ्यक्तं मेढ्रमन्ध्राङ्गुलानि षट् । ततश्च पीड़येद्वस्तिं शनैर्नेत्रञ्च निर्हरेत् । ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः । स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्य्याद्दशाङ्गुलं । शनैर्निष्क्रम्याधेयं सूक्ष्मं नेत्रं विचक्षणैः । योनिमार्गेषु नारीणां स्नेहमात्रां द्विपालिकीं । उत्तानायै स्त्रियै दद्यादूर्द्धजान्वै विचक्षणः । अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते । भूयो वस्तिर्विधातव्यः संयुक्तैः शोधनैर्गणैः । फलवर्त्तिं निदध्याद्वा योनिमार्गे दृढां भिषक् । मूत्रैर्विनिःसृतां स्निग्धां शोधनद्रव्यसंयुताम् । दह्यमाने तथा वस्तौ दद्याद्वस्तिविशारदः ॥" शार्ङ्गः । पलाद्यमुत्तरी वस्तिः मात्रावस्तिः पलद्वयं । यापनास्नेहवस्तौ च द्वावेतौ षट्पलान्वितौ । पिच्छावस्तिर्व्वैत्रस्थः पादोनः शीर्त्तितोऽपरः ॥ आनन्दखानः ।

उत्तरवायुः । पुं । तद्दिग्भवमारुते । स च शीतः स्निग्धः दीपप्रकोपकरः क्लेदनः प्रकृतिस्थानां बलदः मृदुः क्षतक्षीणविषार्त्तानां विशेषेण गुणकरश्च । भद. व. २३ ।

उत्तरवारुणी । स्त्री । इन्द्रवारुण्याम् । राखालशसा । र. सा. सं. वैक्रान्तमारणे । भैष. कुष्ठ चि. । "शिला चोत्तरवारुणी ।" ज्व. चि. कुलवधूरसे । उत्तमारणीति वा. उ. ३७ अ., वै. निघ. २भ. कासचि. वारुणीपत्रधूमे ।

उत्तरायणम् । क्ली । मकरसंक्रान्तितो मिथुनसंक्रान्तिसमाप्तिपर्य्यन्तकाले, सवितुरुत्तरमार्गगतिरूपे वा काले । तदादानं जानीयात्, यतस्तदा नृणां प्रतिदिनं सारमादत्ते, आदित्यपवनयोः भवः सौम्यगुणहरत्वात् । वा. सू. ३अ. ।

उत्तरासङ्गः । पुं । उत्तरीयवस्त्रे । ऊड़नि । अम. । तत्पर्य्यायः,—उत्तरीयं प्रावारः उत्तरासङ्गः वृहतिका संव्यानं (अ), कक्षा (ल) ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरिणी। स्त्री। उत्तमारण्याम्। गुणाः—"उत्तरिणी तु कटुका शीता नेत्र्या लघुः स्मृता। उष्णा स्निग्धा सारका च तुवरा व्रणरोपणी। कासव्रणकृमिश्वासज्वरपित्तप्रमेहकान्। कफकुष्ठप्लीहांश्च वातं तन्द्राञ्च दद्रुकं। क्षयकासं मूत्रकृच्छ्रं योनिरोगञ्च शीथकं। नाशयेदिति सम्प्रोक्ता सुखप्रसवकारिणी। शाकाम्लस्वाद्वीर्ष्णवीर्य्या तिक्ता कृम्यर्शःकुष्ठहृत्। कफवातहरा प्रोक्ता फलं त्वस्याः पटु स्मृतं। तिक्तमुष्णञ्च कटुकं लघु चाग्निप्रदीपकं। पित्तकोपकरञ्चैव शिवदं विषनाशनम्॥" वै. निघ.।

उत्तानः। त्रि। ऊर्द्धास्यशयिते। चित् हइया शोया। मे. नत्रिकं। क्ली। जले। हे. च.।

उत्तानकः। पुं। (Cyperus.) मुस्तभेदे। नागरमुता। उच्चटायां। चेँचुया, निर्विषी। र. मा.। रत्ना.।

उत्तानपत्रः (कः)। पुं। रक्तैरण्डे। रा. नि. व. ८। भा. पू. १भ. गु. व.। सद. व. १। श्वेतैरण्डे। वै. निघ.।

उत्तानशयः। पुं। स्तन्यपायिशिशौ। अतिशिशौ। अम.।

उत्तानशायी। त्रि। उत्तानशायिनि। वै. निघ.।

उत्तापः। पुं। तेजसि। उष्णतायाम्।

उत्तापनम्। क्ली। उष्णताकरणे।

उत्तारः। पुं। वमने।

उत्तालः। पुं। सर्कटे। मे. लत्रिकं। त्रि। उत्कटे।

उत्तुङ्गः। त्रि। उच्चे।

उत्तुङ्गकी। स्त्री। करञ्जके। वै. निघ.।

उत्तुण्डितः। त्रि। निर्गते। सु. चि. २अ.।

उत्तुषः। पुं। लाजायाम्। खैइ। हारा.।

उत्तेजि(रि)तम्। क्ली। अश्वस्य मध्यवेगगतिविशेषे। इयं चतुर्थपञ्चमगतिः। "उत्प्लुत्योत्प्लुत्यगमनं कीपादिवाखिलैः पदैः।" हे. च.।

उत्तोलनम्। क्ली। उत्क्षेपणे।

उत्थानम्। क्ली। मलोत्सर्गे। रत्ना.। सत्वरीगे। पौरुषे। हर्षे। हे. च. मे. नत्रिकं।

उत्थितः। पुं। सरलवृक्षे। रा. नि. व. १२। त्रि। उत्पन्ने। मे. तत्रिकं।

उत्थिताङ्गुलिः। पुं। चपटे। चापड़। भ. च.।

उत्पतः। पुं। पक्षिणि। त्रिका.।

उत्पतनम् (त्तिः)। क्ली, स्त्री। उत्पत्तौ। ऊर्द्ध्वगमने। मे. नचतुष्कं। जन्मनि।

उत्पल(क)म्। क्ली। Blue lotus. नीलकमले। नीलपद्मे। रा. नि. व. १०। सु. सू. २८अ. उत्पलादौ ड.। च. सू. ४अ.। च. द. र. पि. चि.। कुष्ठे। कूड़। तें चेगलिकोष्ठु। प. सु. विश्व.। प्र. कस्तूरीसीदके। र. सा. सं.। च. द. पि. ज्व. लीध्रादिः। "लीध्रोत्पलाम्रतापद्म।" लाक्षादितैले। वै. निघ. अर्शःचि. क्षीरविरृतौ। शालूके। प. मु.। स्वनामख्यातकमलजातीयपुष्पे। शुन्दि फुल, हेला फूल। हिं कौञ्जि। मं उत्पल। सु. चि. ३अ.। गुणाः—कषायं मधुरं शीतलं पित्तकफरक्तघ्नञ्च। राज.। शीतलं स्वादु रक्तपित्तघ्नं दाहश्रमवमिभ्रान्तिक्लमिहरञ्च। रा. नि. व. १०। सामान्येनोत्पलं शीतं स्वादु दाहहरं मतं। रक्तदोषं श्रमं वान्तिं भ्रान्तिं मूर्च्छां क्लमान् जयेत्। द्रव्यगुणः। नीलोत्पले। नीलशुन्दि। सि. यो. र. पि. चि. सिद्धतमयोगे, श्रीकण्ठः। "वासा कषायोत्पलसूत्रियङ्गु।" सि. यो. यक्ष्म-चि. च्यवनप्राशे। वा. सू. १५ अ., अञ्जनादि। पद्मकाष्ठे। "पथ्योत्पलधान्यरीहिणीविश्वैः।" च. द. ज्वरातौ. चि. घनजलादि.। पुष्पे। मे.। जलजातपुष्पमात्रे। अम.।

उत्पलः। त्रि। मांसशून्ये। हे. च.।

उत्पलकः। पुं। चेतकरीषे। वनघुँटे। प्र. र. सा. सं. रूप्यमारणे। नीलोत्पले। नीलशुन्दि। रा. नि. व. १०।

उत्पलकन्दः। पुं। शालूके। रत्ना.।

उत्पलकुष्ठकः। पुं। कुष्ठौषधौ। वै. निघ.।

उत्पलकेसरम्। क्ली। पद्मकेशरे। भैष. क्षुद्ररो. चि. कनकतैले।

उत्पलगन्धिकम्। क्ली। अतिसुरभिचन्दनविशे। श. मा.।

उत्पलगोपा। स्त्री। श्वेतशारिवायाम्। श्वेत शोमालता। वै. निघ.।

उत्पलदलम्। क्ली। तन्नामकास्त्रविशेषे। तच्च छेदने भेदने च प्रयुज्यते। लक्षणं यथा—"उत्पलाध्यर्द्धधाराख्ये भेदने छेदने तथा।" अवि.।

उत्पलपत्र(क)म्। क्ली। वैद्यकास्त्रविशेषे छेदने भेदने च। तत्परिमाणं षड़ङ्गुलम्। सु. सू. ८ अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मद. व. १४ अ.। तिलके। धरणिः। कुवलयपत्रे। हे. च.।

उत्पलभेद्यकः। पुं। वृत्तायतसमौभयपार्श्वि-कर्णबन्धनाकृतिविशेषे। सु. सू. १६ अ.।

उत्पलमृत्। स्त्री। सौराष्ट्रमृत्तिकायां। च. द. र. पि. चि.।

उत्पलशारिवा। स्त्री। श्यामालतायाम्। प. सु.। र. मा। अनन्तमूले। अम। भैष. ध्व. भ. चि.।

उत्पलषट्कम्। क्ली। योगविशेषे। "उत्पलं धान्यकं गुरुची पृश्निपर्णी बलाद्वयं। बालबिल्वं गवां तक्रेणात्युष्णेन च पेषयेत्। तेन खाजकृतं सर्पि-र्देयमानीय शीतलम्। ज्वरातिसारशमनं हुताशन-बलप्रदम्॥" हा. अति. ३स्था. ३अ.।

उत्पलादिः। पुं। कषायवर्गविशेषे। उत्पल-रक्तोत्पलकुमुदसौगन्धिककुवलयपुण्डरीकानि मधुक-श्चेति। गुणाः—"उत्पलादिरयं दाहपित्तरक्तप्रशा-मनः। पिपासाविषहृद्रोगच्छर्दिमूर्च्छाहरो गणः" इति॥ सु. सू. ३८ अ.। भावप्रकाशे त्वन्यविधः। यथा—"उत्पलं नीलसारक्तं कह्लारं कुमुदं तथा। श्वेताम्भोजञ्च मधुकमुत्पलादिरयं गणः॥ सुशीतलो हरत्येवं दाहं तृष्णां हृदामयम्। रक्तपित्तञ्च मूर्च्छाञ्च तथा छर्दिमरोचकम्॥" इति।

उत्पलिनी। स्त्री। कुसुदषण्डे। शुन्दिफूलेर झाड़। लघुकमलिन्यां। हिं कोञ्चिकोटी। गुणाः —हिमा तिक्ता रक्तासयघ्नी पित्तघ्नी तापकफकास-तृष्णाश्रमवमिघ्नी च। तस्या बीजगुणाः—स्वादु रुच्यं हिमं गुरु च। रा. नि. व. १०।

उत्पली। स्त्री। तुषचर्मण्याम्। तूषेर चापड़ा। मे. लघिकं।

उत्पाटः (टः)। पुं। कर्णपालीगतरोगे। तल्ल-क्षणं—"गुर्व्वाभरणसंयोगात्ताड़नाद्वर्षणादति। शीथः पाल्यां भवेच्छ्यावः दाहपाकरुजान्वितः। रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदो मतः॥" मा. नि.। कर्णपाल्या उपद्रवेः। सु. उ २० अ.।

उत्पाठनम्। क्ली। वायुजन्यव्रणवेदनाविशेषे। उन्मूलने। सु. सू. २२ अ.।

उत्पादकः। पुं। शरभे। हे. च.।

उत्पादशयनः। पुं। टिट्टिभपक्षिणि। हे. च.।

उत्पादिका। स्त्री। उपजिह्विकायाम्। हारा। हिलमोचिकायाम्। शिक्षे। उपोदिकायां। शूँई। विका.। दंशिकानामकीटविशेषे। श. च.।

उत्पारः। पुं। गुडघृते।

उत्पालो। स्त्री। आरोग्ये। श. च.।

उत्पिञ्जलः। वि। भृशमाकुले। हे. च.।

उत्पिष्टसन्धिः। पुं। सन्धेरुत्पेषणे, अस्थिसन्धौ घर्षणे। तेन सन्धावुभयतः शीघ्री वेदना च भवति। सु. नि. १५ अ.। See भग्नम्।

उत्पीड़ः। पुं। सुरामण्डे। फेने।

उत्पुटकः। पुं। कर्णपालीगतरोगविशेषे। सु. सू. १६ अ.। कर्णपालीविधीपद्रवे। सु.।

उत्प्राणः। पुं। श्वासे। वै. निघ.।

उत्प्लवनं। क्ली। उल्लङ्घने। लाफान।

उत्फालः। पुं। उल्लम्फने।

उत्फुल्लः। वि। विकसिते। हे. च.। क्ली। स्त्रीन्द्रिये। मे.।

उत्सः। पुं। प्रस्रवणे।

उत्सङ्गः। पुं। क्रोड़े। रा. नि. व. १८। "क्रोड़-मङ्कस्तथोत्सङ्गः प्राग्भागो वपुषः स्मृतः।" राज.। व्रणवस्तुप्रदेशे। सु. चि. १अ.। पर्व्वतमध्यदेशाकार-व्रणबन्धविशेषे। वा. सू. २८ अ.।

उत्सङ्गपिड़का। स्त्री। लक्षणं—नेत्रवर्त्मगत-रोगविशेषे। नवाधोवर्त्मनि सञ्जातपिडकायां। सा च स्थूला कण्डूमती, अधोवर्त्मनि सोत्सङ्गा वर्त्मा-भ्यन्तरसुखी, बहिस्तासान्तःपूया च। "अभ्यन्तर-मुखी ताम्रा बाह्यतो वर्त्मनश्च या। सोत्सङ्गोत्सङ्ग-पिड़का सर्व्वजा स्थूलकण्डुरा॥" मा. नि.।

उत्सङ्गी। पुं। नाड़ीव्रणविशेषे। नाली घा। सु.।

उत्सर्गः। पुं। त्यागे, दाने। वर्জ্জने। हे.।

उत्सर्जनम्। क्ली। दाने। अम.।

उत्सर्जनी। स्त्री। गुदस्य द्वितीयवलौ। लक्षणं यथा—"उत्सर्जनी तु तदधः सा साङ्गोङ्गुल-सन्निता।" भा.।

उत्सर्य्या। स्त्री। प्राप्तप्रजननकालायां गवि। पाल लइबार योग्य गाभी। जटा.।

उत्सवः। पुं। इच्छाप्रसवे। उत्सेके। उत्साहे। क्रीड़े। मे वत्रिकं।

CC-0. Gurukul Kan[illegible]ction, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्सादनम्। क्ली। उद्वर्त्तने। भा. म. ४भ. ने.-री. चि.। "ताः प्रोचुर्णोत्सादनलेपनादीन्।" "उत्सादनाङ्गैस्त्वक् स्त्रीणां विशेषात्कान्तिमद्वपुः।" सु. चि. २४ अ.। उत्सवे। रत्ना. अने.। सानुलेखने। मे. तचतुष्कं। निम्नस्य व्रणस्य उन्नतीकरणे। सु. चि. १अ.।

उत्सादितः। त्रि। निर्म्मलीकृते।

उत्साहः। पुं। मनस उल्लासे। अम.।

उत्साहयुक्तः। पुं। शरभे। मद. व. १२।

उत्साही। पुं। भल्लातकीगिरि।

उत्सिंहनम्। क्ली। नासया ऊर्द्ध्वश्वासधारणे। वा. सू.।

उत्सुकः। त्रि। उत्कण्ठिते। अमे।

उत्सूरः। पुं। सन्ध्याकाले, दिनावसाने। हे. च.।

उत्सृष्टः। त्रि। त्यक्ते। अम.।

उत्सेचनं। क्ली। ऊर्द्ध्वसेके। उपचान।

उत्सेधः। पुं। शरीरौन्नत्ये। दैर्घ्ये। अम.।

उत्स्मयः। पुं। मन्दहास्ये। वै. निघ.।

उत्क्षिप्तः। पुं। धुस्तूरफले। श. च.।

उत्क्षिप्तिका। स्त्री। आतङ्कविशेषे। हे. च.।

उत्क्षेपणम्। क्ली। व्यजने। धान्यमर्द्दनवस्तुनि। हे. च.।

उत्क्षेपमर्म्म। क्ली। शङ्खद्वयोपरिकेशप्रान्तस्थ-सन्धिषु। तत्र विशल्यमर्म्मणां युगलं तन्नाम्नैव तिष्ठति। सु. शा. ६अ.।

उद(क)म्। क्ली। जले। श. र., रा. नि. व. १४। पुं। करिशुण्डजलायाम्। हला.।

उदकप्रक्षेपणम्। क्ली। जलप्रक्षेपेण जलस्य शीतीकरणोपाये। सु. सू. ४५ अ.।

उदकमञ्चिका। स्त्री। जलप्रसाधनार्थमाधार-विशेषे। सु. सू. ४५ अ.।

उदकमञ्जरीरसः। पुं। रसोऽयं निरामज्वरे देयः। मात्रा २ र, अनुपानं आर्द्रकरसः। अत्र ऊषणं मरिचं शर्करा विषं। मतान्तरे शर्करा सर्व्वद्रव्यसमा। चिराचं २४ प्रहरपर्य्यन्तम्। पाठः —"सूती गन्धष्टङ्गणः सीषणः स्यादैतैस्तुल्या शर्करा मत्स्यपित्तैः। भूयो भूयो भावयेच्च चिराचं वल्ली देयः शृङ्गवेरस्य वारा॥" पारा १ भ. गन्धक १ भ. सोहागार धै १ भ. मरिच १ भ. विष ४ भ.। केह केह चिनि ४ भाग वलेन। अत्र शर्करास्थाने मनःशिलादानेन चन्द्रशेखररसो भवति। र. सा. सं.।

उदकमेहः। पुं। कफीयमेहविशेषे। लक्षणं —"अच्छं बहु सितं शीतं निर्गन्धमुदकोपमं। मेह-त्युदकमेहेन किञ्चिदाविलपिच्छिलम्।" मा. नि.।

उदकवहस्रोतः। क्ली। जलवहनाड्यां। ते च द्वे तयोर्मूलं तालु क्लोम च। सु. शा. ९ अ.।

उदकवहा। स्त्री। मूत्रवस्तिसन्निप्रपन्ने धमनी-द्वये। तयोर्मूलं तालु क्लोम च। सु. शा. ९।

उदकषट्पल(घृत)म्। क्ली। अर्शोरोगे। तिल-तैलं ४ श. वारि १२ श. दुग्धं ४ श. यवक्षारादीनां प्रत्येकं पलं कल्कं दत्त्वा पचेत्। पाठः—"सक्षारैः पञ्चकोलैस्तु पालिकैस्त्रिगुणोदके। समक्षीरं घृत-प्रस्थं ज्वरार्शःप्लीहकासहृत्॥" घृत ४ श. जल १२ श. दुग्ध ४ श. पञ्चकोल, यवक्षार प्रत्येक ४ प. (८ तो.)। ईषा कल्क। च. द. अर्शः-चि.।

उदकिका। स्त्री। बलानामतृणे। वेड़ेला। रा. नि. व. ४।

उदकी। स्त्री। पाठायाम्। आकृतिगणे। वै. निघ. ग्रह. चि. २ अतिविषादिः।

उदकीर्ण्यः (र्य्यः)। पुं। महाकरञ्जे। डहर-करञ्ज। हिं अरारि। रा. नि. व. ९। र. मा. भा. पू. १भ. गु. व.।

उदकीर्य्या। स्त्री। पूतीकरञ्जे। नाटाकरञ्ज। वा. टी. हेमा.। वा. सू. १५ अ. अर्कादिः। "प्रत्यक्पुष्पीपीततैलोदकीर्य्या।" च. सू. २अ. वमने, फलिनीव. १अ.। सु. सू. ३९ अ. कफशमने।

उदकोदरम्। क्ली। जलोदरनामरोगे। See दकोदरम्।

उदक्या। स्त्री। रजःस्वलायाम्। अम.।

उदगयनम्। क्ली। उत्तरायणे। अम.।

उदग्रदन्। त्रि। महादन्तकरिणि। हे. च.।

उदङ्मुखः। त्रि। उत्तरमुखे।

उदञ्चनम्। क्ली। पिधाने। ढाकनी। हला.।

उदण्डपालः। पुं। मत्स्यविशेषे। डानकोण गाछ। मे. लघुत्रकं।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदव्या। स्त्री। तैलपिपीलिकायाम्। लाल-पिपड़े। रा. नि. व. १९।

उदधिः। पुं। समुद्रे। रत्ना.। [अब्धि कफः।

उदधिकफः। पुं। समुद्रफेने। च. द.। See

उदधिफलम्। क्ली। समुद्रफेने। वै. निघ.।

उदधिफेनः। पुं। समुद्रफेने। च. द. रस. र. बाल. चि.। See अब्धिकफः।

उदधिमलः। पुं। समुद्रफेने। राज.।

उदधिलवणम्। क्ली। सामुद्रलवणे। भा.।

उदधिशुक्तिः। स्त्री। मुक्ताशुक्तौ। समुद्रेर झिणुक।

उदधिसम्भवम्। क्ली। सामुद्रलवणे। पाञ्चा लवण। भा. पू. १भ.।

उदन्तिका। स्त्री। तृष्णा। हारा.।

उदन्या। स्त्री। पिपासायाम्। रा. नि. व. २०। See तृषा।

उदपर्णी। पुं। कृधान्यविशेषे। सु. सू. ३८ अ.।

उदपानः। पुं, क्ली। कूपे। अम.।

उदमन्थः। पुं। उदकप्रधानमन्थे। च. सू. ६ अ.। जलालोड़ितसक्तुशक्तौ। स च ग्रीष्मे सेव्यः। भा. प. सु.।

उदमानम्। क्ली। वारिमानाढ़के।

उदम्बरः। पुं। शरीरजकृमिभेदे। शार्ङ्ग. ७अ.। See कृमिः। क्ली। ताम्रे। ताम्रा।..अ. टी.।

उदयः। पुं। उत्पत्तौ।

उदयभास्करकर्पूरः। पुं। स्वनामख्यात-कर्पूरे। स च पक्वः। सदलनिर्दलभेदेन द्विभेदः। गुणाः —"पीतः सरः स्वच्छकः सम्मोक्षः कठिनः कटुः समुदितः स्याद्दीपकोऽग्नेर्बलुः। श्रीदः पित्तकरः कफकृमिविषान् वातञ्च नाशायुतिं लालास्रावगल-ग्रहौ च शमयेत् जिह्वाजड़त्वापहः।" वै. निघ.।

उदयभास्करसः। पुं। कुष्ठाधिकारे रसः। अत्र केवलं गन्धकेन मृतं ताम्रं दशभागम्। अमृतं विषं, तस्य द्वौ भागौ। र. सा. सं.। पाठः— "गन्धकेन मृतं ताम्रं दशभागं समुद्धरेत्। उषणं (णा) पञ्चभागं (गा) स्यादमृतञ्च द्विभागिकं। सूक्ष्म-चूर्णीकृतं सर्व्वं रक्तिकैकप्रमाणतः। दातव्यं कुष्ठिने .....॥ उषणं स्थाने वृषणमिति। रसे. चि.। "पिप्पली पञ्चभागा स्यादिति।" सा. कौ.। ताम्रा १० तो. पिपुल ५ तो. शृङ्गीविष २ तो. जलेन पिष्ट्वा रक्तिप्रमाणा वटी कार्य्या। मतान्तरे पिपुलमूल ५ तो. अन्यमते त्रिकटु ५ तो.। अन्यः हिक्काश्वासे। पाठः—"धान्याभं सूतकं गन्धं श्वेतापामार्गजद्रवैः। तुल्यांशं मर्द्दयेच्चाग्नियन्त्रे पाता-लके पचेत्। ऊर्द्ध्वलग्नस्तु संग्राह्यो रसो हृदय-भास्करः। श्वासं पञ्चविधं हन्ति द्विगुञ्जमनुपानतः॥ रस. र.। अभ्र. पारा, गन्धक समानभागे श्वेत आपांगरसে গাড়িয়া পাতালযন্ত্রে পাক করিলে যন্ত্রের ঊর্দ্ধভাগে যে বস্তু লাগে, তাহা উদয়ভাস্কর-রস।

उदरम्। क्ली। नाभिस्तनमध्यभागे। পেট। तत्पर्य्यायः,—पिचिण्डः कुचिः कुक्षी जठरः तुन्दः तुन्दं (अ)। रा. नि. व. १८। तन्नामकरोगे। उदरि रोग। तदष्टविधम्—वातपित्तकफसन्नि-पातैः चतुर्विधं प्लीहजन्यं मलसञ्चयजन्यं क्षतजन्यं जलसञ्चयजन्यञ्चेति। अस्य निदानं—अग्निमान्द्या-जीर्णमलसञ्चयादिकम्। कुपितवातादिभिः स्वेद-वहास्ववहस्रोतसि रुद्धे, तथा प्राणापानाभ्यामग्नौ दूषिते तदुत्पद्यते। साधारणलक्षणं—"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता। शीफः सदन-सङ्गानां सङ्गी वातपुरीषयोः। दाहतृष्णा च सर्व्वेषु जठरेषु भवन्ति हि॥" सु. नि. ७अ.। "सर्व्व-मेवोदरं प्रायो दोषसंहतिजं मतं। अतो वातादि-शमनी क्रिया सर्व्वा प्रशस्यते॥ वह्निसन्दीपनायाति कुक्षौ दोषप्रपूरिते। अजीर्णाम्लविनेष्यान्नैर्मन्दाग्नौ मलसञ्चयात्॥ रुद्धाः स्वेदाम्बुवाहिन्यो जनयन्त्युदरं नृणां। आध्मानमाततात्वं गतिरल्पा क्लशाङ्गता॥ शीथः सदनसङ्गानां दाहस्तन्द्रा विवर्णता। विड्वात-सङ्गः पादाभ्यां शीथश्चाशुभलक्षणम्। पूर्व्वरूपम्। औदकानूपजं मांसं शाकं पिष्टकृतं तिलाः। व्याया-साध्वदिवास्वप्नतान्नपानं विवर्ज्जयेत्॥ तथोषणलवणा-म्लानि विदाहीनि गुरूणि च। नाद्यादन्नानि जठरी तीयपा विवर्ज्जयेत्॥ रस. र.।

उदरग्रन्थिः। पुं। अष्ठीलारोगे। গুল্মরোগে। हे. च.। अन्ने। আঁৎড়ী। प्लीहि। Wil.

उदरत्राणं। क्ली। उदरबन्धन-वस्त्रादौ। हे.।

उदरथिः। पुं। समुद्रे। सूर्य्ये। हे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदरनाड़ी। स्त्री। अन्ननाड्याम्।

उदरपरीक्षा। स्त्री। जठरपरीक्षायाम्।

उदरपिशाचः। पुं। सर्व्वान्नभक्षके। हे. च.।

उदरपीड़ा। स्त्री। उदरामये।

उदरभङ्गः। पुं। अतिसाररोगे।

उदररसः। पुं। उदरस्थपाचकरसे।

उदरव्याधिः। पुं। उदरामये।

उदरस्फुटा। स्त्री। नागवल्ल्याम्। व. निघ.।

उदराग्निः। पुं। जठराग्नौ।

उदरानलपत्रकः। पुं। लघुतालीशपत्रे। वै. निघ.।

उदरामयः। पुं। अतिसाररोगे। See अतीसारः।

उदरामयकुञ्जकेशरी। पुं। ग्रीहाधिकारि रसः। अत्र शुल्वं ताम्रं, कटुकं त्रिकटुकम्, लवणानि पञ्चलवणानि, कणामूलं पिप्पलीमूलम्। अत्र हड्डाः चव्यं चित्रकचूर्णञ्च न प्रयच्छन्ति। पाठः—"रसगन्धकभस्मताम्रकं कटुकक्षारयुतं सटङ्कणं। कणामूलकचव्यचित्रकं सयमानि लवणानि रामठं। समभागमिदं विभावयेत् खरतापे त्वथ जम्बुवारिणा। उदरामयकुञ्जकेशरी रस एष प्रथितोऽस्य मात्रकः॥ सुरवार्य्यनु दापयेद्विषक्.....। र. सा. सं.। पारा, गन्धक, ताम्र, त्रिकटु, यवक्षार, सोहागार खै, पिपुलमूल, चई, चितार मूल, पञ्चलवण, यमान एवं हिं प्रत्येक समान भाग। लेबुर रसे मर्द्दन। मात्रा १ माषा।

उदरारिरसः। पुं। उदराधिकारि रसः। वज्रीक्षीरेण कुहीक्षीरेण। पाठः—"पारदं गुक्तितुल्यञ्च जैपालं पिप्पलीसमं। आरग्वधफलान्मज्जा वज्रीक्षीरेण मर्द्दयेत्॥ माषमात्रां वटीं खादेत् स्त्रीणां जलोदरं जयेत्। चित्रकस्वरसञ्चानु पथ्यं दध्योदनं हितम्॥" र. सा. सं.।

उदरावर्त्तः। पुं। नाभौ। रा. नि. व. १८।

उदरावेष्टः। पुं। शरीरकृमिभेदे। पाटाकृमि। शार्ङ्ग. ७अ। See कृमिः।

उदरिणी। स्त्री। गर्भवत्यां। हे. च.।

उदरिलः। वि। महोदरयुक्ते। भुँड़ौयुक्त। हे. च.।

उदरी। वि। उदरिले। हे. च.।

उदर्कः। पुं। धुस्तूरवृक्षे। मदनकण्टके। गयना काँटा। मे. कविकं।

उदर्चिः। पुं। अग्नौ। मे.।

उदर्दः। पुं। Erysipelas. रोगविशेषे। तल्लक्षणं यथा—"वरटीदष्टसंस्थानः शोथः सञ्जायते बहिः। सकण्डूस्फोटबहुलः छर्द्दिज्वरविदाहवान्। उदर्दमिति तं विद्याच्छीतपित्तमथापरे। वाताधिकं शीतपित्तमुदर्दञ्च कफाधिकम्॥" मा. नि.।

उदर्दप्रशमनवर्गः। पुं। उदर्दशमनयोगविशेषे। यथा—तिन्दुक-पियाल-बदर-खदिर-कदर-सप्तपर्णी-श्वकर्णार्জ্জুনासनारिमेदा इति दश। तेँद, पियाल, कुल, खदिर, श्वेतखदिर, छातिम, शाल, अर्জ্জুन, पीतशाल विट्खदिर। च. सू. ४अ.।

उदर्दः। पुं। Scarlet fever. ज्वरविशेषे। Wil.

उदलावणिकः। वि। लवणोदकमिश्रव्यञ्जने। हला.।

उदश्वित्। क्ली। अर्द्धजलतक्रे। अर्द्धेक जलयुक्त घोल। र. मा. अम.। "दध्यम्भसी यदि समे तदुदश्विदाहुः।" रा. नि. व. १५। प. प्र. ३ ख.। गुणाः—लेखन कुष्ठनाशनं तृष्णादाहमुखशोषघ्नञ्च। राज.। पित्तश्लेष्मघ्नम्। रा. नि. व. १५।

उदात्यूहः। पुं। जलकाके। पानकौड़ी। वै. निघ.।

उदानः। पुं। कण्ठस्थवायौ। "उदानः कण्ठदेशस्थः।" भा.। "उदानस्य पुनः स्थानं नाभ्यूरुकण्ठ एव च। वाक्प्रवृत्तिः प्रयत्नोर्জ্জोबलवर्णादिकर्म्म च॥" च.। "उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः। तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते। ऊर्द्ध्वजत्रुगतान् रोगान् करोति च विशेषतः॥" सु. नि. १अ.। "तत्कर्म्म ऊर्द्ध्वनयनम्।" वा. सू. ११ अ.। उदरावर्त्ते। सर्पे। नाभौ। मे. नविकं। पद्मनि। श. र.।

उदारः। पुं। दीर्घशाखी। शस्त्रविशेष।

उदावर्त्तः। पुं। नाभौ। सर्पविशेषे। Di

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ease of the bowells, iliac passion. रोगविशेषे। गूदो। मे.। हे. च.। रोगिणानेन मलमूत्रवायूरोधो भवति। तस्य निदानं सम्प्राप्तिश्च। "वातविण्मूत्रजृम्भाक्षुत्तवोद्गारवमीन्द्रियदुष्टितृष्णोच्छ्वासनिद्राणां वृत्योदावर्त्तसम्भवः॥" क्रमेण लक्षणं यथा—वातमूत्रपुरीषाणां सङ्गोध्मानं क्लमोरुजा। जठरे वातजाश्चान्ये रोगाः स्युः वातनिग्रहात्॥ आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तथोर्द्ध्ववातः। पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य॥ वस्तिमेढ्रनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा। विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे॥ मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात् पवनात्मकाः स्युः। तथाक्षिनासावदनामयाश्च भवन्ति तीव्राः सहकर्णरोगैः। आनन्दजं वाप्यथ शोकजं वा नेत्रोदकं प्राप्तमुच्यती हि। शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन॥ मन्यास्तम्भः शिरःशूलं आर्दितार्द्धावभेदकौ। इन्द्रियाणाञ्च दौर्ब्बल्यं क्षवथोः स्यादिधारणात्॥ कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथवाप्रवृत्तिः। उद्गारवेगेऽभिहते भवन्ति घोरा विकाराः पवनप्रसूताः॥ कण्डू-कोठारुचिव्यङ्गशीत-पाण्डामयज्वराः। कुष्ठवीसर्पहल्लासाः कृच्छ्रान्निग्रहजा गदाः॥ मूत्राशये वै गुदमुष्कयोश्च शीतोरुजा मूत्रविनिग्रहस्य। शुक्राश्मरी तत्स्रवणं भवेच्च ते ते विकारा विहते च शुक्रे॥ तन्द्राङ्गमर्द्दोऽरुचिः श्रमश्च क्षुधाभिघातात् क्लमता च दृष्टेः। कण्ठास्यशोषः श्रवणावरोधः तृष्णाभिघातात् हृदये व्यथा च॥ श्रान्तस्य निश्वासविनिग्रहेण हृद्रोगमीहावधवापि गुल्मः। जृम्भाङ्गमर्द्दोऽक्षिशिरोऽतिजाड्यं निद्राभिघातादथवापि तन्द्रा॥ वायुः कोष्ठानुगो रुद्धः कषायकटुतिक्तकैः। भोजनैः कुपितः सद्य उदावर्त्तं करोति च॥ वातमूत्रपुरीषासृक्कफमेदोवहानि वै। स्रोतांस्युदावर्त्तयति पुरीषं चातिवर्त्तयेत्॥ ततो हृदस्तिशूलार्त्तः हृल्लासारतिपीडितः। वातमूत्रपुरीषाणि कृच्छ्रेण लभते नरः॥ इति। मा. नि.। "विहत् सुधापत्रतिलादिशाकयाम्यौदकानूपरसैर्यवान्नं। अन्यैश्च सृष्टानिलविड्भिरद्यात् तथा प्रसन्ना-गुडशीधुपायी॥ रस. र.।

उदावर्त्ता (र्त्ता)। स्त्री। Difficult menstruation. वायुजन्यस्त्रीयोनिरोगविशेषे। सा कष्टेन सफेनिलं रजो मुञ्चति। "सफेनिलमुदावर्त्ता रजः कृच्छ्रेण मुञ्चति।" भा. म. ४भ. यो. रत्नाकरः। चि.।

उदितः। पुं। नीवारे। उड़िधान। प. मु.।

उदीच्यम्। क्ली। क्रीवेरे। सुगन्धवाला। प. मु.। रा. नि. व. १०। तें कुरुवेरु। सि. यो. ज्व. चि. षड़ङ्गपानीये। "चन्दनोदीच्यनागरैः।" सि. यो. ज्व. चि. किरातादौ। "चन्दनोदीच्यवत्सकैः।"

उदीच्यकाष्ठम्। क्ली। तीपचिनीतिख्यातद्रव्ये। वै. निघ.।

उदीक्षणम्। क्ली। दमने।

उदु(दू)खलम्। क्ली। गुग्गुलौ। मे.। लौहभाण्डे। हांगामदिस्ते इति लोके। तण्डुलकण्डनार्थपात्रे। ऊखली इति च लोके। अम.।

उदुम्बरः। पुं। Glomerous fig tree, (Ficus glomerata.) यज्ञाङ्गवृक्षे। तत्पर्य्यायः,—क्षीरवृक्षः हेमदुग्धः सदाफलः कालस्कन्धः यज्ञयोग्यः यज्ञीयः सुप्रतिष्ठितः शीतवल्कः यज्ञसारः जन्तुफलः पुण्यशून्यः पवित्रकः सौम्यः शीतफलः क्रमिकण्टकं क्रमिकण्टकं क्रिमिकण्टकं (मे), पाणिभुक् यज्ञाङ्गः ब्रह्मवृक्षः यज्ञोडुम्बरः (शब्दर,) सुवक्षुः श्वेतवल्कलः (ज)। यज्ञडुमुर गाछ। गुर्জ, हिं गुलार। मं उम्बराचेझाड़। उत्, उदुम्बरः ज. द.। सु. म. ३८ अ. न्यग्रोधादिः। गुणाः—"उदुम्बरः शीतलः स्याद्रक्तपित्तसन्धानकारकः। व्रणरोपणकृद्वृष्यो मधुरस्तुवरो गुरुः। अक्षिसन्धानकृद्वर्ण्यो कफपित्तातिसारकान्। योनिरोगं नाशयति वल्कश्चैवास्य शीतलं। दुग्धं तुवरं गर्भ्यं व्रणनाशकरं स्मृतं। कोमलञ्चास्य च फलं सन्धक्तुवरं मतं। हितकारि तृषापित्तकफरक्तरुजापहं। मध्यमं कोमलं स्वादु शीतलं तुवरं मतम्। पित्ततृषामोदकरं रक्तस्रुतिवमीहरम्॥ वै. निघ.। व्रण्यः गुरुः कफपित्तघ्नश्च। हिमः रुच्यः पित्तकफास्रजित् मधुरः वर्ण्यः व्रणशीधनरोपणश्च। सद. व. ५। भा. पू. १भ. वटादिव.। तथा अस्य पक्वफलगुणाः मधुरं हिमं क्रमिकरं रक्तपित्ततृष्णादाहमूर्च्छाघ्नञ्च। सुपक्वफलगुणाः—अतिशीतलं मधुरं पित्तश्रमशोषघ्नञ्च। अपक्वफलगुणाः—कषायत्वं दीपनत्वं रुचिकरत्वं मांसकरत्वं शोणितविकारजनकत्वञ्च। अस्य वल्कलगुणाः—शीतं कषायं व्रणघ्नं गर्भसंरक्षणं स्तन्यजनकञ्च। रा. नि. व. ११। कुष्ठविशेषे। ताम्रे। रा. नि. व. १३। जन्तुफले। भा. पू. अने.। क्ली। कर्षे, २ तो.। प. प्र. १ ख.। ताम्रे। मद.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व. ४। तीलमाषे। वै. निघ. पाना. चि. विफलादिलेहे। मेदे। चिका.।

उदुम्बरच्छदा। स्त्री। क्षुद्रदन्तीवृक्षे। मद. व. १.।

उदुम्बरदला। स्त्री। क्षुद्रदन्तीवृक्षे। रा. नि. व. ६।

उदुम्बरपर्णी। स्त्री। दन्तीवृक्षे। प. मु.। र. मा.। लघुदन्तीवृक्षे। भा. पू. १ भ.।

उदुम्बरमशकः। पुं। मूषिकेे। वै. निघ.।

उदुम्बरी। स्त्री। काकोदुम्बरिकायाम्। मं कालाडंबर। रा. नि. व. ११।

उदूखलम्। क्ली। तण्डूलादि कण्डनार्थं काष्ठपात्रे। ऊथ्नि। गुग्गुलौ। मे. लविकं।

उदूखलसन्धिः। पुं। उदूखलाकार-ग्रीवोर्द्ध्वगतसन्धौ। भा.। कक्षावङ्क्षणदशनसन्धिः। सु. शा. ५ अ.।

उद्दृढः। त्रि। स्थूले। मे.।

उद्गमः। पुं। वान्तौ। वमि। वै. निघ.।

उद्गमनीयम्। क्ली। धौतवस्त्रे। अम.। धोया कापड़।

उद्गारः। पुं। उद्वमने। कण्ठगर्ज्जने। ढेकुर इति भाषा। जटा.। "ग्लानेरोजःक्षयाद्दुःखादजीर्णाच्च अभीक्ष्णत्वात्। उदानकोपादाहारस्यास्थिरत्वाच्च यद् भवेत्। पवनस्योर्द्ध्वगमनं तदुद्गारं प्रचक्षते॥" शार्ङ्ग. २५ अ.। ढेकुर। रा. नि. व. २०।

उद्गारकमणिः। पुं। प्रवाले। पला। मं पोंवले। रा. नि. व. १३।

उद्गारणम्। क्ली। उद्गारकरणे।

उद्गारशुद्धिः। स्त्री। उद्गारानवरोधे, सधूमास्त्रीद्गाराभावे।

उद्गारशोधनः। पुं, क्ली। श्वेतजीरके। कृष्ण जीरके। भा. पू. १ भ.।

उद्गारशोधिनी। स्त्री। जीरके। वै. निघ.।

उद्गीरणम्। क्ली। उद्गारे। वमने। विज. र.।

उद्गाहः। पुं। उद्गारे। ढेकुर। वै. निघ.।

उद्घः। पुं। देहस्थ वायौ। मे. घञ्किं। हस्तपुटे। हे. च.।

उद्घटम्। क्ली। वार्त्ताकुपथ्ये। वै. निघ.।

उद्घर्षणम्। पात्रादिघर्षणे। इष्टकाखण्डेनोद्घर्षणे कण्डुकोठनाशः शिरासुखकारकत्वञ्च। राज.।

उद्घसम्। क्ली। मांसे। हारा.।

उद्घाटक(न)म्। क्ली। कूपाज्जलोत्तोलनार्थं सरज्जुघटे। तत्पर्य्यायः—घटीयन्त्रम्। अ.।

उद्घातः। पुं। पादस्खलने। कालभेदे। मे. तत्रिकं। पवनाभ्यासयोगाय कुम्भकादित्रये। विश्व. तत्रिकम्। अस्त्रे। त्रिका.।

उद्दंशः। पुं। मत्कुणे। ऊकुण। हे. च.।

उद्दण्डपालः। पुं। मत्स्यविशेषे। दाँड़िका-माछ। सर्पविशेषे मे.।

उद्दानकः। पुं। शिरीषवृक्षे। रा. नि. व. ९। तें कोंडगीगुपुष्पु। चुल्लग्राम्। विश्व.।

उद्दानम्। क्लीं। चुल्लीविशेषे। उद्यमे। वाड़-वाग्नौ।

उद्दन्तुरः। त्रि। उत्कटदन्ते, करालदन्ते। मे.।

उद्दारदा। स्त्री। शाकतरौ। शेशुन। मंसाग। वै. निघ.।

उद्दारा (रो)। स्त्री। गुड़ूच्याम्। श. च.।

उद्दालः (कः)। पुं। (Cordia myxa or Latifalia.) बहुवारवृक्षे। चालिता गाछ। हिं बहु आरि, लसोड़ा। प. मु.। अम. रा. नि. व. ११। See बहुवारः। आरण्यकोद्रवे। मद. व. १०।

उद्दाला। स्त्री। आरी इति महाराष्ट्रे।

उद्दिष्टः। पुं। बदरवृक्षे।

उद्दीपः (प्रः)। पुं। गुग्गुलौ। अ. टी. भ.।

उद्दीपकः। त्रि.। सीमाकारिणि।

उद्देशः। पुं। गिरिगह्वरकूपे। हारा.। समासकथने। "समासकथनमुद्देशः, यथाशल्यमिति।" सु. उ. ६५ अ.। उपदेशे। हारा.।

उद्देहिका। स्त्री। उत्पादिकायां। वालवी इति ख्याते महाराष्ट्रीयकीटविशेषे। पेदो पोका। हारा.।

उद्दमः। पुं। कष्टश्वासे।

उद्धर्षणम्। क्ली। रोमाञ्चे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्वानम्। क्ली। चुल्ल्याम्। अ. टी. भ.।

उद्वान्तः। पुं। निर्मदकरिणि। अम.।

उद्वारा। स्त्री। गुडूच्याम्। श. च.।

उद्वूलनम्। क्ली। सतैललवङ्गकर्पूरकस्तूरीमरिचलक्चूर्णेषु। पाकराजः।

उद्वूषणम्। क्ली। रोमाञ्चे। हला.।

उद्वृतः। त्रि। परिभुक्तोज्झिते। मे. तत्रिकं।

उद्वृत्तः। त्रि। विकसिते। हे।

उद्वटः। पुं। कच्छपे। शूर्पे। मे. टत्रिकं।

उद्भवः। पुं। उत्पत्तौ। अम.।

उद्भावः। पुं। उत्पत्तौ।

उद्भिजः। त्रि। उद्भिज्जे। अ. टी. र.।

उद्भिज्जः। त्रि। उद्भिदी जाते। इन्द्रगोपमण्डूकादौ। अम.।

उद्भित् (द्)। त्रि। गुल्मादौ। तच्च पञ्चधा—तरुः गुल्मः लता वल्ली तृणञ्च। अम.।

उद्भिदम्। क्ली। भूमिमुद्भिद्य उद्गमज्जलस्थाने। वा. टी. हेमा.। सामुद्रलवणे। पांडा लवण। र. मा.। Culinary salt साम्बविलवणे। रस. र. अर्ण:-चि.। त्रि। तदादौ।

उद्भूतः। त्रि। उत्पन्ने, जाते।

उद्भेदः। पुं। अङ्कुरे। रा. नि. व. २।

उद्भ्रमः। पुं। उद्वेगे। अम.।

उद्यमः। पुं। उद्योगे।

उद्यानम्। क्ली। उपवने। उद्यानं स्वयमप्यरैः समन्तु स्त्रीकैरन्येषां विभवतताच्च पुष्पवाटी। हला.।

उद्यावः। पुं। नियमे। संयोजने।

उद्योगः। पुं। चेष्टायाम्।

उद्योतः। पुं। ज्योतिषि, आलोके। हे.।

उद्रः। पुं। जलमार्जारे। उद्विड़ाल। हारा.। जलनकुले। धेड़े इति भाषा। त्रिका.।

उद्रथः। पुं। वृक्षविशेषे। कुकुरशोंका। ताम्रचूड़े। कुक्कुटे। मे.। पाचके।

उद्राङ्कः। पुं। रक्तचित्रके। वै. निघ.।

उद्रिक्तचित्तता। स्त्री। पानात्यधरीगे। मत्ततायाम्। रा. नि. व. २०।

उद्रेकः। पुं। रजोगुणे। रा. नि. व. २१। महानिर्व्वे। भा. म. १भ.।

उद्वत्सरः। पुं। संवत्सरे। हे. च.।

उद्वमनम्। क्ली। उद्गिरणे, वान्तौ। वमिकरा।

उद्वर्त्तनम्। क्ली। विलेपने। घर्षणे। मे. नवतुष्कं। तद्गुणाः—"उद्वर्त्तनं वातहरं कफमेदोऽनिलापहम्। स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परं। उद्वर्त्तनं हरिद्राद्यैः कण्डूवैवर्ण्यरौक्ष्यजित्। तिलैनोद्वर्त्तनं कण्डूरौक्षत्वघ्नोषणाशनम्॥" राज.। "उद्वर्त्तनं कफहरं मेदसः प्रविलापनम्। स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्।" वा. सू. २अ.। "उद्वर्त्तनं वातहरं भाजकानलदीपनं। गात्रस्थिरत्वसुखितात्वक्प्रसादमृदुत्वकृत्॥" भद. व. १३। मर्द्दने। च. द. विसूचि.।

उद्वहः। पुं। पुत्रे। उदानवायौ। स्त्री। कन्यायाम्।

उद्वान्तः। पुं। निर्मदगजे। त्रि। उद्वमिते। मे. तत्रिकं।

उद्वासनम्। क्ली। मारणे, वधे। अ.।

उद्वाहनी। स्त्री। वराटके।

उद्विड़ालः। पुं। जलविड़ाले। उद्वेताल इति भाषा। धेंड़े इत्यपि क्वचित्।

उद्वृत्तः। त्रि। उत्थिते।

उद्वेगम्। क्ली। गुवाकफले। रा. नि. व. ११। पुं। आशङ्कायाम्। त्रिका.। चाञ्चल्ये।

उधस्। क्ली। आपीने। गाभीर पालान। हला.।

उधस्यं। क्ली। दुग्धे।

उधान(र)म्। क्ली। चुल्ल्याम्। अ. टी. भ.।

उन्दकः। पुं। धवस्रयावनाले। शादा जनार, यवखारा। रा. नि. व. १६।

उन्दरः। पुं। मूषिके।

उन्दिरमारी। स्त्री। मूषिकार्थी, तन्नाम्ना कीड़ाङ्गे प्रसिद्धायां। इन्दूरमारी। गुणाः—"मूषिकारी तु कटुका नेत्र्या चाक्षुषविषापहा। व्रणदोषं नेत्ररोगं नाशयेदिति च स्मृतम्॥" रा. नि. व. ४.।

उन्दुकः। पुं। शरीरैकदेशे। भा.।

उन्दुरः। पुं। मूषिके।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उन्दुरः (कः)। पुं। मूषिके। वन्यमूषिके। रत्ना.।

उन्दुरुकर्णी (र्णिका) (र्णी)। स्त्री। आखुकर्णीलतायाम्। ईन्दूरकाणी। रा. नि. व. ३। दन्तीभेदे। उन्दुरुकर्णी द्रवन्तीति ङ.।

उन्दुरुपर्णी। स्त्री। आखुकर्ण्यां। रा नि.व ३।

उन्दूवरम्। क्ली। ताम्रे। भा.।

उन्द्रः। पुं। कूलचरपशुभेदे। उद्विड़ाल। सु. शा. ३८ अ.। See कूलेचरः।

उन्नम्। क्ली। सुरते। वि। क्लिन्ने। मे. नद्विकं।

उन्नाहम्। क्ली। काञ्जिके। अम.।

उन्मत्तः। पुं। श्वेतधुस्तूरे। श्वेत धुतूरा। धुस्तूरद्वये। प. मु.। र. मा., रा. नि. व. १०। सुचुकुन्दवृक्षे। वि। उन्मादविशिष्टे। मे.।

उन्मत्तकारिणी } स्त्री। दुग्धिकायाम्। हिं
उन्मत्ता } दुधियार।

उन्मत्तरसः। पुं। शीताङ्गसन्निपाते रसः "रसगन्धकतुल्यांशं धुस्तूरफलजद्रवैः। मर्द्दयेद्दिनमेकन्तु तुल्यांशं चिकटुं क्षिपेत्॥" चिकटुमिति चिकटुचूर्णं प्रत्येकं रसतुल्यं॥ र सा.सं शीताङ्ग. सान्निपात-ज्व.।

उन्मनः। पुं। उन्मादवायौ। द्रोणपरिमाणे (१६ श.)। प. प्र. १भ.।

उन्मनायितम्। क्ली। उन्मादे। रा.नि.व. २०।

उन्मन्थकः। पुं। कर्णपालीगतरोगविशेषे। तल्लक्षणं—"कर्णं बलाद्ग्रहयतः पाल्यां वायुः प्रकुप्यति। कफं संगृह्य कुरुते शीघ्रं स्रंसमवेदनम्। उन्मन्थकः सकण्डूको विकारः कफवातजः॥ मा. नि.। सु. चि. २५ अ.।

उन्माथः। पुं। मृगादिवधोपयुक्त-कूटयन्त्र-विशेषे। फाँद। अ.।

उन्मादः। पुं। (Mania.) वायुरोगे। पागल रोग। स च मानसिको व्याधिः षड्विधश्च वातपित्तकफसन्निपातदुःखविषसेवनाद्भवति। सम्प्राप्तिः—मदयन्त्युन्मदा दोषा यस्मादुन्मार्गगामिनः। मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः॥ एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः। मानसेन च दुःखेन स पञ्चविध उच्यते॥ विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजं। स चाप्रवृद्धस्तरुणो भटसंज्ञां बिभर्त्ति च॥ विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानां। उन्मादहेतुर्भयहर्षपूर्व्वो मनोविघातो विषमाश्च चेष्टाः॥ इति तद्धेदनिदानम्। सा. नि.। ययुन्मादः समुद्दिष्टः श्लेष्मपित्तसमुद्भवः। तथापि न विना वातादुन्मादो जायते ध्रुवम्॥ पथ्यं यथा—अभ्यञ्जनं स्नापनमासनञ्च निद्रा सुशीतान्यनुलेपनानि। गोधमगुड्डाक्षणशालयश्च धारीगदुग्धं शृतधौतसर्पिः॥ घृतं नवीनञ्च पुरातनञ्च कूष्माण्डमिषं धन्वरसा रसालं। पुराणकुष्माण्डफलं पटोलं ब्रह्मीदलं वास्तुकतण्डुलीयं॥ खराश्वमूत्रं गगनाम्बु पथ्या सुवर्णचूर्णानि च नारिकेलं। द्राक्षा कपित्थं पनसञ्च वैद्यैः विवेयमुन्मादगदेषु पथ्यम्॥ राज.। अश्वस्योन्मादरोगे। लक्षणं यथा—"प्रकोपकारणैः प्रीतैः कुपिते मातरिश्वनि। उन्मादी जायतेऽश्वस्य तस्य रूपञ्च वक्ष्यते। यातुमिच्छति यः स्थित्वा रज्जुं दन्तैश्च खादति। खादत्यकस्मात्यवसं पुनश्चैव न खादति। कदाचिद्बुध्यते संज्ञां कदाचिच्च न बुध्यते॥" ज. द. ५६ अ.। उन्मादरुजे। अ. टी.।

उन्मादगजाङ्कुशः। पुं। उन्मादाधिकारे रसः। अत्र महाराष्ट्री ब्रह्मयष्टिः। वामुनहाटी। विषमुष्टिः। कुचिला। अर्कचक्रिका, तासचक्रिकायां। पाठः—विदिनं कनकद्रावैः महाराष्ट्रीद्रवैः पुनः। विषमुष्टिजलैः सूतं समुत्थाप्यार्कचक्रिकां। कृत्वा तत्र सगन्धां तां युक्त्या बन्धनमाचरेत्॥ तत्समं कानकं बीजमभ्रकं गन्धकं विषं। मर्द्दयेच्चिदिनं सर्व्वं बल्लमात्रं प्रयोजयेत्॥.....। पारा यथेच्छ परिमाणे लইয়া ধুতুরা, বামনহাটী এবং কুচিলার রসে এক এক দিন ঊর্দ্ধপাতন করিবে। পরে তাহার সহিত সমভাগ গন্ধক মিশাইয়া বন্ধনার্থ অর্কচক্রিকায় রাখিয়া অগ্নিপুট দিবে। পরে উহার সহিত সমভাগ ধুতুরাবীজ, অভ্র, গন্ধক এবং বিষ দিয়া একত্র জলে মর্দ্দন করিবে। र. सा. सं.।

उन्मादपर्पटीरसः। पुं। उन्मादाधिकारे रसः। अत्र पर्पटीरसः क्षेत्रपर्पटीरसः। ক্ষেৎপাপ্ড়ার রস। "कृष्णधुस्तूरजैर्बीजैः पञ्चभिः पर्पटीरसः। सम्प्रयोज्यः प्रशान्त्यर्थमुन्मादं भूतसम्भवम्॥" र. सा. सं.।

उन्मादभञ्जनरसः। पुं। उन्मादाधिकारे। अत्र किरातं भूनिम्बं। इक्ष्वारुणी गीरचकर्कटी। राखालशसा। पाठः—विकटु त्रिफला चैव गज-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिप्पलिका तथा। विड़ङ्गञ्च देवदारु किरातं कटुकी तथा। कण्टकारी च यष्टीन्द्रयवं चित्रकमेव च। बला च पिप्पलीमूलं मूलञ्च वीरणस्य च। शीभाञ्जनस्य बीजानि त्रिवृता चेन्द्रवारुणी। वङ्गं रूप्यमभ्रकञ्च प्रवालं समभागिकं। सर्व्वचूर्णसमं लौहं सलिलेन विमर्द्दयेत्॥.....। र.सा.सं.।

उन्मादभञ्जिनी। स्त्री। उन्मादाधिकारे रसविशेषे। अत्र कटुरोहिणी कटुकी। गिरिमल्लीबीजं कुटजबीजं। पाठः—"शुद्धं मनःशिलाचूर्णं सैन्धवं कटुरोहिणी। वचा शिरीषबीजञ्च हिङ्गु च श्वेतसर्षपं। करञ्जबीजं विकटु मलं पारावतस्य च। एतानि समभागानि गोमूत्रैर्वटिकां कुरु। गिरिमल्लीबीजसमां छायाशुष्काञ्च कारयेत्। प्रातःसन्ध्यानिशाकाले चतुर्थीरञ्जनं हितम्। मधुरादिरसे चाञ्जं राचावपि जलेन च॥".....। र.सा.सं.।

उन्मादाङ्कुशरसः। पुं। उन्मादे रसः। पाठः—चिदिनं कनकद्रावैर्महाराष्ट्रीरसैः पुनः। विषमुष्टिद्रवैः सूतं समुत्थाप्यार्कचक्रिकां। कृत्वा तत्रां सगन्धान्तां युक्त्या बध्नमाचरेत्। तत्समं कानकं बीजमभ्रकं गन्धकं विषं। मर्द्दयेत्त्रिदिनं सर्व्वं बल्लमात्रं प्रयोजयेत्। कनकं धुस्तूरबीजं। महाराष्ट्री जलपिप्पली भार्गी वा। विषमुष्टिः कुचेलकं। एभिरुड्डीपातनं कार्य्यं। पारदादिकं समभागं ग्राह्यम्। उन्मादगजाङ्कुश इति नामान्तरम्। भैष. रसे. चि.।

उन्मादिनी। विजयायाम्। सिद्धि।

उन्मानम्। क्ली। द्रव्यतोलकपरिमाणे। पुं। द्रोणपरिमाणे। प. प्र. १ख.।

उन्मार्गी। पुं। पञ्चविधभगन्दरान्यतमभगन्दररोगविशेषे। अर्शोभगन्दर। तस्य लक्षणम्—"मूढ़ेन मांसलुब्धेन यदस्थिशल्यमत्रेन सहाभ्यवहृतं यदावगाढ़पुरीषोन्मिश्रमपानेनाधःप्रेरितं असम्यगागतं गुदं क्षिणोति, तदा क्षतनिमित्तः कोथ उपजायते। तस्मिंश्च क्षते पूयरुधिरावकीर्णमांसकोथं भूमाविव जलप्लक्लिन्नायां क्रिमयः सञ्जायन्ते। ते भक्षयन्तो गुदमनेकधा पार्श्वतो दारयन्ति, तस्य तैर्मार्गैः क्रमिकृतैः वातमूत्रपुरीषरेतांसि अतिनिःसरन्ति तं भगन्दरं उन्मार्गिणमित्याचक्षते।" सु. नि. ४ अ.।

उन्मीलनम्। क्ली। उन्मेषे। हे. च.।

उन्मुखः। त्रि। ऊर्द्धमुखे।

उन्मूलितं। त्रि.। उत्पाटिते। हे.।

उन्मेषः। पुं। नेत्रोन्मीलने। हे. च.।

उपकण्ठम्। क्ली। अश्वस्यास्कन्दिते। कण्ठसमीपे। हे. च.।

उपकरणम्। क्ली। उपादाने।

उपकर्णिका। स्त्री। मूषकर्णिकायाम्। वै. निघ. २भ. अर्श-चि. विड़ङ्गादिचूर्णलेहे।

उपकारः। पुं। विकीर्णपुष्पादौ। हे.।

उपकारिका। स्त्री। पिष्टकभेदे। मैं कपच्चकं।

उपकारी। स्त्री। राजगृहे। भरत. डि. की.। त्रि। उपकारके।

उपकार्य्या। स्त्री। राजगृहे। अ.। धान्यरक्षणस्थाने। गोला।

उपकालिका। स्त्री। जीरकभेदे। श्वेतजीरके। कलौञ्जीजीरके। मद. व. २। कृष्णजीरके। भा. पू. १भ.। पिप्पल्याम्।

उपकुञ्चः (कः)। पुं। कृष्णजीरके। वै. निघ.।

उपकुञ्चिः (का) (ञ्ची)। स्त्री। कलौञ्जीजीरके। बृहज्जीरके। सूक्ष्मैलायाम्। अम.। कृष्णजीरके। स्वल्पजीरके। छोटि जीरा। भा. पू. १भ. रत्ना.। गुणाः—"तिक्ता कटूष्णा चोष्णा च दीपनी। बृष्या चाजीर्णशमनी गर्भाशयविशोधिनी। आध्मानवातगुल्मञ्च रक्तपित्तं कृमींस्तथा। कफं पित्तं चामदोषं वातं शूलञ्च नाशयेत्॥" वै. निघ.।

उपकुम्भा। स्त्री। दन्तीवृक्षे। वै. निघ.।

उपकुल्या (का)। स्त्री। दन्तीवृक्षे। वै. निघ.। सु., रा. नि. व. ६। च. द. अश्म. चि. एलादौ।

उपकुशः। पुं। Gum boil. तन्नामकदन्तवेष्टजपित्तरक्तजरोगविशेषे। तत्र वेष्टदाहपाकदन्तचलनं आघट्टिते रक्तस्रावविवेदने, स्रुते च रक्ते स्फोटिर्मुखपूतिता च जायन्ते। लक्षणं—"वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च। आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनं। आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते। भा. म. ४भ. सु. रो. चि.। अश्वमुखरोगे, तत्र दन्तमांसाद्रुधिरस्रावः दन्तचलनञ्च भवति। ज. द.।

उपकूपः। पुं। दीर्घिकायाम्। हे. च.।

उपकोलिका। स्त्री। कृष्णजीरके। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपक्रमः। पुं। चिकित्सायाम्। रा. नि. व. २०। आरम्भे। मे. मचतुष्कं।

उपक्रोष्टा। पुं, स्त्री। गर्द्दभे।

उपगूहनं। क्ली। आलिङ्गने। अ.।

उपघातः। पुं। रोगे। रा. नि. व. २०।

उपघातकः। पुं। आरग्वधवृक्षे। वै. निघ.।

उपघ्नः। पुं। निकटाश्रये। अम.।

उपचक्रः। पुं। हंसविशेषे। चकोर। "चक्रीरानुपचक्रकान्।" च. चि. ३अ.। तन्मांसगुणाः—"कषायः स्वादुलवणस्तस्य केश्यो रुचिप्रदः।" सु.सू. ४६ अ.। हृद्यं लघु उष्णवीर्यं कटुपाकि बलाग्निवर्द्धकञ्च। राज.। See चक्रवाकः।

उपचर्य्या। स्त्री। चिकित्सायाम्। सेवायाम्। रा. नि. व. २०। हला.।

उपचक्षुः। क्ली। चक्षुःप्रतिनिधौ। चश्मा इति भाषा।

उपचारः। पुं। चिकित्सायां। सेवायाम्। रा. नि व. २०। हे. च.।

उपचार्य्यः। पुं। चिकित्सायाम्। हे. च.।

उपचितः। त्रि। दग्धे। मे.। पुष्टे।

उपचित्रः (त्रा)। पुं, स्त्री। उपचित्रः इति भद. व. १। पृश्निपर्णीवृक्षे। चाकुलिया। रा. नि. व. ४। दन्तीवृक्षे। प. मु.। र. मा.। आखुकर्ण्याम्। इन्दुरकाणी पाना। मे.। बृहद्दन्त्यां। भा. पू. १भ.। वै. निघ. वा. व्या. विषगर्भतैले।

उपचित्रका। स्त्री। ह्रस्वदन्त्याम्।

उपचिल्ली। स्त्री। श्वेतचिल्लीशाके। श्वेतचिल्ली (बेतोशाक)। रा. नि. व. ७।

उपजिह्वा (ह्विका)। स्त्री। जिह्वागतमुखरोगे। दुष्टकफरक्तं जिह्वामुन्नमय्य निस्रती लालास्रावकण्डूदाहशोथानुत्पादयतः। मा. नि.। लक्षणम्—"जिह्वाग्रूपः श्वयथुर्हि जिह्वामुन्नम्य जातः कफरक्तयोनिः। प्रसेककण्डूपरिदाहयुक्ता प्रकथ्यतेऽसावुपजिह्विकेति॥" सु. नि. १६ अ.। कीटविशेषे। पेदो पोका। हे. च.। मूलजिह्वायाम्। आलजिव। रा. नि. व. १८। अश्वस्य सुखरोगभेदे। अत्र जिह्वाधःस्फोतिः। लक्षणम्—"अधस्तादथ जिह्वायाः श्वयथुर्यस्य जायते। तं विन्द्यादुपजिह्वाख्यं मुखरोगन्तु वाजिनाम्॥" ज. द. २९ अ.।

उपतप्ता। पुं। रोगे। अ. टी. भ.।

उपतापः। पुं। रोगे। उत्तापे। मे. पचतुष्कं।

उपदग्धः। त्रि। ईषद्दग्धे। आँका। सु. सू. ४६ अ.।

उपदन्तः। पुं। कुस्तुम्बुरौ। काँचा धने'।

उपदंश। पुं। The venereal disease. समशौलचुपे। रा. नि. व. ४। शिग्रुवृक्षे। सजिना गाछ। रा. नि. व. ७। चक्षुषे। चोटे। हला.। सि. यो. मदा चि.। "स्रवी सभक्तां पिशितीपदंशाम्।" व्यञ्जने। रा. नि. व. २०। मेढ्ररोगे। बाउ रोग। निदानादि—"हस्ताभिघातान्नखदन्तपातादधावनादत्युपसेवनाद्वा। योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधोपचारैः॥" स च वातादिभेदात्पञ्चधा। तल्लक्षणं—"सतीदभेदैः स्फुरणैः सकृष्णैः स्फोटैर्व्यवस्येत्पवनोपदंशं। पीतैर्बहुक्लेदयुतैः सदाहैः पित्तेन रक्तात्विशितावभासैः। स्फोटैः सकृष्णैः रुधिरं स्रवन्तं रक्तात्मकं पित्तसमानलिङ्गं। सकण्डुरैः शोथयुतैर्महद्भिः शुक्लैर्घनैः स्रावयुतैः कफेन। नानाविधस्रावरुजोपपन्नमसाध्यमाहुस्त्रिमलोपदंशम्॥" मा. नि.। "अतिमैथुनादतिव्रह्मचर्य्याद्वा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढरोमामल्पद्वारां महाद्वारामप्रियामकामां अचोक्ष्यसलिलप्रक्षालितयोनिं अक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करजदशनविषयूकनिपातनादर्द्दनाद्वस्ताभिघाताच्चतुष्पदी-गमनादचोक्ष्यसलिलप्रक्षालनादवपीड़नाच्छुक्रमूत्रवेगविधारणान्मैथुनान्ते वाप्रक्षालनादिभिर्मेढ्रमार्गस्य प्रकुपिता दोषाः चतेऽचते वा श्वयथुमुपजनयन्ति तमुपदंशमाचक्षते।" सु नि. १२। असाध्यलक्षणं। विशीर्णमांसं कृमिभिः प्रजग्धं शुष्कावशेषं परिवर्ज्जयेत्तम्.....। पथ्यं यथा—कृष्णविरेकी ध्वजमध्यनाड़ीवेधी जलौका-परिपातनञ्च। सेकः प्रलेपो यवशालयश्च धन्वामिषं मुद्गरसो घृतानि। कठिल्लकं शिग्रुफलं पटोलं शालिञ्चशाकं वनमूलकञ्च। तिक्तं कषायं मधु कूपवारि तैलञ्च हन्यादुपदंशरोगम्" इति। अपथ्यं यथा—"दिवानिद्रां मूत्रवेगं गुर्व्वन्नं मैथुनं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुड़म्। आयासमन्नं तक्रञ्च वर्ज्जयेदुपदंशवान्॥" पथ्यापथ्यम्।

उपदंशघ्नः। पुं। शिग्रुवृक्षे। वै. निघ.।

उपदलम्। क्ली। पुष्पदले। फूलेर पापड़ी।

उपदी। स्त्री। वन्दाके। मान्दड़ा। मं वादांगुल। रा. नि. व. ५।

उपदीका। स्त्री। उपजिह्वाख्यकीटे। हे. च.।

उपदेवता। स्त्री। यक्षभूतपिशाचादौ।

उपदेशः। पुं। सुस्के। हे. च.। स्थितकघने। एवमित्युपदेशः यथा—"तथा न जाग्त्यादावौ दिवास्वप्नञ्च वर्ज्जयेत्।" सु. उ. ६५ अ.।

उपदेहः। पुं। उपलेपे। प्रलेप, मलम्। वै. निघ.।

उपदेहिका। स्त्री। उपजिह्वाकीटे। हे. च.।

उपद्रवः। पुं। उपसर्गे। तल्लक्षणम्—"रोगारम्भकदोषस्य प्रकोपादुपजायते। योऽन्यो विकारः स बुधैरुपद्रव इहोदितः॥" भा.।

उपधातुः। पुं। Secondary secretion. देहस्थसप्तविधधातुषु। यथा—"स्नन्यं रजो वसा स्वेदो दन्ताः केशास्तथैव च। ओजश्च सप्तधातूनां क्रमात्सप्तोपधातवः॥" भा.। स्नन्यरजोवसास्वेददन्तकेशौजांसि धातूनां सप्तोपधातव इति शार्ङ्गः। A semi-metal. स्वर्णमाक्षिकादिगौणधातुषु। ते च सप्तविधाः—स्वर्णमाक्षिकं, तारमाक्षिकं, तुत्थं, कांस्यं, पित्तलं, सिन्दूरं, शिलाजतु चेति। तत्र स्वर्णमाक्षिकं स्वर्णस्य, तारमाक्षिकं रौप्यस्य, तुत्थं ताम्रस्य, कांस्यं ताम्ररङ्गयोः, पित्तलं ताम्रयशदयोः, सिन्दूरं शीषकस्य, शिलाजतु च लौहस्योपधातुः। मतान्तरे तु माक्षिकतुल्यकाभ्रनीलाञ्जनरसाञ्जनमनःशिलाहरितालेषु। गुणाः—"उपधातुषु सर्व्वेषु तत्तद्धातुगुणा अपि। सन्ति किं तेषु तेऽवीनास्तत्तदंशाल्पभावतः॥" भा. म. १भ. धातुव.।

उपधानम्। क्ली। विषे। उपवर्हे। बालिश। मे. नचतुष्कं।

उपधानीयं। क्ली। उपधाने। शब्दर.।

उपधूपितः। वि। आसन्नासन्नमये। धारा.। आसन्नमरणे। मे.।

उपनखम्। क्ली। चिप्पुलीरोगे। आंगुलहाड़ा। लक्षणं—"नखमांसमधिष्ठाय पित्तं वातश्च वेदनां। करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्। तदेव चतरीगाख्यं तथोपनखमित्यपि॥ सु. नि. १३ अ.।

उपन (ना) यः। पुं। उपनयने। हे.।

उपनयनम्। क्ली। वर्णत्रयाणां यज्ञसूत्रधारणरूपसंस्कारविशेषे। पैते देओया। चिका.।

उपनाहः। पुं। स्वेदविशेषे (शाल्वणादौ)। सेक। वचाकिण्वशताह्वादेवदार्व्वादिभिः यः क्रियते स्वेदः स उपनाहः। वा. टी. हेमा.। लेपे। विश्व. हचतुष्कं। नेत्रसन्धिरोगे। कृष्णमण्डलदृष्टिमण्डलसन्धौ ईषत्पाकी स्वल्पवेदनः कण्डूबहलो ग्रन्थिर्जायते॥ लक्षणम्—"ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकी कण्डूप्रायो नीरुजस्तूपनाहः॥" मा. नि.। हरिद्रायाम्। विश्वः।

उपनाहनम्। क्ली। लेपने। च. द. वा. व्या. चि।

उपनाहस्वेदः। पुं। उपनाहजन्यघर्म्मे। वातकफजन्यशीफयोरुपक्रमभेदे। "अथोपनाहस्वेदञ्च कुर्य्याद्वातहरौषधैः। प्रदिह्य देहं वातार्त्तं क्षीरमांसरसान्वितैः॥ आम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः।" एवमेव महाशाल्वणादिर्ज्ञेयः। सु. चि. १ अ.।

उपपुष्पिका। स्त्री। हाफिकायाम्। हाई। हारा.।

उपप्लवः। पुं। विप्लवे। उत्पात।

उपप्लुता। स्त्री। Morbid sensibility of the uterus. योनिरोगे। लक्षणं यथा—"गर्भिण्याः श्लेष्मलाभ्यासात् छर्द्दिश्वासविनिग्रहात्। वायुः क्रुद्धः कफं योनिमुपनीय प्रदूषयेत्॥ पाण्डु, सतोदमास्रावं श्वेतं स्रवति वा कफम्। कफवातामयव्याप्ता सा स्याद्योनिरुपप्लुता॥" चर.।

उपभूतौ। स्त्री। महानील्यां। वै. निघ.।

उपभोगः। पुं। भोगे। भोजनाधिकभोगे। अम.।

उपमाता। स्त्री। धात्र्यां। धाई।

उपमेतः। पुं। श्यालबृक्षे। श. च.।

उपयन्त्रम्। क्ली। पञ्चविंशतिविधशल्याहरणोपाययन्त्रभेदेषु। तानि प्रायशो लौहानि भवन्ति। तानि च रज्जुवेणिकापट्टचर्म्मान्तवल्कलतावल्लाष्ठीलाश्मसुद्गरपाणिपादतलाङ्गुलिजिह्वादन्तनखमुख-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाताश्मकटकगाखाहीवनप्रवाहणहर्षायस्कान्तमयानि चाराग्निभेषजानि । सु. सू. ७अ. ।

उपय(या)मः । पुं । विवाहे । अ. ।

उपरक्तः । वि । पीड़ायुक्ते ।

उपयोगः । पुं । औषधक्रियायां । औषधसेवने । आनुकूल्ये ।

उपरत्नम् । क्ली । गौणरत्ने । भा. । गोमेद-पद्मराग-वैदूर्य्यप्रवालेषु । प. सु. । काच-स्फटिक-शुक्ति-शङ्खेषु । "उपरत्नानि काचश्च कर्पूराश्मा तथैव च । मुक्ता शुक्तिस्तथा शङ्खः इत्यादीनि बहून्यपि ॥" गुणाः —रत्नतुल्याः किन्तु किञ्चिद्धीनाः । भा. पू. १भ. ।

उपरन्ध्रम् । क्ली । अक्षस्य उदरगह्वरोपरिभागे । ज. द. २अ. ।

उपरसः । पुं । A secondary mineral. गौणरसेषु, उपधातुगणे । ते च हिङ्गुलाभ्रतालक-शिलास्रोतोऽञ्जन टङ्कण-राजावर्त्तक-चुम्बुक-स्फटिक-शङ्ख-खटी-गैरिक - कासीस-रसक-कपर्द - सिकता-वेलाः कङ्कुष्ठकं सौराष्ट्री च । गुणैः सूतस्य किञ्चिदूनयुताः । भा. पू. १भ. धातुव. । यथा— खेचराञ्जनकङ्कुष्ठगन्धालं गैरिकं त्रिति: । शैलयाञ्जनसंमिश्राः संख्युपरसा बुधाः ॥ कन्यिल्लगोरीचपलाकपर्दसशैलसिन्दूरकवल्लिजारान् । पाषाणिनोवादरशङ्खयुक्तानित्यष्टकं सूतसमानमाहुः ॥ रा. नि. व. २२ । गन्धकं वज्रवेक्रान्तं । हीरकं दग्धहीरकञ्च) वज्राभं तालकं शिला । खर्परं शिखितुण्डञ्च विमलं हेममाक्षिकम् । काशीशं कान्तपाषाणं वराटाञ्जनहिङ्गुलम् ॥ गैरिकं शङ्खभूनागं टङ्कणञ्च शिलाजतु । एते चोपरसाः प्रोक्ताः... । र. सा. सं. ।

उपरोधकम् । क्ली । गर्भरुहे । श्र. च. ।

उपलः । पुं । पाषाणे । रत्ना. । मे. ।

उपलभित् । पुं । पाषाणभेदके । रा. नि. व. ५ ।

उपलभेदः (दी) । पुं । करञ्जोड़िपाषाणभेदके । रा. नि. व. ५ ।

उपलवीरुत् । स्त्री । गुञ्जिन्याम् । हे. च. ।

उपला । स्त्री । शर्करायां । बालुकायाम् । मे. ।

उपलाख्यकः । पुं । दद्रुघ्नवृक्षे । दादमर्द्दनी ।

उपलालिका । स्त्री । तृणायाम् । वै. निघ. ।

उपलासिता । स्त्री । खटोशर्करायां । वै. निघ. ।

उपलिङ्गम् । क्ली । उपद्रवे । अरिष्टे । हे. च. ।

उपलेपः । पुं । चन्दनादिलेपने । सुखलिप्ततायाम् । सु. चि. २३अ. ।

उपलेपनम् । क्ली । गोमयादिलेपने । विका. ।

उपलौहम् । क्ली । स्वर्णादिधातुविशेषेषु । यथा— "स्वर्णं तारं ताम्रनागं रसं कान्तञ्च तीक्ष्णकं । सुखान्तमटधा लोहं कांस्यारं घोषकं तथा । उपलौहाः समाख्याताः... ॥ वै. संग्रहे ।

उपवटः । पुं । पियालवृक्षे । चारवृक्षे । रा. नि. व. ११ । See अखटः ।

उपवनम् । क्ली । बहिरुद्याने । अम. ।

उपवनस्थः । पुं । तुरुष्के ।

उपवल्लिका (ल्ली) । स्त्री । अमृतस्ववालतायाम् । रा. नि. व. ३ ।

उपवर्हः (र्हम्) । पुं, क्ली । उपधाने । बालिश, तकिया । हला. ।

उपवस्तम् । क्ली । उपवासे । अम. ।

उपवासः । पु । लङ्घने । क्षीधादिपरित्यागे । "उपावृत्तस्य पापेभ्यः सहवासो गुणैर्हि यः । उपवासः स विज्ञेयो न शरीरस्य शोषणं ॥" च. सू. १अ. ।

उपवाह्यः । पुं । राजवाहकहस्तिनि । हे. च. ।

उपविषम् । क्ली । क्षविसविषे । हे. च. । गौणविषमिति । भा. । तत्पर्य्यायः,—चारं, गरः (हे.) । एकं सविषं दूषीविषसंज्ञं अपरं अविषं तदेव गरसंज्ञकं । तच्च अष्टविधं ।

उपविषपञ्चकम् । क्ली । सुह्यर्ककरवीरलाङ्गली-कुचेलकेषु । रा. नि. व. १२ । करवीरार्कधुस्तूरलाङ्गलीगुञ्जाहिफेनं वत्सञ्च । प. सु. । अर्कचीरं स्नुहीचीरं लाङ्गली करवीरकः । गुञ्जाहिफेनधुस्तूरश्चेति सप्त । भा. । दुग्धपूर्णपात्रे दोलायन्त्रेण पाचितं तत्सर्व्वं शोधितं भवति । र. सा. सं. ।

उपविषा । स्त्री । रक्तातिविषायाम् । अतिविषायाम् । रा. नि. व. ६ ।

उपविषाणिका । स्त्री । कृष्णातिविषायाम् । मद. व. ।

उपविष्टः । वि । आसीने । बसा ।

उपविष्टकः । पुं । गर्भजरोगे ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपवीतम् । क्ली । यज्ञसूत्रे । अम. ।

उपवेदः । पुं । आयुर्व्वेदे ।

उपवेशः । पुं । उपवेशने ।

उपवेशनम् । क्ली । स्थितौ । वसा । गुणाः—मेदीदीप्तिश्लेष्मसौकुमार्य्यसुखकरम् । राज. ।

उपव्याघ्रः । पुं । चित्रके । चिते बाघ । रा नि. व. १९ ।

उपशमः । पुं । शान्तौ । हे. च. ।

उपशमक्रमः । पुं । साधारणौषधे । वै. निघ. ।

उपशयः । पुं । व्याधिज्ञानहेतौ । लक्षणं—"हेतुव्याधिविपर्य्यस-विपर्य्यसार्थकारिणाम् । औषधान्न-विहाराणामुपयोगं सुखावहं । नृणामुपशयं विद्यात् स हि सात्म्यमिति स्मृतः ॥" मा. नि. ।

उपशान्तिः । स्त्री । आरोग्ये ।

उपशायिता । स्त्री । रोगमुक्तिसाधनभूतपथ्ये ।

उपशीर्षकः । पुं । बालरोगे । कपालरोगे ।

उपसन्नवर्त्तनम् । क्ली । दुष्टव्रणविशेषे । चर. ।

उपसम्पन्नम् । क्ली । तप्तौ । हला. । त्रि । निहते । सुसंस्कृते । "उपसम्पन्नमुद्दिष्टं निहते च सुसंस्कृते ।" मे. नपञ्चकं ।

उपसंव्यानम् । क्ली । परिधानवस्त्रे । अम. ।

उपसत्तिः । स्त्री । सेवायाम् । मे. तचतुष्कं ।

उपसरः । पुं । प्रथमगर्भधारणे ।

उपसर्गः । पुं । पिशाचादिबाधायां । मिथ्यारोगे । मे. गचतुष्कं ।

उपसर्य्या । स्त्री । वर्षप्रसवित्र्यां गवि । वछुरविऊनी गाभी । हला. ।

उपसूर्य्यकः । पुं । खद्योते । ज्योत्स्ना पोका । क्लीं । चन्द्रसूर्य्यमण्डले । अ. ।

उपसृष्टम् । क्ली । मैथुने । त्रिका. ।

उपसेकः । पुं । अञ्जने । येनं.दनं भुज्यते । वा. ।

उपस्करः । पुं । वेसवारे । वाटणा । हला. ।

उपस्थः । पुं । शिश्ने । योनौ । रा. नि. व. १८ । मलद्वारे । श. र. । क्रीडे । मे. ।

उपस्थपत्रम् । क्ली । अश्वत्थपत्रके । "पित्तश्लेष्मणि शस्यन्ते सूपे वा प्रलेपेषु चेति ।" चर. ।

उपस्थाता । पुं । परिचारके । रत्ना. ।

उपस्नेहः । पुं । उपलेपे । स्नेहयुक्ततायां । स्नेहयुक्तान्नरसे । सु. नि. ६, ७अ. ।

उपस्पर्शः । पुं । स्नाने । आचमने । मे. श्चतुष्कं ।

उपहतः । त्रि. । नष्टे । अशुद्धद्रव्ये ।

उपह्वरं । क्ली । निर्ज्जनस्थाने । निकटे । पुं । रन्ध्रे । अ. ।

उपाकृतः । पुं । उपद्रवे । हे. । यज्ञे मृतपशौ ।

उपाङ्गः । पुं । चित्रके । जटा. । तिलके ।

उपाङ्गचिकित्सा । स्त्री । छिन्नादिप्रतीकारे । यथा—"छिन्नं भिन्नं तथा भग्नं क्षतं पिच्चितमेव च । तेषां दग्धप्रतीकारः प्रोक्तश्चोपाङ्गसंज्ञकः ॥" वै. निघ. । अग्नि. १स्था. २अ. ।

उपाञ्जनम् । क्ली । अनुलेपने ।

उपात्तः । पुं । अमदगजे । हला. ।

उपाधानम् । क्ली । उपधाने । बालिश ।

उपानद्धारणम् । क्ली । चर्म्मादिपादुकाधारणे । जूतो पेरा । गुणाः—"उपानद्धारणं नेत्र्यमायुष्यं पादरोगहृत् । सुखप्रचारमोजस्यं वृष्यञ्च परिकीर्त्तितम् । पादाभ्यामनुपानद्भ्यां सदा चक्रमणं नृणां । अनारोग्यमनायुष्यमिन्द्रियघ्नमदृष्टिदम् ॥" वै. निघ. ।

उपाश्रयः । पुं । मत्तहस्तिनि । हला. ।

उपासः । पुं । उपवासे ।

उपासनम् । क्ली । शुश्रूषायाम् । अम. । आसने । मे ।

उपासना । स्त्री । सेवायां । अम. ।

उपास्तिः । स्त्री । सेवायां । हे. च. ।

उपास्थि । क्ली । कीनलास्थिनि । कचि हाड़ । अम. ।

उपेक्षा । स्त्री । त्यागे । अनादरे ।

उपोती (दका) (दकी) । स्त्री । A´pothorb. Basella rubra or lucida.) पूतीकायाम् । वड़ पुँई शाक । सं राजगिरा, माड़वी, रुदवेलि, मयाला खण्डपालकेति च ख्याता । तत्पर्य्यायः,—उपोदिका (राज.) उपोदीका (भ.) उपोती (शब्दर.) वृश्चिकप्रिया (शब्दमा.) अपोदिका (अ. टी. स्वा.), पूतीका (अ. टी. भ.) कलम्बी पिच्छिला पिच्छिलच्छदा मोहनी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदग्राक: विशाला बलिपीदकी पूतिका। गुणा:— गुर्व्वी सरा मदघ्नी च। वा. सू. ६अ.। कषायोष्णा कटुका मधुरा निद्रालस्यकरी रूक्षा विष्टम्भश्लेष्मकरी च। रा. नि. व. ७। स्वादुपाकरसा हृद्या वातपित्तमदापहा। उपोदिका सरा स्निग्धा बल्या श्लेष्मकरी हिमा॥ सु सू. ४५ अ.। उपोदकी त्रिधा सामान्या क्षुद्रपत्रा वनजा चेति। द्वितीया रसवीर्य्यविपाकेषु पूर्व्वसमा। तृतीया तिक्ता कटूष्णा रोचनी च। रा. नि. व. ७। "सारकत्वं स्निग्धत्वं बल्यत्वं श्लेष्मकरत्वं हिमत्वञ्च।" राज.।

उपोदि(दी)का। स्त्री। उपोदक्याम्। वड़ पुँई। पुदिनेति च ख्याता। च. सू. २अ.। See उपोदकी।

उपोदिकातैलम्। क्ली। क्षुद्ररोगे हितं। उपोदकीनां क्वार: २प्र. वारि १६ प्र. एकविंशतिवारं विस्राव्य क्वारोदकं कार्य्यम्। तैलं ४ प्र. लवणं १प्र. एकत्र पाच्यम्। च. द. क्षुद्ररो. चि.।

उपोष:। पुं। उपवासे।

उपोषणम्। क्ली। उपवासे।

उप्त:। त्रि। क्षेत्रवपने।

उप्यम्। क्ली। वपनक्षेत्रे। रा. नि. व. २। [भा.।

उभयकण्टका। स्त्री। वदरवृक्षे। कूलगाछ।

उभयभागहरम्। क्ली। ऊर्द्ध्वाधोभागहरौषधे। वामक ও রেচক ঔষধ। सु. सू. ४१ अ.।

उभयलिङ्गिनी। स्त्री। लिङ्गिन्याम्। पञ्चगुड़िया इति लोके प्रसिद्धा। च. क्र. क. बन्ध्या. चि.।

उमा। स्त्री। अतस्याम्। मशिना। रा. नि. व. १६। हरिद्रायाम्। कान्तौ। मे. सङ्ज्ञकं।

उमाकट:। पुं। उमाधूलो। मशिनार धूलि।

उम्या(म्यिका)(म्यालि:)। स्त्री। श्यालिधान्यविशेषे। गुणा:—मधुरा स्निग्धा सुगन्धा कषाया पित्तश्लेष्मघ्नी रूक्षा वातघ्नी च। रा. नि. व. १६।

उम्बर:। पुं। उदुम्बरवृक्षे। यज्ञडुमूर गाछ। हे. च.। गुणा:—स्निग्ध: स्वादादिगुणयुक्त: उष्णवीर्य्य: कफपित्तकरी गुरुश्च। वा.।

उम्बिका (म्बी)। स्त्री। यवान्याम्। अर्द्धपक्व-तृणानलसंभृष्ट-यवगोधूममञ्जर्य्याम्। गुणा:— "कफकरत्वं बलकरत्वं लघुत्वं पित्तानिलापहारित्वञ्च। भा.।

उम्यम्। क्ली। Field of linseed. (Linum utila tissimum) अतसीक्षेत्रे। हरिद्राक्षेत्रे। भ. द्विरूपाचरकौषध।

उर:। क्ली। वक्षसि। अम.। "नाभिर्वितस्तिमात्रञ्च कण्ठदेशात् षडङ्गुलं। उरसस्तद् विजानीयात् शीर्षेतु हृदयं मतम्।" भा.। वि.। श्रेष्ठे। मे.।

उर:क्षतम्। क्ली। उरोव्रणे। क्षयरोगे।

उर:क्षतकास:। पुं। क्षयकासरोगे। हृदयस्थे क्षत कास। "अतिव्यवाय-भाराध्व-युद्धाश्वगजनिग्रहै:। क्षतस्योर:क्षतं वायुर्गृहीत्वा कासमावहेत॥" निदानम्।

उरग: (ङ्ग:) (ङ्गम:)। पुं। सर्पे। क्ली। शीषके। मद. व. १४। रस. र. ह. चि. एकादशाध्याये। नागकेशरवृक्षे।

उरगगृहम्। क्ली। सर्पगृहे।

उरगारि:। पुं। क्रौञ्चपक्षिणि।

उरगाशन:। पुं। गरुड़े। जटा.।

उरगेन्द्रसुमन:। क्ली। नागकेशरे। भा. म. ४ भ.। "व्योषाम्भोददलीरगेन्द्रसुमन:।"

उरङ्ग: (म:)। पुं। सर्पे। अ. टी. रा.।

उरच्छद:। पुं। गुन्द्रे। गँदपटेर इति पाश्चात्यभाषा। भा. पू. १भ.।

उरण:। पुं। मेषे। अम.। क्ली। रौप्ये।

उरणा। स्त्री। मेष्याम्। भेड़ी।

उरणाख्य:(च:) क:। पुं। दद्रुघ्नवृक्षे। दादमर्द्दन। हिं एड़ाचि। चाकरा गाछ इति च केचित्। अ. टी. रा.। शु. र.। आरग्वधवृक्षे।

उरभ्र:। पुं। मेषपशौ। प. मु.।

उरभ्रमारिका। स्त्री। वातप्रकृतिकीटविशेषे। तद्दष्टे वायुजरोगा भवन्ति। सु. कल्प. ८अ.।

उरसिज:। पुं। स्तने। रा. नि. व. १८।

उराह:। पुं। कृष्णजानौषत्पाण्डुवर्णाश्वे। लक्षणं —"उराह: कृष्णजानुस्तु मनाक्पाण्डुस्तु यो भवेत्।" ज. द. ३अ.।

उरोहा। स्त्री। कारवेल्लके। करला, উচ্ছে।

उरुकाल: (क:)। पुं। महाकाललतायाम्। माकालफलेर गाछ। विका.।

उरुमाल:। पुं। फलशाकविशेषे। मायीफल

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति पाश्चात्यभाषा। तत्पर्य्यायः—स्निग्धफलः। फलगुणाः—"उरुमालं पियालञ्च बृंहणं गुरुशीतलं। स्वादुपाकरसं स्निग्धं विष्टम्भि कफशुक्रकृत्॥" वा.।

उरुवुकः | **उरूवूकः** | **उरूवुकः** पुं। श्वेतैरण्डे। एरण्डवृक्षे। अम। र.सा.सं.। उदरवृद्धौ। रक्तैरण्डे। रा. नि. व. ८।

उरुस्तम्भा। स्त्री। कदलीवृक्षे।

उरोग्रहः। पुं। हृदयरोगविशेषे। अग्रमांस इति भाषा। लक्षणं यथा—"अत्यभिष्यन्दिगुर्व्वम्बु-शुष्कपूत्यामिषाशनात्। सान्नं मांसं यकृत्प्लीह्नः सद्यो वृद्धिर्यदा भवेत्। उरोग्रहं तदा कुर्य्यौ कुरुतः कफमारुतौ॥ न वामपार्श्वे न च दक्षिणांशे वुक्कस्य मध्ये परिवृद्धिमेति। उरोग्रहं तं प्रवदन्ति रोगं वुक्काग्रतलस्य शिरातनुत्वं॥ दौर्ब्बल्यं दुर्ब्बलाग्निञ्च कार्श्यं मांसाभिकाङ्क्षितम्। जायते कृष्णवर्णत्वं पीतकत्वापि जायते। द्विजिह्वसदृशः कश्चित् कश्चित्कक्कपसन्निभः। ज्वरोऽरुचिः पिपासा च शीघ्रञ्चातिप्रकोपने॥" नि.। हृदयवेदनायां।

उरोजः। पुं। स्तने। हे. च.।

उरोघातः। पुं। हृद्रोगे। च. द.।

उर्णनाभः। पुं। See ऊर्णनाभः।

उर्णा। स्त्री। See ऊर्णा।

उर्णायुः। पुं। See ऊर्णायुः।

उर्द्रः। पुं। जलविड़ाले। उदविड़ाल। श. र.।

उर्म्मीकफः। पुं। समुद्रफेने।

उर्व्वा। स्त्री। शीषके।

उर्व्वारुः। पुं। इर्व्वारुके। काँकुड़। भरतः द्विरूपकोषश्च। भा. म. ३भ. अश्व. चि. वरुणगुड़े।

उर्व्वी। स्त्री। तन्नामकमर्म्मस्थाने। तच्च स्थान-मूरुमध्यदेशः। सु. शा. ६अ.। वैकल्यकरमर्म्मान्य-तमसन्धिस्थे। सु. शा. ५अ.।

उल(लु)पः। पुं। प्रतानवत्यां लतायां। सा तु वपुषीद्राचातास्थुलीप्रभृतिः। तत्पर्य्यायः—वीरुत् गुच्छिनी (अ.) प्रताना (ज.) प्रतानिनी वीरुधा वरुत् (शब्दर.) अ. टी. सा.। क्ली। तृणविशेषे। उलूखड़। विश्व.। मे.।

उलु(लू)पी। पुं। शिशुके। उषोक। अम.। तदाकारमीने। श. र.। उपल इति ख्याते मत्स्ये। शिशुमाराकृतिमत्स्यभेदे, स कलिङ्गादिदेशेषु दृश्यते। शीशु इति ख्यातमत्स्ये। भाँगस इति च केचित्। शिशुमार इति सर्व्वत्रे। "चुलपः शिशुमारः स्यात् उलुपी शिश्यकस्तथा।" अ. टी. भ.।

उलुम्बा। स्त्री। यमान्याम्। वै. निघ.।

उलूकः। पुं। पेचके। पेँचा। मे. कचिकं। प. स.। र. मा.। तन्मांसं—"उलूकजन्तु यन्मांसं पित्तलं भ्रान्तिकारकं। वातप्रकोपनञ्चैव.....।" वै. निघ.। क्ली। खनामख्यातृणे। उलूखड़। तत्पर्य्यायः,—सूच्यग्रः स्थूलकः दर्भः जूर्णाख्यः खरच्छदः उलपः उलूपः। रा.।

उलूकपादः। पुं। अश्वस्य पादरोगविशेषे। लक्षणं—"कूर्चमाहत्य यः शीर्षी जङ्घायामुपजायते। उलूकपादो विज्ञेयः।" ज. द. ३९ अ.।

उलूखल(क)म्। क्ली। उदूखले। भर.। गुग्गुलौ। अम.।

उलूखलसन्धिः। पुं। कक्षावङ्क्षणदशनसन्धिषु। सु. शा. ५अ.।

उलूतः। पुं। अजगर सर्पे। त्रि.।

उल्कामुखी। स्त्री। शृगालीविशेषे। हारा.। श्याँथशेयाल। तत्पर्य्यायः,—शृगालिका लीमा-लिका दीप्तजिह्वा किखिः। त्रि.।

उल्मुकम्। क्ली। ज्वलदङ्गारे। हारा.। उल्कायां। के.।

उल्लङ्घनं। क्ली। अतिक्रमणे। डिङ्गान।

उल्लसः (सकम्)। पुं, क्ली। रोमाञ्चे। हे. च.।

उल्लाघः। पुं। रोगमुक्तौ। रा. नि. व. २०। मरिचे।

उल्लापः। पुं। कातरध्वनौ।

उल्ली। स्त्री। पलाण्डौ। रा. नि. व. ७।

उल्लुप्तम्। त्रि। निरन्तरं छेदनातिशयेनानुप-च्छिन्नत्वात् पिष्टमिवौषधमुपपिष्टम्। सु. उ. ६३ अ.।

उल्लेखनम्। क्ली। वमने। र. मा. खनने।

उल्लोचः। पुं। चन्द्रातपे। हला.।

उल्लोलः। पुं। महातरङ्गे। बड़ ढेउ। तत्-पर्य्यायः,—कल्लोलः।

उल्वम्। क्ली। जरायौ। अम. कलले। सु. शा. १० अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उल्वणम्। क्ली। वातादिजन्यविकारे।

उष्णिक्। पुं। घृते।

उष्णी। स्त्री। वाञ्छायां। उ.।

उशीरः (कः)। पुं, क्ली। The root of a fragrant grass. (Andropogon muricatum.) स्वनामख्यातसुगन्धतृणमूले। वीरणमूले। खस् वा लामज्जक इति पाश्चात्ये। गन्धवेणार मूल। मं वाला। तें वट्टिवेरु। च. सू.। तत्पर्य्यायः,—अभयं नलदं सेव्यं अमृणालं जलाशयं लामज्जकं लघुमयं अवदाहं इष्टकापथं उशीरं मृणालं लघु लयं अवदानं इष्टं कापथं अवदाहेष्टकापथं इन्द्रगुप्तं (अ. टी.), उशीरकं (र.), जलवासं हरिप्रियं वीरं वीरणं समगन्धिकं रणप्रियं वीरतरुः शिशिरं शीतमूलकं वितान-मूलकं जलामीदं सुगन्धिकं सुगन्धिमूलं सुगन्धिमूलं कम्भु (रा.)। गुणाः—शीतलं तिक्तं दाहहरं श्रमघ्नं पित्तज्वरघ्नं जलसौगन्ध्यकरञ्च। रा. नि. व. १२। उशीरं स्वेददौर्गन्ध्य-दाहपित्तास्रदोषजित्। राज.। पाचनं शीतलं स्निग्धनं तिक्तं मधुरं ज्वरघ्नं वान्तिघ्नं उन्मत्तताहरं कफपित्तव्रणाघ्नं रक्तघ्नं वीसर्पदाहमूत्रकृच्छ्रघ्नञ्च। भा. पू. १भ.। मद. व. ३। बालके। वाला। सुस्राव्यष्टादशाङ्गे।

उशीरादिः। पुं। तृतीयकज्वरे कषायः। "उशीरं चन्दनं मुस्तं गुडूचीधान्यनागरं। अम्भसा क्वथितं पेयं शर्करामधुयोजितं॥ भैष. जीर्णज्व. चि.। द्वितीयः ज्वरातीसारे। तस्य द्रव्याणि—उशीरं बालकं मुस्तं धन्याकं शृङ्गी वराहक्रान्ता धातकी रौद्रं बिल्वपेशी च। सा. कौ।

उशीरी। स्त्री। क्षुद्रकाशतृणे। छोट केशे। तत्पर्य्यायः,—मिषिः गुड़ा अश्वालः नीरुजः शरः। गुणाः—मधुरशीता पित्तदाहक्षयप्लीहच। रा.नि.व.८।

उषः। पुं। गुग्गुलौ। राजनिर्यासे। मे. षद्विकं। क्षारमृत्तिकायाम्। श. र.। क्ली। पांशुजलवणे। पांडा फूला लवण। प. मु.।

उषकः। पुं। टङ्गणक्षारे। सोहागा। रत्ना.। मृत्तिकालवणे। प. मु.।

उषणम्। क्ली। शुण्ठ्याम्। मरिचे। रत्ना.। भा. पू. १भ.। उदकमञ्जरी। च. द. अ. सा. चि.। "विल्वीषणादिः।" शि. धी. अग्निमा. चि. हृद्य. चुक्रसन्धाने.। पिप्पलीमूले। रा. नि. व. ६। "वचीषणकणाः समा.।" त्रिकटुके। वै. नि. ष. २भ. ज्व. चि. सैन्धवाद्यञ्जने।

उषणा। स्त्री। पिप्पल्याम्। कणायामुषणा स्त्रियाम्। मे. णत्रिकं। शुण्ठ्याम्। चविकायाम्। र. मा.। गजपिप्पलीमूले। अम.। भा. पू. १भ.। कट्फले। मरिचे। सन्निपातज्व. चणकाद्युद्वलने। गजपिप्पल्याम्। वै. निघ. २भ. जिह्वकसन्निपा. ज्व. चि.।

उषपः। पुं। सूर्य्ये। अग्नौ। उ.।

उषप्रसूतं। क्ली, पुं। क्षारविशेषे। के.।

उषरा। स्त्री। क्षारमृत्तिकायाम्। क्षारिगाटी। रत्ना.।

उषर्बुधः। पुं। रक्तचित्रके। रांगचिते। श. च.।

उषस्। क्ली, स्त्री। प्रत्यूषे। मे. सत्रिकं।

उषसी। स्त्री। सन्ध्याकाले। मे.।

उषा। स्त्री। गवि। गाई। हे. च.। रात्रौ। मे. रात्रिशेषे। अ.। स्त्र्याख्याम्। अ. टी. रा.।

उषाकलः। पुं। कुक्कुटे। त्रिका.।

उषाक्षारः। पुं। टङ्गणे। सोहागा। क्षारमृत्तिकायाम्। रत्ना.।

उषितः। त्रि। दग्धे। व्युषिते। मे. तत्रिकं।

उषीरः। पुं, क्ली। वीरणमूले। अ. टी. रा.। च. द. र. पि. चि. दूर्व्याद्यतैले।

उष्ट्रः। पुं। स्वनामख्यातपशुविशेषे। ऊँट। हिं उँट्। तत्पर्य्यायः,—क्रमेलकः मयः महाङ्गः (अ.), दीर्घगतिः बली करभः दासेरकः धूसरः लम्बोष्ठः वरणः महाजङ्घः जवी जाङ्घिकः दीर्घः शृङ्खलकः महान् महाग्रीवः महानदः महाध्वगः महापृष्ठः बलिष्ठः (रा), दीर्घजङ्घः ग्रीवी धूम्रकः शरभः (ज), क्रमेलः कण्टकाशनः भीलिः बहुकरः अध्वगः मरुद्विपः वक्रग्रीवः (शब्दर.), वासन्तः कुलनाशः कुशनामा मरुप्रियः द्विककुत् दुर्गलङ्घनः भूतघ्नः दासेरः दीर्घग्रीवः केलिकीर्णः (हे,) कुवाहुलः वणिग्वहः (श), दीर्घाध्वगः (मे.)। तन्मांसगुणाः—विदोषशमनं बलपुष्टिप्रदं रुच्यं मधुरं वीर्य्यवर्द्धनञ्च। रा. नि. व. १७। शीतलत्वं लघुत्वं विदोषघ्नत्वं पुष्टिकरत्वं रुच्यं वीर्य्यवर्द्धनत्वञ्च। रा. नि. व. १५। कटु शीघ्रकृमिविषघ्नं दीपनं वातकफघ्नं कुष्ठगुल्मोदरघ्नञ्च। भा. पू. १ भ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्ट्रकण्टकः। पुं। सकण्टकगुल्मविशेषे। ठीकुर-काँटा। च. द.। गीचुरे। भैष. मसूबा. चि. "उष्ट्र-कण्टकमूलं।"

उष्ट्रकाण्डिका (ण्डी)। स्त्री। पुष्पवृक्षविशेषे। ऊँटाटी इति भाषा। मं उट्कटारा, उटांटी। तत्पर्य्यायः,—रक्तपुष्पी करभकाण्डिका रक्ता लोहितपुष्पी वर्णपुष्पी। गुणाः—तिक्ता उष्णा रूक्षा हृद्रोगहरी। तद्बीजं मधुरं शीतं हृद्यं सन्तर्पणञ्च। रा. नि. व. १०।

उष्ट्रग्रीवः। पुं, क्ली। पित्तजन्यभगन्दररोगभेदे। "पित्तन्तु प्रकुपितं अनिलेनाधःप्रगुन्नं पूर्ववदवस्थितं रक्तां तन्वीमुच्छ्रितामुष्ट्रग्रीवाकारां पिड़कां जनयति। सास्य कण्डूदाहान् वेदनाविशेषान् जनयति। अप्रतिक्रियमाणा च पाकमेति। व्रणश्च कठिनः संरम्भी कण्डूप्रायः पिच्छिलसजसमासावं स्रवति। उपेक्षितश्च वातमूत्रपुरीषरेतांसि विसृजति। तं भगन्दरं परिस्राविणमित्याचक्षते।" सु. नि. ४ अ.। प्रकोपणैः पित्तमतिप्रकोपितं करोति रक्तां पिड़कां गुदागताम्। तदाशुपाकां हिमपूतिवाहिनीं भगन्दरं तृष्ट्रग्रीधरं वदेत॥ नि.।

उष्ट्रधूसरपुच्छिका। स्त्री। वृश्चिकाख्यायाम्। विछाति। र. मा.।

उष्ट्रपादिका। स्त्री। मदनमालत्याम्। मदन-माली, शंपरमाली च इति लोके। र. मा.। तत्पर्य्यायः,—शीतभीरुः भद्रवल्ली भूमिसत्ता अष्ट-पादिका (रा.)।

उष्ट्रप्रमाणः। पुं। काश्मीरदेशीयशरभे। मद. व. १२।

उष्ट्रप्रियः। पुं। मरुभूमिजातकण्टकवृक्षविशेषे। ठाकुरकाँटा गाछ। हिं करील, टाउर। गुणाः करीरशब्दे मृग्याः। भा. पू. १भ.।

उष्ट्रभाण्डिका। स्त्री। क्षुद्रदुरालभायां। रा. नि. व. ४।

उष्ट्रभक्ष्यः। पुं। वंशकरीरे। बाँशेर कोँड़। प. मु.।

उष्ट्रमूत्रम्। क्ली। उष्ट्रस्य मूत्रे। गुणाः—कटु तिक्तोष्णं लवणं पित्तकोपनं बल्यम् उदररोगघ्नं वातदोषघ्नञ्च। रा. नि. व. १५।

उष्ट्रशिरोधरम्। क्ली। उष्ट्रग्रीवभगन्दरे।

उष्ट्रिका (ष्ट्री)। स्त्री। वृश्चिकालिचुपे। विछाति। रा. नि. व. ९। मद्भाण्डविशेषे। हारा.। उष्ट्र-भार्य्यायाम्। उटिनी। मे. कविकं। तत्क्षीर-गुणाः—कुष्ठशोथपित्तार्शःकफाटीपानाहोदरश्वजन्तु-गुल्मश्वासनाशित्वम्, इषद्रूक्षोष्णलवणं, कुष्ठशोफघ्नं पित्तघ्नं अर्शोघ्नं कफाटीपघ्नं आनाहहरं कृमिगुल्मो-दरश्वासघ्नञ्च। रा. नि. व. १५। लघु स्वादु लवणं दीपनं तथा कृमिकुष्ठकफानाहशोथोदरहरं परम्। भा. पू. १भ.। रूक्षं तथोष्णं लवणं कफस्य निवारणं वातविकारहारि। लघु प्रशस्तं कटुकं। दधिगुणाः—अर्शः-कुष्ठ-कृमि - गुल्मोदररोगनाशित्वं कटुत्वं स्वादुत्वञ्च। नवनीतगुणाः—विपाके शीतलत्वं लघुत्वं व्रणकृमिकफकासवातविषघ्नत्वञ्च। घृतगुणाः—शीतमधुरत्वं विपाके कटुत्वं कृमिकुष्ठगुल्मोदर-नाशित्वञ्च। पाके कटु शीघ्रकृमिविषघ्नं दीपनं वातकफघ्नं कुष्ठगुल्मोदरघ्नञ्च। अत्रि. ८अ.।

उष्ट्रीक्षीरम्। क्ली। उष्ट्रीदुग्धे। See उष्ट्री।

उष्ण। पुं। ग्रीष्मे। त्रि। उष्णस्पर्शे। उष्णवीर्य्ये। पलाण्डौ। रा. नि. व.। क्ली। शूरणविशेषे। उष्णं वातकफौ हन्यात्। भा.।

उष्णकः। पुं। पूगवृक्षे। ज्वरे। ग्रीष्मर्त्तौ। त्रि। आतुरे। धर.। मे.।

उष्णगणः। पुं। भद्रदार्व्वादौ। पिप्पल्यादौ। सु. चि. १७ अ.।

उष्णगन्धा। स्त्री। कुलिञ्जनवृक्षे। महाभरी वृक्षः। वै. निघ.।

उष्णजलम्। क्ली। See उष्णोदकं।

उष्णफला। स्त्री। लताविशेषे। कुन्दूरुकी। मं गीड़तोंडली। वै. निघ.।

उष्णमल(मूत्र)त्वम्। क्ली। पित्तजन्यरोगे।

उष्णरश्मिः। पुं। अर्कवृक्षे। अम.। सूर्य्ये।

उष्णवल्ली। स्त्री। सारिवायाम्। अनन्तमूल।

उष्णवातः। पुं। सूत्राघातविशेषे। लक्षणं यथा —"व्यायानाध्वातपैः पित्तं वस्तिं प्राप्यानिलाहतं। वस्तिं मेढ्रं गुदञ्चैव प्रदहन् स्रावयेदधः। मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा। कृच्छात्पुनः पुन-र्जन्तोरुष्णवातं वदन्ति तम्॥" भा.।

उष्णवारणम्। क्ली। छत्रे। हारा.।

उष्णवाष्पः। पुं। नेत्रजले। स्वेदे। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णविदग्धदृष्टिः। पुं। दृष्टिगतरोगविशेषे।

उष्णवीर्य्यः। पुं। शिग्रुसारे। हे. च। क्ली। कटुस्नद्रव्याश्रयधर्म्मे। गुणः—"लघु कफवातघ्नं पित्तकरं द्रव्यं भ्रमतृड्ग्लानिस्वेददाहागुपाकतां करोति। सु. सू. ४१ अ.। त्रि। तीक्ष्णवीर्य्ये।

उष्णसुन्दरः। पुं, क्ली। विभीतकवृक्षे। विभीतके।

उष्णस्निग्धः। त्रि। तत् यद्वातघ्नं वस्तु। सु. सू. ४१ अ.।

उष्णा(ष्मा)। स्त्री। क्षयरोगे। सन्तापे। पित्ते। वै. निघ.। रा. नि. व. २०।

उष्णा(भि)गमः। पुं। ग्रीष्मकाले। अम.।

उष्णाङ्गत्वम्। क्ली। पित्तजन्यरोगे।

उष्णान्नम्। क्ली। उष्णभक्ते। See अन्नम्।

उष्णाम्बु। क्ली। सुखोदके। "उष्णाम्बु च सुखोदकम्।" प. प्र. ३ख.। See उष्णोदकम्।

उष्णासहः। पुं। शरत्काले।

उष्णिका। स्त्री। यवान्नाम्। यांउ। रत्ना.।

उष्णीषः। पुं, क्ली। शिरस्त्राणे। पागड़ी। हिं पाग। धारणगुणः—शुचिदं केश्यं रजोवातातपघ्नञ्च। मद. व. १३। चक्षुष्यमायुर्वर्द्धकत्वं शीतोष्णादिनिवारणञ्च॥ राज.।

उष्णोदकम्। क्ली। अष्टमांशावशिष्टे, चतुर्भागावशिष्टे, अर्द्धशिष्टे वा पक्वजले। प. प्र. १ख.। तच्च त्रिविधं पादहीनार्द्धहीनत्रिभागहीनत्वात्। "तत्पादहीनं वातघ्नमर्द्धहीनन्तु पित्तनुत्। कफघ्नं पादशेषन्तु पानीयं लघु दीपनम्॥" पादहीनं हेमन्ते, पादार्द्धीनं शरदि, तथार्द्धावशेषितं प्रावृड्वसन्तग्रीष्मेषु हितं पथ्यञ्च। विशेषाः स्वस्वपर्य्यायेषु द्रष्टव्याः। गुणाः—सदापथ्यं कासज्वरविबन्धकफवातघ्नं दीपनं वस्तिशोधनञ्च। रात्रौ तप्तं श्लेष्मघ्नत्वं वातकर्षित्वं अजीर्णजारकत्वञ्च। दिवातप्तं वारि नक्तं जाड्यं गच्छति अतस्तन्न रात्रौ पेयं। एवं रात्रितप्तमपि दिवा गुरु स्यात्, अतस्तदपि दिवा न पेयं। तदाह्लसेव तप्तं जलं सदा पेयम्। रा. नि. व. १४। "कफनदीऽनिलामघ्नं दीपनं वस्तिशोधनं। श्वासकासज्वरहरं पथ्यमुष्णोदकं सदा॥ यत् क्वाथ्यमानं निर्व्वेगं निष्फेनं निर्म्मलं लघु। चतुर्भागावशेषन्तु तत्तोयं गुणवत् स्मृतम्॥ नच पर्य्युषितं देयं कदाचिद् वारि जानता। अस्त्रीभूतं कफीत्क्लेशि न हितं तत् पिपासवे॥ मद्यपानात् समुद्भूते रोगे पित्तोल्बणे तथा। सन्निपात-समुत्थे च शृतशीतं प्रशस्यते॥ सुश्रु.॥"

उष्णोपगमः। पुं। ग्रीष्मकाले। अम.।

उष्मः (क्मः)। पुं। तापे। र. मा.। क्षयरोगे। रा. नि. व. २०। ग्रीष्मर्त्तौ। अम.। वसन्तकाले। उष्णतायां। आतपे। मे. कविकं।

उष्मजम्। क्ली। स्वेदसाधारणे। रत्ना.।

उष्मण्यः। पुं। सूर्य्ये।

उष्मस्वेदः। पुं। उष्मजन्यधर्म्मे। यथा—"उष्मस्वेदः प्रयोक्तव्यः लौहपिण्डेष्टिकादिभिः। प्रतप्तैरभिसिक्तैश्च कार्ये वस्त्रकवेष्टितैः॥ अथवा वातजिद्वर्ग-द्रव्यक्वाथरसादिभिः। उष्णैर्घटं पूरयित्वा पार्श्वे छिद्रं निधाय च। विमुद्याग्रं छिद्रखण्डाच्च धातुजां काष्ठवंशजाम्। .....। सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतं। वस्तिगुण्डिकया नाड्या स्वेदयेद्वातरोगिणम्॥ अत्र वातघ्नद्रव्यभागाः—शालपर्णी १ भ. पृश्निपर्णी २ भ. कण्टकारी ३ भ. बृहती ४ भ. गोक्षुरं ५ भ. बिल्वं ६ भ. गणिकारी ७ भ. श्योनाकः ८ भ. पाटलिः ९ भ. गाम्भारी १० भ.। वै. निघ. स्वेद.।

उष्मा (ष्मन्)। पुं। सन्तापे। पित्ते। क्षयव्याधौ। रा. नि. व. २०। ग्रीष्मर्त्तौ। अ. टी. नीलकण्ठ.।

उष्मागमः। पुं। ग्रीष्मकाले। उत्तापे।

उस्रः (स्रा)। पुं, स्त्री। वृषे। अर्জ্জुन्यां। गाइ। उपचिवाय्याम्। आखुकर्ण्याम्। इन्दुरकर्णी। मे. रश्मिकं।

उस्रोया। स्त्री। गवि। कै.।

उक्षः। त्रि। धौते। सिक्ते।

उक्षणम्। क्ली। सेचने।

उक्षतरः। पुं। महावृषे। हे. च.।

उक्षा (न्)। पुं। वृषभे। भा. पू. १भ.। ऋषभकौषधे। रा. नि. व. ५।

उक्षाभद्रः। पुं। वृषे। वै. निघ.।

उक्षालः। पुं। वानरे। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊ

ऊची। स्त्री। भृष्टद्रव्यविशेषे। हरापोड़ा इति लोके। See ऊम्बी।

ऊर्ज्जः। पुं। बले। चरः।

ऊधः। क्ली। आपीने। अमः।

ऊधस्यम्। क्ली। दुग्धे। रा. नि. व. १५।

ऊम्बी। स्त्री। यवगोधूमयोरर्द्धपक्वमञ्जरी तृणाग्निना भर्जिता ऊम्बीत्युच्यते। "मञ्जरी खर्द्धपक्वा या यवगोधूमयोर्भवेत्। तृणानलेन संभृष्टा बुधैरूम्बीति सा स्मृता॥ गुणाः—कफदा वल्या स्निग्धी पित्तानिलघ्नी च। भा. पू. १भ.।

ऊरणः। पुं। मेषे। प. सु.।

ऊरुः। पुं। जानूपरिभागे। ऊरुः। रा. नि. व. १८।

ऊरुपर्व्वा। पुं. क्ली। जानौ। हाँटु। अमः।

ऊरुमाणः। पुं। मायीफले। सु. सू. ४६ अ.। See ऊरुसालः।

ऊरुसन्धिः। पुं। जानूपरिस्थसन्धिस्थाने। सु.।

ऊरुस्तम्भः। पुं। Paralysis of the lower extremities. वातकफजन्यरोगविशेषे। आढ्यवात इति केचित्। निदानं सम्प्राप्तिः तथा—"शीतोष्णद्रवसंशुष्कगुरुस्निग्धैः निषेवितैः। जीर्णाजीर्णे तथायाससङ्कीर्णस्वप्नजागरैः।—सश्लेष्मभेदः पवनः साममत्यर्थसञ्चितम्। अभिभूयेतरं दोषमूरू चेत्प्रतिपद्यते। सक्थ्यस्थिनी प्रपूर्य्यान्तः श्लेष्मणा स्तिमितेन च। तदा स्तभ्नाति तेनोरुस्तब्धौ शीतावचेतनौ॥ इति। परकोयाविव गुरू स्यातामतिभृशव्यथौ। ध्यानाङ्गमर्द्दसंमित्यतन्द्राच्छर्द्यरुचिज्वरैः। संयुक्तौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः। तमूरुस्तम्भमित्याहुराढ्यवातमथापरे॥" इति रुपम्। मा. नि.। ऊरुस्तम्भे विधिः कार्य्यो वातकोपी कफापहः। युक्त्या जित्वा कफं रूक्षैः पयाहातं जयेद्विषक्। पुराणशालिश्यामाकयवकोद्रवमोदनं। अघृतैर्जाङ्गलैर्मांसैः तथाचालवणैर्हितम्। वास्तूकवायसीनिम्बवेत्राग्रकुलकादिभिः। शुष्कमूलकयूषेण पटोलस्य रसेन वा। कफचर्यार्थं व्यायामैश्चेनं शक्त्येषु योजयेत्। स्थानान्याक्रामयेत् प्रातः प्रतिस्रोतो नदीन्तरेत्॥ पथ्यम्। रस. र.।

ऊरुस्तम्भा। स्त्री। कदलीवृक्षे। रा. नि. व. ११।

ऊर्ज्जः (कः)। पुं। बले। कार्त्तिकमासे। हे. च.। क्ली। जले। श. र.।

ऊर्ज्जाः। पुं। उत्साहे। वा. सू. २अ.।

ऊर्णनाभः। पुं। मर्कटके। माकड़शा। अमः।

ऊर्णनाभिः। पुं। ऊर्णनाभे। श. र.।

ऊर्णा। स्त्री। मेषलोम्नि। "ऊर्णा मेषादिलोम्नि स्यात्।" भ्रूमध्यावर्त्ते। "अन्तरावर्त्तके भ्रुवोः।" मे. णविकं।

ऊर्णायुः। पुं। कम्बले। मेषे। प. सु.। ऊर्णनाभौ। हे. च.।

ऊर्द्धकण्टा (ण्टिका) (ण्टी)। स्त्री। महाशतावर्य्याम्। रा. नि. व. ४।

ऊर्द्धका। स्त्री। वायुजन्यरोगविशेषे। ऊर्द्धक्।

ऊर्द्धगः। पुं। अस्थिभङ्गरोगे।

ऊर्द्धगुणभूयिष्ठः। त्रि। वमनद्रव्यमात्रे। सु. सू. ४१ अ.।

ऊर्द्धगुदः। पुं। गुदीर्द्धगरोगे।

ऊर्द्धग्रहः। पुं। अश्वस्य ग्रहदोषजन्यरोगविशेषे। तस्य लक्षणं—जिह्वास्यकृष्णत्वं दर्शनस्मरणनाशश्चेति। "श्यामं जिह्वामुखं यस्य नष्टदृष्टिस्मृतिर्भवेत्। ऊर्द्धग्रहकृतं दोषं तस्य दीनस्य निर्द्दिशेत्॥" ज. ५७ अ.।

ऊर्द्धजत्रु। क्ली। स्कन्धसन्धेरूर्द्धभागः। स्कन्धसन्धिर ऊर्द्धभाग। "ऊर्द्धजत्रुरोगघ्नी। तच्च रोगेषु।" च. द. ज्व.।

ऊर्द्धजानुः। त्रि। ऊर्द्धजानौ। उपरिस्थजानुके। भा.।

ऊर्द्धज्ञः। त्रि। ऊर्द्धजानौ।

ऊर्द्धतिक्तः (क्तः)। पुं। नेपालनिम्बे।

ऊर्द्धनाड़ी। स्त्री। नाड़ीविशेषे।

ऊर्द्धपातनम्। क्ली। रसस्योर्द्धोत्क्षेपणकर्म्मणि यथा—रस ३ भ. ताम्र १भ. जम्बीररसेन तावन्मर्द्दयेत्, यावन्न पिण्डतां गच्छति। अथ ऊर्द्धपातनायन्त्रं विद्याधरयन्त्रं वा परिकल्प्य तं पिण्डं तलस्थभाण्डे संस्थाप्य तदुपरिस्थभाण्डे जलं दत्त्वा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्त्रसन्धिं सम्यक् निरोधयेत्। अथ तदधः वह्निं ज्वालयेत्। "स्थालीमध्ये जलं दत्त्वा वह्निं प्रज्वालयेदधः। एतद्विद्याधरं यन्त्रं पातनायन्त्रमित्यपि॥" पातनायन्त्रमित्यूर्द्धपातनायन्त्रम्। "हण्डिकोपरितलभागेऽन्यां हण्डिकामधोमुखीं विन्यस्याधोहण्डिकाभ्यन्तरे पाच्यसूतादिकं निवेश्य च द्वयोः सन्धिं निरोधयेत्। तत उपरितलस्थाल्यां जलं दत्त्वा अधो वह्निं प्रज्वालयेदिति। र. सा. सं.। একটী হাঁড়ির ভিতর পিণ্ডিত সতাম্র রস রাখিয়া তাহার মুখে আর একটী হাঁড়ি বসাইয়া উভয়ের সন্ধিমুখ উত্তমরূপে লেপিয়া শুষ্ক করিবে। পরে উপরিস্থ হণ্ডিকায় জল পূরণ করিয়া জ্বাল দিবে। সিদ্ধ হইলে নামাইয়া হাঁড়ির গায়ে যে ভূষা লাগিয়াছে, তাহা যত্নে লইয়া তাহা হইতে পারা বাহির করিবে।

ऊर्द्वपादः। पुं। काश्मीरदेशीयशरभभेदे। अष्टपादपशुविशेषे।

ऊर्द्वभागहरः। वि। वमनद्रव्ये। सु. सू. ४अ.। See वमनं।

ऊर्द्वरेताः (स्)। पुं। अस्खलित-शुक्रविशिष्टे। मैथुनादौ यस्य शुक्रस्खलनं न भवति।

ऊर्द्ववर्त्तिः। पुं। नासिकाश्वयथुरोगे। लक्षणं यथा—"दग्धोदनञ्च यो वाजी खादितं पुनः। सुखेन प्रीह्निरत्याशं वि...ऊर्द्ववर्त्तिनम्॥" ज. द. ४३ अ.।

ऊर्द्ववातः। पुं। वायुरोगभेदे। उद्गारे। ঢেকুর। लक्षणं—"अधःप्रतिहतो वायुः श्लेष्मणा मारुतेन च। करीत्युद्गारबाहुल्यमूर्द्ववातः स उच्यते॥" निदानम्।

ऊर्द्ववायुः। पुं। ऊर्द्वगतवायौ। उद्गारबाहुल्ये। श्वासरोगे। भा. ज्व. चि.।

ऊर्द्वशोधनम्। क्ली। अरिष्टकफले। रीठা ফল। वमने।

ऊर्द्वश्वासः। पुं। श्वासरोगभेदे। "ऊर्द्वं श्वसिति यो दीर्घं न च प्रत्याहरत्यधः। श्लेष्मावृतमुखस्रोता कृच्छ्रगन्धवहार्दितः॥ ऊर्द्वदृष्टिर्विपश्यंश्च विभ्रान्ताक्षश्चतस्ततः। प्रमुह्यन् वेदनार्त्तश्च शुक्लास्योऽरतिपीड़ितः। ऊर्द्वश्वासे प्रकुपिते ह्यधःश्वासो निरुध्यते। सुह्यतस्तस्यतश्चोर्द्वं श्वासस्तस्यैव हन्त्यसून्॥" भा. नि.। See श्वासः।

ऊर्द्वस्थितिः। पुं। अश्वस्योर्द्ववर्त्ते। त्रिका.।

ऊर्द्वोसितः। पुं। कारवेल्ले। করলা উচ্ছে। त्रिका.।

ऊर्म्मणः। पुं। द्रोणपरिमाणे।

ऊर्म्मिः। पुं, स्त्री। तरङ्गे। दुःखे। वेदनायां। पीड़ायां। वेगे। भङ्गे। मे. मदिकं।

ऊर्म्मिकः। पुं। अश्वस्य पादरोगभेदे। लक्षणं—"ऊर्म्मिकश्चोर्म्मिसंस्थानैर्वलिभिः खुरसम्भवैः।" ज. द. ३९ अ.।

ऊर्म्मिका। स्त्री। उत्कण्ठायां। तरङ्गे। भङ्गनादे। वस्त्रभङ्गे। अङ्गुलीयके। हे.।

ऊर्व्वः। पुं। वाड़वाग्नौ।

ऊर्व्वरा। स्त्री। सर्व्वशस्याख्यायां भूमौ। शब्द र.।

ऊर्व्वी। स्त्री। उरुस्थसन्धिभेदे। सु.।

ऊर्ङ्गम्। क्ली। गोमयच्छर्दिकायाम्। গুবরে ছাতা। हारा.।

ऊर्षा। स्त्री। देवताड़कवृक्षे। श्र. च.।

ऊलुपी। पुं। शिशुमारे। अ. टी.।

ऊलूकः। पुं। पेचके। अयं प्रसहजातीयः। एतन्मांसम् उष्णवीर्य्यम्। एतद्भक्षणात् श्वीषभस्मकीन्मादाः क्षीणशुक्रता च जायन्ते। भा. पू. १भ.। "उलूकपलले भान्तिकरं वातप्रकोपकरञ्च।" मद. व.।

ऊषः। पुं। क्षारमृत्तिकायां। अम.। सन्ध्यायां। रन्ध्रे। मे.। क्ली। प्रभाते। श्र. र.।

ऊषकः। पुं। कल्लर इति प्रसिद्धे द्रव्यकन्दे। वा. सू. १५ अ. ऊषकादि.। "ऊषकस्तुत्थकं हिङ्गु।" क्षारमृत्तिकायाम्। "ऊषकः क्षारमृत्तिका, वाराणसीसमीपे बभूवदेशे बाहुल्येन भवति। अन्ये तद्भवं द्रव्यान्तरमाहुः।" सु. सू. ३८ अ. ड.। क्ली। प्रत्यूषे। श्र. र.।

ऊषकादिगणः। पुं। ऊषकस्तुत्थकहिङ्गुकासीसद्वयसैन्धवशिलाजतूनीति गणः। गुणाः—मूत्रकृच्छ्राश्मरीगुल्मकृमिदोषकफघ्नाः। "ऊषकस्तुत्थकी हिङ्गुकाशीशद्वयसैन्धवं सशिलाजतु।" वा. सू. १५ अ.। च. द. कषायघृते।

ऊषणम्। क्ली। मरिचे। "उषणं मरिचे क्लीवम्।" मे. रत्नमा.। प. मु.। भा. प. १भ. च. व.। पिप्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पल्यां। च. द. कफज्व. चि. सिन्दुवारादिः। "सिन्दुवारदलक्काथः सोषणः कफजे ज्वरे।" गुरुट्यां। भा. पू. १भ. ह. व.। पिप्पलीमूले। भा. पू. १भ. ह. व.। पुं। चित्रकवृक्षे। भा. पू. १भ. ह. व.।

ऋषणा। स्त्री। पिप्पल्याम्। रा. नि. व. ६। भा. पू. १भ. ह. व.। चविकायाम्। प. मु.। See चव्यम्। गुरुट्यां। वै. निघ.।

ऋषरः। पुं। चारभूमौ। रा. नि. व. २।

ऋषरक(ज)म्। क्ली। औषरके। पांशुलवणे। औषरलवणे। रोमकनामायस्कान्तभेदे। रा. नि. व. १३।

ऋषरतृणम्। क्ली। खनामख्यातृणे, घासविशेषे। गुणाः—बलदं रुच्यं पशूनां हितञ्च। रा. नि व. ८।

ऋषवान्। वि। ऊषरे। अम.।

ऋषसूतम्। क्ली। मृत्तिकालवणे। "ऋषसूतं बालुकेलं शैलमूलाकरोद्भवं। लवणं कटुकं क्षेदि विद्धितं कटु चोच्यते॥" सु. सू. ४६ अ.।

ऋषक्षारः। पुं। क्षारमृत्तिकायाम्। लोणामाटी। गुणाः—"उष्णोऽनिलघ्नः प्रक्लेदी ऋषक्षारो बलापहः।" सु. सू. ४६ अ.।

ऋषाकरः। पुं। कुक्कुटे। श. र.।

ऋषापानम्। क्ली। प्रत्यूषजलपाने। तस्य विधिगुणाः—"अम्भसः प्रसृतीरष्टौ रवावनुदिते पिबेत्। वातपित्तकफान् जित्वा जीवेद्वर्षशतं सुखी॥ तथा—अर्शःशीथग्रहण्यो ज्वरजठरजराकुष्ठमेदोविकाराः सूर्याघातास्तु पित्तश्रवणगलशिरःश्रोणिशूलाक्षिरोगाः। ये चान्ये वातपित्तश्लेष्मजकफकृता व्याधयः सन्ति जन्तोस्तांस्तानभ्यासयोगादपहरति पयः पीतमन्ते निशायाः॥ विगतघननिशीथे प्रातरुत्थाय नित्यं पिबति खलु नरो यो नासरन्ध्रेण वारि। स भवति मतिपूर्णश्चक्षुषा तार्क्ष्यतुल्यो बलिपलितविहीनः सर्व्वगात्रैर्विमुक्तः॥" भा.।

ऋषाकः। पुं। पित्ते। रा. नि. व.। ग्रीष्मऋतौ। ज्यैष्ठाषाढौ ग्रीष्मऋतुः।

ऋष्मा। पुं। उष्णतायाम्। क्षयरोगे। वै. निघ.।

ऋष्मापहः। पुं। हेमन्तऋतौ। वै. निघ.।

ऋहः। पुं। तर्के।

ऋहिनी। स्त्री। सम्मार्ज्जन्याम्। झाँटा।

ऋह्यम्। क्ली। "यदनिर्द्दिष्टं बुद्धिमता तदृह्यं।" सु. उ. ६५ अ.।

ॠ

ॠक्थम्। क्ली। स्वर्णे। धने। अम.। सु. सू. ३८ अ.।

ॠक्यः। पुं। धने।

ॠचो(जी)षम्। क्ली। भाष्टे। ताओया। हे. च.।

ॠजोकः। पुं। धूमे।

ॠजुश्रेणी। स्त्री। मूर्व्वायां। रत्ना.।

ॠजुसर्पः। पुं। सर्पविशेषे। दर्व्वीकरसर्पे। सु. कल्प. ४ अ.। See सर्पः।

ॠज्ञासनः। पुं। मेघे। सिद्धा. कौ.।

ॠतम्। क्ली। जले। मे.। उञ्छशीले।

ॠतुः। पुं। वसन्तादिषड्विधकाले। रवे राशिसंक्रमात् यत दीषाणां चयकोपसमा भवन्ति ते ॠतव उच्यन्ते। "चयकोपसमा यस्मिन् दीषाणां सम्भवन्ति हि। ॠतुषट्कं तदाख्यातं रवे राशिषु संक्रमात्॥" भा. पू. १ भ. ॠतुचर्य्या। ते च शिशिर - वसन्त-ग्रीष्म - वर्षा-शरद्धेमन्तसंज्ञाः दोषीपचयप्रकोपोपशमननिमित्तानि भवन्ति। तदुक्तं —"माघादयो द्वादशसासा द्विमासिकमृतुङ्कृत्वा षड्ऋतवो भवन्ति। ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः, मधुमाधवौ वसन्तः, शुचिशुक्रौ ग्रीष्मः, नभोनभस्यौ वर्षाः, इषोर्जौ शरत्, सहःसहस्यौ हेमन्त इति। भाद्रपदाश्वयुजौ शरत्, कार्त्तिकमार्गशीर्षौ हेमन्तः, पौषमाघौ शीतः, फाल्गुनचैत्रौ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्तः, वैशाखज्यैष्ठौ ग्रीष्मः, आषाढ़श्रावणौ प्रावृड़िति" च मतान्तरं। सु. सू. ६अ.। ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृण्मिथुनकर्कटौ। सिंहकन्ये स्मृता वर्षाः तुला-वृश्चिकयोः शरत्। धनुर्मकरौ च हैमन्तौ वसन्तः कुम्भमीनयोः। भा.। स्मृतौ तु तस्य भेदत्रयं स्वीकुर्व्वन्ति यथा—शीत-ग्रीष्मवर्षाः। तत्र फाल्गुनादिज्यैष्ठान्ताः ग्रीष्मः, आषाढ़ाद्याश्विनान्ता वर्षाः, कार्त्तिकादिमाघान्ताः शीत इति। ऋतुलक्षणादिकं यथा—"तत्र वर्षा-स्वोषधयस्तरुण्योऽल्पवीर्य्या आपश्चाप्रसन्नाः क्षितिः सलप्रायास्ता उपयुज्यमाना नभसि मेघावृते जल-प्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवात-विष्टब्धाग्नीनां विदह्यन्ते, विदाहात्पित्तसञ्चयमापा-दयन्ति, स सञ्चयः शरदि प्रविरलमेघे वियत्युप-श्लिष्यति पङ्केऽर्ककिरणप्रविलापितः पैत्तिकान् व्याधीन् जनयति। ता एवौषधयः कालपरिणामात्परि-णतवीर्य्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्यस्ता उपयुज्यमाना मन्दकिरण-त्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिना-मविदग्धाः स्नेहाच्छैत्यात्तौषारवादुपस्तम्भाच्च श्लेष्मणः सञ्चयमापादयति, स सञ्चयो वसन्तेऽर्करश्मिप्रविला-पित ईषत् स्रवद्देहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति। ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्वी भवन्त्यापश्च ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्यात्खरत्वा-द्वैशद्याच्च वायोः सञ्चयमापादयन्ति, स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षैरिती वातिकान् व्याधीन् जनयति।...तत्र पूर्व्वाह्णे वसन्तस्य लिङ्गं मध्याह्ने ग्रीष्मस्यापराह्णे प्रावृषः प्रदोषे वार्षिकं शारदमर्द्ध-रात्रे प्रत्यूषसि हैमन्तमुपलक्षयेत्। एवमहोरात्र-मपि वर्षमिव शीतोष्णलक्षणं दोषोपचयप्रकोपोप-शमैर्जानीयात्। ऋतूनामत ऊर्द्धमव्यापन्नानां लक्ष-णानि यथा—वायुर्व्वात्युत्तरः शीतो रजोधूमा-कुला दिशः। क्षुण्णसुषारैः रुचिता हिमानद्धा जलाशयाः॥ दर्पिता ध्वाङ्क्ष-खञ्जरीट-महिषीरभ-कुञ्जराः। रौद्रप्रियङ्गुपुन्नागाः पुष्पिता हिमसाह्वये॥ शिशिरे शीतमधिकं वातवृष्टाकुला दिशः। शेषं हेमन्तवत्तत्र्व्वं विज्ञेयं लक्षणं बुधैः॥ दिशो वसन्ते विमलाः काननैरुपशोभिताः। किंशुकाम्भोजवकुल-चूताशोकादिपुष्पितैः॥ कोकिलाषट्पदगणैरुप-गीता मनोहराः। दक्षिणानिलसंवीताः सुमुखाः पल्वलोज्ज्वलाः॥ ग्रीष्मे तीक्ष्णांशुरादित्यो मारुती नैर्ऋतीऽसुखः। भूस्तप्ता सरितस्तन्व्यो दिशः प्रज्व-लिता इव॥ श्रान्तचक्राङ्गयुगलाः पयःपानाकुला मृगाः॥ ध्वस्तवीरुत्तृणलता विपर्णाङ्घ्रिपादपाः॥ प्रावृष्यम्बरमानद्धं पश्चिमानिलकर्षितैः। अम्बु-र्विद्युदुद्द्योतप्रस्रुतैस्तुमुलस्वनैः॥ कीमलश्यामशस्याढ्या शक्रगोपोज्ज्वला मही। कदम्बनीपकुटजसर्ज्जकेतकि-भूषिता॥ तत्र वर्षासु नद्यम्भःपूरोद्गतटद्रुमाः। वाप्यः प्रोत्फुल्लकुमुदनीलोत्पलविराजिताः॥ भूर-व्यक्तस्थलशष्पा बहुशस्योपशोभिता। नातिगर्जत्-स्तनन्मेघनिरुद्धार्कगृहं नभः॥ बभुरुष्णः शरद्यर्कः श्वेताभ्रविमलं नभः। तथा सरांस्यम्बुरुहैर्भान्ति हंसांसघट्टितः॥ पङ्कशुष्कद्रुमाकीर्णा निम्नोन्नतसमेषु भूः। वाणसप्ताह्वबन्धूककाशासनविराजिता॥ स्वगुणै-रतियुक्तेषु विपरीतेषु वा पुनः। विषमेष्वपि वा दोषाः कुप्यन्त्यृतुषु देहिनां॥ हरेद्धसन्ते श्लेष्माणं पित्तं शरदि निर्हरेत्। वर्षासु शमयेद्वायुं प्राग्वि-कारसमुच्छ्रयात्॥" सु. सू. ६अ.। स्त्रीकुसुमे। अम.। See पुष्प, आर्त्तवञ्च।

ऋतुजन्मा। स्त्री। पुनर्नवायाम्।

ऋतुपरीक्षा। स्त्री। आर्त्तवपरीक्षायाम्। तद्यथा —"ऋतौ कण्डूयनं योनौ क्वचिदङ्गे च वेदना। बाहुल्यं स्खल्पता वापि चानुबन्धित्वमस्य वा। संरोधः सर्व्वथा वापि वेद्यान्येतानि यत्नतः। आमयेष्व-खिलेष्वेव भिषग्भिर्यौषितां सदा॥" अवि.।

ऋतुमती। वि। रजःस्वलायां स्त्रियाम्। तत्-पर्य्यायः,—रजस्वला स्त्रीधर्म्मिणी अवी आर्त्तवी मलिनी पुष्पवती उदक्या। अ.। तल्लक्षणं यथा —"पीनप्रसन्नवदनां प्रक्लिन्नात्मसुखद्विजां। नरकामां प्रियकथां सस्तकुच्यचिमूर्द्धजाम्॥ स्फुरद्भुजकुच-श्रोणिनाभ्यूरुजघनस्फिचं। हर्षोत्सुक्यपराञ्चापि विद्याद्ऋतुमतीमिति॥ नियते दिवसेऽतीते सङ्कुच-त्यम्बुजं यथा। ऋतौ व्यतीते नार्य्यास्तु योनिः संक्रियते तथा॥ मासेनोपचितं काले धमनीभ्यां तदार्त्तवम्। ईषत्कृष्णं विदग्धञ्च वायुर्योनिमुखं नयेत्॥ यद्द्वादशाद्दशात्काले वर्त्तमानमसृक् पुनः। जरापक्वशरीराणां याति पञ्चाशतः क्षयम्॥" सु. शा. २।३ अ.।

ऋतुराजः। पुं। वसन्तऋतौ। रा. नि. व. २१।

ऋतुविपर्य्ययः। पुं। ऋतुव्यापदि। वसन्तादि-स्थाने शरदादिधर्म्मप्रवृत्तौ।

ऋतुवृत्तिः। पुं। वत्सरे। त्रि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतुवैषम्यम्। क्ली। ऋतुचर्य्याविपरीताचरणे। भा. म. ४भ.। "क्रीधर्त्तुवैषम्यशिरीभितापैः।"

ऋतुशूलम्। क्ली। ऋतुकाले रजोरोधजन्यशूलरोगे। "पुष्पस्य वातादिभिर्हृतत्वं तस्य कारणं। बहुलं पिच्छिलं स्निग्धं घनं स्रवति शोणितं। योनौ नाभौ तु शूलानि ऋतौ परमदारुणम्।" रस. र. यो. व्या. चि.।

ऋतुषट्कम्। क्ली। हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु। "चयकोपसमा यस्मिन् दोषाणां सम्भवन्ति हि। ऋतुषट्कं तदाख्यातं रवेराशिषु संक्रमात्॥" भा.।

ऋतुसन्धिः। पुं। ऋतुद्वयसंश्लेषसमये। स च ऋतुद्वयस्याद्यन्तसप्ताहरूपः। तदुक्तं "ऋत्वोरन्त्यादिसप्ताहावृतुसन्धिरिति स्मृतः। तत्र पूर्व्वोविधिरुत्याज्यः सेवनीयः परो विधिरिति॥" वा.।

ऋतुसम्मिता। स्त्री। सुनिखर्जूरिकायाम्। वै. निघ.।

ऋतुस्नाता। स्त्री। रजोदर्शनाच्चतुर्थेऽह्नि स्नातायाम्। "पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना। तादृशं जनयेत् पुत्रं ततः पश्येत्पतिं प्रियं॥" सु. शा. २ अ.।

ऋतुहरीतकी। स्त्री। ऋतौ ऋतौ हरीतकीभक्षणविधौ। यथा—"सिन्धूत्थशर्करागुरहीकणामधुगुड़ैः क्रमात्। वर्षादिष्वभया सेव्या रसायनगुणैषिणा॥" च. द.। भट्टारस्तु ग्रीष्मेऽधिकृत्याह। ग्रीष्मे तुल्यगुड़ां सुसैन्धवयुतां मेघावनद्धाम्बरे साईं शर्करया शरद्यमलया गुरुद्या तुषारागमे। पिप्पल्या शिशिरे वसन्तसमये चौद्रेण संयोजितामित्थं प्राश्य हरीतकीमिव रुजो नश्यन्तु ते शत्रवः॥ प्रयोगा. वाजी.।

ऋद्धम्। क्ली। सम्यक्पक्वधान्ये। अम.। पक्वमर्द्धितधान्ये। निर्वृषीकृतधान्य। अ. टी.।

ऋद्धिः। स्त्री। कोशयामलप्रसिद्धे ऋद्धिर्वृद्धीति च गौड़प्रसिद्धे खनामख्यातलतोकन्दे। तदुक्तं "ऋद्धिर्वृद्धिश्च द्वौ कन्दौ भवतः कोशयामले। श्वेतरोमान्वितः कन्दो लताजातः सरम्भकः। तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा। प्रयोगेष्वनयोरिकं यथालाभं प्रयोजयेत्॥ रा.नि.व. ५। तत्पर्य्यायः,—योग्यं सिद्धिः लक्ष्मी(अ), प्राणप्रदा वृद्धा (र.), प्राणदा जीवदात्री सिद्धा योग्या चेतनीया रथाङ्गी मङ्गल्या लोककान्ता जीवश्रेष्ठा यशस्या। गुणाः—वृद्धिगुणतुल्या बल्या चित्तोपपत्ती शुक्रला मधुरा गुरुः बलैश्वर्य्यकरी मूर्च्छारक्तपित्तहरी च। भा. पू. १भ.। महाश्रावण्यां। वा. सू. १५ अ. पद्मकादौ अरुणः। "पद्मकपुण्ड्रावृद्धितुगर्द्धाः। एतदभावे वाराही वीज्या।"

ऋद्धिजा। स्त्री। सर्पगन्धायां। गन्धराजायां। प. मु.। अस्याः कन्दीयाद्यः। भा. म. १भ.।

ऋभुक्षः। पुं। वज्रे। स्वर्गे। राजनि.।

ऋश्यः (श्यः)। मृगे। रुरुमृगे। "ऋश्यो नीलाङ्को लोके स रोरु इति कीर्त्तितः।" भा म १भ.। तन्मांसगुणाः—कषायं मधुरं वातघ्नं पित्तघ्नं हृद्यं तीक्ष्णं वस्तिशोधनञ्च। सु. सू. ४६ अ.।

ऋषभः। पुं। ऋषभके। कर्णरन्ध्रे। कुम्भीरपुच्छे। मे.। सु. चि. १७अ. बल्लीवर्द्दे। वृष। मांसगुणाः—अतिगुरु स्निग्धं पित्तश्लेष्मवर्द्धनं दृंहणं वातघ्नं बल्यं पौनसन्नञ्च। भा. पू. १भ.।

ऋषभकः। पुं। One of the eight medicaments, carpopogon pruriens. खनामख्यातौषधे। ऋषभ इति गौड़े काश्मीरे च प्रसिद्धः। ऋषभक। तत्पर्य्यायः,—वृषः ऋषभः वीरः (र.), पृथिवीपतिः (मे.)। गोपतिः धीरः विषाणी दुर्द्धरः ककुद्मान् पुङ्गवः वोढ़ा श्रृङ्गी वृषभः धूर्य्यः भूपतिः कासी रुचप्रियः उक्षा लाङ्गली गौः वन्धुरः वन्धूरः गोरक्षः वनवासी। जीवकर्षभकयोरुत्पत्तिमाह भिषग्भावः—"जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ। रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ। जीवकः कूर्चकाकारः ऋषभो वृषशृङ्गवत्॥" गुणाः—जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ। एतदभावे विदारीमूलं प्रयोज्यम्। भा. पू. १ भ। मधुरः शीतः पित्तरक्तविरेकनुत्। शुक्रश्लेष्मकरो दाहक्षयज्वरहरश्च सः। रा. नि. व. ५। "ऋषभको वृषभकः।" सु. चि. ८अ.।

ऋषभी। स्त्री। कपिकच्छुलतायाम्। आलाकुशी। र. मा.। नराकारयोषिति। शिरालायाम्। विधवायाम्। मे. भविक्षं।

ऋषिः। पुं। गीरचनायां। वै. निघ.।

ऋषिकम्। क्ली। लताविशेषे। सियाड़िलता। प. मु.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषिकुल्या । स्त्री । नद्यां । हे. ।

ऋषिजाङ्गलकः (ला) (लिका, की) । स्त्री । ऋक्षगन्धायाम् । सर्पगन्धा । रत्ना. ।

ऋषिपुत्रकः । पुं । दमनकवृक्षे । वै. निघ. ।

ऋषिप्रोक्ता । स्त्री । माषपर्णीलतायां । प. मु. ।

ऋषिश्रेष्ठः । पुं । पुष्करीकवृक्षे । ऋद्धौ ।

ऋषिश्रेष्ठा । स्त्री । ऋद्धौ । वृद्धौ । वै. निघ. ।

ऋषिसृष्टा । स्त्री । ऋद्धौ । मद. व. १ ।

ऋषीकः । पुं । काशतृणे । मद. व. १ ।

ऋष्यः । पुं । हरिणे । श्वेतकृष्णे । गवयमृगे । नीलहरिणे । एतन्मांसं कफघ्नं पित्तघ्नं किञ्चिद्वातवर्द्धकं लघु बल्यञ्च । भा. पू. १भ. ।

ऋष्यगता । स्त्री । माषपर्ण्यां । मांसाणी । श. र. ।

ऋष्यगन्धा (न्धिका) । स्त्री । ऋषिजाङ्गलायां । र. मा. । तत्पर्य्यायः—ऋक्षगन्धा ऋषिजाङ्गलिकी वृद्धदारकः । अतिबलायाम् । क्षीरविदार्य्यां । श. र. । श्वेतशर्करकन्दे, रक्तशर्करकन्दे । वै. निघ. ।

ऋष्यजिह्व(क)म् । क्ली । महाकुष्ठभेदे । तस्य लक्षणम्—"ऋष्यजिह्वा-प्रकाशखरत्वानि ऋष्यजिह्वानि ।" सु. नि. ५अ. ।

ऋष्यपुष्पी । स्त्री । अतिबलायाम् । वै. निघ. ।

ऋष्यप्रोक्ता । स्त्री । श्वेतवाराहीकन्दे । प. मु. । शतमूल्याम् । महाशतावर्य्याम् । महाबलायाम् । कपिकच्छुलतायाम् । भा. पू. १भ. गु. व. । पीतवाराहीकन्दे । रत्ना. । माषपर्ण्याम् । च. सू. ४अ. । "ऋष्यप्रोक्ताशतावर्य्यतिबलाशुक्लशिम्बिषु ।" मे. तच्चतुष्कं ।

ऋष्याह्वा । स्त्री । नागबलायाम् । बलायाम् । वेड़ेला । वै. निघ. ।

ऋक्षः । पुं । भल्लूके । रा. नि. व. १९ । तन्मांसगुणाः—स्निग्धं गुरु वृष्यं स्वादु उष्णं वातघ्नम् । मद. व. १२ । हरिणे । हला. । क्षतवेधने । क्षौमलता । मे. षष्टिकं । श्योनाकवृक्षे । रा. नि. व. ९ ।

ऋक्षगन्धा । स्त्री । वृद्धदारकवृक्षे । वीजताड़क । ऋषिजाङ्गलायां । र. मा. च. सू. ४अ. वृंहणे । श्वेतभूमिकुष्माण्डे । वै. निघ. ।

ऋक्षगन्धिका । स्त्री । कृष्णभूमिकुष्माण्डे । वृद्धदारकलतायां । वै. निघ. ।

ऋक्षप्रियः । पुं । ऋषभकवृक्षे । रा. नि. व. ५ ।

ऋक्षमुखयन्त्रम् । क्ली । सन्दंशतुल्ये यन्त्रविशेषे । अवि. ।

ऋक्षरं । क्ली । वारिधारायाम् । मे. ।

ऋक्षविट् । स्त्री । तैलपायिविष्ठायाम् । आर्शोधारे नादि । वै. निघ. २भ. अर्शःचि. कृष्णशिरीषलेपे ।

ऋक्षार्हा । स्त्री । महामेदालतावृक्षे । रा. नि. व. ५ ।

ऋक्षेपः । पुं । चन्द्रे । हे. ।

ए

एककन्दः । पुं । पानीयालुके । पाषाणारु इति प्रसिद्धे कन्दशाके । शोलाकचू । प. मु. ।

एककुष्ठम् । क्ली । क्षुद्र कुष्ठभेदे । लक्षणम्—अस्वेदनं महाश्वास्तु यन्मत्स्यशकलोपमं । तदेककुष्ठम् । मा. नि. । एककुष्ठं चर्म्मदलमिति केचित । कृष्णारुणं यैन भवेच्छरीरं । तदेककुष्ठं प्रवदन्त्यसाध्यम् । सु. नि. ५अ. ।

एकचरः । पुं । गण्डके । गण्डार । त्रिका. ।

एकदृक् (ष्टिः) । पुं । काके । हला. । त्रि । काणे । काणा । हे. च. ।

एकपत्रः (कः) । पुं । चण्डालकन्दविशेषे । रा. नि. व. ७ । श्वेततुलस्यां । र. मा. ।

एकपत्रा (त्रिका) । स्त्री । सुगन्धशठ्याम् । गन्धशठी । मालवे पलाश इति ख्याते गन्धपत्रवृक्षे । रा. नि. व. ६ । पाण्डुरतुलसीवृक्षे ।

एकपत्री । स्त्री । नागवल्लीलतायाम् । वै. निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकभक्तव्रतं। क्ली। रात्रिभोजनाभाव-विशिष्ट-दिवाभोजने। "दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत्। एकभक्तमितिप्रोक्तं रात्रौ तन्न कदाचन।" स्कन्द पु.।

एकमूलः। पुं। पुण्डरीकवृक्षे। पुण्डरिया।

एकमूला। स्त्री। शालपर्ण्याम्। अतस्याम्। मशिना। संग्रहः।

एकरजः। पुं। भृङ्गराजवृक्षे। भीमराज; भेङ्गराज। जटा.।

एकरन्ध्रः। पुं। नदीवटे। वै. निघ.।

एकवर्णी। स्त्री। वाद्यभेदे। तत्पर्य्यायः—करताली। कङ्कमाला कलङ्कषा। शब्दर.।

एकवर्षीया। स्त्री। एकहायन्यां गवि। एक बछरेर बाछुर। हे. च.।

एकवाद्यः। पुं। डिण्डिम-वाद्ये। शब्दर.।

एकविंशतिगुग्गुलुः। पुं। कुष्ठरोगे। च. द. कुष्ठ-चि.। चित्रकं चिफलां व्योषमजाजीं कारवीं वचाम्। सैन्धवातिविषे कुष्ठं चव्यैलायावशूकजम्। विड़ङ्गान्यजमोदाञ्च सुखान्यमरदारु च। यावन्त्येतानि चूर्णानि तावन्मात्रान्तु गुग्गुलुं। सङ्गृह्य सर्पिषा सार्द्धं गुड़िकां कारयेद्भिषक्। प्रातर्भोजनकाले च भक्षयेत्तु यथाबलम्.....। चितामूल, त्रिफला, त्रिकटु, जीरे, कृष्णजीरे, वच, सैन्धव, आतईच, कुड़, चई, एलाईच, यवक्षार, विड़ङ्ग, यमानी, मुता, देवदारु प्रत्येक समभाग। सर्व्वचूर्णसमान गुग्गुल घृतेर सहित मर्द्दन पूर्व्वक गुड़िका करिबे।

एकवीरः। पुं। स्वनामख्यातवृक्षविशेषे। एकवीर। गंडुविकेक। तत्पर्य्यायः,—महावीरः सक्तवीरः सुवीरकः। गुणाः—कटुकः तीव्रवातघ्नः उष्णः गृध्रसीकटिशूलाभिघातघ्नः। रा. नि. व. ८।

एकवीरा। स्त्री। वन्ध्याकर्कोट्याम्। गुणाः—"एकवीरा स्मृता तिक्ता चात्युष्णा वातहा स्मृता। पक्षाघातं पृष्ठकटीशूलञ्चैव विनाशयेत्॥" वै. निघ.।

एकवृन्दः। पुं। तन्नामककण्टकारीगविशेषे। येन दुष्टकफशीर्षिताभ्यां कण्ठे दाहकण्डूमदीषत्पाकीषच्च मृदुरुन्नती वृत्तश्च शोथो जायते। लक्षणं—"वृत्तोन्नतो यः श्वयथुः सदाहः कण्डून्वितोऽपाक्यमृदुर्गुरुश्च। नाम्नैकवृन्दः परिकल्पितोऽसौ व्याधिर्बलासक्षतजप्रसूतः॥" सु. नि. १६अ.। मा. नि.।

एकवृक्षः। पुं। गलरोगे। वै. निघ.। स्थानभेदे। चतुःक्रोशान्तरे—यत्र वृक्षान्तरं नेक्ष्यते।

एकशफः। पुं। घोटके। त्रिका.। एकखुरजन्तुमात्रे। यथा—"खरोऽश्वोश्वतरी गौरः शरभश्चमरी तथा। एते चैकशफाः ख्याताः।" भा.।

एकशफक्षीरम्। क्ली। अविभागखुरपशुदुग्धे। खूरयोड़ा पशुमात्रेर दुध। गुणाः—उष्णं लेकशफं लघु शाखावातहरं साम्लमीषल्लवणं जड़ताकरमिति। वा. टी. हेमा.। "बल्यमेकशफं पयः" इति चरकः।

एकशिखा। स्त्री। पाठायाम्। आकनादि। प. मु.।

एकशृङ्गः। पुं। गण्डके। गण्डार। वै. निघ.।

एकसूत्रः। पुं। डमरु-वाद्ये। शब्दर.।

एकहस्ती। स्त्री। अश्वस्य शोभनवल्गाभेदे। "द्विहस्ती चैकहस्ती च शुभगा शोभना मता।" ज. द. ७अ.।

एकहायनी। स्त्री। एकवर्षीयायां गवि। अम.।

एकाङ्गम्। क्ली। चन्दने। हारा.।

एकाङ्गवातः। पुं। पक्षवधरोगे। पक्षाघात। मा. नि.। See पक्षवधः। अश्वस्य वातव्याधिरोगविशेषे। "एकः प्रलम्बते कर्णः शरीरार्द्धञ्च शुष्यति। शूनो भवति चाश्वस्य रोगे एकाङ्गसंज्ञके॥" ज. द. ५५ अ.।

एकाङ्गी। स्त्री। सुरामांस्यां। मुरामांसी नामक गन्धद्रव्यविशेष। गुणाः—तिक्ता हिमा स्वादी लघुः वातपित्तघ्नी ज्वरभूतरक्तरचोघ्नी कुष्ठकासघ्नी च। भा. पू. १भ.। कटुः कषाया भ्रममूर्च्छातृष्णाविषदाहघ्नी च। रा. नि. व. १२।

एकाण्डः। पुं। तन्नामकदीर्घान्वितार्थे। "एकेन लम्बमानेन सुकर्णेनैकाण्डसंज्ञकः। ज. द. ३ अ.।

एकादशशतिकमहाप्रसारणीतैलम्। क्ली। वातव्याधौ। "शाखामूलदलैः प्रसारणितुलासिद्धैः क्षुरण्टीतुले, छिन्नायाश्च तुले तुले रुवुकती राखाशिरीषात्तुलां। देवाह्वाच्च सकेतकाद्दटशते निःक्वाथ्य कुम्भांशिके, तोये तैलघटं तुषाम्बुकलसौ दत्त्वाढ़कं मस्तुनः॥ शुक्ताच्छागरसादधेक्षुरसतः क्षीराच्च दत्त्वाढ़कं, पृक्काकर्कटजीवकाद्यविकषा काकोलिका-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कच्छुरा:। मूर्व्वेला-घनसारकुन्दुसरला-काश्मीर-मांसीनखै:, कालीयोत्पलपद्मकाह्वयनिशा-कक्कोलक-ग्रन्थिकै: ॥ चाम्पेयाभयचोचपूगकटुकाजातीफला-भीरुभि:, श्रीवासामरदारुचन्दनवचाशैलेयसिन्धू-द्भवै:। तैलाम्भोदकटम्बराङ्घ्रिनलिनाह्वथीरकचीरकै:, कस्तूरी-दशमूल-केतक-नत-श्यामाश्वगन्धाम्बुभि:। कौन्ती-तार्क्षजशल्लकीफल-सुवृश्चामा-शताह्वामयै:, भल्लात-विफलाज-केशर-महाश्यामा-लवङ्गान्वितै:। सर्व्वौषैस्त्रिपलैर्महीयसि पचेत्मन्देन पाचेऽग्निना ॥" तिलतैल ६४श. क्वाथार्थ समूलपत्रशाख गन्ध-भाद्दुलिया ३७॥०श. नीलझाँटी, गुलञ्च, एरण्ड-मूल प्रत्येक २५ श. रास्ना, शिरीषछाल, देवदारु, केयार मूल प्रत्येके ७।०श. जल ६४००श. शेष ६४श. काँजि ६४श दधिमण्ड १६श. शुक्त १६श. छागमांस ८श. जल ६४श. शेष १६ श. इक्षुरस १६ श. दुग्ध १६ श.। कल्कार्थ पिड़िंफल, काँकड़ाशृङ्गी, जीवनीय दशक वा अष्टवर्ग, काकोली, मञ्जिष्ठा, क्षीर-काकोली, आलाकुशीर मूल. छोट एलाइच, कर्पूर, कुन्दुरुखोटी, सरलकाष्ठ, कुङ्कुम, जटामांसी, नखी, कृष्णागुरु, नीलोत्पल, पद्म-काष्ठ, हरिद्रा, कक्कोल, गेँठेला, चाँपाकलि वा नागेश्वर, वेणार मूल, गुड़त्वक्, सुपारि, जायफल, लताकस्तुरी, शतमूली, लवणखोटी, देवदारु, श्वेतचन्दन, वच, शैलज, सैन्धव, शिलारस, मुता, गन्धभाद्दुलिमूल, पुनर्नवा, नालुका, गन्धशटी, मृगनाभि, दशमूल, मयना-फल, प्रियङ्गु, शाल, केया, तगरमूल, अश्व-गन्धा, बाला, रेणुका, रसाञ्जन, शिमुलमूल, कट्-फल, अगुरु, श्यामालता वा अनन्तमूल, कुड़, भेलार मूटी, त्रिफला, शुल्फा, पद्म, नागेश्वर, लवङ्ग, त्रिकटु प्रत्येक ३ पल। प्रयोग. भैष.। ध्यामेमिति पाठे गन्धतृणम्।

एकादशायस:। पुं। ब्रह्मवैद्यधिकारे। पाठ:—"मृताय: पुरुष: शुल्वं खगो दरदगन्धकौ। गगनं पुष्पराजञ्च शोणितेश्वरीरगौ। विडङ्गविफला-हिङ्गुयमानीजीरकद्वयं। सर्जीफलवचाशृङ्गी मरिचं पिप्पलीद्वयं। चवी दुरालभा वङ्गि: गुग्गुलीद्रावैर्विमर्द्दयेत्॥" पुरुष: रस:। खग: स्वर्णमाक्षिकम्। पुष्पराग: तन्नामकमणि: रसाञ्जनं वा। शोणितं कुङ्कुमं। ईश्वर: पित्तलं। रस. र. ब्रह्म-चि.। प्रयोगामृते तु शुल्वस्थाने गुड़:, गुग्गुलीद्रावैर्विमर्द्दयेदित्यत्र "भावयेदार्द्रकद्रवै:" इति पाठान्तरं। प्रयोगा-मृते पुरुष: गग्गुलु:। पुष्परागं रसाञ्जनं। शोणितं ताम्रं। ईश्वर: रस:। जारितलौहं पारद: गन्ध: ताम्रं स्वर्णमाक्षिकं अभ्रं हिङ्गुलं कुङ्कुमं पीखुराज-मणि: शीषं पित्तलं विड़ङ्गं विफला हिङ्गु यमानी जीरकं कृष्णजीरकं पियालफलं वचा कर्कटशृङ्गी मरिचं पिप्पली गजपिप्पली चवी दुरालभा चित्रकमूलं एषां प्रति समभाग:। आर्द्रकरसेन भाव्यं।

एकादशेन्द्रियम्। क्ली। श्रोत्रत्वक्चक्षूरसना-घ्राणवाक्पाणिपायूपस्थपादमना:सु। एषु प्रथमं पञ्चज्ञानेन्द्रियं, अन्यच्च कर्म्मेन्द्रियं। सु. शा. १अ.।

एकादिवीर:। पुं। एकवीरवृक्षे। वै. निघ.।

एकान्त:। पुं। यदवधारणीयते। यथा—"चिरद् विरेचयति मदनफलं वामयतीति।" सु. उ. ६५ अ.।

एकाष्ठी। स्त्री। कार्पास्यां। कार्पासबीजकोषे। वै. निघ.।

एकाष्ठीका। स्त्री। पाठायाम्। आकनादि, निमुका। वै. निघ.।

एकाष्ठील: (ला)। पुं, स्त्री। वकवृक्षे। अम.। हिज्जलीवील, सरी। भा. पू. १भ.। (ला) पाठायां। र. मा.। रा. नि. व. ६। वनतिक्तिकायाम्। मे. लचतुष्कं। पुष्पवृक्षभेदे। भा. पू. १भ.। See अगस्त्य:।

एकाह्वा। स्त्री। एकवर्षायां गवि। अम.।

एकाक्ष:। पुं। काके। वि। एकनेत्रे। काणा। शब्द. च.।

एकैषिकतैलम्। क्ली। तन्नामकतैले। गुणा:—हिमं पित्तघ्नं वातश्लेष्मकृच्च। मद.।

एकैषि(कोशि)का। स्त्री। वकपुष्पवृक्षे। पाठायाम्। आकनादि। विड़ताया। "एकै-शिकाजशृङ्गी च"। सु. सू. ३६ अ. चि. १७, १८अ.। तत्तैलं मधुरम् अतिशीतं पित्तहरं वात-कोपनं श्लेष्मवर्द्धनञ्च। सु. सू. ४५ अ.।

एकैषी। स्त्री। पाठायां। आकनादि। मं पहाड़-मूल। वै. निघ.।

एकोशि(षि)का। स्त्री। पाठायाम्। आक-नादि। र. मा.। वकवृक्षे इति केचित्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एड: । त्रि । बधिरे । काला । अम. ।

एडक: (काय्य:) । पुं । पृथुशृङ्गमेषे । भेड़ा । प. सु. । वनच्छगले । त्रिका. । "एडक: पृथुशृङ्ग: स्यान्मेद:-पुच्छस्तु दुम्बक:। एडकस्य पलं ज्ञेयं मेषामिष-मं गुणै:। मेद:पुच्छीद्भवं मांसं हृद्यं वृष्यं श्रमापहम्। पित्तश्लेष्मकरं किञ्चिद्वात-व्याधिविनाशनम्। भा. पू. १भ. मांसव. । तृण-विशेषे । होगला । सु. चि. ७अ. । मञ्जिष्ठायां च. ।

एड़कघृतम् । क्ली । एडकनवनीतोत्पन्ने । गुणा:—अतिगुरुत्वाद्दर्ज्ये सुकुमाराणाम्, बुद्धिपाटव-करं बलकरञ्च । रा. नि. व. १५ ।

एड़का । स्त्री । मेष्यां । भेड़ी । अ. टी. रा. ।

एड़गज: (जा) । पुं, स्त्री । चक्रमर्दवृक्षे । चाकन्दा गाछ, चाटीकाटा इति च भाषा । रा. नि. व. ५ । भा. पू. १भ. सीमराजतैले । च. सू. ३ अ. । वन्यैलायां । वन एलाच । च. द. कुष्ठ-चि. ।

एड़मूक: । त्रि । बधिरे । वाक्श्रुतिवर्ज्जिते । काला बोबा । मे. कचतुष्कं ।

एड़हस्ती । पुं । चक्रमर्दे । चाकन्दा गाछ ।

एड़क: । त्रि । बधिरे । मे. ।

एण: । पुं । हरिणे । रा. नि. व. १९ । कृष्णमृग-विशेषे । कृष्णसार हरिण । हिं करीसाङ्गलहरिण । अयं जङ्गालजातीय: । अस्य मांसगुणा:—कषायं मधुरं हृद्यं रक्तपित्तकफवातघ्नं रुचिकरं धारकं बल्यं । सु. सू. ४६ अ. । भा. पू. १भ. । विशेषतो ज्वरे प्रशस्तमिति चक्रपाणि: । लघु शीतलं वृष्यं विदोषहरं षड्रसजं रुच्यञ्च । रा. नि. व. १७ । "शृङ्गिनां हरिण: श्रेष्ठ: बल्यो रोचनदीपन: । विदोषघ्नो लघु: पाके मधुरो ज्वरिणां हित: ॥ चते चयार्शसी: पाण्डावरोचकनिपीड़िते । कासश्वासा-तुराणाञ्च एणमांसं सुखावहम् ॥" अत्रि. २० अ. ।

एणक: । पुं । हरिणे । श. र. । कृष्णसारे ।

एणीदाह: । पुं । सन्निपातज्वरविशेषे । लक्षणं —"परिधावतीव गात्रे रुक्पात्रे भुजङ्गपतङ्ग-हरिणगय: । वेपथुमत: सदाहस्यैणीदाहज्वरार्त्तस्य ।" भा. म. १भ. । रुक्पात्रे पौड़ाभाजने, गात्रस्य विशेषणमेतत् ।

एणीपद: । पुं । मण्डलिसर्पे । सु. कल्प. ४अ. । See सर्प: ।

एणीपदी । स्त्री । असाध्यलूताभेदे । सु. कल्प. ८अ. । See लूता ।

एत: । पुं । हरिणे । श. र. । घोटके ।

एतन: । पुं । निश्वासे । हे. च. ।

एतश: । पुं । घोटके ।

कटभिः (भी)। स्त्री। कण्टकशिरीषे। काँटाशिरीष। रत्ना. लताशिरीषे। श्वेत अपराजिता। प. मु.। लघुज्योतिष्मतीलतायाम्। लताफट्‌की। रा. नि. व. ३, २३। वै. निघ. २भ. उन्मा. चि. निशादिघृते। सुषल्यां। तालमूली। रा. नि. व. २३। अपराजितायाम्। अप. चि. स्मृतिसागररसे। किणिहीत्यपरनामधेयवृक्षविशेषे। सा द्विविधा कृष्णश्वेतभेदेन। तयोः श्वेता पुनः महाह्रस्वभेदेन द्विविधा। कृष्णाया गुणाः— कटभी गुल्मघ्नी विषाध्मानशूलघ्नी वातकफाजीर्णहरी च। श्वेता तत अधिकगुणयुक्ता। रा. नि. व. ९। "कटभी कटुका चोष्णा तुवरा तिक्तका मता। नाड़ीव्रणं रक्तदुष्टं प्रमेहञ्च विषं क्रमीन्। श्वेतकुष्ठं कफञ्चैव त्रिदोषञ्च व्रणन्तथा। शिरोरोगमजीर्णञ्च नाशयेदिति कीर्त्तिता। फलञ्चास्या धातुवर्द्धिकरं कफवर्द्धकञ्च। "निर्य्यासोऽस्या गुरुर्ब्रष्यो बल्यो वातविनाशनः।" इति महाश्वेतकटभी-तत्फलनिर्य्यासगुणाः। "क्षुद्रा च कटभी चोष्णा कटुका कुष्ठहा मता। कफहा रक्तदोषघ्नी मेदोरोगहरा परा। नाड़ीव्रणं विषं मेहं क्रमीन्श्चैव विनाशयेत्। कटभीवत्फलगुणा ज्ञेयाः...।" ह्रस्वकटभीगुणाः। वै. निघ.।

कटभीवल्क्। स्त्री। कटभीवल्कले। च. द. उन्मा. चि.।

कटमालिनी। स्त्री। मदिरायाम्। शब्द. च.।

कटम्ब(भ)रा (टुम्भरा)। स्त्री। कटुक्यां। कर्कटी। मे.। र. मा. भा. पू. १भ. गु. व.। कटभी भट्टाली च। सि. यो. उन्मा. चि. श्रीकण्ठः। "कटम्भरा हस्तिकाली।" गन्धप्रसारण्यां। गन्धभाद्दलि। दन्तीवृक्षे। गोधायां। बध्नां। हारा.। श्योणाकवृक्षे। भा. पू. १भ. अने.। करिण्याम्। कलम्बिकायां। मूर्व्वायां। पुनर्णवायां। मे. रत्नत्रयं। राजबलायां। अम.। महाबलायाम्। रा. नि. व. ४।

कटम्भरः। पुं। श्योणाकवृक्षे। रा. नि. व. ९। कटभीवृक्षे। वै. निघ.।

कटशर्करा। स्त्री। गाङ्गेष्टीलतायाम्। नटी। इति गौड़े। हारा.। औषधिविशेषे।

कटसारिका। स्त्री। झिण्टीसामान्ये। झाँटि। हिं कटशरैया। भा. पू. १भ.।

कटाकुः। पुं। पक्षिविशेषे। उणा.।

कटायणम्। क्लो। वीरणे। वेणा। शब्द. च.।

कटाहः। पुं। कूर्म्मकपरे। मे. हाविकं। जायमानविषाणाग्रभागे महिषशिशौ। हारा.। तैलपाकपात्रे। कड़ा। शब्द. च.। सूपे। विका.।

कटाहकः। पुं। मातुलुङ्गादेरभ्यन्तरस्थात्मवल्कले। आँति। अचि. सू. १७ अ.।

कटाह्वयम्। क्लो। पद्मकन्दे। पद्मेर गेँड़ो। रा. नि. व. १०।

कटाक्षः। अपाङ्गदृष्टौ। अम. अश्वस्य शङ्खकर्णयोरन्तरभागे। ज. द. २अ.।

कटिः। पुं, स्त्री। श्रोण्याम्। कौंकान। रा. नि. व. १८। तत्पर्य्यायः,—श्रोणिफलकं श्रोणी ककुद्मती कटः (अ), कटी श्रोणिः श्रोणिफलं (अ. टी.), फलवं कटीरं काञ्चीपदं (हे), करभः (ज.)।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कटितटम् । क्ली । नितम्बे ।

कटित्रम् । क्ली । रसनायाम् । मे रविकं । कटीवस्त्रे । क्षुद्रघण्टिकायां । घुँघुर । के. ।

कटिदेशः । पुं । कट्याम् । काँकाल ।

कटि(टी)प्रोथः । पुं । स्फिचि । रा. नि. व. १८ । कटिदेशस्थमांसपिण्डे । पाछार पेलो । अम. ।

कटिरोहकः । पुं । ः रिपक्षाङ्गागारोहके । शु. मा. ।

कटिल्लम् । क्ली । कारवेल्लफले । भा. पू. १भ. ।

कटिल्लकः । पुं । कारवेल्लके । करला । प. मु. । रक्तपुननवायाम् । मे. कचतुष्कं ।

कटिशीर्षकः । पुं । कटिदेशे । काँकाल । हला. ।

कटिशूलः । पुं । कटिदेशस्थे शूलरोगे । कुम्री इति भाषा ।

कटिशृङ्खला । स्त्री । कटिकिङ्किण्याम् । कोमरेर घुँघुर । हारा. ।

कटिसूत्रम् । क्ली । कटिभूषणविशेषे ।

कटि (इन्) । पुं । हस्तिनि । खदिरवृक्षे । रा. नि. व. ८ । स्त्री । श्रीगिफलके । काँकाल । अम. । पिप्पल्याम् । मे. टङ्किकं । स्फिक्प्रदेशे । रत्ना. ।

कटीकतरुणम् । क्ली । नितम्बगर्त्तसन्धिसमीपे । तत्स्थानं पृष्ठदण्डोभयतः जघनपार्श्वबहिर्भागे ईषन्नीचैः । पृष्ठवंशोभयतः प्रतिश्रोणीकाण्डं अस्थिनी । अम. । सु. शा. ६अ. ।

कटीकपालम् । क्ली । कटीफलके । विज. र. ।

कटीग्रहः । पुं । कटीगतवातरोगे । कोमरेर वात । लक्षणं—"वायुः कट्यान्रितः स्तब्धः सामी वा जनयेद्रुजम् । कटिग्रहः स एवोक्तः पङ्गुः सक्थ्नोर्द्वयोर्वधात् ॥" भा. म. १भ. ।

कटीरः । पुं, क्ली । जघनस्थले । जटा. । कटिदेशे । काँकाल । हे. च. । कटिपार्श्वे । अ. टी. ।

कटीरकः । नितम्बस्थले । रा. नि. व. १८ ।

कटुः । स्त्री । लतायाम् । राजिकायाम् । मे. टङ्किकं । कटुक्याम् । कटकी । रा. नि. व. ६ । कटुवल्ल्यां । लताविशेष । रा. नि. व. ३ । प्रियङ्गुवृक्षे । हे. च. । कटुपटोले । त्रिष्पलता । वै. निघ. २भ. उन्मा चि. । चम्पकवृक्षे । अर्कवृक्षे । शु. च. । जलजतृणविशेषे । कुवकविषे । छातारिविष । शु. र. । कुटजतरौ । राजसर्षपे । हारा. । चीनकर्पूरे । रा. नि. व. १२ । वायुग्निगुणभूयिष्ठे षड्रसान्यतमरसे । झालरस । मे तिखट् । म मरिचादौ व्यक्तः । रा. नि. व. २० । तस्य लक्षणं —"यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुकः ।" सु. सू. ४२ अ. । अपिच "संवेदयेद्यो रसनां निपातं तदतीव च । विदहन्मुखनासाक्षि संस्रावः स कटुः स्मृतः ॥" चर. । गुणाः—उष्णलघुरूक्षः मुखशोधनः घ्राणाक्षिविरेचनः कृमिहरश्च । तद्विपाकोऽपि कटुः । तद्विपाकगुणाश्च वातला कफ-पित्तघ्ना वायुग्निगुणभूयिष्ठाश्च । सु. सू. ४२ अ. । कफकण्ठदोष-शोफ-मन्दानिल-स्थिरोगघ्नः । अतिसेवितश्चेत् क्षयवीर्यबलक्षयञ्च करोति । रा. नि. व. २० । कटुरुष्णश्च तीक्ष्णश्च विशदो वातपित्तकृत् । श्लेष्मकृमिघ्नाग्नेयः कृमिकण्डूविषापहः । रुक्षस्तन्यहरश्चापि मेदःस्थौल्यापकर्षणः । अग्र्यो नासिकास्याक्षिजिह्वायोर्द्दीपनो रुच्यः नासिकाशीर्षणी भृशम् । क्लेदमेदोवसामज्जशुक्रन्यूनीपशीर्षण इति मतान्तरम् । सीदतियुक्तो भ्रान्तिदाहसुखतालुोष्ठशीर्षकृत्... ॥" भा. म. १भ. । वि । कटुनि, तिक्तरसे । रत्ना. । मुगन्धे । मे. । दुर्गन्धे । तीक्ष्णे । अ. टी. स्वा. ।

कटुकः । पुं । तन्त्रामकरसपाके । सु. सू. ४० अ. । कटुरसे । कटुपटोले । वै. निघ. २भ. ज्व. चि. कटुफलादौ । सुगन्धतृणे । शु. र. । कुटजवृक्षे । अर्कवृक्षे । शु. च. । आर्द्रके । राजसर्षपे । हारा. । लशुने । मे. । क्ली । विकटौ । मे. कविकं । मरिचे । रा. नि. व. ६ । भा. म. १भ कण्ठकुब्ज. स. ज्व. चि. । "कटुकट्फलाम्भोधरैः ।" कटुक्यां । च. द. कफज्व. चि. । "कटुकं चित्रकं निम्बम् ।"

कटुकण्टकः । शाल्मलीवृक्षे । रा. नि. व. ८ ।

कटुकत्रयम् । क्ली । विकटौ । च. द. ज्व. चि. कवलधारणे । "सैन्धवं कटुकत्रयम् ।"

कटुकन्दः । पुं । शिग्रुवृक्षे । सजिना गाछ । आर्द्रके । आदा । लशुने । मे. दचतुष्कं । क्ली । मूलके । मूला । प. मु. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कटुकन्दरी। स्त्री। गोविन्दीति कोङ्कणे प्रसिद्धा। प्रा॰ वाघेंची। गुणाः—"कटुकन्दरिका चोष्णा तिक्ता वातकफापहा। विसर्प्यादीन्नाशयति।" वै. निघ.।

कटुकफलम्। क्ली। कक्कोलके। कक्कोल। रा. नि. व. १२। वै. निघ. २भ. वा. व्या.। महारास्नादौ।

कटुकरसः। पुं। षड्रसान्यतमरसविशेषः। झालरस। See कटुः।

कटुकरोहिणी। स्त्री। कटुक्याम्। कटुकी। वा. चि. १अ.। पटोलादौ। "पत्रं कटुकरोहिणी।" च.द.ज्व.चि. सुस्नाद्यगणे। "बलाकटुकरोहिणी।"

कटुकवर्गः। पुं। कटुकद्रव्यसमूहः। यथा—शिग्रुमधुशिग्रुमूलकलशुनसुमुखसितशिफकुष्ठदेवदारुहरेणुकावल्गुजफल-चण्डागुरुगुग्गुल-मुस्तलाङ्गलिकायुकनासापीलुप्रभृतीनि पिप्पल्यादिगणः सालसारादिगणः सुरसादिगणश्चेति। सजिना, रक्तसजिनी, मूला, रशुन. श्वेततुलसी, मोरी, कुड़, देवदारु, रेणुक, सोमराजीबीज, शङ्खपुष्पी, गुग्गुल, मुता विषलाङ्गुलिया, श्योणापात एवं पीलू प्रभृतिः पिप्पल्यादि (पिपुल, पिप्पुलमूल, चई, चित्रकमूल, शुँठ, मरिच, गजपिप्पली, रेणुक, एला, यमानी, इन्द्रयव, आकनादि, जीरक, सर्षप, घोड़ानिम्, मदनफल, हिङ्गु, वामुनहाटी, मूर्व्वामूल, आतइच, वच, विड़ङ्ग एवं कटुकी), सुरसादि (तुलसी, श्वेत तुलसी गन्धपलाश, बाबुई तुलसी, गन्धतृण, महागन्धतृण, राईसरिषा, वनबाबुई, कासमर्द्द, हेँचेता, वनतुलसी, विड़ङ्ग, कटफल, श्वेतनिशिन्दा, नीलनिशिन्दा, कुकुरशोँका, इन्दुरकाणी पाना, वामुनहाटी, केउयाठुँटी, गुड़काँउली, घोड़ानिम्) ओ शालसारादिगणके (शाल, पियाशाल, खदिर, श्वेतखदिर, विटखदिर, शुपारि, भूर्जपत्र, मेषशृङ्गी, तिन्दुक, चन्दन, रक्तचन्दन, शिशु, शिरीष, वक, धव, अर्জ্জুन, ताल, शेशुन, करञ्ज, नाटाकरञ्ज, कृष्णागुरु, अगुरु, लताशाल) कटुवर्ग कहे। सु. सू. ४२ अ.।

कटुकवल्ली। स्त्री। कटुनामलतावि॰शेषः। कटुकी। तेँ रेसट्टु। गुणाः—कटुः शीता कफश्वासघ्नी नानाज्वरहरा रुच्या राजयक्ष्मघ्नी। रा. नि. व. ३।

कटुकशर्करा। स्त्री। पित्तश्लेष्मज्वरे कटुरोहिणी शर्करायोगे। अत्र प्रत्येकं तोलकमितं। वैद्यप्रसारके क. टी.। चक्रस्तु कटुरोहिण्या १२ मा सितायाश्च ४ मा.।

कटुकस्नेहः। पुं। सर्षपतैले। वै. निघ.।

कटुका(की)। स्त्री। (Picrorrhiza kurroa.) कटुक्याम्। कटुकी। हिं कुट्की। तेँ नल्लकीलकर। केदारकटुकीति दाक्षिणात्ये प्रसिद्धा। रा. नि. व. ६। तत्पर्य्यायः,—जननी तिक्ता रोहिणी तिक्तरोहिणी चक्राङ्गी मत्स्यपित्ता नकुला शकुलादनी सादनी शतपर्व्वा द्विजाङ्गी मलभेदिनी अशोकरोहिणी कृष्णा कृष्णभेदा कृष्णभेदी महौषधी कटी अञ्जनी काण्डरुहा कटुः कटुरोहिणी केदारकटुका अरिष्टा पामघ्नी (रा), धन्वन्तरिण्या वान्तिदा (श), कटम्बरा कटुम्भरा अशोका (अ), काण्डरुहा तिक्त-रोहिणिका (र), तिक्तिका। द्रव्याभि.। "कटुकामुष्णवारिणा।" च. द. पित्तश्लेष्मज्व. चि.। "सितां कटुकया युक्तां पीत्वा चोष्णेन वारिणा।" आयुर्व्वेदसारे। गुणाः—सारकरुचकफघ्नी। राज.। तिक्तातिकटुः शीता पित्तरक्तदाहबलासारोचकघ्नी च। वा.। श्वासज्वरभेदनी (अर्थात्) बहुमबहुं वा मलपिण्डितं मलादिकं भित्त्वाधः पातयति। चक्र. द.। कटुः तिक्ता रुच्या शीता लघुः भेदका दीपनी हृदयग्राही कफपित्तज्वरप्रमेहश्वासकासरक्तदाहकुष्ठकृमिघ्नी च। भा. पू. १भ. हृ. व.। कटुतुम्ब्याम्। तिएलाउ। क्षुद्रक्षुक्षुपे। रा. नि. व. ३४। पीतरोहिण्यां। नेत्रपाषाण इति लोके। रत्ना.। लताकस्तूर्य्याम्। च. द. वा. व्या. चि.।

कटुकाख्या। स्त्री। कटुक्याम्। सु।

कटुकाद्यलौहम्। क्ली। शीथाधिकारे। पाठः—"कटुकं चूर्णं दन्ती त्रिवृङ्गं त्रिफला तथा। चित्रकौ देवदारुश्च त्रिवृद्दारणपिप्पली॥ चूर्णान्येतानि तुल्यानि द्विगुणं स्यादयोरजः। क्षौद्रेण तुल्यमेतच्च श्रेष्ठं श्वयथुनाशनं॥ भैष. रस.शीथ.चि.। त्रिकटु, कटुकी, दन्तीमूल, विड़ङ्ग, त्रिफला,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिताके मूल देवदारु, तेउड़ीमूल, गजपिप्पुल, समुदाय समान भाग। सर्व्वद्विगुण लौहचूर्ण।

कटुकापाली। स्त्री। कण्टकपालीवृक्षे। काँटागुड़काँउली। रत्ना.। प. मु.।

कटुकारोहिणी। स्त्री। कटुकायां। रा. नि. व. ६। च. द. पित्त. ज्व. चि. सहीकादौ। "कटुकारोहिणी समा।"

कटुकालाबुः। पुं। तिक्ततुम्ब्याम्। तिएलाउ। र. मा.।

कटुको। स्त्री। कटुकायाम्।

कटुकीटः (कः)। पुं। मशके। मशा। जटा.।

कटुक्काणः। पुं। टिट्टिभे। तितिर पाखी। हे. च.।

कटुग्रन्थि। क्ली। पिप्पलीमूले। गुरुग्राम्। रा. नि. व. ६। लशुने। वै. निघ.।

कटुङ्कता। स्त्री। नित्यकर्म्मसमाचारनिष्ठुरत्वे। हारा.।

कटुचातुर्जातकम्। क्ली। समभागत्वगेलापत्रमरिचेषु। "एलात्वक्पत्रकैस्तुल्यैर्मरिचेन समन्वितैः। कटुपूर्व्वमिदञ्चातुर्जातकमुच्यते॥" रा. नि. व. २२।

कटुच्छदः। पुं। तगरवृक्षे। श. र.। सुगन्धार्जके। गन्धतुलसी। वै. निघ.।

कटुजीरकः। पुं। जीरके। रा. नि. व. ५।

कटुता (त्वम्)। स्त्री, (क्ली)। तीक्ष्णतायाम्। झाल। दौर्गन्ध्ये।

कटुतिक्तः (क्तः)। पुं। किराततिक्तके। चिरेता। भा. पू. १भ.। महाशणवृक्षे। बड़ शण। शणवृक्षे। रा. नि. व. ४।

कटुतिक्त(क्ति)का। स्त्री। महाशणे। प. मु.। कटुतुम्ब्याम्। तिएलाउ। श. र.।

कटुतिक्ता। स्त्री। कटुतुम्ब्यां। तिएलाउ। कटुतुण्ड्याम्। कटुतरुई वा तिएपलता। रा. नि. व. ३।

कटुतिन्दुकः। पुं.। कुचेलके। कुँचिला। श. च.।

कटुतुण्डिका (ण्डी)। स्त्री। तिक्ततुण्ड्यां। कटुतराई, तिएपलता, तेँत कुन्दुरुकी। मं कं कडुतीण्डली, कहितीड़े, तीतकुंदरु, वनटिंडुराकडुआ। गुणाः—कटुः तिक्ता कफवान्तिविषघ्नी अरोचकरक्तपित्तघ्नी रोचनी च। रा. नि. व. ३। विम्ब्याम्। तेलाकुचा।

कटुतुम्बि(म्बी)का। स्त्री। Wild variety of lagenaria vulgaris. तिक्तालाबूम्। तिएलाउ। हिं कडुतुमिया, तुम्बी, तीतलौकी। मं कं कडुभोपला, कडुदुधी, कहिसोरे। तें चेतिआनव। तत्पर्य्यायः,—फलिनी चरः पिण्डफला (ज), खम्बा (मे.), इक्ष्वाकुः (अ.), तिक्ततुम्बी कटुकालाबुः वृषात्मजा (र.) तिक्तका कटुतिक्तिका बृहत्फला राजपुत्री तिक्तबीजा तुम्बिका। गुणाः—पाण्डुकृमिकफवातनाशित्वं लघुपाकित्वञ्च। राज.। "कटुतुम्बी रसे पाके कटुर्हृद्या च शीतला। तिक्ता वान्तिकरी श्वास-कास-हृच्छीधनी मता। वातशीफव्रणविषशूलपित्तज्वरापहा। पर्णे पाके तु मधुरं सूक्ष्मशीधनमुत्तमम्। पित्तशान्तिकरं ज्ञेयं फले पर्णसमा गुणाः॥" वै. निघ.।

कटुतुम्बिनी। स्त्री। तिक्तालाबूां। रा. नि. व. ३।

कटुतैलम्। क्ली। सार्षपतैले। सरिषार तैल। हिं कड़ुवातेल। मं शिरशेल। गुणाः—कटु तिक्तं तथा ग्राहि उष्णं स्यात्कफवातनुत्। कृमिपाण्डुशीघनं स्यात्पित्तकृत्सार्षपं स्मृतम्। कर्णरोगे कृमिरोगे तथा वातामयेषु च। कण्डूकुष्ठामये चैव कफमेदोगुणेषु च। प्रशस्तं सार्षपञ्चैव रोगाणाञ्च विभावयेत्। वस्तिकर्म्मणि नो शस्तं पित्तदाहकरं महत्।" अग्नि. पू. १४ अ.। कटुणं तीक्ष्णं लघु कफशुक्रानिलहरं पित्तासृक्कीठकुष्ठार्शोव्रणजन्तुजिच्च। वा. टी. हेमा. तैलव.। "सार्षपं तिक्तकटूणं वातकफविकारघ्नम्। पित्तासृदोषदं कृमिकुष्ठघ्नं तिलजवच्च चक्षुष्यम्॥" रा. नि. व. १५।

कटुतैलमूर्च्छा। स्त्री। सर्षपतामतादिदोषनाशार्थमामतैलस्य पाकेन निष्फेनीकृतस्यावतार्य्य सजलहरिद्रादिवारिपेषेण शनैः शनैः शीतलीकरणे। तेन पाककाले स्फोट्यादयुपद्रवो न जायते। मूर्च्छाद्रव्याणि यथा—आमलकी हरिद्रा मुस्ता विल्वत्वक् दाड़िमत्वक् नागकेशरं कृष्णजीरकं बालकं नलुका विभीतकञ्च। "वयस्था रजनीमुस्तविल्वदाड़िमकेशरैः। कृष्णजीरकबालैर्वेरनलिकैः सविभीतकैः॥ एतैः समांशैः प्रस्थे च कर्षमात्रं प्रयोजयेत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरुणाद्विपलं तत्र तीयचाढ़कसम्मितम्। कटुतैलं पचेत्तेन आमदोषहरं परम्॥" भैष. ज्व. चि.। तैल ४श. पाक करिया निक्षेप हइले, नामाइया अग्रे सजलहरिद्रा ताहार पर सजलमञ्जिष्ठा तत्परे अन्यान्य द्रव्य क्रमे क्रमे प्रक्षेप द्वारा उष्ण तैलके शनैः शनैः शीतल करिबे। परे १६श. जले पाक करिबे। मञ्जिष्ठा २प. ও অন্যান্য দ্রব্য প্রত্যেক ২ তোলা দিবে।

कटुत्रय(त्रिक)म्। क्ली। त्रिकटुके। শুঁঠ, পিপুল, মরিচ। रा नि. व. २२। भा.।

कटुदला। स्त्री। कर्कटिकायाम्। কাঁকুড়। रा. नि. व. ७।

कटुदुग्धिका। स्त्री। तिक्तालाबूां। वै. निघ.।

कटुनिष्पावः। पुं। नदीनिष्पावधान्ये। श्र. च.।

कटुपत्रः (कः)। पुं। पर्पटे। ক্ষেৎপাপড়া। सितार्जके। श्वेतपत्र क्षुद्रतुलसी। रा. नि. व.५।

कटुपत्रिका (त्री)। स्त्री। लघुचुचुपे। कारीवृक्षे। रा. नि. व. ८।

कटुपर्णिका (र्णी)। स्त्री। क्षीरिण्यां। यन्मूलं चोक् इति उच्यते। "कटुपर्णी हैमवती हैमक्षीरी हिमावती। हैमाह्वा पीतदुग्धा च तन्मूलं चोकमुच्यते। गुणाः—हैमाह्वा रेचनी तिक्ता भेदिन्युत्क्लेशकारिणी। क्रमिकण्डूविषानाहकफपित्तास्रकुष्ठनुत्॥" भा. म. १भ.।

कटुफलः। पुं। पटोले। रा. नि. व. ३। कक्कोलवृक्षे। तिक्तकर्कटिकायाम्। कारवेल्लके। क्ली। इन्द्रयवे। वै. निघ. १भ. वा. व्या.।

कटुफला। स्त्री। श्रीवल्लीकण्टकवृक्षे। तिक्तालाबूाम्। रा. नि. व. ३। वृहत्यां। कण्टकार्य्याम्। चिचोटके।

कटुभङ्गः। पुं। शुण्ठ्याम्। चिका.।

कटुभद्रम्। क्ली। शुण्ठ्याम्। रा. नि. व. ६। आर्द्रके। भा. पू. १भ.।

कटुमञ्जरिकः (का)। पुं, स्त्री। शुक्लापामार्गे। শ্বেত আপাং। रा. नि. व. ४।

कटुमूलम्। क्ली। पिप्पलीमूले। रा. नि.व. ६।

कटुमोदम्। क्ली। गन्धराजे। খাটাশী। रा. नि. व. १२।

कटुम्भरा। स्त्री। प्रसारण्याम्। গন্ধভাদুলিয়া। च. द. वा. व्या. एकादशशतिकप्रसारणीतैले।

कटुरम्। क्ली। तक्रे। ঘোল। जटा.।

कटुरवः। पुं। भेके। रा नि. व. १९।

कटुरा। स्त्री। आर्द्रहरिद्रायां। কাঁচা হরিদ্রা।

कटुरुणा। स्त्री। विहतायां। रत्ना.।

कटुरोहिणी। स्त्री। कटुक्याम्। र. मा.। रा. नि. व. ६। वा. सू. १६ अ. पटोलादिः। च. द. पित्त. ज्व. चि. दुरालभादिः। "भूनिम्बवासाकटुरोहिणीनाम्।" च द. कफज्व. चि. सुस्तादिः। "त्रिफला कटुरोहिणी।" अष्टादशाङ्गकषाये। "पटोलं कटुरोहिणी।" च. द. ज्व. चि. शठ्यादिः।

कटुलता। स्त्री। कटुक्याम्। কট্‌কী। भैष.।

कटुवार्त्ताकी। स्त्री। तिक्तवार्त्ताक्यां। তেঁত বেগুন। श्वेतकृष्णकार्य्याम्। रा. नि. व. ४। (किनी)। क्षुद्रवृहत्याम्। वै. निघ.।

कटुवाष्पिका। स्त्री। महाराष्ट्राम्। प. सु.।

कटुविपाकः। पुं। द्रव्यस्य पाककटुत्वे। तदाश्रयश्च कटुतिक्तकषायरसद्रव्यमात्रम्। कटुविपाकं वस्तु खलु वातलं शुक्रघ्न कफपित्तघ्नञ्च। सु. सू. ४० अ.।

कटुवीजा। स्त्री। पिप्पल्यां। रा. नि. व. ६।

कटुवीरा। स्त्री। (Capcici.) Capcicum. कुमरिचे। লঙ্কামরিচ, গাছমরিচ, ঝাল গাছ। হিং লালমরিচ। गुणाः—"कटुवीराग्निजननी दाहिनी बलासघ्नी अजीर्णविसूचीव्रणक्लेदघ्नी तन्द्रामोहप्रलापस्वरभङ्गारोचकघ्नी। सन्निपातजड़ीभूतं हृतेन्द्रियञ्च नरं जीवयति।" अवि.।

कटुशृङ्गाट(ल)म्। क्ली। चिवकूटदेशप्रसिद्धगौरसुवर्णशाके। रा. नि. व. ७।

कटुसिंहपुची। स्त्री। क्षुद्रपृश्निपर्ण्याम्।

कटुसिंही। स्त्री। कटुवार्त्ताक्याम्।

कटुस्नेहः। पुं। (Sinapis dechotoma.) सर्षपवृक्षे। चिका.। कटुतैले। भैष. बाल. चि.। गौरसर्षपे। रा. नि. व. ७।

कटुहुच्चो। स्त्री। कारवेल्ले। উচ্ছে গাছ। रा. नि. व. ७। कर्कट्याम्।

कटुक्कट(क)म्। क्ली। शुण्ठ्याम्। आर्द्रके। आदा। र. मा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कटूदरी। स्त्री। गोविन्दीति कीर्त्तिते ख्यातौषधे। गुणः—विसूचीघ्नी कटूष्णा कफवातहा। वै. निघ.।

कटूषणम् (णा)। क्ली, स्त्री। पिप्पलीमूले। शुण्ठ्याम्। रा. नि. व. ६। पिप्पल्यां। वै. निघ.।

कटोरम्। क्ली। मद्यपात्रे। कटोरा। भ. च.।

कटोरा। स्त्री। स्वनामख्यातपात्रे। टाटी, कटोरा। भ. च.।

कटोलः। पुं। कटुरसे। उणा.।

कट्टकं। क्ली। कतकफले। निर्म्मलीफल।

कट्टरतैलम्। क्ली। ज्वरे विदाहे च हितम्। मूर्च्छिततिलतैलं ४श. कल्कद्रव्याणि समदत्ता १ श. तक्रं २४ श. यथाविधि पाच्यम्। सचललवणं गुरुणी कुटं मूर्व्वामूलं लाचा हरिद्रा मञ्जिष्ठाचेति द्रव्याणि। "सुवर्चिका नागरकुष्ठमूर्व्वालाचानिशालोहितयष्टिकाभिः। तैलं ज्वरे षड्गुणतक्रसिद्धमभ्यङ्गनाच्छीतविदाहनुच्च।" वै. निघ.।

कट्टारः। पुं। क्षुद्रखड्गे। काटारी।

कट्टणम्। क्ली। गन्धतृणे। सि. यो. वा. व्या. चि. माषबलादिः। सुगन्धरीहिषतृणे। रामकर्पूर। वा. उ. ३७अ.। See कत्तृणम्।

कट्फलः। पुं। (Myrica sapida.) स्वनामख्यातवृक्षे। कट्फल, कट्छाल। हिं कायफर्। सं कं कायफल, किरुसिवल्लि। तें पापरवुड्म्। प. सु.। र. मा.। तत्पर्य्यायः,—ग्रीपर्णिका कुटिका कुम्भी कैटर्य्यः (अ), काफलः कुम्भिपाकी (भा.) पर्षः कुटी (शब्दर.), त्वक्फलं (द्रव्याभि.), सीमवल्कः सीमवृक्षः रोहिणी (र.) नासानुः अरण्यः (ध.), कृष्णगर्भः प्रचेतसी भद्रावती महाकुम्भी रामसेनकः कसुदा उग्रगन्धः भद्रारञ्जनकः लघुकाश्मर्य्यः ग्रीपर्णी। गुणः—कटुः उष्णः कासश्वासज्वरघ्नः उग्रदाहहरः रुचः सुखरीगशान्तिकरश्च। रा. नि. व. ६। सु. सू. ३८ अ. लोध्रादि. ङ.। सु. सू. ३८ सुरसादौ. ङ.। वार्त्ताकवृक्षे। वै. निघ.। क्ली। कट्फले। गुणाः—तुवरं तिक्तं कटु वातकफज्वरघ्नं श्वासार्शःप्रमेहकासकण्डूमयरुचिघ्नञ्च। भा.। मद. व. १। सि. यो. कफज्वरावलेहे। वा. सू. १५ अ.। परूषकादौ अरुणः। "कट्फलं कतकाफलम्।" वा. सू. १५ अ. रोध्रादि. अरुणः। "जिङ्गिनीसरलकट्फलयुक्ताः।" वा. सू. १५ अ. सुरसादिः। "खरवुसवृषकर्णी कट्फलं कासमर्द्दः।" च. द. पित्त. ज्व. कलिङ्गादिः। "कलिङ्गं कट्फलं मुस्तम्।" कङ्कोले। रा. नि. व. १२।

कट्फला। स्त्री। गाम्भारीवृक्षे। र. मा.। रा. नि. व. ६। बृहत्यां। काकमाच्याम्। वार्त्ताक्यां। रा. नि. व. ४। देवदाल्यां। देवीतोड़ा। रा. नि. व. ३। सुगन्धकोकिले। रा. नि. व. ७।

कट्फलादिः। पुं। कासरोगे कषायविशेषे। पाठः—"कट्फलं कत्तृणं भार्गी मुस्तं धान्यं वचाभया। शृङ्गी पर्पटकं गुरुणी सुराह्वञ्च जले शृतं। मधुहिङ्गुयुतं पेयम्॥" अत्र प्रक्षेप्यहिङ्गुमधुनी-र्मांसः। उत्तमादौ पलांशादिकं देयम्। मात्रिकं हिङ्गुसिन्धूत्थमित्यादि परिभाषावचनात्। च. द. कास चि.।

कट्फलादिपानम्। क्ली। दीर्घकालानुबन्धिज्वरे हितं। गुणः—चिरदीर्घदाहतृष्णाघ्नम्। कट्फलं त्रिफला देवदारु रक्तचन्दनं वृषकफलं (फलसा) कटुकी पद्मकाष्ठं उशीरञ्चेति द्रव्याणि एषां प्र. १६ रक्तिकं वारि २श. शी. १ श.। भा. म. १भ. ज्व. चि.।

कट्वकं। क्लीं। कतकफले। निर्म्मलफल।

कट्वङ्गः। पुं। तिन्दुकवृक्षे। तेंदू गाछ। वा. टी. वत्सकादिगणे. हेमाद्रिः। श्योणाकवृक्षे। शोणापाटा। रा. नि. व. ६। भैष. स्त्रीरो. पुष्यानुगचूर्णे। च. सू. ४अ. ३१ दशके। वै. निघ. अप. चि. कटभ्यादितैले। वा. सू. ३५ अ. अम्बष्ठादौ। "कट्वङ्गः कमलोद्भवं रजः।" सु. सू. ३८ अम्बष्ठादिः। क्ली। टुण्टुकफले। शोणाफल। "कट्वङ्गफलाजमोद...।"

कट्वम्बरा। स्त्री। प्रसारण्याम्। ज. द.।

कट्वरम्। क्ली। Butter-milk. दधिमिश्रे। त्रिका.। दधिसरे। र. मा.। तक्रे। 'तक्रं कट्वरमिष्यते। प. प्र. ३ख.। व्यञ्जने। उणा.।

कट्वरतैलम्। क्ली। See कट्टरतैलम्।

कट्वी। स्त्री। कटुक्यां। कटुकी। रा. नि. व. ६। वै. निघ. २भ. कण्डूकुष्ठज्व. चि.। भैष. कुष्ठ. चि. भल्लातकगुड़े। सु. सू. ४० अ.। कटुकवल्ल्यां। कटुकीलतांविशेष। रा. नि. व. ३। तत्पर्य्यायः,—कटुकपत्री सुकाष्ठा काष्ठवल्लिका सुवल्ली महा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्ली पशुमीढनिका कटुः। गुणाः—मधुरत्वं शीतत्वं रुचिकारित्वं कफ-श्वास-क्षयनिवारणत्वञ्च।

कठरः। त्रि। कठिने। जटा.।

कठा। स्त्री। करिण्याम्। श. च.।

कठाकुः। पुं। पक्षिणि।

कठाहकः। पुं। A gallinule. दात्यूह पक्षिणि। श. र.।

कठिका। स्त्री। तुलसीवृक्षे। खटिकायाम्। वै. निघ.।

कठिञ्जरः। पुं। (Ocymum sanctum.) अर्ज्जकवृक्षे। क्षुद्रतुलसी वृक्ष। रा. नि. व. १०। पर्णासे। काल तुलसी। भा. पू. १भ. पुं. व.।

कठिनम्। क्ली। यवान्यजाजीत्रिकटुभूनिम्बादि-द्रव्येषु। श. च.। स्थाल्याम्। त्रि। स्तब्धे। मे.।

कठिनपृष्ठः(कः)। पुं। कूर्म्मे। रा. नि. व. १९।

कठिनफलः। पुं। कपित्थवृक्षे। रा. नि. व. ११।

कठिना। स्त्री। गुड़शर्करायाम्। मे. नवकं। काकोदुम्बरिकायाम्। रा. नि. व. ११।

कठिनिका। स्त्री। खटिकायाम्। खड़ी। हारा.।

कठिनी (कः)। स्त्री, पुं। खटिकायाम्। खड़ी। र. मा.। प. मु., विका.। मे. नवकं।

कठिनोपलः। पुं। कौरभ्रीशाली। शालिधान्य-विशेष। रा. नि. व. १६।

कठिल्लः (कः)। पुं। कारवेल्लके। करला, उच्छे। प. मु.। भा. पू. २भ.। कर्कटे। काँकरोल, वनकाँकरोल। प. मु., च. चि. ३अ.। "कर्कटो-ऽरण्यसम्भूतः कठिल्लः शठघातकः।" वै. निघ.। पुनर्नवायाम्। रा. नि. व. ५। भैष. मध्यमनारायण-तैले। रक्तपुनर्नवायां। भा. पू. २भ.। तुलसी-वृक्षे। विका.।

कठिल्ल(ल्लि)का। स्त्री। (Momordica chanartia.) कारवेल्लवृक्षे। उच्छे गाछ। तुलस्यां। रक्तपुनर्नवायां। गांदापूर्णे। ज. द. १२ अ.।

कठोरः (लः)। त्रि। कठिने। अ. टी.।

कड़कम्। क्ली। सामुद्रलवणे। कड़कच। र. मा.।

कड़ङ्करः। पुं। तुषे। वै. निघ.।

कड़ङ्गः। पुं। सुराविशेषे। उणा.।

कड़ङ्गरः। पुं। वुषे। तूष, आगड़ा। हे. च.।

कड़म्भः (कः)। पुं। कलम्बिशाके। शाक-नाड़िकायाम्। डाँटा। See कलम्बी।

कड़म्भो(म्बुका)। स्त्री। कलम्बीशाके। श. र.।

कड़ारः। पुं। पिङ्गलवर्णे। अम.।

कड़ुहुच्ची। स्त्री। क्षुद्रकारवेल्ले। छोटे उच्छे। रा. नि. व. ७।

कणः। पुं। पिप्पल्यां। वा. सू. १५ अ. शोधनव.। "कणलवणवचैला...।" कणोऽतिसूक्ष्मे धान्यांशे। मे. णद्वयं। क्लीबे। हे. च.। वनजीरके। रा. नि व. ६।

कणगुग्गुलुः। पुं। श्वेतजीरके। स्वनामख्यात गुग्गुली। गुग्गुलविशेष कणगुग्गुल। तत्-पर्य्यायः—गन्धराजः स्वर्णवर्णः सुवर्णः कनकः वंशप्रीतः सुरभिः पलङ्कषः। गुणाः—कटूष्णः सुरभिः वातघ्नः रसायनश्च। रा. नि. व. १२।

कणजिह्विका। स्त्री। महासमङ्गायाम्। वड़ वेड़ेला। सारिवायाम्। बहुपुत्रिकायाम्। शतमूली वा भुँइ आमला। रा. नि. व. २२।

कणजीरः (कम्)। पुं, क्ली। शुक्लजीरके। मद. व. २। क्षुद्रजीरके। श. च.। रा. नि. व. ६।

कणजीर्णा। स्त्री। श्वेतजीरके। रा. नि. व. ६।

कणनिर्य्यासः। पुं। गुग्गुलौ। रत्ना.।

कणप्रियः। पुं। सूक्ष्मचटके। वै. निघ.।

कणभः। पुं। पुष्पवृक्षविशेषे। गुनठिया। रत्ना.। तन्नामककीटे। तद्दष्टलक्षणम्—विसर्पः श्वयथुः शूलं ज्वरस्कर्द्दिरथापि च। लक्षणं कणभैर्दृष्टे दंशश्चैवावसीदति॥ मा. नि.। अग्निप्रकृतिकीट-विशेषे। तेन दष्टे पित्तरोगा भवन्ति। अन्य-जातीयकीटे। स च चतुर्विधः—"चिकरटकः कुणी हस्तिकच्छः अपराजितश्चेति। तैर्दष्टस्य श्वयथुरङ्ग-मर्द्दो गुरुता गात्राणां दंशः क्लथता च भवति। सु. कल्प. ८अ.।

कणभक्षकः। पुं। श्यामचटके। भारिटपक्षिणि। बाबुई, भारुई। रा. नि. व १९।

कणमूलम्। क्ली। पिप्पलीमूले। पञ्चतिक्तघृते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कणही । स्त्री । लताग्निरीषि । प. मु. ।

कणा । स्त्री । पिप्पल्याम् । प. मु. रा. नि. व. ६ । जीरके, शुक्लजीरके, कृष्णजीरके । भा. पू. १भ. । कुम्भीरमक्षिकायाम् । कुमीरे पोका । हारा. । "कणा जीरककुम्भीरमक्षिकापिप्पलीषु च ।" मे. णद्विकं ।

कणाजटा । स्त्री । पिप्पलीमूले । वै. निघ. २ भ. अजीर्णवड़वानलचूर्णे ।

कणाटीनः (रः, कः) । पुं । खञ्जनपक्षिणि । त्रिका. । श. र. ।

कणादिगणः । पुं । पिप्पल्यादिगणे । स च —पिप्पलीपिप्पलीमूलचव्यचित्रकनागरं । मरिचैलाजमोदेन्द्रपाठारेणुकजीरकम् । भार्गीमहानिम्बफलं हिङ्गु रोहिणिसर्षपम् । विड़ङ्गातिविषे मूर्वा चैत्यं कीर्त्तिती गणः ॥ च. द. कफच्च. चि. ।

कणादिवटी । स्त्री । श्लीपदाधिकारे । "कणावचादारुपुनर्नवानां चूर्णं सविल्वं समवृद्धदारकम् । सम्मर्द्द्य चैतस्य निहन्ति वल्लः सकाञ्जिकः श्लीपदमुग्रवेगम् ॥" पिप्पुल, वच, देवदारु, श्वेतपुनर्नवा, बेलछाल, वृद्धदारकबीज, प्रत्येकेर चूर्ण समभाग । मात्रा ७ रति । अनुपान काँजि । र. सा. सं. ।

कणादीप्यः । पुं । श्वेतजीरके । रा. नि. व. ६ ।

कणाद्यलौहम् । क्ली । अतिसाराधिकारे । योगरत्नाकरस्य । अत्र "त्रिवर्गत्रितयेन चेति" त्रिकटुत्रिमदत्रिफलाभिः । र. सा. सं. । "कणानागरपाठाभिस्त्रिवर्गत्रितयेन च । बिल्वचन्दनक्षीरैः समं लौहं प्रदापयेत् । सर्व्वातीसारशमनः संग्रहग्रहणीहरः ॥" त्रिवर्गत्रितयं त्रिमदत्रिफले । पिप्पुल, शुँठ, आकनादि, आमला, बहेड़ा, हरीतकी, मुता, चित्ते, विड़ङ्ग, रक्तचन्दन, बेलशुँठ, बाला समभाग । सर्व्वचूर्णसमान लौह । जले मर्द्दन । रस. र. । र. चि. ९अ. ।

कणाह्वा । स्त्री । श्वेतजीरके । रा. नि. व. ६ ।

कणिकः । पुं । पिप्पल्याम् । शुष्कगोधूमचूर्णे । रा. नि. व. १६ ।

कणिका । स्त्री । अग्निमन्थवृक्षे । अतिसूक्ष्मवस्तुनि । मे. कवित्रं । "शुष्कगोधूमचूर्णन्तु कणिका समुदाहृता ।" रा. नि. व. १६ कणाख्यां । तण्डुलविशेषे । अ. टी रा. ।

कणितम् । क्ली । आर्त्तनादे । हे. च. ।

कणिशम् । क्ली । शस्यमञ्जर्य्याम् । धान्यादिर शीष । अम. । हे. च. ।

कणी । स्त्री । हयकर्णलतायाम् । शा. र. । कणिकायां । अ. टी. भ. ।

कणीकं । त्रि । अत्यल्पे । उ. ।

कणीचम् । त्रि । अत्यल्पे । उ. ।

कणीची । स्त्री । गुञ्जायाम् । किरांचीति ख्यातायाम् पृश्निपर्णलतायाम् । शाटकें । मे. चत्रिकं ।

कणीनिका । स्त्री । नेत्रतारकायाम् । चक्षुर तारा ।

कणेरः । पुं । कर्णिकारवृक्षे । कनेर-फूल, चीनेर करवी । उणा. ।

कणेरा । स्त्री । हस्तिन्याम् । शा. च. ।

कणेरुः । पुं । कर्णिकारवृक्षे । मे. ।

कण्टः । पुं । वकुलवृक्षे ।

कण्टकः । पुं, क्ली । गोक्षुरक्षुपे । रा. नि. व. ४ । मदनवृक्षे । मयनाकाँटा । रत्ना. । मत्स्यादिकीकसे । मत्स्यादिर काँटा । द्रुमाङ्गे । गाछेर काँटा । मे. कत्रिकं । बिल्ववृक्षे । इङ्गुदीवृक्षे । वनमुद्गे । घुगानी । बर्ब्बूरकवृक्षे । बाव्‌ला गाछ । सीमाक्षे । त्रिका. । पद्मबीजे । वेणौ । हे. च. ।

कण्टककरञ्जः । पुं । करञ्जभेदे । काँटाकरञ्ज, गेँटेकरञ्ज । अ. टी. भ. ।

कण्टककिंशुकः । पुं । कण्टकीपारिजाते । पालिधागान्दार । मं पाङ्गारा । वै. निघ. ।

कण्टककीटः । पुं । कण्टकयुक्त-कीटविशेषे । शुँयो पोका ।

कण्टकच्छदः । पुं । श्वेतकेतकवृक्षे । वै. निघ. ।

कण्टकत्रयम् । क्ली । कण्टकारीत्रये । रा. नि. व. २२ । बृहती कण्टकारी गोक्षुरञ्च । गुणः— "कण्टकत्रितयं प्रोक्तं विदोषभ्रमनाशकम् । ज्वरं पित्तञ्च हिक्काञ्च तन्द्रालापञ्च नाशयेत् ।" वै. निघ. । See कण्टकारीत्रयम् ।

कण्टकदला । स्त्री । केतकीवृक्षे । वै. निघ. ।

कण्टकद्रुमः । पुं । शाल्मलीवृक्षे । रा. नि. व. ८ । खदिरवृक्षे । र. मा. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्टकपञ्चमूलम् । क्ली । स्वल्पमहत्तृणवल्ली-कण्टकसंज्ञकपञ्चमूलेषु । सि. यो. तृणा. चि. श्रीकण्ठः । सु. सू. ३८., चि १७ अ. विसर्परोगे । एतत्तु पक्वाशयशोधनं वातकफहरञ्च । करमर्द्द-गोक्षुरहिंसाभिण्टीशतावरीषु । "करमर्द्दः स्वदंष्ट्रा च हिंसा भिण्टी शतावरी । कण्टकाद्यं पञ्च-मूलम ।" प. प्र. ३ ख. । हिंसा केलेकड़ा । "रक्तपित्तहरं श्लेतच्छोफत्रयविनाशनम् । सर्व्वमेह-हरञ्चैव शुक्रदोषविनाशनम् ।" सु. सू. ३८ अ. ।

कण्टकपाली । स्त्री । (Caparis sepiaria.) स्वनामख्यातवृक्षे । कांलिया कड़ा । हिं हिन्स् । प. मु. ।

कण्टकप्रावृता । स्त्री । घृतकुमार्य्याम् । रा. नि. व. ५ । कण्टकैरवल्याम् । वै. निघ. ।

कण्टकफलः (ला) । पुं, स्त्री । पनसवृक्षे । काँठाल गाछ । अ. टी. भ. । गोक्षुरे । र. मा. । कण्टकार्य्याम् । एरण्डवृक्षे । धुस्तूरवृक्षे । देव-दाल्याम् । कुसुम्भवृक्षे । ब्रह्मदण्डीवृक्षे । करञ्जवृक्षे ।

कण्टकभुक् । पुं । उष्ट्रे ।

कण्टकलता । स्त्री । चपुषायां । कर्कटिकायां ।

कण्टकवृन्ताकी । स्त्री । वार्त्ताकीवृक्षे । वेगुण-गाछ । रा. नि. व. ७ ।

कण्टकशिरीषः । पुं । कण्टकयुक्त-शिरीषवृक्षे ।

कण्टकश्रेणी । स्त्री । कण्टकार्य्याम् । श. च. ।

कण्टका । स्त्री । कण्टकारिकायाम् । दुरा-लभायां । वनमुद्गे । कर्कटिकायाम् । वै. निघ. ।

कण्टकागारः । पुं । शरटे । गिरगिटे । रा. नि. व. १९ । शल्लक्याम् । शजारू ।

कण्टकाढ्यः । पुं । कुब्जकावृक्षे । कीङ्गणदेश-ख्यातपुष्पवृक्षविशेषे । वेलफूल । हिं बेल । रा. नि. व. १० । विल्ववृक्षे । स्त्री । शाल्मलिवृक्षे । वै. निघ. ।

कण्टकारिः (का) । स्त्री । कण्टकार्य्याम् । कण्टिकारी । च. द. विषमज्व. चि. । "विश्वौषध-कण्टकारिकाक्वाथः ।" श्वेतकण्टकार्य्याम् ।

कण्टकारित्रयम् । क्ली । कण्टकारीत्रये ।

कण्टकारी । स्त्री । (Solanum xantho-carpum. Syn. solanum Jaquinii.) स्वनामख्याततिक्तशाकक्षुपविशेषे । कण्टिकारी । हिं कंटेलि, रिंगिनी, भटकरैया, नेनगुल्लु । ते ब्राकुड़िचेट्टु । उत्. कण्टमारिष । तत्पर्य्यायः,— कण्टकश्रेणी कासघ्नी (श), निदिग्धिका स्पृही व्याघ्री बृहती प्रचोदनी कली क्षुद्रा दुःस्पर्शा राष्ट्रिका (अ.), अनाक्रान्ता भण्टाकी सिंही धाव-निका (र.), कुलिः (शब्दर.) कण्टकारिका कण्टा-किनी दुष्प्रधर्षिणी निदिग्धा धावनी क्षुद्रकण्टिका बृहत्कण्टा क्षुद्रफला कण्टालिका चित्रफला । सा द्विधा, सामान्यश्चित्रभेदात् । तत्र सामान्यगुणाः— कटूष्णा दीपनी श्वासकासघ्नी प्रतिश्यायघ्नी कफ-वातज्वरघ्नी च । सरा तिक्ता कटुपाका लघुः रूक्षोष्णा पाचनी पीनसघ्नी पार्श्वपीडाघ्नी कृमि-हृद्रोगघ्नी । फलम्—रसे पाके कटुकं शुक्रारेचनं भेदि तिक्तं पित्ताग्निक्लेष्म कफ वात-कण्डू कास-मेदः-कृमिज्वरघ्नं लघु च । शुक्रा सा गर्भदा च । भा. पू. १भ. । शाल्मलीवृक्षे । जटा. । विकङ्कतवृक्षे । वँइचि गाछ । श. रा. ।

कण्टकारीघृतम् । क्ली । स्वरभेदे हितं । "व्याघ्रीस्वरसविपक्वं राज्ञावाव्यालगोक्षुरव्योषैः । सर्पिः स्वरोपघातं हन्यात्कासञ्च पञ्चविधम् ॥" घृतं ४ श. स्वरसाभावे क्वाथार्थंकण्टकारी १२॥० श. वारि ६३ श. शेष. १६ श. रास्नाश्वेतवाव्याल-गोक्षुरविकटूनां षट्कल्कद्रव्याणां मिलितं ८ प. । "शुष्कद्रव्यमुपादाय स्वरसानामसम्भवे । वारिण्यष्ट-गुणे साध्यं ग्राह्यं पादावशेषितम् ॥" इति वच-नात् । च. द. स्व. भे. चि. ।

कण्टकारीत्रयम् । क्ली । बृहतीकण्टकारी-दुरालभासु । "बृहती चाग्निदमनी दुस्पर्शा चेति तु त्रयम् । कण्टकारीत्रयं प्रोक्तं...॥" रा. नि. व. २२ । सिद्धयोगे तु गणिकारीस्थाने गोक्षुर-माह । "कण्टकारित्रयं तन्द्राप्रलापभ्रमनाशनम् । पित्तं ज्वरं त्रिदोषञ्च नाशयेत्... ।" वै. निघ. ।

कण्टकारीद्रुः (मः) । पुं । विकङ्कतवृक्षे । वँइची । वै. निघ. ।

कण्टकारीद्वयम् । क्ली । बृहतीकण्टकारीति द्वयम् । भा. म. सान्निपात-ज्व. ।

कण्टकारीफलम् । क्ली । कण्टकार्य्याः फले । कण्टिकारीर फल । गुणाः—"कण्टकारीफलं तिक्तं कटुकं दीपनं लघु । रूक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम् ।" भा. पू. १भ शाकव. ।

कण्टकार्य्यः । पुं । कुटजवृक्षे ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्टकार्य्या । स्त्री । कण्टकारीवृक्षे । रस. र. बाल.चि. । "कुसुमैः कण्टकार्य्यायाः... ।"

कण्टकार्य्यादिः । पुं । पित्तश्लेष्मज्वरे कषायः । कण्टकारी अमृता ब्राह्मणयष्टिः गुरुही इन्द्रयवः दुरालभा चिरायता रक्तचन्दनं सुस्तं पटोलं कटुकी प्रत्येकं १४ र. वारि ३२ ती. शेष. ८ ती. । भैष. । अत्र नागरेन्द्रयवासकमिति नागरं गुरुही इन्द्रः इन्द्रयवः यवासकः दुरालभा, द्रव्य २ ती. वारि कुडवमितम् । च. द. ज्व. चि. ।

कण्टकालः । पुं । पनसवृक्षे । श. च. ।

कण्टकालिका । स्त्री । कण्टकार्य्याम् । भा. पू. १भ. ।

कण्टकालुकः । पुं । दुरालभायां । यासचुपे । रा. नि. व. ४ ।

कण्टकाशनः । पुं । उष्ट्रे । हे. च. ।

कण्टकाष्ठः । पुं । शाल्मलीवृक्षे । शिमुल ।

कण्टकाष्ठीलः । पुं । कुलिशशस्त्रे । त्रिका. ।

कण्टकिन् । पुं । मत्स्ये । श. र. । मदनवृक्षे । काँटानयना । प. मु. । खदिरवृक्षे । श. मा. । गोक्षुरचुपे । रा. नि. व. ४ । सु. सू. ३८ अ. । वदरवृक्षे । रा. नि. व. ११ । वंशविशेषे । वेउड़बाँश । रा. नि. व. ७ । विकङ्कतवृक्षे । वँइची गाछ । सु. चि. ८ अ. ड. । विट्खदिरे । गुयेबाव्ला । प. मु. । बिल्ववृक्षे । पारिभद्रवृक्षे । वै. निघ. ।

कण्टकिनी । स्त्री । वार्त्ताकीचुपे । कण्टकारिकायां । रा. नि. व. ४ । रक्तझिण्टीवृक्षे । रा. नि. व. १० । मधुखर्ज्जूरीवृक्षे । रा. नि. व. ११ ।

कण्टकि(की)फलः । पुं । समष्टीलक्षुपे । रा. नि. व. ४ । पनसवृक्षे । काँठाल गाछ । अ. टी. भ. । क्ली । क्षुपफले । शशा । भा. ।

कण्टकि(की)फला । स्त्री । कर्कट्यां । काँकुड़ । वै. निघ. ।

कण्टकिलः । पुं । वंशविशेषे । वेउड़ बाँश । श. च. ।

कण्टकि(की)लता । स्त्री । कर्कट्याम् । काँकुड़ गाछ । क्षुपीलतायाम् । शशा गाछ, क्षीरा लता । रा. नि. व ७ ।

कण्टकिला । स्त्री । वेणुविशेषे । वेउड़बाँश ।

कण्टकी । स्त्री । शमीवृक्षे । प. मु. । बृहत्याम् । मद. व. । कण्टकवार्त्ताक्याम् । काँटाबेगुण । गुणाः—कटुतिक्तोष्णा रक्तपित्तकोपना कण्डूकच्छूहरी च । राज. ।

कण्टकीद्रुमः । पुं । खदिरवृक्षे । रत्ना. । मदनवृक्षे । र. । वंशे । बदरवृक्षे ।

कण्टकीपारिजातः । पुं । पारिभद्रके । पालते मान्दार । हिं पांगारा । वै. निघ. ।

कण्टकीशरपुङ्खा । स्त्री । शरपुङ्खाभेदे । इयं कटूष्णा कृमिशूलघ्नी च । वै. निघ. ।

कण्टकी(कि)शुकः । पुं । पारिभद्रवृक्षे । पालिधा गाछ । वै. निघ. ।

कण्टकुरण्टः । पुं । पीतझिण्ट्याम् । वै. निघ. । झिण्टीवृक्षे । काँटी गाछ । रा. नि. व. १० । See झिण्टी ।

कण्टतनुः । स्त्री । बृहत्यां । रा. नि. व. ४ ।

कण्टदला । स्त्री । केतकीवृक्षे । केया गाछ । रा. नि. व. १० । श्वेतकेतक्याम् । वै. निघ. ।

कण्टपत्रः । पुं । विकङ्कतवृक्षे । वँइची गाछ । श. मा. ।

कण्टपत्रफला (त्रा) । स्त्री । ब्रह्मदण्डीवृक्षे । रा. नि. व. ५ ।

कण्टपत्रिका । स्त्री । वार्त्ताकीवृक्षे । रा. नि. व. ७ ।

कण्टपादः । पुं । विकङ्कतवृक्षे । वँइची गाछ । रा. नि. व. ९ ।

कण्टपुङ्खा (ङ्खिका) । स्त्री । कण्टकशरपुङ्खायाम् । गुणाः—"कण्टशरपुङ्खा कटूष्णा च कृमिशूलविनाशिनी ।" रा. नि. व. ४ ।

कण्टफलः । पुं । देवताड़वृक्षे । देयाताड़ । रा. नि. व. ३।२३ । क्षुद्रगोक्षुरके । रा. नि. व. ४ । पनसे । रा. नि. व. ११ । धुस्तूरके । रा. नि. व. १० । लताकरञ्जे । रा. नि. व. ९ । एरण्डे । नक्षत्रे । रा. नि. व. ४ । कुसुम्भवृक्षे । ब्रह्मदण्ड्यां । रा. नि. व. २३ ।

कण्टफला । स्त्री । देवदालीलतायां । रा. नि. व. ३ । लघुकारवेल्लयाम् । रा. नि. व. ७ । ब्रह्म-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डीवृक्षे । रा. नि. व. ५ । कर्कोट्याम् । काँकरोल । रा. नि. व. ७ । वृहत्यां । रा. नि. व. ४ ।

कण्टलः । पुं । बाबलवृक्षे । बाब्‌ला गाछ । भ. च. वै. निघ. ।

कण्टवल्लरी । स्त्री । श्रीवल्लीवृक्षे । वाघेण्टीति कीङ्गणे प्रसिद्धलतायां । वै. निघ. ।

कण्टवल्ली । स्त्री । श्रीवल्लीवृक्षे । रा. नि. व. ८ ।

कण्टावार्त्ताकी । स्त्री । कण्टकयुक्तबार्त्ताक्यां । काँटाबेगुन गाछ । रा. नि. व. ७ ।

कण्टवृक्षः । पुं । तेजःफलवृक्षे । तेजफल इति पार्व्वतीये । रा. नि. व. ११ ।

कण्टसारका । स्त्री । श्वेतभिण्टीवृक्ष । वै. निघ. ।

कण्टकारी । स्त्री । पनसवृक्षे । वै. निघ. ।

कण्टाकुम्भाडुः । पुं । कण्टकलताविशेषे । कुमिरके इति भाषा । च. द. ।

कण्टाफलः । पुं । धुस्तूरवृक्षे । रा. नि. व. १० । पनसवृक्षे । काँठाल गाछ । रा. नि. व. ११ ।

कण्टारवी । स्त्री । वासायाम् ।

कण्टारिका । स्त्री । अग्निदमनीवृक्षे । कण्टकार्य्याम् । रा. नि. व. ४ ।

कण्टार्गलः (र्त्तगला) । पुं, स्त्री । नीलझिण्ट्याम् । रा. नि. व. १० । See नीलास्लानः ।

कण्टार्हलता । स्त्री । नीलझिण्ट्याम् ।

कण्टालः । पुं । मदनवृक्षे । रा. नि. व. ८ । पनसवृक्षे ।

कण्टालिका (ली) । स्त्री । कण्टकार्य्याम् । वै. निघ. ।

कण्टालुः । पुं । वर्व्वूरकवृक्षे । रा. नि. व. ८ । वंशे । रा. नि. व. ७ । वृहत्यां । वार्त्ताकीवृक्षे । रा. नि. व. ४ । कर्कटीभेदे । रा. नि. व. ७ ।

कण्टाह्वयम् । क्ली । पद्मकन्दे । रा. नि. व. १० ।

कण्टिका । स्त्री । अतिबलायाम् । वै. निघ. ।

कण्टी । पुं । श्वेतापामार्गे । अपामार्गे । रा. नि. व. ८ । गोक्षुरे । क्षुद्रगोक्षुरे । रा. नि. व. ४ । खदिरे ।

कण्ठः । पुं । गले । रा. नि. व. १८ । मदनवृक्षे । मे. ठद्विकं । स्वरे । हारा. ।

कण्ठकुब्जः (कः) । पुं । सन्निपातज्वरविशेषे । लक्षणं यथा—"शिरोर्त्तिकण्ठग्रहदाहमोहकम्प-ज्वरी रक्तसमीरणार्त्तिः । हनुग्रहस्तापविलापमूर्च्छा स्यात् कण्ठकुब्जः खलु कष्टसाध्यः ॥" भा. ज्व. चि. ।

कण्ठकुजनम् । क्ली । गलकूजने । गला-डाका । मा. नि. । "प्रततं कण्ठकूजनम् ।"

कण्ठकूलिका । स्त्री । वीणानामक-वाद्ययन्त्र-विशेषे । हे. ।

कण्ठग्रहः । पुं । कण्ठकुब्जके । भा. म. १भ ज्व. । इह द्वौ कर्णकण्ठग्रहौ ।

कण्ठतलासिका । स्त्री । अश्वबन्धनरज्जौ । भ. मा. ।

कण्ठनाड़ी । स्त्री । कण्ठनाल्याम् । गलार नली । भा. ।

कण्ठनीड़कः । पुं । चिल्लपक्षिणि । चिलपक्षी । त्रिका. ।

कण्ठनीलकः । पुं । उल्कायाम् । मशाल । भ. मा. ।

कण्ठपाशकः । पुं । करिगलवेष्टनरज्जौ । भ. मा. ।

कण्ठबन्धः । पुं । करिकण्ठबन्धनरज्जौ । हे. च. ।

कण्ठमणिः । पुं । ग्रैवेयमणौ । त्रिका. ।

कण्ठरोहिणी । स्त्री । गलरोहिणीनामक कण्ठ-गत-रोगविशेषे । सुश्रु. ।

कण्ठलता । स्त्री । कण्ठभूषणे । अश्वबन्धने ।

कण्ठशालुकः (शूकः) । पुं । कण्ठगतमुख-रोगविशेषे । अत्र कफकोपात्कण्ठे शालुककन्द-वदराख्याकृतिः खरस्पर्शः कठिनश्च ग्रन्थिर्भवति । अयं कण्टकशूकवद्वेदनां जनयति शस्त्रसाध्यश्च । मा. नि. । लक्षणम्—"कोलास्थिमात्रः कफसम्भवो यो ग्रन्थिर्गले कण्टकशूकभूतः । खरः स्थिरः शस्त्र-निपातसाध्यस्तं कण्ठशालूकमिति ब्रुवन्ति ॥" सु. नि. १६ अ. ।

कण्ठशुण्डी । स्त्री । गलशुण्डीनाम-कण्ठगत-रोगविशेषे । सुश्रु. ।

कण्ठशुद्धिः । स्त्री । गलस्य कफाद्यलिप्तत्वे । गला शुकान ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्ठशोषः। पुं। पित्तजन्यरोगविशेषे।
कण्ठा। स्त्री। गलदेशे।
कण्ठाग्निः। पुं। पचिषि। चिका.।
कण्ठालः। पुं। गुरणे। उष्ट्रे। मे.। गौणी-प्रभेदे। मे.।
कण्ठालङ्कारः। पुं। काशे। केशे घास। रा. नि. व. ८।
कण्ठाला। स्त्री। जालगोणिकायां। चिका.।
कण्ठालुः। स्त्री। कण्ठपुष्पायां। विषघ्नीनामकी कन्दशाकी। रा. नि. व. ७।
कण्ठिका। स्त्री। कण्ठमालायाम्।
कण्ठी। स्त्री। गले। अ. टी. भ.। अश्वकण्ठ-वेष्टनरज्जौ (चर्म्मादौ)। श. मा.।
कण्ठो (न्)। पुं। कलाये। मटरे। रा. नि. व. १६।
कण्ठौरवः। पुं। प्रसहजातीये सिंहे। हारा.। पारावते। रा. नि. व. १७।
कण्ठौरवी। स्त्री। वासकपुष्पवृक्षे। वासक गाछ। रा. नि. व. ४।
कण्ठोलः। पुं। क्रमेलके। उंट्। मे. लविकं।
कण्ठोला। स्त्री। द्रोणीभेदे। मे. लविकं।
कण्ठ्यः। त्रि। Expectorants. स्वरचरे।
कण्ठ्यवर्गः। पुं। स्वर्य्यमहाकषायवर्गे चतुष्कस्य तृतीयद्वयके। यथा—"खारिविल्वमूल-मधुकपिप्पली-द्राक्षा-विदारी - कौटर्य्य-हंसपादी-बृहती-कण्टकारिका" इति दशेमानि कण्ठ्यानि भवन्ति। अनन्तमूल, इक्षुमूल, यष्टिमधु, पिप्पुल, द्राक्षा, भूँइकुमड़ा, कट्फल, थूलकुड़ि, विकृती, कण्टकारी। च. सू. ४अ.।
कण्डकः। पुं। कासामयविशेषे। वै. निघ.।
कण्डनम्। क्ली। निस्तुषीकरणे। कौंड़ा। हे. च.।
कण्डनी। स्त्री। उलूखले। मुषले। चिका.।
कण्डररोगः। पुं। व्रणरोगे। चूलकूनि। वै. निघ.।
कण्डरा। स्त्री। अस्थिवत्-स्थूलशिरायाम्। महास्नायौ। बड़ स्नायु। रा. नि. व. १८। सा च शरीरे सङ्ख्यया षोड़श। यथा—पादयोः चतस्रः, हस्तयोः चतस्रः, पृष्ठ चतस्रः, ग्रीवायाश्च चतस्र इति। करपादस्थकण्डराणां प्ररोहरूपा नखा जायन्ते। पृष्ठकटिकण्डराभ्यो विम्बः, ग्रीवाहृदय-कण्डराभ्यो मेढ्रश्च जायते। सु. शा ५अ.। महत्यः स्नायवः प्रोक्ता कण्डरास्तासु षोड़श। प्रसारणा-कुञ्चनयोः दृष्टं तासां प्रयोजनम्॥ भा.।
कण्डवल्ली। स्त्री। कारण्डवल्लाम्। करला। वै. निघ.।
कण्डीरः। पुं। लघुकारवेल्लके। च. चि. १ अ. अगुरुतैले। पीतसुद्दे।
कण्डुः (ण्डूः)। स्त्री। वायुजन्यकण्डूयादौ। तत्पर्य्यायः,—खर्ज्जूः कण्डुया (अ.) कण्डूतिः (अ. टी.), कण्डूयाम् (रा.)। चूलकना, पाँचड़ादि। कर्णरोगविशेषे। शुकशिम्ब्याम्। आलाकुशी। रा. नि. व. २०।
कण्डुघ्नः। पुं। श्वेतसर्षपे। वै. निघ.। आरग्वध-वृक्षे। रा.।
कण्डुरः। पुं। कारवेल्ललतायाम्। कुन्दरतृणे। रा. नि. व. ३।
कण्डुरा। स्त्री। कपिकच्छुलतायाम्। कर्पूर-कश्मीरककन्दे। रा. नि. व. १०। अल्पपर्ण्याम्। वल्लीभूषण। रा. नि. व. ३।
कण्डू(ण्डु)ला(ली)। स्त्री। अल्पपर्ण्याम्। रा. नि. व. ३।
कण्डूकरी। स्त्री। शुकशिम्बीलतायां। आला-कुशी रा. नि. व. १०। वा. सू. १५ अ. विदा-र्य्यादिः। "कण्डूकरी जीवनङ्खसंज्ञे।"
कण्डूका। स्त्री। काकतुण्ड्यां। कुँच वा कुच-कवल। वै. निघ.।
कण्डूघ्नः। पुं। आरग्वधवृक्षे। बड़ शोणालू। रा. नि. व. ९। गौरसर्षपे। रा. नि. व. १६।
कण्डूतिः। स्त्री। खर्ज्जाम्। खुजलानि। रा. नि. व. २०।
कण्डूमका। स्त्री। कीटविशेषे। सा च कृष्णः सारः कुहकः हरितः रक्तः यववर्णाभः भृकुटी-कीटिकश्चेत्यष्टविधा। तैर्दष्टस्य दंशकण्डूर्भवति पीत-फेनागमश्च वक्त्रात् तद्दष्टे च रोगी पीताङ्ग-र्च्छतीसारज्वरादिभिरभिहन्यते। सु. कल्प. ८अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्डूयनम्। क्ली। कण्डूः। खर्ज्जा। चुलकुनि। रा. नि. व. २०।

कण्डूयना। स्त्री। कण्डूत्याम्। चुलकुनि। अम.।

कण्डूया। स्त्री। कण्डूयने। रा. नि. व. २०।

कण्डूरः। पुं। माषके। प. मु.।

कण्डूरा। स्त्री। शुक्रशिम्बीलतायाम्। आलाकुशी। अ. टी.।

कण्डूलः। पुं। शूरणे। बुनो ओल। रा. नि. व. ७। त्रि। कण्डूयुक्ते।

कण्डूला। स्त्री। अत्यम्लपर्णीलतायाम्। वल्ली ओल, अम्बरबेल। वै. निघ.।

कण्डेरः। पुं। तण्डुलीये। भा.।

कण्डोघः। पुं। शूककीटे। शुँयो पोका।

कण्डोलः। पुं। उष्ट्रे। उषा.। गोणीभेदे। वंशादिनिर्म्मितधान्यरक्षणभाण्डे। डोल। अम. तत्पर्य्यायः,—पिटः पिटकः पेटकः। भ.।

कण्डोलकः। पुं। कण्डोले। डोल। हे. च.।

कण्डोलवीणा (ली)। स्त्री। चण्डालवीणायां। केँदड़ा। अम.। तत्पर्य्यायः—चण्डालिका चण्डाला वल्लकी कटीलवीणा (भ.) कण्डोली। शब्दर.।

कण्डोषः। पुं। शूककीटे। शुयो पोका। श. च.।

कण्वं। क्ली। पापे।

कतः (कः)। पुं। (Strychnos potatorum.) The clearing nut plant. निर्म्मलीफलवृक्षे। निर्म्माल्य वृक्ष। मं कं चीलु, चिल्लिकाथि। तत्पर्य्यायः,—अम्बुप्रसादः कतः तिक्तफलः रूक्षः छेदनीयः गुच्छफलः कतकफलः तिक्तमरिचः। गुणाः—कटुतिक्तोष्णः चक्षुष्यः कृमिदोषघ्नः रुचिकृत् शूलघ्नश्च। तद्बीजं जलप्रसादनम्। रा. नि. व. ११। "कतकस्य फलं नेत्र्यं जलनिर्म्मलताकरम्। वातश्लेष्महरं शीतं मधुरं तुवरं गुरु॥" भा. म. आस्रव.। कासमर्दे। कुचेलके। र. मा.। च. कं ४ अ. विषघ्नव.। जम्बीरवृक्षे। त्रिका.।

कतकम्। क्ली। कतकफले। निर्म्माल्य फल।

कतकफलः। पुं। कतकवृक्षे। निर्म्मलीवृक्ष। रा. नि. व. ११। तमालवृक्षे। क्ली। वारिप्रसादनफले। निर्म्माल्य। वा. सू. १५ अ. परुषकादिः। सु. सू. ३८ परुषकादौ। "कट्फलं कतकफलम्। शशकपुरीषप्रतिमफेनमम्बुप्रसादनम्।" ङ.।

कत्तृणम्। क्ली। (Andropogon schoenanthus.) गन्धतृणे। रामकर्पूर। प. मु.। हिं रोहिस, सोधिया च। तें कामंचिगड्डि, तूटिकूर। मं कं लाघानुरीहिसु। किरुगंजनि। द्वितीयं रोहिषतृणं, वाटुरीहिसु। हरियगंजिनि। तत्पर्य्यायः,—पौरं सौगन्धिकं श्यामं दिव्यगन्धकं रौहिषं (अ.), सुगन्धं तृणशीतं सुशीतलं रोहिषतृणं कात्तृणं। भूति भूतिकं श्यामकं श्यामकं पूति सुदृगलं ह्रस्वदीर्घभेदात् तद्विविधम्। गुणाः—ह्रस्वं कटुतिक्तं कफघ्नं शस्त्रशल्यादिदोषघ्नं व्रणग्रहघ्नञ्च। दीर्घं तिक्तं कटूष्णं कफवातघ्नं भूतग्रहविषदोषघ्नं व्रणचतुरीपणञ्च। रा. नि. व. ८। तुवरं तिक्तं कटुपाकं हृद्रोगकण्ठरोगपित्तरोगघ्नं रक्तदोषशूलकासकफज्वरघ्नञ्च। भा. पू. १भ. गु. व.। "रोहिषं कटुकं पाके तिक्तीषणं तुवरं जयेत्। हन्ति मारुतपित्तास्रं व्रणाच्छ्वासकफज्वरान्।" मद. व. १। च. सू. ४अ. स्तन्यजनने। सि. यो. च. द. कास. चि. कट्फलादौ। पृश्निपर्ण्याम्। चाकुलेः। मे. षविं। "कत्तृणं तृणभित्पृश्नेः।"

कत्तोयम्। क्ली। मद्ये। मैरेये। त्रिका.।

कक्षवरम्। क्ली। स्कन्धे। काँध। श. च.।

कथरी। स्त्री। कन्थार्य्याम्। रा. नि. व. ८।

कथाप्रसङ्गः। पुं। विषवैद्ये। हे. च.। त्रि। वातुले। त्रिका.।

कथिका। स्त्री। तक्रादिसाधितखाद्यद्रव्यविशेषे। कढ़ीति महाराष्ट्रे। प्रकरणम् यथा—नात्यम्लं मधुरं तक्रं सैन्धवेन तथा युतम्। पिष्टं मरीचं चाणक्यं निःक्षिप्य सुनिधाय च। तप्तस्थाल्यां घृतं वाथ तैलं तप्त्वा च निःक्षिपेत्। तस्मिन्निशां रामठञ्च पश्चात् स्थालीं पिधाय च। तक्रार्द्धं निक्षिपेत्तस्यां पिधाय च पुनः क्षिपेत्। बुद्बुदोत्पत्तिपर्य्यन्तं पक्वा सा कथिकाभिधा। कथिका पाचनी रुच्या लघ्वी च वह्निदीपनी। कफानिलविबन्धघ्नी किञ्चित् पित्तप्रकोपिनी।" वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदनम्। क्ली। मारणे। जटा.।

कदन्नम्। क्ली। कुत्सितान्ने। कदर्य्यान्ने। जटा.।

कदम्बः। पुं। (Anthocephalus Kadamba, Syn. Nauclea Kadamba) स्वनामख्यातवृक्षे। कदम गाछ। मं ऋखंबु। कं कड़ंब। तें कड़िमिचेट्टु। तत्पर्य्यायः,—नीपः प्रियकः हलिप्रियः अशोकारिः निपः (अ.)। कादम्बः (अ. टी.), षट्पदेष्टः प्रावृषेण्यः हरिप्रियः (र.), जालः (मे.), वृत्तपुष्पः सुरभिः लखनाप्रियः कादम्बर्य्यः सीधुपुष्पः जीर्णपूर्णः महाढ्यः कर्णपूरकः। र. मा.। साधारणगुणाः—मधुरः शीतः कषायः लवणः गुरुः सरः विष्टम्भकृत् रुच्यः कफस्तन्यानिलप्रदश्च। "कदम्बस्तिक्तकटुकः कषायी वातनाशनः। शीतलः कफपित्तादिनाशनः शुक्रवर्द्धनः॥ रा. नि. व. ९ भा. पू. १भ.। कदम्बिका तु मधुरा शीतला तुवरा गुरुः। मलस्तम्भकरी चारा रुच्यास्तन्यकफप्रदा। वातला मुनिभिः प्रोक्ता फलं तस्यास्तु शीतलं। तुवरं मधुरं पित्तरक्तदोषहरं मतम्॥ वै. निघ.। अस्य साङ्गः—"नीपो महाकदम्बः स्याद्धाराकदम्ब इत्यपि। द्वितीयोऽल्पप्रसारश्च वृत्तपुष्पः कदम्बकः" इति भेदैः तथा रत्नेऽपि "हारिद्रस्तु रजोबलः। धूलीकदम्बकौ धाराकदम्बः षट्पदप्रियः वृत्तपुष्पः केशराढ्यः प्रावृषेण्यः कदम्बकः। नीपो महाकदम्बोऽपि तथा बहुफलो मतः॥" अ. टी. भ.। सु. सू. ३८ अ. लोध्रादौ। वा. सू. १५ अ. न्यग्रोधादौ। सर्षपवृक्षे। मे. देवताड़वृक्षे। रत्ना.। क्ली। माक्षिके। हे. च।

कदम्बकः। पुं। कदम्बवृक्षे। त्रिका. वनौ.। हरिद्रुवृक्षे। रा. नि. व. ९। सर्षपवृक्षे। प. मु. हे. च.। अश्वस्य पादरोगभेदे। लक्षणं—"कदम्बफलमात्रस्तु मण्डूकीमध्यसंस्थितः। मांसाङ्कुरः कदम्बाख्यः श्लेष्मशोणितसम्भवः॥" ज. द. ३९ अ.।

कदम्बका। स्त्री। कलहंस्याम्। वै. निघ.।

कदम्बदः। पुं। सर्षपे। श. च.।

कदम्बनिर्य्यासः। पुं। कदम्बस्य वेष्टके। कदमेर आठा। च. सू. ४ अ.।

कदम्बपुष्पः। पुं। हरिद्रुवृक्षे। क्ली। कदम्बकुसुमे।

कदम्बपुष्पगन्धः। पुं। कलमशालौ। कनमाधान्। रा. नि. व. १६।

कदम्बपुष्पा। स्त्री। महाश्रावण्याम्। गीरचमुण्डीति प्रसिद्धा। मुण्डीरी। रा. नि. व. ५।

कदम्बपुष्पिका (ष्पी)। स्त्री। महाश्रावणिकायां। मुण्डीरी। हिं गीरचमुण्डी। भा. पू. १भ.। सु. चि. १९ अ.। "कदम्बपुष्पी मन्दारौ।"

कदम्बवायुः। पुं। सुगन्धवायौ।

कदम्बा (म्बी)। स्त्री। देवदालीलतायाम्। रा. नि. व. ३।

कदम्बिका। स्त्री। कदम्बवृक्षे। वै. निघ.।

कदरः (रा)। पुं, स्त्री। A white sort of mimosa. श्वेतखदिरे। पांपड़िखयेर। तें तेल्लतुम्मचेट्टु, वेणुतुरुचेट्टु। तत्पर्य्यायः,—सोमवल्कः (अ.), ब्रह्मदारुः खदिरीपमः। वर्वूरकवृक्षे। काँटा बाबला गाछ। र. मा.। "खदिराकृतिः श्वेतसारः।" वा. सू. १५ अ. असनादिव.। "खदिरकदरभण्डी।" कदरः खदिराकारः श्वेतसारः। सु. सू. ३८ अ. ङ.। च. सू. ४अ. ४१ दशके। क्रकचे। मे.।

कदरम्। क्ली। व्याधिभेदे। कुल आँटी, कड़ा, आमूड़ा। मे. रचिकं। लक्षणम्—"अकरीन्मथिते पादे क्षते वा कण्टकादिभिः। ग्रन्थिः कीलवदुत्सन्नो जायते कदरं हि तत्॥" मा. नि., सु. नि. १३ अ.। पायसभेदे। श. मा.।

कदलः (कः)। पुं। कदलीवृक्षे। पृश्निपर्ण्यां। चाकुलिया। मे.। श. र.।

कदलम्। क्ली। नराङ्कुरे। कपाले। मे. त्रिकं।

कदला। स्त्री। कदलीवृक्षे। पृश्निपर्ण्याम्। चाकुले। शाल्मलीवृक्षे। डिम्बिकायां। मे. त्रिकं।

कदलिका (ली)। स्त्री। (Musa sapientum) स्वनामख्यातवृक्षे। कला गाछ। हिं केरा, सवेज्, केलापेड़्। तें अरटिचेट्टु, वुरुगचेट्टु, दींड़तोगे। तत्पर्य्यायः,—वारणवृषा रम्भा मोचा अंशुमत्फला काष्ठीला (अ.), कदलः वारवृषा वारणवृषा (अ. टी.), सुफला सुकुमारा सकृत्फला गुच्छफला हस्तिविषाणी गुच्छदलिका निःसारा राजेष्टा बालकप्रिया उरुस्तम्भा भानुफला वनलक्ष्मी (रा.) तत्पत्री नगरौषधिः (श.) कदलकः मोचकः रोचकः लोचकः वारवृषा (शब्दर.) वारणवल्लभा चर्म्मन्वती आयतच्छदा तन्तुविग्रहा (त्रि.)। कदली

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुधा—काष्ठकदली, गिरिकदली, सुवर्णकदली, महेन्द्रकदली, कृष्णकदली चेति। "माणिक्य-मर्त्यामृतचम्पकाद्या भेदा कदल्या बहवोऽपि सन्ति। उक्ता गुणास्तत्रधिका भवन्ति निर्दोषता स्वाम्लता च तेषाम्। रा. नि. व. ११। अमृतचम्पक-मर्त्यमाणिक्यादयः इति। भा.। आसां विशेषाः तत्तत्पर्य्याये द्रष्टव्याः। सामान्यतः कदलीगुणाः—शीतला गुर्वी हृद्या स्निग्धा मधुरा पित्तरक्तविकार-योनिदोषाश्मरीरक्तपित्तघ्नी। कदलीफलं मधुरं शीतं विष्टम्भि कफकरं गुरु स्निग्धं पित्तासृग्दाह-क्षतक्षयवातहरञ्च। पक्वफलं—कषायं मधुरं शीतलं पित्तासृघ्नं गुरु मन्दाग्नौ अपथ्यं शुक्रवर्द्धनं क्लमतृष्णा-हरं कान्तिदं दीप्ताग्नौ सुखदं कफरोगकरं दुर्जरं सन्तर्पणञ्चेति। "हृद्यं मनोज्ञं कफवह्निकारि शान्तञ्च सन्तर्पणमेव बल्यम्। रक्तं सपित्तं श्वसनञ्च दाहं रम्भाफलं हन्ति सदा नराणाम्॥ संग्राह्य-पक्वञ्च सुशीतलञ्च कषायकं वातकफं करोति। विष्टम्भि बल्यं गुरु दुर्जरञ्च आरण्यरम्भाफलमेव तद्वत्॥" अत्रि. १७ अ.। कदलीमृगे। कृष्णसार। पृश्निपर्ण्यां। चाकुलिया। मे.।

कदलि(ली)क्षता। स्त्री। कर्कटीभेदे। वै. निघ.।

कदलीकन्दः। पुं। रम्भामूले। कलार एटे। हिं केराकन्द। तें अरटिदुंप। गुणाः—"शीतलः कदलीकन्दो बल्यः केश्योऽस्रपित्तजित्। वह्निकृद्दाह-हारी च मधुरो रुचिकारकः॥" मद. व. ६।

कदलीकुसुमम्। क्ली। रम्भापुष्पे। कलार मोचा वा फूल। गुणाः—"कदल्याः कुसुमं स्निग्धं मधुरं तुवरं गुरु। वातपित्तहरं शीतं रक्तपित्तक्षय-प्रणुत्॥" वै. निघ.।

कदलीजलम्। क्ली। कदलीरसे। कलार जल। गुणाः—"कदल्यास्तु जलं शीतं ग्राहकं मूत्रकृच्छ्रहृत्। मेहं दृषां कर्णरोगं चातिसारञ्च नाशयेत्॥ अस्रिस्रावं रक्तपित्तं विस्फोटं रक्त-पित्तकं। योनिदोषञ्च दाहञ्च नाशयेत्॥" "सारः कदल्याः संग्राही चाग्निग्री गुरुशीतलः। वृद्दाह-मूत्रकृच्छ्रातिसारमेहांश्च सोमकम्। अस्रिस्रावं रक्तपित्तं विस्फोटांश्चैव नाशयेत्॥" वै. निघ.।

कदलीदण्डः (नालः)। पुं। थोड़ इति ख्यातं माचाहृत्गर्भस्थकाण्डवद्भागे। शु. च.। गुणाः—"योनिदोषहरो दण्डः कादल्योऽस्रदरं जयेत्। रक्तपित्तहरः शीतः सुरुच्योऽग्निप्रवर्द्धनः॥"

कदलीमूलम्। क्ली। कदलीमूले। गुणाः—बल्यं वातपित्तघ्नं गुरु च।

कदलीमृगः। पुं। शबलमृगे। "सः प्रायशः पूर्व्वदेशे प्रसिद्धः। स तु व्याघ्रतरक्षुबिड़ालसमानाकारो विलिख्यः।" सु. चि. ८अ.।

कदलीवल्कलम्। क्ली। प्रसिद्धायां कदली-त्वचि। कलार पेटो। गुणाः—तिक्तं कटु लघु वातहरञ्च। वै. निघ.।

कदलीसारः। पुं। कदलीरसे।

कदलीह्या। स्त्री। फललतामेदे। शशा गाछ, काँकुड़ गाछ।

कदश्वः। कुत्सिताश्वे।

कदाख्यम्। क्ली। कुष्ठौषधौ। कूड़। भ. च.।

कदाचि(न्)। क्ली। कुत्सितनेचे। टेरा।

कदुष्णम्। त्रि। ईषदुष्णे। अम.। क्ली। उष्ण-तायाम्। अम.। तत्पर्य्यायः,—कोष्णं कवोष्णं मन्दोष्णं।

कद्रुः। पुं। पिङ्गलवर्णे। प्रियालवृक्षे। अ. टी.।

कनकः। पुं। कासमर्द्दवृक्षे। रा. नि. व. ४। जयपालवृक्षे। रक्तपलाशवृक्षे। च. चि. १अ.। नागकेशरवृक्षे। रक्तकाञ्चनफूलेर गाछ। चम्पक-वृक्षे। काँटालिचाँपा वा चाँपाफूलेर गाछ। कृष्णागुरुवृक्षे। मे. कविकं। धूस्तूरवृक्षे। प. मु.। "निशाकनककल्काभ्यां।" कनकगुग्गुलौ। रा. नि. व. १२। लाचातरौ। भ. मा.। कृष्ण-धूस्तूरे। रा. नि. व. १०। कनकधूतरा। भैष. वातरक्तचि. विषतिन्दुतैले। क्ली। स्वर्णे। टङ्कणे।

कनककन्दपरसः। पुं। वाजीकरणे औष-धम्। अयं हेमाङ्गसुन्दरतुल्य एव केवलमत्र स्वर्णं वैक्रान्तं कान्तलौहञ्च रसपादं देयम्। पारा, गन्धक प्रत्येक समभाग। कान्तलोह, वैक्रान्त, एवं स्वर्ण प्रत्येके पारार चतुर्थांश। अग्रे कज्जलि करिया ताम्र-पात्रे काकडुमुरेर रस, सरिषार तैल, काल धुतुरार रस द्वारा प्रत्येके तिन दिन माड़िबे। शुकाइले बालुकायन्त्रे मन्द मन्द पाक करिया, बालुका तप्त हइले जाल निवा-इबे। शीतल हइले नामाइया औषध ग्रहण

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करिबे। अनुपान घृत चिनि ও মধু। रस. र.।

कनकगैरिकम्। क्ली। अत्यन्तरक्तगैरिके। সোনাগেরি। भा. म. ४भ. विषचि.।

कनकचम्पकः। पुं। चम्पकविशेषे। কনক-চাঁপা।

कनकजोङ्गवः। पुं। राले। ধুনো। रा. नि. व. १२।

कनकतैलम्। क्ली। क्षुद्ररोगाधिकारे तैलम्। "मधुकस्य कषायेन तैलस्य कुड़वं पचेत्। कल्कैः प्रियङ्गुमञ्जिष्ठाचन्दनीत्पलकेशरैः। कनकं नाम तत्तैलं सुखकान्तिकरं परम्। अभीरुनीलिकाव्यङ्ग-नाशनं परमार्च्चितम्॥" च. द.। तिलतैल १ प्र. क्वाथार्थं—यष्टीमधु १ प्र. জল ১६ প্র. শে. ४ প্র.। कल्कार्थं—प्रियङ्गु मञ्जिष्ठारक्तचन्दन-नीलोत्पलनागे-श्वराणां प्र. ४ তো.।

कनकपरागः। पुं। सुवर्णरेणौ।

कनकपलः। पुं। स्वर्णादिपरिमापकषोड়শ-माषके। १६ মাষা। धारा.।

कनकपुष्पिका (ष्पी)। स्त्री। गणिकारि-कायाम्। द्रुमोत्पले। ওলট কম্বল। वै. निघ.।

कनकप्रभः। पुं। सीमलतामेदे। सु. चि. २९ अ.। See सीमः।

कनकप्रभा। स्त्री। महाज्योतिष्मतीलतायाम्। বড় লতাফট্‌কী। रा. नि. व. ३। पीतयूथिकायां। स्वर्णयूथिकायाम्। যুঁই। रा. नि. व. १०। ज्वरातिसारोक्ते रसविशेषे। अत्र सुवर्णबीजं कृष्ण-धुस्तूरबीजम्। मरालपादं थानकुनीति ख्यातं। जयाङ्गिः विजयाक्वाथैः। "सुवर्णबीजं मरिचं मराल-पादं कणा टङ्कणकं विषञ्च। गन्धं जयाङ्गिर्दिवसं विमर्द्य गुञ्जाप्रमाणां वटिकां विदध्यात्॥" कालधुत-रार बीज, মরিচ, থানকুনী, পিপুল, সোহাগার খই, বিষ, গন্ধক সমভাগ। সিদ্ধির রসে মর্দ্দন। र. सा. सं.।

कनकप्रसवा। स्त्री। स्वर्णकेतकीवृक्षे। रा. नि. व. १०।

कनकप्रसूनः। पुं। धूलीकदम्बे। वै. निघ.।

कनकमोचा। स्त्री। स्वर्णकदल्याम्। চাঁপা-কলা।

कनकरम्भा। स्त्री। सुवर्णकदल्याम्। "চাঁপা কলা। रा. नि. व. ११।

कनकरसः। पुं, क्ली। हरितालि। रा.नि.व. १३।

कनकलोङ्गवः। पुं। सर्जरसे। ধুনা। रा. नि. व. १२।

कनकवतीरसः। पुं। अर्शोऽधिकारि रसः। पाठः—"शुद्धसूतं समं गन्धं तालसिन्धूत्थलाङ्गली। फलत्रिकोपलैकैकं लशुनञ्च चतुष्पलं। कारवेल्या द्रवैर्मर्द्य दिनैकं वटकीकृतं। गुञ्जामात्रं सदा खादेत् पायुजन्वापि नाशयेत्। रक्तवातकफीत्थानि अर्शांसि नाशयेद्ध्रुवम्। वटी कनकवती नाम अनुपानञ्च कथ्यते। भल्लातचित्रफला दन्ती वह्निचूर्णं समं समं। सैन्धवं सर्व्वतुल्यं स्याद्भर्जयेत् खर्परे चिरं। मृद्वग्निना भवेत्सिद्धं। कर्षतक्रं पिबेन्नरः॥ পারা, গন্ধক, হরিতাল, সৈন্ধবলবণ, ঈশলাঙ্গুলিয়া, ইন্দ্রযব, তিৎলাউ প্রত্যেকে ১ পল, রশুন ৪ পল, উচ্ছেপাতার রসে মর্দ্দন। বটী ১ কুঁচ। रस. र.।

कनकवीजम्। क्ली। धुस्तूरबीजे। कनकसुन्दर-रसे। See कनकसुन्दररसः।

कनकसङ्कोचरसः। पुं। कुष्ठाधिकारे रसः। पाठः—"मृतस्वर्णाभ्रकं शुण्ठं शुद्धसूतं त्रिभिः समं। अम्लैर्मर्द्यन्तु तल्लोलं पिष्ट्वा तुल्यञ्च गन्धकं। कटुतैल-युतं पाच्यं लौहे च मृदुनाग्निना। द्रवे जीर्णे विचू-र्य्याथ वह्निमूलकटुत्रिकैः। त्वग्विड়ঙ্গবিষৈस्तुल्यै-स्त्रिगुणं त्रिफला विषात्। अजामूत्रे दिनं पिष्ट्वा गुञ्जैकां भक्षयेद्वटीम्॥" क्रमेण २ गुञ्जा। अनुपानं वाकुचीतैलं निष्कमितं। रस. र.। স্বর্ণ, অভ্র, শুঁঠ এক এক ভাগ, পারা ৩ ভাগ, গন্ধক ৩ ভাগ, অম্লরসে পেষণ ও গোলকীকরণপূর্ব্বক সেই গোলক লৌহপাত্রে সর্ষপতৈলের সহিত পাক করিয়া, ভাজা ভাজা হইলে নামাইয়া চূর্ণ করিবে ও তাহাতে চিতামূল, ত্রিকটু, গুড়ত্বক্, বিড়ঙ্গ, বিষ প্রত্যেকে এক এক ভাগ ও ত্রিফলা ৩ ভাগ দিয়া ছাগমূত্রে মাড়িয়া বটী করিবে।

कनकसुन्दरसः। पुं। ज्वरातिसाराधिकारे रसः। विजयाद्रवैः भक्षाशनक्वाथैः। कनकस्य बीजं धुस्तूरबीजम्। अत्र टङ्कणस्थाने अभ्रकं पठन्ति केचित्। "शुद्धसूतं समं गन्धं मरिचं टङ्कणं तथा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्णवीजं समं सर्व्वैः भार्गीद्रावैर्दिनार्द्रकं। सूततुल्यं मृतञ्चाभं रसः कनकसुन्दरः॥" माचा २र. । अन्यः —"हिङ्गुलं मरिचं गन्धं पिप्पली टङ्गणं विषं। कनकस्य च बीजानि समांशं विजयाद्रवैः। मर्द्दयेद्याममात्रन्तु चणमात्रा वटी कृता॥" हिङ्गुल, मरिच, गन्धक, पिपुल, सोहागार थई, विष, धुतुरा-बीज समान भागे सिद्धिर क्वाथे मर्द्दन करिबे। वटी चणकप्रमाण। भैष.। तृतीयः यक्ष्माधिकारे। तच—कृशानुः चित्रकः। तुर्य्यभागेन चतुर्थभागेन। पाठः—रसस्य तुर्य्यभागेन हैमभस्म प्रयोजयेत्। मनःशिला गन्धकञ्च तुल्यं माक्षिक-तालकं॥ विषं टङ्गणकं सर्व्वं रसतुल्यं प्रदापयेत्। मर्द्दयेत्सर्व्वमेकत्र खल्लपात्रे च निर्म्मले। जयन्ती-भृङ्गराजोत्थैः पाठाया वासकस्य च। अगस्तिलाङ्ग-लाग्नीनां स्वरसैश्च पृथक् पृथक्। भावयित्वा विशो-ष्याथ पुनश्चार्द्रकवारिणा। सप्तधा भावयित्वा च रसः कनकसुन्दरः॥ गुञ्जाद्वयं वयं वास्य राजयक्ष्म-प्रशान्तये। मधुना पिप्पलीभिर्वा मरिचैर्वा घृता-न्वितं॥ सन्निपाते प्रदातव्यमार्द्रकस्य रसेन वै॥ जयपालरजोभिर्वा गुल्मिने शूलरोगिणे। अम्लवर्ज्यं भवेत्पथ्यम्...॥ र. सा. सं.। पारा, मनछाल, गन्धक, तुँते, स्वर्णमाक्षिक, हरितাল, বিষ, সোহাগা প্রত্যেকে সমান ভাগ, পারার চতুর্থাংশ স্বর্ণ। জয়ন্তী, চিতে, বাসক, বক, ঈশলাঙ্গুলি, ভীমরাজ, আকনাদি ইহাদের রসে এক এক ভাবনা। পরে আদার রসে ৭ ভাবনা।

कनकस्तम्भा। स्त्री। सुवर्णकदलीवृक्षे। চাঁপা কলা গাছ। रा. नि. व. ११।

कनकक्षारः। पुं। टङ्गणक्षारे। সোহাগার খই। रा. नि. व. १३।

कनकक्षीरी। स्त्री। सुवर्णक्षीर्य्याम्। শেয়াল-কাঁটা, সোণাথিরুই। पीतकण्टकधुस्तूरे। सात-लायाम्।

कनकान्त(र)कः। पुं। कोविदारवृक्षे। রক্ত কাঞ্চন বৃক্ষ। रा.नि. व. १०। See काञ्चनारः।

कनकारिष्टम्। क्ली। अर्शोधिकारे चरकोक्त अरिष्ट विशेषे। ग्रहणी रोगेऽपि प्रशस्तमेतत्। चर. चि. ९म अ.।

कनकालुका। स्त्री। सुवर्णभृङ्गारे। হেলা.।

कनकासवः। पुं। हिक्काश्वासे आसवः। पाठः "संचुद्य कनकं शाखामूलपत्रफलैः सह। ततश्चतुष्पलं ग्राह्यं वृषमूलत्वचस्तथा। मधुकं मागधी व्याघ्री केशरं विश्वभेषजं। भार्गी तालीशपत्रञ्च सचूर्णैषां पलद्वयम्। संगृह्य धातकीप्रस्थं द्राक्षायाः पल-विंशतिम्। जलद्रोणद्वयं दत्त्वा शर्करायास्तुलां तथा। क्षौद्रस्यार्द्धतुलाञ्चापि सर्व्वं संमिश्र्य यत्नतः। भाण्डे निक्षिप्य चाद्वत्थ निदध्यान्मासमात्रकम्..."॥ धुतू-রার ফল মূল পত্র শাখা মিলিত ৪প. বাসক-মূলের ছাল ৪ প. পিপুল, যষ্টিমধু, কণ্টিকারী, নাগেশ্বর, শুঁঠ, বামুনহাটী, তালীশপত্র প্রত্যেকের চূর্ণ ২ প. ধাইফুল ১৬ প. দ্রাক্ষা ২০ প. জল ১২৮ শ. শর্করা ১২॥০ শ. মধু ৬।০ সের একত্র কলসে ১ মাস রাখিয়া ছাঁকিয়া লইবে। भैष.।

कनकाह्वः (यः)। पुं, क्ली। श्वेतधुस्तूरे। तण्डुलीयशाके। वै. निघ.। जैपालवृक्षे। ध. मु.। धुस्तूरवृक्षे। रा. नि. व. १०। नागकेशरवृक्षे। रा. नि. व. ६। र. मा.।

कनकोद्भवः। पुं। महासर्जवृक्षे। वै. निघ.।

कननः। त्रि। काणे। काणा। श्र. च.।

कनिक्या। स्त्री। समितायाम्। श्र. चि.।

कनिचिः। स्त्री। शूरणे। ওল। प. मु.। गुञ्जायां। কুঁচ।

कनिष्ठकम्। क्ली। शूकतृणे। श्र. च.।

कनिष्ठा। स्त्री। अङ्गुष्ठात्पञ्चमाङ्गुली। কড়ে' আঙ্গুল। रा. नि. व. १८।

कनी। स्त्री। कन्यायाम्। हे. च.।

कनीचिः। स्त्री। गुञ्जालतायां। কুঁচ গাছ। श्र. र.। सपुष्पलतायां। उणादिकोषः।

कनीनिका (नी)। स्त्री। अक्षितारके। रा. नि. व. १८। अश्वस्य नासासमीपभागे। ज. द. २अ.। कनिष्ठाङ्गुलौ। मे. कचतुष्कं।

कनीयसम्। क्ली। ताम्रे। हे. च.।

कनीयान्। पुं। सीमलताभेदे। सु. चि. २९ अ.। See सीमः। वि। अनुजे। त्रिका.। अत्यल्पे। मे.।

कनीयःपञ्चमूलम्। क्ली। त्रिकण्टकवृक्षादीय-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथक्पर्णीविदारिगन्धासु । विकण्टकं गोक्षुरे । विदारिगन्धा शालपर्णी । सु. स. ३८ अ. ।

कनेरा । स्त्री । हस्तिन्याम् । वै. निघ. ।

कन्तुः । पुं । हृदये । वै. निघ. ।

कन्था । स्त्री । स्यूतकर्पटे । काँथा । अम. । चीरे । तूलपूर्णगाववस्त्रे । लेप. ।

कन्थारी । स्त्री । स्वनामख्यातवृक्षे । फणिमनसा । मं कं कांथारी, कांतरु, फणीनिवडुंग कोङ्कणे । गुणाः—कटुतिक्तोष्णा वातकफघ्नी शोथघ्नी दीपनी रुचिकरी रक्तपित्तरुजाघ्नी ज्वरघ्नी च । रा. नि. व. ८ ।

कन्दः । पुं, क्ली । (Arum campanulatum) A bulbous or tuberous root. फलहीनौषधिमूले । योनिरोगविशेषे । योनिकन्द रोग । See कन्दरोगः । इन्दीवरे । रा. नि. व. २३ । रक्तमूलके । कासालुके । श्वेतशुक्लाबहुपुटकन्दविशेषे । सर्पच्छत्रकमिति लोके । ङ. । सु. सू. ३९ अ. पित्तशमने । हस्तिकन्दे । वै. निघ. अलस. चि. हस्तिकर्णयोग. । शूरणकन्दे । र. सा. सं. । सि. यो. बाहुशालगुड़े । च. द. अ. पि. चि. अभयगुडिः । शालूके । प. मु. । शल्लकम इति प्रसिद्धे मूलविशेषे । गञ्जने । रा. नि. व. ७ । सुगन्धितृणविशेषे । रामकर्पूर । प. मु. । गुड़े, शर्करायां । दलो, ढूरो । च. द. अर्शःचि. काङ्कायनमोदके । पिण्डालुके । सुखनीति ख्याते कन्दे । शस्यमूले । मे. दद्रिकं ।

कन्दकः । पुं । सुखालौ । रा. नि. व. ७ । वनशूरणे । वन ओल । भैष. कुष्ठ. चि. कन्दर्पसारतैले ।

कन्दगुडूची । स्त्री । गुडूचीविशेषे । गुणाः—"कन्दोद्भवा गुडूची च कटूष्णा सन्निपातहा । विषघ्नी ज्वरभूतघ्नी वल्लीपलितनाशिनी ॥" रा. नि. व. ३ ।

कन्दग्रन्थिः । पुं । पिण्डालुनामकन्दशाके । रा. नि. व. ७ । श्वेतराजालुके । वै. निघ. ।

कन्दजविषम् । क्ली । कन्दजातविषे । तच्चाष्टविधम् । यथा—"शृङ्गकं मुस्तकं कौशं दर्वीकं सर्षपं तथा । सैकतं वत्सनाभञ्च शृङ्गी चैव विशेषतः ॥ इति । एतानि औषधार्थं ग्राह्याणि । अपराणि च दश नामानुरूपाणि न भैषज्यरसायने प्रयोज्यानि । तच्छुद्धिः—"विषभागांशकवत् स्थलान् क्वत्वा तु भाजने । तव गोमूत्रकं क्षिप्त्वा प्रत्यहं नित्यनूतनं । शोषयेच्चिदिनं पूर्वं शृत्वातीवातपे ततः । प्रयोगेषु प्रयुञ्जीत भागमात्रेन तद्विषम् ॥" इति ।

कन्दटम् । क्ली । शुक्लीवल्ले । श्वेतशुन्दि । कोंजी इति पश्चिमदेशे । श. र. ।

कन्दतृणम् । क्ली । तृणविशेषे । गुण्ठतृण । वै. निघ. ।

कन्दनालका । स्त्री । गोजिह्वायां । वै. निघ. ।

कन्दपञ्चकम् । क्ली । तैलकन्दाहिनेवकन्दसुकन्दक्रीडकन्दकदन्तीकन्देषु । गुणाः—"कन्दस्य पञ्चकं प्रोक्तं तासादिरसमारकं । सर्व्वरोगहरं प्रोक्तमेतद्वै स्निग्धपञ्चकम् ॥" वै. निघ. ।

कन्दपत्रः । पुं । महातालीशपत्रे । वै. निघ. ।

कन्दफला । स्त्री । क्षुद्रकारवेल्लके । उच्छे गाछ । विदार्य्यां । भूँइकुमड़ा । रा. नि. व. ७ ।

कन्दबहुला । स्त्री । विपर्णीनामकन्दे । वन कांपासी । रा. नि. व. ७ ।

कन्दमूलम् । क्ली । मूलके । मूला । हिं मूलि । रा. नि. व. ७ ।

कन्दरः । पुं । श्वेतखदिरे । क्षुद्ररोगविशेषे । See कदरः । क्ली । आर्द्रके । गुरुच्यां । रा. नि. व. ६ । गिरिगुहायाम् ।

कन्दरालः (कः) । पुं । क्षुपवृक्षे । पाकुड़ गाछ । गर्दभाण्डवृक्षे । गान्धीभाट इति भाषा ।

कन्दरुहः । पुं । कटुशूरणे । वै. निघ. ।

कन्दरोगः । पुं । An affection of the feminine organ considered as a fleshy excrescence, but apparently prolapsus uteri. योनिरोगविशेषे । योनिकन्द । स च वातादिभेदेन चतुर्विधः । तस्य निदानलक्षणे—दिवानिद्रातिमैथुनादि - कारणैः दोषाः प्रकुपिताः पूयरक्ताभं सन्दारफलसदृशं कन्दमुत्पादयन्ति । "दिवास्वप्नादतिक्रीधाद्व्यायामादतिमैथुनात् । चताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा ॥ पूयशोणितसङ्काशं लकुचाकृतिसन्निभं । उत्पद्यते तदा योनौ नाम्ना कन्दः स योनिजः ॥ रुचं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् । दाहरागज्वरयुतं विद्यात्पित्तकन्तु तम् ॥ नीलपुष्पप्रती-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काश्यं कण्डूमन्तं कफात्मकं। सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः॥ मा. नि.।

कन्दरोद्भवा। स्त्री। क्षुद्रपाषाणभेदवृक्षे। पाथरकुचा। रा. नि. व. ५।

कन्दरोहिणी। स्त्री। कन्दगुडूच्यां। रा. नि. व. ३।

कन्दर्पकूपः। पुं। योनौ।

कन्दर्पजीवः। पुं। कामजवृक्षे। रा. नि. व. ५।

कन्दर्पज्वरः। पुं। कामे।

कन्दर्पमुशलः। पुं। Membrum virile. लिङ्गे। विका.।

कन्दर्पसारतैलम्। क्ली। कुष्ठाधिकारे तैलम्। यथा—कटुतैल ४ श.। क्वाथार्थ—छातिमछाल, कालियाकड़ा, गुलञ्च, निमछाल, शिरीषछाल, घोड़ानिम् वा तित्पलता, जयन्तीपत्र, तित्लाउ, राखालशशार मूल वा गोरक्षचाकुले, हरिद्रा प्रत्येके १० प. जल ६४ श. शेष. १६श.। गोमूत्र १६ श. शोणालुपाता, भीमराज, जयन्तीपत्र, धुतुरापाता, हरिद्रा वा आम्ला, सिद्धि, खर्জ্জুरपत्र, गोमय, आकन्दपत्र, सिजेर पाता प्रत्येकेर स्वरस ४श.। कल्कार्थ—माकालफल, वच, ब्रह्मीशाक, तित्लाउ, चितामूल, गोयालिया, कुँचिला, मनछाल, आम्ला, खुदेनटे, गेँटेला, शोणालि, आकन्द-आटा, कालकासन्दा, ঈशের मूल, आउচ, मञ्जिष्ठा, घोड़ानिम् वा तित्पलता, राखालशशामूल, विछातिमूल, गन्धभाद्दुलिया, हापरमाली, मूर्व्वा, छातिमछाल, कुड़चिछाल, निम्छाल, घोड़ानिम्, गुलञ्च, सोमराजीमूल, हाकुचबीज, चाकन्दाबीज, ध'নে, भीमराज, यष्टिमधु, कुन्दुरुखोटी, (कन्दकमिति पाठे) वन ওল, शटी, कट्की, दारुहरिद्रा, তেউড়ী, पद्मकाष्ठ, पिपूलमूल, অগুরু, कुড়, कट्फल, जटामांसी, कर्पूर, सिद्धির পাতা, এলাচ, গুড়ত্বক্, টুমারিফল, हरीतकी, বহেড়া প্রত্যেके २ তোলা। सा. को. भैष. पाठः संग्रहे न्यूनः।

कन्दलः। पुं। कपालि। कनके। धरणिः। कृष्णसारमृगे। हे. च.। क्ली। श्लीन्ध्रपुष्पे। चिका.। कमलबीजे। कदलीपुष्पे। आर्द्रके। रा. नि. व. ६। शूरणे। भा. पू. १भ. গা. व.। गण्डस्थले। अङ्कुरे। कोमलशाखायाम्।

कन्दलता। स्त्री। मालकन्दे। रा. नि. व. ७। क्षुद्रकारवल्लाम्। वै. निघ.।

कन्दलिन् (ली)। पुं, स्त्री। पद्मबीजे। पद्मबीज। रा. नि. व. १०। सु. सू. ३९ अ. पित्तशमने। मृगविशेषे। गुल्मभेदे। से. लक्षिके।

कन्दलीकुसुमम्। क्ली। श्लीन्ध्रे। কোড়কছাতা। श. च.।

कन्दवर्गः। पुं। कन्दजातिमात्रे। গেঁড়ো, গেঁড়্। यथा—विदारीकन्दशतावरीमृणालविसकशेरुशृङ्गाटपिण्डालुमध्वालुहस्त्यालुकाष्ठालुशङ्खालुरक्तालुकेन्दीवरोत्पलकन्दादिषु। गुणाः—रक्तपित्तहराणि शीतानि मधुराणि गुरूणि बहुशुक्रकराणि स्तन्यवृद्धिकराणि च। सु. सू. ४६ अ.। "शूरणः पिण्डपिण्डालू पलाण्डुर्गृञ्जनस्तथा। ताम्बूलपर्णकन्दः स्यात् हस्तिकन्दस्तथा परः। वराहकन्दः अप्यन्यः कन्दस्याष्टौ इमे स्मृताः॥" अचि. १६ अ.।

कन्दवर्द्धनः। पुं। Esculent root. शूरणे। रा. नि. व. ७। कटुशूरणे। वै. निघ.।

कन्दवल्ली। स्त्री। बन्ध्याकर्कोटक्याम्। रा. नि. व. ३। भूमिकुष्माण्डे। वै. निघ.।

कन्दविषम्। क्ली। यस्य कन्दे विषं वर्त्तते। कालकूट-वत्सनाभ-सर्षप-पालक-कर्द्दम-वैराटक-मुस्तक-शृङ्गी-पुष्करीक-मूलक-हलाहल-महाविष-कर्कटकानीति त्रयोदश कन्दविषाणि। एषु वत्सनाभानि चत्वारि, मुस्तके द्वे, सर्षपानि षट्, शिष्टानि एकैकमेवेति। "गुणाः—कन्दजानि तु तीक्ष्णानि तेषां वक्ष्यामि विस्तरं। स्पर्शाज्ञानं कालकूटे वेपथुः स्तम्भ एव च। ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता। सर्षपे वातवैगुण्यमानाहो ग्रन्थिजन्म च। ग्रीवादौर्ब्बल्यवाक्सङ्गौ पालकेऽनुमताविह। प्रसेकः कर्द्दमाख्ये तु विड्भेदो नेत्रपीतता। वैराटकेनाङ्गदुःखं शिरोरोगश्च जायते। गात्रस्तम्भो वेपथुश्च जायते मुस्तकेन तु। शृङ्गीविषेणाङ्गसादो दाहोदरविवृद्धयः। पुष्करीकेण रक्तत्वमक्षीर्द्वेस्तथोदरे। वैवर्ण्यं मूलकैश्छर्द्दिर्हिक्काशीफाप्रमूढताः। चिरेणोच्छ्वसिति श्यावो नरो हलाहलेन वै। महाविषेण हृदये ग्रन्थिशूलोद्गमो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्षम्। कर्कटेनोत्पतथूर्द्धं हसन्दन्तान्दशत्यपि। कन्दजान्युत्पवीर्य्याणि प्रयुक्तानि तथोदग्र। कन्दमूलं तथा तीक्ष्णं सूक्ष्मसारगुरुवायि च। विकाशि विशदञ्चैव लघुपाकि च तत् स्मृत। सर्व्वाणि कुशलैर्ज्ञेयान्येतानि दशभिर्गुणैः॥" सु. कल्प. २अ.।

कन्दशाकः। पुं। See कन्दवर्गः।

कन्दशालिनी। स्त्री। बन्ध्याकर्कोटक्याम्। वै. निघ.।

कन्दशूरणः। पुं। शूरणकन्दे। ओल, कटु ओल। रा. नि. व. ७।

कन्दसंज्ञम्। क्ली। (Prolapsus uteri.) योन्यर्शसि। योनिरक्तरोगे। चिकि.। See कन्दः and कन्दरोगः।

कन्दा। स्त्री। कन्दगुडूच्याम्। वै. निघ.।

कन्दाढ्यः। पुं। धारणीनामसहाकन्दशाके। धरणीकन्द। रा. नि. व. ७। वै. निघ.।

कन्दामृता। स्त्री। कन्दगुडूच्यां। रा. नि. व. २।

कन्दार्हः। पुं। कन्दशूरणे। रा. नि. व. ७।

कन्दालुः। पुं। विषर्णीलतायाम्। कासालुके। धारणीनामसहाकन्दशाके। रा. नि. व. ७।

कन्दिरी। स्त्री। लज्जालुकायाम्। श. चि.।

कन्दी। पुं। कटुशूरणे। रा. नि. व. ७।

कन्दुः। पुं, स्त्री। लौहमयचुल्लपात्रे। तांওরা। तत्पर्य्यायः,—स्वेदनी। अ.। हला.। सुराकरणपात्रे। गेण्डुके।

कन्दुकम्। क्ली। पूगफले। अङ्कुरे। वै. निघ.।

कन्दुपक्वः। त्रि। जलौषसेकं विना केवलपाचे अग्निना भृष्टखण्डुलादौ। यथा—"कन्दुपक्वानि तैलानि पायसं दधि शक्तवः। द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपीति" स्मृतिः।

कन्देक्षुः। पुं। काशभेदे। केशे। वै. निघ.।

कन्दोटः। पुं, क्ली। शुक्लोत्पले। कुमुदे। नीलोत्पले। श. र.।

कन्दोतः। पुं। कुमुदे। चिका.। श्वेतपद्मे। शर.।

कन्दोत्थम्। क्ली। नीलोत्पले। नीलशुन्दि। रा. नि. व. १०।

कन्दोद्भवा। स्त्री। कन्दगुडूच्यां। रा. नि. व. ३। क्षुद्रपाषाणभेदायाम्। रा. नि. व. ५।

कन्दौषधम्। क्ली। आर्द्रके। वै. निघ.।

कन्धः। पुं। सेधे। शब्दर.। अभ्रकधातौ। के.।

कन्धरः। पुं। सारिवशाके। सेधे। क्ली। ससारस्य दध्नः तक्रं कन्धरमित्यते। कु. टी. श्रीकण्ठः। सक्षेहं दधि कान्धरं। सि. यो. षट्कन्धरतैले।

कन्धरा। स्त्री। मानविशेषे। वै. निघ.। ग्रीवायाम्। रा. नि. व. १८।

कन्धिः। स्त्री। ग्रीवायाम्। हारा.। पुं। समुद्रे।

कन्धुकः(कः)। पुं। भूमिवदरे। आरण्यवदरे। वन कुल। वै. निघ.।

कन्नम्। क्ली। मूर्च्छायाम्। श. मा.।

कन्यका। स्त्री। गृहकन्यायाम्। घृतकुमारी। रा. नि. व. ५। कन्यायाम्। इष्टौ।

कन्यसा। स्त्री। कनिष्ठाङ्गुली।

कन्या। स्त्री। घृतकुमार्य्याम्। घृतकुमारी। रा. नि. व. ५। स्थूलैलायाम्। रा. नि. व. ६। वाराहीनामसहाकन्दशाके। रा. नि. व. ७। कुमार्य्यां। रा. नि. व. १८। नार्य्याम्। महौषधिविशेषे। See ओषधिः। बन्ध्याकर्कोटक्यां। रा. नि. व. ३। (Aloes perpoliata.) मुषब्बर इति ख्यातद्रव्ये। बन्दायां। बान्दरा। कन्दगुडूच्यां। वै. निघ.।

कन्याटः। पुं। जम्पटे। कामुक। हारा.। आभ्यन्तरघट्टे।

कन्यिका। स्त्री। कन्यकायाम्।

कन्युषम्। क्ली। वस्त्रपुच्छे। हारा.। बन्ध्याकर्कोटकीफले। भा. पू. १भ.।

कपटम्। क्ली। चीड़ादेवदारुणि।

कपटचीड़ा। स्त्री। चीड़ानामदेवदारुविशेषे। रा. नि. व. १२।

कपटा। स्त्री। क्रमुकत्वचि।

कपटिनी। स्त्री। चीड़ानामगन्धद्रव्ये देवदारौ वा। रा. नि. व. १२।

कपटी। स्त्री। परिमाणभेदे। एक आँकाड़। श. र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपटेश्वरी। स्त्री। श्वेतकण्टकार्य्याम्। रा. नि. व. ४। ह्रस्वबृहत्याम्। वै. निघ.।

कपर्दः। पुं। वराटके। कड़ि। तत्पर्य्यायः,—उद्वाहनी (हे.), वराटः वराटकः कपर्दः वराटिका चराचरः चरः वर्ज्रः बालक्रीड़कः। तद्भेदा यथा—सुवर्णवर्णा सिंही धूम्रवर्णा व्याघ्री पीतपृष्ठा सितोदरा मृगी श्वेतवर्णा हंसी विदन्ता नातिदीर्घा च। गुणाः—कफुतिक्तोष्णकर्णशूलव्रण-गुल्मशूलनेत्रदोषनाशित्वानि। रा. नि. व. १३। "कपर्दः कटुकश्चोष्णो ह्रष्यश्चाग्निप्रदीपनः। तिक्तः शीतः कर्णशूल-व्रण नेत्ररुजापहः। ग्रहणी-गुल्म-शूलानि परिणामं क्षयं तथा। वात कफं नाशयतीत्येवं प्रोक्तो मनीषिभिः॥" वै. निघ.। शीधनं शङ्खशब्दे मृग्यम्।

कपर्दकरसः। पुं। रक्तपित्ताधिकारे रसः। "सूतं वा मूर्च्छितं सूतं कार्पासपुष्पजैर्द्रवैः। मर्द्दयेद्दिनमेकन्तु तेन पूर्य्या वराटिका। निरुध्य चान्धमूषायां भाण्डे रुद्वा पुटे पचेत्। उद्धृत्य चूर्णयेच्चूर्णं मरिचद्विगुणैः सह। गुञ्जैकैकं घृतैर्लेह्यं रक्तपित्तं नियच्छति। कपर्दकरसो नाम असाध्यं साधयत्यलम्। उदुम्बरफलं पक्वं घृतैः पाच्यं सितायुतं। भक्षयेन्मरिचैर्युक्तमनु स्याद्रक्तपित्तनुत्॥" रस. र.। कार्पासफूलेर रसे एकदिन मर्द्दित मूर्च्छित पारद २ तो. कड़ির ভিতর ভরিয়া কড়ির মুখ রুদ্ধ করিবে। পরে সেই কড়ি অন্ধমূষাযন্ত্রে রাখিয়া পুটপাক করিবে। শীতল হইলে তুলিয়া ৪ তো. মরিচের সঙ্গে একত্র চূর্ণ করিবে। মাত্রা ১ কুঁচ।

कपर्दा। स्त्री। वराटके। वै. निघ.।

कपर्दिः। पुं। कपर्दके। रा. नि. व. १३।

कपर्दिका। स्त्री। वराटिकायाम्।

कपर्दिकाक्षः। पुं। काचाक्षपक्षिणि।

कपाटम्। क्ली। द्वाराच्छादके। कपाट। तत्पर्य्यायः—अररं (अ.) कवाट: कपाटी कवाटी अररी अररिः (अ. टी.) द्वारकण्टकं असारं (शब्दर.)।

कपाटशयनम्। क्ली। उत्तानशयने। सु. चि. २ अ.।

कपाटसन्धिकः। पुं। अभ्यन्तरदीर्घैकपालि-रितराल्पपालिरित्येवं कर्णवन्मनाकृतिविशेषे। सु. सू. १६ अ.।

कपाटिनी। स्त्री। चीड़ानामदेवदारुभेदे। गन्धकाष्ठविशेष। रा. नि. व. १२।

कपालः। पुं, क्ली। मृण्मयघटादिखण्डे। খাপড়া, খোলাকুচি। रा. नि. व. १८। भा. म. ४ भ. सु. रो. चि.। मस्तकास्थिषु। तानि च नितम्ब-तालुदेशांसदेश-मस्तक-गण्डस्थल-जानु-शङ्ख-वङ्क्षण-शिरोऽस्थीनि। सु. शा. ५ अ.। काकादनीवृक्षे कोकिलाक्षवृक्षे।

कपालकुष्ठम्। क्ली। महाकुष्ठभेदे। अस्य लक्षणम्—"कृष्णकपालिका-प्रकाशानि कपाल-कुष्ठानि।" सु. नि. ५ अ.। "कृष्णारुणं कपालाभं यद्दुश्चं परुषं तनु। कपालतोदबाहुल्यं तत् कुष्ठं विषमं स्मृतम्॥" भा.।

कपालनालिका। स्त्री। तर्कुर्य्याम्। টেকো। विका.।

कपालरोगः। पुं। शिरोरोगे।

कपालास्थि। क्ली। स्वनामख्यातशरीरमध्यस्थ-कर्परसदृशास्थिनि। "जानुनितम्बांसतालुगण्डशङ्ख-शिरोऽस्थीनि तन्नाम्नाभिधीयन्ते"। सु. शा. ५ अ.।

कपालिका। स्त्री। दन्तरोगविशेषे। तल्लक्षणं —कपालेष्विव दीर्घेषु दन्तानां सैव शर्करा। कपालिकेति पठिता सदा दन्तविनाशिनी॥ मा. नि. सु. नि. १६। शृङ्गकर्परिकायाम्। सु. चि. १ अ.।

कपाली। स्त्री। विड़ङ्गायाम्। रा. नि. व. ६। हारीपरिस्थितकाष्ठविशेषे।

कपिः। पुं, स्त्री। वानरे। রক্ত। सिल्हके। शिलारसे। रा. नि. व. १२। आम्रातके। शूकशिम्बयाम्। करञ्जविशेषे। शु. च.।

कपिकच्छुः (च्छूः)। स्त्री। शूकशिम्बयाम्। आलाकुशी। सि. यो. उन्मा. चि.। 'कपिकच्छ्वा-थवा तप्तम्।' See आत्मगुप्ता।

कपिकच्छुफलम्। क्ली। शूकशिम्बयाः फले। आलाकुशीर बीज।

कपिकच्छुफलोपमा। स्त्री। जन्तुकायाम्। जन्तुकारीति मालवे। रा. नि. व. ३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपिकच्छुरा। स्त्री। शूकशिम्ब्याम्। प. मु.। See आत्मगुप्ता।

कपिकन्दुकम्। क्ली। शिरीऽस्थिनि। माथाचा खूनी। श. च.।

कपिका। स्त्री। नीलसिन्धुवारवृक्षे। रा. नि. व. ४। अर्कवृक्षे। रत्ना.।

कपिकोलिः। पुं। शृगालकोलिकायां। शेषाकुल। र. मा.।

कपिगन्धिका। स्त्री। गजपिप्पल्याम्।

कपिचञ्चलः। पुं। तुरुष्के। शिलारस। शब्दर.।

कपिचूड़ः (ड़ा)। पुं, स्त्री। आम्रातकवृक्षे। आमड़ा गाछ। रा. नि. व. ११।

कपिचूतः। पुं। अश्वत्थभेदे। पलाशपिप्पल। गजहुण्डसहोदरा इति। भा. पू. १भ. वटा. व.। आम्रातकवृक्षे। त्रिका.।

कपिजः। पुं। सिल्हके। शिलारस। रा. नि. व. १२।

कपिजङ्घिका। स्त्री। तैलपिपीलिकायाम्। श. च.।

कपिञ्जलः। पुं। A bird. the francoline partridge. चातकपक्षिणि। फटिकजल पाखि। गौरतित्तिरी। पाछानाड़ा पाखि। कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरिः। भा.। तन्मांसगुणाः—शीतलं मधुरं लघु अतएव रक्तपित्ते रक्तश्लेष्मविकारे मन्दवातविकारे च प्रशस्तं। चक्र. द.। तथा एतस्य मांसं चटकमांसाच्छीतलं। वृष्यं रोचकञ्च। रा. नि. व. १७। शिलारसे। शिलारस। काक्कातुया इति ख्याते पक्षिणि। केचित्।

कपिञ्जला। स्त्री। शालिधान्यविशेषे। सा श्लेष्मकरी। अवि. १५ अ.।

कपितैलम्। क्ली। शिलारसे। रत्ना.। तुरुष्कनामकगन्धद्रव्ये। भा.।

कपि(बि)त्थः (कः)। पुं। (Feronia elephantum.) स्वनामख्यातवृक्षे। कयेत गाछ। हिं कीदथ्। मं कविठ। कं वेलु। टें वेलगचेट्टु। प. मु.। तत्पर्य्यायः—दधित्थः ग्राहो मन्मथः दधिफलः पुष्पफलः दन्तशठः (अ.), कगित्थः (भ.), कपित्थः (अ. टी.), देवपादाद्यः (श.), मालूरः सङ्कल्यः नीलमल्लिका ग्राहिफलः चिरपाकी ग्रन्थिफलः कुचफलः कपीष्टः गान्धफलः दन्तफलः करभवल्लभः काठिन्यफलः करञ्जफलकः। गुणाः—मधुराम्लः कषायः तिक्तः शीतलः वृष्यः पित्तानिलघ्नः संग्राही व्रणघ्नः। आमं कपित्थमम्लोष्णं कफघ्नं ग्राहि वातलं। दीपनग्रहरं पक्वं मधुराम्लरसं गुरु। अपिच। आमं जिह्वाजाड्यकरं विदोषवर्द्धनं विषघ्नं रोचकं संग्राहि। पक्वं श्वासवमिग्रमक्लमहरं हिक्कापनोदनम्। रा. नि. व. ११। "कपित्थमम्लं मधुरं कषायं विशदं गुरु। कासातिसारहृद्रोगच्छर्द्दिकफरुजापहम्। कपित्थं मधुरं शीतं कषायं ग्राहकं लघु" ॥ अवि. सं. १७ अ.। तत्फलमम्लं श्लेष्माणं शमयति रूक्षवीर्य्यत्वात्। सु. सू ४० अ.। अपिच—"कपित्थमामं संग्राहि कषायं लघु लेखनं। पक्वं गुरु तृषाहिक्काश्रमनं वातपित्तजित्। त्यादम्लं तुवरं कण्ठशोधनं ग्राहि दुर्ज्जरम्" ॥ भा.। अश्वत्थवृक्षे।

कपित्थतैलम्। क्ली। कपित्थबीजतैले। गुणाः—"कपित्थतैलं तुवरं स्वादु चाक्षुविषापहम्।" वै. निघ.।

कपित्थत्वक्। क्ली। एलवालुके। रा. नि. व. ४।

कपित्थपत्रा (णी)। स्त्री। वृक्षविशेषे। कपित्थालीति कवटपत्रीति महाराष्ट्रे। गन्धविरजाद्र गाछ। रत्ना.। गुणाः—"कपित्थपत्रा तीक्ष्णोष्णा पाके कटुी च तूवरा। रसे तिक्ता क्लमिकफमेदमेहविषं जयेत्। स्नायुरोगं नाशयति...।" वै. निघ.।

कपित्थानी। स्त्री। कपित्थपत्र्याम्।

कपित्थाम्त्रः। पुं। आम्रभेदे। वै. निघ.।

कपित्थार्ज्जकः। पुं। श्वेतार्ज्जके। तुलसीभेदे। मद. व. ३।

कपित्थास्यः। पुं। वानरविशेषे, गोखाङ्गूरि। मुखपोड़ा। त्रिका.।

कपित्थाष्टकचूर्णम्। क्ली। ग्रहण्यधिकारे। अत्र यमान्यादीनां प्रत्येकमेकैकं भागं, महाद्रकादिदाड़िमान्तानां प्रत्येकं भागत्रयम्, शर्करायाः षड्भागान् कपित्थशुण्ठचूर्णस्य चाष्टभागानेकत्र मेलयेत्। शर्करायाः अष्टोत्तरशतभागा इति वा. टी.। कश्चित्र "षड्गुणसिते कपित्थाष्टगणे" पठति। सुन्दरं तन्मते यमान्यादीनामेकैकभागश्चत्वे कपित्थस्याष्टौ भागाः कपित्थाच्च षड्गुणाः सिता भवन्ति। अपरे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च सर्व्वचूर्णपिचया पञ्चगुणसिता अष्टगुणकपित्थचूर्णं ददति। च. द.। अग्निः चित्रके। नलं बालके। यमानी, पिपुलमूल, गुड़त्वक्, तेजपत्र, एलाइच, नागेश्वर, शुँठ, मरिच, चितेर मूल, बाला, जीरक, धने', सौवर्चललवण प्रत्येकेर १ भाग, तिन्तिड़ी, धाईफुल, पिपुल, वेल-शुँठ, पाटिया लोध, दाड़िमछाल प्रत्येकेर ७ भ. चिनि ७ भ. कपित्थचूर्ण ८ भ.।

कपिनामा। पुं। शिलारसे। रत्ना.।

कपिपिप्पली। स्त्री। रक्तापामार्गे। भा. पू. २भ.। वानरपिप्पल्यां। वै. निघ.। सूर्य्यावर्त्तनुपे। र. मा.।

कपिपुच्छिका (च्छी)। स्त्री। कपिकच्छु-लतायाम्।

कपिप्रभा। स्त्री। शूकशिम्ब्यां। आलाकुशी। श. र.।

कपिप्रियः। पुं। आम्रातकवृक्षे। रा. नि. व. ११। कपित्थवृक्षे। भा.।

कपिभूतः। पुं। पारिभाद्रवृक्षे। वै. निघ.।

कपिरसः। पुं। शिलारसे।

कपिरसाख्यः। पुं। आम्रातकवृक्षे। रा. नि. व. ११।

कपिरोमफला। स्त्री। कपिकच्छ्वां। रा. नि. व. ३।

कपिरोमा। स्त्री। कपिकच्छ्वी। रेणुकायां। रा. नि. व. ६।

कपिलः। पुं। शिलारसे। रत्ना.। कुक्कुरे। हारा.। पित्तले। मूषिकभेदे। तद्दष्टे व्रणकीयः ज्वरः गण्डाङ्गवः। सु. कल्प. ६अ.। त्रि। पिङ्गलवर्णे।

कपिलच्छाया। स्त्री। मृगनाभौ। भा. म.। See कस्तूरिका।

कपिलद्राक्षा। स्त्री। कपिलवर्णवृहद्द्राक्षाविशेषे। आङ्गुर इति यस्याः प्रसिद्धिः। आंङ्गुर। तत्-पर्य्यायः—मृद्विका गोस्तनी कपिलफला अमृतरसा दीर्घफला मधुवल्ली मधुफला मधुली हरिता हार-हारा सुफला मृद्वी हिमोत्तरा पथिका हैमवती शतवीर्य्या काश्मीरा। गुणाः—मधुरा शीतला हृद्या मदहर्षदा दाहमूर्च्छाज्वरश्वासतृष्णाहल्लासघ्नी च। रा. नि. व. ३। अमृतरसे।

कपिलद्रुमः। पुं। काचीनाक्षुपवृक्षे। श. च.।

कपिलफला। स्त्री। कपिलद्राक्षायाम्। आङ्गुर। रा. नि. व. ३।

कपिललौहम्। क्ली। पित्तले। हे. च. वै. निघ.।

कपिलशिंशपा। स्त्री। Tawny-leaved sisu. (Dalbergia sisu.) कपिलपत्रशिंशपा। इति। कपिलपत्र शिशु गाछ। मं क पिवला शिशव। हींवदवोउ। तत्पर्य्यायः,—कपिला पीता सारिणी कपिलाह्वा भग्नगर्भा कुशिंशपा। गुणाः—तिक्ता शीतवीर्य्या भ्रमघ्नी वातपित्तज्वरघ्नी कृद्दिहिक्कानिवारणी च। रा. नि. व. ९। कटुका तिक्ता कषाया शीतघ्नी उष्णवीर्य्या मंदकुष्ठ-श्वित्रवस्तिकृमिहरी वस्तिरुजाव्रणदाहरक्तवलासघ्नी गर्भपातिनी च। भा. पू. १भ. वटा. व.।

कपिला। स्त्री। पित्तले। भा. म. १भ.। राज-रीती। पितलविशेष। गृहकन्यायाम्। रा. नि. व. ५। रेणुकायाम्। रेणुकबीज। रा. नि. व. ६। कपिलशिंशपायां कान शिशु। रा. नि. व. ९। निर्विषजलायुकायाम्। निर्विषजोंक। सु. सू. १३ अ.। See जलायुका। स्वर्णवर्णकामधेनुभेदे। मे. लघिका। क्षुद्रसाध्यलूताभेदे। See लूता।

कपिलाधिका। स्त्री। तैलपिपीलिकायाम्।

कपिलार्ज्जकः। पुं। कपिलवर्णतुलसीवृक्षे। पाण्डुपत्र तुलसीवृक्ष। वै. निघ.।

कपिलाह्वी। स्त्री। कपिलशिंशपायाम्। रा. नि. व. ९। मृगेर्वारुके। रा. नि. व. ७।

कपिलिका। स्त्री। शतपदीभेदे। पिपीलिका-विशेषे। सु. कल्प. ८अ.। See शतपदी, पिपी-लिका।

कपिलोमफला। स्त्री। कपिकच्छ्वाम्। आला-कुशी। रा. नि. व. ३।

कपिलोमा (ला)। स्त्री। रेणुकबीजे। रेणुक। रा. नि. व. ६।

कपिलोहम्। क्ली। पित्तले। हे. च.। राज-रीती। भाल पितल।

कपिल्लकः। पुं। कम्पिल्लके। कमलागुँड़ि। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपिल्लिका । स्त्री । औषधिविशेषे । गजपिप्पुल वा कमलागुँड़ि । र. मा. ।

कपिवदान्यः । पुं । अम्लातकवृक्षे । आमड़ा-गाछ ।

कपिवल्लिका (ल्ली) । स्त्री । गजपिप्पल्याम् । भा. पू. १भ. । कपित्थवृक्षे ।

कपिवासः । पुं । पारिभाद्रवृक्षे । पलाशपिप्पुल ।

कपिविरोचनम् (विरोधि) । क्ली । मरिचे । रा. नि. व. ६ ।

कपिवीजम् । क्ली । शूकशिम्बीबीजे । आला-कुशीबीज । भैष. कामेश्वरमोदके ।

कपिवृक्षः । पुं । पारीभाद्रवृक्षे । वै. निघ. ।

कपिशः । पुं । सिल्लकनामगन्धद्रव्ये । शिला-रस । दाक्षामद्ये । वै. निघ. । त्रि. । श्यामवर्णे । मे. शब्दिकं ।

कपिशा(शी,शिका) । स्त्री । सुरायां । त्रिका. । माधवीलतायाम् । मे. शब्दिकं ।

कपिशायनम् । क्ली । मद्यविशेषे । त्रिका. ।

कपिशीर्षकम् । क्ली । हिङ्गुले । श. च. ।

कपिहस्तकः । पुं । कपिकच्छौ । रत्न. र. ।

कपीकच्छुः । पुं । कपिकच्छुलतायाम् । आला-कुशी । श. र. ।

कपीज्यः । पुं । चौरिकावृक्षे । जटा. ।

कपीतः । पुं । श्वेतदुग्धावृक्षे । र. मा. ।

कपीतकः । पुं । प्लक्षवृक्षे । रा. नि. व. ११ । शिरीषवृक्षे ।

कपीतनः । पुं । उदुम्बरवृक्षे । यज्ञडुमूर । हिं गुलार । ज. द. । आम्रातके । आमड़ा । वा. सू. १५ अ. । न्यग्रोधादौ । च. सू. ४अ. । शिरीषवृक्षे । रा. नि. व. ९ । अश्वत्थवृक्षे । मे. नचतुष्कं । गुवाक-वृक्षे । बिल्ववृक्षे । श. र. । गण्डभुण्डे । गन्धभाडुनि । रत्ना. । प्लक्षवृक्षे । रा. नि. व. २३ ।

कपीन्द्रः । पुं । हनुमति । श. र. ।

कपीष्टः । पुं । राजादनीवृक्षे । वै. निघ । कपित्थ-वृक्षे । रा. नि. व. ११ ।

कपोतः । पुं । पारावतपक्षिणि । गृहकपोते । पाम्रवा, कइतर । मं परेवा । हिं कबुतर । तत्-पर्य्यायः,—कलरवः पारावतः (अ.) पारापतः क्षेयः रक्तलोचनः (रा.) रक्तदृक् (के.) गृह-कुक्कुटः । तन्मांसगुणाः—बलवीर्य्यवर्द्धनं स्वादु कफपित्तास्रदोषजित्त्वं । रा. नि. व. १७ । कपोत-मांसं पाण्डौ वर्ज्यं । च. द. पाण्डु. चि. योगराजे । पारावतो गुरुः स्निग्धः रक्तपित्तानिलापहः । संग्राही शीतलस्तज्ज्ञैः कथितो वीर्य्यवर्द्धनः ॥ भा. पू. २भ. । रसे पाके च स्वादु कषायं विषदञ्च । राज. । कपोतो बृंहणो बल्यो वातपित्तविनाशनः । तर्पणः शुक्रजननो हितो नृणां गुणप्रदः ॥ अग्नि. २१ अ. । See पारावतः । पक्षिविशेषे । घूघू । मे. त्रिका. । तत्पर्य्यायः,—चित्रकण्ठः (मे.) कीकदेवः धूसरः धूम्रलोचनः दहनः अग्निसहायः भीषणः गृह-नाशनः । तन्मांसगुणाः—बलवीर्य्यवृद्धिकरत्वं शीतलं कषायस्वादुत्वं कफ-पित्तास्रनाशित्वं विरुद्धत्वञ्च । मूषिकभेदे । सु. कल्प. ६ अ. । कपोतमृद्वे । पारदे । सर्जिकारे । पक्षिमात्रे । पारीभद्रवृक्षे । पलाशपिप्पुल । भा. ।

कपोत(क)म् । क्ली । Antimony. सौवी-राञ्जने । रा. नि. व. १३ । कपोताञ्जने । मे त्रिकं ।

कपोतकनिषादी । पुं । अश्वस्य वातव्याधि-भेदे । लक्षणं यथा—"कृच्छ्रादुत्थापितस्यापि पुनर्यो-याति मेदिनीं । कपोतकनिषादीति स ज्ञेयः कृच्छ्रजीवनः ॥" ज. द. ५५ अ. ।

कपोतचक्रः । पुं । कवाटचक्रवृक्षे । रत्ना. ।

कपोतचरणा । स्त्री । नखीनामगन्धद्रव्ये । ननूका । जटा. ।

कपोतपर्णी । स्त्री । एलायाम् । एलाईच गाछ । रा. नि. व. १२ ।

कपोतपुटम् । क्ली । औषधपुटविशेषे । लक्षणं यथा—"यत् पुटं दीयते स्नाते अष्टसङ्ख्यैर्वनौषधैः । कपोतपुटमित्तत्तु कथितम्...॥" भा. म. १भ. ।

कपोतपुरीषः । पुं । पारावतविष्ठायां । एष व्रणदारणः ।

कपोतवक्रा (क्रा) । स्त्री । काकमाच्याम् । केउआठुँठी । कड़ङ्ग । च. द. अरी. चि. कषाय-तैले ।

कपोतवङ्का । स्त्री । ब्राह्म्यां । भा. म. ३ भ. घृतमा. ग्रह. चि. । "कपोतवङ्काश्योनाकः ।" लताफट्कीति प्रसिद्धायां लतायां । सु. सू. ३८ अ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कपोतवङ्कासुवर्चला। अन्ये "शिरीषसङ्गशपत्रस्वल्पविटपत्वचे" इति द्रव्यान्तरमाहुः। ङ। सु. चि. ७अ.।

कपोतवर्णा (र्णी)। स्त्री। सूच्यैलायाम्। रा. नि. व. ६।

कपोतवाणा। स्त्री। नलुकायाम्। रा. नि. व. १२।

कपोतविष्ठा। स्त्री। पारावतपुरीषे। इयं व्रणदारणी। सु. सू. ३६ अ.।

कपोतवेगा। स्त्री। ब्राह्मीनाममहाक्षुपे। रा. नि. व. ५।

कपोतसारम्। स्त्री। खीतोऽञ्जने। रा. नि. व. १३।

कपोताङ्घ्रिः। स्त्री। नलिकायाम्, गन्धद्रव्यविशेषे। अम.।

कपोताञ्जनम्। क्ली। नीलाञ्जने।

कपोताण्डोपमफलम्। क्ली। निम्बूभेदे। वै. निघ.।

कपोतारिः। पुं। श्येनपक्षिणि। भ. र.।

कपोतिका। स्त्री। चाणक्यमूलके। कोमलमूलके। वै. निघ.।

कपोलः। पुं, क्ली। मस्तके। गण्डस्थले। गाल। रा. नि. व. १८। स्त्री (ली)। जान्वग्रभागे।

कपोलफलकम्। क्ली। प्रशस्तगण्डस्थले।

कप्याख्यः। पुं। सिल्हके। शिलारस।

कप्यासः। पुं। वानरगुदे।

कफः। पुं। Phlegm. शरीरस्थसौम्यधातुविशेषे। श्लेष्मा। तत्पर्य्यायः—क्लेदनः (अ.) श्लेष्मा सङ्घातः सौम्यधातुः घनः बली। गुणाः—"श्लेष्मा गुरुः श्लक्ष्णमृदुः प्रसृतसुकः स्निग्धः पटुः शीतजड़स्य गौल्यवान्। शीते वसन्ते च भृशं निशामुखे पूर्व्वेऽह्नि भुक्तोपरि च प्रकुप्यति॥ रा. नि. व. २१। तत्प्रकोपकारणम् यथा—"गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूप-सर्पिःप्रपूरैः। तुहिनपतनकाले श्लेष्मणः सम्प्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते॥ इति। तत्कर्म्म यथा—स्तैमित्यं मधुरास्यता शिशिरता श्लोम्नः प्रसेकौ मलप्राचुर्य्यं स्थिरता रसस्य लवणं कण्डूयतिस्वल्पता। आलस्यं चिरकारिता कठिनता शीथाग्रचिक्किग्धता। तन्द्रालस्यप्रदेहकासगुरुता एताः कफोत्था रुजः॥ इति। तच्छान्तिहेतुर्यथा—"गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः। श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः॥ इति। माधुर्य्यात्पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च। आमाशये सम्भवति श्लेष्मा मधुरशीतलः। श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च। मधुरस्वविदग्धः स्याद्दिदग्धो लवणः स्मृतः॥ सु. सू. २१ अ.। श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीतलस्तथा। तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत्॥ इति स्वरूपम् तस्य। स्थानभेदेन तस्य नामानि यथा—क्लेदन आलम्बनो रसन: स्नेहनश्चेति स्थानभेदेन। तानि च स्थानानि यथाक्रमं आमाशयहृदयकण्ठशिरःसन्धयः। तत्स्थानगतानाञ्च तेषां कर्म्माणि यथा—क्लेदनः क्लेदयत्यन्नमन्यानि च श्लेष्मस्थानानि उदकर्म्मणानुगृह्णाति। रसयुक्तात्मवीर्य्येण हृदयस्यावलम्बनम्। विकसन्धारणञ्चापि विदधात्यवलम्बनः॥ उभावपि ततः सौम्यौ तिष्ठतश्चान्तिके यतः। यतो रसान्विजानीतो रसनारसनौ समौ॥ स्नेहनः स्नेहदानेन समस्तेन्द्रियतर्पणः। श्लेष्मणः सर्व्वसन्धीनां संश्लेषं विदधात्यसौ॥ भा. म. १भ.। अवलम्बक इत्येकः क्लेदकः श्लेष्मकोऽपरः। बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः इति॥ तेषां लक्षणानि—कफधाम्नान्तु शेषाणां यत्करोत्यवलम्बनं। ततोऽवलम्बनाख्यातिं श्लेष्मा प्राप्नोत्युरःस्थितः। आमाशयाश्रितः सोऽन्नक्लेदनात् क्लेदकः स्मृतः। श्लेष्मकः श्लेष्मणात् सन्धेः स च सन्धौ व्यवस्थितः। रसनावस्थितस्तेषु बोधको रसबोधनात्। शिरसि प्रस्थितश्चासौ तर्पकः। वा. टी.। श्लेष्मधाम्नाञ्च शेषाणां यत्करोत्यवलम्बनं। अतोऽवलम्बकः श्लेष्मा यस्त्वामाशयसंश्रितः। क्लेदकः सोऽन्नसङ्घातक्लेदनाद्रसबोधनात्। बोधको रसनास्थाग्रो शिरःसंस्थोऽचितर्पणात्। तर्पकः सन्धिसंश्लेषात् श्लेषकः सन्धिषु स्थितः॥ वा.। कपित्थवृक्षे। रा. नि. व. ११। समुद्रफेने। च. द. अर्श. चि. प्रलेपे।

कफकूर्चिका। स्त्री। जालायाम्। मुखेन्द्र लाल, थूकू। हे. च.।

कफकेतुरसः। पुं। कफरोगाधिकारे रसः। मागधी पिप्पली। र. सा. सं.। पाठः—"टङ्कणं मागधी शुद्धं वत्सनाभं समं समं। आर्द्रकस्वरसै-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाथ दापयेद्भावनात्रयम् । गुञ्जामात्रं प्रदातव्यम्... ॥" द्वितीये यथा—"दग्धशङ्खं विकटुकं टङ्कणं समभागिकं। विषञ्च पञ्चभिस्तुल्यमार्द्रतोयेन मर्द्दयेत्। वारत्रयं रक्तिकाञ्च वटीं कुर्य्यादिचक्षणः।" सायं प्रातरार्द्रकरसेन देयं। भैष. कफज्व. चि.।

कफगण्डः। पुं। गलरोगे। तस्य लक्षणम्—"स्थिरः सवर्णो गुरुरुग्रकण्डूः शीतो महांश्चापि कफात्मकस्तु। पारुष्ययुक्तास्थिरवृद्धिपाकी यदृच्छया पाकमियात् कदाचित्। वैरस्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः॥" मा. नि.।

कफगुल्मः। पुं। श्लेष्मजगुल्मे। तस्य रूपं—"स्तैमित्य-शीतज्वर-गात्रसादहृल्लास-कासारुचिगौरवाणि। श्वेतं रुगल्पा कठिनोन्नतत्वं गुल्मस्य रूपाणि कफात्मकस्य।" शीतं गुरुस्निग्धमचेष्टनञ्च सम्पूरणं प्रस्वपनं दिवा च। गुल्मस्य हेतुः कफसम्भवस्य सर्व्वस्तु दुष्टौ निचयात्मकस्य।" च. चि. ५ अ.।

कफघ्नः। त्रि। श्लेष्मनाशके।

कफघ्नी। स्त्री। शुकनासायाम्। हवुषाभेदे। रा. नि. व. ४।

कफज्वरः। पुं। श्लेष्मजन्यज्वरे। See ज्वरः।

कफ(फो)णिः (णी)। पुं, स्त्री। भुजमध्यग्रन्थौ। कनुई। रा. नि. व. १८।

कफनाड़ी। स्त्री। दन्तमूलगतरोगविशेषे। दाँतेर गोड़ार कफजन्य नाली। यथा—दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः। ज्ञेया कफाद्दृढघनार्जुनपिच्छिलासा स्रव्या सकण्डूरुजा रजनीप्रवृद्धा।" मा. नि.।

कफप्रकृतिः। स्त्री। स्थिरचित्ततास्निग्धकेशत्वादौ। कफोधातु।

कफमन्दिरम्। मण्डभेदे। माड़, फेन।

कफरुहा। स्त्री। नागरमुस्तायाम्।

कफरोगः। पुं। कफजन्यरोगमात्रे।

कफरोहिणी। स्त्री। कफजन्यगलरोगविशेषे। तस्य लक्षणं यथा—"स्रोतोनिरोधिन्यपि मन्दपाका स्थिराऽरुजा या कफसम्भवा सा। मा. नि.। See गलरोहिणी।

कफवर्द्धकः। त्रि। श्लेष्मवर्द्धके।

कफवर्द्धनः। पुं। पिण्डीतगरवृक्षे। चिका.। त्रि। कफवर्द्धके।

कफविरोधि। क्ली। मरिचे। रा. नि. व. ६। त्रि। श्लेष्मरोधके।

कफसंशमनवर्गः। पुं। कफशान्तिकरद्रव्यगणेषु। यथा—"रूक्षचारकषायतिक्तकटुकव्यायामनिष्ठीवनं धूमाद्युष्णशिरोविरिकवमनस्वेदोपवासादिकम्। स्त्रीसेवाध्वनियुद्धजागरजलक्रीड़ाङ्गनासेवनं पानाहार-विहार-भेषजमिदं श्लेष्माणमुग्रं जयेत्॥" भा. पू. २भ.।

कफसम्भवः। त्रि। कफोत्थे।

कफस्थानम्। क्ली। कफाशयेषु, आमाशयोरःकण्ठशिरःसन्धिषु। सु. सू. २१ अ.।

कफस्रावः। पुं। नेत्रसन्निगतरोगविशेषे। लक्षणं यथा—"पाकः सर्व्वो संस्रवेद्यस्तु पूयं पूयास्रावीऽसौ गदः सर्व्वजस्तु। श्वेतं सान्द्रं पिच्छिलं संस्रवेद्वि श्लेष्मास्रावीऽसौ विकारी मतस्तु॥" मा. नि.।

कफातिसारः। पुं। कफजन्यातिसारे। सा. चिकित्सा—"श्लेष्मातिसारे प्रथमं हितं लङ्घनपाचनं। यीज्यश्यामातिसारघ्नी यथोक्तौ दीपनौ गणः॥" तस्य लक्षणं यथा—गुरुं सान्द्रं सकफं श्लेष्मयुक्तं विस्रं शीतं हृष्टरोमा मनुष्यः। मा. नि.।

कफान्तकः। पुं। वर्व्वूरकवृक्षे। बाबला गाछ। रा. नि. व. ८।

कफापहा। स्त्री। जीरके।

कफारिः। पुं। आर्द्रके। शुण्ठ्याम्। रा. नि. व. ६।

कफी (फिन्)। त्रि। कफयुक्ते। अमः। पुं। गजे। हाती।

कफेलुः। त्रि। कफयुक्ते। उणा.।

कफोल्कटः। त्रि। कफप्रधाने। च. द. सान्निपातिकज्व. चि.। "कणया च कफोल्कटे।"

कफोत्क्लिष्टः। पुं। नेत्ररोगभेदे। लक्षणम्—कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च। सलिलप्लावितानीव परिजाड्यानि मानवः॥ मा.नि.।

कफोलिः। पुं। स्त्री। भुजमध्यग्रन्थौ। कनुई।

कफोत्क्लेशः। पुं। कफस्य वमनोपस्थितौ।

कफोदरम्। क्ली। कफजन्योदररोगे। लक्षणं —"यच्छीतलं शुक्लशिरावनद्धं गुरु स्थिरं शुक्ल-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नखाननस्थ। स्निग्धं महच्छोफयुतं ससादं कफीदरं तच्च चिराभिवृद्धि॥" सु. नि. ७अ.।

कबन्धम्। क्ली। जले। रा. नि. व. १४। पुं। उदरे। मे.।

कबित्थः। पुं। कपित्थवृक्षे। अ. टी.।

कम्। अव्ययं। मस्तके। ग. चि.।

कमठः। पुं, क्ली। कच्छपे। भाण्डविशेषे। मे. ठविकं। शल्लक्यां। शब्दार्क। धरणिः। वंशे। ज.र।

कमठी। स्त्री। कच्छप्याम्। अम.।

कमण्डलुः (तरुः)। पुं, वृक्षवृक्षे। पाकुड़ गाछ। प. मु.। करके। सन्न्यासीव पात्र। मे. लचतुष्कं। अश्वत्थभेदे। गजहस्तसङ्गीरा। पलाशपिप्पल। भा. पू. १अ. वटा. व.।

कमण्डलूफलः। पुं। पपीतकवृक्षे। पेँपे।

कमनः। पुं। अशोकवृक्षे। मे. नविकं। मदने। वि। कामुके।

कमनच्छदः। पुं। कङ्कपक्षिणि। हे. च.। क्रौञ्चपक्षिणि।

कमन्धम्। क्ली। जले। अ. टी. रा.।

कमलम्। क्ली। Nelumbium speciosum or Nymphaea nelumbo. पद्मसामान्ये। पद्म। तें तामर। तच्च श्वेतरक्तनीलभेदेन त्रिविधम्। तत्पर्य्यायः,—पद्मं पाथोजं नलं नलिनं अम्भोजं अम्बुजन्म अम्बुजं श्रीः अम्बुरोहं अम्बुपद्मं सृजलं अम्भोरुहं सारसं पङ्कजं सरसीरुहं कुटपं पङ्करुट् पङ्कजन्म पङ्करुहं पाथोरुहं पुष्करं वार्ज्जं तामरसं कुशेशयं कुजं कजं अरविन्दं शतपत्रं विसकुसुमं सहस्रपत्रं महोत्पलं वारिरोहं सरसिजं सलिलजं पङ्केरुहं राजीवं। कमलगुणाः—शीतलं वर्णकरं मधुरं पित्तकफघ्नं तृष्णादाहरक्तविस्फोटकविषविसर्पहरं। श्वेतं शीतलं मधुरं कफपित्तघ्नम्। रक्तनीले तु तस्माल्पगुणे भवतः। भा. पू. १भ.। पुं। मृगविशेषे। मे. लचिकं। सारसविहङ्गमे। अम.। ताम्रे। क्लीन्नि। मेषजे। मे. लविकं। पद्मकाष्ठे। कुङ्कुमे। मूत्राशये। जले। रा. नि. व. १४। पुं। मृगविशेषे।

कमलकन्दः। पुं। शालूके। पद्मेर गेँड़ो। गुणाः—"शालूकः कटुकश्चोक्तः तुवरो मधुरो गुरुः। मलस्तम्भकरो रुच्यो नेत्र्यो हृद्यश्च शीतलः। दुर्जरो ग्राहको रक्तपित्तं दाहं तृषां कफं। पित्तवातञ्च गुल्मञ्च पित्तं कासं क्लमौंस्तथा। सुखरीर्भं रक्तदोषं नाशयेदिति च स्मृतः।" वै. निघ.।

कमलकर्णिका। स्त्री। पद्मबीजकोशे। पद्मेर चाकि। गुणाः—"बीजकोशस्तु मधुरः तुवरः शीतलो लघुः। तिक्तो सुखस्वच्छकारी रक्तदोषतृषाहरः॥" वै. निघ.।

कमलकेसरः। पुं, क्ली। पद्मकिञ्जल्के। पद्मकेशर। गुणाः—"शीतलः ग्राही मधुरः कटुः रूक्षः गर्भस्थैर्य्यकरः रूक्षश्च।" वै. निघ.।

कमलच्छदः। पुं। कङ्कपक्षिणि। पद्मदले।

कमलनालम्। क्ली। पद्मनालायाम्। पद्मेर डाँटा। वै. निघ.। See मृणालम्।

कमला। स्त्री। वरस्त्रियि। मे. लविकं। निश्चुकविशेषे। कमलां लेबु, सरवती लेबु। तल्लसारः।

कमलाक्षः। पुं। कमलबीजे। पद्मबीज। गुणाः—"स्वादुरूक्षः पाचनः कटुकः स्मृतः। शीतलस्तुवरस्तिक्तो गुरुर्विष्टम्भकारकः। गर्भस्थितिकरो रूक्षो हृद्यो वातकरो मतः। कफक्लेश्मनो ग्राही बल्यः पित्तविनाशनः। रक्तरुग्वमिदाहास्रापत्यनाशकरो मतः।" वै. निघ. वृद्धि. चि. वमनातियोगे।

कमलिनी। स्त्री। पद्मिन्याम्। गुणाः—शीतला गुरुः मधुरा लवणा रूक्षा पित्तासृक्कफघ्नी वातविष्टम्भकारिणी च। भा. पू. १भ. पुष्पव.। तत्कन्दः—"शीतस्तुवरो मधुरो मतः। तिक्तः पाकेऽतिकटुकः लघुर्वै ग्राहको मतः। वातकृत् कफपित्तानां नाशको मुनिभिः स्मृतः॥" वै. निघ.।

कमलोत्तरम्। क्ली। कुसुम्भपुष्पे। हे. च.।

कमा। स्त्री। क्षीभायाम्। रा.।

कमोदपुष्पम्। क्ली। जलपुष्पविशेषे।

कम्पः। पुं। वेपथौ। रा. नि. व. २०।

कम्पनः। पुं, क्ली। कम्पे। मे. नविकं। शिशिरकाले। रा. नि. व. २१। तन्नामकश्लेष्मोल्बणसन्निपातज्वरे। लचणम्—"जड़ता गद्गदा वाणी रात्रौ निद्रा भवत्यपि। प्रसक्ते नयने चैव मुखमाधुर्य्यमेव च। कफोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।...कम्पनसंज्ञकः॥" भा. म. खु. १भा.।

कम्पलक्ष्मा। स्त्री। वायौ। ज. र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कम्पवायुः। पुं। वायुरोगविशेषे। "सर्व्वाङ्गकम्पः शिरसो वायुर्वेपथुसंज्ञकः।" मा. नि.।

कम्पाकः। पुं। वायौ। हे. च.।

कम्पितम्। क्ली। चलने। शु. र.। वि। कम्पयुक्ते।

कम्पिलः। पुं। श्वेतविड्वतायाम्। वै. निघ. २ भ.।

कम्पिला। स्त्री। कुमार्य्याम्। घृतकुमारी।

कम्पिल्लः (कः)। पुं। रेणुवह्नुखारीवृक्षयाम्। कमलागुँड़ि। र. मा.। रा. नि. व. १३। तत्पर्य्यायः,—कम्पीलकः रक्ताङ्गः रेची, रेचनकः रञ्जकः लोहिताङ्गः रक्तचूर्णकः। गुणाः—विरेचकत्वं कटुत्वं उष्णत्वं लघुत्वं व्रण-कफ-तनुक्रिमिनाशित्वञ्च। रञ्जनके। वा. सू. १५ अ विरेचने। कुङ्कुमे। च. द. ज्व. चि. मुस्तादिगणे।...नीली कम्पिल्लकं विड्वत्। कम्पिल्लकी रोचनिकः स्वनामख्यातः"। ङ.।

कम्पिल्लमालकः। पुं। वकुलभेदे।

कम्प्रः। वि। कम्पयुक्ते। अम.।

कम्बरः। पुं। कर्व्बूरवर्णे, चित्रवर्णे। शब्दर.।

कम्बलः। पुं। लोमिकाशाके। वनभूनिम्बे। प. मु.। मेषादिरोमजातवस्त्रादौ। कम्बल। अम.। तत्पर्य्यायः,—रल्लकः (अ.) वेशकः रौमयोनिः वेणुका (शब्दर.) प्रावारः (ज.)। शय्यायाम्। रत्ना.। नागराजे। क्लमौ। उत्तरासङ्गे। मे. लचिकं। मृगभेदे। जटा. क्ली। जले। मे. लचिकं।

कम्बलांशुकः। पुं। लोमिकाशाके।

कम्बलिवाह्यकम्। क्ली। वृषवाह्यशकटे। गरुर गाड़ी। अम.। तत्पर्य्यायः,—गन्त्री (अ.) गान्त्री (अ. टी)।

कम्बातायो (न्)। पुं। शङ्खचिह्ननाम पक्षिविशेषे। के.। शङ्खचिल।

कम्बिः। स्त्री। दर्व्वाम्। शु. च.। वंशाग्रे। बाँशेर पाव। मे. बहिकं। वंशाङ्कुरे।

कम्बुः (कः)। पुं, क्ली। शङ्खे। शाँक। रा. नि. व. १३। शम्बूके। वलये। गले। मे. बहिकं। शोणितवहनाड्याम्। ग्रीवायां। गलके। नलि, हाड़। हे. च.। मानभेदे।

कम्बुककुसुमा। स्त्री। शङ्खपुष्प्याम्।

कम्बुका। स्त्री। अश्वगन्धावृक्षे। र. मा.।

कम्बुकाष्ठा। स्त्री। अश्वगन्धावृक्षे। रा. नि. व. ४।

कम्बुकिनी। स्त्री। चिरीशृङ्खे।

कम्बुकी। स्त्री। चिरीशृङ्खे।

कम्बुग्रीवा। स्त्री। शङ्खाकृतिरेखावत्याग्र्यग्रीवायाम्। रा. नि. व. १८।

कम्बुजः। पुं। शङ्खे।

कम्बुपुष्पी। स्त्री। शङ्खपुष्पीलतायाम्। रा. नि. व. ३।

कम्बुमालिनी। स्त्री। शङ्खपुष्पीलतायाम्। रा. नि. व. ३।

कम्बूः। स्त्री। शङ्खे। वलये।

कम्बूपूतः। पुं। शङ्खे। शाँक। रा. नि. व. १३।

कम्बोजः। पु। शङ्खविशेषे। हस्तिविशेषे। मे. जविकं।

कम्बोतायो(इन्)। पुं। शङ्खचिह्ने।

कम्भारी। स्त्री। गाम्भार्य्यां। गामार गाछ। रा. नि. व. ९।

कम्भु। क्ली। उशीरे। रा. नि. व. १२।

कम्रः। वि। मैथुनेच्छायुक्ते। अम.। कामुक।

कयस्था। स्त्री। हरीतक्यां। काकोल्यां। अ. टी. खा.। सूच्यैलायां। च. द. उन्मा. चि. महापैशाचघृते।

कयाहः। पुं। पक्वतालसदृशवर्णाश्वे। लक्षणं यथा—"पक्वतालनिभो वाजी कयाहः परिकीर्त्तितः।" ज. द. ३अ.।

करंसहा। स्त्री। स्वर्णचौरीलतायाम्।

करः। पुं। आहुल्यवृक्षे। तवरड़ इति काश्मीरे। रा. नि. व. ४। वर्षोपले। रश्मौ। पाणौ। शुण्डदण्डे। मे. रहिकं। हस्ते। रा. नि. व. १८।

करकः। पुं। दाड़िम्बवृक्षे। रा. नि. व. ११। पलाशवृक्षे। हारा.। वकुलवृक्षे। कोविदारवृक्षे। रक्तकाञ्चनवृक्ष। रा. नि. व. १०। See काश्चनारः। करवीरवृक्षे। रा. नि. व. ८। नारिकेला-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थिनि। माला। रा. नि. व. ११। नाटा इति प्रसिद्धे करञ्जवृक्षे। हे. च.। कुसुम्भवृक्षे। पक्षि-विशेषे। मे. कविकं। क्ली। करङ्के। गोमयच्छवे। त्रिका.।

करकचः। पुं। नखे। वै. निघ.।

करकटः। पुं। भरद्वाजपक्षिणि। वै. निघ.।

करकण्टकः। पुं। नखे। त्रिका.।

करकशालिः। पुं। रसालेक्षौ।

करका। स्त्री। कारवल्लाम्। करला। रा. नि. व. ७। वर्षोपले। अम.।

करकाजलम्। क्ली। दिव्यजलभेदे। "दिव्य-वायुग्निसंयोगात् संहता: खात्पतन्ति या:। पाषाण-खण्डवच्चापस्ता: कारक्योऽस्तोपमा:। करकाजं जलं रूक्षं विशदं गुरु च स्थिरं। दारुणं शीतलं सान्द्रं पित्तश्लेष्मकफवायुकृत्॥" वैद्यके।

करकाम्बु। क्ली। करकजले। वै. निघ.।

करकाभाः। पुं। नारिकेलवृक्षे। त्रिका.। क्ली। करकजले।

करकुड्मलम्। क्ली। कराङ्गुलौ।

करकृष्णा। स्त्री। जीरके। वै. निघ.।

करगः। पुं। श्येनपक्षिणि। शिकरे पाखी।

करग्रहः। पुं। विवाहे। त्रिका.। करग्रहणे।

करघर्षणः। पुं। दधिमन्थनदण्डे। श. च.।

करघर्षी। पुं। क्षुद्रमन्थानदण्डे। छोट मउनि। हिं छोटीरयी।

करघाटः। पुं। तन्नामकस्थावरविषभेदे, यस्य त्वचि निर्यासे च विषं वर्त्तते। अयं मूलविषोऽप्युच्यते। सु. कल्प. २अ.।

करङ्कः। पुं। मस्तके। विश्व. कविकं। अग्रस्थ-नारिकेलफलास्थिनि। नारिकेलेर खोल, मालो। श. च.। कङ्काले। रा. नि. व. १८।

करङ्कशालिः। पुं। करङ्कनामेक्षौ। मं रस-दाखि। कं रसालउंस। गुणा:—मधुर: शीतल: रुचिकृत् मृदु: पित्तघ्न: दाहहर: द्रव्य: तेजो-बलवर्द्धनश्च। रा. नि. व. १४।

करङ्कीभूतः। त्रि। अस्थिमात्रेण स्थित:। भा. म. ४भ. गर्भ. चि.। "करङ्कीभूतगोमूर्द्धा।"

करचन्द्रः। पुं। नखे। शब्दर.।

करच्छदः। पुं। शाखोटवृक्षे। शेओड़ा गाछ। हिं सिहोड़ा। भा.।

करच्छदा। स्त्री। सिन्दूरपुष्प्यां। रा. नि. व. १०। शाकतरौ।

करजः। पुं। करञ्जवृक्षे। डहरकरञ्ज गाछ। नखे। क्ली। व्याघ्रनखे। नखी। मे. जविकं।

करजाख्यः। पुं। नखीनामगन्धद्रव्ये। नखी।

करज्योड़िः। पुं। ह्रस्वज्योड़िमहाकन्दशाके। हाड़जोड़ी। रा. नि. व. ७। काष्ठपाषाणभेदे।

करज्योड़िकन्दः। पुं। तन्नामकवृक्षकन्दे। एषां गुण: रसबन्धकृद्वृष्यकृच्च। रा. नि. व. ७।

करञ्जः (कः)। पुं। (Pangamia glabra. Syn. galedupa Indica.) स्वनामख्यात-वृक्षे। वृहत् करञ्ज गाछ, डहरकरञ्ज गाछ। हिं करँजुवा करीदा। कण्टकरेजो। तें कानुग-चेट्टु। स च षड्विध:—तत्रैक: डहरकरञ्ज, द्वितीय: नाटाकरञ्ज, तृतीय: काँटा वा गेँटे-करञ्ज, चतुर्थ: गाकुड़ाकरञ्ज, पञ्चम: विषकरञ्ज, शेष: अम्लकरञ्ज इति वङ्गे कथ्यते। कण्टकरेजा-करञ्ज:। घीराकरञ्ज:। भा.। तत्र प्रथमस्य पर्य्याय: —चिरबिल्वो नक्तमाल: करञ्जश्च करञ्जके। द्विती-यस्य यथा—प्रकीर्य्य: पूतिकरञ्ज: पूतिक: कलि-कारक:। तृतीयस्य—षङ्गन्य:। चतुर्थस्य—मर्कटी। पञ्चमस्य—अङ्गारवल्लरी। षष्ठस्य—करमर्दी वने-क्षुद्रा कराम्ल: करमर्दक: इति। गुणा:—कटुक: तीक्ष्ण: वीर्य्योष्ण: अनिलघ्न: कुष्ठोदावर्त्तगुल्मार्शो-व्रणकृमिकफघ्न:। करञ्जपत्रं कफवातार्शः-कृमि-शोथहरं भेदनं पाककटुकं वीर्य्योष्णं पित्तलं लघु च। तत् फलं कफवातघ्नं मेहार्शःकृमिकुष्ठघ्नञ्च। घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणै:। भा. पू. १भ. गु. व.। तत्पुष्पं—उष्णवीर्य्यं पित्तवात कफघ्नञ्च। तदङ्कुरा:—अग्निदीपना रसे पाके च कटुका: पाचना: कफवातार्शः-कुष्ठ-कृमि-विषघ्ना: शीघ्रहराश्च। वै. निघ.। कैचित्तु महाकरञ्जघृत-करञ्ज-पूतिकरञ्ज-गुच्छकरञ्ज-करञ्जिकादिभेदानाहु:। तेषां गुणा: स्वस्वपर्य्याये मृग्या:। भृङ्गराजे। जटा.। करञ्जफले। सि. यो. हृद्दग्निमुखचूर्णे।

करञ्जतैलम्। क्ली। तन्नामकफलीत्यतैले। करञ्जतैल। गुणा:—तिक्तं नात्युष्णञ्च। वा. टी.। नेत्ररोगघ्नं वातरोगघ्नं तीक्ष्णमुष्णं कुष्ठकण्डूति-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचर्चिकाहरं लेपेनः। नानाविधचर्म्मरोगघ्नञ्च। रा. नि. व. १५। कृमिघ्नं कृमिघ्नं रुचिपित्तदोषकरञ्च। राज.।

करञ्जद्वय(युग्म)म्। क्ली। डहरकरञ्ज, नाटाकरञ्ज इति द्वये। "एकश्चिरविल्वः द्वितीयः कण्टकीविटपकरञ्जः।" वृक्षविटपकरञ्जौ। सु. सू. ३८ अ. ड. श्यामादिः। सि. यो. उमा. चि.। "करञ्जौ देवदारु च।" (एकः पूतिकरञ्जश्चिरविल्वाख्यः, द्वितीयः नक्तमालाख्यः।) वा. सू. १५ अ. आरग्वधादिः। "भूनिम्बसैन्धवकपटीलकरञ्जयुग्मम्।"

करञ्जफलः(कः)। पुं। कपित्थवृक्षे। रा. नि. व. ११।

करञ्जस्नेहः। पुं। करञ्जतैले। रा. नि. व. ९। See करञ्जतैलम्।

करञ्जाद्यघृतम्। क्ली। उपदंशे। पाठः—"करञ्जनिम्बार्जुनशालजम्बूवटादिभिः कल्ककषायसिद्धं। सर्पिर्निहन्त्यादुपदंशदोषं सदाहपाकं स्रुतिरागयुक्तम्।" वटादीनां त्वक्कषायेन तेषामेव कल्केन तैलं पाच्यं। तैलं ४ भ. क्वाथद्रव्यं ४ भ. जलं ६४ भ. शे. १६ भ. कल्कः १ भ.। च. द.।

करञ्जिका। स्त्री। काँटाकरञ्ज इति लोके। गुणाः—कषायुक्तः करञ्जस्तु पाके कटुश्च तवरः। ग्राहकश्चोष्णवीर्य्यः स्यात्तिक्तः प्रोक्तश्च मेहहा। कुष्ठार्शोव्रणवातानां कृमीणां नाशनः परः। पुष्पन्तु वीर्य्ये चोष्णं स्यात्तिक्तं वातकफापहम्॥ वै. निघ.। नक्तमालफले। सु. चि. २ अ. सद्योव्रणे।

करञ्जी। स्त्री। महाकरञ्जे। भ. च.। डहरकरञ्ज। हिं अरारि। गुणाः—स्वभ्नी तिक्ता तुवरी कटुपाका वीर्य्योष्णा पित्तार्शोवमिकृमिकुष्ठप्रमेहघ्नी च। भा. पू. १ भ.। करञ्जवल्ल्याम्।

करटः (कः)। पुं। कुसुम्भवृक्षे। रत्ना.। करिगण्डस्थले। हला.। वायसे। मे.।

करटवी। स्त्री। वृक्षमूषिकायाम्। रत्न. र. अल्पवृद्धि. चि.।

करटा। स्त्री। दुःखदोह्यायां गवि। हे. च.।

करटी(टिनी)। पुं, स्त्री। हस्तिनि। हस्तिन्याम्। हे. च.।

करटुः। पुं। कर्करेटुपक्षिणि। कर्कटिन्नाम पक्षी। हे. च.।

करणः। पुं। नख्यीरवृक्षे। हला.। क्ली। इन्द्रियगोलके। विषयेन्द्रिये। "क्रियाभेदेन्द्रियत्वेवकाय संवेशनेषु च। कायस्थे साधने क्लीवम्।" मे. णत्विकं।

करणत्राणम्। क्ली। मस्तके। हे. च.।

करणा। स्त्री। करुणानिम्बुके।

करणाधिपः। पुं। जीवे।

करण्टकः। पुं। पद्मकन्दे।

करण्टुः। पुं। लोणिकाशाके। वनभूनिम्बा। प. मु.।

करण्डः। पुं। मधुकीषे। मोचाक। दलाटके। करण्ड्यां। फूलेर साजि। मे. डत्विकं। कारण्डवपक्षिणि। हारा.।

करण्डफलः (कः)। पुं। कपित्थवृक्षे। रा. नि. व. ११।

करण्डा। स्त्री। यकृति। कालखण्डे।

करण्डो (ड्डन्)। पुं। मत्स्ये। त्रिका.।

करतलः। पुं। हस्ततले। हातेर तेलो। हिं हथेली। "ऊर्द्धं करतले स्मृतं।" रा. नि. व. १८।

करतालो। स्त्री। वाद्यविशेषे। कत्ताल। हस्ततलध्वनौ। हाततालो।

करत्रणम्। क्ली। श्वेतकेतके।

करतोयम्। क्ली। वर्षोपलजले। शीलेर जल।

करद्रुमः। पुं। कारस्करवृक्षे। कूँचिला। रा. नि. व. ९।

करपत्रम्। क्ली। क्रकचास्त्रे। करात, काँचि। सु. सू. ८ अ.। तच्च छेदनलेखनकर्म्मणि प्रयुज्यते। यथा—"भेदेऽस्थां करपत्रन्तु खरसारं दशाङ्गुलं। विसारि द्व्यङ्गुलं सूक्ष्मदन्तमत्स्यरुदन्वनम्" ॥ अवि.।

करपत्रवान्। पुं। तालवृक्षे। भ. च.।

करपत्रिका। स्त्री। जलक्रीड़ायाम्। नटा.। तिलपर्ण्याम्।

करपर्णः। पुं। भिण्डावृक्षे। रा. नि. व ४। रक्तैरण्डे। रा. नि. व. ८।

करपल्लवः। पुं। अङ्गुलौ। शब्दकल्प.।

करपात्रम् (त्रिका)। क्ली, स्त्री। जलक्रीड़ायाम्। हारा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करपा(बा)लिका। स्त्री। एकधारास्त्र। अ. टी. सा.।

करपुटः। पुं। एकत्रीकृतकरतलयुगले। अञ्जली।

करबडावल्ली। स्त्री। अत्यल्पपर्ण्याम्। हिं वल्लीपूरण। रा. नि. व. ३।

करबालः। पुं। नखे। श. मा.। खड्गे।

करभः। पुं। गजपिप्पल्यां। प. सु.। उष्ट्रे। रत्ना.। उष्ट्रशावके। सूर्य्यावर्त्ते। गजशिशौ। अ. टी. सा.। करिशुण्डे। नखीनामगन्धद्रव्ये। रा. नि. व. १२। See नखः। मणिबन्धात् कनिष्ठाङ्गुलिपर्य्यन्तहस्तावहिर्भागे। मे. भक्तिकं।

करभकाण्डिका। स्त्री। उष्ट्रकाण्डिकावत्। रा. नि. व. १०।

करभञ्जि(ण्डि)का। स्त्री। महाकरञ्जे। उहरकरञ्ज। हिं अरारि। भा. पू. १भ.। लताकरञ्जे।

करभप्रियः। पुं। क्षुद्रपीलुवृक्षे।

करभप्रिया। स्त्री। दुरालभायां। क्षुद्रदुरालभायां। रा. नि. व. ४।

करभवल्लभः। पुं। कपित्थवृक्षे। क्षुद्रपीलुवृक्षे। रा. नि. व. ११।

करभवारुणी। स्त्री। उष्ट्रकण्टकगुल्मे। "स्थितं करभवारुणी।" रस. र. वाजी.।

करभा। स्त्री। हस्तिकाल्यां। विहाति गाछ। रा. नि. व. ९।

करभादनिका (नी)। स्त्री। क्षुद्रदुरालभायां। रा. नि. व. ४।

करभी(इन्)। पुं, स्त्री (भी)। हस्तिनि। उष्ट्र्यां। भा. म. ३भ. मू. घा. चि.। ऋक्षमेषयोर्द्वयोः। श्वेतापराजितायां।

करभीरः। पुं। सिंहे। श. र.।

करमटः। पुं। गुवाकवृक्षे। त्रिका.।

करमध्यम्। क्ली। कर्षे, २ तो.। प. प्र. १ख.।

करमर्दः। पाणीयामलकवृक्षे। पाणीयामला। अटी. सा.। करमचा। हिं करौंदा इति च भाषा। मं कं करवन्दे, करिजिगे। रा. नि. व. ११। सद्विविधो महाक्षुद्रभेदेन। रूपाः—"करमर्दफलक्षाम सिक्तक्षाग्निप्रदीपकं। गुरु पित्तकरं ग्राहि चाम्लमुष्णं रुचिप्रदं। रक्तपित्तं कफञ्चैव वर्द्धयेत्तद्धि नाशकम्। तत्पक्वं मधुरं रूक्षं लघु शीतञ्च पित्तहं। रक्तपित्तं विदोषञ्च विषं वातञ्च नाशयेत्। तच्छुष्कं पक्वसदृशं गुणैर्ज्ञेयं विचक्षणैः। अत्यल्पस्य गुणाश्चैव ज्ञेया आमकरञ्जवत्" ॥ वै. निघ.। "पिपासाघ्नं गुरु रुचिकरं पित्तकरञ्च। राज.। "करमर्दद्वयं लाममग्नं गुरु तृषापहं। उष्णं रुचिकरम्प्रोक्तं रक्तपित्तकफप्रदम्। तत्पक्वं मधुरं रूक्षं लघु पित्तसमीरजित्" ॥ भा.। च. सू. ४अ.।

करमर्दकः (का)। पुं, स्त्री। करमर्दवृक्षे। लताविशेषे।

करमर्दिका। स्त्री। पर्व्वतजद्राक्षासदृश्याम्। करौंदीति लोके ख्यातायाम्। द्राक्षा पर्व्वतजा यादृक् तादृशी करमर्दिका। भा. पू. १भ. आम्रादिव.।

करमर्दी। पुं, स्त्री। करञ्जवृक्षे। करमर्दवृक्षे। रत्ना.।

करमालः। पुं। खतमाले। धूमे। हे. च.।

करमूलम्। क्ली। मणिबन्धे। रा. नि. व. १८।

करम्बी। स्त्री। कलम्बीशाके। See कलम्बी।

करम्भः। पुं। दधिसक्तुनि। प. सु. उत्तमारणीति। वा. सू. १५ अ. वीरतरादिः अरुणः। "भल्लूकमीरटकुरण्टकरम्भपार्थाः।" क्ली। तन्नामकत्वक्सारनिर्य्यासे। वरविषे। प्रियङ्गुफले। इदं स्थावरविषान्तर्गतफलविषं। पुष्पविशेषञ्च। सु कल्प. २ अ.। See फलविषम्।

करम्भकः। पुं। श्वेतकिणिह्यां। क्ली। दधिमिश्रितसक्तुनि। हारा.।

करम्भा। स्त्री। शतावर्य्याम्। प्रियङ्गौ। रा. नि. व. १२। इन्दीवरायां। रा. नि. व. ३।

कररी। स्त्री। करिदन्तमूले। हला.।

कररुहः। पुं। नखे। रा. नि. व. १८। नखीनामगन्धद्रव्ये। नखीति भाषा। रा. नि. व. १३। See नखः। अगर्व्वादिधूपे। वै. निघ. २भ.।

कररेखा। स्त्री। करस्थरेखायाम्। "रेखाः सामुद्रिके ज्ञेयाः शुभाशुभनिवेदकाः।" रा. नि. व. १८।

करलः। पुं। कपित्थवृक्षे।

करवालिका। स्त्री। करपालिकायाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करवी। स्त्री। हिङ्गुपत्र्याम् तें कीपपु। भा. पू. १भ. गु. व.। यमान्यां। राजिकायां। सु. सू. ४६ अ.।

करवी(र)भुजा। स्त्री। आढकीवृक्षे। आईरी। रा. नि. व. १६।

करवीरः। पुं। (Nerium odorum.) Sweet-scented oleander. उपविषजातीयस्वनामख्यातवृक्षे। करवी गाछ। हिं कणैली। मं कणेरू, कण्हेर। कं वाफणलिंगे। तें गन्नेरु। स चतुर्धा श्वेतरक्तपीतकृष्णभेदेन। तत्र श्वेतकरवीरगुणाः—कटुः तीक्ष्णः कुष्ठकण्डूघ्नः व्रणविषविस्फोटघ्नः हृद्यवृद्धिप्रदश्च। रा. नि. व. १०। सु. सू. ३९ अ. शिरोविरेचने। रक्तवर्णः श्रीधकः स्यात्कटुः पाके च तिक्तकः। कुष्ठादिनाशकौ लेपात् इति रक्तगुणाः। निघण्टौ पाटलभेद उक्तः—अथ पाटलवर्णकः। शीर्षपीड़ां कफं वातं नाशयेदिति कीर्त्तितः। रक्तादिचतुर्भेदगुणाः श्वेतहयारिवत्। वै. निघ.। अर्जुनवृक्षे। भुजाढ़कीवृक्षे। टोंडर कलाय्र गाछ। प. मु.। हिङ्गुपत्रे। सीमलतामेदे। सु. चि. २९ अ.। See सीमः।

करवीरकः। पुं। श्वेतकरवीरवृक्षे। तन्मूलविषे। हे. च.। अर्जुनवृक्षे। रा. नि. व. ९।

करवीरकन्दसंज्ञः। पुं, क्ली। A species of onion or bulb. तैलकन्दे। पलाण्डुविशेष। रा. नि. व. ७।

करवीरका। स्त्री। मनःशिलायां। वै. निघ.।

करवीरणी। स्त्री। करवीरुणी ककरखिरुणी इति कीङ्कणदेशप्रसिद्धे पुष्पवृक्षविशेषे। या रक्तपुष्पा ग्रीष्मे जायते। गुणाः—"तिक्ता चोष्णा च कटुी च कफवातविषापहा। आध्मानवातं कृद्दिं च ऊर्द्ध्वश्वासकृमीञ्जयेत्। इत्येवं करवीरण्या गुणाः प्रोक्ताः"...। वै. निघ.। रा. नि. व. १०।

करवीभुजा। स्त्री। आढ़क्याम्। हिं रहर। रा. नि. व. १६।

करवीरा। स्त्री। मनःशिलायाम्।

करवीराद्यतैलम्। क्ली। भगन्दराधिकारे तलम्। पाठः—"करवीरनिशादन्तीलाङ्गलीलवणाग्निभिः। मातुलुङ्गार्कवत्साद्यैः पचेत्तैलं भगन्दरे॥" तिलतैलं ४श. करवीरादिकल्कः १श. वारि १६ श. एकत्र पाचयम्। च. द., रस. र.। अन्यत् नासारोगे—"रक्तकरवीरपुष्पं जात्यास्तथाशनमल्लिकायाश्च। एतैः समन्तु तैलं नासार्शोनाशनं श्रेष्ठम्॥" च. द.। अशनः पीतशाले (पियाशाल)। पाकः पूर्ववत्।

करवीरानुजा। स्त्री। आढक्यां। हिं रहर। वै. निघ.।

करवीरिका। स्त्री। मनःशिलायां। र. सा. सं।

करवीरी। स्त्री। श्रेष्ठगव्याम्। मे.।

करवीर्य्यः। पुं। चिकित्सकविशेषे।

करशाखा। स्त्री। अङ्गुलौ। रा. नि. व. १८।

करशीकरः। पुं। वसने। करिशुण्डनिर्गतजलकणे। हला.।

करशूकः। पुं। नखे। त्रिका.।

करशोथः। पुं। (Oedematous swelling of hand.) हस्तशोथे। हातेर फुला फोला।

करसम्भवम्। क्ली। रोमकलवणे। सांभरिलवण। रत्ना.।

करसादः। पुं। हस्तदौर्ब्बल्ये।

करहा [न्]। पुं। मदनवृक्षे।

करहाटः (कः)। पुं। मदनवृक्षे। प. मु., रा. नि. व. ८। योगरत्न. उ. ख. केशरपाके. सु. कल्प ७. अ.। महापिण्डीतरौ। रा. नि. व. ९। सु. चि. १८ अ.। पद्मकन्दे। मे.। अकर्करायां। आकरकरा। श्वेतमदने। वै. निघ.।

करहाटकं। क्ली। स्वर्णे। अ.।

कराग्रम्। क्ली। करिपुष्करे। हला.।

कराग्रपल्लवः। पुं। अङ्गुलौ।

कराघातः। पुं। हस्ताङ्गुलौ।

कराङ्कुशः। पुं। नखे। शब्दर.।

कराङ्गणम्। क्ली। हट्टे। हारा.।

कराचीनः। पुं। खञ्जने। हिरूपकीषः।

करामर्दः। पुं। करमर्दकवृक्षे। श. र.।

कराम्बुकः। पुं। पानीयामलकवृक्षे। श. च.।

कराम्लः (क)। पुं। करमर्दकवृक्षे। प. मु.।

करायिका। स्त्री। पचिमेदे। क्षुद्रवके। वै. निघ.।

करालः (कः)। पुं, क्ली। पर्णासे। कृष्णतुलसी।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प सु. । भा. पू. १भ. । वि । दन्तुरे, तुङ्गे, भीषणे । पुं । सर्ज्जरसतैले । गर्ज्जनतैल । मे. लचिकं । तन्नामकदन्तरोगे दन्तोपरिदन्तोद्गेदनरूपे । दाँतेर उपर दाँत ओठा । तल्लक्षणम्—अन्ने: अन्ने: प्रकुरुते वायुर्दन्तसमाश्रित: । करालान् विकटान् दन्तान् करालो न स सिध्यति ॥ मा. नि. । कस्तूरीमृगे । सु. सू. ४६ अ. । गुणा:—जङ्गालवत् । क्ली । कृष्णार्जके । कृष्णवर्बूरके । तैलेन घृतेन वा कृते वेसवारे । इति पाकराज: ।

करालकलिक: । पुं । कुन्दपुष्पवृक्षे । प. सु. ।

करालत्रिपुटा । स्त्री । लङ्कानामग्निस्त्रीधान्ये । तेओड़ा धान । रा. नि. व. १६ ।

कराला । स्त्री । अनन्तमूले । अनन्तमूल । प. सु. । विड़ङ्गायाम् ।

करालाङ्गम् । क्ली । विड़ङ्गे । वै. निघ. ।

करालास्य: । वि । दन्तुरवदने ।

करालिक: । पुं । वृक्षे । हे. च. ।

करालो । स्त्री । अग्निजिह्वायाम् । पुं । (लिन्) महादीषान्वितार्श्वे । यस्य नीचत ऊर्द्धं वा एको दन्तुरो दन्तो जायते स करालो । ज. द. ३अ. ।

करिक: । पुं । विट्खदिरे ।

करिकणा । स्त्री । गजपिप्पल्याम् । भैष. वाजी. कामेश्वरमोदके ।

करिकणावल्ली । स्त्री । चविकालतायाम् । चइ गाछ । रा. नि. व. ६ ।

करिकर्णपलाश: । पुं । हस्तिकर्णपलाशे । भैष. अ. पि. सर्व्वतोभद्ररसे ।

करिकवल: । पुं । विधाने । हारा. ।

करिका । स्त्री । कारीवृक्षे । कटिकारी । रा. नि. व. ८ । नखक्षते ।

करिकुम्भ: । पुं । गजकुम्भे ।

करिकुम्भक: । पुं । नागकेशरवृक्षे । हारा. ।

करिकुसुम्भ: । पुं । नागकेशरवृक्षे । नागकेशरचूर्णे । हारा. ।

करिकृष्णा । स्त्री । गजपिप्पल्याम् ।

करिकेसरम् । क्ली । नागकेसरे । वै. निघ. शालि. चन्द्रावलेहे ।

करिचर्म्म । क्ली । गजचर्म्मणि ।

करिच्छदम् । क्ली । तालीशपत्रे । रा. ।

करिज: । पुं । गजशावके । श. मा. ।

करिणी । स्त्री । हस्तिन्याम् । अम. । तत्पर्य्याय:, —वेणुका वशा (अ.), कुञ्जरी (श.) गणेरु: (मे.), करेणू: करेणु: करेणुका रेणुका वासिता वाशा हस्तिनी (शब्दर.), कटम्भरा पुष्परिणी कचा गणिका गजयोषित् (ज.), पद्मिनी (अ. टी.) ।

करिदन्त: । पुं । गजदन्ते ।

कुटजपुटपाकः। पुं। सन्निपातरक्तातीसारे हितः। कुटजमूलत्वक् ३२ तो. तण्डुलोदकेन सम्पिष्य तद्गालकं जम्बूपत्रेणावेष्ट्य सूत्रेणावेष्टयेत्। अथ तत्पिष्टगोधूमेनालिप्य तदुपरि मृत्तिकालिपनं दत्त्वा करीषाग्नौ पचेत्। यावल्लेपो रक्तवर्णः तावदवतार्य्य रसं गालयेत् मधुना च पलमितो रसो हितः। भा म. १भ. रक्तातिसा. चि.। सा. कौ.। भैष.। "स्निग्धं घन कुटजवल्कमजन्तुजग्धमादाय तत्क्षणमतीव च पीथयित्वा। जम्बूपलाशपुटतण्डुलतोयसिक्तं वस्त्रं कुशेन च वहिघनपङ्कलिप्तम्। सुस्निग्धमेतदवपीड्य रसं गृहीत्वा चौद्रेण युक्तमतिसारवते प्रदद्यात्। ताजा कुड़चिर मूलेर छाल कुटिया चेलूनीर जले माखिया जामपातात्र कुश द्वारा बान्धिया मृत्तिका लेपनपूर्व्वक पाक करिबे। लेपनमृत्तिका लाल हइले पाक शेष हइबे।

कुटजमल्ली। स्त्री। वृक्षविशेषे। कुड़चिगाछिका।

कुटजरसक्रिया। स्त्री। अर्शोरोगघ्नी। कुटजत्वक् १०९ प. आकाशवारि (अभावे भौमवारि) ६४ श. शे. १६ श. (मतान्तरे अष्टभागशिष्टः)। क्वाथे पुनः पक्वा लेहीभूते तत्र मोचरस-वराहक्रान्ता-प्रियङ्गिन्द्रयवानां प्रत्येकं चूर्णं त्रिपलिकं दत्त्वा पुनः पचेत्, पक्वा च दर्व्वीलिपयोग्ये सञ्जाते पाकशेषकल्पावतारयेत्। कुड़चिछाल १२॥० श. जल ६४ श. शेष १६ श. या ८श.। पाक :करिया लेहवत् हइले, मोचरस, वराक्रान्ता, प्रियङ्गु, इन्द्रयव प्रत्येके ३ पल प्रक्षेप दिबे।

कुटजलेहः। पुं। अर्शोरोगघ्नः। कुटजत्वक् १२॥० श. वारि ६४ श. शे. क्वाथः ८ श.। तत्पूतं क्वाथं सपुराणगुड़ (३ प) पक्वा लेहीभूत, अवतार्य्य तत्र मेलकादीनां चूर्णं प्रत्येकं १ प. प्रक्षिप्य यथाविधि पाकशेषं कुर्य्यात्। चूर्णानि यथा—रक्तचन्दनं विड़ङ्गं चिकटु त्रिफला रसाञ्जनं चित्रकमूलं इन्द्रयवः वचा अतिविषा बिल्वपेशी च। च. द. अर्श. चि.।

कुटजवीजम्। क्ली। इन्द्रयवे। रा. नि. व. ९।

कुटजसुधा। स्त्री। कुटजचूर्णे। कुड़चिर चूर्ण। "कौटजा शोषनाशिनी।" वै निघ.।

कुटजक्षीरम्। क्ली। रक्तातीसारे प्रशस्तम्। कुट्टितकुटजमूलत्वक् १६ तो. वारि ४ श. शे. १ श. क्वानयित्वा तत्र क्वाथे छागीपयः पलद्वयं दत्त्वा पक्वा च क्षीरशेषमवतारयेत्। भा. म. १भ. अतिसा. चि.।

कुटजा (भिधम्)। स्त्री, क्ली। इन्द्रयवे। रा. नि. व. ९।

कुटजाद्यक्वाथः। पुं। रक्तातीसारे हितः। "कुटजात्विषा मुस्ता बालकं लोध्रचन्दनं। धातकी दाडिमं पाठा क्वाथमेषां समाचिकं। पिबेद्रक्तातिसारेषु दाहशूलप्रशान्तये।" भा. म. १भ. रक्तातिसारे। द्वितीयः—"कुटजं दाडिमं मुस्तं धातकी बिल्वबालकं। लोध्रचन्दनपाठाश्च क्वाथं मधुना पिबेत्॥" कुड़चिछाल, आतइच, मुता, बाला, लोध, रक्तचन्दन, धाइफूल दाड़िमछाल, आकनादिमूल प्रत्येके १७॥० रति। जल ॥० श. शे. ⅛ अर्द्ध पोओया। द्वितीय पूर्व्ववत् केवल आतइच स्थाने वेलशुँट। भैष.।

कुटजाद्यघृतम्। क्ली। अर्शोरोगे हितम्। घृतं ४ श. कल्कद्रव्याणां समष्टिरष्टपलं, वारि ४ श. एकत्र पचेत्। द्रवानुक्तौ जलदानविधानात्। अनुक्ते द्रवकार्य्ये तु सर्व्वत्र सलिलं मतम्। प. प्र.। घृत ४ श. जल ४ श.। कल्कद्रव्य कुड़चिर छाल, इन्द्रयव, नागेश्वर, नीलोत्पल, लोधकाष्ठ, धाइफूल प्रत्येके १०॥⅛ तो. एकत्र पाक करिबे। च. द. अर्श. चि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुटजावलेहः। पुं। अतीसारे हितः। कुटजमूलत्वक् पलशतं वारि ६४ श. शे. १६ श. पादशिष्टक्वाथः पुनर्लेहवत् पाच्यः। पाकशेषे जाते अवतार्य्य सौवर्चलादीनां चूर्णं पलद्वयं प्रक्षेप्यम्। "शतं कुटजमूलस्य चुर्णं तोयार्द्धशेषे पचेत्। क्वाथे पादावशेषेऽस्मिन् लेहं पूते पुनः पचेत्। सौवर्चलयवक्षारविड्सैन्धवपिप्पली। धातकीन्द्रयवाजाजीचूर्णं दत्त्वा पलद्वयं। लिह्याद्दर्भमात्रन्तु शीतं क्षौद्रेण संयुतम्॥" कुटजत्वक् १२॥० श. जल ७४ श. शे. १६ श.। छाँकিয়া ঐ क्वाथ पुनः पाक करিয়া লেহের মত হইলে, তাহাতে সচল, বিট্, সৈন্ধব, যবক্ষার, পিপুল, ধাইফুল, ইন্দ্রযব ও জীরা উহাদের চূর্ণ একত্র ১৬ তোলা দিয়া নামাইবে। মাত্রা ১ তোলা, মধুর সহিত। च. द. अतीसा. चि.।

कुटजाष्टकम्। क्ली। अतिसारघ्नमौषधम्। कुटजमूलत्वक् १०० प. वारि ६४ श. शे. १६ श.। अथ शाल्मल्यादीनां प्रत्येकं पलं गृहीत्वा एकत्र सम्पिष्य तच्च क्वाथे दापयेत्। अथ पुनः पक्त्वा पाकशेषः कार्य्यः। केचित्तु शाल्मल्यादीनां चूर्णम्प्रक्षिपन्ति। अन्ये च पाठादिकं दत्त्वा यावद्दर्व्वीलग्नं न भवति तावत्पचन्ति। पाकशेषे मोचरसचूर्णं प्रक्षिपन्ति। प्रक्षेप्यद्रव्यं यथा—आकनादि, वराक्रान्ता, आतइच, मुता, वेलशुँठ, धाईफुल, मोचरस प्रत्येके ८ तोला। च. द.।

कुटजाष्टकावलेहः। पुं। अतिसारे हितः। कुटजत्वक् ५० प. वारि ६४ श. शे. १६ श.। अथ क्वाथं वस्त्रपूतङ्कृत्वा पुनः पचेत्। पाकशेषप्राये अवतार्य्य लज्जालुका धातकी बिल्वशलाटुः पाठा (आकनाद) मुस्तकमोचरसौ अतिविषा चेति द्रव्याणां चूर्णं प्रत्येकं पलं प्रक्षेप्तव्यम्। भा. म. १भ.।

कुटजीवः। पुं। पुत्रजीववृक्षे। वै. निघ.।

कुटजोद्भवः (वा)। पुं, स्त्री। इन्द्रयवे। वा. टी.। हे. च.।

कुटनी। स्त्री। महाज्योतिष्मतीलतायाम्। मे.।

कुटन्नक(ट)म्। क्ली, पुं। भद्रमुस्तायाम्। नागरमुता। प. म.। केशराजे। केशुर। अ. टी.। पुं। विकङ्कतवृक्षे। वँईचि गाछ। श्योणाकवृक्षे। रा. नि. व. ९। सु. सू. ३८ अ.। कैवर्त्तमुस्तके। वितुन्नकनाम्नी वृक्षविशेषस्य त्वचि (गुड़त्वची इति लोके)। भा.।

कुटन्नटा। स्त्री। पालङ्कशाके। सु. चि. २० अ.।

कुटपः। पुं। कुड़वमानभेदे। गृहसमीपीयाने कुड़वाढ़माने। हे. च.। क्ली। पर्णे। रा. नि. व. १०।

कुटपिनी। स्त्री। पद्मिन्याम्। पद्मের ঝাড়। रा. नि. व. १०।

कुटप्पकम्। क्ली। सुगन्धरोहिषतृणे। हे. निघ.।

कुटर(रि)(रु)णा (र(रि)णी)। स्त्री। विद्रतायाम्। তেউড়ী। प. मु.। अरुणमूलविद्रति। शुक्लविद्रति। वा. सू. १५ अ.। "क्षमुक-कुटरणी शङ्खिनी चर्म्मसाह्वा।"

कुटरवाहिनी। स्त्री। श्वेतविद्रति। वै. निघ.।

कुटरुः। पुं। पटगृहे। कानात्। उणा.।

कुटलम्। क्ली। पटले। घরের চাল। हारा.।

कुटशाल्मलिः। पुं। रोहितकवृक्षे। के.।

कुटामोदः। पुं। गन्धमार्जारावृक्षे। वै. निघ.।

कुटारः। पुं। वृक्षे। शब्दर.।

कुटिः। पुं। वृक्षे। श. र.। शरीरे। उणा.। स्त्री। सुरामांस्याम्। मद. व. ३। गृहे। अ. टी. भ.।

कुटिकः। पुं। सृत्फल्यां, कुष्ठे। कूड়। हारा.।

कुटिचरः। पुं। जलशूकरे। শুশুক। श. र.।

कुटि(ठि)ञ्जरः। पुं। पक्षशाकविशेषे, वनवास्तुके। गुणाः—"कुटिञ्जरः स्वादुपाकः चारी रूक्षश्च शीतलः। गुरुर्मलस्तम्भकरो दोषोत्पादनकारकः" वै. निघ.।

कुटि(टी)रम्। क्ली। क्षुद्रगृहे। জটা.।

कुटिलम्। क्ली। वनवास्तुके। वै. निघ.। पिण्डीतगरे, तगरपादिकायाम्। तगरपাদুকা। प. मु.। पुं। शल्के। শামুকে। रा. नि. व. १३। ति। वर्त्ते। शब्दर.।

कुटिलपुष्पिका। स्त्री। तगरपादिके। प. मु.। स्पृक्कानामगन्धद्रव्ये। रा. नि. व. १२।

कुटिलसप्तकम्। क्ली। चक्षे। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुटिला। स्त्री। सृक्कानाम-गन्धद्रव्ये। See कुटिलपुष्पिका।

कुटी। सुरानामगन्धद्रव्यं। मूरामांसी। रा. नि. व. १२। अन्नादिरहितसिक्थके। प. प्र. २ ख.। श्वेतकुटजवृक्षे। मरुवकवृक्षे। वै. निघ.।

कुटीका। स्त्री। भूशयमृगे। च. सू. ४अ.।

कुटीप्रावेशिकम्। क्ली। कुटी गृहं, तत्प्रवेशयोग्ये (द्विविधरसायनान्यतमे)। च. चि. १अ.। सु. चि. ४ अ.। वा. उ. ३९अ.।

कुटीस्वेदः। पुं। स्वेदविशेषे। च. सू. १४अ.।

कुटुङ्गकः। पुं। वृक्षलतागहने। गृहाच्छादने। कुटीरे। अ. टी. सा.।

कुटुम्बकः। पुं। भूतृणे। गन्धतृणविशेष। रा. नि. व. ८।

कुटुम्बिनी। स्त्री। स्वनामख्यातमहाक्षुपे। तत्पर्य्यायः,—पयस्या, क्षीरिणी, जलकामुका, वक्रशल्या, दुराधर्षा, क्रूरकर्म्मा, सिरिरुष्टिका, शीता, प्रहरकुटवी, शीतला, जलरुहा। गुणाः—मधुरा ग्राहिणी कफ-पित्तघ्नी व्रण-रक्तदोषकण्डूघ्नी रसायनी च। रा. नि. व. ५।

कुटेरः। पुं। कुटीरे।

कुट्टकः। पुं। पानीयकाके। पानकौड़ी। वै. निघ.।

कुट्टनम्। क्ली। छेदने। कोटा। कुत्सने। तापने।

कुट्टमलः। पुं, क्ली। पुष्पकीरके।

कुट्टल(क)म्। क्ली। नीलोत्पले। नीलशुन्दि। रा. नि. व. १०।

कुट्टारम्। क्ली। सुरते। मे.। कम्बले। वि.।

कुट्टितमांसम्। क्ली। मांसव्यञ्जनभेदे। मांसकाबाब्। श. चि.।

कुट्टिमः। पुं। दाड़िम्बवृक्षे। दाड़िम गाछ। रा नि. व. ११। बद्धभूमौ। बान्धान मेजे। हला.।

कुड्मलः। पुं। मुकुले। अम.। कीशे। जटा.।

कुठः। पुं। चिबुकक्षुपे। रा. नि. व. ६। वृक्षे। अम.।

कुठरः। पुं। दण्डविष्कम्भे। अम.।

कुठरिणी। स्त्री। श्वेतवृक्षतायाम्।

कुठाकुः। पुं। Wild pecker. पक्षिविशेषे। काठ्ठोक्रा। हिं खुटक्वढ़या। उणा., विश्व.।

कुठाटङ्कः। पुं। कुठारे। जटा.।

कुठारः। पुं। कुठेरकवृक्षे। र. सा. सं.। अस्त्रविशेषे।

कुठारकतैलम्। क्ली। शारीरव्रणघ्ने तैले। पाठः—"कुठारकात्पलशतं क्वाथयेदक्षणेऽम्भसि। तेन पादावशेषेण तैलप्रस्थं विपाचयेत्। कल्कैः कुठारापामार्गग्रीष्मिकामक्षिकासु च। एतत् कुठारकं नाम व्रणशोधनरोपणम्। नाड़ीषु परमोऽभ्यङ्गः.....।" अत्र मक्षिकेत्यत्र चिङ्गड़ीमत्स्य इति केचिद्वदन्ति। कुक्षाक्षिकामत्स्य इति। श्रीकण्ठ.। रस. र.।

कुठारच्छिन्ना। स्त्री। कन्दगड़ूच्याम्। हिं कुरेया। वै. निघ. क्षयरोग. लौहरसायने।

कुठारिका (री)। स्त्री। कुठारे। कुड़ुल। हिं कुलहाड़ी। शस्त्रकर्म्मयोग्यव्यधनास्त्रविशेषे। यथा—"पृथुः कुठारी गोदन्तसदृशार्द्धाङ्गुलानना। तयोर्द्वदन्तया विध्येदुपर्य्यस्थां शिरां स्थिताम्॥" सु. शा., सू. ८ अ.।

कुठारुः। पुं। कुठेरकवृक्षे। कौशे। मे.

कुठिः। पुं। वृक्षे। उणा.।

कुठिकः। पुं। कुष्ठौषधौ। कूड़। हारा.।

कुठिल्लकः। पुं। रक्तपुनर्नवायाम्। वै. निघ.।

कुठेरः (कः)। पुं। A kind of Basilicum. सितार्जकवृक्षे। क्षुद्रपत्र-श्वेततुलसी, बाबुई-तुलसी। रा. नि. व. १०। भैष. अग्निदग्ध. चि. रुद्रतैले। पर्णासे। काल बाबुई, काल तुलसी। रा. नि. व. १०। च. सू. २अ.। भा.। नन्दीवृक्षे। रा. नि. व. २३। तुलसीवृक्षे। उणा.। अम.।

कुठेरजः। पुं। (Ocimum Gratissicum.) श्वेततुलस्याम्। बाबुई तुलसी। श. र.।

कुठेरुः। पुं। चामरवाते। चामरेर बातास।

कुड़पः (वः)। पुं। परिमाणविशेषे। द्वात्रिंशत्तोलके ८ वा ४ प.। प्रसृतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः। प. प्र. १ ख.। मृद्वृक्षवेणुलौहादेर्भाण्डं यच्चतुरङ्गुलं। विस्तीर्णञ्च तथोर्द्धञ्च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्मानं कुड़वं स्मृतम्॥ कुड़वाद्यूर्द्धं शरावादिमानानां द्वैगुण्यम् ग्राह्यम्। नियलकरमते तु कुड़वस्यापि द्वैगुण्यम्। तच्च दन्तीघृते कुड़ुमाद्यतैले दृश्यते न नारिकैलखण्डे। "आर्द्रद्रव्यस्य कुड़वः पलैरष्टाभिरेव च। शुष्कद्रव्यचतुष्केण कुड़वः समुदाहृतः॥" हारीतः।

कुड़लो। पुं। काञ्चनारभेदे। मद. व. १।

कुड़िः। पुं। देहे। उणा.।

कुड़िशः। पुं। Cyprinus curchius.) मत्स्यविशेषे। कुड़ची गाछ, वाटा गाछ। गुणाः—मधुरो हृद्यः कषायोऽग्निदीपनः लघुः स्निग्धः वाते पथ्यः रोचनो बल्यः कीष्टवन्ध्यकरश्च। राज.।

कुड़ुच्चो। स्त्री। क्षुद्रकारवेल्लके। छोट उच्छे। लताफलगुणाः—कटुः उष्णातिरुच्या दीपनी वातरक्तकरी च। तत्कन्दः अर्शोहरः मलशोधनः योनिदोषघ्नश्च। रा. नि. व. ७।

कुड्मलः। पुं। मुकुले। मे.। क्ली। नीलोत्पले।

कुड्मलकम्। क्ली। नीलोत्पले। रा.।

कुड्यम्। क्ली। विलेपने। मे.। गृहभित्तौ।

कुड्यकोटकः } पुं,स्त्री। गृहगोधिकायाम्।
कुड्यमत्स्यो (त्स्यः) } टिकटिकी। हे. च.। भ. र.। च. भा. ८ अ.।

कुणः। पु.। प्रावारकीटे। ज.।

कुणकः। पुं। बालके, सद्योजातशिशौ। श. चि.।

कुण(णि)ञ्जः (रः)। पुं। A kind of chenopodium.) अरण्यवास्तुकविशेषे। वनवेतुआ। सं कुणजिरु, गीरजे। तत्पर्य्यायः,—कुणञ्जा, कुणञ्जः, अरण्यवास्तूकः। गुणाः—मधुरः रुच्यः दीपनः पाचनश्च। रा. नि. व. ५। तच्छाकं विदोषघ्नं मधुरं रुच्यं दीपनं ईषत्कषायं संग्राहि लघु। रा. नि. व. ७।

कुणञ्जा (ञ्जी)। स्त्री। कुणञ्जरक्षुपे। रा. नि. व. ५।

कुणटी। स्त्री। मनःशिलाविशेषे। मनछालविशेष। कुणटी तु मनःशिला। रा. नि. व. १३।२३। धानके। भा. पू. १भ.।

कुणपः। त्रि। शवगन्धौ। 'मज्जप्रकाशङ्कुणपं विदीषम्।' भा. म. ४ भ.। दुर्गन्धे। पुं, क्ली। शुक्रदोषे, आर्त्तवदोषे। मृतशरीरे। अम.।

कुणपगन्धः। पुं। शवगन्धे।

कुणपा (पी)। स्त्री। विट्शारिकायाम्। गुय्रेशालिक, गुय्रेल्याकुड़ा। हारा.।

कुणारी। स्त्री। कुष्ठरोगविहितभक्षद्रव्ये, यवपर्पटीति ख्याते। सु. चि. १० अ.। कोणाड़िकेति कश्चित्पठति।

कुणालः। पुं। पक्षिविशेषे।

कुणिः। पुं। The tree cedrela Toona. तुन्नवृक्षे। तूँद गाछ। अम.। मे.। त्रि। कुत्सितकरे। "कुणिस्तुन्नकवृक्षे। कुकरे।" मे.। तन्नामकमर्म्मस्थाने, कूर्परे। सु. शा. ६ अ.।

कुणी। पुं। कणभजातीयकीटे। सु. कल्प. ८अ.। See कणभः।

कुण्टम्। क्ली। अर्ज्जके। गुण्ठतृणे। वै. निघ.।

कुण्टकः। त्रि। स्थूले। मोटा। भ. मा.।

कुण्टकुरण्टः। पुं। झिण्टयाम्। झाँटी। वै. निघ.।

कुण्डम्। क्ली। मानभेदे। हला.। जलाशयविशेषे। इन्दारा. चोवाच्चा। जलगुणाः—रुच्यमग्निकरं कफकरं मधुरं लघु च। रा. नि. व. १४। स्थाल्याम्। थाली। अम.। पुं। क्रौञ्चे। हला.। जारजपुत्रे। वारिपात्रे।

कुण्डगोलकम्। क्ली। काञ्जिके। काँञ्जि। हे. च.।

कुण्डङ्गः (कः)। पुं। कुङ्के। हे. च.।

कुण्डलः। पुं। रक्तकाञ्चनवृक्षे। र. मा.। क्ली। कर्णभूषणे। पार्श्वे। बलये। मे. लचिकं।

कुण्डलपत्रः। पुं। दना इति ख्यातवृक्षे। वै. निघ.।

कुण्डलिका (नी)। स्त्री। जिलेबी इति ख्याते मिष्टान्ने। तन्निर्म्माणविधिः यथा—"गोधूमप्रस्थद्वितयस्य कृत्वा सुक्ष्माः कणाः प्रस्थमिताः सुनिस्तुषाः। दुग्धेन क्लिन्नासु तथैव भाण्डे यावत्सदस्नत्वमुपेयुरीषत्। उद्धृत्य दुग्धेन द्रवं सुपृथ्य सच्छिद्रपात्रेण च शौफलस्य। धारां घृते कुण्डलिकाकृतिं सृजन् पचेदथोद्धृत्य सुशर्कराया:। पाके निमज्जितामाहुः सर्व्वे कुण्डलिकाभिधाम्। सा शुक्लला हृद्यतमा इन्द्रियाणां सुतर्पिणा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्टि-कान्तिकरी बल्या द्वितीयास्याकृतिर्मता ॥" वै. निघ. । गुडूच्याम् । रा. नि. व. ३ ।

कुण्डलिनायकः । पुं । पिङ्गलसर्पे ।

कुण्डला (इन्) । पुं । सर्पे । हारा. । वरुणे । मयूरे । मे. । सुगविशेषे । इति अजयपालः । आरग्वधवृक्षे । स्त्री (ला, ली) । गुडूच्याम् । भा. म. १भ. कर्णकर्ज. चि. । "बाटुलिकीयाघन-कुण्डलीभिः ।" काञ्चनवृक्षे । मे. । सर्पिणीवृक्षे । गडगडे शाक । रा. नि. व. ५ । कपिकच्छौ । रा. नि. व. ३ । कुमार्याम् । घृतकुमारी । कुण्डलिकायाम् । जिलेबी । भा. ।

कुण्डलीचालनः । पुं । सर्पिणीवृक्षे ।

कुण्डिका । स्त्री । कमण्डलौ । हे. च. । पिठरे । शु. च. ।

कुण्डी । स्त्री । शुक्लयूथिकायाम् । वै. निघ. । कमण्डलौ । अ. । स्थाल्याम् । अ. टी. भ. । (इन्) पुं । अग्नौ ।

कुण्डोरः । पुं । मनुष्ये । धरणौ ।

कुतकम् । क्ली । रसाञ्जने । प. सु. ।

कुतपः । पुं, क्ली । Poa Cynosuroides. दर्भविशेषे । कुश । छागकम्बले । मे. । वृषे । अग्नौ । सूर्ये । हे. च. । दिवसस्याष्टममुहूर्त्ते । वि । ईषदुष्णे ।

कुतपकालः । पुं । मध्याह्नकाले । अत्यूष्ण-काले । के. ।

कुतपसप्तकम् । क्ली । कृष्णतिले । रौप्ये । दर्भे । ऊर्णावस्त्रे । वै. निघ. ।

कुतित्तिरिः । पुं । तित्तिरपक्षिविशेषे । सु. सू. ४६ अ. ।

कुतुः (पः) । पुं, क्ली । चर्म्मपात्रे । कूपो । अस. ।

कुतुम्बा (म्बिका) । स्त्री । द्रोणपुष्पीवृक्षे । रा. नि. व. ६ ।

कुतुम्बुरु । क्ली । कुत्सिततिन्दुकीफले । ডেঁদ । शु. च. ।

कुतूणकः । पुं । बालरोगविशेषे । See कुकूणकः ।

कुत्तणम् । क्ली । कालशे । गन्धतृण । रा. नि. व. ८ । कृमिकायाम् । हारा. ।

कुत्सम् । क्ली, पुं । कुष्ठौषधौ । रा. नि. व. १२ । स्तवके । हारे । चिका. ।

कुत्सला । स्त्री । नीलीवृक्षे । नील गाछ ।

कुत्सशिम्बी, कुत्सा । स्त्री । शिम्बीभेदे । रक्तशिग्रौ । वै. निघ. ।

कुत्सितम् । क्ली । दीर्घरोहिषे । बड़ गन्धतृण । वै. निघ. । कुष्ठौषधौ । रा. नि. व. १२ ।

कुत्सितशाल्मली । स्त्री । क्षुद्रशाल्मल्याम् ।

कुत्सिताम्बः । पुं । कदम्बवृक्षे । वा.स.१५.अ ।

कुथः (था) । पुं, स्त्री । कुशतृणे । कुश । प. सु. । शुक्लदर्भे । वै. निघ. । (था) हस्तिपृष्ठस्थ-कम्बले । হাতির পিঠের ঝুল । अस. ।

कुथितः । वि । पूतियुक्ते । পচা । सु. चि. १९ अ. ।

कुदलिः
कुदारः (लः) } पुं । अश्मन्तकवृक्षे । চালিতা । कोविदारवृक्षे । रक्तकाञ्चन । र. मा. । रा. नि. व. ९।१० । आरग्वधवृक्षे । वै. निघ. । क्षुद्रधान्ये । কোদো ধান । प. सु. ।

कुदेहः (कः) । पुं । कुत्सितदेहे । महाशाल-वृक्षे । वै. निघ. ।

कुद्दालः । पुं । गिरिकाञ्चने ।

कुद्यम् । क्ली । कुड्ये, भित्तौ । अ. टी. ।

कुद्रवः (वलः) । पुं । कोद्रवे । কোদো ধান । वै. निघ. ।

कुद्रङ्गः । पुं । मञ्चीपरिस्थ मण्डपे । तत्पर्य्यायः, —उदघाटः, पिठरः । वि. ।

कुद्रङ्गः । पुं । गृहविशेषे । मञ्चीपरिस्थ-मण्डपे ।

कुधरः । पुं । पर्व्वते । रा. नि. व. २ ।

कुधान्यम् । क्ली । तृणधान्ये, क्षुद्रधान्ये । कोद्रव दूषकश्यामाकनीवार-शान्तनु-तुवरकीद्दालकप्रियङ्गु-मधुलिका-नन्दीमुख-कुरुविन्दगवेधुक-वरुकोदपर्णी-सुकुन्द-वेणुज-प्रभृतयस्तद्गणाः । गुणाः—कषाया मधुरा रूक्षाः कटुपाकाः श्लेष्मघ्नाः स्रावरोधकाः वातपित्तप्रकोपकराश्च । सु. सू. ४६ अ. । वातात्मकाः शीतलाश्च । रा. नि. व. १५ ।

कुध्रः । पुं । पर्व्वते । हे. ।

कुनखः । पुं, क्ली । क्षुद्ररोगविशेषे । तल्लक्षणं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा—"नखसांसमधिष्ठाय वातः पित्तञ्च देहिनां। कुर्व्याति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्। तदैवाल्पतरैर्दोषैः परुषं कुनखं वदेदिति॥" मा. नि.। वि। कुत्सितनखयुक्ते।

कुनखी। त्रि। कुनखरोगयुक्ते। क्षुद्रचितनखे।

कुनटः। पुं। पृथुशिम्ब-श्रेणीवृक्षे। बड़ सौंटा शोणा गाछ। रा. नि. व. ६। पीतलोध्रे। वै. निघ.।

कुनटी। स्त्री। Red arsenic (Coriandrum Sativum.) मनःशिलायाम्। मनछाल। र. मा.। धान्याके। भा. पू. १भ। नेपालदेशजमनःशिलायाम्। भरत.।

कुनली (इन्)। पुं। वकवृक्षे। बड़ बांकसगाछ। त्रिका.।

कुनाभिः। पुं। निधौ। हे. च.। वातमण्डल्याम्। त्रिका.।

कुनालः
कुनालिकः } पुं। कोकिले।

कुनाशकः। पुं। दुरालभायाम्, रक्तयवासे। अम.।

कुनासः। पुं। ऊर्द्धे। वै. निघ.।

कुनोली। स्त्री। तेरणे। रा. नि. व. ४।

कुन्तः। पुं। Coix Barbata.) गवेधुकायां। गड़गड़े। मे.। क्षुद्रजन्तौ। विश्व.।

कुन्तलः। पुं। केशे। रा. नि. व. १८। चषके। यवे। मे. लत्रिकं। झींवेरे। बाला। अम.। लाङ्गले। वि.।

कुन्तलवर्द्धनः। पुं। भृङ्गराजवृक्षे। भीमराज। रा. नि. व. ४।

कुन्तलिका (ली)। स्त्री। दध्यादिच्छेदन्याम्। दै काटा छुरी। छारा.। वृक्षभेदे। आबुटा। वै. निघ.।

कुन्तलोशीरम्। क्ली। झींवेरे। बाला। रा. नि. व. १०।

कुन्ती। स्त्री। गुग्गुलुवृक्षे। "गुग्गुलुपृथयोश्च शालुक्याम्।" मे. तत्रिकं। शल्लकीवृक्षे।

कुन्दः (कः)। पुं। (Jasminum Multiflorum.) स्वनामख्यातपुष्पवृक्षे। कुन्दफूलेर गाछ। सं कुन्दे। क. मुरगि। ते मोल्ल। मे., क्ली। तत्पर्य्यायः,—माच्य (अ) शुक्लपुष्पः (रा.) दलकोषः (शब्दमा.), बरटं, बोरटं (शब्दर.), मकरन्दः, महामोदः, मनोहरः, सुक्लापुष्पः, सदापुष्पः, तारपुष्पः, अष्टपुष्पकः, दमनः, वनहासः, मनोज्ञः। गुणाः—अतिमधुरः शीतः कषायः कफभावनः कफपित्तहरः सरः दीपनः पाचनश्च। रा. नि. व. १०। तत्पुष्पे। पुष्पं शीतं लघु श्लेष्म शिरोवेदना-विष-पित्तघ्नञ्च। भा. पू. १भ.। श्लेष्मलं याहि च। राज.। कुन्दुरुखीय्यां। भा. पू. १भ.। रा. नि. व. १२। श्वेतकरवीरवृक्षे। रा. नि. व. १०। मदनवृक्षविशेषे। काँटा गयना। प. मु.। See पिचुकः। निधिविशेषे। यक्षभेदे। मे.। (कः) कुन्दुरुके। रा. नि. व. ८।

कुन्दमः। पुं। मार्जारे। त्रिका.।

कुन्दरः। पुं। तन्नामकवृक्षे। कुन्दरा। तत्पर्य्यायः,—कण्डूरः, झिण्टी, दीर्घपत्रः, खरच्छदः, रसालः, चैत्रसम्भूतः, सुतरणः, भृगवल्लभः। गुणाः—"गौल्यङ्कन्दरमूलञ्च शीतं पित्तातिसारनुत्। प्रशस्तं शीधनानाञ्च बलपुष्टिविवर्द्धनम्॥" रा. नि. व. ८।

कुन्दरिका। स्त्री। सल्लक्याम्। रा. नि. व. ११।

कुन्दसाह्वा, कुन्दा। स्त्री। श्वेतयूथिकायाम्। वै. निघ.।

कुन्दालः। पुं। महारम्भवृक्षे। वै. निघ.।

कुन्दिनी। स्त्री। पद्मसमूहे। त्रिका.।

कुन्दुः। स्त्री। कुन्दुरुखीय्याम्, कुन्दुरुनामगन्धद्रव्ये। रा. नि. व. १२। च. द. वा. व्या. एकादशशतीप्रसारणीतैले। पुं। मूषिके। श. र.।

कुन्दुकुन्दुकः। पुं। कुन्दूरुखीय्याम्। रा. नि. व. १२॥

कुन्दुखोटी। स्त्री। कुन्दुरुखीय्यां। भैष. बृहद्विष्णुतैले।

कुन्दुरः (रुः, कः)। पुं, स्त्री (की)। सल्लक्याम्। धूपभेदे, गुग्गुलुभेदे। हिं वेरोजा। वै. निघ.। कुन्दरवृक्षे। रा.नि.व. २३। The resin of the plant (Boswellia thurifera.) स्वनामख्यातगन्धद्रव्ये, शल्लकीनिर्य्यासे। कुन्दुरुखोटी। तत्पर्य्यायः,—पालङ्क्या, मुकुन्दः, कुन्दः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अ.), पालङ्की, सुकुन्दुः, कुन्दुः, कुन्दुरः (अ. टी. भ.), तीक्ष्णगन्धः, बली (ज), कुन्दुरुकः, सौराष्ट्रः, शिखरी, कुन्दकः, तीक्ष्णः, गोपुरकः, बहुगन्धः, पालिन्दः, भीषणः। गुणाः—मधुरः तिक्तः कफपित्त-दाहघ्नः प्रदरघ्नः पाने लेपे च शीतलः। मधुर-तिक्ततीक्ष्णकटुकः त्वच्यः ज्वरस्वेद-ग्रहदीषसुखरीग-कफ-वातघ्नश्च। भा. पू. १भ.। रा. नि. व. १२। स्वेदवातश्लेष्मघ्नज्वरहरः। मद. व. ३।

कुन्दुरुकी। स्त्री। शल्लकीवृक्षे। अम.। शल्लकीनिर्य्यासे। वै. निघ.। स्वनामख्यात-फललता-विशेषे।

कुन्दुरुखोटी। स्त्री। स्वनामख्यातगन्धद्रव्ये, कुन्दुरी। प. मु.। सा. कौ. शतावरीमोदके।

कुपः। पुं। भारद्वाजपक्षिणि। वै. निघ.।

कुपथ्यम्। क्ली। अस्वास्थ्यकरे पथ्ये।

कुपनसः। पुं। पनसवृक्षे। कँटील गाछ। प. मु.।

कुपाकः। पुं। कुपीलौ। वै. निघ.।

कुपाणिः। वि। कुकरे, वक्रहस्ते। कोपा। हिं टुण्डा। जटा.।

कुपिनो। स्त्री। खालुइ इति गौड़भाषाप्रसिद्धायां खल्पमत्स्यधान्याम्। श. र.।

कुपिन्दः। पुं। वस्त्रनिर्मातरि। वै. निघ.।

कुपि(पी)लुः। पुं। काकपीलौ, कारस्करवृक्षे। गाकुड़ा गाव, मधुर गाव, कुचिला। रा. नि. व. ९। तत्पर्य्यायः,—जलजः, दीर्घपत्रः, कुलकः, कालतिन्दुकः, दीर्घपत्रकः, कालपीलुकः, काकेन्दुः, विषतिन्दुः, मर्कटतिन्दुकः। गुणाः—शीतलत्वं, तिक्तत्वं, लघुत्वं, वात-मदकारित्वं, लघुत्वं, व्यथाहरत्वं, ग्राहित्वं, कफपित्तास्रनाशित्वञ्च। See कारस्करः।

कुप्य(क)म्। क्ली। Tutenag. सीसरङ्गमिश्रधातौ, अष्टधातुमध्ये दस्ता इति ख्याते धातौ। सुवर्णरजतभिन्नधातौ। रत्ना.।

कुप्यधौतम्। क्ली। रौप्ये। रा. नि. व. १३।

कुप्यलवणम्। क्ली। लवणविशेषे। च. वि. ८अ.।

कुप्यशाला। स्त्री। धातुद्रव्यनिर्म्माणशालायां।

कुबाहुलः। पुं। उष्ट्रे। श. च.।

कुबे(वे)रः (कः)। पुं। नन्दिवृक्षे, तूनवृक्षे। तूण वा गम्भा अश्वत्थ। अम.। प. मु.। वै. निघ. २भ. वा. व्या. कुवेरपाके। चि। कुश्रीरे। त्रिका.।

कुबेरनेत्रः (त्राक्षः)। पुं। पाटलवृक्षे। नृताकरञ्जे। वै. निघ.।

कुबेराह्वयः। पुं। नन्दीवृक्षे। वै. निघ. २भ. ग्रहणी. चि.।

कुबेराक्षी। स्त्री। पाटलावृक्षे। प. मु.। काष्ठपाटलायाम्। सितपाटलायाम्। श्वेत पारुल। रा. नि. व. १०। पेटिकायाम्। पेटारि। रत्ना.। सु. सू. ३९ अ.। भा. म. ४भ. बाल. चि.। "कुबेराक्षी च योज्याः स्युः।" नृताकरञ्जे। वै. निघ.।

कुब्जः। पुं। वनचटके। (Bola cuja.) मत्स्यविशेषे। अपामार्गे। रा. नि. व. ४। तन्नामकवातव्याधिविशेषे। कूँज। लक्षणं—"हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक्। कुब्जीवायुर्यदा कुर्य्यात्तदा तद्कुब्जमादिशेत्॥" मा. नि.। "वातघ्नैर्दशमूल्या च नरं कुब्जमुपाचरेत्। स्नेहैर्मांसरसैश्चापि प्रवृद्धं तं विवर्ज्जयेत्॥" चि। उन्नतपृष्ठे। कूँजो। हे. च.।

कुब्जकः। पुं। An aquatic plant, (Trapa bispinosa.) कोङ्कणदेशख्यातपुष्पवृक्षविशेषे। श्वेत गोलाप। हिं कूजा। मं कांटेशेवती। तत्पर्य्यायः,—वारिकण्टकः (चि), भद्रतरुणी, वृत्तपुष्पः, अतिकेशरः महासहः, कण्टकाढ्यः, खर्व्वः, अलिकुलसङ्कुलः। गुणाः—सुरभिः शीतलः रक्तपित्तहरश्च। पुष्पं शीतलं बल्यं दाहघ्नं वातपित्तघ्नञ्च। रा. नि. व. १०। "कुब्जकः सुरभिः स्वादुः कषायः सुरसः सरः। त्रिदोषशमनो वृष्यः शीतहर्त्ता च स स्मृतः॥" भा.। शृङ्गाटके। त्रिका.। पीतभिण्ट्याम्। र. मा.।

कुब्जकण्टकः। पुं। White mimosa. श्वेतखदिरे। रा. नि. व. ८।

कुब्जका। स्त्री। कुब्जकवृक्षे। हिं गुलाब। रा. नि. व. १०। मद.।

कुब्जकिरातः } पुं। कुब्जे।
कुब्जवामनः }

कुब्जत्वम्। क्ली। वायुरोगभेदे। कूँज।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुब्जपुष्पः। पुं। पीतभिण्टीवृक्षे। पीतपुष्पा झाँटी। र. मा.।

कुब्जप्रसारणीतैलम्। क्ली। वातव्याध्यधिकारे। तिलतैलम् १६ श. क्वाथार्थं—प्रसारणीक्वाथः १०० प. जलं ६४ श. शे. १६ श.। दधि १६ श. काञ्जिकं १६ श. दुग्धं ३२ श.। कल्कार्थं—चित्रकमूलपिप्पलीमूलयष्टिमधुसैन्धववचागुलफादेवदारुरास्ना-गजपिप्पलीगन्धभार्गुलिमूलजटामांसीभेलक (अभावे) रक्तचन्दनानां प्रत्येकं २ प.। गन्धद्रव्यं यथालाभं देयम्। च. द.।

कुब्जा। स्त्री। वनचटकायाम्। वै. निघ.।

कुब्रम्। क्ली। वने। उ.। कुरुडे। कुरुडले। तल्पौ। शकटे। संचितसा.।

कुभुक्तम्। क्ली। कदर्य्यान्ने।

कुमरिचः। पुं। (Capsicum.) मरिचवृक्षविशेषे। लङ्कामरिच। हिं लालमिरिच। उत्नोकीमरिच।

कुमरीयकः। पुं। दग्धाङ्गवृक्षे। के.।

कुमारः (कः)। पुं। सप्तदशभ्यः विंशवर्षपर्य्यन्तं पुरुषे। रा. नि. व. १८। पञ्चवर्षीयबालके। हे. च.। (कः) वरुणवृक्षे। वरुण गाछ। रा. नि. व. ९। समुद्रवृक्षे। मशासमुद्रा। रत्ना.। शुकपक्षिणि। अश्ववारके। मे.। क्ली। जात्यकाञ्चने। खाँटिसोणा। मे.। नेचतारके।

कुमारकल्याणघृतम्। क्ली। बालरोगाधिकारे। पाठः—"शङ्खपुष्पी वचा ब्राह्मी कुष्ठं विफलया सह। द्राक्षा सशर्करा शुण्ठी जीवन्ती नीरकं बला। शटी दुरालभा बिल्वं दाडिमं सुरसः स्थिरा। मुस्तं पुष्करमूलञ्च सूक्ष्मैला गजपिप्पली। एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्। कषाये कल्कार्य्याश्च चीरे तस्माच्चतुर्गुणे। एतत्कुमारकल्याणम्॥ घृतं ४ श. कल्कानां शङ्खपुष्प्यादीनां प्रत्येकं २ तो.। कल्कारी १२॥० श. जलं ६४ श. शे. क्वाथः १६ श. दुग्धं १६ श.। च. द.।

कुमारजीवः (ञ्जीवसंज्ञः)। पुं। पुत्रञ्जीवकवृक्षे। पूतञ्जिया गाछ। र. मा.।

कुमारतन्त्रम्। क्ली। रावणकृते बालरोगप्रबन्धे। प्रथमे दिवसे मासि वर्षे वा नन्दा मातृका, द्वितीये दिवसे मासि वर्षे वा सुनन्दा, तृतीये दिवसे मासि वर्षे वा पूतना, चतुर्थे दिवसे मासि वर्षे वा सुखसुप्तिका, पञ्चमे···कटपूतना, षष्ठे ...शकुनिका, सप्तमे...शुष्करेवती, अष्टमे... आर्य्यका, नवमे···सूतिका, दशमे...निर्ऋता, एकादशे...पिलिपिच्छिका, द्वादशे च दिने मासि वर्षे वा कामुका नाम मातृका शिशुं गृह्णाति। सर्व्वाभिरेव गृहीतमात्रस्य च ज्वरोदयो भवति। च. द.।

कुमारभृत्या। स्त्री। गर्भिण्याः परिचर्य्यायाम्, बालतन्त्रे। विका.।

कुमारललिता। स्त्री। शिशुक्रीड़ायाम्।

कुमारवाही (हिन्)। पुं। मयूरे। श. र.।

कुमारा। स्त्री। शिंशपावृक्षे। वै. निघ.।

कुमारिका (री)। स्त्री। अनागतार्त्तवायां कन्यायाम्। रा. नि. व. १८। घृतकुमार्य्याम्। घृतकुमारी, घीकाञ्चन। हिं घिउकुमारी। मं कं कुवारि, नीयिसर, घिकुवार। तें पिन्नगोरिण्टकलवंद। विरजाजितोगे। गुणाः—हिमा तिक्ता कफघ्नी पित्तकास-विष-श्वास-कुष्ठघ्नी रसायनी च। रा. नि. व. ५। मेदिनी शीतला तिक्त-मधुरा चक्षुष्या रसायनी हृद्या वातविषघ्नी गुल्मप्लीहयकृद्वृद्धि कफज्वर-ग्रन्थि-विस्फोटाग्निदग्ध-रक्तपित्त-चर्म्मरोगघ्नी च। भा. पू. १भ.। (री) जियत्पष्ठीति ख्याते वृक्षे। प. मु.। तरुणीपुष्पवृक्षे। गोलाप। रा. नि. व. १०। अपराजितायाम्। मे.। कृष्णचटकायाम्। श्यामा पाखी। रा. नि. व. १९। वाराहीकन्दे। स्थूलैलायाम्। वन्ध्याकर्कोट्याम्। रा. नि. व. २३। नवमल्लिकायाम्। प. मु.। वटपत्रीमल्लिकायाम्। बेल फूल। सप्तपर्णवृक्षे। महाजम्बूवृक्षे। वै. निघ.। पतङ्गविशेषे। कुमीरे पोका। नेत्रप्रतिफलिते दृष्टवस्तुनः प्रतिबिम्बे। च. इन्द्रिय. ७ अ.।

कुमारिकावर्त्तिः। पुं। नेत्ररोगे रोपणीवर्त्तौ। "अशीतिसिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः। जातीकुसुमपञ्चाशत् मरिचानि च षोड़श। एषा कुमारिकावर्त्तिर्गतं चक्षुर्निवर्त्तयेत्॥" तिलपुष्पं ८० पिप्पलीरोंआ ६० जातीपुष्पं ५० मरिचं १६।

कुमारीकन्दः। पुं। कुमार्य्याः कन्दे। घृतकुमारीमूल। वै. निघ. २भ. कामला. चि. नस्ये।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुमारीपुत्रः। पुं। [त्री] स्त्री। पुत्रस्त्रीवद्वत्ते। जिह्मापुत्रौ।

कुमारीरससम्भवः। पुं। वीरास्त्रावे। भूस-ब्बर।

कुमुखः। पुं। शूकरे।

कुमुत् (दम्)। क्ली। (Nymphaea Esculenta) (Nymphaea Lotus.) चन्द्रविकाशिनि स्वनामख्यातपुष्पे। हेला फूल, नालि फूल, श्वेत शुन्दि। हिं कोइ। मं पांढरे उत्पल। कं विलियनेइदिलु। च. सू. ४ अ.। तत्पर्य्यायः, —कैरवं (अ), कन्दोटः (चि), कच्छं (श), कुवं (हे.), गन्धसोमं (शब्दर.), चन्द्रकान्तं, गर्द्दभं, कुमुत् (र.), धवलोत्पलः, कह्लारं, शीतलकं, शशिकान्तं, इन्दुकमलं, चन्द्रिकाम्बुजम्। गुणाः—शीतलं स्वादु पाके तिक्तं कफघ्नं रक्तदोषहरं दाह-श्रमपित्तघ्नञ्च। रा. नि. व. १०। पिच्छिलं स्निग्धं मधुरं शीतवीर्य्यं ह्लादनञ्च। भा. पू. १भ. (Nymphaea Rubra,) रक्तपद्मे। मे.। रक्तोत्पले। विका.। रौप्ये। हे. च.। पुं। गाम्भारीवृक्षे। शाखास्तरौ। मे.। अमि. २० अ.। कुमुदकन्दे। गुग्गुलौ। सर्पभेदे। श्वेतोत्पले। हे. च.। कर्पूरे। रा. नि. व. १२। कुम्भिकायाम्। पानी। कट्फलवृक्षे। वै. निघ.।

कुमुदकः। पुं। प्रपौण्डरीके। पूंडरिया। हिं पुण्डरिया। वै. निघ.।

कुमुदघ्नः। स्त्री। तन्नामकस्थावरविषे। यस्य चौरे विषं वर्त्तते। सु. कल्प. २अ.।

कुमुदप्रियः
कुमुदबान्धवः
कुमुदसुहृत् } पुं। कर्पूरे। चन्द्रे। वै. निघ.।

कुमुदरागा। स्त्री। धातकीवृक्षे। वै. निघ.।

कुमुदवीजम्। क्ली। कुमुदतीबीजे। तेलाकुचि। हिं भेटवेरा। गुणाः—स्वादु गुरु रुच्यं हिमञ्च। भा.।

कुमुदा। स्त्री। कुम्भिकायाम्। पानी। गाम्भारी-वृक्षे। हे. च.। शालपर्ण्याम्। धातक्याम्। धाई-फूल। कट्फलवृक्षे। रा. नि. व. ४।६।९।

कुमुदाभिख्यम्। क्ली। रूप्ये। हे. च.।

कुमुदावासः। पुं। कुमुदप्रायदेशे। हे.।

कुमुदिका। स्त्री। कुमुदिन्याम्। अम.। कट्-फलवृक्षे। भा. पू. १भ.।

कुमुदिनी। स्त्री। चन्द्रप्रियायाम्। ज्योत्स्ना। उत्पलिन्याम्। शुन्दीझाड़, छोट शुन्दी। कुमुद-लतायाम्। कुमुदझाड़। तें कलुवलंडे कोलिनु। कलुवपुव्वुलु। रा. नि. व. १०। इयं कमलिनी-गुणयुक्ता ज्ञेया। भा. पू. १भ.। कमलिन्याम्।

कुमुदिनीवीजम्। क्ली। कुमुदवीजे। वै. निघ.।

कुमुदी। स्त्री। कट्फलवृक्षे। मद. व. १। गाम्भारीवृक्षे। रा. नि. व. ९।

कुमुदेश्वररसः। पुं। यक्ष्माधिकारे। पाठः—"हेमभस्मरसभस्मतुल्यकं मौक्तिकन्तु रसपादटङ्कणं। गन्धकं कुरुत सर्व्वतुल्यकं काञ्जिकेन परिमर्द्द्य शोषकं। सृत्स्नया च परिवेष्ट्य शोषितं भाण्डके सलवणे यथा पचेत्।" द्वितीयसूषणाधिकारे। सृततारं २भ. वङ्गभस्म १ भ. यष्टीमधुक्काथेन भाव-यित्वा शोषयित्वा च मात्रार्द्धं सेव्यम्। र. सा. सं.।

कुमुद्वती। स्त्री। कुमुदिन्याम्। शुन्दी वा कुमुदफुलेर झाड़। रा. नि. व. १०। कुमुद-लतेति प्रसिद्धस्थावरविषान्तर्गतफलविषे। सु. कल्प. २अ.। See फलविषम्।

कुमुद्वतीवीजम्। क्ली। कुमुदवीजे। "भवेत्-कुमुद्वतीवीजं स्वादु रुच्यं हिमं गुरु।" वैद्यकम्।

कुमुद्वान्। त्रि। कुमुदविशिष्टे (देशे)। मे.।

कुम्पः। पुं। बाहुकुण्डे। कोंपा। जटा.।

कुम्भम्। क्ली, पुं। विवृतायां। हे. च.। गुग्-गुलौ। अम.। "निकुम्भकुम्भनिकुला गवाक्षी।" चन्द्रप्रभावत्यां।) पुं। सूर्पमाने। ७४ सेर। प. प्र. १ ख.। जयपालवृक्षे। कट्फलवृक्षे। पृश्नि-पर्ण्याम्। पाटलावृक्षे। मे.। कलसे। करिशिरःस्थ-पिण्डयोः। "मूर्द्धनि पिण्डौ स्मृतौ कुम्भौ कुम्भयो-रन्तरं विदुः।" हला.।

कुम्भकः। पुं। जयपाले। के.।

कुम्भकरेचना। स्त्री। जैपालवृक्षे। वै. निघ.।

कुम्भकामला (पादः)। स्त्री। A sort of Jaundice. कामलाभेदे। कालाधिक्येन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामला खरीभूता कुम्भकामलायां परिणमति। वम्यरोचकज्वरादिकं तदसाध्यलक्षणम्। मा. नि.।

कुम्भकारः। पुं। कुक्कुभपक्षिणि। हे. च.।

कुम्भकारकुक्कुटः। पुं। (Phasianus Gallus.) क्षुद्रकुक्कुटविशेषे।

कुम्भकारिका (री)। स्त्री। कुलत्थाक्षुपे। रा. नि. व. १२। वनकुलत्थायाम्। प. मु.। मनःशिलायाम्। जटा.।

कुम्भकालुकम्। क्ली। घीलि। वै. निघ.।

कुम्भजः। पुं। वकवृक्षे। बकफूलेर्‌ गाछ। प. मु.।

कुम्भड़िका। स्त्री। कुष्माण्डशालौ। रा. नि. व. १६।

कुम्भतुम्बी। स्त्री। इक्षुतुम्बी। गोल लाउ। तत्पर्य्यायः,—कुम्भालाबूः, गोरक्षतुम्बी, गोरक्षा, नागालाबूः, घटाभिधा, घटालाबूः। गुणा.—"कुम्भतुम्बी तु मधुरा शीतला नर्त्तणी गुरुः। रुच्या पुष्टिकरी शुक्रवर्द्धिनी तु बलप्रदा। पित्तनाशकरी गर्भपोषणी पित्तनाशिनी। फले तु वल्लीवत् प्रोक्ता गुणाश्च।" वै. निघ.। शीतपित्तश्वासकफकासज्वरकासनाशिका बल्या च। रा. नि. व. ७।

कुम्भपर्णी। स्त्री। कुष्माण्डीलतायाम्। प. मु.।

कुम्भपुटा। स्त्री। श्वेतविहतायाम्। वै. निघ.।

कुम्भपुष्पी। स्त्री। रक्तपाटलवृक्षे। वै. निघ.।

कुम्भफला। स्त्री। महाकुष्माण्ड्याम्। रा. नि. व. ७।

कुम्भयोनिः (का)। स्त्री। द्रोणपुष्पीक्षुपे। श्लक्ष्णा। रा. नि. व. ६। वकवृक्षे। वै. निघ.।

कुम्भरेताः। पुं। अगस्त्यः।

कुम्भजा। स्त्री। सुण्ड्यां। शुण्ठीरौ। र. मा.।

कुम्भवारुणी। स्त्री। सुण्डीभेदे। प. मु.।

कुम्भवीजः (कः)। पुं। अरिष्टफलवृक्षे। वीठा गाछ। रा. नि. व. ९।

कुम्भशालिः। पुं। अनामख्यातशालिधान्यविशेषे। गुणाः—मधुरा स्निग्धा वात-पित्तघ्नी च। रा. नि. व. १६।

कुम्भसन्धिः। पुं। करिकुम्भद्वयमध्यभागे। त्रिका.।

कुम्भसर्पिः। क्ली। एकादशोत्तरशतवार्षिके पुराणघृते। गुणाः—रुचोष्णम्। सु. सू. ४५ अ.।

कुम्भा। स्त्री। उखायाम्। कट्फलवृक्षे। पृश्निपर्ण्याम्। पाटलावृक्षे। मे.। द्रोणपुष्प्याम्। वै. निघ.। श्वेतविहतायाम्। तुम्ब्याम्। वै. निघ.।

कुम्भाख्या। स्त्री। रक्तपाटले। वै. निघ.।

कुम्भाटः। पुं। कुम्भाडुया इति ख्याते वृक्षे। रत्ना.।

कुम्भाण्डः। पुं। कुष्माण्डे। रा.।

कुम्भाण्डी। स्त्री। Pumpkin Gourd. कुष्माण्ड्याम्। कुमड़ा गाछ। रा. नि. व. ७।

कुम्भारी (र्द्री, र्द्री)। स्त्री। कुष्माण्ड्याम्। वै. निघ.।

कुम्भालाबुः। स्त्री। महादुग्धालाबूम्। वै. निघ.।

कुम्भाह्वयः। पुं। कुम्भकामलायाम्। च. द. पाण्डु. चि.।

कुम्भि(म्भी)कः। पुं। पुन्नागवृक्षे। र. मा.। भैष. नाड़ीव्रण. चि. कुम्भ्याद्यतैले। सप्तपर्णवृक्षे। प. मु.। वारिपर्ण्याम्। पानी। भूर्जवृक्षे। भूर्जपत्र गाछ। "रोमशः श्वेतत्वक् कुम्भीनामा वृक्षो यस्य त्वक् वल्काकारा भवति।" सु. सू. ३८ अ. प्रियङ्वादि. सु.। See भूर्जः। पाटलवृक्षे। षण्ढविशेषे। हिजड़े। लक्षणं यथा—"स्त्री गुदे ब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते। कुम्भीकः स च विज्ञेयः॥" सु. चि. १७.।

कुम्भि(म्भी)का। स्त्री। (Pistia statriotes.) वारिपर्ण्याम्। टोका पानी। रत्ना.। वा. उ. ८अ.। रक्तपाटलायाम्। रा. नि. व. १०। तन्नामकनेत्ररोगविशेषे। कुम्भीकाबीजसदृशाकारत्वात्तथोच्यते। एषा प्रान्तजा विदोषा च स्रवति पुनश्च पूर्णा भवति। लक्षणं यथा—'वर्त्मान्ते पिडका जाता भिद्यन्ते च स्रवन्ति च। कुम्भीकबीजसदृशा कुम्भिका सन्निपातजा॥" मा. नि.। कट्फलवृक्षे। वै. निघ.। पाटलवृक्षे। प. मु.। द्रोणपुष्प्याम्। श्लक्ष्णा। रा. नि. व. ६। गुग्गुलौ। शुक्रदोषविशेषे। लक्षणम्—"कुम्भीका रक्तपित्तोत्था जाम्बवास्थिनिभा शुभा।" सु. नि. शु. दो. १४ अ.।

कुम्भ्याद्यतैलम्। क्ली। नाड़ीव्रणाधिकारे। तैलं ४ प्र.। क्वाथार्थं—कुम्भीका (पानार मूल)

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खर्जूरीकपित्थबिल्वानां तथा जदुम्बराद्यपुष्पफल-त्वचाणां फलशलाटुकल्कं ४ श. वारि ३२ श. शे. ८ श. । उक्तक्वाथेन सुस्तादीनां कल्कं शरावं (१ श.) दत्वा तैलं पाचयेत् । कल्कद्रव्याणि—सुस्तकसरलकाम्प्रियङ्गु-खगेलापत्रनागकेशरमोचरसजातीकोष-लोध्रधातकीपुष्पाणि । "कुम्भीक खर्जूरकपित्थबिल्वजम्बूनस्तानान्त शलाटुवर्गौ। कृत्वा क्वाथं विधिवत् तत्समादाय्य सुस्तासरलप्रियङ्गु ॥ सोमवल्कासोचरसाहिपुष्पलोध्राणि दत्वा खलु पाचयीत ।" अत्र क्वाथो पक्वो, दुरालभा वा। वनस्थायी वटाद्याः सर्व्वेषां शलाटु आमफलम्। रस र ।

कुम्भितित्तिरः । पुं। तित्तिरपक्षिभेदे । वै. निघ. ।

कुम्भिनी । स्त्री। मृगेर्व्वारुलतायाम्। रा.। शाखानशाखा ।

कुम्भिनीफल(बीज)म् । क्ली। जेपाले। रा. नि. व. ६ ।

कुम्भिपाकी । स्त्री। कट्फलवृक्षे । भा. ।

कुम्भिमदः । पुं। हस्तिमदे ।

कुम्भिलः । पुं। शालमत्स्ये । मे. लविकं ।

कुम्भी (इन्) । पुं। हस्तिनि। हला.। गुग्गुलु-वृक्षे। जटा.। सविषपतङ्गभेदे। कुमीरके। मत्स्यभेदे। बालग्रहविशेषे। कुम्भीरे। हे. च.। स्त्री। पृश्निपर्ण्याम्। पाटलायां। मे.। कट्फले। रा. नि. व. ९। वारिपर्ण्याम्। टोका पोना। रा. नि. व. ६। वृक्षीवृक्षे। रा. नि. व. ५। पुष्प-वृक्षविशेषे कोङ्कणदेशे प्रसिद्धे। तत्पर्य्यायः,—रोमालुविटपी, रोमशः पर्पटद्रुमः। गुणाः—कटुः कषाया उष्णा वातकफघ्नी संग्राही च। रा. नि. व. ९। वातपित्तज्वरदाहकफरक्तातिसारघ्नी योनि-दोषविषघ्नी च। वै. निघ.। अग्निप्रकृतिकीटभेदे। तेन दष्टे पित्तजा रोगा भवन्ति। सु. कल्प. ८ अ.। श्वेतविवृति। जेपालवृक्षे। वै. निघ. अलर्कविष-पात. चि.।

कुम्भीनसः । पुं। क्रूरसर्पे। मे.। वातप्रकृति-कीटभेदे। तेन दष्टे वातनिमित्तजा रोगा जायन्ते। सु. कल्प. ८ अ.।

कुम्भीपाकः । पुं। सन्निपातज्वरभेदे। लक्षणं —"घोणाविवरजभ्रारुद्वहुशीर्षाक्षितलोहितं सान्द्रं। विलुप्तन्मस्तकमभितः कुम्भीपाकेन पीड़ितं विद्यात् ॥" भा. म. १भ. ।

कुम्भीपुटः । पुं। गजपुटे। र. सा. सं. ।

कुम्भीफलः } पुं। जेपालवृक्षे। कुमीरफले वै.
कुम्भीबीजः } निघ.। क्ली। जेपालबीजे। रा. नि. व. ६ ।

कुम्भीमुखः । क्ली। दुष्टव्रणविशेषे ।

कुम्भीरः (लः) । पुं। The crocodile of Ganges. जलजन्तुविशेषे। कुमीर। रत्ना.। अ. टी.। तत्पर्य्यायः,—कुम्भी, जलशूकरः, तालुजिह्वः, द्विधागतिः, पिङ्गचक्षुः; महासुखः, शङ्खमुखः (हे.), जलजिह्वः (हा.), नक्रः (अ.), कुम्भीलः (अ. टी.), गिलग्राहः, महाबलः (रा.), वाडटः, अम्बुकिरातः, अम्बुकण्टकः (शब्दर.)। तन्मांसं पाके स्वादु वातघ्नं स्निग्धं शीतलं पित्त-रोगे हितं मलवर्द्धनं श्लेष्मकरञ्च। सु.। कुम्भीवृक्षे। वै. निघ. ।

कुम्भीरमक्षिका । स्त्री। मक्षिकाविशेषे। कुमीरा पोका। हारा.।

कुम्भीरवल्कः । पुं। कायफलवृक्षे। वै. निघ. ।

कुम्भीरुः । पुं। सुरपुन्नागे ।

कुम्भीवीजम् । क्ली। जयपाले। रा. ।

कुम्भीवृक्षफलम् । क्ली। कायफले। वै. निघ. ।

कुम्भीस्वेदः । पुं। वातहरक्वाथादिभिः काञ्जि-कादिभिर्वा घटस्थितैः स्वेदैः। भानुदासः। च. सू. १४ अ. ।

कुम्भीवृक्षतरुः । पुं। अगस्तिवृक्षे। वकफूलের গাছ। भा. म. १भ. चित्तविभ्रम. ज्व. चि. ।

कुम्भीलुः (लूकः) । पुं। पेचकभेदे।

कुम्भीलूखलकः । पुं। गुग्गुलौ। वै निघ. ।

कुयवः । पुं। कुत्सितयवे ।

कुरका । स्त्री। सल्लकीवृक्षे। रा. नि. व. ११ ।

कुरङ्ग(ङ्गु)रः । पुं। The Indian crane. सार पक्षिणि। हे. च.। हारा.। क्रौञ्चपक्षिणि। वै. निघ. ।

कुरङ्गः (कः) । पुं। Indian antilope. स्वल्पहरिणे। रत्ना.। "न कृष्णे न च तामे हरिण-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषे।" सु. सू. ४६ अ.। च. चि. ३ अ.। (कः) अर्कक्षारायाम्। वै. निघ.।

कुरङ्गनाभिः। पुं। मृगनाभौ। रा.नि.व.१२।

कुरङ्गमः। पुं। हरिणविशेषे। कुरङ्ग। त्रिका.।

कुरङ्गमांसम्। क्ली। मृगविशेषस्य मांसे। एतन्मांसं रक्तपित्ते हितम्। तथा कफघ्नं मधुरं पित्तघ्नं मांसवर्द्धकञ्च। सि. यो. र. पि चि. खण्डकाद्यघृते।

कुरङ्गिका (नी)। स्त्री। सुङ्गपर्ण्याम्। मूगानी। रा. नि. व. ३।

कुरङ्गी। स्त्री। कुरङ्गपत्न्याम्। हरिणी।

कुरचिल्लः। पुं। कर्कटे। हे. च.।

कुरण्टः। पुं। सितिवारवृक्षे। शुशुनि शाक। वा. सू. १५। "भल्लूकभीरुटकुरण्टकरम्भपार्थाः" श्वेतझिण्ट्याम्। रा. नि. व १०। कुटजवृक्षे। वै. निघ.।

कुरण्टकः। पुं। पीतझिण्टीवृक्षे। पीतपुष्प झाँटी गाछ। र. मा.। "पीतपुष्पः कण्टाशेलुया इति प्रसिद्धः।" सु. सू. ३८ अ.। ड.। पीतपुष्पास्फाने, रक्तझिण्ट्याम्। मे.। वै. निघ.।

कुरण्टमूलम्। क्ली। पीतपुष्पझिण्टीमूले। भा. म. ४ भ योनिरो. चि.।

कुरण्टिका। कुटजवृक्षे। साकुरण्डवृक्षे। रा. नि. व. १०। सुनिषण्णकशाके। वै. निघ.।

कुरण्टी। स्त्री। सिंहपिप्पल्याम्। वै. निघ.।

कुरण्डः। पुं। Hydrocele. शुष्कवृद्धिरोगे। कोरन्ड, पोता। हे. च.। तस्य सम्प्राप्तिपूर्व्वकं लक्षणं यथा—"क्षुद्वोऽनूर्द्धगतिर्वायुः श्रोणिमूलकरश्चरन्। सुप्तौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः॥ प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः। दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा गदः॥" मा. नि.॥ अचोटवृक्षे। वै. निघ.। गुर्जरदेशख्याते साकुरण्डवृक्षे। रा. नि. व. ६।

कुरण्डकः। पुं। मदनवृक्षे, श्वेतमदने। वै. निघ.। कुरण्टकवृक्षे। अ. टी.। च. द. मात्रतैले।

कुरण्ड(ण्ड)का। स्त्री। वृक्षविशेषे। गुणाः—"सरा रूक्षा गुर्व्वी चाग्निप्रदीपनी। नाशिनी कफवातानां वैद्यैस्तु परिकीर्त्तिता॥ बृहत्कुरण्डिका शीता पाके माध्वी कटुः स्मृता। तिक्ता चारा च कषा च सरा वृष्या जड़ा मता॥ वातला पित्तला वल्ली वातकारी कफापहा। रक्तदोषं सूचक्रकुष्ठं नाशयेदिति कीर्त्तिता॥" वै. निघ.।

कुरबाहुकः। पुं। पक्षिविशेषे। कुरकुरा पाखी। अयं लघुशीतकषायः। सु. सू. ४६ अ.।

कुररः। पुं। An osprey. प्लवजातीयपक्षिविशेषे खनालख्याते, उत्क्रोशपक्षिणि। कुरर, कर्कटिया। हला.। तन्मांसगुणाः—रक्तपित्तघ्नं शीतलं स्निग्धं वृष्यं वातघ्नं रसे पाके च मधुरम्। सु. सू. ४६ अ.।

कुररवः। पुं। पारावते। वै. निघ.।

कुरराङ्घ्रिः। पुं। देवर्षभे। रा. नि. व. ६। रक्तमूलके।

कुररी (री)। स्त्री। मेष्यां। भेड़ी। हे. च.। कुररपक्षिस्त्रियां। अम.। (री) सिंहपिप्पल्याम्। हे. च.।

कुरलः। पुं। उत्क्रोशपक्षिणि। हला.। चूर्णकुन्तले। धरणी।

कुरवः (कः)। पुं। श्वेतार्के। रा. नि. व. १०। रक्तम्लानपुष्पवृक्षे। रक्तझाँटी। श. र.। झिण्टीशाके। कुरुई शाक। रा. नि. व. १०। पीतझिण्ट्याम्। हे. च.। षष्टिकधान्यजातिभेदे। सु. सू. ४६ अ.। गुणाः कङ्गुकवत्। कैय्य.। रा. नि. व. १८।

कुरवाहुकः। पुं। पक्षिविशेषे।

कुरसः। पुं। आसवे। मद्यविशेषे। हारा.। कुत्सितरसे। त्रि.। कुरसयुक्ते।

कुरसा। स्त्री। गोजिह्वालतायाम्। गोजिया नता। श. च.।

कुरालः } पुं। कुलाहघोटके, ईषत्पाण्डुकृष्ण-
कुराहः } जङ्घघोटके। हे. च.।

कुरी। स्त्री। यमुनातीरप्रसिद्धे तृणधान्यविशेषे। गुणाः—मधुरं बलप्रदं हरितं वा पक्वं वा वृद्धं वा वाजिपुष्टिदायकञ्च। रा. नि. व. १६।

कुरीरम्। क्ली। मैथुने। उणा.।

कुरुः। पुं, स्त्री। शिल्पादनै। वै. निघ.। कारुकारिकायाम्। श. च.।

कुरुकन्दकम्। क्ली। मूलके। मूला। श. मा.।

कुरुचिल्लः। पुं। कर्कटे। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुरुटः। पुं। सितावरशाकवृक्षे। शुशुनि शाक। रा. नि. व. ४।

कुरुटी (ट्न्)। पुं। अश्वे।

कुरुण्टः (कः)। पुं। Yellow amaranth, yellow barleria. पीतझिण्टाम्। पीत झाँटी। रा. नि. व. १०। च. द. प्रदर. चि। तत्पर्य्यायः,—सहचरी, सहचरः (अ.), कुरण्टकः (भ.)। दारुपत्राम्। अम्लानवृक्षभेदे। झाँटी-विशेष। मे.। कुटजवृक्षे।

कुरुण्टका। स्त्री। पीतझिण्टाम्। च. द. अश्मरी. चि.।

कुरुण्टिका (ण्टी)। स्त्री। साकुरुण्डवृक्षे। रा. नि. व. १०। कृष्णसूक्ष्मफला शिरवालिका इति लोके। सु. सू. ३८अ.। ड.। झिण्टाम्। झाँटी। हस्तिशुण्ड्याम्। शाँतिशुँढ़े। रत्ना.। शेफालिकाभेदे। सु. चि. ७अ.। काष्ठपुत्तलिकायाम्। मे.।

कुरुण्डः। पुं। कुरुण्टकवृक्षे।

कुरुनाथः। पुं। उष्ट्रे। वै. निघ.। पीतझिण्टाम्। सु. सू. ३८ अ.।

कुरुबाहुः। पुं। पक्षिविशेषे। कूरुर। कुरुकुरु इति पाश्चात्ये। वै. निघ.।

कुरुम्बम्। क्ली, पुं। कुलपालके, नागरङ्गविशेषे। कमलालेबु। भ. च.।

कुरुम्बा (म्बिका)। स्त्री। द्रोणपुष्पाम्। रा. नि. व. ५।

कुरुम्बो। स्त्री। सैंहलीवृक्षे। रा. नि. व. ५।

कुरुरो } पुं। कुररपक्षिणि। भालस्थ-चूर्ण-
कुरुलः } कुन्तले। हे. च.। वै. निघ.।

कुरुवकः। पुं। Crimson amaranth, (Barleria cristata.) रक्तझिण्टाम्। लाल झाँटी। हिं कटसरैआ। अम.। पीतपुष्पझिण्टा। मे.। क्ली। कुरुवकशाके। प. मु.।

कुरुविन्दः। पुं। कुरुक्षेत्रवज्रीहिभेदे, कुल्माषे। अयं कुधान्यवर्गीयः। कुलत्थ। सु. सू. ४६ अ.। भद्रमुस्तायाम्। नागरमूर्वा। ज. द.। मुस्तायाम्। रा. नि. व. ६। सु. सू. ३६ अ.। माषे। माषकलाये। प. मु.। रा. नि. व. १६। सु. सू. ४६ अ. क्ली। हिङ्गुले। हे. च.। पद्मरागमणौ। माणिक्य। काचलवणे। रा. नि. व. ६। रक्तभेदे। रा. नि. व. १३। कृष्णलवणे। "जानीयात् कुरुविन्दकं यदरुणं स्यात्।" ज. द.।

कुरुविन्दकः (न्दाख्या)। पुं, स्त्री। A kind of Dolichos Biflorus. वनकुलत्थके। भद्रमुस्तायाम्। नागरमूर्वा। अम.। ज. द. १२ अ.।

कुरुविल्वः (ल्वः, कः)। पुं। नागरमुस्तायाम्। ज. द. १२ अ.। पद्मरागमणौ। विका.। वनकुलत्थे। रत्ना.। कुलत्थाशने। र.।

कुरुविस्तः। पुं। सुवर्णपले। ४ तो. सोना। अम.।

कुरुवीरकः। पुं। अर्जुनवृक्षे। रा. नि. व. ६।

कुरूप्यम्। स्त्री। रङ्गे। रा. नि. व. १३।

कुर्कुटः। पुं। कुक्कुटे।

कुर्कुरः। पुं। ग्राम्यमृगे। कूकुर। अ. टी. रा.।

कुर्चिका। स्त्री। सूच्याम्। छूँच्। विका.।

कुर्णकम्। क्ली। पटोललतायाम्। पटोलगाछ। भ. चि.।

कुर्णजः। पुं। कुलिञ्जनवृक्षे, गन्धमूले। रा. नि. व. ६।

कुर्परः। पुं। कफोनौ। कूनुई। हे. च.।

कुर्पासः (कः)। पुं। स्त्रीणां स्तनाच्छादनवस्त्रे। काँचुलि। अम.।

कुलम्। क्ली। वदरे। देहे। कृष्णाञ्जने। विका.।

कु(कू)लकः। पुं. क्ली। रसनामले। हारा.। भोज्यवस्तुनि। विका.। सा. कौ. व्य. चि.। सर्पविशेषे। हस्तिभर्पे। रा. नि. व. २३। वल्मीके मे.। कुपीलौ। कूँचुले। भा. पू. १भ.। च. द. व्य. चि. शाकविधौ। "कुलकङ्कारवेल्लकम्।" "निम्बकूलकयूषस्तु।" कदुवकवृक्षे। गम्भारी गाछ। र. मा.। क्ली। पटोललतायाम्। पलता। मे.।

कुलकर्कटी। स्त्री। चीनकर्कट्याम्। रा. नि. व. ७।

कुलकाः। स्त्री। पटोललतिकायाम्। पलता। भैष. अम्ल.पि.चि. क्षुधावतीगुड़ी। मनःशिलायाम्। (कन्दर्पसारतैले।)

कुलकृत्। पुं। अकर्करे। आकरकरा। वै. निघ. जिह्वक. व्य. चि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलङ्गः। पुं। कृष्णसर्पविशेषे। वै. निघ.।

कुलङ्गी। स्त्री। मेषशृङ्ग्याम्। काँकड़ाशृङ्गी। वै. निघ.।

कुल(लि)ञ्जः। पुं। कुलञ्जनवृक्षे। रा. नि. व. ६.। प. मु.।

कुल(लि)ञ्जनः। पुं, क्ली। An aromatic plant. (Alpinia Galanga.) खनामख्यातद्रव्ये, गन्धमूलके। महाभैरवीवचायाम्। कुड़विशेष, महाभरी वच। गुणाः—कटुतिक्तोष्णः दीपनः सुखदोषघ्नत्। रा. नि. व. ६। कुलञ्जनञ्च स्वरकृत् हृत्कण्ठसुखशोधनः। अर्क. चि.। "कुलिञ्जनङ्कटु तिक्तसुष्णञ्चाग्निप्रदीपनं। रुच्यं स्वर्य्यञ्च हृद्यञ्च सुखकण्ठविशुद्धिकृत्। सुखदोषङ्कफञ्चैव कासं वातकफं हरेत्। बृहत्कुष्ठं गुणैर्ज्ञेयं न्यूनमस्मादिति स्मृतम्॥" वै. निघ.।

कुलटी। स्त्री। मनःशिलायाम्। र. मा.।

कुलट्टणम्। क्ली। दमनके। नागदना। प. मु.।

कुल(लि)त्थः (कः)। पुं। A sort of pulse. (Dolichos biflorus, Syn. Dolichos uniflorus.) शिम्बिधान्यविशेषे। कुर्त्तिकलाय। हिं कुलत्थी। तें ओलवलु। तत्पर्य्यायः,—कालवृन्तः, ताम्रवृन्तः, कुलत्थिका (र.), ताम्रवृन्तः (वि), ताम्रबीजः, सितेतरः। कृष्णवर्णभेदेन स द्विविधः। ताम्रश्च तत्कृष्णगुणाः—कषायः उष्णः रूक्षः वातकफघ्नः रक्तपित्तकरः श्वासकासवीर्य्यबलघ्नश्च। रा. नि. व. १६। "उष्णो जयेन्मारुतपीनसांश्च कासप्रतिश्यायविबन्धगुल्मान्। हिक्कां स रक्तञ्च बलासपित्तं निहन्ति मेदश्च कुलत्थकोऽयं॥" अवि. १५अ.। उष्णवीर्य्यः पाकेऽम्लः शुक्राश्मरीपीनसघ्नः कासार्शःकफवातघ्नः पित्तासृदश्च। वा.। रसतः कषायः विपाके कटुश्च। हेमाद्रि। शिम्बीधान्यवर्गे। कषायः कटुक उष्णवीर्य्यत्वात् वातं शमयेत्। पाकेन कटुत्वं। सु. सू. ४०अ.।

कुलत्थगुड़ः। पुं। हिक्काश्वासाधिकारे। कुलत्थस्य १०० प. दशमूलस्य समष्टया १०० प. भार्ग्याः १०० प. एकत्र पृथग्वा वारि प्र. द्रोणमितं (६४अ.) पादशिष्टः क्वाथः कार्य्यः। गुड़स्य ५० प. एकत्र पक्वा लेहभूते, प्रक्षेपः—मधु ८ प. वंशरोचना ६ प. पिप्पली २ प. गुड़त्वक् तेजपत्रं एला प्र. २ तो.। च. द.। "कुलत्थो दशमूलञ्च तथैव द्विपुनर्यष्टिका। शतं शतञ्च संगृह्य जलद्रोणे विपाचयेत्। पादावशेषे तस्मिंश्च गुड़स्यार्द्धतुलाद्विपेत्। शीतीभूते च पक्वे च मधुनोऽष्टौ पलानि च। षट्पलञ्च तुगाक्षीर्य्याः पिप्पल्याश्च पलद्वयं। विसुगन्धिसुगन्धं तं खादेदग्निबलं प्रति॥" रस. र.।

कुलत्थयूषः। पुं। आमकुलत्थसाधितक्वाथे। प. मु.। गुणाः—वातानुलोमकः गुल्मघ्नस्तूणीघ्नः प्रतितूणीघ्नश्च। वा.। "वीर्य्योष्णो मधुरोऽग्निप्रदीपनः। कषायो गुल्मकफहृद्व्यर्थ्यश्वासकासहा। वातानुलोमनस्तूनीमेहमेदोविनाशनः।" वै. निघ.। कुलत्थयूषो मधुरः कषायो भवेत् स वातस्य कफस्य हन्ता। महाश्मरीवायुजगेहहन्ता सन्दीपनो मेदविशोषणश्च।" अवि.।

कुलत्थषट्पलघृतम्। क्ली। हिक्काश्वासाधिकारे। "कुलत्थाद्दशमूलाच्च भार्ग्याः प्रस्थं पृथक् पृथक्। क्वाथयित्वा जलद्रोणे पादशेषे विपाचयेत्। द्विचीरं सर्पिषः प्रस्थं सचारैः पञ्चकोलकैः। पलिकैस्तज्जयेत् सिद्धं.....॥" क्वाथार्थ—कुलथ २ श. दशमूलमिलित २ श. भार्गीमूल २श. जल ७४ श. ८श. १६ श. घृत ४श. छागदुग्ध ४श. गव्यदुग्ध ४ श.। कल्कार्थ—पञ्चकोल ও यवक्षार प्रत्येके १प.। रस. र.।

कुलत्थसूपः। पुं। भृष्टकुलत्थसिद्धयूषे। गुणाः—"कुलत्थसूपो वातघ्नः कटुः पाके कषायकः। कफविरोधी शुक्राश्मकरीषश्वासकासनुत्। शुक्राश्मरीहरः पित्तकारकः कथितो नृभिः॥" वै. निघ.।

कुलत्था। स्त्री। कुलत्थाक्षुपे। कान शुर्गी। रा. नि. व. १३। वनकुलत्थिकायाम्। वनकुलथ। मं रानकुलित्था। कं काड़हुलिग। तत्पर्य्यायः,—दृक्प्रसादा, अरण्यकुलत्थिका, कुलाली, लोचनहिता, चक्षुष्या, कुम्भकारिका, कुलत्थिका (रा.), कुलाषः, कुरुविल्वकः (र.)। गुणाः—कटुः तिक्ता अर्शःशूलघ्नी विबन्धाध्मानघ्नी चक्षुष्या व्रणरोपणी च। रा. नि. व. ५।

कुलत्थाञ्जनम्। क्ली। A blue stone nsed as a collyrium. खनामख्याताञ्जनविशेषे, कुलत्थाकाराञ्जनप्रस्तरविशेषे। कृत्रिम अञ्जनविशेष। हिं कालाशुर्मा, खापरिया। तत्पर्य्यायः,—कुम्भकारी, प्रलापहा। गुणाः—"कुलत्थिका तु चक्षुष्या कषाया कटुका हिमा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषविस्फोटकखूतिव्रणदोषनिबर्हिणी ॥" रा. नि. व. १३।

कुलत्यादिलेपः। पुं। कर्णमूलशोथे हिते लेपे। कुलत्थः कट्फलं गुरुची कृष्णजीरकञ्च समभागं जलेन पेषयित्वा ईषदुष्णो लेपः। भा. म. १भ. ज्व. चि.।

कुलत्याद्यघृतम्। क्ली। अश्मर्य्यधिकारे। "कुलत्थसिन्धूत्थविड़ङ्गसारं सशर्करागोतलियावशूकम्। बीजानि कुष्माण्डकगोक्षुराणां घृतं पचेद्वै वरुणस्य तोये।" घृतं ४ श. वरुणत्वक् १२॥० श. (मतान्तरे ८ श.) वारि ६४ श. पादांशः १६ श. कुलत्थादिकल्कः ८ प, एकत्र पाचयम्। मतान्तरे— घृत ४श. वरुणछाल ४ श. जल १६ श. शे. ४ श.। कल्कार्थ—कुलथ, सैन्धव, विड़ङ्ग, चिनि, शिउलिछोप, यवक्षार, कुष्माण्डबीज, गोक्षुरबीज, प्रत्येके ८ तो.। सा. कौ.। च. द.।

कुलत्थान्नम्। क्ली। तत्कृतभक्ते। गुणाः— "कुलत्थान्नन्तु मधुरं तुवरं रूक्षमुष्णकं। खलु वृद्धिकरं प्राक्ते कटुकञ्चाग्निदीपनम्। कफवातकृमिश्वासनाशनं परिकीर्त्तितम्॥" वै. निघ.।

कुलत्थिका। स्त्री। कुलत्थाङ्गने। रा. नि. व. १३। रत्ना.। कुलत्थे। वनकुलत्थे। वनकुर्त्ति। र. मा.। हे. च.। रक्तकुलत्थे। भा.। शीतलादेव्याम्। वै. निघ.।

कुलत्थी। स्त्री। कुलत्थिकायाम्।

कुलनाथः। पुं। उष्ट्रे। हे. च.।

कुलपत्रः (कः)। पुं। दमनकवृक्षे। दना। रा. नि. व. १०।

कुलपालकम्। क्ली। कुरुण्टे। कमला लेबु। श. च.।

कुलबधूरसः। पुं। सन्निपातज्वरे। अत्र तुल्यांशं एकभागतुल्यं। यद्यपि नस्यमुक्तं तथाप्यञ्जनव्यवहारः। र. सा. सं.। पारदशीषकलाक्षमनःशिलातुल्यकानि द्रव्याणि। इन्द्रवारुणी (राखाल शशा) रसेन चणकाभा वटी कार्य्या। भै. रत्नावली।

कुलभृत्या। स्त्री। गर्भिणीपर्य्युपासनायाम्। । अटा.

कुलयो) स्त्री। वृक्षविशेषे। शीतला स्वादुः
कुलो ∫ वातघ्नत् गुरुश्च। "कुलयो शीतला स्वादुः वातला कफकृद्गुरुः।" वै. निघ.।

कुलराहः (कः)। पुं। सैराहापरनाम्नि पीयूषवर्णाश्वे। "कुलाहः कुलराहस्तु सैराहः सरराहकः।" ज. द. ३अ.।

कुलर्कः। पुं। तालमर्द्दने। हारा.।

कुलवर्णा। स्त्री। रक्तमूलायां विद्यति। लाल केउड़ी। रा. नि. व. ६।

कुलसञ्चयम्। क्ली। परिपेले। केउटथूता।

कुलसौरभम्। क्ली। मरुवकवृक्षे। हिं मरुआ। श. मा.।

कुलहरटः (रुडकः)। पुं। जलावर्त्ते। हारा.।

कुल(ला)हलः। पुं। (Coryza Terebinthina or Celsia Coromandelina.) भूकदम्बे। कुक्कुरिमा। र. मा.। "कुलहलविषसुष्टी मूलुणी भूतकेशी।" वा. सू. १५ अ.। महाश्रावणिकायाम्। मुण्डीरी। मद. व. १।

कुलहला। स्त्री। गौरचमुण्डीचुपे। वै. निघ.।

कुलच्छया। स्त्री। कर्पूरशय्याम्। वै. निघ.। कपिकच्छ्वाम्। श. च.।

कुला। स्त्री। मनःशिलायाम्। वै. निघ.। शूकशिम्बाम्।

कुलाटः। पुं। क्षुद्रमत्स्यविशेषे। श. मा.।

कुलायः। पुं। पक्षिनीड़े। स्थानमात्रे। मे.। क्ली। शरीरे।

कुलायस्थः। पुं। पक्षिणि। श. च.।

कुलायिका। स्त्री। पक्षिशालायाम्। विका.।

कुलालः। पुं। वनकुक्कुटपक्षिणि। कुक्कुभपक्षिणि। हारा.। मे.। कुम्भीरे। वै. निघ.।

कुलालिका (ली)। स्त्री। नीलोत्पलविशेषे। अञ्जनान्तरे, कुलत्थाञ्जनप्रस्तरविशेषे। मे.। रा. नि. व. १३। वनकुलत्थिकायाम्। रा. नि. व. ५।

कुलासकः। पुं। दुरालभायाम्। प. मु.।

कुलाहः (कः)। पुं। ईषत्पीतवर्णकृष्णजानुघाटके। हे. च.। "ईषत्पीतः कुलाहस्तु यो भवेत् कृष्णजानुकः।" ज. द. ३ अ.। रक्तकोकिलाक्षे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाल कुलेथाड़ा। गुणाः—आमवातघ्नः रक्तरोगघ्नश्च। राज.। ह्लकलासे। शु. र.।

कुलाच्चिका (च्चुता)। स्त्री। शुन्यां। कुत्ति।

कुलिः (लो)। स्त्री। चविकायाम्। चई। रत्ना.। कण्टकार्य्याम्। कण्टकारी। मे.। पुं। काञ्चनारभेदे। रक्तकाञ्चन। मद. व. १। हस्ते। हात। विका.। चटकपक्षिणि। वै. निघ.।

कुलिकः। पुं। कण्टकपालीवृक्षे। केलेकड़ा, काँटा गुड़काँउली। मेघ.। अश्वकर्णशाले। लता शाल। रत्ना.।

कुलिकच्छः। पुं। नन्दीवृक्षे। गम्भा अश्वत्थ गाछ, तूण। प. मु.।

कुलिका। स्त्री। मेषशृङ्ग्याम्। वै. निघ.।

कुलिङ्गः (कः)। पुं। चटकपक्षिणि। रत्ना.। तत्पर्य्यायः,—कलिङ्गः, धूम्याटः, फिङ्गकः (शब्दसा.) शृङ्गः (अ.)। च.चि.२अ.हृष्ययोगे। गृहकुलिङ्गमांसं रक्तपित्तहरं अतिशीतलञ्च। रा.नि.व.१९। कुलिङ्गी स्निग्धः कफशुक्रविवर्द्धनः। रक्तपित्तहरी वेश्मकुलिङ्गक्षुतिशीतलः। सुश्रु.। सविषमूषिकविशेषे। तद्दष्टे रुजः शोफो राज्यश्च दंशमण्डले भवन्ति। सु. कल्प. ६ अ.। Fork tailed shrike. फिङ्गकपक्षिणि। फिङ्गा पाखी हिं नरगेंया। तन्मांसगुणाः—कुलिङ्गी मधुरः स्निग्धः कफशुक्रविवर्द्धनः। सु. सू. ४६ अ.। मधुरं स्निग्धं कफपित्तकरञ्च। राज.।

कुलिङ्गा (ङ्गी)। स्त्री। कुलिङ्गपक्षिस्त्रियाम्। कर्कटशृङ्गीवृक्ष। काँकड़ाशृङ्गी गाछ। प. मु.। च. सू. ४ अ.।

कुलिङ्गाक्षी। स्त्री। पेटिकावृक्षे। पेटारि गाछ। श्वेताचटायाम्। श्वेत ओकड़ा। रत्ना.।

कुलित्था। स्त्री। रक्तकुलत्थे। वै. निघ.।

कुलित्थिका। स्त्री। वनकुलत्थे। विदतायाम्। मसूरिकादाल्याम्। वै. निघ.।

कुलिरः। पुं। कर्कटे। काँकड़ा। विका.।

कुलिशः। पुं। लताशाले। र. मा.। खण्डकर्णवृक्षे। "हस्तिकर्णपलाशस्य कुलिशस्य तथैव च।" रसेन्द्र. चि. ८ अ.। अस्थिसंहारवृक्षे। प. मु.। मेघ. अमरपि. चि. ८अ.। र. मा. लौहमारणे। हीरकप्रभमस्यविशेषे। विका.। मे.। क्ली। वज्रे। हीरे। रा. नि. व. १३।

कुलिशतरुः। पुं। अश्वकर्णशालललतायाम्। लताशाल। रा. नि. व. ९।

कुलिशद्रुमः। पुं। खुहीवृक्षे। मनसा वृक्ष। हिं सूहर। वै. निघ.।

कुलिशमत्स्यः। पुं। कुड़िशमत्स्ये। राज.।

कुलीनः। पुं। कुनखनामक्षुद्ररोगे। See कुनखः। श्रेष्ठघोटके। हे. च.।

कुलीनकः। पुं। वनसूरे। मुगानी। कर्कटे। प. मु.।

कुलीनसम्। क्ली। जले। हे. च.।

कुलीयकम्। क्ली। नेवसन्धौ। वै. निघ.।

कुलीरः (कः)। पुं। कर्कटशृङ्ग्याम्। वै. निघ.। कर्कटे। क्षुद्रकर्कटे। काँकड़ा। रत्ना.। रस. र. बाल. चि.। कुलीरमांसगुणाः—"कुलीरकस्य मांसन्तु शीतं धातुविवर्द्धकं। हृद्यं रक्तप्रवाहञ्च क्षीणां शमयति क्षणात्॥" वै. निघ.। सृष्टविष्मूत्रं भग्नसन्धानकृत् वातपित्तघ्नम्। "कुलिरोऽतिबलो हृद्यः पाण्डुक्षयविनाशनः। शीघ्रातिसारग्रहणीरोगविराणां स्त्रियां हितः॥" अवि.।

कुलीरविषाणिका (णी)। स्त्री। कर्कटशृङ्ग्याम्। काँकड़ाशृङ्गी। भा. पू. १भ.।

कुलीरशृङ्गी
कुलीरा } स्त्री। कर्कटशृङ्ग्याम्। प. मु.। भा. कर्णक. ज्व. चि.। च. सू. ४ अ.।

कुलीरात्। पुं। कर्कटशिशौ। काँकड़ार बाच्चा। विका.।

कुलीशम्। क्ली, पुं। वज्रे। अ. टी. सा.।

कुलुकम्। क्ली। जिह्वामले। हे. च.।

कुलुक्कगुञ्जा। स्त्री। उल्कायां। हारा.।

कुलूलम्। क्ली। तुषानले। मे.।

कुलेचरः। पुं। क्षुद्रकभेदे। वै. निघ.।

कुलोत्कटः। पुं। कुलीनघोटके। श. च.।

कुलोत्थिका। स्त्री। कुलत्थे। वै. निघ.।

कुल्फः। पुं। गुल्फे। गुल्फ। रोगे। उणा.।

कुल्माषः। पुं, क्ली। काञ्जिके। रा. नि. व.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२। कुसत्ये। गन्धशाली। प. सु.। यावकै। याउ। मे.। अर्द्धस्विन्नधान्यगोधूमादौ। घुङ्नी। "अर्द्धस्विन्नास्तु गोधूमा अन्येऽपि चणकादयः। कुल्माष इति कथ्यन्ते। कुल्माषा गुरवो रूक्षा धातला भिन्नवर्चसः।" भा.। कीटदष्टमाषे। शूकधान्ये, यवादौ। वै. निघ.। वंशे। रा. नि. व. २२। जटामांस्याम्। वनकुलत्थे। र. मा.। काश्मीरे तुलसीभेदे। क्ली। धान्यविशेषे। बोरो धान। राजमाषे। वर्वटी। यवौदने। सु. चि. ६ अ.। यवपिष्टमाषे। सु. चि. १० अ.।

कुल्माषाभिभवम्} क्ली। काङ्किके। "कुल्मा-
कुल्माषाभिषुतम्} षादिभिरर्द्धस्विन्नैरभिषूयते स।" अ. टी. स्था.।

कुल्मासम्। क्ली, पुं। कुल्माषे। विश्व.।

कुल्यम्। क्ली। अस्थि। हाड़। द्रोणाष्टकपरिमाणे। आमिषे। कीकसे। पाँजर। मे.।

कुल्या। स्त्री। द्रोणाष्टकमाने। जीवन्त्याम्। मे.। स्थूलवार्त्ताक्याम्। वड़ बेगुण। र.मा.। पयःप्रणाल्याम्। अ.।

कुल्वकम्। क्ली। जिह्वमले। वै. निघ.।

कुवम्। क्ली। वारिजपुष्पमात्रे। पद्मे। हे. च.।

कुवकालुका। स्त्री। घोलीशाकै। रा. नि. व. ७।

कुवङ्गम्। क्ली। त्रीषके। शीसे। रा. नि. व. १३।

कुवञ्चकम्। क्ली। वैक्रान्तमणौ। रा.नि.व.१३।

कुवरः। पुं। तुवररसे। झालरस। अ. टी.।

कुवलः। पुं।)Ziziphus Jujuba.) वदरीवृक्षे। कुल गाछ। र. मा.। क्ली। पद्मे। उत्पले। मे.। वदरफले। कुल। मद. व. ६। वृक्षवदरे च. ह. ४ अ.। मुक्ताफले। प. सु.।

कुवलकी। स्त्री। शल्लकीवृक्षे। वै. निघ.।

कुवलकुणः। पुं। कोलिफलकाले।

कुवलयम्। क्ली। उत्पले। नीलोत्पले। नील शुन्नि। हिं कौजो। रा. नि. व. १०। भ. र.। "दूषन्नीलधवलं कुवलयम्।" ङ.। श्वेतपद्मे। नीलपद्मे। वै. निघ.। श्वेतकुमुदे। भा. पू. १भ.।

कुवलयिनी। स्त्री। उत्पलिन्याम्। शुन्नि वा कुमुदेर झाड़। रा. नि. व. १०।

कुवला। स्त्री। मुक्ताविशेषे।

कुवली। स्त्री। कोलिवृक्षे। कुल गाछ। हे. च.।

कुवाली। स्त्री। अश्मन्तकवृक्षे। रा.। आवाटु।

कुवासः। पुं। दुर्गन्धे। के.।

कुवाहुलः। पुं। ऊष्ट्रे। भ.।

कुविड़म्। क्ली। विड़लवणे। रा. नि. व. १३।

कुवृत्तिकृत्। पुं। पूतिकायाम्। करञ्जभेदे। काँटा करञ्ज। भ. च.।

कुवेणी। स्त्री। मत्स्यधानिकायाम्। खालुई।

कुवेरः (कः)। पुं। तुन्नवृक्षे। तूँद। मे.।

कुवेराक्षी। स्त्री। पाटलावृक्षे। अ.। सितापाटलिकायाम्। लताकरञ्जे। पेटिकावृक्षे। रा.।

कुवेलम्। क्ली। कुवलये। पद्म। हे. भ.।

कुवैद्यः। पुं। कुत्सितवैद्ये।

कुशः। पुं, क्ली। जले। मे.। Sacrificial grass. (Poa cynosuroides) स्वनामख्याततृणे। कुश। हिं दभ्। कुचदसु उल्लाकुशि। तत्पर्य्यायः,—कुखः, दर्भः, पवित्रं (अ.), याज्ञिकः, ऋक्षगर्भः, बर्हिः, कुतुपः (शब्दर.)। कुशो द्विविधः ऋस्वदीर्घभेदेन। तयोर्दीर्घपत्रकुशएव सितदर्भ उच्यते। स एवाधिकगुणः। ऋस्वोऽपि प्रायेण सितदर्भतुल्यगुणः। "दर्भौ द्वौ च गुणतुल्यौ तथापि च सिताऽधिकः। यदि श्वेतकुशाभावे त्वपरं योजयेद्विषक्॥" रा. नि. व. ८। "दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमं। मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित्॥" भा. पू. १भ.। "कुशो ऋस्वदर्भ इति।" सु. सू. ३८ अ.। ङ.। तृणपञ्चमूले कुशासने च। च. द. प्रमेहचि।

कुशद्वयम्। क्ली। स्थूलसूक्ष्मदर्भद्वये। वा. सू. १५ अ. वीरतरादि.। "इक्षादनोनलकुशद्वयगुण्ठगुन्द्राः।"

कुशनाभा। पुं। उष्ट्रे। हे. च.।

कुशपः। पुं। पानपात्रविशेषे। उणा.।

कुशपत्र(क)म्। क्ली। तदाकारपत्रास्त्रविशेषे। तच्च विस्रावणे प्रयोज्यम्। "कुशाटीवदने स्राव्ये द्व्याङ्गुलं स्यात्तयोः फलमिति।" सु. सू. ८ अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुशपुष्पम्। क्ली। यन्थिपर्णं। गाँठिवाना। प. मु.।

कुशमुक्तोलो। स्त्री। कुशमय्यां मुटिकायाम्। कुशानां रचनाविशेषो मुक्तोलीत्युच्यते। वा. कल्प. १ अ. अरुण.।

कुशमूढः। पुं। कुशनिर्म्मितपटके। मु. सू. ४३ अ.।

कुशमूलम्। क्ली। दर्भमूले। गुणाः—हिमं रूक्षं मधुरं पित्तघ्नं रक्तज्वरतृष्णाश्वासकासमलाहृच्च। रा. नि. व. ८।

कुशरीरः। पुं। महाशालवृक्षे। वै. निघ.। त्रि। कुत्सितशरीरे।

कुशलः। त्रि। निपुणे। पुं। कुक्कुरे। हे. च.। महानलवेतसे। मत्स्यभेदे। वै. निघ.। क्ली। पर्य्याप्तौ। अम.।

कुशलो। स्त्री। अम्लवेतसवृक्षे। क्षुद्राम्लिकायाम् चाङ्गेर्य्याम्। आमरूल। भा. भ. १ ख. शाकव। कुलार्य्याम्। घृतकुमार्यौ। वै. निघ.।

कुशलोदरम्। क्ली। भव्यफले। चालता।

कुशस्तवः। पुं। कुशगुच्छे।

कुशस्त्रम्। क्ली। कुत्सितास्त्र। खारापं अस्त्र। यथा—"अज्ञान-लोभाहितवाक्ययोग - भय - प्रमोहै-रपरैश्च [illegible] भिषक् कुशस्त्रं तदा स शेषान् कुरुते विकारान्॥" सु.।

कुशा। स्त्री। रज्ज्वाम्। मे.। मधुककंक्ष्याम्। भ. च.। वल्गायां। लागाम्। हे. च.।

कुशाकरः। पुं। अग्नौ। शब्दमा.।

कुशाग्रः। पुं। वानरे। सूर्य्ये। अग्नौ। वै.। क्ली। कुशतृणाग्रे।

कुशाङ्कुरम्। पुं। कुशतृणाङ्कुरे।

कुशादिशालिपर्ण्यः। स्त्री। तृणपञ्चकमूले विदारिगन्धादिगणे च। सि. यो. दाह. चि.।

कुशाद्यघृतम्। क्ली। अश्मर्य्यधिकारे। कुशादिक्काथ्यद्रव्याणां समष्टिः १२॥० भ. वारि ६४ भ. पादशिष्टः क्वाथः १६ भ. शिलाजत्वादीनां कल्कः १ भ. घृतप्रस्थं ४ भ. पचेत्। क्वाथद्रव्यं यथा—कुशमूलं काशमूलं शरमूलं इक्षुमूलं (ईकड़ मूल) इक्षुमूलं पाषाणभेदः उलुमूलं भूमिकुष्माण्डः वाराहीकन्दः वराहक्रान्तां वा शाखिधान्यमूलं गोक्षुरं श्योनाकः पाटला पाठा आर्कनादि) शालिचशाकं पीतझिण्टी श्वेतपुनर्नवे शिरीषमेवेति। कल्कद्रव्यं यथा—शिलाजतु यष्टिमधु इन्दीवरबीजं चुञ्चाबीज) चपुषबीजं (शशाबीज कर्कटीबीजं (काँकुड़बीज)। सर्व्वैरेव क्वाथकल्कैरित्यर्थे। च. द. अश्मरी. चि.।

कुशाद्यतैलम् (घृतञ्च)। क्ली। दाहाधिकारे। तिलतैलं घृतं वा ४ भ.। क्वाथार्थं कुशकाशशरेक्षुशीरशालपर्णीनां मिलितपलशतं वारि ६४ भ. शिष्टक्वाथः १६ भ. जीवकादीनां मिलितपलाष्टकमितं कल्कं दत्त्वा एकत्र पचेत्। च. द. दाह. चि। "कुशादिशालपर्ण्यादिजीवकाद्यैन साधितं। तैलं घृतं वा दाहघ्न वात-पित्त-विनाशनम्॥" क्वाथार्थं कुशादिपञ्चतृण-स्वल्पपञ्चमूलञ्च मिलित्वा ३२ प., कल्कार्थं जीवकाद्यष्टवर्गः मि. १ भ.। रस. र.।

कुशाम्लिः (म्ली)। पुं. स्त्री. (Averrhoa Rohitaka रक्तरोहीतके। रोहीतकवृक्ष। टोंड़ा वृक्ष। रा. नि. व. ८।

कुशावलेहः। पुं। प्रमेहाधिकारे औषधविशेष। पाठः—"वीरणस्य कुशः काशः क्षुद्रः खागड़स्तथा। एषां दशपलान् भागान् जलद्रोणे विपाचयेत्। मधुकं कर्कटीबीजं कर्कारुं चापुषन्तथा। शुक्लामलकपत्राणि एलात्वङ्नागकेशरं। वरुणात्वतपियङ्गूनां प्रत्येकमर्द्धसम्मितम्॥" सा. कौ.। द्रव्याणि—वीरणमूलं (वेणार मूल) कुशमूलं काशमूलं क्षुद्रतृणमूलं खगड़मूलञ्च, एषां प्र. १० प. वारि ६४ भ. शे. ८ भ.। तेन खण्डं २ भ. संमिश्र्य पचेत्, लेहभूते प्रक्षेपो देयः। तद्द्रव्यपरिमाणञ्च प्र. २ तो.। प्रक्षेपद्रव्याणि—यष्टीमधुकं कर्कटीबीजं (काँकुड़बीज) कुष्माण्डबीजं चपुषबीजं (शशाबीज) शंखपुष्पी आमलकपत्रं एला त्वक् (दारचिनी) नागकेशरपुष्पं वरुणत्वक् गुडूची प्रियङ्गुश्च। च. द.।

कुशासनम्। क्ली। कुशनिर्म्मितासने।

कुशाह्वः। पुं। वानरे। भ. मा.।

कुशिंशपा। स्त्री। कपिलवर्णशिंशपायाम्। कापलवर्ण शिशुगाछ। रा. नि. व. ९।

कुशिः। पुं। पेचके। रा.।

कुशिकः। पुं। सर्ज्जवृक्षे। शाल गाछ। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभीतकवृक्षे। हे. च.। अश्वकर्णवृक्षे। लता शाल। रा. नि. व. ९। तैलशिषे। विश्व.। फाले। फाल। भल्लातकवृक्षे। वदरे। वै. निघ.। नि। टेवा। श. मा.।

कुशि(षि)तः। त्रि। जलसिक्ते। उणा.।

कुशिखिः खी(बी)। पुं, स्त्री। शिम्बीविशेषे। गुणाः—"ज्ञेया विपाके मधुरा रसे च बलप्रदाः पित्तनिवर्हणाश्च।" वैद्यकं।

कुशी। स्त्री। फाले। लौहविकारे। मे.।

कुशोदम्। क्ली। फाले। रक्तचन्दने। सुखसालातत्वम्।

कुशोपुः। पुं। अग्नौ। वै. निघ.।

कुशूलः। पुं। तुषाग्नौ। जटा.। अन्नकोष्ठ, धान्यकोष्ठे। हला.।

कुशेशयः। पुं, क्ली। पद्मे। प. मु.। कर्णिकारवृक्षे। कल्केफूनेर गाछ। श. च.। सारसपक्षिणि। अम.।

कुशेशयकरः। पुं। सूर्य्ये।

कुषकः। पुं। विभीतकवृक्षे। वै. निघ.।

कुषाकुः। पुं। वानरे। अत्री। विश्व.। अर्के। मे.।

कुष्ठः। पुं, क्ली। (Sausurea auriculata. Syn. Aplotaxis auriculata.) स्वनामख्यातमध्यमगन्धभेषजविशेषे। कूड़। हिं कूढ़। तें चेंगलिकोष्ठु, चंगलकोष्ठु। प. मु.। तत्पर्य्यायः, —कदाख्यं, दुष्टं (अ.), व्याधिः, परिभाव्यं, व्याप्यं, उत्पलम् (अ.), वाप्यं, आप्यं (अ.टी.), नरणम्, गदाख्यम् (र.), गदाह्वम्, गदाह्वयम्, कौवेरम्, भासुरम् (शब्दर.) काकलम्, नीरुजम् (ज.), कुठिकः (हा.), रुजा, गदः, आमयः, पारिभद्रक राम वाणीरजम्, पावनं, कुत्सितम्, पाकलं पद्मकम्। गुणाः—"कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु। हन्ति वातासवीसर्पकासकुष्ठमरुत्क्षतान्॥" भा. पू. १भ.। विषकण्डूखर्ज्जूदद्रुहृत्क्लान्तिकरञ्च। रा. नि. व. १२। वा. सू. १५ अ.। कुष्ठरोगे। पुष्करमूले। कुड़विशेष। विषभेदे। हे. च.। कुलिञ्जनवृक्षे।

कुष्ठकण्टकः। पुं। खदिरवृक्षे। वै. निघ.।

कुष्ठकालानलरसः। पुं। कुष्ठे हितः। पाठः —"गन्धं रसं टङ्कणताम्रलौहं भस्मीकृतं मागधिकासमेतं। पञ्चाङ्गनिर्य्यूहेन फलत्रयेण विभावितं राजतरोत्थयैव। नियोजयेद्बल्लकयुग्ममानं कुष्ठेषु सर्व्वेष्वपि रोगसङ्घे॥" र. चि. ९अ.।

कुष्ठकुठारकरसः। पुं। कुष्ठाधिकारे। सूतभस्म १ भ. गन्धक. १ भ. स्तायःप्रभृति-शिलाजत्वन्तानां प्रत्येकं १६ भ. करञ्जबीजचूर्ण ६४ भ. अभ्रञ्च ६४ भ.। चूर्णानुरूपघृतमधुभ्यां विलीड़येत्। "भस्मसूतसमो गन्धो स्तायखाम्रगुग्गुलू। त्रिफला च सहानिम्बखदिरकञ्च शिलाजतु। इत्येतच्चूर्णितङ्कुर्य्यात्प्रत्येकं भागषोड़श। चतुःषष्टिं करञ्जस्य बीजचूर्णं प्रकल्पयेत्। चतुःषष्टिं घृतञ्चाभ्रं मधव्याभ्यां विलीड़येत्॥" रस. र.। र. सा. सं.।

कुष्ठकेतुः। पुं। भूम्याङ्कुल्यक्षुपे। भूमिथथ्सा। रा. नि. व. ४।

कुष्ठगन्धा (न्धिनी)। स्त्री। अश्वगन्धायाम्। भा. पू. १भ.।

कुष्ठगन्धि। क्ली। (Feronia Elephantum.) एलवालुके। अम.।

कुष्ठघ्नः। पुं। पटोलवल्लतायाम्। रा. नि. व. ३। हितावल्ल्याम्। खदिरवृक्षे। वै. निघ.।

कुष्ठघ्नी। स्त्री। काकोदुम्बरिकायाम्। रा. नि. व. ११। काकमाच्याम्। वाकुच्याम्। सोमराज। हितावल्ल्याम्। वै. निघ.।

कुष्ठतोदनः। पुं। रक्तखदिरवृक्षे। रा. नि. व. ८।

कुष्ठदलनरसः। पुं। कुष्ठाधिकारे रसः। पाठः —"गन्धं रसं वाकुचिकीत्यबीजं पलाशबीजञ्च कृमानुशुद्धौ। श्लक्ष्णाणि सध्याज्ययुतानि कृत्वा सेवेत कुष्ठी च हिताशनन्तु॥" गन्धक, रस, सोमराजी, पलाशबीज, चित्रक, शुण्ठी, प्रत्येकेर चूर्ण समभाग। रस. र.।

कुष्ठदोषापहा। स्त्री। वाकुच्याम्। रा. नि. व. ४।

कुष्ठनाशनः। पुं। कुष्ठहरवृक्षेषु। गौरसर्षपे। रा. नि. व. १६। चोरीशवृक्षे, चोरकचुकीति लोके। रत्ना.। वाराहीनामगन्धाकन्दे। रा. नि. व. ७। रक्तखदिरवृक्षे। आरग्वधवृक्षे। वै. निघ.।

कुष्ठनाशिनी। स्त्री। वाकुच्यां। सोमराज। प. मु.। काकमाच्याम्। रा. नि. व. ४।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुष्ठनोदनः । पुं । रक्तखदिरवृक्षे । वै. निघ. ।

कुष्ठमयः । त्रि. । कुष्ठरोगिणि ।

कुष्ठरोगः । पुं । Leprosy. (Elephantiasis.) महाव्याधिनामरोगविशेषे । महाव्याधि, कुष्ठव्याधि । लक्षणादिकं यथा—मिथ्याहारविहाराचारस्य विशेषाद्दूषिकृद्वासात्म्याजीर्णाहिताशिनः स्नेहपीतस्य वान्तस्य वा व्यायामव्याय्यधर्म्मसेविनो ग्राम्यानूपौदकमांसानि वा पयसाभीक्ष्णमश्नतो यो वा मज्जत्यप्सूष्माभितप्तः सहसा वृष्टिं वा प्रतिहन्ति तस्य पित्तश्लेष्माणौ प्रकुपितौ परिगृह्यानिलः प्रवृद्धस्त्थिग्गाः शिराः सम्प्रतिपद्य समुद्धूय बाह्यं मार्गं प्रति समन्ताद्विक्षिपति, यत्र यत्र च दोषो विक्षिप्तो निःसरति, तत्र तत्र मण्डलानि प्रादुर्भवन्ति, एवमुत्पन्नस्वचि दोषस्तत्र च परिवृद्धिं प्राप्याप्रतिक्रियमाणोऽभ्यन्तरं प्रतिपद्यते धातून्दूषयन् । तस्य पूर्व्वरूपाणि त्वक्पाकस्यादौनि । स महाक्षुद्रभेदेन द्विविधः, तत्र खल्वसौ महाकुष्ठान्येकादश क्षुद्राणीति अष्टादश । अरुषीदुम्बरर्ष्यजिह्वकपालककाकणकपुण्ड्रीकदद्रुकुष्ठानीति महाकुष्ठानि । स्थूलारुष्कमहाकुष्ठैककुष्ठचर्म्मदलविसर्पसिध्मपामाविचर्च्चिकाकिटिभपरिसर्पारुषकाश्चेति क्षुद्राणि । सु. नि. ५ अ. । "पुराणधान्यानि च जाङ्गलानि मांसानि मुद्गाश्च पटोलयूषाः । अवादयश्चात्र हिताः पुराणाः घृतानि शाकानि च तिक्तकानि ॥" इति पथ्यम् । "अलीमिकां ग्रन्थिसतीं तथा वा व्रणसंयुतां । त्वक्दुष्टमहारोगः करोत्यस्य दारुणाम् ॥ गवां मूत्रपुरीषाभ्यां खदेत्तु व्रणिनो हितः । कुष्ठरोगेषु सर्व्वेषु सर्पीषि वेधयेच्छिराम् ॥' इति अश्वस्य कुष्ठम् । जा. द. ४८ अ. ।

कुष्ठवैरी (इन्) । पुं । वृक्षविशेषे, चालमुगरा इति भाषा । गुणाः—"कुष्ठवैरी शैलरोही महागदमहीरुहः । वैवस्वतद्रुमः स स्याद्वलक्ष्यश्च रसायनः । पामाविचर्च्चिकाकण्डूसिध्मदद्रुविपादिकाः । हन्त्यामवातं वातामं कुष्ठानि च विशेषतः ॥" अत्रि. ।

कुष्ठशैलेन्द्रवज्ररसः । पुं । कुष्ठाधिकारे रसः । पाठः—"तालकं मरिचङ्कुष्ठं काचटङ्कनिशावचाः । निर्गुण्डी निम्बकरञ्जावोजं वा दलमेव वा । प्रत्येकं तोलकं चूर्णं चूर्णतुल्यन्तु गुग्गुलुः । वाकुच्याः पलिकं ग्राह्यं पलं सूतस्य गन्धकं । लौहस्य द्विपलखात्र तिक्तक्षाजलशोधितं । षण्मासा वटिका कार्य्या गोमूत्रेण निषेविता । कुष्ठशैलेन्द्रवज्राख्यो लौहोऽयमृतोपमः ॥' रस. र. । हरितालं मरिचं कुष्ठं (कूड़) काचलवणं टङ्कणं (सोहागा) हरिद्रा वचा निर्गुण्डी । निम्ब-कारवेल्लयोः बीजं पत्रं वा, एषां प्र. १ तो. सर्व्वचूर्णसमं गुग्गुलचूर्णं सीसराजीचूर्णं ८ तो. पारदगन्धकयोः चूर्णं मिलितं १६ तो. त्रिफलागुडूचीलौहं १६ तो. एकत्र गोमूत्रेण वटीं ६ मा. कार्य्या ।

कुष्ठसूदनः । पुं । आरग्वधे । बड़ सोणालू । रा. नि. व. ९ ।

कुष्ठहन्ता । पुं । हस्तिकन्दनामसंज्ञाकन्दशाके । रा. नि. व. ७ ।

कुष्ठहन्त्री । स्त्री । वाकुच्याम् । सोमराज । हाकुच् । रा. नि. व. ४ ।

कुष्ठहरतालेश्वरः । पुं । कुष्ठाधिकारे । रसोऽयं तास्रकोटरे क्वथा पुटपाकविधिना प्रहरषट्कं पचनीयम् । शुद्धहरितालं १२ भ. गन्धकं ६ भ. पारद ७ भ. कृष्णाभ्रभस्म ७ भ. एकत्र अर्कक्षीरक्वाथेन सेहुण्डक्षीरेण अर्कक्षीरेण करवीरक्वाथेन उदुम्बरक्वाथेन च मर्द्दनीयः । अथ तास्रपात्रे कृत्वा ६ प्रहरं पाच्यः । र. सा. सं. ।

कुष्ठहा । पुं । पटोलवृक्षे । भा.पू.१भ.शाकव. ।

कुष्ठहृत् । पुं । खदिरवृक्षे । खैर गाछ । विका. ।

कुष्ठाद्यतैलम् । क्ली । ज्वरस्तम्भे । कटुतैलं ४ प्र. कल्कीभूतकुष्ठादीनां प्रत्येकं ८ तो. वारि १६ प्र. तैलपाकविधिना पाच्यम् । ग्रैवेष्टः धूपः । अजगन्धा कीफान्दौ । अन्यत् कर्णरोगे—"कुष्ठहिङ्गुवचादारुशताह्वाविश्वभेषजैः । पूतिकर्णापहं तैलं वस्त्रमूत्रेण साधितम् ॥" शताह्वा शतमूली । तिलतैलं १ प्र. कुष्ठं (कूड़) हिङ्गु वचा देवदारुः शतमूली शुण्ठी मिलितं १६ तो. छागमूत्रं ४ प्र. । च. द. ।

कुष्ठाद्युद्वर्त्तनम् । क्ली । कुष्ठरोगे उद्वर्त्तने । "कुष्ठं हरिद्रे सुरसं पटोलं निम्बाश्वगन्धे सुरदारुशिग्रू । ससर्षपं तुम्बुरुधान्यबल्ये चण्डाश्च चूर्णानि समानि कुर्य्यात् । तैलक्रपिष्टैः प्रथमं शरीरं तैलाक्तमुद्वर्त्तयितुं यतेत ।" सुरसं तुलसी. बल्यं केवर्त्तमुस्तकं, चण्डा चीरपुष्पी (छोटधड़ुके) च. द. ।

कुष्ठान्तकरसः । पुं । कुष्ठाधिकारे रसः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठः—"शुद्धसूतं द्विधा गन्धं निर्गुण्डीवागुचीरसैः। दिनैकं मर्दयेत्पाच्यं यामं लवणयन्त्रके। उद्धृत्य चूर्णयेत् तुल्यैस्त्रिफलावाकुचीफलैः। तुल्यांशं मङ्गचूर्णञ्च सर्व्वमेकत्र पाचयेत्। पलाशखदिरक्वाथैः गोमूत्रैर्लोहभाजने। दिनैकान्ते वटीकुर्य्यान्निष्कोवं भक्षयेन्मदा। कुष्ठं विस्फोटकं हन्ति नाना कुष्ठान्तको रसः। मर्दनं भानुतैलेन आतपे कारयेत्सदा॥" रस. र.।

कुष्ठारिः। पुं। (Acacia Farnesiana.) विट्खदिरे। रा. नि. व. ८। पटोलि। रा.नि.व.३। गन्धके। रा. नि. व. १२। (Acacia Catechac). खदिरे। आदित्यपत्रके। रा. नि. व. ४। भमरारि-नामपुष्पवृक्षे मालवदेशे प्रसिद्ध। रा. नि. व. १०।

कुष्ठारिसः। पुं। कुष्ठाधिकारे। अत्र बलात्रयं श्वेतबलापीतबलानागबला ग्राह्याः। ब्रह्मदण्डी (भार्गी)। काकडुमूर, वामुनहाटीमूल, श्वेत वेलेड़ा, पीत वेलेड़ा, गोरक्षचाकुले प्रत्येकेर चूर्ण समभाग। मधुर सहित चाटिया खाइबे। र. सा. सं.।

कुष्ठिकम्। क्ली। अण्डस्य किणार्धो मध्यभागे। "किणं तत्रैव मध्यस्थमधोभागे च कुष्ठिकम्।" ज. द. २ अ.।

कुष्ठी। त्रि। कुष्ठरोगयुक्ते।

कुष्णोषः। पुं। सरीसृपज्वरे। गज. वै.।

कुष्मलम्। क्ली। छेदने। उणा.।

कुष्माण्डः (कः)। पुं। A kind of Pumpkin gourd. (Benincasa cerifera.) खनामख्यातफलशाके। कूमड़ा गाछ। हिं कुंहड़ा। तें गुम्मडि। उत्. कखाडु, पानीकखारू। तत्पर्य्यायः,—घूणावासः, तिलिषः, ग्राम्यकर्कटी (त्रि.), पुष्पफलः (र.), कर्कारुः (अ.), कुष्माण्डः, शिखिवर्द्धकः (शब्दर.), कुष्माण्डः, कुष्माण्डी, कर्कोटिका, कुष्माण्डी, बृहत्फला, सुफला, कुच्चकन्ना, नागपुष्पफला, शुनी, कुष्माण्डं, वल्लीफलश्रेष्ठं। तत्फलं विविधं बालमध्योत्तमभेदात्। गुणाः—"वातघ्नं रोचकं बालं, मध्यमं स्यात्त्रिदोषहृत्। शीर्णं वातकफं हन्ति रक्तपित्तनिबर्हणम्॥" भावि. १६ अ.। बृंहणं बृष्यं गुरुत्वात् श्लेष्मलं पित्तास्रवातघ्नम्। बालं तत् पित्तघ्नं शीतलं मध्यमं कफकरं। वृद्धं नातिहिमं स्वादु सक्षार दीपनं लघु वस्तिशोधकं चेतोरोगहृत्॥ भा. पू. १भ. शाकव.। तन्मध्यफलं कफकरं गुरुपाकि च। तत्पक्वफलं—लघु उष्णं क्षाररसं अग्निदीपनं वस्तिशोधनं हृद्यं चित्तविकारणाञ्च पथ्यम्। तस्य लताशाकौ—मधुरौ सुक्षारौ गुरू रुचौ रुचिकरौ वातकफाश्मरीशर्करापहरौ च। तन्मज्ज—शुक्रलं पित्तघ्नं वस्तिशोधनञ्च। राज. ३प.। मूत्राघातहरं प्रमेहमूत्रकृच्छ्राश्मरीघ्नं विष्मूत्रबलप्रदं शुक्रवृद्धिकरं तृष्णाहरं जीर्णाङ्गपुष्टिकरं स्वादु अरोचकहरं बल्यं पित्तघ्नञ्च। रा. नि. व. ७। "कुष्माण्डकस्य स्वरसौ गुड़ेन सह योजितः। कुष्ठकी द्रवसङ्घातं मदं पानाद्व्यपोहति॥ शार्ङ्ग. म. १ ।।

कुष्माण्डकघृतम्। क्ली। अपस्माराधिकारे। घृतं ४ प्र. यष्टिमधुकल्कः १ प्र. कुष्माण्डरसः ७२ प्र.। च. द. अपस्मा. चि.।

कुष्माण्डकशिफा। स्त्री। कुष्माण्डमूले। वै. निघ. श्वास. चि.।

कुष्माण्डकवटी। स्त्री। कुष्माण्डादिकृतवटिकायाम्। कूमड़बड़ी। कुष्माण्डकवटी ज्ञेया पूर्व्वोक्ता वटिकागुणाः। विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः। भा.।

कुष्माण्डखण्डम्। क्ली। रक्तपित्ताधिकारे घृतम्। "कुष्माण्डकं पलशतं सुस्विन्नं निष्कुलीकृतं। पचेत्तत्र घृतप्रस्थं शनैस्तत्समये दृढे। यदा मधुनिभः पाकः तदा खण्डशतं न्यसेत्। पिप्पलीशृङ्गवेराभ्यां द्वे पले जीरकस्य च। त्वगेलापत्रमरिच-धान्यकानां पलार्द्धकं। न्यसेच्चूर्णीकृतं तत्र दर्व्व्या सङ्घट्टयेत् पुनः। तत् पक्वं स्थापयेद्भाण्डे दत्त्वा चौद्रं घृतार्द्धकं। तद्यथाग्निबलं खादेत् रक्तपित्ती चतत्त्रयी॥" त्वग्बीजान्त्रैर्विरहितं निष्कुलीकृतमुच्यते। निष्कुलीकृतकुष्माण्डं १०० प. घृतं ४ प्र. कुष्माण्डजलं १६ प्र. शर्करा १०० प. पाकसिद्धौ पिप्पलीचूर्णं १ प. शुण्ठीचूर्णं १ प. जीरकगुड़त्वक्तेजपत्रैलामरिचधन्याकचूर्णं प्र. ४ ती. मधु २ प्र.। सा. कौ.। वा. चि. ३ अ.।

कुष्माण्डगुड़कल्याणकम्। क्ली। ग्रहण्यधिकारे। रूढ़ानां वत्सरातीतानाम्। निष्कुलत्वचां वृक्षाबीजवल्कलरहितानाम्। कुष्माण्डं श्लोकजलेन पिष्ट्वा निष्पीड़नेन नीरसङ्कृत्वा रौद्रे शोषयेत्। एवं कुष्माण्डं १०० प. घृतं ३२ प. तिल-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैलं ८ प. एकत्र भर्ज्जयेत्। गुड़: (पुरातन:) २५ प. आमलकीरस: १०० प. उक्तरसेन शर्करा गोलयित्वा भर्ज्जितकुष्माण्डेन सह तावत् पचेत् यावत् पाकी दर्व्वीलिप्तो न भवति। पाकशेषे पिप्पल्यादिचूर्णप्रक्षेपो देय:। यथा—यमानी जीरकम्। पिप्पली पिप्पलीमूलं चित्रकमूलं गजपिप्पली धान्यकं विड़ङ्गं मरिचं चिफला धनयमानी इन्द्रयव: सैन्धवं एषां प्रति चूर्णं ८ तो. विल्वमूलचूर्णं ८ प.। च. द. ग्रहणी. चि.।

कुष्माण्डग्रह:। पुं। भूतग्रहविशेषे। लक्षणं —"बहुप्रलापङ्गृणाख्यं प्रविलम्बितयायिनं। गूनप्रलम्बहृषणं कुष्माण्डाधिष्ठितं वदेत्॥" वा. उ. ४ अ.।

कुष्माण्डतैलम्। क्ली। कुष्माण्डबीजतैलं। कुमड़ाबीजेर तेल। गुणा:—वातपित्तघ्नं श्लेष्मलं गुरु शीतलञ्च। वा. तैलव.।

कुष्माण्डनाड़िका (ड़ी)। स्त्री। कुष्माण्डस्यनाले। कुमड़ार डाँटा। गुणा:—"कुष्माण्डनाड़िका गुर्व्वी शर्कराश्मरिनाशिनी।" राज. २प.।

कुष्माण्डवटक:। पुं। कुष्माण्डकृतवटके। कुमड़ाबड़ि। यथा—"कुष्माण्डं कर्त्तयित्वास्य जलं निष्काश्य यत्नत:। कुस्तुम्बुरुनिशालाषचूर्णं सतिलसैन्धवं। निक्षिप्य वटका: कार्य्या आतपे शोषयेत्तत:। रुचिदा वातघ्नास्तिलतैले सुपाचिता:॥" वै. निघ.।

कुष्माण्डशालि:। पुं, स्त्री। खनामख्यातशालिधान्यविशेषे। गुणा—मधुरा गुरु: सुगन्धा पीता दुर्ज्जरा स्थूलतण्डुला कीमला च। रा. नि. व.१६।

कुष्माण्डसुरा। स्त्री। कुष्माण्डकृतसुराविशेषे। कुमड़ार मद। गुणा:—"कुष्माण्डस्य सुरा गुर्व्वी धातुवर्द्धनकारिणी। अग्निमान्द्यकरी हृद्या प्रीक्ता दृष्टिप्रदा बुधै:॥" वै. निघ.।

कुष्माण्डचार:। पुं। कुष्माण्डभक्षोत्थचारे। "कुष्माण्डं तनु कृत्वा तु चिक्षा घर्म्मे विशोषयेत्। स्थाल्यां विचिप्य तत्सर्व्वं पिधानेन पिधाय च। चुल्ल्यां निवेश्य वह्निञ्च ज्वालयेत् कुशलो जन:। यदा तच्च भवेद्वस्म किन्वङ्गारी दृढ़ो भवेत्। तदा निर्वापयेच्छीतं सर्व्वथा चूर्णितन्तु तत्॥" भा. म. ३भ. शूलचि.।

कुष्माण्डी। स्त्री। कर्कोटक्याम्। विलाती कुमड़ा वा काँकरोल। कुष्माण्डलतायाम्। कुमड़ा गाछ। रा. नि. व. ७।

कुष्माण्डोन्माद:। पुं। भूतोन्मादभेदे। स च कुष्माण्डग्रहजात:। आङ्ग. पू. ७अ.। लक्षणं—"बहुप्रलापङ्गृणाख्यं प्रविलम्बितयायिनं। गूनप्रलम्बहृषणं कुष्माण्डाधिष्ठितं वदेत्॥" वा. उ. ४अ.।

कुसिम्बा। स्त्री। कुसिम्बीलतायाम्।

कुसिम्बी। रक्तशिम्बीलतायाम्। शिम् गाछ। रा. नि. व. १६।

कुसुमम्। क्ली, पुं। पुष्पे। स्त्रीरजसि। Ophthalmia नेत्ररोगविशेषे। मे.। लवङ्गे। त्रै. निघ. २भ. अर्शं. चि.।

कुसुमफलम्। क्ली। जातीफले। वै. निघ.।

कुसुममध्यम्। क्ली। भव्यफले। चालिता। भा. च.।

कुसुमवती। स्त्री। रज:स्वलायाम्।

कुसुमसार:। पुं। मधुनि। "घृतकुसुमसारलौढ़:।" च. द. यक्ष्म. चि. गर्भाधि.।

कुसुमा। स्त्री। मालतीपुष्पवृक्षे। रक्तपाटलायाम्। जातीपुष्पवृक्षे। रत्ना.।

कुसुमाकर:। पुं। वसन्तसमये।

कुसुमाञ्जनम्। क्ली। पुष्पाकाररीतिमलसम्भवे अञ्जने। पुष्पाञ्जन। रा. नि. व. १३। तत्पर्य्याय:,—पीष्पकं रौतिपुष्पं पुष्पकेतु: (अ.)।

कुसुमात्मकम्। क्ली। कुङ्कुमे। हारा.। पुं। केशे। वै. निघ.।

कुसुमाधिप:। पुं। चम्पकवृक्षे। भा. र.।

कुसुमाधिराज:(राट्)। पुं। महानागकेशरचम्पकवृक्षे। नागेश्वरचाँपा। विका.।

कुसुमावलि:। स्त्री। इन्द्रकृतसिद्धयोगटीकायाम्।

कुसुमासवम्। क्ली, पुं। मधुनि। रा. नि. व. १४।

कुसुमोदरम्। क्ली। भव्यफले। चालिता। प. मु.।

कुसुम्ब:(म्भ:)। पुं, क्ली। कुङ्कुमवृक्षे। पूतीकरञ्जे। नाटाकरमचा। मे.। See पूतीक:।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(Safflower cartham us tinctorius.) खनामप्रसिद्धवृक्षे। कुसुमफूलेर गाछ। म कर्डुईचे झाड़। तैं खत्तुक, खक्क, अंगारसु। स त्रिविधः महाकुखनकुसुम्भभेदात्। ग्राम्यकुक्कुसं (वि.) कमलोत्तमं, वह्निशिखं, महारजनं (अ.), कुक्कुटशिखः (श.), पावकः, पीतः, पद्मोत्तरः, रक्तः, लोहितं, वस्त्ररञ्जनं अग्निशिखम्। गुणाः—"कुसुम्भो वातली रूक्षो विदाही कटुकः स्मृतः। मूत्रकृच्छ्रकफं रक्तपित्तञ्चैव विनाशयेत्॥ कुसुम्भपुष्पं सुस्वादु विदोषघ्नञ्च भेदकं। रूक्षमुष्णं पित्तलञ्च केशरञ्जनकारकं। कफनाशकरञ्चैव लघु प्रोक्तं मनीषिभिः॥" वै. निघ.। वातलं मूत्रकृच्छ्ररक्तपित्तकफघ्नम्। भा. पू. १भ.। तक्काकं मधुरं कटूष्णं त्रिदोषघ्नं दृष्टिप्रसादनं रूक्षमग्निकरञ्च। रा. नि. व. ७। "कुसुम्भपत्रं मधुरं नेत्रयोरुष्णं कटु स्मृतम्। अग्निदीप्तिकरञ्चाति-रूक्षं रूक्षं गुरु स्मृतं। सरं पित्तकरञ्चान्नं गुदरोगकरं मतं। कफत्रिदोषजभेदानां नाशकं परमं मतम्॥" वै. निघ.। कुसुम्भं रूचिकृद्धातं हन्ति बल्यं रूचिप्रदं।.....स्वादु विपाके च कफापहम्॥ किञ्चिच्चाम्लं भवेत् चारम्भश्लेष्मघ्नि-मान्द्यकृत्। भेदनं रूक्षमधुरं कषायमतिवीर्यलम्॥" अत्रि. १६ अ.। स्वर्णे। मे.।

कुसुम्भतैलम्। क्ली। कुसुम्भबीजस्नेहे। कुसुम्बीजेर तैल। गुणाः—"कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च। चक्षुर्थ्यमहितं बल्यं रक्तपित्तकफापहम्॥" वै. निघ.। कृमिघ्नं तेजोबलकरं राजयक्ष्मघ्नं मलघ्नं विदोषकरं पुष्टिनाशनं बलक्षयकरं दृष्टिकण्डूतिजनकञ्च। रा. नि. व. १५। कुसुम्भतैलमुष्णन्तु विपाके कटुकं गुरु। विदाहकं विशेषेण सर्व्वदोषप्रकोपनं॥" अत्रि. १४. अ.।

कुसुम्भपत्रम्। क्ली। कुसुम्भशाके। See कुसुम्भः।

कुसुम्भबीजम्। क्ली। कुसुम्भवृक्षफले। कुसुम्भफूलेर बीज। हिं बरे। गुणाः—कटुपाकं दृक्शुक्रहरञ्च। वा. पुष्पव.। मधुरं स्निग्धं रक्तपित्तकफघ्नं कषायं शीतलं गुरु वृष्यं वातघ्नञ्च। भा.।

कुसुम्भला। स्त्री। दारुहरिद्रायां। वै. निघ.।

कुसूः। पुं। किञ्चुलुके, गण्डूपदे। हे. च.।

कुसुम्ब(म्भ)रो(रः)। स्त्री। A pungent seed used in condiment. धन्याके। रा. नि. व. ६। (रौ) The plant coriander. आर्द्रधन्याके। काँचा धने। सं कोथिम्बीर। "गुडूचीनिम्बकुसुम्भरूपत्रकम्।" सि. यो. अग्निसा. चि.। "चव्यं चित्रकपाठां चीरं कुसुम्भरूणि च।" च. द. चव्यादिघृते। गुणाः—"आर्द्रा कुसुम्भरी कुर्य्यात् स्वादुदौर्गन्ध्यहृद्यतां। सा गुर्व्वी मधुरा पाके स्निग्धा दृङ्दाहनाशिनी। दोषघ्नी कटुका किञ्चित्तिक्ता स्त्रीतोविशोधनी॥" सु. सू. ४६ अ.।

कुस्वप्नः। पुं। कुत्सितस्वप्ने।

कुहम्। क्ली। राजवदरफले। मद. व. ६। पद्मे। नीलपद्मे। वै. निघ.।

कुहकः। पुं। मण्डूकजातीयकीटभेदे। सु. कल्प. ८ अ.। ग्रन्थिपर्णवृक्षे। गँठेला। वै. निघ.।

कुहकस्वनः } पुं। Phasianus Gallus.
कुहकस्वरः } वनकुक्कुटे। हे. च.।

कुहनः। वि। ईर्ष्यालौ। हारा.। पुं। सूषिके। सर्पे। हे. च.। क्ली। मृद्वाण्डविशेषे। काचपात्रे। मे.।

कुहरः। पुं। नागविशेषे। कर्णे। कण्ठे। कण्ठशब्दे। अजयपालः। क्ली। छिद्रे। मे.। भृष्टान्ने। श.।

कुहलिः। पुं। सज्जिततास्बूले। साजापान। पूगपुष्पिकायाम्। त्रिका.।

कुहा। स्त्री। गोपघोषितायाम्। शेम्राकुल। वै. निघ.। कटुक्यां। श. च.। वदरवृक्षे। भा.।

कुहुकम्। क्ली। ग्रन्थिपर्णे। श. चि.।

कुहूकः (कण्ठः) (मुखः) (रवः)। पुं। कोकिले। त्रिका.। (वा) स्त्री। कोकिलायाम्। वै. निघ.।

कुहूलम्। क्ली। सशल्य-भूरन्ध्रे। ज.। सापेर गर्त्त।

कुहेड़िका (ड़ी) (लिका)। स्त्री। कुज्झटिकायाम्। हारा.। त्रिका.।

कुचः। पुं। कुचौ। कोंक्। उणा.।

कुच्चिः। स्त्री। उदरे। रत्ना.।

कुच्चिम्भरिः। वि। स्वोदरपूरके। अम.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुक्षिरन्ध्रः। पुं। नले। रा. नि. व. ८।

कुक्षिशूलम्। क्ली। वातव्याधौ। मा. नि.।

कूः। स्त्री। पिशाच्याम्। शब्दमा.।

कूकुरः। पुं। कुकुरे। वै. निघ.।

कूचः। पुं। कुर्चे, स्तने। उणा.।

कूचिका। स्त्री। अस्थाहिमत्स्ये। त्रिका.। क्षुद्रकुक्षिकायाम्। दुग्धपाचिते क्षतभर्ज्जिततण्डुले। वै. निघ.।

कूची। स्त्री। तक्रकूर्चिकायाम्। दुग्धकूर्चिकायाम्। वै. निघ.।

कूजः। पुं। अव्यक्तशब्दे।

कूजनम्। क्ली। कुत्सनम्। भा. म. १भ. ज्व. चि.। "कूजनञ्चातिवैगन्ध्यम्।"

कूजितम्। क्ली। पक्षिरवे। हे.।

कूटः। पुं। अश्मशङ्कवृक्षे। हला.। रटहे। श्र. र.। अमि. २० अ.। वृक्षविशेषे। क्ली। लौहसारे। पित्तले। प. मु.। वारिपात्रे। वै. निघ.।

कूटकः। पुं, क्ली। सुरानामगन्धद्रव्ये। श. मा.।

कूटगृहम्। क्ली। जैनाकगृहे। च. शा. ३अ.।

कूटजः। पुं। कूटजवृक्षे। कुड़चि गाछ। भा. पू. १भ.। श्वेतकुटजे। वै. निघ.।

कूटजीवः। पुं। पुत्रजीववृक्षे। रा. नि. व. ९।

कूटतुला। स्त्री। कुत्सिततुलायाम्। शब्दरत्ना. निक्ति।

कूटपाकः। पुं। सन्निपाते। पैत्तिकज्वरे। वै. निघ.।

कूटपाकलः। पुं। हस्तिनः पैत्तिकज्वरे। त्रिदोषोल्बणसन्निपातज्वरे। लक्षणं—"सर्व्वदोषोल्बणो यस्य सन्निपातः प्रकुप्यति। त्रयाणामपि दोषाणां तस्य रूपाणि लक्षयेत्।.....। केवलोच्छ्वासपरमः स्तब्धाङ्गः स्तब्धलोचनः। विराचीपरमे तस्य जन्तोर्हरति जीवितम्॥...। सन्निपातमिममाहुः भिषजं कूटपाकलम्॥" भा. म. १भ.।

कूटपालकः। पुं। पित्तज्वरे। कुलालस्य पवने। कुमारेऽन्न पोण। हारा.।

कूटप(पू)र्व्वः। पुं। हस्तिनस्त्रिदोषजज्वरे। त्रिका.।

कूटमानम्। क्ली। कुत्सितमाने।

कूटलमस्तकः। पुं। चर्विकायां। वै. निघ.।

कूटयन्त्रम्। क्ली। खगपक्षिबन्धनार्थयन्त्रविशेषे। फाँद। तत्पर्य्यायः उत्थाथः (अ.)।

कूटशाल्मलिः। पुं। रक्तरोहितवृक्षे। रा. नि. व. ८। A species of Simul silk cotton tree. क्षणशाल्मलीवृक्षे। काशि साल्ला जीवनीकापला इति भाषा। तत्पर्य्यायः—कुत्सितशाल्मलिः, प्रीतीरोचनः, कूटशाल्मलिकः। गुणाः—"तिक्तः कटुः मेदकरो मतः। उष्णः कफञ्च वातञ्च प्लीहां गुल्मं यकृद्रुजं। विषदोषं भूतबाधां मलस्तम्भं विनाशयेत्। मेदञ्च रक्तदोषञ्च शूलञ्चैव विनाशयेत्॥" वै. निघ.।

कूटस्थम्। क्ली। नखीनामकगन्धद्रव्ये। व्याघ्रनखौ। रा. नि. व. १२।

कूटार्थसिद्धिकृत्। पुं। पुत्रजीववृक्षे। वै. निघ.।

कूणिः। वि। रोगादिना कुञ्चितकरे। लूलो। अ. टी.।

कूणिका। स्त्री। पशुशृङ्गे। हे. च.। कलिकायाम्। श. चि.।

कूथनम्। क्ली। कुत्सने। वै. निघ.।

कूदालः। पुं। कुद्दालकवृक्षे। अ. टी. र.।

कूपः (कः)। पुं। गम्भीर-सङ्कीर्णेष्टकादिबद्धपुरुषकृतजलाशये। कुया, पातकुया, इन्दारा। तत्पर्य्यायः,—अम्बुः, प्रहिः, उदपानं (अ.), अवटः, कीट्टारः (ज.), कात्तः कर्त्तः, वजः, काटः, खातः, अवतः, क्रिविः, सूदः, उत्सः, ऋषदात्, कारीतरात्, कुशिषः, केवटः। वा. टी. हेमा. वारिव.। तस्य लक्षणं—"भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः। वद्धोऽबद्धः स कूपः स्यात्तदम्भः कौपमुच्यते॥ जलगुणाः—कौपम्पयो यदि स्वादु त्रिदोषघ्नं हिमं लघु। तत्चारक्तकफवातघ्नं दीपनं पित्तकृत् परम्॥" भा.। लघु पित्तकरं कफघ्नं चारच्च। रा. नि. व. १४। वातकफघ्नं दीपनं लघु पित्तकरं सचारं लवणरसं काले काले शीतलसुखञ्च। राज.। तैलादिरचार्थ-पात्रविशेषे। कूपी।

कूपकच्छपः। पुं। कूपस्थकच्छपे।

कूपजः। पुं। केशे, लोम्नि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कूपजलम्। क्ली। कूपसलिले। कोंयार जल। निर्झरजले। M. Williams.

कूपदर्दुरः
कूपमण्डूकः } पुं। कूपस्थभेके। कोंयर बेङ्।

कूपाङ्गः (ङ्गः)। पुं। रोमाञ्चे। श. र.।

कूपिका। स्त्री। नदीजलगतोपले। मे.।

कूपी। स्त्री। पात्रविशेषे। कपिकच्छाम्। आल-कुशी। वै. निघ.।

कूपोदकम्। क्ली। कूपजले।

कूप्यम्। क्ली। रौप्ये। माणिक्ये।

कूभ(म)म्। क्ली। अल्पसरोवरे। जटा.।

कूरः। पुं। अन्ने, भक्ते। रा. नि. व. २०।

कूर्चम्। क्ली, पुं। केशादिकृतमार्ज्जन्यां। कूँचि। मे.। इन्द्रलुप्तादिरोगेषु प्रयोज्ये यन्त्रविशेषे, यद्वर्त्तमाने वुरुष इति भण्यते। "कूर्चं वर्त्तैकपृष्ठस्थाः सूचयः ताः सुबन्धनाः। संयोज्यं नौलिकाव्यङ्ग-केशशातेषु कुट्टने॥" अजि.। मस्तके। भ्रुवो-र्मध्ये नासिकोपरिभागे। श्मश्रुणि। मे.। "कूर्चाश्च शिरास्नायुस्थिमांससम्भवा ज्ञेयाः।" भा.। तन्नामक-वैकल्यकरस्नायुमर्म्मषट्के। तस्य च स्थानं अङ्गुष्ठा-ङ्गुलिमध्यस्योपरिभागे। हे. च.। चिप्रीपर्य्युभय-पार्श्वे वा। "चिप्रस्योपरिष्टात् उभयतः कूर्चौ नाम। कूर्चौ हस्तपादग्रीवामेढ्रेषु षट्, हस्तयोर्द्वौ ग्रीवामेढ्रयोरेकैकः।" सु. शा. ६ अ.। अश्वस्य पादहस्तयोरग्रतः पश्चाद्भागे। ज. द. २ अ.।

कूर्चकः। पुं। जीवके। जाङ्गलपक्षिविशेषे। अमि. २० अ. भ्रूमध्यादिदेहांशेषु। क्ली। दन्त-धावनकुचिकायाम्। वै. निघ.।

कूर्चपर्णी। स्त्री। सेषशृङ्ग्याम्। मेढ़ाशिङे। वै. निघ.।

कूर्चभाक्। क्ली। भूर्ज्जपत्रे। वै. निघ.।

कूर्चमर्म्म। क्ली। तन्नामकस्नायुसर्म्मषट्के। See कूर्चम्।

कूर्चलः। पुं। प्राणिनां पुनर्दन्तोद्भेदकाले।

कूर्चशिरः। क्ली। अङ्घ्रिस्कन्धे। गुड़मूड़ा। तन्नामकरुजाकरस्नायुमर्म्मचतुष्टये। तस्य च स्थानं गुल्फसन्धेरधोभागे उभयपार्श्वतः। सु. शा. ६ अ.।

कूर्चशीर्षः (र्षकः)। पुं। जीवकौषधौ। र. मा.। ज. द. १२ अ.। नारिकेलवृक्षे। भा.।

कूर्चशेखरः। पुं। नारिकेलवृक्षे। रा. नि. व. १०।

कूर्चिकः (का)। पुं, स्त्री। चीरविकृतौ। क्षीरसा.। अम.। "दध्ना तक्रेण वा सह पाकात् पृथग्भूतघनद्रवभागक्षीरं कूर्चिकेत्युच्यते।" वा. टी. हेमा.। च. सू. ५ अ.। सा द्विविधा—"दध्ना सह च यत् पक्वं चीरं सा दधिकूर्चिका। तक्रेण पक्वं यत् चीरं सा भवेत्तक्रकूर्चिका॥" भरत.। सूचिकायाम्। शूँच्। वै. निघ.। कुण्डले। कूँड़ि। तूलिकायाम्। कूँचि। हे. च.। मे.।

कूर्चिकापिण्डः। पुं। खिलाटे। छाना। र. मा.।

कूर्दनम्। क्ली। शिशुक्रीड़ायाम्। अम.।

कूर्पम्। क्ली। भ्रुवोमध्यभागे। हे. च.।

कूर्परः (रा)। पुं, क्ली। भुजमध्यभागे। कनूई। रा. नि. व. १८। कफोणौ, जानुदेशे। मे.।

कूर्परसर्म्म। क्ली। तत्स्थानस्थिते तन्नामकसर्म्म-द्वये। सु. शा. ६ अ.।

कूर्पासः (कः)। पुं, क्ली। अर्द्धतोलके। चोली। स्त्रीणां कञ्चुलिकायाम्। Bodice. हे. च.।

कूर्म्मः। पुं। उन्मीलननिमीलनकरे शरीरस्थ-वायुविशेषे। श. चि.। कच्छपे। रत्ना.। स्त्री (र्म्मी)। कच्छप्याम्।

कूर्म्मपित्तम्। क्ली। कच्छपपित्ते।

कूर्म्मपृष्ठः। पुं। अम्लानवृक्षे। झाँटी। श. च.। क्ली। कूर्म्मपृष्ठदेशे।

कूर्म्मपृष्ठकम्। क्ली। शरावे। शरा। हिं सकोरा। श. च.।

कूर्म्मपृष्ठकास्थि। क्ली। कच्छपास्थनि। काछि-मेर खोना। एतत्खेदः वातव्याधिहरः।

कूर्म्ममांसम्। क्ली। कच्छपमांसे। See शङ्खः।

कूर्म्मशीर्षकः। पुं। जीवकवृक्षे। रा. नि. व. ५।

कूलम्। क्ली। तीरे, तटे। अम.। जलाशये।

कूलकम्। क्ली, पुं। पटोलपत्रे। "निम्बकूलक-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यूषस्तु।" सि. यो. च्च. चि.। पटोले। भा. पू. १भ. शाकव.। वल्लीकै। उईटिपि। मे.।

कूलहण्डकः। पुं। जलावर्त्ते। त्रि.।

कूला। स्त्री। क्षुद्रदन्तीवृक्षे। वै. निघ.।

कूलालम्। क्ली। एलाकरवीरे। रत्ना.।

कूलिका। स्त्री। ओषधिविशेषे। हाड़योड़ा। सन्मूलनस्थेन कालदष्टोऽपि जीवति। च. द.।

कूलेचरः। पुं। पञ्चविधानूपान्तर्गतपशुवर्गे। स च वर्गः लुलायादिपशुपरः। यथा—"लुलाप-गण्डवाराहचमरोवारण्यादयः। एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यपाम्॥ गुणाः—कूलेचरा सकृत्पित्तहरा हृष्या बलावहाः। मधुराः शीतलाः स्निग्धाः सूक्ष्माः श्लेष्मवर्द्धनाः" इति॥ भा.। "गज-गवयमहिषरुरुचमरऋष्यरोहितवराहखड्गि-गोकर्ण-कालपुच्छकोद्रव्यङ्कुवनगवयप्रभृतयः।" "वातपित्त-हरा हृष्या मधुरा रसपाकयोः। शीतला बल्याः स्निग्धा सूक्ष्माः कफवर्द्धनाः॥" सु. सू. ४६ अ.।

कूवरः। पुं। कुब्जके। मे.।

कूष्माण्डः (कः)। पुं। कुष्माण्डलतायाम्। कुम्ड़ा गाछ। हे. च.।

कूष्माण्डकी। स्त्री। भूमिकुष्माण्डे। कुष्माण्ड लतायाम्। व. निघ.।

कूष्माण्डवटिका। स्त्री। कलायकुष्माण्डाभ्यां कृते वटीविशेषे। कुशड़ाँवड़ि। "कुष्माण्डवटिका ज्ञेया पूर्व्वोक्तवटिकागुणा। विशेषात्पित्तरक्तघ्नी लघ्वी च कथिता बुधैः॥"

कूष्माण्डिका (की)। स्त्री। पीतालाबुम्। वै. निघ.।

कूष्माण्डी। स्त्री। कर्कारौ। "कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता।" हे. च.।

कूहा। स्त्री। कुज्झटिकायाम्। कूआसा। हिं कुहासा। भ. र.।

कृकः। पुं। गले। गला। हे. च.।

कृकणः। पुं। क्रकरपक्षिणि। कयार इति लोके। अम.। क्रमौ। हारा.।

कृकरः (लः)। पुं। चव्यनामक्षुपे। छइ। रा. नि. व. ६। (Perdix Sylvatica.) पक्षि-विशेषे। कर्कटे पाखी। हिं कुवार। सं कर-ढौंक। गुणाः—"लघुश्च कृकरो ज्ञेयः कायाग्नि-वर्द्धनो भृशम्।" अनि.। करवीरवृक्षे। रा. नि. व. १०। (लः) चुक्करे शरीरस्थवायुविशेषे। तत्त्वम्।

कृकरा (रा)। स्त्री। पिप्पल्याम्। रा.नि.व.६।

कृक(कु)लासः (सः)। पुं। सरटे। गिर-गिटे, काँकलास। रत्ना.। गृहगोधायाम्। तत्पर्य्यायः,—सरटः (अ.), वेदारः, क्रकवपात, तृणाङ्गनः, प्रतिसूर्य्यः, (त्रि), प्रतिसूर्य्यकः, दक्षिण्यः, कण्टकागारः दरारीहः, द्रुमाश्रयः (रा), अरुजः (वै)। कृकलासः (वि), कृकलासः, सरट् (अ. टी.), सरटुः (उ.)।

कृकवाकुः। पुं। Gallinaceous fowl. कुक्कुटे। रत्ना.। मयूरे। त्रिका.। सरटे। हारा.। स्त्री। गृहगोधिकायाम्।

कृकषा। स्त्री। कण्डूयनहारिकपक्षिणि।

कृकाटिका। स्त्री। ग्रीवापश्चाद्भागे। घाड़। रा. नि. व. १८। तत्स्थानस्थतन्नामकवैकल्यकार-मर्म्मद्वये। सु. शा. ६अ.।

कृकालिका। स्त्री। पक्षिभेदे।

कृकुवल्या। स्त्री। मर्कटे। वै. निघ.।

कृकूलासः। पुं। कृकलासे। अ. टी.।

कृकरः। पुं। करीरे। रा. नि. व. ८।

कृच्छ्रम्। क्ली। कष्टे। सूक्ष्मकृच्छ्ररोगे। रा. नि. व. २०। सन्तापे। मे.।

कृच्छ्रसाध्यः। वि। कष्टसाध्ये।

कृच्छ्रहरः। पुं। पाषाणभेदे। वै. निघ.।

कृच्छ्रारिः। पुं। विल्वान्तरवृक्षे। रा. नि. व. ८।

कृच्छ्रोन्मीलः। पुं। चक्षुरोगविशेषे। तस्य लक्षणं यथा—"चलन्तु गरलक्लेद प्राप्य वर्त्मान्तयोः शिराः। सुप्तीव्यितस्य कुरुते वर्त्मस्तब्धं सवेदनं। पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मीलनमग्र्यच। विसर्ज्जनात्स्याच्च समः कृच्छ्रोन्मीलं वदन्ति तम्॥" वा.।

कृणञ्जः। पुं। कुणञ्जरे।

कृतम्। क्ली। फले। हे. च.। हिंसिते। मे.।

कृतक(ण्टक)म्। क्ली। रसाञ्जने। रा. नि. व. १३। विड़ङ्गवृक्षे। विट्लवण। रा. नि. व. ६।

कृतकः। वि। कृत्रिमे। चणा.।

कृतच्छाया। स्त्री। श्वेतकोषातक्याम्। रत्ना.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षतच्छिद्रा। स्त्री। कोशातकीलतायाम्। झिञ्झा, घोषालता। रा. नि. व. ३।

क्षतज्ञः। पुं। कुक्कुरे। मे.।

क्षतत्रा। स्त्री। वायमाणायाम्। रा.।

क्षतत्राणा। स्त्री। वायमाणायाम्। गोपालेलता। रा. नि. व. ५।

क्षतपिण्डोत्तः (कः)। पुं। शिलारसे। नि. निघ.।

क्षतफलम्। क्ली। कक्कोलफले। रा. नि. व. १२।

क्षतफला। स्त्री। कोशशिम्ब्याम्। आलाकुशी। रा. नि. व. ७।

क्षतबन्धनम्। क्ली। कोशातकफले। घोषा। भा. म. ४भ. प्रसूता. चि.। "क्षतबन्धनसर्पणः।"

क्षतमालः। पुं। क्षुद्रारग्वधे, कर्णिकारवृक्षे। सोणालू, सोन्दाल। च. सू. ४ अ.। तत्फलं संसनं (अर्थात् कोष्ठस्थं श्लिष्टमलादिकमपक्वमेव अधो नयति)। सङ्घातचारिपक्षिविशेषे। सङ्घातचारिमृगेषु। सु.सू. ४६ अ.।

क्षतयूषः। पुं। प्रमथ्यायाम्। वा. चि. ९ अ.।

क्षतरसः। पुं। स्नेहशुण्ठ्यादियुक्ते क्षते तद्विपरीते च अकृते मांसरसे। तदुक्तं—"छागलं सक्थिनं मांसं निरस्थि तैत्तिरं तथा। चतुष्पलान्वितं सूक्ष्मं कल्पितङ्गालितं जले। पिप्पलीपिप्पलीमूलगृहीचित्रकधान्यकैः। द्विशाणैः संयुते तोये क्वाथ्यं सार्द्धाढकोन्मिते। मांसेऽस्मिन्द्विपलं तत्र दाडिमान् कुटितान् क्षिपेत्। तं रसं मर्दितं पूतं हिङ्गुसैन्धवजीरकैः। युक्तं प्रधूपितस्नेह्यं शुद्धानां शुद्धिकाङ्क्षिणाम्॥" वा. टी.।

क्षतवेधः (कः)। पुं। कोशातक्याम्। श्वेत घोषा। र. मा.।

क्षतवेधनः। पुं। श्वेतपुष्पकोशातके। श्वेत घोषा। आरग्वधवृक्षे। सु. सू. ३९, ४५ अ.। ज्योत्स्निकायाम्। जंताफट्टिकौ। च. सू. २अ.। च. द. गर्भाधि.।

क्षतवेधना। स्त्री। Plant with white flowers, Emitics. राजकोशातकीलतायाम्। झिञ्झा, घोषालता। प. मु.। श्वेतघोषायाम्, कटुघोषायाम्। रत्ना.।

क्षताख्ययूषः। पुं। लवणस्नेहकटुकादिकृतयूषे। अयं गुरुगुणः। वैद्यकम्।

क्षताञ्जलिः। स्त्री। लज्जावतीलतायाम्। धरणि.। "ब्रह्मदण्डीकृताञ्जलिः।" च. द. ज्व. चि.। एतद्बन्धनं एकाह्निकज्वरघ्नम्। "रक्तसूत्रेण संवेष्ट्य बन्धादेकाह्निकं नयेत्।" भै. स्त्रीरोग चि.। रस. र. स्तनरो. चि.।

क्षतान्तः। पुं। यमे। अम.।

क्षतान्ता। स्त्री। रेणुकनामगन्धद्रव्ये। रेणुक। ग. च.।

क्षतान्नम्। क्ली। लड्डुकादौ।

क्षतालयः। पुं। भेके, मण्डूके। त्रिका.।

क्षतिः। स्त्री। करणे। हिंसायाम्। मे.। (का) स्त्री। भूर्ज्जवृक्षे। नकुल. १२अ.।

क्षती (इन्)। त्रि। कुशले।

क्षत्तम्। क्ली। छिन्ने। चेष्टिते। हे. च.।

क्षत्तिः (का)। स्त्री। कृष्णसारादिचर्म्मणि। त्वचि। भूर्ज्जे। क्षत्तिश्चर्म्मत्वचोर्भूर्ज्जे।" मे.।

क्षत्तिकाभवः। पुं। चन्द्रे। ग.।

क्षत्तिवासाः। पुं। शिवे। अम.।

क्षत्या। स्त्री। आभिचारिकदेवतायाम्। सि. यो. उन्मा. चि.। "क्षत्यालक्ष्मीज्वरापहम्।" क्रियायाम्। मे.।

क्षत्योन्मादः। पुं। क्षत्याजातभूतोन्मादरोगे। शार्ङ्ग.।

क्षत्रिम(क)म्। क्ली। विड्लवणे। रा. नि. व. १२३। रसाञ्जने, क्षत्रिमरसाञ्जने। रत्ना.। चीनकर्पूरे। गन्धराजे। कस्तूरिकायाम्। रा. नि. व. १२। पुं। सिल्हके। शिलारस। मे.। पीतचन्दने। वै. निघ.।

क्षत्रिमधूपकः। पुं। षोडशाङ्गधूपे। अम.। तत्पर्य्यायः—वृकधूपः (अ.)।

क्षत्रिमरत्नम्। क्ली। काचे। वै. निघ.।

क्षत्रिमविषम्। क्ली। विषदोषे। वै. निघ.।

क्षत्स(त्स्न)म्। क्ली। जले। कुचौ। मे.।

क्षदरः। पुं। धान्यादि-रक्षार्थ-माधारविशेषे। गोला। सि. कौ.।

क्षन्तव्यम्। क्ली। लाङ्गले। सि. कौ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृन्तनम्। क्ली। छेदने।

कृन्तनिका। स्त्री। क्षुरिकायाम्।

कृपणः। पुं। क्लमौ। "कृपणस्तु क्लमौ पुंसि।" मे.।

कृपणा। स्त्री। सविषकीटविशेषे। सु. कल्प. ८ अ.।

कृपाणः। पुं। खड्गे। अ.।

कृपाणिका(णी)। स्त्री। कर्त्तर्याम्। कातारि। क्षुरिकायाम्। मे.।

कृपोटम्। क्ली। उदरे। तोये। मे.। वने। काष्ठे। श. र.।

कृपोटपालः। पुं। वायौ। श. र.।

कृपोटयोनिः। पुं। अग्नौ। हे. च.।

कृमिः। पुं। कीटे। केँचो, पोका। अम.। तत्पर्य्यायः,—नीलाङ्गः (अ.), नीलाङ्गुः, क्रिमिः (अ. टी.), पुण्ड्रः (ज.)। पतङ्गभावे। पिपीलिकायाम्। कीटाण्डके लाक्षायाम्। "कृमिर्ना "कृमिवत्कीटे लाक्षायां कृमिले खरे।" मे.। ऊर्णनाभे। हे. च.।

कृमिकम्। क्ली। पूगफले। पुं। क्षुद्रकृमौ।

कृमिकण्टकम्। क्ली। विड्गे। उदुम्बरे। यज्ञडुमुर। मे.। चित्रायाम्। इन्दुरकर्णी। हे.च.।

कृमिकरः। पुं। सविषकीटभेदे।

कृमिकर्णः (कः)। पुं। कीटविशेषे। कानकोटारि। कर्णरोगविशेषे। कानेर कानकोटार। "यदा तु मूर्च्छन्त्यथवापि जन्तवः सृजन्त्यपत्यान्यथवापि मक्षिकाः। तदञ्जनत्वाच्छ्रवणे निरुच्यते, भिषग्भिराद्यैः कृमिकर्णकस्तु सः॥" सु. उ. २० अ.। वा. उ. १७ अ.।

कृमिका। स्त्री। ग्रन्थिपर्ण्याम्। राजिकायाम्। राई वा काल सरिषा। शीधे। वै. निघ.।

कृमिकालानलरसः। पुं। कृमिघ्नौषधे। विड्ग २ प. विषचूर्ण १ प. लौह ४ तो. पारद २ तो. गन्धक २ तो. छागदुग्धे मर्द्दनं। र. सा. सं.।

कृमिकुम्भा। स्त्री। महाकाललतायाम्।

कृमिकोशः (षः)। पुं। फलविशेषे। गोजूफल। तत्पर्य्यायः,—संग्राही, पूगफलः, पक्वफलः, कषायी, व्रणरोधकः। तस्य संग्राहि तिक्तं रक्तरोधनं ज्वरार्शःप्रदरातीसारघ्नं कण्ठरोगघ्नञ्च। वै. चन्द्रिका।

कृमिकोषोत्थम्। क्ली। कौषेये। रेशमी कापड़।

कृमिकोष्ठकः। पुं। व्रणस्य रोगविशेषे। लक्षणं यथा—"क्रमस्य यस्य वाहस्य जन्तुभिः परिवेष्टितम्। पुरीषं जायते भिन्नं तं विद्यात् कृमिकोष्ठकम्॥" जा. द. ४६ अ.।

कृमिगुहा। स्त्री। इन्द्रवारुणीलतायाम्। मद. व. १।

कृमिग्रन्थिः। पुं। नेत्रसन्धिगतरोगे। लक्षणं —"कृमिग्रन्थिर्वर्त्मनः पक्ष्मनाश कण्डूक्लेदौ कृमयः सञ्चिजाताः। नानारूपा वर्त्मगक्लस्य सन्धौ चरन्तोऽन्तर्नयनं दूषयन्ति॥" सु. उ. २अ.।

कृमिघातिनी (गुड़ी)। स्त्री। कृमिघ्ने रसे। पाठः—"रसगन्धाजमोदानां कृमिघ्नब्रह्मबीजयोः। एक-द्वि-त्रि-चतुः-पञ्च तिन्दोर्बीजस्य षट् क्रमात्। सच्चूर्ण्य मधुना सर्व्वं गुडिकाकृमिघातिनीं। खादेत् पिपासासुस्रोयञ्च सुस्नानाद्भमिशान्तये। आखुपर्णीकषायञ्च पिबेच्चानु सशर्करम्॥" पारा १ भ. गन्धक २ भ. वनयमानी ३ भ. विड़ङ्ग ४ भ. पलाशपापड़ा ५ भ. तेँदबीज ६ भ.। र. चि।

कृमिघाती। पुं। विड़ङ्गे। त्रि। कृमिनाशके।

कृमिघ्नः। पुं। पारिभद्रवृक्षे। पालिदे मान्दार। रा. नि. व. ८। कटुनिम्बे। पलाण्डौ। कीलकन्दे। बदरमूले। रा. नि. व. ७। भल्लातकवृक्षे। रा. नि. व. ११। विड़ङ्गे। प. मु.। हरिद्रायाम्। भा.। त्रि। कृमिनाशके।

कृमिघ्नरसः। पुं। कृम्यधिकारे रसः। विड़ङ्ग पलाशबीजं निम्बबीजं रससिन्दूरं, एषां चूर्णं समं। र. सा. सं.।

कृमिघ्ना (घ्नी)। स्त्री। हरिद्रायाम्। लाक्षायाम्। विड़ङ्गायाम्। वै. निघ.। धूमपत्रायाम्। तामाक। रा. नि. व. ५। सोमराज्याम्। श. च.।

कृमिज(ग्ध)म्। क्ली। अगुरुकाष्ठे। अम.। लाक्षायाम्। त्रि। कृमिजाते।

कृमिजलजः। पुं। कृमिभेदे। रा. नि. व. १२।

कृमिजा (जाक्षा)। स्त्री। लाक्षायाम्। लाहा, आल्ता। र. मा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृमिजित् । क्ली । विड्रङ्गे । वै. निघ. वा. व्या. महाराजादौ ।

कृमिदन्तः (कः) । पुं । दन्तरोगविशेषे । लक्षणं —"क्षणाच्छिद्रशतः स्रावी ससंरम्भो महारुजः । अभिमित्तरुजो वातात् स ज्ञेयः कृमिदन्तकः ॥" सु. नि. १६ अ. । वा. उ. २२ अ. ।

कृमिद्रवः । पुं । लाक्षायाम् । वै. निघ. ।

कृमिनाशनम् । क्ली । विड्रङ्गे । वै. निघ । वि । कृमिहरे ।

कृमिनाशिनी । स्त्री । अजमोदायाम् । वै. निघ. ।

कृमिपाना (मा) । स्त्री । लाक्षायां । वै. निघ. ।

कृमिफलः । पुं । उदुम्बरवृक्षे । मद. व. ५ ।

कृमिमक्षिका । स्त्री । कृमितुल्यमक्षिकायाम् । वै. निघ. ।

कृमिमुद्गरः । पुं । कृमिघ्ने रसे । "क्रमेण वङ्गं रसगन्धकाजमोदाविड्रङ्गं विषमुष्टिका च । पलाशबीजञ्च विचूर्णमस्य निष्कप्रमाणं मधुनावलीढम् ॥" पारा १ भ. गन्धक २ भ. वनयमानी ३ भ. विड्रङ्ग ४ भ. कुचिला वा निम्ब ५ भ. पलाशबीज ७ भ. । मात्रा ४ माषा । भैष. ।

कृमिरिपुः । पुं । विड्रङ्गे । श. र. ।

कृमिरोगः । पुं । उदरजकृमिजन्यरोगे । कृमिरोग । कृमिर्द्विविधः बहिरभ्यन्तरभेदेन । जन्मभेदेन चतुर्धा । नामतो विंशतिः । सा. नि. । एकविंशतिः । शार्ङ्ग. । तदुत्पत्तिकारणं जीर्णभोजनादि । "बाह्यास्तथाभ्यन्तराः स्युस्तेषु यूका बहिश्चराः । लिक्षाद्याश्चान्तरचराः कफात्ते हृदयादकाः । अन्त्रादा उदरावेष्टाश्चुरवश्च महान्त्रदाः । सुगन्धा दर्भकुसुमास्तथा रक्ताश्च मातरः । सौरसा लोमविध्वंसा लोमद्वीपा उदुम्बराः । केशादाश्च तथैवान्ये शङ्खनाता मकेरुकाः । लेलिहाश्च सशूलाश्च सौसुरादाः ककेरुकाः । तथान्यः कफरक्ताभ्यां सञ्जातः सायुकः स्मृतः ॥" शार्ङ्ग. पू. ७ अ. ।

कृमिलकः । वि । कृमिविशिष्टे ।

कृमिला । स्त्री । अनेकप्रस्राम्, बहुसन्तानप्रसवायाम् । हे. च. । वि । कृमियुक्ते ।

कृमिवारिरुहः । पुं । कृमिशङ्खे । रा. नि. व. १३ ।

कृमिविनाशरसः । पुं । कृम्यधिकारे रसः । पारद-गन्धक-अभ्र-लौह-मनःशिला-धातकी-त्रिफला-लोध्र-विड्ङ्ग-हरिद्रा-दारुहरिद्राः, एषां प्रति समभागः आर्द्रकरसेन ७धा भाव्यः । र. सा. सं ।

कृमिवृक्षः । पुं । कीटाख्ये । जलपाई । भा. ।

कृमिशङ्खः । पुं,क्ली । Fish of the conch. जीवशङ्खे । कृमिशङ्खं । अयं रसवीर्य्याद्यैः शङ्खसदृशः । रा. नि. व १३ ।

कृमिशत्रुः । पुं । विड्रङ्गे । प. मु. । वै. निघ. २ भ. ज्व. चि. । पारिजातवृक्षे । पाल्‌दे गान्दार ।

कृमिशात्रवः । पुं । विट्खदिरे ।

कृमिशुक्तिः (क्तिः) । स्त्री । जलशुक्तौ । झिणुक । रा. नि. व. १३ । मत्स्यभेदे । वै. निघ. ।

कृमिशैलः (कः) । पुं । वल्मीके । श. र. ।

कृमिसरारी । पुं । अग्निग्रन्थिकीटे । तेन दष्टे पित्तजन्यरोगा जायन्ते । सु. कल्प. ८अ. ।

कृमिहल्ली (ल्ला) । स्त्री । विड्रङ्गायाम् । वै. निघ. ।

कृमिहरम् । क्ली । विड्रङ्गे । भा. म. १भ. तन्त्रिज्व. चि. । विड्लवणे । मरिचे । वै. निघ. । वि । कृमिघ्ने ।

कृमिहररसः । पुं । कृम्यधिकारे । अथ देवदाली हस्तिघोषाफलम् । पारद-गन्धक-इन्द्रयव-यमानी-मनःशिला-पलाशबीजानि प्र. समभागः, हस्तिघोषाफलरसेन दिनं सम्मर्द्द्य वटी कार्य्या । अनुपानं शालपर्णीरसः । र. सा. सं. ।

कृमिहा [न्] । पुं । विड्रङ्गे । रा. ।

कृमी (इन्) । वि । कृमिविशिष्टे ।

कृमीलकः । पुं । वनमुद्गे । भूगानी । रा. नि. व. १६ । See मकुष्ठकः ।

कृशः । वि । दुर्ब्बले । सूक्ष्मे । अम. ।

कृशनम् । क्ली । स्वर्णे । के. ।

कृशरः । पुं । कृसरे, तिलतण्डुलमाषकृते मण्डविशेषे । रत्ना. यवाग्वादिव. । तिलमिश्रौदने, तुल्यतिलान्ने । हे. च. ।

कृश(स)रा । स्त्री । तिलौदने । हारा. । खेचरान्ने । खिचुड़ि, खरसा । "तिलतण्डुलमाषैश्च कृसरा विसरेति ।" प. प्र. ३ ख. । तल्लक्षणं—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"तण्डुला दालिसंमिश्रा लवणार्द्रकहिङ्गुभिः । संयुक्ताः सलिलैः सिद्धाः कृशराः कथिता बुधैः ॥" भा. । गुणाः—"कृशरा गुरुका बल्या गुरुः पित्तकफप्रदा दुर्जरा वृष्टिविष्मलमूत्रकरी स्मृता ॥" वै. निघ. । यवागूपाकविधिना पाकः कार्य्यः ।

कृशरोमा । स्त्री । शुकशिम्बाम् । वै. निघ. ।

कृशला । स्त्री । शिरःकेशे । भ्र. च. ।

कृशशाकः(कः) । पुं । पर्पटके । क्षेत्रपापड़ा । रा. नि. व. ५ ।

कृशाकुः । पुं । उष्णकरणे । वै. निघ. ।

कृशाङ्गः । पुं । लूतायाम् ।

कृशाङ्गी । स्त्री । प्रियङ्गुलतायाम् । भ्र. च. ।

कृशाणुः (नुः) । पुं । चिचकच्छुपे । रा. नि. व. ६ ।

कृशाश्वः । पुं । ऊर्णनाभौ । वै. निघ. ।

कृशि(शि)का । स्त्री । आखुकर्णीलतायाम् । इन्दुरकाणी । रा. नि. व. ३ ।

कृशोबल्वः । पुं । काकजङ्घायुक्षे । केउआठेंडा । र. मा. ।

कृशोदरी । स्त्री । श्वेतसारिवायाम् । भा. पू. १ भ. । See अनन्ता ।

कृषः । पुं । अरण्ये । हे. च. ।

कृषकः । पुं । फालकर्षके । त्रिका. । हले । भ्र. च. ।

कृषिदिष्टः । पुं । गृहनिर्म्माणपटु पक्षिविशेषे । बाबुई । रा. ।

कृषिलौहम् । क्ली । सुरुलौहे । रा. नि. व. १३ ।

कृषीवलः । पुं । काकजङ्घावृक्षे ।

कृष्टपच्यः । त्रि । व्रीहिधान्ये ।

कृष्टपाक्यम् । क्ली । व्रीहिधान्ये ।

कृष्णम् । क्ली । सौवीराञ्जने । रा. नि. व. १३ । मरिचे । प. सु. । यवनाले । काल जनीर । सौतोऽञ्जने । जलाञ्जन । र. मा. । लौहे । जटा. । नीलाञ्जने । रा. नि. व. २३ । कृष्णागुरुणि । रा. नि. व. ६ । भा. । अगुरुणि । रत्ना. । लौहकिट्टे । विड्ङ्गलवणे । शीसके । सौवर्चललवणे । तुत्थके । वै. निघ. । नेवतारके । पुं । राजसर्षपे । काल सरिषा । रा. नि. व. १६ । कृष्णसारमृगे । रत्ना. । वायसे । मे. । मन्दविषवृश्चिके । मण्डूकाख्यकीटभेदे । सु. कल्प. ८ अ. । कोकिले । विश्व. । करञ्जवृक्षे । भ. र. । "कृष्णे प्रवरवासस्त्वं हरिमत्यज शिबिका." हे. च. ।

कृष्णकः । पुं । कृष्णसुन्दे । कृष्णतण्डुलायाम् । वै. निघ. ।

कृष्णकञ्चुकः । पुं । कृष्णचणके । वै. निघ. ।

कृष्णकदली । स्त्री । महाराष्ट्रप्रसिद्धे कदलीविशेषे । गुणाः—"कृष्णा तु कदली रूक्षा तुवरा मधुरा खलु । वायोर्धातोर्द्विकरी मेहपित्तत्वषाहरा ॥" वै. निघ. ।

कृष्णकन्दम् । क्ली । रक्तोत्पले । रक्तकमले । त्रिका. ।

कृष्णकरवीरः । पुं । कृष्णपुष्पकरवीरवृक्षे । काल करवीर गाछ । गुणैः करवीरतुल्यः । रा. नि. व. १० ।

कृष्णकर्कटकः । पुं । कृष्णवर्णकर्कटविशेषे । काल काँकड़ा । गुणाः—"कृष्णकर्कटकस्तेषां बल्यः क्षीणोऽनिलापहः । शुक्रः सन्धानकृत् स्रष्टविष्मूत्रोऽनिलपित्तहः ॥" सु. सू. ४६ अ. ।

कृष्णकर्म्म । क्ली । शुक्लस्य व्रणशरीरपरणस्थानस्य कृष्णीकरणे । सु. चि. १अ. ।

कृष्णक(कै)लिः । पुं । (Mirabilis Jalapa.) स्वनामख्यातपुष्पवृक्षे । कृष्णकलि, सन्ध्यामणि । गुलालफुल इति गौड़ीयाः । तस्याः शाखा रक्ततण्डुलीयलालवत् ग्रन्थियुक्ता च । पत्रं ताम्बूलवत् परं क्षुद्रं भवति, तत्पुष्पं श्वेतरक्तपाटलपीताभं युक्तपञ्चदलं षट्केसरमध्यमौषद्गन्धं सायाह्ने विकसति प्रायेण सुलभं । बीजञ्च तस्य कृष्णं मरिचाभञ्च । वै. निघ. ।

कृष्णका । स्त्री । राजिकायाम् । राईसरिषा । प. सु. ।

कृष्णकाकः । पुं । द्रोणकाके । हला. ।

कृष्णकातरा । स्त्री । रक्तगुञ्जायाम् । वै. निघ. ।

कृष्णकापो(तिः)ती । स्त्री । महौषधिविशेषे । "सच्चारां रोमशां ह्रस्वां रसेनेक्षुरसोपमां । एवं कृष्णरसाञ्चापि कृष्णकापोतिमादिशेत् ॥" सु. चि. ३० अ. । See ओषधिः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णकायः। पुं। महिषे। वै. निघ.।

कृष्णकाष्ठ(क)म्। क्ली। कृष्णागुरुणि। रा. नि. व. १२।

कृष्णकुटजः। पुं। कृष्णपुष्पकुटजवृक्षे। दे निघ. अतिसा. चि. कुटजपुटपाके।

कृष्णकुठेरकः। पुं। कृष्णतुलस्याम्। के.।

कृष्णकुलत्थः (कः)। पुं। कुलत्थभेदे। काल कूर्तिकलाय। गुणाः—"कृष्णकुलत्थको ग्राही रक्तपित्तकरो मतः। रसे च तुवरः पाके कटुः कफहरो मतः। वातशुक्राश्मरीगुल्मपीनसश्वासकासजित्। आनाहगुदकीलार्शोमेदधातुविनाशकः॥" वै. निघ.।

कृष्णकुलत्थिका। स्त्री। वनकुलत्थके। वै. निघ.।

कृष्णकुसुमः। पुं। कृष्णकरवीरे। रा. नि. व. १०।

कृष्णकेलिः। स्त्री। कैलिकदम्बे इति प्रसिद्धे पुष्पवृक्षे। के.।

कृष्णगन्धः (न्धा)। पुं, स्त्री। शोभाञ्जनवृक्षे। सजिना गाछ। र. मा.। मद. ६ च. सू. १, ३अ.। वा. चि. ५ अ.।

कृष्णगर्भः। पुं। कट्फलवृक्षे। रा. नि. व. ९।

कृष्णगलः। पुं। कुक्कुभपक्षिणि। कूकों पाखी। वै. निघ.।

कृष्णगोकर्णी। स्त्री। Black kind of Murvá. (Sansevieria Zeylanica) कृष्णकुसुममूर्व्वालतायाम्। काल मुर्गा। हिं काला-सुरहरा। मं सुपली। गुणाः—"कृष्णा गोकर्णिका तिक्ता रसे स्निग्धा विदोषहा। शीतवीर्य्या वातपित्तज्वरदाहश्रमापहा। पिशाचबाधारक्तातिसारोन्मादमदापहा। अतिकासश्वासकफकुष्ठजन्यव्रणापहा। अन्ये गुणास्तु सुश्वेतगोकर्णीसदृशा मताः॥" वै. निघ.।

कृष्णगोधा। स्त्री। सविषसौम्यकीटभेदे। तद्दष्टस्य श्लेष्मजन्यरोगा जायन्ते। सु. कल्प. ८अ.।

कृष्णचणकः। पुं। कृष्णवर्णचणकवृक्षे। काल छोला। मं करियाचणा। कं करियकड़ले। गुणाः—मधुरः कासपित्तघ्नः पित्तातिसारकासघ्नः बल्यः रसायनश्च। रा. नि. व. १६।

कृष्णचञ्चुकः। पुं। चणकवृक्षे। छोला गाछ। रा. नि. व. १६।

कृष्णचटकः। पुं। श्यामाकपक्षिणि। शामा पाखी।

कृष्णचन्दनम्। क्ली। पीतचन्दने। हरिचन्दने। काल चन्दन। प. मु.।

कृष्णचूड़ा। स्त्री। The plant Caesalpinia Pulcherrima. स्वनामप्रसिद्धपुष्पवृक्षे। कृष्णचूड़ गाछ। गुलतुरा इति यवनाः। तत्पुष्पं पीतरक्तवर्णं दीर्घवृन्तं दशदलसौषत्सुगन्धं वर्षास्वेव प्रचुरं भवति। काञ्चनशिम्बीतुल्यमिति। कल्पद्रुमः। रक्तगुञ्जायाम्। रा. नि. व. ३।

कृष्णचूड़िका। स्त्री। गुञ्जालतायाम्। रा. नि. व. ३।

कृष्णचूरकः। पुं। चणकवृक्षे। छोला गाछ। प. मु.।

कृष्णचूर्णम्। क्ली। लौहमले। गण्डूर। रा. नि. व. १३।

कृष्णजग्धम्। क्ली। कृष्णागुरुणि। वै. निघ.।

कृष्णजटा। स्त्री। सुगन्धजटामांस्याम्। जटामांसी। रत्ना.। वा. अञ्जनादिव.।

कृष्णजयन्ती। स्त्री। कृष्णवर्णजयन्तीवृक्षे। काल जयन्ती। सा रसायना। रा. नि. व. ४।

कृष्णजिह्वः। पुं। अश्वभाण्डे। ज. द. ३अ.।

कृष्णजीरः (कः)। पुं। (Nigella sativa or Indica.) स्वनामप्रसिद्धे जीरकवृक्षे। काल जीरे। हिं मङ्गरइल। मं कालेजीरें। ते नल्लजीरे। तत्पर्य्यायः,—सुषवी, कारवी, पृथ्वी, पृथुः, काला, उपकुञ्चिका (अ.), कुञ्चिका (ज.), पतिम्बरा (ग.), सुशवी, कुञ्चिका (अ. टी.), उपकुञ्चिः (र.), सुसवी, पृथुका, पृथिवी, मेषजं (शब्दर.), कृष्णा, जरणा, शाली, बहुगन्धा। तद्विविधं स्थूलसूक्ष्मभेदेन। गुणाः—"कृष्णजीरञ्च चक्षुष्यं रुच्यञ्चोष्णं सुगन्धिकं। ग्राहकं कटुकं रुच्यं दीपकं जीर्णजूर्त्तिनुत्। कफं शीर्षं शिरोरोगङ्कुष्ठञ्चैव विनाशयेत्॥" वै. निघ.। "जरणा कटुकृष्णा च कफशीर्षनिकृन्तनी। रुच्या जीर्णज्वरघ्नी च चक्षुष्या ग्राहिणी परा॥" रा. नि. व. ६। तैलं मूलक-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैलवत्। जीरकभेदे। हिं साहाजीरा, कलौंजी। भा. म. ४भ. नासारो. चि.।

कृष्णतण्डुला। स्त्री। विड्गायाम्। वै. निघ.। कृष्णस्फोटालतायाम्। रा. नि. व. ३। पिप्पल्याम्।

कृष्णताम्बूलवल्ली। स्त्री। कृष्णनालनागवल्ल्यां। काल पान। गुणः—"तिक्तोष्णा कटुका मता। कषाया च मलस्तम्भकारिणी दाहकारिणी। मुखनाशकरी प्रोक्ता"... ॥ वै. निघ.।

कृष्णताम्रम्। क्ली। गोशीर्षचन्दने। ध. मा.।

कृष्णतारः। पुं। हरिणे। रा. नि. व. १९।

कृष्णतिलः। पुं। Black Sesamum. स्वनामख्यातवृक्षे। कृष्णतिल गाछ। रा. नि. व. १६। See तिलः।

कृष्णतोक्ष्णा। स्त्री। कृष्णजीरके। काल जीरे। वै. निघ.।

कृष्णतुण्डः। पुं। अग्निप्रकृतिकीटे। तेन दष्टस्य पित्तजन्यरोगा जायन्ते। सु. कल्प. ८ अ.।

कृष्णतुलसी। स्त्री। कृष्णपत्रतुलसीवृक्षे। राम तुलसी वा काल तुलसी। गुणाः—कासवातकृमिवमिभूतघ्नी। रा. नि. व. १०।

कृष्णत्रिवृत् (ता)। स्त्री। कृष्णमूलत्रिवृतायां। काल तेउड़ी। हिं श्यामपनिलर, कालानिशोथ। गुणाः—श्वेताया ईषद्हीनगुणा, विशेषतस्तु तीव्रविरेचनी मूर्च्छादाहमततृष्णभ्रान्तिकण्ठोत्क्लेशजननी च। भा. पू. १भ.।

कृष्णत्वक्। पुं। वकुलवृक्षे। वै. निघ.।

कृष्णदन्ता। स्त्री। काश्मरीवृक्षे। गाम्भार गाछ। रा. नि. व. ९।

कृष्णदेहः। पुं। भ्रमरे।

कृष्णधान्यम्। क्ली। कृष्णवर्णषष्टिकधान्ये। काली धान। श्यामाके। वै. निघ.। च. सू. २७ अ.।

कृष्णधुत्तूरकः। पुं। (Datura fastuosa.) कृष्णपुष्पधुस्तूरवृक्षे। काल धुतुरा, कनक धुतुरा। सं कालाधत्तूर। कं करियमदकुणिगे। तत्पर्य्यायः,—सिद्धः, कनकः, सचिवः, शिवः कृष्णपुष्पः, विषारातिः, क्रूरधत्तूरः। अयं गुणैर्धुस्तूरतुल्यः परं गुणाढ्यः।..."कटुरुष्णश्च कान्तिकारी व्रणान्तिनुत्। त्वग्दोषखर्ज्जुकण्डूतिज्वरहारी श्रमप्रदः।" रा. नि. व. १०।

कृष्णपर्णी। स्त्री। कृष्णतुलस्याम्। काल तुलसी। र. मा.।

कृष्णपल्लवा। स्त्री। कृष्णकलस्याम्। काल कलमी। प. मु.।

कृष्णपाकः (पाकफलः)। पुं। करमर्दवृक्षे। करञ्जा गाछ। भ. र.।

कृष्णपिण्डारः (कः)। पुं। पियारा इति प्रसिद्धे फलवृक्षे। रत्ना.।

कृष्णपिण्डोतकः (ण्डीरः)। पुं। कृष्णपिण्डारी। पेयारा गाछ। रत्ना.। कृष्णमदनवृक्षे। काल मयना गाछ। प. मु.।

कृष्णपिपीलिका (लौ)। स्त्री। कृष्णवर्णपिपीलिकायां। काल पिपड़े, डेंयो। रा. नि. व. १९।

कृष्णपुच्छः। पुं। शृङ्गहीने हरिणतुल्यवन्यजन्तुविशेषे कीङ्गणप्रसिद्धे। हिं लीमड़ी। वै. निघ.।

कृष्णपुष्पः। पुं। कृष्णधुस्तूरके। रा. नि. व. १०।

कृष्णपुष्पी। स्त्री। प्रियङ्गुवृक्षे। भ. च.।

कृष्णपूतिफला। स्त्री। सीमराज्याम्। रत्ना.।

कृष्णप्रियः। पुं। कदम्बवृक्षे। वै. निघ.।

कृष्णफलः (फलपाकः)। पुं। करमर्दवृक्षे। करञ्जा। हिं करौन्दा। अ. टी. भ.। द्वि. कोषः।

कृष्णफला। स्त्री। श्वेतशुकशिम्ब्याम्। श्वेत आलाकुशी। भा. पू. १भ. शाकव.। सीमराज्याम्। अम.। प. मु.। क्षुद्रकरञ्जे। वै. निघ.।

कृष्णबर्ब्बरः। पुं। कृष्णबर्ब्बरके। काल बाबुई। रा. नि. व. १०। वैजयन्तीनामतुलसीवृक्षे। वै. निघ.।

कृष्णबालुकम्। क्ली। कङ्कुष्ठे। वै. निघ.।

कृष्णभस्म। क्ली। Black sulphide of mercury. पारदस्य भस्मीकरणेन कृष्णतापादने। धान्याभकं १ प. पारदः १ प. मारकद्रव्यरसैः दिनं मर्दयित्वा, ततो मारकद्रव्यकल्केन वस्त्रखण्डं लिप्त्वा तेन वर्त्तिं कुर्य्यात्। अथ तां वर्त्तिं एरण्डतैलेनाप्लाव्य पुनः पुनः प्रज्वाल्य च यदधः पतति, तद्घृतभाण्डे गृह्णीयात्। तदेव कृष्णभस्मेत्युच्यते। तच्च पुनर्निशामकैः गणैः मर्दयित्वा कन्दु-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काष्ठे यन्त्रे दिनैकं पातयेत्। एतत्प्रणाली र. सा. सं. दृश्या।

कृष्णभूकुष्माण्डः। पुं। कृष्णवर्णभूमिकुष्माण्डे। श. चि.।

कृष्णभूभवा। स्त्री। क्षारवेल्लिकायाम्। वै. निघ.।

कृष्णभूमः (मिः)। पुं, स्त्री। कृष्णवर्णभूमियुक्ते देशे। हे. च.। रा. नि. व. २।

कृष्णभूमिजा। स्त्री। गोमूत्रिकातरौ। रा. नि. व. ८।

कृष्णभूषणम्। क्ली। मरिचे। वै. निघ.।

कृष्णभेदा (दी)। स्त्री। कटुकायाम्। रा. नि. व. ६।

कृष्णमणिः। पुं। राजावर्त्तमणौ। वै. निघ.।

कृष्णमत्स्यः। पुं। कण्टकयुक्तमत्स्यभेदे। सु. सू. ४६ अ.।

कृष्णमदनः। पुं। कृष्णवर्णमदनवृक्षे। काल मयना गाछ। गुणाः—"कृष्णः श्वेतस्तु मदनः शीतलो मधुरः स्मृतः। कटुस्तिक्तश्च तुवरः वान्तिकृत् कफनाशनः। पक्वामाशयशुद्धेश्च कारकः पित्तनाशकः॥" वै. निघ.।

कृष्णमधुरज्वरः। पुं। मधुरज्वरभेदे। वै. निघ.।

कृष्णमल्लिका (ल्ली)। स्त्री। कृष्णार्ज्जकवृक्षे। कृष्णपत्र क्षुद्र तुलसी। रा. नि. व. १०। See अर्ज्जक। पर्णासे। काल बाबुई। भा. पू. १भ.। See वर्बरी। वनवर्ब्बर्य्याम्। काल तुलसी। वै. निघ.।

कृष्णमक्षिका। स्त्री। मक्षिकाविशेषे। काल माछि। वै. निघ.।

कृष्णमालुकः। पुं। कृष्णार्ज्जके। कृष्णपत्र क्षुद्र तुलसी। रा. नि. व. १०।

कृष्णमाषः। पुं। कृष्णकलाये। कालकलाय। गुणाः—"कृष्णमाषो बलकरो रुच्यो दोषत्रयापहः।" वै. निघ.।

कृष्णमुखः। पुं। वानरे। मुखपोड़ा। रा. नि. व. १९।

कृष्णमुखा। स्त्री। कृष्णशारिवायां। वै. निघ.।

कृष्णमुखी। स्त्री। अलगर्दशलीकायाम्। सु. सू. १३ अ.।

कृष्णमुद्गः। पुं। (Phaseolus max.) खनामख्यातशिम्बीधान्ये, मुद्गविशेषे। वसन्तज काल मूग। सं करियामुंग। कं करियहेसरू। तत्पर्य्यायः,—वासन्तः, माधवः, सुराष्ट्रजः। गुणाः—विदोषघ्नः मधुरः वातघ्नः लघुः दीपनः पथ्यः बलवीर्य्याङ्गपुष्टिदश्च। रा. नि. व. १६।

कृष्णमुष्कः। पुं। कृष्णघण्टापाटलिकायाम्। काल घण्टापारुल। गुणाः—"कटुश्चाम्लो रुचिकृत्याचकः स्मृतः। यकृच्छ्लीहोदरहरो गुणाश्चान्ये च श्वेतवत्॥" वै. निघ.।

कृष्णमूला (लो)। स्त्री। कृष्णमूलशारिवाविशेषे। रा. नि. व. १२।

कृष्णमूषिकः। पुं। मूषिकभेदे। "क्षणेनाशुक् क्षुर्द्दयति दुर्दिनेषु विशेषतः। शिरोषफलकुष्ठन्तु प्रिवेत्किंशुकभस्मना॥" सु. कल्प. ६अ.।

कृष्णमृगः। पुं। कृष्णहरिणे। कालसार हरिण। वै. निघ.।

कृष्णमृत् (त्तिका) (त्स्ना)। स्त्री। कृष्णवर्ण सुरभिमृत्तिकायाम्। सुगन्ध काल माटी। हिं करियामाटी। सं कालोनातौ। गुणाः—"कृष्णमृत्स्ना रक्तदोषप्रदरत्वतदाहहृत्। सूचक्रच्छ्रकफपित्तं नाशयेदिति कीर्त्तितम्॥" वै. निघ.। "कृष्णमृत्त्वतदाहास्रप्रदरश्लेष्मपित्तनुत्।" रा. नि. व. २। च. चि. १अ.। वा. चि. ९ अ.। कृष्णभूमौ। वै. निघ.।

कृष्णमृत्तिकः। पुं। कृष्णभूमौ। हे. च.।

कृष्णमेहः। पुं। तन्नामकप्रमेहरोगे। "कालमेही मसीनिभम्।" भा.। मा. नि.।

कृष्णरङ्गम्। क्ली। शीसधातौ। वै. निघ.।

कृष्णरम्भा। स्त्री। रम्भाविशेषे। काल कला। वै. निघ.।

कृष्णरसः। पुं। पारदस्य कृष्णीकरणे। तत्प्रकरणं—"लौहपात्रेऽथवा ताम्रे पलैकं शुद्धगन्धक। मृदग्निना द्रुते तस्मिन् शुद्धसूतं पलत्रयं। चिम्बा च चालयेत्किञ्चिल्लौहदर्व्या पुनः पुनः। गोमये कदलीपत्रं तस्योपरि च ढालयेत्। इत्येवङ्कन्यवर्ज्यन्तु सर्व्वरोगेषु योजयेत्॥" अचि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णराजः। पुं। कृष्णशिग्रुवृक्षे। काल सजना गाछ।

कृष्णराजिका। स्त्री। कृष्णसर्षपे। काल सरिषा। वै. निघ.।

कृष्णरुहा। स्त्री। जतुकालतायाम्। रा. नि. व. ३।

कृष्णलः (कः)। पुं। रक्तिकायाम्। इति। घुंघुंटी, चिरमटी इति च पाश्चात्ये। गुञ्जायाम्। कूँच। कृष्णगुञ्जायाम्। वै. निघ.।

कृष्णलवणम्। क्ली। Muriate of soda with a proportion of sulphur and iron. काचलवणे। सौवर्च्चलवणे। सचल लवण। रा. नि. व. ६।

कृष्णला। स्त्री। श्वेतगुञ्जालतायाम्। भा. पू. १भ.। गुञ्जालतायाम्। रा.नि.व.३। भूजाढ्यायाम्। टोंडोर कलाय। प. मु.। कृष्णगुञ्जायाम्। वै. निघ.।

कृष्णलो(लौ)हम्। क्ली। कान्तलौहे। रा. नि. व. १३। तीक्ष्णलौहे। सु. सू. ३८ अ.।

कृष्णवक्त्रः। पुं। श्याममुखे वानरे। हला.।

कृष्णवनालुकम्। क्ली। वनजकृष्णालुकविशेषे। बूनो काल आलू। गुणाः—"कृष्णं वनालुकं रूक्षं महाग्निदीपकरं परं। सुखजाड्यहरम्प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः॥" वै. निघ.।

कृष्णवर्णः। पुं। वाराहमदनवृक्षे। काल मयना गाछ। रा. नि. व. ८। कस्तूरिकायाम्। सुस्तायाम्। रौठाकरञ्जे। कालशाके। सत्यभेदे। क्ली। जले। लवङ्गे। कृष्णागुरुणि। वै. निघ.। स्त्री (र्णा)। असाध्यसविषलूताविशेषे। सु. कल्प. ८ अ.।

कृष्णवर्त्मा। पुं। अग्नौ। चित्रकवृक्षे। चित्ते गाछ। अम.। भल्लातकवृक्षे। वै. निघ.।

कृष्णवर्व्वरकः। पुं। वर्व्वरवृक्षे। रा। काल बाबुई तुलसी।

कृष्णवल्मीकः। पुं, क्ली। कृष्णवर्णवल्मीके। सु. कल्प. ८ अ.।

कृष्णवल्लिका। स्त्री। जतुकालतायाम्। रा. नि. व. ३।

कृष्णवल्ली। स्त्री। (Ocymum pilosum.) कृष्णतुलस्याम्। काल बाबुई। प. मु.। कृष्णसारिवायाम्। रा. नि. व. १२।

कृष्णवानरः। पुं। गोलाङ्गूले वानरे। मुथपोड़ा बानर। रा. नि. व. १९।

कृष्णवार्त्ताकुः। पुं। कृष्णवर्णवार्त्ताकौ। काल बेगुन। रस. र. ज्वरादि. ग्रह. कबाटरसे।

कृष्णवीजः। पुं। रक्तशिग्रौ। लाल सजना गाछ। जटा.। क्ली। कालिङ्गे। तरमूज। रा. नि. व. ७।

कृष्णवृन्ता (न्तिका)। स्त्री। पाटलावृक्षे। गाम्भारीवृक्षे। रा. नि. व. २३। माषपर्णीलतायाम्। प. मु.। कुबेराक्षीवृक्षे। पेटारि गाछ। र. मा.।

कृष्णवेत्रः। पुं। केलिलता इति प्रसिद्धलतायाम्। भैष. महाभल्लातकगुड़े। "कृष्णवेतसत्वक्फलम्।" रस. र. वज्रकल्पे।

कृष्णवोलः। पुं। कृष्णच्छविवोलभेदे। भूशक्कर, काल गन्धबोल। गुणाः—"कृष्णवोलः कटुः शीतः भेदकी रसशोधनः। शूलाध्मानकफान्वातकृमिगुल्मौ च नाशयेत्॥" वै. निघ.।

कृष्णव्रीहिः। पुं। कृष्णवर्णतुषतण्डुले व्रीहिधान्यविशेषे। काल धान, आउशकेले। स च सर्व्वव्रीहिभ्येष्ठ इति। सु.। "कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः" इति। भा. पू. १भ.।

कृष्णशठः। पुं। दुर्लभकाश्मे। अ. द.।

कृष्णशणः। पुं। कृष्णपुष्पशणवृक्षे। काल शण। भैष. क्षुद्र. रो. चि. महानीलतैले। च. चि. २७अ.।

कृष्णसारः। पुं। Black antilope. स्वनामप्रसिद्धे मृगे। कालसार हरिण। अ. टी. र.।

कृष्णसारिवा। स्त्री। कृष्णसारिवायाम्। शामा लता। See कृष्णसारिवा।

कृष्णशालिः। पुं। स्वनामख्यातशालिधान्ये, कृष्णधान्य। काल हेमन्त धान। तत्पर्य्यायः,—श्यामशालिः, कालशालिः, सितेतरः। गुणाः—मधुरः बलकृत् पुष्टिवीर्य्यवर्द्धनः वर्णदः कान्तिदः, त्रिदोषघ्नश्च। रा. नि. व. १६।

कृष्णशिंशपा। स्त्री। कालागुर्व्वपरनामशिंशपावृक्षे। काल शिशु गाछ। सं कालासिंसपा। कं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करियइवौडु । गुणाः—तिक्ता कटुकृष्णा कफवातघ्नी दीपनी शोथातिसारघ्नी च । रा.नि.व. ९ । "तिक्ता कटुः चोष्णाग्निदीपनी । तुवरा कफवातघ्नी शोफातीसार-कुष्ठहा । श्वित्रं मेदःकृमीञ्छ्वित्रं वस्तिरोगमूत्रमेहकं । रक्तदोषञ्च व्रणपीनसगर्भनुत् । अजीर्णनाशिनी प्रोक्ता"— ॥ वै. निघ. । "शिंशपा कृष्णसारा ।" सु. सू. ३८ अ. ।

कृष्णशिखिकम् । क्ली । अगुरुकाष्ठे । वै. निघ. ।

कृष्णशिग्रुः । पुं । शोभाञ्जनवृक्षे । काल सजिना गाछ । रा. नि. व. ७ ।

कृष्णशिग्वा । स्त्री । कुलत्थभेदे । काल कुलथ । वै. निघ. ।

कृष्णशिम्बिका (म्बी) । स्त्री । Dolichos virosus.) कृष्णवर्णायां शिम्बिकायाम् । काल शीम । र. मा. ।

कृष्णशृङ्गः । पुं । महिषे । हे. च. ।

कृष्णशैरीयकः । पुं । कृष्णपुष्पभिण्टीवृक्षे । काल झाँटी । भैष. क्षुद्ररोगचि. महानीलतैले ।

कृष्णश्वेता । स्त्री । पाटलावृक्षे । गाम्भारीवृक्षे । वै. निघ. ।

कृष्णसंज्ञकम् । क्ली । सौवर्चललवणे । वै. निघ. ।

कृष्णसखः । पुं । अर्ज्जुनवृक्षे ।

कृष्णसखी । स्त्री । जीरके । भ. च. ।

कृष्णसर्ज्जनः । पुं । अश्वकर्णशालवृक्षे । वै. निघ. ।

कृष्णसर्पः । पुं । दर्व्वीकरसर्पविशेषे । कऊटे साप । सु. कल्प. ४अ. । See सर्पः ।

कृष्णसर्पा । स्त्री । कृष्णकापोतिकायाम् ।

कृष्णसर्षपः (पा) । पुं, स्त्री । राजसर्षपे, राजिकायाम् । काल सरिषा । गुणाः—"कृष्णा तु राजिका चातितीक्ष्णा ज्ञेया बधैः सदा । गुणैस्त्वन्य राजिकावत् ।" वै. निघ. । रा. नि. व. १६ । See राजिका ।

कृष्णसारः । पुं । हरिणविशेषे । कालसार हरिण । तत्पर्य्यायः,—कृष्णसारः (अ. टी.), कृष्णसारङ्गः (के.) । रत्ना. । क्षुद्रौवृक्षे । शिंशपावृक्षे । मे. । खदिरवृक्षे । भ. र. । वृक्षविशेषे । आवलूष । वै. निघ. ।

कृष्णसारका । स्त्री । कृष्णशिंशपावृक्षे । हारा. ।

कृष्णसारङ्गः । पुं । कृष्णसारमृगे । के. ।

कृष्णसारथिः । पुं । अर्ज्जुनवृक्षे । रा. नि. व. ९ ।

कृष्णसारमांसम् । क्ली । खनामख्यातमृगमांसे । कालसार हरिणेर मांस । त्रि. यी. रक्तपि. चि. खण्डकाद्ये । गुणाः—रक्तपित्ते हितम् । संग्राहि रुचिकरं बलकरं ज्वरघ्नञ्च । राज. ।

कृष्णसारा । स्त्री । कृष्णशिंशपावृक्षे । काल शिशु गाछ । हिं सीशव । र. मा. ।

कृष्णसारिवा । स्त्री । श्यामालतायाम् । श्यामा लता । हिं कारिआसांवा । मं कालीउपलसरी । उत्. शाँआल । कृष्णहैमवतीपयस्यशुक्लदा चन्दनगन्धा कालवेलि इति लोके सु. चि. ८अ. । ङ. । इन्द्रजम्बूवत्पचा कृष्णसारिवेति । भा. पू. १भ. । गुणाः—"कृष्णा तु सारिवा शीता ह्रस्वा तु मधुराहृता । कफघ्नी चैव सम्प्रोक्ता गुणाश्चान्ये तु पूर्व्ववत् ॥" वै. निघ. । See अनन्ता ।

कृष्णसूक्ष्मफला । स्त्री । शारिवाभेदे । गुणाः—स्वादुः स्निग्धा गुरुः शुक्रजननी अग्निमान्द्यारुचिश्वासकासामविषनाशिनी दीपनवयघ्नी रक्तदोषप्रदरज्वरातीसारघ्नी च । वै. निघ. ।

कृष्णस्कन्धः । पुं । तमालवृक्षे । तमाल गाछ । अ. टी. भ. ।

कृष्णस्रोतः । क्ली । रसाञ्जने । रसा. ।

कृष्णा । स्त्री । कृष्णवेणी कृष्णगङ्गेति खनामप्रसिद्धायां भारतवर्षीयनद्याम् । तज्जलगुणाः—लाघवकरं स्वादु पवित्रं पित्तास्रकोपनञ्च । रा. नि. व. १४ । सविषजलौकाभेदे । सु. सू. १३ अ. । See जलायुका । कृष्णशतपादीभेदे । सु. कल्प. ८अ. । सू. १३ अ. । See शतपदी । मरिचे । च. द. वातरक्त. चि. । "पिबेत् कृष्णां कफाधिके ।" पिप्पल्याम् । प. सु. । "कृष्णा च मधुना सह ।" "आमलक्यभया कृष्णा ।" च. द. कफज्व. चि. आमलक्यादिः । वृहच्चक्रे । नीलीवृक्षे । रा. नि. व. ४ । द्राक्षालतायाम् । रा. नि. व. २३ । नीलपुनर्नवायाम् । रा. नि. व. ५ । गाम्भारीवृक्षे । रा. नि. व. ९ । कृष्णजीरके । कटुकायाम् । इन्द्रयवे । रा. नि. व. ६ । राजसर्षपे । रा. नि. व. १६ । सोमराज्याम् । रा. नि. व. २३ । कृष्ण-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शारिवाविशेषे। रा. नि. व. १२। च. द. यक्ष्मा. चि.। कृष्णतुलसीवृक्षे। रा. नि. व. १०। शिरीषवृक्षे। पटोले। पर्पट्याम्। भा.। शतपत्र्याम्। सेऊती। भा. पू. १भ.। जटामांस्याम्। वै. निघ. अर्शः चि. कृष्णाशिरीषलेपे। कुटजवृक्षे। दूर्व्वायाम्। कृष्णनिर्गुण्ड्याम्। वनकुलत्थे। कस्तूर्य्याम्। कृष्णचटकायां। वै. निघ.। काकोल्याम्। जटा.।

कृष्णाख्या। स्त्री। नीलपुनर्नवावृक्षे। रा. नि. व. ५।

कृष्णागुरु। क्ली। स्वनामख्यातकृष्णवर्णसुगन्धिकाष्ठे। कृष्णागुरु। हिं कालागर। प. मु.। तत्पर्य्यायः,—काकतुण्डः (हे.), अगुरु, अङ्गारम्, विश्वरूपकम्, शौर्षम्, कालागुरु, कैरुं, वसुकम्, कृष्णकाष्ठः, धूपार्हम्, वह्निरम्, मिश्रवर्णम्, गन्धम्। गुणाः—कटूष्णं तिक्तं कषायं लेपे शीतलं पाने पित्तहरं त्रिदोषघ्नं सुखरीगवान्तिवातहरञ्च। रा. नि. व. १२।

कृष्णाङ्गम्। क्ली। जीरकभेदे। हिं कलौञ्जी। वै. निघ.।

कृष्णाजटा। स्त्री। पिप्पलीमूले। वै. निघ. २भ. वा. व्या. पचवध. चि.।

कृष्णाजाजी। स्त्री। कृष्णजीरके। च. द. संग्रणी. चि.।

कृष्णाजिनम्। क्ली। कृष्णसारचर्म्मणि।

कृष्णाञ्जनी। स्त्री। कालाञ्जनीवृक्षे, कृष्णकार्पासे। रा. नि. व. ४। वै. निघ.।

कृष्णाढ्की। स्त्री। कृष्णपुष्पाढ्क्याम्। काल रहर। गुणाः—"कृष्णा तु तुवरी वल्या चाग्निदीपिकरी मता। पित्तदाहप्रशमनी ऋषिभिः परिकीर्त्तिता॥" वै. निघ.।

कृष्णातण्डुलम्। क्ली। पिप्पलीबीजे। शि. यो. छर्द्दि. चि.। "सकृष्णातण्डुलो लेहः।"

कृष्णात्रेयः। पुं। वैद्यकसंहिताप्रणेतरि महर्षौ।

कृष्णादिगणः। पुं। पिप्पल्यादिद्रव्यवर्गे। यथा—"कृष्णा चित्रकषङ्ग्रन्था वासकं विकसा घनं। ग्रन्थिकैले चातिविषा रेणुकञ्च कटुत्रिकम्। यमानी गोलनी ब्राह्मी भूनिम्बं बिल्वचन्दनं। भार्गी श्यामा शिवा धात्री स्थिरा मूर्व्वा सलोरका॥" वा.।

कृष्णाद्यतैलम्। क्ली। नेत्ररोगे हितम्। "कृष्णाविड़ङ्गमधुयष्टिकमिन्द्रजवविश्रौषधैः पयसि सिद्धमिदं छगल्याः। तैलं कृष्णां तिमिरशुक्लशिरोऽक्षिशूलपाकाल्पयान् जयति नस्यविधौ प्रयुक्तम्॥" तिलतैलं १ श. पिप्पल्यादिकल्कः १० पो. वारि ४ श. छागदुग्धं १ श.। च. द.।

कृष्णाद्यमोदकः। पुं। श्लीपदाधिकारे। अव पिप्पलीमूलचूर्णं २ तो. चित्रकमूलचूर्णं ४ तो. दन्तीमूलचूर्णं ८ तो. हरीतकीचूर्णं २० तो. तच्चूर्णसेकव पलद्वयगुड़ेन मोदकः कार्य्यः। मोदको मधुना लेह्यः। पाठः—"कृष्णाचित्रकदन्तीनां कर्षनष्टपलम्पलम्। त्रिंशतिश्च हरीतक्याः गुड़स्य च पलद्वयम्॥" रस. र.। सा. कौ.।

कृष्णाद्यलौहम्। क्ली। शूले लौहम्। पाठः—"कृष्णाभयालौहचूर्णं लिह्येन्मधुसर्पिषा। परिणामद्रवं शूलं सर्व्वं हन्ति त्रिदोषजम्॥" र. चि. ९ अ.। रस. र.।

कृष्णाभा। स्त्री। कालाञ्जन्याम्, कृष्णकार्पासे। रा. नि. व. ४।

कृष्णाभ्रम्। क्ली। नीलाभ्रे। काल अब्र। See अभ्रकम्।

कृष्णामिषम्। क्ली। लौहे। हे. च.।

कृष्णामूलम्। क्ली। पिप्पलीमूले। वै. निघ.।

कृष्णायः। पुं। कान्तलौहे। रा. नि. व. १३।

कृष्णायसम्। कृष्णवर्णलौहे, पिण्डोवचादिव्यतिरिक्तलौहे। काल लोह, इस्पात। रत्ना.। तीक्ष्णलौहे। तीखा लोह। र. मा.। सुश्रुतलौहे। रा. नि. व. १३।

कृष्णार्च्चिः। अग्नौ। चित्रकवृक्षे। वै. निघ.।

कृष्णार्ज्जकः। पुं। कृष्णपत्रक्षुद्रतुलस्यां। काल तुलसी। सं कालाऽाजबला। रा. नि. व. १०। तत्पर्य्यायः,—कालमालः, मालूकः, कृष्णमालूकः, कृष्णमल्लिका, कृष्णवल्ली, गरन्नः, वनबर्ब्बरः, बर्ब्बरी, नातिः। गुणाः—कटुत्वं, उष्णत्वं, कफवातामयनेत्ररोगनाशित्वं रुचिसुखप्रसवकारित्वञ्च। रा.।

कृष्णालुः। पुं। कैन्दुवृक्षे। कृष्णवर्णालुके। वै. निघ.।

कृष्णालुकः। पुं, क्ली। नीलालौ। गुणाः—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कृष्णालुकन्तु मधुरं शीतवीर्य्यं श्रमापहं। पित्तदाहहरञ्चैव ऋषिभिः परिकीर्त्तितम्॥ एतदेव बल्यं रुचिकरं सुखजाड्यहरञ्च।" वै. निघ.। मधुरः शीतः पित्तदाहश्रमापहश्च। रा. नि. व. ७।

कृष्णावासः। पुं। अश्वत्थवृक्षे। हे. च.।

कृष्णिका। स्त्री। राजिकायाम्। राईसरिषा। अम.।

कृष्णी। स्त्री। रात्रौ।

कृष्णीकरणम्। क्ली। श्वेतादेः कृष्णतासम्पादने। सु. चि. १अ.।

कृष्णेन्द्रियम्। क्ली। कदम्बे। वै. निघ.।

कृष्णेक्षुः। पुं। श्यामेक्षौ। काजलि आख्। मं कालाउंस। कं करियकबु। तत्पर्य्यायः,—कान्तारकः (अ.), श्यामलेक्षुः, कोकिलेक्षुः, कोकिलाक्षः। गुणाः—पाके मधुरः स्वादुः रसबहुलः कटुकः विदोषघ्नः बलकरः वीर्य्यप्रदश्च। रा. नि. व. १४। "तद्वत्सुकृष्णो भवते गुणानां वृष्यो भवेत्तर्पणदाहहन्ता, क्षारः स किञ्चिन्मधुरो रसेन शोषापहर्त्ता व्रणशोफकारी।" अवि. १० अ.। तच्छर्करागुणाः—वृष्या वृष्तिजननी बलदा श्रमहरा जीवनी च। च. द. प्रमेहचि.।

कृष्णोदरः। पुं। दर्व्वीकरसर्पे। फणायुक्त सर्प। सु. कल्प. ८अ.। See सर्पः।

कृष्णोदुम्बरः (रिका)। पुं, स्त्री। काकोदुम्बरिकायाम्। काकडुमूर। रा. नि. व. ११।

कृसरः। पुं। तुल्यतिलान्ने। "तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते।" हे. च.।

कृसरा (यवागूः)। स्त्री। यवागूभेदे। यांउ-विशेष। लक्षणगुणाः—"तिलतण्डुलमाषाणामथवा तिलतण्डुलात्। षड्गुणञ्च जलं दत्त्वा साधनीया यवागुका॥ सा जरा दुर्जरा बल्या मदपुष्टिप्रदा मता। कफपित्तमलस्तभ्यशुक्रक्लेदातनाशिनी॥" वै. निघ.।

कृमधूपः। पुं। सिल्हके। शिलारस। जटा.।

केकरः। पुं। निम्नोन्नताक्षिपुरुषे। टेरा, गजा। हिं ऐंचाताना। अम.।

केका। स्त्री। मयूरवाण्याम्। अम.।

केका(क,का)णः। पुं। तद्वे शजातायै। See अश्वः।

केकाबलः। पुं। मयूरे। श. च.।

केकिकः (की)। पुं, स्त्री। मयूरे। रत्ना.।

केकिशिखा। स्त्री। मयूरशिखायाम्। रा. नि. व. ५। भैष. बाल. चि.।

केचुकः। पुं, क्ली। (Colocasia Antiquorum.) तन्नामकवृक्षे। कचू गाछ। शाकविशेषे। कचूर शाक। विका.। केमुके। केँउ।

केचुकाकन्दः। पुं। केचुके। कचू। सु. चि. ९ अ.। "केचुकाकन्दनिर्य्यासम्।"

केलिका। पटावासे। तँबू।

केतकः (की)। पुं, स्त्री। (Pandanus odoratissimus.) स्वनामख्यातसुगन्धपुष्पवृक्षे। केया गाछ। हिं केवड़ा। मं केतकी। तें मोगलिचेट्टु। कं केदगे। तत्पर्य्यायः,—सूचिपुष्पः, हलीनः, जम्बूलः (र.), चामरपुष्पः (मे.), केतकः, सूचिकापुष्पः, जम्बुकः, क्रकचच्छदः (भा.), तीक्ष्णपुष्पा, विफला, धूलिपुष्पिका, मेध्या, कण्टदला, शिवदिष्टा, नृपप्रिया, क्रकचा, दीर्घपत्रा, स्थिरगन्धा, गन्धपुष्पा, इन्दुकलिका, दलपुष्पा, पांशुला। केतकी द्विधा श्वेतस्वर्णभेदेन। गुणाः—मधुरत्वं तिक्तत्वं कफघ्नत्व कटुत्वं लघुत्वञ्च। तत्पुष्पं वर्ण्यं केशदौर्गन्ध्यघ्नं। सुवर्णा—तिक्तोष्णा लघुः नेत्रहिता कटुः मधुरा विषरोगकफघ्नी च। तत्पुष्प सुखकर कामोद्दीपकं हृद्यं किञ्चिदुष्णं कटुतिक्तं सुगन्धं नेत्रहितञ्च। स्वल्पः—अतिशीतलः देहदार्ढ्यकरः कटुः रसायनी वर्ण्यः पित्तकफघ्नश्च। रा. नि. व. १०। फलं केशरञ्च पूर्व्वोक्तगुणम्। "श्वेतस्य कटुकः स्वादुः लघुः तिक्तः कफापहः। उष्णा तिक्तरसा ज्ञेया चक्षुष्या हेमकेतकी॥" भा. पू. १भ.। श्वेतकेतकीफलं किञ्चिदुष्णं स्वादु मेहवातकफघ्नञ्च। वै. निघ.। "केतकी वातला वृष्या तन्द्रा-निद्राकरी मता।" अवि. १६ अ.। जातीपुष्पवृक्षे। चामेलीपुष्प वृक्ष। रा. नि. व. १०।

केतकफलम्। क्ली। कुचेलके। कुँचिला। च. द. अश्मरीचि. कषा. घृते। केतकीफले। तच्च विदोषविषघ्नम्। च. सू. २७ अ.।

केतकाद्यतैलम्। क्ली। वातव्याध्यधिकारे। तैलं ४ श्र. क्वाथार्थं—केतकीमूलं वाट्यालकातिबलानां प्र. ४२ प. २ कर्षं १० मा. पाकार्थं जलं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२८ ग. शी. १६ ग. कार्त्तिकं १६ ग. यथाविधि तैलं पचेत्। तैलमिदमवल्गुजात् तुल्येन क्वाथेन तुषोदकेन साध्यं भवति। च. द. बा. व्या. चि.।

केतनम्। क्ली। चिह्ने। ध्वजे। हे. च.।

केतुः। पुं। अग्निभेदे। र. मा.। रोगे। पीड़ायाम्। उत्पाते। चिह्ने। मे.।

केतुग्रहवल्लभम्। क्ली। वैदूर्य्यरत्ने। भा. पू. १ भ.।

केतुतारा। स्त्री। धूमकेतौ।

केतुभः। पुं। मेघे। शब्दमा.।

केतुरत्नम्। क्ली। वैदूर्य्यमणौ। प. मु.।

केतुवसनः। पुं। पताकायाम्।

केदरः। त्रि। काणे। टेरके। श. र.। पुं। वनस्पतिविशेषे। अम.।

केदारः। पुं। अद्रौ। क्षेत्रविशेषे। चषां क्षेत्रे। मान्यभूमिविशेषे। आलवाले। मे.। केदारशाली। आमन। वै. निघ.।

केदारकः। पुं। केदारजातषष्टिकधान्यजातिभेदे। सु. सू. ४६ अ.। गुणाः—कङ्गुकवत्। See केदारशालिः।

केदारकटुका। स्त्री। कटुक्यां। रा. नि. व. ६।

केदारखण्डम्। पुं। बृहदालवालविशेष। बाँध।

केदारजम्। क्ली। पद्मकाष्ठे। रा. नि. व. १२।

केदारजलम्। क्ली। तद्दृष्टस्रजले। गुणाः—विपाके खादु गुरु दोषदञ्च। तदेव बद्धमूत्रं विशेषेण दोषदं भवेत्। रा. नि. व. १४।

केदारभूमिः। स्त्री। नालचेवे।

केदारशालिः। पुं। केदारक्षेत्रजशालिधान्ये। उन्नतभूमिज शालिधान्य, आमन धान, सेटे धान। गुणाः—मधुरा वृष्या बल्याः पित्तबर्द्धनाः ईषत्कषाया अल्पमला गुरवः कफघ्नाश्च। रा. नि. व. १६। धान्यं—मधुरं शीतलं रुचिकरं स्तन्यवर्द्धनम्। वै. निघ.। "केदारप्रभवा रूक्षा वातपित्तविनाशिनः। रक्तपित्तविकारघ्नाः वातलाः कफकारकाः॥" अचि. १५ अ.।

केना (नी)। स्त्री। पत्रशाकविशेषे। गुणाः—मधुरा शीता रूक्षा स्तन्यवर्द्धनी च। वै. निघ.।

केनारः। पुं। शिरःकपोलसन्धिषु। मे.।

केनिपातः (कः)। पुं। अरिष्टे। शब्दर.।

केन्दुः (कः) (रः)। पुं। (Diospyros Glutinosa.) तिन्दुके। तेँदु, गाव। श. र.। श. च.।

केमुकः (का)। त्रि। केवुककन्दे उत्तरदेशख्याते। केँऊ गाछ। हिं कोवी, केमुआ। तत्पर्य्यायः—पेचुकः, पेचुनी, पेचुः, पेचिका, दलसारिणी, केचुकः। र.। प्र. त्रिकटुकायसोदके। गुणाः—मधुरा वृष्या कटुपाका तिक्ता शीता लघुः पाचिका दीपनी ग्राहिणी हृद्या वातला कफपित्तज्वरघ्नी प्रमेहकुष्ठकासघ्नी रक्तरोगघ्नी पित्तभ्रमं पिपासाञ्च नाशयेत्। वै. निघ.। सूत्रं—"केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु। दीपनं पाचनं हृद्यं कफपित्तज्वरापहं। कुष्ठकासप्रमेहास्रनाशनं वातलङ्कटु॥" भा. पू. १भ. कफपित्तघ्नं रोचनं अग्निदीपनञ्च। राज.। मधुरं रूक्षमच्छं शीतलं भेदकं ग्राहकं रूक्ष्यं गुरुपित्तकफघ्नं वातघ्नञ्च। हे. निघ.।

केम्बुकम्। क्ली। पूगे। भा. म. ३भ. मू. क्ष. चि.।

केयूरम्। क्ली। अलङ्कारविशेषे। तत्पर्य्यायः—अङ्गदम् (अ.)। ताड़, ताग़ा, अनन्त।

केलटम्। क्ली। कुसुम्भबीजे। वै. निघ.।

केलटकः। पुं। केसुककन्दे। वै. निघ.।

केलासः। पुं। स्फटिकमणौ। वै. निघ.।

केलिः। स्त्री। पृथिव्याम्। शब्दर.।

केलिकः (किलः)। पुं। अशोकवृक्षे। वै. निघ.।

केलिकदम्बः। पुं। कदम्बविशेषे। के.। See कदम्बः।

केलिकिणः (कीर्णः)। पुं। उष्ट्रे। वै. निघ.। हे. च.।

केलिपिकः। पुं। कोकिले।

केलिवृक्षः। पुं। केलिकदम्बे। केलिकदम्बम्। श. र.।

केलूट(क)म्। क्ली, पुं। कन्दशाकविशेषे। केमुककन्द। जलोदुम्बरे। वै. निघ.।

केवलद्रव्यम्। क्ली। मरिचे। श. र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवा (विका) । स्त्री । केवार् इति कीङ्कणदेशे ख्याते पुष्पवृक्षविशेषे । तत्पर्य्यायः,—कविका, कैवी, भृङ्गारः नृपवल्लभा, भृङ्गमारी, महागन्धा, राजकन्या, अलिवाहिनी । गुणाः—मधुराशीतला दाहपित्तश्रमघ्नी वातघ्नी कृद्दीपनी च । रा. नि. व. १० ।

केवु(वू)कः (का) । पुं,स्त्री । पत्तूरे । शालिञ्च । सि. यो. क्लमि. चि । केसुके । काँउ, केउताड़ा । च. सू ४अ. क्लमिघ्नगण ।

केश । पुं । क्षौरे । वाल । प. सु. कुन्तले । मे. । बाले । चुल । रा. नि. व. १८ । स तु गर्भस्थ शिशोरष्टाभिर्मासैः जायते । सुश्रुतः ।

केशकारः । पुं । इक्षुविशेषे । हिं कुशियार । गुणाः—गुरुः शीतः रक्तपित्तक्षयघ्नश्च । भा. ।

केशकारी । स्त्री । रोहिष्याम् । वै. निघ. ।

केशकीटः । पुं । Louse. उकुण ।

केशगर्भकः । पुं । कवर्य्याम् । चिका. । श्योनाकवृक्षे । छागे । उत्कुणे ।

केशघ्नम् । क्ली । इन्द्रलुप्तरोगे । टाक पोका । रा. नि, व. २० ।

केशच्छित् । पुं । नापिते । श्र. मा. ।

केशटः । पुं । उकुणे । छागे । मे. । श्योनाकवृक्षे । चिका. ।

केशधारिणी । स्त्री । दुर्गपुष्प्याम् । श्र. । केशपुष्पी ।

केशघृत् । पुं । मस्तके । भूतकेशे । श्र. च. ।

केशनाम । क्ली । क्षौरे । वाल । अम. ।

केशपक्षः । पुं । केशसमूहे । अम. ।

केशपर्णी । स्त्री । अपामार्गवृक्षे, रक्तापामार्गे । भा. पू. १भ. ।

केशपाशः । पुं । केशभारे । अम. ।

केशपाशी । स्त्री । शिरोमध्यस्थशिखायाम् । चूड़ा । अम. ।

केशफला । स्त्री । कोषफलायाम् । के. । राजकोषातकी ।

केशभूः (भृत्) । स्त्री, पुं । मस्तके । रा. नि. व. १८ ।

केशमथनी । स्त्री । शमीवृक्षे । शाँई गाछ । रा. नि. व. ८ ।

केशमार्ज्जक(न)म् । क्ली । कङ्कतिकायाम् । काँकुई, चिरुणी । हला. ।

केशमुष्टिः (कः) । पुं । विषमुष्टिनामपत्रशाकवृक्षे, महानिम्बे । घोड़ानिम् । मं वकानीनिव । रा. नि. व. ४।९ ।

केशयन्त्रम् । क्ली । उपविषादिशोधनार्थे यन्त्रविशेषे । लक्षणं यथा—"धान्यपूरितसुस्थाल्यां सुसुच्छायां सुखीपरि । सुदुग्धेनारिकेलस्य खर्परे विसमर्द्दयेत् । केशी दुग्धे श्रुतौ यस्मात् केशयन्त्रं तथा स्मृतम् ॥" वै. चन्द्रिका ।

केशरः । पुं, क्ली । नागकेशरवृक्षे । मे. । च. सू. ५ अ. । वकुलवृक्षे । सु. सू. २८ अ. एलादि. । पुन्नागवृक्षे । हारा. । किञ्जल्के । भा. पू. १भ । सिंहकेशे । मे. । हिङ्गुवृक्षे । अ. टी. भ. ।

केशरङ्गः । पुं । केशराजे । भृङ्गराजे ।

केशरङ्गिनी । स्त्री । सहदेवीलतायाम् ।

केशरञ्जनः । पुं । भृङ्गराजे । भीमराज । रा. नि. व. ४ । नीलझिण्ट्याम् । वै. निघ. ।

केशरपाकः । पुं । वाजीकरणपाकविशेषे ।

केशरा । स्त्री । नागरसुक्षायाम् । रा. नि. व. ६ ।

केशरागः । पुं । भृङ्गराजवृक्षे । भा. गण्डमा. चि. ।

केशराजः । पुं । स्वनामख्याते शाकविशेषे । केशुरे । हिं भेंगरिया । उत्. कलाकेशदुरा । सा. कौ. । तत्पर्य्यायः,—भृङ्गराजः, भृङ्गः, पत्रङ्गः, मार्कवः, मार्कः (र.), मार्कवः (अ.), नागसारः, पररुः, भृङ्गसोदरः (वि), केशरञ्जनः, केश्यः, कुन्तलवर्द्धनः (वै.), अङ्गारकः, एकरजः, करञ्जकः, भृङ्गरजः, भृङ्गारः (ज), अजागरः, भृङ्गराजः, मर्कटः (शब्दर.) भृङ्गाह्वः, पितृप्रियः । गुणाः—तिक्तोष्णः चक्षुष्यः केशरञ्जनः कफामशोथश्चित्रघ्नः । तत्र नीली रसायनः । रा.नि.व. ४ । आग्नेयः केश्यः चक्षुर्हितः पाण्डुकफघ्नः रसायनश्च । राज. । भृङ्गराजे । भीमराज । र. मा. ।

केश(स)राह्वः । पुं । मातुलुङ्गवृक्षे । जटा. ।

केशराह्वयम् । क्ली । बालके । वाला । सु. चि. ९ अ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केश(स)री (इन्) । पुं । पुन्नागवृक्षे । नागकेशरे । घोटके । मे. । जलचरपक्षिविशेषे । च. सू. २७ अ. । रक्तशिखी । रा. नि. व. ७ । मातुलुङ्गवृक्षे । मद. व. ६ । सिंहे । रत्ना. । वानरभेदे । वै. निघ. ।

केशरुहा । स्त्री । भद्रदन्तीवृक्षे । बड़ हस्तीगाछ । रा. नि. व. ६ । महाबलायाम् । गोरक्षचाकुलिया । महानील्याम् । वै. निघ. ।

केशरूढकः । पुं । कासमर्दवृक्षे । वै. निघ. ।

केशरूपा । स्त्री । वल्लाकनामक्षुपे । पटगाछा । रा. नि. व. ५ ।

केशवः । पुं । सुरपुन्नागवृक्षे । वायसे । "वायसे केशवेऽर्जुने ।" मे. । नागकेसरवृक्षे । प. सु. ।

केशवन्धम् । क्ली । केशविन्यासे । खोंपा ।

केशवप्रिया । स्त्री । गोरोचनायाम् । प. सु. ।

केशवर्द्धिनी । स्त्री । महाबलालतायाम् । रा. नि. व. ४ ।

केशवायुधः । पुं । आम्रवृक्षे । श. मा. ।

केशवालयः (वासः) । पुं । अश्वत्थवृक्षे । चिका. । जटा. ।

केशशौक्ल्यम् । क्ली । पलिते । रा. नि. व. १८ ।

केशसीमन्तकज्वरः । पुं । असाध्यज्वरविशेषे । यस्मिन् ज्वरे केशाः सीमन्तीकृता भवन्ति स ज्वरः । "ज्वरः क्षीणस्य शूनस्य गम्भीरो दीर्घरात्रिकः । असाध्यो बलवान् यत्र केशसीमन्तकज्वरः ॥" मा. नि. । "केशाः सीमन्तिनी यस्य सङ्क्षिप्ते विनते भ्रुवौ । लुनन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे ॥" तन्त्रान्तरात् । विज. र. ।

केशहन्त्रि(न्त्री)फला । स्त्री । महाशमीवृक्षे । वै. निघ. ।

केशहन्त्री । स्त्री । शमीवृक्षे । रा. नि. व. ८ ।

केशहस्तः । पुं । केशसमूहे । अ. । चूलेर गोछा ।

केशा । स्त्री । जटायाम् । वै. निघ. ।

केशाख्यम् । क्ली । क्षौद्रे । बालां । रत्ना. । "भृङ्गकेशाख्यनिर्गुण्डी ।" भैष. अचिन्त्यशक्तिरसे ।

केशादः । पुं । क्रमौ । वै. निघ. ।

केशापहा । स्त्री । शमीवृक्षे । वै. निघ. ।

केशारिः । पुं । नागकेशरे । वै. निघ. ।

केशारुहा । स्त्री । महाबलाक्षुपे । रा. नि. व. ४ ।

केशार्हा । स्त्री । महानीलीक्षुपे । बड़ नील । रा. नि. व. ४ ।

केशालिः । पुं । भृङ्गराजे । भीमराज । वै. निघ. ।

केशाह्वम् । क्ली । बालके । बाला । वै. निघ. ।

केशिकः । पुं । कशेरौ । केशुर । प. सु. । चि । प्रशस्तकेशयुक्ते । अम ।

केशिका । स्त्री । शतावर्य्याम् । रा. नि. व. ४ ।

केशिनी । स्त्री । जटामांस्याम् । रा. नि. व. १२ । बल्यायाम् । वै. निघ. ।

केशी । स्त्री । शूकशिम्बयाम् । आलाकुशी । र. मा. । जटामांस्याम् । भूकेश । रा. नि. व. १२ । च. द. । सि. यो. महापैशाचघृते । वा. उ. ६ अ. । महाशतावर्य्याम् । आम्रातके । वै. निघ. । नीलीवृक्षे । रा. नि. व. ९ । चौरपुष्प्याम् । अम. ।

केशोच्चयः । पुं । केशसमूहे । हे. ।

केश्यः । पुं । सार्षपक्षुपे । भीमराज । रा. नि. व. ४ । असनशाले । वै. निघ. । क्ली । कृष्णागुरुणि । रा. नि. व. १२ । क्षीवेरे । बाला । रा. नि. व. १० ।

केसरम् । क्ली, पुं । नागकेसरपुष्पे । रा. नि. व. ९ । वै. निघ. वा. व्या. षड्शीतिगुग्गुलौ । किञ्जल्के । पद्मकेसरे । सि. यो. कल्याणघृते । वकुलवृक्षे । रा. नि. व. १० । कासीसे । स्वर्णे । रा. नि. व. १३ । पुन्नागवृक्षे । अम. । मातुलुङ्गवृक्षे । लेबू गाछ । रा. नि. व. ११ । हिङ्गुनि । सिंहच्छटायाम् । मे. ।

केसरवरम् । क्ली । कुङ्कुमे । रा. नि. व. १२ ।

केशराम्लः । पुं । बीजपूरके । रा. । दाड़िम्बे । के. ।

केसरिका । स्त्री । महाबलाक्षुपे । रा. नि. व. ४ । सहदेवीलतायाम् ।

केसरिसुतः । पुं । हनूमति । हे. च. ।

केसरी (न्) । पुं । सिंहे । घोटके । पुन्नागवृक्षे । नागकेशरवृक्षे । रक्तशिखी । रा. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केसरोच्चटा । स्त्री । सुस्तायां । नागरसुस्तायाम् । वै. निघ. ।

केसूरः । पुं । कशेरी । केशुर । केसूरः स्यात् पीतरसो गोन्दी वृष्यः कशेरुकः । द्रव्याभि. ।

केङ्कः । पुं । गरगण्ड इति ख्याते वृक्षे । गरगण्डा । सु. सू. ३६ अ. ।

कैटजः । पुं । कुटजवृक्षे । कुड़चि गाछ । भा. पू. १भ. ।

कैट(ड्)र्य्यः । पुं । स्वनामप्रसिद्धे महानिम्बविशेषे । फलित महानिम्बविशेष, घोड़ाशुंठी । मं फलितमहानिंब, गोरानिम्ब । कं कथाहिव्वेच । वै. निघ. अपस्मा. चि. वचाद्यघृते । गुणाः—कटुतिक्तकषायः शीतलो लघुः तापघ्नः शीषकुष्ठरक्तकृमिभूतविषघ्नश्च । रा. नि. व. ६ । शीतलस्तिक्तः कटुः तुवरः लघुः दाहार्शःकृमिशूलघ्नः सन्तापविषघ्नश्च । श्वेतपाटलवृक्षे । वै. निघ. । कटफलवृक्षे । रा. नि. व. ६ । च. सू. ४अ. । भा. म. बाल-चि. । मदनवृक्षे । रा. नि. व. ८ महाभल्लातकगुड़े । पूतीकरञ्जे । कृष्णकटभीवृक्षे रा. नि. व. ६ । घृतकरञ्जे । कासुके । लघुकाश्मर्य्यां । रा. नि. व. २३ ।

कैतकम् । क्ली । केतकीपुष्पे । राज. । शृगालकोल्याम् । शेयाकूल ।

कैतवम् । क्ली । कुमुदे । वैदूर्य्यमणौ । रा. नि. व. १३ । राजिकायाम् । राई । विका. ।

कैदारः । पुं । केदारशालिधान्ये । आशन धान । षष्टिकधान्ये । षटे धान । गुणाः—कैदारा मधुरा वृष्या बल्याः पित्तनिवर्हणाः । ईषत्कषायास्वरसा गुरवः कफशुक्रलाः ॥ सु. सू. ४६ अ. । क्ली । पद्मकाष्ठे । प. सु. ।

कैपोला । स्त्री । क्षणचिह्नितायाम् । वै. निघ. ।

कैरली । स्त्री । विड़ङ्गायाम् । रा. नि. व. ६ ।

कैरवम् । क्ली । विड़ङ्गे । कुमुदे । हेला फूल, शालूक फूल । रत्ना. । श्वेतपद्मे । हे. च. । श्वेतकुमुदे । श्वेत शुन्दि । भा. पू. १भ. । रा. नि. व. १० ।

कैरविका । स्त्री । कुमुदिन्याम् । छोटशुन्दीर झाड़ । भा. पू. १भ. ।

कैरविणी । स्त्री । उत्पलिन्याम् । शुन्दी वा कुमुदफूलेर झाड़ । रा. नि. व. १० ।

कैरविणीफलम् । क्ली । कुसुदबीजे । तेलो बीचि, भेट । हिं भेट । भा. ।

कैरवी । स्त्री । भेषिकायाम् । मेति । प. सु. । चन्द्रिकायाम् । मे. । (विन्) पुं । चन्द्रे ।

कैरवीकन्दः । पुं । तैलकन्दे । रा. नि. व. ७ ।

कैराटः (कः) । पुं । करवीरवृक्षे, स्थावरविषभेदे । हे. च. ।

कैरातः (कः) । पुं । जलपक्षिविशेषे । च. सू. २७अ. । भूनिम्बे । चिरेता । रा. नि. व. ६ । बलवति पुरुषे । हारा. । क्ली शुवरचन्दने । रा. नि. व. १२ ।

कैरातचन्दनम् । क्ली, पुं । नातिपीतचन्दने कोङ्कणे ख्याते । शुवरचन्दन । गुणाः—"शीतलश्तिक्तः कान्तिकरो मतः । विचर्चिकाकुष्ठकण्डूकफदद्रुविषापहः । रक्तपित्तक्लमिव्यङ्गपित्तहृट्ज्वरदाहहृत् ॥" वै. निघ. । See शुवरचन्दनम् ।

कैरालम् । क्ली । विड़ङ्गे । वै. निघ. ।

कैरालो । स्त्री । भूनिम्बे । विड़ङ्गायाम् । रा. नि. व. ६ ।

कैवर्त्तः । पुं । महानिम्बे । वै. निघ. ।

कैवर्त्तम(मु)स्त(क)म् । क्ली । कैवर्त्तिकायाम्, जलजमुस्ताभेदे । केओटमूता, केशुरमूता । श. र. । तत्पर्य्यायः,—वन्यं, सितपुष्पं (ज), कैवर्त्तीमुस्तकं, कैवर्त्तमुस्तकं (शब्दर.), कुटनूटं, दशपुरं, वालेय, परिपेलवं, प्लवं, गोपुरं, गोनर्दं (अ.), कैवर्त्ती (वै.), दाशपुरं, दासपुरं, परिपेलं, पारिपेलं, कैवर्त्तिमुस्तकं, वनसम्भवं (र.), धान्यं, शीतपुष्पं, जीर्णवृन्नकं । गुणाः—हिमं तिक्तं कषायं कटु कान्तिकरं कफघ्नं पित्तघ्नं रक्तदोषवीसर्पकुष्ठकण्डूघ्नञ्च । इदन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्तकाकृतिः । "मुस्तावत्पेलवपुटं शुक्लाभं स्याद्वितुन्नकमिति ।" भा. पू. १भ. ।

कैवर्त्तिका (र्त्ती) । स्त्री । (Cyperus rotundus.) A kind of fragrant grass. मालवे स्वनामख्यातजलजमुस्तायाम् । केओटमूता. केशुरमूता । अटी. भ. । गुणाः—लघुः वृष्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कषाया कफघ्नी कासश्वासघ्नी मन्दाग्निहरी च। रा. नि. व. ३।

कैवर्त्ति(र्त्ती)मुस्त(क)म्। क्ली। कैवर्त्तिकायाम्। भा. पू. १भ.।

कैवलम्। क्ली। विड्गे। र. मा.।

कैशिकम्। क्ली। केशसमूहे। अ.।

कैशिकी। स्त्री। व्यधनीपयोग्यस्रुवधारायाम्। सु. सू. ८अ.।

कैशोरम्। क्ली। एकादशाब्दात्पञ्चदशपर्य्यन्ते वयसि। रा. नि. व. १८।

कैशोरको (गुग्गुलुः)। पुं। वातरक्ते हितः। पोटलीबद्धगुग्गुलुः २ श. त्रिफला २श. गुडूची ४ श. (एकत्र) वारि ९६ श. अर्द्धशिष्टः क्वाथः (४८ श.) कर्त्तव्यः। क्वाथं वस्त्रपूतङ्कृत्वा तेन घृतमर्द्दितगुग्गुलुं गोलवित्वा पुनः पाकं कुर्य्यात्। घनीभूते पाके अवतार्य्य तत्र त्रिफलाचूर्णं प्र. ४ तो. त्रिकटुचूर्णं प्र. ४ तो. विड्ङ्गचूर्णं ४ तो. विहङ्गचूर्णं २ तो. दन्तीमूलचूर्णं २ तो. गुडूचीचूर्णं ८ तो. प्रक्षेपो देयः। च. द.। सा. कौ.।

कैषि(षी)का। स्त्री। आम्रातके। शरमूलमिति केचित्। च. चि. ३अ.।

कैषी। स्त्री। पाठायाम्। आकनादि। वै. निघ.।

कोकः। पुं। खर्ज्जरीवृक्षे। ज्योष्टिकायाम्। भेके। मे.। ईहामृगे। घोंगा, घोष। रा. नि. व. १९। चक्रवाके। त्रिका.।

कोकड़ः
कोकवाचः } पुं। चमरपुच्छे विलिशयसृगे। कहुखार इति भाषा। तत्पर्य्यायः,—जविनः, कोकवाचः, विलिशयः, चमरपुच्छः, लोमशः, धूम्रवर्णकः। तन्मांसगुणाः—श्वासानिलकासहरः पित्तदाहकरश्च। रा. नि. व. १९।

कोकदन्ता। स्त्री। हस्तरञ्जके। मेंदीपाता।

कोकदेवः। पुं। कपोते। वनकपोते। रा. नि. व. १९।

कोकनदम्। क्ली। (Nelumbium speciosum.) रक्तपद्मे। रक्तपद्म। रक्ता। गुणाः—कटु तिक्तं मधुरं शीतलं रक्तदोषघ्नं कफपित्तवातशमनं सन्तर्पणं वृष्यञ्च। रा. नि. व. १०। "कोकनदमुक्तं मधुरं शीतं वर्ण्यं कटु-तिक्तकं। वृष्यं तृषः करणं विस्फोटकरक्तदोषदाहहरं। वट्-कफपित्तविसर्पविषसन्तापवातनाशकरम्॥" वै. निघ.।

कोकबन्धूः। पुं। सूर्य्ये। श.। चक्रवाकपक्षिणि।

कोकाग्यः। पुं। समष्टीलवृषे। रा.।

कोकाहः। पुं। पाण्डुवर्णघोटके। कर्केत्यपरनामख्याते गुह्यकाश्वे। "श्वेतः कोकाह इत्युक्तः।" ज. द. ३ अ.। "सिते तु कर्ककोकाहौ।" हे. च.।

कोकिलः। पुं। (Cuculus Indicus.) स्वनामख्यातपक्षिणि। कोकिल। हिं कोइला। रत्ना.। तत्पर्य्यायः,—वनप्रियः, परभृतः, पिकः, काकपुच्छः, कलघोषः, अलिस्वकः, कामजालः, पञ्चमास्यः, मधुस्वरः, कुहूकण्ठः, घोषयिनुः (शब्दर.), कलध्वनिः, गातुः, अलिसकः, अलिपकः (मे.), अन्यभृतः, अचलवित्, मधुवनः (श.), कामतालः, कुहूमुखः, मधुकण्ठः, काकपुष्टः (त्रि), भाङ्गपुष्टः (हा.), मधुघोषः (शब्दमा.), वसन्तघोषी (के.), परपुष्टः, कालः, वसन्तदूतः, ताम्राक्षः, गन्धर्व्वः, मधुगायनः, वासन्तः, कलकण्ठः, कालान्धः, काकलीरवः, कुहूरवः, अन्यपुष्टः, मत्तः, मदनशाठकः, कलरवः। रा.। तन्मांसगुणाः—"कोकिलः श्लेष्मलो ज्ञेयः पित्तसंशमनो मतः।" अवि. २१ अ.। सविषसौम्यकीटभेदे। तद्दष्टस्य कफनिमित्तजा रोगा भवन्ति। सु. कल्प. ८ अ.। क्ली। बदरीफले। जटा.।

कोकिलनयनः। पुं। कोकिलाक्षवृक्षे। कुलिञ्जाखाड़ा। अ. टी. र.।

कोकिला। स्त्री। काकोल्यां। कोकिलस्त्रियाम्। वै. निघ.।

कोकिलानन्दः (वासः)। पुं। राजासनवृक्षे। रा. नि. व. ११।

कोकिलावर्त्तिः (र्त्ती)। स्त्री। नेत्ररोगे वर्त्तिविशेषे। "व्योषायशूर्णसिन्धूत्थत्रिफलाञ्जनसंयुता। गुडिका जलपिष्टेयं कोकिला तिमिरापहा॥" च. द.।

कोकिलावासः। पुं। आम्रवृक्षे।

कोकिलाक्षः (कः)। पुं। (Hygrophila spinosa Syn. Ruellia longifolia.) स्वनामख्यातवृक्षे। कूलेखाड़ा, कूलेकाँटा, शूलमर्द्दन। हिं कोलिस्ताविखर् कैलया; तद्बीजं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तालमाखना। मं कोलिसा। कं कुलुगोलिके। तें गोलिमिड़िचेट्टु, गोव्विचेट्टु। उत्. कुइलिरखा, माखुरेण। मद.। तत्पर्य्यायः,—इक्षुगन्धा, काण्डेक्षुः, इक्षुरः, क्षुरः (अ.), शृगाली, शृङ्खली, शूरकः, शृगालघण्टी, वज्रास्थि, शृङ्खला, वज्रकण्टकः, इक्षुः, इक्षुरकः, वज्रः, शृङ्खलीका, पिकेक्षणा, पिच्छिला (रा.), कोकिलनयनः, कोकिलाक्षकः (अ. टी.)। स तु श्वेतरक्तभेदेन द्विविधः। श्वेतस्य तस्य पर्य्यायः,—वीरतरुः, विक्षुरः, क्षुरकः, शुक्लपुष्पः कुलाहकः। रक्तस्य तस्य पर्य्यायः—क्षुवकः, अतिक्षुवकः। गुणाः—आमवातरक्तघ्नः। राज.। मधुरः शीतः पित्तातिसारजित् हृद्यः कफघ्नः बल्यः रुच्यः सन्तर्पणश्च। रा. नि. व. ५। शीतलः वृष्यः स्वादुस्निग्धपित्तलः तिक्तः आमवातशीर्षाश्मरीतृष्णावातरक्तघ्नश्च। भा. पू. १भ.। तद्बीजगुणः—शीतलं स्वादु कषायं तिक्तं गुरु गर्भस्रावनं हृद्यञ्च। वै. निघ.।

कोकिलाक्षी। स्त्री। कोकिलाक्षबीजे। कूलेखाड़ाबीज। हिं तालमाखना। श. र.।

कोकिलेष्टा। स्त्री। महाजम्बूवृक्षे। बड़ जाम गाछ। रा. नि. व. ११।

कोकिलेक्षुः (क्षुः)। पुं। क्षुद्रेक्षौ। काँजला ईक्षू। कोकिलाक्षेक्षुपे। रा. नि. व. १४।५।

कोकिलोत्सवः। पुं। आम्रवृक्षे। रा.नि.व.११।

कोकुराहः। पुं। सुखपुरुषकयुक्तश्वेताश्वे। "कोकाहः पुरुषकेणाश्वः कोकुराहः।" ज.द.३अ.।

कोङ्क(ङ्का)णः। पुं। कोङ्कणदेशजोत्तमाश्वे। ज. द. ६अ.।

कोचिला। स्त्री। कुचेलके। कुँचले। भैष. व्व. चि. पानीयवट्याम्।

कोटः। पुं। कोठरोगे। गुवाकवृक्षे। चिका.।

कोटजः। पुं। कुटजवृक्षे। कुड़चि गाछ। रा. नि. व. ९।

कोटरः। पुं, क्ली। वृक्षगह्वरे। गाछेर कोटर। अम.। तत्पर्य्यायः,—निष्कुहः (अ.), निर्गूढः, कोटरः (शब्दर.), प्रान्तरं, तरुविवरम् (ज.)।

कोट(ठ)रपुष्पी। स्त्री। वृद्दारकलतायाम्। वीजतारक। रा. नि. व. ३।

कोटरवासिनी। स्त्री। श्वेतचित्रतायाम्। वै. निघ.।

कोटरी। स्त्री। नग्नायाम् स्त्रियाम्।

कोट(ट्ट)वी। स्त्री। नग्नस्त्रियां। नेंटो मेयें। अम.।

कोटिः (का)। स्त्री। स्फुक्कायाम्। पिड़िंशाक। रा. नि. व. १२। वेदिकाख्ये गन्धद्रव्ये। मे.।

कोटिकः। पुं। मण्डूकजातीयसविषकीटभेदे। सु. कल्प. ८अ.। See मण्डूकः। इन्द्रगोपकीटे। आषाढ़े पोका। जटा.।

कोटिबालिका। स्त्री। सरटे। वै. निघ.।

कोटिरः। पुं। नकुले। इन्द्रगोपकीटे। मे.।

कोटि(टी)वर्षा। स्त्री। पिड़िङ्गशाके। पिड़िंशाक। श. र.।

कोटिवृक्षकः। पुं। कुटजवृक्षे। मद. व. १।

कोटिशः। पुं। लोष्टभेदने। ढेले। भरत.।

कोटी। स्त्री। कुटजवृक्षे। कुड़चि गाछ। वै. निघ.। स्फुक्कायाम्। श. र.। शस्त्राग्रभागे। अ. टी.।

कोटीरः (वः)। पुं। जटायाम्। त्रिका.। किरीटे। हे.।

कोटोडुम्बरः। पुं। यज्ञीडुम्बरे। भैष. क्षीरी. चि.।

कोट्टारः। पुं। कूपे। धारा.। पुष्करिण्याः पाटके। मे.।

कोठः। पुं। Aspecies of leprosy. Ringworm. क्षुद्ररोगान्तर्गतचर्म्मरोगविशेषे। तत्पर्य्यायः,—मण्डलकं (अ), दुश्चर्म्मा, त्वग्दोषः चर्म्मदूषिका। रा.। तस्य लक्षणं यथा—"असम्यग्वमनोदीर्णपित्तश्लेष्मानिगृह्णतः। मण्डलानि सकण्डूनि रागवन्ति बहूनि च। उत्कोठः सानुबन्धस्तु कोठ इत्यभिधीयते॥" मा. नि.। "वरटीदष्टकण्डूमाँल्लीहितोऽस्रकफपित्तात्। चणिकोत्पादविनाशः कोठ इति विगद्यते॥" भल्लुकीतन्त्रात्।

कोठरः। पुं। अङ्कोलवृक्षे। आँकोड़ गाछ। रा. नि. व. ९।

कोठरपुष्पी। स्त्री। वृद्दारके। रा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोणः। पुं। अस्त्राद्यग्रभागे। अम.।

कोणकुणः। पुं। उत्कुणे। ऊकुण। हे. च.।

कोणिः। वि। कुनखि। अ. टी.।

कोथः। पुं। पूतीभावः। पूय। भा. म. ४भ. नासारो. चि.। "विक्लेदकोथावयवापि यत्र।" नेत्ररोगभेदे। केतो। मे.। दुर्गन्धक्लेदे। पाके। सु. नि. ४अ.। वि। ग्रथिते। ग्रठिते। हे. च.।

कोदकारः। पुं। अश्वाकारमृगभेदे। वै. निघ.।

कोदण्डः। पुं, क्ली। भ्रुवि। भुरू। मे.।

कोद्दालकः, **कोद्रवः** } पुं। (Paspalum scrobiculatum.) कोरदूषकापरनामधेयधान्यविशेषे। कोदो धान। सं कोद्रव। कं हारक। तत्पर्य्यायः,—कोरदूषः (अ.), कुद्रवः (अ.टी.) कोरदूषकः, कोरदुष्कः (शब्दर.), कोदारः, कोद्दालः (सुश्रु.), कुद्दालः, सदनायकः, उद्दालः, वनकोद्रवः। देशविशेषे तस्य नानाभेदाः कृताः। गुणाः—वातलो ग्राही हिमः पित्तकफघ्नश्च। भा.। अतिग्राहि वातलञ्च। राज.। "कोद्रवो रूक्षो ग्राही स्यात् रक्तपित्तविशोषनः। नात्यन्तकफकृत् प्रोक्तो रूक्षः स्वादुः प्रकीर्त्तितः॥" अवि. ५अ.। सन्धिबन्धशिथिलकरत्वात् विकाशी ग्राही स्पर्शशीतलो विषापहश्च। वा. धान्यव.। मधुरः तिक्तः व्रणिनां पथ्यः कफपित्तहरः रूक्षः वातलः गुरुः मोहकश्च। रा. नि. व. १६। "ग्लानिमूर्च्छाकरं सद्यः कोद्रवं न हितं सतम्।" अवि. १२अ.।

कोद्रवमण्डः। पुं, क्ली। कोद्रवधान्यकृतमण्डे। कोदो धानेर माड़। गुणाः—मूर्च्छाग्लानिजननः। वै. निघ.।

कोद्रविकम्। क्ली। सौवर्च्चललवणे। वै. निघ.।

कोद्रुभक्तः। पुं, क्ली। कोद्रवान्ने। कदोर भात। सं हरकाचाभात। गुणाः—"कोद्रुभक्तो रुचिकरो मधुरस्तु प्रमेहहा। सूक्ष्मदोषत्वषाच्छर्द्दिकफवातामदाहनुत्॥" वै. निघ.।

कोनफलम्। क्ली। रक्तालौ। वै. निघ.।

कोना(नी)लः। पुं। वर्त्तिकाख्ये जलपक्षिणि। वै. निघ.।

कोनालिः। स्त्री। कुष्ठविहितभक्ष्यद्रव्ये। सु. चि. १० अ.।

कोपः पुं। क्रोध। अम.।

कोपनः। पुं। ग्रन्थिपर्णे। गाँठेला। वि। कुद्धे। जटा.। वै. निघ.।

कोपनकः। पुं। चीराख्यगन्धद्रव्ये। गाँठेला। हिं चीरा। रा. नि. व. १२।

कोपना। स्त्री। रक्तकरवीरे। वै. निघ.।

कोपलता। स्त्री। कर्णस्फोटलतायाम्। कानछिड़े, कानफोड़ा। रा. नि. व. ३।

कोपि(पी)नः। पुं। जलकपोते। रा. नि. व. १९।

कोमम्। क्ली। पिपासास्थाने। अ. टी.।

कोमलम्। क्ली। जले। मे.। वि। अकठिने। तत्पर्य्यायः,—सुकुमारः, मृदुलः, मृदुः (अ.), पेलवः (ज.)।

कोमलकम्। क्ली। मृणाले। पद्मेर डाँटा। भ. र.। पद्मकाष्ठे। वै. निघ.।

कोमलकदलम्। क्ली। बालकदलफले। कचि कला। सं कोंवलीकेलें। गुणाः—शीतमधुरकषायरुच्यान्नं पित्तघ्नञ्च। वै. निघ.।

कोमलदलम्। क्ली। पद्मे। वै. निघ.।

कोमलनारिकेलम्। क्ली। बालनारिकेले।

कोमलपत्रकः। पुं। शिग्रौ। सजिना गाछ। रा. नि. व. ७।

कोमलप्रसवः। पुं। श्वेतभिण्ट्यां। वै. निघ.।

कोमलवल्कला (ली)। स्त्री। लवलीवृक्षे। लोओयाड़। भा.।

कोमला। स्त्री। चीरिकायाम्। धौरुई। श. च.। चीरिण्यां। धिर्नी। खर्ज्जूरिकायां। वै. निघ.।

कोमलेक्षुः। पुं। इक्षुविशेषे। कचि ईक्षु। गुणाः—"कोमलेक्षुर्मेदकफमेहकारी च कीर्त्तितः। तरुणस्तु मधुः प्रोक्तः किञ्चित्कटुश्च वातहा। पित्तं नाशयतीत्येवं स इक्षो वीर्य्यवर्द्धकः। रक्तपित्तहरो बल्यो चतनाशकरो मतः॥" वै. निघ.।

कोमासिका। स्त्री। जालिकायाम्। फलेर जालि। हारा.।

कोयष्टिः (किः)। पुं। जलकुक्कुभे। कोंड़ा पाखी। अयं प्रतुदगुणः। सु. सू. ४६ अ.। च. सू. २७ अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोरकः। पुं, क्ली। काकोल्याम्। कौंरुला। कुड्मले। कूँड़ि। अम। मृणाले। मे.। चकोर-पक्षिणि। वै. निघ.। **चोरनामगन्धद्रव्ये**। जटा.।

कोरकवृक्षः। पुं। इङ्गुदीवृक्षे। वै. निघ.।

कोरकसेरुः। पुं। भद्रमुस्तके। नागरमुता।

कोरङ्गी। स्त्री। सूक्ष्मेलायाम्। रा. नि. व. २३। पिप्पल्याम्। रा. नि. व. ६।

कोरञ्जो। स्त्री। सौराष्टिकायां। कौंच्ड़ा दाम्। वै. निघ.।

कोरण्टो। स्त्री। वदरीवृक्षे। भद. व. ६।

कोरदूषः (षकः, ष्यः)। पुं। कोद्रवे। रा. नि. व. १६। च. द. र. पि. चि.। कोद्रवधान्ये। कदो धान वा छोट मटर। रत्ना.। गुणाः—"कोरदूषस्तु मधुरः शीतो ग्राही गुरुर्मतः। तिक्तो व्रणश्च रूक्षश्च कफपित्तविषापहः। मूत्रकृच्छ्रहरः प्रोक्तो जीर्णश्चार्धं लघुः स्मृतः॥" वै. निघ.।

कोरदुष्कः। पुं। कोद्रवे। शब्दर.।

कोरसन्धिः। पुं। गर्त्ते। गर्त्ताकारसन्धौ। "अङ्गुलिसन्धिवन्धगुल्फजानुकूर्परेषु कोरसन्धयः।" सु. शा. ५ अ.।

कोरिमदः। पुं। कासमर्दे। प. सु.।

कोर्द्रवः। पुं। कोद्रवे। शब्दर.।

कोल(क)म्। क्ली। तोलकमाने। १ तोला। प. प्र.। "अयस्तिलचूर्णकोलभागैः।" सि. यो. पाण्डु. चि.। मरिचे। चव्ये। रा. नि. व. ६। वदरफले। रत्ना.। क्रीड़े। मेलके। चित्रके। कक्कोले। मे.। रा. नि. व. १२।१९। वै. निघ. २भ. पाण्डु. चि. लोहादिचूर्णे। अङ्कोले। गजपिप्पल्याम्। पिप्पल्याम्। राजवदरे। नखे। पुं। वदरवृक्षे। कुल गाछ। र. मा.। वा. चि. १अ.। "कोल-सूक्ष्माम्लकलशौ।" वदरास्थिशस्ये। "कोलत्वक्-मज्जा।" रस. र. बाल. चि.। च. द. पाण्डु. चि.। "त्र्यूषणकोलभागैः।" टङ्कद्वयपरिमाणे। "तद्वयङ्कोल उच्यते।" प. प्र. १ख.। वराहे। रत्ना.। कुलत्थे। सा. कौ. गुदभं. चि. चाङ्गेरी-घृते। अङ्कोलवृक्षे। बहुवारवृक्षे। जटा.।

कोलकन्दः। पुं। खनामख्यातमहाकन्दशाक-विशेषे। पुटालुरिति काश्मीरे ख्यातः। शुयाँर आलू। मं पुटगेडु। तत्पर्य्यायः,—क्रिमिघ्नः, पञ्चलः, वस्त्रपञ्चलः, पुटालुः, सुपुटः, पुटकन्दः। गुणाः—कटुः उष्णः कृमिघ्नः वान्तिघ्नः कफहृद्घ्नः विषदोषघ्नश्च। रा. नि. व. ७।

कोलकर्कटिका (टी)। स्त्री। मधुखर्ज्जुरि-कावृक्षे। रा. नि. व. ११।

कोलका। स्त्री। शुक्लशुकशिम्ब्याम्। वै. निघ.।

कोलगजिनी। स्त्री। गजपिप्पल्यां। वै. निघ.।

कोलङ्गः। पुं। आमलकवृक्षे। वै. निघ.।

कोलतैलम्। क्ली। वदरीबीजतैले। गुणः विल्वो-तकतैलवत्।

कोलदलम्। क्ली। नखीनामगन्धद्रव्ये। अम.।

कोलद्वयम्। क्ली। कर्षे। दुई तोला। भा.।

कोलनाशिका। स्त्री। वह्निनीवृक्षे। हारा.।

कोलपुच्छः। पुं। कङ्कपक्षिणि। "कोलपुच्छस्तु कङ्कः स्यात्।" हारा.।

कोलबालुकः। पुं। कुङ्कुष्ठे। वै. निघ.।

कोलमज्जा। पुं। वदरास्थिशस्ये। कूलेर आँटिर भाँस। सि. यो. हि. श्वास. चि.। "कोल-मज्जाञ्जन लाजा।" गुणाः—"कोलमज्जा तु मधुरः पित्तच्छर्द्दितृषापहः।" राज.। "कषायो मधुरो मज्जा कोलानां पित्तनाशनः। तृष्णाच्छर्द्दिनिल-घ्नश्च।" सु. सू. ४६ अ.।

कोलमूलम्। क्ली। पिप्पलीमूले। रा. नि. व. ६।

कोलमूला। स्त्री। पिप्पलीमूले। रा.।

कोलवल्लिका (ल्ली)। स्त्री। (Scindapsus officinalis. Syn. Pothos officinalis.) गजपिप्पल्याम्। प. सु.। चव्ये। रा. नि. व. ६। च. चि. ३अ.।

कोलशिम्बिः (म्बी)। स्त्री। कपिकच्छौ। आलाकुशी गाछ। हिं सुरवाञ्जेवि। भद. व. १। शिम्बीभेदे। शुइयाँरे शिम्, कटेरा शिम्। तत्पर्य्यायः,—क्षुतफला, खट्वा, शूकरपादिका, काकाण्डोला, दधिपुष्पी, काकाख्या, पर्य्यङ्क-पादिका। गुणाः—वातघ्नी गुरुरूक्षा वातकफघ्नी शुक्राग्निमान्द्यकृत् बल्या रुचिकृत्। भा.। वातघ्नी गुरुः उष्णा कफपित्तकरी च। रा. नि. व. ३।

कोला। स्त्री। वदरीवृक्षे। श. र.। पिप्पल्याम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा. नि. व. ६। महाश्रावण्याम्। गोरक्षमुण्डी। रा. नि. व. ५। चव्ये। भा. पू. १भ.।

कोलात्मजः। पुं। बदरफले। वै. निघ.।

कोलादिमण्डूरम्। क्ली। परिणामशूले हितम्। कोला चविका, ग्रन्थिकं पिप्पलीमूलं, चपला पिप्पली, चारी यवचारः, सुरभिजलं गोमूत्रं, स्पष्टम्। च. द. परिणामशू. चि.। शोधितमण्डूरं १० तो. शुण्ठीपिप्पलीचव्यपिप्पलीमूलयवचाराणां प्र. २ तो. गोमूत्रं ८० तो. (१भ.)।

कोलास्थि। क्ली। बदरास्थनि। कुलेर आँटि। सि. यो. कट्टिं. चि.।

कोलाहलः। पुं। भूकदम्बे। कुक्कुरिमा। वै. निघ.।

कोलिः (ली)। पुं, स्त्री। बदरीवृक्षे। कुलगाछ। विका.। अ. टी. भ.।

कोलिका। स्त्री। घण्टाबदरे। लेप्राकुल। वै. निघ.।

कोलिपत्रम्। क्ली। बदरीपत्रे। नखीनामगन्धद्रव्ये।

कोली। स्त्री। कोलिवृक्षे। अ. टी. भ.।

कोल्या। स्त्री। पिप्पल्याम्। र.।

कोविदः। पुं। तिलकवृक्षे। वै. निघ.।

कोविदारः (कः)। पुं। (Bauhinia variegata.) A species of ebony. काञ्चनारभेदे, रक्तकाञ्चनभेदे। भा.। रक्त कांञ्चन भेद। हिं कचनारभेद। मं क कांचनु, कोचाले। ते देवकांचन। तत्पर्य्यायः—चमरिकः, कुद्दालः, युगपत्रकः (अ.) युगपत्रः (हे.), काञ्चनालः, ताम्रपुष्पः, कुद्दारः, रक्तकाञ्चनः (अ.), चम्पः (शब्दमा.), विदलः (शब्दर.), काञ्चनारः, कनकारकः, काष्ठपुष्पः, करकः, काष्ठारः, यमच्छदः। गुणाः—"दोषनः स्यात् कषायो व्रणरोपणः। संग्राही सारकः स्वादुः पर्णशाकेषु चोत्तमः। मूलक्वाथं विदोषघ्नं शोषं दाहं कफं तथा। वातं हरेत् पुष्पगुणा रक्तकाञ्चनपुष्पवत्॥" वै. निघ.। धारकः रुचिकरः रक्तपित्ते पथ्यश्च। राज.। तैलगुणाः विभीतकतैलवत्। See काञ्चनारः।

कोशः (कः)। पुं। चर्म्मकोशः। भा. म. ४ भ.। "मनेरधस्ताल्लोशस्तु।" कुम्भले। पात्रे। जातिकोषे। वै. निघ. २भ. चय. चि. सूर्य्यप्रभागु.। पिण्याम्। शब्दसंग्रहे। मे.। स्वर्णे। रूप्ये। अम.। (कः) व्रणवस्त्रविशेषे। स च अङ्गुष्ठाङ्गुलिपर्व्वसु विधेयः। सु. सू. १८ अ.। "कोशकश्च स विज्ञेयः व्यधैर्बन्धनं वर्ज्जितः।" "व्यधैः सूचीव्यधनैरहितः बन्धेन वर्ज्जितः कोशकारः" इति। ङ.। अण्डे। श. र.।

कोशकारः। पुं। कीषकारिचौ। हिं करिया, कुशिया।

कोशकालो। स्त्री। जलचरपक्षिभेदे। वै. निघ.।

कोशकृत्। पुं। कीषकारे। वै. निघ.। कृषेचौ। भा.।

कोशफलम्। क्ली। चपुष्याम्। शशा। देवदाल्याम्। घोण्टायाम्। लेप्राकुल। रा. नि. व. २३। कक्कोले। अम.। बदरे। वै. निघ.।

कोशफला। स्त्री। महाकीषातक्याम्। बड़ घोषा वा धुन्दुल। देवदालीलतायाम्। लेप्राताड़ा। रा. नि. व. ३। पीतघोषायाम्। रत्ना.। श्वेतविदलतायां, कृष्णविदलतायाम्। चपुष्याम्। शशी गाछ। रा. नि. व. ७।

कोशवती। स्त्री। घोषायाम्। घोषा। सु. चि. १८ अ.।

कोशवासी [न्]। पुं। शल्लूके। तन्तुकौटे। स्फटिकविशेषे। के.।

कोशस्थः। पुं। शङ्खशुक्त्यादौ। सु. सू. ४६ अ.।

कोशस्थमांसम्। क्ली। शङ्खशुक्त्यादिमांसे। गुणाः—मधुरं शीतलं स्निग्धं शुक्रकरं हृद्यं विड्वर्द्धकं बलवर्द्धिकरं वातपित्तघ्नञ्च। वै. निघ.।

कोशा। स्त्री। मद्ये। वै. निघ.।

कोशाङ्गम्। क्ली। इक्षटे। हारा.।

कोशा(षा)तकः। पुं। घोषके। घोषा। मे.।

कोशा(षा)तकी। स्त्री। स्वनामख्यातफलशाके। घोषा लता। हिं करइतरइ। तें वोर, उत्तरेणि। मं कडुदोड़की, काहीरे। तत्पर्य्यायः, —कृतच्छिद्रा, जालिनी, कृतवेधना, चुड़ा, सुतिक्ता, घण्टाली, मृदङ्गफलिनी, कर्कशच्छदा। श्वेतपीतभेदेन द्विधा। फलगुणः—कफार्शोघ्नं। पक्वफलगुणः—आमाशयशुद्धिकरम्। तैलं मूलक-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तलगुणम्। राज.। च. द. अर्शः. चि.। (Luffa pentandra or amara, and L. Acutangula.) अन्यविधफलशाकविशेषे, ज्योत्स्निकायाम्। झिंगा। हिं नोकी झिमनी, तरुइ, चितरुइ। उत्. जनी। तत्पर्य्यायः—राजकोशातकी, धामार्गवः, पीतपुष्पः जालिनी, क्रतवेधनः। गुणाः—शिशिरा कटुः अल्पकषाया वातपित्तकफघ्नी मलाध्मानशोधिनी। रा. नि. व. ७। महाकोषातक्याम्। वड़ धुन्दूल। हिं नेनुआ। तत्पर्य्यायः,—महाकोशातकी, महाघोषातकी, हस्तिघोषा, महाफला, धामार्गवः, घोषकः, हस्तिपर्णः। गुणाः—"महाकोशातकी स्निग्धा सरा पित्तानिलापहा।" तत्फलं स्वादु मधुरं वातपित्तघ्नं पाके कफघ्नं ज्वरे श्रस्तञ्च। अति. १६ अ.। See राजकोषातकी। तिक्तफललतताविशेषे। तिक्तपत्री। महाकाललतायाम्। श्वेतघोषायाम्। रत्ना.। पटोल्याम्। पटल गाछ। मे.। अपामार्गे। वै. निघ.।

कोशा(षा)म्रः। पुं। वनाम्रवृक्षविशेषे, क्षुद्राम्रे। जलपाई, केओड़ा। हिं कोशंभ। सं झारी-आंवा। कं जूरिमाचु। तत्पर्य्यायः,—कोषाम्रः, कृमिवृक्षः, सुकोशकः, (रा.), घनस्कन्धः, वनाम्रः, जन्तुपादपः, क्षुद्राम्रः, रक्ताम्रः, लाक्षावृक्षः, सुरक्तकः (रा.)। गुणाः—"कोषाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः। तत्फलं ग्राहि वातघ्नमग्निदीप्तं गुरुपित्तलं। पक्वन्तु दीपनं रुच्यं लघ्वग्निकफवातनुत्॥" भा.। फलं—अम्लं वातहरं कफपित्तकरं गुरु विदाहशोफहरञ्च। रा. नि. व. ११। विरेचनमिति। सु. चि. ३१ अ.। अम्लो गुरुः विदाही पित्तलः कफकृत्कोष्ठशोधनश्च। फलं ग्राहि उष्णं पित्तलं गुरु अम्लं वातघ्नञ्च। किञ्चित्पक्वं अम्लं रुच्यं दीपनञ्च। पक्वफलरसः स्निग्धो रोचनश्च। वै. निघ.। तन्मज्जगुणाः—स्वादुपाकोऽग्निबलकृत् स्निग्धः पित्तानिलापहः। सु. सू. ४६ अ.।

कोशा(षा)म्रतैलम्। क्ली। केओड़ा इति प्रसिद्धतरुफलजतैले। केओड़ार तैल। गुणाः—सारकं कृमिकुष्ठव्रणघ्नं तिक्तं अम्लमधुरं बल्यं पथ्यं रोचनं पाचनञ्च। रा. नि. व. १५।

कोशिला। स्त्री। सुक्षपर्ण्याम्। मूगानी। रा. नि. व. ३।

कोशी। स्त्री। व्याघ्रनखे। नखौ। रा. नि. व. १२। उपानहि। हारा.। धान्यादिशुद्धायाम्। हे. च.। पुं (न्)। नखीनामगन्धद्रव्ये। रा.।

कोषः (कः)। पुं, क्ली। जातीकोषे। आम्रफले। पात्रे। मे। कुड्मले। कूँड़ि। वृषणे। श. र.। शिश्ने। अण्डे। कृताकृतस्वर्णरौप्ये। अम.। योन्याम्। शिश्नायाम्। हे. च.। पनसादिफलस्थान्ते। धरणि.।

कोषकारः। पुं। इक्षौ। ईखू। श. र.। इक्षुविशेषे। हिं कुषारि, कुशिया, कुसियार। तैं कोव्वरिचेट्टु। भा. स. ३भ. मूत्राघात. चि.। गुणाः—गुरुः शीतलः रक्तपित्त-क्षयघ्नश्च। राज.। "कोषकारो गुरुः शीतो रक्तपित्तक्षयापहः।" भा.। अयं मूले मध्ये च मधुरः। सु. सू. ४५ अ.। कीटभेदे। गुटिपोका। जटा.।

कोषकारजम्। क्ली। कौषेये। रेशम्। रत्ना.।

कोषकालः। पुं। घोषायाम्।

कोषचञ्चुः। पुं। सारसपक्षिणि। श. मा.।

कोषफलम्। क्ली। कर्पूरगन्धिकक्कोले। भा पू. १भ.। पुं। घोषकलतायाम्। घोषा लता। जटा.। (ला) स्त्री। पीतदेवताड़वृक्षे। रा. नि. व. ३। पीतघोषायाम्। प. मु.। लिम्बाके। पातिलेबु।

कोषला (ह्वा)। स्त्री। जीवशाके। प. मु.।

कोषवती। स्त्री। कोषातक्याम्। घोषा, झिंगा। द्विधा घण्टालिका। एका धामार्गवः द्वितीया राजकोशातकी। वा. सू. १५ अ.।

कोषवृद्धिः। स्त्री। कुरण्डे। कोरोन्द। श. र.। See वृद्धिः।

कोषस्थः। त्रि। कोषवासिप्राणिमात्रे, यथा—शङ्खशुक्तिशङ्खनखशम्बूककर्कटादौ। गुणाः—"शङ्खकूर्म्मोदयः स्वादुरसपाका वातघ्ना शीताः स्निग्धा पित्ते हिताः श्लेष्मवर्द्धनाश्च।" सु. सू. ४६ अ.। "कोषस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः। वृंहणा बहुवर्च्चस्काः वृष्याश्च बलवर्द्धनाः॥" भा.।

कोषा (षिन्)। स्त्री, पुं। पादुकायाम्। श. र.। शुक्रायाम्। शुक्रा। हे. च.। आम्रवृक्षे। श. मा.। पीतघोषायाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोषाम्बा। स्त्री। महाकोषातक्याम्। वृन्ताकलायाम्। प. मु.।

कोषातक्याद्यतैलम्। क्ली। उपदंशे तैलम्। पाठः—"यस्य लिङ्गस्य मांसञ्च शीर्य्यते क्लमिभक्षितम्। तस्य कोषातकीलम्बाबीजनागरसाधितम्। तैलं हन्त्यचिराद्दीरं दुष्टव्रणभगन्दरम्॥" कोषातकी घोषकः (घोषा), लम्बा तिक्तालाबूः। तैलं ४ श. कोषातक्यादिकल्कः १श. वारि १६ श.। रस. र.।

कोषीफला। स्त्री। पीतघोषायाम्।

कोष्ठम्। क्ली। कुष्ठौषधौ। कूड़। गुणाः—उष्णं कटु तिक्तं स्वादु वृष्यं शुक्रकरं कुष्ठविषविसर्पहरम्। वै. निघ.। See कुष्ठम्। पुं। कुक्षौ। स्वकुक्षौ हृदयाद्वस्तिपर्य्यन्ते। मे.। Any viscus. आमाग्निसूत्ररुधिरस्थानादौ। यथा—"स्थानान्यामाग्निपक्वानां सूत्रस्य रुधिरस्य च। हृदुण्डुकः फुस्फुसश्च कोष्ठ इत्यभिधीयते।" स त्रिविधः मृदुः क्रूरो मध्यश्चेति। तत्र बहुपित्तो मृदुः सुदुष्टेनापि विरिच्यते। बहुवातश्लेष्मा क्रूरः, स दुर्विरेच्यः। समदोषो मध्यमः स साधारण इति। तत्र मृदौ मात्रा मृद्वी, तीक्ष्णा क्रूरे, मध्ये मध्या च कर्त्तव्येति। सु. चि. ३३ अ.।

कोष्ठपुष्पः। पुं। चीरमूर्व्वायाम्। वै. निघ.।

कोष्ठभेदः। पुं। तन्नामकरोगे। वै. निघ.।

कोष्ठसन्तापः। पुं। अन्तर्दाहे। रा. नि. व. २०।

कोष्ठागारिका। स्त्री। मृत्तिकाविशेषे। कुमौरे माटी। वै. निघ.।

कोष्ठागारी (इन्)। पुं। प्राणघातककीटविशेषे। कुमौरे पोका। तेन दष्टे सान्निपातिकरोगो जायन्ते। सु. कल्प. ८अ.। See कीटः।

कोष्ठाग्निः। पुं। पाचकाग्निर्नाम यौऽग्निर्जठरे अन्नं पचति। पाचकाग्नि। निदानम्।

कोष्ठाङ्गम्। क्ली। नाभिहृदयादिपञ्चदशविधाङ्गे। च. शा. ७अ.।

कोष्ठिकयन्त्रम्। क्ली। लौहकारस्य धमनयन्त्रविशेषे। कामारेर हापर। लक्षणं—"षोड़शाङ्गुलविस्तीर्णं हस्तमात्रायतं समम्। धातुसत्त्वनिपातार्थं कोष्ठिकं परिकीर्त्तितं॥ परिपूर्णं दृढ़ाङ्गारैरधो वातेन कोष्ठके। मात्रया ज्वालमार्गेण ज्वालयेच्च हुताशनम्॥" अग्नि.।

कोष्ठिका। स्त्री। सूचायाम्। मा.।

कोष्ठेक्षुः। पुं। श्वेतेक्षौ।

कोष्णम्। त्रि। ईषदुष्णे। रत्ना.।

कोहलः। पुं। यवसकृतमद्यविशेषे। यवेर मद। गुणाः—"विदोषघ्नश्च वृष्यश्च कोहलो वदनप्रियः। सु.। कोहलः शुक्रभिर्देशे वाह्लीके क्रियते यवैः।" वाचस्पतिः।

कोहली। स्त्री। कृष्णाख्यसुरायाम्। गुणौ—वृंहणी गुर्व्वी च। वै. निघ.।

कौकिल्यः। पुं। कोकिलाचक्षुषि। वै. निघ.।

कौकुटः। त्रि। कुक्कुटसम्बन्धिनि। वा.चि. ३अ.।

कौकृत्यम्। क्ली। अनुतापे। त्रिका.।

कौक्कुटपुटम्। क्ली। पुटविशेषे। "वितस्तिमात्रके खाते कथितङ्कौक्कुटं पुटम्। षोड़शाङ्गुलके खाते कस्यचित्कौक्कुटं पुटम्॥" भा.।

कौक्कुटिकः। पुं। अदूरप्रेरितात्रे। मे.। पक्षिविशेषे। टोला पक्षी। वै. निघ.।

कौक्कुटिकन्दलः। पुं। सर्पविशेषे। बोड़ा साप। त्रिका.। तत्पर्य्यायः,—भाण्डपुष्पः। चि.।

कौङ्कः (ङ्किणः)। पुं। कौङ्कणदेशे। श. र.।

कौटः। पुं। कुटजवृक्षे। भा. पू. १भ.।

कौटकिकः। त्रि। मांसविक्रेतरि। श. र.।

कौटजः। पुं। इन्द्रयवे। प. मु.। कुटजवृक्षे। कुड़चि गाछ। अ. टी. रा.।

कौटजलेहः। पुं। अर्शोऽधिकारे लेहः। कुटजत्वक् पलशतं जलद्रोणे विपाचयेत्। अष्टभागावशेषन्तु कषायमवतारयेत्। वस्त्रपूतं पचेत्तेन गुड़ात् त्रिंशत्पलानि च। घृतस्य कुड़वं दत्त्वा ततो लेहत्वमागतं। वचाव्योषविड़ङ्गेन्द्रवित्फलाग्निरसाञ्जनं। भल्लातातिविषाविल्वं प्रत्येकञ्च पलं पलं। चूर्णीकृत्य प्रदातव्यं मधुनः कुड़वं तथा। एष लेहः शमयति चार्शो रक्तसमुद्भवम्॥" कुटजत्वक् १०० प. पाकार्थजलं ६४ श. शे. ८ श. पुराणगुड़ः ३० प. घृतं ८प. प्रक्षेपाद्य वचादीनां चूर्णं प्र. पलं, मधु ८ प. अनुपानं घृतं मधु तक्रं जलं दुग्धञ्च। सा. कौ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौटजबीजम्। क्ली। इन्द्रयवे। वृहत्त्रयङ्गादिचूर्णे।

कौटिकः। वि। मांसविक्रेतरि। कसाई। अम.।

कौटिल्यम्। क्ली। चाणक्यमूलके। रा. नि. व. ७। चणकमूलौ।

कौष्टिल्यकः। पुं। अग्निप्रकृतिकीटविशेषे। तेन दष्टे वातनिमित्तजा रोगा जायन्ते। सु.कल्प. ८अ.।

कौटी। स्त्री। कुटजवृक्षे। वै. निघ.।

कौड़विकः। वि। कुड़वपरिमिते। ४ पल। च. द. यक्ष्म. चि. सर्पिर्गुड़े। कुड़वमितबीजवपनयोग्यक्षेत्रे। अ. टी. रा.।

कौणपः। वि। कुणपगन्धौ। च. इ. १८ अ.।

कौण्डिन्या। स्त्री। मांसरोहिण्याम्। वै. निघ.।

कौण्यम्। क्ली। कुणित्वे। कूड़ि। सु. नि. ५अ.।

कौतुकम्। क्ली। भोजनकाले। हे. च.। हर्षे। विवाहसूत्रे। मे.।

कौद्रविकम्। क्ली। Sochal salt. सौवर्चललवणे। सचल लवण। रा. नि. व. ६।

कौनख्यम्। क्ली। कुनखरोगे।

कौन्ती। स्त्री। रेणुकायाम्। रेणुक। भा. म. १भ. ज्व. चि. लाचादितैले।

कौन्तेयः। पुं। अर्ज्जुनवृक्षे। रा. नि. व. ९।

कौप(जल)म्। क्ली। कूपोदके। पातकोद्धृत जल भा.।

कौपीनम्। क्ली। उपस्थे। गुह्यदेशे। अम.। मेखलाबद्ध-परिधेय-वस्त्रखण्डे। कप्नि।

कौबी(वी)रा। स्त्री। भूम्यामलक्याम्।

कौबे(वे)रः। पुं, क्ली। कुष्ठे। कूड़। मद. व. १। (री) उत्तरदिशि।

कौबेरग्रहः। पुं। अश्वजातेर्दुष्टग्रहविशेषे। लक्षणं—"खिन्नाङ्गो वेपमानश्च जानुभ्यां यश्च तिष्ठति। कौबेरग्रहसंजुष्टं तं विद्यात्कष्टजीविनम्॥" न. द. ५७ अ.।

कौमारम्। क्ली। पञ्चवर्षपर्य्यन्ते काले। कौमारं पञ्चमाब्दान्तम्।" रा. नि. व. १८।

कौमारभृत्यम्। क्ली। तन्त्राभिधानतन्त्रे, बालभृत्यायाम्। शिशुचर्य्या। "कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानानाञ्च व्याधीनामुपशमनार्थं।" सु. सू. १अ.।

कौमारी। स्त्री। वाराहीनामकन्दे। रा. नि.व. ७। वंशलोचनभेदे। घृतकुमार्य्याम्। वै. निघ. ज्व. चि.।

कौमुदः। पुं। कार्त्तिकमासे। विक्रा.।

कौमुदी। स्त्री। ज्योत्स्नायाम्। अ.।

कौमुदीजीवनः। पुं। चकोरपक्षिणि। वै. निघ.।

कौमुदीवृक्षः। पुं। दीपवृक्षे। पिलखञ्ज। हारा.।

कौम्भघृतम्। क्ली। शताब्दिकघृते। वै. निघ.। स्थितं वर्षं शतं श्रेष्ठं कौम्भं सर्पिस्तदुच्यते। चक्र.।

कौर्म्मम्। क्ली। विषभेदे। "कूर्म्माकृति भवेत् कौर्म्मम्।" वै.।

कौलत्थः। वि। कुलत्थसम्बन्धिनि। वा. चि. ७ अ.।

कौलत्थीनः। वि। कुलत्थोत्पादके (क्षेत्रादौ)। अ. टी. भ.।

कौलालकम्। क्ली। मृत्पात्रविशेषे।

कौलीनम्। क्ली। गुह्ये। उपस्थे। मे.।

कौलीरा। स्त्री। कर्कटशृङ्ग्यां। काँकड़ाशृङ्गी। रा. नि. व. ६।

कौलेयकः। पुं। कुक्कुरे। हला.।

कौल्माषीणः। वि। कुल्माषोत्पादके (क्षेत्रादौ)। अ. टी. रा.।

कौवलम्। क्ली। Jujube. कोलीफले। कूल। द्विरू. कोषः।

कौवेरम्। क्ली। कुष्ठौषधौ। शब्दर। कूड़।

कौशिकः। पुं। गुग्गुलौ। गुग्गुल। प. मु.। अश्वकर्णशाललतायाम्। लताशाल। रा. नि. व. ९। पेचके। रत्ना.। व्यालि। गाहि। नकुलि। मे.। कोशकारे। श. र.। मज्जायाम्। हे. च.।

कौशिकफलः। पुं। नालिकेरवृक्षे। श. र.।

कौशिका। स्त्री। गन्धिपर्णीक्षुपे। गँठेना। सुरायाम्। वै. निघ.। पानपात्रे। हे. च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौशिकारातिः (कारिः)। पुं। काकै। रा. नि. व. १९।

कौशिकारिः। पुं। काकपक्षिणि। रा.।

कौशिकी। स्त्री। नदीविशेषे। मे.।

कौशिक्यः (क्या)। पुं, स्त्री। शाखोटवृक्षे। शाओड़ा गाछ। रा. नि. व. ९। गुणाः—"पित्तला चोष्णा तिक्ता वातविनाशिनी।" वै. निघ.।

कौशिक्योज्यः। पुं। शाखोटवृक्षे। रा.।

कौशीरम्। क्ली, पुं। नखीनामगन्धद्रव्ये।

कौशे(षे)य(क)म्। क्ली। कृमिकोशोत्थवस्त्रे। रेशमी कापड़। रत्ना.। काशतणे। वै. निघ.।

कौषम्। क्ली। कमले। पद्मे। वै. निघ.।

कौषिकः। पुं। कौशिके। मे.। आहितुण्डिके। रत्ना.।

कौसीद्यम्। क्ली। तन्द्रायाम्। आलस्ये। हे. च.।

कौसुमम्। क्ली। पुष्पाञ्जने। रा. नि. व. २२।

कौसुम्भम्। क्ली, पुं। वनकुसुम्भे। रा.नि.व.४। क्वचिन्माञ्जने।

कौसुम्भतैलम्। क्ली। कुसुम्भबीजोद्भवतैले। कुसुमबीजेर तेल। तच्च कटु सचारं वातघ्नं कफपित्तहरञ्च। वा. टी.। See कुसुम्भतैलम्।

कौसुम्भशाकम्। क्ली। कुसुम्भशाके। गुणाः—कौसुम्भं मधुरं रूक्षमुष्णं श्लेष्महरं लघु। See कुसुम्भपत्रम्।

कौसुम्भशुण्डिकः। पुं। स्वनामख्यातशाली। गुणाः—लघुपाकः वातपित्तघ्नश्च। रा. नि. व. १६।

कौस्तम्। क्ली। दशाब्दिकघृते। रत्ना.।

कौचेयकः। पुं। खड्गे। अ.।

क्रकचः। पुं, क्ली। करपत्रे। करात्। केतक्याम्। ग्रन्थिलतरौ। गाँठेना। मे.। प्रबलहीनमध्यवातादिजनितसन्निपातज्वरे। लक्षणम्—"प्रलापायाससम्मोहाः कम्पमूर्च्छारतिभ्रमाः। मन्यास्तम्भेन मृत्युः स्यात् तत्राप्येतद्विशेषतः। भिषग्भिः सन्निपातोऽयं क्रकचः सम्प्रकीर्त्तितः॥" भा. म. १भ.।

क्रकचच्छदः। पुं। केतकीवृक्षे। केया गाछ। प. मु.।

क्रकचपत्रः। पुं। शाकवृक्षे। शेगुन गाछ। रा. नि. व. ९।

क्रकचपात् (पादः)। पुं। Chameleon. क्रकलासे। गिरगिटे। हारा.।

क्रकचपृष्ठी। स्त्री। (Coius cobojinus.) कवयीमत्स्ये। टेक माछ। हारा.।

क्रकचा। स्त्री। केतकीवृक्षे। केया गाछ। रा. नि. व. १०। होग्गलतणे। होग्ला। रत्ना.।

क्रकणः। पुं। तित्तिरपक्षिणि, क्रकरपक्षिणि। कस्यार पाखी। अम.।

क्रकरः। पुं। क्रकचे। करात्। वंशकरीरे। बाँशेर कोंड़। प. मु.। करीरवृक्षे। उटकटार गाछ। अम.। (Perdix sylvatica.) पक्षिविशेषे। कर्कटिया। हिं कयार। मं करढोंक। तत्पर्य्यायः,—क्रकणः, क्रकणः (अ.), क्रकरः (शब्दर.)। गुणाः—"वातपित्तहरा हृद्या मेध्याग्निबलवर्द्धनाः। लघवः क्रकरा हृद्या तथा वै चीपचक्रकाः॥" सु. सू. ४६ अ.। तन्मांसगुणाः—लघु हृद्यञ्च। रा. नि. व. १९। रक्तपित्ते हितं। सि.यो. र. पि. चि. खण्डखाद्यलौहे।

क्रकराटः। पुं। भरद्वाजपक्षिणि। वै. निघ.।

खुल्लम्। क्ली। नखौनामगन्धद्रव्ये। श. च.।

खुल्लकः। त्रि। खल्वे। अ. टी.।

खेखोरकः। पुं। शब्दकारिणि यष्टिविशेषे। शब्दकारी लाठी। हा.।

खेगमनः। कालकण्ठपक्षिणि। श. मा.।

खेचरः। पुं। पारदे। पक्षिणि। क्ली। खेचराग्ने। वै. निघ.। काशीसे। हिरेकस। र. सा. सं.। संस्कृत-पारदविशेषे। रा.।

खेचरा। स्त्री। आकाशवल्ल्याम्। वै. निघ.।

खेचराञ्जनम्। क्ली। काशीसे। हिरेकस। वै. निघ.।

खेचरान्नम्। क्ली। खेचरिकायाम्। थिचूड़ी। पाकराज.।

खेटः। पुं। कफे। मे.। अश्वे। क्ली। तृणे। श. र.। लगुड़े। चर्म्मे। ढाल।

खेदः। पुं। शोके। हा.। अवसादे। ज.

खेदिनी। स्त्री। अश्वनपर्णीवृक्षे। श. च.।

खेयम्। क्ली। परिखायाम्। अ.।

खेलनम्। क्ली। क्रीड़ने। ह.।

खेलनी। स्त्री। शारिफले। हे.।

खेला। स्त्री। खनामख्यातवृक्षे। केना। गुणाः—मधुरा शीता सन्यदा रुचिकृच्च। रा. नि. व. ५। क्रीड़ायाम्।

खेलिः। स्त्री। वाणे। सूर्य्ये। पक्षिणि। जन्तौ। अज.।

खेसरः। पुं। अश्वतरे। खच्चर। रा. नि. व. १९।

खोङ्गा(ङ्गा)हः। पुं। श्वेतपिङ्गलवर्णाश्वे। हे. च.।

खोटः(कं)। पुं, क्ली। यमक, फुट इति ख्याते रसजारणद्रव्ये। तल्लक्षणं यथा—"खोटकं स्वर्ण-संतुल्यं समावर्त्त्य च कारयेत्। कुक्कुटाण्डनिभं सूतं प्रदु भेदि भवेद्यदा। आवर्ज्जितं पुनस्तद्वत् खोटवद्वरसाकृति। अचयं कठिनं श्वेतं शिखिना मृदुना पचेत्। श्वेतपीतगुरुत्वञ्च मृदुसिक्थक-सन्निभम्। अग्निमध्ये यदा तिष्ठेत् पीटबद्धस्य लक्षणं। नानावर्णसमा स्वच्छी धृती शीघ्रौ जलौकावत्। वर्द्धते सूतको यश्च जलौकाबद्ध-लक्षणम्॥"

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खोटिः (टी)। पुं, स्त्री। कन्दुरुखोटी। च. द. वा. व्या. चि.। पालङ्कोद्वर्त्ते। ग. च.।

खोड़ः (रः) (लः)। वि। खर्ज्जे। अम.।

खोड़कः। पुं। शीर्षे। हिङ्गुले। वि.।

खोड़शीर्षकः। पुं। हिङ्गुले।

खोरकः। पुं। गर्त्तभञ्जरे। गजवै.।

खोलकः। पुं। वल्मीके। उईटिपि। शिरस्त्राणे। पागड़ी। विका.। घूमकीर्षे। सुपारिर खोला। मे.।

खोल्लिः। स्त्री। तूणे। ग. मा.।

खोषाह्वः। पुं। जीवशाके। थोसणा। खोषाह्वः शाकवीरय जीवशाकः प्रवालकः। द्रव्याभि.।

ग।

गगनम्। क्ली। अभ्रधातौ। अभ्र। मेघे। रा. नि. व. २३। कनकसुन्दररसे।

गगनध्वजः। पुं। मेघे। हा.। सूर्य्ये। हे.।

गगनमारकगणः। पुं। अभ्रमारकद्रव्येषु।

गगनसुन्दरः। पुं। यहण्यां रसः। रसः १ तो. गन्धकं २ तो. अभ्रं ८ तो. जलेन वटी कार्य्या। मा. २—४ र.। र. चि.। अन्यः ज्वरातिसारे—टङ्गणहिङ्गुलगन्धकाभ्रं प्र. समम्। चीरिणीरसेन (थिकुई) ३ भावनाः। भैष.।

गगनस्पर्शः। पुं। वायौ। वै. निघ.।

गगनादिलौहम्। क्ली। सोमरोगे हितम्। "गगनं त्रिफला लौहं कुटजङ्कटुकत्रयम्। पारदो गन्धकश्चैव विषटङ्गणसर्जिकाः। त्वगेला तेजपत्रञ्च वङ्गं जीरकयुग्मकं। एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्। तदर्द्धं चित्रकचूर्णं...॥" अभ्र, त्रिफला, लौह, कुड़चि, त्रिकटु, पारा, गन्धक, विष, सोहागार खै, साजिमाटी, गुड़त्वक्, एला, तेजपत्र, वङ्ग, जीरा, कृष्णजीरा प्रत्येकेर चूर्ण समभाग। सर्व्वचूर्णार्द्ध चित्रकमूलचूर्ण। र. सा. सं.।

गगनादिवटी। स्त्री। वातरोगे। अभ्रकपारदगन्धकतामकसुण्डलौहतीक्ष्णलौहखर्णमाक्षिकं एषां प्र. समभागं यष्टीवासकदाचाभृङ्गभाण्डक्काथेन मर्द्दयेत्। मा. २ र.। अभ्र, पारा, गन्धक, तामा, मुण्ड ओ तीक्ष्णलौह, स्वर्णमाक्षिक प्रत्येक समभाग; यष्टिमधुर क्काथ, वासाक्काथ, किस्मिसेर क्काथ ओ भृङ्गराजाण्डक्काथे मर्द्दन। मात्रा २ रति। अनुपान घृत ओ मधु। र. सा. सं.।

गगनाध्वगः। पुं। सूर्य्ये। हे.।

गगनाम्बु (म्भस्)। क्ली। नीहारजले। आकाशवारिणि। गुणाः—त्रिदोषघ्नं बल्यं रसायनं मेध्यं रक्तोष्णं शीतलम् आह्लादकं ज्वरदाहविषघ्नञ्च। सु. सू. ४६ अ.।

गङ्गका (ङ्गा, का)। स्त्री। स्वनामख्यातनद्याम्। तत्पर्य्यायः,—विष्णुपदी, जह्नुतनया, सुरनिम्नगा, भागीरथी, त्रिपथगा, त्रिस्रोताः, भीष्मसूः (अ.), अर्य्यतीर्थं, तीर्थराजः, त्रिदशदीर्घिका, कुमारसूः, सरिद्वरा, सिद्धापगा, खरापगा, स्वर्गरापगा, खापगा, ऋषिकुल्या, हैमवती, खर्व्वापी, हरशेखरा, (हे.), सुरापगा, धर्म्मद्रवी, सुधा, गान्धिनी, नन्दिनी, अलकनन्दा, सितसिन्धुः (जः), सुरसरित् (हला.), पुरन्दरा (हा.), सुरला (हा.), सुरसिन्धुः, सरिताम्बरा, निलिम्पनिर्झरी, पावनी, हिमवत्सुता (के.), अध्वगा, उग्रशेखरा, सिद्धसिन्धुः (त्रिः), मन्दाकिनी, जाह्नवी, पुण्या, समुद्रसुभगा, खर्नदी, सुरदीर्घिका, सुरनदी, खर्धुनी, ज्येष्ठा, शुभा, शैलेन्द्रजा, सुरेश्वरी, भवायना (शब्दर.)। तज्जलगुणाः—शीतं स्वच्छं स्वादु अतिरोचकं पथ्यं पाचकं पावनं तृष्णामोहघ्नं दीपनं प्रज्ञाकरञ्च। रा. नि. व. १४। लज्जालुकायाम्। वै. निघ.।

गङ्गाचिल्ली। स्त्री। चिल्लविशेषे। गांचील। हारा.। तत्पर्य्यायः,—दैवट्टी, विश्वका, जलकुक्कुटी। हा.।

गङ्गाटेयः। पुं। चिङ्गटमत्स्ये। चिंड़ि माछ। तत्पर्य्यायः,—गलानिलः (चि.), गलालिकः, गलाविलः (हे.)। विका.। See चिङ्गटः।

गङ्गाधरक्काथः। पुं। अतीसारे कचटाद्यपर-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामकषाये। "कच्चटदाड़िमजम्बूग्रङ्गाटकपचवर्हिष्ठं। जलधरनागरसहितं गङ्गासपि वेगवाहिनीं कुर्य्यात्॥" काँचड़ा, दाड़िम, जाम, शिङ्गाड़ा (इहादेर) पाता, बाला, मूता, शुँठ प्रत्येक २२॥० ग्र.। भा.।

गङ्गाधरचूर्णम् (बृहत्)। क्ली। अतीसारि औषधम्। मुस्ताश्योणाकमुण्डीधातकीपुष्पलोध्रबालकबिल्वशलाटुमोचरसपाठेन्द्रयव कुटजत्वगास्थिवराहक्रान्तातिविषाणां प्र. चूर्ण समभागम्। मूता, श्योणा, शुँठ, धाईफुल, लोध, बाला, बेलशुँठ, मोचरस, आक्‌नादि, इन्द्रयव, कुड़चिछाल, आम्रास्थि, वराहक्रान्ता, आतइच प्रत्येकेर चूर्ण समभाग। अन्यव्यथा—मुस्तेन्द्रयवमोचरसबिल्वशलाटुधातकीलोध्रास्थि प्र. समभागानि। गुड़ेन सेव्यम्। मूता, इन्द्रयव, मोचरस, बेलशुँठ, धाईफुल, लोधचूर्ण प्रत्येक समभाग। अपरं यथा—मोचरसमुस्तकमुण्डीपाठाश्योणाकधातकीपुष्पाणि प्र. समभागानि। दधिमस्तुना सेव्यम्। मोचरस, मूता, शुँठ, आक्‌नादि, श्योणा, धाईफुलचूर्ण, प्रत्येक समभाग। भा. म. १भ.।

गङ्गापत्री। स्त्री। स्वनामख्यातपत्रशाकविशेषे। सं गङ्गावती। कं वट्टगान्धारी। तत्पर्य्यायः,—पत्री, सुगन्धा, गन्धपत्रिका। गुणाः—कटुः उष्णा वातघ्नी व्रणरोपणी च। रा. नि. व. १०। र. सा. सं. अम्लमारणे। लज्जालुकायाम्। वै. निघ.।

गङ्गापालङ्कः। पुं। वन्यपालङ्कशाके।

गङ्गिका। स्त्री। गङ्गायाम्।

गङ्गुकः। पुं। धान्यविशेषे। सुश्रु.।

गङ्गोदकम्। क्ली। गङ्गाजले।

गच्छः। पुं। वृक्षे। हे. च.।

गजः। पुं। हस्तिनि। अयं कूलचरत्वात्तद्गुणः। नागकेशरवृक्षे। नागेश्वर गाछ। वै. निघ.। गजपिप्पल्याम्। पचतिक्तघृतम्। गजपुटे। प्रयोगा.।

गजकणा। स्त्री। गजपिप्पल्याम्। र. मा.। सा. की. बाहुशालगुड़े।

गजकन्दः। पुं। हस्तिकन्दनामशाकन्दशाके। रा. नि. व. ७।

गजकर्ण (र्णी)। स्त्री। करिकर्णवत्पत्रे कन्दशाकविशेषे। हिं हस्तिकर्णा। सं वहस्त्रीकन्द। गुणाः—तिक्ता उष्णा वातकफहरा पाके स्वादुः शीतज्वरघ्नी पाण्डुशोथक्रिमिप्लीहगुल्मानाहोदरघ्नी वनशूरणवत् ग्रहण्यर्शोघ्नी च। भा. पू. १भ. शाकव.। आखुकर्णीलतायाम्। रा. नि. व. ३।

गजकर्णिका। स्त्री। कर्कटिकायाम्। काँकुड़। वै. निघ.। इन्द्रवारुणीलतायाम्। राखालशशा। रा. नि. व. ३।

गजकुसुमः। पुं, क्ली। नागकेशरवृक्षे तत्पुष्पे च। नागेश्वर गाछ वा ताहार फुल। भैष. सुखरो. चि. अरिमेदा. गुड़ी.।

गजकृष्णा। स्त्री। गजपिप्पल्याम्। भा. रुद्रतैले। "गजकृष्णा कटुर्वातश्लेष्मनुद्वह्निवर्द्धनी। उष्णा निहन्त्यतीसारं श्वासकण्ठामयक्रिमीन्॥" भा.।

गजकेश(स)रः। पुं। नागकेशरे। नागेश्वर। सि. यो. छर्द्दि. चि. एलादिगुड़ी.। "लवङ्गगजकेशरकीलमज्जाः।"

गजकेश(स)रीरसः। पुं। आमज्वरादौ रसः। "शुद्धसूतं विषङ्गन्धं व्योषं त्रिफलमेव च। जयपालसमङ्कृत्वा भृङ्गतोयेन मर्द्दयेत्॥" भा. १ र.। रस. की.।

गजचक्षुः। वि.। विकृतचक्षुषि। टेरा।

गजचिर्भि(र्मि)टः (टा)। स्त्री। इन्द्रवारुण्याम्। राखालशशा, गोरक्षकाड़ु। प. मु.। रा.नि.व.३। च. द. गुल्म. चि.। (टः) गोडुम्बायां। गोमक। विका.।

गजजातिः। स्त्री। हस्तिजातौ। सा त्रिधा भद्रः मन्द्रः मृगश्चेति। रा. नि. व. १९।

गजदघ्नः। पुं। गजपरिमाणे। सुश्रुवी.।

गजदन्तः। पुं। करिदन्ते। हातिर दाँत। वै. निघ.। एतन्मज्जा श्विवघ्नी।

गजदन्तफला। स्त्री। डङ्गरीनामफलशाकलतायाम्। रा. नि. व. ७।

गजदन्तवत्। क्ली। मूलके। वै. निघ.।

गजदन्तिका। स्त्री। हस्तिदन्तायाम्। वा. उ. ३९ अ.।

गजदानम्। क्ली। हस्तिमदे। रा.।

गजद्रुमः (पादपः)। पुं। नन्दीवृक्षे। गम्रा अश्वत्थ। हिं बाखियापिपल। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गजपादः । पुं । स्थलीवृक्षे । वेनिग्रापिपर ।

गजपिप्पली । स्त्री । (Scindapsus officinalis.) Syn. Pothos officinalis. खनामख्यातवृक्षे । गजपिप्पली तें गजपिप्पल । तत्पर्य्यायः,—करिपिप्पली, इभकणा, कपिवल्ली, कपिल्लिका, कपिवल्लिका, श्रेयसी, वसिरः, गजाह्वा (र.), कीलवल्ली, इभौषणा (श.), कुञ्जरपिप्पली (शब्दसा.), वशिरः (अ. टी.), गजौषणा, चव्यफलं, चव्यजा, छिद्रवेदेही, दीर्घवृन्तिः, हैजली, वर्षुखी, स्थूलवेदेही । सा चविकायाः फलमिति केचित् । "चविकायाः फलम्प्राज्ञैः कथिता गजपिप्पली ।" इति । गुणाः—दीपनी पाचनी उष्णत्वाद्रसशोधनी ग्राहिणी कटुष्णा रूक्षा स्वल्पविबन्धिनी च । रा. नि. व. ६ । तत्फलं विष्टम्भि दुर्जरं रूक्षं शीतलं वातकोपनं विपाके मधुरं रक्तपित्तघ्नञ्च । सु. सू. ४६ अ. ।

गजपुटम् । क्ली । औषधपुटनार्थं सपादहस्तपरिमितनिम्नायतवृत्तखाते । ऊर्द्ध १।० हाँत, आयत १।० हाँत । "सपादहस्तमानेन कुण्डे निम्ने तथायते । वनौषधसहस्रेण पूर्णे मध्ये विधारयेत् । पुटनद्रव्यसंयुक्ताङ्गोष्ठिकां सुदृढां सुखे । अधस्तानि करस्थानि अर्द्धान्युपरि निःक्षिपेत् । एतद्गजपुटम्प्रोक्तं ख्यातं सर्व्वपुटोत्तमम् ॥" भा. । "गजप्रमाणगम्भीरं शुषिरं क्रमशस्तं । वितस्तिद्वितयमुखं वितस्तितलं तथा । एवं विधाय यत्नेन विशिरस्कारीरवत् । तस्य पादत्रयं सम्यक् पूरयित्वा वनौषधैः । वैद्यस्य-कोष्ठिकां तत्र स्थापयित्वा ततः पुनः । वनौषधैः संवृणुयादेतद्गजपुटं स्मृतम् ॥" गभीर २ हाँत वा १५० हाँत, ७ विगत तला, २ विगत मूखेर फाँड़ गर्त्त । अचि. । हस्तप्रमाणगर्त्ते यः पुटः स तु गजाह्वयः । इति प्रयोगा. ।

गजप्रिया । स्त्री । शल्लकीवृक्षे । शालविशेष । हे. च. ।

गजबला । स्त्री । गोरक्ष्याम् । गोरखचाकुलिया । "नयति गजबलामूलं ।" च.द. कास.चि. ।

गजभक्षः (क्ष्यः) (क्षः) । पुं । तालवृक्षे । अश्वत्थवृक्षे । रा. नि. व. ८।११ ।

गजभक्षा (क्ष्या) । स्त्री । The gum oil-banum tree. शल्लकीवृक्षे । प. सु. ।

गजमदः । पुं । हस्तिमदे । वै. निघ. ।

गजमदहरणी । स्त्री । शिवलिङ्गिनीलतायाम् । वै. निघ. ।

गजमारणः (मोटनः) । पुं । सिंहे । हारा. । श. मा. ।

गजमुक्ता । स्त्री । करिगण्डस्थमुक्तायाम् । वै. निघ. ।

गजल(लें)ण्डः । पुं । हस्तिविष्ठायाम् । हातीर माद । भैष. कुष्ठ. चि. । सु. चि. ९ अ. ।

गजवल्लभा । स्त्री । गिरिकदलीवृक्षे । वुनो कला । शल्लकीवृक्षे । रा. नि. व. ११ ।

गजवाजिप्रिया । स्त्री । भूमिकुष्माण्डे । भूँइकुमड़ा । वै. निघ. ।

गजवैद्यकम् । क्ली । पालकाप्य(व्य)कृतगजचिकित्साशास्त्रं । चर. ।

गजाख्यः । पुं । चक्रमर्दवृक्षे । चाकन्दा गाछ । रा. नि. व. ४ ।

गजाण्डम् । क्ली । प्रिश्निमूलके । रा. नि. व. ७ ।

गजादनः । पुं । अश्वत्थवृक्षे । र. मा. ।

गजादिनामा । स्त्री । गजपिप्पल्याम् । "गजादिनामाकरहाटकुष्ठैः ।" सु. चि. १८ अ. ।

गजारिः । पुं । गजमादनशल्लकीवृक्षे । "गजारिसल्लसिंहयोः ।" हेमचन्द्रः ।

गजाशनः । पुं । कमलकन्दे । वै. निघ. । अश्वत्थवृक्षे । मद. व. ५ । शालवृक्षे । र. मा. ।

गजाशना । स्त्री । भङ्गायाम् । भाङ, सिद्धि । श. च. । शल्लकीवृक्षे । पद्ममूले । र. मा. । श्रवणवृक्षे । वै. निघ. ।

गजाह्वः । पुं, क्ली । नागकेशरवृक्षे तत्पुष्पे च । च. द. अर्श. चि. बाहुशालगुड़ ।

गजाह्वया । स्त्री । यूथिकावृक्षे । श्वेत यूँई । रा. नि. व. १० । गजपिप्पल्याम् । भा. पू. १भ. ।

गजाह्वा । स्त्री । गजपिप्पल्याम् । "गजाह्वा व्याधिघातका ।" भा. पू. १भ. ।

गजेष्टा । स्त्री । भूमिकुष्माण्डे । रा. नि. व. ७ ।

गजोपकुल्या । स्त्री । गजपिप्पल्याम् । वै. निघ. २भ. ग्रहणी. चि. । भैष. कुष्ठचि. ।

गजोपमः । पुं । कुमार्य्याम् । घृतकुमारी । वै. निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गजोषणा। स्त्री। गजपिप्पल्याम्। रा. नि. व. ५।

गञ्जा (ह्वा) (ञ्जिका)। स्त्री। मद्यभाण्डे। ग्र. र.। मदिराग्टहे। अम.। रत्नखनौ। मे.। गाँजा इति प्रसिद्धे वणिग्द्रव्ये। गुञ्जायाम्। वै. निघ.।

गञ्जायिका। स्त्री। शक्राशने। सिद्धि, भाङ।

गठो(ड़ो)त्थम्। क्ली। साम्भरापरपर्य्याये लवणे। सांभर नवण। रा. नि. व. ६।

गड़ः (कः)। पुं। मत्स्यभेदे। गड़ूई माछ। मे.। गुणाः—मधुरः रूक्षः कषायः शीतः लघुश्च। राज. ३प.। क्ली। साम्भरलवणे। रा. नि. व. ६।

गड़देशजम्। क्ली। साम्भरलवणे। रा. नि. व. ६।

गड़लवणम्। क्ली। साम्भरदेशजलवणे। सांभर नवण। गड़ादिलवणं शुभ्रं पृथ्वीजं गड़देशजं। गड़ोत्थञ्च महारम्भं साम्बरं सम्बरोद्भवम्॥ गुणाः—लवणं ईषदम्लं मलघ्नम् उष्णं दीपनं कफवातार्शोघ्नं कोष्ठशोधनञ्च। रा. नि. व. ६।

गड़ाख्य(दिलवण)म्। क्ली। साम्भरलवणे। रा. नि. व. ६।

गड़िः। पुं। तरुणवृषे। युवा षाँड़। रा. नि. व. १९।

गड़िश्रः। पुं। तन्नामकमत्स्यविशेषे। गुणाः—गड़िश्रो मधुरो ग्राही बल्यो वह्निप्रदो गुरुः। राज. ३प.।

गड़ुः (ड़ूः)। पुं। पृष्ठगण्डौ। कूँज। रा. नि. व. २०। गलगण्डे। पृष्ठगुड़े, स च घाटामस्तकयोर्मध्ये मांसग्रन्थिः। अ. म.। शल्यास्थे। ग्र. र.। किचुलुके। चिका.। मन्यास्तम्भरोगे। वै. निघ.। चि। कुजे। मे.।

गड़ुकम्। क्ली। जलपात्रविशेषे। गाड़ू।

गड़ुरः (लः)। वि। कुजे। कूँजो। श. र.।

गड़ू(खड़ू)पदः। पुं। किचुलुके। केँचो। मं दाणा। अम.।

गड़ेरः (लः)। पुं। मेघे। वि.।

गड़ोत्थम्। क्ली। गड़लवणे। रा.।

गड़ोलः। पुं। गुड़े। उणा.। ग्रासे। हे. च.।

गड्डु(ड्डू)कः। पुं। सौवर्णभूङ्गारे। सोणार गाड़ू। ग्र. र.।

गद्या(द्या)ण(ल)कम्। क्ली। ४८ अथवा ६४ रक्तिकामाने। खोलावती। वैद्यकम्। शाणषट्के शताधिकद्विनवतिरक्तिकासु वा। २ तोला। "गद्याणोभाषकैः षड्भिः। द्विभिः शाणैर्भवेत्तोला षड्भिर्गद्याणकं विदुः॥" तोड़ानन्द.।

गणः। पुं। अजमोदायाम्। राङ्गुनी। मं किरमाणीअोम्बा। वै. निघ.। चोरनामगन्धद्रव्ये। मे.।

गणकर्णिका। स्त्री। इन्द्रवारुण्याम्। रा. नि. व. ३।

गणद्रव्यम्। क्ली। साधारणद्रव्ये। द्रव्यसमूहे।

गणपर्व्वतः। पुं। कैलासपर्व्वते। चि.।

गणपीठकम्। क्ली। वच्चसि। ग्र. च.।

गणरूपः (कः)। पुं। अर्कवृक्षे। आकन्द गाछ। अम.। श्वेतार्कवृक्षे। र. मा.। मन्दारार्के। रक्तार्क। रा. नि. व. १०। See राजार्कः।

गणरूपी (इन्)। पुं। श्वेतार्के। श्वेत आकन्द। र. मा.। अर्कवृक्षे। वै. निघ.। रक्तार्के। रा. नि. व. १०।

गणवतीसुतः। पुं। दिवोदासे। "धन्वन्तरिर्दिवोदासः काशिराजः सुधीश्वरः। पालिकाख्या गणवती करेणुश्चिरासुतः।" पालकाप्ये। चिका.।

गणहासः (कः)। पुं। चोरनामकगन्धद्रव्ये। चोरा इति पश्चिमदेशे। गँठेला। मं गठोला। रा. नि. व. १२। चण्डालकन्दे। अजमोदायाम्। राङ्गुनी। वै. निघ.।

गणिका। स्त्री। यूथिकापुष्पवृक्षे। यूँईफूलेर गाछ। र. मा.। श्वेतयूथिकायाम्। श्वेत यूँई गाछ। रा. नि. व. १०। पीतयूथिकायाम्। वै. निघ.। गणिकारिकायाम्। गणिरि। ग्र. र.। हस्तिन्याम्। जटा.।

गणिकारिका। स्त्री। (Premna serratifolia. Syn. P. Spinosa.) क्षुद्राग्निमन्थे। छोट गणिरि। तें चिरिनेल्लिचेट्टु। तत्पर्य्यायः, —श्रीपर्णः, अग्निमन्थः, कर्णिका, जया (अ.), तेजोमन्थः, हविर्मन्थः, ज्योतिष्कः, पावकः, अरणिः,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वह्निसन्यः, मथनः (र.), जयः (भा.), गिरिकर्णिका (द्रव्याभि.), पावकारणिः (ब्रह्मा.), अग्निमथनः, तर्कारी, वैजयन्तिका, अरणीकेतुः, श्रीपर्णी, कर्णिका, नादेयी, विजया, अनन्ता, नदीजा। गुणाः—कटूष्णतिक्तवातकफशोफघ्नी साग्निमान्द्यार्शोमलविष्टम्भश्रमहरी। रा. नि. व. ९। See अग्निमन्थः। गणिकारीपुष्पवृक्षे। वै. निघ.।

गणिकारी। स्त्री। पुष्पवृक्षविशेषे, कीकसदेशे स्वनामख्या प्रसिद्धे। वासन्तीफूलेर गाछ। सं गणेरी। तत्पर्य्यायः,—काञ्चनिका, काञ्चनपुष्पी, गन्धकुसुमा, अलिमोदा, वसन्तदूती, वासन्ती, मदनमादिनी। गुणाः—अतिसुरभिः त्रिदोषघ्नी दाहशोषहरा कामीदीपनी च। रा. नि. व. १०। गणिकारिकायाम्।

गणेरुः। पुं। कर्णिकारवृक्षे। कनिकाफूलेर गाछ। पारिभद्रवृक्षे। वै.निघ.। स्त्री। हस्तिन्याम्। मे.।

गणेरुकः (का)। पुं, स्त्री। गणिकारिपुष्पवृक्षे। वै. निघ.।

गणेशः (कुसुमः)। पुं। रक्तकरवीरवृक्षे। रा. नि. व. १०।

गणेशप्रियः। पुं। रक्तकरवीरे। "गणेशप्रियमूलानि।" अर्कप्रकाशः।

गणेशभूषणम्। क्ली। सिन्दूरे। रा. नि. व.१३।

गणोत्साहः। पुं। गण्डके। गण्डार। चिका.।

गण्डः (का:)। पुं। खड्गिनि। गण्डार। मे.। कपोलदेशे। गाल। रा. नि. व. १८। रोगविशेषे। "निबद्धः श्वयथुर्यस्य सुप्तवत्प्रभवत्यपि गण्डे। महान्वा यदि वा क्षुद्रस्तं गण्डमिति निर्दिशेत्॥" सु. नि. ११ अ.। करिकपोले। अम.। अण्डौ। चिह्ने। पिटके। मे.।

गण्डकर्णः। पुं। वाह्यदीर्घैकपालिकर्णे। सु. सू. १६ अ.।

गण्डकारी। स्त्री। वराहक्रान्तायाम्। वराहक्रान्ता। श्वेतलज्जालुकायाम्। लज्जावती। र. मा.। खदिरीवृक्षे। अम.। श. च.।

गण्डकाली। स्त्री। खदिरीवृक्षे। अम.। काकजङ्घायाम्। केयोठेङा। शल्लकीवृक्षे। वै.निघ.।

गण्डकी। स्त्री। इक्षुदण्डे। आख। नकुल. १२ अ.। स्वनामख्यातनदीविशेषे। मे.।

गण्डकुसुमम्। क्ली। गजदन्ते। हारा.।

गण्डगात्रम्। क्ली। (Annona squamosa.) आतापिफले। आता, नोना। हिं शरीफा। सं शीताफल। गुणाः—"गण्डगात्रं हिमं वृष्यं वातपित्तनिसूदनं। श्लेष्मलं तर्षशमनं वान्त्यतीक्ष्णनिपीडनम्॥" अवि.। श. च.।

गण्डगोपालिका। स्त्री। आम्रवाटिकाख्यकीटविशेषे। आम्पोका। हिं गण्डगुबारि। भा.।

गण्डदूर्व्वा। स्त्री। जलोपरिजायमानदूर्व्वाविशेषे। दूर्व्वाविशेष, गाँटे दूर्व्वा। हिं गाण्डरि दुविपाच। सं गण्डरदूर्वा गाढ़ीहरियाली। कं मीनगत्त। तत्पर्य्यायः,—गण्डाली, अतितीव्रा, मत्स्याक्षी, ग्रन्थिला, ग्रन्थिपर्णी, वारुणी, मीननेत्रा, श्वासघ्नि:, सूचिपत्रा, श्यामकान्ता, जलस्था, शकुलाक्षी, कलाया, चित्रा। गुणाः—मधुरा शीतला वातपित्तज्वरघ्नी द्वन्द्वदोषघ्नी श्रमतृष्णाश्रमघ्नी च। रा. नि. व. ८। "गण्डदूर्व्वा हिमा लीढ्रावित्तो ग्राहिणी लघुः। तिक्ता कषाया मधुरा वातश्लेष्मविषापहा। दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा॥" भा.।

गण्डपोलिका। स्त्री। कीटभेदे। गण्डुआ।

गण्डप्रपाली। स्त्री। कीटविशेषे।

गण्डफलकः। पुं। प्रशस्तगण्डस्थले। प्रशस्त गाल। वै. निघ.।

गण्डमाला। स्त्री। Inflamation of the glands of the necks &c. स्वनामख्यातगलरोगविशेषे। गण्डमाला। तस्य सम्प्राप्तिरूपे—"कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु। मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिश्च गण्डैः॥" मा. नि.। "मेदस्याः कण्ठमन्याचकक्षावङ्क्षणगा मलाः। सवर्णान् कठिनान् स्निग्धान्वार्त्ताकामलकाकृतीन्। अवगाढान् बहून् गण्डान् चिरपाकांश्च कुर्व्वते। पच्यन्ते ऽल्परुजस्त्वचे स्रवन्त्यन्येऽतिकण्डुराः। नश्यत्यन्ये भवत्यन्ये दीर्घकालानुबन्धिनः। गण्डमालापची चेयं दूर्व्वेव चयद्वद्विभाक्। तां त्यजेत् सज्वरच्छर्दिपार्श्वरुक्सपीनसाम्॥" वा. उ. २९ अ.। "छर्द्दिर्विरेचनं स्वेदो नस्यं धूमः शिराव्यधः। अग्निकर्म्म क्षारयोगः प्रलेपो लङ्घनानि च। पुराणघृतपानञ्च जीर्णलोहितशालयः॥" इति पथ्यापथ्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गण्डमालिका। स्त्री। गण्डमालायाम्। लज्जालुकायाम्। रा. नि. व. ५।

गण्डरोगः। पुं। अश्वस्य सुखरोगभेदे। गण्डाभ्यन्तरगो गण्डः गण्डरोग इति स्मृतः।" ज द. २९ अ.।

गण्डशैलः। पुं। ललाटे। हे. च.।

गण्डस्थलम्। क्ली। कपोलदेशे। वै. निघ.।

गण्डाङ्गः। पुं। खड्गिनि। गण्डार। अ. च.।

गण्डारिः। पुं। कोविदारवृक्षे। रक्तकाञ्चन गाछ। भा.। सत्यविशेषे। वै. निघ.।

गण्डारी। स्त्री। सञ्जिष्ठायाम्। के.।

गण्डालजो। स्त्री। गण्डजरोगे। लक्षणं—"गण्डालजी स्थिरः शीफः गण्डे दाहज्वरान्वितः॥" वा. उ. २१ अ.।

गण्डालिनी (ली)। स्त्री। गण्डदूर्व्वायाम्। रा. नि. व. ८। श्वेतदूर्व्वायाम्। अम.। सर्पाख्यायाम्। सुगन्ध रास्ना। भा.।

गण्डास्थि। क्ली। कपोलास्थिद्वये। च. शा. ७ अ.। सु. शा. ५ अ.।

गण्डिः। पुं। चपुषे। कण्डमणौ। तत्प्रशाखायाम्। वै. निघ.। तरुकाण्डे। हे. च.।

गण्डिरिका। स्त्री। क्षुद्रोवृक्षे। चक्र.।

गण्डीरः। पुं। शाकविशेषे। गण्डिनी, शालिञ्च, शमठ शाक, शुनछिया। अ. टी. भ.। च. सू. ४ अ.। सञ्जिष्ठायाम्। क्षुद्रोवृक्षे। रा. नि. व. ८। कटुशूरणे। वै. निघ.।

गण्डीराद्यतैलम्। क्ली। सप्तलकिटिभादिकुष्ठरोगेषु हितम्। "गण्डीरिकाचित्रकभार्कवार्क-कुष्ठद्रुमत्वग्लवणैः समूवैः। तैलम्यचेत्".....। तैल ४ श. गोमूत्र १६ श.। कल्क—शूकशौक्रीर वा सञ्जिष्ठा, चित्रकमूल, भृङ्गराज, आकन्द-आटा, कुड़, कुटजत्वक् वा सोणालुछाल एवं सैन्धव लवण मिलित १ श.। च.द.।

गण्डीरिका (री)। स्त्री। क्षुद्रोवृक्षे। मनसा सिजु, तेकाँटा सिजु। रा. नि. व. ८। च. द. गण्डीराद्यतैले। सञ्जिष्ठायाम्। प. मु.। शाकविशेषे। भा. म. प्रसेह. चि.। इक्षौ। रक्तकाञ्चनवृक्षे। वै. निघ. संग्रहणी. चि. चाङ्गेरीघृते।

गण्डुः। पुं, स्त्री। गल्यौ। वै. निघ.। उपधानै। जटा.।

गण्डूपदः। पुं। किचुलुके। केँचो। अम.।

गण्डूपदभवम्। क्ली। शीषके। हे. च.।

गण्डूपदाद्यतैलम्। क्ली। व्रणरोगे हितम्। कटुतैल ४ श. पाकार्थजल १६ श. कल्कार्थगण्डूपदः (केँचो) १ श.। अथवा कटुतैल १ श. कल्कार्थगण्डूपददशकं (केँचो १०टा) च. द.।

गण्डूपदी। स्त्री। जलपिप्पल्याम्। वै. निघ.। क्षुद्रकिचुलुकायाम्। अम.। तत्पर्य्यायः,—शिखी (अ.), सिखी (अ. टी. भ.)।

गण्डूली। स्त्री। गण्डदूर्व्वायाम्। वै. निघ.।

गण्डूषः (धारणं)। पुं, क्ली। चुलुके। गण्डूष। स्नेहक्षीरकषायादिद्रवैर्मुखापूरणं गण्डूषः। आपूर्य्य च सुखेन धारणं गण्डूषधारणमुच्यते। तस्य द्रव्यमात्रा द्रवद्रव्यं पलमात्रं सूक्ष्मचूर्णस्य च कोलपरिमाणम्। तद्धारणमात्रा—"आसञ्चार्य्या तु या मात्रा गण्डूषे सा प्रकीर्त्तिता।" च. द.। तच्च गण्डूषधारणं तावत्कार्य्यं यावत्कफपूर्णास्यता दीर्घच्छेदः नेत्रघ्राणसुखित्व भवेत्। गण्डूषस्तुविधः स्नेहनशमनशोधनरोपणभेदेन। "स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतैः प्रसादनः। पित्ते कटुम्लवणैरुष्णैः संशोधनः कफे। कषायतिक्तमधुरैः कटुम्ली रोपणो व्रणे। इति। द्रव्याद्रवेषु चूर्णेषु च गण्डूषे कोलमात्रकम्। कर्षप्रमाणः कल्कस्य कवले दीयते बुधैः। धार्य्यन्ते पञ्चमाद्यर्षाङ्गण्डूषाः कवलादयः। व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवं। इन्द्रियाणां प्रसादश्च गण्डूषे विधृते भवेत्॥" भा.। आसञ्चारी मुखे पूर्णे गण्डूषः कवलोऽन्यथा। द्रवेषु द्रव्याच्चूर्णं हि गण्डूषे कर्षमात्रकम्॥ पलमात्रं द्रवं सर्व्वं गण्डूषे दापयेद्बुधः। द्रवेण कार्य्यो गण्डूषः कल्केन कवलः स्मृतः। कल्कः शुष्करूपः स्यान्न तु तूष्णं प्रदापयेत्॥ एकद्वित्रिचतुःपञ्चवारान् कुर्य्यादनालसः।" करिगण्डाद्यभागे। प्रकृतिपरिमिते। वै.।

गण्डूषा। स्त्री। गण्डूषे। अ.।

गण्डोलः। पुं, क्ली। गुड़े। विका.। शर्करायाम्। ग्रासे। वै. निघ.।

गतशोकः। पुं। अशोकवृक्षे। वा. सू. १५ अ. रोध्रादि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गतसन्धकः । पुं । निर्मद-हस्तिनि । श्र० ।

गतार्त्तवा । स्त्री० । निवृत्तरजस्कायां वृद्धायां स्त्रियाम् । रा० नि० व० १८ ।

गतासूः । वि० । मृते ।

गतिः (क्तः) । स्त्री, पुं । नाडीभेदे । नाली । नाड़ीव्रणे । मे० । अश्वस्य गतिविशेषे । घोड़ार चाल, कदम । प्र० । तद्यथा—"सङ्कीर्णा विकट-भ्रष्टावक्रा सौष्ठववर्जिता । अत्युद्धा बलिता चैव वाजिनां निन्दिता गतिः ॥ षोड़शच्छोटिकाभिस्तु करवेष्टितजानुभिः । शतं त्रिगुणितङ्कृत्वा हस्तानां पुनरेति यः ॥ स शीघ्रगतिरित्युक्तो वाजी धन्य-स्तपोधनैः । दश हीना भवन्त्येते मध्यमाधमगा हयाः ॥ दूरमुत्क्षिप्य यः पादांस्तताङ्गारान् स्पृशन्निव । पुनर्याति सुसंहृष्टो वाजी भद्रगतिस्तु सः ॥ पूजिता हयमातङ्गसिंहशार्दूलगामिनः । अतोऽन्य-गतयो नेष्टाः सर्व्वदैव तुरङ्गमाः ॥" ज० द० ७अ० । "गतयः षड्विधा धाराः स्खलितं रेचितं प्लुतम् । धौरितकं वलितञ्च तासां लक्ष्म पृथक् पृथक् ॥" इति शुक्रः । "धौरितं वलितं प्लुत्युत्तेजितौत्तेजितानि च । गतयः पञ्च धाराख्यास्तुरङ्गानां क्रमादिमाः ॥" हे० च० । "गतिः प्लुता चतुष्का च तद्वन्मध्यजवापरा । पूर्णवेगा तथा चान्या पञ्च धाराः प्रकीर्त्तिताः ॥" "गतिरेका प्लुता चास्य चातुरीया द्वितीयका । वेगसन्धिस्तृतीया च धारा वेगवती तुरी ॥ धारा तु पञ्चमी प्रोक्ता न शृणोति न पश्यति । सर्व्वकर्म्मक्षतो वाजी तस्मात्तां परि-वर्ज्जयेत् ॥" नकुल० ।

गतिला । स्त्री० । नदीविशेषे । उ० ।

गदम् । क्ली, पुं । विषे । कुष्ठौषधौ । कूड़ । रा० नि० व० ६।१२ । वै० निघ० अन्तकसन्निपातचि० । रोगे । रा० नि० व० २० ।

गदघ्नः । पुं । नन्दीवृक्षे । वै० निघ० ।

गदनिश्चयः । पुं । माधवीय-रोगनिश्चायकग्रन्थे ।

गदसुरारिः । पुं । प्रौढ़ामज्वरे रसः । "रस-बलिश्रिललौहव्योषतासाणि तुल्यान्यथ सदरदनागं भागमितत् प्रदिष्टं, भवति गदसुरारिश्चास्य गुञ्जाद्वयं ।" रस, गन्धक, मनछाल, लौह, त्रिकटु, ताम्र, हिङ्गुल, शीषा प्रत्येक समभाग । र० सा० सं० ।

गदविनोदनिघण्टुः । पुं । वैद्यकनिघण्टु भेदे ।

गदहरः (री (इन्)) । पुं । वैद्ये । वै० निघ० ।

गदा । स्त्री० । पाटलवृक्षे । श्र० च० ।

गदाख्यम् । क्ली । कुष्ठे । कूड़ । र० मा० ।

गदागदी । पुं द्वि० । अश्विनीकुमारौ । विका० ।

गदाग्रणीः । पुं । क्षयरोगे । रा० नि० व० २० ।

गदाम्बरः । पुं । मेघे ।

गदायुधः । पुं । लगुड़े । लाठी ।

गदारातिः । पुं । औषधे । रा० नि० व० २० ।

गदार्त्तिका । स्त्री० । गोजिह्वायाम् । पाथर कूचि । वै० निघ० ।

गदाह्व(य)म् । क्ली । कुष्ठे । कूड़ । श्र० र० ।

गदी (इन्) । वि । रोगिणि । वै० निघ० ।

गन्नदः । पुं । वातव्याधिविशेषे । तोत्ला । सु० सू० १अ० । See मिन्मिनः ।

गद्याणः । पुं । षट्माषके । कालिङ्ग० ।

गद्यान(ल)कम् । क्ली । अष्टचत्वारिंशद्गुञ्जा-माने । लीला० । चतुःषष्टिक-गुञ्जामाने । के० ।

गन्ता । वि । संवरणशीले । सु० शा० ३अ० ।

गन्त्री । स्त्री० । गोशकटे । अ० । गरुर गाड़ी ।

गन्धम् । क्ली । अगुरुणि । कृष्णागुरुणि । रा० नि० व० १२ ।

गन्ध (क्तः) । पुं । (Sulphur.) स्वनामख्यात-खनिजोपधातौ । गन्धक । हिं गन्धक । फार्शि गोगिर्द । तत्पर्य्यायः,—गन्धाश्म, सौगन्धिकः (अ०), गन्धिकः, सुगन्धिकः (अ० टी०), गन्ध-पाषाणः, पामाघ्नः (र), पामारिः, शुल्वारिः (हे), गन्धी (शब्दर०), गन्धमोदनः, पूतिगन्धः, वरः, सुगन्धः, दिव्यगन्धः, गन्धः, रसगन्धकः, कुष्ठारिः, क्रूरगन्धः, कीटघ्नः, शरभूमिजः । "श्वेतद्वीपे पुरा दैत्या क्रीड़न्त्या रजसाप्लुतं । दुकूलं तेन वस्त्रेण स्नातायास् चीरनीरधौ । प्रस्रुतं यद्रजस्तस्माद्गन्धकः समजायत ॥" भा० । स च रक्तपीतश्वेतकृष्ण-त्वात् चतुर्विधः । पीतः औषधेषु, श्वेतः चर्म्म-रोगेषु वाह्यप्रयोगेषु च व्यवहार्य्यः । र० सा० सं० । "चतुर्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः । रक्तो हंसक्रियासूक्तः पीतश्चेतौ रसायने । व्रणादि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेपने श्वेतः कृष्णः श्रेष्ठः सुदुर्लभः ॥ गुणाः—कटुकः वीर्य्योष्णस्तुवरः सरः। पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित्। हन्ति कुष्ठत्रयप्लीह-कफवातान् रसायनः॥ अशोधितो गन्धक एष कुष्ठं करोति तापं विषमं शरीरे। शोषञ्च रूपञ्च बलं तथौजः शुक्रं निहन्त्येव करोति चास्रम्॥" भा. पू. १भ.। तच्छुद्धिः—"लौहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत्। तप्ते तस्य समानञ्च निः-क्षिपेद् गान्धकं रजः। विद्रुतङ्गन्धकं ज्ञात्वा दुग्ध-मध्ये निधापयेत्। एवं गन्धकशुद्धिः स्यात्सर्व्व-कार्य्येषु योजयेत्॥" एवं त्रिफलाजलभृङ्गराज-खरसादौ निःक्षिपेदिति मतान्तरम्। सा. कौ.। शुद्धगन्धकगुणाः—"शुद्धगन्धो हरेद्रोगान् कुष्ठमेतुज्व-रादिकान्। अग्निकारी महानुष्णो वीर्य्यवृद्धिं करोति च॥" र. मा. सं. ५ अ.। आमोदे। विश्व.। क्षुद्ररोगे। वै. निघ.। शोभाञ्जनवृक्षे। श. र.। गन्धरसे। वै. निघ.।

गन्धककज्जलिः। पुं। सन्निपातज्वरे देयः। पाठः—"कण्टकारी सिन्धुवारस्तथा नाटकरञ्जकं। अमीषां रसमादाय कृत्वा खर्परखण्डके। प्रक्षिप्य गन्धकं तत्र ज्वालां मृदग्निना दहेत्। गन्धके स्नेह-तापन्ने पारदं तत्समक्षिपेत्। मिश्रीकृत्य ततो द्राभ्यां द्रवं तमवतारयेत्। आमर्द्दयेत्तथा तन्तु यथा स्यात् कज्जलप्रभम्। ततस्तु रक्तिकामस्य जीरकस्य च माषकं। माषैकं लवणस्यापि पर्णे कृत्वा प्रदापयेत्। ज्वरे त्रिदोषजे घोरे जलमुष्णं पिबेदनु॥" रस. र.।

गन्धकतैलम्। क्ली। कर्णनाड्यां हितम्। "निशागन्धपले द्वे तु कटुतैलं पलाष्टकं। धूर्त्तपत्र-रसे सिद्धं कर्णनाड़ीजिदुत्तमम्॥" कटुतैलं ८ प. धुस्तूरपत्ररसः ८ प.। कल्कः—हरिद्रा १ प. गन्धकः १ प. एकत्र पचेत्। रस. र.।

गन्धकद्रावकम्। अकीकृतगन्धकविशेषे। आ.। See गन्धद्रावम्।

गन्धकन्दकः। पुं। कशेरौ। रा. नि. व. ८।

गन्धकली। स्त्री। प्रियङ्गौ। च. द. विष. चि.। चम्पककलिकायाम्।

गन्धकस्तुरिका। स्त्री। स्वनामख्यात-गन्ध-द्रव्यविशेषे।

गन्धकारी। स्त्री। श्वेतलज्जालुके। शल्लकी-वृक्षे। वै. निघ.।

गन्धकाष्ठम्। क्ली। अगुरुकाष्ठ। विका.। श्वेतरक्तचन्दने, ईषत्पीतचन्दने। रा. नि. व. १२। कृष्णागुरुणि। वै. निघ.।

गन्धकी। स्त्री। सल्लक्याम्। शालूके। च. द. वा. व्या. एकादशग्रहणी. प्र. तैले।

गन्धकुटी। स्त्री। सुरामांस्याम्। रा. नि. व. १२।

गन्धकुसुमा। स्त्री। कोङ्कणदेशे ख्याते गणि-कारीपुष्पवृक्षे। रा. नि. व. १०।

गन्धकेलिका। स्त्री। कस्तुर्य्याम्। रा. नि. व. १२। गन्धमालत्याम्। वै. निघ.।

गन्धकोलिका। स्त्री। गन्धमालतीतुल्ये गन्ध-द्रव्यविशेषे। गुणाः..."स्निग्धोष्णा कफवातिका सुगन्धा गन्धकोलिका। गन्धकोलिकया तुल्या विज्ञेया गन्धमालती॥" भा. क. व.।

गन्धखेड़(क)म्। क्ली। गन्धवीरणे। गन्ध-वेणा। तत्पर्य्यायः,—गन्धवीरणं, भूतृणं, रौहिषं, गीमयप्रियं (र.), गन्धतृणं, सुगन्धभूततृणं, सुरसः, सुरभिः, सुगन्धिः, सुखवासः। एतच्च सुगन्धि ईषत्तिक्तं रसायनं स्निग्धं मधुरं शीतलं कफपित्त-श्रमहरञ्च। रा. नि. व. ८।

गन्धगर्भः। पुं। बिल्ववृक्षे। वै. निघ.।

गन्धगृह्या। स्त्री। सुरामांस्याम्। वै. निघ.।

गन्धग्राही। स्त्री। नासिकायाम्। वै. निघ.।

गन्धचन्दनम्। क्ली। सल्लरचन्दने। श्वेत-चन्दने।

गन्धचेलिका (लो)। स्त्री। लताकस्तुर्य्याम्। प. मु.। कस्तूर्य्याम्। मृगनाभि। विका.। जवादि-कस्तूर्य्याम्। खाटाशी। वै. निघ.।

गन्धजातम्। क्ली। तेजपत्रे। श. र.।

गन्धज्ञा। स्त्री। नासायाम्। हे. च.।

गन्धतण्डुलः। पुं। सुगन्धशालौ। रा. नि. व. १६।

गन्धतिरियः। पुं। तिरियनाम-शालिधान्य-विशेषे।

गन्धतुलसी। स्त्री। सुगन्धतुलसीवृक्षे। स्थूल-तुलसी, गोलापतुलसी। प. मु.।

गन्धतूर्य्यम्। क्ली। वाद्यविशेषे। तत्पर्य्यायः,—रणतूर्य्यं, महास्वनः (शब्दर.)।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्धतृणम्। क्ली। Andropogon schoenanthus.) खनामख्याततृणे सुगन्धभूतृणे वा। गन्धतृण, सुगन्धि तृण। गुणाः—सुगन्धि ईषत्तिक्तं रसायनं मधुरशीतं कफपित्तश्रमघ्नञ्च। रा. नि. व. ८। वालके। वै. निघ.।

गन्धतैलम्। क्ली। पक्वतैलविशेषे। आवर्त्तमानदुग्धे गन्धकरजो दत्त्वा तज्जातदधिजं घृतं गन्धतैलमुच्यते। इदं गलत्कुष्ठे लेपनभक्षणाद्धितम्। "आवर्त्तमाने पयसि दत्त्वा गन्धकजं रजः। तज्जातदधिजं सर्पिर्गन्धतैलं वदन्ति हि। गन्धतैलं गलत्कुष्ठं हन्ति लेपाच्च भक्षणात्॥" अचि.। सतान्तरं यथा—"अर्कक्षीरैः स्नुहीक्षीरैर्बस्त्रं लिप्यन्तु सप्तधा। गन्धकं नवनीतेन पिष्ट्वा वस्त्रं प्रलेपयेत्। तद्वर्त्तिर्ज्वालिता दग्धे घृता धार्य्या लघौसुखी। तैलं पतत्यधः पाचे ग्राह्यं योगेषु योजयेत्॥" भैष.। अन्यत् भृङ्गरोगे हितम्। सु. चि. ३अ. स्तृग्यं। अपरं सव्रणभग्नाधिकारे। चतुःशरावौ चितक्षणतिलान् गृहीत्वा वस्त्रेण पोट्टलीबद्धान् कृत्वा स्रोतोजले निमज्य रात्रौ स्थापयेत्। ततो दिवसे आतपे शोषयेद्दिनसप्तकं यावत्। तत्तिलतुल्यपरिमाणे गव्यदुग्धे रात्रौ तिलान् प्रक्षिप्य दिवा प्रसार्य्य आतपे शोषयेत्। तदनुभाव्यद्रव्यसमयष्टिमधुकाद्येन ततः पुनः क्षीरेण विभाव्य शोषयित्वा चूर्णयेत्। अथ काकोल्यादिचूर्णं तिलचूर्णचतुर्थांशं वा समं वा गृहीत्वा तिलचूर्णेन मिलयेत्। ततः एलादिगन्धद्रव्यशतं क्षीरं तावन्मानं ग्राह्यं यावता पीड़नार्थं समस्तं तिलादिचूर्णम् आर्द्रं भवेत्। (इति ब्रह्मोपदेशः।) एवंविधं निष्पीड़ितं तैलं काकोल्यादिशतपुष्पान्तैस्तथा एलादिगुच्छाटकान्तैः कल्कद्रव्यैः तैलचतुर्गुणजलेन यथाविधि पाचं। क्षीरशुक्ला क्षीरविदारी, अनन्ता दूर्व्वा, मधूलिकं नर्कटहस्तिलतम्। च. द.।

गन्धत्वक्। स्त्री। एलवालुके। रा. नि. व. ४।

गन्धदला। स्त्री। अजमोदायाम्। वनयमानी। रा. नि. व. ६।

गन्धद्रव्यम्। क्ली। पक्वतैलसुवासनद्रव्ये। गन्धमशला। तानि यथा—"एलाचन्दनकुङ्कुमागुरुसुराकक्कोलमांसी-शटीश्रीवासच्छदगन्धिपर्णशुण्ठभृत्क्षौणीध्वजशीरकम्। कस्तूरीनखपूतिगन्धजलसुक्षौद्रलवङ्गादिकं गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु॥" च. द.। अन्यच्च यथा—कुष्ठञ्च नालिका पूतिरुशीरं श्वेतचन्दनं। जटामांसी तेजपत्रं नखी सुगन्धः फलं। कक्कोलं कुङ्कुमक्षौद्रं लताकस्तूरिका वचा। सूक्ष्मैला गुरुमुस्तञ्च कर्पूरं गन्धिपर्णकम्। क्षीवासः कुन्दुरुदेवकुसुमङ्गन्धमालती च। सिल्हको मिसिका मेथी भद्रमुस्तं तथा शटी। जातीकोषः शैलजञ्च देवदारु सजीवकम्। एतानि गन्धद्रव्याणि॥" तच्छुङ्गादिकं पञ्चपल्लवतोयेन भवति। "आम्रजम्बूकपित्थानां बीजपूरकबिल्वयोः। गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम्॥" भैष.। गुणाः—रुच्यं दीपनं पाचनं सुखदौर्गन्ध्यहरं मेदःश्रमघ्नञ्च। रा. नि. व.।

गन्धद्रावकम्। क्ली। अकीकृतौषधविशेषे। द्रावकविशेष। साधनविधिः यथा—"काशीषं गन्धकं वापि सन्दहेद् यन्त्रयोगतः। सौरकञ्चापि (सोरा) सन्दह्य द्वयोर्धूमं विमिश्रयेत्। शीशपात्रेऽम्बुवाष्पेण द्रावकं तेन जायते॥ निर्ज्जलं तन्न सेवेत परं दाहकरं हि तत्। चतुर्दशगुणैस्तोयैर्युतं बिन्दुमितं पिबेत्॥" अचि.।

गन्धधूमजः। पुं। स्वादुनि अगुरुसारे। स्वादु अगुरु। रा. नि. व. १२।

गन्धधूलिः (लो)। स्त्री। कस्तूर्य्याम्। हे.च.।

गन्धनकुलः। पुं। कुच्छुन्दर्य्याम्। छुँचो। हारा.।

गन्धनाकुली। स्त्री। रास्नायाम्। अम.। (Ophioxylon serpentinum.) नाकुलीनामकन्दशाकभेदे, गन्धरास्नायाम्। सुगन्ध नाकुली, गन्धरास्ना। हिं नाइ। तत्पर्य्यायः,—महासुगन्धा, सुवहा, सर्पाक्षी, फणिहन्त्री, नकुलाह्वा, अहिभुक्, विषमर्द्दनिका, अहिमर्द्दनी, विषमर्द्दनी, महाहिगन्धा, अहिलता। गुणाः—"नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्। भोगिलूताहयिकाखुविषज्वररक्तमिश्रणान्॥" भा.। कटुतिक्तोष्णा विदीपघ्नी नकुल्या ईषच्छेष्टा च। रा. नि. व. ६।

गन्धनामा (म्नो)। पुं। रक्तपुष्पतुलस्याम्। सं सुवासिक औषधिविशेष। र. मा.। स्त्री (म्नी)। तन्नासकत्वग्रोगभेदे। त्वग्गत फोड़ा। "तादृशी सहती लेखा गन्धनामेति कीर्त्तिता।" वा. उ. ३१ अ.। लक्षणं यथा—"एकामेतादृशीं दृष्ट्वा पिड़कां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्फोटसन्निभं। त्वग्जातां पित्तकोपिन गन्धनाम्नीं प्रचक्ष्यते॥" भा. नि.। भा. म. ४भ.।

गन्धनालिका (ली)। स्त्री। नासिकायाम्। त्रिका.।

गन्धनिलया। स्त्री। नवमल्लिकायाम्। सं वटमोगरी। श. च.।

गन्धनिशा। स्त्री। गन्धहरिद्रायाम्। आम-आदा। सं आंबेहलद। रा. नि. व. ६।

गन्धपत्र(क)म्। क्ली। तेजपत्रे। वै. निघ. अर्थः. चि. कनकार्णवरसे। सगन्धपत्रविशेषे। पचापात। "गन्धाख्या सौरभेयी च गन्धपत्रं नपुंसकं।" गुणाः—गन्धपत्रं वातहरं शीतलं वह्निवर्द्धनम्। रा. नि. व. १०। प्रसारणीपत्रे। गन्धभादुलेर पाता। सुदर्शनचूर्ण. ज्व. चि.। पुं। श्वेततुलस्याम्। मरुवकवृक्षे। गन्धतुलसी, नागदना इति केचित्। वर्व्वरे। काल बाबुई। रा. नि. व. १०। नागरङ्गवृक्षे। बिल्ववृक्षे। रा. नि. व. ११।

गन्धपत्रा (त्रिका) (त्री)। स्त्री। सालवे प्रसिद्धगन्धपलाश्याम्। पलाशनाश इति दाक्षिणात्याः। शटीविशेष, गन्धशटी, आम आदा। अजमोदायाम्। वनयमानी। रा. नि. व. १०। गङ्गापत्र्याम्। पत्रशाकविशेष। रा. नि. व. १०। अश्वगन्धायाम्। अश्वष्टायाम्। आकनादि। रा. नि. व. ४।

गन्धपर्णम्। क्ली। काकपुष्पे।

गन्धपर्णी। स्त्री। अश्वष्टायाम्। अशाड़ा।

गन्धपलाशजा (शिनी)। स्त्री। वंशलोचनभेदे। वै. निघ.।

गन्धपलाशिका (शी, सी)। स्त्री। (Curcuma amhaldi zerumbet.) गन्धशट्याम्। तन्नामकसुगन्धद्रव्ये। गन्धपलाशीति काश्मीरे प्रसिद्धा। गन्धशटी, आमआदा। सं कापूरकाचरी, आंबेहलद। गुणाः—"भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः। तिक्ता तीक्ष्णा च कटुकानुष्णास्यमलनाशिनी। शीथकासव्रणश्वास-शूलहिक्काग्रहापहा॥" भा.। कटुः स्वादुः तीक्ष्णोष्णा वातकफघ्नी कासच्छर्द्दिघ्नी पित्तकोपनी च। रा. नि. व. ६। (का) हरिद्रायाम्। हारा.।

गन्धपल्लवा। स्त्री। गन्धपलाश्याम्। शटीभेदे। वै. निघ.।

गन्धपाषाणः। पुं। गन्धके। र. मा.। भैष. कुष्ठ. चि.।

गन्धपिण्डिका। स्त्री। गन्धकजारणमारणार्थं सगन्धकपिष्टौ। "शुद्धसूतपलैकन्तु कर्षैकं गन्धकस्य च। खिन्नखल्वे विनिक्षिप्य दैवदालीरसप्लुतम्। मर्दयेच्च कराङ्गुल्या जायते गन्धपिण्डिका॥" र. चि. ५ अ.।

गन्धपिण्डीरः। पुं। कृष्णसदनवृक्षे। काल शन्ना गाछ। सं कालेगँल। वै. निघ.।

गन्धपिशाचिका। स्त्री। धूपे। हे. च.। कुच्छुन्दर्य्याम्। वै. निघ.।

गन्धपोता। स्त्री। गन्धपत्रायाम्। रा. नि. व. ६। गन्धशट्याम्। वै. निघ.।

गन्धपुष्पः (कः)। पुं। (Calarpus Rotang.) वेतसवृक्षे। बेत गाछ। बहुवारवृक्षे। रा. नि. व. ६।११। अङ्कोटवृक्षे। आँकोड़ गाछ। जटा.। अशोकवृक्षे। नीलीवृक्षे। वै. निघ.।

गन्धपुष्पा। स्त्री। गणिकारिकापुष्पवृक्षे। केतक्याम्। केया गाछ। रा.नि.व. १०। नील्याम्। रा. नि. व. ४।

गन्धपूतना। स्त्री। पूतनाभेदे।

गन्धप्रियङ्गुः। पुं, स्त्री। प्रियङ्गुभेदे। प्रियङ्गू लता। हिं फुलप्रियङ्गु। सं गन्धला। गुणाः—तीक्ष्णः तिक्तः हृष्यः शीतलः कैश्यः वान्तिभ्रान्तिदाहपित्तरक्तज्वरमोहस्वेदकुष्ठसुखजाड्यतृष्णाहरः वातं गुल्मं विषं मेदं मेहञ्च नाशयेत्। बीजं—कषायं मधुरं शीतलं रुच्यं याहि गुरु रक्तपित्तघ्नं मलविष्टम्भि बल्यं पित्तघ्नं कफघ्नम् आध्मानकरञ्च। वै. निघ.।

गन्धफणिज्झकः। पुं। रक्ततुलसीवृक्षे। र. मा.।

गन्धफलः। पुं। कपित्थवृक्षे। बिल्ववृक्षे। तेजःफलवृक्षे। रा. नि. व. ११।

गन्धफला। स्त्री। प्रियङ्गुवृक्षे। श. र.। मेधिकायाम्। शल्लकीवृक्षे। रा. नि. व. ६।११। सुरामांस्याम्। वै. निघ.।

गन्धफलिका। स्त्री। स्थूलैलायाम्। रा. नि. व. ६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्धफली । स्त्री । प्रियङ्गौ । वै. निघ. । चम्पककलिकायाम् । चाँपार कलि । रा. नि. व. १० ।

गन्धबधूः । स्त्री । शठ्याम् । सं कापूरकाचरी, कचोरा । चिरानामगन्धद्रव्ये, चौड़ानामदेवदारुभेदे । रा. नि. व. १२ ।

गन्धबन्धा । स्त्री । नासिकायाम् ।

गन्धबन्धुः । पुं । आम्रवृक्षे । रा. नि. व. २३ ।

गन्धबह(हु)लः । पुं । सुगन्धशालिधान्ये । वै. निघ. । सितार्ज्जकवृक्षे । श्वेतपत्र क्षुद्र तुलसी । रा. नि. व. १० । स्त्री । श्वेतार्ज्जके । बाबुई । सं श्वेताश्वेतवल्ली । गोरचचिच्चायाम् । रा. नि. व. ५ ।

गन्धभद्रा । स्त्री । प्रसारण्याम् । गन्धभाद्दलिका । सं गन्धलीलता । श. च. ।

गन्धभाण्डः । पुं । गर्द्दभाण्डवृक्षे । श. र. । आम्रातके । आमड़ा । च. सू. ४अ. ।

गन्धभेदकः । पुं । कटके । काचके । लौहे । तिलके । रा. नि. व. २३ ।

गन्धमांसी । स्त्री । A kind of Indian spikenard. सुगन्धजटामांस्याम् । सं कं बहुलगन्धजटामांसी । तत्पर्य्यायः,—कैशी, भूतजटा, पिशाची, पिशाचिका (रा.), भूतना, भूतकेशी, लोमशा, जटाला, लघुमांसी । गुणाः—तिक्ता शीता कफघ्नी कण्ठरोगघ्नी रक्तपित्तहरी विषघ्नी भूतज्वरघ्नी । रा. नि. व. १२ ।

गन्धमात्र(त्रि)का । स्त्री । गन्धमात्रेति प्रसिद्धे वणिग्द्रव्ये । भैष. स्त्रीरोग. उत्पलादिः ।

गन्धमादनः । पुं । गन्धर्वे । भ्रमरे । वानरविशेषे । मे. । लूतादिकीटविषघ्नागदविशेषे । "नतरोध्रवचाकट्वीपाठेलापत्रकुङ्कुमैः ।" वा. उ. ३७अ. ।

गन्धमाद(दि)नी । स्त्री । चीड़ानामदेवदारुभेदे । आम्रवृक्षे । रा. नि. व. १२।२३ । लाचायाम् । रा. नि. व. ६ । वन्दाके । सुरामांस्याम् । रा. नि. व. १२ । सुराविशेषे । विका. ।

गन्धमादिका (द्री) । स्त्री । गन्धमात्रायाम् । के. ।

गन्धमार्ज्जारः । पुं । The civet cat. लोमशमार्ज्जारे । गन्धगोकुल । जटा. । मार्ज्जारीनामौषधौ ।

गन्धमार्ज्जारवीर्य्यम् । क्ली । गन्धमार्ज्जारागण्डीद्भवकस्तूर्य्याम् । खाटाशी । गौरासाखभेदे । हिं खाँड़ो । गुणाः—"वीर्य्यकृत्कफवातघ्नं । कण्डूकुष्ठहरं लेखं सुगन्धं स्वेदगन्धनुत् ॥" भा. ।

गन्धमालती । स्त्री । गन्धकोकिलानामगन्धद्रव्यविशेषे । भा. । गन्धकोकिलया तुल्या विज्ञया गन्धमालती ।

गन्धमाला । स्त्री । क्षुद्ररोगभेदे । See गन्धनाली ।

गन्धमालिनी (न्या) । स्त्री । सुरामांस्याम् । जटा. । सुगन्धशाली । रा. नि. व. १६ ।

गन्धमुण्डः । पुं । पारीषाभ्यवे । पलाशपिप्पुल, गन्धभाद्दलिविशेष, गन्धमुण्डघेँटु । हिं गन्धियाभाँट्, गजहुण्ड । भा. । तत्पर्य्यायः,—नन्दीवृक्षः, ताम्रपाकी, फलपाकी, पीतकः, गर्द्दभाण्डः, शिग्रुपाकी । वै. । See पारीषः ।

गन्धमूलः (कः) । पुं । कुलञ्जनवृक्षे । रा. नि. व. ६ । बालके । बाला । वै. निघ. । शठ्याम् । श. र. ।

गन्धमूला । स्त्री । शठ्याम् । शल्लकीवृक्षे । रा. नि. व. ११ । स्थलकमलिन्याम् । रास्नायाम् । वै. निघ. ।

गन्धमूलिका (ली) । स्त्री । गन्धशठ्याम् । माकन्द्याम् । रा. नि. व. ६।७ । अम. ।

गन्धमूषिकः (षिका) (षी) । पुं, स्त्री । छुच्छुन्दरे । छुँचो । विका. । हिं. च. ।

गन्धमृगः । पुं । खट्टाशे । गन्धगोकुल, खाटाश । सं जवादीमांजार । श. मा. ।

गन्धमृत्पुष्पः । पुं । कदम्बवृक्षे । कदम गाछ । वै. निघ. ।

गन्धमेदिनी । स्त्री । चम्पककलिकायाम् । चाँपार कलि । वन्दाके । बान्दरा । रा. नि. व. १० ।

गन्धमैथुनः । पुं । वृषभे । षाँड़ । विका. ।

गन्धमोदनः । पुं । गन्धके । रा. नि. व. १३ ।

गन्धमोदि (हि) नी । स्त्री । चम्पककलिकायाम् । वै. निघ. । वन्दायाम् । रा. नि. व. १२ ।

गन्धरसः । पुं, क्ली । सुगन्धवीरे । धूनथारापि,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फूलसत्त्व गन्धबोल। विका.। तत्पर्य्यायः,— बोलः, प्राणः, पिण्डः, पिण्डलः, गोपः, रसः (अ.), रसगन्धः, गोसः, पिण्डगोसः, भग्नः, गोसभग्नः (अ. टी.), गान्धारं, मसिवल्कनं (चि.) गोपरसः, बोलजः, गोपजः, गोपकः (शब्दर.)। खट्टासिकायाम्। खाटाशी। च. द. वा. व्या. एलादितैले। (सा) स्त्री। सुरामांस्याम्। वै. निघ.।

गन्धरसाङ्कः। पुं। श्रीवेष्टनाम-गन्धद्रव्ये। रा.।

गन्धराजः (कः)। पुं, क्ली। सुन्दरपुष्पवृक्षे। गन्धराज फूलेर गाछ. रा. नि. व. १०। खनामख्यातद्रव्ये। खाटाशी, गन्धराज। See जवादिः। कणगुग्गुलौ। श्रीखण्डचन्दने। श्वेत चन्दन। कृष्णागुरुणि। रा. नि. व. १२। नखीनामगन्धद्रव्ये। वै. निघ.।

गन्धराजतैलम्। क्ली। वातव्याधौ तैले। पाठः—"तिलतैलाढके चिक्वा तक्रं तत्परिमाणकम्। वचाचतुष्पलं दत्त्वा शुक्तं तच्च चतुर्गुणम्॥ विष्कलायाः पलान्यष्टौ सञ्छिन्नायास्तथैव च। पुनरष्टपलान्यस्या अर्द्धदग्धानि दापयेत्॥ पूगचेलशठीपत्रशरणास्वुद्दारुणः। पलान्यष्टौ विनिक्षिप्य घृतस्य तु पलद्वयम्॥ आद्ये पाके पचेदित्थं तैलं यावच्चतुर्गुणं। गालयित्वापरद्युर्य्यात्तत्र पाकत्रयम्बुधः। चण्डादलमरुच्छत्रात्वक्पत्रीकोलशैलजं। विषाग्निवीरणग्रन्थिदेवताकुसुमानि च॥ प्रत्येकमेषाच्चत्वारि पलान्यादाय गान्धिकः। पाकं द्वितीयं तैलस्य कारयेत् क्रमयोगतः॥ पृक्का मांसी सुरा बालं सदनं ह्रीबेरकामली। नगुरुं काष्ठखोटी च चम्पकुन्दप्रियङ्गवः॥ एषां खट्टासिकायाश्च प्रत्येकञ्च पलद्वयम्। आदाय कारयेत्पाकं तृतीयङ्गन्धकोविदः॥ फणिलावल्लताकोलफलैलागुरुसिल्हकैः। त्वक्पीकैर्द्विपलिकैरिति पाकश्चतुर्थकः॥ वेधः पलयुगेनेन्दीवरदस्य त्वष्टभिः पलैः। गन्धराजाह्वयं तैलमिदं नृपमनोहरम्॥" तिलतैल १६ श. तक्र १६ श. काँजि ६० श. कल्कार्थ—यथाविधि वच ४ प. त्रिफला, मञ्जिष्ठा, अर्द्धभृष्ट मञ्जिष्ठा प्रत्येक ८ प. गुवाकपुष्पत्वक्, तेजपत्र, शटी, सरलकाष्ठ, मुता, देवदारु मिलित ८ प. कुन्दुरुखोटी २ प. इहादेर द्वारा प्रथम गन्धपाक करिबे। शोधित चोरहुली, तेजपत्र, मरुवा मौरी, गुड़त्वक्, दना, शिलारस, एला, कुड़, देवहुली, गेँठेला, उशीर प्रत्येक ४ प. पूर्ब्बकल्क छाँकिया इहादारा २य गन्धपाक करिबे। शुद्ध पिड़िं, जटामांसी, मुरामांसी, बाला, लवङ्ग, छल्लीपुष्प (छलना), भूँई आमला, अगुरु, लवणखोटी, चम्पकपुष्प, कुन्दपुष्प, प्रियङ्गु, खाटाशी प्रत्येक २ प. ३य गन्धपाक। श्वेत चन्दन, लवङ्गलता, कस्तूरी, कक्कोल, जायफल, एलाच, अगुरु, शिलारस, गुड़त्वक्, जयित्री, कुङ्कुम प्रत्येक २ प. ४र्थ गन्धपाक। छाँकिया कर्पूर १७ तो. मृगनाभि ७४ तो. मिशाइबे। रस. र.।

गन्धराजी। स्त्री। नख्याम्। नखी। श. च.।

गन्धराट् (ज)। पुं। धूनके। धूना।

गन्धकुहा। स्त्री। वनमल्लिकायाम्।

गन्धर्व्वः। पुं। श्वेतकरवीरे। श्वेतैरण्डे। च. द. वा. रक्त. चि. अमृताद्यघृते। कस्तूरीमृगे। अश्वे। अम.। कोकिले। रा. नि. व. २३। क्ली। कैरवे।

गन्धर्व्वगन्धः (न्धा)। पुं, स्त्री। अश्वगन्धायाम्। भा. म. ४ भ. स्नायुरोगे। उ. ख. वाजी.।

गन्धर्व्वगृहः। पुं। उन्मादविशेषे। "हृष्टात्मा पुलिनवनान्तरीपसेवी स्वाचारः प्रियगीतगन्धमाल्यः। नृत्यन् वै प्रहसति चारु चाल्पशब्दं गन्धर्व्वगृहपरिपीड़ितो मनुष्यः।" भा. नि.।

गन्धर्व्वतैलम्। क्ली। एरण्डतैले। भा.।

गन्धर्व्वभूषणम्। क्ली। सिन्दूरे। वै. निघ.।

गन्धर्व्वभ्राका। स्त्री। भार्य्याम्। वामनहाटी। र. मा.।

गन्धर्व्वहस्तः (कः)। पुं। एरण्डवृक्षे। हारा.।

गन्धर्व्वहस्तकतैलम्। क्ली। ब्रह्मवृद्ध्यधिकारे तैलम्। पाठः—"शतमैरण्डमूलस्य पलं शुण्ठ्या यवाढकम्। जलद्रोणे विपक्तव्य यावत्पादावशेषितम्। तेन पादावशेषेण पयसा तत्समेन च। प्रस्थमैरण्डतैलस्य तन्मूलाच्च चतुष्पलम्। विपलं शृङ्गवेरञ्च सर्व्वं दत्त्वा विपाचयेत्॥" रस. र.।

गन्धर्व्वा। स्त्री। कोकिलायाम्। वै. निघ.।

गन्धलः। पुं। सुगन्धि व्रीहिभेदे।

गन्धलता। स्त्री। प्रियङ्गौ। भा. म. १भ. रक्षोघ्नी. चि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्धला । स्त्री । प्रियङ्गौ ।

गन्धलोलुपा । स्त्री । मक्षिकायाम् । श. र. ।

गन्धवती । स्त्री । विपुरमल्लिकायाम् । प. मु. । वनमल्लिकायाम् । सेउती । र. मा. । सुरायाम् । रा. नि. व. १२ । सुरायाम् । मे. । तालीशपत्रे । वनयमान्याम् । वै. निघ. ।

गन्धवर्णा । स्त्री । महाबलायाम् । वै. निघ. ।

गन्धवल्कलम् । क्ली । गुडत्वङ्नामगन्धद्रव्ये । दारचिनि । रा. नि. व. ६ ।

गन्धवल्लरी (वल्ली) । स्त्री । महाबलायाम् । प. मु. । पीतपुष्पदण्डोत्पलायाम् । डाभिपोलां । र. मा. ।

गन्धवहः (वाहः, कः) । पुं । कस्तूरीमृगे ।

गन्धव(वा)हा । स्त्री । नासिकायाम् । रा. नि. व. १८ । हे. च ।

गन्धवाकुची । स्त्री । लताकस्तूर्याम् ।

गन्धवासिनी । स्त्री । सुरामांस्याम् । वै. निघ. ।

गन्धवाही (इन्) । पुं । वायौ । रा. नि. व. २१ ।

गन्धविह्वलः । पुं । गीधूसे । वै. निघ. ।

गन्धवीजः । पुं । कुलिञ्जनवृक्षे । वै. निघ. । (जा) स्त्री । मंथिकायाम् । रा. नि. व. ६ ।

गन्धवीरा । स्त्री । सल्लकीवृक्षे । वै. निघ. ।

गन्धवृक्षः (कः) । पुं । शालवृक्षे । सर्ज्जवृक्षे । रा. नि. व. ९ । शाकतरौ । वरुणवृक्षे । वै. निघ. ।

गन्धवे (बो) धिका । स्त्री । कस्तूर्याम् । वै. निघ. ।

गन्धवेष्टः । पुं । धूनके । धूना ।

गन्धव्याकुलम् । क्ली । कक्कोले । श. च. ।

गन्धशटी । स्त्री । खनामख्यातौषधौ । गन्धपलाश्याम् । गन्धशटी, गन्धपलाशी । श. र. । See गन्धपलाशी ।

गन्धशाकम् । क्ली । गौरसुवर्णशाके । रा. नि. व. ७ ।

गन्धशालिः । पुं । सुगन्धशालिधान्यविशेषे । सुगन्ध धान, कलमाशालि । प. मु. । तत्पर्य्यायः, —कल्माषः, गन्धालुः, कलमोत्तमः, सुगन्धिः, गन्धबहुलः, सुरभिः, गन्धतण्डुलः, सुगन्धिशालिः । गुणाः—मधुरः अतिहृद्यः पित्तदाहारुचिश्रमरक्तश्लेष्मकरः सत्यकरः गर्भस्थिरतादायकः दुर्गन्धहातकरः पुष्टिकरः दुर्गन्धत्वकरः बलदश्च । रा. नि. व. १६ ।

गन्धशुण्डिनी । स्त्री । क्षुच्छुन्दर्य्याम् । रा. नि. व. १९ ।

गन्धशेखरः । पुं । कस्तूर्याम् । मृगनाभि । हारा. ।

गन्धसम्भवा । स्त्री । सुगन्धशाल्यौ । रा. नि. व. १६ ।

गन्धसारः । पुं । चन्दनसामान्ये । प. मु. । श्वेतखण्डचन्दने । श्वेत चन्दन । रा. नि. व. १२ । "घनसारो गन्धसारः ।" सा. कौ. । गन्धशब्द्याम् । रा. नि. व. ६ । सुन्दरपुष्पवृक्षे । रा. नि. व. १० । गन्धके । वै. निघ. ।

गन्धसारणः । पुं । वृक्षभेदे । र. मा. ।

गन्धसूची । स्त्री । आम्रातके । मं आंबाडी । वै. निघ. ।

गन्धसूयी । स्त्री । क्षुद्रक्षुच्छुन्दर्य्याम् । वै. निघ. ।

गन्धसेवि । क्ली । रोहिषतृणे । रांगकर्पूर । वै. निघ. ।

गन्धसोमम् । क्ली । कुमुदे । नीलफूल । श्वेतकमले । चिका. ।

गन्धसोमजम् । क्ली । रक्तकैरवे । रक्तकमल ।

गन्धहारिणी । स्त्री । तुलस्याम् । भ. ।

गन्धा । स्त्री । मङ्गल्यागुरुणि । शब्द्याम् । रा. नि. व. १२ । अजमोदायाम् । रा. नि. व. ६ । शालपर्ण्याम् । अ. टी. भ. । वनतुलस्याम् । वंशलोचनाभिदे । क्षुच्छुन्दर्य्याम् । प्रियङ्गौ । वै. निघ. । सुवर्णचम्पककलिकायाम् । श. र. ।

गन्धाखुः । पुं । क्षुच्छुन्दर्य्याम् । छूँचा । हारा. ।

गन्धागुरु । क्ली । मङ्गल्यागुरुणि । वै. निघ. ।

गन्धाजीवः । पुं । गन्धवणिजि । जटा. ।

गन्धाज्ञता । स्त्री । गन्धाननुभवे । वै. निघ. ।

गन्धाढ्यम् । क्ली । चन्दने । श्वेतखण्डचन्दने । श्वेत चन्दन । गन्धराजे । खाटाशी । रा. नि. व. १२ । वकुलपुष्पे । वै. निघ. । पुं । नागरङ्गके । रा. नि. व. ११ ।

गन्धाढ्या । स्त्री । स्वर्णयूथिकायाम् । तरणी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्पवृक्षे । आरामशीतलायाम् । पत्रशाकविशेष । रा. नि. व. १०। वनबीजपूरवृक्षे । वूनो लेबु । सुरामांस्याम् । रा. नि. व. ११।१२ । सुगन्धशालौ । रा. नि. व. १६ । गन्धाख्यायाम् । गाँधाली । भ. च.। कस्तूर्य्याम् । मृगनाभि । जवादिकस्तूर्य्याम् । अरण्य-शिवलयाम् । फूलविशेष । जातीपत्रयाम् । वै. निघ. । गन्धपत्रायाम् ।

गन्धादि । क्ली । तृणकेशरे । वै. निघ. ।

गन्धाधिकम् । क्ली । तृणकुङ्कुमे । रा. नि. व. १२ ।

गन्धाधि(रि)का । स्त्री । महाशताह्वायाम् । गुल्फा, वड़िशोप । रा. नि. व. ४ ।

गन्धानो । स्त्री । सुगन्धशालौ । धूपपत्रायाम् । रा. नि. व. १६।२३ ।

गन्धानुः । पुं । सुगन्धशालौ । रा. । दण्डालौ । द्रव्याभि. ।

गन्धान्नः । पुं । गन्धशालौ । प. मु. ।

गन्धामृतरसः । पुं । वाजीकरणोक्त-रसविशेषे । "भस्मसतं द्विधा-गन्धं चणकन्यां विमर्दयेत् । कृत्वा लघुपुटे पचाल्लेहयेन्मधुसर्पिषा । निकामाचं जरा-मृत्यू हन्ति गन्धामृती रसः ॥" रस. र. ।

गन्धाम्बु । क्ली । गन्धोदके । चक्र. ।

गन्धारिः (री) । स्त्री । दुरालभायाम् । रक्त-दुरालभायाम् । गन्धपलाश्याम् । आम्रहरिद्रायाम् । वै. निघ. ।

गन्धरिका । स्त्री । शटीभेदे । भा. ।

गन्धालः (लुः) । पुं । गन्धशालौ । रा. नि. व. १६ । दण्डालुके ।

गन्धाला । स्त्री । अग्निमन्थवृक्षे । वै. निघ. ।

गन्धालिः (लिका) (ली) । स्त्री । गन्धश्र-व्याम् । प. मु. । (ली) प्रसारण्याम् । गन्धभाद्दले । तत्पर्य्यायः,—प्रसारणी, भद्रपर्णी, कटम्भरा (र.), शरणा, शरणी (शब्दर.), गन्धाढ्या, गन्धभद्रा (श.), सरणा, राजबला, भद्रबला (अ.), गन्धीली, सारणी (ज.), सारणीः (उ.), सरणी (अ. टी.) सा. कौ. । जातीफलायाम् । कीटविशेषे । कुशीदर पोका । वै. निघ. ।

गन्धालोगर्भः । पुं । सूच्चैलायाम् । रा. नि. व. १२ ।

गन्धाश्मा । पुं । गन्धके । गन्धक । रा. नि. व. १२ । ग्रहणीकवाटरसे । च. द. रसमण्डूरे ।

गन्धाश्वः । पुं । अश्वगन्धायाम् । भैष. कुष्ठ. चि. ।

गन्धाष्टकम् । क्ली । सुगन्धाष्टद्रव्यगणे । तच्च नानाविधम् । तत्र मांसादियूषसुगन्धीकरणार्थं यथा—जातीपत्र-लवङ्गत्वगेला नागकेसर-मरिचसृग-नाभयः । रावण. । देवतादितुष्ट्यर्थं यथा—चन्दन-कर्पूर-नागकेशर-बालक-नागरकुस्ता-देवदारु-गोरी-चना-कुसुमानि । तथा चन्दनागुरुकर्पूररोचना-कुङ्कुमसृगमदचन्दनक्षीवैराणि गणपतिप्रीत्यर्थम् । चन्दनागुरुकर्पूर- तमालक्षीवैर-कुङ्कुमकुशीदकुष्ठानि शिवस्य । "चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः । जटामांसी कपियुता गन्धैर्गन्धाष्टकं विदुः ॥" "चन्द-नागुरुक्षीवैरकुष्ठकुङ्कुमसैव्यकाः । जटामांसी सुरा चेति विष्णोर्गन्धाष्टकं विदुः ॥"

गन्धाह्वा । स्त्री । प्रियङ्गौ । सु. चि. ९ अ. ।

गन्धि । क्ली । तृणकुङ्कुमे । रा. नि. व. १२ ।

गन्धिकः । पुं । गन्धके । भा. ।

गन्धिका । स्त्री । अजसीदायाम् ।

गन्धिनी । स्त्री । सुरामांस्याम् । अम. । पीत-मूल्याम् । रेउचिनीति केचित् । रुसीमस्तुरीति च अन्यः ।

गन्धपर्णः । पुं । सप्तपर्णवृक्षे । रा. नि. व. १२ ।

गन्धिरसः । पुं । गोपके । निशादल ।

गन्धिला । स्त्री । सुस्तायाम् । रा. नि. व. ६ ।

गन्धी (न्धिन्) । पुं । कस्तूरीमृगे । वै. निघ. । गन्धके । शब्दर. । कीटविशेषे । छारपोका ।

गन्धोग्रा । स्त्री । वचायाम् । च. द. वा. चि. ।

गन्धोतुः । पुं । सुगन्धमार्ज्जारे । गन्ध गोकुल । विका. ।

गन्धोत्कटः (टा) । पुं, स्त्री । दमनकवृक्षे । दना गाछ । रा. नि. व. १० । सुरामांस्याम् । वै. निघ. ।

गन्धोत्तमा । स्त्री । मदिरायाम् । अम. ।

गन्धोपला । स्त्री । गन्धके । वै. निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्धोलिः (ली)। स्त्री। शल्याम्। श. र.। चरटायाम्। बोलता। अम.। मल्लिकाविशेषे। कुगोन्ना गाछि। कर्कटीभेदे। वै. निघ.।

गन्धोलिकः। पुं। मसूरे।

गन्धौषधम् (धिः)। क्ली, पुं। सुगन्धिद्रव्यरूपी-पधौ अगुरुकुष्ठादौ। शि. यो. वा. व्या. चि.। च. सू. ३अ.।

गभस्तिः। पुं। किरणे। मे.। सूर्ये।

गभोलिकः। पुं। मसूरे। हारा.।

गमूर्च्छा। स्त्री। मत्स्या इति ख्यातायाम्। र. मा.।

गम्भारिका (री)। स्त्री। वृक्षविशेषे। गांभार गाछ। तत्पर्य्यायः,—सर्व्वतोभद्रा, काश्मरी, मधुपर्णिका, श्रीपर्णी, भद्रपर्णी, काश्मर्य्यः, काश्मर्य्य, काश्मरी (अ.) काश्वरी, कम्भारिका (के.), भद्रा, गोपभद्रिका, कुसुदा, सदाभद्रा, क्षणफला, कट्फला, क्षणवृन्तिका (र.) क्षणवृन्ता, क्षीरा, सर्व्वतोभद्रिका, स्निग्धपर्णी, सुभद्रा, कम्भारी, गोपभद्रा, चीरिणी, विदारिणी, सदाभद्रा, मधुभद्रा, सुखभद्रा, क्षणा, अश्वत्था, रोहिणी, यष्टिः, स्थलत्वचा, मधुमती, सुफला, मोदिनी, सदाकुसुदा, सुदृढ़त्वचा। गुणाः—कटुत्वं तिक्तत्वं उष्णत्वं गुरुत्वं भ्रमशोथज्वरतृष्णाविषदाहनाशित्वञ्च। रा. नि. व. ९। तुवरा तिक्ता वीर्य्योष्णा मधुरा गुरुः दीपनी पाचनी मेध्या मेदिनी भ्रमशोथघ्नी तृष्णाम-शूलार्शोविषदाहज्वरघ्नी च। भा.। फलगुणाः—तिक्तं गुरु मधुरं ग्राहि केश्यं रसायनं मेध्यं शीतलं पित्तदाहघ्नं। राज.। हृद्यं हृद्यं गुरु केश्यं रसायनं वातपित्ततृष्णारक्तक्षयमूत्रविबन्धहरं स्वादु-पाकं स्निग्धं स्निग्धं तुवरास्रं दाहतृष्णावातरक्तपित्त-क्षतक्षयघ्नञ्च। तद्बीजतैलं—मधुरं कषायं कफपित्त-घ्नञ्च। सु. सू. ४५ अ.। मूलं—अत्युष्णं चित्त-रोगे हितञ्च। राज.।

गम्भीरः। पुं। पद्मजन्तौ। उणा.। शाकवृक्ष-वृक्षे। भातुलुङ्गवृक्षे। श्रीरीषवृक्षे। वै. निघ.। क्ली। पद्मजे। वत्सनाभविषे।

गम्भीरकः। पुं। फणिझकवृक्षे। वै. निघ.।

गम्भीरज्वरः। पुं। अन्तर्वेगान्तर्दाहयुक्तज्वरे। "गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन लक्षणैः। आन-द्धत्वेन दोषाणां श्वासकासोद्भमेन च॥" निदान.।

गम्भीरदृष्टिः। पुं। नेत्ररोगविशेषे। वै. निघ.। See गम्भीरिका।

गम्भीरपाकः। पुं। अन्तःपाके। वै. निघ.।

गम्भीरवेद्यो(न्)। पुं। दुर्ज्ञेयलक्षणे। त्रि.।

गम्भीरा। स्त्री। तन्नामकक्रिकायाम्। "नासि-प्रवृत्ता या क्रिका घोरा गम्भीरनादिनी। शुष्काल्प-कण्ठजिह्वा स्याच्छ्वासकासरुजाकरी। अनेकोपद्रव-वती गम्भीरा नाम सा स्मृता॥" निदान.।

गम्भीरिका। स्त्री। वातजन्यनेत्ररोगभेदे। लक्षणं यथा—"दृष्टिर्विरूपा खलनीपसृष्टा सङ्कु-च्यतेऽभ्यन्तरतः प्रयाति। कृच्छावगाढ़ा च तमस्वि-रोगं गम्भीरिकेति प्रवदन्ति धीराः॥" भा.।

गरः। पुं। उपविषे। वत्सनाभविषे। रोगे। हे. च.। विषघ्नौषधे। निर्विषद्रव्ययोगजे कृत्रिमविषे। तेनान्तःपाण्डुः क्षणेऽल्पाग्निः कासश्वासज्वरार्दितश्च भवति। वा.। यथा—"संयोगजन्तु त्रिविधं तृतीयं विषमुच्यते। गरः स्यादविषस्तत्र सविष-कृत्रिमं यतः॥" वृद्धवाग्भट.। "दंष्ट्राविषे मूत्र-विषे सगरे कृत्रिमे विषे।" च.। "नानाप्राण्यङ्ग-समलविरुद्धौषधभक्षणाम्। विषाणाञ्चाल्पवीर्य्याणां योगी गर इति स्मृतः॥" वा. उ. ३५ अ.।

गरघ्नः। पुं। कृष्णार्जके। कृष्णपत्र क्षुद्र तुलसी। कृष्णपत्रवर्व्वरे। काल बाबुई। रा. नि. व. १०। टङ्कणचारे। वैजयन्तीतुलस्याम्। वै. निघ.।

गरघ्नी। स्त्री। वृक्षविशेषे। गरइ गाछ। गुणाः —मधुरा कषाया वातपित्तकफघ्नी रुचिबलवीर्य्य-करी दीपनी लघ्वी च। भा.।

गरजध्वजम्। क्ली। अभ्रके। वाचस्पतिः।

गरणम्। क्ली। निगरणे, वमने।

गरदम्। क्ली। विषे, गरले। रा. नि. व. ६। त्रि। विषदायिनि।

गरदिग्धः। त्रि। कृत्रिमविषलिप्ते। च. सि. स्था. २ अ.।

गरद्रुमः। पुं। कारस्करवृक्षे। कुँचिला गाछ। रा. नि. व. ९।

गरध्वजम्। क्ली। अभ्रे। अभ्र।

गरनाशिनी। स्त्री। देवदालिकायाम्। देव्ना-ताड़। मं देवडङ्गरी। वै. निघ.।

गरभः। पुं। गर्भे। हे. च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गरलम् । क्ली । अहिफेने । वै. निघ. । विषे । अम. । सर्पविषे । तृणपुलके । घासेर आटि । हे. च. । जङ्गमविषे । त्रिका. ।

गरला । स्त्री । मधुमक्षिकायाम् । वै. निघ. ।

गरलारिः । पुं । मरकतमणौ । रा. नि. व. १३ ।

गरव्रतः । पुं । नयूरे । श. र. ।

गरहा । पुं । कालशाके । त्रिका. ।

गरा (रो) । स्त्री । देवताड़वृक्षे । पीतघोषा । अ. टी. खा. । गिगरणे । धरणी. ।

गरागरो । स्त्री । लाक्षायाम् । रा. ।

गरात्मकः । पुं, क्ली । श्वेताञ्जनवृक्षे, तद्बीजे च । श. च. ।

गराषिका । स्त्री । लाक्षायाम् । र. मा. ।

गराधिका । स्त्री । लाक्षायाम् । र. मा. ।

गरारिवटिका । स्त्री । कासे हिता । पाठः —भार्गेकः त्रिफलाचूर्णात् द्विभागस्तु कटुत्रयात् । तालीशस्य त्रिभागः स्यादभयायास्तुष्टयः । यावत्यो-तानि चूर्णानि तावानेव गुड़ो मतः । मधुना वटिका कार्य्या द्विमाषा सुखधारिणी ॥ प्रयोगा. कास. चि. ।

गरो । स्त्री । देवतारवृक्षे । रा. ।

गरुड़ः । पुं । खनामख्यातपक्षिणि । स्वर्ण-माक्षिके । स्वर्णमाक्षिक । रा.सा.सं. । गरुड़शाली । रा. नि. व. १६ ।

गरुड़वलिः । पुं । बालरोगशान्त्यर्थं बलिविशेषे । ओं नमो भगवते गरुड़ाय चक्रध्वजाय स्वाहा । च. द. बाल. चि. ।

गरुड़वेगा । स्त्री । वृक्षविशेषे ।

गरुड़शालिः । पुं । खनामख्यातशालिधान्य-विशेषे । पक्षिराज धान । गुणः—गन्धकारी लघुपाककरः कफपित्तहरः स्वादुश्लेष्मासनिवारणः ग्रहणीगुल्मकुष्ठघ्नः गुल्मशोधनः ॥ रा. नि. व. १६ । "गरुड़ान्या च वातघ्नी पित्तमूत्रमदापहा ।" अत्रि. १५ अ. ।

गरुड़ाङ्कितम् । क्ली । मरकतमणौ । रा. नि. व. १३ ।

गरुड़श्मा । पुं । मरकतमणौ । जटा. ।

गरुड़ाहृतः । पुं । सीसलताभेदे । सु. चि. २९ अ. ।

गरुड़ी । स्त्री । गुड़ूच्याम् । रस. र. विष. चि. ।

गरुड़ोत्तो(न्नो)र्णम् । क्ली । मरकतमणौ । रा. नि. व. १३ ।

गरुत् । पुं । पक्षणि । पाखा । अम. ।

गरुत्मान् । पुं । स्वर्णमाक्षिके । रसकौ. । भैष. वा. रक्त. चि. द्राक्षाद्यासवे । पक्षिणि । मे. । गरुड़े । वै. निघ. ।

गरुद्बीधो (धृन्) । पुं । भारतीपक्षिणि । भारुई । त्रिका. । लावपक्षिणि । वै. निघ. ।

गर्गरः (कः) । पुं । A kind of fish, (Pimelodms gagora.) मत्स्यविशेषे । गागर माछ । स पीतवर्णः पिच्छिलाङ्गः पृष्ठे बहुरेखा-युक्तः, तथा गर्गरशब्देन वशीकरणीयत्वात् गर्गर इत्युच्यते । गुणाः—शीतलः कफवातकरश्च । रा. नि. व. १७ । मधुरः स्निग्धः वातपित्तघ्नश्च । राज. ३५ । "गर्गरः पित्तलः किञ्चिद्वातजित् कफ-कोपनः ।" भा. ।

गर्गरकम् । क्ली । स्थावरविषान्तर्गतखनामक-मूलविषभेदे । सु. कल्प. २अ. ।

गर्गरी । स्त्री । मत्स्यन्याम्, दधिमन्थनपात्रे । अम. । कलसी ।

गर्गाटः । पुं । गर्गरमत्स्ये । तत्पर्य्यायः— योगनाविकः । हारा. ।

गर्ज्जकः । पुं । मत्स्यविशेषे । गजाड़, शोल माछ । तत्पर्य्यायः,—शालः, शालकः । श. र. ।

गर्ज्जरम् । क्ली । A carrot. खनामख्यात-मूलशाके । गाजरमूल । मं कं बाटुलामूला । वन्यमूलंगि । तत्पर्य्यायः—पिण्डमूलं, पीतकन्दं, सुमूलकं, स्वादुमूलं, सुपीतं, नारङ्गं, पीतमूलकं । गुणाः—मधुरं रुच्यं ईषत्कटु कफघ्नं आध्मानकृमि-शूलघ्नं दाहपित्ततृष्णाघ्नञ्च । रा. नि. व. ७ । रक्तरसोने ।

गर्ज्जरी । स्त्री । रक्तलशूने । वै. निघ. ।

गर्ज्जाफलः । पुं । विकङ्कतवृक्षे । रा. नि. व. ११ ।

गर्ज्जितः । पुं । मत्तहस्तिनि । अ. ।

गर्त्तः । पुं । अम्भे । गाड़ा । तत्पर्य्यायः,— अवटः (अ), अवटूः (शब्दर.), आवटिः, भूरन्ध्रं,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दरः, श्वभं (ज.)। जटा.। कुकुन्दरे। मे.। रोगविशेषे। ग्र. र.।

गर्त्तकलम्बुका। स्त्री। गण्डदूर्व्वायाम्। मत्स्याक्ष्याम्। वै. निघ.।

गर्त्तटकः। पुं। वनमूषिके। वै. निघ.।

गर्त्तिका। स्त्री। तन्तुशालायाम्। ताँत्घर। हे. च.।

गर्दभः। पुं। स्वनामख्यातपशौ। गाधा। तत्पर्य्यायः,—चक्रीवान्, वालेयः, रासभः, खरः (अ.), राशभः (अ.टी.), वेशरः, धूसरः (ज.), स्वरस्वर्य्यः, चिरमेही, पशुचारिः, चैरपुङ्गः, चारटः, याम्याश्वः (शब्दर.), शुङ्ग-जङ्घः, शङ्कुकर्णः, भारगः, शूरिगलः, धूसराह्वयः, सांसगुणाः—किञ्चिद्गुरु बलप्रदञ्च। वनगर्दभमांसं रूक्षं श्लेष्मकरं बहुवीर्य्यवत्त्वकरञ्च। मूत्रगुणाः—कटुत्वं तिक्तत्वम् उष्णत्वं चीरत्वं कफमहावातभूतकर्म्मोन्मादहरत्वञ्च। रा. नि. व. १७। विकारघ्नं तीक्ष्णं ग्रहणीरोगनुत्। "दीपनं गार्दभं मूत्रं कृमिश्वित्रकफापहम्।" सु. सू. ४५ अ. शरसेदोगन्धे। हे. च.। क्लो। कुमुदे। प. मु.। श्वेतकुमुदे। हे. च.। विड्भङ्गे। र. मा.।

गर्दभकम्। क्ली। श्वेतोत्पले। श्वेतपद्मे। हे.।

गर्दभगदः। पुं। ज्वालागर्दभरोगे। लक्षणं ज्वालगर्दभशब्दे द्रष्टव्यम्। रा. नि. व २०।

गर्दभगन्धिका। स्त्री। भार्य्यायाम्। वामनहाटी। वै. निघ.।

गर्दभमांसम्। क्ली। गर्दभस्य पिशिते। रा. नि. व. १७।

गर्दभमूत्रम्। क्ली। खरमूत्रे। See गर्दभः।

गर्दभशाकः (का, खा, खी)। पुं, स्त्री। भार्य्याम्। वामनहाटी। जटा.। रा. नि. व. ६।

गर्दभाः। स्त्री। श्वेतकण्टकार्य्याम्। भा.।

गर्दभाण्डः। पुं। (Thespesia populnea. Syn. Hibiscus populnes.) प्लक्षवृक्षे। पाकुड़ गाछ। रा. नि. व. ११। (Thespesia populneoides.) पारीषाश्वत्थे। गया अश्वत्थ, पलाश पिप्पल। अमः। स च पत्रकाण्डफलादिभिरश्वत्थवृक्षाकारः। गन्धपिप्पल इति च कैचित्। भ.। गर्दभपिप्पलीति सारसुन्दरी। सं पारसपिप्पल पिंपरी। गन्धसुण्ड इति गन्धीभाट इति सा. कौ.। तत्पर्य्यायः,—कन्दरालः, कपीतनः, सुपार्श्वकः, प्लक्षः (अ.), शृङ्गी, प्लवः, कमण्डलुः (ज.), गन्धभाण्डः, प्लक्षेशः, कन्दरालकः (शब्दर.), भाण्डः (ग.), गन्धसुण्डः, नन्दीवृक्षः, फलपाकी। रा.।

गर्दभाह्वयः। पुं। कुमुदे। षण्ढे। हे. च.।

गर्दभिका। स्त्री। वातपित्तजजत्रुरोगविशेषे। तल्लक्षणं—"मण्डलं वृत्तमुन्नम्नं सरक्तं पिडकाचितं। रुजाकरीं गर्दभिकां तां विद्याद्वातपित्तजाम्॥" भा.।

गर्दभी। स्त्री। कटभ्याम्। रा. नि. व. २३। श्वेतापराजितायाम्। श्वेतकण्टकार्य्याम्। रा. नि. व. ३।४। गर्दभस्त्रियाम्। दुग्धगुणाः—बलकरत्वं वातश्वासहरत्वं मधुरास्वरत्वं रूक्षत्वं दीपनत्वञ्च। दधिगुणाः—रूक्षोष्णत्वं वातघ्नत्वञ्च। नवनीतगुणाः—कषायत्वं वातकफाग्निघ्नं बलकरत्वं दीपनत्वं लघुपाकित्वं मूत्रदोषकरत्वम् उष्णत्वञ्च। घृतगुणाः—बल्यं दीपनं मूत्रदोषघ्नम् लघुपाकम् उष्णवीर्य्यं कषायं कफघ्नञ्च। रा. नि. व. १५।

गर्द्दः। पुं। गर्दभाण्डवृक्षे। श. च.।

गर्द्दभाण्डः। पुं। गर्दभाण्डवृक्षे।

गर्भः। पुं। भ्रूणे। तेजःसंयोगात् शुक्रं तरलीभूतं च्युतं सत् अनिलसंयोगात् योनिमुखं पतितम् आर्त्तवेन युक्तं गर्भसंज्ञां लभते। ततोऽग्निसोमसंयोगात् संहन्यमानो गर्भो गर्भाशयमनुप्रतिपद्यते। लक्षणं यथा—"गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकं। प्रकृतिः सविकारा च तत्सर्व्वं गर्भसंज्ञकं। कालेन वर्द्धितो गर्भः यदाङ्गोपाङ्गसंयुतः भवेत्तदा स मुनिभिः शरीरीति निगद्यते॥" भा.। कामान्मिथुनसंयोगे शुक्रशोणितशुक्रजः। गर्भः सञ्जायते नार्य्याः सञ्जाती बाल उच्यते॥ शार्ङ्ग. ६ अ.। आधिक्ये रजसः कन्या पुंवः शुक्राधिक्ये भवेत्। नपुंसकं समत्वेन यथेच्छा पारमेश्वरी॥ भा.। "प्रथमे मासि द्रवीभूतं शुक्रार्त्तवं तिष्ठति, द्वितीये घनः, तृतीये हस्तपादशिरसां पञ्च पिण्डका निर्व्वर्त्तन्ते, अङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति, चतुर्थे सर्व्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरो भवति। गर्भहृदयप्रव्यक्तभावाच्चेतनाधातुरभिव्यक्तो भवति कस्मात्तत्स्थानत्वात्तस्माद्गर्भचतुर्थे मास्यभिप्रायमिन्द्रि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यार्थेषु करोति, पञ्चमे मनः प्रतिबुद्धतरं भवति, षष्ठे बुद्धिः, सप्तमे सर्व्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरः, अष्टमेऽस्थिरीभवति ओजसस्तु जातयेन्न जीवेन्निरीजस्त्वान्नैर्ऋतभागत्वाच्च, ततो वस्तिं मांसौदनमश्नीते दापयेत्, नवमदशमैकादशद्वादशानामन्यतमस्मिन् जायते। अतोऽन्यथा विकारी भवति। मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाड़ी प्रतिबद्धा, सास्य मातुराहाररसवीर्य्यमभिवहति। तेनोपस्नेहेनास्याभिवृद्धिर्भवति। गर्भस्य हि सम्भवतः पूर्व्वं शिरः सम्भवतीति शौनकः, हृदयमिति क्रतवीर्य्यः बुद्धेर्मनसश्च स्थानत्वात्। नाभिरिति पाराशर्य्यस्तस्यां हि बद्धायां देही देहिनः। पाणिपादमिति मार्कण्डेयः तन्मूलत्वाच्चेष्टाया गर्भस्य। मध्यशरीरमिति सुभूतिर्गौतमस्तन्निबद्धत्वात् सर्व्वगात्रसम्भवस्य, तत्तु न सम्यक्सर्व्वाङ्गप्रत्यङ्गानि युगपत्सम्भवन्तीत्याह धन्वन्तरिः गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवत् चूतफलवच्च। तद्यथा चूतफले परिपक्वे केशरमांसास्थिमज्जानः पृथग्दृश्यन्ते कालप्रकर्षात्तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति। एवं गर्भस्य तावत्सर्व्वेष्वङ्गप्रत्यङ्गेषु सत्स्वपि सौक्ष्म्यादनुपलब्धिः। तान्येव कालप्रकर्षात्प्रव्यक्तानि भवन्ति। गर्भस्य केशश्मश्रुलोमास्थि-नखदन्त-शिरास्नायुधमनी-रेतः- प्रभृतीनि स्थिराणि पितृजानि। मांसशोणितमेदोमज्जहृन्नाभियकृत्प्लीहान्त्रगुदप्रभृतीनि मृदूनि मातृजानि। शरीरोपचयो बलं वर्णः स्थितिर्हानिश्च रसजानि। इन्द्रियाणि ज्ञानं विज्ञानमायुः सुखदुःखादिकञ्चात्मजानि। वीर्य्यमारोग्यं बलवर्णौ मेधाच सात्म्यजानि। तत्र यस्या दक्षिणे स्तने प्राक् पयोदर्शनं भवति दक्षिणाग्निमहत्त्वञ्च पूर्व्वञ्च दक्षिणं सक्थ्युत्कर्षति बाहुल्याच्च पुत्रानभिधेयेषु द्रव्येषु दौहृदमभिध्यायति। स्वप्नेषु चोपलभते पद्मोत्पलकुमुदासातकादीनि पुत्रानान्येव प्रसन्नमुखवर्णा च भवति तां ब्रूयात् पुत्रमियं जनयिष्यतीति तद्विपर्य्यये कन्यां। यस्याः पार्श्वद्वयमुन्नतं पुरस्तान्निर्गतमुदरं प्रागभिहितलक्षणञ्च तस्या नपुंसकमिति विद्यात्। यस्या मध्ये निम्नं द्रोणीप्रभूतमुदरं सा युग्मं प्रसूयते। सु. शा. ३अ। तस्य खल्वेवं प्रवृत्तस्य शुक्रशोणितस्याभिपच्यमानस्य क्षीरस्येव सन्तानिकाः सप्त त्वचो भवन्ति। तासां प्रथमा अवभासिनी नाम सर्व्ववर्णानवभासयति, द्वितीया लोहिता नाम षोड़शभागप्रमाणा तिलकालकाद्यधिष्ठाना, तृतीया श्वेता नाम द्वात्रिंशद्भागप्रमाणा चर्म्मदलाद्यधिष्ठाना, चतुर्थी ताम्राष्टभागप्रमाणा कुष्ठाद्यधिष्ठाना, पञ्चमी वेदिनी नाम द्वौ द्विप्रमाणा व्यङ्ग्याद्यधिष्ठाना, षष्ठी मांसधरा नाम द्वौ त्रिंशद्भागप्रमाणा भगन्दराद्यधिष्ठाना। कलाः खल्वपि सप्त धात्वाशयान्तरमर्य्यादाः। तत्र गृहीतगर्भाणामार्त्तववहानां स्रोतसां वर्त्मान्यवरुध्यन्ते गर्भेण तस्माद्गृहीतगर्भाणामार्त्तवं न दृश्यते। ततस्तद्धः प्रतिहतमूर्द्धमागतमपरस्योपचीयमानमपरेत्यभिधीयते। श्रोणिस्तनोर्द्धान्तरमागतं पयोधरावभिप्रतिपद्यते। तस्माद्गर्भिण्याः पीनोन्नतपयोधरा भवन्ति। गर्भस्य यकृत्प्लीहानौ शोणितजौ शोणितफेनप्रभवः फुप्फुसः शोणितकिट्टप्रभव उण्डुकः। अस्रजः श्लेष्मणश्चापि यः प्रसादः परो मतः। तं पञ्चमासं पित्तेन वायुराप्यनुधावति। ततोऽस्यान्त्राणि जायन्ते गुदं वस्तिञ्च देहिनः उदरे पच्यमानानामाधानाद्रूक्षसारवत्। कफशोणितमांसानां सारो जिह्वा प्रजायते। यथार्थसुश्रुषा युक्तो वायुः स्रोतांसि दारयेत्। अनुप्रविश्य पिण्डितं पेशीर्विभजते तथा। मेदसः स्नेहमादाय शिराक्लायुलमाप्नुयात्। शिराणाञ्च मृदुः पाकः स्नायूनाञ्च ततः खरः। आश्वभ्यासयोगेन करीत्याश्वसमस्वनम्॥ रक्तमेदःप्रसादाद्वृक्कौ, मांसाच्चकफमेदःप्रसादाद्वृषणौ, शोणितकफप्रसादाज्जं हृदयं यदाश्रया हि धमन्यः प्राणवहाः, तस्याधो वामतः प्लीहा फुप्फुसस्य दक्षिणतो यकृत् क्लोम च। तद्धृदयं विशेषेण चेतनास्थानमतस्तस्मिन्सर्व्वे सत्त्वाश्रिताः सर्व्वप्राणिनः स्वपन्ति। सु. शा. ४अ.। सद्यो गृहीतगर्भाया लिङ्गानि त्रयो ग्लानिः पिपासा सक्थिसदनं शुक्रशोणितयोरवबन्धः स्तनयोः क्षणसुखता रोमराज्युद्गमस्तथा। अक्षिपक्ष्माणि चाप्यस्याः सन्धीयन्ते विशेषतः। अकामतश्छर्दयति गन्धादुद्विजते मुहुः। प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते॥ तदा प्रभृत्येव व्यायामं व्यवायमपतर्पणमतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं यानावरोहणं भयमुत्कटकासनञ्चैकान्ततः स्नेहादिक्रियां शोणितस्रावणं चाकाले वेगविधारणञ्च न सेवेत। दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते। स स भागः शिशोस्तस्य गर्भस्यस्य प्रपीड्यते॥ सु. शा. ३अ.। आमुखीऽभिमुखः शेते गर्भो गर्भाशये स्त्रियाः। स योनिं शिरसा याति स्वभावात्सवसन्मतिः॥" सु. शा. ५अ.। शिश्नौ। सन्धौ। पणसकण्टके। कुंचौ। पेटे। मे.। अथाया गर्भज्ञानलक्षणे—योन्यां वीजग्रहे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रस्तिः लोचनाविलता तथा। सगर्भा ताड़येदश्वं गर्भस्य परिरक्षणम्॥ काचिन्मूका जड़ीभूता निर्विकारा व्यजेदृषम्। काचित्कण्डूयमानाश्वा गर्भिण्यपि प्रहर्षति॥ काचिद्रागवशाद्वापि समूत्रा ताड़येदृषम्। रुणद्धि परुषा काचित् अश्वा पुच्छेन योनिकाम्॥ विन्यस्तकर्णौ क्रीधाढ्या हर्षे दुष्टाप-सर्पिणी। शूनाधोयोनिभागा च सदा कान्तिविधा-रिणी॥ प्रश्लथस्नायु स्निग्धाङ्गी निविड़ोदरबन्धना। गर्भोपक्षिप्तपार्श्वा च बड़वा गर्भिणी मता॥ जं. द. ९ अ.।

गर्भकम्। क्ली। रजनीद्वये। दुई रात्रि। हे. च.। पुं। केशमध्यस्थितमाल्ये।

गर्भकण्टकः। पुं। धनसद्वृक्षे। वै. निघ.।

गर्भकरः। पुं। पुत्रजीवद्वृक्षे। भा.।

गर्भकोशः (शः)। पुं गर्भाशये। वै. निघ.।

गर्भगृहम्। क्ली। अन्तर्गृहे।

गर्भघातिनी। स्त्री। लाङ्गलीनामवृषे। ऐश-लाङ्गलि। रा. नि. व. ४।

गर्भचिन्तामणिः। पुं। गर्भाधिकारे रसः। स चतुर्विधः। १रसः—सूतिकाविनोदरसे तुल्य-खाने स्वर्णदानेन चिन्तामणिर्भवति। र. सा. सं.। २यः—जातीफलं टङ्कणं (सोहागा) विकटु हिङ्गुलं प्र. समभागः। जम्बीररसेन वटी कार्य्या समभागः। ३यः—रसः रौप्यं लौहं प्र. २ ती. अभ्रं ६ ती. (मतान्तरे ४ ती.) कर्पूरं वङ्गं ताम्रं जाती-फलं जयित्री गोचुरबीजं शुतावरी बला (श्वेत-बला) गोरक्षतण्डुला (गोरक्षचाकुलिया) प्र. १ ती. जलेन वटी कार्य्या। मा २र.। ४र्थः—रसः गन्धकः स्वर्णं लौहं रौप्यमाक्षिकंहरितालं वङ्गं अभ्रं प्र. समभागः। ब्रह्मी-वासा-भृङ्गराज-चित्रपर्पटी-दशमूलानां प्रत्येकं रसेन ७ भावना देयाः। वटी १ र.। बृहच्चिन्तामणिः।

गर्भचर्य्या। स्त्री। गर्भोपचारकर्म्मणि।

गर्भच्युतिः। स्त्री। गर्भस्रावे।

गर्भजरोगः। पुं। स्त्रीरोगे। विका.।

गर्भण्डः। पुं। नाभिगुड़के। नाभेर गोँड़। विका.।

गर्भदः (दा)। पुं, स्त्री। पुत्रजीवद्वृक्षे। रा. नि. व. ९। श्वेतकण्टकार्य्याम्। भा.।

गर्भदात्री (त्रिका)। स्त्री। पुष्यदात्रीवृक्षे। तत्पर्य्यायः,—पुत्रदा, प्रजादा, अपत्यदा, सृष्टि-प्रदा, प्राणिमाता, तापसद्रुमसन्निभा, प्राणदाता। के.। गुणाः—मधुरा शीता स्त्रीपुष्पदोषपित्त-दाहश्रमघ्नी गर्भदा च। रा. नि. व. ४।

गर्भद्रुतिः। स्त्री। वह्निव्यतिरेकेऽपि रसयोगी-कृतानां लोहानां द्रवत्वे। शीघ्रानन्तर पारादि सहित स्वर्णादिर द्रवत्व। "जम्बीरबीजपूरक-चाङ्गेरीवेतसाम्लसंयोगात्। चारा भवन्ति सुतरां गर्भद्रुतिजारणे शस्ताः॥" र. चि. ३अ।

गर्भधारिणी। स्त्री। मातरि।

गर्भधृक्। वि। गर्भधारिण्याम्। वै. निघ.।

गर्भनाड़ी। स्त्री। (Umbilical cord.) गर्भप्रणाल्याम्। वै. निघ.।

गर्भनाशः। पुं। गर्भपाते।

गर्भनाशना। स्त्री। अरिष्टवृक्षे। रिठा गाछ। वै. निघ.।

गर्भनुत्। पुं। लाङ्गलिकायाम्। विषलाङ्गलि। सं कलसावी। भा.।

गर्भपरिस्रवः। पुं। (Secondines.) गर्भ-वेष्टने। गर्भपुष्प। वै. निघ.।

गर्भपाकी (इन्)। पुं। षष्टिकव्रीहौ। षेटे धान। हे. च.।

गर्भपातः। पुं। गर्भजरोगविशेषे। येन पञ्चम-षष्ठमासिकगर्भस्य पतनं भवेत्। "सतः स्थिर-शरीरस्य पातः पञ्चमषष्ठयोः।" सु. नि. २७ अ.। See गर्भस्रावः।

गर्भपातकः। पुं। रक्तशोभाञ्जनवृक्षे। जटा.।

गर्भपातनः। पुं। रीठाकरञ्जे। रिठा। भा.।

गर्भपात(ति)नी। स्त्री। कलिकारीवृक्षे। विषलाङ्गलिया। रा. नि. व. ४।

गर्भपोयूषवल्लीरसः। पुं। स्त्रीरोगाधिकारे रसः। "सूतो गन्धं तथा स्वर्णं लौहं रजत-माक्षिके। हरितालं वङ्गभस्माभ्रकं समभागिकं। भावना खलुदातव्या रसैरेसां पृथक् पृथक्। ब्रह्मी वासा भृङ्गराजपर्पटं दशमूलकं। सप्तधा भावयेद्वैद्यः गुञ्जामानां वटीञ्चरेत्॥" रौप्यं स्वर्णमाक्षिकञ्च। भैष.। See बृहद्गर्भचिन्तामणिः।

गर्भपोषणम्। वि। गर्भपुष्टिकरणे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गर्भभाण्डकः । पुं । प्लवङ्गे । सद. व. ५ ।

गर्भरूपः । वि. । तरुणे ।

गर्भवती । स्त्री । ससत्त्वायां स्त्रियाम् । पोवाती स्त्री । तत्पर्य्यायः,—अन्तर्वत्नी, गुर्व्विणी, गर्भिणी, ससत्त्वा, आपन्नसत्त्वा, दोहदवती (अम्हरः), दोहदान्विता । हे. । पुत्रगर्भवतीलक्षणं—पुत्रगर्भयुक्तायाः नार्य्या द्वितीये मासि गर्भाशयमध्ये गर्भः पिण्डाकारो लक्ष्यते, दक्षिणाक्षिमहत्त्वं प्राग्दक्षिणस्तने स्तन्यं प्रसन्नमुखवर्णता दक्षिणोरु, पुष्टिः, निद्रायां पुन्नामप्रियद्रव्येष्वभिलाषः आस्यादिफललाभः इति । कन्यागर्भलक्षणं उक्तविपरीतलक्षणं ज्ञेयम् । नपुंसकगर्भे गर्भोऽर्व्वुदाकृतिः पार्श्वद्वयसुन्नतं पुरस्ताच्च महदिति । मा. । See गर्भिणी ।

गर्भविच्युतिः । स्त्री । रोगादिना गर्भस्य अकालपतने, गर्भस्रावादौ । "क्षुत्पिपासाभिघातैस्तु तद्वैगुण्यकृतं फलं । पतत्यकालेऽपि यथा तथा स्थाद्गर्भविच्युतिः ॥" सु. नि. ८ अ. ।

गर्भविनोदरसः । पुं । सूतिकाधिकारे रसः । त्रिकटु ३ तो. हिङ्गुलं ४ तो. जयित्री लवङ्गञ्च प्र. ३ तो. स्वर्णमाक्षिकं २ तो. जलेन चणकाकारा वटी कार्य्या । र. सा. सं. ।

गर्भविलासतैलम् । क्ली । गर्भाधिकारे गर्भस्थापनतैले । तिलतैलं मूर्च्छितं १ श. कल्कार्थं —भूकुष्माण्ड दाड़िमपत्रं आमहरिद्रा (काँचा हलूद) अङ्कोटकपत्रं त्रिफला जातीपुष्पं शतावरी नीलोत्पलं पद्मपुष्पञ्च प्र. १४० तो. (वा मिलितं १६ तो.) पाकार्थं वारि ८ श. । भैष. ।

गर्भविलासरसः । पुं । गर्भिणीज्वरे रसः । रसगन्धकतुत्थकानां प्र. समं जम्बीरत्रिकटुरसाभ्यां प्र. दिनत्रयं भावयेत् । पारा, गन्धक, तूँतेभस्म प्रत्येके समान । जम्बीररसे (गोँड़ा लेबू) ३ दिन ও त्रिकटूरसे ३ दिन भावना दिबे । र. चि. ६ अ. ।

गर्भविस्राविणी । स्त्री । एलायाम् । वै. निघ. ।

गर्भशङ्कुः (कः) । पुं । मृतगर्भनिःसारणास्त्रे । वै. निघ. । तल्लक्षणं यथा,—ततोऽग्रे शङ्कुना तुल्यो गर्भशङ्कुरितिस्मृतः । अष्टाङ्गुलायतस्तेन मूढ़गर्भं हरेत् स्त्रियाम् ।

गर्भशय्या । स्त्री । Uterus. पक्वाशयमध्यवर्त्ति-गर्भोत्पत्त्याश्रये । यथा वेष्टितो गर्भः कुक्षौ तिष्ठति । गर्भाशय । तस्य रूपम्—"शङ्खनाभ्याकृतियोनिस्त्यावर्त्ता सा च कीर्त्तिता । तस्यास्तृतीये त्यावर्त्ते गर्भशय्या प्रकीर्त्तिता । यथा रोहितमत्स्यस्य मुखमवति रूपतः । तत्संस्थाञ्च तथारूपां गर्भशय्यां विदुर्बुधाः ॥" भा. ।

गर्भशल्यम् । क्ली । गर्भवेदनायाम्, गर्भशूले । च. शा. ८ अ. ।

गर्भशातनम् । क्ली । भेषजेन गर्भपातने । पेट खसान । शातनप्रस्तुतिभिः विशेषैः बन्धनान्मुच्यते गर्भः ।" सु. नि. ८ अ. ।

गर्भशोषः । पुं । गर्भस्य शुष्कतारोगे ।

गर्भसम्भवा । स्त्री । स्थूलैलायाम् । वै. निघ. ।

गर्भस्थली । स्त्री । गर्भाशये ।

गर्भस्थानम् । क्ली । गर्भाशये । अन्तःपुरे । वै. निघ. ।

गर्भ(र्भी)स्थापनम् । क्ली । गर्भरक्षणे । गर्भरक्षणयोगे । च. शा. ८ अ. ।

गर्भस्फुरणम् । क्ली । गर्भस्पन्दने । सु. शा. १० अ. ।

गर्भस्रावः । पुं । Abortion. गर्भविच्युतौ । चतुर्थमासपर्य्यन्तं शोणितरूपस्य गर्भस्य विच्युतौ । गा खसा, पेट खसा । स च भयाभिघाततीक्ष्णौषधपानाशनसेवनादिभिर्भवति । गर्भस्रावनिदानलक्षणे यथा— "भयाभिघाततीक्ष्णौषधपानाशननिषेवणात् । गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत् । गाढ्यधर्म्माध्वगमनयानायासप्रपीड़नैः । ज्वरीपवासपतनप्रहाराजीर्णधावनैः । वमनाच्च विरेकाच्च कुत्सनाद्गर्भपातनात् । तीक्ष्णधारीषकटुकतिक्तरूक्षनिषेवणात् । वेगाभिघातादिषमासनाच्छयनाद्गयात् । आचतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः ॥" भा. ।

गर्भस्रावी (विन्) । पुं । हिन्तालवृक्षे । शोंताल गाछ । रा. नि. व. ९ ।

गर्भागारम् । क्ली, पुं । शयनगृहे । अन्तर्गृहे । गर्भाशये । रा. नि. व. १८ ।

गर्भाधानम् । क्ली । प्रथमऋतुस्नानादूर्द्ध्वमनुष्ठेये दशसंस्कारान्तर्गतप्रथमसंस्कारे । तत्क्रमः—"अथास्मै पञ्चविंशतिवर्षाय द्वादशवर्षां पत्नीमावहेत् पित्र्यधर्म्मार्थकामप्रजाः प्राप्स्यतीति । ऊनषोड़शवर्षायामप्राप्तः पञ्चविंशतिम् । यद्यार्षं पुमान् गर्भं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुचिस्थः स विपद्यते ॥ जातो वा न चिरञ्जीवेज्जीवेद्वा दुर्ब्बलेन्द्रियः। तस्मादत्यन्तबालायां गर्भाधानं न कारयेत् ॥" सु. शा. १० अ.।

गर्भाम्भः। पुं। गर्भस्थजले। पानभूमि। वा. उ. १अ.।

गर्भारिः। पुं। सूक्ष्मैलायाम्। रा. नि. व. ६।

गर्भावक्रान्तिः। स्त्री। गर्भावतरणक्रियायाम्। सु. शा. ३अ.। See गर्भः।

गर्भाशयः। पुं। गर्भशय्यायाम्। जरायौ। See गर्भशय्या।

गर्भाष्टमः। पुं। गर्भजननमासादष्टममासे। चिका.।

गर्भिणी। स्त्री। चीराबीवृक्षे। क्षीरुई गाछ। श. च.। गर्भवत्याम्। लिङ्गं यथा—"स्तनयोर्मुखकार्ष्ण्यं स्याद्दीमराज्युद्गमस्तथा। अक्षिपक्ष्माणि चाप्यस्याः सम्मीलन्ते विशेषतः। छर्द्दयेत्पथ्यं भुक्तापि गन्धादुद्विजते शुभात्। प्रसेकः सदनञ्चैव गर्भिण्या लिङ्गमुच्यते ॥" भा.। See गर्भः। तत्कृत्यं यथा—"गर्भिणी प्रथमदिवसात् प्रभृति नित्यस्नाता शुचिलङ्कृता शुक्लवसना शान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेन्मलिनविकृतहीनगात्रानि, न स्पृशेत् दुर्गन्धदुर्दर्शनानि, परिहरेदुद्वेजनीयाश्च कथाः, शुष्कं पर्य्युषितं कुथितं क्लिन्नं चान्नं नोपभुञ्जीत। वह्निनिष्क्रमणं शून्यागारचैत्यश्मशानवृक्षायतान् क्रोधभयङ्करांश्च भावानुच्चैर्भाष्यादिकं परिहरेत् यानि च गर्भं व्यापादयन्ति। न चाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत। न चायस्येच्छरीरं पूर्व्वोक्तानि च परिहरेत्। शयनासनं ह्रस्वास्तरणं नात्युच्चमपाश्रयोपेतमसम्बाधं विदध्यात्। हृद्यं द्रव्यं मधुरप्रायं स्निग्धं दोषनीयसंस्कृतञ्च भोजनं भोजयेत्। सामान्यमेतदाप्रसवात्। विशेषतस्तु गर्भिणी प्रथमद्वितीयतृतीयमासेषु मधुरशीतद्रवप्रायमाहारमुपसेवेत, चतुर्थे पयोनवनीतसंसृष्टमाहारयेज्जाङ्गलमांससहितं हृद्यमन्नं भोजयेत्, पञ्चमे क्षीरसर्पिःसंसृष्टं, षष्ठे श्वदंष्ट्रासिद्धस्य सर्पिषो मात्रां पाययेत् यवागूं वा, सप्तमे सर्पिः पृथक्पर्ण्यादिसिद्धमेवमाप्याय्यते गर्भः, अष्टमे वदरीदकेन बलातिबलाशतपुष्पपललपयोदधिमस्तुतैल-लवणमदनफल-मधुघृतमिश्रेण स्नापयेत् पुराणपुरीषशुद्ध्यर्थम् अनुलोमनार्थञ्च वायोः, ततः पयोमधुरकषायसिद्धेन तैलेनानुवासयेदनुलोमे हि वायौ सुखमनुपद्रवा प्रसूयते, नवमे मासि सूतिकागारमेनां प्रवेशयेत्। प्रसवलक्षणं—"जाते हि शिथिले कुक्षौ सुप्ते हृदयबन्धने। सगुदे जघने नारी ज्ञेया सा तु प्रजायिनी ॥ ततोपस्थितप्रसवायाः कटीपृष्ठसम्भृति समन्ताद्वेदना भवन्त्यभीक्ष्णं पुरीषप्रवृत्तिः सूचं प्रसिच्यते योनिसुखात् श्लेष्मा च।" सु. शा. १० अ.।

गर्भिण्यवेक्षणम्। क्ली। कुमारभृत्यायाम्। Midwifery. गर्भिणीपरिचर्य्यायाम्। चिका.।

गर्भी (र्भिन्)। पुं। पुत्रजीववृक्षे। वै. निघ.।

गर्भेपाकर्णिकः। पुं। षष्टिकधान्ये। रा. नि. व. १६।

गर्म्मु(र्म्मी)टिका (टी)। स्त्री। लवणतृणविशेषे। गाड़ुया घासविशेष वा धान। हिं जरड़ि। सं गोड़ालवणतृण। तत्पर्य्यायः—गर्म्मूच्छदः। र.। गुणाः—मधुरा शीता सारणी दाहघ्नी रक्तदोषघ्नी रुच्या पशूनां दुग्धदायिनी। रा. नि. व. ८। र. सा.।

गर्म्मुत्। स्त्री। तृणधान्यविशेषे। गड़गड़, मयना। अम.। सुवर्णे। नखे। मे।

गर्व्वालावूः। स्त्री। पातालगरुड़ीनाम लताविशेषे।

गलः। पुं। कण्ठे। गला। रा. नि. व. १८। सर्ज्जरसे। धूनो। मे। गड़कमीने। श. र.।

गलकः। पुं। गड़कमत्स्ये। श. र.।

गलकम्बलः। पुं। साक्षायाम्। गरुत्र गलस्थित कम्बलाकृति मांस। अम.।

गलकोलः। पुं। गलशुण्डीनामरोगे। वै. निघ.।

गलगण्डः। पुं। Goitre. गलरोगविशेषे। गलगण्ड। तस्य निदानं—"वातः कफश्चापि गले प्रदुष्टौ मध्ये तु संसृत्य तथैव मेदः। कुर्व्वन्ति गण्डं क्रमशः स्वलिङ्गैः समाचितं तं गलगण्डमाहुः॥ लक्षणं—निबद्धः स्वयथुर्यस्य सुप्तवल्लम्बते गले। महान्वा यदि वा ह्रस्वो गलगण्डं तमादिशेत् ॥" मा. नि.। पक्षिविशेषे। हाड़गिले।

गलगोड़ि(लि)का (ली)। स्त्री। सविषकीटविशेषे। यस्य दंशनात् दाहस्वेदशोफकरी तु गलगोड़िका।" च.। निर्विषसर्पविशेषे। सु. कल्प. ४ अ.।

गलग्रहः। पुं। मत्स्यघण्टापरनामघेये व्यञ्जने।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मांछेर घण्टे । श. च. गलरोगविशेषे । गलाधरा । "तस्य श्लेष्मा प्रकुपितः तिष्ठत्यन्तर्गले स्थिरः । आशु सञ्जनयेच्छोफं जायतेऽस्य गलग्रहः ॥" च. सू. १८ अ. । अश्वस्य गलरोगविशेषे । ज. द. २९ अ. ।

गलग्राहः । पुं । मकरे । वै. निघ. ।

गलत्कुष्ठारिरसः । पुं । गलत्कुष्ठे रसः । पारद-गन्धक-ताम्रलौह-गुग्गुलु - चित्रकशिलाजतुकुचिलावचानां (पाठान्तरे वचास्थाने विफला) प्र.समभागः । अभ्रं ४ भ. करञ्जबीजं ४ भ. घृतमधुभ्यां वटी कार्य्या । पारा, गन्धक, तामा, लौह, गुग्गुल, चितामूलचूर्ण, शिलाजतु, कुचिला, वच (पाठान्तरे त्रिफला) प्रत्येके १ भ. अभ्र ४ भ. करञ्जबीज ४ भ. घृत ও মধু দ্বারা মর্দ্দন । मा. १ तो. । भा. । र. सा. सं. ।

गलन्तिका । स्त्री । कर्कर्य्याम् । वसूचारा । अम. ।

गलभङ्गः । पुं । स्वरभङ्गे ।

गलमेखला । स्त्री । गलसूत्रे । हारा. । तत्पर्य्यायः—सूत्रावली । हा. ।

गलरोगः (हिणी) । पुं, स्त्री । कण्ठगतसप्तदशरोगभेदे । तत्र वातपित्तकफसन्निपातशोणितजभेदेन रोहिणी पञ्चधा भवति । अपरे गलशालूकतुण्डिकेरिका-गलौघ-वलय - गलायुक-शतघ्नी - गलविद्रधि - गलार्ब्बुदाः बहिर्गलगण्डः वातज - कफजमेदोजभेदेन स्वरघ्नेति द्वादश । रोहिण्याः पञ्च कण्ठशालूकाधि-जिह्वबलय - बलासैकद्वन्द्वशतघ्नीगिलायुगलविद्रधिगलौघस्वरघ्नमांसतानविदार्य्य इति अष्टादश । लक्षणं—"गलेऽनिलः पित्तकफौ च मूर्च्छितौ पृथक्समस्ताश्च तथैव शोणितं । प्रदूष्य मांसं गलरोधिनीऽङ्कुरान् सृजन्ति यान् सासृक्हरा तु रोहिणी ॥" सु. नि. १६ अ. । कण्ठास्यशोषक्लेदात् सा हनुशोषरुक्करी । पित्ताज्वरीषाटक्षीहकण्ठधूमायनान्विता । कफेन पिच्छिला पाण्डुः असृजा स्फोटकाचिता । गम्भीरपाकानिचयात्सर्व्वलिङ्गसमन्विता ॥ वा. उ. २१ अ. । लक्षणानि स्वस्वपर्य्याये द्रष्टव्यानि ।

गलरोहिणी । स्त्री । कण्ठगत - रोगविशेषे । "गलेऽनिलः पित्तकफौच मूर्च्छितौ । पृथक् समस्ताश्च तथैव शोणितम् । प्रदूष्य मांसं गलरोधिनीऽङ्कुरान् सजन्ति यान् सासृक्हरा तु रोहिणी ॥" सुश्रु. ।

गलविद्रधिः । पुं । गलरोगभेदे । कण्ठविद्रधि । लक्षणं—"सर्व्वाङ्गजं व्याप्य समुत्थितौ यः शोफौ रुजौ यत्र वसन्ति सर्व्वाः । स सर्व्वदोषौ गलविद्रधिस्तु तस्यैव तुल्यः खलु सर्व्वजस्य ॥" सु. नि. १६ अ. ।

गलव्रतः । पुं । मयूरे । त्रिका. ।

गलशालूकः । पुं । अश्वस्य मुखरोगविशेषे । ज. द. २९ ।

गलशुण्डिका (ण्डी) । स्त्री । The mvula. अलिजिह्विकायाम् । आलजिव, गलার গুঁড়ি । रा. नि. व. १८ । च. शा. ७अ. । तत्पर्य्यायः,—सुधास्रवा, घण्टिका, लम्बिका (हे.), रसाङ्का, प्रतिजिह्विका, साध्वी, अलिजिह्विका, रसताकाकुः (शब्दर.) । जिह्वाप्रबन्धजाः कण्ठे दारुणा मार्गरोधिनः । मांसाङ्कुराः शीघ्रचया रोहिणी शीघ्रकारिणी ॥ कण्ठगुण्डीत्यपरनामधेये तालुजरोगविशेषे । लक्षणं यथा—"श्लेष्मासृग्भ्यां तालुमूलात् प्रवृद्धो दीर्घः शोथो श्वेतवस्तिप्रकाशः । तृष्णाश्वासकासकृत् तं वदन्ति व्याधिं वैद्याः कण्ठगुण्डीति नाम्ना ॥" भा. म. ४भ. मुखरो. चि. ।

गलशोथः । पुं । गलस्फोटौ । গলাফোলা । "सनागरं देवदारु चव्यचित्रकपेषितं । प्रलेपनमिदं श्रेष्ठं गलशोथघुनाशनम् ॥" भैष. ज्व. चि. ।

गलस्तनः । पुं । गलगण्डरोगे । रा. नि. व. २० । छागगलस्थस्तने । वै. निघ. ।

गल(ले)स्तनी । स्त्री । छाग्याम् । हे. च. ।

गला । स्त्री । अलम्बुषायाम् । भा. । ফুলশোলা ।

गलाङ्कुरः । पुं । A disease of the throat. रोहिणीत्यपरपर्य्याये गलरोगविशेषे । गण्डमालायाम् । গণ্ডমালা । हे. च. ।

गलानिकः(विलः) । पुं । गङ्गाटेयमत्स्ये । গঙ্গাচিংড়ি । त्रिका. ।

गलायुकः । पुं । गलरोगभेदे । लक्षणं—"मांसकीली गले दीर्घैरेकोऽनेकोऽथवाल्परुक् । क्लेच्छोक्ष्णाभ्यवहृतिः पृथुमूली गलायुकः ॥" वा. उ. २१ अ. ।

गलार्ब्बुदम् । क्ली । गलरोगभेदे । গলার আব্ । लक्षणम्—"जिह्वावसाने कण्ठादावपाकं स्वयथुं गलाः । जनयन्ति स्थिरं रक्तं नीरुजं तद्गलार्ब्बुदम् ॥ वा. उ. २१ अ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गलितकुष्ठम्। क्ली। Incurable leprosy. गलत्कुष्ठे।

गलितदन्तः। त्रि। दन्तहीने।

गलुः। पुं। मणिविशेषे। महा भा.।

गलेगण्डः। पुं। सर्कटपक्षिणि। त्रिका.। गलगण्डरोगे। रा. नि. व. २०।

गलेस्तनी। स्त्री। स्त्रीछागे। रा.।

गलोद्भवः। पुं। रोचमानार्श्वे। त्रिका.।

गलौघः। पुं। गलरोगविशेषे। तस्य लक्षणं यथा—"शीघ्री सहानन्नजलावरोधी तीव्रज्वरी वातगतेर्निहन्ता। कफेन जाती रुधिरान्वितेन गले गलौघः परिकीर्त्यतेऽसौ॥" सु. नि. १६ अ.।

गल्लः (कः)। पुं। गण्डे। गाल। हे. च.।

गल्लचातुरी। स्त्री। उपधानविशेषे। गालबालिश। जटा.।

गल्लिरः। पुं। उन्मन्थनामकक्रकरपालीगतरोगे।

गल्वर्कः। पुं। वैदूर्यमणौ। इन्द्रनीलमणौ। त्रिका.। सुरापानपात्रे।

गवयः। पुं। गलकम्बलयूने गोसदृशे कूलचरपशौ। तत्पर्य्यायः,—गोसटृचः (हे.), गवालूकः (त्रि.), वनगौः, वलभद्रः, महागन्धः। तन्मांसगुणाः—बृंहणं बल्यं रूक्षं ह्रष्यञ्च। रा. नि. व. १७। स्निग्धं मधुरं कासघ्नं विपाके मधुरं व्यवायवर्द्धनञ्च। सु. सू. ४६ अ.।

गवयी। स्त्री। गवयपत्न्याम्। वृद्धा गाई। रा. नि. व. १६। तत्पर्य्यायः,—वनधेनुः, भिल्लगवी। रा.।

गवयोद्भवः। पुं। तक्रोरे। वै. निघ.।

गवराजः। पुं। महाहृषे। श. च.।

गवलम्। क्ली। महिषशृङ्गे। अम.। विषे। अ.। पुं। वनमहिषे। हे. च.।

गवाची (टी)। स्त्री। (Macrognathus pancalus.) पङ्कालमत्स्ये। पाँकाल माछ। अस्य गुणाः—अजीर्णकारित्वं गुरुत्वं श्लेष्मकोपनत्वञ्च। राज. ३ प.।

गवादनम्। क्ली। घासे। श. च.।

गवादनी। स्त्री। इन्द्रवारुणीलतायाम्। राखालशशा। वै. निघ. अपस्मा. चि.। श्वेतापराजितायाम्। अक्षोटवृक्षे। वै. निघ.। अपराजितायाम्। नीलापराजितायाम्। रा. नि. व. ३।

गवालूकः। पुं। गवये। त्रिका.।

गवाक्षिका। स्त्री। खाद्यायाम्। र. मा.।

गवाक्षः। पुं। गोक्षुरके। वै. निघ.। वातायने। अम.।

गवाक्षिका। स्त्री। गवाक्ष्याम्। अपराजिता। र. मा.।

गवाक्षितः। त्रि। विरचिते। "यैर्गवाक्षितमिदं शरीरम्।" भा.।

गवाक्षी। स्त्री। शाखोटवृक्षे। शाँओड़ा गाछ। रा. नि. व. ८। महावल्लायाम्। रा. नि. व. २३। इन्द्रवारुणीलतायाम्। राखालशशार गाछ। सु. कल्प. ७अ.। भा. म. १भ. तन्द्रिकज्व. चि.। "निकुम्भकुम्भविफलागवाक्षी।" गोडुम्बायाम्। राजगोमूक। च. सू. २अ.। गोरक्षकर्कट्याम्। राखालशशा। सि. यो. कास. चि.। अपराजितायाम्। प. मु.। सु. सू. ३६ अ.। श्वेतपुष्पेन्द्रवारुण्याम्। सु. सू. ३९ अ. अधःसंशमने।

गविनः। पुं। कीकड़नामकविलेशयसर्गे। जविन इत्यपि पाठः। रा. नि. व. १९।

गवेडुः। स्त्री। धान्यविशेषे। गड़गड़, देधान। अम.।

गवेधुः (कः)। पुं। घुलुचवृक्षे। देधान। च. सू. २अ.। गोरक्षतण्डुलायाम्। गोरक्षचाकुलिप्रा। च. द.। सि. यो. छर्दि. चि. विष्णुतैले, महानारायणतैले। क्ली (कम्)। गैरिके। गिरिमाटी। रा. नि. व. १३।

गवेधुका। स्त्री। (Coixbarbata.) गवेड़ी। देधान। हिं गरहेड़ आ। तत्पर्य्यायः,—गवेडुः (अ.), गवेधुः, गवेडूका (अ. टी.), कुण्डः (मे.), क्षुद्रा, गोजिह्वा, गुन्द्रः, गुन्द्रा (व.)। च. सू. २अ. यवान्नाम्। गुणाः—गवेधुः कटुका स्वादी कार्श्यकृत् कफनाशिनी। भा. पू. १भ. धान्यव.। नागबलायाम्। गोरक्षचाकुले। रा. नि. व. ४। भैष. वा. व्या. चि. खल्वविष्णुतैले। काश्मर्यां। वा. व्या. श्वा. नारायणतैले।

गवेरि(रु)कम्। क्ली। गैरिके। गिरिमाटी। त्रिका.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गवेश(शि)का। स्त्री। गोरचीवृत्ते। श्र. च.।

गव्यम्। क्ली। गोघृते। गोरोचनायाम्। गव्यदधि। गोदुग्धे। विका.। वि। गोसम्बन्धीये।

गव्यघृतम्। क्ली। गव्यनवनीतजातघृते। गांउया घि। गुणाः—बुद्धिकान्तिस्मृतिदं बलमेधावर्द्धकं पुष्टिकरं वातश्लेष्मघ्नं श्रमहरं पित्तघ्नं हृद्यम् अग्निकरं पाकमधुरं वृष्यं देहस्थैर्य्यकरञ्च। रा. नि. व. १५।

गव्यतक्रम्। क्ली। गोदुग्धभवघोले। गरुव घोल। गुणाः—"गव्यं विदीपशमनं पथ्ये श्रेष्ठं तदुच्यते। दीपनं रुचिकृन्मेध्यं अर्शोदरविकारजित्॥" अवि. ८ अ.।

गव्यदधि। क्ली। गोदुग्धजातदधनि। गुणाः—अतिपवित्रं शीतलं स्निग्धं दीपनं बल्यं मधुरम् अरोचकघ्नं ग्राहि वातरोगघ्नञ्च। रा. नि. व. १५। आम्लं स्वादुरसं ग्राहि गुरूणां वातरोगजित्। मेदःशुक्रबलश्लेष्म-रक्तपित्ताग्नि-शोफकृत्। स्निग्धं विपाके मधुरं दीपनं रुचिवर्द्धनं। वातापहं पवित्रञ्च दधि गव्यं रुजाकरम्॥" अवि. ८ अ.।

गव्यनवनीतम्। क्ली। गोदुग्धजनवनीते। गांउया ननी। सर्व्वदोषघ्नं बलकृत् पुष्टिवर्द्धनञ्च। रा. नि. व. १५।

गव्यमांसम्। क्ली। गोमांसे। सु. सू. ४६ अ.।

गव्या। स्त्री। गोरोचनायाम्। रा. नि. व. १२।

गव्यूतिः। पुं, स्त्री। क्रोशद्वये। हे. च.।

गह्वनम्। क्ली। वने। दुःखे। पीड़ायाम्। वै. निघ.।

गह्वरम्। क्ली, स्त्री। विड़ङ्गे। प. मु.। गुहायाम्। अ.। वने। मे.। रोदने। हे.। पुं। निकुञ्जे। मे.।

गाङ्गम्। क्ली। गङ्गोदके। वै. निघ.।

गाङ्गटः (कः)। पुं। मत्स्यविशेषे। चिंड़ि माछ। श्र. र.।

गाङ्गटेयः। पुं। गाङ्गटमत्स्ये। श्र. र.।

गाङ्गेयम्। क्ली। भद्रमुस्तायाम्। मूता। सुवर्णे। रा. नि. व. १३। र. चि. ६ अ.। धुसूरे। कर्पूरे। अम.। पुं। इङ्गीश्रमत्स्ये। विका.। स्त्री (यी)। मुस्तके। "अथवा वृषगाङ्गेयी।" वा. चि. १ अ.।

गाङ्गेरिका। स्त्री। नागबलायाम्। गोरक्षचाउलो। वै. निघ.।

गाङ्गेरुः (कः)। पुं। काकाण्डीवृक्षे। लताफट्‌की, आलाकुशी। वै. निघ.।

गाङ्गेरुकम्। क्ली। गोरक्षतण्डुलबीजे।

गाङ्गेरुकी। स्त्री। गुड़शर्करके। प. मु.। गोरक्षतण्डुलायाम्। गोरक्षचाउलो। अम.। "गाङ्गेरुकीमूलरसैर्जायते गतवेदनः।" भा. म. १ भ.। तत्फलङ्कषायं हिमं स्वादु कफवातघ्नञ्च। सु. सू. ४६ अ.।

गाङ्गेरुही। स्त्री। नागबलायाम्। रा.।

गाङ्गेष्ठी। स्त्री। कटशर्करालतायाम्। नटा। हारा.।

गाङ्गौघम्। क्ली। गङ्गास्रोतसि।

गाजरम्। क्ली। गर्जने। शालगम। भा. पू. १ भ. शाकव.।

गाञ्जि(ञ्जी)कायः। पुं। वर्त्तिकपक्षिणि। रा. नि. व. १९।

गाड़वः। पुं। मेघे। त्रि.।

गाढ़म्। त्रि। बहुकालजाते। बद्धमूले। सान्द्रे। सु. नि. ६ अ.।

गाढ़मुष्टिः। पुं। खड्गे। मे.।

गाढ़लवणम्। क्ली। समुद्रदेशजलवणविशेषे। समुद्र नवण। रा. नि. व. ६।

गाण्डीरम्। क्ली। शाकविशेषे। शमठ शाक। सु. सू. ४६ अ.।

गाण्डीवी (इन्)। पुं। अर्জ্জুনवृक्षे। रा. नि. व. ९।

गातुः। पुं। कोकिले। भ्रमरे। मे.। गन्धर्व्वे। के.।

गात्रम्। क्ली। देहे, शरीरावयवे। रा. नि. व. १८। करिणः पूर्व्वजङ्घादिप्रदेशे, अग्रपादादि सम्मुखभागे। मे.।

गात्रकण्डूः। स्त्री। कण्डूरोगविशेषे।

गात्रघर्षणम्। क्ली। शरीरमार्জ্জने।

गात्रभङ्गा। स्त्री। शूकशिम्बाम्। श्र. च.। गन्धशुष्याम्। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गात्रमार्ज्जनी। स्त्री। अङ्गमार्ज्जनार्थवस्त्रे। गामछा।

गात्रविक्षेपः। पुं। अङ्गचालने, अङ्गविक्षेपणे। वै. निघ.।

गात्रशोषः। पुं। पूतना-नामबालरोगविशेषे। पूँग्गे पाওয়া। वै. निघ.।

गात्रसङ्कोचो (इन्)। पुं। जाहकजन्तौ। कृष्णकलासे। काँकलास, वहुरूपी। रा. नि. व. १९। गोनससर्पे। वै. निघ.।

गात्रसम्भवः। पुं। प्लवजातीयपक्षिणि, हंसादौ। हे. च.।

गात्रसादः। पुं। शरीरावसादे। पित्तरोगे। वै. निघ.।

गात्रानुलेपनी। स्त्री। गात्रानुलेपनयोग्ये घृष्टपिष्टे सुगन्धिद्रव्ये। अम.।

गात्रोत्सादनम्। क्ली। गात्रानुलेपने।

गाधः। पुं। स्थाने। लाभेच्छायाम्। हे. च.।

गाध्यण्डा। स्त्री। भूम्यामलक्याम्। के.।

गानिनो (लो)। स्त्री। वचायाम्। वै. निघ.।

गान्धी। स्त्री। गोशकटे। अ. टी. रा.।

गान्धारम्। क्ली। गन्धरसे। गन्धबोल। त्रिका.। पुं। सिन्दुरे। मे.। देशविशेषे।

गान्धारी (रिका)। स्त्री। कण्टकार्य्याम्। वै. निघ.। दुरालभायाम्। भा.। रा. नि. व. ४। गञ्जिकायाम्।

गान्धिकः। पुं। कीटविशेषे। গাঁধি পোকা। श. र.। लेखके। नाना.।

गान्धिनी। स्त्री। गङ्गायाम्। शब्दर.।

गाम्भारिका (री)। स्त्री। गाम्भारीवृक्षे। গামার গাছ। मं कं सीवनी। तं गम्भारि। प. मु.।

गाम्भीर्य्यम्। क्ली। गम्भीरतायाम्।

गायत्री (इन्)। पुं, स्त्री। खदिरवृक्षे। भ.। अम.। च. द., सि. यो. रक्त. पि. चि. खण्डकाथलौहे। "तालमूली च गायत्री।" खदिरकाष्ठसारे। च. द. यक्ष्म. चि. एलादिमन्थे।

गायत्रीसारः। पुं। खदिरसारे। चक्र.।

गायत्रः। पुं। सोमलतायाम्। "गायत्रस्त्वेष शुभः।" सु. चि. २९ अ.।

गारित्थम्। क्ली। धान्यविशेषे। वै. निघ.। ओदने। उणा.।

गारुडम्। क्ली। स्वर्णे। मे.। मरकतमणौ। रा. नि. व. १३। तन्नामविषमन्त्रे। जटा.।

गारुडिकः। पुं। विषवैद्ये। श. र.।

गारुडी। स्त्री। पातालगरुडीवृक्षे। रा.नि.व.३।

गारुत्मक(त)म्। क्ली। मरकतमणौ। रा. नि. व. १३। वै. निघ. चय. चि.। नवरत्नराजस्मगाङ्के।

गारुत्मतपत्रिका। स्त्री। गङ्गापत्र्याम्। পাঁচী লতা। रा. नि. व. १०।

गार्ज्जरम्। क्ली। गर्जरमूलके। গাজর মূলা। रा. नि. व. ७।

गार्द्धः। त्रि। आद्यूने। क्ली (र्द्धं)। आद्यूनतायां।

गार्भः (र्भिकः)। त्रि। गर्भसम्बन्धिनि।

गालः। पुं। मदनवृक्षे। प. मु.। वा. ज्व. चि. १अ.। "पिप्पलीभिर्युतान् गालान्।"

गालनम्। क्ली। वस्त्रपूतकरणे। ছাঁকা।

गालफलम्। क्ली। मदनफले। वै. निघ.।

गालवः। पुं। लीध्रवृक्षे। मे.। श्वेतलोध्रे। अ. टी. भ.। कैन्दुकवृक्षे। কেঁদ গাছ। श. च.।

गालितः। त्रि.। द्रवीकृते।

गालोड़नम्। क्ली। उन्मादरोगे।

गालोड़ितः। त्रि.। उन्मत्ते। रुग्ने। के.।

गालोद्यम्। क्ली। पद्मबीजे। रा. नि. व. १०।

गाहितः। त्रि। कम्पिते। स्नाते। वै. निघ.।

गाह्वीरी। स्त्री। चीरशुक्लायाम्। प. मु.।

गिरणम्। क्ली। भक्षणे। वै. निघ.।

गिरिः। पुं। चञ्चूरीगविशेषे। मे.। पर्व्वते। रा. नि. व. २। स्त्री। गिलने। अम.। बालमूषिकायाम्। अ. टी. र.। पारददोषविशेषे। रत्ना.।

गिरिकः। पुं। गिरिनिम्बे। महानिम्बे। वै. निघ.।

गिरिकदम्बः। पुं। धाराकदम्बे। रा. नि. व. ९। वा. उ. २अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गिरिकदली। स्त्री। पार्व्वतीयकदलीवृक्षे। तत्पर्य्यायः,—गिरिरम्भा, पर्व्वतमोचा, अरण्यकदली, बहुबीजा, वनरम्भा, गिरिजा, गजवल्लभा। गुणाः—मधुरा हिमा बल्या बीर्य्यवर्द्धनी रुच्या तृष्णापित्तदाहशीषहरी गुरुः दुर्ज्जरा च। रा. नि. व. ११।

गिरिकर्णिः (र्णी)। स्त्री। इन्द्रवारुण्याम्। रा. नि. व. २३। पाण्डुरापराजितायाम्। रा. नि. व. ३। See श्वेतापराजिता। कृष्णापराजितायाम्। कील अपराजिता। गुणाः—शीतला तिक्ता पित्तोपद्रवघ्नी चक्षुष्या विषदोषघ्नी त्रिदोषघ्नी। भा.। श्वेतकिणिहीवृक्षे। पृथिव्याम्। आस्फोतायाम्। शंखपुष्पीवृक्षे। र. मा.। दुरालभायाम्। श. च.।

गिरिकर्णिका। स्त्री। अपराजितायाम्। अपराजिता। सु. सू. ३९ अ.। श्वेतकटभीवृक्षे। रा. नि. व. ९। श्वेतकिणिह्याम्। आरग्वधवृक्षे। रा. नि. व. २३।

गिरिका। स्त्री। बालमूषिकायाम्। छुँचो। अम.।

गिरिकाणः। त्रि। गिरिरोगेणैककक्षुर्हीने। उणा.।

गिरिकीटजफलम्। क्ली। इन्द्रयवे। वै. निघ. २भ. अतिसा. चि. मुस्तादिचूर्णे।

गिरिगुडः। पुं। गेरुके। गेरू। हे.।

गिरिगोचरः। पुं। श्वेतमर्कटे। वै. निघ.।

गिरिजम्। क्ली। शिलाजतुनि। भा.। अभ्रधातौ। लौहे। मे.। गैरिके। रा. नि. व. १३। पुं। गिरिजमधूकवृक्षे। पाहाड़े महुल गाछ। र. मा.। तत्पर्य्यायः,—गौरशाकः, मधूलः, खल्पपत्रकः। रः। काञ्चनारवृक्षे। रक्त कांचन गाछ। रा. नि. व. १०।

गिरिजतु (न्)। क्ली। शिलाजतुनि। रा. नि. व. १३। वै. निघ. क्षय. चि. सूर्य्यप्रभागुड़ी।

गिरिजधातुः। पुं। गैरिके। गिरिमाटी। वै. निघ.।

गिरिजा। स्त्री। मल्लिकापुष्पवृक्षे। मल्लिका फूलेर गाछ। रा. नि. व. १०। मातुलुङ्गवृक्षे। ए. सु.। श्वेतवृक्षायाम्। वायसाण्डतायाम्। रा. नि. व. ५। गिरिकदलीवृक्षे। लघुपाषाणभेदे। लौहे। रा. नि. व. २३। रास्नायाम्। कुन्दपुष्पवृक्षे। वै. निघ.।

गिरिजातेजः। क्ली। अभ्रधातौ। वै. निघ.।

गिरिजामलम्। क्ली। अभ्रधातौ। अ. टी. रा.।

गिरिजावीजम्। क्ली। गन्धके। भैष. ग्रहणीकवाटरसे। अभ्रके।

गिरिजाह्वयम्। क्ली। शिलाजतुनि। वै. निघ.।

गिरिज्वरः। पुं। वज्रे। श. र.।

गिरिधातुः। पुं। गैरिकधातौ। रा. नि. व. १३।

गिरिध्वजः। पुं। वज्रे।

गिरिनिम्बः। पुं। महानिम्बवृक्षे, कैटर्य्यनिम्बे। रा. नि. व. ९।

गिरिपत्रः। पुं। गिरिनिम्बे। महानिम्ब। हिं वकायनिम्ब। वै. निघ.।

गिरिपादिका। स्त्री। कपिकच्छ्वाम्। आलाकुशी। मं गोड़ीकुहिड़ी। वै. निघ.।

गिरिपीलुः। पुं। परूषकवृक्षे। रा. नि. व. ११।

गिरिपुष्प(क)म्। क्ली। शैलजे। शैलज। मं दगड़फूल। रा. नि. व. १२।

गिरिप्रिया। स्त्री। चमरीगव्याम्। रा. नि. व. १९।

गिरिभित्। पुं। पाषाणभेदवृक्षे। भा.। श्वेताश्मभेदवृक्षे। चां'। आ.।

गिरिभूः। स्त्री। क्षुद्रपाषाणभेदे। रा. नि. व. ५।

गिरिभेदः। पुं। पाषाणभेदवृक्षे।

गिरिमनोहरः। पुं। आरग्वधवृक्षे। वै. निघ.।

गिरिमल्लिका (ली)। स्त्री। कुटजवृक्षे। अम। सि. यो. रक्ताति. चि. (कुटजाष्टके)।

गिरिमानः। पुं। गजे। श. र.।

गिरिमालः। पुं। आरग्वधवृक्षे। वै. निघ.।

गिरिमालपञ्चकम्। क्ली। आरग्वधाद्यपरनामयोगविशेषे। आरग्वधादि पाचन। "आरग्वधग्रन्थिकमुस्तपर्पटकाहरीतकीभिः कथितः कषायः।" सि. यो. वातरक्तच्च. चि.।

गिरिमृत् (द्भवम्)। स्त्री, क्ली। गैरिके। चिक्का.। रा. नि. व. १३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गिरिमेदः। पुं। विट्खदिरे। र. मा.। इरिमेद इत्यपि पाठः।

गिरिय(या)कः। पुं। गेरुके। हे.।

गिरिरम्भा। स्त्री। गिरिकदल्याम्। वौचे कला। रा. नि. व. ११।

गिरिवर्त्तिका। स्त्री। पार्व्वतपक्षिविशेषे। वै. निघ.।

गिरिवासी (इन्)। पुं। हस्तिकन्दनाममहाकन्दशाके। रा. नि. व. ७।

गिरिशान्तकः। पुं। लौहमारकवृक्षादिगणे। र. सा. सं.।

गिरिशायी (इन्)। पुं। पार्व्वतपक्षिविशेषे। वै. निघ.।

गिरिशालाह्वः। पुं। प्रतुदपक्षिणि। सु. सू. ४६ अ.।

गिरि(शृ)शालिनी। स्त्री। अपराजितायाम्। पुराणं।

गिरिशेखरः। पुं। महावकुले। वै. निघ.।

गिरिसर्पः। पुं। दर्व्वीकरसर्पविशेषे। सु. कल्प. ४ अ.। See सर्पः।

गिरिसालुगा(जा)। स्त्री। वायसाणायाम्। वै. निघ.।

गिरिसारः। पुं। लौहे, वङ्गे। मे.।

गिरिसिन्दु(न्धु)कः। पुं। कृष्णनिर्गुण्डाम्। वै. निघ.।

गिरिस्खेदः। पुं। शिलाजतुनि। वै. निघ.।

गिरिह्वा। स्त्री। बालभूषिकायाम्। अ. टी. र.। सु. कल्प. ५ अ.।

गिलः। पुं। जम्बीरवृक्षे। श. च.।

गिलग्राहः। पुं। नक्रे। वै. निघ.।

गिलनम् (लिः)। क्ली, स्त्री। गलाधःकरणे, भक्षणे। अ. टी.।

गिलायुः। पुं। गलरोगे। तल्लक्षणं यथा—"ग्रन्थिर्गले त्वामलकास्थिमात्रः स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः। संलक्ष्यते सक्तमिवाशनञ्च स शस्त्रसाध्यस्तु गिलायुसंज्ञः॥" सु. नि. १६ अ.।

गिलोड्यः। पुं। शणपत्राकारावयवयुक्तफलविशेषे। गिलोट इति लोके। सु. सू. ४२ अ.।

गीर्लता। स्त्री। महाज्योतिष्मतीलतायाम्। रा. नि. व. ३।

गोर्व्वाणकुसुमम्। क्ली। लवङ्गे। रा. नि. व. १२।

गुग्गुलुः। पुं।(Burseraceae. Balsamodendron mukul.) स्वनामख्यातपण्यद्रव्ये। गुग्गुल इति भाषा। तं गुग्गिलमुचेदुः। वा. सू. १५ अ.। तत्पर्य्यायः,—कुम्भं, उलूखलकं, कौशिकः, पुरः (अ.), कुम्भीलुखलकं, गुग्गुलः (भ.), जटायुः, कालनिर्य्यासः, देवधूपः, सर्व्वसहः, महिषाक्षः, पलङ्कषा (र.), उषः, उदूखलकं, कुन्तो (मे.), कुम्भी (ज.), उद्दौप्रं (अ. टी. भ.), यवनेष्टः, शवाभीष्टः, निशाटकः, जटालः, पुटः, भूतहरः, शिवः, शाम्भवः, दुर्गः, यातुघ्नः, महिषाक्षकः, दैवेष्टः, मरुद्दिष्टः, रक्षोघ्नः, रुचगन्धकः, दिव्यः। स त्रिविधः—साधारणगुग्गुलुः, कणगुग्गुलुः, भूमिजगुग्गुलुश्च। विशेषाः पर्य्याये द्रष्टव्याः। रा. नि. व. १२। महिषाक्ष-महानील कुमुद-पद्म-हिरण्या इति पञ्चभेदमिच्छन्ति भावमिश्रादयः। तेषु भृङ्गाञ्जनसवर्णः महिषाक्षः, महानीलवर्णो महानीलः, कुमुदाभः कुमुदः, माणिक्यसवर्णः पद्मः, हेमाभश्च हिरण्य इति। तत्र प्रथमो द्वितीयश्च हस्तिनां, कुमुदो हयानां, पद्म आरोग्ये, कनकश्च नरस्य हितः। भा.। शुद्धिः—उष्णे पूते च दशमूलक्काथे गुग्गुलुं प्रक्षिप्यालोड्य वस्त्रपूतं विधाय पश्चाद्विशोष्य घृतं दत्त्वा पेषितो ग्राह्यः। सा. कौ.। गुणाः—जराव्याधिहरत्वाद्रसायनः। कटूतिक्तोष्णः कफवातकासघ्नः क्रिमिवातोदरग्रीहृद्रोगोपशमनश्च। रा. नि. व. १२। नवो हृद्यो हृद्यः सुगन्धः पिच्छलः शुष्को दुर्गन्धः। पुराणश्च अतिलेखनो वीर्य्यहीनश्च। भा.। गुग्गुलुपाकः गुडपाकवत्। See गुडपाकः।

गुग्गुलुवटकः (आदित्यपाकः)। पुं। वातव्याधौ। त्रिफलाचूर्णं प्र. ४ तो. पिप्पलीचूर्णं ३ तो. गुडत्वगेलाचूर्णं प्र. २ तो. शोधितगुग्गुलुः २० तो. एकत्र दशमूलाम्बुना भाव्यम् (दशमूल ४० तो. वारि ६० तो. शे. २० तो.)। "भाव्यद्रव्यसमं क्काथ्यं क्काथोऽष्टांशस्तु तेन च।" च. द.। प. प्र.।

गुच्छः। पुं। लवके। त्रिका.। भूतृणे। गुच्छाख्यिनीतृणे। वै. निघ.। सञ्जूरपक्षे। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुच्छकः। पुं। गुच्छकन्दे। तैलशारु इति लोके। गज. वै.। रीठाकरञ्जवृक्षे। रा. नि. व. ९। क्ली। ग्रन्थिपर्णे। भा.।

गुच्छकच्छदः। पुं। ग्रन्थिपर्ण्याम्। वै. निघ.।

गुच्छकणिशः। पुं। रागीधान्ये। रा. नि.व. १६।

गुच्छकन्दः। पुं। कन्दशाके। तैलसारु इति लोके। मं कुलीहालु। कं सुकुलियागड्डे। गुणाः —मधुरः शीतलः हृद्यः दाहघ्नः तर्पणः। रा. नि. व. ७।

गुच्छकरञ्जः। पुं। करञ्जवृक्षविशेषे। तत्पर्य्यायः,—स्निग्धदलः, गुच्छपुष्पकः, नदी, गुच्छी, स्निग्धपत्रकः, सानन्दः, दन्तधावनः। गुणाः— कटुतिक्तोष्णः विषवातकण्डूविचर्चिकाकुष्ठस्पर्शत्वग्दोषघ्नश्च। रा. नि. व. ९।

गुच्छगुल्मिका। स्त्री। क्षुद्रोवृक्षविशेषे। ह्रस्वफणिमनसाविशेष। वै. निघ.।

गुच्छदन्तिका। स्त्री। कदलीवृक्षे। रा. नि. व. ११।

गुच्छपत्रः। पुं। तालवृक्षे। तालगाछ। रा. नि. व. ९।

गुच्छपुच्छः (कः)। पुं। गुच्छकरञ्जे। रा. नि. व. ९।

गुच्छपुष्पः (कः)। पुं। सप्तपर्णवृक्षे। अशोकवृक्षे। रा. नि. व. १०। (कः) गुच्छकरञ्जे। रीठाकरञ्जे। रा. नि. व. ९।

गुच्छपुष्पी। स्त्री। शिग्रुवृक्षनामवृक्षे। धातकीवृक्षे। रा. नि. व. ४।६।

गुच्छफलः। पुं। रीठाकरञ्जे। रा. नि. व. ९। कतकवृक्षे। राजादनवृक्षे। क्षौणीवृक्ष। रा. नि. व. ११। जलवेतसे। वै. निघ.।

गुच्छफला। स्त्री। अग्निदमनीनामवृक्षे। काकमाच्याम्। रा. नि. व. ४। द्राक्षायाम्। कदलीवृक्षे। रा. नि. व. ११। निष्पाव्याम्। रा. नि. व. ७।

गुच्छबुध्ना। स्त्री। गुण्डालाक्षुपे। रा. नि. व. ५।

गुच्छमूल(लि)का (ला)। स्त्री। गुण्डासिनीवृक्षे। रा. नि. व. ८। गुण्डालाक्षुपे। वै. निघ.।

गुच्छसङ्घा। स्त्री। क्षुद्रधातक्याम्। वै. निघ.।

गुच्छार्द्धः। पुं। चतुर्विंशतियष्टिक-हारविशेषे। अ.।

गुच्छालः। पुं। भूतृणे। रा. नि. व. ८। भूकदम्बे। प. मु.।

गुच्छाह्वकन्दः। पुं। गुलुच्छकन्दे। रा. नि. व. ७।

गुच्छी। स्त्री। गुच्छकरञ्जवृक्षे। रा. नि. व. ९।

गुञ्जः। पुं। गुच्छे। श. र.।

गुञ्जकृत्। पुं। भ्रमरे। श. र.।

गुञ्जनम्। क्ली। भ्रमरादेर्गुणगुणध्वनौ।

गुञ्जरत्नमाला। स्त्री। वैद्यकग्रन्थभेदे।

गुञ्जा। स्त्री। (Abrus precatorius.) स्वनामख्यातोपविषजातीयमूलविषलतायाम्। कुँच गाछ। हिं शीणकाँइच चिरमिति। मं कं गुलुगुञ्जे, एरडु। उत्. रूञ्ज। सु. कल्प. २ अ.। तत्पर्य्यायः,—गुञ्जिका (श.), काकचिञ्ची, क्ष्वेलजा (अ.), शाङ्कुष्ठा, रक्तिका, काकणन्तिका, काकादनी, काकतिक्ता, काकजङ्घा, शिखण्डिनी (र.), काकतुण्डिका, कच्चा (हे.), कनीचिः (शब्दर.), काका, काकिनी (अ. टी.), काञ्ची (वि.), चूड़ामणिः, सौम्या, शिखण्डी, अरुणा, ताम्रिका, शीतपाकी, उच्चटा, कृष्णचूड़िका, रक्ता, काम्बोजी, भीलभूषणा, वन्या, श्यामलचूड़ा, काकचिञ्चिका। गुञ्जा द्विधा श्वेतरक्तभेदात्। द्वयोर्गुणाः—फलं तिक्तोष्णं क्षवकरं शिरोऽर्त्तिनाशनञ्च। शिफा वान्तिकरी पत्रं शूलघ्नं विषहृत्। बीजे श्वेतञ्च शस्यते। रा. नि. व. ३। "गुञ्जाद्वयन्तु केश्यं स्याद्वातपित्तज्वरापहं। मुखशोषभ्रमश्वासतृष्णामदविनाशिनं। नेत्रामयहरं हृद्यं बल्यं कण्डूव्रणं हरेत्। कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च॥" भा.। श्वेतगुञ्जायाम्। र. सा. सं.। सुवर्णायाम्। रा. नि. व ६। मद्यशालायाम्। श. र.। यवचतुष्टयात्मके माने। गुञ्जा स्यात्तच्चतुष्टयम्। प. प्र. १ख.। यवत्रयमाने। क्वचिद्वैद्यके। गोधूमद्वयमाने। रा. नि. व. २१ अ.।

गुञ्जाकिनी। स्त्री। गुञ्जायाम्। भैष. ज्व. चि. पानीयभक्तवट्याम्।

गुञ्जागर्भरसः। पुं। हृद्रोगे रसः। पाठः— "निष्कत्रयं रसस्य स्याद्गन्धकस्तुर्य्यभागिकः। गन्धकेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयाचूर्णं निम्बुबीजं समानकम्। गुञ्जाबीजं तदर्द्धं स्यात्तदर्द्धं जयपालकं। निम्बुद्रवेण सम्मर्द्द्य काकमाच्या दिनान्तकम्। धुस्तूरकजयन्तीभ्यां गुडिकां कारयेत्सुधीः। गुञ्जागर्भरसो नाम्ना दातव्यो घृतसंयुतः। हिङ्गुसैन्धवसंयुक्तं मण्डं पथ्याय दापयेत्॥" पारा १॥० तो. गन्धक, जयन्तीबीज वा हरीतकी, निम्बूबीज प्रत्येके ७ तो. कुँचेर बीज ७ तो. जयपाल १॥० तो. निम्बु, काकमाची, धुतूरा एवं जयन्ती रसे गाड़िया वटी करिबे। र. चि.।

गुञ्जातैलम्। क्ली। कुष्ठे, गण्डमालायां तैलम्। "गुञ्जामूलफलैः तैलं विपक्वं द्विगुणाम्भसा।" कटुतैलं ४ श. गुञ्जामूलं फलञ्च प्र. ४ प. वारि ८ श.। भा.। अन्यत्—"गुञ्जाफलैः घृतं तैलं भृङ्गराजरसेन च।" कटुतैलं ४ श. कुँचफल ८ प. भीमराजरस ८ श.। सा. कौ.।

गुञ्जाद्यतैलम्। क्ली। गलगण्डाधिकारे। गुञ्जामूलं करवीरमूलं बीजताड़कमूलं, अर्कमूलं वा निर्यासः, सर्षपं। एषां प्र. ४ तो. तैलं १ श. (८० तो.) गोमूत्रं ८ श. पक्त्वा शीषयेत्। तत्र पिप्पली पञ्चलवण मरिचचूर्णं २० तो. प्रक्षेपः। रस. र.।

गुञ्जाफलम्। क्ली। गुञ्जाबीजे।

गुञ्जाभद्ररसः। पुं। ऊरुस्तम्भे हृद्रोगे च हितः। पारदः १॥० तो. गन्धकं ६ तो. गुञ्जबीजं ३ तो. जयन्तीबीजं निम्बुबीजं जैपालबीजं प्र. अर्द्धतोलकं। जयन्तीधुस्तूरपत्रजम्बीरकाकमाचीरसेन प्रत्येकं विभाव्य घृतेन मर्द्दयित्वा वटी कार्य्या। मा. ४ र.। र. सा. सं। भैषज्यरत्नावल्यां जयन्ती निम्बं नास्ति।

गुञ्जिका। स्त्री। गुञ्जायाम्। कुँच। विषवपरिमाणे। श. च.।

गुञ्जितम्। क्ली। गुञ्जने।

गुटिकः। पुं। मत्स्यखण्डाम्। गिछरि। जा. द. १२ अ.।

गुटिका। स्त्री। वटिकायाम्। गुलि। गुञ्जायाम्। कुँच। जा. द.।

गुटिकाञ्जनम्। क्ली। विविधाञ्जनान्यतमेऽञ्जने। See अञ्जनम्।

गुटिकाद्वयः। पुं, क्ली। लवणविशेषे। के.।

गुण्ठः। पुं। तृणविशेषे। केशुर। रा. नि. व. ८। सुगन्धरोहिषतृणे। वै. निघ.। दाक्षिणात्ये। "दाक्षिणात्यो भवेद्गुण्ठो योऽधन्यः सर्व्ववाजिनाम्।" जा. द. ६अ.।

गुड़ः। पुं। इक्षादिरसविकारे। गुड़। तत्पर्य्यायः,—इक्षुसारः, मधुरः, रसपाकजः, खण्डजः, द्रवजः, सिद्धः, मोदकः, अमृतसारजः, शिशुप्रियः, सितादिः, अरुणः, रसजः (रा.), इक्षुरसक्वाथः, गण्डोलः, मधुबीजकः (वै.), गण्डोलं, गुलः, स्वादुखण्डः (शब्दर.), स्वादुः (चि.)। स सामान्यतश्चतुर्भेदः धौताधौतपुराणनवभेदात्। तेषु धौतो नातिश्लेष्मलः मलानुलोमस्य, अधौतः प्रभूतकृमिमज्जास्थ्नोर्दीप्तिकरः, पुराणो हृद्यः स्वस्थहितस्य, नवस्य श्लेष्माग्निमान्द्यकृत्। वा. टी. हेमा.। सा. गुणाः—हृद्यो गुरुः स्निग्धः वातघ्नः मूत्रशोधनः नातिपित्तहरः मेदःकफकृमिमिवलदश्च। भा.। पुरातनस्य गुणाः—अधिकगुणः रक्तपित्तप्रसन्नबलकरी च। राज.। "गुड़ो जीर्णो लघुः पथ्यो नाभिष्यन्द्यग्निपुष्टिकृत्। पित्तघ्नो मधुरो हृद्यो वातघ्नोऽसृक्प्रसादनः॥" भा.। यावनालगुड़स्य कटुः चारो मधुरः वातकफघ्नः पित्तजनकः नित्यसेवनेन कण्डूकुष्ठं जनयति असृग्विदाहञ्च करोति॥ रा. नि. व. १४। "बल्यो हृद्यो गुरुः स्निग्धः वातघ्नो मूत्रशोधनः। स पुराणोऽधिकगुणो गुल्मार्शोऽरोचकापहः। क्षये कासे क्षतक्षीणे पाण्डुरोगेऽसृजः क्षये। हितो यौग्येन संयुक्तो गुड़ः पथ्यतमो मतः॥" "गुदामये कामलशोषमेहे गुल्मामये पाण्डुहृल्लीमके च। वाते सपित्तासृजि राजरोगे रुचिप्रदो रोगहरो गुरुः स्यात्॥ कासे शीर्षे गुड़ो नेष्टः अत्यर्थापि हितो मतः। योगयुक्तोऽपि सर्व्वत्र हितो गुणगणालयः॥ क्षामक्षामक्षतरुजाश्वासमूर्च्छानुरोगिणाम्। अध्वश्रान्तिश्रममदविषमूत्रकृच्छ्राश्मरीणाम्। जीर्णक्षामज्वरविषमगे रक्तपित्तप्रकोपे तृष्णादाहक्षयरुधिरगे सर्व्वरोगान् निहन्ति॥" अचि. १० अ.। क्षुद्रीक्षुवे। मनसासिजू। प. मु.। कार्पासाम्। कापास। अ. टी.। घासे। हे. च.।

गुड़कः। पुं। गुड़पक्वौषधभावे। षण्मासं यावत् अस्य पुर्णवीर्य्यत्वम्। वै.।

गुड़काष्ठः। पुं। इक्षौ। वै. निघ.।

गुड़कुष्माण्डकम्। क्ली। वाजीकरणाधिकारे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशस्तम्। लगादिहीनं किञ्चिज्जलोत्क्षिप्तं शिलापिष्टं किञ्चिदातपशोषितं पुष्कुष्माण्डपलशतं तैलघृतेन भर्ज्जयेत् यथा मधुवर्णं भवति। क्षिप्तगालितकुष्माण्डद्रवे पुराणगुड़ं दत्त्वालोड्य पूत्वा च तेन जलेन कुष्माण्डकं पचेत्। बाहुशालीक्तगुड़पाकचिह्नेनावतारिते कोणे त्वक्पात्रादिचूर्णं प्रक्षेप्यम्। कुष्माण्डं १०० प. घृतं ८ प. तिलतैलं ८ प. गुड़ १०० प. त्वक्तेजपत्रं धान्यं त्रिकटु जीरकद्वयं एलाद्वयं चित्रकं पिप्पलीमूलं चव्यं गजपिप्पली शुण्ठी शृङ्गाटकं कशेरु तालाङ्कुरं तालमस्तकञ्च एषां प्र. चूर्णं ८ प. मधु ८ प.। रस. र.।

गुड़खण्डः। पुं। गुड़कृतखण्डे। शाँड़गुड़, पाटोलि। गुणाः—"गुड़खण्डस्य मधुरः सितस्य वातपित्तहा। किञ्चिच्छीतगुणोपेतो बल्यो हृद्यो रुचिप्रदः॥"

गुड़गुड़ा। स्त्री। यावनालशर्कारायाम्। रा. नि. व. १४।

गुड़चो। स्त्री। गुड़ूच्याम्। अ. टी. भ.।

गुड़चुक्रम्। क्ली। गुड़कृतचुक्रविशेषे। गुड़कृत सिर्काभेद। यथा—"गुड़ाम्बुना सतैलेन कन्दशाकफलैस्तथा। सञ्चितञ्चाम्लतां यातङ्गुड़चुक्रं तदुच्यते॥" भा.।

गुड़त्वक्(त्रिक्)। पुं, क्ली। इचौ। रा. नि. व. १४। गुड़त्वचे। श. र.।

गुड़त्वक्। क्ली। स्वनामख्यातगन्धद्रव्ये। दारुचिनि। तत्पर्य्यायः,—सूतकटं, भृङ्गं, त्वक्पत्रं, वराङ्गकं, त्वचं, चोलं, त्वचा, पत्रं, हृद्यं, सुरभिवल्कलं (शब्दर.), उत्कटं, चोचं (अ.), गुड़त्वचं (श.), त्वक्, पत्रं (अ. टी.)। तच्च लघूष्णं स्वादु तिक्तं रुच्यं पित्तवर्द्धकं अरुचिकण्डूहृद्वस्तिवातार्शःक्रमिपीनसघ्नञ्च। भा.। कफशुक्रामवातघ्नं मधुरं कटु चेति। राज.।

गुड़त्वचम्। क्ली। गुड़त्वचि। जातीकोषे। जयित्री। श. च.।

गुड़दारुः। क्ली। इचौ। त्रिका.।

गुड़पाकः। पुं। औषधस्य गुड़पाके। तल्लक्षणम्—"यदा दर्व्वीप्रलेपः स्यात् यदा वा तन्तुली भवेत्। तोयपूर्णे च पात्रे तु चिप्तो न म्लायते गुड़ः। चिप्तस्तु निश्चलस्तिष्ठेत्पतितस्तु न शीर्य्यते। एष पाकी गुड़ादीनां सर्व्वेषां परिकीर्त्तितः। सुखमर्द्दः सुखस्पर्शो गन्धवर्णरसान्वितः। पीड़िती भजते मुद्रां गुड़पाकः सुपाकतः। गुड़वद्गुग्गुलोः पाकः रसगन्धविशेषतः। श्रेष्ठमध्यमहीनेषु द्वादशाष्टचतुष्टयैः। माषकैः गुग्गुलोर्माषां व्याधिं वीक्ष्य प्रयोजयेत्॥ रसक्रियाद्या ये लेहा गुड़ाद्यैव प्रकीर्त्तिताः। तेषां विन्दुर्जले न्यस्तो न शीर्य्येत्पाकलक्षणं॥" प. प्र. ३ ख.।

गुड़पाचकः। पुं। इचौ। वै. निघ.।

गुड़पिप्पली। स्त्री। पिप्पलीचूर्णं १ भ. गुड़स्य च भागद्वयं जीर्णज्वरे प्रशस्तम्। अन्या यथा—त्रिङ्गं त्रिकटु कुष्ठं हिङ्गु पञ्चलवणं यवक्षारः सर्জ्जिक्षारः टङ्गणक्षारः समुद्रफेनः चित्रकमूलचूर्णं गजपिप्पली क्षणजीरकं तालजटाक्षारः कुष्माण्डनालभस्म अपामार्गक्षारः तिन्तिड़ीक्षारः प्र. समभागः। सर्व्वचूर्णसमं पिप्पलीचूर्णं। पुनः सर्व्वचूर्णद्विगुणः पुरातनगुड़ः एकत्र सम्मर्द्दयम्। मा. ॥० ती.। भैष.।

गुड़पुष्पः(कः)। पुं। मधूकवृक्षे। महुल गाछ। हिं महुया। र. मा.। वकुलपुष्पवृक्षे। अ.।

गुड़पुष्पसारः। पुं। मधुकपुष्पसारे। च. द.।

गुड़फलः। पुं। पीलुवृक्षे। भा.। बदरवृक्षे। रा. नि. व. ११।

गुड़फला। स्त्री। क्षुद्रकाकमाच्याम्। वै. निघ.।

गुड़भल्लातकम्। क्ली। अर्शोरोगे। क्वाथार्थ—दशमूल, गुलञ्च, वामनहाटी, गोक्षुर, चिता, शटी प्रत्येके १ प. भल्लातक १०० टा, जल ६४ श. शे. १६ श.। प्रक्षेपार्थ—मधु ८ प. पिप्पुल ४ प. एरण्डतैल ८ प. गुड़त्वक्, एला, मरिच प्रत्येके १ पोओया। च. द.।

गुड़भा। स्त्री। यावनालशर्कारायाम्। रा.।

गुड़मञ्जरी। स्त्री। जिङ्गिन्याम्। वै. निघ.। क्षणशाल्यन्नेन स्नस्यांसरुक् नश्यति। वा. उ. ४० अ.।

गुड़मण्डूरम्। क्ली। अन्नद्रवशूले। पुराणगुड़ः १ प. आमलकचूर्णं १ प. हरीतकीचूर्णं १ प. शुद्धमण्डूरं ३ प. घृतमधुभ्यां सम्मर्द्द्य २ तो. भोजनाग्रमध्यावसानेषु सेव्यम्। रस. र.।

गुड़मूलः(कः)। पुं। स्वल्पसारिवशाके। श. च.। इचौ। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुड़योगफला। स्त्री। मधुरालाव्वां। वै. निघ.।

गुड़लम्। क्ली। गौड़ीमदिरायाम्। श. च.।

गुड़वीजः। पुं। मसूरे। रा. नि. व. १६।

गुड़शर्करा। स्त्री। शर्करायाम्। चिका.। तत्पर्य्यायः,—पिण्पटा (चि.), कठिना (वि.)। गुणाः—"द्वयाः चीण-चतहिताः सस्नेहा गुड़-शर्कराः।" च. सू. २७ अ.।

गुड़शिग्रुः। पुं। रक्तशीभाञ्जने। श. च.।

गुड़शुक्तम्। क्ली। सतैलगुड़ाम्बुना कन्दशाकादि एकत्र संहितमत्तरसं गुड़शुक्तमुच्यते। प. प्र. ३ ख.। गुड़ाम्बुना सतैलेन सन्धानङ्गाञ्जिकन्तु यत्। कन्दशाकफलैर्युक्ताङ्गुड़शुक्तं तदुच्यते॥" शार्ङ्गः।

गुड़ा। स्त्री। क्षुद्रोद्वचे। र. मा.। गुड़िकायाम्। मे.। उष्णीर्य्याम्। रा. नि. व. ८। गुड़ूच्याम्। वै. निघ.।

गुड़ाका। स्त्री। निद्रायाम्।

गुड़ाख्यः। पुं। क्षुद्रोद्वचे। रा. नि. व. ८।

गुड़ादिवटिका। स्त्री। शीधे रसः। शुण्ठी-चूर्णं ३ प. पिप्पलीचूर्णं ३ प. शुद्धमण्डूरं १ प. तिलं १ प. पलत्रयगुड़ेन वटी कार्य्या। गुड़ ७ प. शुँठचूर्ण ७ प. पिप्पलचूर्ण ७ प. शुद्धमण्डूर १ प. तिल १ प.। भा.।

गुड़ाम्बु। क्ली। गुड़क्वतजले। "गुड़योगाद्गुड़ाम्बु स्याद्गुड़वर्णरसान्वितम्।" प. प्र. ३ ख.। वा. चि. ६ अ.।

गुड़ारिष्टम्। क्ली। मदिरायाम्।

गुड़ाशयः। पुं। अचीटद्वचे। रा. नि. व. ११।

गुड़ाष्टकम्। क्ली। उदावर्त्ते अजीर्णे च। विकटु-पिप्पलीमूलं विल्वमूलं दन्तीमूलं चित्रकमूलं एषां प्रति चूर्णं तुल्यभागं गुड़ेन प्रातर्भक्षयेत्। माचा यथाग्निबला देया।

गुड़ासवः। पुं। गुड़क्वतासवे। गुणाः—"सृष्टो भिन्नशकृद्वासी गौड़स्तर्पणदीपनः।" च. सू. २७ अ.।

गुड़िका। स्त्री। गुटिकायाम्। प. प्र.। गुड़िका वटिका वेति संज्ञावान्तरभेदतः। वैप.।

गुड़ी। स्त्री। क्षुद्रोद्वचे। गुड़ूच्याम्। वै. निघ.।

गुड़चिका (ची)। गुड़ूच्याम्। चर.। भ.।

गुड़ूची। स्त्री। (Tinospora cordifolia. Syn. Menispermum cordifolium.) स्वनामख्यातपत्रशाकलतायाम्। गुलञ्चलता। हिं गुड़च, घड़च्च। मं गुलवेलि। कं अमरदवेलि। तें तिप्पयीगे। काल्यकुब्जे गुरुच्ची। गुर्जरे गलो। तत्पर्य्यायः,—वत्सादनी, छिन्नरुहा, तन्त्रिका, अमृता, जीवन्तिका, सोमवल्ली, विशल्या, मधुपर्णी (अ.), गुड़ची (अ.टी.), वातरक्तारिः, पामरोद्धरा, पित्तघ्नी, उद्धारा (ग.), तन्वी, निर्जरा (मे.), गुड़ूची (भ.), कुण्डली, चक्रलक्षणा (र.), अमृत-वल्ली (वरा.), ज्वरारिः, श्यामा, सुरक्षता मधु-पर्णिका, छिन्नोद्भवा, अमृतलता, रसायनी, छिन्ना, सोमलतिका, भिषक्प्रिया, कुण्डलिनी, वयस्था, नागकुमारिका, छन्निका, चन्द्रहासा, अमृत-सम्भवा। रा.। गुणाः—"गुड़ूची कटुका तिक्ता स्वादुपाका रसायनी। संग्राहिणी कषायोष्णा लघ्वी बल्याग्निदीपनी। दोषत्रयामदाहमेदःकासांश पाण्डुतां। कामलाकुष्ठवातासृग्ज्वरक्रिमिविषमीन् हरेत्। प्रमेहश्वासकासार्शःक्लेच्छद्रीगवातनुत्॥" तदुत्पत्तिः—पुरा यदा राक्षसपरिवृतो रामः सीता-पहारिणं रावणं जघान तदा हतान् वानरानिन्द्रो ऽमृतवर्षणेन जीवयामास। तद्गात्रच्युता रक्तविन्दवः गुड़ूची जाताः। भा.।

गुड़ूचीघृतम्। क्ली। वातरक्ते। गव्यघृतं ४ श. क्वाथार्थं—गुड़ूची १२॥० श. जलं ६४ श. शे. १६ श. कल्कार्थं—गुड़ूची १ श.। अन्यत् आम-वाते—गव्यघृतं ४ श. क्वाथार्थं—गुड़ूची ६४ प. जलं ६४ श. शे. १६ श. कल्कार्थं शुण्ठी १ श.। च. द.।

गुड़ूचीतैलम्। क्ली। वातरक्ते तैलम्। स्वल्पं यथा—तिलतैलं ४ श. क्वाथार्थं—गुड़ूची १०० प. जलं ६४ श. शे. १६ श.। मतान्तरे गुड़ूची ४ श. जल १६ श. शे. ४ श.। सा. कौ.। भैष.। मध्यमं यथा—तिलतैलं ४ श. गुड़ूचीक्वाथः १६ श. दुग्ध ४ श.। भैष.। बृहत् यथा—तिलतैलं ८ श. क्वाथार्थं—गुड़ूची १०० प. जलं ६४ श. शे. १६ श. कल्कार्थं—गुल्फा हरीतकी चिकटु रास्ना मुस्ता वनयमानी हरिद्रा दारुहरिद्रा कुष्ठं धान्यं पद्मकाष्ठं विड़ङ्गं तेजपत्रं वचा जटामांसी, एषां प्रति ४ ती. रक्तचन्दनं ८ ती.। अपरं यथा —तिलतैलं १६ श. गुड़ूची १२॥० श. जलं ६४

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शु. शु. १६ शु. दुरभं ६४ शु. कल्कार्थं—यष्टिमधु मञ्जिष्ठा ऋद्धिः (अभावे बला) वृद्धिः (अभावे गोरक्षचाकुली) मेदा (अभावे अश्वगन्धा) महामेदा (अभावे अनन्ता) जीवकः (गुडूची) ऋषभकः (अभावे वंशरोचना) काकोली क्षीरकाकोली जीवन्ती कुष्ठम् एला अगरु द्राक्षा जटामांसी पद्मनखी शटी रेणुकं विकङ्कतजटा (वँईचिर चुम्बर) गुञ्जी पिप्पली मरिचं शुलुफा श्यामालता अनन्तमूलं गुडत्वक् तेजपत्रं चव्यं वराहक्रान्ता भूम्यामलकी शालपर्णी तगरपादुका नागेश्वरं पद्म काष्ठं सौगन्धिकं (शुन्नी) रक्तचन्दनं एषां प्रति २ ती.। सा. कौ.।

गुडूचीपत्रम्। क्ली। पत्रं गुडूच्याः शाकार्थे। गुणाः—आग्नेयं सर्व्वज्वरहरं लघु कटु कषायं तिक्तं स्वादुपाकं रसायनं बल्यमुष्णं संग्राहि व्रणाघ्नं प्रमेहघ्नं दाहघ्नं कामलाकुष्ठपाण्डुघ्नञ्च। भा।

गुडूचीसत्त्वम्। क्ली। गुडूचीसारे। शुलक्षेर पाल्लो। भैष.।

गुडूच्यादिगणः (कषायः)। पुं। गुडूचीपद्मकारिष्टधानकारक्तचन्दनात्मके गणे। स च पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नः अग्निकृच्च। वा. सू. १५ अ.। गुडूचीशारिवाद्राक्षाशतपुष्पापुनर्नवाभिः कृते कषाये। च. द.। अन्यः—"गुडूच्यतिविषाधान्यशुण्ठीबिल्वाब्दवालकैः। पाठाभूनिम्बकुटज चन्दनोशीरपद्मकैः। कषायः शीतलः पेयः ज्वरातीसारशान्तये॥" भैष.।

गुडूच्यादिलौहः। पुं। वातरक्ते रसः। पाठः गुडूचीसारसंयुक्तं विकटत्रयसंयुतम्। वातरक्तं निहन्त्याशु...। गुडूचीसारः (शुलक्षपालो) चिकटु विफला विड़ङ्गं मुस्ता चित्रकमूलं—एषां प्र. १ ती. लौहं १० ती. माषप्रमाणा वटी कार्य्या। र. चि.।

गुडेरः (कः)। पुं। घासे। ग्रासे। उणा.।

गुडोदकम्। क्ली। गुडाम्बुनि।

गुडोङ्गवा। स्त्री। शर्करायाम्। रा. नि. व. १४।

गुडोङ्गूता। स्त्री। शर्करायाम्।

गुड्डकः। पुं। गरुड़शालौ। रा. नि. व. १६।

गुणः (कः)। पुं। इन्द्रिये। मे.। लघ्वादौ धर्म्मे। ते च लघुगुरुस्निग्धरूक्षतीक्ष्णा इति यथाक्रमम् आकाशक्षितिजलाग्नीनां गुणाः। तत्र लघु—पथ्यं कफघ्नं चिरपाकि। गुरु—वातघ्नं पुष्टिश्लेष्मकृच्चिरपाकि च। स्निग्धं—वातघ्नं श्लेष्मकारि वृष्यं बल्यञ्च। रूक्षं वातकरं कफघ्नञ्च। तीक्ष्णं—पित्तकरं लेखनं कफवातघ्नञ्च। सुश्रुतस्तु विंशतिगुणानाह यथा—लघुगुरुस्निग्धरूक्षतीक्ष्णश्लक्ष्णस्थिरसर पिच्छिलविशदश्लीतोष्ण-मृदुकर्कशस्थूलसूक्ष्मद्रवगुरुकालमर्दा इति।

गुणकर्णिका। स्त्री। इन्द्रवारुणीलतायाम्। रा. नि. व. ३।

गुणत्रयम्। क्ली। सत्त्वरजस्तमःसु। लक्षणं—"सत्त्वं रजस्तमश्चेति पुंसासुक्तास्त्रयो गुणाः। तत्र सत्त्वं श्लेष्मा रजः पित्तं तमश्च वायुः। सत्त्वं श्लेष्मा रजः पित्तं तमश्चापि समीरणः। द्रव्यस्य मानसुद्रिक्तं पुंसि पुंस्यनुवर्त्तते॥" रा. नि. व. २१।

गुणमहोदधिः। पुं। कासाधिकारे। पारदः गन्धकं लौहं विषं त्वक् (गुडत्वक्) ताम्रं वङ्गं अभ्रं—एषां प्रति १ ती. विकटु तेजपत्रं सुस्तकं विड़ङ्गं नागकेशरं रेणुकं एला पिप्पलीमूलञ्च एषां प्र. २ ती. बालकपिप्पलीक्वाथेन जम्बीररसेन च भावना दातव्या। मात्रा चणकाभा। रस. कौ.।

गुणलयनिका (नी)। स्त्री। पटनिर्म्मितगृहे। तँाबू।

गुणवतीवर्त्तिः। स्त्री। व्रणरोगे हिता। घृतकं लोध्रं सिन्दूरम् अतिविषा हरिद्रा विभीतकफलं कम्पिल्लकं श्रीवासः गुग्गुलुश्च, एषां प्र. समभागं घृततैलाभ्यां सम्पिष्य तं पिण्डं तुल्यसिक्थकं (मोम) मृदग्निना पक्त्वा सम्मिश्रितं ज्ञात्वा उद्धरेत्। रस. र.।

गुणवत्तरा। स्त्री। जीवन्तीशाके। प. मु.।

गुणसूः। स्त्री। कार्पासीवृक्षे। रा. नि. व. ४।

गुणा। स्त्री। दूर्व्वायाम्। मांसरोहिण्याम्। मद्यसामान्ये। रा. नि. व. ८।१२।१४।

गुणाढ्यकः। पुं। अङ्कोलवृक्षे। वै. निघ.।

गुणारिष्टम्। क्ली। मद्ये। रा.।

गुणी (इन्)। पुं। आवर्त्तक्याम्। आपटा। वै. निघ.। त्रि। शब्दाद्याधारे आकाशादौ। च.।

गुणोज्ज्वला। स्त्री। क्षुद्रश्वेतयूथिकायाम्। वै. निघ.।

गुण्ठः। पुं। वृत्तवृक्षे। वा. सू. १५ अ.। "वृक्षा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दनीलकुशहयगुरुगुन्द्राः ।" दाक्षिणात्यघोटकभेदे । See अश्वः ।

गुण्डः । पुं । (Scirpus kysoor.) कसेरुतृणे । अस्य कन्दः कसेरुरिति । केशुर घास, गँठेरा केशुर । कैवर्टीति स्त्रीकै । मं वल्लहातीनि । कं मूरुगेरु । तत्पर्य्यायः,—काण्डगुण्डः, दीर्घकाण्डः, विकीर्णकः, क्लवगुच्छः, असिपत्रः, नीलपत्रः, विधारकः । गुण्डस्त्रिविधः—वृत्तगुण्डः लघुस्थूलगुण्डौ च । सा. गुणाः—मधुराः शीताः कफपित्तातिसारघ्नाः दाहरक्तहरास्य । मध्ये स्थूलतरीऽधिकगुणश्च । रा. नि. व. ८ । सुगन्धरौहिषतृणे । वै. निघ. ।

गुण्डकः । पुं । चूर्णे । भेष. ।

गुण्डकन्दः । पुं । कसेरौ । केशुर । रा. नि. व. ८ ।

गुण्डता । स्त्री । यावनालशर्करायाम् । रा. नि. व. १४ ।

गुण्डसः । पुं । सर्ज्जातिभेदे । अमि. ३ स्थान. ।

गुण्डा । स्त्री । काश्मलणभेदे । छोटे केशे । रा. नि. व. ८ ।

गुण्डाफली । स्त्री । देवदाल्याम् । पीलुपर्णी । वै. निघ. ।

गुण्डारोचनिका (नी) । स्त्री । खनामख्यातगन्धद्रव्ये । कमलागुड़ि । र. मा. ।

गुण्डाला । स्त्री । खनामख्यातक्षुद्रक्षुपे । गुंड़ाला, गोंड़ाल । तत्पर्य्यायः,—जलीद्भवा, गुच्छवधा, जलाश्रया । गुणाः—कटुतिक्तोष्णा शीथव्रणघ्नी च । रा. नि. व. ५ । गुण्डासिनीतृणे । रा. नि. व. ८ ।

गुण्डासिनी । स्त्री । खनामख्यातत्रणविशेषे । तत्पर्य्यायः,—गुण्डाला, गुड़ाला, गुच्छमूलिका, चिपिटा, त्रणपत्री, यवासा, पृथुला, विष्टरा । गुणाः—स्वादकटुः तिक्तोष्णा पित्तदाहश्रमघ्नी पशुघ्नी व्रणदोषघ्नी च । रा. नि. व. ८ ।

गुण्डिकः । पुं । तण्डुलादिचूर्णे । गुँड़ा ।

गुत्थः । पुं । गवेधुकायाम् । र. मा. । भा. म. अश्म. चि. । गुड़ूच्याम् । च. द. अतिसा. चि. ।

गुत्थकम् । क्ली । ग्रन्थिपर्णे । गँठेला । र. मा. ।

गुत्सः (कः) । पुं । ग्रन्थिपर्णवृक्षे । मे. । गुच्छे ।

गुत्सपुष्पः । पुं । सप्तच्छदवृक्षे । जटा. ।

गुदम् । क्ली । The anus. मलत्यागद्वारे । मलद्वार जटा. । स्थूलान्त्रप्रतिबद्धसार्द्धपञ्चाङ्गुलं गुदपरिमाणम् तच्च वलयः तिस्रोऽभ्यर्द्धाङ्गुलान्तरभूताः··· । चतुरङ्गुलायताः सर्व्वास्तिस्रोऽपि गोकाङ्गुलीच्छिताः··· । सु. नि. २अ. । भावप्रकाशस्तु सार्द्धचतुरङ्गुलमाह । तल्लक्षणं यथा—"गुदस्य मानं सर्व्वस्य सार्द्धं स्याच्चतुरङ्गुलं । तत्र सुर्व्वलयस्तिस्रः शङ्खावर्त्तनिभास्तु ताः । प्रवाहिणी भवेत् पूर्व्वा सार्द्धाङ्गुलमिता मता । उत्सर्ज्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता । तस्याधः सम्वरणी स्यादेकाङ्गुलसमा मिता । अर्द्धाङ्गुलप्रमाणन्तु बुधैर्गुदसुखं मतम् । मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्म्मितः ॥" भा. । तदुत्पत्तिरन्त्रशब्दे मृग्या ।

गुदकीलः (कः) । पुं । अर्शोरोगे । रा. नि. व. २० ।

गुदकुट्ट(न्दः)कः । पुं । शिशोर्गुदजतामवर्णव्रणविशेषे । लक्षणम्—"मलोपलेपात् स्वेदाद्वा गुदे रक्तकफोद्भवः । ताम्रवर्णोऽन्तःकण्डूमान् जायते मृद्व्युपद्रवः । कैश्चित्तं मातृकादोषं वदन्त्यन्येऽपि पूतनम् । प्रष्टारुर्गुदकुन्दश्च केचिच्च तमनासिकम् ॥" वा. उ. २अ. ।

गुदग्रहः । पुं । उदावर्त्तरोगे । हे. च. । पायुवेदनायाम् । च. इन्द्रिय. १०अ. ।

गुदजघ्नः । पुं । कटुशूरणे । वै. निघ. ।

गुदजारिः । पुं । देवताड़वृक्षे । वै. निघ. ।

गुदपाकः । पुं । गुदकुन्दरोगे । वै. निघ. ।

गुदबलिः । स्त्री । शङ्खावर्त्तवत् गजतालुसवर्णाः पायुस्थबलिवर्त्ते । See गुदम् ।

गुदभ्रंशः । पुं । (Prolapsus ani.) गुदनिर्गमरोगविशेषे । हारिते । तस्य लक्षणं यथा—"प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः । रूक्षदुर्ब्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥" मा. नि. ।

गुदाङ्कुरः । पुं । अर्शरोगे । हे. च. । मा. नि. ।

गुदामयः । पुं । अर्शसि । र. सा. सं. ।

गुदामयहरः । पुं । कटुशूरणे । बुनो ओल । वै. निघ. ।

गुदास्थि । क्ली । पायुस्थनि । च. शा. ७अ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुदौष्ठः। पुं। मलद्वारमूले। "रोमान्तेभ्यो यवाध्यर्द्धौ गुदौष्ठः परिकीर्त्तितः।" सु. नि. २अ.।

गुन्यफलः। पुं। नारिकेलवृक्षे। वै. निघ.।

गुन्द्रगुच्छकः। पुं। गुच्छकरञ्जे। वै. निघ.।

गुन्दा(न्द्रा)लः। पुं। जीवञ्जीवपक्षिणि। चकोर। हे. च.।

गुन्द्रः। पुं। पाटरकाख्यशरे। शर गाछ। हिं गन्दपटेर। तत्पर्य्यायः,—पटरकः, अच्छः, शङ्खवेराह्व-मूलकः। गुणाः—कषायत्वं मधुरत्वं स्निग्धत्वं रक्तपित्तमूत्रकृच्छ्रनाशित्वं स्वन्यमूत्ररजः-शोधकत्वञ्च। भा.। शरस्तम्बे। अम.। मुस्तक-तृणे। वै. निघ.।

गुन्द्रकः। पुं। गुन्द्रशरे। प. मु.। भा. म. अश्मरी. चि.।

गुन्द्रमूला। स्त्री। एरकातृणे। भा.। मुस्तक-तृणे। वै. निघ.।

गुन्द्रा। स्त्री। गवेधुकायाम्। पटरके, गोदर इति लोके। गड़गड़। सु. सू ३८अ.। दैवधान्ये। र. मा.। रोचनिकायाम्। सि. यो. क्रमि. चि.। भद्रमुस्तके। त्रिका.। प्रियङ्गौ। अम.। गुड़ूच्याम्। च. सू. ४अ.। चि. ३अ.। एरण्डवृक्षे। शिरीष-वृक्षे। दर्भे। वै. निघ.। एरकातृणे। भा.।

गुन्द्रालः। पुं। जीवञ्जीवपक्षिणि। हे.।

गुप्तगन्धिः। स्त्री। एलबालुके। रा. नि. व. ४।

गुप्तपत्रकः। पुं। मध्वालुके। मौ आलू। प. मु.।

गुप्तपुष्पः। पुं। सप्तपर्णवृक्षे। वै. निघ.।

गुप्तफला। स्त्री। काकजङ्घायाम्। गुड़कौंउनि। वै. निघ.।

गुप्तबीजम्। क्ली। तृणे। वै. निघ.।

गुप्तस्नेहः (ही (ह्न्))। पुं। अङ्कोटवृक्षे। आँकोट गाछ। रा. नि. व. ११।

गुप्ता। स्त्री। कपिकच्छौ। रा. नि. व. ३। चन्दन-विशेषे। चुया। वै. निघ.।

गुप्तागुरुः। स्त्री। शुकशिम्बीवृक्षे।

गुप्ताफलम्। क्ली। शुकशिम्बीबीजे। आला-कुशीर बीज। सु. चि. २६।

गुम्भिः। स्त्री। अवकरस्थाने। रत्नमे। मे.। यमे। हे. च.।

गुम्भटी। स्त्री। तृणधान्यभेदे। गड़गड़। गुणाः श्यामाकवत्। च. सू. २७अ.।

गुम्फः। पुं। श्मश्रुणि। गोँप। श. र.।

गुरवकः। पुं। गरुड़शाली। रा. नि. व. १६।

गुरुः। पुं। पिण्डालौ। प. मु.। स्त्री। कपि-कच्छौ। रा. नि. व. ३। त्रि। अलघुद्रव्ये, दुष्पच-द्रव्ये पृथिवीसोमगुणभूयिष्ठे। तच्च त्रिविधं—स्वभावगुरु, मात्रागुरु, संस्कारगुरु चेति। स्वभाव-गुरु तत् यत्प्रकृत्या गुरु तच्च माषादिकं, तन्मात्रा-गुरु यत् मुद्गादिकं, संस्कारगुरु च पिष्टान्नादि। यथा—"मन्दानलकरं द्रव्यं मात्रागुरु विवर्ज्जयेत्। स्वभावतश्च गुरु यत्तत्तु संस्कारतो गुरु। मात्रागुरु तु मुद्गादि माषादि प्रकृतेर्गुरु। संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम्॥ गुरु वातहरं पुष्टिश्लेष्म-कृच्चिरपाकि चेति" भा.। शीघ्रधातौ। वै. निघ.।

गुरुकण्टकः। पुं। तिलमयूरे। त्रि.।

गुरुकोष्ठः। त्रि। गुरुपाकिकोष्ठे।

गुरुगन्धिकम्। क्ली। अगुरुणि। वै. निघ.।

गुरुगुणः। त्रि। यच्चिरेण पक्वं तद्गुरुगुणं। वा. टी. हेमा.।

गुरुघ्नः। पुं। गौरसर्षपे। रा. नि. व. १६।

गुरुण्टकः। पुं। तिलमयूरे। त्रिका.।

गुरुतण्डुला। स्त्री। उन्माशालौ। रा. नि. व. १६।

गुरुता। स्त्री। गौरवे। जाड्ये। मा. नि.।

गुरुत्वम्। क्ली। गौरवे। जाड्ये।

गुरुपञ्चमूली। स्त्री। बृहत्पञ्चमूली, सा बिल्व-श्योणाक-गाम्भारी-पाटला-गणिकारिका इति पञ्च-मूलात्मिका वातकफे हिता। च. द. ज्व. चि.। "पञ्चमूल्या लघीयस्या गुर्व्या ताभ्यां सधान्यया।"

गुरुपत्रम्। क्ली। वङ्गे। हे. च.।

गुरुपत्रा। स्त्री। तिन्तिड़ीवृक्षे। श. र.।

गुरुपाकः। त्रि। यः पक्वः विष्मूत्रे सृजति श्लेष्माणञ्च करोति स गुरुपाकः। वा. टी. हेमा.। सृष्टविष्मूत्रतया कफीत्क्लेशेनानुमेयम्। सु. सू. ४१ अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुपुष्पः। पुं। क्रमुकवृक्षे। गुवाकवृक्ष। वै. निघ.।

गुरुरत्नम्। क्ली। पुष्परागमणौ। रा. नि. व. १३।

गुरुवर्चोघ्नः। पुं। लिम्बाकवृक्षे। कांगजी वा पातिलेबूर गाछ। भ. च.।

गुरुबीजः। पुं। मसूरे। रा. नि. व. १६।

गुरुशिंशपा। स्त्री। शिंशपावृक्षे। वै. निघ.।

गुरुश्रेष्ठम्। क्ली। वङ्गधातौ। रङ्ग। वै. निघ.।

गुरुसः। पुं। गरुड़शाली। रा. नि. व. १६।

गुरुसारा। स्त्री। शिंशपावृक्षविशेषे।

गुरुस्कन्धः। पुं। चीरिणीवृक्षे। वै. निघ.।

गुरुस्वेदः। पुं। अश्वस्य स्वेदविशेषे। लक्षणं—"यव क्वाथेन यः स्वेदः गुरुस्वेदः स उच्यते।" ज द. १८अ.।

गुर्व्वर्च्चनम्। क्ली। पूज्यार्च्चने। गुणाः—"स्वर्ग्यं यशस्यमायुष्यम् अलक्ष्मीकविनाशनम्। धनधान्यकरं नित्यं गुरुदेवद्विजार्च्चनम्॥" राज. २प.।

गुर्व्विणी। स्त्री। गर्भवत्याम्। रा. नि. व. १८।

गुर्व्वी। स्त्री। गुवाकवृक्षे। गर्भिण्याम्। मे.।

गुलः। पुं। गुड़े। मे.।

गुलकः। पुं। गुरुतृणे। वै. निघ.।

गुलञ्चकन्दः। पुं। गुच्छकन्दे। कुनी। मं कुलीहाल। तत्पर्य्यायः,—गुच्छालकन्दः, वलाढ्यकन्दः, निर्घण्टिका। गुणाः—मधुरत्वं शीतलत्वं द्रव्यत्वं तर्पणत्वं दाहघ्नत्वञ्च। रा. नि. व. ७।

गुलदावदो। स्त्री। स्थलपद्मभेदे। गोलक फूल। हिं गीलावहड़ी।

गुला। स्त्री। क्षुद्रोवृक्षे। मे.।

गुलालः। पुं। भूतृणे। गन्धतृणविशेष। रा. नि. व. ८।

गुलावः। पुं। पुष्पविशेषे। गोलाप फूल।

गुलिका (ली)। स्त्री। गुड़िकायाम्। रोगविशेषे। वसन्त रोग। मे.।

गुलिकालवणम्। क्ली। गुटिकालवणे। वै. निघ.।

गुलुच्छः (च्छ)। पुं। पुष्पस्तवके। त्रिका.।

गुलुच्छकन्दः। पुं। गुच्छकन्दे। वै. निघ.।

गुल्लोरिका। स्त्री। गुल्फे। वै. निघ.।

गुल्फः। पुं। पादग्रन्थौ। पायेर गुल्ले, गोड़ालो। हे. च.। "जङ्घाङ्घ्रिसन्धिग्रन्थौ तु घुटिका गुल्फ इत्यपि।" रा.नि.व. १८। जङ्घास्थसन्धिविशेषे। सु.। तत्पर्य्यायः,—घुटिका (अ.), चरणग्रन्थिः, घुटिकः, घुरुटकः, घुरुट (हे.), घुटिः, घुटी (हि.)।

गुल्फास्थि। क्ली। पादघुटिकास्थनि। गुल्लेर हाड़। च. शा. ७अ.।

गुल्मः। पुं। प्लीहायाम्। रोगविशेषे। स च पञ्चस्थानेषु पञ्चविधः वातादिभेदेन। कारणपूर्व्वकं सा. लक्षणं यथा—"दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः। कुर्व्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणं॥" सा. लक्षणं—"हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः। वृत्तयग्रापचयवान् स गुल्म इति कीर्त्तितः।—स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः। पुरुषाणां तथा स्त्रीणां त्रयो रक्तेन चापरः॥" आर्त्तवजमाह—"आर्त्तवादपि गुल्मः स्यात् स तु स्त्रीणां प्रजायते। अन्यस्त्वसृग्भवः पुंसां तथा स्त्रीणां प्रजायते। तत्स्थानमाह—तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिवस्तयः।" पूर्व्वरूपं—"उद्गार-बाहुल्यपुरीषबन्ध-तृष्णारुचिमत्वान्त्रविकूजनानि। आटोपमाध्मानमपक्तिशूलमासन्नगुल्मस्य वदन्ति चिह्नम्॥ अरुचिश्छर्द्दिरुद्विष्टनिवातत्वञ्चान्त्रकूजनं। आनाहश्चोद्भवातश्च सर्व्वगुल्मेषु लक्षयेत्॥" भा.। तस्य चापक्वताकारणे सुश्रुतः। "तुल्यदोषसमुत्थानात् विद्रधेर्गुल्मकस्य च। कस्मान्न पच्यते गुल्मी विद्रधिः पाकमेति च। गुल्मरूपाः स्वयं दोषा विद्रधिर्मांसशोणितं। तस्मान्न पच्यते गुल्मी विद्रधिः पाकमेति च॥" इति। ग्रन्थिपर्णवृक्षे। गेँठेना। काण्डशून्यवृक्षजातौ। झोप, झाड़ि वन। वृक्षभेदे। त्रिका.।

गुल्मकः। पुं। रक्तकरवीरवृक्षे। वै. निघ.।

गुल्मकालानलरसः। पुं। गुल्माधिकारे रसः। पारदं गन्धकं तालं तामकं टङ्कणं यवक्षारं प्र. तीलकद्वयमितं सुस्तकं पिप्पली शुण्ठी हरीतकी वचा कुष्ठं प्र. तीलकं चूर्णयेत् सर्व्वमेकीकृत्य पर्पटसुस्तकशुण्ठ्यपामार्गपाठाक्वाथेन भावयित्वा शुष्कञ्चत्वा चूर्णयेत्। मात्रा गुञ्जाचतुष्टयं। भैष.। टङ्कणस्थाने लौहमिति रसेन्द्रसारः। महान् यथा —गन्धकं तालकं तामं तथैव तीक्ष्णलौहकं समांशं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहीत्वा घृतकुमारीरसेन दृढं मर्दयित्वा गजपुटे पचेत्। शीते च समुद्धरेत्। मात्रा. २ र.। र. सा. सं.।

गुल्मकेतुः। पुं। अम्लवेतसे। रा. नि. व. ६।

गुल्मगणः। पुं। गुल्महृत्तानां वर्गे। यथा—"बलाचतुष्टयं पर्णीपञ्चकञ्चाग्निमन्थकः। पाठा-यवासा वार्त्ताकी कोकिलाक्षी गणो द्विधा। अपामार्गद्वयं मूर्व्वा चाह्निमान् शरपुङ्खिका। काक-नासा काकजङ्घा मेषशृङ्गी च भृङ्गकम्। वन्या-कर्कोटकी वेधा वर्व्वरीतुलसी द्विधा। वज्रदन्ती द्विधा जाली नाम्ना गुल्मगणस्त्रयम्॥" अर्कः।

गुल्मगवेधुका। स्त्री। गवेधुकायाम्। गड़-गड़े। प. मु.। देवधान्ये। र. मा.।

गुल्मघ्नम्। क्ली। हिङ्गुनि। रा. नि. व. ६।

गुल्ममूलम्। क्ली। आर्द्रके। रा. नि. व. ६।

गुल्मवज्रिणी (वटिका)। स्त्री। रक्तगुल्मे हिता। "रसगन्धकताम्रञ्च कांस्यं टङ्कणतालकं। प्रत्येकं पलिकं ग्राह्यमर्द्धं यैदतियत्नतः। तद्व्यथाग्नि-बलं खादेत् रक्तगुल्मप्रशान्तये॥" रस, गंधक, ताम्बा, काँसा, सोहागा, हरिताल प्रत्येक ८ तो. जले मर्द्दन। र. सा. सं.।

गुल्मवल्ली। स्त्री। सीमलतायाम्। रा. नि. व. ३।

गुल्मशार्दूलरसः। पुं। गुल्मे रसः। रसगन्धक-लौहगुग्गुलु-त्रिवृतापिप्पली-शुण्ठीशटीधन्याक-जीर-कानि प्र. ८ तो. जपालबीजं ४ तो. सच्चूर्ण्य घृतेन वटी-कार्य्या। मात्रा २ र.। र. सा. सं.।

गुल्मिकः। पुं रक्तकरवीरे। वै. निघ.।

गुल्मिनी। स्त्री। उलुपे। ऊलू। विस्तृत-लतायाम्। अम.।

गुल्मी (ल्मिन्)। पुं। कण्टकपालीवृक्षे। प. मु.। स्त्री। आमलक्याम्। एलायाम्। मे.। गृध्रनखी-वृक्षे। गुड़काँउली। भ. च.।

गुल्यः। त्रि। मधुरे। हे. च.।

गुवाकः। पुं। The betel-nut tree. स्वनामख्यातवृक्षे। गुआ गाछ। हिं सुपारि। तत्पर्य्यायः,—घोण्टा, पूगः, क्रमुकः, खपुरः (अ.), गूवाकः (अ. टी.), कपीतनः (मे.), क्रमुः (भा.), क्रमुकी (शब्दर.), पूगवृक्षः, दीर्घपादपः, दृढ़वल्कलः, वल्कतरुः, चिक्कणः (रा.), पूगी (भा.), अकीटः, तन्तुसारः, सुरञ्जनः, गोपदलः, राजताक्षः, कुटा-फलः, करसटः (त्रि.)। अस्य फलपर्य्यायः,—क्रमुकफलं, पूगं, चिक्कणी, चिक्का, चिक्कणं, श्लक्ष्णकं, उद्वेगं, पूगफलं (रा.), पूगीफलं (भा.)। गुणाः—कषायत्वं शीतलत्वं दीपनत्वं गुरुपाकित्वञ्च। राज.। तत्फलगुणाः—पूगं गुरु हिमं रूक्षं कषायं कफपित्त-जित्। मोहनं दीपनं रूक्षं आस्यवैरस्यनाशनम्॥ आर्द्रं तद्गुर्व्वभिष्यन्दि वह्निदृष्टिहरं स्मृतम्। स्निग्धं दोषत्रयक्षेदि दृढ़सख्यं तदुत्तमम्॥" भा.। अस्य मस्तिष्कगुणाः,—स्वादुतिक्तकषायत्वं, बलप्रद-शुक्रवर्द्धकत्वं, भेदसदकारित्वं मूत्रदोषनाशित्वञ्च। राज.। See अकीटः।

गु(गू)ष्टिः। स्त्री। गाम्भारीवृक्षे। वै. निघ.।

गुहः। पुं। चपलघोटके। श. र.। कङ्गुधान्ये। वै. निघ. २भ. अतिसा. चि. गोक्षुरकादिकषाये।

गुहा। स्त्री। सिंहपुच्छीनामपृश्निपर्ण्याम्। सिंह-पूच्छी चाकुलिया। रा. नि. व. ४। नकुलः १३अ। वा. सू. २९ अ.। शालपर्णीनामक्षुपे। भा. पू. १भ.।

गुहाशयः। पुं। गुहाशयमृगमात्रे। सिंहव्याघ्र-भल्लतरक्षुद्वीपृच्छमार्ज्जारगवालनकुलगोधाबभ्रुप्रभृतिषु। तन्मांसगुणाः—मधुरं गुरु स्निग्धं बल्यं वातघ्नमुष्ण-वीर्य्यं नेचार्शसां हितम्। सु. सू. ४६ अ.। "सिंह-व्याघ्रभल्लतरक्षुद्वीपिनस्तथा। बभ्रुजम्बूकमार्ज्जारा इत्याद्याः स्युर्गुहाशयाः॥" भा.। वनसूषिके। सप्त-पर्णवृक्षे। चक्रवाके। वै. निघ.। व्याघ्रे। रा. नि. व. १९। त्रि। गुहाशायिनि।

गुहिनम्। क्ली। वने। श. र.।

गुहिलम्। क्ली। धने। उणा.।

गुहेरः। पुं। लौहकारे। उणा.।

गुह्यम्। क्ली, पुं। कमठे। मे.। पायौ। भगे। विवरे। लिङ्गे। अम.।

गुह्यदीपकः। पुं। खद्योते। श. च.।

गुह्यनिष्यन्दः। पुं। मूत्रे। रा. नि. व. १८।

गुह्यपत्रः (पुष्पः)। पुं। अश्वत्थवृक्षे। रा. नि. व. ११।

गुह्यरोगः। पुं। शूकदोषापरनामसु उपदंशादि-वयोविंशतिविधरोगेषु। तत्र उपदंशाः पञ्च।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्षपिकादय अष्टादश। See गुक्कदीषः। निदानम्—"स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा। दोषाध्युषितसङ्कीर्णमलिनानुरजःपथाम्। अन्ययोनिमनिच्छन्तीमगम्यां नवसूतिकां। दूषितं स्पृशतस्तीयं रतान्तेष्वपि नैव वा। विवर्द्धयिषया तीक्ष्णान् प्रसेपादीन् प्रयच्छतः। सुष्टिदन्तनखोत्पीड़ाविषवक्त्रकृपातनैः। वेगनिग्रहदीर्घातिखरस्पर्शविघट्टनैः। दोषा दुष्टा गता गुह्यं त्रयोविंशतिसामयान्। जनयन्त्युपदंशादीन्॥" वा. उ. ३३ अ.।

गुह्यवोजः। पुं, क्ली। भूतृणे। गन्धतृणविशेष। रा. नि. व. ८। हगसाचे। वै. निघ.।

गूः। पुं। विष्ठायाम्।

गूढम्। क्ली। गुह्ये। मे.। चि। संवृते। अम.।

गूढकासो (इन्)। पुं। काके। वै. निघ.।

गूढगर्भकः। पुं। गर्भजरोगविशेषे। वै. निघ.।

गूढनोड़ः। पुं। खञ्जरीटपक्षिणि। श्र. मा.।

गूढपत्रः (त्रा)। पुं, स्त्री। अङ्गीलवृक्षे। कररी वृक्षे। रा. नि. व. ८।

गूढपथः। पुं। अन्तरात्मनि। हे. च.।

गूढ़पात् (दः)। पुं। सर्पे। अम.। श्र. र.। कच्छपे। वै. निघ.।

गूढ़पुष्पः (कः)। पुं। वकुलवृक्षे। रा.नि.व.१०।

गूढ़फलः। पुं। वदरवृक्षे। रा.।

गूढ़फला। स्त्री। गृध्रनख्याम्। गुड़कौंउनी, कानियाकड़ा। वै. निघ.।

गूढ़मल्लिका। स्त्री। अङ्गीलवृक्षे। "अङ्गीले गूढमल्लिका।" रा. नि. व. २३।

गूड़मैथुनः। पुं। काके। विका.।

गूढ़वर्चाः। पुं। भेके। विका.।

गूढ़वल्लिका (ल्ली)। स्त्री। अङ्गीलवृक्षे। रा. नि. व. २३।

गूढ़ाङ्गः। पुं। कच्छपे। रा. नि. व. १९। उपस्थे। वै. निघ.।

गूढ़ाङ्घ्रिः। पुं। सर्पे। रा. नि. व. १९।

गूथम्। क्ली। विष्ठायाम्। अम.। श्र. च.।

गूथलक्ताः। पुं। पक्षिविशेषे। गुय्रेशालिक। श्र. च.।

गूनः। त्रि। कृतपुरीषोत्सर्गे। अम.।

गूवाकः। पुं। गुवाके। श्र. र.।

गूषणा। स्त्री। मयूरपिच्छचन्द्रके। श्र. च.।

गृञ्जन(क)म्। क्ली। रक्तमूलकविशेषे। शालगम। हिं गाजर। सं सैठीमूल। कं चण्डिकैयमूलंगि। तत्पर्य्यायः,—शिखाख्यं, यवनेष्टं, वर्त्तुलं, ग्रन्थिमूलं, शिखाकन्दं, कन्दं, भिण्डीरसोदकं। गुणाः—कटूष्णं कफवातघ्नं रुच्यं दीपनं हृद्यं दुर्गन्धगुल्मघ्नञ्च। रा. नि. व. ७। विषदिग्धपक्षीमांसे। भै.। वा. चि. ४अ.। (कम्) हरीतकीभेदे। वा. चि. ९अ. "यूषे गृञ्जनकस्य वा।" पुं। Garlic. रसोने। रक्तरसोने। लाल लहसुन। हिं लसण। रा.नि.व.७। गुणाः—द्वयीरेव उष्णकटूपिच्छिलस्निग्धगुरुस्वादुतिक्तव्यवायत्वं मेधास्वरवर्णचक्षुर्भग्नास्थिसन्धानकरत्वं तीक्ष्णत्वं हृद्रोगजीर्णज्वरकृमिशूलविबन्धगुल्मारुचिसूचक्लेच्छघ्नत्वं अर्शः कुष्ठवातक्लमिकफरोगघ्नत्वञ्च। रा. नि. व. ७। रक्तशिग्रौ। गङ्गायाम्। वै. निघ.।

गृञ्जरः। पुं। गर्ज्जरे। गाजर। वै. निघ.।

गृण्डोवः (रः)। पुं। महाशृगाले। बड़ शेयाल। हे. च.।

गृधूः। पुं। अपाने। उणा.।

गृध्रः। पुं। पक्षिविशेषे। शकुनि, गृधिनी। रा. नि. व. १९। प्रसहवर्गीयः काकसमगुणश्च। सु. सू. ४६ च.। त्रि। लोभयुक्ते। विका.।

गृध्रनखी। स्त्री। कण्टकपालीवृक्षे। गुड़कौंउनी, केलेकड़ा। तें गेद्दगेरुचेट्टु। र. मा.। कोलिवृक्षे। कुलगाछ। विका.। वै. निघ. २भ. वा. व्या. चि. महारास्नादौ। नखीनामगन्धद्रव्ये। वै. निघ.।

गृध्रनखीद्वयम्। क्ली। श्वेतलोहितपुष्पभेदात् अहिंसाद्वये, कालीयकद्वये। श्वेत रक्त केलेकड़ा, गुड़कौंउनी। "द्वे गृध्रनख्यौ रास्ना च।" सि. यो. च. द. वा. व्या. वाजिगन्धादिकषाये। वदरीद्वये, वदरी वनवदरी चेति। विका.। वै. निघ. २भ. ज्व. चि. दशमूलादिकषाये।

गृध्रपत्रा। स्त्री। धूम्रपत्रा-नामकवृक्षे। रा. नि. व. ५।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृध्रपुरीषः। पुं। गृध्रपक्षिविष्ठायाम्। गुणाः —व्रणदारणत्वम्। सु. सू. २६ अ.।

गृध्रमलः। पुं। गृध्रपक्षिविष्ठायाम्। चक्र.।

गृध्रसी। स्त्री। Rheumatism, affecting the loins. वातरोगविशेषे। चौरङ्गी वात। तल्लक्षणम्—"स्फिक्पूर्व्वा कटिपृष्ठोरुजानुजङ्घापदं क्रमात्। गृध्रसी स्तम्भरुक्तोदैः गृह्णाति स्पन्दते मुहुः। वाताद्वातकफात्तन्द्रागौरवारोचकान्विता॥" मा. नि.। वाताद्वातकफाभ्यां सा विज्ञेया द्विविधा पुनः। वातजायां भवेत्तोदो दैहस्यातीव वक्रता। जानुजङ्घोरुसन्धीनां स्फुरणं स्तम्भता भृशं। वातश्लेष्मोद्भवायास्तु गौरवं वह्निवर्द्धनं। तन्द्रा सुखप्रसेकश्च भक्तद्वेषस्तथैव च॥" भा.। "पाणिप्रत्यङ्गुलीनान्तु कण्डरा यानिलादिता। सक्थ्नोः चेपं निगृह्णीयात् गृध्रसीति हि सा स्मृता॥" सु. नि. १ अ.। गृध्रस्यान्तु नरं सम्यक्रेकेण वमनेन वा। ज्ञात्वा निरामं दीप्ताग्निं बस्तिभिः समुपाचरेत्॥

गृध्राकारः। पुं। भाषपक्षिणि। वै. निघ.।

गृध्राणी। स्त्री। धूम्रपत्रा-नामक्षुद्रक्षुपे। रा. नि. व. ५।

गृष्टिः (ष्टिका)। स्त्री। वाराही-नामक-सङ्घाकन्दशाके। शुद्धार आलू। रा.नि.व.७। भूकर्य्यां। सु. चि. २६।१७ अ.। सकृत्प्रसूतायां गवि। हे. च.। गाम्भारीवृक्षे। रा. नि. व. ९। वराहक्रान्तायाम्। अम.। शुक्लभूकुष्माण्डे। वै. निघ.। वदरवृक्षे। मे.।

गृष्टिक्षीरम्। क्ली। सकृत्प्रसवादुग्धे। भा. म. ३ भ.।

गृहम्। क्ली। निकेतने। घर।

गृहकच्छपः। पुं। पेषणशिलायाम्। श. र.।

गृहकन्या। स्त्री। कुमार्य्याम्। घृतकुमारी। रा. नि. व. ५।

गृहकपोतः (कः)। पुं। पारावते। पाय्रा। त्रिका.। See कपोतः।

गृहकर्त्ता। पुं। धूसरवर्णेऽतिसूक्ष्मचटके। बाबुई। रा. नि. व. १९। तत्पर्य्यायः,—धान्यभक्षणः, चमः, भीरुः, कपिप्रियः। रा.।

गृहकारी (इन्)। पुं। कीटविशेषे। कुमीरा पोका।

गृहकुक्कुटः। पुं। कपोतपक्षिणि। सार.।

गृहकुलिङ्गः। पुं। गृहचटके।

गृहकूलकः। पुं। चिचिण्डायाम्। चिचिङ्गा। भा. पू. १ भ.।

गृहगोधा (धिका)। स्त्री। ज्येष्ठायाम्। टिकटिकि। हिं छिपकली, विषखापरा। र. मा.। तत्पर्य्यायः,—शल्की, मूषली, विश्वम्बरा, ज्येष्ठी, कुड्यमत्स्यः, पल्लिका, गृहगोधिका (रा.), गृहगोलिका, माणिक्या, भित्तिका, गृहोलिका (हे.), गृहालिका (हा.)। तल्लक्षणम्—"विदाहं श्वयथुं तोदं स्वेदञ्च गृहगोधिका···जनयेत्।" मा. नि.। (लिका) इति हे. च.।

गृहचटकः। पुं। गृहपालितचटके। ग्राम्य चड़ा। गुणाः—"गृहस्थ चटको वृष्यः बलशुक्रविवर्द्धनः। सर्व्वदोषहरश्चापि दीपनो मांसवर्द्धनः॥" अवि. २१ अ.। "रक्तपित्तहरो वेश्मकुलिङ्गस्त्वतिशुक्रलः।" सु. सू ४६ अ.।

गृहचूल्लिमृत्। स्त्री। चुल्लीमृत्तिकायाम्। उननेर माटी। चि. क्र. क.।

गृहणी। स्त्री। पलाण्डौ। वै. निघ.। काञ्जिके। त्रिका.।

गृहतटी। स्त्री। गृहवीथिकायाम्। हा.। बारांडा।

गृहद्रुमः। पुं। मेषशृङ्गीनामवृक्षे। प. मु.। शाकवृक्षे। शेगुन गाछ। रा. नि. व. ९। स्त्री (मा)। मेढ्रशृङ्ग्राम्। र.।

गृहधूमः। पुं। आगारधूमे। झूल। सा. कौ. गृहणी. चि.।

गृहधूमाद्यतैलम्। क्ली। नासारोगे तैलम्। "गृहधूमकणादारुचारनक्ताह्वसैन्धवैः। सिद्धं शिखरिबीजैश्च तैलं नास्यार्शसां हितम्॥" तिलतैल १ श. झूल, पिप्पुल, दारुहरिद्रा, यवक्षार, करञ्जबीज, सैन्धव, वामुनहाटीबीज प्रत्येके २ तो. ४ मा. ७ र.। सा. कौ.। अन्यत् उपदंशचिते—गृहधूमनिशाकिट्टैरेकविंशकैः क्रमात् ...। झूल १प. २ तो. ५ मा. ७ र. हरिद्रा २ प. ५ तो. २ मा. ७ र. सुराबीज ७ प. १ तो. १ मा. ९ र. तैल ४ श. जल चतुर्गुण। रस. र.। आगारधूमाद्यतैलं।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहनाशनः। पुं। कपोते। रा. नि. व. १९।
गृहनीड़ः। पुं। चटकपक्षिणि। हारा.।
गृहपालः। पुं। कुक्कुरे।
गृहपुतिका। स्त्री। गोधापदीलतायाम्। के.। गोयालेलता।
गृहपुत्रिका। स्त्री। घृतकुमार्य्याम्। भैष. कुष्ठ. चि. कन्दर्पसा. तैले। वायसाणायाम्। गोयालेलता। सा. कौ.।
गृहबलिप्रियः। पुं। चटके। काके। वै. निघ.।
गृहबलिभुक् वके। श. र.।
गृहभणिः। पुं। प्रदीपे। त्रिका.।
गृहमाक्षिका। स्त्री। चर्म्मचट्याम्। चामचिकि। त्रिका.।
गृहमृगः। पुं। कुक्कुरे। हे. च.।
गृहवारिका। स्त्री। काञ्जिके। के.।
गृहशायी (इन्)। पुं। पारावते। पायरा। वै. निघ.।
गृहस्थूणम्। क्ली। गृहस्तम्भे। अ.।
गृहागिका। स्त्री। गृहगोधायाम्।
गृहाम्बु (म्ल)। क्ली। काञ्जिके। त्रिका.। च. द. गर्भ चि.।
गृहा(हो)लिका। स्त्री। ज्येष्ठाम्। हारा.। हे. च.।
गृहाशया। स्त्री। ताम्बूलीलतायाम्। श. च.। पूगीवृक्षे। वै. निघ.।
गृहाशी (न्)। पु। सप्तपर्णवृक्षे।
गृहाश्मा। पुं। पेषणशिलायाम्। शिल। श. र.।
गृहिणी। स्त्री। काञ्जिके। त्रिका.। भार्य्यायाम्। हे. च.।
गृह्यम्। क्ली। गुदे। मे.।
गृह्यकः। पुं। गृहासक्तमृगादौ। अम.।
गेण्डुः (कः)। पुं। कन्दुके। ज.।
गेयप्रियः। पुं। सुन्दरपुष्पवृक्षे। गन्धराज गाछ। रा. नि. व. १०।
गेहधूमः। पुं। गृहधूमे। झूल। च. द.।
गेहपत्री। पुं। पारावते। वै. निघ.।

गैरिक(रेय)म्। क्ली। सुवर्णे। रा. नि. व. १३। वै. निघ. हिक्का. चि। शिलाजतुनि। गिरिमृत्तिकायाम्। गेरिमाटी। हिं गेरु, सुवर्णगेरु। तत्पर्य्यायः,—रक्तधातुः, गिरिधातुः, गवेधुकं, धातुः, सुरङ्गधातुः, गिरिसम्भवं (रा.), वनालक्तं, गवेरुकं, प्रत्यग्रम, गिरिमृत् (त्रि), लोहितमृत्तिका, गिरिजम्। तच्च गैरिकस्वर्णगैरिकभेदेन द्विविधम्। तयोः गैरिकं स्वर्णगैरिकात् रक्ततरम्। तस्य पर्य्यायः,—सुवर्णगैरिकं (र), स्वर्णधातुः, शिलाधातुः, सुरक्तकः, सन्ध्याभं, वभ्रुधातुः। गुणाः—"गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमं। चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम्॥" भा. पू. १भ.। निर्म्मलं स्निग्धं नेत्रतेजस्करम्। राज.। शोधनं शङ्खशोधनवत्। भा. ४भ. पादस्फोट. चि. मधुसिक्थकगैरिककृत...।
गैरिकाक्तः। पुं। जलमधूकवृक्षे। रा. नि. व. ११।
गैरी। स्त्री। लाङ्गलिकवृक्षे। विषलाङ्गुलि। र. मा.।
गैरेयम्। क्ली। शिलाजतुनि। अ.। गैरिके। भा.।
गोः। पुं। स्वर्णे। सूर्य्यरश्मौ। वज्रे। चन्द्रे। सूर्य्ये। ऋषभौषधे। स्त्री। शोभायाम्। चक्षुषि। पृथिव्याम्। के.।
गोकण्टः(कः)। पुं। क्षुद्रगोक्षुरक्षुपे। रा. नि. व. ४। च. द. वा. व्या. माषतैले। विकण्टकवृक्षे। रा. नि. व. ११।
गोकण्टी। स्त्री। गोपघीष्टायाम्। वै. निघ.।
गोकर्णः। पुं। अश्वगन्धायाम्। मद. व. १। अश्वतरे। मे.। कूलचरमृगभेदे। अम.। गुणाः—गोकर्णमांसं मधुरं स्निग्धं मृदु कफघ्नं विपाके मधुरं रक्तपित्तघ्नञ्च। सु. सू. ४६ अ.। सर्पविशेषे। मे.। अनामिकायुक्तमुष्टिपरिमाणे।
गोकर्णा। स्त्री। अश्वगन्धायाम्। वै. निघ.।
गोकर्णिका (र्णी)। स्त्री। वाजिवल्गाभेदे। ज. द. ७अ.। मूर्व्वायाम्। रा. नि. व. ३। तृणविशेषे। काल अपराजितविशेष। गुणाः—कटुः शीता तिक्ता वृष्या चक्षुष्या तुवरा सरा विषघ्नी विदोषघ्नी शिरःशूलघ्नी आम-पित्तरोग-शीथ-कृमि-कफव्रण-कफ-ग्रहपीड़ा-सर्पविषहरी च। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोकिरा(री)टिका (टी)। स्त्री। सारिकायाम्। शालिक पाखी। हे. च.। रा. नि. व. १९।

गोकि(की)लः। पुं। सुषले। हले। हारा.।

गोकुलिकः। स्त्री। काणे। काणा। वै. निघ.।

गोक्षतम्। क्ली। गोमये। श. च.।

गोखरो (खुरः)। पुं। गोक्षुरवृक्षे। श. र.। क्ली। गोशफे। श. च.।

गोगृष्टिः। स्त्री। सकृत्प्रसूतायाम् गवि। के.।

गोग्रन्थिः। पुं। गोजिह्विकौषधौ। मे.। करीषे, शुष्कगोमये। त्रिका.।

गोघृतम्। क्ली। गव्यघृते। गाओया घि। गुणाः—विपाके मधुरं शीतलं वात-पित्त-विषघ्नं चक्षुष्यं बल्यं श्रेष्ठञ्च। सु. सू. ४६अ.। See गव्यघृतम्। वर्षोपले। त्रिका.।

गोचन्दना। स्त्री। गोवृषणवदधोभागे द्विधाकृतिसविषजलायुकाभेदे। जोंक। सु. सू. १३अ.। सु. चि. २८अ.।

गोचरविभ्रमः। पुं। रूपस्यायथायथदर्शने। भा. म. ४भ. नेत्ररो. चि.।

गोचर्म्म। क्ली। गोत्वचि।

गोचर्म्मकण्टकः। पुं। पर्पटके। वै. निघ.।

गोचाण्डाली। स्त्री। स्वनामख्यात-वृक्षविशेषे।

गोच्छगलः। पुं, क्ली। गोमये। वै. निघ.।

गोच्छालः। पुं। अलम्बूषवृक्षे। कुकुशिमे गाछ। र. मा.।

गोच्छाला। स्त्री। गोरक्षमुण्ड्याम्। वै. निघ.।

गोजलम्। क्ली। गोमूत्रे। रा. नि. व. १५।

गोजा। स्त्री। गोलोमिकायाम्। रा. नि. व. ५। भा. म. २भ. मू. घा. चि.।

गोजागरिकः। पुं। कण्टकारीवृक्षे। मे.।

गोजापर्णी। स्त्री। दुग्धफेनीवृक्षे। छुदिया। रा. नि. व. ५।

गोजिः (जी) (जिका)। स्त्री। गोजिह्वालतायाम्। सु. चि. १८।२२ अ.। भा.। शाखोटवृक्षे। सुश्रु.।

गोजिकाणः। पुं। मध्यमाश्वे। See अश्वः।

गोजिह्वा। स्त्री। Elephantopus scaber. स्वनामख्यातपत्रशाकवृक्षे। दाड़ि शाक। हिं पाथरी, गोभी, दाड़ीशाक, गोजियालता। तें येटुनालुकचेट्टु, मरिलिकचेट्टु। तत्पर्य्यायः,—दार्व्विका (अ.), दर्व्विका (भ.), कुरसा (श.), दार्व्विपत्रिका (र.), दर्व्वी, गोजिह्विका (शब्दर.), खरपत्री, वातोना, अधोमुखा, अनड्डूज्जिह्वा, अधःपुष्पी। च. द.। "गोजिह्वां बालमूलकम्।" गुणाः—लघुः कुष्ठमेहास्रकृच्छ्रज्वरघ्नी। भा. पू. १भ. शा. व.। कटुका तीव्रा शीतला पित्तघ्नी व्रणरोपणी। सर्व्वदन्तविषापहा च। रा. नि. व. ४। "गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत्। हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः। कोमला तुवरा तिक्ता स्वादुपाकरसा स्मृता॥" सु.। गुन्द्रायाम्। गड़गड़े। देवधान्ये। देधान। र. मा.।

गोजिह्विका। स्त्री। गोजिह्वायाम्। श. र.। जिह्वारूपकायप्रत्यङ्गविशेषे। च. शा. ७अ.।

गोड़ः। पुं। नाभौ संवृद्धमांसगुड़के। गोंड़। मे।

गोड़म्बो। स्त्री। भल्लातकबीजे। वै. निघ.।

गोड़वास्तुकः। पुं। वास्तुकशाकविशेषे। वै. निघ.।

गोड़ुम्बः। पुं। कालिङ्गलतायाम्। तन्नामभेदे। मे.।

गोड़ुम्बा (म्बिका)। स्त्री। (Cucumis madraspatanus. Cucumis melo.) फलशाकलताविशेषे। गोमुक, राजगोमुक। र. मा.। तत्पर्य्यायः,—चिब्बा, गवाक्षी (अ.), गोड़ुम्बिका (र), विशाला, नृपवल्लभा। द्रव्याभि.।

गोणमञ्जरी। स्त्री। मनःशिलायाम्। के.।

गोणा। स्त्री। मनःशिलायाम्। रा. नि. व. १३।

गोणी। स्त्री। द्रोणीपरिमाणे। प. प्र.। छिन्नवस्त्रे। हे.। धान्यादिवहनाधारविशेषे। सुगवी.। गुण, थ'ले।

गोण्डः। पुं। गोड़े। गोंड़। अम.।

गोतीर्थकः (च्छेदः)। पुं। गोयीन्याकारच्छेदने। सु. चि. ८अ.। काव्यगतगोमूत्रिकाकारच्छेदे। वा. उ. २८अ.। "पार्श्वादागतशस्त्रेण कृतो गोतीर्थको मतः।" भा. म. भगन्दरे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोतैलम्। क्ली। गोवसायां। भैष. क्षुद्ररो. चि.।

गोत्रम्। क्ली। कुले। गव्ये। विका.। शरीरे। क्षेत्रे। वै. निघ.।

गोत्रद्रुमः (पुष्पः, कः)(विटपो)(वृक्षः)। पुं। धन्वनवृक्षे। भा.। वै. निघ.।

गोत्रभृत्। पुं। पर्व्वते। रा. नि. व. २।

गोत्रवृक्षः। पुं। गोवृक्षे। हे.।

गोत्रेष्टम्। क्ली। शीषके।

गोदः। पुं। मस्तकमध्ये हे, मस्तिष्के। हे. च.।

गोदधि। क्ली। गव्यदधनि। See गव्यदधि।

गोदन्तम्। क्ली, पुं। हरितालं। रा.नि. व. १३। तन्नामकहरितालविशेषे। गोदन्त हरितालं। भैष. ज्व. चि. कालाग्निभै. रसे।

गोदन्ता। स्त्री। दारुसीचभेदे। दार्मुज। प. मु.। तन्नामकहरितालं। भैष. स्त्रीरो. चि. शुक्रद्रावके।

गोदावरी। स्त्री। विन्ध्यस्थ दक्षिणप्रस्थितभारतीयनद्याम्। तत्पर्य्यायः,—गोदा, तपनी (हे.), गौतमसम्भवा, ब्राह्मद्रिजाता, गौतमी। तज्जलगुणाः—पित्तरोगहरं रक्तदोषहरं वातहरं पथ्यम् अतिदीपनं पापघ्नं कुष्ठादिदुष्टरोगघ्नं तृष्णाहरञ्च। रा. नि. व. १४।

गोदुग्धम्। क्ली। गोक्षीरे। गाईदूध। तत्प्रशस्तता—"निर्वत्साबालवत्साया: पयो दोषलमोरितं। वल्येकवर्णयोः शस्तं धवलीकृष्णयोरपि। इक्ष्वादा माषपर्ण्यादा ऊर्द्धशृङ्गी च या भवेत्। तासां गवां हितक्षीरम्।" राज ३प.। गुणाः—पथ्यं अतिरूक्षं स्वादु स्निग्धं वातपित्तरोगघ्नं कान्तिकरं प्रज्ञाजनकं बुद्धिमेधाङ्गपुष्टिदं वीर्य्यवर्द्धकञ्च। रा. नि. व. १५। "गव्यं पवित्रञ्च रसायनञ्च पथ्यञ्च हृद्यं बलपुष्टिदं स्यात्। आयुःप्रदं रक्तविकारपित्तविदोषहृद्रोगविषापहं स्यात्॥" अत्रि. ८अ.। गोदुग्धग्रहणकालनिर्णयः—"गव्यं प्रलूषसि क्षीरं गुरु विष्टम्भि दुर्ज्जरं। तस्मादभ्युदिते सूर्य्ये यामं यामार्द्धमेव वा। समुत्तार्य्य ततो ग्राह्यं तत्पथ्यं दीपनं लघु॥" राज. ३प.।

गोदुग्धदा। स्त्री। चणिकाख्यतृणे। रा.नि.व. ८।

गोदुग्धा। स्त्री। गोड्डुम्बायाम्। राजगोभक। इन्द्रवारुणीलतायाम्। चिर्भटिकायाम्। वै. निघ.।

गोद्रवः। पुं। गोमूत्रे। रा. नि. व. १५।

गोधजः। पुं। गोधायाम्। वै. निघ.।

गोधनः। पुं। स्थूलाग्रवाणे। हरिव.।

गोधना। स्त्री। ऋद्धौषधौ। वै. निघ.।

गोधा। स्त्री। स्वनामख्यातजन्तुविशेषे। गोसाप। हिं गोही। तत्पर्य्यायः,—गोधिः, निहिका, गोधिका (अ.), दारुमुख्याह्वा। सा द्विधा जलजस्थलजभेदात्। अस्या मांसगुणाः—वातकासश्वासनाशित्वम्। रा. नि. व. १७। पाकमधुरत्वं कषायत्वं कटुत्वं पित्तघ्नत्वं रक्तशुक्रबलकरत्वञ्च। राज. ३प.। "रक्तपित्तहरा ह्रद्या स्निग्धा मधुरशीतला। श्वासकासहरा प्रोक्ता गोधा चार्शोहिता तथा॥" अवि. २० अ.। च. सू. २अ.। वटपत्रीपाषाणभेदे। वै. निघ.। मनःशिलायाम्। भा.।

गोधाकारा। स्त्री। काष्ठगोधा-नामौषधिविशेषे। मे.।

गोधाख्यः। पुं। गोधासर्पे। गोधासदृश-सर्पभेदे। चर.।

गोधाङ्घ्रिः। स्त्री। गोधापद्याम्। भ.।

गोधापदिका (दी)। स्त्री। (Vitis pedate. Syn. Cissus pedatus.) हंसपद्याम्। गोयालेलता। तें हंसपादिचेट्टु। तत्पर्य्यायः,—सुवहा (अ.), हंसपदी, गोधाङ्घ्रिः, विफला (भ.), विपदी, मधुस्रवा, हंसपादी (र), गोधापदिका (शब्दर), चिदला, हंसवती, (ज.), चित्रपदा (शब्दमा.), कीटमाता (भा.), हंसपादिका, हंसाङ्घ्रिः, रक्तपादी, त्रिपदा, घृतमण्डलिका, विश्वग्रन्थिः, त्रिपदिका, त्रिपादी, कीटमारी, कर्णाटी, ताम्रपादी, विक्रान्ता, ब्रह्मादनी, पदाङ्गी, शीताङ्गी, सूतपादिका, सञ्चारिणी, पदिका, प्रह्लादी, कीटपादिका, धार्त्तराष्ट्रपदी, गोधापदिका। गुणाः—कटुरुष्णा विषघ्नी भूतघ्नी भ्रान्तिघ्नी अपस्मारहरी रसायनी च। रा.नि.व.५। र. चि. हृह. पानीयभक्तगुड्याम्। "हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान्। विसर्पदाहतीसारलूताभूताग्निरोहिणीः॥" भा.। तालमूल्याम्। रा. नि. व. ७। रक्तलज्जालुकायाम्। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोधामांसम्। क्ली। गोधाया मांसे। गोसापेर मांस। See गोधा।

गोधावती। स्त्री। वटपत्रीनामपाषाणभेदविशेषे। वै. निघ.। गोधापद्याम्। गोग्रालै। च. द.।

गोधावल्ली। स्त्री। हंसपदीलतायाम्। प. मु.।

गोधासुतः। पुं। गौधेरके। अयं चतुष्पात्। वा. उ. ३६ अ.।

गोधास्कन्दः (न्धः)। पुं। अरिमेदवृक्षे। विट्खदिर। रा. नि. व. ८।

गोधिः। पुं। ललाटे। रा. नि. व. १८। गोधायाम्। श. र.।

गोधिका। स्त्री। गोधायाम्। अम.।

गोधिकात्मजः (सुतः)। पुं। गोधाग्निगुवदाकारकीटरन्ध्रस्थलगोधायाम्। सा. सु.।

गोधिकासूदनः। पुं। गौधेरके। जलगोधा। वै. निघ.।

गोधिनी। स्त्री। घविकानामवृहत्याम्। रा. नि. व. ४।

गोधु(धू)मः। पुं। (Triticum vulgare.) Common wheat, स्वनामख्यातशूकधान्ये। गम्। हिं गेँहु। तें गोधुमलु। तत्पर्य्यायः,—सुमनः (अ.), गोधूमः (श.), बहुदुग्धः, अपूपः, स्निग्धभोजनः निस्तुषचौरः, रसालः, सुमनाः। स त्रिधा—महागोधूम - मधूली - निःशूकभेदेन। "महागोधूम इत्याख्यः पश्चाद्दीर्घात्समागतः। मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा। निःशूकी दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः॥" मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः। शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः॥" भा. पू. १भ. धान्यव.। गुणाः—द्रव्यः शीतो गुरुः स्निग्धः जीवनः वातपित्तघ्नः सन्धानकारी मधुरः स्थैर्य्यकृत् सरश्च। वा. सू.। मधुरो गुरुर्विष्टम्भी द्रव्यो बल्योऽथ बृंहणः। ईषत्कषायमधुरो गोधूमः स्वादुशीतलः। जीवनो बृंहणो द्रव्यः स्निग्धस्थैर्य्यकरो गुरुः॥ च. सू. २७ अ.। पित्तदाहक्लमत् श्लेष्मामजनकः रुचिकरश्च। रा. नि. व. १६। तत्कालिकगुणाः—"सन्दीपनं शूलहरं रुचिप्रदं गोधूमजातं क्षुधितं कषायं। सन्दीपणं स्याज्जरणं कफघ्नं समीरदोषं हरते ततोऽपि। पीतं जरयते चामं वाह्यदाह्यश्रमापहं। स्याच्च तत् कुष्ठकण्डूघ्नं तैलयुक्तं समीरजित्॥" अवि. ११ अ.।

गोधूमकः। पुं। राजिमत्सर्पविशेषे। सु. कल्प. ४ अ.। See सर्पः।

गोधूमचूर्णम्। क्ली। चूर्णीकृतगोधूमे। मयदा। गोधूमगुणम्।

गोधूमजः। पुं। तवक्षीरे। वै. निघ.।

गोधूमफलम्। क्ली। गोधूमे। वै. निघ.।

गोधूममण्डः। पुं, क्ली। गोधूमकृतमण्डे। गमेर मण्ड। गुणाः—"तद्वद्गोधूमसम्भूतं मधुरं पित्तवारणम्।" अवि. १२ अ.।

गोधूमसम्भवम्। क्ली। सौवीरकाञ्जिके। रा. नि. व. १५।

गोधूमसारः। पुं। गोधूमसमध्यस्थसारभागे। गमेर पालो। तन्निष्काशनविधिर्यथा—"निस्तुषगोधूमसुदूखले कण्डयित्वा षोड़शांशैर्जलैस्तं भाजने रात्रौ स्थापयेत्, प्रभाते उपरिस्थं जलं क्रमेण त्यक्त्वा, नीचस्थं सारं रौद्रेण शोषयेत्। पाकराज.।

गोधूमसौवीरम्। क्ली। गोधूमजातकाञ्जिके। वै. निघ.।

गोधूमचौरिका। स्त्री। गोधूमपायसे। गुजिर पायस। गुणाः—"गोधूमपायसो बल्यः कफमेदकरो गुरुः। शीतलः पित्तशमनो वातक्षुक्लवर्द्धनः॥" वैद्यकम्।

गोधूमाद्यघृतम्। क्ली। रसायनाधिकारे। घृतं ४ श. दुग्धं १६ श. क्वाथार्थं—गोधूमः १०० प. वारि ३२ श. शे. ८ श.। कल्कार्थं—गोधूमः सुञ्जाफलं (अभावे तालमस्तकं) माषकलायः द्राक्षा परूषफलं काकोली क्षीरकाकोली जीवन्ती शतमूली अश्वगन्धा पिण्डीखर्জ্জूरं मधूकफलं (মউল) त्रिकटु शर्करा भल्लातकं (अभावे रक्तचन्दनं) आत्मगुप्ताफलं मूलं वा (আলাকুশী) एषां प्रति ३॥० तो. ४॥० र.। प्रक्षेपद्रव्यं—गुड़त्वक् एला पिप्पली धान्यकं कर्पूरं नागकेशरं एषां प्रति १०॥/१० तो. शर्करा ८ प. मधु ८ प. इक्षुकाण्डेन आलोड़येत्। मात्रा १—२ प. च. द.।

गोधूमिका (मी)। स्त्री। गोलोमिकायाम्। रा. नि. व. ५।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोधूलिः (लो)। स्त्री। सूर्य्यास्तवेलायाम्।

गोधेरकः। पुं। गौधेरके। वै. च.। सर्पो गोधेरको नाम गोधाखः स्याच्चतुष्पदः। कृष्णसर्पेण तुल्यः स्यान्नाना सुर्भिरजातयः॥ चर.।

गोनन्दी। स्त्री। सारसपक्षिणि। हारा।

गोनर्दम्। क्ली। कैवर्त्तमुस्तके। मे.। परिपेल्लवृणे। रा. नि. व. ८। पुं। तन्नामकपक्षिणि। मे.। च. सू. २७ अ।

गोनाड़ीचः। पुं। चञ्चुशाके।

गोनाथः। पुं। वृषे। रा.।

गोन(ना)सः। पुं, क्ली। वैक्रान्तसर्पौ। रा. नि. व. १३। तन्नामकसर्पे। मण्डलीबोड्रे। बोड़ा साप, मण्डली बोड़ा। विक्रमादित्यः। तत्पर्य्यायः,—तिनित्सः (अ.), गोनासः, घोनसः (हे.), मण्डलीबोड्रः (के.), बोड्रः (शब्दर.)। मण्डलिसर्पे। गोखुरा साप। इति केचित्।

गोनसी। स्त्री। महौषधिविशेषे। तदाकृतिलक्षणं यथा,—द्विपर्णिनीं सूलभवामरुणां कृष्णमण्डलां। द्वारन्निमावां जानीयात् गोनसीं गोनसाकृतिम्। सा तु अम्बुदा समे देशे बहुलं दृश्यते। सुश्रु.। See ओषधिः।

गोनिष्यन्दः (नीरं)। पुं, क्ली। गोमूत्रे। रा. नि. व. १५।

गोपः (कः)। पुं। वणिग्द्रव्यभेदे, रक्तबोले। अम.। शारिवायाम्। वै. निघ.। सारजवर्गौषधे नरसारे। निशादल। भ. र.। चि.। उपकारके। भ. च.।

गोपकन्या। स्त्री। काष्ठसारिवायाम्। रा. नि. व. १२। श्वेतसारिवायाम्। भा. पू. १भ.। वा. उ. ३७अ., चि. २अ.।

गोपकर्कटिका। स्त्री। गोपालकर्कटिलतायाम्। कुन्दूरु, मीठाँकाँकुड़। रा. नि. व. ३।

गोपकोलिः। पुं। कर्कन्धौ। शेग्राकूल। "गोपकोलि गौणघण्टा वदरं वदरीत्यपि।" द्रव्याभि.।

गोपघण्टा। स्त्री। गोपघीण्टायाम्। वै. निघ.।

गोपघाती। स्त्री। विकङ्कतवृक्षे। हस्तिकोलिनाम वदरीविशेषे। रा.।

गोपघोण्टा (ण्टिका)। स्त्री। विकङ्कतवृक्षे। वैईची गाछ। रा. नि. व. ९। कर्कीन्धाम्। शेग्राकूल। जांबकोली। भ. र. मु. सू. ३८अ.। पूगभेदे। सु. चि. ८अ.।

गोपतिः। पुं। ऋषभकौषधौ। रा. नि. व. ५। वृषे। मे.।

गोपदलः। पुं। गुवाकवृक्षे। त्रिका.।

गोपनम्। क्ली। तेजपत्रे। ग्रन्थिपर्णे। वै. निघ.।

गोपपत्नी। स्त्री। शारिवायाम्।

गोपबधूः। स्त्री। शारिवायाम्, कृष्णशारिवायाम्। भा. पू. १भ.।

गोपभद्रम्। क्ली। शालूके। भ. च.।

गोपभद्रा (द्रिका)। स्त्री। गाम्भारीवृक्षे। गांभार गाछ। प. मु.।

गोपयः (स्)। क्ली। गोदुग्धे।

गोपरसः। पुं। बोले। निशादल। भ. र.।

गोपवल्लिः (ल्ली)। स्त्री। मूर्व्वायाम्। अनन्तायाम्। अनन्तमूल। प. मु.। श्यामालतायाम्। रा. नि. व. ११।

गोपसुता। स्त्री। सारिवायाम्। वा. सू. १५अ.।

गोपा (पी)। स्त्री। श्यामालतायाम्। भैष. कुष्ठ. चि. महाभल्लातगुड़े। अनन्तायाम्। प. मु.। काष्ठशारिवायाम्। रा. नि. व. १२

गोपाङ्गना। स्त्री। श्वेतशारिवायाम्।

गोपानीयम्। क्ली। गोमूत्रे। वै. निघ.।

गोपालकर्कटिका (टी)। स्त्री। स्वनामख्यातारण्यकर्कटीलतायां। कुन्दरुकी, केकड़ा। हिं गोरुभा, गोयालकाँकड़ी। तत्पर्य्यायः,—वन्या, गोपकर्कटिका, क्षुद्रेर्व्वारुः, क्षुद्रफला, गोपाली, क्षुद्रचिर्भिटा। गुणाः—शीतला मधुरा पित्तघ्नी मूत्रकृच्छ्राश्मरीमेहदाहशोषघ्नी च। रा. नि. व. ३।

गोपालप(पु)त्रिका। स्त्री। चिर्भिटायाम्। "गोपालपत्रिकामूलम्।" वै. निघ. २भ. विषमज्व. चि.।

गोपालिका। स्त्री। इन्द्रगोपकीटभेदे। हे. च.। शारिवायाम्।

गोपाली। स्त्री। गोरक्षीनाममहाक्षुपे। गोरक्ष-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चाकुले। रा. नि. व. ५। गोपालकर्कटीलतायाम्। रा. नि. व. ३।

गोपिका। स्त्री। कृष्णशारिवायाम्। वै. निघ.।

गोपित्तम्। क्ली। गोरीचनायाम्। प. मु.।

गोपित्तजा। स्त्री। गोरीचनायाम्। वै. निघ.।

गोपिनी। स्त्री। श्यामालतायाम्। भ. च.।

गोपीचन्दनम्। क्ली। सौराष्ट्रमृत्तिकायाम्। शुभ्रमृत्तिकायाम्। वै. निघ.।

गोपीजलः। पुं। गुल्माधिकारे रसः। "जैपालाष्टौ द्विको गन्धः शुण्ठीमरिचचित्रकं। एकः सूतः ससौभाग्यः गोपीजल इति स्मृतः॥" र.सा.सं.।

गोपीभद्रा। स्त्री। शारिवायाम्।

गोपीवल्लभः। पुं। प्रवाले। पलां। प. मु.।

गोपुच्छः। पुं। वानरविशेषे। गवां लाङ्गूले। वै. निघ.। हारभेदे।

गोपुटः। पुं। क्षुद्रमुस्तायाम्। वै. निघ.।

गोपुटा (टी)। स्त्री। स्थूलैलायाम्। बड़ एलाच। रा. नि. व. ६।

गोपुरम्। क्ली। कैवर्त्तमुस्तके। मे.।

गोपुरकः। पुं। कुन्दुरौ। कुन्दूरुखोटी। रा. नि. व. १२।

गोपुरीषम्। क्ली। गोमये। रा. नि. व. १५।

गोपुष्टम्। क्ली। पचिपेक्षत्रणे। रा. नि. व. ८।

गोप्रियम्। क्ली। पलाले। पोयाल खड़। वै. निघ.। पुं। वृषे।

गोप्रेरकः। पुं। पचिविशेषे। कालवट इति महाराष्ट्रे। वै. निघ.।

गोफणा। स्त्री। यन्त्रभेदे, फिङ्गा इति लोके, यथा पाषाणगुड़िका दूरे क्षिप्यन्ते। तदाकारे चिबुकनासौष्ठादिगत-व्रणबन्धनविशेषे। सु. सू. १८ अ.। चि. २अ.। वा. चि. ९ अ.। "पाषाणगुड़िकोत्क्षेपकारिणीं गोफणां विदुः।" इति।

गोबन्धना (नी)। स्त्री। गोवल्लाम्, पीतपुष्पदण्डोत्पलायाम्। डानकुनी। र. मा.।

गोबल्यः। पुं। श्वेतयावनाले। वै. निघ.।

गोबालधी। स्त्री। चमरीमृगे। हे. निघ.।

गोभण्डीरः। पुं। जलकुक्कुभपक्षिणि। त्रिका.।

गोभिरामा। स्त्री। रामतरण्याम्। वै. निघ.।

गोभी। स्त्री। गोजिह्वायाम्। वै. निघ.।

गोमतम्। क्ली। रक्तवोले। वै. निघ.।

गोमतल्लिका। स्त्री। सुशीलायां गवि; गोश्रेष्ठे। हला.।

गोमती। स्त्री। गोरीचनायाम्। वै. निघ. कनकतैले। खनामख्यातनदीभेदे।

गोमत्स्यः। पुं। नादेयगोमीने। See मत्स्यः।

गोमन्तः। पुं। पर्व्वतभेदे। ज.।

गोमन्दरः। पुं। पारिभद्रजातीय-वृक्षभेदे।

गोमयः। पुं, क्ली। गोशकृति। गोबर। रा. नि. व. १५। तत्पर्य्यायः,—गोविट् (अ.), गोक्षतं, भूमिलेपनं (ग.), जगलं, गोहृन्, गोशकृत् (र.), गोपुरीषं, गोविष्ठा, गोमलम्। रा.।

गोमयचूर्णीयः। वि। गोमयचूर्णमधिकृत्य कृते चरकीयाध्याये। च. इन्द्रिय. १२ अ.।

गोमयच्छत्रम्। क्ली। करके। कौंड़कछाता। त्रिका.। तत्पर्य्यायः,—शिखीरं, शिखीस्रुक्कं (हा.), उच्छिलीन्ध्रं (के.)।

गोमयच्छत्रिका। स्त्री। गोमयच्छत्रे। हारा.।

गोमयतैलम्। क्ली। नेचरोगे तिमिरे च तैलम्। "गवां शकृत्क्वाथविपक्वमुत्तमं हितञ्च तैलं तिमिरेषु नस्यतः।" तिल तैल १ श. गोमयरस १ श.। भैष.।

गोमयप्रियम्। क्ली। भूतृणे। गन्धखड़। र. मा.। बालके। बाला। वै. निघ.।

गोमयाद्यघृतम्। क्ली। तिमिराख्यनेत्ररोगे घृतम्। पाठः—"गवां शकृत्क्वाथविपक्वमुत्तमं हितञ्च तैलं तिमिरेषु नस्यतः। घृतं हितं केवलमेव पैत्तिके छागाजाविकं यन्मधुरैर्विपाचितम्॥" छागघृत ४श. गोमयरस ४श. कल्कार्थ काकोली, क्षीरकाकोली, जीवक, ऋषभक, मुद्गपर्णी, माषाणी, मेदा, महामेदा, गुलञ्च, काँकड़ाशृङ्गी, वंशलोचन, पद्मकाष्ठ, पुण्डरिया, ऋद्धि, वृद्धि, किस्मिस्, जीवन्ती, यष्टिमधु मिलित १ श. जल १६ श.। रस. र.।

गोमयोत्था। स्त्री। गोमयजातकीटे। गुबरे पोका। हे. च.। तत्पर्य्यायः,—गईभी। हे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोमयोद्भवः। पुं। आरग्वधे। भ्र. च.।

गोमयोपलम्। क्ली। करीषे। वनघुँटे वा विलघुँटे।

गोमरी। स्त्री। वार्त्ताकुभेदे। राजनिघण्टु।

गोमर्दः। पुं। सारसपक्षिणि। त्रिका.।

गोमलम्। क्ली। गोमये। रा. नि. व. १५।

गोमक्षिका। स्त्री। मक्षिकाविशेषे। डाँश-गाछी। भ. र.।

गोमांसम्। क्ली। गोभवमांसे। गोरुर मास। तच्च पवित्रं गुरु वात-कफजनकञ्च। रा. नि. व. १७। "गव्यं पवित्रमायुष्यं श्रमघ्नमनिलापहम्।" राज. ३प.। "गव्यं केवलवातेषु पौनर्भे विषमज्वरे। शुष्ककासश्रमात्यग्निमांसक्षयहितञ्च यत्॥" च. सू. २७ अ.। "कासश्वासप्रतिश्यायविषमज्वरनाशनं। श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम्॥" सु. सू. ४६ अ.।

गोमायुः। पुं। शृगाले। शेयाल। प. मु.। (युस्) क्ली। वंशलोचनायाम्। वै. निघ.।

गोमाक्षी। स्त्री। कर्णस्फोटायाम्। वै. निघ.।

गोमी (न्) । पुं। शृगाले। मे.।

गोमीनः। पुं। मत्स्यविशेषे।

गोमुखः। पुं। नक्रे। हे. च.। क्ली। लेपने। त्रिका.।

गोमूत्रम्। क्ली। गोजले। चोना। तत्पर्य्यायः,—गोजलं, गोऽम्भः, गोनिष्यन्दः, गोद्रवः। गुणाः—कटु तिक्तम् उष्णं कफ-वातहरं लघु पित्तकरं दीपनं त्वग्दोषहरं मेध्यञ्च। रा. नि. व. १५।

गोमूत्रवीजकः। पुं। रक्तवीजासनवृक्षे। रा. नि. व. ९।

गोमूत्राभः। पुं। मन्दविषवृश्चिकभेदे। सु. कल्प. ८अ.।

गोमूत्रिका। स्त्री। स्वनामख्यातलते। तांवड़, गोढ़वि इति पश्चिमदेशे। तत्पर्य्यायः,—रक्ततृणा, क्षेत्रजा, कृष्णभूमिजा। गुणाः—मधुरा वृष्या गोदुग्धदा। रा. नि. व. ८।

गोमूत्री। स्त्री। रक्तकुलत्थिकायाम्। वै. निघ.।

गोमेदः (कः)। पुं। स्वनामख्यातोपरत्नविशेषे, लोहितमणौ। गोमेद। वै. निघ. २भ. चक्र. चि. नवरत्नराजमृगाङ्के। सु. नि. ३अ.। तत्पर्य्यायः,—गोमेदः, पीतरत्नकं (रा.) बाहुरत्नं तमोमणिः, स्वर्भानवः, पिङ्गस्फटिकः। गुणाः—अस्य उष्णः वातकोपहरः दीपनः पाचनः धारणे पापघ्नश्च। रा. नि. व. १३। See माणिक्यम्। क्ली। तेजपत्रे। भा. ब्रह्मखण्डे। "पत्रं दलाह्वयं वासी गोमेदं वसनाह्वयम्।" धन्वन्तरिः।

गोमेदसन्निभा। स्त्री। दुग्धपाषाणे। फूल-खड़ि। प. मु.।

गोमोटी। स्त्री। वृक्षभेदे।

गोऽम्बु (म्भः)। क्ली। गोमूत्रे। रा. नि. व. १५।

गोरकः। पुं। विषधरसर्पविशेषे। अमि. २ स्थान।

गोरङ्गुः। पुं। जलकुक्कुटे। पानकौड़ि। मे.।

गोरटः। पुं। विट्खदिरवृक्षे। रा. नि. व. ८।

गोरण्टकः। पुं। कीङ्गणदेशप्रसिद्धविकण्टक-वृक्षे। रा. नि. व. ११।

गोरण्डी। स्त्री। गोधापदीलतायाम्।

गोरमा। स्त्री। गोप्रियतृणविशेषे। गन्धखड़।

गोरसः। पुं। दुग्धे। चतुर्थांशजलतक्रे। पाद-जल घोल। दधनि। हे. च.।

गोरसजम्। क्ली। पादजलेन विभागदधिकृते तक्रे। रा. नि. व. १५।

गोरक्षः। पुं। ऋषभकौषधौ। रा. नि. व. ५। नागरङ्गवृक्षे। मे.।

गोरक्षकर्कटी। स्त्री। इन्द्रवारुण्याम्। राखाल-शसा। चिर्भटिकायाम्। काँकुड़। भा.।

गोरक्षजम्बूः। स्त्री। घोण्टाबदरीवृक्षे। शेया-कुल। जटा.। बलायाम्। वै. निघ.। गोधूमे। गोरक्षतण्डुलायाम्। विश्व.।

गोरक्षतण्डुला। स्त्री। (Hedysarum lagopodioides.) नागबलायाम्। गोरक्ष-चाकुलिया। प. मु.।

गोरक्षतुम्बी। स्त्री। स्वनामख्यातफलशाक-विशेषे। कुष्मतुम्ब्याम्। गोरखतुम्बी, गोरखदुद्धिके इति च देशविशेषख्याते। गोल लाउ। गुणाः—मधुरा शीतला पित्तघ्ना गुरु सन्तर्पणी रुच्या वीर्य्य-पुष्टिबलदा। रा. नि. व. ७।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोरक्षदुग्धा (ग्धी)। स्त्री। गोरक्षीनामक्षुद्रक्षुपे। तत्पर्य्यायः,—गोरक्षी, क्षीरदुग्धा, रसायनी, बहुपत्री, अमृता, जीवा, अमृतस्रवा जीवनी। गुणाः—मधुरा शीतला वृष्या वश्यकरी संग्राहिणी रसे सिद्धिदा। रा. नि. व. ५।

गोरक्षी। स्त्री। स्वनामख्यातमहाक्षुपे। तन्नाम्नैव मालवदेशे प्रसिद्धा। तत्पर्य्यायः,—सर्पदण्डी, दीर्घदण्डी, सुदन्तिका, चिचला, गन्धबहुला, गोपाली, पक्षपर्णिका। गुणाः—मधुरा तिक्ता शीता दाह-पित्तघ्नी विस्फोट-वान्ति-ज्वरातीसारघ्नी च। रा. नि. व. ५। ऋषभके। कुम्भतुम्ब्याम्। रा. नि. व. ७। गोरक्षदुग्धायाम्। रा. नि. व. ५।

गोराङ्गीः। स्त्री। गोधापदी-लतायाम्।

गोराटी (ट्टिका) (टिका)। स्त्री। शारिका-पक्षिणि। शालिक पाखी। हे. च.। रा. नि. व. १९।

गोरुची। स्त्री। गोरोचनायाम्। वै. निघ.।

गोरोचम्। क्ली। हरितालें। रा. नि. व. १३।

गोरोचनम् (ना)। क्ली, स्त्री। स्वनामख्यातसारजवर्गीयद्रव्ये। तत्पर्य्यायः,—वन्दनीया (वि.), वन्द्या, रोचना (भा.), रुचिः, शोभा, रुचिरा, शोभना, शुभा, गौरी, रोचनी, पिङ्गा, मङ्गल्या, मङ्गला, शिवा, पीता, गौतमी, गव्या, चन्दनीया, काञ्चनी, मेध्या, मनोरमा, श्यामा, रामा। सा च न गोसाधारणहृदयाधारा गोविशेषेषु कदाचित् लभ्यते। प. सु.। गोमस्तकस्थ-शुष्कपित्तमिति साधवः। गोमूत्रनिर्म्मितमिति केचित्। गुणाः—शीतला विषदोषघ्नी रुच्या पाचनी कृमिकुष्ठघ्नी भूतग्रहशान्तिकरी शृङ्गारमङ्गलकरी जनमोहनी च। रा. नि. व. १२। "गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा। विषालक्ष्मीग्रहोन्मादगर्भस्रावत्वतास्रहृत्॥" भा.। वै. निघ. २भ. सर्व्वज्व. चि. गोरोचनादिचूर्ण.।

गोर्दम्। क्ली। शिरोमले। मस्तिष्के। माथार घि। अम.।

गोलः। पुं। सुमन्त्रवीले। गंधबोल। जटा.। मदनवृक्षे। र. मा.। मणौ। विका.।

गोलकः। पुं। कालशुष्कवृक्षे। घण्टापारुल। मणौ। विका.। रक्तसुगन्धवीले। र. मा.। कलाये। मटर। श. च.। गुड़े। हे. च.। सुगन्धरोहिषतृणे। वै. निघ.। पिण्डे। हे. च.।

गोलफलः। पुं। मदनवृक्षे। मयना गाछ। रा. नि. व. ८।

गोलवत्। क्ली। पुष्पप्रियङ्गौ। हिं फुलप्रियङ्गु। वै. निघ.।

गोला। स्त्री। मनःशिलायाम्। मे.।

गोलाङ्गूलः। पुं। कपौ। मुखपोड़ा। त्रिका.।

गोलासः। पुं। गोमयच्छचके। कोड़कछाता। हारा.।

गोलिका। स्त्री। घोण्टायाम्। शेयाकुल। रा. नि. व. ८।

गोलिहः (लोढः)। पुं। कालशुष्कवृक्षे। घण्टापारुल। अम.।

गोली। स्त्री। गोजिह्वायाम्। गोजिया। वै. निघ.।

गोलोमिका (मी)। स्त्री। (Corydalis govaniana). स्वनामख्यातमहाक्षुपे। गंधबल। हिं पाथरी। इटगिरे। तत्पर्य्यायः,—गोधूमी, गोजा, क्रोष्टुकपुच्छिका, गोलोमी, गोसम्भवा, प्रस्तरिणी। गुणाः—कटुः तिक्ता हिमा त्रिदोषघ्नी मूलदीपामदोषघ्नी दीपनी ग्राहिणी च। रा. नि. व. ५। वचायाम्। रा. नि. व. ३। श्वेतदूर्व्वायाम्। रा. नि. व. ८। भा. स्वन्दापस्मा. चि.। भूतकेश्याम्। भूँइकेश। "अनलकेशी च गोलोमी भूतकेशी च केश्यपि। द्रव्याभि.। प. सु. च. सू. ४अ.। महौषधिविशेषे। See ओषधिः। नीलदूर्व्वायाम्। जटामांस्याम्। अर्कर्कारायाम्। वै. निघ.।

गोल्यः। पुं। कशेरौ।

गोवत्सादी (न्)। पुं। वृके।

गोवत्सारिः। पुं। ईहामृगे। घोंग। रा. नि. व. १९।

गोवन्दनी। स्त्री। प्रियङ्गुवृक्षे। अम.। पीतदण्डीत्यलायाम्। पीत डानकुनी। र. मा.।

गोवरम्। क्ली। गोखुरत्वक्षगोष्ठस्थशुष्कगोमयचूर्णे। "गोष्ठान्तर्गोखुरत्वक्षशुष्कं गोमयचूर्णितं। गोवरं तत् समाख्यातं वरिष्टं रससाधने॥" भा.।

गोवरपुटम्। क्ली। औषधस्य पुटविशेषे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं चूर्णितगोमयम्। गोवरं तत्समाख्यातं वरिष्ठं रससाधने। वृहद्गाण्डस्थितैर्यत्र गोवरैर्दीयते पुटम्। तद्गोवरपुटम्प्रोक्तं भिषग्भिः सूतभस्मनि॥" भा.।

गोवर्णी। स्त्री। अश्वगन्धायाम्। वै. निघ.।

गोवशा। स्त्री। वन्ध्यायां गवि। वै. निघ.।

गोवारि। क्ली। गोमूत्रे। वा. उ. ३६ अ.।

गोविट् (ष्ठा)। स्त्री। गोमये। अम.। रा.।

गोविन्दः। पुं। गोमिदमणौ। वै. निघ.।

गोविन्दिनी। स्त्री। प्रियङ्गौ। रा. नि. व. १२।

गोविराटी। स्त्री। शारिकापक्षिणि। वै. निघ.।

गोविषाणाह्वा। स्त्री। वब्बूलवृक्षे। बाव्‌ला गाछ। वै. निघ. हिक्का. चि. धूमे.।

गोविष्ठा। स्त्री। गोमये। रा. नि. व. १५।

गोवृद्धः। पुं। वलीवर्दे।

गोवृषः। पुं। वृषे। अ. र.।

गोवेष्टम्। क्ली। शीधके। शीधा। प. सु.।

गोशकृत्। क्ली। गोमये। जटा.।

गोशाड्वलः। पुं। ग्रन्थिपर्ण्याम्। गেঁটেলা। वै. निघ.।

गोशालम्। क्ली। गोगृहे।

गोशीर्षः (कः)। पुं। (र्षः) प. सु.। (कः) र. मा.। द्रोणपुष्पाम्। घलघसिया। क्ली। श्रीखण्डचन्दने। श्वेत चन्दन। प. सु.। गोमस्तके। चन्दने। रा. नि. व. १२।

गोशृङ्गः। पुं। वब्बूरकवृक्षे। बाव्‌ला गाछ। रा. नि. व. ८। वै. निघ. ग्रहणी. चि.। क्ली। गोशृङ्गे।

गोष्ठम्। क्ली। गोस्थाने। अ.।

गोष्ठकुक्कुटः (गोचरः)। पुं। भासपक्षिणि। काकविशेषे। वै. निघ.।

गोष्ठीश्वरः। पुं। उष्ट्रश्वरे। गज. वै.।

गोसः। पुं। रक्तगन्धवीरुधि। खून्‌खाराপী। मे.। प्रत्यूषसि। मे.।

गोसङ्गः (र्गः)। पुं। प्रभाते। हारा.। च. इन्द्रिय. ८ अ.।

गोसट्टकः। पुं। [illegible]। हे. च.।

गोसम्भवा। स्त्री। गोलोमिकायाम्। श्वेतदूर्वा। रा. नि. व. ५।

गोसटशः। पुं। रक्तवीरुधि। खून्‌खाराপী। अ. टी. रा.।

गोस्तना। स्त्री। द्राक्षायाम्। अ. टी. च. द. सि. यो. रक्त. पि. चि.। "पथ्याखर्ज्जूरगोस्तनाः।"

गोस्तनाकारा। स्त्री। मधुखर्ज्जूरीवृक्षे। वै. निघ.।

गोस्तनिका (नी)। स्त्री। द्राक्षायाम्। मनक्का। वै. निघ. २भ. पाण्डु. चि. आमलक्यवलेहे। गुणाः—वृष्या गुर्व्वी कफपित्तघ्नी च। भा.।

गोस्तनीभवः। पुं। द्राक्षासवे। द्राक्षार आसव। वै. निघ.।

गोस्ववः। पुं। अनामिकाङ्गुष्ठयुतकरविस्तारे। रा. नि. व. १८। गोमूत्रे। रा. नि. व. १५।

गोहन(न्न)म्। क्ली। गोमये। र. मा.।

गोहरीतकी। स्त्री। विल्ववृक्षे। प. सु.।

गोहला। स्त्री। गोधापदीलतायाम्।

गोहालिया। स्त्री। गोधापद्याम्। "पीतं गोहालियामूलं तिलदध्याज्यसंयुतम्। विबद्धमूत्रं कथितं प्रवर्त्तयति शङ्कर॥" गारु.।

गोहितः। पुं। घोषालतायाम्। विल्ववृक्षे। शा. च.।

गोहिरः। पुं। अधमजातीयाश्वे। नकुल.। क्ली। पादमूले। हे. च.।

गोह्वलः। पुं। गोशीर्षके। के.।

गोक्षीरः। पुं। गोक्षुरके। गোখ্‌রী। रा. नि. व. ४। क्ली। गोदुग्धे।

गोक्षुरः (कः)। पुं। (Zygophylleæ. Tribulus terestris. Syn. T. Lanuginosus.) स्वनामख्यातक्षुपे। গোখ্‌রী। क्षुद्रक्षुपविशेषे। हिं गोक्षुरमूल। उत्. गोखुरा। वेड़िलीसराटी। गोखरु इति च प्रसिद्धः। तत्पर्य्यायः;—त्रिकण्टः, स्थलशृङ्गाटः, गोकण्टः, त्रिकण्टकः, त्रिपुटः, कण्टकफलः, क्षुरः (र), गोक्षुरकः, पलङ्कषा, इक्षुगन्धा, शूदंष्ट्रा, स्वादुकण्टकः, गोकण्टकः, वनशृङ्गाटः (अ.), गोखुरिः (अ.), विकण्टकः (शब्दमा.), गोखुरः, त्रिकटः, त्रिकः, इक्षुरः,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शब्दर.), क्षुरकः, भल्लकण्टः, इक्षुगन्धिका (भा.), क्षुराङ्गः, श्वदंष्ट्रकः, कण्टकी, भद्रकण्टः, व्यालदंष्ट्रः, क्षुरकः, षड्ङ्गः, कण्ठी। स च महाक्षुद्रभेदाद्विधा। सा. गुणाः—शीतत्वं मधुरत्वं बल्यत्वं बृंहणत्वं कृच्छ्राश्मरीमेहविदाहघ्नत्वं रसायनत्वञ्च। "गोक्षुरः शीतलः स्वादुः बलकृद्वस्तिशोधनः। मधुरो दीपनो हृद्यः पुष्टिदश्चाश्मरीहरः। प्रमेहश्वासकासार्शः-कृच्छ्रहृद्रोग-वातनुत् ॥" भा.। चारगुणाः—"चारस्तु गोक्षुराणान्तु मधुरः शीतलो मतः। स्रोतोविशोधनश्चैव वातघ्नो हृद्य एव च ॥" वै. निघ.। तच्छाकगुणाः—तिक्तं हृद्यं स्रोतोविशोधनञ्च। राज. ३प.। बीजगुणाः—बीजं गोक्षुरकं शीतं मूत्रलं शीघ्रवारणम्। हृद्यमायुस्करं शुक्रमेहनुत् कृच्छ्रनाशनम् ॥ वै. निघ.।

गोक्षुरादिगणः। पुं। लौहसारकवर्गभेदे। यथा—गोक्षुरः क्षुरको व्याघ्री सिंहपुच्छी कुशिम्बिका। गोक्षुरादिरिति प्रोक्तो वातश्लेष्महरो गणः ॥" रस. च.।

गोक्षुराद्यघृतम्। क्ली। सूत्राघाते घृतम्। "धान्यगोक्षुरकक्वाथकल्कसिद्धं घृतं हितम्।" घृतं ४ श. क्वाथार्थं धन्याकं ४ प. गोक्षुरः ४ प.। घृत ४ श. क्वाथार्थं धने' २ श. जल १६ श. शे. ४ श. कल्कार्थं धने' ४ प. गोक्षुर ४ प.। भा. कौ.। अन्यत् राजयक्ष्मणि। गव्यघृतं ४ श. क्वाथार्थं दुरालभा गोक्षुरः शालपर्णी पृश्निपर्णी (चाकुले) मुद्गपर्णी माषपर्णी श्वेतवाह्यालकं चेक्षुपर्पटौ एषां प्र. १ प. जल ४० श. शे. ४ श.। कल्कार्थं शटी पुष्करमूलं पिप्पली बला भूम्यामलकी चिरायता इन्द्रयवः अनन्तमूलं एषां प्र. २ तो. दुग्धं ८ श.। च. चि. ८अ.।

गोक्षुरी। स्त्री। गोक्षुरे। गोखरी। रा. नि. व. ४।

गोक्षुरः (रिः)। पुं। गोक्षुरे। कंकलासे।

गोक्षो(क्ष्वे)ड़ः (कः)। पुं। गोनर्दपक्षिणि। सारस पाखी। सु. सू. ४६ अ.।

गौः। पुं, स्त्री। स्वनामख्यातपशौ। गरु। अम.। पुं। स्वर्गे। मे.। चण्डिकाहरणे। रा. नि. व. ८। ऋषभके। रा. नि. व. ५। क्ली। लोम्नि। अ. टी. भानु.। रश्मौ। वज्रे। मे.। चन्द्रे। सूर्ये। अ. टी.। स्त्री। नेत्रे। वाक्ये। रोहिण्याम्। जले। मे.। भूम्यौ। चिका.।

गौड़ः। पुं। गुड़विकारे। गुड़ेर गद। स. च. पाचनी दीपनश्च। सु.।

गौड़(र)वास्तुकः। पुं, क्ली। चिल्लीशाके। बृहत्पत्रवास्तुके। रा. नि. व. ७। लाल बेतो शाक। "तदेव तु बृहत्पत्रं रक्तं स्याद्गौरवास्तुकं।" भा. पू. १भ. शाकव.। See वास्तुकम्।

गौड़सीधुः। पुं। गुड़कृततीक्ष्णमद्ये। गुणाः—"कषायी मधुरः सीधुर्गौड़ः पाचनदीपनः।" सु. सू. ४५ अ.।

गौड़ारसः। पुं। शूले रसः। रससिन्दूरं ५ भ. गृतलौहं ५ भ. शतावरी आमलकी गुड़ूचीक्वाथे मर्द्दयेत्। रससिन्दूर ५ भ. गृतलौह ५ भ, शतावरी, आमलकी एवं गुड़ूचीकाथेर ७ दिन भावना दिबे। मात्रा ४ र.। अनुपान घृत ओ मधु। रस र.।

गौड़ासवः। पुं। गुड़कृतासवे। गुड़े' मद। गुणाः—सृष्टमूत्रशुक्रकृत् तर्पणो दीपनश्च। वा. टी. हेमाद्रिः। धातकीगुड़संयोगभेदे गौड़ः प्रकीर्त्तितः। तौड़ः द्रव्यगुणमाला।

गौड़िकम्। क्ली। गुड़कृतमद्यविशेषे। त्रि। गुड़संस्कृते। भा. उदावर्त्त. चि.।

गौड़ी। स्त्री। गुड़कृतमद्ये। तत्पर्य्यायः वाल्कली। विका.। धातकीरसगुड़ादिकृतताम्रमद्ये। गुणाः—तीक्ष्णा उष्णा मधुरा वातघ्नी पित्तजननी बलकरी पथ्या कान्तिजननी तर्पणी च। रा नि. व. १४। "गौड़ी कषाया मधुराम्लशीता सन्दीपनी शूलमलापहन्त्री। हृद्या विदीप्त श्रमशल्यजीर्णं पाण्ड्वामयार्शःश्वसनं निहन्ति ॥" अवि. १९ अ.।

गौणविम्बी। स्त्री। विम्बीभेदे। वै. निघ.।

गौणी। स्त्री। क्षीरिकाशाके। नुनियाशाक। प. मु। मनःशिलायाम्। र. सा. सं.।

गौण्यः। पुं। कर्णिकारे। केशुर।

गौत(त्त)मः। पुं। स्थावरविषभेदे। हे. च.।

गौतमी। स्त्री। गोरोचनायाम्। रा. नि. व. १२।

तण्डु(न्दु)लीयः (कः)। पुं, क्ली। विड़ङ्गे। मे.। (Amarantus(thus) spinosus or Amblogina polygonoides.)Prickly Amaranth. खनामख्यातपत्रशाकक्षुपे। वनतण्डुलीयके। काँटानटे, गोयाल नटे, क्षुद्रे नटे। हिं अल्पमरसा, चवड़ाइ। म तांदुलिजा। कं किरुकुप्पालि। दा. काट्टेमाट। ता. मुल्लुक्किरइ। तत्पर्यायः—अल्पमारीषः (अ.), तण्डुलीकः, तण्डुलः (शब्दर.), तण्डीरः, तण्डुली, तण्डुलीयकः, ग्रन्थिलः, बहुबीर्यः, मेघनादः, घनस्वनः, सुशाकः, पथ्यशाकः, स्फूर्ज्जथुः, स्वनितान्वयः, वीरः, तण्डुलनामा। गुणाः—शिशिरमधुरविषघ्नः रुचिकृद्दीपनः पित्तदाहभ्रमघ्नश्च। रा.नि.व.५। सृष्टमलमूत्रो विषहारकश्च। भा.पू.१भ.शाकव.। रसे मधुरः, वीर्य्ये शीतपाकी मधुरः, प्रभावय रक्तपित्तविषहरः। च.द.। 'मधुरो रसपाकाभ्यां रक्तपित्तमदापहः। तेषां शीततमो रुचमण्डुलीयो विषापहः॥' सु.सू.४६अ.। तन्मूलगुणाः—"तण्डुलीयकमूलं स्यादुष्णं श्लेष्मविनाशनं। रजोरोधकरं रक्तपित्तप्रदरसंहरम्॥" अचि.। विशेषतः शूलघ्नम्। तच्छाकगुणाः—हिमम् अग्निपित्तरक्तविषकासघ्नं ग्राहि मधुर द्राक्षशोषघ्नं रुच्यञ्च। रा.नि.व.७। "स्वादुपाकमसृक्पित्तविघ्नं तण्डुलीयकम्।" अवि.१६अ.।

तण्डु(न्दु)लीयका। स्त्री। विड़ङ्गायाम्। विड़ङ्ग। रा.नि.व.६।

तण्डुलीयदलम्। क्ली। तण्डुलीयशाके। रा.नि.व.७।

तण्डुलीयमूलम्। क्ली। तण्डुलीयकजटायां। काँटानटेर शिकड़। अमि.।

तण्डु(न्दु)लीवोजः। पुं। तण्डुलीयशाके। भा.पू.शाकव.।

तण्डुलीयशाकम्। क्ली। शाकभेदे। काँटानटियार शाक। रा.नि.व.७। सि.यो.र.पि.चि.।

तण्डुलुः। स्त्री। विड़ङ्गे। श.र.।

तण्डु(न्दु)लेरः (कः)। पुं। तण्डुलीयशाके। भा.पू.१भ.शाकव.।

तण्डु(न्दु)लोत्थ(दक)म्। क्ली। प्रक्षालिततण्डुलजले। चेलूनिर जल। तस्य विधिः—तण्डुलपलं कणशः क्षुत्वा चतुर्गुणजलेन क्षाल्यम्। प. प्र. १ख.। शीतकषायमानेन वा तण्डुलोदककल्पना इति केचित्। अष्टगुणजलमिति शार्ङ्ग.। "कुट्टितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत्। भावयित्वा जलं ग्राह्यम्।" "जलमष्टगुणं दत्त्वा पलं कण्डिततण्डुलात्। भावयित्वा ततो देयं तण्डुलोदककर्म्मणि।" तत्कालान्तरम्। गुणाः—कषायं मधुरं लघु संग्राहि विषच्छर्दितृष्णादाहनाशनम्। रा.नि.व.५। [श.च.।

तण्डुलीघः। पुं। वेष्टकवंशे। वेउड़ बाँश।

ततः। पुं। वायौ। वै.निघ.।

ततपत्री। स्त्री। कदलीवृक्षे। श.च। हिङ्पत्रीवृक्षे। के.। [निघ.।

तत्कालललवणम्। क्ली। सौवर्चललवणे। वै.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्पदः। पुं। अश्वत्थवृक्षे। वै.निघ.।

तत्फलः। पुं। श्वेतपद्मे। कुष्ठे। कुड़। चौरा-नामगन्धद्रव्ये। धरणिः। रोहिषतृणे। वै.निघ.।

तत्त्वम्। क्ली। परमात्मनि। स्वरूपे। वस्तुनि। विका.। चित्ते। धरणि.।

तद्रूप्यम्। क्ली। पातलदधनि। पातला दही। रा.नि.व.१५।

तद्विद्यसम्भाषा। स्त्री। विजिगीषुणा स्वर्द्धया सारोद्धारपूर्व्वं गुह्यार्थप्रकटने। च.वि.८अ.।

तनयः। पुं। पुत्रे। स्त्री। कन्यायाम्। कृष्ण-तुलस्याम्। श. च.। पृश्निपर्ण्याम्। हे. निघ.।

तनुः (नूः)। स्त्री। त्वचि। त्वक्। नार्य्याम्। मे.। शरीरे। रा.नि.व.१८। (स्) क्ली। शरीरे। त्रि। अल्पे। कृशे। मे.।

तनुकम्। क्ली। घातकीपुष्पे। विभीतके। त्वचि। दारुचिनि। वै.निघ.।

तनुकूपः। पुं। रोमकूपे। वै. निघ.।

तनुच्छायः। पुं। ज्वालावर्जूरकवृक्षे। क्षुद्रे बाव्ला। रा. नि. व. ८।

तनुता। स्त्री। क्षीणतायाम्।

तनुत्वक्। पुं। तेलाशारु इति ख्याते वृक्षे। प.मु.। सूक्ष्मत्वचि। दारुचिनि। वै. निघ.।

तनुत्वचा। स्त्री। क्षुद्राग्निमन्थे। छोट गणिरि। रा. नि. व. ९।

तनुपत्रः। पुं। इक्षुदीवृक्षे। रा. नि. व. ८। क्ली। वंशपत्रहरितालै। वै.निघ.

तनुभस्त्रा। स्त्री। नासिकायाम्। श.र.।

तनुरसः। पुं। स्वेदे। घाम। हारा.।

तनु(नू)रुट्(ह्म्)। क्ली। रोम्नि। केशे। श. र.। मे.।

तनुवोजः। पुं। राजबदरे। नारकूलेकुल। रा. नि. व. ११।

तनुव्रणः। पुं। वल्मीकनामरोगे। श.र.।

तनुसञ्चारिणी। स्त्री। वालिकायाम्। शब्दर.।

तनु(नू)च्छदः। पुं। पार्थो, गुदे। मलद्वारे। विका.।

तनुच्छोरः। पुं। आम्रातकवृक्षे। आमड़ा गाछ। रा.नि.व.११।

तनूनः। पुं। वायौ। वै.निघ.।

तनूनपम्। क्ली। घृते। श.च.।

तनूनपात्। पुं। चित्रकवृक्षे। अग्नौ। अम.।

तनोनुः। पुं। षष्टिकशालौ। षेटे धान-विशेष। वै.निघ.।

तन्तुः (कः)। पुं। वनशूकरे। स्नायुरोगे। भा.म ४भ.। जलजन्तौ। हे.च.। सन्ततौ। सूत्रे। अम.। मण्डलिसर्पभेदे। सु.कल्प.४अ.। सर्षपवृक्षे। अ.टी.रा.।

तन्तुकी। स्त्री। शिरायाम्। शरीरान्तर्नाड्यां। रा.नि.व.१८।१९। नाड़ीशाकभेदे। राजिकायां। राइ। वै.निघ.।

तन्तुकीटः। पुं। कीटविशेषे। गुटीपोका। जटा.।

तन्तुणः (नागः)। पुं। नागे। हाङ्गर। हे.च.।

तन्तुनाभः। पुं। ऊर्णनाभौ। माकड़शा।

तन्तुनिर्यासः। पुं। तालवृक्षे। श.र.।

तन्तुभः। पुं। श्वेतसर्षपवृक्षे। प.मु.।

तन्तुर(ल)म्। क्ली। मृणाले। श.र.। हे.च.।

तन्तुवापः (यः)। पुं। लूतायां। माकड़शा। अम.।

तन्तुविग्रहा। स्त्री। कदलीवृक्षे। विका.।

तन्तुसारः। पुं। गुवाकवृक्षे। विका.।

तन्त्रम्। क्ली। औषधे। मे.। द्रव्ये। अग्निवेशादि-कृतषट्संख्यवैद्यकशास्त्रभेदे। च सू.१अ.। वस्त्रे। पुं। ऊर्णनाभौ। पुत्रे। वै.निघ.। गृहे। के.।

तन्त्रकारः। पुं। अग्निवेशादिषट्संख्यतन्त्र-कारेषु। यथा—"अग्निवेशस्य भेलस्य जतूकर्णः पराशरः। हारीतः क्षारपाणिश्च जगृहुस्तन्त्रनैपुणम्। तन्त्रस्य कर्त्ता प्रथममग्निवेशो यतोऽभवत्। अथ भेलादयश्चक्रुः स्वं स्वं तन्त्रकृतानि च। आवयामासुरात्रेयं सर्षिसङ्घं सुमेधसः॥" च सू.१अ.।

तन्त्रयुक्तिः। स्त्री। असद्वादिप्रयुक्तवाक्यप्रति-षेधनेन स्ववाक्यपोषकशास्त्रयुक्तौ। तस्याः प्रयोजनं। वाक्ययोजनमर्थयोजनञ्च। "असद्वादि-प्रयुक्तानां वाक्यानां प्रतिषेधनम्। स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः॥ व्यक्ता नोक्ताश्च ये ह्यर्था लीना ये

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चाप्यनिर्श्लेला:। लिंगोक्ता ये क्वचित्तन्त्र तेषाञ्चापि प्रसाधनम्॥ यथाच्युजवनाख्यार्कः प्रदीपो वेश्मनो यथा। प्रबोध्यस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः॥" सु.उ.६५अ.।

तन्त्रवायः। पुं। लतायाम्। शाकड़शा। अ.टी.।

तन्त्रिका (न्त्री)। स्त्री। गुड़ूच्याम्। ज.द. १२अ.। र.सा.सं.पुटपाकप्रकरणे। कर्णपाल्यागतरोगविशेषे। लक्षणं—"क्लेशा दृढ़ा च तन्त्रीवत् पाली वातेन तन्त्रिका।" वा.उ.१७अ.। सैंहली-पिप्पल्यां। वै.निघ.। श्रोणितवाहिशिरायां। मे.।

तन्द्रा। स्त्री। विषयाज्ञाने। रा.नि.व.२०। सा च श्लेष्मतमोऽनिलसम्भूता। "तन्द्रा श्लेष्मतमोऽनिलैः।" शार्ङ्ग.पू.६अ.। लक्षणं—"इन्द्रियार्थेष्वसंवित्तिः गौरवं जृम्भणं क्लमः। निद्रानाशश्च यस्यैता तस्य तन्द्रां विनिर्दिशेत्॥ मा.नि.। निद्रावत्क्लान्तौ। च.सू.१६अ.। तत्पर्य्यायः,—प्रसीला, तन्द्री (अ.), तन्द्रिः (अ.टी.), तन्द्रिका, विषयाज्ञानं (रा.)।

तन्द्राकफः। पुं। तज्जनककफश्लेष्मकरोगभेदे। निदानम्।

तन्द्रालुः। पुं। निद्रालौ।

तन्द्रिः (का)। स्त्री। निद्रायां। आलस्ये। उणा.। च.सू.१६अ.।

तन्द्रिकः। पुं। तन्नामकसन्निपातज्वरे। लक्षणं—"प्रभूता तन्द्रार्त्तिज्वरकफपिपासाकुलतरा भवेच्छ्यामा जिह्वा पृथुलकठिना कण्ठकवृता। अतीसारः श्वासः क्लमघुपरितापौ श्रुतिरुजौ भृशं कण्ठे जाड्यं शयनमनिशं तन्द्रिकगदे॥" ज्वरे प्रथमसुप्तन्ने चक्षुर्भ्यां नैव पश्यति। निदा.।

तन्द्रिः (न्द्रिः)। स्त्री। चक्रकुल्यावनस्पतौ। काल तुलसी। र.सा.।

तन्द्युतुः। पुं। रात्रौ। उ.।

तन्वी। स्त्री। शालपर्ण्यां। शालपाणि। छिङ्गुपत्र्यां। रा.नि.व.४।६। वि। क्षुद्राङ्गयाम्। चक्रकुल्यायाम्। द्रव्याभि.।

तपः। पुं। ग्रीष्मर्त्तौ। ग्रीष्मे। अम.।

तपःकरः। पुं। तपस्विमत्स्ये। तपसी माछ। श.र.।

तपनः। पुं। शुक्लार्कवृक्षे। श्वेत आकन्द। रा.नि.व.१०। भल्लातकवृक्षे। रा.नि.व.११। सूर्य्यकान्तमणौ। रा.नि.व.१३। ग्रीष्मर्त्तौ। हे.च.। क्षुद्राग्निमन्थे। क्ली। चक्षुषि। रा.।

तपनकः। पुं। शालिधान्यभेदे। वा.सू.६अ.। See शालिः।

तपनच्छदः। पुं। आदित्यपत्रवृक्षे। छड़छड़े। रा.नि.व.४।

तपनतनया (येष्टा)। स्त्री। महाशमीवृक्षे। रा.नि.व८। वै.निघ.।

तपनमणिः। पुं। सूर्य्यकान्तमणौ। रा.नि.व.१३।

तपना। स्त्री। क्षुद्राग्निमन्थे। छोट गणिरि। रा.नि.व.९।

तपनी। स्त्री। पाठायाम्। वै.निघ.।

तपनीय(क)म्। क्ली। स्वर्णे। अम.। रा.नि. व.१३। अन्ने। पुं। शालिधान्यभेदे। च.सू.२७अ.।

तपनेष्टम्। क्ली। ताम्रे। रा.नि.व.१३। (ष्टा) स्त्री। शमीभेदे। ह्रस्व शमी। वै.निघ.।

तपसः। पुं। चन्द्रे। त्रि। पक्षिणि। सि.कौ.।

तपस्यः। पुं, क्ली। कुन्दपुष्पवृक्षे। श.च.। पुं। फाल्गुने मासि। अम.।

तपस्वी। पुं। घृतकरञ्जे। रा.नि.व.९। मत्स्यभेदे। तपसी माछ। श.च.। छिङ्गुपत्र्यां। दमनकवृक्षे। वै.निघ.।

तपस्विनी। स्त्री। जटामांस्याम्। रा.नि.व. २३। कटुक्यां। हे.च.। सुण्डीर्य्यां। मूण्डीरी। भा.। जिङ्गिण्यां। झिञा। वै.निघ.। महाश्रावणिकायाम्। वड़ थूलकुड़ी।

तपस्विपत्रः। पुं। मदनवृक्षे। दना। रा. नि.व.१०।

तपाः। पुं। ग्रीष्मर्त्तौ। अ.टी.। माघमासे। मे.। शरदि। च.सू.१अ.। च.द.।

तपात्ययः। पुं। वर्षाकाले। हे.च.।

तपुः (स्)। पुं। अग्नौ। सूर्य्ये। उ.।

तपोधनः। पुं। श्रावणीनामसहाचुपे मदनवृक्षे। रा.नि.व.५।१०। स्त्री (ना)। सुण्डीर्य्यां। मूण्डीरी। मे.। श्रावनिकायाम्। थूनकुड़ि।

तप्त(क)म्। क्ली। रौप्ये। रा.नि.व.१३। साक्षिकनामोपधातौ। स्वर्णमाक्षिकादि। र.सा.सं.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमकः। पुं। ताम्रपात्रविशेषे। के. लोहपात्रविशेषे। तांडवां। भा.।

तमखल्लः। पुं। छागप्रकृन्मिश्रतुषाग्नौ उष्णीकृतखल्ले। गरम खल्ल। तद्यथा—"अजाप्रकृत्तुषाग्निञ्च चालयित्वा भुवि क्षिपेत्। तस्योपरिस्थितः खल्लस्तमखल्ल इति स्मृतः।" अचि.।

तमराजतैलम्। क्ली। शिरोरोगे तैलम्। सर्षपतैलं ४ श. गोमूत्रं १६ श.। क्वाथार्थं—धुस्तूरकरञ्जझिण्टी जयन्ती निर्गुण्डी शिरीष-हिज्जलबीज-शिग्रु-दशमूलानां प्र. २ श. जलं ६४ श. शे. १६ श.। कल्कद्रव्यं—मदनफल-तिकटु-कुष्ठ-कृष्णजीरक-गुञ्जी-कट्फल-वरुणत्वक्-मुस्ता-हिज्जलबिल्व-हरिताल-जवापुष्प-विष-मनःशिला-कर्कटशृङ्गी-रक्तचन्दन-शिग्रु-यमानी-विकङ्कतत्वचां प्र. २ तो.। भैष.।

तमरूप(क)म्। क्ली। रौप्ये। रा.नि.व.१३।

तमलोमशः। पुं। काशीषे। शिरीकस्। वै.निघ.।

तमाभः। क्ली। उष्णसलिले।

तमः। पुं। छागे। अ.टी.।

तमम्। क्ली। अन्धकारे। शब्दर.। पादाघे। श.।

तमः। पुं। तमालवृक्षे। श.च.। अन्धकारे। तद्गुणाः—तमोभयावहं मोहदिङ्मोहजनकं भवेत्। पित्तहृत् कफहृत् कासवर्द्धनं क्लमकृच्च तत्॥ भा.। अन्धकारदर्शने। सु.चि.२२अ.। क्ली। वातकफजे प्रकृतेरन्यतमगुणे। वै.निघ.। चित्तोन्मेषहृदयावरणे। विमोहने। रा.नि.व.२१। व्याधौ। रा.नि.व.२०।

तमःप्रवेशनम्। क्ली। अन्धकारप्रविष्टस्येवासंवित्तौ। मा.नि.। तमःस्थस्येव यद्ज्ञानं तत्तमः कथ्यते बुधैः।"

तमकश्वासः। पुं। श्वासरोगभेदे। तमकश्वास। लक्षणं—"प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते। यौवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च। करोति पीनसं तेन रुद्धो घुर्घुरकं तथा। अतीव तीव्रवेगश्च श्वासं प्राणप्रपीड़कं। प्रताम्यति सवेगेन तृष्यते सन्निरुध्यते। प्रमीहङ्गासमानश्च स गच्छति सुदुर्दृशः। श्लेष्मण्युच्यमाने तु सुखं भवति दुःखितः। तस्मैव च विमोच्यान्ते मुहूर्त्तं लभते सुखं। तथाऽऽसीनं कफः कृच्छ्राच्छ्रकीति भाषितुम्। न चापि लभते निद्रां शयानः श्वासपीड़ितः। पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः। आसीनो लभते सौख्यमुषणञ्चैवाभिनन्दति। उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमर्त्तिमान्। विशुष्कास्यो मुहुः श्वासी मुहुश्चैवावधूयते। मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते। स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः॥" मा.नि.।

तमका। स्त्री। भूम्यामलक्याम्। वै.निघ.।

तमरम्। क्ली। शीषधातौ। वङ्गे। हे.च.।

तमसम्। क्ली। अन्धकारे। वि.।

तमसः। पुं। कूपे। अन्धकारे। सं.सा.।

तमराजः। पुं। शर्करादिकारे। "नवात् गुड़" इति भाषा। गुणाः—तृष्णाज्वरदाहरक्तपित्तघ्नः। राज.।

तमस्विनी। स्त्री। रात्रौ। रा.। [अम.।

तमस्विनी। स्त्री। निशायाम्। हरिद्रायाम्।

तमा। स्त्री। भूधात्र्याम्। भूँई आमला। काकोल्यां। काँकला। रात्रौ। हे.च.। तमालवृक्षे। श.च.।

तमालः (कः)। पुं। (Xanthochymus Pictorius.) स्वनामख्यातवृक्षे। तमाल गाछ। मं तमालु। कं कदालउ। तत्पर्य्यायः,—कालस्कन्धः, तापिञ्छः (अ.), तापिञ्जः (भ.), कृष्णस्कन्धः (अ.टी.भ.), तमः, तमा (श.), नीलतालः, तमालकः, नीलध्वजः, कालतालः, महाबलः। गुणाः—मधुरः वल्यः वृष्यः शीतलः गुरुः तृष्णादाहकरः कफपित्तकरः श्रमशान्तिकरश्च। वरुणवृक्षे। वरुण गाछ। रा.नि.व.९। कृष्णखदिरे। श.च.। स्थलपद्मे। कृष्णतिले। विका.। वंशत्वचि। वाँशेर छाल। अम.। श.र.। यवासशर्करायाम्। खड्गे। तापिञ्छे। विका.। क्ली। श्वेतसुनिषण्णकशाके। तेजपत्रे। रा.नि.व.९। मे.। सु.सू.३९अ. शिरोविरेके। त्वचि। गुड़त्वक्। वै. निघ.।

तमालकम्। क्ली। सुनिषण्णशाके। स्थलपद्मपुष्पवृक्षे। वि.। तेजपत्रे। रा.।

तमालका (की)। स्त्री। भूधात्र्याम्। भूँई आमला। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमालच्छदम्। क्ली। तेजपत्रे। वै.निघ.।

तमालपत्र(क)म्। क्ली। तेजपत्रे। रा.नि. व.६। च.चि.३अ.। तमालवल्ले, दारुचिनीति ख्याते। तिलके। मे.।

तमालिका (नी) (ली)। स्त्री। श्यामलक्याम्। रा.नि.व.५। ताम्रवल्ल्याम्। गञ्जिष्ठी। रा.नि.व.३। "भूधात्र्यान्तु तमालिनी।" रा.नि. व.२३। (ली) वरुणवृक्षे। रा.नि.व.९।

तमालो(न्)। पुं। वरुणवृक्षे।

तमाली। स्त्री। ताम्रवल्ल्याम्। श्यामलक्याम्। रा.।

तमाल्वयम्। क्ली। तालीशपत्रे। वै.निघ.।

तमिः (मी)। स्त्री। हरिद्रायाम्। रात्रौ। अम.।

तमिस्रम्। क्ली। अन्धकारे। अ.। क्रोधे। मे.।

तमिस्रा। स्त्री। हरिद्रायाम्। अन्धकाररात्रौ। अ.।

तमी। स्त्री। रात्रौ। हरिद्रायाम्। अ.।

तमोज्योतिः (भित्)। पुं। खद्योते। जोनाकि पोका। वै.निघ.। श.र.।

तमोदर्शनम्। क्ली। पित्तजरोगे अन्धकारदर्शने। मा.।

तमोनुदः। पुं। सूर्ये। शब्दर.।

तमोभिद्। पुं। खद्योते। शब्दर.।

तमोमणिः। पुं। गोमेदरत्ने। प.मु.। खद्योते। त्रिका.।

तमोविकारः। पुं। रोगे। रा.नि.व.२०।

तमोव्रणः। पुं। वल्मीके। त्रिका.।

तमोहरः। पुं। चन्द्रे। शब्दर.।

तम्या(म्बा)। स्त्री। गवि। हे.च.।

तम्बुरुः। पुं। तुम्बुरौ। नेपालि धनञ्जे। रा. नि.व.११।

तरः। पुं। वृक्षे। सूरिप्र.। अग्नौ। तरणे। मे.।

तरः (स्)। क्ली। वने। तटे। प्लवगे। शब्दर.। मांसे। कै.।

तरङ्गः। पुं। वस्त्रे। ऊर्म्मौ। ढेऊ। तत्पर्य्यायः,—भङ्गः, ऊर्म्मिः, वीचिः (अ.), उर्म्मी, वीची, विचिः, लहरी, लहरिः, हली, विलिः (भा.), मृण्डिः (हा.), उत्कलिका, ऊर्म्मिका (ज.), विची। हि.।

तरटः। पुं। चक्रमर्दवृक्षे। चाकन्दा गाछ।

तरटी। स्त्री। शोलापुरादौ स्वनामख्यातरक्तबीजकण्टकवृक्षे। मं तरडि। कं रेउडि। तत्पर्य्यायः,—तरदी, तारदी, तीव्रा, खर्ज्जूरा, रक्तबीजका। गुणाः—तिक्ता मधुरा गुरुः बल्या कफघ्नी। रा.नि.व.८।

तरणिः। पुं। अर्कपत्रवृक्षे। आकन्द गाछ। अम.। ताप्ये। स्त्री। कण्टकसेवल्याम्। सेउति गोलाप। रा.नि.व.१०। घृतकुमार्य्याम्। अम.।

तरणिरत्नम्। क्ली। माणिक्ये। रा.नि.व.१३।

तरणी। स्त्री। घृतकुमार्य्याम्। प.मु.। क्षुद्रदन्तीवृक्षे। रा.नि.व.६। पद्मचारिण्याम्। श.च.। स्वनामख्यातपुष्पवृक्षे। मं तरणी। कं चेंवड़े। शेउती गोलाप। गुणाः—शीतला स्निग्धा पित्तदाहज्वरघ्नी मधुरा सुखपाकहरी तृष्णाच्छर्दिघ्नी च। राजतरणी कषाया कफकरी चक्षुष्या हृद्या सुगन्धिश्च। रा.नि.व.१०।

तरणीवल्ली। स्त्री। कण्टकशतपुत्रीपुष्पवृक्षे। बूनो गोलाप। वै.निघ.।

तरत्। पुं। कारण्डवपक्षिणि। मे.।

तरत्सलः। पुं। तृणाग्नौ। वै.निघ.।

तरद्वी। स्त्री। तरण्याम्। रा.नि.व.८।

तरन्तः। पुं। पक्षिविशेषे। भेके।

तरम्बुजम्। क्ली, पुं। (Lupinus albus or Citrullus vulgaris. Syn. Cucurbita citrallus.) तरमुज इति ख्यातफले। हिं तरमूजा। प.मु.। तद्वृक्षे। वै.निघ.। बीजं शैत्यकरम्।

तरलः। पुं। माणिक्ये। रा.नि.व.१३। श्वेतधुस्तूरके। हारमध्यमणौ। वै.निघ.। (ला) स्त्री। यवाग्वाम्। त्रिका.। काञ्चिके। मद्यविशेषे। मे.। मधुमक्षिकायाम्। हे.च.।

तरवटः। पुं। आहुल्यारण्यचुपे। हिं रग। रा. नि.व.४।

तरसं (तरः, स्)। क्ली। मांसे। बले। वेगे। त्रिका.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तरस्वी(न्)। पुं। वायौ। गरुड़े। रा.।

तरक्षुः (क्षुः)। पुं। प्रसह्यजातीयमृगादनव्याघ्रे। तेंदो बाघ, नेकड़े बाघ। हिं तरख। रा. नि.व.१९। तत्पर्य्यायः,—तर्क्षः, तरक्षुः, मृगादनः, तरक्षुकः (शब्दर.), तरक्षः (श.टी.भ.)।

तरिता। स्त्री। रसोने। तर्ज्जन्याम्। श.च.। गञ्जने। गाँजा। "तारिका तरिता तथा।" कुलार्णवतन्त्रे।

तरी। स्त्री। धूमे। चिका.। नौकायाम्। द्रोण्याम्। पेटके। गदायाम्।

तरुः। पुं। वृक्षे। अम.।

तरुकूणिः। पुं। वाग्दृषच्चिणि। चिका.।

तरुजः। पुं। श्वेतखदिरे। प.मु.।

तरुजीवनम्। क्ली। तरुमूले। श.च.।

तरुटः। पुं। नीलीत्पलमूले। राज.३प.। च. सू.२७अ.।

तरुणः। पुं। एरण्डवृक्षे। प.मु.। श्वेतैरण्डवृक्षे। भा.। रा.नि.व.८। स्थूलजीरके। मोटा जीरा। रा.नि.व.६। युवके। रा.नि.व.१८। चीड़ादेवदारौ। क्ली। कुब्जकपुष्पे, कुन्दपुष्पे। मे.। प्राणनेत्रयोर्वास्थनि। वै.निघ.।

तरुणज्वरः। पुं। नवज्वरे। नवज्वर, नूतन ज्वर। "आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः।" च.द.।

तरुणज्वरारिरसः। पुं। ज्वरे मलशुद्धिकरज्वरलाघवकररसविशेषे। पारदगन्धकविषजैपालबीजानि समभागानि कुमारीरसेन एकत्र मर्द्यानि। पारा, गन्धक, विष, जयपालबीज प्रत्येक समान। सा.कौ.।

तरुणदधि। क्ली। पञ्चदीनातीतदधनि। "दधि पञ्चादिनातीतं तरुणं दधि उच्यते।" वै.।

तरुणदारुः। पुं। वृक्षदारौ। बीजताड़क। वै.निघ. सन्धिकज्व.चि.। [निघ.।

तरुणपोतिका। स्त्री। मनःशिलायाम्। वै.

तरुणाभासः। पुं। कर्कट्याम्। काँकुड़। वै.निघ.।

तरुणास्थि। क्ली। घ्राणकर्णाक्षिगुदेषु कोमलास्थिषु। सु.। भा.।

तरुणिः (णी)। स्त्री। स्थूलझण्टीरके। क्षुद्रदन्त्याम्। रा.नि.व.६। चीड़ादेवदारुणि। रा. नि.व.१२। तरुणीपुष्पवृक्षे। शेउती गोलाप फूलेर गाछ। सु.सू.४६अ.। तत्पर्य्यायः,—सेवती (के.), सहा, कुमारी, गन्धाढ्या, चारुकेशरा, भृङ्गेष्टा, रामतरुणी, सूदला, बहुपत्रिका, भृङ्गवल्लभा। गुणाः—शीतत्वं, स्निग्धत्वं, मधुरत्वं, पित्तदाहज्वर-सुखप्राशत्वाविषच्छर्द्दिनाशित्वञ्च। रा. नि. व. १०। घृतकुमार्य्याम्। रा. नि. व. ५। युवत्याम्।

तरुणीकटाक्षमालः। पुं। तिलकवृक्षे। तिल गाछ। रा.नि.व.१०।

तरुणीमूलम्। क्ली। दन्तीमूले। वै.।

तरुतू(दू)लिका। स्त्री। वादुली। बाँदुड़। हारा.।

तरुनखः। पुं। करञ्जे। काँटा। हारा.।

तरुभुक्। पुं। वन्दाके। परगाछा। वै.निघ.।

तरुमालिनी। स्त्री। भूम्यामलक्यां। वै.निघ.।

तरुमृगः। पुं। वानरे। वै.निघ.।

तरुरागम्। क्ली। कोमलपल्लवे। हारा.।

तरुराजः। पुं। तालवृक्षे। रा.नि.व.९।

तरुरुट् (ड्) (रोहिणी)। स्त्री। वन्दाके। बान्दरा। रा.नि.व.५।

तरुवल्ली। स्त्री। जतुकालतायाम्। जनीनाम गन्धद्रव्य। रा.नि.व.३।

तरुशायी (यिन्)। पुं। पक्षिणि। हारा.।

तरुसारः। पुं। कर्पूरे। हारा.। [व.५।

तरुस्था। स्त्री। वन्दाके। परगाछा। रा.नि.

तरूटः। पुं। कमलमूले। उत्पलकन्दे। गुणाः—गुरुः विष्टम्भिः शीतलश्च। राज.।

तर्कारी। स्त्री। (Sesbania aculeata.) जयन्तीवृक्षे। धनिचा गाछ। हिं वृहच्चक्रमेद। सं रानशैवरि। तें तक्केडुचेट्टु। ता. एराजिल्लगना। देवताड़वृक्षे। रा.नि.व.३। अग्निमन्थे। भा.स.१ भ.ज्व.चि.। रा. नि. व. ९।२३। क्षुद्राग्निमन्थे। जीमूते। रा. नि. व. २३। वै.निघ.सा.ज्व.चि, अर्कादि। शिंशपावृक्षे। वनकर्कट्याम्। वै.निघ.। चक्रमर्द्दवृक्षे। वै.निघ.२भ.वा.व्या.चि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्कीणः (णः) । पुं। चक्रमर्द्दवृक्षे। चाकन्दा गाछ। प.मु.। वै.निघ.।

तर्कुः । स्त्री। सूत्रनिर्म्माणयन्त्रे। टाकु। ज.।

तर्कुटम् । क्ली। कर्क्कटे। त्रि.।

तर्कुटी । स्त्री। तर्कौ। टाकु। हा.।

तर्कुपीठी । स्त्री। वर्त्तन्यां। टेकोर बाँटुल। त्रिका.। [त्रिका.।

तर्कुशाणः । पुं। शाणके। टेकोर शाण।

तर्जनी । स्त्री। प्रदेशिन्यामङ्गुली। रा.नि.व.१८। सा तु गर्भस्य चतुर्थे मासि भवति।

तर्णः (कः) । पुं। शालिधान्यविशेषे, काश्मीरे आजव इति प्रसिद्धे। तूर्णक इति अक्षयदत्तः। स कलमाङ्गीनगुणः स्वादुपाकरसत्वादियुक्तः। वा.सू.टी.६।२ अ. हेमा.। "तर्णकः शकुनाहृतः।" गोवत्से। कमले वाछुरे। अम.।

तर्णभः । पुं। सद्योजातवत्सके। ज.।

तर्णिः । पुं। सूर्य्ये। ध्रुवे। के.।

तर्दकः । पुं। काष्ठदर्व्याम्। ज.द.१२अ.।

तर्दूः । स्त्री। काष्ठदर्व्याम्। काठेर हाता। अम.।

तर्पणम् । क्ली। तृप्तौ। अम.। तीर्यप्रीतसक्तुषु। सि.यो.छर्दि.चि.। आहारविशेषे। स च द्राक्षादाड़िमखर्জ্জूरादिज्वरघ्नफलरसैः समधुशर्करैर्लाजाचूर्णं मिश्रयित्वालोड्य कृतः मदात्ययादिज्वरे यवागूस्थले देयः हितश्च। "तत्र तर्पणमेवादौ प्रदेयं लाजशक्तुभिः। ज्वरापहैः फलरसैर्युक्तं समधुशर्करं। द्रवैर्लालोड़ितास्ते सुस्तर्पणं लाजसक्तवः।" जल /२ से. द्राक्षारस १ छ. दाड़िमादिरस /॥० शे. खईचूर्ण ४ तो.। च.द.ज्व.चि.। नेत्रतर्पणानुष्ठाने। यथा—"वातातपरजोहीने वेश्मन्युत्थानशायिनः। अभितो माषचूर्णेन क्लिन्नेन परिपिण्डितौ। समौ दृढौ च सम्बीधौ कर्त्तव्यौ नेत्रकोशयोः। पूरयेदृतसण्डेन विलीनेन सुखोदकैः। सर्पिषा शतधौतेन क्षीरजेन घृतेन वा। निसमान्यक्षि पक्ष्माणि यावत्स्युस्तावदेव हि। पूरयेन्नीलिते नेत्रे तत उन्मीलयेच्छनैः। भिषग्भिरेव विख्यातस्तर्पणस्यैदितोविधिः॥" भा.पू.२भ.। क्षि। नेत्रपूरणे। तृप्तिजनने। वा.टी.।

तर्पणकषायः । पुं। पञ्चमांशावशिष्टकषाये। "तर्पणपञ्चमांशके।" रा.नि.व.२०। यत्र यत्र तर्पणकषायविधिस्तत्र तत्रैवं कल्पनीयम्।

तर्पणी । स्त्री। पित्तघ्नेषु लाजयवधान्यकृतान्नेषु। "लाजाश्च यवधानाश्च तर्पणी पित्तनाशिनी।" रा.नि.व.१६। गुरुस्तन्यहृद्ये, श्लेष्मलाहृद्ये। श.मा.।

तर्पिणी । स्त्री। पद्मचारिण्याम्। स्थलपद्म। श.च.।

तर्व्वटः । पुं। चक्रमर्द्दे। चाकन्दा। रा.नि.व.१३।

तर्षः । पुं। तृष्णायां। लिप्सायां। त्रिका.। ध्रुवे। समुद्रे। उ.। सूर्य्ये। सं.सा.।

तर्षणम् । क्ली। पिपासायाम्। जटा.।

तर्क्षुः । पुं। तरक्षुखगे। श्र.र.।

तर्क्ष्यः । पुं। यवक्षारे। र.सा.।

तलः । पुं। तालवृक्षे। मे.। वै.निघ.२भ.वा.व्या.चि.। वक्षसि। खुरस्याधोभागे। ज.द.२अ.। चपेटे। रा.नि.व.१८। मूले। गर्त्ते। त्रिका.। आधारे। हे.च.।

तलकम् । क्ली। पुष्करिण्याम्। हिं ताहाव। वै.निघ.।

तलभोनः । पुं। चिलिचिमसत्स्ये। भा.।

तलसारकम् । क्ली। अश्वस्य वचःस्थलरज्जौ। तङ्ग इति भाषा। हे.च.।

तलसारणम् । क्ली। अश्वस्य भोजनपात्रे।

तलहृदयम् । क्ली। मध्यमाङ्गुलीमनुपूर्व्वेण पादतलस्य मध्ये। हे.च.। तन्नामकसक्थिमर्म्मणि। सु.शा.६अ.।

तलक्षिप्रम् । क्ली। पादतलस्थसर्म्मभेदे। सुश्रु.। See क्षिप्रम्।

तला । स्त्री। गोधायाम्। अम.।

तलाटी । स्त्री। तलनिर्म्मितकटे। नलेर दड़ा। हा.।

तलामणिः । पुं। प्रवाले। त्रिका.।

तलाह्वम् । क्ली। तालीशपत्रे। रा.नि.व.६।

तलिका । स्त्री। तलसारके। हे.च.।

तलित(मांस)म् । क्ली। सन्तलितमांसे। भाजा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मांस। यथा—"शुद्धमांसविधानेन मांसं सम्यक् प्रसाधितम्। पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः॥" गुणाः—"तलितं बलमेधाग्निमांसौजःशुक्रवर्द्धिकृत्। तर्पणं लघु सुस्निग्धं रोचनं दृढताकरम्॥" भा.।

तलिन(म)म्। क्ली। शय्यायाम्। त्रि। तुच्छे। हारा.। दुर्ब्बले। हे.च.। मे.।

तलुनः। पुं। पवने। तरुणे। मे.। (स्त्री, नी) युवत्याम्।

तलोदा। स्त्री। नद्याम्। त्रि.।

तलेक्षणः। पुं। शूकरे। वै.निघ.।

तल्कम्। क्ली। बले। त्रि.।

तल्पः। पुं, क्ली। शय्यायाम्। अम.।

तल्पकोटः। पुं। कीटभेदे। छारपोका।

तल्पनम्। क्ली। पृष्ठवंशमांसे। मेरुदण्डेर मांस। हारा.। हस्तिपृष्ठे। वै.निघ.।

तल्लः। पुं। तड़ागे। वै.निघ.।

तवराजः। पुं। यवासशर्करायां। मिना इति भाषा। रा.नि.व.१४। वै.निघ.चय.चि.तवराजचूर्णे।

तवराजखण्डः। पुं। यवासशर्कराजातखण्डे। मालखण्डौविशेष। मं खण्डतवराज, मिनार खाँड़। तत्पर्य्यायः,—सुधामोदकजः, खण्डजोद्भवजः, सिद्धमोदकः, अमृतसारजः, सिद्धखण्डः। गुणाः—दाहहरः तापशान्तिकरः तृप्तिजनकः मूर्च्छामोहहरः श्वासघ्नः इन्द्रियतर्पणः शीतलः सुमधुरश्च। रा.नि.व.१४।

तवराजोद्भवः। पुं। तवराजखण्डे, नवात् इति ख्याते मिष्टान्ने। वै.निघ.।

तवराजोद्भवखण्डः। पुं। तवराजखण्डे। रा.नि.व.१४।

तवर्णकृत्। पुं। शरटे। गिरगिटा। वै.निघ.।

तवक्षीरम्। क्ली। स्वनामख्यातपिष्टकविशेषे। तत्तु यवजं गवयक्षीरपक्वं क्षीरजलं। हिं तोषाक्षीर। तत्पर्य्यायः,—पयःक्षीरं, यवजं, यवजोद्भवम्। गुणाः—मधुरं स्निग्धिरं दाहपित्तघ्नं क्षयकासकफश्वासघ्नं रक्तदोषहरञ्च। रा.नि.व.६। गन्धपत्रायाम्। वै.निघ.अर्शः चि, चन्द्रप्रभायां।

तवक्षीरी। स्त्री। गन्धपत्रायां। रा.नि.व.४।६। १०। तवक्षीरे। वै.निघ.।

तवक्षीर्य्येकपत्रिका। स्त्री। आम्रहरिद्रायां। वै.निघ.।

तवीषः। पुं। सुवर्णे। मे.। (स्त्री, षी) नद्याम्। सि. कौ.।

तसरः। पुं। सूत्रवेष्टने। उणा.। पट्टवस्त्रविशेषे।

तस्करः। पुं। स्पृक्कायां। पिड़िंग शाक। प. मु.। मदनवृक्षे। मयना गाछ। जटा.। चोरके। चोरानामक गन्धद्रव्य। वै.निघ.। [व.३।

तस्करस्नायुः। पुं। काकनासायां। रा.नि.

तस्करी। स्त्री। काकनासालतायां। ग्रन्थिपर्ण्यां। श्वेतलज्जालुकायां। वै.निघ.। [भा.।

तहरी। स्त्री। तापहरीतिख्याते व्यञ्जनविशेषे।

तक्षकः। पुं। सर्पविशेषे। सु.कल्प.५अ.। वृक्षभेदे। हे.च.।

तक्षणम्। क्ली। कृशीकरणे।

तक्षणी। स्त्री। अस्त्रविशेषे। बाईस प्रभृति। त्रिका.।

ताड़ः। पुं। कृष्णताले। तमाल गाछ। हिन्ताल। हेँताल। श्वेताले। कण्टकताले। वै.निघ.। पर्व्वते। हे.। करभूषणभेदे।।

ताड़कम्। क्ली। वृद्धदारकबीजे। भैष शिरोरोगचि.महादशमूलतैले।

ताड़का। स्त्री। देवदाल्यां। देम्राताड़ा। वै.निघ.। र.चि.९अ.।

ताड़काफलम्। क्ली। स्थूलैलायां। प.मु.।

ताड़नम्। क्ली। वायुजन्यव्रणवेदनाविशेषे। सु.सू. २२अ.। नारंगे।

ताड़नी। स्त्री। कशायाम्। शब्दमा.।

ताड़िः (ड़ी)। स्त्री। तालरसे। ताड़ी। गुणाः—"तालजं तरुणं तोयमतीवमदकृन्मतं। अग्नीभूतं तदा तु स्यात्पित्तकृद्दातदोषहृत्॥" भा. आसव.। वृक्षविशेषे। तेंड़ेत गाछ। अटी.भ.। तत्पर्य्यायः,—ताड़िः, तालिः (भ.), तालकी (त्रि.), तारिका (के.)।

ताण्डवम्। क्ली। नृत्यविशेषे। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तातनः । पुं । खञ्जरीटपक्षिणि । त्रिका. ।

तातलः । पुं । रोगे । पाके । मे. ।

तानीयकः । पुं । यावनालवृक्षे । जनारगाछ । वै.निघ. ।

तानूरः । पुं । बहुवारवृक्षे । चालता गाछ । वै.निघ. । जलावर्त्ते । भ. ।

तान्त्रिकः । पुं । तन्त्राभिकसन्निपाते । "अतितन्द्रा ज्वरः श्वासः कासस्तापोऽतिसारकः । स्थूलकण्ठः सिता श्यामा जिह्वा कण्ठे च कूजति । श्रुतिरल्पा चेति विद्यात् तान्त्रिके सान्निपातिके ।

तान्द्रवः । पुं । वायौ ।

तापः । पुं । अग्निसन्तापैर्वस्त्रादिभिः कृते खेदे । वा. टी. हेमा. । सन्तापे । रा. नि. व. २० । क्लेशे । मे. ।

तापकः । पुं । ज्वरे । ग.र. ।

तापनः । पुं । सूर्य्यकान्तमणौ । रा.नि.व.१३ । सूर्य्ये । हे. ।

तापसम् । क्ली । तेजपत्रे । तेजपात । रा. नि.व.६ । त्वचि । दारुचिनि । वै.निघ. ।

तापसः । पुं । मदनवृक्षे । वकपक्षिणि । रा. नि.व.१९ । तापसेक्षौ । के. ।

तापसजम् । क्ली । तेजपत्रे । वै.निघ. ।

तापसतरुः । पुं । इङ्गुदीवृक्षे । अम. । हिं इङ्गुआ । पुत्रजीवकवृक्षे । सु.सू.३८अ. ।

तापसद्रुमः । पुं । इङ्गुदीवृक्षे । जिग्रांपूता । रा.नि.व.८ । स्वर्णमाक्षिके । र.सा.सं.सेहवजरसे । वकवृक्षवृक्षे । वै.निघ. ।

तापसद्रुमसन्निभा । स्त्री । पुत्रदात्रीवृक्षे । रा.नि.व.४ ।

तापसपत्रः । पुं । दमनकवृक्षे । दना । रा. नि.व.१० ।

तापसप्रियः । पुं । इङ्गुदीवृक्षे । प.मु. । र. मा. । चारवृक्षे । पेआल गाछ । इक्षौ । रुद्राक्षे । स्त्री । द्राक्षालतायाम् । रा.नि.व.११ ।

तापसवृक्षः । पुं । इङ्गुदीवृक्षे । सु.सू.३७अ., चि.१८अ., वा.सू.१५अ.अर्कादिः । "श्वेतायुग्मं तापसानाञ्च वृक्षः ।"

तापसा । स्त्री । द्राक्षायाम् । वै.निघ ।

ताप(म)सी । स्त्री । जटामांस्यां । आमहरिद्रायां । आम आदा । वै.निघ. ।

तापसेष्टः । पुं । प्रियालवृक्षे । पेआलगाछ । रा.नि.व.११ ।

तापसेक्षुः । पुं । इक्षुविशेषे । गुणाः—"तापसेक्षुर्भवेन्मृद्वी मधुरा श्लेष्मकोपनी । तर्पणी रुचिकृच्चापि वृष्या च बलकारिणी ॥" भा. । कान्तारेक्षुगुणश्च । सु.सू.४५अ. ।

तापस्वेदः । पुं । स्वेदविशेषे । अलक्तवेष्टिते काये अम्लसिक्तैः खदिराङ्गारप्रतप्तैर्वालुकावस्त्रकांस्यकन्दुककपालपाणिभिः श्यानस्य बहुशोऽङ्गतापे । भा. । सु.चि.३२अ. ।

तापहरी । स्त्री । व्यञ्जनविशेषे । ताहड़ी, तातादीरी इति भाषा । तत्साधनविधिः—"घृते हरिद्रासंयुक्ते माषजा मज्जयेद्वटीः । तण्डुलांश्चापि निर्धौतान् सहैव परिभर्ज्जयेत् । सिद्धयोग्यं जलं तत्र प्रक्षिप्य कुशलैः पचेत् । लवणार्द्रकहिङ्गुनि मात्रायां तत्र निक्षिपेत् । एषा सिद्धिं समायाता प्रोक्ता तापहरी बुधैः । भवेत्तापहरी बल्या वृष्या श्लेष्माणमाचरेत् । इंहणी तर्पणी रुच्या गुर्व्वी पित्तहरी स्मृता ॥" भा. ।

तापिञ्जः (ञ्जः) (ञ्जः) । पुं । तमालवृक्षे । अ.टी.भ. । (ञ्जं) क्ली । स्वर्णमाक्षिके, धातुमाक्षिके । रा.नि.व.१३ ।

तापिनी । स्त्री । भारतवर्षीयनदीविशेषे । सा च पश्चिमदेशे प्रसिद्धा । तज्जलं वेत्रवती-जलतुल्यगुणम् । रा.नि.व.१४ ।

तापि(पी)समुद्भवम् । क्ली । माक्षिकनामोपधातौ । स्वर्णमाक्षिक । र.सा.सं. ।

तापीजम् । क्ली । स्वर्णमाक्षिके । रा.नि.व.१३ ।

ताप्य(क,ज)म् । क्ली, पुं । धातुमाक्षिके, स्वर्णमाक्षिके । हे.च. । र.मा. । तुत्थके । तूँतिया । रा.नि.व.१३ । सि.यो.यक्ष्म.चि. ।

ताप्युत्थसंज्ञकम् । क्ली । माक्षिकधातौ । स्वर्णमाक्षिक । र.सा. ।

तामरम् । क्ली । घृते । जले । भ. रुद्रः ।

तामरसम् । क्ली । कमले । रा. नि. व. १० । नीलपद्मे । वै.निघ. । स्वर्णे । त्रिका. । ताम्रे । मे. । सारसपक्षिणि । अम. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तामलकी। स्त्री। भूम्यामलक्याम्। भूँई आमला। च.द.सि.यो.यक्ष्मचि.च्यवनप्राशे।

तामसः। पुं। पेचके। रा.नि.व.१९। सर्पे। मे.। तमोगुणे। स्त्री। जटामांस्याम्। रा.नि.व.१२।

ताम्बूलम्। क्ली। (Piper Betle. Syn. Chavica Betle.) नागवल्लीदले, पर्णे। पान। हिं पान। तें तामलपाकु। ता. वेट्टिलै। वम्, नागवेल्ल। तत्पर्य्यायः,—गन्धाढ्या (श.), पर्णं (रा.) मुखभूषणम् (वै.)। गुणाः—"ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरं। वह्न्यं तिक्तं कटु चारं रक्तपित्तकरं लघु॥ वल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम्। मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्। हृनुदन्तमलध्वंसि जिह्वेन्द्रियविशोधनं। नवं तदेव मधुरकषायानुरसं गुरु। बलासजननं प्रायः पक्वशाकगुणं स्मृतम्। वङ्गदेशोद्भवं पर्णं परं कटुरसं सरम्। पाचनं पित्तजननमुष्णं कफहरं स्मृतं॥ पर्णं पुराणमकटु खल्लकं तनु पाण्डुरम्। विशेषाद्गुणवद्वेद्यमन्यद्धीनगुणं स्मृतम्॥" भा.। "शिरा पर्णस्य शैथिल्यं कुर्य्यात्तस्यास्रदस्रः। शीर्णं लम्बोष्ठदन्तास्यमक्षिते तु सितासिते। अनिधाय सुखे पर्णं पूगं खादयते नरः। सतिक्तश्री दरिद्रः स्यादन्ते न स्मरते हरिम्॥ कृष्णपर्णस्य गुणाः—तिक्तोष्णं कषायं दाहमुखजाड्यमलनाशनम्। शुभ्रपर्णं श्लेष्मवातामयघ्न पथ्यं रुच्यं पाचनदीपनञ्च। सद्यस्क्रीटितस्य गुणाः—मुखजाड्यारोचकहरम्।" रा.नि.व.११। ताम्बूलभक्षणनिषिद्धता यथा—"ताम्बूलमहितम् प्रीक्तं शरीरे रुचदुर्ब्बले। ज्वरास्यशोषपित्तास्रमदमूर्च्छाचिरोगिषु॥" तदनुपयोगगुणाः—"ताम्बूलानुपयोगाच्यान श्लेष्मपित्तानिलान्वितः। दंष्ट्रक्षेदन्ताग्निश्रीवर्णबलक्षयः॥" राज. ३ प.। गुवाके। त्रिका.।

ताम्बूलकरङ्कः। पुं। ताम्बूलपात्रे। पानेर बाटा। हे.च.।

ताम्बूलपत्रः। पुं। नागवल्लीलतायाम्। वै. निघ.। पिण्डाली। रा.नि.व.७।

ताम्बूलपत्र(र्ण)कन्दः। पुं। कन्दशाले, पिण्डालौ। थाम आलु, चुवड़ि आलु। रा.नि.व.७। गुणाः—शुक्रलो विशदः लघुश्च। अवि.।

ताम्बूलपर्णिका (र्णी)। स्त्री। नागवल्लीलतायाम्। पानेर गाछ। वै.निघ.।

ताम्बूलरागः। पुं। मसूरे। हारा।

ताम्बूलवल्लिका (ल्ली)। स्त्री। नागवल्लीलतायाम्। पानेर गाछ। श.र.।

ताम्र(क)म्। क्ली। (Cuprum.) Copper. स्वनामख्यातधातौ। र.सा.। तामा। हिं तांबा। तें रागि। ता. सेनगु। तत्पर्य्यायः,—ताम्रकं, शुल्वं, म्लेच्छमुखं, द्यष्टं, वरिष्टं, उडुम्बरं (अ.), कनीयसं (हे.), शुल्वं, विष्टं, उदम्बरं, औदुम्बरं, औडुम्बरं, उदुम्बरं (अ.टी.), रविसंज्ञकं, सुनिपित्तलं, अर्कं, सूर्य्याह्वं, लोहितायसं (शब्दर.), लोहितायः (वि.), तपनेष्टं, अम्बकं, अरविन्दं, रविलोहं, रविप्रियं, रक्तं, नैपालिकं, रक्तधातुः। ताम्रलक्षणम्—"जवाकुसुमसङ्काशं स्निग्धं मृदु घनं समं। लौहनागोज्झितं ताम्रं सारणाय प्रशस्यते॥" इति। ताम्रदोषा अष्टौ—भ्रमो मूर्च्छा विदाहश्च उत्क्लेदः शीर्षवान्तयः। अरुचिश्चित्तसन्ताप एते दोषा विषोपमाः॥" र.सा.सं.। ताम्रोत्पत्तिः—"शुक्रं यत्कार्त्तिकेयस्य पतितं धरणीतले तस्मात्ताम्रं समुत्पन्नमिदमाहुः पुराविदः॥" गुणाः—"ताम्रं कषायं मधुरञ्च तिक्तमम्लञ्च पाके कटु सारकञ्च। पित्तापहं श्लेष्महरञ्च शीतं तद्दीपनं स्यात्कृमिलेखनञ्च। पाण्डूदरार्शोज्वरकुष्ठकासश्वासक्षयान् पीनसमम्लपित्तं। शीघ्रं कृमिं शूलमपाकरीति प्राहुः परे ह्रंहणमल्पमेतत्॥" भा.पू.१भ.धातुव.। ताम्रं सुपक्वं मधुरं कषायं तिक्तं विपाके कटु शीतलञ्च। कफापहं पित्तहरं विबन्धशूलघ्नपाण्डूदरगुल्मनाशि॥" इति शोधितताम्रगुणाः। "घनघातसहं स्निग्धं रक्तपत्रामलं मृदु। शुद्धाकरसमुत्पन्नं ताम्रं शुभसंस्करम्॥" तस्य लक्षणम्। ताम्रमारणम्—"गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना। शुध्यते नात्र सन्देहो विषदोषनिहत्तये। जम्बीररससंघृष्टं रसगन्धकलेपितम्। ताम्रपत्रं शरावस्थं चिपुटे म्रियते ध्रुवम्। सूतालाभे भिषग्युक्त्या वाच हिङ्गुलमर्पयेत्॥" इति। यथैव मारितं ताम्रं ताम्रमम्लेन मर्द्दयेत्। तल्लोलं शूरणस्यान्ते रुद्धा सन्धिः प्रलेपयेत्। शुष्के गजपुटे पाच्यं सर्व्वदोषहरं भवेत्। पत्तलीकृतपत्राणि ताम्रस्याग्नौ प्रतापयेत्। निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा॥ एवं ताम्रस्य पत्राणां विशुद्धिः सम्प्रजायते। तथा—"गोमूत्रे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च पचेद्यामं ताम्रपत्रं दृढाग्निना। शुद्धते नात्र सन्देहो मारणत्वात्र कथ्यते॥" इति अन्यविध-शोधनं। "सूतमेकं द्विधा गन्धं यामं सर्यन्तु कन्यया। द्वयोस्तुल्यं तामपत्रं लिप्त्वा स्थाल्यां निधापयेत्। सम्यक् शूरणजैः सार्द्धं पार्श्वे भस्म निधापयेत्। चतुर्यामं पचेच्छुद्धां पात्रपृष्ठे सगोमये। जलं पुनः-पुनर्देयं साङ्गशीतं विसर्द्धयेत्। म्रियते नात्र सन्देहः सर्व्वरोगेषु योजयेत्॥ जम्बुत्वसा सैन्धव-संयुतेन सगन्धकं स्थापय शुल्वपत्रम्। पक्वायमानं पुटयेत् सुयुक्त्या वाल्यादिकं यावदुपैति शान्तिम्॥" इति अन्यविधमारणम्। र.सा.सं.। अम्लपिष्टं मृतं ताम्रं शूरणस्थं वह्निमर्दा। पुटेत् पञ्चाम्लतै-र्वापि त्रिधा वाल्यादिशान्तये॥" र.चि.३अ.। रक्तचन्दने। त्रि। ताम्रवर्णे। पुं। कुष्ठरोगभेदे। वै.निघ.। [नि.व.८।

ताम्रकण्टकः। पुं। रक्तखदिरवृक्षे। रा.

ताम्रकल्पः। पुं। क्षीद्राधिकारे कल्पविशेषः। "अथपारदगन्धञ्च कर्षद्वयमितं पृथक्। सर्व्वैः समं भवेत्ताम्रं जम्बीराम्लेन मर्द्दयेत्। सूर्य्यावर्त्तरसैः पश्चात् कणामीचरसेन च। शोषयेत्तीव्रवह्नौ तु यावत्सर्व्वन्तु जीर्य्यति। जम्बीरस्य रसैर्भूयो रसं दण्डेन चालयेत्। दृढे शिलामये पात्रे चूर्णयेदति-शोभनम्॥" मात्रा २ रतिः। विशोतक-पारद-गन्धकाः प्र. २ तो. जारिततामं ६ तो. जम्बीर-रसेन मर्द्दयेत्। अथ सूर्य्यावर्त्तरसेन कणामीच-रसक्वाथेन च संनिप्य यावज्जरणं रौद्रे धारयेत्। पुनश्च जम्बीररसेन सम्मर्द्द शुष्के सति चूर्णयेत्। मा. २ र.। र.सा.सं.।

ताम्रकिलिः (ल्लिमिः)। पुं। इन्द्रगोपकीटे। आषाढ़े पोका। हारा.।

ताम्रकुट्टकः (कूटः)। पुं। (Nicotiana rustica or tabacum. Latakia tobacco.) Tobacco. कलङ्के, तामकूटे। तामाक। पं, हिं तमाकु, चिलाशीतमाकु। ते पोगाकु, धूम्रपवसु। ता. पुगइ इलइ। वस्. तम्बाखु। तत्तम्।

ताम्रगर्भम्। क्ली। तुत्थे। रा.नि.व.१३।

ताम्रचञ्चुः। पुं। कपोते। वै.निघ.।

ताम्रचूडः। पुं। कुक्कुटे। प.मु.। च.सू.२अ.। कुक्कुरवृक्षे। कुक्शिमा। रा.नि.व.५।

ताम्रतुण्डः। पुं। श्वेतमर्कटे। वै.निघ.।

ताम्रचपुजम्। क्ली। कांस्यधातौ। भा.।

ताम्रदुग्धा। स्त्री। गोरचदुग्धीनामक्षुपे। रा.नि.व.५।

ताम्रद्रुः। पुं। रक्तचन्दनवृक्षे। वै.निघ.।

ताम्रधातुः। पुं। गिरिमृत्तिकायां। वै.निघ.।

ताम्रपत्रः। पुं। जीवशाके। रा.नि.व.७। क्ली। ताम्रस्य पत्रे। तांगार पात।

ताम्रपत्रकः। पुं। आवर्त्तकीलतायाम्। आँटमोड़ा। वै.निघ.।

ताम्रपत्री। स्त्री। हंसपादीनामक्षुपे। लज्जालु-विशेषे। रा.नि.व.५।

ताम्रपर्णी। स्त्री। गन्धसुण्डे। गन्धभाद्दलि विशेष। प.मु.। सञ्जिष्टायां। वै.निघ.।

ताम्रपल्लवः। पुं। अशोकवृक्षे। रा.नि.व.१०।

ताम्रपाकी (इन्)। पुं। प्लक्षवृक्षे, गर्द्दभाण्ड-वृक्षे। र.सा.।

ताम्रपादी। स्त्री। रक्तलज्जालुकायाम्, हंस-पाद्यां। रा.नि.व.३।

ताम्रपुष्पः (कः)। पुं। आरग्वधवृक्षे। रक्त-काञ्चने। वै.निघ.। काञ्चनवृक्षे। जटा.। भूच-म्पके। भूँई चाँपा। श.च.।

ताम्रपुष्पा (ष्पिका) (ष्पी)। स्त्री। रक्त-पाटलवृक्षे। पाकल गाछ। रा.नि.व.१०। (ष्पी, ष्पिका,) रक्तविडति। धातकीवृक्षे। रा.नि.व.९। प.मु.चय.चि.खर्ज्जूरासवे। नागरङ्गवृक्षे। नारांगा। ज.द.१२अ.।

ताम्रप्रयोगः। पुं। उदराधिकारे। "केवलं जारितं ताम्रं शृङ्गवेररसैः सह। दिगुञ्चं भक्षये-त्प्रातः.....॥" रस.चि.। अन्यः ग्रहण्यादौ। शोधितपारदगन्धकयोः प्र. २ तो. कज्जलीकृत्य अतिसूक्ष्मताम्रपत्रेण तोलकद्वयेन एकत्र सम्मिश्र मृत्पात्रे संस्थाप्य यावता प्लावितं भवेत् तावत्परि-माणं पक्वजम्बीररसं दत्त्वा तावत्कालं आतपे स्थापयेत् यावता औषधं पङ्कभूतं भवेत्। अथ इक्षुरसेन मर्द्दयित्वा वटी कार्य्या। रस.र.।

ताम्रफलः। पुं। अङ्कोलवृक्षे। आँकोड़ गाछ। रा.नि.व.९।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताम्रफलकः। पुं। ताम्रदले। ताँबार चाँदर।

ताम्रमूला (लिका) (ली)। स्त्री। लज्जालुकालतायाम्। रा.नि.व.५। क्षीरिणीभेदे। थिकुई। र.मा.। मञ्जिष्ठायां। दुरालभायां। रा. नि.व.४। भा.म.१भ.ज्व.चि.। "सिंही व्याघ्री ताम्रमूली।" रक्तदुरालभायां। प.मु.।

ताम्रमृगः। पुं। रक्तवर्णहरिणे। वै.निघ.।

ताम्ररसायनी। स्त्री। दुग्धिकायां। वै.निघ.।

ताम्रवर्णः (कः)। पुं। पक्षीवाहतृणे। रा. नि.व.८। गोधूमभेदे। हरिणे। गिरिमृत्तिकायां। वै.निघ.।

ताम्रवर्णा। स्त्री। जपावृक्षे। श.च.।

ताम्रवल्ली। स्त्री। मञ्जिष्ठायां। प.मु.। चित्रकूटदेशे प्रसिद्धायां स्वनामख्यातलतायां। सु.शा. १०अ.। तत्पर्य्यायः,—ताम्रा, ताली, तमाली, तमालिका, सूक्ष्मवल्ली, सूक्ष्मा, शोधनी, तालिका। गुणाः—कषाया कफघ्नी मुखकण्ठदोषघ्नी श्लेष्मशोधनी च। रा.नि.व.३।

ताम्रवीजः। पुं। कुलत्थे। प.मु.।

ताम्रवृन्तः। पुं, स्त्री (न्ता, न्तिका)। रक्तकुलत्थे। विका.। हे.च.।

ताम्रवृक्षः। पुं। कुलत्थे। रक्तचन्दने। र.मा.।

ताम्रशालिः। पुं। रक्तशाली। दादखानि। प.मु.।

ताम्रशिखो (ख)। पुं, स्त्री। ताम्रचूडे। कुक्कुटे। जटा.।

ताम्रसार(क)म्। क्ली। रक्तचन्दने। प.मु.। (कम्) रक्तखदिरे। रा.नि.व.८।

ताम्रा। स्त्री। ताम्रवल्लीलतायां। सैंहलीलतायां। रा.नि.व.३।६। मञ्जिष्ठायां। रक्तगुञ्जायां। मद.। देहाभ्यन्तरचतुर्थीकलायाम्। या व्रीहेरष्टभागप्रमाणा कुष्ठाद्यधिष्ठाना। सु.शा.४अ.।

ताम्राभम्। क्ली। रक्तचन्दने। श.च.।

ताम्रार्द्धम्। क्ली। कांस्ये। काँसा। विका.। वै.निघ.।

ताम्राक्षः। पुं। कोकिले। विका.। रा.नि. व.१९। चकोरपक्षिणि। (क्षी) कोकिलायाम्। वै.निघ.।

ताम्रिका (म्री)। स्त्री। गुञ्जायाम्। रा. नि.व.३। रक्तगुञ्जायाम्। मञ्जिष्ठायां। वै.निघ.।

ताम्रोपधातुः। पुं। तुत्थके। तूँते। भा.।

तारम्। क्ली। कर्पूरे। वै.निघ.। रौप्ये। मौक्तिके। रा. नि. व. १३। शुद्धमौक्तिके। पुं। वानरविशेषे। त्रि। निर्म्मले। धरणिः। अत्युच्चस्वरे। विका.।

तारकम्। क्ली। नेत्रे। मे.। धनुषि। शब्दर.।

तारका। स्त्री। देवताड़वृक्षे। मद.। पक्षाघारे। र.सा.सं.। इन्द्रवारुणीलतायाम्। रा.नि.व.३। कनीनिकायां। मे.। त्रिका.। मुक्तायां। नक्षत्रे। वै.निघ.।

तारकिनी। स्त्री। रात्रौ। रा.।

तारकेश्वररसः। पुं। प्रमेहाधिकारे रसः। रससिन्दूरं वङ्गं लौहभ्रं अभ्रकं प्रत्येकं समं मधुना मर्दयित्वा मधुना वटमूत्रे लेहयेत्। अनुपानं पक्वोदुम्बरबीजचूर्णं यथाबलमात्रं मधुना लेह्यम्। रस. र.। अन्यः मूत्रकृच्छ्रे रसः। गन्धकः लौहं वङ्गम् अभ्रं दुरालभा यवक्षारः गोक्षुरबीजं हरीतकी एषां प्रति समभागः। कुष्माण्डस्वरसैरेकत्र मर्द्दयित्वा कुशादितृणपञ्चमूलगोक्षुरयोः क्वाथेन च भावयित्वा रक्तिवया वटी कार्य्या। उदुम्बरबीजचूर्णस्य लेहः।

तारजम्। क्ली। रौप्यमाक्षिके। वै.निघ.।

तारटी (टो)। स्त्री। तरटीवृक्षे। रा.नि.व.८।

तारणः। पुं। भेलके। शब्दर.।

तारणिः। स्त्री। नौकायाम्। हा.।

तारतरङ्गलः। पुं। धवलयावनाले। श्वेत जवार वा जओयारा। रा.नि.व.१६।

तारतालकोवीजम्। क्ली। रसजारणार्थं वीजभेदे। र.चि.३अ.।

तारदो। स्त्री। तरदीवृक्षे। रा.।

तारपुष्पः। पुं। कुन्दपुष्पवृक्षे। रा.नि.व.१०।

तारमाक्षिकम्। क्ली। Iron pyrites. रूप्यमाक्षिके, रूप्यस्योपधातौ। रौप्यमाक्षिक। प.मु.। रूप्याभावे तन्माक्षिकं ग्राह्यम्। लक्षणम्— "तारमाक्षिकमन्यत्तु तद्भवेद्रजतोपमम्। किञ्चिद्रजतसाहित्यात्तारमाक्षिकमीरितम्। अनुकल्पतया तस्य तती हीनगुणाः स्मृताः। न केवलं रूप्यगुणाः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्त्तन्ते तारमाचिके। द्रव्यान्तरस्य संसर्गात् सत्व्यत्येऽपि गुणा यतः॥" गुणाः—"स्यात्तारमाचिकं स्वादु तिक्तं द्रव्यं रसायनम्। चक्षुष्यं वल्लिरुक्कुष्ठपाण्डुसंदृविषोदरान्। अर्शः शीर्यं क्षयक्रण्डूं विदोषमपि नाशयेत्। अशुद्धं तत् स्वर्णमाक्षिकवद्दोषान् करोति च॥" तच्छोधनं यथा—"कर्कटीमेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनं। भावयेदातपे तीव्रे विमला शुध्यति ध्रुवम्॥" तन्मारणं यथा—"कुलत्थस्य कषायेण घृष्टा तैलेन वा पुटेत्। तैलेन वाजमूत्रेण तारमाक्षिकमृच्छति॥" भा.।

तारविमला। स्त्री। रौप्यमाक्षिके। वै.निघ.।

तारवीजम्। क्ली। रौप्यादिकृततरसनिबन्धनबीजे। "कुटिलं विमला तीक्ष्णं समचूर्णमकल्पयेत्। पुटितन्यञ्चवारन्तु तारे वाह्यं शनैर्धमन्। यावद्गुणं तत्तु तावद्वीजम्भवेच्छुभम्॥" र.चि.३अ.।

तारशुद्धिकरम्। क्ली। सीसके। रा.नि.व.१३।

तारा। स्त्री। चीड़ानामदेवदारुभेदे। नेवकनीलिकायाम्। रा.नि.व.१२।१८।

तारापथः। पुं। आकाशे। हे.।

तारामः। पुं। यशदभेदे। दस्तादिशेव। पारदे। वै.निघ.।

ताराभ्रः। पुं। कर्पूरे। रा.नि.व.१२।

तारारिः। पुं। माक्षिकधातौ। स्वर्णमाक्षिक। विड़माक्षिके। हे.च.।

तारारिष्टम्। क्ली। रौप्यारिष्टे। र.चि.३अ.।

तारिका। स्त्री। ताड्यां। ताड़ि। तन्त्रम्।

तारिणी। स्त्री। मातरि। अक्षिमध्यभागे। विका.। [समुद्रे। चि.।

तारीषम्। क्ली, पुं। स्वर्णे। वै.निघ.। मे.।

तारुण्यम्। क्ली। यौवने। अम.।

तारुण्यजनवल्लभा। स्त्री। उम्पाशालौ। रा.नि.व.१६।

तारुण्यपिड़का। स्त्री। सुखदूषिकायाम्। वयसफोड़ा। भैष.क्षुद्ररोग.चि.।

तारेश्वररसः। पुं। राजयक्ष्मणि रसः। पारदः १ तो. रौप्यं। ४ तो. मनःशिला गन्धकः प्र. ४ तो. गोक्षुररसेन प्रहरद्वयं सम्मर्द्य वालुकायन्त्रेण प्रहरद्वयं पचेत्। शीते सति चूर्णयेत्। मात्रा २ र.। रस.कौ.।

तार्क्षी। स्त्री। वत्सादनीलतायाम्। पातालगरुड़ी लता, शिलिन्ध्रा। रा.नि.व.३।

तार्क्ष्य(क्ष्,ज)म्। क्ली। रसाञ्जने। भा.म.४म. नेवविड़ालरी. चि.। सि.यो.अपस्मा.चि. सिद्धतमयोगे। See माणिक्यम्। पुं। अश्वकर्णलतायाम्, लताशाले। शिग्रुड़ि लता। र.मा.। वा.उ.३९ अ.। सर्ज्जतरौ। अर्श। सर्पे। मे.। स्वर्णे। श.र.।

तार्क्ष्यनायकः। पुं। गरुड़े। रा.नि.व.१९।

तार्क्ष्यप्रसवः। पुं। अश्वकर्णनामकलताशाले। लताशाल। रा.नि.व.९।

तार्क्ष्यशैलम्। क्ली। रसाञ्जने। र.मा.।

तालः। पुं। (Borassus flabelliformis.) The Palmyra tree. स्वनामख्यातवृक्षे। तालगाछ। प.मु.। र.मा.। हिं ताल, ताड़। उत्. ताड़। गुर्ज. तड़। ता. पनम। स्वरताल इति अन्ध्रप्रदेशे। सु.सू.३७अ.। तत्पर्य्यायः,—तलः (मे.), भूमिपिशाचः (हा.), दीर्घतरुः, द्रुमश्रेष्ठः द्रुमेश्वरः (के.), तालद्रुमः, पत्री, दीर्घस्कन्धः, ध्वजद्रुमः, हणराजः, मधुरसः, मदाढ्यः, दीर्घपादपः, चिरायुः, तरुराजः, दीर्घपत्रः, गुच्छपत्रः, आसवद्रुः (रा.), करपत्रवान्, दीर्घद्रुः (श.), तन्तुनिर्य्यासः (शब्दर.)। गुणाः—स्वादुतिक्तकषायः मूत्ररोगघ्नः बलप्राणशुक्रवृद्धिकरश्च। राज.। "पक्वं तालफलं पित्तरक्तश्लेष्मविवर्द्धनं। दुर्जरञ्चहुमूत्रञ्च तन्द्राभिष्यन्दशुक्रदम्॥ तालमज्जा तु तरुणः किञ्चिन्मदकरो लघुः। श्लेष्मलो वातपित्तघ्नः सस्नेहो मधुरः सरः॥" भा.आसव.। तालप्रलम्बगुणाः—रुच्यः चतुरोगघ्नश्च। तालास्थिमज्ज-(ताल-आँटी-शाँस्)गुणाः—मधुरं शीतं मूत्रलं गुरु च। तालाम्बुगुणाः—पित्तघ्नं शुक्रलं स्तन्यवर्द्धनं गुरु च। तालफलं शीतलं बल्यं स्निग्धं स्वादुरसं गुरु विष्टम्भि वातपित्तरक्तक्षतदाहक्षयघ्नञ्च। रा.नि.व.९। तालरसगुणाः—तरुणी रसो मदकारी। अस्त्रीभूतः स पित्तकृत् वातदोषहरश्च। भा.। क्ली। हरितालि। लौहे। त्रिका.। तालीशपत्रे। रा.नि.व.६। तालफले। तुवरिकायां। श.र.। मत्स्यशल्के। सु.सू.७अ.।

तालकः। पुं। प्राणनाशकक्रीटविशेषे। सु.कल्प. ८अ.। See कीटः। क्ली.। हरितालि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तालकन्दः। पुं। तालवृक्षस्य कन्दे। चि.क्र. क.सीमरी.चि.।

तालकरीरः। पुं। तालाङ्कुरे। च.द.अमृत-सारलौहे।

तालकाफलम्। क्ली। स्थूलैलायाम्। ज.द. १२अ.।

तालकाभम्। क्ली। नीलरङ्गे। वै.निघ.।

तालकी। स्त्री। ताड्याम्। ताड़ी। विका.।

तालङ्गः। पुं। पचिभेदे। भालूई। के.।

तालजटा। स्त्री। तालवृक्षस्य जटायां। तालेर जटा। चि.क्र.क.सीमरी.चि.।

तालती। स्त्री। तालसुरायां। विका.।

तालद्रुमः। पुं। अम्बुदेशे खरताल इति ख्याते वृक्षे। रा.नि.व.९।

तालध्वजा। स्त्री। तालपत्रे।

तालपत्रम्। क्ली। तालच्छदे। मेथिकायाम्। वै.निघ.।

तालपत्री (त्री)। स्त्री। मिश्रेयानामचुपे। मउरी गाछ। रा.नि.व ४। तालमूल्यां। सु.सू. ३६अ.। चि.११।२५अ.। वा.उ.१२अ.। कृष्ण-सुषल्यां। कृष्ण तालमूली। सु.चि.१८अ.। मूषक-पर्ण्याम्। मे.। वनशताह्वायाम्। वै.निघ.।

तालपत्रिका। स्त्री। तालमूल्यां। रा.नि. व.७।

तालपर्णम्। क्ली। सुरानामगन्धद्रव्ये। मुरा-मांसी। शब्दच.।

तालपर्णी। स्त्री। मधुरिकायाम्। रा.नि.व. ४। सुषल्यां। तालमूली। सुरामांस्यां। अम.। वृहच्छताह्वायाम्। वै.निघ.।

तालपुष्प(क)म्। क्ली। तालजटायाम्। तालेर मोच। (कम्) प्रपौण्डरीके। शब्दर.।

तालप्रलम्बम्। क्ली। तालजटायाम्। गुणाः —"तथा तालप्रलम्बञ्च रूक्षं चतरुजापहम्।" राज.३प.।

तालमण्डिका। स्त्री। तालरसमद्ये। तालेर मद, ताड़ी। तत्पर्य्यायः,—सैन्धा, हाला। तत्साधनं यथा,—"तालपक्वं दलिशाकं ककुभञ्च तथैवच। तैरेवच सुसन्धानात् तालमद्यं प्रकीर्त्तितं॥" तन्त्र.। गुणाः—"श्लेष्मदोषकरी वृष्या वातला श्लेष्मवर्द्धनी। कासवृद्धासविध्वंसकरणी तालमण्डिका॥ पूर्णे कषायपित्ते च योगयुक्ता सुरा हिता। बहुदोषहरा चैव श्लेष्मरोगे विशेषतः॥" अग्नि.१९अ.।

तालमस्तकम्। क्ली। कटुशूरणे। वुनो ओल। वै.निघ.। तालवृक्षमस्तके। तालेर माथि। गुणाः—स्वादुतिक्तकषायत्वं, बलप्राण-शुक्रवृद्धिकरत्वं, मूत्रातङ्करोगनाशित्वञ्च। राज.।

तालमूलिका। स्त्री। तालमूल्याम्। अम.।

तालमूली। स्त्री। (Curculigo orchioides or Hypoxis orchioides. Syn. Curculigo orchiodies.) स्वनामख्यातकन्द-शाके। तालमूली, तलुर। दा.हिं कालीसुष्ली। तें निलप्तलिगड्डलु, नेलतारि। सुषलीकन्द इति भाषा। तत्पर्य्यायः,—तालिका, तालमूलिका (शब्दर.), अर्शोघ्नी, सुषली, तालो, खलनी (र.), सुवहा, तालपत्रिका, गोधापदी, हेमपुष्पी, सुतालो, दीर्घकन्दिका, मूषली। सा श्वेतकृष्ण-भेदाद्विधा। श्वेता स्वल्पगुणा, अन्या रसायनी च। श्वेता शफेदसुषली, कृष्णा कालीसुषली। सा. गुणाः—मधुरा शीतला वृष्या बलपुष्टिदा पित्तच्छिला कफकरी पित्तदाहश्रमघ्नी च। रा. नि. व. ७। अपिच—"तालमूली च विष्टम्भी सुषली परि-कीर्त्तिता। सुषली मधुरा वृष्या वीर्य्योष्णा वृंहणी गुरुः। तिक्ता रसायनी हन्ति गुदजाननिलां-स्तथा॥" भा.

तालर(ल)ण्डः। पुं। तालजटायाम्। तालेर मोच। र.सा.सं.।

तालवृन्त(क)म्। क्ली। तालव्यजने। ताल-पाताय पाखा। तच्च त्रिदोषशमनं लघु। राज. २प.। पुं। सीमलतामेदे। सु.चि.२९अ.। See सीमः।

तालशस्यम्। क्ली। तालास्थिमज्जायां। ताल-शाँस। गुणाः—वृंहणं स्निग्धं शीतलं बल्यं मधु-रञ्च। च.सू.२७अ.।

तालसत्त्वम्। क्ली। हरितालभस्मनि। रस.चि.।

तालक्षीर(क)म्। क्ली। तालजतक्षीरे। रा.नि.व.६।

तालाख्या। स्त्री। सुरामांस्यां। शब्दच.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तालाङ्कः। पुं। शाकभेदे। हे.च.। करपत्रे।

तालाङ्कुरम्। क्ली। तालास्थिशस्ये। पुं। मनःशिलायाम्। के.।

तालिः। स्त्री। तालभेदे। तेड़ए। वै.निघ.। भूम्यामलक्यां। र.मा.।

तालिकः। पुं। प्रसारिताङ्गुलिपाणौ। हे.च.।

तालिका (ली)। स्त्री। तास्रवल्लीलतायाम्। रा.नि.व.३। तालमूल्याम्। प.मु.। सु.चि.१७अ.। भूम्यामलक्याम्। रा.नि.व.५। तालवृक्षभेदे। ताड़िग्राए। अम.। मनःशिलायाम्। तालीशपत्रे। वै.निघ.। तुवरिकायाम्। श.र.।

तालिश(स)(पत्र)म्। क्ली। तालीशपत्रे। भूरिप्र.।

तालोत्तलम्। क्ली। सुषवीकन्दे। तालमूली। सु.चि.१७अ.। ड.।

तालोपत्रम्। क्ली। तालीशपत्रे। रा.नि.व.६।

तालोश(क)म्। क्ली। तालीशपत्रे। रा.नि.व.६।

तालोश(स)पत्रम्। क्ली। (Abies webbiana or Pinus webbiana or Flacourtia cataphracta.) भूम्यामलकीसदृशे स्वनामख्यातपण्यद्रव्ये। तालीशपत्र। भा.। दा.हिं तालिष्पवि, तालिशपत्र। ते॰ ता. तालिशपवि। दा. पनिअल। वम्. तास्रवठ। तत्पर्य्यायः,—तालीशं, पत्राख्यं, शुकोदरं, धात्रीपत्रं, अर्कवेधं, करिपत्रं, करिच्छदं, नीलं, नीलाम्बरं, तालं, तालीपत्रं, तमाह्वयं, तालीशपत्रकं। तदभावे करञ्जबीजटा ग्राह्या। गुणाः—तिक्तोष्णं मधुरं कफवातघ्नं हिक्काश्वासक्षयकासच्छर्दिघ्नञ्च। रा.नि.व.६। लघु अरुचिघ्नं गुल्मामाग्निमान्द्यहरञ्च। भा.। भूम्यामलक्यां। मे.।

तालीशादिमोदकः। पुं। यक्ष्माधिकारे। तालीशपत्रं १ तो. मरिचं २ तो. शुण्ठी ३ तो. पिप्पली ४ तो. गुड़त्वक् ॥० तो. एला ॥० तो. वंशलोचना ५ तो. शर्करा ३२ तो.। सा.कौ.। च.द.।

तालु (लुन्)। क्ली। जिह्वाधिष्ठानभूतप्रदेशे। ताल्, टाक्रा। तत्पर्य्यायः,—काकुदं (अ.), तालुकं। रा.नि.व.१८। "मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते। ततो नाना रसी जज्ञे-जिह्वया योऽधिगम्यते॥" भाग.।

तालुकण्टकः। पुं। तालुगतरोगभेदे। तेलो-ओलो। अयञ्च प्रायः शिशोरेव भवति। लक्षणं यथा—"तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम्। तेन तालुप्रदेशस्य निम्नता मूर्द्धि जायते। तालुपातात् स्तनद्वेषः कृच्छ्रात् पानं शकृद्द्रवम्। तृड्रुचिकण्ठास्यरुजा गौरवादुर्धरता वमिः॥" भा.।

तालुजिह्वः। पुं। कुम्भीरे। हे.च.।

तालुपाकः। पुं। पित्तजन्यतालुरोगविशेषे। तेलो पाका। तत्र पित्तम् अतिघोरं तालुपाकं जनयति। "पित्तं कुर्य्यात्पाकमत्यन्तघोरं तालुन्येवं तालुपाकं वदन्ति।" भा.म.४भ. सुखरो.चि.।

तालुपातः (पोड़कः)। पुं। तालुरोगभेदे, तालुकण्टके। तेलो ओलो।

तालुपुप्पुटः। पुं। तालुदेशे मेदःकफजन्ये रोगविशेषे। तत्रावेदनः स्थायी केवलमावः शीथो जायते। लक्षणम्—"नीरुक् स्थायी कीलमावः कफात्मा मेदोयुक्तः पुप्पुटस्तालुदेशे।" भा.म.४भ. सुखरो.चि.।

तालुयन्त्रम्। क्ली। कर्णनासानाड़ीशल्यानामाहरणार्थयन्त्रविशेषे। तच्च मीनताल्वाकारं द्वादशाङ्गुलपरिमितम्। तद्विधा—तयोरेकं मत्स्यतालुवदेकताल्वं नाम, अन्यत् द्वितालं नाम। सु.सू.७अ.

तालुरोगः। पुं। मुखरोगभेदे, तालुदेशस्थरोगे। स नवधा यथा—गलशुण्डी तुण्डिकेरीअधिजिह्वः कच्छपः तालुर्व्वुदः मांससङ्घातः तालुपुप्पुटः तालुशीषः तालुपाकश्चेति। भा.म.४भ.सुखरो.चि.। एषां विशेषाः स्वस्वपर्य्याये द्रष्टव्याः।

तालुविद्रधिः (धी)। स्त्री। तालुशीर्षे। "स्यात्तालुविद्रध्यपि दाहरागयुता भवेत्तालुनि सा विदीर्णात्।" च.।

तालुशोषः। पुं। तालुदेशे वायुजन्यरोगविशेषे। तत्र तालुदेशे विदारणवत्पीड़ा श्वासश्च जायते। "शीर्षोऽत्यर्थं दीर्य्यते वापि तालु श्वासी वातात्तालुशीर्षोऽयमुक्तः।" भा.म.सुखरो.चि.।

तालुसंहतिः। स्त्री। तालुरोगविशेषे। "तालुमध्ये निरुच्छ्वासं संहतं तालुसंहतिः।" वा.उ. २१अ.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तालूरः। पुं। जलावर्त्ते। हे.।

तालेश्वररसः। पुं। कासरोगे रसः। रसः २ तो. लौहं २ तो. गन्धकः ४ तो. अभ्रं ८ तो. हरितालं १ तो. मनःशिला ॥० तो. जयन्ती (जन्ती) एरण्डः चाङ्गेरी (आमरुल) तण्डुलीयं (काँटानटे) केशराजः (केशुण्डे) भृङ्गराजः (भीमराज) पचरसेन प्र. द्विधा भावयेत्। रस.को.।

ताम्रपर्णी। स्त्री। मिश्रेयायास्। शुल्का। रा.।

ताल्वर्व्बुदम्। क्ली, पुं। तालुशोथरोगे। टाकरा फोला। लक्षणं—पद्माकारं तालुमध्ये तु शोफं विद्याद्रक्तादर्व्बुदं पित्तलिङ्गम्। भा.।

ताल्वस्थि। क्ली। तालुदेशस्थे अस्थनि। ते च द्वे। च.शा.७अ.।

तावीषः। पुं। स्वर्णे।

तिक्तः (क्तः)। पुं। पटोललतायां। पल्ता नति। प.मु.। भा.। वरुणवृक्षे। वरुण गाछ। श.मा.। कुटजवृक्षे। कुड़ची गाछ। श.च.। किराततिक्तके। चिरेता। श.र.। वा.उ.२अ.। कुरबकभाके। कुरुण्टा शाक। पर्पटकक्षुपे। क्षेत्पापड़ा। प.मु.। हे.च.। वायुकाशभूम्यिष्ठषड्रसान्यतमरसे। तेतो रस। "यो गले चीषमुत्पादयति सुखवैशद्यं जनयति भक्तरुचिमुत्पादयति हर्षञ्च स तिक्तः।" सु.सू.४२अ.। स निम्बादौ ख्याप्यते। गुणाः—कृमिघ्नः कुष्ठघ्नः अतिसेवनात् राजयक्ष्माणं करोति। रा.नि.व.२०। शीतलघुरूक्षः दीपनः पाचनः शोधनः अरोचक-विषघ्नश्च। तद्विपाकोऽपि कटुः। स च विपाको वातकृत् कफपित्तघ्नश्च। सु.सू.४२अ.। "प्रतिहन्ति निपाते यो वमनं खदते न च। स तिक्तो मुखवैशद्यशोषप्रह्लादकारकः॥" चर.। स वातियुक्तः शिरःशूलमन्यास्तम्भभ्रमान् जनयति। तथा कम्पमूर्च्छातृषाबलशुक्रक्षयकरश्च भवति। इक्षुदीवृक्षे। भा.। निम्बवृक्षे। वै.निघ.। क्ली। तेजोह्वायाम्। तेजवल। वै. निघ. चयरो. चि. गोक्षुरघृते। पित्ते। विड्लवणे। कृष्णखदिरे। श.मा.।

तिक्तकघृतम्। क्ली। कुष्ठं घृतम्। गव्यघृतं ४श.। क्काथार्थं त्रिफला हरिद्रा दारुहरिद्रा वासा दुरालभा चेत्रपर्पटी पटोलपत्रं वायमाणा कटुकी निम्बत्वक् एषां प्र. २ प. वारि ६४ श. शे. १६ श.। कल्कार्थं—पिप्पली मुस्तकं रक्तचन्दनं वायमाणा (वनो नता) इन्द्रयवः भूनिम्बः एषां प्र. ४ तो. मतान्तरे ६ तो.। सु.चि.९अ.। च.द.। घृतं ४ श.। कल्कार्थं—सप्तपर्णत्वक् अतिविषा सप्ताकः (सोन्दाल) कटुकी पाठा मुस्तकम् उशीरं त्रिफला पटोलपत्रं निम्बत्वक् चेत्रपर्पटी दुरालभा रक्तचन्दनं पिप्पली गजपिप्पली पद्मकाष्ठं हरिद्रा दारुहरिद्रा वचा इन्द्रवारुणी (राखालशशा) सुरा वा शतावरी श्यामालता अनन्ता इन्द्रयवः वासा मूर्व्वा गुडूची भूनिम्बः (चिरेता) यष्टिमधु वायमाणा एषां मिलित्वा १ शरावः (१ सेर)। जलं ३२ श. आमलकफलरसः ४ श.। च.द.। रस.र.। महातिक्तकमिदम्।

तिक्तकन्द(न्दि)का। स्त्री। आम्रहरिद्रायां। मालवे पलाश इति ख्याते गन्धपत्रवृक्षे। रा.नि.व.६। तिक्तदन्तकापीति क्वचित् निघण्टौ पाठः।

तिक्तकरोहिणी। स्त्री। कटुक्याम्। कुट्की। च.द.पित्तघ्न.चि.कलिङ्गादौ।

तिक्तककर्कोटकी। स्त्री। तिक्तकर्कटिकायां। तिएकाँकड़ी, काँकरोल। श.चि.।

तिक्तका। स्त्री। तुम्ब्यां, कटुतुम्ब्याम्। तिए लाउ। प.मु.। काकजङ्घायाम्। करञ्जलतायां। चुच्चुशाके। वै.निघ.।

तिक्तकाण्डः। पुं। भूनिम्बे। चिरातो।

तिक्तकाण्डरुहा। स्त्री। कटुकायाम्। कुट्की।

तिक्तकोषातकी। स्त्री। तिक्तघोषायाम्। तिएपलता। भैष. कुष्ठचि.।

तिक्तगन्धा। स्त्री। राजिकायाम्। राई। वै. निघ.। वराहक्रान्तायाम्।

तिक्तगन्धिका। स्त्री। वराहक्रान्तायाम्। वराक्रान्ता। श.मा.।

तिक्तगुञ्जा। स्त्री। करञ्जवृक्षे। हारा.। तत्पर्य्यायः,—क्षुद्ररसा, रसघा, विड्वकर्कटी।

तिक्ततण्डुला। स्त्री। पिप्पल्यां। रा.नि.व.६।

तिक्ततुण्डी। स्त्री। कटुतुण्डीलतायाम्। तिए कुन्दरु, तेलाकुचा। हिं कटुतराइ। रा. नि. व. ३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिक्ततुम्बी । स्त्री । कटुतुम्ब्याम् । तिए लाउ । प.मु. ।

तिक्तदुग्धा । स्त्री । चीरिण्याम् । अजशृङ्ग्याम् । काँकड़ाशृङ्गी । रा.नि.व ५।९ ।

तिक्तधातुः । पुं । पित्ते । रा.नि.व.२१ ।

तिक्तनित्यः । त्रि । नित्यं तिक्तभक्षणशीले । च.द. ।

तिक्तपर्णी (र्णिका) । स्त्री । गोरक्षकर्कट्याम् ।

तिक्तपत्रः (त्री) । पुं, स्त्री । कर्कोटकवृक्षे । काँकरोल लता । हे.च. । भैष.उपदं. चि. ।

तिक्तपर्व्वा । स्त्री । गुडूच्याम् । यष्टिमधुनि । छिलमोचिकायां । मे. । ब्राह्मीभेदे । दूर्व्वायाम् । जटा. ।

तिक्तपुष्पा । स्त्री । पाठायां । रा.नि.व.६ ।

तिक्तफलः (ला) । पुं, स्त्री । कतकवृक्षे । निर्म्मली वृक्ष । रा.नि.व.११ । (ला) कतकबीजे । वै.निघ. । यवतिक्तालतायां । रा. नि. व. ३ । वार्त्ताक्यां । षड्भुजायां । खरभूज । रा.नि.व.७ ।

तिक्तभद्रः (क्रः) । पुं । पटोललतायां । श.च. ।

तिक्तमरिचः । पुं । कतकवृक्षे । रा.नि.व.११ ।

तिक्तयवा । स्त्री । यवतिक्तालतायां । रा.नि. व.३ । अङ्गिन्याम् । वै.निघ. ।

तिक्तरसा । स्त्री । ब्राह्मीनाम-शाकभेदे ।

तिक्तरोहिणिका (णी) । स्त्री । कटुक्यां । कटुकी । रा.नि.व.६ । र.मा. । सि.यो.कफज्व. चि. । च.द.कफज्व.चि. ।

तिक्तला । स्त्री । अङ्गिन्यां । नवमालिका । ज.द.१२अ. ।

तिक्तवर्गः । पुं । तिक्तरसद्रव्यगणे । तद्यथा—मण्डूकपर्णी (थूलकुड़ि)—वेतसकरीर (वेतेर कोँड़)—हरिद्राद्वय (हरिद्रा दारुहरिद्रा)-इन्द्रयव-वरुण स्वादुकण्टक-(वँइची) सप्तपर्णवृहतीद्वय-(वृहती, कण्टकारी) अङ्गिनी-(शाँकिनी) द्रवन्ती-(इन्दुरकाणी) चित्रक-कृतवेधन-(घोषा) कारवेल्ल-(उच्छे) वार्त्ताकु-करीर (वंशाङ्कुर)-सुमनः-(नाटा) अङ्कपुष्पी (डानकुणी)-अपामार्ग-चायमाणा-(गोहालिया) शूकरोहिणी (कटुकी)-वैजयन्ती-(जन्ती) सुवर्चला (हुड़हुड़े)-पुनर्नवा-वृश्चिकाली-(बिछाती) ज्योतिष्मती (लताफट्‌की) —प्रभृतीनि द्रव्याणि । सु.सू.४६अ. ।

तिक्तवल्ली । स्त्री । सूर्व्वायां । मूर्व्वा । र.मा. ।

तिक्तवार्त्ताकुः । पुं । The egg plant, the fruit of which is bitter. वार्त्ताकुभेदे । तेत वेगुन । हिं तीत् भण्टा । ज.द.१२अ. ।

तिक्तवीजा । स्त्री । कटुतुम्ब्यां । रा.नि.व.३ ।

तिक्तशाकः । पुं । वरुणवृक्षे । प.मु. । पवसुन्दरवृक्षे । मे. । खदिरवृक्षे । त्रिका. ।

तिक्तशाकतरुः । पुं । श्वेतप्रसूनकवृक्षे । शब्दमा. ।

तिक्तशाकद्रुमः । पुं । वरुणवृक्षे । वै.निघ. ।

तिक्तषट्पलकं (घृतम्) । क्ली । कुष्ठाधिकारे । क्वाथार्थं—निम्बत्वक् पटोलपत्रं दार्वी दुरालभा कटुकी विफला पर्पटकः चायमाणा प्र. ४ तो. जलं ३२ प्र. शे. ४ प्र. । कल्कार्थं—रक्तचन्दनं भूनिम्बः पिप्पली चायमाणा (वना लता) मुस्तकम् इन्द्रयवः प्र. १ तो. । च.चि.७अ. ।

तिक्तसारः । पुं । विट्‌खदिरवृक्षे । प.मु. । See अरिमेदः । क्ली । दीर्घरोहिषे । वड़ राम-कर्पूर । रा.नि.व.८ ।

तिक्तस्कन्धः । पुं । षड्विधास्थापनस्कन्धेषु तिक्तवर्गीयद्रव्यकृतास्थापनविशेषे । च.चि.८अ. ।

तिक्ता । स्त्री । लताकस्तूरिकायाम् । लताकस्तूरिका । सि.यो.यक्ष्मा.चि.चन्दनादितैले । "हरिद्रे शारिवे तिक्ता ।" कटुक्यां । रा.नि.व.६ । सि.यो.हिक्काश्वासचि.हे । च.द.शूल चि. । वा.उ.२अ. । "तिक्ताकाञ्चनगैरिकम् ।" छिक्किन्यां । भा. । सूर्व्वायाम् । मूर्व्वा । रा.नि.व.३ । सि.यो.कासचि. । कटुरोहिण्यां । पाठायाम् । रा.नि.व.६ । यवतिक्तायां । कटुतुम्ब्यां । रा.नि,व.३ ।

तिक्ताख्या । स्त्री । कटुतुण्डीलतायाम् । कटुतरोई । रा.नि.व.३ ।

तिक्ताङ्गा । स्त्री । पातालगरुड़ीलतायाम् । शिलिन्ध्रा । रा.नि.व.३ ।

तिक्तादयम् । क्ली । एका कटुका अन्या काकतिक्ता च । वा.सू.१५अ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिक्तामृता। स्त्री। गुडूच्याम्। वै.निघ.।

तिक्तालाबूः। स्त्री। तिक्ततुम्ब्यां। तिरुणाउ। ज.द.१२अ.।

तिक्तास्यता। स्त्री। पित्तजन्यमुखरोगे। वै. निघ.।

तिक्तिका। स्त्री। कटुतुम्ब्यां। भ.र.। काकमाच्यां। रा.नि.व.४। तिक्तपटोल्यां। तिरु पलता। सा.कौ.अभयारिष्टे।

तिक्तोत्तमा। स्त्री। पटोले। वै.निघ.।

तिग्मम्। क्ली। तीक्ष्णे। अ.।

तिग्मांशुः। पुं। सूर्ये। हे.।

तिङ्गुदः। पुं। इङ्गुदीवृक्षे। वै.निघ.।

तिजिलः। पुं। चन्द्रे। उ.।

तिण्टी। स्त्री। श्लीपदाख्ये। विद्रधायां। भ.च.।

तितउः। पुं। शतपीणके। चालनी।

तितिभः। पुं। इन्द्रगोपकीटे। हे.च.।

तित्तिरिः। पुं। तित्तिरपक्षिणि। रा.

तित्तिलम्। क्ली। तिलपिञ्चटे। वै.निघ.।

तित्तिड़ीकः (रोका)। पुं, स्त्री। आम्लवेतसे। तिन्तिड्यां। वै.निघ.।

तित्तिरः (रिः)। पुं। पक्षिविशेषे। तितिर पाखी। तें तीतुकपिट्ट। वसन्तगौर इति च। तत्पर्य्यायः,—कपिञ्जलः, लघुमांसः(वै), खरकीरः(हे.), चित्रपत्र.(ज), तित्तिरिः, तैत्तिरः, याज्ञुषीदरः। गौरकृष्णभेदेन तित्तिरी द्विविधः। तयोः कृष्णः तित्तिरिरिति, गौरः प्रशस्तः कपिञ्जल इति कथ्यते। मांसगुणाः—वर्णदं ग्राहि हिक्कघ्नं विदोषघ्नं श्वासकासज्वरघ्नम्। भा.मांसव.। रक्तपित्ते हितम्। सि.यो.र.पि.चि.। स्निग्धं लघु बलवीर्य्यकरं कषायं मधुरं शीतलं विदोषघ्नञ्च। रा.नि.व.१७। "तित्तिरिः कृष्णवर्णः स्याच्चित्रोऽन्यो गौरतित्तिरिः। तित्तिरिर्बलदो ग्राही हिक्कादोषत्रयापहः। श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणैः॥" अपिच "तित्तिरिः सर्व्वदोषघ्नो ग्राही वर्णप्रसादनः। हिक्काश्वासानिलहरो विशेषाद्गौरतित्तिरिः॥" सु.सू.४६अ.। तथैव तित्तिरौ द्रव्यः मेधाग्नि बलवर्द्धनः। सर्व्वदोषहरो वल्यो बलाकासमता गुणैः॥ गौरतित्तिरभेदश्च श्रेष्ठो गौरश्च तित्तिरः। तृतीयतित्तिरोऽन्योऽपि सामान्यगुणलक्षणैः। स वातलोऽतिमलकृद्घनः किञ्चिद्रसायनः॥" अत्रि.२१अ.। सारसपक्षिणि। जैपालवृक्षे। वै.निघ.।

तित्तिरीफलम्। क्ली। जैपालबीजे। वै.निघ.। वृक्षाम्ले।

तित्थः। पुं। अग्नौ। प्रावृट्काले। सं.सा.।

तित्थिप्रणीः। पुं। चन्द्रे। हे.।

तिदिशः। पुं। डिण्डिशे। टेँड़श। वै.निघ.।

तिनाशकः। पुं। तिनिशवृक्षे। जाङ्गल गाछ। भ.र.।

तिनिः। पुं। तिनिशवृक्षे। जाङ्गल गाछ। "कट्फलं तिनिसैन्धवम्।" सु.चि.१६अ.।

तिनिका। स्त्री। यवनालवृक्षे। जनार गाछ। वै.निघ.।

तिनिशः। पुं। (Lagerstroemia flos-Reginae or Dalbergia oujeineisis) खनामख्यातवृक्षे। जाङ्गल गाछ, सादन गाछ। प.मु.। हिं तिरिच्छ। स्यन्दन इति महाराष्ट्रे कर्णाटे अनूपदेशे च प्रसिद्धः। च.चि.१अ.। तत्पर्य्यायः,—तिनाशकः, स्यन्दनद्रुमः (भ्रन्दर.), अचक्रः (र.), चित्रकर्म्मा (भ.), स्यन्दनः, नेमी, रथद्रुः, अतिमुक्तकः, वञ्जुलः, चित्रकृत् (अ.), चक्री, शताङ्गः, शकटः, रथः, रथिकः, भस्मगर्भः, मेघी, जलधरः, स्यन्दनिः। गुणाः—कषायः उष्णः कफरक्तातिसारघ्नः ग्राहकः दाहजनकः वातरोगे हितश्च। रा.नि.व.९। "तिनिशः श्लेष्मपित्तास्रमेदःकुष्ठप्रमेहजित्। तुवरः श्वित्रदाहघ्नो व्रणपाण्डुकृमिप्रणुत्॥" भा.।

तिन्तिड़ः। पुं। वृक्षाम्ले। विश्व.।

तिन्तिड़ि(ड़ी)कः (कम्) (का)। पुं, क्ली, स्त्री। The tamarind tree or its fruit. (Tamarindus Indica.) खनामख्यातास्लफलवृक्षे। तेँतुल गाछ, तेँतुल। हिं अम्ली, इमली। सं इमली, चिञ्चा। कं लुनिसे। तें चिण्ट। उत्. कँआं। ता. पुलि। वम्. टिन्टज्। तत्पर्य्यायः,—चिञ्चा, अम्लिका (अ.), तिन्तिड़ीकः, तिन्तिड़ीका, तिन्तिड़िकं, अम्लीका, आम्लिका, आम्लीका, तिन्तिलीका (अ.टी.), वृक्षाम्लं, तिन्तिड़ः (वै.), तिन्तिली, तिन्तिडिका, आन्ध्रिका, चुक्रुः, चुक्रा, [illegible] अम्ला, अत्यम्ला, भुक्ता,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुक्तिका, चारिवा, गुरुपत्रा, पिच्छिला, यमदूतिका, चरिवा (शब्दर.), शाकचुक्रिका, सुचुक्रिका, सुतिन्तिड़ी। गुणाः—आमा (काँचा) गुरुर्वातहरा पित्तकफरक्तघ्नी। पक्का (पाका वा गोव्रा) सरा रूक्षा बल्यिकृत् वस्तिशोधनी। शुष्का (शुकना) हृद्या लघुः श्रमभ्रान्तितृष्णाहरी च। मद व.६। आम वातघ्नी गुरुः पित्तकफास्रकृत्, पक्का दीपनी रूक्षा सरा उष्णा वातकफघ्नी च। भा.पू.१भ.। आमं वातघ्नम् उष्णम् अतिगुरु च। पक्वं लघु संग्राहि ग्रहणी कफवातजित्। मद. व. ६। आमतिन्तिड़ी (काँचा तेँतुल) अम्लरसा। पक्का (पाका तेँतुल) मधुराम्ला वातघ्नी पित्तदाहरक्तकफप्रकोपकरी। तिन्तिड़ीकम् आममत्यम्लं लघु पित्तकृत्। पक्वं फलं मधुराम्लं भेदन विष्टम्भवातघ्नञ्च। अम्लं वटु कषायं कफाग्नीघ्नसुषां वातोदरव्रणाहृद्रोगयकृत्प्लीहासारव्रणघ्नञ्च। रा.नि.व.६। पक्वचिञ्चाफलरसः मधुराम्लः रुचिदः शीघ्रपाककरश्लेष्मः व्रणदोषघ्नश्च। चिञ्चापत्रं (तेँतुलपाता) शीफघ्नं रक्तदोषव्यधाहरञ्च। तस्य शुष्कत्वक्क्षारः (शुष्क तेँतुलछालेर क्षार) शूलाग्निमान्द्यहरः। रा.नि.व ११।

तिन्तिड़ीकम्। क्ली। वृक्षास्ले। तेँतुल। अम.। सि. यौ. स्वरभेद. चि. चव्यादिलिहे। पुं। अम्लवेतसे। वै.निघ.।

तिन्तिड़ीद्युतम्। क्ली। वृक्षभेदे। काँईबीचिर खोला।

तिन्तिड़ी(ली)फलम्। क्ली। वृक्षास्ले। तेँतुल। गहा आदा। रा.नि.व.६। जैपालबीजे। प.मु.।

तिन्तिणी (ला) (लि(ली)का) (ली)। तिन्तिड़ी। अ.टी.। श्र.र.। वै.निघ. ग्रहणी चि. यमान्यादिचूर्णे।

तिन्तिराङ्गम्। क्ली। वज्रलौहे।

तिन्दिशः। पुं। टिण्डिशवृक्षे। रा.नि.व.७।

तिन्दुः (कः)। पुं, क्ली (कम्)। (Diospyros glutinosa or D. Cordifolia or D. Embryoptoris.) स्वनामप्रसिद्धवृक्षे तत्फले च। गाव, तेँद, माकुड़ा केँदु। हिं तेँद, माकड़ाकेँद, गाव्। मं टेम्बरुणि। कं रूंबुरु। ते तमिक्। ता. तुम्बिक। वस्. तिन्बोरी। तत्पर्य्यायः,—स्फूर्ज्जकः, कालस्कन्धः, शितिसारकः (अ.), स्फूर्ज्जकः, केन्दुः, तिन्दुः, तिन्दुलः, तिन्दुकी (शब्दर.), नीलसारः, अतिमुक्तकः, स्वर्य्यकः, रामणः, स्फूर्ज्जनः, स्यन्दनाह्वयः, कालसारः। च. सू. ४ अ.। सु.सू.३८अ.न्यग्रोधादिः। फलगुणाः—स्वादामं तिन्दुकं ग्राहि वातलं शीतलं लघु। पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु॥ भा. आसव.। अक्षीणं लघु संग्राहि स्निग्धं पित्ताग्निवर्द्धनं। आमं कषायं संग्राहि तिन्दुं वातप्रकोपनम्॥ सु.सू.४६अ.। तिन्दुकामं कषायं स्यात् संग्राहि वातकृत्परं। पक्वन्तु मधुरं स्निग्धं दुर्ज्जरं श्लेष्मलं गुरु॥" रा. नि. व. ११। (Diospyros melanoxylon.) Ebony tree. काकतिन्दुके। तिन्दुकभेदे। केँद, आवलूश। हिं केन्दु, तेन्दु। तं तुमि, तुम्कि। ता. तुम्बि। कुचेलके। तिण्डिशे। टेँड़श। वै.निघ.। क्ली। कर्षे, २ तो.। प.प्र.१ख.।

तिन्दुकाक्षतिफलः } पुं। द्वीपान्तरखर्ज्जूरी-
तिन्दुकाभफलः। } वृक्षे। पिण्डीखेजुर। वै.निघ.।

तिन्दुकास्थि। क्ली। तिन्दुकबीजे। तेँदफलेर बीज।

तिन्दुकिः। स्त्री। तिन्दुकवृक्षे। श्र. र.।

तिन्दुकिनी। स्त्री। आवर्त्तकीलतायां। आँएगोड़ा। रा.नि.व.३।

तिन्दुकी (इन्)। पुं। तिन्दुकवृक्षे। गाव-गाछ। र.मा.। श्र.र.।

तिन्दुजः (कः)। पुं। खीरवृक्षे। प.मु.। च. द. परिणामशूले।

तिन्दुलः। पुं। तिन्दुकवृक्षे। श्र.र.।

तिन्दुबीजम्। क्ली। केवुकबीजे। केँउ बीज। र.चि.क्रमि.चि.।

तिमिः। पुं। सागरजमहामत्स्ये। तिमि माछ। गुणाः—"सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः। उष्णा वातहरा हृद्या वर्च्यास्ते श्लेष्मवर्द्धनाः। बलावहा विशेषेण मांसाशित्वात्समुद्रजाः॥" सु.सू.४६अ.।

तिमिकोषः। पुं। समुद्रे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिमिङ्गिलः। पुं। सागरजाते तिमितोऽपि महति मत्स्ये। अयन्तिमिभक्षकः तद्भक्षणश्च। अम.।

तिमिङ्गिलगिलः। पुं। राघवमत्स्ये। अयं तिमिङ्गिलभक्षकः। राघव बोयाल। हे.च.।

तिमितः। त्रि। क्लिन्ने। भिजे। रा.

तिमिरः (रोगः)। पुं, क्ली। लिङ्गनाशापरनामधेये नेत्ररोगविशेषे। रातकाणा। हिं नजला। तच्च षड्विधं वातपित्तकफरक्तसंसर्गसन्निपातभेदेन। निदानादि यथा—दोषाश्चतुर्थपटलमाश्रित्य तिमिरमुत्पादयन्ति। तेन साकल्येन दृष्टिरोधी भवति। गाढे च तस्मिन् तेजःपदार्थमपि न दृश्यते। "तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः। रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतःपरम्। अस्मिन्नपि तमीभूते नातिरूढे महागदे। चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतं। निर्म्मलानि च तेजांसि भाजिष्णून्यथ पश्यति॥ शिरानुसारिणि मले प्रथमं पटलं श्रिते। अव्यक्तमीक्षते रूपं व्यक्तमन्यनिमित्ततः। प्राप्ते द्वितीयं पटलमभूतमपि पश्यति। भूतन्तु यन्नादासन्नं दूरे सूक्ष्मञ्च नेक्षते। दूरान्तिकस्थं रूपञ्च विपर्य्यासेन मन्यते। दीपे मण्डलसंस्थाने मण्डलानीव पश्यति। द्विधैकदृष्टिमध्यस्थे बहुधा बहुधास्थिते। दृष्टेरभ्यन्तरगते क्रमवृद्धविपर्य्ययम्। नान्तिकस्थमथ संस्थे दूरगं नोपरिस्थितं। पार्श्वे पश्येन्न पार्श्वस्थे तिमिराख्योऽयमामयः॥" वातजे यथा—"...वाते तु सङ्कीर्य्यते दृक्शिराः। दृक्खण्डं विश्रुत्यन्ती गम्भीरा दृगसौ मृता॥" पित्तजे यथा—"पित्तजे तिमिरे विद्युत्खद्योतोद्योतदीपितम्। शिखितित्तिरपिच्छाभं प्रायो नीलञ्च पश्यति॥" कफजे यथा—"कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति। शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम्। रक्तेन तिमिरे रक्तं तमीभूतञ्च पश्यति। संसर्गसन्निपातेषु विद्यात् सङ्कीर्णलक्षणम्॥" वा.उ.१२अ.। अस्य नेत्ररोगविशेषे। झाँश्या। लक्षणं—"कदाचिद्दीप्यते रूपं कदाचिच्च न दीप्यते। तिमिरं तं विजानीयात् लिङ्गेनानेन बुद्धिमान्॥" ज.द.३० अ.। लौहकिट्टे। ताम्रे। त्रिका.। जलजवृक्षभेदे। नखरञ्जनवृक्षे। मेंदी गाछ। द्रव्याभि.।

तिमिरा। स्त्री। हरिद्रायाम्। भैष.वातरक्तचि. विषतिन्दुकतैले।

तिमिरिः। पुं। मत्स्यभेदे। वै.निघ.।

तिमिरी (इन्)। पुं। इन्द्रगोपकीटे। वै.निघ.।

तिमिषः। पुं। कृमाखण्डलतायाम्। कुमुड़ा गाछ। त्रिका.। याम्यकर्कटिकायाम्। त्रिका.। तरम्बुजलतायाम्। नाटाम्बे। हारा.।

तिमी। स्त्री। तिमिमत्स्ये। द्विरूपकोषः।

तिमीरकः। पुं। नखरञ्जकवृक्षे। मेइदि गाछ। प.मु.।

तिरश्ची। स्त्री। पशुपक्षिस्त्रियाम्। मादि।

तिरस्कारिणी। स्त्री। व्यवधायकवस्त्रे। अ.। कानात।

तिरिजिह्विकः। पुं। पारिजातवृक्षे। वै.निघ.। पालते।

तिरिटः। पुं। इक्षुदण्डे। वै.निघ.।

तिरिटिः। पुं। इक्षुयन्त्रौ। श.रा.।

तिरिणीकण्टः। पुं। पारिजातवृक्षे। पालते मान्दार। वै.निघ.।

तिरिमः (रियः)। पुं। शालिधान्यभेदे। गुणाः—मधुरः स्निग्धः शीतलः दाहपित्तघ्नः रुच्यः विदोषघ्नः पथ्यश्च। रा.नि.व.१६।

तिरीटः। पुं, क्ली। लोध्रवृक्षे। प.मु.। रा.नि.व.६। भैष.नेत्ररो.चि.। किरीटे। उ.।

तिरीटकः। पुं। पट्टिकालोध्रे। त्रि.यो.रक्तार्शःचि.। भा.म.४भ.।

तिरीपशालिः। पुं। मासत्रयपक्वे शालिधान्यभेदे। वै.निघ.।

तिर्य्यक्। पुं। चञ्चलधातौ। पारा। पचिजातौ। वै.निघ.।

तिर्य्यक्पातनम्। क्ली। पारदस्य पातनक्रियाविशेषे। तत्साधनविधिः—"घटे रसं विनिःक्षिप्य सजलं घटमन्यकम्। तिर्य्यङ्मुखं द्वयोः कृत्वा तन्मुखं रोधयेत् सुधीः। रसाधो ज्वालयेदग्निं यावत् सूतोजलं विशेत्। तिर्य्यक्पातनमित्युक्तं सिद्धैर्नागार्जुनादिभिः॥" र.सा.सं.।

तिर्य्यक्फला। स्त्री। जतुकालतायाम्। आँशमोड़ा। रा.नि.व.३।

तिर्य्यक्स्रोताः (स्)। पुं। पशुपक्ष्यादौ।

तिर्य्यक्च्छिन्नम्। क्ली। अस्थिभङ्गविशेषे। See भग्नम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिर्य्यग्गतः। त्रि। सन्निस्थानं त्यक्त्वा वक्रं गते। भा.म.३भ.भग्न.त्रि.।

तिर्य्यग्गा। स्त्री। पूतनीशाके। पूदिना। प.मु.।

तिर्य्यग्गामी (न्) । पुं। कर्कटे। वै.निघ.।

तिर्य्यग्यन्त्रम्। क्ली। पारदस्य तिर्य्यक्पातनार्थं यन्त्रविशेषे। "अधःपाति लघोर्भाण्डे त्रिभागजलपूरिते। तोयमग्न्यर्द्धभाण्डस्य तद्गाण्डीर्द्धविस्तृतं। विपेटं ज्वालयेद्वह्निं तस्योपरि च गोमयैः। तिर्य्यक्कृतञ्च तद्यन्त्रं तिर्य्यग्यन्त्रमुदीरितम्॥" रस.त्रि.।

तिर्य्यग्यवोदरम्। क्ली। यवधान्ये। वै.निघ.।

तिर्य्यग्यानः। पुं। कर्कटे। त्रिका.।

तिर्य्यग्योनिः। पुं। पशुपक्ष्यादौ। सुश्रु.।

तिर्य्यङ् (ञ्च्)। वि। विहङ्गादौ। मे.। पशौ। हे.।

तिर्य्यञ्ची। स्त्री। पशुपक्ष्यादौ। सुग्धबो.।

तिलः (कः)। पुं, क्ली,। (Sesamum Indicum.) स्वनामख्यातक्षुपे। तिल गाछ। प.मु.। हिं मिठातिल। सं तिल। कं एलु। तें नुव्वुलु, सञ्चिनूने नुव्वुलु। ता. वाल्लेन्नेय। फा. कुञ्जद। दा. वारिक तिल। तत्पर्य्यायः,—होमधान्यं, पवित्रः, पितृतर्पणः, पापघ्नः, पूतधान्यं (रा.), स्नेहफलः, स्नेहफलपूरफलः। श्वेतकृष्णरक्तवर्णभेदेन चतुर्धा। सा. गुणाः—स्निग्धः वर्ण्यबलाग्निवृद्धिकरः स्तन्यघ्नः वातघ्नः गुरुः उष्णः पित्तकरः सूक्ष्मलाघवकरः व्रणे हितः पथ्यः। संग्राही मधुरः कषायः तिक्तः कटुविपाकः पथ्यतमश्च। इति कृष्णतिलगुणाः। सितः अल्पगुणदः। रा. नि. व. १६। "कृष्णः श्रेष्ठस्तमस्तेषु शुक्लो मध्यमः सितः। अन्ये हीनतराः प्रोक्तास्तज्ज्ञैः रक्तादयस्तिलाः॥" भा.पू.१भ.धान्यव.। "तिलो विपाके मधुरो बलिष्ठः स्निग्धो व्रणालेपनपथ्य उक्तः। बल्योऽग्निमेधाजननो वरेण्यो सूक्ष्मस्य दोषाहरणो गुरुश्च। तिलेषु सर्व्वेष्वसितः प्रधानो मध्यः सितो हीनतरास्तथान्ये॥" अवि.१५अ.। तच्छाकगुणाः—"वातलं कटु तिक्तास्रमधोमार्गप्रवर्त्तकम्।" च. सू. २७ अ.। (कः) लोध्रवृक्षे। लोध गाछ। रा.नि.व.६। सरुवकवृक्षे। सरुआ कूलेर गाछ। तत्पर्य्यायः,—विशेषकः, सुखमञ्जनकः, पुण्ड्रः, पुण्ड्रकः, स्थिरपुष्पी, छिन्नरुहः, दग्धरुहः, मृतजीवः, तरुणीकटाक्षकामः, वासन्तसुन्दरः, दुग्धरुहः, बालविभूषणसंज्ञः, पुन्नागः, रेचकः (रा.)। गुणाः—मधुरः शीतः वातपित्तकफघ्नः बलपुष्टिकरः हृद्यः लघुः मेदोवृद्धिकरश्च। रा.नि.व.१०। कटुपाकः उष्णः रसायनः कफकुष्ठकृमिघ्नः बस्तिदन्तमुखरोगघ्नश्च। भा.। कैतकीवृक्षे। गुड़ूच्याम्। सुषव्याम्। ऊच्छे। रा.नि. व. २३। सूचाग्रये। अश्वविशेषे। मे.। तिलकालकरोगे। अम.। (कम्) क्ली। सौवर्च्चललवणे। रा.नि.व.६। काललौहे। गुड़े। कृष्णतिले। वै. निघ.। मस्तिष्के। क्लीम्नि। रा.नि.व. १८। कृष्णसौवर्च्चललवणे। काचलवणे। चिवके। त्रिका.।

तिलकटः। पुं। तिलपुष्परेणौ। तिलचूर्णे। वै.निघ.।

तिलकणः। पुं। भार्ज्जिततिले। भाजा तिल। च.सू.४अ.।

तिलकत्वक्। स्त्री। तिलवल्कले। तिलेर छाल। गुणाः—कषाया उष्णा पुंस्त्वघ्नी दन्तदोषहरी कफसिध्मकुष्ठघ्नी रक्तदोषघ्नी। रा.नि.व.१०।

तिलकन्दः। पुं। विषपर्णीकन्दे। रा.नि.व.७।

तिलकल्कः (ज)। पुं, क्ली। पीड़िततिलपिण्याके। तिलेर खोल। रा.नि.व.१६।

तिलका। स्त्री। कस्तुरीमृगभेदे। रा.।

तिलकालकः। पुं। क्षुद्ररोगभेदे। तिल। तत्पर्य्यायः,—तिलकः (अ.), कालकः, पिप्लुः, जड़ूलः (हे.)। लक्षणं—"कृष्णानि तिलमात्राणि नीरुजानि समानि च। वातपित्तकफोद्रेकात्तान् विद्यात्तिलकालकान्॥" भा.नि.। शुक्रदोषभेदे। "कृष्णानि चित्राख्यवा शुक्लानि सविषाणि च। पातितानि पचत्याशु सिद्धं निरवशेषतः॥ कालानि भूत्वा मांसानि शीर्य्यन्ते यस्य देहिनः। सन्निपातसमुत्थानं तं विद्यात्तिलकालकम्॥" सु.नि.१४अ.।

तिलकाश्रयः। पुं। ललाटे। ललाट। शब्दार्थकल्पतरुः।

तिलकिट्टम्। क्ली। तिलकल्के। तिलेर खइल। गुणाः—लेखनं रूक्षं विष्टम्भि वृद्धिदोषकरञ्च। भा.पू.१भ.।

तिलकी (न्)। वि। तिलकालकयुक्ते।

तिलकुट्टम्। क्ली। तिलकिट्टे। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिलखलिः। पुं। तिलकिट्टे। भा.।

तिलचित्रपत्रकः। पुं। तैलकन्दनामककन्दशाके। रा.नि.व.७।

तिलचूर्णम्। क्ली। तिलकल्के। तिलकुटो। तत्पर्य्यायः,—तिलकल्कं, पललं, पिष्टकम्। गुणाः—मधुरं रुच्यं रक्तपित्तबलपुष्टिकरञ्च। रा.नि.व.१६।

तिलच्छदः। पुं। ईहामृगे। वै.निघ.।

तिलजम्। क्ली। तैले। वै.निघ.।

तिलजटा। स्त्री। तिलमञ्जर्य्याम्। दुग्धेनैतत्क्वाथः आखुविषहरः। वा.उ.३८अ.।

तिलजा। स्त्री। तिलवासिनीशाली। हैमन्तिकधान्यविशेष। रा.नि.व.१६।

तिलतण्डुलकम्। क्ली। आलिङ्गने। अ.मा.। तिलतण्डुले। सतिलतण्डुले।

तिलतैलम्। क्ली। तिलभवतैले। तिलेर तेल। गुणाः—तीक्ष्णं लघ्वोष्णं चक्षुष्यं सूक्ष्मोष्णं कफक्लृत् वह्निविट्कं कृमिघ्नं स्रोतःशोधकं व्रणस्य धातुपुष्टिकरञ्च। वा.तैलव.। केश्यं मधुरं तिक्तं कषायम् उष्णं तीक्ष्णं बल्यं कफवातजन्तुखर्जुव्रणकण्डूतिहरं कान्तिकरञ्च। रा.नि.व.१५। "कषायानुरसं स्वादु सूक्ष्मघ्नं व्यवायि च। पित्तक्लेदातपशमनं श्लेष्मरोगादिवर्द्धनं। अल्पं रुचिकरं मेध्यं कण्डूकुष्ठविकारनुत्। वृष्यं व्रणापहं ज्ञेयं तिलतैलं विदुर्बुधः। छिन्ने भिन्ने च्युते दृष्टे भग्नेऽग्निदाहकेऽपि च। वाताभिष्यन्दिस्फुटने चाभ्यङ्गे तिलतैलकम्। विषे व्यालगुनः सर्पे भेकेऽभ्यङ्गावगाहने। पाने वस्तौ बलासे च तिलतैलं विधीयते। तिलतैलं विषेयं स्यात् सर्व्वरोगनिवारणे॥" अवि.१४अ.।

तिलनामा। स्त्री। तिलवासिनीशाली। रा.नि.व.१६।

तिलनालभूतिः। स्त्री। तिलनालचारे। तिलेर क्षार। गुणाः—अश्मरीघ्नः। च.द.अश्म.चि.।

तिलनी। स्त्री। तिलवासिनीशाली। रा.नि.व.१६।

तिलपर्णः। पुं, क्ली। श्रीवेष्ट। देवदारुनिर्य्यास। रा.नि.व.१२।

तिलपर्ण(क)म्। क्ली। रक्तचन्दने। भा.। श्रीखण्डचन्दने। श्वेतचन्दन। रा.नि.व.१२।

तिलपर्णिका। स्त्री। श्रीखण्डचन्दने, श्रीवेष्टके। अजगन्धायाम्। ब्राह्मीनि। रा.नि.व.२३। रक्तचन्दनवृक्षे। हे.च.।

तिलपर्णी। स्त्री। रक्तचन्दने। प.मु.। वै.निघ. २भ.ज्व.भैरवीगुट्यां। तिलवासिनीशाली। रा.नि.व.१६। "तिलोनी" नामकशाकभेदे। र.सा.सं.रसमारणे। गुणाः—लघुः कफशीतहरी च। सु.सू.४६अ.। चन्दने। वै.निघ.।

तिलपिच्चटम्। क्ली। तिलपिष्टके। तिलकुटो। कश्चित्।

तिलपिञ्जः। पुं। श्वेततिलवृक्षे। शोभा तिल। निष्फलतिलवृक्षे। अम.। वन्यतिले। काटतिल। वै.निघ.। [प.मु.।

तिलपिण्डी। स्त्री। तिलकल्के। तिल थईल।

तिलपिष्टकम्। क्ली। पलले, कुट्टिततिलकृतपिष्टके। तिलकुटो, तिलेर सन्देश। गुणाः—"पललन्तु समाख्यातं सैन्धवं तिलपिष्टकम्। पललं मलकृद्वल्यं वातघ्नं कफपित्तकृत्। वृंहणं गुरु वृष्यञ्च स्निग्धं मूत्रनिवर्त्तकम्।" भा.।

तिलपुष्पकः। पुं। विभीतकवृक्षे। वै.निघ.। व्याघ्रनखवृक्षे।

तिलपेजः। पुं। तिलपिञ्जे। श्वेत तिल, निष्फल तिल। वै.निघ.।

तिलभाविनी। स्त्री। जातीपुष्पवृक्षे। रा.नि.व.१०। [वै.निघ.।

तिलभेदः। पुं। खाखसवृक्षे। पोस्त गाछ।

तिलमयूरः। पुं। पक्षिभेदे। तिले मयूर। तत्पर्य्यायः,—गुरुष्टकः। विङ्का.।

तिलमलम्। क्ली। तिलकिट्टे। के.।

तिलमोदकः। पुं। तिलगुडुके। वै.निघ.।

तिलरसः। पुं। तिलतैले। वै.निघ.।

तिलवासिनी (सी)। स्त्री, पुं। स्वनामख्यातशालिधान्यविशेषे। हैमन्तिक धान्यविशेष। गुणाः—पित्तकफघ्नी स्निग्धा कासश्वासहरा शीघ्रपाककारी लघुः हृद्या शुक्रवर्द्धिनी महागुणा पाण्डुशूलामवातेषु प्रशस्ता च। रा.नि.व.१६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिलशालिः। पुं, स्त्री। तिलवासिशालौ। रा.नि.व.१६।

तिलश्राणा। स्त्री। खिचड्याम्। खिचूड़ी। प.मु.।

तिलस्नेहवम्। क्ली। तैले। वै.निघ.।

तिलस्नेहः। पुं। तिलतैले। (शब्दकल्पतरुः)।

तिलाङ्किततरुः। पुं। तैलकन्दे। रा.नि. व ७। See तैलकन्दः।

तिलापत्या। स्त्री। क्षणजीरके। श.च.।

तिलित्सः। पुं। गोनाससर्पे। अम.।

तिलौदनम्। क्ली। तिलान्ने। हारा.।

तिल्वम्। क्ली। तिलबीजे। रा.नि.व.२।

तिल्वः (ल्वः) (कः)। पुं। मरुवकवृक्षे। मकुआ कुलेर गाछ। र.मा.। रोध्रवृक्षे। अम.। श्वेतरोध्रे। रक्तरोध्रे। अ.टी.सप्तति.खा.। रोध्राकारि वृक्षत्वचि रक्तवेरेचनिकवृक्षे। सु. सू. ३८ अ.। श्यामादिः ड.। वा.सू.१५अ.। खल्वरोध्रे। सु.सू. ३९ अ.। अधःसंशमने। इक्षुदीवृक्षे। वै. निघ. विषमज्व. कोलादिवृते।

तिल्वकतरुः। पुं। लोध्रवृक्षे। वै.निघ.।

तिल्वनी। स्त्री। कर्णस्फोटायाम्। कांणछिड़ा। वै.निघ.।

तिष्यः (कः)। पुं। पौषमासे। श.र.। आमलकवृक्षे। असनवृक्षे। वै.निघ.।

तिष्यदृगुः। पुं। सन्ध्यायाम्। भट्टि.।

तिष्यपुष्या (फला)। स्त्री। आमलकीवृक्षे। श.च.। अम.।

तिष्या। स्त्री। आमलकीवृक्षे। श.र.।

तिस्रा। स्त्री। अङ्गपुत्रीलतायाम्। वै.निघ.।

तिह्मन्। पुं। तण्डुले। वि। रोगिणि। उणा.। धनुषि। सं.सा.।

तीरः। पुं, क्ली। वङ्गे। मे.।

तीरणः। पुं। करञ्जिकायाम्। वै.निघ.।

तीरभुक्तिः। पुं। त्रिहुदितिख्याते देशभेदे। त्रि.।

तीर्णपदी। स्त्री। सुषवीकन्दे। तालमूली। श.च.।

तीर्थम्। क्ली। स्त्रीरजसि। मे.। योनौ। हे. च.। अग्नौ। निदाने। उणा.। स्त्री। कदलीवृक्षे। रा.नि.व.११।

तीर्थवाकः। पुं। केशे। हे.च.।

तीर्थसेवी (विन्)। पुं। वकपक्षिणि। रा. नि. व १९।

तीवरः। पुं। समुद्रे। अ.।

तीव्रम्। क्ली। लौहे। तीक्ष्णलौहे। रा. नि. व. १३। वङ्गे। उणा.। त्रि। तीक्ष्णे। कटुनि। त्रिका.।

तीव्रकन्दः (ष्ठः)। पुं। शूरणे। ओल। कटुशूरणे। वुनो ओल। रा.नि.व.७।

तीव्रगन्धा(न्धिका)। स्त्री। यमान्याम्। रा. नि. व. ६।

तीव्रज्वाला। स्त्री। धातकीवृक्षे। रा.नि.व.९।

तीव्रवेदना। स्त्री। अतिवेदनायाम्।

तीव्रशक्तिः। स्त्री। कटुवीरायाम्। लक्ष्मणश्चिच। अ.।

तीव्रसन्तापः। पुं। श्येनपक्षिणि। बाज पाखी। वै.निघ.।

तीव्रा। स्त्री। महाज्योतिष्मतीलतायाम्। बड़ लताफट्‌की। तरटीवृक्षे। तुलसीवृक्षे। रा. नि. व. ६।८।१०। धातकीवृक्षे। पाण्डुशिग्रुपायाम्। वै.निघ.। गण्डदूर्व्वायाम्। राजिकायाम्। राई। कटुक्याम्। मे.।

तीक्ष्णः। पुं। क्षणसर्षपे। विषे। अम.। तिक्तायाम्। यवक्षारे। चाणक्यमूलके। रेचनधूमपानविशेषे। तत्र धूमनाड्यौ २४ अङ्गुलयः, धूपद्रव्याणि च तीक्ष्णानि भाव्यानि। अम्लवेतसे। श्वेतशिग्रौ। छिक्किन्यां। श्वेतसर्षपके। कृष्णशिग्रुपायां। पुंरोगे। वै.निघ.। सितदर्भे। कुन्दुरौ। कुन्दुरुकोटौ। रा.नि.व.८।१२। क्ली। सूक्ष्मिकालवणे। तीक्ष्णवस्तुनि। हीरकादौ। खर्परधातौ। वै.निघ.। लवङ्गे। लौहे। प.मु.। तीक्ष्णलौहे। र.मा.। लवणे। सुष्कके। मे.। मरिचे। वै.निघ. २भ.अतिसा.चि. देवदार्य्यादिः। चविकायां। रा. नि व.६। मूलके। अम.। त्रि। तीव्रगुणभूयिष्ठे। तदाश्रयद्रव्यं पित्तकरं वातकफघ्नं लेखनञ्च। सु.।

तीक्ष्णकः। पुं। सिद्धार्थे। श्वेत सरिषा। रा. नि.व.१६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीक्ष्णकण्टः (कः)। पुं। यासवृक्षे। क्षुद्र दुरालभा। रा.नि.व.४। इक्षुदीवृक्षे। करीरवृक्षे। वर्वरकवृक्षे। रा.नि.व.८। धुस्तूरवृक्षे। जटा.। क्षुद्रीवृक्षे। वै.निघ.। क्ली। धुस्तूरफले।

तीक्ष्णकण्टका। स्त्री। कन्यारीवृक्षे। रा.नि. व.८। फणिवल्लीवृक्षे। फणिमनसा। वै.निघ.।

तीक्ष्णकन्दः। पुं। पलाण्डौ। रा.नि.व.७।

तीक्ष्णकल्कः। पुं। रेचनाख्यधूमपानकल्के। स च व्यूषणादिः। भा.। कुस्तुम्बुरुवृक्षे। तीक्ष्णमूल फल, नेपालि धने'। रा.नि.व.६।

तीक्ष्णकीलः (कः)। पुं। अकर्करे। शुक्रमदन-वृक्षे। वै.निघ.।

तीक्ष्णगन्धः (कः)। पुं। पलाण्डौ। भैरवी-वचायां। शीभाञ्जनवृक्षे। गन्धतुलस्यां। प.मु.। चक्रवृक्षे। हेँचेता। रा. नि. व. ९। कृष्ण-शिग्रौ। एलायां। कृष्णार्ज्जके। फणिज्झकवृक्षे। वै.निघ.। कुन्दुरुखोटौ। शब्दार्णवः। महाराजप्र. सा.तैले।

तीक्ष्णगन्धा। स्त्री। सूक्ष्मैलायां। र.मा.। श्वेत-वचायां। कन्यारिवृक्षे। रक्तसर्षपे। राँई। रा.नि. व.६।८।१६। वचायां। मे.। भा.म.४भ. क्षुद्रौ. चि.। जीवन्त्याम्। शु.च.। श्वेतशोरके। वै.निघ.।

तीक्ष्णगन्धोग्रा। स्त्री। शुक्लवचायां। वै.निघ.।

तीक्ष्णगुणकर्म्म। क्ली। तीक्ष्णद्रव्यगुणक्रिया-याम्। तत् दाहपाककरं स्रावणं मृदु च। सु.।

तीक्ष्णतण्डुला। स्त्री। पिप्पल्याम्। प.मु.। रा.नि.व.६। भा.पू.१भ.।

तीक्ष्णतरुः। पुं। पीलुवृक्षे। वै.निघ.।

तीक्ष्णतैलम्। क्ली। मद्ये। सर्जरसे। क्षुद्री-क्षीरे। शु.र.। ज्योतिष्मतीतैले। लताफट्किरी तैल। रस.र.।

तीक्ष्णत्वक्। पुं। तुम्बुरौ। नेपालि धने'। वै.निघ.।

तीक्ष्णदंष्ट्रः (कः)। पुं। व्याघ्रे, चित्रकव्याघ्रे। रा.नि.व.१९।

तीक्ष्णदग्धा। स्त्री। कीडगे ख्याते यावनाल-वृक्षे। वै.निघ.।

तीक्ष्णद्रुः। पुं। पीलुवृक्षे। वै.निघ.।

तीक्ष्णपत्रः। पुं। कुमरिचे। लङ्कामरिच। प.मु.। तुम्बुरुवृक्षे। रा.नि.व.११। रक्तेक्षौ। इक्षुदीवृक्षे। वै.निघ.।

तीक्ष्णपर्णम्। क्ली। कर्म्मरङ्गवृक्षे। के.।

तीक्ष्णपुष्पम् (ष्पा)। क्ली, स्त्री। लवङ्गे। रा. नि.व.१२। (ष्पा) श्वेतकेतकीवृक्षे। रा.नि.व.१०।

तीक्ष्णप्रियः। पुं। यवे। वै.निघ.।

तीक्ष्णफलः। पुं। तुम्बुरुवृक्षे। रा.नि.व.११। क्ली। तेजःफले। वै.निघ.।

तीक्ष्णफला। स्त्री। राजसर्षपे। राँई सरिषा। रा.नि.व.१९।

तीक्ष्णमञ्जरी। स्त्री। नागवल्लीलतायाम्। पानेर गाछ। वै.निघ।

तीक्ष्णमूलः। पुं। कुलञ्जनवृक्षे। रा.नि.व.९। शिग्रुवृक्षे। सजिने गाछ। रा.नि.व.७।

तीक्ष्णरसः। पुं। यवक्षारे। र.मा.।

तीक्ष्णलौहम्। क्ली। रुक्मलौहे। इस्पात, विदरीति भाषा। गुणाः—रुचम् उष्णं तिक्तं वातपित्तकफप्रमेहपाण्डुशूलघ्नं सुखाधिकगुणञ्च। रा.नि.व.१३।

तीक्ष्णवल्कः। पुं। तुम्बुरुवृक्षे। रा.नि.व.११।

तीक्ष्णवृक्षः। पुं। पीलुवृक्षे। वा.टी.हेमा., अरुणद्य। सू.१५अ.श्यामादिः।

तीक्ष्णशूकः। पुं। यवे। प.मु.। रा.नि.व.१९।

तीक्ष्णसारः। पुं। मधूकवृक्षे। मउल गाछ। कृष्णशिंशपायाम्। घण्टापाटलायाम्। घण्टा-पारुल। लौहे। वै.निघ.। स्त्री। कृष्णशिंशपायां। काल शिशु वा अगुरु। रा.नि.व.९।

तीक्ष्णा। स्त्री। अत्यल्पपर्ण्याम्। वचायाम्। सर्पकङ्कालिकालतायाम्। प.मु.। चविकायाम्। रा. नि. व. ६। महाज्योतिष्मतीलतायाम्। लता-फट्की। कपिकच्छौ। आलाकुशी। रा. नि. व. ३। छिक्किन्याम्। हेँचेता। वै.निघ.।

तीक्ष्णाग्निः। पुं। जाठराग्न्यन्यतमे अग्नौ। पाचक अग्निविशेष। "मात्रातिमात्राप्यग्नितां तीक्ष्णाग्नेः पचते सुखं। अतएव हि केनापि मतस्तीक्ष्णाग्निरुत्तमः॥" भा.। See अग्निः।

तीक्ष्णायसम। क्ली। तीक्ष्णलौहे। तिथा वा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईप्पाए। रा.नि.व.१३। तत्पर्य्यायः,—खोहं, शस्त्रायसं, शस्त्रं, पिण्डा, पिण्डायसं, शठं, आयसं, निशितं, तीव्रं, खड्गं, कुण्डितं, अयः, चिताायसं, चीनजं। गुणाः—रूक्षोष्णतिक्ततीक्ष्णत्वं वातपित्तकफप्रमेहपाण्डुशूलनाशित्वं सुखलोहादगुणाधिकत्वञ्च। रा.।

तुङ्गा(गा)क्षीरी। स्त्री। वंशलोचनायाम्। हे.च.। रा.नि.व.६। च.द.यक्ष्म.चि.सितोपलादिचूर्णे।

तुङ्गा (ख्या)। स्त्री। वंशलोचनायाम्। वंशलोचन। रा.नि.व.६। च.द.सि.यो.ख.मे.चि.। वा.सू.१५अ.।

तुङ्गः। पुं। पुन्नागवृक्षे। पुन्नाग गाछ। र.मा.। च.सू.४अ.। वृहदारकवृक्षे। सु.कल्प.८अ.। नारिकेलवृक्षे। भा.। गण्डके। गण्डार। रा.नि.व.१६। पद्मकेसरे। वै.निघ.। वि। उच्चे। प्रधाने। उच्चे।

तुङ्गकः। पुं। पुन्नागवृक्षे। श.र.। वृहदारकवृक्षे। पद्मकेसरे। वै.निघ.। [केशरे।

तुङ्गकेशरः। पुं। पुन्नागवृक्षे। प.मु.। नाग-

तुङ्गभद्रा। स्त्री। दक्षिणदेशप्रसिद्धनद्यां। तज्जलं स्निग्धं निर्म्मलं स्वादु गुरु कण्डूपित्तजनकं सात्मेा पथ्यकरञ्च। रा.नि.व.१४।

तुङ्गवृक्षः। पुं। नारिकेलवृक्षे। वै.निघ.।

तुङ्गस्कन्धफलः। पुं। नारिकेलवृक्षे। भा. आम्रवर्गे।

तुङ्गा। स्त्री। वंशलोचनायाम्। रा.नि.व.६। वै.निघ.अ.सा.चि.वृहल्लवङ्गादिचूर्णे। शमीवृक्षे। रा.नि.व.८। अल्पशमीवृक्षे। च.वि.८अ.।

तुङ्गारिः। श्वेतकरवीरवृक्षे। र.।

तुङ्गाक्षीरी। स्त्री। वंशलोचनायां। वै.निघ.।

तुङ्गिनी। स्त्री। महाशतावर्य्यां। रा.नि.व.४।

तुङ्गी। स्त्री। कर्णस्फोटायां। कर्णछिड़ा। वै.निघ.। वनतुलस्यां। हरिद्रायाम्। मे.। वर्व्वरीवृक्षे। शब्दर.।

तुङ्गोनसः। पुं। प्राणनाशकजन्तुविशेषे। सु.कल्प.८अ.।

तुङ्गोपतिः। पुं। चन्द्रे। त्रि.।

तुङ्गोशः। पुं। सूर्य्ये। शब्दर.।

तुच्छम्। क्ली। पुलाकजे, तुषे। भूषि। उणा.।

तुच्छद्रुः। पुं। एरण्डवृक्षे। श.च.।

तुच्छधान्यकम्। क्ली। नीवारधान्ये। उड़िधान। पुलाक। आगड़ा। र.मा.।

तुच्छा। स्त्री। गोलीवृक्षे। तुत्थके। भा.।

तुटुमः। पुं। मूषके। त्रिका.।

तुड़ी। स्त्री। आढ़क्यां। अरहर। र.मा.।

तुणः (णिः) कः। पुं। नन्दिवृक्षे। तूण गाछ। अ टी.खा.।

तुण्डम्। क्ली। मुखे। रा.नि.व.१८।

तुण्डकी। स्त्री। करञ्जवल्ल्यां। वै.निघ.।

तुण्ड(ण्डि)केरिः (रिका) (री)। स्त्री, पुं। कार्पास्याम्। कार्पास गाछ। बिम्बिकायां। तेलाकुचा। अ.टी.खा.। रा.नि.व.४। वनकार्पासीफले। (कः, का) तन्नामकतालुरोगविशेषे, शिश्नीगलरोगभेदे। लक्षणम्—"शोथः स्थूलस्तीव्रदाहप्रपाकौ श्लेष्मासृग्भ्यां कीर्त्तिता तुण्डिकेरी।" भा.। सु.। "हनुसन्धाश्रितः कण्ठे कार्पासीफलसन्निभः। पिच्छिलो मन्दरुक् शीघ्रः कठिनस्तुण्डिकेरिकः॥" वा.उ.२१अ.। वायव्यकीटविशेषे। तद्दष्टे वातजन्यरोगा भवन्ति। सु.कल्प.८अ.।

तुण्डाहतदष्टकम्। क्ली। अदंष्ट्राकृतदंशे। छोबलान। "यच्च लालापरिक्लेदमात्रं गात्रे प्रदृश्यते। न तु दंष्ट्राकृतो दंशः तत्तुण्डाहतमादिशेत्॥" वा.उ.३६अ.।

तुण्डि(ण्डी)। पुं, स्त्री। मुखे। पचिचचौ। पाथीर ठोंट। उणा.। स्त्री। शिश्नीनाभिगण्डरोगे। गोंड़। लक्षणं यथा—"वातेनाक्षिपिता नाभिः सरुजा तुण्डिरुच्यते।" भा.। सु.शा.१०अ.। नाभौ। श.र.। अरण्यबिम्बिकायाम्। रा.नि.व.२३। देवधान्ये। वै.निघ.। (ण्डी) काकादनीवृक्षे। र.।

तुण्डिका। स्त्री। पीलुपर्ण्याम्। रा.नि.व.२३। बिम्बिकायाम्। तेलाकुचा। नाभौ। श.र.। कार्पास्याम्। काकजङ्घायाम्। कुन्दुरुलतायाम्। कुन्दूरुकी। वै.निघ.।

तुण्डिकेरि(री)फला। स्त्री। कुन्दुरुलतायाम्, मधुरबिम्ब्याम्। कुन्दूरुकी। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुण्डिकेरुफला। स्त्री। तन्नामगलरोगविशेषे। वै.निघ.।

तुण्डिकेशी। स्त्री। बिम्बिकायां। अ.टी.।

तुण्डिभः (लः)। त्रि। पुष्टे। बृहन्नाभियुक्ते। अम.।

तुत्थ(क)म्। क्ली। Sulphate of copper. ताम्रक्षीपधातौ खनामख्यातपक्षद्रव्ये। तूँतिया। र.सा.। तुत्थं द्विविधं मयूरं खर्परीतुत्थञ्च। तत्पर्य्यायः,—नीलाञ्जनं, हरिताश्म, तुत्थकं, मयूरग्रीवकं, ताम्रगर्भं, अमृतोद्भवं, मयूरतुत्थं, शिखिकण्ठं, नीलं (रा.), तुत्थाञ्जनं, शिखिग्रीवं, वितुत्तकं, मयूरकं (अ.), भूतकं, मूषातुत्थं, मृतामदं (श.), हंससारं। र.चि.। गुणाः—"तुत्थं कटु कषायोष्णं स्निग्धनेत्रामयापहं। विषदोषेषु सर्व्वेषु प्रशस्तं शान्तिकारकं। खर्परी कटुका तिक्ता चक्षुष्या च रसायनी। त्वग्दोषशमनी रुच्या दीप्या पुष्टिविवर्द्धनी॥" रा.नि.व.१३। "तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत्। किञ्चित्ताम्रगुणं तस्मात् वक्ष्यमाणगुणञ्च तत्॥" भा.पू.१भ.। क्षारं निर्म्मलं लघु भेदकं कृमि-कण्डू-कुष्ठ-कफपित्तघ्नम्⊥ राज.। "गन्धकेन पचेत्तुत्थं तुत्थार्द्धेनार्द्धयामकं। वान्तिभ्रान्तौ यदा न स्तः तदा शुद्धिं विनिर्द्दिशेत्॥" इति शुद्धिः। सा.कौ.। अन्यच्च—"त्रिष्ठया मर्द्दयेत्तुत्थं मार्ज्जारककपोतयोः। दशांशं टङ्कणं दत्त्वा पचेल्लघुपुटे ततः। पुटं दत्त्वा पुटङ्गौद्रैः देयं तुत्थविशुद्धये॥" भा.। कृत्रिमरसाञ्जने। चक्षा.।

तुत्थखर्परिका (री)। स्त्री। खर्परिकायां। खांपड़ा। वै.निघ.।

तुत्थनी। स्त्री। एलायां। शिवलिङ्गिन्यां। वै.निघ.।

तुत्था। स्त्री। नीलीवृक्षे, महानील्यां। रा.नि.व.४। क्षुद्रेलायां। अम.।

तुत्थाञ्जनम्। क्ली। तुत्थे। अम.।

तुनिकः। पुं। तूनीवृक्षे।

तुन्तुभः। पुं। सर्पवृक्षे। भा.पू.१भ.धान्यव.।

तुन्दम्। क्ली। उदरे। रा.नि.व.१८।

तुन्दः। पुं। स्थविरे। रा.नि.व.२०। नाभौ। त्रिका.।

तुन्दकूपिका (पी)। स्त्री। नाभ्याम्। हे.च.। त्रिका.।

तुन्दपरिमार्जः (मृजः)। त्रि। अलसे। अ.टी.र.।

तुन्दि। क्ली। उदरे। हे.च.। स्त्री। नाभौ। त्रिका.।

तुन्दिकः। पुं। पृथूदरमानुषे। स्त्री। नाभौ। श.र.।

तुन्दिकरः। पुं। नाभौ। त्रिका.।

तुन्दिका। स्त्री। नाभौ। शब्दर.।

तुन्दिभः (लः)। त्रि। स्थूलोदरे। भूँड़ा। श.र.।

तुन्दिलफला। स्त्री। चपुषीलतायाम्। रा.नि.व.७।

तुन्दी। स्त्री। नाभौ। श.र.।

तुन्नः (कः)। पुं। (Cedrela Toona.) वृक्षविशेषे, तूणीवृक्षे। तुन्द गाछ। हिं महानिम, तुन्। उत् महालिम्बु। पुं, द्वावौ। अ.म.। त्रि। पीड़िते।

तुन्नकारिका। स्त्री। भूम्यामलक्याम्। वै.निघ.।

तुन्नसेवनी। स्त्री। शिरःकटीकपालसन्धिदेशेषु। सु.शा.५अ.।

तुभः। पुं। वर्करे। बोका छागल। वै.निघ.।

तुमुलः। पुं। विभीतकवृक्षे। बे.।

तुम्बः (कः)। पुं। अलाब्वाम्। लाउ। प.मु.। श.र.।

तुम्बकम्। क्ली। धन्याके। धनिया। कन्दर्पसा. टैले।

तुम्बरुः। पुं। तुम्बुरौ। नेपालि धने'। वै.निघ.।

तुम्बा। स्त्री। अलाब्वाम्। प.मु.। तिक्ततुम्ब्याम्। वै.निघ.।

तुम्बिः। स्त्री। तिक्ततुम्ब्याम्। अलाब्वाम्। श.र.।

तुम्बिका। स्त्री। कटुतुम्ब्याम्। रा.नि.व.३।

तुम्बिनी। स्त्री। कटुतुम्ब्याम्। रा.नि.व.३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुम्बी। स्त्री। अलाब्वाम्। प.मु.। कटुतुम्ब्यां। तिंत्लाउ। भा.। पुं (इन्)। सरलवृक्षे। रा.नि. व.१२। विम्बिकाफले। कुलिकवृक्षे।

तुम्बीतैलम्। क्ली। गलगण्डाधिकारे तैलम्। कटुतैल ४ प्र. पुराणतिक्तालाबूरसः १६ प्र.। कल्कार्थं—विड्गं यवक्षारः सैन्धवं वचा राम्ना चित्रकमूलं विकटु देवदारु एषां प्रत्येकं तौ.। भैष.। च.द.।

तुम्बीपुष्पम्। क्ली। अलाबुपुष्पे। लताम्बुजे। हारा.।

तुम्बुकः। पुं, क्ली। अलाब्वाम्। लाउ। हडडचन्द्रः।

तुम्बुरः (रौ)। पुं, स्त्री। तुम्बुरुवृक्षे। र.मा.। आर्द्रधान्यके। विका.। कुक्कुरस्त्रियां। मे.।

तुम्बुरुः। पुं, क्ली। (Xanthoxylon alatum. Syn. Z. hostile.) खनामख्यातफलवृक्षविशेषे। तेजबलेर गाछ, नेपालि ध'ने, ताम्बूल फल। हिं तेजबल, तुम्रू। सं तेन्दु। कं तुम्बुरु। तत्पर्य्यायः,—शूलघ्नः (रा.), सारजः, सौरभः, सौरः, वनजः, सानुजः, द्विजः, अन्धकः, तीक्ष्णकल्कः, तीक्ष्णफलः, तीक्ष्णपत्रः, सहासुनिः, स्फुटलः, सुगन्धिः। तत्फलं सरिचवत्। च.सू.३अ.। एतद्भावे धान्यकं गाह्यम्। गुणाः—मधुरः तिक्तः कटूष्णः वात-कफघ्नः शूल-गुल्मोदरानाह क्लमिघ्नः अग्निदीपनश्च। रा.नि.व.११। "तुम्बुरु प्रथितं तिक्तं कटु पाकेऽपि तत्कटु। रूचीष्णं दीपनं तीक्ष्णं रूच्यं लघु विदाहि च। वातश्लेष्माधिकर्णौष्ठशिरोरुग्गुरुताक्रमीन्। कुष्ठ शूलारुचि-श्वासप्लीहकृच्छ्राणि नाशयेत्॥" भा.।

तुर(ग,ङ्ग)गन्धा। स्त्री। अश्वगन्धायां। प.मु.।

तुरग(ङ्ग)हिष(ह्वेषि)णी। स्त्री। महिष्यां। रा.नि.व.१९। वै.निघ.।

तुरगप्रियः। पुं। यवे। रा.नि.व.१६।

तुरगशिफा। स्त्री। अश्वगन्धामूले। च.द.वा. व्या.चि.।

तुरगान्हा। स्त्री। अश्वगन्धायाम्। मद व.१। घोण्टायां। शेवाकुल। रा.नि.व.८।

तुरगी (इन्)। त्रि। अश्वारोहे। हे.च.। स्त्री। अश्वगन्धायां। घोण्टायां। रा.नि.व.४८। अश्व्यां।

तुरङ्गः (मः)। पुं। घोटके। अम.। चित्ते। ग.र.। क्ली। गन्धके। र.सा.सं.। सैन्धवे। अ.।

तुरङ्गकः। पुं। हस्तिघोषायां। र.सा.।

तुरङ्गरिपुः (ङ्गारिः)। पुं। करवीरवृक्षे। र.मा.। वै.निघ.२भ.विषमज्वरे। महिषे।

तुरङ्गा (ङ्गी)। स्त्री। अश्वगन्धायाम्। वै.निघ.। मद.व.१। प.मु.। घोण्टायाम्। घोण्टीवदर। रा.नि.व.८।

तुरङ्गारिः। पुं। करवीरवृक्षे। र.।

तुरङ्गिका। स्त्री। देवदालीलतायां। देश्या-ताड़ा। रा.नि.व.३। See अगरी।

तुरङ्गी। स्त्री। अश्वगन्धायाम्। शब्दर.। घोण्टिकावृक्षे। रा.।

तुरुष्कः। पुं। शिल्हके। शिलारस। प.मु.। सु.सू.३८अ.। वा. टी. हेमा.। अस्यास्तु क्वथनिर्य्यासविशेषमाह। वै.निघ.शतावरीनारायणतैले। च.द.वा.व्या.चि.१८अ.प्रतिकसंहाराजप्रसारणीतैले। तद्वृक्षीयाम्ये। ल.द.६अ.। घण्टापाटलवृक्षे। घण्टापारुल गाछ। श्वीवासे। तापिन तेलेर गाछ। प्राग्वृक्षे। विका.।

तुलम्। क्ली। ब्रह्मदारुनामवृक्षभेदे। अ.।

तुलसी। स्त्री। (Oci(y)mum sanctum.) Holy basil. स्वनामख्यातक्षुपे। तुलसी गाछ। हिं बरखा, तुलसी। सं तुलसीचेभाड़। तै कृष्ण, गग्गेरचेट्टु, इयुलसी, तुलसीचेट्टु। ता. तुलशी। दा. तुल्सी। वम्. तुलस। तत्पर्य्यायः,—सुभगा, तीव्रा, पावनी, विष्णुवल्लभा, सुरेज्या, सुरसा, कायस्था, सुरदुन्दुभिः, सुरभिः, बहुपत्री, मञ्जरी, हरिप्रिया, अपेतराक्षसी, श्यामा, गौरी, विदग्धमञ्जरी, भूतघ्नी, भूतपत्री (रा.), पर्णासः, वृन्दा, कठिञ्जरः, कुठेरकः (शब्दर.), वैष्णवी, पुण्या, पवित्रा, माधवी, अमृता, पवपुष्पा, सुगन्धा, गन्धहारिणी, सुरवल्ली, प्रेतराक्षसी, सुवहा, श्यामा, सुलभा, बहुमञ्जरी, देवदुन्दुभिः (भा.)। अन्या—(O. gratissimum.) रामतुलसी। हिं रामतुलसी। तें निम्मतुलसी। ता. एलुमिच्छम्-तोलसी। दा. रामतुलसी। अपरा—(Ocimum Basilicum.) See विष्णुतुलसी। क्षुद्रपत्र-तुलसी-गन्धतुलसी-कृष्णतुलसी विल्व(श्व)गन्धतुलसी-श्वेततुलसी वर्व्वरीतुलस्य इति षड्भेदा तुलसी।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा. गुणाः—कटुः तिक्तोष्णा वातश्लेष्मघ्नी सुरभिः क्रिमिघ्नी भूतघ्नी रुच्या वातशान्तिकरी। "तुलसी उभया च कासवातकृमिविषमिभूतापहारिणी पुता।" इति श्वेतकृष्णगुणाः। रा.नि.व.१०। "तुलसी कटुका तिक्ता ह्युष्णा दाहपित्तकृत्। दीपनी कृष्णकुष्ठश्वासपार्श्वरुक्फवातजित्॥" श्वेतकृष्णगुणाः—"शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता।" भा.।

तुलसीच्छद(पत्र)म्। क्ली। तुलसीपत्रे। वै.निघ.।

तुलसीद्वेषा। स्त्री। वर्ब्बर्याम्। बाबुई तुलसी। र.मा.।

तुला। स्त्री। ४०० तोलकपरिमाणे, पलशतमाने। तुलामाने। निक्ति। मे.। साष्टम्ये। विका.।

तुलाकोटिः (टी)। स्त्री। परिमाणभेदे। अर्ब्बुदे। हे.च.। कोटिसंख्यायाम्। वै.निघ.। नूपुरे। हे.।

तुला(लि)वीजम्। क्ली। गुञ्जायाम्। विका.।

तुलिका। स्त्री। क्षुपविकापक्षिणि। खञ्जन पाखी। विका.।

तुलिनी। स्त्री। शाल्मलीवृक्षे। रा.।

तुलिफला। स्त्री। शाल्मलीवृक्षे। र.।

तुल्यार्थता। स्त्री। एकसामान्यरूपार्थानुयोगितायां। च.सू.१अ.।

तुवरः (कः)। पुं। तुवरयवनाले। लाल काल जनार। रा.नि.व.१६। आढक्याम्। अरहर। (कः) कुधान्यभेदे। "पक्वैस्तु केशराकारैः कलायसदृशैः फलैः। वृक्षस्तुवरको नाम पश्चिमार्णवतीरजः॥ आरुष्करं तौवरकं कषायं कटुपाकि च। उष्णकृमिज्वरानाहमोहोदावर्त्तनाशनम्॥" सु.सू. ४६अ.। वा.उ.३९अ.। अश्मश्रुपुरुषे। खोंसा। अजातश्मश्रुगवि। अम.। वि। कषाये। मे.। तिक्ते। सु.सू.४५अ.।

तुवरयावनालः। पुं। स्वनामख्यातरक्तकृष्णश्मिश्रौधान्ये। ब्रक्क कृष्ण जनार। मं तूरेजी धन्ने। कं श्रीङ्गरजाल। तत्पर्य्यायः,—तुवरः, कषाययावनालः, रक्तयावनालः, लोहितकुसुम्भुरुधान्यं। गुणाः—कषायः उष्णः श्लेष्मघ्नः संग्राही वातशमनः विदाही श्लेषजनकश्च। रा.नि.व.१६।

तु(तू)वरिका (री)। स्त्री। (Cajanus Indicus.) आढक्याम्। अरहर। रा. नि. व. १६। भुजाढक्याम्। तोरिसेति खीके। टोंडोर कलाय। हिं तीरी। प.मु.। तत्पर्य्यायः,—मृत्, सौराष्ट्री, मृत्सा, आसङ्गं, मसी, सुराष्ट्रजा, मृत्तालकं, काली, मृत्तिका, सुरमृत्तिका, स्तुत्या, काचो, सुजाता, सौराष्ट्रा। गुणाः—कटुतिक्तकषाया उष्णा ग्राहिणी चतुष्या कृद्दिपित्तजम्वामाग्निनी च। रा.नि.व.१६। ग्राहिणी लघुः कफविषरक्तघ्नी तीक्ष्णा उष्णा दीपनी कण्डूकुष्ठकोष्ठकृमिहरी च। भा.पू.१भ.धा.व.। A kind of lentil (Cytisus Cajan.) मसूरकलाये। सौराष्ट्रमृत्तिकायां। मे.। गोपीचन्दने। तिलकमाटी। भा.। राजिकायाम्। श्वेत सरिषा। वै.निघ.।

तुवरीमृत्। स्त्री। सौराष्ट्रमृत्तिकायाम्। तिलकमाटी। पङ्कपर्पटी। रा.नि.व.१३।

तुवरीशिम्बः। पुं। चक्रमर्दवृक्षे। श.च.।

तुविः। स्त्री। तुम्ब्याम्। लाउ। श.मा.।

तुषः। पुं। विभीतकवृक्षे। तुषे। तूष। अम.।

तुषग्रहः। पुं। अग्नौ। त्रि.।

तुषजलम्। क्ली। तुषोदके। काँजिविशेष। अभावे काञ्जिकम्। सि.यो.वृहच्चुक्रसन्धाने।

तुषधान्यम्। क्ली। तुषे। तूष। र.मा.। रक्तशाल्यादौ। वै.निघ.। कङ्गादिकुधान्यवर्गे। यथा—"कङ्गुश्यैनः कोद्रवश्च श्यामाको वनकोद्रवः। शणबीजं वंशबीजं गवेधुश्च प्रसाधिका। तावल्येतानि चोक्तानि तुषधान्यानि वै नव॥"

तुषसारः। पुं। अग्नौ। शब्दमा.।

तुषसौवीरकम्। क्ली। सतुषयवकाञ्जिके, तुषोदके। वै.निघ.।

तुषस्वेदः। पुं। अश्वस्य वातव्याधौ स्वेदविशेषे। "सुतप्तकाञ्जिकैः स्विन्नं तुषं वह्वा पु(पृ)तं भिषक्। तुषस्वेदं तुरङ्गस्य धान्यैर्वापि प्रदापयेत्॥" ज.द. ३८अ.।

तुषानलः। पुं। तुषाग्नौ। हे.च.।

तुषाम्बु। क्ली। तुषोदके। विदलितामयवैः सहिते अम्लतां गते तुषाम्बुनि। "तुषाम्बु सन्धितं ज्ञेयमामैर्विदलितैर्यवैः। भाव.। गुणाः—"तुषाम्बु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीपनं हृद्यं हृत्-पाण्डु-पार्श्वरोगनुत् ग्रहण्यर्शो-विकारघ्नं मेदि सौवीरकं तथा ॥" सुश्रु.।

तुषाम्बुवटम्। क्ली। तुषाम्बुपक्वान्ने। वै.निघ.।

तुषाम्भः। क्ली। तुषाम्बुनि। भैष.र.पि.शूलचि.। "अम्लतुषाम्भसा।"

तुषारः। पुं। कर्पूरे। चीनकर्पूरे। रा.नि.व. १२। जलकणायां। मे.। "अपि नद्याः समुद्रान्ते वह्निरापत्तदुद्भवाः। धूमावयवनिर्मुक्ताः तुषारा-ख्यास्तु ताः स्मृताः॥" भा.। त्रि। शीतले। हिमे। मे.।

तुषारकालः। पुं। शरत्काले। वै.निघ.।

तुषारगौरः। पुं। कर्पूरे। भीमसेनीकर्पूरे। चीनकर्पूरे। वै.निघ.।

तुषाराम्बु। क्ली। नीहारजले।

तुषोत्थम्। क्ली। तुषोदके। सौवीरकाञ्जिके। रा.नि.व.१५।

तुषोदकम्। क्ली। सतुषयवकाञ्जिके। हारा.। सौवीरकाञ्जिके। रा. नि. व. १५। च. सू. ३अ.। तल्लक्षणं—"भृष्टान् माषतुषान् सिद्धान् यवांस्तु चूर्णसंयुतान्। आप्लुतानम्भसा तद्वज्ज्ञातं तच्च तुषोदकम्॥" च.। "तुषोदकं यवैरामैः सतुषैः शकलीकृतैः।" गुणाः—"तुषाम्बु दीपनं हृद्यं पाण्डुकृमिगदापहम्। तीक्ष्णं पाचनं पित्तरक्तकृत् वस्तिशूलनुत्॥" भा.। "तुषोदकं वातपित्ताहरन्तु प्रमेदकं रक्तपित्ताहरञ्च। विपाचकं स्याज्जरणं कृमिघ्नम् अजीर्णहन्तृ कटुकं विपाके॥" अवि.११ अ.। "तुषाम्बु दीपनं हृद्यं हृत्वाण्डुपार्श्वरोगनुत्। ग्रहण्यर्शोविकारघ्नं मेदि सौवीरकं तथा॥" सु.।

तुष्टिः। स्त्री। ब्रह्मौषधे। वै.निघ.।

तुसः। पुं। तुषे। अ.टी.र.।

तुस्तम्। क्ली। रजसि। धूलौ। के.।

तुहिनः। पुं। कर्पूरे। क्ली। हिमे। अम.। स्त्री। शुकनासायाम्। शोणा। वै.निघ.।

तुहिनांशुः। पुं। कर्पूरे। रा.नि.व.१२।

तुहिनांशुतैलम्। क्ली। कर्पूरतैले। रा.नि. व.१५।

तूणः। पुं। तूणीवृक्षे। तृण गाछ।

तूणि(णी)कः। पुं। (Cedrela Toona.) कोङ्कणे नन्दीवृक्षे इति ख्याते वृक्षे। तृण गाछ। हिं तूणि, महानिम्। उत्. महालिम्बु। पं द्रबी। तत्पर्य्यायः,—तूणीकः, तूणी, पीतकः, कच्छपः, नन्दी, कुठेरकः, कान्तः, तुन्नीकः, आपीनः, कच्छकः, कान्तलकः, नन्दीवृक्षः, नन्दकः, तूणीयकः। गुणाः—कटुः तिक्तः पीतः रक्तपित्त-दाहघ्नः शिरोवेदनाघ्नः श्वेतकुष्ठघ्नः सुगन्धिः पुष्टि-करः वीर्य्यकरश्च। रा.नि.व १२।

तूणी (इन्)। पुं। नन्दीवृक्षे। तृण गाछ। रा.नि. व.१२। "तूणी रक्तः कटुः पाके कषायी मधुरी लघुः। तिक्ती याही हिमी हृद्यो व्रणकुष्ठास्र-पित्तजित्॥" भा.। नीलीवृक्षे। वै.निघ.। स्त्री। वातव्याधिविशेषे। लक्षणं यथा—"अधो या वेदना याति वर्चोमूत्राशयोत्थिता। भिन्दतीव गुदोपस्थं सा तूणीत्युपदिश्यते॥" सु.नि.१अ.।

तूतः (दः)। पुं, क्ली। तूलकाष्ठे। गुणाः—"तूतं पक्वं गुरु स्वादु हिमं पित्तानिलापहम्। तदेवामं गुरु सरमस्रीणं रक्तपित्तकृत्॥" भा.आम्रव.। प्लक्षवृक्षे। रा.नि.व.९।

तूतकम्। क्ली। तुत्थे। श.च.।

तूरी। स्त्री। शुक्लधुस्तूरके। भा.।

तूर्णकः। पुं। शालिधान्यविशेषे। काश्मीरे आजव इति प्रसिद्धे। वा.सू.६अ.। [निघ.।

तूर्णिः। स्त्री। विष्ठायां। उणा.। मनसि। वै.

तूलः। पुं, क्ली। (Morus Indica or Morus Nigra.) स्वनामख्यातकाष्ठविशेषे। तूँत, पलाश पिप्पुल, आवलूष इति कश्चित्। हिं तूतरी, साहुड़। मं पारिसपिंपलु, वंगरलि। तें कम्बलिचेट्टु। ता. मधुकट्टइचेड़ि। तत्पर्य्यायः, —तूदः, ब्रह्मकाष्ठं, ब्राह्मणेष्टः, पूषकः, ब्रह्मदारु, सुपुष्पं, सुरूपं, नीलवल्लकं, क्रमुकः, विप्रकाष्ठं, मदसारः (रा.), पूषः (भा.)। गुणाः—मधुरान्नं वातपित्तघ्नं सरं दाहघ्नं कषायं हृद्यं कफघ्नञ्च। रा. नि. व. ९। मधुरान्नं हृद्यं दाहघ्नं कषायं कफघ्नं गुरु सारकम् अम्लम् उष्णं रक्तपित्त-करञ्च। भा.। कार्पासे। श्वेतधुस्तूरके। गयाश्रद्धे। अम.।

तूलकम्। क्ली। कार्पासे। हे.च.।

तूलग्रन्थिसमा। स्त्री। ऋद्धिनामकौषधौ। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तूलनालिका (लौ)। स्त्री। पिञ्जिकायाम्। पींजन। विका.। [टी.भ.।

तूलपिचुः। पुं। कार्पासे, तूले। तूला। अ.

तूलफलः। पुं। अर्कवृक्षे। आकन्द गाछ। रा.नि.व.१०।

तूल(लि)फला। स्त्री। शाल्मलीवृक्षे। र.मा.।

तूलवती (ग्या)। स्त्री। तूलशय्यायाम्। तोषक। भा.।

तूलवृक्षः। पुं। शाल्मलीवृक्षे। रा.नि.व.७।

तूलशर्करा। स्त्री। कार्पासबीजे। श.मा.।

तूला (लौ)। स्त्री। रक्तकार्पास्याम्। रा.नि. व.४। नीलीवृक्षे। भा.। वर्त्त्याम्। श.र.।

तूलिः (लि(लौ)का)। स्त्री। नील्याम्। रक्त-कार्पास्याम्। वै.निघ.। चित्रलिखन्यां। तूलि। अम.। वीरणादिशलाकायां। शय्योपकरणे। तोषक। मे.। वर्त्तौ। श.र.।

तूल(लि)नी (फला)। स्त्री। शाल्मलीवृक्षे। शिमूल गाछ। प.मु.। र.मा.। भा.। लक्ष्मणा-कन्दे। रा.नि.व.७।

तूवरः। पुं। See तुवरः। [श.र.।

तूस्तम्। क्ली। धूलौ। धूलो। मे.। सूक्ष्मे।

तूखम्। क्ली। जातीफले। श.च.।

तृट्। स्त्री। तृषायां। इच्छायां। मे.।

तृणम्। क्ली। कत्तृणे। गन्धतृण। रा.नि.व.८। खटे। नड़ादौ तृणवर्गे। "विधा वंशः कुशः कास-स्त्रिधा.....नलः। गुन्द्री मुञ्जो दर्भस्तथैचणकादि-गणस्तृणम्॥" अर्क.।

तृणकतैलम्। क्ली। कुष्ठाधिकारे तैलम्। पाठः—"मञ्जिष्ठारुङ्निशा - चक्रमर्दारग्वधपल्लवैः। तृणकखरसे सिद्धं तैलं कुष्ठहरं कटु॥" कटुतैलं ४श. चीणघासखरसः ४ श. जलं १६ श.। कल्कार्थं —मञ्जिष्ठा कुष्ठं (कुड़) हरिद्रा चक्रमर्दपत्र (चाकन्दार पाता) सोनालुपत्रं (सोन्दालपाता) एषां मिलित्वा शरावः (१ सेर)। रस.र.।

तृणकुङ्कुमम्। क्ली। काश्मीरदेशे खनात्रा प्रसिद्धे सुगन्धतृणे। कुङ्कुमघास् इति भाषा। सं तृणकेशर। गुणाः—कटूष्णं वातकफशीथघ्नं कण्डूति-पामाकुष्ठामदोषघ्नं दीप्तिकरञ्च। रा.नि.व.१२।

तृणकूटी। स्त्री। तृणाच्छादितगृहे। वि.। तत्पर्य्यायः—तृणौकः। हे.।

तृणकूर्म्मः। पुं। श्वेतालाब्वां। श्वेत लाउ। वै.निघ.। श.मा.। [निघ.।

तृणकेतकी। स्त्री। वंशलोचनविशेषे। वै.

तृणकेतुः (कः)। पुं। वंशे। बाँश। रा. नि.व.७।

तृणकेसरम्। क्ली। तृणकुङ्कुमे। रा.नि.व.१२।

तृणगन्धा। स्त्री। हट्टविलासिकलतायां। वै.निघ.।

तृणगोधा। स्त्री। सरटे। गिरगिटे। कृक-लासे। मे.। तृणजलौकायाम्। शब्दकल्प.।

तृणगोधूमः। पुं। स्वनामख्यातगोधूमे। घासि गम। प.मु.।

तृणगौरम्। क्ली। तृणकुङ्कुमे। रा.नि.व.१२।

तृणग्रन्थिः। पुं। स्वर्णजीवन्त्यां। रा.नि.व.३।

तृणग्राही (हिन्)। पुं, क्ली। नीलहीरके। प. मु.। नीलमणौ। कांकुरदाना। रा.नि.व.१२। तत्पर्य्यायः,—शूकापट्टः, तृणमणिः (हा.)।

तृणचरः। पुं। गोमेदमणौ। वै.निघ.।

तृणजलौका। तृणचरजलौकाविशेषे। चौने जोंक।

तृणद्रुमः। पुं। तालवृक्षे। केतकीवृक्षे। पूग-वृक्षे। खर्ज्जूरीवृक्षे। ताड़ीवृक्षे। तेड़ेए गाछ। नारिकेलवृक्षे। हिन्तालवृक्षे। हेँताल गाछ। एषां मज्जनिर्य्यासाः लघवः शीतला बल्या मोहना हृद्या तृषातापहराश्च। रा.नि.व.९।

तृणधान्यम्। क्ली। तृणोद्भवश्यामाकादौ। शामा धान प्रभृति। गुणाः—"श्यामाकः शीषणो रूक्षः वातलः श्लेष्मपित्तहा। जाड़िका कोद्रवश्चैव हस्तिश्यामाकचीनकौ। पीनसश्वास-कासोरुस्तम्भकण्ठगदान् जयेत्। कङ्गुकांश्यापि जानीयात् एतान् श्यामाकवद्गुणैः। जाड़िका तव कथिता बलासस्य विवर्द्धिनी। कोद्रवस्य परं ग्राही वातलः कफनाशनः॥" राज.३प.। See कुधान्यम्।

तृणधुक्। पुं। वाडवाग्नौ। वि.।

तृणध्वजः। पुं। वल्लजायां। उलू। रा.नि.व. ८। वंशे। अम.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृणनिम्बः। पुं। नेपालनिम्बे। चिरेता। रा.नि.व.९।

तृणपञ्चकम्। क्ली। तृणपञ्चमूलि। भा.।

तृणपञ्चमूलम् (ली)। क्ली, स्त्री। कुशकाशशरेक्षुदर्भेषु। दर्भ उलूपः। शरेक्षुदर्भकाशगालय इति चरकः। "श्वेतघीरं पिबेद्वापि पञ्चमूल्या तृणाख्यया॥" सि.यो.र.पिचि। गुणाः—तृणादाहपित्तरक्तमूत्रसङ्गहरी। "कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवं। पित्तक्लेच्छहरं पञ्चमूलं वस्तिविशोधनम्॥" भा.मू.क्ल.चि.।

तृणपञ्चमूलाद्यघृतम्। क्ली। अश्मर्य्यधिकारे घृतम्। गव्यघृतं ४ श्र.। क्वाथार्थं—कुशः काशः शरः इक्षु दर्भमूलं गोक्षुरः एषां प्र. १० प. वारि ६४ श्र. शे. १६ श्र.। कल्कार्थं—गुडूचीक्षुरबीजे प्र. ४ प.। भा.।

तृणपतिः। पुं। राजघासे। कांलाकर्पूर। के.।

तृणपत्रिका (त्री)। स्त्री। इक्षुदर्भायाम्। इक्षुदर्भा तृण। (त्री) गुण्डासिनीतृणे। रा.नि. व.८।

तृणपर्णम्। क्ली, पुं। चीनाखड़ इति प्रसिद्धतृणे। रस.र.महाभल्लातकगुड़े।

तृणपुष्पम्। क्ली। तृणकुङ्कुमे। रा.नि व.१२।

तृणपुष्पी। स्त्री। सिन्दूरपुष्पीवृक्षे। रा.नि.व. १०।

तृणपूलिकम्। क्ली। क्लीवभेदे। के.।

तृणपूली। स्त्री। चञ्चुम्। चाँच। हारा.। च. चि.२अ.।

तृणमणिः। पुं। नीलहीरके। हारा.। तृणजलौकायाम्।

तृणमल्लिका। स्त्री। मल्लिकापुष्पभेदे। काठगल्लिका। "कुमारिका शैवभवा सुगन्धा तृणमल्लिका।" वै.।

तृणमुन्नः। पुं। श्यामाकधान्ये। शाँमा धान। प.मु.।

तृणमुस्तिका। स्त्री। मुस्ततृणे। मुस्तायाम्। रस र.रसमारणे।

तृणमूलम्। क्ली। गन्धतृणमूले। भा.म.३भ. मू.क्ल.चि.।

तृणमेरुः। पुं। रुद्राक्षवृक्षे। शब्दर.।

तृणराजः (कः)। पुं। तालवृक्षे। ताँग गाछ। नारिकेलवृक्षे। वर्ग। रा.नि.व.८।११।१३। इक्षुवृक्षे। वत्सशायाम्। वै.निघ.।

तृणराजवर्गः। पुं। गुवाकादि सप्तवृक्षे। यथा —"गुवाकस्तालहिन्तालसुधा ताड़ो च केतकी। खर्ज्जूरनारिकेलौच सप्तैते तृणराजकाः। तृणराज शिरापवर्नकुर्य्याद्दन्तधावनम्॥ आह्निक. त.।

तृणराजाह्वः (यः)। पुं। तालवृक्षे। रा.नि. व.११।

तृणवल्ल(ल्व)जा। स्त्री। वत्सजायां। ऊलु। रा.नि.व.८।

तृणवीजः (जोत्तमः)। पुं। श्यामाकतृणे। शाँमा घास। र.मा.।

तृणवृक्षः। पुं। नारिकेलवृक्षे। तालवृक्षे। पूगवृक्षे। केतकीवृक्षे। खर्ज्जूरीवृक्षे। रा.नि.व.९। वै.निघ.।

तृणशिम्बी। स्त्री। निष्पावे। शीम गाछ। प.मु.।

तृणशोकः। पुं। देवताड़वृक्षे। वे.निघ। क्ली। कत्तृणे। गन्धतृणे। र.मा.। स्त्री। महाराष्ट्रीलतायां, जलपिप्पल्यां। काँचड़ा। रा.नि.व.४।

तृणशून्यम्। क्ली, पुं। नागदमनवृक्षे। प.मु.। च.चि.३अ.। सु.चि.१८अ.। श्वेतकेतक्यां। च.सू. २५अ.। मल्लिकायां। केतकीफले। मे.।

तृणशोणितम्। क्ली। तृणकुङ्कुमे। कुङ्कुम घास। रा.नि.व.१२।

तृणशोषकः। पुं। राजिमच्छर्पविशेषे। सु. कल्प. ४अ.। See सर्षपः।

तृणषट्पदः। पुं। कीटविशेषे, वरोलि। भीमरूल। चिका.।

तृणसंज्ञकः। पुं। वैद्यकोक्त-पञ्चतृणे। "कुशकाशनलदर्भकान्तेक्षुकाः।" सुश्रु.।

तृणसारा। स्त्री। कदल्याम्। हारा.।

तृणसिंहः। पुं। कुठारे। शब्दर.। [व. ८।

तृणाख्य(ख्य)म्। क्ली। पर्व्वततृणे। रा. नि.

तृणाङ्घ्रिपः। पुं। मन्थानकतृणे। रा.नि.व.८।

तृणाञ्जनः। पुं। कृकलासे। काँकलास। चिका.।

तृणाधिपः। पुं। मन्थानकतृणे। रा.नि.व.८।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृणान्नम्। क्ली। दैवधान्ये। नीवारधान्ये। भा. पू. भ.धा.व.।

तृणाम्लम्। क्ली। लवणतृणे। रा.नि.व.८।

तृणारिः। पुं। पर्पटके। क्षेत्पापड़ा। वै. निघ.।

तृणावर्त्तः। पुं। गुण्डासिनीतृणे। वै.निघ.।

तृणास्रक्। क्ली। तृणकुङ्कुमे। रा.नि.व.१२।

तृणाह्वा। स्त्री। चीनेघास इतिख्याते तृणभेदे।

तृणी। स्त्री। आमहरिद्रायाम्। वै.निघ.।

तृणेक्षुः। पुं। बल्वजायाम्। उलू। रा.नि.व.८।

तृणोत्तमः। पुं। ऊषरतृणे। रा.नि.व.८।

तृणोत्थम्। क्ली। तृणकुङ्कुमे। रा.नि.व.१२।

तृणोद्भवः। पुं। नीवारे। बोरो धान। रा. नि.व.१६। [वा.उ.३७अ.।

तृणोलुपम्। क्ली। उलुपतृणे। उलूखड़।

तृणोल्का। स्त्री। तृणाग्नौ। खड़ेर आगुन।

तृणौकः। पुं। तृणाच्छादितगृहे। खड़ूया घर। हे.च.।

तृणौषधम्। क्ली। एलवालुके। श.च.।

तृण्मान्। वि। तृणायुक्ते। वा.चि.६अ.।

तृतीयकः। पुं। विषमज्वरविशेषे। एकदिन अन्तर ज्वर। "दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः।" भा.। "कफपित्तात्त्रिकयाही पृथाद्वा तकफात्मकः। वातपित्ताच्छिरोग्राही त्रिविधः स्यात् तृतीयकः।" मा.नि.ज्व.।

तृतीयकविपर्य्ययः। पुं। तृतीयकस्य ज्वरस्य भेदे। प्रथम ७ शेष दिने छाड़िया द्वितीय दिनेर ज्वर। यथा—आदावन्ते च मुञ्चति मध्ये एकं दिनं ज्वरयति। भा.।

तृतीय(या)प्रकृतिः। पुं। नपुंसके। अ.टी.।

तृप(फ)ला। स्त्री। लतायाम्। त्रिफलायाम्। उणा.। त्रिका.।

तृप्तिः। स्त्री। सत्यपि भोजनसामर्थ्ये अनन्नाभिलाषे। भा.म.१भ.ज्व.चि.। "तृप्तस्तृप्तिरथापिवा।"

तृप्तिघ्नः। वि। तृप्तिजनके। क्षुधामान्द्यकरे।

तृप्तिघ्नवर्गः। पुं। नागरचित्रकचव्यविड़ङ्गमूर्व्वागुडूचीवचामुस्तपिप्पलीपटोलेषु। च.सू.४अ.।

तृप्रः। पुं। घृते। उणा.।

तृफुः। पुं। सर्पे। उणा.।

तृबुता। स्त्री। त्रिवृति। तेउड़ी। शुक्लत्रिवृतायां। श्वेत तेउड़ी। वा.चि.२अ.।

तृशूलफलम्। क्ली। बिल्वफले। [प.मु.।

तृषतौ। स्त्री। शुकशिम्बयाम्। आलाकुशी।

तृषा। स्त्री। तृष्णायाम्। रा.नि.व.२०। लाङ्गलिकालतायाम्। श.च.।

तृषाभूः। स्त्री। मूवाश्मये। क्लीम्नि। श.च.।

तृषाह(क)म्। क्ली। जले। श.च.। वै.निघ.।

तृषाहा। स्त्री। शताह्वायाम्, मधुरिकायाम्।

तृषितम्। क्ली। तृषायाम्। त्रि। तृषार्त्ते।

तृषितोत्तरा। स्त्री। गोकर्णीनामवल्ल्याम्। वै. निघ.। अश्मनपर्णीलतायाम्। श.च.।

तृष्णक्। त्रि। तृष्णावति। वा. ज्व. चि.१अ.। लुब्धे। अम.।

तृष्णा। स्त्री। पानेच्छायां। पिपासा। मे.। तत्पर्य्यायः,—उदन्या, पिपासा, तृट, तर्षः (अ.), तृषा (शब्दर), तर्षणं, तर्षणं (ज.), उपलासिका, धृतिः (हे.)। तर्पणे। जटा.। पिपासारोगे। रा. नि.व.२०। "भयश्रमाभ्यां बलसङ्क्षयाद्वा ऊर्द्ध्वत्रितं पित्तमिहैनमेव। पित्तं सवातं कुपितं नराणां तालुप्रपन्नां जनयेत्पिपासाम्॥" "सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति। पुनः काङ्क्षति तोयञ्च तं तृष्णार्दितमादिशेत्॥" "स्रोतःस्वपांवाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः। त्रिधा: स्मृतास्ताः चतजा चतुर्थी क्षयात्तथाऽऽमासमुद्भवा च। भक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्व्वशस्तु। श्रमाश्रया मारुतसम्भवायां तोदस्तथा शङ्खशिरःसु चापि। स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विदह्यतेति। मूर्च्छाभ्रमविद्वेषविलापदाहा रक्तेक्षणत्वं प्रततञ्च शोषः। शीताभिनन्दा सुखतिक्तता च पित्तात्मिकायां परिदूयणञ्च। वाष्पावरोधात् कफसंहतेऽग्नौ तृषा बलासेन भवेत्तथा तु। निद्रागुरुत्वं मधुरास्यता च तृष्णार्दितः शुष्यति चातिमात्रम्। चतस्य रूक्शोणितनिर्गमाभ्यां तृषा चतुर्थी चतजा मता तु। रसक्षयाद्या क्षयसम्भवा सा तयाभिभूतस्य निशादिनेषु। पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः॥" इत्यादि। मा.नि.। पथ्यं—"शोधनं वमनं निद्रा स्नानं कवलधारणं।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीद्रवाः शालयः पेया विलेपी लाजसक्तवः। अन्नमण्डो घनरसाः सिता सुद्गादिजा रसाः। खर्जूरं दाड़िमं धात्री कर्कोलं नलदञ्च च। जम्बीरं करमर्दञ्च बीजपूरं गवां पयः। मधूकपुष्पं तिक्तानि मधुराणि विशेषतः। बालतालकशेलाम्बु माक्षिकं सरसीजलं। घनसारो गन्धसारः कौसुदो शिशिराणि च। एला जातीकपूरञ्च कुसुम्बुरु च टङ्कणम्। चन्दनार्द्रप्रियाश्लेषो रत्नाभरणधारणं। हिमानुलेपनञ्च स्यात्पथ्यमेतत् तृषातुरे॥" पथ्यापथ्यम्।

तृषारिः। पुं। पर्पटके। फेरूपाबड़ा। रा. नि.व.५।

तेजः। क्ली। मज्जायां। रा.नि.व.१८। गुणाः— तृट्क्षुधानिद्रालस्यमैथुनेषु। रस.र.ज्व.चि.। पित्ते। रा.नि.व.२१। घृते। कान्तौ। स्वर्णे। रा.नि.व.१३। शुक्रे। मे.। नवनीते। अग्नौ। है.च.। ओजसि।

तेजःफलः। पुं। तेजफलवृक्षे। तेजबल। रा.नि.व.११।

तेजनः (कः)। पुं। शरे। प.मु.। वंशे। भा.। सुद्गातृणे। उलपतृणे। ज.द.१२अ.। रा.नि.व. ८। क्ली। भोजने। रा.नि.व.२०।

तेजना(ख्यः)ह्वयः। पुं। सुद्गतृणे। मूज। रा.नि.व.८।

तेजनी। स्त्री। मूर्वायां। अम.। चीरमूर्व्वायां। कङ्गुधान्ये। वै.निघ.। वचायां। भैष.सु.री.चि.। ज्योतिष्मतीलतायां। शा.र.।

तेजपत्रम्। क्ली। स्वनामख्यातपत्रे। तेजपात। प.मु.। तत्पर्य्यायः,—पत्रं, पत्रकं, गन्धजातं (शब्दर.), पाकरञ्जनम् (शा.)। See अंशुकम्।

तेजफलः। पुं। हिमालयादौ ख्याते स्वनामख्यातवृक्षे। तेजबल। मं काइफल। कं गावटे। तत्पर्य्यायः,—बहुफलः, शाल्मलीफलः, स्रवकफलः, स्तेयफलः, गन्धफलः, करटवृक्षः। गुणाः—कटुः तीक्ष्णः सुगन्धः दीपनः वातश्लेष्मारुचिघ्नः बालरक्षाकारकः। "तेजफलः कटुस्तीक्ष्णः सुगन्धिर्दीपनः परः। वातश्लेष्मारुचिघ्नश्च बालरक्षाकरः परः॥" रा.नि.व.११।

तेजलः। पुं। कपिञ्जलपक्षिणि। तित्तिर पाखी। रा.नि.व.१९।

तेजवती। स्त्री। नलपिप्पल्यां। काँचड़ा। वै.निघ.२भ.अ.च.चि.। गजपिप्पल्याम्। शा.र.। तेजवल्कल, तेजबल इति च ख्याते द्रव्ये। गुणाः —"तेजस्विनी कफ-श्वास-कासास्यामय-वातहृत्। पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी॥" भा.। वचायां। वच। भैष.क्षुद्ररो.चि.।

तेजसाह्वयः। क्ली। मुञ्जतृणे। वै.निघ.।

तेजस्करः। त्रि। तेजोवर्द्धके।

तेजस्विनी (जिनी)। स्त्री। मूर्वायाम्। चविकायाम्। महाज्योतिष्मतीलतायाम्। रा.नि. व.३। च.वि.८अ.। तेजोवल्लयाम्। वै.निघ.। ज्योतिष्मतीलतायाम्। लताफट्‌की। शा.र.।

तेजाह्वा। स्त्री। तेजफले। महाज्योतिष्मतीलतायाम्। के.।

तेजिका। स्त्री। ज्योतिष्मतीलतायाम्। के.।

तेजोद्वेषः। पुं। पित्तजरोगे। भा.।

तेजोधातुः। पुं। पित्ते। वै.निघ.।

तेजोमन्थः। पुं। क्षुद्राग्निमन्थवृक्षे। छोट गणिरि। प.मु.। गुणाः—"तेजोमन्थगुणाः प्रोक्ता-श्चाग्निमन्थसमा बुधैः। विशेषाद्वातगौल्मे च प्रोक्ताः पूर्व्वैश्च सूरिभिः॥" वै.निघ.।

तेजोमयम्। क्ली। पित्ते। वै.निघ.।

तेजोवती। स्त्री। महाज्योतिष्मतीलतायाम्। वड़ लताफट्‌की। हिं उमिजिनि। भैष. कुष्ठ. चि. पञ्चतिक्तघृते। वै. निघ. २भ. जीर्णज्व. चि.। चविकायाम्। चई। प.मु.। भा.। सा.कौ.अर्शः-चि.बाइशालगुड़े। गजपिप्पल्यां। शा.र.। वचायां। सि.यो.हि.श्वास.चि.बाइशालगुड़े। "तृक्तेजोवती दन्ती।" यत्र चवी तेजोवती चास्ति तत्र तेजोवती ज्योतिष्मती ग्राह्या। श्रीकण्ठः। तेजोवल्कले। तेजबल। स्वर्णजोवन्त्याम्। भा.म.४भ.सु.री चि.। सु.चि.२२अ.। मरिचे। वै.निघ.।

तेजोवीजम्। क्ली। मज्जायाम्। मज्जा। वै. निघ.।

तेजोवृक्षः। पुं। क्षुद्राग्निमन्थ। छोट गणिरि। रा.नि.व.९।

तेजोह्वा। स्त्री। तेजोवत्याम्। तेजबल। भा. म.४भ.सु.री.चि.। सु.चि.२अ.। वै.निघ.अर्शःचि. बाइशालगुड़े। वचायाम्। वच। क्षुद्ररो.चि. कालकचूर्णे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेमनम्। क्ली। आर्द्रीकरणे। मे.। व्यञ्जने। "व्यञ्जनं सूपशाकादिमिष्टान्नं तेमनं स्मृतम्।" रा. नि.व.२०।

तेमनी। स्त्री। चुल्लीभेदे। हे.च.।

तेरः (रणः)। पुं। स्वनामख्यातवृक्षे। तेरड़ा गाछ। मं तेरणा। कं वेवत्तिगे। गुणाः—शीतलः तिक्तः व्रणघ्नः अरुणरङ्गदः। रा.नि.व.४।

तैजवल्ली। स्त्री। शतावर्य्याम्। रा.नि.व.४।

तैजसम्। क्ली। घृते। रा.नि.व.१५।

तैजसावर्त्तिनी। स्त्री। स्वर्णादिपात्रसुषायां। भूचि। अम.।

तैजसी। स्त्री। गजपिप्पल्याम्। रा.नि.व.६।

तैतिलः। पुं। खड्गिनि। गण्डार। मे.।

तैत्तिरः। पुं। तित्तिरपक्षिणि। रा. नि. व. १९। गण्डके। गण्डार। मे.।

तैरणी(रिणी)। स्त्री। तेरणवृक्षे। रा.नि.व.४। तत्पर्य्यायः,—तैरणः, तैरः, कुनीली, रागदः। गुणाः—तिक्तत्वं, शीतलं, व्रणनाशित्वं, अरुणवर्णजनकत्वञ्च। रा.।

दीपास्यभस्म । क्ली । दग्धदीपशिखायाम् । प्रदीपेत्र पोड़ा शीष । रस.र.समरी.चि. ।
दीपिका । स्त्री । वचायाम् । वै.निघ. ।
दीप्त(क)म् । क्ली । हिङ्गुनि । हिं । रा.नि. व.६ । कांस्यधातौ । काँसा । सुवर्णे । रा.नि.व.१३ । जम्बीरे । वै.निघ. । पुं । सिंहे । रा.नि.व.१९ । नासारोगविशेषे । नाकझांला । लक्षणं यथा— "घ्राणे भृशं दाहसमन्विते तु विनिःसरेद्धूम इवेह वायुः । नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिन्तु तं दीप्तमुदाहरन्ति ॥" सु. । निम्बूकवृक्षे । रा. नि. व. ११ ।
दीप्तकांसम् । क्ली । शुद्धकांस्यधातौ । शोधी काँसा । रा.नि.व.१३ ।
दीप्तजिह्वा । स्त्री । उल्कामुखीशृगाल्याम् । विका. ।
दीप्तपिङ्गलः । पुं । सिंहे । रा.नि.व.१९ ।
दीप्तपुष्पा । स्त्री । लाङ्गलीवृक्षे । विषलाङ्गलिन्या । वै.निघ. ।
दीप्तरसः । पुं । किंशुलुके । केँचो । शा.च. ।
दीप्तलोचनः । पुं । विड़ाले । रा.नि.व.१९ ।
दीप्तलोहम् । क्ली । कांस्यधातौ । प.मु. ।
दीप्ता (प्तिः) । स्त्री । लाङ्गलिकायुक्ते । विषलाङ्गलिन्या । रा.नि.व.४ । ज्योतिष्मतीलतायाम् । लताफटकी । रा.नि.व.३ । लाक्षायाम् । रा.नि. व.६ । मनःशिलायाम् । वै.निघ. । कांस्यधातौ । रा.नि.व.१३ । दीप्तनामनासारोगभेदे । वा.उ. १९अ. । See दीप्तः ।
दीप्ताग्निः । वि । दीप्तजठराग्नौ । मा.नि. ।
दीप्ताङ्गः (क्षः) । पुं । मयूरे । शा.र. । विड़ाले । शा.र. ।
दीप्तानलम् । क्ली । सुवर्णे । रा.नि.व.१३ ।
दीप्ताक्षः । पुं । विड़ाले । विका. । मयूरे । वै.निघ. ।
दीप्तिः । स्त्री । दीपने । अ. । लाक्षायाम् । कांस्ये । रा. ।
दीप्तिकः । पुं । दुग्धपाषाणे । कूल खड़ि । वै. निघ. ।
दीप्तिकांस्यम् । क्ली । कांस्ये । रा. ।
दीप्तोपलः । पुं । सूर्यकान्तमणौ । प.मु. ।
दीप्यः (क्यः) । पुं, क्ली । मयूरशिखायां । रुद्र-जटायाम् । भम. । रक्तचित्रके । कुङ्कुमे । तगरे । निम्बूकवृक्षे । श्येनपक्षिणि । भ. । जीरके । रा. नि.व.६ । रस.र.सूतिका.चि.पञ्चजीरकगुड़ । भैष. कुष्ठ.चि. । च.द.पञ्चतिक्तघृतगुग्गुलौ । उन्मा.चि. लशुनाद्यघृते । अजमोदायाम् । ब्राह्मीनि । भा.पू. २भ. । यमान्याम् । च.द.सि.थी.कास चि.दशमूल-षट्पलकघृते । "तालीशवल्किदीप्यकम् ।"
दीप्यका । स्त्री । यमान्याम् । अजमोदायाम् । ब्राह्मीनि । भा.पू.१भ. ।
दीप्यवल्ली । स्त्री । अजमोदायाम् । वै.निघ. ।
दीप्या । स्त्री । कृष्णजीरकभेदे । मोटो कृष्ण-जीरे । रा.नि.व.६ । यमान्याम् । भा. । पिण्ड-खर्जूरिकायाम् ।
दीर्घः । पुं । रामशरे । रा.नि.व.८ । लताशाले । र.मा. । कीर्तनदेशप्रसिद्धे माड़वृक्षे । रा.नि.व. ९ । रक्तकशाले । रा.नि.व.१६ । इक्षुटि । र.मा. । नक्षत्रभेदे । रा. । उष्ट्रे । रा.नि.व.१९ । वि । आयते ।
दीर्घकम् । क्ली, पुं । कृष्णजीरके । भद.व.२ । शरवृक्षे । श्वेतजीरके । उशीरे । उष्ट्रे । शाकवृक्षे । शेगुन गाछ । वै.निघ. ।
दीर्घकणा । स्त्री । गौरजीरके । शादा जीरा । रा.नि.व.६ ।
दीर्घकण्टः (कः) । पुं । बर्बूरवृक्षे । बाबला गाछ । रा.नि.व.८ ।
दीर्घकण्ठः (कः) । पुं । वकपक्षिणि । शा.च. ।
दीर्घकन्दः (कः) । पुं । मालाकन्दे । वै.निघ. । सुखालो । मो आलू । (कम्) क्ली । मूलके । मूला । रा.नि.व.७ ।
दीर्घकन्दिका । स्त्री । तालमूल्याम् । रा.नि. व ७ । कृष्णतालमूल्याम् । वै.निघ. ।
दीर्घकन्धरः । पुं । वकपक्षिणि । रा.नि.व.१९ । स्त्री । वकस्त्रियाम् । वै.निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीर्घकर्णः। पुं। छागे। छागल।
दीर्घकाण्डः। पुं। गुण्डतृणे। रा.नि.व.८।
दीर्घकाण्डा। स्त्री। वत्साद्दनीलतायाम्। पाताल गरुड़ी। रा.नि.व.३।
दीर्घकोलः (कः)। पुं। अङ्कोल्लवृक्षे। धल आँकोड़, आँकोड़ गाछ। रा. नि. व. ९। जटा.। "अङ्कोल्ले दीर्घकोलकः।" रा.नि.व.१३।
दीर्घकुल्या। स्त्री। गजपिप्पल्याम्।
दीर्घकूरकम्। क्ली। तृणान्ननामकशालिधान्यभेदे। राज अन्न। रा.नि.व.१६।
दीर्घकृष्णा। स्त्री। तिलवासिनीशाली। रा.नि. व.१६।
दीर्घकेशः (शी)। पुं। भल्लूके। रा.नि.व.१९।
दीर्घकोशा (षा)। स्त्री। पङ्क्तशुक्तौ। शुक्ति, झिनुक। हारा.। गण्डूपद्याम्। केँचो। वै.निघ.।
दीर्घकोशि(षि)का (शी)। स्त्री। पङ्क्तशुक्तौ। हारा.। गण्डूपद्यां। वै.निघ.।
दीर्घखरच्छदः। पुं। इक्षटे। ईख़कड़। प.मु.।
दीर्घगतिः। पुं। उष्ट्रे। रा.नि.व.१९।
दीर्घगोधूमः। पुं। महागोधूमे। वै. निघ.।
दीर्घग्रन्थिः। पुं। गजपिप्पल्यां। रा.नि.व.६।
दीर्घग्रीवः। पुं। उष्ट्रे। हे. च.। नीलकौञ्चपक्षिणि। रा.नि.व.९।
दीर्घघाटिकः। पुं। उष्ट्रे। वके। वै. निघ.।
दीर्घचञ्चुः। पुं। पक्षिविशेषे। वम्, रुखोड़ा। वै. निघ.।
दीर्घच्छदः। पुं। शाकवृक्षे। शेगुन गाछ। वृक्षे। भा.।
दीर्घजङ्घलः। पुं। मत्स्यविशेषे। भाङ्गन माछ। भ. मा.।
दीर्घजङ्घः। पुं। उष्ट्रे। जटा.। वकपक्षिणि। विका.।
दीर्घजिह्वः। पुं। सर्पे। हे. च.।
दीर्घजीरकः। पुं। स्थूलजीरके। भा. पू.१भ.।
दीर्घतन्वी। स्त्री। आलुकभेदे। वै.निघ.।
दीर्घतरः। पुं। शूकरे। शब्दर.।
दीर्घतरुः। पुं। तालवृक्षे। शब्दार्थकल्प.।
दीर्घतिमिषा। स्त्री। कर्कटिकायाम्। क्षुद्र तेतो काँकुड़। भ.मा.।
दीर्घतुण्डा (ण्डी)। स्त्री। कुक्कुन्दर्य्याम्। छुँचो। वै. निघ.।
दीर्घत्वणः। पुं। पल्लिवाहतृणे। वम्. पीकलतृण। रा.नि.व.८।
दीर्घदण्डः (कः)। पुं। श्वेतैरण्डे। रा.नि.व. ८। जटा.। तालवृक्षे। रोहीतकविशेषे। वै.निघ.।
दीर्घदण्डी। स्त्री। गीरच्यायाम्। गोरक्षचाकूले। रा.नि.व.५। [निघ.।
दीर्घदलः। पुं। मालाकन्दे। श्यामाके। वै.
दीर्घदर्शी (ष्टि)। पुं। गृध्रे। भ.र.। भल्लूके। रा.नि.व.१९।
दीर्घद्रुः। पुं। तालवृक्षे। भ.च.।
दीर्घद्रुमः। पुं। शाल्मलिवृक्षे। शिमूल गाछ। रा.नि.व.८। [१९।
दीर्घनादः। पुं। शङ्खे। शाँक। रा.नि.व.
दीर्घनालः। पुं। दीर्घरोहिषे। बड़ गङ्गतृण। गुण्डतृणे। रा.नि.व.८। आलुके। शालिधान्यभेदे। वै.निघ.। यावनालनामशिम्बीधान्ये। रा.नि.व.१६।
दीर्घनिद्रा। स्त्री। मृत्यौ। हे.।
दीर्घनिस्वनः। पुं। शङ्खे। वै. निघ.।
दीर्घपटोलिका (ली)। स्त्री। पटोलाकारदीर्घफलशाकविशेषे। धुन्दुल। वम्. गोड़परवल। गुणाः—गुरू स्निग्धं विष्टम्भि कटुकं मधुरं शीतलं वातपित्तश्लेष्मारुचिकरञ्च। राज. ३प.।
दीर्घपत्रः (कः)। पुं। पुनर्नवायाम्। श्वेत पुनर्नवा। रा.नि.व.५। राजपलाण्डौ। विष्णुकन्दे। रा.नि.व.७। शरपत्रदर्भे। कुन्दुरुतृणे। रा.नि.व. ८। तालवृक्षे। रा.नि.व.९। हरितकुशे। रक्तपुनर्नवायाम्। सर्ज्जवृक्षे। मिश्रवर्णेचौ। हिं बड़ौ षा। गुणाः—सुकठिनः सचारश्च। भा.। वातकरः कफपित्तघ्नः कषायः विदाही च। सु.सू.४५ अ.। कुपीलौ। कूँचिला। भा.। मधूकवृक्षे। वै. निघ.। (क) वेतसवृक्षे। मद.व.५। रक्तरसोने।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाल रङ्गन । रा.नि.व.७। एरण्डवृक्षे । हिज्जल-वृक्षे । रा.नि.व.८। शुक्लरसोने । श्वेत रङ्गन । हे.च.। जलमधूके । जटा.। करीरवृक्षे । श्र.च.।

दीर्घपत्रा । स्त्री। वृहतीवृक्षे । द्रोणपुष्प्याम् । घलघसा । रा.नि.व.४।५। शालपर्ण्याम् । भा.। क्षुद्रजम्बूवृक्षे । वन जाम गाछ । र. मा.। केतकी-वृक्षे । रा.नि.व.१०। घृतकुमार्य्याम् । श्वेतपुनर्न-वायाम् । आम्रहरिद्रायां । कदलीवृक्षे । श्योणाक-वृक्षे । कुम्भतुम्बीम् । गोल लाउ । वै. निघ.। चिञ्चायां । चेँच्‌ड़ा । भा. पू १भ. श्रा.व.।

दीर्घपत्रिका । स्त्री। श्वेतवचायाम् । श्वेत वच । रा.नि.व.६। घृतकुमार्य्याम् । घृतकुमारी । रा.नि.व.५।२३। शालपर्ण्याम् । शालपाणि । रा. नि.व ४। भा.। केतक्यां । रा.नि.व.२३। आट-रूषके । वासक । मातुलुङ्गवृक्षे । छोलङ्ग लेबु । कृष्णतालमूल्याम् । कदलीवृक्षे । वै.निघ.।

दीर्घपत्री । स्त्री। पलाशीलतायाम् । हापर-मालो । रा.नि.व.३। महाचुञ्चुपे । चुञ्चु शाक । रा.नि.व.४।

दीर्घपर्णः । पुं अश्वकर्णनामकशाले । लता-शाल । रा.नि.व.८। 'तोपचिनी' इतिख्याते द्रव्ये । वै. निघ.।

दीर्घपर्णी । स्त्री। पृश्निपर्ण्याम् । चाकुलिया । रा.नि.व.४। शालपर्ण्याम् । शालपाणि । वै.निघ.।

दीर्घपर्व्वा । पुं। इक्षौ । वै. निघ. ।

दीर्घपलाण्डुः । पुं। विष्णुकन्दे । राज-पलाण्डौ । तालवृक्षे । रा.नि.व.७।८। हरितकुश-वृक्षे । कुन्दरवृक्षे । इक्षुभेदे । कुचेलवृक्षे । कूँचिला गाछ । भा. ।

दीर्घपल्लवः । पुं। शणवृक्षे । शण गाछ । रा. नि.व.४।

दीर्घपत्तः । पुं। मत्स्यविशेषे । वै. निघ.।

दीर्घपात् (दः) । पुं। क्रौञ्चपक्षे । कोँच पक्ष । कङ्कपक्षिणि । काँकपाखी । विका.। हे. च. ।

दीर्घपादपः । पुं। तालवृक्षे । रा.नि.व.९। गुवाकवृक्षे । रा.नि.व.११। See अकोटः ।

दीर्घपुष्पः । पुं। सुचुकुन्दवृक्षे । मूचकुन्द । प. मु.। श्वेतमन्दाराके । रा.नि.व.१०।

दीर्घपृष्ठः । पुं। सर्पे । अम. ।

दीर्घपोरः । पुं। वंशनामिचुमेदे । "दीर्घपोरः सुकठिनः सचारी वंशकः स्मृतः ।" भा. ।

दीर्घफलः (कः) । पुं। स्थूलारग्वधवृक्षे । वड़ सोणालु । रा.नि.व.९। पलाशवृक्षे । अर्क-वृक्षे । वै.निघ.। (कः) अगस्तिपुष्पवृक्षे । वासना-फूलेर गाछ । रा.नि.व.१०।

दीर्घफला । स्त्री। कीषातक्याम् । झिँगे प्रभृति । रा.नि.व ७। जन्तुकालतायाम् । रा.नि. व.३। कपिलद्राक्षायाम् । रा.नि.व.११। मेघ-शृङ्ग्याम् । तिक्तालाब्वाम् । वै.निघ.।

दीर्घबाला । स्त्री। चमरीमृगे । वै. निघ.।

दीर्घबालुकः । पुं। वृद्धदारकलतायाम् । वीजताड़क । रा.नि.व.३ ।

दीर्घमारुतः । पुं। हस्तिनि । विका.।

दीर्घमूलः । पुं। मीरटलतायाम् । रा.नि. व.३। यासचुपे। जुरालभा । रा.नि.व.४।२३। वेल्लन्तरवृक्षे । रा. नि. व. ८।२३। विल्ववृक्षे । लज्जालुकायाम् । लाजुकि । रा.नि.व.१२।२३। विभीतकवृक्षे । देवसर्षपे । इन्द्रयवे । क्लो । मूलके । वै. निघ. ।

दीर्घमूलकम् । क्लो। मूलके । मूला । रा.नि. व.७। पुं। स्थूलशरे । रा.नि.व.८।

दीर्घमूला (लिका) । स्त्री। शालपर्णीचुपे । वै.निघ.। श्यामालतायाम् । प.मु.। (ला) दुरा-लभायाम् । सु.सू.३८अ.। शरवृक्षे । शर गाछ । चीरमूर्व्वायां । मेषशृङ्ग्यां । वेल्लन्तरवृक्षे । वै. निघ.।

दीर्घमूली (लिका) । स्त्री। दुरालभायाम् । श्र. मा.। काकमाच्याम् । काकजङ्घायाम् । वै. निघ. ।

दीर्घरङ्गा । स्त्री। हरिद्रायाम् । वै.निघ.।

दीर्घरतः (दः) । पुं। शूकरे । विका.।

दीर्घरसनः । पुं। सर्पे । श्र. च.।

दीर्घरागा । स्त्री। हरिद्रायाम् । रा.नि.व.९।

दीर्घरात्रिकः । पुं। बहुरात्रानुबन्धी-ज्वरभेदे । भा. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीर्घरोमा। पुं। भल्लूके। वै.निघ.

दीर्घरोहिष(क)म्। क्ली। रोहिषभेदे। बड़ गन्धतृण। तत्पर्य्यायः,—दृढ़काण्डं, दृढ़च्छदं, यज्ञेष्टं, दीर्घनालं, तिक्तसारं। रा.। गुणाः—तिक्तं कटूष्णं कफवातजित् व्रणचतरोपणञ्च। रा.नि.व.८।

दीर्घलता। स्त्री। व्याघ्रघण्टायाम्। शिम्बाड़ि लता। वै.निघ.।

दीर्घलताद्रुमः। पुं। अश्वकर्णवृक्षे।

दीर्घलोहितयष्टिका। स्त्री। रक्तचौ।

दीर्घवंशः। पुं। नले। नल। रा.नि.व.८।

दीर्घवक्त्रः। पुं। हस्तिनि। श.मा.।

दीर्घवच्छिका। स्त्री। कुम्भीरे। शब्दार्थकल्प.।

दीर्घवर्षाभूः। स्त्री। श्वेतपुनर्नवायां। वै.निघ.।

दीर्घवल्ली (लिका)। स्त्री। महेन्द्रवारुणी लतायाम्। बड़ माकाल। वल्लादनीलतायाम्। पातालगरुड़ी। पलाशीलतायां। हापरमाली। रा.नि.व.३।

दीर्घवीजा। स्त्री। अलाब्वाम्। शिम्बीभेदे। प.मु.।

दीर्घवृन्तः (कः)। पुं। पृथुशिम्बशीषाकवृक्षे। शोणापाठा। प.मु.। पीतलोध्रे। वै.निघ. लताशाले।

दीर्घवृन्ता (न्तिका)। स्त्री। इन्दीवराख्यालतायां। इन्द्रचिर्भटी। रा.नि.व.३। कपर्दकभेदे। र.सा.सं.। एलापर्ण्यां। श.च.। काँटा आमरुली।

दीर्घवृक्षः। पुं। तालवृक्षे। लताशालवृक्षे। वै. निघ.।

दीर्घशरः। पुं। यावनालनामकशिम्बीधान्ये। जनार गाछ। रा.नि.व.१६।

दीर्घशाखः। पुं। शणवृक्षे। शण गाछ। रा. नि.व.४। शाकतरौ। शेशुन गाछ। वै.निघ.। शालवृक्षे। श.च.।

दीर्घशाखिका। स्त्री। कृष्णपीठोज्जीवक्ष, नीलाम्लीचुपे। रा.नि.व.४।

दीर्घशिम्बा। स्त्री। शिम्बीविशेषे। प.मु.।

दीर्घशिम्बिकः। पुं। राजमाषे। बरबटी। रा.नि.व.१६।

दीर्घशूकः (कः)। पुं,क्ली। शूकाकारशालिधान्यविशेषे। स सारामुखाङ्गीनगुणः स्वादुपाकरसत्वादियुक्तः। च.सू.२७अ.। राजान्ने। रा.नि.व. २३।

दीर्घसमुश्रयः। पुं। नलवृक्षे। प.मु.।

दीर्घसस्यः। पुं। तिन्दुकवृक्षे। तेँद गाछ। वै. निघ.।

दीर्घसुरतः। पुं। कुक्कुरे। शूकरे। त्रिका.।

दीर्घस्कन्धः। पुं। तालवृक्षे। रा.नि.व.९।

दीर्घा। स्त्री। पृश्निपर्ण्याम्। रा.नि.व.४।

दीर्घाङ्कुरः। पुं। राजशाली। राज अन्न। वै.निघ.।

दीर्घाङ्गी। स्त्री। शालपर्ण्याम्। भा.पू.१भ.।

दीर्घाङ्घ्रिः। स्त्री। शालपर्ण्याम्। वै.निघ.।

दीर्घाध्वगः। पुं। उष्ट्रे। त्रिका.।

दीर्घायुः। पुं। शाल्मलिवृक्षे। शिमूल गाछ। रा.नि.व.८। जीवकौषधौ। काके। मे.। रा.नि. व.५। त्रिका.।

दीर्घायुधः। पुं। वनशूकरे। श.मा.।

दीर्घायुष्यः। पुं। जीवके। मे.। श्वेतमन्दारार्के। रा.नि.व.१०। [१०।

दीर्घार्कः। पुं। महाश्वेतार्कवृक्षे। रा.नि.व.

दीर्घिका। स्त्री। हिङ्गुपत्र्याम्। रा.नि.व.६। गोजिह्वायाम्। वै.निघ.। विंशतिधनुःपरिमितजलाशये। तत्पर्य्यायः,—वापिः, (भ) वापी। अ.। तज्जलं गुरु कटु क्षारं पित्तकरं कफवातघ्नञ्च। रा.नि.व.१४।

दीर्घीवृक्षः। पुं। महालाब्वाम्। दीर्घकर्कटिकायाम्। रा.नि.व.७।

दीर्विः। पुं। चाषपक्षिणि। श.मा.। [१२।

दुकूलः। पुं। चीरनामकगन्धद्रव्ये। रा.नि.व.

दुःखम्। क्ली। रोगे। मानसधर्म्मभेदे। दुःख। तत्तु सप्तविधे व्याधावुपनिपतति। सु.सू.२४अ.। See व्याधिः।

दुःखकोद्रवा। स्त्री। मसूरिकाभेदे। कोदाई। "किञ्चिदुष्णनिमित्तेन जायते राजिकाकृतिः। एषा भवति बालानां सुखं शुष्यति च स्वयम्॥" भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखत्रयम्। क्ली। आध्यात्मिकमाधिभौतिकमाधिदैविकञ्चेति विविधदुःखे। सु.सू.२४अ.।

दुःखदर्शनः। पुं। गृध्रपक्षिणि। शकुनि। वै. निघ.।

दुःखदिरः। पुं। विट्खदिरे। रा.नि.व.८।

दुःखवर्द्धनः। पुं। कर्णपालीरोगे। लक्षणम्—"वर्द्धमाने यदा कर्णे कण्डू-दाह-रुगन्वितः। श्रीफी भवति पाकश्च लक्ष्यीऽसौ दुःखवर्द्धनः॥" सु.चि.२५अ.।

दुःसहा। स्त्री। नागदमन्याम्। रा.नि.व.५।

दुःसाध्यः। त्रि। दुश्चिकित्स्ये। पुं। शम्बुके। भल्लु के।

दुःस्पर्शा। स्त्री। कपिकच्छ्वाम्। दुरालभायाम्। कण्टकार्य्याम्। आकाशवल्ल्याम्। रा.।

दुकू(गू)लम्। क्ली। श्लक्ष्णवस्त्रे। विका.। हे.च.।

दुग्धम्। क्ली। कर्त्तरि। ब्रामकपूर्व्व। र.मा.। चीरे। दुग्ध। रा.नि.व.१५। तत्पर्य्यायः,—चीरं, पीयूषं, उधस्यं, स्तन्यं, पयः, अमृतं (रा.), बालजीवनं (भा.), दोहजं (के.), अवदोहं, दोहापनयः (चि.)। तद्गुणादि—"चीरं स्निग्धं तथा रक्तं पित्तेन पाकतां गतं। रक्तं श्वेतत्वमायाति तथा चीरं सितं भवेत्। चीरनाड़ी कुमारीणां वन्ध्यानाञ्च कथं भवेत्। अल्पधातुबलं यस्मात् तस्मात् चीरं न जायते। वन्ध्यानां चीरनाड्यस्तु वातेन परिपूरीताः। चीरञ्च न भवेत् तस्मात् आर्त्तवञ्चाधिकं यतः। प्रसूतासु च नारीषु बलेन सह सूयते। तेन स्रोतोविशुद्धिः स्यात् चीरमाशु प्रवर्त्तते। तस्मात् सद्यःप्रसूतायां जायते श्लैष्मिकं पयः। तेन कठिनतां याति तस्मात्तत् परिवर्ज्जयेत्। स्रोतोविशुद्धिकरणं बलकृद्दीपनाशनम्। पयस्विदोषशमनं द्रव्यञ्चाग्निप्रवर्द्धनम्॥" तत्र श्वेतादुग्धं श्लेष्मकरं, रक्ताया वातलं, पीतायाः पित्तसंशमनं विशिष्टं, कृष्णायाश्च पित्तलम्। अत्रि. ८अ.। दुग्धं बहुविधं गव्यादिभेदात् यथा—गावस्तु दशधा काली विधाजी त्रिविधा मता। मृग्य एकास्त्रिधा मेषी विधीष्ट्री दशधा हयी। पञ्चधा करिणी नारी दशधा शूकरी द्विधा। व्याघ्री श्वनी श्वदंष्ट्री च रासभी पञ्चधा पृथक्। त्रिधा ह्येकाष्टधा मत्स्यी गवयी खड्गिनी रुड़ी। दुग्धं घृतञ्च तक्रञ्च दधि ताभ्यः प्रजायते॥ अर्क.। गवादिदुग्धगुणाः स्वस्वपर्य्यायेषु सूत्राः। दुग्धमात्रगुणाः—आमं गुरु कास-श्वास-प्रकोपकं रोगजनकञ्च। तप्तमावर्त्तितञ्च तत् पथ्यम्। नारीचीरन्तु आममेव रोगघ्नं भवति। धारोष्णं गव्यादिदुग्धम् अमृतोपमं सर्व्वरोगघ्नं। चिरसंस्थं दोषदञ्च। तथा—"कैड्याविकं पथ्यतमं घृतौष्णं चीरं त्वजानां घृतशीतमाहुः। दोहान्तशीतं महिषीपयश्च गव्यन्तु धारोष्णमिदं प्रशस्तम्॥" पूर्व्वाह्णपीतं दुग्धं हृद्यं बल्यं ह्लंहणमाग्नेयञ्च, मध्याह्नपीतं बलदं कफघ्नं क्लक्लघ्नञ्च। बालअग्निकरं यौवने बल्यं वीर्य्यदञ्च वार्द्धके भवति। रात्रौ नानादोषशमनं अतः चीरं सदा सेव्यम्। मुहूर्त्तवयपर्य्युषितमतप्तं न सेवेत। षष्ठोषितं दोषकरं तदूर्द्धञ्च विषोपमं ज्ञेयम्। ज्वरे तद्गुणाः—"जीर्णज्वरे कफे चीणे चीरं स्यादमृतोपमम्। तदेव तरुणे पीतं विषवद्वन्ति मानवम्। चतुर्थभागं सलिलं निधाय यन्नादृयदावर्त्तितमुत्तमं तत्। सर्व्वामयघ्नं बलपुष्टिकारि वीर्य्यप्रदं चीरमतिप्रशस्तम्।" इति दुग्धक्वाथः। "गव्यस्यूष्णाक्षकालं स्यादपराह्णे तु माहिषम्। चीरं सशर्करं पथ्यं यद्वा सात्म्यं च सर्व्वदा। पित्तघ्नं घृतशीतलं कफहरं पक्वं तदुष्णं भवेच्छीतं यत्तु न पाचितं तदखिलं विष्टम्भदोषप्रदं। धारोष्णं त्वमृतं पयः श्रमहरं निद्राकरं कान्तिदं हृद्यं ह्लंहणमग्निवर्द्धनमतिस्वादु विदोषापहम्॥" घृतशीतादिचीरगुणाः—"चीरं न भुञ्जीत कदाप्यतप्तं तप्तं न चैतल्लवणेन सार्द्धम्। पिष्टान्नसन्धानकमाषमुद्गकोशातकीकन्दफलादिकैश्च।" तथाच "सत्स्यमांसगुड़मुद्गमूलकैः कुठमावहति सेवितं पयः। शाकजाम्बवरसैस्तु सेवितं सारयत्यबुधमाशु सर्पवत्॥" इति चीरवर्জ্জनस्थानम्। "स्निग्धं शीतं गुरु चीरं सर्व्वकालं न सेवयेत्। दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च। नित्यं तीव्राग्निना सेव्यं सुपक्वं माहिषं पयः। पुष्यन्ति धातवः सर्व्वे बलपुष्टिविवर्द्धनम्॥" इति चीरसेवनस्थानम्। "चीरं गवाजकादीर्म्मधुरं चारं नवप्रसूतानाम्। रूक्षं न पित्तदाहं करोति रक्तामयं कुरुते॥ मधुरं विदोषशमनं चीरं मध्यप्रसूतानाम्। लवणं मधुरं चीरं विदाहजननं चिरप्रसूतानाम्॥ गुणहीनं निःसारं चीरं प्रथमप्रसूतानां। मेध्यञ्च सरसायनमुक्तमिदं दुर्ब्बलन्तु दुग्धानाम्॥ तासां मासवयादूर्द्धं गुर्व्विणीनाञ्च यत्पयः। यद्दाहि लवणं चीरं मधुरं पित्तदीपकृत्॥ गवादीनां वर्णभेदाद्गुणा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुग्धादिके पृथक्। कैश्चिदुक्तो विशेषाच्च विशेषो देशभेदतः॥" तथा उक्तञ्च। देशेषु देशेषु च तेषु तेषु तृणाम्बुनी यादृशदोषयुक्ते। तत्सेवनादेव गवादिकानां गुणा हि दुग्धादिषु तादृशत्वम्। शीतं स्निग्धं गुरु गौल्यं हृष्यं पित्तापहं परं। ज्ञेयञ्चैवाभिधौतस्य कीलाटन्तु पयस्कदः॥" रा.नि.व १५। प्रभातदुग्धं—"निशाशीतांशुसंशीतं निद्रालस्यश्रमानुगं। सघनं शीतकफकृत् क्षीरं प्राभातिकं भवेत्॥" अत्रि.८अ.।

दुग्धकन्दगणः। पुं। दुग्धप्रधाने अश्वगन्धादिद्रव्यगणे। यथा—"अश्वगन्धा च मुशली विदारी च शतावरी। क्षीरवाराहिका चेति दुग्धकन्दगणस्त्वयम्॥" गुणाः—"बालकी वर्द्धते वीर्य्यैरिरंसुर्बालया सह। एतदर्कस्य पानेन कन्या षोड़शवार्षिकी॥" अर्क.।

दुग्धकूपिका। स्त्री। घृतदुग्धमिश्रिततण्डुलचूर्णकृतपिष्टकविशेषे। तन्निर्माणविधिः यथा—"तण्डुलचूर्णविमिश्रित-नष्टक्षीरेण सान्द्रशिष्टेन। दृढ़कूपिका विदध्यात्ताच्च पचेत् सर्पिषा सम्यक्। अथ तां कीरितमध्यां घनपयसा पूर्णगर्भाच्च। सदृकमुद्रितवदनां सर्पिषि सपक्ववदनाच्च। अथ पाण्डुखण्डपाके स्रापयेत् कर्पूरवासिते कुशलः।" गुणाः—"अथ दुग्धकूपिका सा बल्या पित्तानिलापहा। हृष्या शीता गुर्व्वी शुक्रकरी हृंहणी रुच्या। विदधाति कायपुष्टिं दूरप्रसारिणीं सुचिरम्॥" भा.।

दुग्धतालीयम्। क्ली। दुग्धसारे। हे.च.। दुग्धासवे। क्षीरफेने। मे.।

दुग्धतुम्बी। स्त्री। क्षीरालाब्वाम्। वै.निघ.।

दुग्धत्रयम्। क्ली। गोमहिषच्छागदुग्धेषु। र. सा.सं.।

दुग्धदा। स्त्री। चणिकातृणे। रा.नि.व.८।

दुग्धनिका। स्त्री। रक्तापामार्गे। अर्कवृक्षे। वै.निघ.।

दुग्धपाचनः। त्रि। दुग्धपाककरे। क्ली। दुग्धपाकपात्रे। हारा.।

दुग्धपाषाणः (कः)। पुं। खटिकाविशेषे। फूलखड़ि, खड़िमाटी। हिं झिरगोला। तत्पर्य्यायः,—दुग्धपाषाणकः, दुग्धाश्मा, क्षीरी, गोमेदसन्निभः, वज्राभः, दौग्धिकः, दुग्धी, क्षीरवरः, सौधः। गुणाः—रुच्य ईषदुष्णः ज्वरपित्तहृद्रोगकासशूलाध्मानहरश्च। रा.नि.व.१३।

दुग्धपाषाणिका। स्त्री। दुग्धपाषाणे। फूलखड़ि। रा.नि.व.३।

दुग्धपुच्छी। स्त्री। वृक्षविशेषे। दुधपेया। श.च.। तत्पर्य्यायः—सेवकालुः, निशाभङ्गा, नमस्कारी (श.)।

दुग्धफेनः (कः)। पुं, क्ली। क्षीरफेने। दूधेर फेना। रा.नि.व.१५। गुणाः—"क्षणगोऽस्यपयःफेनमजानां वेति श्रुस्यते। मन्दाग्नीनाङ्कृशानाञ्च विशेषादतिसारिणाम्। उत्साहदीपनम्बल्यं मधुरं वातनाशनं। सद्यो बलकरञ्चैव तच्च क्षीरविलोड़ितं। क्षीणज्वरातिसारे च सामे च विषमज्वरे। मन्दाग्नौ कफमाश्रित्य पयःफेनम्प्रशस्यते। क्षीरं गवाङ्क्षीरफेनं तक्रं वा हितमेव च। पक्वान्नभक्षणादापि ग्रहणी तस्य नश्यति। ताम्बूलं नैव सेवेत क्षीरम्पीत्वा तु मानवः। यावत्तच्च द्रवेत् क्षीरभुक्तान्नादापि श्रस्यते॥" अत्रि.।

दुग्धफेनी। स्त्री। स्वनामख्यातक्षुपे। सं कं दुधफेनी, हालुगोलवि। तत्पर्य्यायः,—पयःफेनी, फेनदुग्धा, पयस्विनी, लतारिः, व्रण-केतुघ्नी, गोजापर्णी। गुणाः—कटुः तिक्ता हिमा विषघ्नी व्रणघ्नी रुच्या। रा.नि.व.५। पक्वान्नविशेषे। वै. निघ.।

दुग्धरुहः। पुं। तिलकवृक्षे।

दुग्धवटी। स्त्री। औषधे वटी। विषं हिङ्गुलं धुस्तूरबीजं समभागं गृहीत्वा धुस्तूरपत्तरसेन प्रहरं मर्द्दयित्वा मुद्गमाना वटी कार्य्या। भैष.।

दुग्धवीजः (जा)। पुं, स्त्री। यावनालादिकृतचिपीटके। जनार वा जोयारेर चिड़े। "ये चान्ये यावनालाद्याश्चिपिटास्तण्डुलाः। अतण्डुलास्ते तु दुग्धबीजाः प्रकीर्त्तिताः॥" गुणाः—"दुग्धबीजा सुमधुरा दुर्ज्जरा वीर्य्य-पुष्टिदा। शालेय-यावनालाद्याः चिपिटाः पुष्टिवर्द्धनाः॥" रा.नि.व.१६।

दुग्धसन्तानिका। स्त्री। दुग्धसरे। वै. निघ.।

दुग्धहरणी। स्त्री। दुग्धवहनाड्याम्। रस. र. स्तनरो.चि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुग्धचीरिका। स्त्री। दुग्धतण्डुलघृतशर्करा-कृतपायसे। यथा—"दुग्धाष्टमांशभागेन तण्डुलान् घृतसंस्कृतान्। शुद्धेऽर्द्धपक्के दुग्धे तु चिप्ता सिद्धा हि चीरिका। पायसं शर्करायुक्तघृतप्रक्षेपणाद्भवेत्॥" गुणाः—"सा गुरुर्वातरक्तघ्नी मलावष्टम्भकारका तथा। अरुचिं मेदरुद्धिञ्च कफमग्निञ्च मन्दताम्। कृत्वा च रक्तपित्तं हि वातपित्तञ्च नाशयेत्॥" द्रव्यगुणः।

दुग्धा (ग्धी)। स्त्री। चीरिकायां। क्षिरांई। रत्ना.। भैष.क्षुद्ररो.चि.। काकोल्याम्। पलाशीलतायाम्। शारिवायाम्। वै. निघ.। दुग्धपाषाणे। फूलखड़ि। रा.नि.व.१३।

दुग्धाम्लम्। क्ली। दुग्धतालीये। आँवेर सङ्गे दुध। गुणाः—"दुग्धाम्लं शीतलं स्वादु हृद्यं वर्णकरं गुरु। वातपित्तापहं रुच्यं हृद्दाहश्लेष्मवर्द्धनम्॥" रा.नि.व.१५।

दुग्धाश्मा। पुं। दुग्धपाषाणे। फूलखड़ि। रा.नि.व.१३।

दुग्धाक्षः। पुं। चीरस्फटि[illegible]—कल्पतरुः।

दुग्धिका। स्त्री। क्षुद्रचीरिकायाम्। वै.निघ.। खिरांई। मं दुधि। कं दुधले। तें पिन्नपालचेट्टु। तत्पर्य्यायः,—दुग्धी, चीरी, चीरात्मिका (शब्दर.); अपिच "दुग्धिका स्वादुपर्णी स्यात् चीरावी चीरिणी तथा।" भा.। गुणाः—"दुग्धिकीषा गुरू रूक्षा वातला गर्भकारिणी। स्वादुचीरा कटुस्तिक्ता सृष्टमूत्रमलापहा। स्वादुर्विष्टम्भिनी हृद्या कफकुष्ठक्रिमिप्रणुत्॥" भा.। चि.क्र.क.प्रदर चि.। रस. र. ज्वराति. चि.। इन्दीवरायाम्। इक्षुचिर्भटी। शुक्लकटुकालाव्याम्। तिरै लाउ। वै.निघ.। वृक्षभेदे। खिर्णी गाछ। र.मा.।

दुग्धिनि (नी) का (नी)। स्त्री। रक्तापामार्गचुपे। रा.नि.व.४। शुक्लदुग्धालाव्याम्। वा. उ.३७अ.।

दुच्छकः। पुं। सुरामांसाम्। मे.। तालीशपत्रे। वै.निघ.।

दुड़िः (लिः)। स्त्री। कच्छपिकायाम्। अ.टी. रा.। मे.।

दुण्डुभः। पुं। सर्पभेदे। ढोंड़ा साप। उणा.।

दुण्डुभा। स्त्री। सर्पवृक्षे। वै.निघ.।

दुद्रुमः। पुं। कन्दविशेषे, हरितपलाण्डौ। अम.।

दुन्दुः। पुं। दण्डटक्कायाम्। दामामा। शब्दर.।

दुन्दुभिः। पुं। सर्पदष्टेन्दुरादौ, दन्दुर इति लोके। सु.कल्प.७अ.। प्रतुदपक्षिविशेषे। च.सू २७अ.। विषे। हे.च.।

दुन्दुमारः। पुं। विड़ाले। वै.निघ.।

दुन्धुमारः। पुं। धुन्धुमारे, गृहधूमे।

दुम्बकः। पुं। स्वनामख्यातमीषे। दुम्बा। वै. निघ.।

दुरभिग्रहः। पुं। अपामार्गचुपे। रा.नि.व.४।

दुरभिग्रहा। स्त्री। दुरालभायां। कपिकच्छौ। अपामार्गे। रा.नि.व.२३। अलाव्यां। वै.निघ.।

दुरामर्षः (र्षा)। पुं, स्त्री। सिद्धार्थे। श्वेत सरिषा। (र्षा) कुटुम्बिनीचुपे। रा.नि.व.५।

दुरारुहः। पुं। नारिकेलवृक्षे। विल्ववृक्षे। रा.नि.व.११।

दुरारुहा। स्त्री। खर्ज्जूरीवृक्षे। खेजूर गाछ। नारिकेलवृक्षे। तालवृक्षे। वंशे। रा.नि.व.२३।

दुरारोहः। पुं। तालवृक्षे। शाल्मलीवृक्षे। खर्ज्जूरीवृक्षे। वै.निघ.। शरटे। रा.नि.व.१९।

दुरारोहा। स्त्री। शीवल्लीवृक्षे। रा.नि.व.८। शरटे। गिरगिटे। रा.नि.व.२३। पिण्डीखर्ज्जूर्य्याम्। भा.। शाल्मलीवृक्षे। विका.।

दुरालभा (लम्भा)। स्त्री। (Alhagi maurorun. Syn. Hedysarum Alhagi.) स्वनामख्यातचुपे। हिङ्गुया इति ख्याता। दुरालभा(लां)भा। हिं वम, अवासा दुरालभा, धमासा। मं वेलिकामूली। कं वल्लिदुरवे। तें पिलरेगटि टुलगोंड़ि। तत्पर्य्यायः—यासः, यवासः, दुःस्पर्शः, कुनाशकः, रोदनी, अनन्ता, समुद्रान्ता, (अ.), धनुर्य्यासा, यवसः, कच्छुरा (शब्दर.), धन्वयवास. (अ.टी.भ.), विकण्टकः (ज.), आत्ममूली, पद्ममुखी, इदंकार्य्या (श.), दुरालम्भा, धन्वयासः, तामूला, कच्छूरा, दुःस्पर्शा, धन्वी, धन्वयवासकः, प्रबोधनी, सूक्ष्मदला, विरूपा, दुरभिग्रहा, दुर्लभा, दुष्प्रधर्षा सा द्विधा स्थूलसूक्ष्मभेदात्। गुणाः—कटुः तिक्ता उष्णा चारोष्णिका मधुरा वातपित्तघ्नी ज्वर-गुल्म-प्रमेहघ्नी च। रा.नि.व.४। "यासः स्वादुः सरस्निग्ध-स्तुवरः शीतलो लघुः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कफ् मेदो-मद-भ्रान्ति-पित्तासृक्-कुष्ठ-कासजित् । तृष्णा वीसर्प-वातास्र-वमि-ज्वरहरः स्मृतः । यवासस्य गुणैरुक्ता बुधैस्तुल्या दुरालभा ।" भा. । वा.चि. १अ. । सि.यो.कास.चि. । "दुरालभास्रवेतसैः ।" कार्पासवृक्षे । स्त्रक्षायां । पिड़िंग शाक । श. चि. ।

दुरालभादिः । पुं । दुरालभा-मृता-मुस्ता-नागरकृतः कषायः वातज्वरे हितः । दुरालभादिरयं पितज्वरतृष्णारक्तपित्तदाहघ्नः । वा. चि. १ अ. । "दुरालभा-पर्पटक-प्रियङ्गु-भूनिम्ब-वासा-कटुरोहिणी-नाम् । जलं पिबेत् शर्करयावगाढम् ।" च.द.पि. ज्व.चि. ।

दुरालम्भा । स्त्री । दुरालभायाम् । रा. ।

दुरासदः । पुं । खड्गे । शब्दर. । त्रि. । दुष्प्राप्ये ।

दुरिः । स्त्री । ऋतुमत्यां । शब्दर. ।

दुरितद(श)मनी । स्त्री । शमीवृक्षे । रा. नि.व.८ ।

दुरिष्टकृत् । पुं । अभिचारकर्त्तरि ।

दुरूराहः । पुं । पुष्कलयुक्त-दुकुलाहार्श्वे । "दुकुलाहो दुरूराहः पुष्कलैरेव कीर्त्तितः ।" ज.द. ३ष. ।

दुरोहः । पुं । नागकेशरवृक्षे । वै.निघ. ।

दुर्गः । पुं । गुग्गुलौ । रा.नि.व.१२ ।

दुर्गकारकः । पुं । तरुभेदे । श.मा. ।

दुर्गन्धम् । क्ली । सौवर्चलललवणे । हे.च. ।

दुर्गन्धः । पुं आम्रवृक्षे । श.च. । पलाण्डौ । भा. । त्रि । पूतिगन्धयुक्ते ।

दुर्गन्धकाष्ठः । पुं । विट्खदिरवृक्षे । गुप्ते-वाबला ।

दुर्गन्धा । स्त्री । वाकुच्याम् । सोमराज । वै. निघ. ।

दुर्गन्धास्यः । पुं । मुखरोगभेदे । मुखे दुर्गन्ध हओआ ।

दुर्गन्धिः । पुं । आम्रवृक्षे । दुर्गन्धे । क्ली । सौवर्चललवणे । वै. निघ. ।

दुर्गपुष्पी (ष्पिन्) । पुं । वनस्पतिभेदे । केशपुष्पा इति लोके । श.च. ।

दुर्गलङ्घनः । पुं । वृष्टे । हे.च. । [अ. ।

दुर्गसञ्च(ञ्चा)रः । पुं । संक्रमे । साँको, पूल ।

दुर्गा । स्त्री । श्यामपक्षिणि । शामापाखी । रा. नि.व.२३ । कृष्णचटके । कृष्णशारिवायाम् । श्यामा लतां । नील्यां । मे. । कोकिलायाम् । वै.निघ. । अपराजितायां । श.च. ।

दुर्गाह्लादः । पुं । भूमिजगुग्गुलौ । वै.निघ.

दुर्गाह्वः । पुं । भूमिजगुग्गुलौ । रा.नि.व.१२ ।

दुर्ग्रहः । पुं । अपामार्गवृक्षे । रा.नि.व.४।२३ ।

दुर्ग्रहा । स्त्री । मुस्तायाम् । रा.नि.व.२३ । अपामार्गे । भा.पू.१भ. ।

दुर्घटा । स्त्री । पृष्ठग्रन्थौ । वै.निघ. ।

दुर्घोषः । पुं । भल्लुके । रा.नि.व.१९ ।

दुर्जरः । त्रि । दुष्पचे । वै.निघ. ।

दुर्जरफलम् । क्ली । कर्कटिकायाम् । वै.निघ. ।

दुर्जरा । स्त्री । ज्योतिष्मतीलतायाम् । लता-फट्‌की । रा.नि.व.३ । घोले । वै.निघ. ।

दुर्जलजेता (रसः) । पुं । नवज्वरे रसः । पाठः—"विषं भागद्वयं दग्धं कपर्दं पञ्चभागकं । मरिचं नागरञ्चैव चूर्णं वस्त्रेण शोधयेत् । आर्द्रकस्य रसेनास्य कुर्य्यात् मुद्गनिभां वटीं । वारिणा वटिकायुग्मं प्रातः सायञ्च भक्षयेत् ॥" विषं २ भ. वराटकभस्म मरिचचूर्णं गुण्ठीचूर्णं प्र. ५ भ. । भा.म.१भ. ।

दुर्दग्धम् । क्ली । अग्निदग्धरोगे ।

दुर्दर्पः । पुं । भल्लातकवृक्षे । वै.निघ. ।

दुर्दर्भम् । क्ली । ऋषभौषधौ ।

दुर्द्रिता । स्त्री । लतामेदे । जटा. ।

दुर्दिनम् । क्ली । मेघाच्छन्ने दिने । "मेघाच्छन्नेऽह्नि दुर्दिनम् ।" अ. ।

दुर्द्रुमः । पुं । हरित्पलाण्डौ । रा.नि.व.७ ।

दुर्द्धरः । पुं । ऋषभकौषधौ । मे. । भल्लातकवृक्षे । अनड्वाहि । रा.नि.व.२३ । पारदे । वै.निघ.

दुर्द्धर्षा । स्त्री । नागदमन्याम् । नागदना । रा. नि.व.५ । कन्यारीवृक्षे । फणिमनशा । रा.नि.व.८ ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्नाम(क)म् (मा)। क्ली, स्त्री। अर्शोरोगे। रा.नि.व.२०। स्त्री। पङ्कगुल्मौ। झिण्टिका। हारा.। गण्डूपदे। केँचो। वै.निघ.।

दुर्नामारिः। पुं। शूरणे। ओल। रा.नि.व.७।

दुर्नाम्नी। स्त्री। अर्शोरोगे। शा.र.।

दुर्न्यासः। पुं। असम्यक्स्थापने। भा.म.३भ.।

दुर्बला। स्त्री। जलशिरीषे। भा.। चि.। बलहीने।

दुर्भरा। स्त्री। ज्योतिष्मतीलतायाम्। वै.निघ.।

दुर्भिक्षा। स्त्री। काकजङ्घायाम्। वै.निघ.।

दुर्मनाः। स्त्री। शतावर्य्याम्। रा.नि.व.४।

दुर्मरः। पुं। पिप्पलवृक्षे। अश्वत्थ गाछ। वै. निघ.।

दुर्मरा। स्त्री। शतमूल्याम्। रा. नि. व. ४। श्वेतदूर्व्वायां। रा.नि.व.८। दूर्व्वायां। जटा.।

दुर्मांषा। स्त्री। शुक्लगुञ्जायाम्। मद.व.२।

दुर्मुखः। पुं। वानरे। घोटके। सर्पे। विका.।

दुर्मुखा। स्त्री। शुक्लगुञ्जायाम्। वै.निघ.।

दुर्मोका। स्त्री। श्वेतगुञ्जायाम्। वै.निघ.।

दुर्मोहाः। स्त्री। काकादनीलतायाम्। श्वेत कूँच। रा.नि.व.३। रक्तगुञ्जायाम्। वै.निघ.।

दुलभः। पुं। कर्चूरे। शठी। वस्. कचोरा। रा.नि.व.६। वै.निघ.। श्वास.री.चि.श्वासकालेश्वरे। दुरालभायाम्। रा.नि.व.४। रक्तदुरालभायाम्। वै. निघ. २भ.मधुरज्व.चि.मधुकादिः। शब्दार्थ.।

दुर्व्वरा। स्त्री। ब्राह्मणयष्टिकायाम्। वामुनहाटी।

दुर्वर्ण(क)म्। क्ली। रौप्ये। प. सु.। एल बालुके। रा.नि.व.४।

दुर्विधेया। स्त्री। कर्पूरशब्यां। आम आदा। वै.निघ.।

दुलिः (ली)। स्त्री। कच्छप्याम्। मंदि काछिम। अ.टी.भ.।

दुश्चक्रमः। पुं। गोचुरके। रा.नि.व.४।

दुश्च(ष्क)रः। पुं। भल्लूके। रा.नि.व.१९। शम्बूके। हारा.।

दुश्चर्म्मा। पुं। त्वग्दोषरोगे। त्वक्दोष। ते च शीतपित्तोदर्दकीठरोगाः। रा.नि.व.२०।

दुष्कुलः (लोनः)। पुं। चोरकनामगन्धद्रव्ये। रा.नि व.१२। शा.र.।

दुष्खदिरः। पुं। अरिमेदे। विटखदिर। तत्पर्य्यायः,—काश्मीजी, कालस्कन्धः, गोरटः, अमराज, पवतसः, बहुसारः, सारखदिरः, महासारः, क्षुद्रखदिरः। गुणाः—कटु-तिक्तौषः रक्तव्रणकण्डूविषवीसर्पज्वरकुष्ठोन्मादभूतघ्नश्च। रा. नि.व.८।

दुष्टम्। क्ली। कुष्ठौषधौ। कूड़। शा.च.।

दुष्टपीनसः। पुं। पीनसरोगे। वै.निघ.।

दुष्टप्रतिश्यायः। पुं। नासारोगविशेषे। "प्रक्षिप्यते पुनर्नासा पुनश्च परिशुष्यति। पुनरानह्यते चापि पुनर्विध्यते तथा। निश्वासो वाति दुर्गन्धो नरो गन्धं न वेत्ति च। एवं दुष्टप्रतिश्यायं जानीयात् कृच्छ्रसाधनम्॥" मा.नि.।

दुष्टमुखः। पुं। दंशकीटे। डाँश। रा.।

दुष्टव्रणः। पुं। दूषितक्षते। नाड़ीव्रणे।

दुष्टान्नम्। क्ली। विषादिदुष्टे अन्ने। भा.अ. ७क.पि.चि.।

दुष्टाम्बु। क्ली। दुष्टजले। मे.।

दुष्यन्तः। पुं। चोरकनामगन्धद्रव्ये। चोरा इति पार्व्वताः। रा.नि.व.१२।२३। चण्डालकन्दे। यमानीभेदे। वै.निघ.।

दुष्प्रदम्। क्ली। सौविराञ्जने।

दुष्प्रधर्ष(र्षि)णी। स्त्री। कण्टकार्य्याम्। रा. नि.व.४। वार्त्ताक्यां। प.मु.। हृहत्यां। भा.।

दुष्प्रधर्षा। स्त्री। दुरालभायाम्। रा.नि.व.४। खर्ज्जूरीवृक्षे। खेजूर गाछ। रा.नि.व.११।

दुष्प्रवेशा। स्त्री। कन्यारिवृक्षे। फणिमनसा। रा.नि.व.८। गृहकन्यायाम्। वै.निघ.।

दुस्पर्शः। पुं। दुरालभायाम्। भा.टी.भ.। सि. यो.वातकासाधिकारे। च.द वातकफज्व.। "व्याघ्रीदुस्पर्शगोक्षुरैः।" भा.। लताकरञ्जे। रा.नि.व.८।

दुस्पर्शा। स्त्री। कपिकच्छ्वाम्। आलाकुशी। रा.नि.व.३। रक्तदुरालभायाम्। रा.नि.व.४।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाटलवृक्षे । आकाशवल्लीलतायाम् । आलोकनता । वनबदरे । वै.निघ. । कण्टकार्य्याम् । रा. नि.व.४।२३।

दुस्फोटः । पुं । दुष्टव्रणे । शस्त्रभेदे । हे.च. ।

दुस्थः । पुं । कुक्कुरे । कुक्कुटपक्षिणि । शब्दार्थकल्प. ।

दुहिता । स्त्री । कन्यायाम् । अ. ।

दूः । पुं । रोगे । वै.निघ. ।

दूतः । पुं । वैद्यानेतरि । गमनाय प्रज्ञाय वागते पुरुषे । सु.सू.१०अ. । तल्लक्षणम्—"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते । दूता. सुजातयोऽव्यङ्गाः पटवो निर्म्मलाम्बराः । सुखिनोऽश्ववृषारूढाः शुभपुष्पफलैर्युताः । सजातयः सुचेष्टाश्च सजौवदिशि सङ्गताः । भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥" भा. ।

दूतघ्नी । स्त्री । कदम्बपुष्पायाम् । श.च. ।

दूति(ती)का । स्त्री । सारिकापक्षिणि । शौनिक । रा.नि.व.१९ । श्वेतकण्टकार्य्यां । वै. निघ. ।

दूती । स्त्री । रक्तपाटलायाम् । शारिकापक्षिणि । रा.नि.व.१९ । वै.निघ. ।

दूरगः (मः) । पुं । उष्ट्रे । गर्दभे । रा. नि. व. १९ । वै. निघ. ।

दूरजम् । क्ली । वैदूर्य्यमणौ । भा. ।

दूरदर्शनः (दर्शी, ष्टक्) पुं । गृध्रे । विका. । पण्डिते । हे.च. ।

दूरमूला । स्त्री । मुञ्जे । मूज । दुरालभायाम् ।

दूरेरितेक्षणः । वि । केकरे । टेरा, गजा । श.मा. ।

दूर्य्यम् । क्ली । विष्ठायाम् । श.र. ।

दूर्व्वा । स्त्री । (Cynodon dactylon. Syn. Agrostis cynosurioides, or panicum doctylon.) खनामख्यातघासविशेषे । दूर्बा । हिं उत्, दुब् । तें गरिकेगडि, गरिकगसुबु । ता. अरुगम् पुल्लु । तत्पर्य्यायः,—शतपर्व्विका, सहस्रवीर्य्या, भार्गवी, रुहा, अनन्ता (अ.) गुणा (रा.), नन्दा, महावरा (शब्दर.), हरितालिका (वि.), तिक्तपर्व्वा, दुर्म्मरा, महवीर्य्या, हरिता, हरितालो, कच्छरुहा । श्वेतायाः पर्य्यायः,—शतवीर्य्या, गण्डाली, शकुलाचकः, गोलोमी (ज.), सितदूर्व्वा, सितालता (र.), शतपर्व्वा, सिता (र.) । दूर्व्वा बहुधा श्वेतनीलमालागण्डभेदेन । तासां विशेषाः स्वरूपपर्य्याये मुख्याः । सा. गुणाः—कषायाः मधुराः शीतपित्ततृष्णारोचकवमिघ्नाः दाहमूर्च्छाश्रमभूतशान्तिश्लेष्मरक्तमध्वंसिन्यश्च । रा.नि.व.८ । वा.सू.१५ अ. । "दूर्व्वानन्तानिम्बवासाः ।" श्वेतदूर्व्वायाम् । भा.३भ.बालरो.वि. । "श्वेता दूर्व्वा घृतं मधु ।" शय्याम् । रा.नि.व.६ ।

दूर्व्वादिवर्गः । पुं । दूर्व्वानन्तानिम्बवासात्मगुप्तागुन्द्राभीरुशीतपाकीप्रियङ्गवश्चेति वर्गे । गुन्द्रः शर., अभीरुः शतावरी सुस्तकं वा, शीतपाकी गम्भा । अयञ्च वर्गः पित्तघ्नः न्यग्रोधपञ्चकादिवत् । वा.सू.१५अ. ।

दूर्व्याद्यघृतम् । क्ली । रक्तपित्ते घृतम् । गव्यघृतं ४ शु. । कल्कार्थं—दूर्व्वामूलं उत्पलमूलं कुङ्कुमं मञ्जिष्ठा एलवालुकम् उशीरं मुस्ता रक्तचन्दनम् एषां प्र. २ तो. । पाकार्थं—आतप्ततण्डुलजलं १६ शु. छागदुग्धं १६ शु. । (तण्डुलोदकार्थं तण्डुलं ४ शु. जलं १६ शु.) भैष. । भा. ।

दूर्व्वासोमः । पुं । सोमलतामेदे । सू.चि.२९अ. ।

दूलकम् । क्ली । तूलके । तूली । रस.र.बाल.चि. ।

दूलि(ली)का । स्त्री । नील्याम् । नील गाछ । श.र. ।

दूश्यम् । क्ली । वस्त्रगृहे । तँबू । अ.टी. ।

दूषकः । पुं । शालिधान्यभेदे । गुणाः शालिवत् । सु.सू.४६अ. । भा.पू.१भ.धा.व. । पक्षिभेदे ।

दूषिः (षि[षी]का) । स्त्री । नेचसले । चक्षुर्म्म पिचुटी । रा.नि.व.१८ । अ.टी.भ. । श.र । तत्पर्य्यायः,—पिच्चोड़कं पिच्चिटः पिच्चट (शब्दर.)। मुखदूषिकारोगे । वा. उ. ३१ अ. । तूलिकायाम् । मे. ।

दूषीविषम् । क्ली । औषधादिकृतावीर्य्यविषे । भोजनादिदोषेण निद्रया वा दूषितं क्षीणविषं धातूनपि कार्ये दूषयत् दूषीविषमित्युच्यते । "दूषितं देश-कालान्न-दिवास्वप्नैरभोक्तृजः । यस्माद्दूषयते धातून् तस्माद्दूषीविषं स्मृतम् ॥" तस्य चि. अजेयघृतादौ । सु.कल्प.२अ. । तच्च विषं प्राणहरम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा—दूषीविषं प्राणहरमिति सङ्क्षेपतो मतम्। लक्षणं—"गात्रं रक्तं सितं रक्तं श्यावं वा पिड़कान्वितं। सकण्डूदाहवीसर्पपाकि स्यात् क्रोधनं तथा॥" च.। गुणाः—"उदरगुल्मकुष्ठप्रमेहघ्नम्।" राजनि.।

दूषीविषारिः। पुं। दूषीविषविषघ्ने अगदविशेषे। "पिप्पल्यो ध्यामकं मांसी रौद्रमेला सुवचिका। कुटन्नटं नतं कुष्ठं यष्टीचन्दनगैरिकम्। दूषीविषारिनामायं न चान्यत्रापि वाध्यते॥" वा. उ. ३५अ.। सु. कल्प १अ.।

दूष्यम्। क्ली। रक्ते। वा.सू.३५अ.। पूये। हे. च.। वस्त्रे। वस्त्रगृहे। मे.।

दूष्यजलम्। क्ली। विषमूलादिदुष्टवारिणि। विष्ठादिदुष्टे जले। यथा—"विषमूलारुजनीलिकाविषहतं तप्तं घनक्लेनिलं दन्त्याद्यमनार्त्तवं सलवणं शैवालकैः संवृतम्। जन्तुव्रातविमिश्रितं गुरुतरं पर्णीघपङ्काविलं चन्द्रार्कांशुतिरोहितं च न पिबेत् नीरं जड़ं दूषितम्॥" रा.नि.व.१४।

दूष्या। स्त्री। हस्तिकचरज्जौ। काँचदड़ि। हे.।

दूष्युदरम्। क्ली चिरीषजोदररोगे। निदानलक्षणं यथा—"स्त्रियोऽन्नपानं नखरोमसूत्रविड़ार्त्तवैर्युक्तमसाधुवृत्ताः। यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा। तेनाशु रक्तं कुपिताश्च दोषाः कुर्व्वन्ति घोरं जठरं विलिङ्गम्।...प्रकीर्त्तितं दूष्युदरन्तु घोरम्॥" सु.नि.७अ.।

दृक्। स्त्री। नेत्रे। रा.नि.व.१८।

दृकम्। क्ली। छिद्रे। उणा.।

दृक्कटः। पुं। इत्कटे। विका.।

दृक्कर्णः। पुं। सर्पे। हे.च.।

दृक्प्रदम्। क्ली। सौवीराञ्जने। रा.नि.व.१३।

दृक्प्रसादः। पुं, स्त्री। कुलत्थायाम्। वनवाँदरा। रा. नि. व. ५। कुलत्थाञ्जने। रा. नि. व. १३।

दृक्श्रुतिः। पुं। सर्पे। हेला.।

दृक्सेकः। पुं। आश्रीतने। वै.निघ.।

दृगध्वाक्षः। पुं। सूर्य्ये।

दृग्योनिः। पुं। ईर्ष्यकक्लीवे। निदा.।

दृग्विषः। पुं। सर्पे। हे.च.।

दृग्व्याधिहतम्। क्ली। रक्ताञ्जने। वै.निघ.।

दृड़कः। पुं। चुल्लाम्। उनुन।

दृढ़ः। पुं, क्ली। एलवालुके। रा.नि.व.४। शालवृक्षे। धववृक्षे। लौहे। शु.च.। हीरके। वै.निघ.। त्रि.। कठिने। मे.।

दृढ़कण्टकः (का)। पुं, स्त्री। खर्ज्जूरवृक्षे। वै.निघ.। अङ्कोटवृक्षे। धल आँकड़ गाछ। शु.च.।

दृढ़काण्डम्। क्ली। दीर्घरोहिषतृणे। बड़ गन्धतृण। रा.नि.व.८। पुं। वंशे। बाँश। रा. नि.व.७।

दृढ़काण्डा। स्त्री। वल्मादनीलतायाम्। पातालगरुड़ी। रा.नि.व३।

दृढ़गर्भम्। क्ली। हीरके। प.मु.।

दृढ़गात्रिका। स्त्री। सत्स्याण्डिकायाम्। मिछरि। शु.।

दृढ़ग्रन्थिः। पुं। वंशे। बाँश। रा.नि.व.७।

दृढ़च्छदः। पुं,क्ली। तालवृक्षे। रा.नि.व.९। दीर्घरोहिषे। बड़ गन्धतृण। रा.नि.व.८।

दृढ़तरुः। पुं। धवलवृक्षे। धाओया गाछ। रा. नि.व.९।

दृढ़त्वक्। पुं,स्त्री। सुञ्जतृणे। मूज। (क्षा) वल्लजायां। ऊनू। रा.नि.व.८।

दृढ़त्वक्। पुं। यावनालशरे। रा.नि.व.८। सुञ्जतृणे। वै.निघ.।

दृढ़दंशुकः। पुं। जलचरविशेषे। हाङ्गर। वै.निघ.। शब्दार्थकल्पतरुः।

दृढ़नीरः (लः)। पुं। नारिकेलवृक्षे। रा. नि.व.११।

दृढ़पत्रः। पुं। वंशे। बाँश गाछ। रा.नि.व. ७। सुञ्जतृणे। वै.निघ.।

दृढ़पत्नी। स्त्री। वल्लजायां। ऊनू। रा.नि.व.८।

दृढ़प(पा)दा (पादी)। स्त्री। भूम्यामलक्यास्। यवतिक्तायाम्। रा.नि.व.३।५। [व.५।

दृढ़पदी। स्त्री। वल्लाके। पत्रगाछा। रा.नि.

दृढ़पुष्पा। स्त्री। गुलुच्छकन्दे। वै.निघ.।

दृढ़पृष्ठकः। पुं। कच्छपे। रा.नि.व.१९।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृढ़प्ररोहः। पुं। वृक्षवृक्षे। पाकुड़ गाछ। रा.नि.व.११।

दृढ़फलः। पुं। नारिकेलवृक्षे। गुवाकवृक्षे। रा.नि.व.११। कतकवृक्षे। निर्म्माल्य। वै.निघ.।

दृढ़बन्धिनी। स्त्री। श्यामालतायाम्। श.च.।

दृढ़बालुकम्। क्ली। एलबालुके। रा.नि.व.४। वै.निघ.।

दृढ़भार्गवकम्। क्ली। हीरके। रा.नि.व.१३। See वज्रम्।

दृढ़माला। स्त्री। भूधात्र्याम्। वै.निघ.। भा.।

दृढ़मूलः। पुं। सुश्रुतोक्ते। भूज। मन्थानकवृक्षे। रा.नि.व.८। नारिकेलवृक्षे। शब्दार्थकल्पतरुः।

दृढ़रङ्गदा (ङ्ग)। स्त्री। स्फटिकारिकायां। भा.। रा.नि.व.१३।

दृढ़रजाः। स्त्री। प्रौढ़स्त्रियाम्। वै.निघ.।

दृढ़लता। स्त्री। वत्सादनीलतायाम्। पातालगरुड़ी। रा.नि.व.३।

दृढ़लोमा (न्)। पुं, स्त्री। शूकरे। श.च.।

दृढ़वल्कः (ल्कः)। पुं। क्रमुकवृक्षे। रा.नि.व.११। लकुचवृक्षे। उड़ुम्बरा गाछ। रा.नि.व.९। (ल्का) स्त्री। अम्बष्ठायां। रा.नि.व,४।

दृढ़वल्लः। पुं। सुश्रुतोक्ते। वै.निघ.।

दृढ़वीजः। पुं। वर्व्वूरवृक्षे। चक्रमर्दे। रा.नि.व.८। नारिकेलवृक्षे। वदरवृक्षे। रा.नि.व.११।

दृढ़वृन्तः (न्तः)। पुं। नारिकेलवृक्षे। वै.निघ.।

दृढ़सूत्रिका। स्त्री। मूर्व्वायाम्। मूर्गा। श.च.।

दृढ़स्कन्धः (न्धा)। पुं, स्त्री। राजादनवृक्षे। क्रौणी। जटा.। रा.नि.व.११। [११।

दृढ़स्थितिः। पुं। नारिकेलवृक्षे। रा.नि.व.

दृढ़(ढ़े)क्षुरा। स्त्री। वल्लज्ञायां। ऊनू। रा.नि.व.८।

दृढ़ेक्षुरः। पुं। सुश्रुतोक्ते। वै.निघ.।

दृढ़ा। स्त्री। सुषव्यां। तालमूली। प.मु.। भूधात्र्यां। वै.निघ.।

दृढ़ाङ्गम्। क्ली। हीरके। रा.नि.व.१३। पुं। गण्डकपशौ। गण्डार।

दृढ़ारङ्गा। स्त्री। स्फटिकारिकायां। भा.।

दृतम् (ता)। क्ली, स्त्री। जीरके। वै.निघ.। श.च.।

दृतिः। पुं। भस्त्रायां, चर्म्मपुटके। सु.सू.९अ.। मत्स्यविशेषे। मे.।

दृतिधारकः। पुं। तरुभेदे। आकनपाता गाछ। श.च.। तत्पर्य्यायः,—आनन्दी, मूषिका, रावृः, वामनः (श.)।

दृतिहरिः। पुं। कुक्कुरे। व्याक.।

दृभूः (भ्रूः)। स्त्री। सर्पे। मे.। वज्रे। सूर्य्ये। हे.च.।

दृश(ष)त्। स्त्री। प्रस्तरे। अम.। पेषणशिलायां। शिल। मे.।

दृशद्वती। स्त्री। नदीभेदे। मे.

दृशा। स्त्री। चक्षुषि। श.च.।

दृशाकाङ्क्षम्। क्ली। पद्मे। श.च.।

दृशिः (शी)। स्त्री। लोचने। श.र.।

दृशोपमम्। क्ली। श्वेतपद्मे। श.च.।

दृश्या। स्त्री। कपिकच्छौ। आलाकुशी। वै.निघ.।

दृषत्पत्री। स्त्री। शिग्रु(गु)ज्याम्। वस. सेगुड़ी, शेगुड़ति। रा.नि.व.४।

दृषत्सारम्। क्ली। सुखलौहे। रा.नि.व.१३।

दृष (ड्षे) दः। पुं। करञ्जोडिपाषाणभेदे। शाड़जोड़ा। हिं हाथाजोड़ी। वै.निघ.।

दृष्टरजाः। स्त्री। प्राप्तवयस्कायां, मध्यमायां स्त्रियि। रा.नि.व.१८।

दृष्टान्तः। पुं। दृष्टान्तोनाम "मूर्खविदुषाम्बुद्धिसाम्यं यो वर्णं वर्णयति—यथाग्निरुष्णो द्रवमुदकं स्थिरा पृथिवी आदित्यः प्रकाशश्च इति। यथावादित्यः प्रकाशकः, तथा साङ्ख्यवचनं प्रकाशकमिति।" च.वि.८अ.। मरणे। मे.।

दृष्टिः। स्त्री। नेत्रे। रा.नि.व.१८। ज्ञाने। दर्शने। मे.। [श.र.।

दृष्टिकृत् (तम्)। क्ली। स्थलपद्मे। श.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्टिपूतना। स्त्री। बालानां स्त्रीग्रहविशेषे, अन्धपूतनायाम्। वा.उ.३अ.।

दृष्टिप्रदा (वर्त्तिः)। स्त्री। नेत्ररोगे वर्त्तिः। विफला, कुक्कुटाण्डत्वक् (कुकुड़ा के डिमका खोला) काशीसं (हिराकस) लौहं नीलोत्पलं विड्ङ्गं समुद्रफेनं प्र. समं पेषयित्वा ताम्रपात्रे छागदुग्धेन सप्ताहं भावयेत्। अथ पुनश्छागदुग्धेन संमिश्र्य वर्त्तिः कार्य्या। भ.।

दृष्टिबन्धुः। पुं। खद्योते। शं.र.।

दृष्टिमण्डलम्। क्ली। दर्शने। वै.निघ.।

दृष्टियोनिः। पुं। ईर्ष्यकक्लीवे। सु.।

दृष्टिरोगः। पुं। नेत्ररोगे।

दृष्टिवर्त्म। क्ली। नेत्रवर्त्मनि।

दृष्टिविषः। पुं। सर्पे। वै.निघ।

दृष्टिसन्धिः। पुं। नेत्रकोणे। वै.निघ.।

देवः। पुं। पारदे। रा.नि.व.१३। क्ली। इन्द्रिये। मेघे। मे.।

देवकर्दमः। पुं। पञ्चसुगन्धौ। समभागश्वीखण्ड-चन्दनागुरुकर्पूरकुङ्कुमेषु। रा.नि.व.२२।

देवकाष्ठम्। क्ली। देवदारुणि। प.मु.। काष्ठदारुणि। सि.यो.काम.चि.मण्डूरवटके। तत्पर्य्यायः—पूतिकाष्ठं, भद्रकाष्ठं, सुकाष्ठकं, स्निग्धदारुकं, काष्ठदारु। गुणाः—तीक्ष्णोष्णं रूक्षं श्लेष्मवातघ्नञ्च। रा.नि.व.१२।

देवकुक्कुटकः। पुं। सुनिषण्णकशाकभेदे। शुशुनि शाक। वम्. कुरडु। गुणाः—शीतो ह्यः मूत्रशोणहरः अश्मरीनाशकः। वै.निघ.।

देवकुण्डम्। क्ली। देवखातके।

देवकुतुम्बकः। पुं। महाद्रोणपुष्पाम्। वड़ घलघासया। वै.निघ.।

देवकुम्भः (म्भा) (म्भी)। पुं, स्त्री। खनाम-ख्यातवृक्षविशेषे। हि तुम्बा, दगफला। गन्ध-प्रसारणी कुम्बेति कोङ्कणे। वम्.शीतवड़। गुणाः—कटुः तिक्तः मेध्यः पारदशोधकः पिशाचबाधाकफघ्नः वाताग्निमान्द्यघ्नः द्रोणपुष्पीगुणश्च। वै.निघ.।

देवकुरुम्बा। स्त्री। महाद्रोणपुष्पाम्। रा.नि. व.५।

देवकुसुमम्। क्ली। लवङ्गे। रा.नि.व.१२।

देवखातकम्। क्ली। अक्षविमञ्जलाशये। सुभू.। गुहायाम्। अ.टी.भ.।

देवखातविलम्। क्ली। गुहायाम्। अ.।

देवगन्धकम्। क्ली। रोहिषतृणे। गन्धतृण वै.निघ.।

देवगन्धा। स्त्री। महामेदायाम्। रा.नि.व.५। आरामशीतलतायाम्। वै.निघ.।

देवगिरिः। पुं। हिमालय-पर्व्वते।

देवग्रहः। पुं। भूतग्रहविशेषे। ब्रह्मदत्तौ। तल्लक्षणं यथा—"सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धी निस्तन्द्री अवितथसंस्कृतप्रभाषी। तेजस्वी स्थिर-नयनो वरप्रदाता ब्रह्मण्यो भवति नरः स देवजुष्टः। संखेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षी विगतभयो विसार्गदृष्टिः। सन्तुष्टो न भवति चान्नपानजातैः दुष्टात्मा भवति स देवग्रहजुष्टः॥" निदा.।

देवचिकित्सकौ। पुं। अश्विनीकुमारौ। हला.।

देवजग्ध(क)म्। क्ली। रोहिषतृणे, कत्तृणे। सुगन्धतृण। अम.।

देवट्टी। स्त्री। चिल्लपचिविशेषे। शब्दचिन्। गांरचिन। हारा.। [निघ.।

देवतरणी। स्त्री। राजतरणीपुष्पवृक्षे। वै.

देवतरुः। पुं। अश्वत्थवृक्षे, चैत्यवृक्षे। चिका.। विकङ्कतवृक्षे। वै.निघ.। मन्दारवृक्षे। पारिजात-वृक्षे। देवदारुवृक्षे। हरिचन्दने। अम.।

देवता। स्त्री। धुस्तूरवृक्षे। वै.निघ.।

देवताकुसुमम्। क्ली। लवङ्गे। देवदली इति ख्याते गन्धद्रव्ये। च.द.।

देवताड़ः (कः)। पुं। (ङी) स्त्री। देवदाली-वृक्ष। देवाताड़ा। घोषालतायाम्। प.मु.। विश्व.। तत्पर्य्यायः—वेणी, खरा, गरी, जीमूतः (अ.), अगरी, खरागरी, गरागरी (अ.टी.भ.), देवताड़ी, आखुविषहा (ज.), जीमूतकः (सुश्रु), आखुः, विषशिग्रुः, महाच्छदः, खुर्ज्जाकः, कदम्बः, खुज्जाकः, देवताड़कः (र.)।

देवताण्डः। पुं। देवदालीवृक्षे। मद.व.१।

देवतामणिः। पुं। महामेदे। वै.निघ.।

देवदग्धम्। क्ली। रोहिषतृणे। शं.चि.। रोहीतकभेदे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवदण्डा। स्त्री। नागबलायाम्। रा.नि.व.४।

देवदण्डोत्पला। स्त्री। नागबलायाम्। वै. निघ.। [श्लिघोषा। र.मा.।

देवदानो। स्त्री। देवदाल्यां। पीतघोषायां।

देवदारु। क्ली। (Cedrus deodara. Syn. Pinus deodara.) खनानख्यातसुगन्धिकाष्ठविशेषे। देवदारू। हिं देवदार। तत्पर्य्यायः,—शतपादपः, पारिभद्रकः, पूतिकाष्ठं (अ.), किलिमं, सुरभुरुहः, भद्रदारु, द्रुकिलिमं, पीतदारु, दारु, कल्पपादपः (नेष.), किलिमं (शब्दर.) सुरदारु, दारुकं, स्निग्धदारु, अमरदारु, शिवदारु, शाम्भवं, भूतहारि, भवदारु, भद्रदत्, शक्रद्रुमः, इन्द्रवृक्षः, (ज.), सुराहः, देवकाष्ठं (रे.), दारुभद्रं, इन्द्रदारु, मस्तदारु। भा.। तच्च द्विविधं स्निग्धदारुकाष्ठदारुभेदेन। तयोः स्निग्धीणं वातश्लेष्मघ्नम् आमदोषविबन्धार्शःप्रमेहज्वरघ्नञ्च। काष्ठदारु तिक्तोष्णं श्लेष्मवातघ्नं भूतदोषघ्नञ्च। रा.नि.व.१२। "सुगन्धि लघु रुक्षञ्च सुरदारु प्रकीर्त्तितम्।" भैष.। "देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकिच। विबन्धाध्मानशीतामतन्द्राहिक्काज्वरासजित्। प्रमेहपीनसश्लेष्म-कास-कण्डू-समीरनुत्॥" भा.।

देवदालिका (ली)। स्त्री। (Andropogon serratus.) मूषिकविषघ्नपीतदेवताड़ाख्यलताविशेषे। अस्याः खखासवत् फलपुष्पवृन्तानि, फलञ्च कर्कोटकीवत्। पीत घोषा, देवताड़ा। हिं घघरवेल सनैया। भा.पू.१भ.। मं देवदाली। कं देवडंगरी। तें डानरगंडि, लताविशेषसु। देवलि इति। सु.टी.३९अ.ड.। तत्पर्य्यायः,—जीमूतकः, कण्टफला, गरा, गरी, वेणी, महाकीषफला, कट्फला, घोरा, कदम्बी, विषहा, कर्कटी, सारमूषिका, वृन्तकीशा, आखुविषहा, दाली, रोमशा, पविका, तुरङ्गिका, सुतर्कारी, देवताड़ः। गुणाः—तिक्तोष्णा कटुका पाण्डुकफघ्नी अर्शः-श्वासकासकामलाभूतघ्नी च। रा. नि. व. ३। तत्फलं मलसञ्चयं स्वस्थानात् ऊर्द्धम् अधो वा वहिनयेत्। र. सा. सं.। वा. सू. १५ अ.। अपिच "देवदाली रसे तिक्ता कफार्शः-शीथपाण्डुता:। नाशयेद् वामनी तिक्ता चय-हिक्काक्रिमिश्लिरान्॥ देवदालीफलं तिक्तं क्रिमिश्लेष्म-विनाशनं। स्वंसनं गुल्मशूलघ्नमर्शोघ्नं वातजित् परम्॥ भा.। वायमाणायाम्। वै.निघ.।

देवदासी। स्त्री। वनबीजपूरवृक्षे। रा.नि.व.११।

देवदीपः। पुं। नेचे। वै.निघ.।

देवदुन्दुभिः। पुं। रक्ततुलस्याम्। र.मा.। कृष्णतुलस्याम्। वै.निघ.।

देवदूता (ती)। स्त्री। वनबीजपूरवृक्षे। रा.नि.व.११। मधुकुक्कुटिका नाम निम्बुभेदे।

देवद्रुमः। पुं। देवदारुवृक्षे। भा. म. १भ. द्वात्रिंशरक्काथे। [व. ५।

देवद्रोणी। स्त्री। सीहाद्रोणपुष्पीवृक्षे। रा.नि.

देवधान्यम्। क्ली। धवलयावनालाख्यशिम्बीधान्ये। देधान। हिं पोनरी, जुहल। रा.नि.व. १६। तत्पर्य्यायः,—यवनालः, यौनालः, जूर्णाह्वयः, जोन्नाला, बीजपुष्पिका। हे.। गुणाः—हिमं स्वादु श्लेष्मपित्तघ्नम् अहृष्यं तुवरं रूक्षं क्लेदन लघु च। भा.।

देवधूपः। पुं। गुग्गुलौ। प.मु.। राले। वै.निघ.। [निघ.।

देवनम्। क्ली। पद्मे। शब्दच.। तेजसि। वै.

देवन(ना)लः। पुं। महानले। बड़ नल गाछ। हिं नर्कट। मं थोरुदेवनलु, हिरियदेदनाल। तत्पर्य्यायः,—देवनालः, महानलः, वन्यः, नलोत्तमः, स्थूलनालः, स्थूलदण्डः, सुरनालः, सुरद्रुमः। गुणाः—अतिमधुरः वृष्य ईषत्कषायः रसकार्य्ये श्रस्तः नलादधिकगुणयः। रा.नि.व.८।

देवनिर्म्मिता। स्त्री। गुडूच्याम्। वै.निघ.।

देवपत्नी। स्त्री। रक्तालौ। मध्वालौ। विका.।

देवप(पु)त्रिका (त्री)। स्त्री। सृक्कायाम्। वै. निघ.।

देवपर्णम्। क्ली, पुं। सुरपर्णाभिधपत्रशाके। सृक्कायाम्। पिड़िं शाक। रा.नि.व.१०।

देवपुष्पम्। क्ली। लवङ्गे। वै.निघ. जीर्णज्व. चि. लवङ्गादिकषाये।

देवपुष्पी। स्त्री। वृक्षविशेषे। देवहुली इति लोके। च.द.वा.व्या.चि.। "देवपुष्पी बीलपत्रम्।"

देवप्रियः। पुं। पीतभृङ्गराजे। रा.नि.व.४। See मार्कवः। क्षारे। विका.। पीतोशीरे। अगस्तिवृक्षे। (या) स्त्री। नागवल्लीलतायाम्। वै. निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवबला। स्त्री। महाबलायाम्। वायमाणालतायाम्। रा.नि.व.४।५।

देवभवनम्। क्ली। अश्वत्थवृक्षे। शब्दच.।

देवभूतिः। स्त्री। स्वर्गगङ्गायाम्।

देवमणिः। पुं। महामेदायाम्। प.मु.। रा.नि.व.५। मेदायाम्। वै.निघ.। अश्वस्य निगालावर्त्ते। हारा.। कौस्तुभमणौ। मे.।

देवमर्त्या। स्त्री। महामेदायाम्। वै.निघ.।

देवमातृकः। पुं। वृष्टाम्बुपालिते देशे। रा.नि.व.२।

देवमानकः। पुं। कौस्तुभमणौ। शब्दर.।

देवमासः (कः)। पुं। गर्भाष्टमे मासि। विका.।

देवमित्रः। पुं। अर्जुनवृक्षे। वै.निघ.।

देवराजाशनाख्यः। पुं। संविदायां। सिद्धि। रस.र.।

देवरातः। पुं। सारसपक्षिभेदे। शब्दार्थकल्प.।

देवलता। स्त्री। वटपत्रमल्लिकायां। नवमल्लिका। शब्दच.।

देवलाङ्गुलिका। स्त्री। वृश्चिकाल्यां। विछाति गांछ। रा.नि.व.९। क्षुद्रमेषशृङ्ग्यां। छोट मेढ़ाशिंङे। वै.निघ.।

देववक्त्रम्। क्ली। अग्नौ। आगुन। शब्द.।

देववल्लभः। पुं। पुन्नागवृक्षे। अम.।

देववृक्षः। पुं। गुग्गुलुवृक्षे। मे.। गोपघोषायां। शेफ्राकुल। वै. निघ.। सप्तपर्णवृक्षे। विका.। मन्दारवृक्षे। मन्दार गाछ। मे.।

देवशत्रुः। पुं। दैत्यग्रहे। सा.नि.।

देवशालिः। पुं। शालिधान्यविशेषे। वै.निघ.।

देवशेखरः। पुं। दमनकवृक्षे। दना। रा.नि.व.१०।

देवश्रेणी। स्त्री। मूर्व्वायाम्। रा.नि.व.३।

देवसर्षपः। पुं। कुक्कुटपाद्यां। सरिषाविशेष। मं देवसिरस। कं देवसिरसभेद। तत्पर्य्यायः,— अश्वाक्षः, वदरः, रक्तमूलकः, सुरसर्षपकः, सूक्ष्मदलः, निर्ज्जरसर्षपः, कुरवाङ्गिः। गुणाः— कटूष्णः कफघ्नः कृमिदोषघ्नः रुच्यः मुखरोगघ्नश्च। रा.नि.व.९। रुचके। सातुलुङ्गवृक्षे। विभीतके। कलिङ्गके। इङ्गुदवृ। रा.नि.व.२३।

देवसहा। स्त्री। सहदेवायाम्, महाबलायां। रा.नि.व.४। दण्डोत्पलायां। त्रिका.। वायमाणायां। रा.नि.व.५।

देवसृष्टा। स्त्री। मदिरायां। हे.च.।

देवा। स्त्री। अश्वनपर्ण्यां। पक्षचारिण्यां। शब्दच.।

देवात्मा। पुं। अश्वत्थवृक्षे। शब्दच.।

देवाद्रोणा। स्त्री। महाद्रोणपुष्पी। बड़ द्रोणपुष्पा।

देवाह्वयम्। क्ली। एका सहदेवा (महाबला) द्वितीया विश्वदेवा (नागबला)। वा.सू.१५अ. विदार्य्यादौ। देवाह्वयमिति पाठदर्शनात्। अरुणः।

देवानाम्प्रियः। पुं। छागे। विका.।

देवाभीष्टा। स्त्री। पूगवृक्षे। वै.निघ.। ताम्बूल्याम्। पान। शब्दच.।

देवार्हम्। क्ली। सुरपर्णनामपक्षशाके। रा.नि.व.१०।

देवार्हा। स्त्री। महाबलायाम्। पीत बेलेड़ा। रा.नि.व.४।

देवावासः। पुं। अश्वत्थवृक्षे। चैत्यवृक्षे। विका.।

देवाह्वः। पुं। वामकर्णे।

देवाह्वः (यः)। पुं,क्ली। देवदारुवृक्षे। वा.सू. १५अ.वचादि, विदार्य्यादिः। वै.निघ.२भ.चय-चि.-सूर्य्यप्रभागुण्यास्। च.द.उ.रु.चि.। वा.उ.२अ.।

देविका। स्त्री। धुस्तूरवृक्षे। भा.। नदीभेदे। शब्दर.।

देविता। पुं। धुस्तूरवृक्षे। भा.।

देवी। स्त्री। लिङ्गिनीलतायां। बन्याकर्कोटक्यां। मूर्व्वायां। रा.नि.व.३। सौराष्ट्रमृत्तिकायां। पङ्कपर्पटी। रा.सा.सं.। रस. क्ली. ज्वरान्तकरसे। पृक्कायां। पिंडिं शाक। रा.नि.व.१२। शालपर्ण्याम्। पाठायाम्। रा.नि.व.७।६। आदित्यभक्तायां। हुड़हुड़िया। बलायां। बेलेड़ा। महाद्रोणायां। बड़ द्रोणपुष्पी। नागरमुस्तायां। रा.नि.व.२३। अतसीवृक्षे। हरीतक्यां। पक्षिविशेषे। श्यामा पाखी। रा.नि.व.१९।१६।१९।

देवीलता। स्त्री। अनन्तमूले। ज.द.१४अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवीबीजम्। क्ली। गन्धके। भैष.ज्व.चि.चक्रीरसे।

देवेष्टः (ष्टा)। पुं, स्त्री। गुग्गुलौ। रा.नि.व.१२। सर्ज्जवृक्षे। वै.निघ.। महामेदायां। रा.नि.व.५। वनबीजपूरवृक्षे। रा.नि.व.११।

देवोन्मादः। पुं। दैवकृतोन्मादरोगे। लक्षणं —"अमर्त्यवाग्विक्रमवीर्य्यचेष्टको ज्ञानादिविज्ञानबलादियुक्तः। प्रकोपकालो नियतश्च यस्य देवादिजन्मा मनसो विकारः॥" भा.।

देव्या। स्त्री। सुरामांस्यां। ब्राह्मीक्षुपे। वै.निघ.।

देशः। पुं। स्थाने। स विविधः, आनूपजाङ्गलभिन्नभेदेन। विशेषाः पर्य्याये द्रष्टव्याः।

देशसमाख्यबीजम्। क्ली। इन्द्रयवे। इन्द्रयव। वै. निघ.।

देशिनी। स्त्री। तर्ज्जन्याम्। श.र.।

देहः (कः)। पुं, स्त्री। लेपने। शरीरे। रा.नि.व.१८। स स्थूलकृशमध्य इति विविधः—"कर्षयेद्दृढंदृढयेच्चापि सदा स्थूलकृशौ नरः। रक्षणञ्चैव मध्यस्य कुर्व्वीत सततं भिषक्। यस्माद्बलवतः सर्व्वक्रियाप्रवृत्तिस्तस्माद्बलमधानमधिकरणानाम्। कैचिक्कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः। तस्मात् स्थिरत्वव्यायामैर्बलं वैद्यः प्रतर्कयेत्॥" सु.सू.३५अ.।

देहकोषः (चर्म्म)। पुं। त्वचि। चाम्ड़ा, त्वक्। वै. निघ.। पत्रे। पाथा। श.च.।

देहत्वक्। स्त्री। चर्म्मणि। वै.निघ.।

देहदः। पुं। पारदे। रा.नि.व.१३।

देहदुर्गन्धता। स्त्री। शरीरदौर्गन्ध्ये। गात्रे दुर्गन्धः। तन्नाशकौषधं यथा—अर्জ্জুনपुष्पं जम्बूपत्रं लोध्रत्वचेति समभागं लिपेत्। पुराणम्।

देहधारक(ण)म्। क्ली। अन्नेनि। हे.च.। आहारे। वै.निघ.। अविकृत-विदोषे। "नर्त्ते देहः कफादस्ति न पित्तान्न च मारुतात्। शोणितादपि वा नित्यं देह एतैस्तु धार्य्यते॥"

देहधिः। पुं। पत्रे। पाथा। श.च.।

देहधृक्। पुं। वायौ। वै.निघ.।

देहबन्धास्थि। क्ली। कङ्काले। ज.।

देहभृत्। पुं। जीवे, प्राणिनि। वै.निघ.।

देहयात्रा। स्त्री। मृत्यौ। अन्ने। भोजने। त्रिका.।

देहला। स्त्री। सुरायाम्। वै.निघ.।

देहवल्कलम्। क्ली। वसायाम्। चर्ब्बि। रा.नि.व.१८।

देहसारः। पुं। मज्जायाम्। रा.नि.व.१८।

देहक्षयः। पुं। रोगे। श.च.।

देहिका। स्त्री। उपजिह्विकाकीटे। पेदो पोका। त्रिका.।

देहो (ह्न्)। त्रि। शरीरिणि। त्रिका.।

दैत्यः। पुं। लौहे। रत्न.र. व्रणगजाङ्कुशे।

दैत्यकुसुमम्। क्ली। सुगन्धिद्रव्यभेदे।

दैत्यग्रहः (त्योन्मादः)। असुरग्रहे। लक्षणं यथा—"जिह्मदृष्टिं दुरात्मानं गुरुदैवद्विजद्विषं। निर्भयं मानिनं शूरं क्रोधनं व्यवसायिनं। रुद्रः स्कन्दो विशाखोऽहमिन्द्रोऽहमिति वादिनं। सुरामांसरुचिं विद्यात् दैत्यग्रहगृहीतकम्॥" वा.उ. उन्मा.चि.। दैत्यावेशजन्योन्मादरोगे। लक्षणं — "संस्वेदी द्विजगुरुदैवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः। सन्तुष्टो भवति नचान्नपानजातैः दुष्टात्मा भवति स दैवशुजुष्टः॥" भा.।

दैत्यदेवः। पुं। वायौ। हे.।

दैत्यमेदजः। पुं। भूमिजगुग्गुलौ। महिषाक्षगुग्गुलौ। रा.नि.व.१२। स्त्री। (जा) पृथिव्याम्।

दैत्यरक्तकम्। क्ली। हिङ्गुलि। र.सा.स.।

दैत्या। स्त्री। सुरामांस्याम्। रा.नि.व.१२। मद्ये। त्रिका.। यमानीभेदे। वै.निघ.। चण्डौषधौ। मे.।

दैत्येन्द्रः। पुं। गन्धके। भैष. पञ्चाननरसे।

दैत्येन्द्ररक्तम्। क्ली। हिङ्गुलि। सा.कौ. विदोषनीहाररसे।

दैन्यम्। क्ली। क्लीवचित्ततायाम्। भा.।

दैर्घरात्रिकः। त्रि। मारात्मके। च.चि.६अ.। दीर्घरात्रानुबन्धिज्वरे। भा.।

दैवम्। क्ली। पूर्व्वकृतकर्म्मणि। "दैवं पुरा यत् कृतमुच्यते तु।" च.श.२अ.।

दैवच्छिद्रम्। क्ली। कर्म्मच्छिद्रे। वा.उ.१४अ.।

दैवदारु। क्ली। देवदारुणि। र.मा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवदोषः। पुं। खीचने। विका.।

दैवबलप्रवृत्तः। पुं। आधिदैविकरोगेषु। ये दैवद्रोहादभिशप्तका अथर्वकृता उपसर्गकृताः। तेऽपि द्विधा, विद्युदशनिकृताः पिशाचादिकृताश्च। सु.सू.२४अ.।

दैवव्यपाश्रयः। वि। मणि-मन्त्रौषध-पूजोपहाररूपौषधवाचके। च.वि.८अ.।

दैवाकरिः। पुं। यमे। स्त्री (री) यमुनानद्याम्।

दैवी। स्त्री। बलिपूजादिरूपे चिकित्साविशेषे। यथा—"आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता।" वैद्यकम्।

दैवोदासिः। पुं। दिवोदासापत्ये। श.चि.।

दोः। पुं। बाहौ। रा.नि.व.१८।

दोःशिखरम्। पुं। स्कन्धे। रा.नि.व.१८।

दोग्धा (ग्धृ)। पुं। गोवत्से। शब्दर.।

दोग्ध्री। स्त्री। दुग्धवत्यां गव्याम्। रा.।

दोण्डिका (ण्डी)। स्त्री। तरदीलतायाम्, कोषातक्याम्। वै.निघ.।

दोधः। पुं। गोवत्से। (छन्दःशास्त्रम्)।

दोर्गडुः। वि। बाहुकुब्जे। शूली। विका.।

दोर्दण्डः। पुं। बाहौ। भूरिप्र.।

दोर्मध्यम्। क्ली। बाहुमध्यभागे। हातेर वाजू। शब्दार्थकल्प.।

दोर्मूलम्। क्ली। बाहुमूले। वराग। वै.निघ.।

दोला (लिका)। स्त्री। नीलोड्डे। वै.निघ.। क्रीडार्थं काष्ठादिमये हिन्दोलके। हेंदला। तद्गमणगुणाः—वातकोपनत्वम् अङ्गस्थैर्यबलाग्निकारित्वञ्च। राज.।

दोलायन्त्रम्। क्ली। रसस्वेदनार्थं यन्त्रविशेषे। तस्य लक्षणम्—"निबद्धमौषधं सूतं भूर्जं तन्निर्गुण्डवरे। रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि। सस्नानपूर्णकुम्भान्तः स्रावलम्बनसंस्थितम्। अधस्ताज्ज्वालयेदग्निं तत्तदुक्तक्रमेण हि। दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि॥" भा.। "द्रवद्रव्येण भाण्डस्य पूरितार्द्धोदरस्य च। मुखे तिर्यक्कृते दण्डे द्रव्यं सूत्रेण लम्बयेत्। स्वेदयेच्चान्तरगतं दोलायन्त्रमुदीरितम्॥" अमि.।

दोषः (कः)। पुं। वातपित्तकफरजस्तमोरूपेषु। श.च.। तत्र त एव धातुमलपदवाच्याः "तेषु क्रमादमी दोषाः कफपित्तानिलाः स्थिताः।" रा.नि.व.१२। "मानसः पुनरुद्दिष्टो रजश्च तम एव च।" च.सू.७अ.। तन्निरुक्तिः—"धातवश्च मलाश्चापि दुष्यन्त्येभिर्यतस्ततः। वातपित्तकफा एते त्रयो दोषा इति स्मृताः। ते धातवोऽपि विज्ञेया निर्गदिता देहधारणात्। मलाश्च ते रसादीनां मलिनीकरणान्मताः॥" भा.। उक्तञ्च यथा—"दोषधातुमलमूलं हि शरीरम्...। तत्र प्रस्यन्दनीदहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति। सन्धिसंश्लेषणक्लेदनरोपणपूरणबलस्थैर्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मणानुग्रहं करोति। रागपक्त्वौजस्त्वौजोमेधोष्मकृत्पित्तं पञ्चधा विभक्तमग्निकर्म्मणानुग्रहं करोतीति। एषां विधिवत् परिरक्षणं कुर्व्वीत॥ एषां त्वये मन्दचेष्टता मन्दीप्तता रूक्षतादि देहहानिरायति। तत्र स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः। एषां वृद्धौ लङ्घनरूक्षादिकं भवति। तेषां यथास्वं संशोधनं चपणञ्च क्षयादविरुद्धैः क्रियाविशेषैः प्रतिकुर्व्वीत।" सु.सू.१५अ.। गोवत्से। श.र.। [प.मु.।

दोषकरः। पुं। लकुचवृक्षे। गान्धारि गाछ।

दोषज्ञः। पुं। वैद्ये, चिकित्सके। हे.च.। वि। दोषवेत्तरि।

दोषत्व(त्वित)यम्। क्ली। मिलितवातपित्तकफेषु। रा.नि.व.२२।

दोषपाकी(न्)। पुं। आम्रातकवृक्षे।

दोषपाचनः। पुं। कपित्थवृक्षे। प.मु.। वि। दोषपाचके।

दोषप्रकृतिः। स्त्री। दोषाणां स्वमार्गसञ्चारे। भा.च्य.चि.। वातादीनां यथाक्रमं वर्षाशरद्धेमन्तप्रावृषे वसन्तशरत्कोपे वा। "यथर्तुकुपितो दोषो दोषप्रकृतिरुच्यते।" वि.र.।

दोषबलप्रवृत्तः। पुं। रोगविशेषे। ते च ते रोगा ये आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च। तेऽपि पुनः द्विधा आमाशयोत्थाः पक्वाशयोत्थाश्च। एत एवाध्यात्मिकरोगाः कथ्यन्ते। सु.सू.२४अ.।

दोषलः। वि। दोषयुक्ते।

दोषशमनवस्तिः। पुं। निरूहवस्तिभेदे। यथा—"प्रियङ्गु मधुकं मुस्ता तथैव च रसाञ्जनम्। सचीरं श्रस्यते वस्तिः दोषाणां शमनः परम्॥" भा.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषहरबस्तिः। पुं। तन्नामकनिरूहबस्तौ। "शताह्वा मधुकं बिल्वं कौटजं फलमेव च। सकाञ्जिकः सगोमूत्रो बस्तिर्दोषहरः स्मृतः॥" भा.।

दोषा। स्त्री। बाहौ। रा.नि.व.१८। राची। मे.।

दोषाकरः। पुं। चन्द्रे।

दोषा(षोत्)क्लेशो। स्त्री। वनवर्ब्बरिकायाम्। वन बाबुई। रा.नि.व.१०।

दोषातिलकः। पुं। दीपे। त्रिका.।

दोषान्धः। पुं। दृष्टिरोगभेदे। लक्षणं—"अर्कोऽस्तमस्तकन्यस्तगभस्तौ स्तम्भमागताः। स्थगयन्ति दृशं दोषाः दोषान्धः स गदोऽपरः॥ दिवाकरकरस्पृष्टा भ्रष्टा दृष्टिपथान्मलाः। विलीनलीना यच्छन्ति व्यक्तमवाङ्मि दर्शनम्॥" अत्र रोगिणो दिवारूपं पश्यन्ति। वा.उ.१२अ.।

दोषास्यः। पुं। प्रदीपे। शब्दर.।

दोषिकः। पुं। रोगे। श.च.। निघ.।

दोहः। पुं। दोहने। दोहनपात्रे। दुग्धे। वै.

दोहजम्। क्ली। दुग्धे। शब्दार्थकल्पतरुः।

दोहदः (लः)। पुं। गर्भिणीदोहदे। साध. हे.च.। गर्भचिह्ने। भरतधृतकोषान्तरम्।

दोहदलक्षणम्। क्ली। गर्भधारणे। गर्भे। वयःसन्धौ। मे.।

दोहदवती। स्त्री। गर्भवत्यां स्त्रियां। हे.च.।

दोहनम्। क्ली। स्तनाद्युधनिःसारणे। दोग्धा।

दोहनी। स्त्री। धातकीवृक्षे। वै.निघ.। दोहनभाण्डे। त्रिका.।

दोहनः। पुं। वकुल-पुष्पवृक्षे। रा.। गर्भिण्यभिलाषे। शब्दार्थकल्पतरुः।

दोहलवती। स्त्री। दोहदवत्यां। शब्दार्थकल्प.।

दोहली। स्त्री। अशोकवृक्षे। रा.नि.व.१०।

दोहापनयः (पयनम्)। पुं,क्ली। गव्यदुग्धे। त्रिका.। वै.निघ.।

दौग्धिकम्। क्ली। दुग्धिकामूले। शिकईमूल। वा.उ.३७अ.।

दौण्डिका। स्त्री। कीषातक्यां। वै.निघ.।

दौर्गन्ध्यम्। क्ली। दुर्गन्धतारूपपित्तजरोगविशेषे। दुर्गन्धता। तन्नाशकतैलं—चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका। जातो-कक्कोल-पूगानां लवङ्गस्य फलानि च। अगुरुशीरकाश्मर्य्य कुष्ठं तगरनालिका। गोरोचना प्रियङ्गुश्च चोल मदनकं नखं। सरलः सप्तपर्णश्च लाचा चा लकी तथा। कर्चूरकः पद्मकश्च एतैस्तत्र प्रसाधितम्॥" गारुड़े प्रसिद्धम्।

दौर्ग्रहः। पुं। घोटके।

दौर्बल्यम्। क्ली। दुर्ब्बलतायाम्। वै.निघ.।

दौर्वाणम्। क्ली। इष्टपर्णे। दूर्ब्बारसे। मे.।

दौर्हृदम्। क्ली। गर्भे। दोहदे। हे.च.।

दौर्हृदा। स्त्री। गर्भवत्यां स्त्रियाम्। सुश्रु.।

दौलेयः। पुं। कच्छपे। हे.च.।

दौष्कुलेयः। पुं। ग्रन्थिपर्णमूले। गँटेला। वै.निघ.।

द्यविद्यवि। अव्य। दिवसे। वेदनि.।

द्यु। क्ली। दिने। गगने। वि.।

द्युः। क्ली। दिवसे। पुं। अग्नौ। मे.।

द्युकः। पुं। पेचके। वै.निघ.।

द्युकारिः। पुं। काके। वै.निघ.।

द्युगः। पुं। पक्षिणि। रा.नि.व.१९।

द्युगतिः। पुं। सूर्य्ये। हे.।

द्युतरुः। पुं। कल्पतरौ। वै.निघ.।

द्युत(ति)मणिः। पुं। अर्कवृक्षे। अम.। र.सा.सं. विद्याधररत्ने। मारिततार्क्ष्ये। भा.म.१अ.ज्व.चि. त्रिपुरभैरवरत्ने। "द्युमणिरक्तकमार्द्रकमर्हितम्।"

द्युम्नम्। क्ली। बले। मे.।

द्यूतबीजम्। क्ली। कपर्द्दके। त्रिका.।

द्योःशिखरम्। क्ली। स्कन्धे। रा.।

द्योतः। पुं। रौद्रे। अ.।

द्योतनम्। क्ली। दर्शने। हे. च.। पुं। प्रदीपे। उ.।

द्यौभूमिः। पुं। पक्षिणि। श.च.।

द्यौ। स्त्री। आकाशे। अ.।

द्यौत्रम्। क्ली। बीजे। उणा.।

द्रङ्क्षणम्। क्ली,पुं। टङ्कद्वयमाने। (इति कालिङ्गमानम्)। "चुद्रमोरटकस्यापि द्रङ्क्षणः स निगद्यते। शाणौ द्वौ द्रङ्क्षणः।" (इति मागधमानम्। प.प्र.१ख.। तोलके। श.मा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्र(द्रा)क्ष[क्षा]म्। क्ली। तरलदधनि। वराटे। अम.। अ.टी.भ.।

द्रवः। पुं। तक्रे। रा.नि.व.१५। तरले। पातले। गुणाः—क्लेदकरः व्यापकश्च, गुरुः विपरीतगुणः। भा.। रसे। विश्व.। क्ली। जले। सि.यो.उन्मा.चि.महापैशाचघृते।

द्रवजः। पुं। शर्करायाम्। गुड़े। रा.नि.व.१४।

द्रवत्पत्रो। स्त्री। शिग्रुवृक्षे। रा.नि.व.४।

द्रव(व)दारु। क्ली। पित्तले। (व्य.) लाक्षायाम्।

द्रवद्रव्यम्। क्ली। तरलद्रव्ये।

द्रवन्तिका (न्ती)। स्त्री। (Anthericum tuberosum.) खनामख्यातक्षुपे। मुशली लता, वुड़िगुन्नापान, मूषाकर्णी। सं भोंपनी। कं बल्लिहर्दे तें एलुकचेविचेट्टु। गुणाः—मधुरा शीता रसवन्धकरी ज्वरक्लमि-शूलघ्नी च। रा.नि.व.५। क्षणदन्तीचुपे। र.सा.। ह्रस्वदन्त्याम्। चीरितपत्रदन्तीभेदे। च.सू.१अ.। सु.सू.३९अ.। शुतपर्णीनामसहाचुपे। इन्दुरसायनी। रा.नि.व.४। क्षुद्रदन्त्याम्। रा.नि.व.३। वा.सू.हेमा. टी. १५अ. श्यामादिः। "श्यामा दन्ती द्रवन्ती।" क्षुद्रदन्त्याम्। च.सू.२अ.।

द्रवरसा। स्त्री। लाक्षायाम्। रा.नि.व.६।

द्रवशूलः। पुं। अन्नद्रवशूले।

द्रवस्वेदः। पुं। वातहरस्वेदविशेषे। स च द्रव्यक्वाथपूर्णे कटाहे, षड्विंशत्यङ्गुलायामोच्छ्राययुक्ते चतुष्कोणे सीवर्णादिस्वेदकोष्ठके वा अवगाह्योपविश्य च गृह्यते। "द्रवस्वेदस्तु वातघ्नो द्रव्यक्वाथेन पूरिते। कटाहे कोष्ठके वापि सूपविष्टेऽवगाहयेत्। सौवर्णे राजते वापि ताम्रे लौहेऽथ दारुजे। कोष्ठकं तत्र कुर्वीतोच्छ्राये षड्विंशदङ्गुलं। आयामे वा तदेव स्याच्चतुष्कोणन्तु चिक्कणम्॥' भा.।

द्रवा। स्त्री। मेदायाम्। रा.नि.व.५।

द्रविड़ी। स्त्री। एलायाम्। वै.निघ.२भ. वा. व्या.चि.शतावरीतैले। [मे.।

द्रविणम्। क्ली। सुवर्णे। रत्ने। बले। अम.।

द्रविणनाशनः। पुं। शिग्रुवृक्षे। सजिना गाछ। श.र.।

द्रविणोदाः (स्)। पुं। अग्नौ।

द्रवीकरणम्। क्ली। तरलतापादने।

द्रव्यम्। क्ली। वस्तुनि। पित्तले। मद्ये। जले। विषे। जतुके। ला। मे.। औषधोपकरणे। औषधे। विका.। तच्च द्रव्यमादौ पृथिव्यादिभूतसमुदायादुत्पद्यते। तदुत्कर्षस्याभिव्यञ्जकत्वात्, तत्पञ्चविधं पार्थिवम् आप्यं तैजसं वायव्यमाकाशीयञ्च। तत्र "स्थूलसारसान्द्रमन्थरगुरुकठिनगन्धबहुलमौपलकषायमाप्यगो मधुरम्पार्थिवम्, तच्च स्थैर्यबलादिकरं विशेषतश्चाधोगतिस्वभावम्। यच्च द्रव्यं शीतस्निग्धगुरुसरसान्द्रं पिच्छिलमौपलकषायास्लवर्णं मधुररसप्रायं तदाप्यम्, तच्च स्नेहनाह्लादनादिकरम्। यद्रूपगुणबहुलम् ईषदम्लवर्णं कटुरसप्रायं विशेषतश्चोर्द्वगतिस्वभावं तत्तैजसं, तच्च दहनपचनदारणादिकरम्। सूक्ष्मरूक्षखरविशदं स्पर्शबहुलमौपलिकं विशेषतश्च कषायं वायव्यम्, तद्रूक्ष्यलाघवादिकरम्। श्लक्ष्णसूक्ष्मदुष्यवायिविविक्तमव्यक्तरसं शब्दबहुलमाकाशीयम्, तच्च मार्दवलाघवादिकरम्। अनेन निदर्शनेन नानौषधीभूतं जगति किञ्चिद्द्रव्यमस्तीति कृत्वा तं तं युक्तिविशेषमर्थं वाभिसमीक्ष्य स्ववीर्य्यगुणयुक्तानि द्रव्याणि कर्म्मकराणि भवन्ति। तानि यदा कुर्व्वन्ति स कालः, यत्कुर्व्वन्ति तत्कर्म्म, येन कुर्व्वन्ति तद्वीर्य्यं, यत्र कुर्व्वन्ति तदधिकरणं, यथा कुर्व्वन्ति स उपायः, यन्निष्पादयति तत्फलमिति। तत्र विरेचनद्रव्याणि पृथिव्यम्बुगुणभूयिष्ठानि पृथिव्यापो गुर्व्यो गुरुत्वादधोगच्छन्ति तस्मादिरेचनमधोगुणभूयिष्ठमनुमानात्। वमनद्रव्याण्यग्निवायुगुणभूयिष्ठान्यग्निवायू हि लघू लघुत्वाच्च तान्यूर्द्धमुत्तिष्ठन्ति तस्माद्वमनमप्यूर्द्धगुणभूयिष्ठमुक्तम्। उभयगुणभूयिष्ठमुभयतोभागं। आकाशगुणभूयिष्ठं संशमनं। संशमनमनिलगुणभूयिष्ठमनिलस्य शोषणात्मकत्वात्। दीपनमग्निगुणभूयिष्ठं। लेखनमनिलानलगुणभूयिष्ठं। बृंहणं पृथिव्यम्बुगुणभूयिष्ठं। एवमौषधकर्म्माण्यनुमानाल्लाघयेत्। भवन्ति चात्र—भूतेजोवारिजैर्द्रव्यैः क्षिप्रमाप्नोति निर्वृतिं॥ खतेजोऽनिलजैः श्लेष्मा शममेति शरीरिणां। वियत्पवनजाताभ्यां बृंहिमाप्नोति मारुतः॥ आग्नेयमेव यद्द्रव्यं तेन पित्तमुदीर्य्यते। वसुधाऽम्बुजाताभ्यां बलासः परिवर्द्धते॥ एवमेतद्गुणाधिक्यं द्रव्ये द्रव्ये विनिश्चितं। दिशो वा बहुशो वापि ज्ञात्वा दोषेऽवचारयेत्॥" सु.सू. ४१अ.। दोषशमनधातुदूषणस्वस्थहितत्वात् द्रव्यं विविधमाह चरकः॥ तच्च पुनस्त्रिविधं जाङ्गमौ-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विदपार्थिवभेदात्। तच्च जाङ्गमसमूनविंशतिः, औभं विंशतिः, उद्भिदस्त्वहु। तच्च चतुर्विधं वनस्पतिवीरुद्वानस्पत्यौषधयः। इति। च.सू.१अ.। द्रव्यं पुनः द्विविधं शुष्कामार्द्रं चेति। तयोः शुष्कद्रव्यापेक्षयार्द्रस्य द्विगुणा मात्रा ग्राह्या। "शुष्कद्रव्यं तु या मात्रा आर्द्रस्य द्विगुणा हि सा।" तदपवादमाह —"वासानिम्बपटोलकैतकिवल्लीकुमाण्डकेन्दीवरी वर्षाभूकुटजाम्बगन्धसहिताः ताः पूतिगन्धाह्वताः। मांसीनागबलाकुरण्टकपुरोद्विड्भार्द्रकं चैवं ग्राह्यास्तत्क्षणमेव न द्विगुणिता ये चेत्तुजाता गणाः।" इन्दीवरी शतावरी। पूतिगन्धा प्रसारणी। कुरण्टकः पीतझिण्टी। इत्तुजाता गुडादयः। गणाः दशमूलादयः। "वासाकुटजकुष्माण्डशतपुष्पासहाह्वताः। प्रसारण्यम्बगन्धा च नागाख्यातिबलाबलाः। नित्यमार्द्राः प्रयोक्तव्याः न तासां द्विगुणो भवेत्।" शार्ङ्ग.। "शुष्कं नवीनं द्रव्यञ्च योज्यं सकलकर्म्मसु। आर्द्रञ्च द्विगुणं विद्यादेष सर्व्वत्र निश्चयः। द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ। ऋते घृतगुडत्रौद्रधान्यकृष्णाविड्लवणात्॥" प.प्र.१ख.।

द्रव्यकल्कः। पुं। दृषदि पेषितद्रव्ये।

द्रव्यगुणाकरः
द्रव्यरत्नवालो } पुं,स्त्री। द्रव्यगुणसंग्रहविशेषे।

द्रव्यसंग्रहः। पुं। करचरणहरीतक्यादिद्रव्यसङ्क्षेपे। च.सू.१अ.। [संग्रहे।

द्रव्याभिधानम्। क्ली। औषधादीनां नाम।

द्राघिष्ठम्। क्ली। दीर्घरोहिषतृणे। वड़ गन्धतृण। रा.नि.व.८।

द्राघिष्ठास्यः। पुं। भल्लूके। रा.नि.व.१९।

द्राणः। त्रि। सुप्ते।

द्रापः। पुं। पङ्के। शब्दार्थकल्प.।

द्रापस्म्। क्ली। द्रप्से। अ.टी.। वस्त्रादौ।

द्रावः। पुं। उष्णतायाम् वै.निघ.।

द्रावकम्। क्ली। सिक्थके। रा.नि.व.१३। लौहचुम्बके। वै.निघ.। क्षौद्रौषधविशेषे। महाद्रावकादौ। पुं। प्रस्तरविशेषे। चन्द्रकान्तमणि। मे.। रसविशेषे। श.र.।

द्रावककन्दः। पुं। तैलकन्दे। रा.नि.व.७।

द्रावकरम्। क्ली। श्वेतटङ्गणे। सोहागा। रा.नि.व.६।

द्रावकवर्गः। पुं। द्रवकरद्रव्यपञ्चके। यथा— "गुञ्जाटङ्कणमध्याज्यगुड़ा द्रावकपञ्चकाः।" र. सा.सं.। [र.सा.।

द्रावण(फल)म्। क्ली। कतकफले। निर्म्माल्य।

द्रावणकः। पुं। टङ्कणचारे। वै.निघ.।

द्राविका। स्त्री। लालायाम्। लाल, थूथू। श.र.।

द्राविड़ः (कः)। पुं। वेधसुख्ये। जिघ्रत्यसृष्टि। अम.। मे.। गन्धशठ्याम्। पसु.। आमहरिद्रायाम्। काँचा हलूद। श.र.। क्ली। विड़लवणे। रा.नि.व.६।

द्राविड़भूतिकः (मिजः)। पुं। आमहरिद्रायाम्। काँचा हरिद्रा। श.र.।

द्राविड़ी। स्त्री। सूक्ष्मैलायाम्। प.सु.। भा.म. ४भ.सौभाग्यगुण्ठीमोदके। "द्राविड़ीनां पलम्।" सु.सू.३८अ.।

द्राविड़ोद्भवः। पुं। सुगन्धतृणे। सुगन्धप्रियङ्गौ। (वा) स्त्री। एलायाम्। वै.निघ.।

द्राविणः। पुं। टङ्कणे। सोहागा। रा.सा.सं.।

द्राविणी। स्त्री। काकजङ्घायां, काकमाच्यां। वै.निघ.।

द्रावी (इन्)। पुं। टङ्कणचारे। र.सा.सं. टङ्कणशोधने। अम्लवेतसे। वै.निघ.।

द्राक्षम्। क्ली। द्राक्षाभवमद्ये। ज.।

द्राक्षा। स्त्री। (Vitis vinifera.) Dried fruits called Kismis. स्वनामख्यातलतायाम्। किस्मिस, मनेक्का। हिं दाख, आङ्गूर। मं द्राचा। तें द्राचपोण्डु, द्राचचेट्टु। ता. कोड़िम्मिरिप्पझम्। तत्पर्य्यायः,—कृष्णा, चारुफला (ज.), रसा (शब्दर.), सदीका, गोस्तनी, खादी, मधुरसा (अ.), यक्षप्रीः (शब्दसा.), प्रियाला, तापसप्रिया, गुच्छफला, रसाला, अमृतफला, स्वादुफला, हारहरा। गुणाः—पक्वा सा सरा शीता चक्षुष्या हृंहणी। अपक्वा स्वल्पगुणा गुर्व्वी च। अम्ला सा रक्तपित्तकृत्। "द्राक्षा पक्वा रसा शीता चक्षुष्या हृंहणी गुरुः। स्वादुपाकरसा स्वर्य्या तुवरा सृष्टमूत्रविट्। कोष्ठमारुतकृद्दृष्या कफपुष्टिरुचिप्रदा। हन्ति तृष्णाज्वरश्वासवातवातास्रकामलाः। कृच्छ्रास्रपित्त-सम्मोह-दाहशोषमदात्ययान्। हृष्या

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाङ्गीतनी द्राचा गुर्व्वी च कफपित्तनुत्। अवीजाच्या खल्पतरा गोस्तनीसदृशी गुणैः। द्राचा पर्व्वतजा लघ्वी स्वाद्वी श्लेष्मापित्तहृत्। द्राचा पर्व्वतजा याद्दक्तादृशी करमर्द्दिका॥" भा. द्राचाव.। "द्राचाफलं मधुरमम्लकषाययुक्तं चारेण पित्तमरुतां कफहारि शीघ्रम्। श्रेष्ठं निहन्ति रुधिरामदाहशीर्षमूर्च्छाज्वरश्वसनकासविनाशकारि। कषायाम्ला विपाके च द्राचा चैव कफे हिता॥" अवि. १७अ.। एतदभावे गाम्भारीफलं ग्राह्यम्। सि.यो. ज्व.चि.पिप्पल्यादौ। वा.सू.१५अ.परूषकादिः। "परूषकं वरा द्राचा"। च.द.वा.ज्व.चि. पिप्पल्यादिः। वा.ज्व.चि. द्राचादिः। रसालायाम्। रा.नि.व.२३।

द्राचादिः। पुं। वातज्वरे कषायः। "द्राचागुडूचीकाश्मर्य्यवायसाणाः सशारिवाः। निष्क्वाथ्य सगुडं क्वाथम्...।" च.द.वा.ज्व.चि.। अन्यः—द्राचाभयापर्पटकाद्यतिकाक्वतः कषायः पैत्तिकज्वरे प्रलापमूर्च्छायमग्नः। च.द.पि.ज्व.चि.।

द्राचाफलः। पुं। पियालवृक्षे। वै.निघ.।

द्राचायणी। स्त्री। दन्तीवृक्षे। प.मु.।

द्राचारसम्। क्ली। द्राचाभवमद्ये।

द्राचारिष्टः। पुं। यक्ष्माधिकारे अरिष्टविशेषे। पाठः—"द्राचातुलार्द्धं द्विद्रोणे जलस्य विपचेत् सुधीः। पादशेषे कषाये च पूते शीते विनिक्षिपेत्। गुडस्य द्वितुलां तत्र त्वगेलापत्रकेसरं। प्रियङ्गुमरिचकृष्णा विड्वंचिति विचूर्णयेत्। पृथक् पलोन्मितैर्भागैर्घृतभाण्डे निधापयेत्। सप्तरात्री घटस्थित्वा पिबेज्जातरसं ततः॥" भैष.।

द्राचासम्भूतः। पुं। द्राचासवे। वै.निघ.।

द्राचासवः। पुं। द्राचाकृतासवे। गुणाः—रोचनो दीपनो हृद्यः बल्यः पित्ताविरोधी विबन्धघ्नः कफघ्नः लघुः स्वल्पमारुतश्च। च.सू.२७अ.।

द्राचासुरा। स्त्री। द्राचाकृतमद्ये। च.सू.२७अ.।

द्राचोत्थः। पुं। द्राचासवे। वै.निघ.।

द्रुः। पुं। वृक्षे। अ.।

द्रुकिलिमम्। क्ली। देवदारुणि। प.मु.।

द्रु(द्रू)घनः। पुं। भूमिचम्पकवृक्षे। भूँई चाँपा। श.च.। सुद्गरे।

द्रु(द्रू)णः। पुं। भ्रमरे। वृश्चिके। धूम्राटपक्षिणि। फिङे। हे.च.। मधुमक्षिकायां। वै.निघ.।

द्रुणहः। पुं। खड्गपिधाने। हा.। तरवारेर खाप। क्ली। धनुषि।

द्रुणी। स्त्री। कर्णजलायुकायाम्। कर्णकोटारि। कर्णपिकायाम्। अम.भ.।

द्रुतः। पुं। हरिणे। अश्वके। वृक्षे। धरणि.।

द्रुतमांसम्। क्ली। अश्वादिहरिणादयः स्वयं द्रुतगमनात् द्रुतसंज्ञकाः स्मृताः, तेषां मांसे। गुणाः—पथ्यं बल्यं लघु वीर्य्यकारि च। रा.नि. व.१७।

द्रुदंष्ट्रः। पुं। कण्टके। काँटा। त्रिका.।

द्रुपदी। स्त्री। वन्दाके। मान्दड़ा। वै.निघ.।

द्रुमः। पुं। वृक्षे। विर्का.। कुटजवृक्षे। आरग्वधवृक्षे। च.द.कुष्ठ-चि. गण्डीराद्यतैले। पारिजातवृक्षे। मे.।

द्रुमकण्टका। स्त्री। शाल्मलीवृक्षे।

द्रुमकिलः। पुं। देवदारुवृक्षे। वै.निघ.।

द्रुमगः। पुं। स्वल्पजलदेशे। वै.निघ.।

द्रुमत्वक्। स्त्री। कुटजवल्कले। च.द.कुष्ठ-चि.।

द्रुमध्वजः। पुं। तालवृक्षे। वै.निघ.। [मे.।

द्रुमनखः। पुं। कण्टके। हारा.। पारिजातवृक्षे।

द्रुमनिर्य्यासः। पुं। तरुनिर्य्यूहे। गाछेर आटा। वै.निघ.।

द्रुमरः। पुं। कण्टके। हारा.।

द्रुमव्याधिः। पुं। लाक्षायाम्। रा.नि.व.६।

द्रुमशयः। पुं। वानरे। वै.निघ.।

द्रुमशीर्षः। पुं। दाड़िम्बे।

द्रुमश्रेष्ठः। पुं। तालवृक्षे। वै.निघ.।

द्रुमाङ्गः। पुं। वृक्षशाखायाम्।

द्रुमामयः। पुं। लाक्षायाम्। प.मु.।

द्रुमारिः। पुं। हस्तिनि। वै.निघ.।

द्रुमारुहा। स्त्री। कैवर्त्तमुस्तायां। रा.नि.व.३।

द्रुमाश्रयः। पुं। सरटे। गिरगिटे। रा.नि. व.१९।

द्रुमेश्वरः। पुं। तालवृक्षे। रा.नि.व.२३।

द्रुमोत्पलः। पुं। (Abroma augusta.) कर्णिकारवृक्षे। ओलट् कम्बल। अम.। ऋतुयूथे हितः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रुयवम्। क्ली। परिमाणे। वै.निघ.।

द्रुमल्लकः। पुं। पियालवृक्षे। पेय्राशाल। श. र.।

द्रूः। स्त्री। स्वर्णे। वै.निघ.।

द्रेकः (का)। पुं, स्त्री। निम्बविशेषे। घोड़ा निम्। हिं वकाणनिम्ब। भा.म.४भ.महाभल्लातके। क्रीडा इति ख्याते वृक्षे। च.द.दार्व्यादिकषाये। "सरलाद्रेकामृतायासकैः।"

द्रोणः। पुं। ४०० धनुःपरिमितजलाशये। काकविशेषे। दाँड़ काक, डोम काक। मे.। द्रोणपुष्पवृक्षे। घलघसे। वृश्चिके। रा.नि.व.१९। पुं,क्ली। आढ़कमाने। ८ शेर। खारीषोड़शांशे। नीलावल्यां। आढ़कचतुष्टये (३२ श.)। "चतुर्भिराढ़कैर्द्रोणः।" तत्पर्य्यायः,—उन्मानः, नल्वनः, अर्म्मणः, घटः, कलसः। प.प्र.१ख.। क्ली। हरिचन्दने। द्रोणीलवणे। वै.निघ.।

द्रोणकाकः। पुं। तन्नामककाके। डोम काक। अम.। तत्पर्य्यायः,—काकोलः (अ.), द्रोणः, अरण्यवायसः, वनवासी, महाप्राणः, क्रूररावी, पलप्रियः (रा.), काकालः, काकलः (शब्दर.)।

द्रोणकुतुम्बका। स्त्री। दिवकुम्भायाम्। दिवद्रोणा। बड़ घलघसादिविशेष। वै.निघ.।

द्रोणगन्धिका। स्त्री। राज्ञायाम्। जटा।

द्रोणपर्णी। स्त्री। द्रोणपुष्पाम्।

द्रोणपुष्पिका। स्त्री। द्रोणपुष्पाम्। घलघसा। वै.निघ.।

द्रोणपुष्पी। स्त्री। घलघसा हलकषा दरुकलस इति ख्याते शिवजटावृक्षे। द्रोणपुष्पीति भाषा। र.मा.। मं कुंवा। कं तुंवे। हिं गुम्मा, गूमा। तें एनुगतुम्मि। तत्पर्य्यायः,—शिवपत्री, कुम्भयोनीः, कुरुम्बिका, चित्राचुपः, कुरुण्टा, सुपुष्पी, शिवपत्रिका। गुणाः—कटूष्णा रुच्या वातकफघ्नी अग्निमान्द्यकरी पथ्या च। रा.नि.व५। च. द. चि. यो. काम. चि. अञ्जने। "अञ्जनं कामलार्त्तानां द्रोणपुष्पीरसः शुभः। द्रोणपुष्पीरसोऽप्येवं निहन्ति विषमज्वरान्।" शार्ङ्ग. म. ख. १ अ.। कफार्शःकामलाकृमिशोथघ्नी। राज.। द्रोणपुष्पी गुरुः स्वादुपाका कटूष्णा मेदिनी कफामकामलाशोथहृत्कण्ठश्वासकृमिघ्नी च। भा.।

द्रोणपुष्पीदलम्। क्ली। द्रोणपुष्पीपत्रे। घलघसेर पाता। गुणाः—स्वादु रुच्यं गुरु पित्तकरं भेदनं कासलाशीथमेहज्वरहरं कटु च। भा.पू.१भ.शा.व.।

द्रोणा। स्त्री। द्रोणपुष्पाम्। घलघसा। भा.वा.उ३६अ.। इन्दीवरालतायाम्। वै.निघ.।

द्रोणिः। स्त्री। सूर्पदृयमाने। १२८श्र.। प.प्र. १ख.।

द्रोणिका। स्त्री। नौल्याम्। श.र.। [व.६।

द्रोणि(णी)जम्। क्ली। द्रोणीलवणे। रा.नि.

द्रोणिनी। स्त्री। उत्तरिण्याम्। वै.निघ.२भ. मञ्जिष्ठाद्यघृते।

द्रोणी। स्त्री। इन्द्रबिर्भटायां, इन्दीवरायाम्। रा.नि.व.३। द्रोणीलवणे। श.र.। नौल्याम्। सूर्पदृयमाने। १२८श्र.। "सूर्पाभ्याञ्च भवेद्द्रोणी।" प.प्र.१ख.। काष्ठाख्यवाहिन्याम्। मे.।

द्रोणीजम्। क्ली। द्रोणीलवणे। रा.।

द्रोणीदलः। पुं। केतकीपुष्पवृक्षे। केया गाछ। हारा.।

द्रोणीलः। पुं। केतकवृक्षे। वै.निघ.।

द्रोणीलवणम्। क्ली। वारिजलवणे। मं दोणीचेभोट। कं दोणीय उप्पु। गुणाः—भेदनं स्निग्धं शूलघ्नं नातिपित्तलं पाके नात्युष्णञ्च। रा.नि.व.६।

द्रोणियम्
द्रौणम् } क्ली। वारिजलवणे। रा.नि.व.६।

द्वन्द(न्द्व)म्। क्ली। मिथुने। युगले। सुखदुःखादौ। पुं। रोगभेदे। श.र.।

द्वन्द्वगः। पुं। चक्रवाके। वै.निघ.।

द्वन्द्वगदः। पुं। द्वन्द्वजरोगे।

द्वन्द्वचरः (चारी)। पुं। चक्रवाकपक्षिणि। हे.च.। त्रिका.।

द्वन्द्वचरीसहायः। पुं। चक्रवाकपक्षिणि।

द्वन्द्वजः (दोषोत्थः)। पुं। विषमज्वरे। रा. नि.व.२०। द्विदोषरोगे। त्रि। द्विदोषोत्थे। मा. ज्व.नि.।

द्वयाग्निः। पुं। चित्रकवृक्षे। चिता। श.च.।

द्वादशपत्रिका। स्त्री। शताह्वाख्यगुल्मे। शुल्फा गाछ, मउरि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वादशाङ्गकाथः। पुं। सन्निपातज्वरे कषायः। दशमूलीकषायस्तु पिप्पलीपौष्करान्वितः। सन्निपातज्वरे देयः श्वासकाससमन्वितः॥ भा.म.१भ.।

द्वादशाङ्गुलः। पुं। वितस्तौ। विगत्। अम.।

द्वादशात्मा। पुं। सूर्य्ये। अर्कवृक्षे। अम.।

द्वादशायसकः। पुं। ज्वरसन्न्याधिकारे रसः। विनेत्याद्यरस एव। रस.र.। See विनेचरसः वातरक्ते।

द्वादशायुः। पुं। कुक्कुरे। श.मा.।

द्वारम्। क्ली। उपाये। निगमे। त्रिका.।

द्वारकण्टकः। पुं। कवाटे।

द्वारका। स्त्री। कार्पास्याम्। वै.निघ.।

द्वारदारुः (रु)। पुं। शाकवृक्षे। वै.निघ.। भूमौसरुवृक्षे। भा.।

द्वारबलिभुक्। पुं। काकविशेषे। त्रिका.।

द्विक्षः। पुं। काके। त्रिका.। चक्रवाके। मे.। क्ली। अगुरुकाष्ठे। चक्र.।

द्विककारः। पुं। काके। श.र.।

द्विककुत्, द्विकपृष्ठः। पुं। उष्ट्रे। हे.च.।

द्विकटुकम्। क्ली। पिप्पलीमरिचरूपे कटुत्रये। चक्र.।

द्विकाकोली। स्त्री। काकोलीक्षीरकाकोल्यौ। वा.उ.२अ.।

द्विखुरी (द्वन्)। पुं। गोखुरवत् द्विधाविभक्तखुरायुभार्थे। "द्विखुरं गोखुराकारङ्गुरैर्विद्याद्विचक्षणः। अथवा सौवनोयुक्तैर्निम्नमध्यं तु निर्दिशेत्॥" ज.द.३अ.।

द्विगृध्रनखी। स्त्री। मिलित-कुलिककालिवृक्ष। कुलेकाँटा ও कुलगाछ।

द्विचिक्कम्। क्ली। श्वेतरक्तचिवकयोः। सि.यो अग्निमा.चि.।

द्विजः। पुं। दन्ते। रा.नि.व.१८।२३। तुम्बुरुवृक्षे। रा.नि.व.११। ब्राह्मणे। क्षत्रिये। वैश्ये। मे.। सर्पे। अण्डजे। अम.।

द्विजकुल्लितः। पुं। बहुवारवृक्षे। चालिता गाछ। रा.नि.व.११।

द्विजकेतुः। पुं। जम्बीरविशेषे। वै.निघ.।

द्विजन्मा (न्मन्)। पुं। पक्षिणि। दन्ते। श.र.। आर्द्रधान्ये। मौक्तिके। अण्डजे। वै.निघ.।

द्विजप्रिया। स्त्री। सोमलतायां। रा.नि.व.३।

द्विजभक्तः। त्रि। वैद्ये भक्तिमति (रोगिणि)। वै.निघ.।

द्विजयष्टिः (ष्टिका)। स्त्री। भार्य्याम्। वामू शाटी। वै.निघ.२भ.वा.व्या.चि.।

द्विजराजः। पुं। चन्द्रे। कर्पूरे। अ.। गरुडपक्षिणि। मे.।

द्विजव्रणः। पुं। दन्तमूलक्षते। रा.।

द्विजशत्रुः। पुं। राजमाषे। वर्वटी। श.च.।

द्विजस्नेहः। पुं। पलाशवृक्षे। वै.निघ.।

द्विजा। स्त्री। रेणुकायां। रेणुक। रा.नि.व.६। भार्य्याम्। मे.। लोवान् इति ख्याते गन्धद्रव्ये। वै.निघ. पालक्यशाके। श.च.।

द्विजाङ्गिका (ङ्गी)। स्त्री। कटुक्याम्। कटकी। रा.नि.व.६.।

द्विजातिः। पुं। दन्ते। अण्डजे। पक्षिणि।

द्विजायनी। स्त्री। यज्ञोपवीते। त्रिका.।

द्विजालयः। पुं। तरुकोटरे। श.च.।

द्विजिह्वः। पुं। सर्पे। अम.। अधिजिह्वनामककण्ठरोगे। आलजिवेर रोग। सु.नि.१६अ.।

द्विजेन्द्रकः। पुं। निम्बवृक्षे। नेबुर गाछ। वै.निघ.।

द्विड़ा। स्त्री। स्त्री-गवि। गाभी। के.।

द्वितिक्ता। स्त्री। कटुक्यां, करञ्जिकायाञ्च। वा. टी.हेमा. सुस्तकादि.।

द्वितीयः। पुं। पुत्रे। श्वशुरे। स्त्री(या)। भार्य्यायाम्।

द्वितीयत्रिफला। स्त्री। द्राक्षाखर्ज्जूरगाम्भारीफलेषु। किस्मिस्, खेजुर, गाम्भारफल। वै.निघ.।

द्वितीयाभा। स्त्री। Curcuma zanthorrhiza.) वृक्षविशेषे। दारुहरिद्रायाम्। श.च.।

द्विदलः। पुं। अश्मन्तकवृक्षे। आपटा इति ख्याते। आवुटा। वै.निघ.। क्ली। द्विदलमात्रे। तद्गुणाः—"यूषः कृतो द्विदलानामष्टादशगुणेऽम्बसि। स एव सर्पिःसैन्धवसंयुतः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवेद्गुरुतरस्यैव कृतमित्येव तं विदुः। चिप्तैर्द्रव्यैर्विनासिद्धमकृतन्तु लघुं वदेत्। फलान्नधान्यतक्रैश्च कृता गुरुतरा मताः। वातघ्ना रुचिदाः प्रोक्ताः पूर्व्वपाकविशारदैः॥" द्रव्यगुणः।

द्विधागतिः। पुं। शिशुमारे। शुशुक। वै. निघ.। कुम्भीरे। कुमीर। हे.च.।

द्विधातुः। वि। द्विप्रकृतिके।

द्विधात्मकम्। क्ली। जातीफले। वै.निघ.।

द्विधालेख्यः। पुं। हिन्तालवृक्षे। हाँताल गाछ। रा.नि.व.९।

द्विनिशा। स्त्री। हरिद्रा-दारुहरिद्रारूपे हरिद्राद्वये। भै.।

द्विपः। पुं। हस्तिनि। प.मु.। नागकेसरवृक्षे।

द्विपञ्चमूलम्। दशमूले। चक्र.।

द्विपत्रकः। पुं। चण्डालकन्दे। रा.नि.व७।

द्विपदः। पुं। मनुष्ये। पक्षिणि। प्रश्नसारः।

द्विपबला। स्त्री। नागबलायां। वै.निघ. वा. व्या.चि. शतावरीतैले।

द्विपमदः। पं। करिमदजले।

द्विपर्णी। स्त्री। शालपर्णी पृश्निपर्णी चेति द्वये। शालपानि, चाकुलिया। च.द.ग्रह.चि।

द्विपसर्पः। पुं। नागकेशरे।

द्विपच्चः। पुं। पनसवृक्षे। काँटालगाछ।

द्विपाख्यः। पुं। नागकेशरवृक्षे। प.मु.।

द्विपाठा। स्त्री। अम्बष्ठाद्वये। चरा.।

द्विपादिकः। पं। नागकेशरवृक्षे। प.मु.।

द्विपायी (न्)। पुं। करिणि। हारा.।

द्विपाश्वः। पुं। हस्तिनि। द्विकर्षमाने। ४ चारि तोला। चक्र.।

द्विपिनखः। पुं। व्याघ्रनखे। नखीविशेष। रा.नि.व.१२।

द्विपी (न्)। पुं। चित्रकभेदे। च.वि.८अ.।

द्विपुटः। पुं। (Impotiens Balsamina) पुष्पद्विपविशेषे। दोपाटी। श.चि.।

द्विपुटी। स्त्री। मल्लिकायाम्। मे.।

द्विपुनर्नवम्। क्ली। शुक्लालोहितलताभेदेन पुनर्नवाद्वये। श्वेतपुनर्ना, गादापुनर्ना। सि.यो. काम.चि.व्योषाद्यघृते। "त्रिफला द्विपुनर्नवम्।"

द्विब्राह्मी। स्त्री। ह्रस्वदीर्घब्राह्मीद्वये। छोटि ओ बड़ ब्राह्मी। सु.शा.१०अ.।

द्विमधुकः। पुं। स्थलज-जलजभेदाद् यष्टिमधुद्वये। धर.।

द्विमाषम्। क्ली। क्षुद्रपर्णीमाषापर्ण्योः। मुगानी ओ माषाणी। च.द.उन्मा.चि.महाकल्याणघृते।

द्विमुखः (खाहिः)। पुं। द्विमुखसर्पविशेषे, राजसर्पे। राजसाप, दुमुखो साप, शाँखिनी साप। वस् टुंदुल। हला.। रस.र.विष.चि.। त्रि। मुखद्वययुक्ते।

द्विमुखा। स्त्री। भारिकायां। गाड़ू। जलौकायाम्। जोंक। हला.।

द्विमुखाहिः। पुं। राजसर्पे। शाँखिनी साप। तत्पर्य्यायः,—अहीवलिः, राजहिः, राजसर्पः। द्विमुखः, सर्पभुक्। ह.।

द्विमुखोरगः। पुं। द्विमुखसर्पे। जटा.।

द्विरजनी। स्त्री। हरिद्रायां दारुहरिद्रायाञ्च। हरिद्रा, दारुहरिद्रा। सि.यो.काम.चि.व्योषाद्यघृते।

द्विरदः। पुं। हस्तिनि। प.मु.।

द्विरदपिप्पली। स्त्री। गजपिप्पल्याम्। वै. निघ.२भ.वा.व्या.चि.द्राक्षिंशकगुग्गुलौ।

द्विरदान्तः (कः)। पुं। सिंहे। रा.नि.व. १९।

द्विरदारातिः। पुं। शरभे। सिंहविशेष। वै.निघ.।

द्विरदाशनः। पुं। अश्वत्थवृक्षे। वै.निघ.।

द्विरर्व्बुदम्। क्ली। अर्व्बुदभेदे। तस्य लक्षणं —"यद्वन्द्वजातं युगपत् क्रमाद्वा द्विरर्व्बुदं तच्च भवेदसाध्यम्।" सु.नि.११अ.।

द्विरश्मनम्। क्ली। वारद्वयक्षीजने। तिथितत्त्वम्।

द्विरसनः। पुं। सर्पे। त्रिका.।

द्विरा। स्त्री। पृथिव्याम्। शब्दर.।

द्विरापः। पुं। हस्तिनि। श.मा.।

द्विरे । पुं। गर्द्दभे। वै.निघ.। स्त्रीपुं'चिङ्गङ्ग

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नपुंसके। "बीजात्समांशादुपतप्तबीजात् स्त्रीपुंसलिङ्गौ भवति द्विरेफाः।" च शा.२अ.।

द्विरेफः। पुं, स्त्री। भ्रमरे। अ.।

द्विरेफगणसम्म(म्भि)ता। स्त्री। पुष्पवृक्षभेदे। वन शेँउती। वै.निघ.।

द्विलग्नकः। पुं। दुश्चर्म्मणि। हे.च.।

द्विवर्षा (र्षिका)। स्त्री। द्विहायन्याम् गवि। अम.। हे.च.।

द्विवार्त्ताकी। स्त्री। बृहतीद्वये। वृहती, कण्टिकारी। भा.म.३भ.बाल-चि.। "द्विवार्त्ताकी-फलरसम्।"

द्विवाहिका। स्त्री। दोलायाम्। डुलि।

द्विविदः। पुं। वानरभेदे। हे.।

द्विविषम्। क्ली। पाण्डुकृष्णातिविषायाम्। श्वेत ও কৃষ্ণ আতইচ। वै.निघ.२भ.वा.व्या.चि.।

द्विवृन्तः। पुं। नखरञ्जकवृक्षे। মেঁদী গাছ। प.मु.।

द्विवृहती। स्त्री। कण्टकारिका-बृहत्योः। কণ্টিকারী ও বিরুতী। वा.सू.१५अ.। "द्विवृहती द्विकरञ्जजयाद्वयम्।"

द्विशफः। त्रि। द्विखुरपशुमात्रे। "गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चैते अविरुष्ट्रश्च सप्तमः॥" भागवतम्।

द्विशृङ्गिका। स्त्री। मेषशृङ्ग्याम्। মেড়াশিঙী। वै.निघ.। [গাছ। वै. निघ.।

द्विशृङ्गी (ङ्गिन्)। पुं। मत्स्यविशेषे। শিঙ্গী

द्विषा। स्त्री। एलायाम्। वै.निघ.।

द्विष्टम्। क्ली। ताम्रे। अ.टी.सा.।

द्विस्विन्नान्नम्। क्ली। सिद्धतण्डुले। সিদ্ধ চাউল। पुराणम्। [सुश्रु.।

द्विहरिद्रा। स्त्री। हरिद्रा-दारुहरिद्रेतिद्वये।

द्विहा (न्)। पुं। हस्तिनि। शब्दर.।

द्विहृदया। स्त्री। गर्भवत्यां स्त्रियां। वै.निघ.।

द्विक्षारम्। क्ली। यवक्षारसर्জिक्षारयोः। सि. यो. अग्निमा.चि.।

द्विक्षीरम्। क्ली। गव्याजदुग्धयोः। গাইদুগ্ধ ও ছাগদুগ্ধ। च.द.यक्ष्म.चि.सर्पির্গুড়।

द्वीपः। पुं। कक्कोलवृक्षे। वै.निघ.। जलवेष्टित-स्थलभागे। अ.। क्ली। व्याघ्रचर्म्मणि। भ.।

द्वीपकर्पूरः (ज्ञः)। पुं। चीनकर्पूरे। रा. नि.व.१२। [द्वीपान्तरखर्জ্জুरे। रा.नि.व.११।

द्वीपखर्জ্জूरम्, द्वीपजम्। क्ली। महापारिवते,

द्वीपवती। स्त्री। नद्याम्। भूमौ। मे.। [४जटा।

द्वीप(पि)शत्रुः। पुं। शतावर्य्याम्। रा.नि.व.

द्वीपसम्भवः। पुं। कक्कोलवृक्षे। কাঁকলা। जीरके। (त्रा) स्त्री। महाखर्জ্জूरवृक्षे। वै.निघ.।

द्वीपान्तरवचा। स्त्री। तीपचिनोति ख्याते मूले। गुणाः--"द्वीपान्तरवचा किञ्चित्तिक्तोष्णा वह्निदीपिनिकृत्। विबन्धाध्मानशूलघ्नी शक्रन्मूत्रविशोधिनी। वातव्याधीनपस्मारमुन्मादं तनुवेदनाम्। व्यपोहति विशेषेण फिरङ्गामयनाशिनी॥" भा.।

द्विपिकः। पुं। चित्रकवृक्षे। चर.।

द्वीपिका। स्त्री। शतमूल्याम्। रा.नि.व.४।

द्विपिनखः। पुं। व्याघ्रनखे। নখী। वै.निघ.।

द्विपिनी। स्त्री। वटपतपाषाणभेदे। वै.निघ.।

द्वीपिपलाशः। पुं। हस्तिकर्णपलाशे। वा. सू.१५अ.मुष्ककादिः। "मुष्ककस्तु कपलाशद्वीपि-पलाशधवशिंशपाः।"

द्वीपी (पिन्)। पुं। व्याघ्रविशेषे। চিতাবাঘ।

द्विप्यः। पुं। काके। क्ली। वल्कीले। वै.निघ.।

द्वीप्या। स्त्री। शतावर्य्याम्। रा.नि.व.४। पिण्डीखर्জ্জूरवृक्षे। रा.नि.व.११।

द्वेषः। पुं। अम्लताविशेषे। रस.र.स्त्रीरो.चि.।

द्वेष्यम्। क्ली। कङ्कोले। रा.नि.व.१२।

द्वैपेयम्। क्ली। कर्पूरतैले। आ.। [रा.नि.व.२।

द्वैमातृकः। पुं। नदीवृष्ट्यम्बुपालिते देशे।

द्वैषणीया। स्त्री। नागवल्लीविशेषे। ছীसयलेहलेय इति घारसमुद्रदेशे ख्याता। द्वैसनीया इति पुस्तकान्तरे पाठः। रा.नि.व.११। [आधसेर।

द्व्यञ्जलम्। क्ली। अञ्जलीद्वयपरिमाणे।

द्व्यन्तरः। पुं। जातिद्वयसम्भूते सर्पे। দোআঁশলা সাপ। सु.कल्प.टी.।

द्व्यष्टम्। क्ली। ताम्रे। अम.। [ब्बरे। मा.नि.।

द्व्यहिकः (हीनः)। पुं। दिनद्वयान्तरभवे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध

धटः (कः)। पुं। धववृक्षे। धाओया गाछ। वै.निघ.। तुलामाने। तराजू धाड़ा। अम.। १४ वल्लमाने। ४२ रत्ति। लीलावती।

धटी (ष्टी)। स्त्री। वल्कले। वै.निघ.। जीर्णवस्त्रखण्डे। धड़ि। मे.।

धत्तूरः। पुं। धुस्तूरवृक्षे। रा.नि.व.१०।

धनम्। पुं,क्ली। मरिचे। अर्थे। वै.निघ.। स्नेहपाके। श.र.।

धनकम्। क्ली। धान्यके। धनिया। वै.निघ. २भ. सर्व्वज्व.चि.गुडूच्यादिः।

धनच्छः (च्छूः)। पुं, स्त्री। पक्षिविशेषे। धानस पाखी, कर्कटिया पाखी। विका.।

धनञ्जयः। पुं। अर्ज्जुनवृक्षे। रा.नि.व.९। वै.निघ.२भ.अजी.चि.पञ्चाग्निचूर्णे। अग्नौ। अम.। चित्रकवृक्षे। र.मा.। सर्पभेदे। मे.।

धनदः। पुं। हिज्जलवृक्षे। रा.नि.व.१०।

धनदायी (न्)। पुं। अग्नौ। शब्दर.।

धनदाची। स्त्री। पाटलवृक्षे। रा.नि.व.१०। लताकरञ्जे। रा.नि.व.८।

धनपिशाची (चिका)। स्त्री। तृष्णायाम्। विका.। हारा.।

धनप्रिया। स्त्री। काकजम्बूकवृक्षे। वन जाम। रा.नि.व.११।

धनसूः। पुं। धूम्राटपक्षिणि। फिङे पाखी। वै.निघ.।

धनस्य(स्व)कः। पुं। गोक्षुरकवृक्षे। श.च.।

धनहरः। पुं। ग्रन्थिपर्णवृक्षे। गँठेला। पारसीकयमान्याम्। वै.निघ.। चीरकनाम-गन्धद्रव्ये। भा.।

धनह(हा)री। स्त्री। पारसीकयमान्याम्। ग्रन्थिपर्णभेदे। अम.। चीरके। अ.।

धनहृत्। पुं। चण्डालकन्दे। वै.निघ.।

धना (नी)। स्त्री। आर्द्रधान्यके। वै.निघ.। धान्यके। वै.निघ.२भ.वा.व्या.चि.षड़शीतिगुग्गुलौ। अत्रि.२स्थान.२अ.।

धनिकः। पुं। धान्यकवृक्षे। धने' गाछ। रा.नि.व.६। क्ली। धान्यके। धने'। च.द. सि.यो. सन्निपातज्व.अष्टाङ्गकषाये। "तिक्तेन्द्रवीजधनिके"।

धनिका। स्त्री। धान्यके। धने। अत्रि.२स्थान.। प्रियङ्गुलतायाम्। श.च.। युवतीस्त्रियाम्। धनिया। श.र.।

धनीयकम्। क्ली। आर्द्रधान्यके। धान्यके।

धनुः(स्)। पुं। भल्लातकवृक्षे। चारवृक्षे। पिण्डाशाल। मे.। शरासने। शब्दर.।

धनुःप(ष्प)टः। पुं। प्रियालवृक्षे। रा.नि.व. ११। अम.।

धनुःशाखा। स्त्री। मूर्व्वायां। मूर्गा। श.च.।

धनुःश्रेणी। स्त्री। मूर्व्वायाम्। प.मु.। वारुण्याम्। वड़ माकाल, राखालशशा। रा.नि. व.३।

धनुर्गुणा। स्त्री। मूर्व्वायाम्। श.च.।

धनुर्द्रुमः। पुं। वंशे। बाँश। रा.नि.व.७।

धनुर्माला। स्त्री। मूर्व्वायाम्। श.च.।

धनुर्व्यासः। पुं। दुरालभायाम्। प.मु.।

धनुर्लता। स्त्री। सोमवल्ल्याम्। सोमलता। रा.नि.व.३।

धनुर्वातः। पुं। वातव्याधिविशेषे, यत्र सर्व्वसन्धिषु वेदनारुचिश्च भवति। "अनिच्छन्त्यचतां यस्तु उपभुङ्क्ते परस्त्रियं। बलादाक्रम्य स नरः सर्व्वसन्धिषु वेदनां। तीव्रामाप्नोत्यरुचिमान् धनुर्वातयुतो भवेत्॥" इति कर्म्मविपाकः। धनुस्तम्भरोगे।

धनुर्वीजः। पुं। भल्लातकवृक्षे। रा.नि.व.११।

धनुर्वृक्षः। पुं। धमन्यवृक्षे। धामनि गाछ। र.मा.। रा.नि.व.९। वंशे। भल्लातकवृक्षे। अश्वत्थवृक्षे। रा.नि.व.११।

धनुषः। पुं। कुक्कुरे। वै.निघ.।

धनुष्यः। पुं। वंशे। बाँश। रा.नि.व.७।

धनुस्तम्भः। पुं। वातव्याधिविशेषे। धनुष्टङ्कार। स वाह्याभ्यन्तरायामभेदाविद्विधः। लक्षणं—"धनुस्तुल्यो नमेद्यस्तु स धनुस्तम्भसञ्ज्ञितः। विवर्णवक्त्रवदनः सक्ताक्षी नष्टचेतनः। प्रक्षिप्यंश्च धनुस्तम्भी दशरात्रं न जीवति॥" मा.नि.।

CC-0. Gurukul Kangri Collection, Haridwár

Digitized by Arya Samaj Foundation Chennai and eGangotri

धनूः। स्त्री। धनुषि। ज.।

धनेच्छूः। पुं। करेटूपचिणि। [भ.।

धनेयकम्। क्ली। धन्याके। धनिया। अ.टी.

धनैषणा। स्त्री। एषणासु नरस्य द्वितीयैषणायाम्। धनप्रार्थना। "प्राणेभ्यो ह्यनन्तरं धनमेव पर्य्येष्टव्यं भवति। तदुपकरणानि च कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि। यानि चान्यान्यपि सतामविगर्हितानि कर्म्माणि वृत्तिपुष्टिकराणि विद्यात्।" च.सू.११अ.।

धन्यः। पुं। अश्वकर्णशाले। लता शाल। रा. नि.व.९। क्ली। द्रव्ये। वै.निघ.। कैवर्त्तमुस्तायां। ज.द.१२अ.। धन्याके।

धन्यवृक्षः। पुं। अश्वत्थवृक्षे। वै.निघ.।

धन्या। स्त्री। धन्याके। धनें'। हे.च.। उपमातरि। वै.निघ.। आमलक्याम्। मे.। निर्जलप्रदेशे। वै.निघ.।

धन्याकम्। क्ली। (Coriandrum sativum.) Coriander plant. खनामख्यातपण्यद्रव्ये। प.मु.। धनें'। हिं धनिया। तें कोचिमिरचेट्टु, धनियलु। ता. कीटमल्लि। तत्पर्य्यायः, —छत्रा, वितुन्नकं कुस्तुम्बूरु (अ.), धन्यं, धन्याकं, तुम्बुरु, धनिकं, धनीयकं, कस्तुम्बुरी, धान्याकं, धन्या, तुम्बरौ, धनेयकं (भरतधृतरत्नको.)· धानकं, धान्यं, धानियं, धनिका, छत्राधान्यं, सुगन्धि, शाकयोग्यं, सूक्ष्मपत्रं, जनप्रियं, धान्यबीजं, बीजधान्यं, अवरिका, वेधकं (रा.), उग्रा (के.), धेन्निका। भा.। च.द.सन्निपातज्व.चि.नागरादिः। "धन्याकं द्वयतीद्वयम्।" पि.ज्व.चि.। "व्युषितं धन्याकजलम्।" पि. श्लेष्मज्व.चि. गुडूच्यादिः। गुणाः—तुवरं स्निग्धम् अवृष्यं मूत्रलं लघु तिक्तं कटूष्णवीर्य्यं दीपनं पाचनं ज्वरघ्नं रोचकं ग्राहि खादुपाकं त्रिदोषघ्नं तृष्णादाहवमिश्वासकासकार्श्यकृमिघ्नच्च। आर्द्रं तत् तद्गुणसम्पन्नं स्वादु विशेषतः पित्तघ्नच्च। भा.पू.१भ.। मद.व.२।

धन्वः। पुं। दुरालभायाम्। वै.निघ.।

धन्वकः (गः)। पुं। धामनवृक्षे। च.द.मेह.चि.। "पाठार्জ্জুनधन्वकानां।"

धन्वङ्गः। पुं। धामनवृक्षे। धामना गाछ। गुणाः—"धन्वङ्गस्तु धनुर्वृक्षे गौरवृक्षः सुतेजनः। धन्वङ्गः कफपित्तास्रकासहृत्तुवरो लघुः। हृद्दृष्टो बलकृद्वृक्षः सन्धिकृद्व्रणरोपणः॥" भा.म.३ भ.प्रमे.चि.। वंशे। वै.निघ.। [७अ.।

धन्वचारी। त्रि। निर्जलदेशचारिणि। वा.चि.

धन्वजा। स्त्री। सर्षप्याम्। रा.।

धन्वतरुः। पुं। सोमवल्क्याम्। वै.निघ.।

धन्वदुर्गम्। क्ली। निर्जलदेशे। पुराणम्।

धन्वनः। पुं। धामनवृक्षे। धामना गाछ। र.मा.। हिं धामिनी। सं धमानु। कं उदुवे तत्पर्य्यायः,—पिच्छिलत्वक् (रा.), रक्तकुसुमः, धनुर्द्रुमः, महाबलः, रुजासहः, पिच्छिलकः, रुचस्वादुफलः। गुणाः—कटुः उष्णः कषायः कफघ्नः दाहशोषकरः संग्राही कण्ठदोषघ्नश्च। रा.नि.व.९। एतत्फलं कषायं हिमं स्वादु वातकफघ्नच्च। सु.सू. ४६अ.।

धन्वन्तरिः। पुं। वैद्ये। चितौ आयुर्व्वेदप्रणेतरि देववैद्ये। तदाविर्भावः—"एकदा देवराजस्य दृष्टिर्निपतिता भुवि। तत्र तेन नरा दृष्टा व्याधिभिः परिपीड़िताः॥ तान् दृष्ट्वा हृदयं तस्य दयया परिपीड़ितम्। दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह॥ धन्वन्तरे सुरश्रेष्ठ भगवन् किञ्चिदुच्यते। योग्यो भवसि भूतानामुपकारपरो भव॥ उपकाराय लोकानां केन किं न कृतम्पुरा। त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान्॥ तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव। प्रतीकाराय रोगाणामायुर्व्वेदम्प्रकाशय॥ इत्युक्ता सुरशार्दूलः सर्व्वभूतहितेप्सया। समस्तमायुषो वेदं धन्वन्तरिमुपादिशत्॥ अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा। आगत्य पृथिवीं काश्यां जातो वाहुजवंश्यनि॥ नाम्ना तु भीमभवत् ख्यातो दिवोदास इति क्षितौ। बाल एव विरक्तोऽभूच्चचार सुमहत्तपः॥ यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम्। ततो धन्वन्तरिर्लोकैः काशिराजोऽभिधीयते॥ हिताय देहिनां स्वीया संहिता विहितासुना। अयं विद्यार्थिनो लोकान् संहितान्तामपाठयत्॥' भा.। चिकित्सादीपकनिदानविषघ्नादिप्रणेतरि।

धन्वन्तरिग्रस्ता। स्त्री। कटुक्यां। कटकी। श.च। [विशेषे।

धन्वन्तरिपञ्चकम्। क्ली। धन्वन्तरिकृतग्रन्थ-

धन्वन्तरिभागः। पुं। औषधकरणार्थं वैद्य-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लभ्यौषधादिभागै। सिद्धरसानां ॥० भ. तैलघृत-लौहानां ८ भ. लेहवटिकानां ७ भ.। वै.निघ.।

धन्वपटः। पुं। प्रियालवृक्षे।

धन्वमांसम्। क्ली। निर्जलदेशपशुमांसे। वा. चि.१२अ.। See जाङ्गलमांसम्।

धन्वयवासः (कः) / **धन्वयासः** | पुं। दुरालभायाम्। रा. नि.व.४। सि.यो.रक्तार्श-चि.। "धन्वयवासाः सनागराः क्वथिताः।" च.सू. ४अ.। सि.यो.सन्निपात-ज्व.चि.अष्टादशाङ्गकषाये।

धन्वी (न्)। पुं। मरुभूमौ। रा.नि.व.२। च. चि.१अ.।

धन्वामिषम्। क्ली। जाङ्गलपशुमांसे।

धन्वौ (इन्)। पुं। दुरालभायाम्। रा.नि.व.४। अर्जुनवृक्षे। रा.नि.व.९। वकुलवृक्षे। वकुल। रा.नि.व.१०।

धमनः। पुं। नलतृणे। नल गाछ। रा.नि.व. ८। निम्बवृक्षे। निम् गाछ। रा.नि.व.९।

धमनिः (नी)। स्त्री। पृश्निपर्ण्याम्। चाकुले। रा.नि.व.४। उत्तरापथप्रसिद्ध-नालिकानामगन्धद्रव्ये। भा.। हे.च.। नखीनामगन्धद्रव्ये। हरिद्रायाम्। गोवायाम्। हे.। शिरायाम्। रा.नि.व.१८। शिराविकार एव धमनी। धमन्यश्च नाभिजाः, तत्संख्या च २४। तेषु दशोर्द्ध्वगाः, शेषास्तिर्य्यगाश्च। तेषूर्द्ध्वगाः रूपरसगन्धस्पर्शशब्दप्रश्वासोच्छ्वाससम्भ-क्षुत्हास्यभाषणरोदनगानादिकर्म्म सम्पादयन्ती देहं धारयन्ति। ताश्च हृदयं गत्वा प्रत्येकं शाखात्रयं विस्तारयन्त्यः ३० संख्या भवन्ति। तासु प्रत्येकं द्वे द्वे कृत्वा दश धमन्यो वातपित्तकफ-शोणितरसान् वहन्ति। अष्टौ च रूपादीनि गृह्णन्ति। शिष्टासु द्वादशसु द्वाभ्यां वाङ्निष्पत्तिः, द्वाभ्यां घोषणं, द्वाभ्यां निद्रा, द्वाभ्यां जागरणं, द्वाभ्याञ्च रक्तवहनं भवति शिष्टेन स्तनसंस्थितेन द्वयेन च स्त्रियाः स्तन्यवहनं पुंसश्च शुक्रवहनं स्तनाभ्यां भवति। अधोगास्तु दश पित्ताशयमधिगम्य विंशत्सम्पन्नाः। तासु द्वे द्वे वातपित्तकफरक्तरसान् वहतः। शिष्टाभ्यश्च द्वे अन्त्रमाश्रित्यान्नं वहतः। द्वे जलं वहतः, द्वे वस्तिमाश्रित्य मूत्रं वहतः। द्वाभ्यां पुरुषस्य शुक्रं स्त्रिय आर्त्तवञ्च प्रादुर्भवति, द्वे च तद्वयं निःसारयतः। द्वे स्थूलान्त्रनिबद्धे भूत्वा पुरीषं निःसारयतः। अवशिष्टाश्चतस्रो तिर्य्यगा-मिन्यो स्वेदं निःसारयन्ति। एताश्चाधोगा धमन्यः पक्वाशयकठिमूत्रपुरीषगुह्यवस्तिमेढ्रपादप्रभृतीन्याश्रित्य तेषां पोषणं सम्पादयन्ति। तिर्य्यगाश्च धमनीचतुष्टयं प्रत्येकमसंख्यशाखाविभक्तं देहं रन्ध्रभूयिष्ठं करोति। एतासाञ्च मुखानि प्रतिलोमकूपं संलग्नानि। तेभ्यश्च मुखेभ्यः स्वेदा निर्गच्छन्ति, देहरसो बहिरन्तश्च सन्तर्पयति। अभ्यङ्गादिना च तैलादिर्वीर्य्यमन्तःशरीरं प्रविश्य त्वक्पाकादिकं करोति तेनैव च शुभाशुभस्पर्शज्ञानं भवति।" सु. शा.९अ.। भा.।

धमन्यः। पुं। धत्तूरवृक्षे।

धमिः। स्त्री। अन्त्रे। धमन्याम्। हारा.।

धयनम्। क्ली। पाने। रा.नि.व.३०।

धरः। पुं। कार्पासतूलके। मे.। पर्व्वते। कूर्म्मराजे। मे.।

धरणः। पुं। तुलायां। स्तने। धान्ये। हे.च.। तण्डुले। वै.निघ.। क्ली। कालिङ्गचतुर्मांषमित-माने। रौप्यषोड़शमाषे। वै.निघ.।

धरणी। धारणीकन्दे। रा.नि.व.७। शिरायां। रा.नि.व.१८। खदिरवृक्षे। रा.नि.व.२३। पुन-र्नवायाम्। मेदायाम्। वै.निघ.। शाल्मलिवृक्षे। भू.च.। पृथिव्याम्।

धरणीकन्दः। पुं। धरणीकन्दे। रा.नि.व.७।

धरणीकौलकः। पुं। पर्व्वते। शब्दर.।

धरणीधरः (भ्रः)। पुं। पर्व्वते। कच्छपे। रा. नि.व.१९।

धरणीपूरः (प्लवः)। पुं। समुद्रे। शब्दर.। वि.।

धरणीबन्धः। पुं। अरिष्टबन्धने। सर्पाघाते बन्धनविशेष। स शाखादष्टस्य दंशदेशाच्चतुरङ्गुलं न्यास्यः। यदाह वाभटः—"दंशस्योपरि बध्नीया-दरिष्टां चतुरङ्गुलं। चौमादिभिर्बोलकया सिद्धै-र्मन्त्रैश्च मन्त्रवित्॥" च.द विष.चि.।

धरणीया। स्त्री। धारणीकन्दे।

धरणीरुहः। पुं। वृक्षे। अ.।

धरा। स्त्री। शिरायाम्। नाड्याम्। रा.नि.व. १८। वसायाम्। गर्भाशये। मे.।

धराकदम्बः (कः)। पुं। कदम्बवृक्षे। हारा.।

धराङ्कुरः। पुं। भूच्छत्राके। वै.निघ.।

धराकदम्बः। पुं। धाराकदम्बे। हा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धराजकुष्माण्डः। पुं। भूमिकुष्माण्डे। भुँइ कुमड़ा। चि.क्र.क.स्त्रीरो.चि.।

धराफलः। पुं। कर्म्मरङ्गे। कामरांगा। रा.।

धराफल्गुः। स्त्री। वार्त्ताक्याम्।

धरिमा (न्)। पुं। तुलायाम्। तराजू। आकरे। वै.निघ.।

धरुणः। पुं। जले। मे.।

धर्त्तम्। क्ली। गृहे। उ.।

धर्त्तरः। पुं। शुक्लधुस्तूरे। वै.निघ.। [धनुषि।

धर्म्मः। पुं। स्वभावे। आचारे। गुणे। मे.।

धर्म्मघ्नः। पुं। विभीतकवृक्षे। वै.निघ.।

धर्म्मणः। पुं। धमनवृक्षे। धामना गाछ। र.मा.। सर्पभेदे। ढेमना साप। मे.।

धर्म्मद्रवो। स्त्री। गङ्गायाम्। वि.।

धर्म्मद्वेषी (इन्)। पुं। विभीतकवृक्षे। वै.निघ.।

धर्म्मपत्तनम्। क्ली। सरिचे। रा.नि.व.६।

धर्म्मपत्रः। पुं, क्ली। उदुम्बरवृक्षे। शब्दच.।

धर्म्मपालः। पुं। खड्गे। शब्दर.।

धर्म्मवृक्षः। पुं। अश्वत्थवृक्षे। रा.नि.व.११।

धर्म्मसूः। पुं। धूम्राटपक्षिणि। शब्दर.।

धर्म्मिणी। स्त्री। रेणुकायाम्। रेणुक। रा.नि.व.। [जाह्वे।

धर्षः (र्षितम्)। पुं, क्ली। मैथुने। त्रिका.।

धलखण्डः (कः)। पुं। खनामख्यातवृक्षे। धला आँकोड़। शब्दच.।

धलमङ्गठः। धलखण्डवृक्षे। मे.।

धवः। पुं। (Anogeissus latifolia. Syn. Conocarpus latifolia.) खनामख्यातवृक्षे। धाओया गाछ। र.मा.। मं धामोड़ा। कं सिरिवृ। तें नारिंजचेट्टु। तत्पर्य्यायः,—धुरन्धरः, शाकटाख्यः (रा.) दृढ़तरुः, गौरः, कषायः, मधुरत्वक्, शुक्लवृक्षः, शुक्लाङ्गः, पाण्डुतरुः, धवलः, पाण्डुरः। गुणाः—कटुः कषायः कफघ्नः वातघ्नः पित्तकोपनः रुच्यः दीपनश्च। राज.। "धवः श्रोतः प्रमेहार्शःपाण्डुपित्तकफापहः। मधुरस्तुवरस्तस्य फलञ्च मधुरं मनाक्॥" भा.। अन्यच्च—'धवः कषायः कटुकः कफघ्नोऽनिलनाशनः। पित्तप्रकोपनो रुच्यो विज्ञेयो दीपनः परः॥" फलमीषन्मधुरम्। रा.नि.व.९। काके। त्रिका.। मनुष्ये। अम.। खदिरे। र.सा.सं. सल्युच्चयलोहे। [वै.निघ.।

धवनी। स्त्री। पृश्निपर्ण्याम्। चाकुलिया।

धवलः। पुं। धववृक्षे। धाओया गाछ। रा.नि.व.९। अर्জ্জुनवृक्षे। भा.। शङ्खे। चीनकर्पूरे। रा.नि.व.१२। धातकीवृक्षे। वै.निघ.। क्ली। श्वेतसरिचे। रा.नि.व.६। त्रि। शुक्ले। सुन्दरे। त्रिका.। [नि व.१९।

धवलपक्षः (क्षी इन्))। पुं। हंसे। रा.

धवलपाटली। स्त्री। शुक्लपाटल्याम्। श्वेत पाकुल। रा.नि.व.१०।

धवलपुनर्नवा। स्त्री। श्वेतपुनर्नवायाम्। चक्र.।

धवलमृत्तिका। स्त्री। खटिकायाम्। फुलखड़ि। रा.नि.व.१३।

धवलयावनालः। पुं। श्वेतवर्णयावनालवृक्षे। शादा जनार। सं श्वेतजुवारी। कं बिलियजोल। तत्पर्य्यायः,—पाण्डुरः, तारतण्डुलः, नवबकान्ति-विस्तारः, वृत्तः, मौक्तिक-तण्डुलः। अयं शिम्बीधान्ये वर्त्तते। गुणाः—गौल्यः बल्यः विदीपघ्नः हृद्यः रुचिप्रदः अर्शोघ्नः पथ्यः गुल्मव्रणघ्नश्च। रा.नि.व.१६।

धवलशारिवा। स्त्री। शुक्लशारिवायाम्। अनन्तमूल। वै.निघ.।

धवला। स्त्री। श्वेतशारिवायाम्। See अनन्ता श्वेतसारिवा च। भा.पू.१भ.। गवि। गाई गरु। त्रिका.। वचायाम्। श्वेतापराजितायाम्। र.चि. पापरोगाल्लकरसे।

धवली। स्त्री। शुक्लगवि। अम.।

धवलेक्षुः। पुं। श्वेतेक्षौ। रा.नि.व.१४।

धवलोत्पलम्। क्ली। कुमुदपुष्पे। नीलफूल, श्वेत फूल। रा.नि.व.१०।

धवाणकः। पुं। वायौ। उ.।

धविचम्। क्ली। मृगचर्म्मनिर्म्मितव्यजने। अम.।

धाकः। पुं। हर्षे। क्ली। अन्ने। स्तम्भे। उणा.।

धातकी। स्त्री। (Woodfordia floribunda. Grislea tomentosa.) खनामख्यातपुष्पवृक्षे। धाईफूलेर गाछ। हिं धावड़,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धाणीला। मं धायटी। तें आरेपुष्पु, जागें। उत्, जातिकी। तत्पर्य्यायः,—धातपुष्पी, धातुपुष्पी, धावी (अम्बर.), वह्निपुष्पी, ताम्रपुष्पी, धावणी, अग्निज्वाला, सुभिक्षा, पार्व्वती, बहुपुष्पिका, कुतुदा, सोधुपुष्पी, कुब्जरा, मद्यवासिणी, गुच्छपुष्पी, सङ्घपुष्पी, रौद्रपुष्पिणी, तीव्रज्वाला, वह्निशिखा, मद्यपुष्पी। गुणाः—कटुः उष्णा मदकृद्विषघ्नी प्रवाहिकातिसारघ्नी विसर्पव्रणघ्नी च। रा.नि. व.९। "धातकी कटुका शीता मृदुकृत्तुवरा लघुः। तृष्णाविसारपित्तास्रविषकृमिविसर्पजित्॥" भा.। शीता रक्तपित्तघ्नी च। राज.।

धातकीकुसुम(पुष्प)म्। क्ली। धातकीपुष्पे। धाईं फूल। सु.सू.३८अ. अम्बष्ठादिः। च.सू.४अ.।

धातक्यभिषुतम्। क्ली। धातकीपुष्पकृतसुराभेदे। गुणाः—हृद्यं रूक्षं रोचनं दीपनञ्च। च. सू.२७अ.।

धातक्यादिचूर्णम्। क्ली। बालरोगाधिकारे औषधम्। पाठः—"धातकीबिल्वधन्याकलोध्रेन्द्रयवबालकम्। लिह्यात् क्षौद्रेण बालानां ज्वरातीसारवान्तिजित्॥" धाईफूल, बेलशुंटी, धने, लोध, इन्द्रयव, बाला प्रत्येक चूर्ण समभाग मधु द्वारा लेहन। सा.कौ.।

धाता। पुं। स्रष्टरि। शरीरादिसंयोगस्य धारणहेतौ। सु.शा.३अ.।

धातुः। पुं। खनिजेषु स्वर्णादिसप्तविधाष्टविधनवविधपदार्थेषु। धात। यथा—काञ्चनं रजतं ताम्रं कांस्यं पित्तलं नागं वङ्गं लौहञ्चेत्यष्टौ। रा. नि.व.१८। स्वर्णरौप्यताम्रवङ्गयशदसीसलौहानीति सप्त। भा.। तथा—"हेमतारारनालाश्च ताम्रवङ्गे च तीक्ष्णकम्। कांस्यकङ्कान्तलौहञ्च धातवो नव कीर्त्तिताः॥" सुखबोधः। "विविधन्तु सुवर्णं स्यादष्टधा रजतं भवेत्। पञ्च प्रकारकं ताम्रं वङ्गन्तु द्विविधं स्मृतम्। यशदं त्रिविधं प्रोक्तं भवेन्नागस्तु षड्विधः। अष्टधा लौहमुद्दिष्टमेते सप्तैव धातवः॥" अर्कचि.। गुणाः—"वलीपलितखालित्यकार्श्यावल्यज्वरामयान्। निवार्य्य देहं दधाति शूणां तद्धातवो मताः॥" भा.पू.१भ.धातुव.। देहधारकवस्तुविशेषे। स च वातपित्तकफरूपः देहस्य धारणात्तस्य धातुशब्दवाच्यता। यथा—"धारणाद्धातवस्ते स्युर्वातपित्तकफास्त्रयः।" वैद्यम्। गैरिकमनःशिलाद्यश्मविकारे। प.सु.। शरीरस्थसप्तधातुषु रसरक्तमांसमेदोऽस्थिमज्जशुक्रेषु। "रसादस्रं ततो मांसं मांसान्मेदोऽस्थि तद्भवं। अस्थ्नोमज्जा ततः शुक्रमित्येषां विनिष्क्रमः॥" रा.नि.व.१८। धातूनाञ्च कर्म्माणि प्रीणनजीवनलेपस्नेहधारणपूरणगर्भोत्पादकानि। गिरिमृत्तिकायां। रा.नि.व.१३।

धातुक(ज)म्। क्ली। शिलाजतुनि। वै. निघ.।

धातुकाशीष(सीस)म्। क्ली। कासीसे। शिरेकस्। रा.नि.व.१३।

धातुकी। स्त्री। धातकीवृक्षे। वै.निघ.।

धातुग्राही (ह्रिन्)। पुं। स्वर्परे। वै.निघ.।

धातुघनः। पुं। शरीरस्थ-रस-धातौ।

धातुघ्नम्। क्ली। काञ्जिके। हे.च.।

धातुचेतनकरम्। क्ली। दुग्धे। आमलकि। शिदले। वै.निघ.।

धातुद्रावकम्। क्ली। टङ्कणक्षारे। सोहागा। वै.निघ.।

धातुनाशनम्। क्ली। काञ्जिके। त्रिका.।

धातुपः। पुं। शुक्रे। रसे। अ.च.।

धातुपाकः। पुं। रसादिधातुह्रासे। तल्लक्षणम्—"निद्रानाशो हृदिस्पन्दो विष्टम्भो गौरवारुचौ। अरतिर्बलहानिश्च धातूनाम्पाकलक्षणम्।" वैद्यकम्।

धातुपुष्पिका (ष्पी)। स्त्री। धातकीवृक्षे। प.मु.। भा.।

धातुभृत्। पुं। पर्व्वते। अम्बर.।

धातुमलः। पुं। शीषके। रसादिमलेषु। व्रणरक्तादिषु मल। "मलिनीकरणान्मलाः॥" वैद्यकम्। "कफः पित्तं मलः खेषु प्रस्वेदो नखलोमसु। नेत्रविट्त्वक्षु च स्नेहो धातूनां क्रमशोमलाः॥ भा.।

धातुमारिणी। स्त्री। टङ्कणक्षारे। अ.च.।

धातुमारी (रिन्)। पुं। गन्धके। वै.निघ.।

धातुमाक्षिकम्। क्ली। स्वर्णमाक्षिके। रा.नि. व.१३। धातुकाशीषे। शिरेकस्। वै.निघ.।

धातुराजः (कम्)। पुं, क्ली। वीर्य्ये। शुक्रे। वै.निघ.। अ.च.।

धातुवल्लभम्। क्ली। टङ्कणे। सोहागा प.मु.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धातुवादी (दिन्) । पुं । स्वनिजविद्याभिज्ञे ।
धातुविट् । स्त्री । शोषके । वै.निघ. ।
धातुविषम् । क्ली । हरितालादौ । र.सा.सं. ।
धातुवृद्धिः । स्त्री । रसादिवृद्धौ, रसादिधातुसाम्ये । च.सू.१३अ. ।
धातुवृद्धिकरः । पुं । धातुवर्द्धकद्रव्ये, अश्वगन्धामधुलोमशतावर्य्यादौ ।
धातुवैरी (दिन्) । पुं । गन्धके । ग्र.च. ।
धातुवैषम्यम् । क्ली । विकारागमरूपकार्य्ययोनौ । च.वि.८अ. ।
धातुशेखरम् । क्ली । Green sulphate of Iron. धातुकाशीषे । हिरेकस् । हे.च. ।
धातुशोधनम् । क्ली । शीषके । वै.निघ. ।
धातुशोधनकरी । स्त्री । हरीतक्याम् । वै. निघ. ।
धातुसम्भवम् । क्ली । शीषके । वै.निघ. ।
धातुसाम्यम् । क्ली । विकारोपशमरूपकार्य्ये । च.वि.८अ. । आरोग्ये । च.सू.१अ. ।
धातुस्तम्भनकरम् । क्ली । जातीफले । वै. निघ. ।
धातुहा (न्) । पुं । गन्धके । वै.निघ. ।
धातूचयकासः । पुं । धातूचयकरकासरोगे । क्षयकास । निदा. । [रा. ।
धातूपरसः । पुं । भक्तमण्डे । भातेर माड़ ।
धातूपलः । पुं । खड़िकायाम् । खड़ि । वै.निघ. ।
धात्रिका । स्त्री । आमलक्याम् । रा.नि.व.११ ।
धात्री । स्त्री । आमलक्याम् । आमला । रा. नि.व.११ । भा.पू.१भ. । See अकरा । उपमातरि । दाई । तल्लक्षणं—"पीताय यदि बालस्य विदध्यादुपमातरम् । सुविचार्य्य गुणान् दोषान् कुर्य्याद्धात्रीं तदिङ्गिताम् । सवर्णां मध्यवयसां सच्छीलां सुदितां सदा । शुद्धदुग्धां बहुक्षीरां सवत्सामतिवत्सलाम् । स्वाधीनामल्पसन्तुष्टां कुलीनां सज्जनात्मजाम् । कैतवेन परित्यक्तां निजपुत्रेऽपि शिशौ ॥" मा. । धात्रीकर्म्म । यथा—"धात्री तु यदा स्वादु-बहुल-शुद्धदुग्धा स्यात्, तदा स्नातानुलिप्ता शुक्लवस्त्रं परिधाय ब्राह्मणाद्यौषधं धारयन्ती कुमारं प्राङ्मुखं प्रथमं दक्षिणं स्तनं पाययेत् ।" इत्यादि । च.शा.८अ. ।
धात्र्यवलम् । क्ली । तालीशपत्रे । रा.नि.व.६ । आमलकीपत्रे ।
धात्रीफलम् । क्ली । आमलकफले । आमला । मद.व.१ । (ला) स्त्री । आमलक्याम् । आमला गाछ । रा.नि.व.११ ।
धात्रीलौहम् । क्ली । शूलाधिकारे । प्रथमः पाठः—शुद्धमण्डूरं ६ प. यवः ४ प. पाकार्थजलं २ श. शे. ॥० शं. शतावरीरसः ८ प. आमलकीस्वरसः ८ प. दधि ८प. दुग्धं ८प. भूमिकुष्माण्डस्वरसः ४ प. घृतं ४ प. इक्षुरसः ४ प. । एकत्र पक्वा पाके सिद्धे प्रक्षेपः—जीरकचूर्णं धान्यकचूर्णं त्वक्चूर्णं तेजपत्रचूर्णम् एलाचूर्णं गजपिप्पलीचूर्णं मुस्ताचूर्णं हरीतकीचूर्णम् अभ्रभस्म लौहभस्म रेणुकचूर्णं त्रिफलाचूर्णं तालीशचूर्णं नागकेसरचूर्णं प्र. रतो. । शुद्धमण्डूर ७प. यव ४प. पाकार्थ जल २श.शे.॥० श. । शतमूलीरस ८प. आमलकीरस ८ प. दधि ८ प. दुग्ध ८ प. भूमिकुष्माण्डेर रस ४ प. घृत ४ प. ईक्षुरस ४ प. । एकत्र पाक सिद्ध हइले, प्रक्षेप—जीरा, धने, गुड़त्वक्, तेजपत्र, एलाईच, गजपिपुल, मुता, हरीतकी, अभ्र, लौह, रेणुक, त्रिफला, तालीशपत्र, नागेश्वर प्रत्येक चूर्ण २तो. । र.सा.सं. । सा.कौ. । द्वितीयः—धात्रीचूर्ण ८ प. मण्डूरचूर्ण ४ प. यष्टिमधुचूर्ण २ प. गुडूचीक्वाथे सप्तवारं भावयेत् । भावनाक्वाथार्थं क्वाथ्यद्रव्यम् औषधतुल्यमादाय ८गुणे वारिणि साधयेत् । आमलकीचूर्ण ८ प. मण्डूरलौहचूर्ण ४प. यष्टिमधुचूर्ण २ प. । गुलूक्वाथे सप्ताह भावनानन्तर शुष्क करिया घृतभाण्डे राखिबे । भावनार क्वाथ औषधेर तुल्य लइया ८ गुण जले प्रस्तुत करिबे । तृतीयः- पाण्डौ—आमलकलौहविकटुसनःशिलाचूर्णं मधु घृतं शर्करा प्र. समम । आमलाचूर्ण, लौह, त्रिकटु, मनछाल, मधु, घृत, चिनि प्रत्येक समान । चतुर्थः वाजीकरणे—आमलकचूर्णं ८ प विफलाक्वाथेन २१ भावयित्वा; अथ मृतलौहमधुघृतशर्कराः प्र. २ प. निषेवयेत् । आमलाचूर्ण ८ प. त्रिफलाक्वाथे २१ भावना दिबे । मृतलौह २ प. मधु २

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प. घृत २ प. शर्करा २ प. एकत्र मिश्रित करिवे। रस.र.। अन्य: पित्तरोगे—"धात्रीचूर्ण-स्याष्टौ पलानि चत्वारि लौहचूर्णस्य। यष्टीमधुक-रजस द्विपलं दद्यात् पुटे घृष्टम्। घात्र्याश्च क्वाथेन तच्चूर्णं भाव्यञ्च सप्ताहं। चण्डातपेन संशुष्कं भूय: पिष्टं घटे स्थितं। घृतेन मधुना युक्तं भोजनादन्त-मध्यत:। त्रीन् वारान् भक्षयेन्नित्यं.....।" र. सा.सं।

धात्रीश्वरी। स्त्री। धातक्याम्। रा.।

धात्रीषट्पलकघृतम्। क्ली। गुल्मे घृतम्। "धात्रीफलानां स्वरसै: षट्पलं विपचेद्घृतम्। शर्करासैन्धवोपेतं तद्धितं सर्व्वगुल्मिनाम्॥" धात्री-रस: घृतसम:। रस.र.। भैष.।

धात्रेयि(यी)का। स्त्री। आमलक्याम्। रा. नि.व ११। उपमातरि।

धात्र्यरिष्टम्। क्ली। पाण्डुरोगे। "धात्रीफल-सहस्रे द्वे पीड़यित्वा रसन्तु तं। चौद्राष्टांशेन संयुक्तं क्षणाईकुड़वेन च। शर्कराईतुलोन्मिश्रं पक्वं स्निग्धे घटे स्थितं। प्रपिबेन्मात्रया प्रात:.....।" च.चि. २० अ.।

धात्र्यादि:। पुं। चातुर्थिकज्वरघ्ने धात्रीमुस्ता-मृतचौद्रकृते कषाये। वा.चि.१अ.।

धानक:। पुं। मानपरिमाणे। च.कल्प.१२अ.। क्ली। धन्याके। मद.व.२।

धाना (ना:)। स्त्री। चिपीटके। चिड़े। प.मु.। भक्ष्यवादौ। भाजा यवादि। हिं बहुड़ा। गुणा:—विष्टम्भिनी रूक्षा तर्पणी लेखनी गुरुश्च। वा.। "यवादयश्च ये भृष्टा धानास्ते परिकीर्त्तिता:।" रा.नि.व.६। "धाना: स्युर्दुर्जरा रूक्षास्तुट्-प्रदा गुरवस्तु ता:। तथा मेहकफच्छर्द्दिनाशिन्य: सम्प्रकीर्त्तिता:॥" धन्याके। धनिया। भा.। शुष्कभृष्टयवे। सु.चि.१०अ.।

धानाका:। स्त्री। धान्याके। धने'। वा. सू. १५अ.गुडूच्यादि:। "धानाकारक्तचन्दनम्।" (बहुवचनान्ता:)।

धानाचूर्णम्। क्ली। भृष्टयवादिचूर्णे। यवादिव्र छातू। हे.च.।

धानाला। स्त्री। वृक्षभेदे।

धानिका। स्त्री। धान्यके। धने'। वै.निघ. अ.सा.चि.यवान्यादौ।

धानी इन्)। पुं। पीलुवृक्षे। रा.।

धानी। स्त्री। धान्यके। धने'। मद.व.२। पीलुवृक्षे। रा.नि.व.११।

धानुष्का। स्त्री। अपामार्गवृक्षे। आपांग गाछ। श.च.।

धानुष्य:। पुं। वंशे। रा.नि.व.८।

धानेय(क)म्। क्ली। धन्याके। रा.नि.व.६। आर्द्रधान्यके। काँचा धनिया। वै.निघ.।

धान्धा। स्त्री। एलायाम्। श.च.।

धान्यम्। क्ली। ४ तिलमाने। ६ गुञ्जामाने। धन्याके। धने'। रा.नि.व.६।२३। भूम्यामलक्याम्। रा.नि.व.२३। (Oryza sativa.) Common rice plant. शाल्यादिवृक्षे। सतुषतण्डुले। धान। तत्पर्य्याय:,—भोग्य, भोगार्ह, अन्न, आद्य, जीवनधन, स्वस्कारि:, व्रीहि:। धान्यं त्रिधा शालिषष्टिकव्रीहिभेदत:। यथा—"शालयो हैमना-स्तत्र षष्टिका गैषिका अपि। व्रीहयस्त्वाशव: ख्याता प्रावृट्कालसमुद्भवा:॥" राज.३प.। शूकशिम्बी-तृणधान्यभेदेन त्रिधा। रा.नि.व.१६। शालि-व्रीहिशूकशिम्बीक्षुद्रधान्यभेदेन पञ्चविधम्। 'शालयो रक्तशाल्याद्या व्रीहय: षष्टिकादय:। यवादिकं शूकधान्यमुद्भाद्यं शिम्बिधान्यकम्। कङ्ग्वादिक-क्षुद्रधान्यं तृणधान्यञ्च तत् स्मृतमिति॥" भा.पू. १भ.धा.व.। अष्टादशविधम्। यथा—"रक्त-शालिर्महाशालि: कलमा षष्टिकापरा। खञ्जरी टीपसाहो च जीरकाद्या कपिञ्जला। सौगन्धी शूकला चान्या तिलवासो कचोरका। गरुड़ा रूक्षवल्ली च कलमाद्या तथापरा। विखजा मागधी पीता ता अष्टादश शालय:॥ कङ्गुस्तुर्विध: प्रोक्त: श्यामाकश्चीनक: कट:। कोद्रवो द्विविध: प्रोक्तो वंशबीजं शरोद्भवं। कुसुम्भबीजं तीली च योनरी च गवेधुक:। द्विजाङ्गला राजनी च क्षुद्रधान्य-गणस्त्रयम्॥" क्षुद्रधान्यम्। त्रिधा यवस्य गोधूमी मुद्ग: षड्विध ईरित:। द्विविध: प्रोच्यते माषो राजमाषस्त्रिधा मत:। मकुष्ठसुवरी वेधा निष्पावकमसूरकौ। त्रिधा चणक उद्दिष्ट: कलायश्च त्रिपुण्ड्रक:॥" अवि.। एषां गुणा: स्वस्वपर्य्याये दृश्या:। शरद्भवीक्षवधान्यगुणा:— "धान्यं शरद्भवमभवं पाकेऽन्न पित्तक्रद्गुरु।" ऋतुसन्धिजधान्यगुणा:—"ऋतुसन्धिभवञ्चीर्णं पित्तलं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कफनाशनम् ॥" राज.३प. । स्थलजधान्यगुणाः—"स्थलजं कफ-पित्तघ्नं कषायं कटुपाकि च । किञ्चित् तु तिक्त-मधुरं पवनानलवर्द्धनम् ॥" वापितावापितधान्यगुणाः—"वापितं गुरु तद्वान्यं किञ्चिद्धीनमवापितम् ।" रौप्यातिरौप्यधान्यगुणाः—"रौप्यातिरौप्ये लघुनी शीघ्रपाकि गुणोत्तरे । अदाहिनी दोषहरे बल्ये मूत्रविवर्द्धने ॥" यच्छूकसमन्वितं व्रीह्यादिकं तच्छूकधान्यम्, शिम्बी-निगूढ़ सुक्ष्मशुष्कादि शिम्बीधान्यम् । तृणीव-तया तृणधान्यम् । इति । "पक्वं हरितलूनञ्च धान्यं सर्व्वगुणावहम् । शुष्कं लूनन्तु निःसारं रूक्षं तत्सक्तनाशनम् ॥" इति हरितलूनान्नशुष्कलूनान्न-गुणाः । "कीशधान्यं नवम्बल्यं मधुरं वत्सरोषितं । निर्द्दोषं लघु पथ्यञ्च तद्वर्षादचिरम्भवेत् । नवं धान्यमभिष्यन्दि लघु संवत्सरोषितं । द्व्यब्दोषितं लघु पथ्यं विवर्षादबलम्भवेत् ॥" इति नवधान्य-जीर्णधान्यगुणाः । धान्यं वापितम् उत्तमं, तदेव छिन्नीज्ञवं मध्यमम् । दग्धभूमौ वने वा वापितं छिन्नीज्ञवं धान्यं विष्मूत्रबन्धकरम् । चारोदक-समुत्पन्नं श्लेष्मरोगघ्नम् । सुस्निग्धभूमिजम् ओजो-बलकरम् । बालुकाभूमिजम्बलपुष्टिहरञ्च । रा. नि.व.१६ ।

धान्यकम् । क्ली । स्वनामख्यातपण्यद्रव्ये । धने' । हिं कोथुम्बुरि । धनिया । भद.व.२ । गुणाः—मधुरं शीतलं कषायं पित्तघ्नं ज्वरकास-तृष्णाच्छर्द्दिकफघ्नं दीपनञ्च । रा.नि.व.६ । च.सू.४ अ. । च.द.ज्वराति. चि. । "बिल्वधान्यकनागरैः ।" पुं । माषमितमाने । ७ कुँच । प.प्र.१ख. ।

धान्यकच्चुकी (इन्) । पुं । धान्यत्वचि । धनेर खोला । गुणाः—धान्यगुणयुक्तः । रा.नि.व.१६ ।

धान्यकतण्डुलः । पुं । कण्डितधन्याकतण्डुले । ध'नेर चा'ल । भा.म.१भ. अन्तकज्व.चि.धान्यक-क्वाथे । "प्रातर्धान्यकतण्डुलक्वाथः ।"

धान्यकल्कः । पुं । तुषे ।

धान्यचतुष्कम् । क्ली । अतीसारे धान्यसुस्तक-बालकबिल्वकृतकषायविशेषे । वैद्यकसं. ।

धान्यचमसः । पुं । चिपीटके । चिँड़े । त्रिका. ।

धान्यजम् । क्ली । धानेर । रा.नि.व.६ ।

धान्यतुषोदम् । क्ली । धान्यतुषकृतसन्धान-विशेषे । एतदभावे काञ्जिकम् । सि.यो.अजी.चि. ।

धान्यतैलम् । क्ली । गोधूमयावनालव्रीहियवा-दिजतैले । गुणाः—विदीषशमनं कण्डूकुष्ठादिहरं चक्षुष्यञ्च । रा.नि.व.१५ ।

धान्यपञ्चकम् । क्ली । आमशूलादौ कषाये । "धान्यकं नागरं मुस्तं बालकं बिल्वमेव वा । आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ॥" वैद्यकसं. । पञ्चविधधान्येषु शालिव्रीहियूककशिम्बीक्षुद्राख्येषु । "शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकं । शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम् ॥" भा. ।

धान्यपटोलः । पुं,क्ली । पित्तश्लेष्मज्वरे यौग-विशेषे । अत्र धान्यस्य १० माषाः पटोलस्य च ६ माषाः । सि.यो.ज्व.चि. ।

नवनी(नम्)। स्त्री,क्ली। दुग्धजसारे। टाटका ननि, गाथन्। तत्पर्य्यायः,—नवोद्धृतं, नवनी, सरजं, सन्यजं, हैयङ्गवीनं, दधिसारः, कलम्बूटः, दधिजं, सारं, हैयङ्गवीनकं। तन्नानादुग्धजत्वात् दशविधं। गव्यं माहिषमाजमाविकं गर्द्दभजमौष्ट्रम् ऐड़कं हास्तिकं मानुष्यमथौनञ्च ति। विशेषाः स्वस्वपर्य्याये दृश्याः। सा. गुणाः—शीतं वर्णदं बलदं मधुरं हृद्यं संग्राहकं वातघ्नं कफघ्नं रुच्यं सर्व्वाङ्गशूलघ्नं कासघ्नं श्रमघ्नं सुखजनकं कान्तिप्रदं पुष्टिकरं चक्षुष्यञ्च। गव्यं नवनीतं—सर्व्वदोषघ्नम्। नवोद्धृतं—शीतलं रुच्यं मधुरं हृद्यं वातघ्नं कासघ्नं क्षतिहरं कफजनकं संग्राहि शूलघ्नं। दधिजं नवनीतं—बलपुष्टिकरं क्षयासघ्नापहरं चक्षुष्यं श्रमघ्नं तर्पणं पित्तघ्नञ्च। तथा—"एकाहाद्युषितं प्रोक्तमुत्तरोत्तरगन्धदम्। अहृद्यं सर्व्वरोगाढ्यं दधिजं तद् घृतं समभिति ॥" रा.नि.व.१५। माहिषं नवनीतं,—कषायं, मधुरं, शीतं, हृद्यं, बल्यं, ग्राहि, पित्तघ्नञ्च। छागं नवनीतं,—बल्यं, दीपनं, कफकासक्षयनेत्ररोगघ्नञ्च। आविकं नवनीतं, —हिमं, लघु, कफवातशमनं, गुद-योनि-शूलहरं। ऐड़कं नवनीतं,—क्लेदघ्नं, शीतलं, गुरु, दीपनं,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेधानाशि, पुष्टिकरं, मेदोवर्द्धकञ्च। हास्तिकं नवनीतं,—कषायं, शीतलं, लघु, तिक्तं, विष्टम्भि, कफपित्तक्रिमिनाशि च। अश्वीजं नवनीतं,—कटु-कषायं, उष्णं, चक्षुष्यं, कफवातघ्नञ्च। गार्द्दभं नवनीतं,—लघु, कषायं, बल्यं, दीपनं, कफवातघ्नं, मूत्रदोषनाशि च। औष्ट्रं नवनीतं,—शीतपाकि व्रण-क्रिमि-कफास्र-वात-नाशि च। मानुष्यं नवनीतं,—लघु, रुच्यं, दीपनं, चक्षुष्यं, सर्व्वामय-विषदोषहरञ्च। (नीतम्) कुन्दुरुखोटौ। भेष. ग्रह.चि. बृहज्जीरकाद्यमोदके।

नवनीतकम्। क्ली, पुं। गन्धके। आमला-सार गन्धक। र.सा.सं.।

नवनीतजम्। क्ली। घृते। रा.नि.व.१५।

नवनीताह्वयगन्धः। पुं। आमलासार वा लाउया गन्धक इति लोके ख्याते गन्धक भेदे। र.सा. सं. नेवाग्रनिरसे। [निघ.।

नवनीतोद्भवम्। क्ली। दधनि। घृते। वै.

नवपल्लवः। पुं। कोमलपल्लवे। भूरिप्र.।

नवफलिका। स्त्री। अचिरजातरजस्कायां स्त्रियि। मे.।

नवमल्लिका (ल्ली) (मालिका)। स्त्री। J. Zambac floribus muitiplicatis.) खनामख्याते पुष्पवृक्षविशेषे। सा ग्रीष्मोद्भवा। वासन्ती नेयाली सेउती नेवारी इति लोके। वासन्ती गाछ। सं रोमाली। कं विरवल्लिभेद। वम्मीगरा। तत्पर्य्यायः,—भद्रवर्म्मा, देवलता, गन्धनिलया, मालिका, ग्रीष्मभवा, अतिमोदा, ग्रीष्मी, ग्रैष्मी, ग्रीष्मोद्भवा, सहला, सुकुमारी, सुरभिः, रुचिमल्लिका, सुगन्धा, शिखरिणी, नवाली। गुणाः—अतिशीता सुरभिः सर्व्वरोगघ्नी च। रा.नि.व.१०।

नवयौवना। स्त्री। युवत्याम्। हारा.।

नवरत्नम्। क्ली। वज्र-मौक्तिक माणिक्य-नील-मरकत गोमेद-पद्मराग-वैदूर्य्य-प्रवालेषु नवमणिषु। प.मु.। तद्दैवतानि सूर्य्योदयः। तद्धारणविधिः—"वैदूर्य्यं धारयेत् सूर्य्ये नीलञ्च मृगलाञ्छने। आव-नेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे। गुरौ मुक्ता भृगौ वज्रं शनौ नीलं विदुर्बुधाः॥" दीपिका। तच्छुद्धिः—"विद्रुमं धारवर्गेण ताक्ष्यं गोदुग्धतस्तथा। पुष्परागञ्च सन्धानैः कुलत्थक्वाथसंयुतैः। तण्डुलीयजलैर्व्वज्रं नीलं नीलीरसेन वा। रोचना-भिश्च गोमेदं वैदूर्य्यं त्रिफलाजलैः॥" मारणं यथा—"लकुचचारसम्पिष्टैः शिलागन्धकतालकैः। वज्रं विनान्यरत्नानि म्रियन्तेऽष्टपुटैः खलु॥" र. चि.७अ.।

नवरत्नदेवता। वि। वज्रादिरत्नानामधिष्ठात्र-देवते। See नवरत्नम्। [१२।

नववल्लभम्। क्ली। दाहागुरुणि। रा.नि.व.

नवविधान्नम्। क्ली। सूपशाकव्यञ्जनसिष्टी-दनीपदंशदधितर्दिशस्तभानरीचनेषु। वै.निघ.।

नवशस्यम्। क्ली। नवीनधान्ये। वै.निघ.।

नवसागरम्। क्ली। वज्रचारे। वै.निघ.२भ. चय.चि.चयकेसरिरसे।

नवसारः। पुं। नरसारे। निशादल।

नवसू(ता)तिका। वि। नवप्रसूतायां। वा.उ. ३३.अ.।

नवाङ्गम्। क्ली। वातपित्तज्वरे विश्वादिनवद्रव्यज-कषाये। "विश्वामृताब्दभूनिम्बैः पञ्चमूलीसमन्वि-तैः। कृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम्॥" शुँट, गुलञ्च, मूता, चिरता, शालपाणि, चाकुलिया, बृहती, कण्टिकारी, गोक्षुर। सा.कौ.। अन्यत्—त्रिकटुत्रिफलाचित्रकमुस्त-विड़ङ्गकृतकषाये। च.द.ज्वर.ज्व.चि.।

नवाङ्गा। स्त्री। कर्कटशृङ्ग्याम्। काँकड़ाशृङ्गी।

नवान्नम्। क्ली। नूतनान्ने। See अन्नम्।

नवाम्बरम्। क्ली। नूतनवस्त्रे। अम.।

नवायसचूर्णम् (लौहम्)। क्ली। पाण्डु-रोगे। चूर्णनत्रिफलामुस्तविड़ङ्गचित्रकाः समाः। नवायोरजसो भागास्तच्चूर्णं मधुसर्पिषा। भक्षयेत् पाण्डुहृद्रोगकुष्ठार्शःकामलापहम्। शुँट, पिप्पुल, मरिच, त्रिफला, मूता, विड़ङ्ग, चितामूल, प्रत्येक १ तो. जारितलोह ९ तो. मात्रा १ मा.। सा.कौ.।

नवाली। स्त्री। नवमल्लिकायाम्।

नवोद्धृतम्। क्ली। सद्योजातनवनीते। अम.।

नश्यः। । रक्तपुनर्नवायाम्। रा.नि.व.५।

नशाकः। पुं। काकषट्शपचिविशेषे। वै.निघ.। काकभेदे। उणा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नश्यप्रसूतिका। स्त्री। मृतवत्कायाम्। हे.च.।
नष्टचेष्टता। स्त्री। मूर्च्छायाम्।
नस् (सा)। स्त्री। नासिकायाम्। नाड्याम्। त्रिका.।
नस्खलकः। पुं। सत्यजातिच्चरे। गजवै.।
नस्तः। पुं। नासिकायाम्। भा.म.४भ.शि.री.चि.। "सर्पिर्वा नस्ततस्त्रयोः।" क्ली। नस्ये। र. सा.।
नस्तकर्म्म। क्ली। प्रतिमर्षावपीड़नस्यप्रधमनशिरोविरेचनेषु पञ्चसु। "नावनञ्चावपीड़श्च धूम एव च। प्रतिमर्षश्च विज्ञेयं नस्तकर्म्म च पञ्चधा॥" ब्र.सिद्धिस्था.।
नस्तप्रच्छर्दनम्। क्ली। पञ्चशिरोविरेचनेषु। च.सू.१अ.।
नस्तो(स्यो)तः। पुं। सनासारज्जु-वृषे। नाकफोँड़ा बलद। श.टी.र.।
नस्यम्। क्ली। नासायाञ्चौषधे। नास, नस्य। नासयोर्न्यस्य आकृष्यते यत्। "नस्यं तत्कथ्यते धीरैः नासायाञ्च यदौषधम्॥" नस्यं रेचनस्नेहनभेदेन त्रिविधम्। तयो रेचनं कर्षणं, स्नेहनं बृंहणञ्च। तस्य कालः—"कफपित्तानिलध्वंसे पूर्व्वे मध्येऽपराह्णिके। दिनस्य गृह्यते नस्यं रात्रौ वातोत्कटे गदे॥" तच्च नस्यं प्रतिमर्षावपीड़नस्यप्रधमनशिरोविरेचनभेदेन पञ्चधा। ज्वरजत्वादिरोगे अरीचकादौ च वैरेचनिकं नस्यं हितम्। औरभ्रस्त्रीक्षुबालानां स्नेहननस्यं देयम्। बालरोगादौ अवपीड़नम् अत्युत्कटदोषादौ प्रधमनम्। स्नैहिकनस्यमानम् अष्टबिन्दवः। निषेधकालः—"नस्यं त्यजेज्जीजनान्ते दुर्दिने चावतर्पितः। तथा नवप्रतिश्यायी गर्भिणी गरदूषितः। अजीर्णी दत्तबस्तिश्च पीतस्नेहोदकासवः। क्रुद्धः शोकाभिभूतश्च तृषार्त्तो बृद्धबालकौ। वेगावधारी आन्तश्च स्नातुकामश्च वर्ज्जयेत्॥" अष्टवर्षात् पूर्व्वं अशीतेरूर्द्धं च न देयम्। भा.। स्त्री (स्या) नासिकायाम्।
नहुनो। स्त्री। वृक्षभेदे।
नहुषम्। क्ली। तगरपुष्पे। रा.नि.व.१०। पुं। सर्पे। वै.निघ.।
नहुषाख्यम्। क्ली। तगरपुष्पे। रा.नि.व.१०।
नक्षत्रम्। क्ली। अश्विन्यादिसप्तविंशतितारकासु। सु.सू.५अ.। मौक्तिके। रा.नि.व.१३।
नक्षत्रकान्तिविस्तारः। पुं। धवलयावनालाख्यशिम्बीधान्यभेदे। रा.नि.व.१६।
नक्षत्रमालिनी। स्त्री। जातीपुष्पवृक्षे। वै. निघ.।
नक्षत्रराजः। पुं। चन्द्रे। कर्पूरे। अम.। मुक्तौ। त्रिका.। खण्डे। हे.च.।
नाकनः। पुं। वंशवान्यविशेषे। प.मु.।
नाकुः। पुं। वल्मीकमृत्तिकायाम्। उईमाटी। भैष.आ.वा.चि.स्वेदे।
नाकुली। स्त्री। (Vanda roxburghii.) A variety of rásná. स्वनामख्यातमहाकन्दशाकविशेषे, रास्नाद्वये। रास्ना, गन्धरास्ना। प.मु.। नाकुली नाम्नि विषमुंगरीति च लोके। हिं चन्द्रा। तत्पर्य्यायः—सर्पगन्धा, सुगन्धा, रक्तपर्विका, ईश्वरी, नागगन्धा, अहिभुक्, सरसा, सर्पादनी, व्यालगन्धा। नाकुली द्विधा—नाकुली गन्धनाकुली च। गुणाः—नाकुलीयुगलं तिक्तं कटूष्णंत्रिदोषघ्नं नानाविषघ्नञ्च। द्वितीया तु किञ्चिच्छ्रेष्ठा। रा.नि. व.४। चर्च्ये। प.मु.। सरिचे। शाल्मलिवृक्षे। मे.।
नाकुलीद्वयम्। क्ली। गन्धरास्नायां रास्नायाञ्च। सि.यो.उन्मा.चि.ग्रहापस्मारोपेशाचग्रहे। "वयस्था नाकुलीद्वयम्।"
नाकुसङ्गा (न्)। पुं। सर्पे।
नागः। पुं, क्ली (गं)। शीघ्रगतौ। वत्सनाभे। कांटविष। नागकेशरवृक्षे। प.मु.। वङ्गे। उड़ुम्बर्य्यौ। नागबलायाम्। मेदायाम्। करिदन्ते। सुरके। सुरपुन्नागवृक्षे। रक्ताभके। मे.। हस्तिनि। नागवल्लीलतायाम्। अ.टी.भ.। सि.यो.समशर्करचर्ण। भैष.अ.पि.चि.पिप्पलीखण्डे। सर्पे। त्रिका.। बीजद्रुमे। असन वृक्ष। रा.नि.व.२३।
नागकन्दः। पुं। हस्तिकन्दाख्यमहाकन्दशाके। रा.नि.व.७। [हस्तिकर्णपलाशे।
नागकर्णः। पुं। रक्तैरण्डे। रा.नि.व.८।
नागकर्णी। स्त्री। आखुकर्णीलतायाम्। रा. नि.व ३। श्वेतापराजितायाम्। शु.चि.।
नागकिञ्जल्कम्। क्ली। नागकेशरपुष्पे। रा. नि.व.८।
नागकुमारिका (री)। स्त्री। गुड़ूच्याम्। रा.नि.व.३। मञ्जिष्ठायाम्। रा.नि.व.६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागकुसुमम्। क्ली। नागकेशरपुष्पे। वै.निघ. २भ.ज्व.चि.चन्दनबलातैले।

नागकृष्णा। स्त्री। गजपिप्पल्याम्। वै.निघ.।

नागकेशः(सरः)(कः)। पुं। (Mesuaferrea.) स्वनामख्यातपुष्पवृक्षे। नागेश्वर चाँपा फूलेर गाछ। हिं कावावचिनी। तें नागकेसरालु। ता. नागल। वम्.। नागचम्प। तत्पर्य्यायः,—चम्पेयः, केसरः, काञ्चनाह्वयः, सुवर्णाख्यः, भुजङ्गाख्यः, षट्पदप्रियः, द्रुमाख्यः, पुष्परेचनः, नागाख्यः, सुपर्णाख्यः, केशरः, नागकेशरः, केसरी, किञ्जल्कः, नागकिञ्जल्कः, नागेयः, काञ्चनं, सुवर्णं, हेमकिञ्जल्कः, रुक्मं, हेम, पिञ्जर, फणिकेसरः, पुन्नगकेसरः, कनकाह्वयम्। गुणाः—दीपनः पाचनः आमपाचनः अग्निमान्द्यकरश्च। तत्पुष्पं वस्तिवातघ्नं कण्ठशिरोरुजाघ्नञ्च। रा.नि.व.९। "नागपुष्पङ्गधायीषं रूक्षं लघ्वामपाचनम्। ज्वरकण्डूतृषास्रदोच्छर्द्दिश्लासनाशनम्। दौर्गन्ध्यक्रुष्ठवीसर्पकफपित्तविषापहम्॥" भा.। "कीटादिक्षत रहितमभिनवमिह केवलं ग्राह्यम्।" भैष.। क्ली। वज्रलौहे।

नागगन्धा। स्त्री। नाकुलीकन्दे। रा.नि.व.७। नागदमन्यां। नागदना। वै.निघ.।

नागगर्भम्। क्ली। सिन्दूरे। रा.नि.व.१३।

नागचम्पकः। पुं। वनचम्पकवृक्षे। नागेश्वर चाँपा, बुनो चाँपार गाछ। रा.नि.व.१०।

नागच्छत्रः(त्रा)। पुं, स्त्री। नागदन्त्याम्। रा.नि.व.५। (त्रा) नागवल्ल्याम्। वै.निघ.।

नागजम्। क्ली। सिन्दूरे। प.मु.। वङ्गे। हे.च.।

नागजम्बूः। स्त्री। भूमिजम्बूम्। भूँइजाम।

नागजिह्वा। स्त्री। अनन्तायां। अनन्तमूल। भैष वा.व्या.चि.। र.सा.। मनःशिलायाम्। रा. नि.व.१२।

नागजिह्विका। स्त्री। मनाशिलायां। प.मु.।

नागजीवनम्। क्ली। वङ्गे। हे.च.।

नागजीवनशत्रुः। पुं। हरितालै। वै.निघ.।

नागतुम्बी। स्त्री। तुम्ब्याम्। वै.निघ.।

नागदन्तः(कः)। पुं। हस्तिदन्ते। मे.।

नागदन्तिका(न्ती)। स्त्री। महाराष्ट्रकर्णाटयोः स्वनामख्यातमहाद्रुपे। हातिशुँड़े। तत्पर्य्यायः,—श्रीहस्तिनी, विशल्या, पर्ण्णपुष्पी, विषोषधी, शुक्लपुष्पा, द्रुमदन्ताह्वा, काण्डेरी, कामदूतिका, श्वेतपुष्पा, मधुपुष्पा, विशीर्षिनी, नागशोभा, विशालाक्षी, नागच्छत्रा, विषघ्नी, सर्पपुष्पी, शुभ्रपुष्पी, स्वादुका, शुण्डदन्तिका, सितपुष्पी, सर्पदन्ती, नागिनी। गुणाः—कटुः तिक्ता रूक्षा वातकफघ्नी विषघ्नी मेधाकरी पाचनी गुल्मशूलोदरघ्नी च। रा.नि.व.५। श्वयथुशूलदन्त्याम्। च.द.। भैष.ना.व्र.चि.। सु.चि.१७अ.। च.वि.८अ.। (का) वृश्चिकाख्यां। बिछाति। र.सा.।

नागदमनी। स्त्री। (Artemisia vulgaris. Syn. A. Indica.) Indian worm wood. स्वनामख्यातवृक्षे। नागदना। हि नागचुनी, नागदवन। तें दैवरिचिट्टु, दरगम। ता. माचिपत्री। वम्. दवणा। नेपाले तितापात। तत्पर्य्यायः,—जम्बुः, जाम्बवती, वृक्षा, रक्तपुष्पी, जाम्बरी, मलघ्नी, दुर्द्धर्षा, दुःसहा। गुणाः—"बलामीटा कटुतिक्ता लघुः पित्तकफापहा। सूतवल्लक्ष्मणान् रक्तो नागयेज्ञासहर्षभम्। सर्व्वग्रहप्रशमनी विशेषविषनाशिनी। जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा॥" भा.। विदीपत्री तीक्ष्णोषा कटु-तिक्ता उदरानाहघ्नी कीटघ्नीधनी च। रा. नि.व.५। बन्ध्याकर्कोटक्याम्। वै.निघ.।

नागदन्तम्। क्ली। नागदन्त्यां। नागदना। भैष.तप्तराजतैले। (स्त्री) पर्णे। पाण।

नागदन्तोपमः। पुं। पलाशवृक्षे। पलाशफल वा फलस गाछ। प.मु.।

नागदा। स्त्री। हरीतक्यां। र.सा.सं.स्वच्छन्दभैरवरसे।

नागदोना। स्त्री। नागदमन्याम्। नागदन्त्याम्।

नागद्रुः। पुं। वृक्षविशेषे। तेकाँटा सिजु गाछ। वम्. गैरचिकाड़ा। श.च.।

नागनामक्षम्। क्ली। सीसके। भा.।

नागनामा(न्)। पुं। श्वेततुलसीवृक्षे। कृष्णतुलसीवृक्षे। वै.निघ.।

नागपत्नी। स्त्री। लक्ष्मणाकन्दे। लक्ष्मणामूल। रा.नि.व.७।

नागपत्रम्। क्ली। ताम्बूलवल्ली। पान। वै. निघ.श्वास-चि.विकटुवटी। [लक्ष्मणाकन्दे।

नागपत्रा। स्त्री। नागदमन्याम्। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागपत्नी। स्त्री। नागदमन्याम्। वै.निघ.।
नागपत्री। स्त्री। लक्ष्मणाकन्दे।
नागपर्णी। स्त्री। नागबलीलतायाम्। वै.निघ.।
नागपर्य्यायकर्णी। स्त्री। श्वेतापराजितायाम्। रा.नि.व.३।
नागपुटभावना। स्त्री। पीड़शपत्रेण भावनायाम्। वै.निघ.।
नागपुरगम्। क्ली। सीसधातौ। रा.नि.व.१३।
नागपुराधश्छत्रम्। क्ली। गजपुरीषजाते छत्राके। वा.उ.३७अ.।
नागपुष्पः। पुं। पुन्नागवृक्षे। मे.। नागकेशरवृक्षे। प.मु.। नागकेसरपुष्पसमपुष्पे महातरौ। सु.सू.३८अ.एलादि.। क्ली। नागकेसरपुष्पे। च.द.र.पि चि.कामदेवघृते। सु.कल्प.५अ.। भा.फिरङ्गरोगे। च.चि.३अ.। नागचम्पके। मे.।
नागपुष्पकः। पुं। कपित्थवृक्षे। स्वर्णयूथिकायाम्। कृष्माण्डे। रा.नि.व.२३। पुन्नागवृक्षे। नागकेसरवृक्षे। वै.निघ.।
नागपुष्पफला। स्त्री। कृष्माण्डीलतायाम्। रा.नि.व.७।
नागपुष्पा। स्त्री। नागदमन्याम्। मनःशिलायाम्। वै.निघ.।
नागपुष्पिका। स्त्री। स्वर्णयूथिकायाम्। रा.नि.व.१०।
नागपुष्पी। स्त्री। नागदमन्याम्। भा.। स्वर्णयूथिकायाम्। रा.नि.व.१०। पुष्पवृक्षविशेषे। तत्पर्य्यायः,—श्वेतपुष्पा, नागिनी, रामदूतिका। गुणाः—"नागिनी रेचनी तिक्ता तीक्ष्णोष्णा कफपित्तनुत्। विनिहन्ति विषं शूलं योनिदोषवमिक्रिमीन्॥" भा.अर्क.चि.।
नागफणः। पुं। (Opuntia Dillenii. Syn. Cactus Indicus.) वृक्षविशेषे। फणिमनसा। तें ता. नागदलि।
नागफलः। पुं। पटोले। रा.नि.व.३। कटुपटोले। वै.निघ.।
नागफेनम्। क्ली। अहिफेने। वै.निघ.२भ. अ.सा.चि कुङ्कुमवटी।
नागवधूप्रियः। पुं। सल्लकीनिर्य्यासे। धूना। वै.निघ.।
नागबन्धुः। पुं। उदुम्बरवृक्षे। ग.चि.। अश्वत्थवृक्षे। ग.च.।
नागबलः। पुं। रक्तैरण्डवृक्षे। लाल भेरेण्डा।
नागबला। स्त्री। (Sida spinosa. Syn. Sida alba.) गोरक्षतण्डुलायाम्। गोरक्षचाकुलिया। हिं गुलशकरी ककड़ी। तत्पर्य्यायः—गाङ्गेरुकी, भसा, ह्रस्वगवेधुका, खरगन्धिनी, गोरक्षतण्डुला, भद्रौदनी, खरगन्धा, चतुःपत्राः महौदया, महापत्रा, महाशाखा, महाफला, विश्वदेवा, अनिष्टा, देवदण्डा, महागन्धा, घण्टा। च.द.यक्ष्म.चि.ग्रङ्गाद्यचूर्णे। च.चि.१अ.नागररसायने। सा.कौ.महाकामेश्वरमोदके। नागानामिव बलं यस्याः सा। सि.यो.यक्ष्म.चि. बलाद्यघृते। भा.मू.क्ष.चि.नागबलातैले। योगरत्न. उ.ख.। गुणाः—मधुराम्ला कषाया उष्णा गुरुः कण्डूकुष्ठवातव्रणपित्तघ्नी च। स्निग्धा आयुष्या ग्राहिणी हृष्या मूत्रकृच्छ्रौषचयरोगेषु हिता च। भा.। मधुराम्ला कषाया उष्णा गुरुः कण्डूकुष्ठवातव्रणपित्तघ्नी वाजीकरणी च। रा.नि.व.४।
नागबलातैलम्। क्ली। वातरक्ते तैलम्। तिलतैलं १६ प्र.। क्वाथार्थं—गोरक्षतण्डुलामूलं १२॥० प्र. वारि ६४ प्र. शे. १६ प्र. छागदुग्धं १६ प्र.। कल्कार्थं—तगरं यष्टिमधु प्र ५ प. वा २ प्र.। तुलाद्रव्ये जलद्रोणाः इति। प.प्र.। तिलतैल १६ श.। क्वाथार्थ—गोरक्षचाकुलिया १२॥० श. जल ६४ श. शे. १६ श. छागदुग्ध १६ श.। कल्कार्थ—तगरपादुका, यष्टिमधु प्रत्येक ५ प. वा २ श.। च.द.।
नागभूः। स्त्री। क्षुद्रपाषाणभेदायाम्। छोटे पाथरकुचा। रा.नि.व.५।
नागभृत्। पुं। डुण्डुभसर्पे। त्रिका.।
नागमती। स्त्री। कृष्णतुलस्याम्। वै.निघ.।
नागमल्लः। पुं। ऐरावत-हस्तिनि।
नागमाता। स्त्री। शारिवायाम्। वै.निघ.। मनःशिलायाम्। हे.च.। मनसादेव्याम्। ग.र.।
नागमारः। पुं। भृङ्गराजे, केशराजे। केऊते। त्रिका.। त्रि। हस्तिमारके।
नागरम्। क्ली। मुस्तायां। मे.। च.सू.२अ.। गुण्ठ्याम्। रा.नि.व.६। भा.। वा.सू.१५अ. वचादिव.। "नागरातिविषाभयाः।" वा.चि.अ.१

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुरालभादिः। शुण्ठ्याम्। हरीतक्याम्। च.द. सन्निपातज्व.चि.षड्ङ्गपानीये। च.सू.४अ.। पुं। नागरङ्गवृक्षे। भ.र.।

नागरकः। पुं। नागरङ्गवृक्षे। वै.निघ.।

नागरक्तम्। क्ली। सिन्दूरे। हे.च.।

नागरघनः। पुं। नागरमुस्तायाम्। नागरमूता। रा.नि.व.६।

नागरङ्गः। पुं। (Citrus aurantium.) Orange. जम्बीरविशेषे। कमला लेबू। हिं नाराङ्गी, संत्रा। मं नारङ्ग। तें गंजनिम्म, नारंजिचेट्टु। ता. किचिलिचेट्टु। उत्. नारिङ्गी। तत्पर्य्यायः,—नारङ्गः, ऐरावतः, नार्य्यङ्गः, नागरः, नागरुकः, किर्म्मिरः, किर्म्मीरिलक्, चक्राधिवासी। गुणाः—तत्फलम् अम्लम् अल्पोष्णं वातपित्तहरं सरञ्च। पक्वं स्वादम्लं हृद्यं दुर्जरं वातघ्नञ्च। मद.व.६। मधुरमम्लं गुरु उष्णं रोचनम् आमवातक्रिमिशूलघ्नं श्रमघ्नं बलकरं रुच्यञ्च। रा.नि.व.११। सुरभि पाके गुरु दुर्जरम् अत्यम्लं मधुरकल्पं हृद्यं वातघ्नञ्च। तत्कीश्वरं रुच्यं वातहरञ्च। राज.। वातघ्नं दुर्जरं गुरु च। सु.सू.४६अ.।

नागरमुस्तकम् (स्ता)। क्ली, स्त्री। (Cyperus pertenuis. Syn. Mariscus cyperus.) नागरदेशप्रसिद्धमुस्तायाम्। नागरमूता। हिं नागरमोथा। तें तुङ्गगड्डलविम्। ता. सुट्टकाच। दा. गरमोटा। तत्पर्य्यायः,—नागरोत्था, चक्राङ्गा, नादेयी, चूड़ाला, मुस्ता, शिशिरा, हृषभाङ्गी, कच्छरुहा, चारुकेशरा, उच्चटा, पूर्णकोषसंज्ञा, कलापिनी। गुणाः—तिक्ता कटुः कषाया शीतला कफघ्नी पित्तज्वरातिसारारुचिक्षयादाहघ्नी भ्रमघ्नी च। रा.नि.व.६।

नागरा। स्त्री। पानीयामलके। वै.निघ.। शुण्ठ्याम्।

नागरादिः। पुं। कषायभेदे। "नागरातिविषामुस्तभूनिम्बामृतवत्सकैः। सर्व्वज्वरहरः क्वाथः सर्व्वातीसारनाशनः॥" च.द.अ.सा.चि.। अन्यः—"नागरं देवकाष्ठञ्च धन्याकं हृतीद्वयम्।" च.द. सामान्यज्व. चि.। शुण्ठ्यादीनां प्रत्येकं रक्तिद्वयाधिकमाषकद्वयं चतुष्पलजलेन पक्त्वा पलमवशेषयेत्। सा.कौ.। अपरः—"नागरं सुरतरुञ्च धान्यकं कुण्डली हृहतिकायुगं निशि।" अत्रि.ज्व.चि.। नागरमुस्तायाम्। वै.निघ.।

नागरादिघनसंज्ञका। स्त्री। नागरमुस्तायाम्।

नागराह्वम्। क्ली। शुण्ठ्याम्। रा.नि.व.६।

नागरी। स्त्री। क्षुद्रीवृक्षे। मनसा गाछ। भ.च.। [वै.निघ.।

नागरीकन्या। स्त्री। बन्ध्याककर्कोटक्याम्।

नागरुकः। पुं। नागरङ्गवृक्षे। कमला लेबूर गाछ। भ.र.।

नागरूपप्रभम्। क्ली। हरितालै। वै.निघ.।

नागरेणुः (कः)। पुं। सिन्दूरे। रा.नि.व.१३। (कः) नागकेसरवृक्षे। वै.निघ.।

नागरोत्था। स्त्री। नागरमुस्तायाम्। "नागरोत्था कच्छरुहा।" रा.नि.व.६।

नागलता। स्त्री। अग्नौ। त्रिका.। नागवल्ल्याम्।

नागवल्लरी। स्त्री। नागवल्ल्याम्। भा.।

नागवल्लिका (ल्ली)। स्त्री। पत्रशाकविशेषे। नालिता गाछ। ताम्बूलीलतायाम्। पान गाछ। तत्पर्य्यायः,—नागवल्लिका, ताम्बूली, वर्णलता, सप्तशिरा, सप्तलता, फणिवल्ली, भुजगलता, भद्रपत्रा, पर्णवल्ली, ताम्बूलिः, दिवाभीष्टा, नागिनी, नागवल्लरी। गुणाः—कटूस्तीक्ष्णा तिक्ता पीनसवातघ्नी कफकासहरा रुच्या दाहकृद्दीपनी च। सा स्थानविशेषजातत्वात् बहुधा भिन्नगुणा। तत्र श्रीवाट्यम्लवाटी सातसी सदाशिराम्लसरादयः प्रसिद्धाः। तत्र अम्लसरा मालवे अगरापर्ण इति ख्याता, आन्ध्रे पोटुकुलिपर्ण हैसनीया च, घोरसमुद्रदेशे घोरसमुद्रदेशपर्ण इति प्रसिद्धा। श्रीवाटीगुणाः—मधुरा तीक्ष्णा रसाढ्या सरसा रुच्या च। अम्लवाटी—कटुकाम्लतीक्ष्णतिक्ता उष्णा विष्टम्भकरी वातघ्नी च। सातसी—मधुरा तीक्ष्णा कटुरुष्णा पाचनी रुच्या दीपनी च। सदाशिरा—अतिरसा सुगन्धिः रुच्या तीक्ष्णा मधुरा दीपनी पुंस्त्वकरी अतिबल्या विरेचनी मुखसौगन्ध्यकरी च। अम्लसरा—तीक्ष्णा मधुरा रुच्या हिमा दीपनी बल्या सुखामोदिनी गुल्माध्मानादिजित्। पटुलिका—कषाया उष्णा कटुः मलकर्षिणी पित्तहृत् वातघ्नी च। हैसनीया—कटुस्तीक्ष्णा हृद्या दीर्घपत्रा रुच्या दीपनी पाचनी च। ताम्बूलं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सद्यस्फोटितं सुखरीगादिजननं दाहारीचकरक्तदं मलकरं विष्टम्भि वान्तिजननम् । चिरबीटितं ताम्बूलदलं जलपीषितं गुणकरं रुच्यं बल्यञ्च । क्वाथं पर्णं तिक्तमणं कषायं दाहजनकं सुखजाड्यकर मलजननञ्च । शुभं पर्णं वातश्लेष्मरोगघ्नं रुच्यं पथ्यं दीपनं पाचनञ्च । शिरापर्णं रक्तदूषत् शैथिल्यजनकञ्च । रा.नि.व.११ । नागवल्लीफलं हृद्यं सुगन्धि कफवातजित् । अचि.१७अ. ।

नागवारिकः । पुं । मयूरे । करीन्द्रे । मे. ।

नागविन्ना । स्त्री । नागच्छायायाम् । नागदन्त्यां । वा.उ.६अ. ।

नागवीजम् । क्ली । शीसकतरसवेधकबीजविशेषे । यथा—"मालिकेन हतं ताम्रं नागञ्च रञ्जयेन्मुहुः । तं नागं वाहयेद्वीजे द्विगोड्रगुणानिह । बीजन्त्विदं वरं श्रेष्ठं नागबीजमुदीरितम् ॥" र.चि.३अ. ।

नागवीरकः । पुं । काकपक्षिणि ।

नागवल्ला (ल्लिका) । स्त्री । हस्तिकालीलुपे । प.मु. ।

नागशुण्डी । स्त्री । हस्तिशुण्ड्याम् । वै.निघ. । ताम्रालाब्वाम्, डङ्गरीफले । रा.नि.व.७ ।

नागश्रीवल्लभः । पुं । सल्लकीनिर्यासे । वै. निघ. ।

नागसत्त्वः । पुं । सीसशुल्बाम् । वै.निघ. ।

नागसम्भवम् । क्ली । सिन्दूरे । अम. ।

नागसिन्दूरम् । क्ली । सीसकृत-सिन्दूरे । तत्प्रकरणं यथा—"भुजङ्गसम्भवस्यञ्च पिष्ट्वा पत्रम्प्रलेपयेत् । तत्र संविद्धते नागे वासामार्गसमुद्भवम् । क्षारं वा मिश्रयेत्तत्र चतुर्थांशं गुरूक्तितः । प्रहरं पाचयेच्छ्लक्ष्णं वासादर्व्यावघट्टितं । तत उद्धृत्य तच्चूर्णं वासानीरैर्विमर्द्दयेत् । पुटेत् पुनः समुद्धृत्य तेनैव परिमर्द्दयेत् । एवं सप्तपुटैर्नागः सिन्दूरं जायते ध्रुवम् । तारस्य रञ्जनो नागः वातपित्तकफापहः । ग्रहणीकुष्ठगुल्मार्शःश्लीपदव्रणविषापहः ॥" रस.चि.६अ. । [अ.टी.भ.खा. ।

नागसुगन्धा । स्त्री । राज्ञायान्, सर्पगन्धायां ।

नागस्तोकम् । क्ली । वत्सनाभाख्यविषे । मिठा विष ।

नागस्फोता । स्त्री । दन्तीवृक्षे । रा.नि.व.६ । नागदन्तीवृक्षे । रा.नि.व.५ ।

नागहनुः । पुं । नखीनामगन्धद्रव्य । रा.नि.व.१२ ।

नागहन्त्री । स्त्री । बन्ध्याकर्कोटक्याम् । रा. नि.व.७ । हिं झाँझ काँकरोल ।

नागा । स्त्री । नाकुल्याम् । पुत्रदात्र्याम् । लाङ्गलीवृक्षे । वै.निघ. । [२स्थान.२अ. ।

नागाख्यः । पुं । नागकेसरे । विका. । अचि.

नागाङ्गना । स्त्री । हस्तिन्याम् ।

नागान्तकः । पुं । मयूरे । गरुडे । अम. ।

नागारातिः । पुं । बन्ध्याकर्कोटिकायाम् । रा.नि.व.७ ।

नागारिः । पुं । देवदालीलतायाम् । वै.निघ. । बन्ध्याकर्कोटक्याम् । रा.नि.व.३ ।

नागार्जुनयोगः । पुं । अर्शःप्रभृतिरोगेषु योगविशेषे । विफला पञ्चलवणं कुष्ठं कटुकी देवदारु विड्ङं निम्बफलं बला गोरक्षतण्डुला हरिद्रा दारुहरिद्रा सौवर्च्चललवणं प्र. समम् । करञ्जत्वग्रसेन पिष्ट्वा बदराक्षिप्रमाणा गुडी कार्य्या । उष्णजलेनाग्नेयः तक्रेणार्शः काञ्जिकेन गुल्मं खदिरजलेन त्वग्रोगं जलेन मूत्रकृच्छ्रं तैलेन वृद्धीगं निर्गुण्ड्या सर्व्वज्वरञ्च हन्ति । त्रिफला, पञ्चलवण, कुड़, कटुकी, देवदारु, विड़ङ्ग, निमफल, बेड़ेला, गोरक्षचाकुलि, हरिद्रा, दारुहरिद्रा, सचललवण, प्रत्येक समभाग । करञ्जछालेर रस सह मर्द्दन । कुलप्रमाण गुली हइबे । च.द. ।

नागार्जुनवटिका । स्त्री । नेत्ररोगे हिता । "त्रिफलाव्योषसिन्धूत्थयष्टीतुत्थरसाञ्जनं । प्रपौण्डरीकं जन्तुघ्नं लोध्रं ताम्रं चतुर्दश । द्रव्याण्येतानि संचुण्य वर्त्तिः कार्य्या नताम्बुना ॥" रस.र. । नताम्बु तगरवारि ।

नागार्जुनाभ्रम् । क्ली । वृद्धीगे औषधम् । "सहस्रपुटनैः शुद्धं वज्राभ्रमर्जुनत्वचः । सर्व्वविमर्दितं सप्तदिनं खल्वे विशोषितं । क्वाथाशुष्का वटी कार्य्या नाम्नेदमर्জ্জুনাह्वयम् ॥" रसा.स. ।

नागार्जुनी । स्त्री । दुग्धिकायाम् । खिरुई । वै.निघ. । [व.७ ।

नागालावुः । स्त्री, क्ली । कुष्माण्डभेदयां रा.नि. ।

नागाह्वः । पुं । वनचम्पकवृक्षे । रा.नि.व.१० ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्ली। नागकेसरपुष्पे। वा.सू.१५अ.अञ्जनादिः। "सैलामधुकनागाह्वम्।" सि.यो.बाहुशालगुड़े। "नागाह्वश्चापि षट्पलम्।" च.द.मू.क्व.चि.।

नागाह्वयम्। क्ली। नागकेशरपुष्पे। वा.सू. १५अ.एलादिः। "पुन्नागनागाह्वयम्।"

नागाह्वा। स्त्री। लक्षणाकन्दे। रा.नि.व.७। नागवल्लीलतायाम्। नागदमन्याम् वै.निघ.।

नागिनी। स्त्री। नागदन्तीवृक्षे। रा.नि.व.६। लक्षणाकन्दे। रा.नि.व.७। नागवल्ल्याम्। नागपुष्पीवृक्षे।

नागी। स्त्री। बन्ध्याकर्कोटक्याम्। वै.निघ.२भ. जीर्णज्व.चि.कल्याणघृते।

नागेयः। पुं। नागकेशरे। रा.नि.व.६।

नागेश्वररसः। पुं। गुल्मे रसः। पारदः गन्धकः शीषः रङ्गं मनःशिला तृसारदः यवक्षारः सर्জ্জिक्षारः टङ्कणं लौहं ताम्रम् अभ्रं प्र. समम्। वज्रीचौरेण मर्द्दनं। पश्चात् वासाचित्रकदन्तीमूलक्वाथेन दिवसं मर्द्दयेत्। मात्रा माषप्रमाणा। पारा, गन्धक, सीसा, वङ्ग, मनछाल, निशादल, यवक्षार, साज्जिक्षार, सोहागा, लोह, ताम्र, अभ्र, प्रत्येक समभाग। सिजुर आठाय मर्द्दन। परे वासक, चिता ও দন্তীর মূল সমভাগ লইয়া একত্র क्वाथ করিয়া, সেই क्वाथ সহ এক দিন মর্দ্দন করিবে। মাত্রা মাষকলায়ের মত। भैष.।

नागोद(र)म्। क्ली। गर्भजरोगविशेषे। "शुक्रशोणितं वायुनाभिप्रपन्नम् अवक्रान्तजीवसाभापयत्युदरम्, तत्कदाचिद्यदृच्छयोपशान्तं नैगमेषापहृतमिति भासन्ते। तमेव कदाचित् प्रलोयमानं नागोदरमित्याहुः।" सु.शा.१०अ.।

नागोद्भवम्। क्ली। कृष्णसर्पविषे।

नाङ्गुरः। पुं। सारसपक्षिणि।

नाचिकेतः (तुः)। पुं। अग्नौ। [विका.।

नाटाम्रः। पुं। कालिङ्गकलतायाम्। तरमूज।

नाड़ः। पुं। नले। नल गाछ। रा.नि.व.८। नाड़ीवल्लतायाम्। च.सू.१अ.।

नाड़िः। स्त्री। शरीरान्तर्नाड़िकायाम्। अ.टी. भ.। सिंहपिप्पल्याम्। कालशाके। दूर्व्वाभेदे। नाड़ीव्रणे। नानि घां। वै.निघ.।

नाड़िकम्। क्ली। कालशाके। कासन्दा शाक। भा.पू.१भ.शा.व.।

नाड़िका। स्त्री। कालशाके। घटपरिमाणे। वै.निघ।

नाड़िकायन्त्रम्। क्ली। यन्त्रविशेषे। वक्रयन्त्र, ভাটীযন্ত্র। तस्य लक्षणं यथा—"विनिधाय घटे द्रव्यं कनीयांसमधीसुखं। घटमन्यं सुखे तस्य स्थापयित्वीभयीर्मुखम्। मृदुसन्धिः समालिप्य नाड़िकां विनिवेशयेत्। यन्त्रात् कुण्डलिताङ्गित्वा जलद्रोणीं महोत्तमां। आधारभाण्डपर्य्यन्तं ततयुक्त्वा विधारयेत्। अधस्ताज्ज्वालयेद्वह्निं यावद्वाष्पो विशेदधः। गृह्णीयादाधारगतं निर्म्मलं रससुत्तमम्। नाड़िकायन्त्रमेतद्धि मुनिभिः परिकीर्त्तितम्॥" इति। अग्नि.।

नाड़िकेरः (लः)। पुं। नालिकेरवृक्षे। अ. टी.भ.।

नाड़िचोरम्। क्ली। निर्वेष्टने। नली। हारा.।

नाड़िन्धमः। पुं। स्वर्णकारे। विका.।

नाड़िपत्रम्। क्ली। नाड़ीचशाके। श.मा.।

नाड़ी। स्त्री। शिरायाम्। रा.नि.व.१८। नासायाम्। नचले। रा.नि.व.२३। नाले। गण्डदूर्व्वायां। मे.। नाड़ीव्रणे। रा.नि.व.२०। ६० पलात्मककाले।

नाड़ीकः। पुं। पट्टशाके। पाटशाक। कोष्टीर शाक। हिं पटुया। भा.पू.१भ.शा.व.। तत्पत्रं तिक्तमधुरभेदेन द्विविधं, तयोस्तिक्तं क्रिमिकुष्ठहरं; मधुरं पित्तिलं शीतं विष्टम्भि कफवातकृच्च। शुष्कपत्रं—नलितमित्युच्यते। नालिता। ज्वरघ्नं पित्तकफज्वरघ्नञ्च। तज्जलञ्च पित्तघ्नं रोचनं व्यञ्जने हितञ्च। राज. क्ली। कालशाके। हिं कालशाक। तत्पर्य्यायः,—नाड़िकं, कालशाकं, शाकशाकं, कालकम्। गुणाः—"कालशाकं सरं रूक्षं वातकृत्कफशोथहृत्। बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमम्॥" भा.।

नाड़ीकलापकः। पुं। सर्पाख्यायाम्। भा.।

नाड़ीकल्पनविधिः। पुं। भूमिष्ठस्य नाड़ीच्छेदनविधौ। "नाभिबन्धनात् प्रभृति हि त्वष्टाङ्गुलमभिज्ञानं कृत्वा छेदनावकाशस्य द्वयोरन्तरयोः शलेरटौ कृत्वा तीक्ष्णेन रौप्यराजतायसानां छेदनानामन्यतमेन ऊर्द्धधारेण छेदयेत्। तामग्रे सूत्रे-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णीपनिबध्य कण्ठे चास्य शिथिलमवसृजेत्। तस्य चेन्नाभिः पच्यतां लौध्रमधुकप्रियङ्गुदारुहरिद्रा-कल्कसिद्धेन तैलेनाभ्यञ्जयात् एतामेव तैलौषधानां चूर्णेनावचूर्णयेदिति।" च.शा.८अ.।

नाड़ केरः (लः)। पुं। नारिकेलवृक्षे। श.र.।

नाड़ीचः। पुं। तिक्तपट्शाके। नालिता। भाता। "नाड़ीचवेजकक्कः।" भैष.चतुर्थी.चि.। पेचुके। रत्नमा.। तत्पर्य्यायाः—केवुकं, पेचुली, पेचुः, विश्वरीचनः। See नाड़ीकः।

नाड़ीचक्रम्। क्ली। नाड़ीनिर्णायकग्रन्थे।

नाड़ीचरणः। पुं। पक्षिणि। त्रिका.।

नाड़ीचवीजम्। क्ली। नालितावीजे। भैष. पृथ्वीसारतैले।

नाड़ीजङ्घः। पुं। काके। त्रिका.। वके।

नाड़ीतरङ्गः। पुं। काकोलवृक्षे। मे.।

नाड़ीतिक्तः। पुं। नेपालनिम्बे। त्रिरत्ना। रा.नि.व.९।

नाड़ीनक्षत्रम्। क्ली। जन्मनक्षत्रे। वै.निघ.।

नाड़ीनिदानम्। क्ली। नाड़ीज्ञानसंग्रहभेदे।

नाड़ीपरिक्षा। स्त्री। शङ्करसेनकृतनाड़ी-ज्ञानशास्त्रे, नाड़ीप्रकाशे।

नाड़ीयन्त्रम्। क्ली। तन्नामकविंशतिविधयन्त्रेषु। यथा—एकच्छिद्रभेदेन भगन्दरयन्त्रे द्वे। अर्शोयन्त्रे अपि द्वे। व्रणयन्त्रमेकं। वस्तिनेत्रयन्त्रं चत्वारि। उत्तरवस्तिनेत्रं द्विविधं। मूत्रकृच्छ्रयन्त्रमेकं। दकोदरयन्त्रमेकं। धूमनेत्राणि त्रीणि वैरेचनिक-स्नेहिकप्रायोगिकभेदेन। निरुद्धप्रकाशमेकं। सन्निरुद्धगुदयन्त्रमेकं। अलाबूयन्त्रमेकं। अर्श-यन्त्रमेकम् इति। तानि चानेकप्रकाराणि अनेक-प्रयोजनानि, एकतोमुखानि, उभयतोमुखानि. स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थम् आचूषणार्थं क्रियासौकर्य्यार्थञ्चेति। तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च। सु. सू. १अ.। "यन्त्रे नाड़ी वृणाभ्यन्तःचलनाय षड़ङ्गुला। वस्तियन्त्राकृतिर्मूलमुखेऽङ्गुष्ठकलायखे। अग्रतः कर्णिके मूले निबद्धमृदुचर्मणि।" अग्नि.।

नाड़ीव्रणः। पुं। तन्नामकरोगे। नाड़ीघा। तस्य निदानं यथा— यः शीतमामसंतिपक्वमुपे-क्षतेऽज्ञो यो वा व्रणं प्रचुरपूयमसाधुवृत्तः। अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य स्थानानि पूर्व्वविहितानि ततः स पूयः। तस्यातिमात्रगमनाद्गति-रिष्यते तु नाडीव यतश्छिद्यति तेन मता तु नाड़ी।" मा.नि.। "दोषैस्त्वभिर्भवति सा पृथगेकशस्य सं-मूर्च्छितैरपि च शल्यनिमित्तसंज्ञा।" सु.नि.१०अ.। अभिहतात् पक्वशल्यफलस्य वृणे चापथ्यसेविनः। अनु प्रविश्य मांसानि दूरं पूयोऽभिधावति। गतिः सा दूरगमनात् नाड़ी नाड़ीव संस्मृतेः। नाड्येकान्नृजुरन्येषां सेवानेकगतिर्मतेः। सा दोषैः पृथगेकैः शल्यहेतुश्च पञ्चमी। वाता सरुक्सूक्ष्ममुखी विवर्णा फेणिलोष्णा। खलत्यभ्यधिकं रात्रौ पित्तात्तृड्ज्वरदाहकृत्। पीतोष्णपूतिपूयास्यं दिवा चातिनिषेवते। घनपिच्छिलसंस्रावा कण्डूला कठिना कफात्। निम्नि चाभ्यधिकक्लेदा सर्वैः सर्व्वाकृतिं त्यजेत्॥' वा.उ.२९अ.।

नाड़ीशाकः। पुं, क्ली (कम्)। पट्शाके। पाटशाक। नालिता। गुणाः—"कोठकृमि-विनाशनम्। मधुरं पिच्छिलं शीतं विष्टम्भि कफवर्द्धनम्। तच्छुष्कं जलदोषघ्नमग्निवातश्लेष्मामवातकृत्॥" राज.३प.कुष्माण्डादौ।

नाड़ीस्वेदः। पुं। स्वेदविशेषे। वा.उ.२८अ.। 'स्वेदनद्रव्याणां पुनर्मूलफलपत्रशङ्खादीनां स्वग-शकुनिपिशितशिरःपादानामुष्णस्वभावानां यथार्हम् अम्ललवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भीवाष्पमतिमात्रमल्पामुत्क्वथितानां नाड्या शरीरा-वयवशरीरकोष्ठावस्थातमतया गजाग्रहस्त-संस्थानया व्यामदीर्घया वा व्यामचतुर्भागाष्टभाग-मूलाग्रपरिणाहस्रोतसा सर्व्वतो वातहरपत्रसंवृत-च्छिद्रया द्विस्त्रिर्वा विनमितया वातहरस्निग्धस्वेद्य-शरीरस्य वाष्पमुपहरेत्। वाष्पो ह्यन्तर्नुगामी विवृतश्च वेगस्त्वचमविदहन् सुखं स्वेदयतीति नाड़ीस्वेदः।" च.सू.१४अ.।

नाड़ीहिङ्गुः। पुं, स्त्री। हिङ्गुभेदे। हिङ्गु-विशेष। हिं कलःपतिहिङ्गु। मं नाड़ीहिङ्गु। कं कलहति। तत्पर्य्यायः,—पलाशाख्यं, जन्तुका, रामठो वंशपत्री, पिण्डाह्वा, सुवीर्य्या, हिङ्गु-नाड़िका। गुणाः—कटुत्वं कफवातशान्तिकृत् विबन्धघ्नः आनाहघ्नश्च। रा.नि.ध.६। हिङ्गुपत्र्यां। प.मु.।

नाथचरिः। पुं। पक्षी। व्याक.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नादेयः। पुं। जलवेतसे। मद.व.५। कासल्हणे। रा.नि.व.८। तज्जातीयानूपरोहितपाठीनादिमीनवर्गे। तन्मांसगुणाः—मधुरं गुरु वातघ्नमुष्णं रक्तपित्तकरं हृद्यं स्निग्धञ्च। क्ली। सौवर्चललवणे। रा.नि.व.६। सामुद्रलवणे। काशग्रहणे। रा.नि.व.२३। सैन्धवलवणे। र.मा.। कृष्णाञ्जने। नदीजलादौ। भा.। "नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम्।"

नादेयिका (यी)। स्त्री। नागरमुस्तायाम्। रा.नि.व.६। नागरिकायाम्। भा.। भूमिजम्बुं। रा.मा.। नागरङ्गवृक्षे। जयन्त्याम्। प.मु.। जलवेतसे। काशग्रहणे। वाराहीकन्दे। बङ्गुले। रा.नि.व.२३। भूम्यामलक्याम्। एरण्डवृक्षे। वै.निघ.।

नानाकन्दः। पुं। पिण्डालौ। रा.नि.व.७।

नान्दीमुखी। स्त्री। कुधान्यभेदे। यव। सा स्निग्धा। सु.सू.४६अ.। "नान्दीमुखी मधूली च मधुरा स्निग्धशीतला।" च.र.।

नापाकम्। क्ली। पद्मबीजे। वै.निघ.।

नापितशाला। (लिका)। स्त्री। नापितभवने। त्रिका.।

नाभः। पुं, क्ली। स्निग्धे।

नाभकः। पुं। हरीतकीवृक्षे। वै.निघ.।

नाभिः। पुं, स्त्री। उदरावर्त्ते। नाई। रा.नि.व.१८। तत्पर्य्यायः,—नाभी, तुन्दकूपी, तुन्दकूपिका, तुन्दिः, तुन्दिका, तुन्दी, तुण्डिः, उदरावर्त्तः। सा च गर्भस्थस्य सप्तभिर्मासे भवति। तन्नामक-मर्म्मस्थाने। सु.शा.६अ.। स्त्री। कस्तूरिकामदे। मे.।

नाभिकण्टकः। पुं। नाभिरोगे। गोंड़।

नाभिका। स्त्री। कृष्णकटभीवृक्षे। रा.नि.व.९।

नाभिगुड़कः। पुं। नाभौ गुड़कवद्ग्रन्थौ। नाईयेर गोंड़। त्रिका.।

नाभिगोलकः। पुं। नाभिगुड़के। जटा.।

नाभिच्छेदनम्। क्ली। नाड़िकाच्छेदने। च.।

नाभिनाड़ी। स्त्री। अमलामलनाभिनाड्यां। नाभिनाड़ी। च.।

नाभिपाकः। पुं। नाभिग्रीथे। नाई पाका।

नाभिलाषः। पुं। अनिच्छायाम्। वै.निघ.।

नाभिशङ्खः। पुं। स्वनामख्यात-मणिगुद्रव्ये।

नाभी। स्त्री। नाभौ। श.र.। कस्तूर्य्याम्। मदिरायाम्।

नाभीलम्। क्ली। स्त्रीकटिसन्धौ। नाभिगुड़के। मे। पीड़ायाम्। नाभिकूपे। हे.च। कण्डूस्नायौ। वै.निघ.।

नाभ्यभ्यङ्गः। पुं। नाभौ तैलमर्दने। [फले।

नामशुण्ठी। स्त्री। डल्लरीति स्वनामप्रसिद्धे

नायिका। स्त्री। पिण्डिकातः किञ्चिन्न्यूने कस्तूरीभेदे। मृगनाभिविशेष। यथा—"चूर्णाक्तेषु खरिका तिलाभा कीलत्यबीजसदृशी च कुलत्थिकाख्या। स्थूला ततः क्षियदिह किल पिण्डिका स्यात् तस्याश्च किञ्चिदधिकापि च नायिकैषा॥" रा.नि.व.१२।

नारः। पुं। गोवत्से। जले। मे.। षष्ठ्यां।

नारकीटः। पुं। अश्मकीटविशेषे। मे.।

नारकेरः। पुं। नारिकेलवृक्षे। जटा.।

नारङ्गम्। क्ली। गर्जरमूलके। गाजरमूला। रा.नि.व.७।

नारङ्गः। पुं। नागरङ्गवृक्षे। कमला लेबुर गाछ। तत्पर्य्यायः,—सुखप्रियः, नागरङ्गः, सुरङ्गः, त्वग्गन्धः, सुरावतः, वस्त्रवासः, योगरङ्गः, सुरङ्गः, गन्धाढ्यः, गन्धपत्रः, वरिष्ठः। फलगुणाः—मधुराम्लं गुरु उष्णं रोचनं वातासृक्कृमिशूलश्रमम्लं बल्यं रुच्यञ्च। रा.नि.व.११। मद.व.६। "नारङ्गजं स्वादुगुणोपपन्नं सन्दीपनं रोचकमर्शसाञ्च। चिदोषहृत् शूलकृमीन्निहन्ति मन्दाग्निकासश्वसनापहारि॥" अवि.१७.अ। मरिचयूषे। पिप्पलीसे। मे।

नारङ्गवर्णकम्। क्ली। रङ्गभे। शीलरस। भा.पू.१भ.शा.व.।

नारदा। स्त्री। इक्षुमूले। मूर्व्वायां। वै.निघ.।

नारा। स्त्री। जले। श.र.।

नाराचचूर्णम्। क्ली। उदावर्त्ताधिकारि चूर्णम्। पाठः—"तुल्यकृष्णाहरीतक्यो द्विचतुःपञ्चभागिकाः। गुड़िका गुड़तुल्या सा विड्विबन्धगदापहा॥" तेउड़ी २ तो. पिप्पुल ४ तो हरीतकी ५ तो. सर्व्वसम गुड़। अन्यत्—विल्वमूर्व्व पिप्पलीचूर्ण प्र, २ ती. शर्करा १ प.। तीक्ष्णकल्पेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुना लिह्यात्। एसङ्गाढ़पुरीष पित्तकफ देयम्। डेउड़ीचूर्ण, पिप्पलीचूर्ण प्रत्येक २तो. चिनि १प.। २ तो मधुर सहित सेव्य। वा.की.।

नाराचिका (ची)। स्त्री। स्वर्णतोलनयन्त्रे। निक्ति। श.र.।

नारायणः। पुं। वैद्यवन्दनामधेयकग्रन्थकारे, वैद्यान्तकारे।

नारायणतैलम्। क्ली। वातव्याधौ तैलविशेषे। पाठः—"विल्वीऽग्निमन्थः श्योनाकः पाटला पारिभद्रकः। प्रसारणश्वगन्धा च वृश्चिकी कण्टकारिका। बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा। एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्। पादशेषं परिस्राव्य तैलप्रावं प्रदापयेत्। शतपुष्पा देवदारु मांसी शैलेयकं वचा। चन्दनं तगरं कुष्ठं एला पर्णिचतुष्टयं। राम्ना तुरगगन्धा च सैन्धव सपुनर्नवं। एषां द्विपलिकान् भागान् पेषयित्वा विनिक्षिपेत्। शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत्। आजं वा यदि वा गव्यं क्षीरं दद्याच्चतुर्गुणम्।" वृत्ति स्वल्पम्। शीते गन्धद्रव्यं देयम्। बेल, गणियारी, श्योणा, पाकुल, निमछाल, गन्धभाद्दुलिया, अश्वगन्धा, बृहती, कण्टिकारी, खेड़ेला, श्वेत बेड़ेला वा (गोरक्षचाकुलिया), गोक्षुर, पुनर्नवा प्रत्येक १० प.। क्वाथार्थ—जल २५६श. शे. ६४ श. तिलतैल १० श.। कल्कार्थ—शुक्लका, देवदारु, जटामांसी, शैलज, वच, रक्तचन्दन, तगरपाद्दुका, कूड़, एलाइच, शालपाणी, चाकुले, मुगानी, माषानी, रास्ना, अश्वगन्धा, सैन्धव, श्वेतपुनर्नवा प्रत्येक २ प. शतमूलीरस १६ श छाग वा गवा दुग्ध ६४ श.। शीतल हइले गन्धद्रव्य दिबे। रस.र.।

नारायणप्रियम्। क्ली। पीतचन्दने। मद.।

नारायणी। स्त्री। शतमूल्याम्। रा.नि.व. ४। सा.की.लक्ष्मीविलासे। भैष.।

नारिकेरः (लः)। पुं। Cocos nucifera.) The cocoanut tree. स्वनामख्यातवृक्षे। नारिकेल गाछ। श.र.। प.मु। हिं नेरियल्। मं कं नारियल। तें नारिकदम। गुज. नडिया। बम्, नारली। ता. टेङ्गा, टेङ्का। तत्पर्य्यायः,—लाङ्गली, नारिकेरः, नारिकैरिः, नालिकेलः, नारीकेली, नारीकारी, नारिकैलिः, सदापुष्पः, श्रिफलः, सदुफलः, पुटीदकः, नालिकेरः, रसफलः, सुतुङ्गः, कूर्चशेखरः, दृढ़ीरः, नीलतरुः, मधुस्रवः, उच्चतरुः, नृपराजः, स्कन्धतरुः, दाक्षिणात्यः, दुरारुहः, ग्रन्थिफलः, दृढ़फलः, श्रिफलः, करकाम्भाः पयोधरः, तुङ्गकुचः, कौशिकफलः, फलमुण्डः, चटाफलः, सुफलः, विश्वामित्रप्रियः, नाड़ीकेलं, नारकेलः, सुभद्रः, फलकेशरः वरफलः। तस्य गुणाः—गुरुः स्निग्धः शीतलः पित्तघ्नश्च। अर्द्धपक्वफल तृष्णाशोषघ्नं दुर्जरञ्च। तद्बालसलिलं लघु बल्यं शीतलं रसपाके मधुरं पित्तशमनं पीनसशमनं तृष्णघ्नं दाहघ्नं शोषशमनं सुखदञ्च। तत्पक्वजलं किञ्चित्पित्तकारि मधुरं रुचिकरं दीपनं बलकरं गुरु हृद्यं बलवर्द्धनञ्च। नारिकेलखर्जूर स्निग्ध गुरु दुर्जरं दाहविष्टम्भकरं रुच्यं बलवीर्य्यवर्द्धनञ्च। रा.नि.व.११। "दुग्धन्तु नारिकेलस्य बल्यं रुच्यं गुरु स्मृतम्। पाके स्वादु समुद्दिष्टं स्निग्धं हृद्यञ्च दाहकम्। किञ्चिदुष्णं वातकफगुल्मकासविनाशकम्॥ नारिकेलघृतं नाम हृद्यं बलवर्द्धनम्। कैश्यं रसे च पाके च मधुरञ्च रुचिप्रदम्। हृद्यञ्च वातपित्तघ्नं तज्जीर्णं गुरु वातहृत्॥ नारिकेलस्य पुष्पन्तु शीतं रक्तातिसारहृत्। रक्तपित्तप्रमेहञ्च सोमरोगञ्च नाशयेत्। मलस्तम्भकरञ्चापि प्रीतिम्... ...॥ नारिकेलशिरोमज्जा रसे पाके मधुः स्मृता। नारिकेलपुष्पजलं गुरु हृद्यम्प्रकीर्त्तितम्॥" वै निघ। "बालस्य नारिकेलस्य जलम्प्रायो विरेचनम्।" राज.। "स्निग्धं स्वादु हिमं हृद्यं दीपन वस्तिशोधनम्। हृद्यं पित्तपिपासाघ्नं नारिकेलोदकं गुरु॥" सु.। तन्मस्तकगुणाः—"नारिकेलस्य तालस्य खर्जूरस्य शिरांसि तु। कषायस्निग्धमधुरहृद्यानि गुरुणि च॥ नारिकेलफलं शीतं दुर्जरं वस्तिशोधनम्। विष्टम्भि हृद्यबल्यं वातपित्तास्रदाहनुत्। विशेषतः कोमलनारिकेलं निहन्ति पित्तज्वरमूर्द्धदोषान्। तदेव जीर्णं गुरु पित्तकारि विदाहि विष्टम्भि मलं भिषग्भिः॥ तस्याण्डं (तदङ्कुरः) शीतलं हृद्यं दीपनं शुक्रलं लघु। पिपासापित्तजित् स्वादु वस्तिशुद्धिकरम्परम्॥" भा.। तस्य तैलं गुरु बाजीकरं क्षीणधातुपीवरं वातपित्तघ्नं मूत्राघातप्रमेहश्वासकासक्षयेषु हितं मेधाकरं तन्नाम्नश्च।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारिकेलं सुमधुरं गरु स्निग्धञ्च शीतलम्। हृद्यं संग्रहणं बल्यमोधनं रक्तपित्तनुत्॥ विष्टम्भि पक्व मतिसन्नपक्वं कफवातलम्। हृद्यं शीतलं हृद्यं नारिकेलफलं विदुः॥" अवि. १७ अ.।

नारिकेरचोरिका। स्त्री। नारिकेलचोरी-नाम मिष्टान्नभेदे।

नारिकेलखण्डम्। क्ली। शूलाधिकारे औषधम्। पाठः—"कुडवमितमिह स्यान्नारिकेलं सुपिष्टं पलपरिमितसर्पिःपाचितं खण्डतुल्यम्। निजपयसि तदेतत् प्रस्थमात्रे विपक्वं गुडदधि सुशीते शाणभागान् क्षिपेच्च। धान्या त्रिपलिपयोष्ट-तुगाद्रिजीरान् शाणं विजातकत्वयापि च केसरञ्च। हन्त्यम्लपित्तमरुचिं वमिसन्नपित्त शूल वमि सकलपैत्तरोगकारि हारि।" सुपिष्टनारिकेलगव्य ४ प. भर्ज्जनार्थघृतं १ प शर्करा ४ प. नारिकेल-जलं ४ श.। पाकसिद्धौ प्रक्षेपः— धन्याकं पिप्पली मुस्ता वंशरोचनी जीरकं कृष्णजीरकं गुडत्वक् तेजपत्रम् एला नागकेशरपुष्पम् एतां प्र. चूर्णं ४ मा.। इदं पित्तशूले। सा को.। रसर.। भैष.। अन्यत्—कोमलनारिकेलगव्यं ८ प. शर्करा २ श नारिकेलजलं ८ श घृत ५ प. शुण्ठीचूर्णं २ प. दुग्धं १ श. एतच्च पचेत्। पाकसिद्धौ वंशलोचना कटुकी मुस्ता गुडत्वक् एला तेजपत्रं नागकेशरं धान्यकं पिप्पली गजपिप्पली प्र. चूर्णं ४ तो. प्रक्षेप्यम्। रसर.। हृदमृतसर्पिः।

नारिकेलजम्। क्ली। नानाभेषजजातमद्यभेदे। इन्द्रजिह्वा पक्वधात्री नारिकेलजलन्तथा कदलीफल-मध्यानात् मद्य तन्नारिकेलजम्।

नारिकेलजलम्। क्ली। प्रसिद्धं, रक्तपित्ते हितम्। सि यी रक्तपि.चि.।

नारिकेलतैलम्। क्ली। तत्फलीत्यतैले। तद्गुणाः,— नारिकेलफलोद्भूतं तैलं वाजीकरं गुरु। पीवणं क्षीणधातूनां वातपित्तप्रणाशनम्। मूत्राघाते प्रमेहे च व्रणे कासे च यक्ष्मणि। मेधालोपे च हितदं चक्षुष्यं बलकारणं तथा॥" अवि.।

नारिकेलत्वक्षम्। क्ली। सजलनारिकेल-मध्ये सेव्यवलवण पूरयित्वा तन्नारिकेलं मृदावेष्ट्य शोषयेत्। अथ दग्ध्वा तन्मध्यात्क्षारं ग्राह्यं। मात्रा ४ माषाः। भैष.।

नारिकेलत्वारी। स्त्री। नारिकेलदुग्धशर्करा-ज्ञतमिष्टान्नं। यथा—"नारिकेलं समुत्कृत्य छिद्र-मस्यसि गोः क्षिपेत्। सितागव्याज्यसंयुक्तं तत्पचन्मृदुनाग्निना॥" गुणाः—"नारिकेलोद्भवा त्वारी स्निग्धा पित्तानिलापहा॥" भा.।

नारिकेलाभ्रकम्। क्ली। अम्लपित्ताधिकारे औषधम्। नारिकेलफलप्रस्थं सुपिष्टं घृतभर्जितं। प्रस्थं प्रस्थं समादाय गुडस्य त्रयुतं क्षिपेत्। नारिकेलस्य तत्तुल्यं क्षीरमेव च। धान्याच्च खरमप्रस्थं खण्डस्यापि तुलां न्यसेत्। एकीकृत्य पचेत्सर्वं शनैर्मृद्वग्निना भिषक्। सिद्धप्रायं प्रदातव्यं चूर्णं तत्र सुरिक्तं। त्रिकटोः सप्ततुर्जातं प्रत्येकस्तु पलोन्मितं। धान्यजीरकयुग्मस्य धन्याकं गन्धि-पर्णकं। तुगापत्रोद्भवचूर्णानि त्रिकर्षञ्च पृथक् पृथक्। मथनः पलचत्वारि स्निग्धे भाण्डे निधापयेत्॥" रसर.। भैष.।

नारिकेलिः (ली)। स्त्री, पुं (इन्)। नारि-केलवृक्षे। भा.। शर.।

नारिकेलोदकम्। क्ली। नारिकेलजले।

नारी। स्त्री। तन्नामकौषधिविशेषे। या अश्व-वलेति कथ्यते। यस्याः पर्म् अश्वसदृशञ्च। च. चि १अ। रसक्रां। मेध्रे मानुषे। सा मान-शोणितोत्तरा विषमतिथौ जाता च। सुखबोधः।

नारीदुग्धम्। क्ली। नारीदुग्धोत्यव्रते। मेध्रे मानुषस्तन्यवत्। घि। गुणाः—कफेऽनिले योनि-दोषे रोगेष्वनेषु तद्धितम्। चक्षुष्यमग्र्यं स्त्रीणाञ्च सर्पिः स्यादक्षसोपमम्॥" अवि.अ.। चक्षुष्यं पथ्य सर्व्वरोगघ्न मन्दाग्निदीपनं रुच्य पाके लघु विषघ्नञ्च। रा.नि.व.१५।

नारीचम्। क्ली। शाकभेदे। नालिता। तद्विधि तिक्त मधुरञ्च। तिक्तं रक्तपित्तघ्न कृमि-कुष्ठहरञ्च। मधुरं पित्तिलं शीतल विष्टम्भि कफवर्द्धकञ्च। राज.।

नारीदुग्धम्। क्ली। मानुषीदुग्धे। See मानुषीदुग्धम्।

नारीपयः। क्ली। नारीदुग्धे।

नारीवल्लभा। स्त्री। गन्धप्रियङ्गौ। वै.निघ.।

नारीषण्डः। पुं। स्त्रीनपुंसके। च.शा.२अ।

नारीष्टा। स्त्री। मल्लिकापुष्पवृक्षे। मल्लिका फूलका गाछ। रा.नि.व.१०।

नारीक्षीरम्। क्ली। मानुषीक्षीरे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नार्य्यङ्गः। पुं। नागरङ्गवृक्षे। कमला लेबुर गाछ। श.र.।

नार्य्यतिक्तः। पुं। किराततिक्तके। चिराता। वै.निघ.।

नालः। पुं, क्ली। पद्मदण्डे। अम.। हरितालै। स्वामी.। नेत्रे। पिचुकिरि। पुं। नले। रा.नि. ८.। सेद्रे। भा.म.३भ.मूत्रोत्सर्गे।

नालकः। पुं। कलाये। मटर। रा.नि.व.१६। नलक इति पाठोऽपि पुस्तकान्तरे दृश्यते। [८।

नालवंशः। पुं। नले। नल गाछ। रा.नि.व.

नालषिका। स्त्री। शूकशिम्बीबीजे।

नाला। स्त्री। नले। स्तम्बे। डाँटा, नाड़ा। अम.भ.।

नाला (लि) कण्टः। पुं। अपामार्गचुपे।

नालावती। स्त्री। नागवल्लीलतायां। प.मु.।

नालिः। स्त्री। नलकास्थनि। नलि। नाड्यां, शिरायां। हि.की.।

नालिकः। पुं। खड्गके। गण्डार। महिषे। त्रिका.। रक्तगन्धवीरे। नाड़ीशाके। चर्म्मकषायाम्। वै.निघ.। क्ली। पद्मे। श.र.।

नालिका। स्त्री। नालायाम्। श.र.। नाड्यां। अ.टी.। चर्म्मकषायाम्। जटा.। करिकर्ण-वेधनास्त्रे। हारा.। नलाकारतन्त्रावे। नलिका-नामगन्धद्रव्ये। शीहड़े। वै.निघ.। मिष्टपव-नालितायाम्। श.मा.।

नालिकिनी। स्त्री। कमलिन्याम्। पद्मेर झाड़। वै.निघ.। [टी.र.।

नारिकेरः (कः)। पुं। नारिकेलवृक्षे। अ.

नालिजङ्घः। पुं। द्रोणकाके। हारा.।

नालिता। स्त्री। (Arum colocasia.) स्वनामख्यातवृक्षाके। नालिता गाछ। "नालिता पट्शाकञ्च मिष्टत्वे तु नालिका।" प.मु.। गुणाः—नाड़ीवत्।

नाली। स्त्री। मनःशिलायाम्। नालिकायाम्। वै.निघ.। शाककड़म्बके। डाँटा। मे.। नाड्यां, शिरायाम्। अ.टी.भ.। कर्णवेधनी-नामास्त्र-विशेषे। पद्मे। श.र.।

नालीकः। पुं। पद्मे। मृणाले। शरे। क्ली। पद्मषण्डे। मे.।

नालीकिनी। स्त्री। पद्मसमूहे। श.र.

नालीव्रणः। पुं। नाड़ीव्रणे। श.र.

नाल्पपुष्पी। स्त्री। महाशणचुपे। प.मु.।

नावनम्। क्ली। नस्ये। सु.।

नासत्यौ। पुं। अश्विनीकुमारौ। अम.।

नासा। स्त्री। नासिकायाम्। नाकफुले। रा. नि.व.४।१९।

नासाच्छिन्नी। स्त्री। पूर्णिकानामपक्षिविशेषे। विका।

नासा(प्रती)नाहः। पुं। नासारोगविशेषे। लक्षणं यथा—"कफावृती वायुरुदानसंज्ञो यदा स्वमार्गे विगुणः स्थितः स्यात्। घ्राणं त्रणीतीव यदा स रोगी नासाप्रतीनाह इति प्रदिष्टः॥" सु. उ.२२अ.।

नासापरिशोषः। पुं। नासारोगविशेषे। लक्षणं यथा—"घ्राणाश्रिते श्लेष्मणि मारुतेन पित्तेन गाढं परिशोषिते च। समुच्छ्वसित्युर्ध्वमधश्च कृच्छ्राच्चयस्य नासापरिशोष उक्तः॥ सु.उ.२२अ.।

नासा(सिका)पाकः। पुं। नासारोगविशेषे। लक्षणं यथा—"घ्राणाश्रितं पित्तमरूंषि कुर्य्याद् यस्मिन् विकारे बलवांश्च पाकः। तं नासिकापाक-मिति व्यवस्येत् विक्लेदकोथावपि यत्र दृष्टौ॥" सु.उ.२२अ.।

नासायन्त्रम्। क्ली। घ्राणार्बुदादिदर्शनार्थं यन्त्रविशेषे। लक्षणं यथा—"घ्राणार्बुदार्शसामेक-च्छिद्रा नाड्यङ्गुलदया। प्रदेशिनीपरीणाहा स्याद्-भगन्दरयन्त्रवत्॥" अग्नि.।

नासारोगः। पुं। नासागतैकविंशद्रोगेषु। यथा—"अपीनसः पूतिनस्यं नासापाकस्तथैव च। तथा शोणितपित्तञ्च पूयशोणितमेव च। क्षवथु-र्भंशथुर्दीप्तो नासानाहः परिस्रवः। नासाशोषश्च सहिता दशैकाश्चेरिता गदाः। चत्वार्य्यर्शांसि चत्वारः शोफाः सप्तार्बुदानि च। प्रतिश्यायाश्च ये पञ्च वक्ष्यन्ते सचिकित्सिताः। एकविंशन्मितास्ते तु नासारोगाः प्रकीर्त्तिताः॥" सु.उ.२२अ.। विशेषः स्वस्वपर्य्याये दृश्यः।

नासार्शः। क्ली। घ्राणेन्द्रियजातार्शसि। नाके अर्श। तच्च लक्षणम्—प्रतिश्यायोऽतिमात्रं क्षवथुः कृच्छ्रोच्छ्वसता पूतिनस्यं सानुनासिकवाक्यत्वं शिरोदुःखञ्चेति। सु.नि.२अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नासालुः। पुं। जातीफलवृक्षे। वै.निघ.। कट्फलवृक्षे। श.च.। [सु.सू.३२अ.।

नासावंशः। पुं। नासादण्डे। नाक दाँड़ि।

नासा(सिका)शोषः। पुं। नासापरिशोषरोगे। सु.उ.२२अ.।

नासासंवेदनः। पुं। काश्मीरलतायाम्। कदला। रा.नि.व.३। क्षिक्किन्याम्। हेँचेता। क्षुद्रकारवेल्ले। वै.निघ.।

नासास्थि। क्ली। घ्राणास्थनि। नाकेर हाड़। च.शा.७अ.।

नासा(परि)स्रावः। पुं। नासास्रावरोगे। लक्षणं—"अजस्रमस्रं सलिलप्रकाशं यस्या विवर्णं स्रवतीह नासा। रात्रौ विशेषेण हितं विकारं नासापरिस्रावमिति व्यवस्येत्॥" सु.उ.२२अ.।

नासिकन्धमः। वि। नासिकया निःश्वासग्राहिणि। व्याक.। [व्याक.।

नासिकन्धयः। वि। नासापथेन पानशीले।

नासिका। स्त्री। घ्राणेन्द्रिये। तत्पर्य्यायः,—गन्धवहा, घोणा, शिङ्घिनी, सिङ्घिनी, नासिक्यं, नासिक्यकं, नस्या, गन्धनाली, गन्धवन्धा, नक्का, घ्राणेन्द्रियः, नसी, किकुणिका, घ्रातिः, हला। रा.नि.व.१८। सा गर्भस्थस्य पञ्चभिर्मासैः भवति। सुखबोधः। [पीनसरोगे।

नासिकामयः। पुं। नासागत-रोगसमूहे।

नासिकामलम्। क्ली। सिंघाणे। शिक्‌णि। रा.नि.व.१८। [डाका।

नासिकाशब्दः। पुं। नासाशब्दे। नाक-

नासिक्यम्। क्ली। नासायाम्। विका.।

नासिक्यौ। पुं। अश्विनीकुमारद्वये। हे.च.।

नास्तितः (दः)। पुं। आमवृक्षे। श.च.।

नाहः। पुं। आनाहे, मलावष्टम्भे। वै.निघ.।

निःशल्या। स्त्री। क्षुद्रदन्तीचुपे। रा.नि.व.६।

निःशूक। पुं। मुण्डशालिधान्ये। रा.नि.व.१६।

निःश्रेणिः। स्त्री। वनखर्ज्जूरिकायाम्। मे.।

निःश्रेणिका। स्त्री। कीदृग्प्रसिद्धे तृणविशेषे। घासविशेष। तत्पर्य्यायः,—श्रेणिवल्ला, निरसा, वनवल्लरी। गुणाः—नीरसा उष्णा पशूनामबलप्रदा। रा.नि.व.८।

निःश्रेणी। स्त्री। खर्ज्जूरीवृक्षे। खेजुर गाछ। रा.नि.व.११।

निःश्वसन (सित)म्। क्ली। निश्वासे।

निःश्वासः। पुं। नासावायौ, प्रश्वासे। हे.च।

निःसरणम्। क्ली। निर्गमने। हे.च.।

निःसारः। पुं। पृथुशिम्बश्रीणाकवृक्षे। वड़ सोँटा शोणा गाछ। रा.नि.व.९। खदिरीभक्तिकायाम्। वै.निघ। शाखोटवृक्षे। श.च.।

निःसारकः। वि। रिक्तके।

निःसारा। स्त्री। कदलीवृक्षे। रा.नि.व.११।

निःसृता। स्त्री। अरुणवर्ण-विहतायाम्।

निःस्नेहफला। स्त्री। श्वेतकण्टकार्य्याम्।

निःस्नेहा। स्त्री। अतसीवृक्षे। मशिना। विका.।

निःस्पृहा। स्त्री। अरुणविहतायाम्।

निःस्यन्दः। पुं। स्रावे। क्षरणे।

निःस्रावः। पुं। भक्तसमुद्भवमण्डे। भातेर माड़, फेन। हे.च.।

निकषः। पुं। शाणे। कष्टि पाथर। स्पर्शमणौ। अ.टी.भ.।

निकारणम्। क्ली। मारणे। अम.।

निकुचः। पुं। डहुके। डेलो। च.सू.४अ.।

निकुञ्चकः। पुं। मुष्टिपरिमाणे। स च कुडवपादः। भरतधृतसर्ब्बस्वे। वानीरवृक्षे। भा.।

निकुञ्जः। पुं,क्ली। जलवेतसे। मद.व.५। वै निघ.२भ.पाण्डु-चि.मण्डूरायरिष्टे।

निकुञ्चिकाम्ला। स्त्री। निकुञ्चिकानामश्रीवल्लीतुल्यगुणकण्टकवृक्षे। निकुञ्चिके। निरीयवल्लीति भाषा। रा.नि.व.८।

निकुम्भः। पुं। दन्तीचुपे। र.मा.। वा.सू.१५ अ.श्रीधरव.। "निकुम्भकुम्भचिफलागवाची।" भा. म.४भ.नासारो.चि.। "शिग्रुसिंह्रीनिकुम्भानाम्।" च.सू.३अ.षट्प्रदेहे। जलवेतसे। सु.चि.१७अ.।

निकुम्भबीजम्। क्ली। जैपालबीजे। रा.नि. व.६।

निकुम्भा (म्भी)। स्त्री। कट्फले। वै.निघ. २भ.कर्णक्लव.चि.। दन्तीवृक्षे। प.मु.। चन्द्रप्रभागुट्याम्। [रा.नि.व.६।

निकुम्भाख्यबीजम्। क्ली। जयपालबीजे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निक्कतनः। पुं । गन्धके वै.निघ.।

निकेतनः। पुं। जलवेतसे। वै निघ.। पलाण्डौ। श.च.।

निकोचः (टः, ठः) (कः)। पुं । अङ्कोटवृक्षे। आँकोड़ गाछ। रा.नि.व.९ । अ. टी. भ । च.सू.२७अ.। (टकः) वृक्षभेदे। पेस्ता गाछ। वै:निघ.। [कन्द।

निखण्डिका। स्त्री । गुडूचीकन्दे। गुलूञ्-

निखर्व्वः। पुं । वामने। हे.च.।

निगड़। पुं। धातुजारणबीजविशेषे। यथा— सत्त्वार्कक्षीरं पलाशबीजं गुग्गुलुः प्रत्येक समं सैन्धवहिङ्गुभ्यां सह मर्द्दयित्वा विधेयः। र.चि.२अ.।

निगदः। वि। पुरातने। वा.चि.७अ.।

निगन्धिकः। पुं । सुवर्णचम्पके। वै.निघ.।

निगरः। पुं । भोजने। रा.नि.व.२०।

निगरणम्। क्ली । भोजने । रा.नि.व.२०। पुं। गले। मे.।

निगारः। पुं । भक्षणे। अम.।

निगालः। पुं । गले। गला। रा.नि.व.१८। अश्वस्य घण्टाबन्धसमीपस्थदेशे। ज.द.२अ.।

निगालवान्। पुं। अश्वे। अम.। [उणा.।

निगुः। पुं । मनसि । त्रिका । मले। मूले।

निगूढः (कः)। वनमुद्गे । हे.च.। वि । गुप्ते।

निग्रहः। पुं । चिकित्सायाम्। रा.नि.व.२०।

निग्रहस्थानम्। क्ली । भिषजां वादमार्ग-ज्ञानार्थमधिगन्तव्यपदविशेषे। 'दिव्यक्तस्य वाक्यस्या ज्ञानं परिषदि विज्ञानवत्याम् अननुयोज्यस्यानु-योगोऽननुयोज्यस्य चाननुयोगः।" च.वि.८अ.।

निघण्टिका। स्त्री। गुलञ्चकन्दे। तत्पर्य्यायः,— गुलञ्चकन्दः, गुच्छालक्कन्दः, वलाढ्यकन्दः। गुणाः—मधुरः, शीतलः, वृष्यः, तर्पणः, दाहघ्नः।

निघण्टुः। पुं। अभिधाने, नामसंग्रहे। हे.च.।

निघण्टुराजः। पुं । नरहरिकृतराजनिघण्टौ।

निघसः। पुं । भक्षणे।

निघृष्वः। पुं। खुरे। वराहे। उणा. वायो।

निचयात्मकः। वि । सन्निपातिके।

निचिकी। स्त्री। उत्तमायां गवि। प्रधान गाई। अ.टी.भ.।

निचितः। वि। सञ्चिते। व्याप्ते। हे.च.।

निचुलः। पुं, क्ली । हिज्जलवृक्षे । प्रसु.। वेतसवृक्षे। रा.नि.व.९। च.सू.२अ। जलवेतसे। मद.व.५। निचोले। पाछुड़ी। अम.। निम्बवृक्षे। वै निघ.।

निचुलकम्। क्ली । हिज्जलफले। च द.। सि.यो.अप चि.व पञ्चगव्यघृते। "विदतानिचुलानि च।" निचोलके। हे च.।

निचुलबीजम्। क्ली। हिज्जलबीजे। लक्ष्मी-विलासरसे।

निचोलकः। पुं। कञ्चुलिकायाम्। कँचुली। हे.च।

निण्डिला(का)। स्त्री। विदतायां। वै.निघ.। कलायभेदे। तेओड़ी। श.च.।

नितम्बः। पु। श्रोण्याम्। पाछा। रा.नि.व. १८। तरुभेदे। रा.नि.व.२। स्कन्धे। मे.।

नितम्बिनी। स्त्री। नार्य्याम्।

नित्यगः। पुं । आयुषि। "नित्यं शरीरं क्षणिकत्वेन गच्छतीति।" च.सू.१अ.।

नित्यगतिः। पुं । वायौ।

नित्यनाथः। पुं । रसरत्नाकरग्रन्थकारे।

नित्ययुक्। वि । आसीचं चित्तानुसरणे, पदार्थानुसारिणि। च.शा.२अ.।

नित्या। स्त्री। मनसादेव्याम्। तन्त्रम्।

निदम्। क्ली। विषे। श.च.।

निदहुः। पुं । मनुष्ये। श.च.।

निदर्शनम्। क्ली । दृष्टान्तेनार्थः प्रसाध्यते यत्र तत्। सु.उ.६५अ।

निदाघः (कालः)। पुं। ग्रीष्मकाले। स च ज्येष्ठाषाढौ, वैशाखज्येष्ठौ वा। अम.।

निदानम्। क्ली । रोगनिर्णये। विश्व.। रोग-लक्षणे। रा.नि.व.२०। रोगहेतौ, कारणे। तच्च द्विविधम् विप्रकृष्टसन्निकृष्टभेदेन। तत्रैः विप्रकृष्टं विरुद्धाहारादि। सन्निकृष्टं वातादि। मा.नि.।

निदानार्थकरः। पुं । रोगजनके। मा.नि.।

निदिग्धा। स्त्री। कण्टकार्य्याम्। रा.नि.व.४। एलायां। श.च.।

निदिग्धिका। स्त्री । कण्टकार्य्याम्। रा.नि.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व.४। च.द. सन्निपातज्व. चि. पिप्पल्याद्यघृते। "तायमाणा निदिग्धिका।" एलायाम्। श.च।

निदिग्धिकागणः। पुं। स्वल्पपञ्चमूले। अर्क.चि.।

निदिग्धिकादिः। पुं। निदिग्धिकादिसिद्धकषाये। कण्टकारी गण्ठी गुडूची चेति। अन्यः—"निदिग्धिकाबलारास्नाव्यायमाणान्हतायुषैः। मसूरविदलैः क्वाथैः...।" च.द.वा.पि.ज्व.चि.।

निदेशः। पुं। भाजने। धरणि.।

निद्रा। स्त्री। स्वापे। घूमान। तत्पर्य्यायः,—शयनं, स्वापः, स्वप्नः, संवेशः, संवेशः, सुप्तिः, स्वपनं। तत्कारणम्—"तमःकफाभ्यां निद्रा स्यात्।" शार्ङ्ग। सा च वैष्णवी माहेत्युच्यते। यदा चैतन्यवहां शिरां प्रति तमोगुणप्रधानः कफः शिरा रुणद्धि, तदा घोरनिद्रा जायते। तदा च ज्ञानाभावो भवति। सा च प्रलयकालिकी मूर्च्छा। निद्रा विधा तामसी स्वाभाविकी वैकारिकी चेति। सु.शा.४अ.। निद्राया विधिनिषेधौ—"दिवा स्वापं न कुर्व्वीत यतोऽसौ श्लेष्मकोपदः। ग्रीष्मवर्ज्जेषु कालेषु दिवास्वापो निषिध्यते। उचितौ हि दिवास्वापौ नित्यं येषां शरीरिणाम्। वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवा। व्यायामप्रमदाध्वाहनरतान् क्लान्तानतीसारिणः, शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान्। क्षीणान् क्षीणकफान् क्षिण्वन् मदहतान् वृद्धान् रसाजीर्णिनः रात्रौ जागरितान्नरात्रिरशनान् कामं दिवा स्वापयेत्॥" भा.। "दिवा वा यदि वा रात्रौ निद्रा स्वाभाविकता तु यैः। न तेषां स्वपतां दोषो जाग्रतां चोपजायते॥" सु.शा.४अ.। उपयुक्तकाले निद्रागुणाः—"निद्रा तु सेविता काले धातुसाम्यमतन्द्रितान्। पुष्टिवर्णबलोत्साहानग्निदीप्तिं करोति च।" राज.५प.।

निद्राकरम्। क्ली। सुनिषण्णकशाके। प.सु.।

निद्रागौरवम्। क्ली। निद्राबाहुल्ये। मा.नि.।

निद्रानाशः। पुं। अनिद्रायाम्। मा.नि.।

निद्रारिः। पुं। नेपालनिम्बे। चिरेता। रा.नि.व.६।

निद्रालुः। पुं। वनवर्ब्बरिकायाम्। वन बाबूई। वार्त्ताकौ। रा.नि.व.१०। नलीनामगन्धद्रव्ये। श.च।

निद्रासञ्जननम्। क्ली। श्लेष्मणि। श.मा.।

निधनम्। क्ली। मरणे। अम.। पुं। वधतारायाम्। [रा.नि.व.६।

निधमनः। पुं। निम्बवृक्षे। निम् गाछ।

निधायकः। पुं। एरण्डवृक्षे।

निधिः। पुं। नलिकायाम्। नाल्‌कौ। रा.नि.व.१२। जीवकौषधौ। श.च.।

निधुवनम्। क्ली। सुरते। अम.।

निध्यानम्। क्ली। दर्शने। अम.।

निनन्दुः। स्त्री। सूतवत्सायाम्। हे.च.।

निन्द्(न्द्य)तलः। वि। निन्दितहस्ते। श.र.।

निपः। पुं। कदम्बवृक्षे। श.च.। कलसे। अम.।

निपाकः। पुं। रन्धने, पाके। श.र.।

निपानम्। क्ली। दोहनभाण्डे। त्रिका.। कूपसमीपे शिलादिबद्धे कूपोद्धृताम्बुस्थाने। भ.।

निपुणः। पुं। चिकित्सके। सु.नि.१६अ.।

निफला। स्त्री। ज्योतिष्मतीलतायाम्। लताफट्‌की। भा।

निफालनम्। क्ली। दर्शने। वै.निघ.।

निफेनम्। क्ली। अहिफेने। रा.नि.व.६।

निबन्धः। पुं। मलमूत्ररोधरोगे, आनाहे। हे.च.। निम्बवृक्षे, जटा.।

निबन्धनम्। क्ली। हेतौ। भा.।

निभालनम्। क्ली। दर्शने। त्रिका.।

निमज्जथुः। पुं। शयने। निद्रायां। वै.निघ.।

निमज्जनम्। क्ली। स्नाने, अवगाहने। वै.निघ.। [वा.चि.७अ.।

निमर्द्दकः। पुं। मांसस्य विविधव्यञ्जनप्रकारे।

निमित्त(क)म्। क्ली। हेतौ। मा.नि.। चिह्ने। अम.। (कम्) चुम्बने। श.मा.।

निमित्तकृत्। पुं। काके। रा.नि.व.१९।

निमीलः(नम्)। पुं, क्ली (नम्)। निमेषे। हे.च.।

निमेषः। पुं। नेत्रवर्त्मगतरोगभेदे। लक्षणं—निमेषणैः शिरा वायुः प्रविष्टो वर्त्मसंश्रयः। चालयेदति वर्त्मानि निमेषः स गदो मतः॥" सु.उ.३अ.। निमिषे। पलके। श.र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निमेषरुक्। पुं। खद्योते। त्रिका.।

निम्नगम्। क्ली। जले। रा.नि.व.१४।

निम्बः (कः)। पुं। (Melia azadirachta. Syn. Azadirachta Indica.) स्वनाम. ख्यातवृक्षे। निम् गाछ। हिं निम्। सं निंबु, लिम्ब। कं वेड। तं वेपचेट्ट। ता. वेपुम्मरम। तत्पर्य्यायः,—अरिष्टः, सर्व्वतोभद्रः, हिङ्गुनिर्य्यासः, मालकः, पिचुमर्दः, पञ्चकृत्, पूयारिः, कृर्दनः, अर्कपादपः, पूकमालकः, कीटकः, विबन्धः, निम्बकः, केटर्य्यः, वरत्वचः, कृर्दिघ्नः, प्रभद्रः, पारिभद्रकः, काकफलः, कीरष्टः, नेता, सुनगः, विशोर्णपर्णः, यवनेष्टः, पीतसारकः, शीतः, राजभद्रकः। गुणाः—शीतः तिक्तः व्रणकृमिविषश्लेष्मघ्नः श्लेष्मघ्नः बहुविषपित्तघ्नः विशेषतो हृदयविशदशान्तिकरश्च। रा.नि.व.९। तत्फलगुणाः—रसे तिक्तं पाके कटु भेदनं स्निग्धं लघु उष्णं कुष्ठघ्नं गुल्मार्शः कृमिमेहघ्नञ्च। भा.। "दूर्व्वानिम्बवासात्मगुप्ताः।" वा.सू.१५अ. आरग्वधादिः। खर्জ্জুरवृक्षे। तालीशपत्रे। मरिचे। पलाण्डौ। वृक्षमूलके। रा.नि.व.२३।

निम्बतरुः। पुं। पारिभद्रवृक्षे। रा.नि.व.८। निम्बवृक्षे। मन्दारवृक्षे। अम.।

निम्बतैलम्। क्ली। निम्बफलोत्थतैले। निम्बफलेर तैल। गुणाः—कटूष्णकृमिकुष्ठकफघ्नञ्च। रा.नि.व.१५।

निम्बपञ्चकम्। क्ली। पञ्चनिम्बे। रा.नि.व.२२।

निम्बपत्रम्। क्ली। प्रसिद्धं, रक्तपित्ते हितम्। निमपाता। सि.यो.र.पि.चि.खण्डखाद्ये। गुणाः—निम्बपत्रं स्मृतं नेत्रं कृमिपित्तविषप्रणुत्। वातलङ्कटुपाकञ्च सर्व्वारोचककुष्ठनुत्॥" भा.। च.द.अष्टाङ्गधूप।

निम्बप्रसवः। पुं। निम्बपत्रे। वा.चि.१अ।

निम्बरकः। पुं। महानिम्बे। महानिम्।

निम्बबीजः। पुं। राजादनीवृक्षे। खर्नी गाछ। रा.नि.व.११। क्ली। निम्बस्य बीजे।

निम्बूः (म्बूः) (कः)। पुं। (Citrus medica. Var. acida.) अम्लजम्बीरवृक्षे। टेक लेबुर गाछ, कागजी लेबु। सं निंबे। कं निंबू। तत्पर्य्यायः,—अम्लजम्बीरः, वह्निः, दीप्तः, वह्निबीजः, अम्लसारः, दन्तशठः, शोधनः, जन्तुमारी, निम्बूः रोचनम्। गुणाः—फलमम्लरसं कटूष्णं गुल्मास्यवातहरम् आग्नेयं चक्षुष्यं कासकफकण्ठहृद्विहरं। पञ्चमतीवरुच्यम्। रा.नि.व.१। निम्बूकमम्लं वातघ्नं दीपनं पाचनं लघु कृमिघ्नं तीक्ष्णमुदरग्रहघ्नं शूले हितं रोचनं मन्दाग्नौ बद्धगुदे च हितम्। भा.। "निम्बूकङ्कुसिसमूहनाशनं तीक्ष्णसुष्णमुदरग्रहापहम्। वातपित्तकफशूलिनां हितं नष्टधान्यरुचि-शोधनम्परम्॥ विदोषवह्व्योज्वरपीड़ितानां दीप्ताग्नितानाञ्च सवज्वलानां। शूलग्रहे बद्धगुदे हितञ्च विसूचिकायां मुनयो वदन्ति॥" अचि.१७।

निम्बूकपानकम्। क्ली। निम्बुरसकृतप्रपानके। लेबुर शर्बत। निम्बुरसः १ भ. शर्करोदकं ६ भ. लवङ्गमरिचचूर्णेन सम्मिश्रा कृते पानके। भा.।

निम्बूतः। पुं। गन्धके। र.सा.सं वसन्ततिलकरसे।

निम्बूसत्त्वम्। पुं। निम्बवृक्षे। वै.निघ.। क्ली। रसस्य संस्कारविशेषे। See पारदः।

नियामकगणः। पुं। रसनियामकद्रव्यसमूहे। यथा—"सर्पाचीवनकाकव्यौ कञ्चुका यमचिञ्चिका। शतावरी शङ्खपुष्पी शरपुङ्खा पुनर्नवा। सूपापर्णी च रुत्याची ब्रह्मदण्डी शिखण्डिनी। अनन्ता काकजङ्घा च काकमाची च पीतिका। विष्णुक्रान्ता सहचरा सहदेवी महाबला। बला नागबला मूर्व्वा चक्रमर्दैकरञ्जकौ। पाठा तामलकी नीली जालिनी पद्मचारिणी। घण्टा विघण्टा गोजिह्वा कोकिलाक्षी घनध्वनिः। आखुपर्णी चौरिणी च विषुटी मेषशृङ्गिका। कृष्णवर्णा च तुलसी सिंही च गिरिकर्णिका॥" र.सा.सं.।

नियोगः। पुं। इदमेव कर्त्तव्यमिति अवधारणे। यथा—पथ्यमेव भोक्तव्यम्। सु.उ.२५अ.।

नियोद्धा। पुं। कुक्कुटे। रा.नि.व.१९।

निर्य्या। स्त्री। सर्पपपष्ठांशमाने। प.प्र.।

निरन्नता। स्त्री। उपवासे।

निरशनम्। क्ली। अनशने। व्याक.।

निरसनम्। क्ली। निष्ठीवने। अम.।

निरसा। स्त्री। निःश्रेणिकातर्णे। रा.नि.व.८।

निरातङ्कः। वि। रोगमुक्ते। रा.नि.व.२०।

निरारपशालिः। पुं। लवणशून्यक्षेत्रे उष्णाम्बुसातशालिधान्यविशेषे। निर्जलदेशज २५८-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तिक धान्य। मं रूपशालि। कं तुरुनेलु। गुणाः —मधुरः स्निग्धः शीतलः पित्तदाहघ्नः विदोषघ्नः रुच्यः पथ्यः सर्व्वरोगघ्नश्च। रा.नि.शा.१६।

निरामज्वरः। पुं। पक्वज्वरे। लक्षणं— क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम्। दोषप्रवृत्तिरुत्साहो निरामज्वरलक्षणम्॥" मा.नि.।

निरामयः। पुं। शुकरे। शु.मा.। वनच्छागे। मे.। वि। रोगमुक्ते। रा.नि.ब.२०।

निरामालुः। पुं। कपित्थवृक्षे। शु.च.।

निरालकः। तदाख्यमतस्यभेदे।

निरालम्बा। स्त्री। आकाशमांस्यां। सूक्ष्म जटामांसी। रा.नि.व.१२।

निरिन्द्रियः। वि। इन्द्रियशून्ये। [इ.।

निरीहः। वि। निश्चेष्टे। निर्व्यापारे। वा.चि.

निरुत्थः (त्थितः)। वि। मृते। र.सा.सं।

निरुत्थीकरणम्। क्ली। मृतलौहस्य मिश्र-पक्वकादिभिः पाकेन मारणं। "सर्व्वमेतन्मृतं लौहं पक्तव्यं मिश्रपक्वकैः। यद्येवं स्यान्निरुत्थञ्च सैव्यं रक्तिचतुष्टयम्॥" मतान्तरं यथा—"गोघृतङ्गन्धकं लौहं तप्तखल्वे विमर्द्दयेत्। दिनैकङ्गन्यकाद्रावरुद्धा गजपुटे पचेत्। इत्येवं सर्व्वलौहानां कर्त्तव्यं स्यान्निरुत्थितम्॥" र.सा.स.।

निरुद्धगुदः (पायु)। पुं। तन्नामकक्षुद्ररोग। लक्षणादि यथा—वेगसन्धारणाद्वायूविवृतौ गुदमाश्रितः। निरुणद्धि महत् स्रोतः सूक्ष्मद्वारं करोति च॥ मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति। सन्निरुद्धगुदं व्याधिमेनं विद्यात् सुदुस्तरम्॥" सु.नि.१२अ.।

निरुद्धप्रक(का)शः। पुं। मेढ्रजक्षुद्ररोगविशेषे। लक्षणं—वातोपसृष्टमेवन्तु चर्म्म संशूयते मणिम्। मणिश्चर्म्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च। निरुद्धप्रकशे तस्मिन्मन्दधारमवेदनम्॥ सु.नि. १३अ.। [अ.।

निरुद्धमणिः। पुं। निरुद्धप्रकशे। वा.उ ३३

निरुपमः। पुं। गौधेरकजातिभेदे। गोधाशाप विशेष। ८अ.।

निरूहः। पुं। वस्तिविशेषे। "कषायक्षीरतैलैर्यो निरूह्य स निगद्यते।" सा.कौ.। तत्र परिमाणं —कफे ११ तो. पित्ते ८ तो. वाते च ६ तो. ग्राह्यम्। स्नेहमधुनोश्च ३।४।६ पलानि यथाक्रमं कफपित्तवातेषु ग्राह्याणि। तथा कल्कस्य २ प. सैन्धवस्य २ तो। रसक्षीराम्लमत्स्यानाञ्च एकैकं पलं ग्राह्यम्। इति निरूहवस्तिकल्पनामा। ज्ञेया। वै.निघ.ज्व.चि.। स च तत्क्षेशनदोषहरशमन लेखनबृंहणपिच्छिलमधुतैलयापनयुक्तरथ सिद्धोत्तरबस्तिभेदेन बहुधा। तेषां लक्षणानि तत्तत्पर्य्याये द्रष्टव्यानि। भा.। तस्य कालादि—"अनुवास्य स्निग्धतनुं ततोऽङ्गे निरूहयेत्। मध्याह्ने किञ्चिदाक्तेप्रयुक्ते बलिमङ्गले। अभ्यक्तस्वेदितोत्सृष्टमलं नातिबुभुक्षितम्। मधुस्नेहनकल्काख्यकषायावापतः क्रमात् त्रीणि षट् द्वे दश त्रीणि पलान्यनिलरोगिणां। पित्ते चत्वारि चत्वारि द्वे द्विपञ्चचतुष्टयम्। षट् त्रीणि द्वे दश त्रीणि कफे चापि निरूहणम्॥" च.द.।

निरोधः। पुं। नाशे। रोधे। मे.।

निरोप्यशालिः। पुं। वापितशाली। वोना धान। गुणाः—लघवः शीघ्रपाका गुणोत्तरा विदाहिनः दोषघ्ना बल्या मूत्रवर्द्धनाश्च। रा.नि.व.१६।

निर्ऋतिः। स्त्री। बालस्य तन्नामकमातृकाग्रहविशेषे। बालग्रहविशेष। यथा दशमे दिने मासि वर्षे वा बालो गृह्यते। तेन तस्य ज्वरगात्रोद्वेजनादि भवति। च.द बालरो.चि.।

निर्गन्धपुष्पी। स्त्री। शालिञ्चवृक्षे। शु.च.।

निर्गुण्डी (ण्डो)। स्त्री। (Vitex negundo) स्वनामख्यातवृक्षे, सिन्धुवारवृक्षे। निशिन्दा गाछ। हिं मेउड़ीसम्भालु, निर्गुण्डी। म लिङ्गुर। तें नाविलिचेट्टु. तैलव। वम्. कट्टरि। ता. नोक्चि। दा. सान्वालि। फा. मिस्वान् गुर्ज. लगाड़। कीङ्गणे निगुड़ सेन्दुवार इति च। मा.। तत्पर्य्यायाः,—सिन्धुः, सिन्धुकः, इन्द्रसुरिषः, इन्द्रसुरसः, निर्गुण्डी, इन्द्राणिका, इन्द्राणी, सिन्दुकः, सिन्दुवारिका, पौलोमी, शक्राणी, कासनाशिनी, सुरसा, शुक्लपृष्ठकः, विसुन्धकः, सुरसः, सिन्दुवारितः, स्थिरसाधनकः, अनन्तः, सिद्धकः, अर्थसिद्धकः। भा.। सा चतुर्धा—श्वेता नीला आरण्या कर्त्तरी चेति। श्वेतपुष्पागुणाः— "निर्गुण्डी कटुका तिक्ता रूक्षा चोष्णा कषायका। श्रुतिप्रदा नेत्रहिता केश्या लघ्वग्निदीपनी। मेध्या वर्ण्या च सम्प्रोक्ता गुदवातहरा परा। सन्धिवातहरा वातश्लेष्मशोफहरा मता। कुष्ठकृमिव्रणं प्लीहां गुल्मकण्ठरुजं तथा। विषं शूलञ्चारुचिञ्च ज्वरं मेदो-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुजं तथा । गुल्मप्लीहञ्च प्रतिश्यायश्वासं श्वासञ्च नाशयेत् । पित्तनाशकरी प्रोक्ता पर्णसंज्ञा लघु स्मृतम् । कृमिनाशकरस्योक्तं..... ॥" नीलपुष्पागुणाः—"नीला निर्गुण्डिका तिक्ता रूक्षा चोष्णा कटुः स्मृता । आध्मानवातस्यदरुक्षास श्वासकफं हरेत । वातनाशकरी प्रोक्ता.....॥" द्रव्यगुणः । रा.नि.व.४ । कर्कशीगुणा—निर्गुण्डी कर्कशीयुक्ता कटुः तिक्ता कफापहा । वातक्षयञ्च शूलञ्च कण्डूष्ठञ्च नाशयेत् ॥ आरण्यायाः श्वेतकृष्णयोः गुणाः—प्रोक्ता चारण्यनिर्गुण्डी पथ्या पित्तञ्चरं हरेत् । विषञ्च गुल्मसीवार्तं नाशयेद्वर्णकारिणी । पर्णञ्चास्यास्तु कटुकञ्चाग्निदीप्तिकरं लघु । कृमीन् कफञ्च वातञ्च नाशयेत्..... ॥ पुष्पञ्चास्याः कटु चोष्णं तिक्तं कृमिकफापहम् । प्लीहां गुल्मञ्च वातञ्च कुष्ठं शीघ्रञ्च नाशयेत् ॥ अरुचेर्नाशकस्योक्तश्चण्डूश्चैव विनाशयेत् ॥" वै. द्रव्यगुणः । See सिन्दुवारः । नीलनिर्गुण्ड्यां । रा.नि.व ४ । सु.सू.३७अ.। नीलशेफालिकायां । शा.र.।

निर्घातः । पुं । अस्त्रविशेषे ।

निर्घातनम् । क्ली । इतश्चेतश्च विचाल्य शल्योद्धरणरूप कर्म्मणि । सु.सू.७अ.।

निर्जरः । वि । जरारहित । क्ली । सुधायाम् । शा.र.।

निर्जरसर्षपः । पुं । देवसर्षपे । रा.नि.व.९ ।

निर्जरा । स्त्री । गुडूच्यां । तालपर्ण्यां । मूर्वा । मे. ।

निर्झरः । पुं । गजे । शैलो । शा.र.। तुषानले । मे. । शैलनिःसृत जलप्रवाहे । त्रिकाण्ड । तत्प्रत्ययायाः,—झरः, निर्झरी:, झरा, झरी । तज्जलगुणाः—मधुरं, पथ्यं, अग्निदीपन, कफघ्नञ्च ।

निर्झरिणी (रो) । स्त्री । नद्याम् ।

निर्णयनम् । क्ली । गजापाङ्गे । शा.र. ।

निर्णेजकः । पुं । रजके । अम. ।

निर्णेजनम् । क्ली । क्षालने । धावने ।

निर्दरम् । क्ली । तरुसारे, वृक्षनिर्यासे । मे. ।

निर्दहनः । पुं । भल्लातकवृक्षे । क्ली । तद्बीजे । रा.नि.व.११ ।

निर्दहनी । स्त्री । मूर्व्वायाम । मूर्वा । र. मा. । च.द.शूल.चि. । "तथाभयां निर्दहनीञ्च ।"

निर्दिग्धः । वि । क्लेदवति, मांसले । हे.च. ।

निर्देशः । पुं । विस्तरवचने । यथा—"शारीरमागन्तु चेति ।" सु.उ.६५अ ।

निर्भर्त्सनम् (ना) । क्ली, स्त्री । अलक्तके, लाक्षायाम् । रा.नि.व.६ ।

निर्भिन्नचिर्भिटः । पुं । फुटिकायां । शा.चि. ।

निर्भुग्नः । वि । विस्फारिते । मा.नि. ।

निर्म्मा(र्म्मे)ध्वा(ध्य) । स्त्री । नलिकानामगन्धद्रव्ये । रा.नि.व १२ ।

निर्म्मलम् । क्ली । कतकफले । निर्म्माल्ये । अभ्रके । मे. । वि । पवित्रे ।

निर्म्मलीपलः । पुं । स्फटिके । रा.नि.व.१३ ।

निर्म्माल्यम् । क्ली । शिवनिर्म्माल्ये । च.द.उन्मा, चि. । देवोच्छिष्टद्रव्ये । पुराणम् । [व.१२ ।

निर्म्माल्या । स्त्री । सुक्कानामगन्धद्रव्ये । रा.नि.

निर्म्मोटः । पुं । वनस्पतिविशेषे । विका । खर्पर । थापर । हारा ।

निर्म्मोकः । पुं । सर्पकञ्चुके । साँपेर खोलश । भा.म.४भ.गर्भ.चि. ।

निर्य्याणम् । क्ली । गजापाङ्गदेशे । हे.च. ।

निर्य्यातनम् । क्ली । मारणे । हे.च. ।

निर्य्यासः (कः) । पुं । तरुक्षीरे । गाछेर आठा । वल्कल । छाल । र.मा. । कषाये, क्वाथे । शा.मा. । लाक्षायाम् । वै.निघ. ।

निर्य्यो(सिः)सो (इन्) । पुं । शाखोटकवृक्षे । प.मु. ।

निर्य्यूषः । पुं । निर्य्यासे । शा.मा. ।

निर्य्यूहः । पुं । शिम्बीधान्यकृतक्वाथे । क्वाथविशेष । र.मा. । प प्र. १ख. । 'शिम्बीधान्यकृतं तोयं निर्य्यूह इति संज्ञितः ।" ब्रह्म. सु. । निर्य्यासे । आठा । अम. ।

निर्लोहम् । क्ली । वीरणाभगन्धद्रव्ये । खुनखारापी । रा.नि.व.६ । व्याघ्रनखे । नखी । वै.निघ । [वै.निघ. ।

निर्व्व(व)यनी । स्त्री । अहिनिर्म्मोके । हे.च. ।

निर्व्वचनम् । क्ली । निश्चितवचने । यथा—"आयुर्विद्यतेऽस्मिन्निति आयुर्वेदः ।" सु.उ.६५अ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वापणः। नि। दीपने। नाशने। वा.चि. ६अ.। [सर्पे।

निर्विषः। पुं। जलसर्पे। वै.निघ.। विषहीन-

निर्विषा (षी)। स्त्री। (Curcuma zedoaria.) केदारदेशोत्पन्नौषधविशेषे। निर्विषी शम। निर्विषा इति महाराष्ट्रे प्रसिद्धा। तत्पर्य्यायाः—अपविषा निर्विषी, विषहा, विषापहा, विषहन्त्री, विषाभावा, अविषा, विषवरिष्ठी। गुणाः—कटुः शीता कफवातरक्तघ्नी बहुविषघ्नी व्रणरोपणी च। रा.नि.व.६।

निर्वीजा। स्त्री। काकलीद्राक्षायां। किंस्मिन्। रा.नि.व.११।

निर्वृत्तिः। स्त्री। उत्पत्तौ। निष्पत्तौ। "निर्वृत्तिरस्यास्तीति।" मा.पञ्चनि.।

निर्वेधमः। पुं। तन्नामककर्णबन्धनाङ्कितौ। "स च पीठोपमप्रालिः उभयतः क्षीणपुच्छिकाश्रितः।" सु.सू.१६अ.।

निर्वेष्टनम्। क्ली। नाड़ीचीरे। हारा.।

निर्व्यथनम्। क्ली। छिद्रे। अम.।

निर्हारः। पुं। मलमूत्रत्यागभवने। आह्निकतत्त्वम्। निर्हरणे, शल्यादुत्पाटने। भ.।

निर्हारगृह(स्थान)म्। क्ली। निर्हारभवने। प्राङ्मुखा। शल्योत्पाटनगृहे। स्मृतिः।

निर्हारी (इन्)। वि। दूरगामिगन्धे। अम.।

निलिम्पा। स्त्री। दोहनभाण्डे। स्त्रीगवि। विका.। [अ.।

निवन्धः। पुं। अश्वस्य ककुदंसभागे। ज.द.२

निवातम्। क्ली। वाताभावे। गुणाः—"निवातं च्छायये सेव्यमारोग्याय च सर्व्वदा।" सु.चि.२४अ.।

निवृत्तसंज्ञम्। क्ली। गुह्यरोगभेदे। निदानादि यथा—"विमर्दनादिदुष्टेन वायुना चर्म्म मेढ्रजं। निवर्त्तते सरुग्दाहं क्वचित्याकञ्च गच्छति। पिच्छितं ग्रथितं चर्म्म तत्प्रलम्बमधोमुखं। निवृत्तसंज्ञं सकफकण्डुकाठिन्यवत्तु तत्॥" वा.उ.३३अ.।

निशल्या। स्त्री। ह्रस्वदन्तीवृक्षे। रा.नि.व.६।

निशा। स्त्री। हरिद्रायाम्। प.मु.। रा.नि.व.६। आम्रहरिद्रायाम्। भा. संग्रहगृहीतालीशादिचूर्णे। दारुहरिद्रायाम्। रात्रौ।

निशाकरः। पुं। कुक्कुटे। श.र.। चन्द्रे।

निशाख्या। स्त्री। हरिद्रायाम्। रा.नि.व.६।

निशाचरः। पुं। चोरकनामगन्धद्रव्ये। अयं अग्निमन्थस्यैव भेदः। भटेउर इति नेपालदेशे प्रसिद्धः। रा.नि.व.१२। पेचके। शृगाले। सर्पे। से.। चक्रवाके। श.र. राक्षिचरजीवे।

निशाचरी। स्त्री। कैशिनीनामगन्धतृणे। जटा।

निशाटः। पुं। पेचके। हे.च.।

निशाटकः। पुं। गुग्गुलौ। रा.नि.व.१२।

निशाटनः। पुं। पेचके। हला.।

निशाणशिला (लिका) (णी)। स्त्री। अनिशितक्षुरादिसुनिशाणार्थं मार्दवसम्पादनोपयोगिशिलायाम्। क्षुरशिलन शिल। सु.सू.८अ.।

निशादर्शी (इन्)। पुं। पेचकपक्षिणि।

निशादिः। पुं। हरिद्रादिगणे। वा.उ.२अ.

निशाद्वयम्। क्ली। हरिद्रा दारुहरिद्रा च। वा.सू.३५.४२ मुस्तादिव.। "द्विनिशा द्वितिक्ता।"

निशान्तम्। क्ली। प्रातःकाले। गृहे।

निशान्धः। वि। रात्रान्धे। रात्रौकाणे। स्त्री। जतुकालतायाम्। रा.नि.व.३।

निशापतिः। पुं। कर्पूरे। अम. चन्द्रे।

निशापुष्पम्। क्ली। उत्पले। शुन्दि फूल। रा.नि.व.१०। [श.च.।

निशाभङ्गा। स्त्री। दुग्धपुच्छ्याम्। दुधपेया।

निशाभूषा। स्त्री। अम्लमूषायां। रभ.र. हिङ्का.चि.।

निशामृगः। पुं। शृगाले। श.र.।

निशालौहम्। क्ली। पाण्डुरोगे। लौहम्। "लौहचूर्णं निशायुग्मं त्रिफलारोहिणीयुतं। प्रलिह्यान्मधुसर्पिर्भ्यामलापाण्डुशान्तये॥" र.सा.स.।

निशावनः। पुं। शबरजुपे। रा.नि.व.४।

निशावेदी (इन्)। पुं। कुक्कुटे। हे.च.।

निशाहासः। पुं। कुमुदपुष्पे। त्रिका.।

निशाहासा। स्त्री। शेफालिकायाम्।

निशाह्वा। स्त्री। हरिद्रायाम्। अम.। मालवदेशप्रसिद्धजतुकाख्यलतायाम्।

निशिक्रन्दः। पुं। बालानां, रात्रिरोदनरोगे। "कुच्छुन्दरुमली मांसी हरिद्रा बिल्वपल्लवः। सनि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुण्डीदलं धूमात् निशिक्रन्दीऽस्मि नी शिशी: ॥" रस.र.बाल.चि.।

निशितम्। क्ली। तीक्ष्णलौहे। रा.नि.व.१३।

निशिपुष्पा (ष्पिका) (ष्पी)। स्त्री। शेफालिकावृक्षे। विका.। श.र.।

निशुम्भनम्। क्ली। मारणे। हला.।

निशेत:। पुं। वकपक्षिणि। त्रिका.।

निशोत्ता। स्त्री। श्वेतत्रिवृति। त्रिवृति। तेउडी। वै.निघ.२भ.अ.चि. गुरुवादिगुटी।

निश्चला। स्त्री। शालपर्ण्याम्। रा.नि.व.४। पृथिव्याम्।

निश्चलाङ्ग:। पुं। वके। रा.नि.व.१९।

निश्चारका:। पुं। पुरीषत्यागपरपर्याये प्रवाहिकाभेदे। मे.। स्त्री.प्रवाहिका चि.श्रीकण्ठ:। पराशर: उल्लणश्च। [चिका.।

निश्चुक्कणम्। क्ली। दन्तशाणे। दन्तमञ्जन।

निश्श्वास:। पुं। श्वासनिर्गमे। बहिर्मुखश्वासे। हे.च.।

निश्श्वासका:। पुं। वायौ।

निषङ्गथि:। पुं। तृणविशेषे। स्कन्धे। उशा.।

निषण्णकम्। क्ली। आसने। सुनिषण्णशाके। श.र.।

निषद्वर:। पुं। कर्दमे।

निषादग्रह:। पुं। ग्रहविशेषे। तदाविष्टस्य लक्षणं यथा—"गृहीत्वा काष्ठ-लोष्ठादि भ्रमन्तं चीरवाससं। नग्नं धावन्तमुत्तस्तदृष्टिं तृणविभूषणं। श्मशानशून्यायतनं रथ्येकद्रुमसेवितं। तिलान्नमद्य मांसेषु सततं सक्तलोचनं। निषादाधिष्ठितं विद्यात् वदन्तं परुषाणि च ॥" वा.उ.४अ.।

निषादी (इन्)। पुं। हस्तिपके। अम.।

निषेक:। पुं। सेके। निःष्यन्दे। गर्भाधानसंस्कारे। भ।

निषोद्या (ट्टृ)। पुं। कुक्कुटपक्षिणि।

निष्क:। पुं, क्ली। स्वर्णे। माषचतुष्टये। प.प.। कर्षपरिमाणे। "चतुर्भिर्माषकै: शाण: स निष्कोऽष्टक मेव च।" गोविन्दी परिभाषा। स्वर्णपले। स्वर्णकर्षे। साष्टशततोलके। हे.च.।

निष्करठ:। पुं। वरुणवृक्षे। श.च.।

निष्कल:। त्रि। धैर्यहीने। मे.।

निष्कला (ली)। स्त्री। उद्वायाम्। रा.नि. व.१८। निवृत्तरजस्कायाम्। श.र.।

निष्कुट:। पुं। गृहसन्निहितनिकुञ्जे। गृहगृहे। अम.। [रा.नि.व.९।

निष्कुटि:। स्त्री। एलायाम्। सूक्ष्मैलायाम्।

निष्कुटी। स्त्री। स्थूलेलायाम्। श.टी.भ.।

निष्कुभ:। पुं। दन्तीवृक्षे। श.टी.रा.।

निष्कुल:। त्रि। त्वक्शिरास्थिरहिते। त्रि.शी. यक्ष्म.चि.क्षयनप्राप्ते। पुं। तरुकोटरे। अम.।

निष्क्वाथ:। पुं। मांसादिक्वाथे। हे.च.।

निष्ठा। स्त्री। चिकित्सायाम्। रा.नि.व.२०।

निष्ठानम्। क्ली। व्यञ्जने। अम.।

निष्ठीव:। पुं। निष्ठीवने।

निष्ठीवनम्। क्ली। मुखेन श्लेष्मादीनां वमने। थुतू फेला। च.द.सान्निपातज्वर.चि.। "नस्यं निष्ठीवनन्तथा।" तत्पर्य्यायाः,—निष्ठेव:, निष्ठूति:, निष्ठीवनं, निष्ठेवा, निष्ठेव, निष्ठौर:, निष्ठीविका। रा.नि.व.९।

निष्ठीविका। स्त्री। निष्ठीवने। च.शा.२अ.।

निष्ठेव: (नम्)। पुं, क्ली। निष्ठीवने। अम.।

निष्पक्कम्। त्रि। क्वथिते। अम.। अतिपक्वव्यञ्जनादौ। भ.।

निष्पत्रक: (त्रिका)। पुं. स्त्री। करवीरवृक्षे। गुणा:—आध्मानकर: कटूष्णकषाय: कफकर: श्वासवायुरोचकशूलखर्जूव्रणघ्नश्च। रा.नि.व.८।

निष्पत्राकृति:। स्त्री। अतिपीडायाम्। अधिक वेदना। हे.च.।

निष्पाव: (क:)। पुं। (Phaseolus radiatus) A sort of pulse. शिम्बयाम्। शीम। प.मु.। श्वेतशिम्बयां। सादा शिम्। र.मा.। च.द. ग्रन्थि.चि.। राजशिम्बीबीजे। "निष्पावस्तु राजशिम्बीबीजं भेटरासु. भेटवासु इति लोके।" भा. मधुरी.नि.। हिं भेटरासु। तें आनपचेट्टु, राजशिम्बि। हैमा.। तत्पर्य्यायाः,—निष्पाव:, राजशिम्बी, वल्लक:, श्वेतशिम्बिक:, निष्पाव.। गुणा:—वातादिकर: गुरु: सर: विदाही दृष्टिघ्न: मुक्तकफशीफविषापहश्च। वा. सू.। "निष्पावकफलं भृष्टं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्लवर्चस्कारं गुरु।" राज.३प.। "निष्पावो मधुरो रुच्यो विपाकेऽल्पो गुरुः सरः। कषायः स्वल्पपित्तास्रमूत्रवातविबन्धजित्। विदाह्युष्णो विषश्लेष्मशीथ-हृच्छुक्रनाशनः।" भा.पू.१भ धा.व.। गुणाढ्ये। राजमाषे। हिं लोबिया। वर्वटी। यूषगुणाः—"यूषो निष्पावजः स्वल्पं श्लेष्मसृत्पादयेत् स्वने। श्लेष्माणं हृष्टिरोगञ्च नाशयेत्सघृतोषितः॥" भटस्य यूषगुणाः—"निष्पावसूपः पित्तासमूत्रस्वल्पानिलप्रदः। विदाह्युष्णो गुरुः श्लेष्मकफकृच्छुक्रलः स्मृतः॥" द्रव्य.गु.। तुषे। सर्षपाद्यौ। मे.।

निष्पावी। स्त्री। (Vigna Catiang. Syn. Dolichos sinensis.) शिम्बीधान्य विशेषे। राजमाषे। बोड़ा इति भाषा। वर्वटी। हिं लोबिया। सं रुडुवर्ण। कं तट्टरे। सा द्विधा हरिच्छुभेदेन। हरिद्वर्णायाः पर्य्यायाः,—ग्रामजा, फलिनी, नखपुष्पिका, सख्डपा, फल्लिका, शिम्बी, गुच्छफला, विशालफलिका, निष्पावि, चिपिटाः। शुभ्रायाः पर्य्यायाः,—अङ्कुलिफला, नखनिष्पाविका, वृत्तनिष्पाविका, ग्राम्या, नख-पुष्पफला, अशना। गुणाः—ईषे एव कषाये मधुरे कण्ठशुद्धिकरे दीपने रुच्ये द्वितीया तु दुष्पच्छेदा। रा.नि.व.७।

निष्पत्त्यनोकम्। त्रि। उपचारायोग्ये। भा. स.४भ.क्षुद्ररो.वल्मीक. चि.। "निष्पत्त्यनीकं चिरजं विशेषात्।"

निष्फला। स्त्री। निष्फलायां। वन्ध्याकर्कोट्यां। श.र.। निवृत्तरजस्कायाम् वृद्धायाम्।

निसारा। स्त्री। कदलीवृक्षे। रा.नि.व.११।

निसिन्धुः। पुं। निर्गुण्डीवृक्षे।

निसुन्धारः। पुं। निर्गुण्डीवृक्षे। भैष.ज्व.चि. पानीयवट्यां।

निसृता। स्त्री। रक्तचित्रतायाम्। प.मु.। श्वेतकाकवृक्षे। वै.निघ.।

निस्तान्त्रकः। पुं। कोष्ठगतरोगभेदे, वृद्धि-रोगे। वै.निघ.।

निस्तनी। स्त्री। वटके। वड़ि। श.च.।

निस्तर्हणम्। क्ली। मारणे। अम.।

निस्तलः (लो)। त्रि। वर्त्तुले। अम. पुं। तलप्रदेशे। हे.च. [व.१६।

निस्तुषः। पुं। गोधूमे। प.मु.। गंग्। रा.नि.

निस्तुषरत्नम्। क्ली। स्फटिके। रा.नि.व.१३।

निस्तुषक्षोरः। पुं। गोधूमे। रा.नि.व.१६।

निस्तुषितः। त्रि। त्वग्रहिते। मे.।

निस्तुषोपलम्। क्ली। स्फटिके। प.मु.।

निस्तोदः। पुं। अतिव्यथायाम् [व.८।

निस्त्रिंशपत्रिका। स्त्री। खड्गीवृक्षे। रा.नि.

निस्त्रटो। स्त्री। एलायाम्। वै.निघ.।

निस्त्रेणपुष्पिकः। पुं। राजधुस्तूरके। रा. नि.व.११। [त्रिका.।

निस्नेहः (हा)। पुं. स्त्री। अतसीवृक्षे।

निस्नेहफला। स्त्री। श्वेतकण्टकार्य्याम्। रा. नि.व.४।

निस्यन्दः। पुं। स्यन्दने। त्रिका.।

निस्मृहा। स्त्री। अमूलवनस्पतौ। वै.निघ.। अग्निशिखावृक्षे। श.च.।

निस्रावः। पुं। भक्तसर्जे। भातेर फेन।

निस्सारकः। पुं। प्रवाहिकारोगे। च.द. रक्तातिसारे।

निहाका। स्त्री। गोधिकायां। अम.।

निहारः। पुं। नीहारे। श.र.। [कोष.।

निद्रा। स्त्री। निद्रायां। निक्ति। उणादि-

नीकः। पुं। वृक्षभेदे। उणा.। [रा.नि.व.१२।

नीचः। पुं। चीरकनामगन्धद्रव्ये। गँठेला।

नीचकः। त्रि। ह्रस्वे। श.र.। स्त्री (का)। उत्तमायां गवि। अ.टी.भ.।

नीचकदम्बः। पुं। गीरचसुरुज्याम्, महा-सावणिकायाम्। वै.निघ.।

नीचकुलिशम्। क्ली। वैक्रान्तरत्ने। प.मु.।

नीचगम्। क्ली। जले। वै.निघ।

नीचभोज्यः। पुं। पलाण्डौ। श.च.।

नीचवज्रम्। क्ली। वैक्रान्तमणौ। पोखराज। रा.नि.व.१३।

नीड़ः। पुं, क्ली। पक्षिकुलाये। अम।

नीड़कः
नीड़ोद्भवः } पुं। पक्षिसामान्ये। हे.च.। अम.।

नीतम्। क्ली। धान्ये। शस्ये। हे.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीथम्। क्ली। जले। उणा.।

नीपः। पुं। कदम्बवृक्षे, धाराकदम्बे। केचित् कदम्ब। सं राजकदम्ब। रा.नि.व.९। गुणाः—गरदीपहरः। सु.सू.४६अ.। अशोकवृक्षे। नीलाशोके। वञ्जुलवृक्षे। वाञ्जुलि गाछ। से.। भूकदम्बे। कुकुभिमा। वै.निघ.।

नीपराजः। पुं। राजकदम्बवृक्षे। वै.निघ.।

नीरम्। क्ली। जले। रा.नि.व.१४। बालके। वाला। वै.निघ. २भ. ज्व.चि.दाहचि. चन्दनादिकषाये।

नीरजः। पुं। काशभेदे। छोटि केशे। रा.नि.व.८। जलनकुशे, जलसाज्जीर। उद्विड़ाल। श.र.। क्ली। उत्पले। पद्मे। नीलोत्पले। कुष्ठौषधौ। से.। "नारजशादिवे च।" सु.चि.२५अ.। मौक्तिके। रा.नि.व.१३।

नीरजाः। स्त्री। अजालरजस्कायां स्त्रियि।

नीरदः। पुं। सुस्तायां। रा.नि.व.६। वै.निघ. २भ.दाह.चि.चन्दनादिकषायः। वि। अदत्ते।

नीरप्रियः। पुं। जलवेतसे। वै.निघ.।

नीरभृच्छः। पुं। जलमधूकवृक्षे। वै.निघ.।

नीरसः। पुं। दाड़िम्बवृक्षे। छारा.। चि। रसहीने।

नीरसा। स्त्री। निःश्रेणिकालतायां। रा.नि.व.८।

नीराखुः। पुं। जलसाज्जारि। उद्विड़ाल। छारा.।

नीरिन्दुः। पुं। अश्वशाखीटवृक्षे। आंशुशाड़ा गाछ। श.च.।

नीरुक्
नीरुजम् } वि। रोगमुक्ते। रा.नि.व.२०। क्ली। कुष्ठभेदे। कुड़विशेषे। जटा। पुं। उशीरयाम्।

नीरोङ्गवा। स्त्री। ब्राह्मीशाके। ब्रह्मीशाक।

नीलम्। क्ली। (Indigofera Tinctoria.) नील्याम्। नीलपद्मे। से.। सौवर्चललवणे। तालीशपत्रे। विषे। रा.नि.व.६। तुत्थके। नीलोत्पल। रा.नि.व.१३। कृष्णाञ्जने। वै.निघ.।

नीलः। पुं। नीलासनवृक्षे। नीलपत्र आसन गाछ। र.मा.। नीलवृक्षे। रा.नि.व.९। वटवृक्षे। रा.नि.व.११। नीलकान्तमणौ। रा.नि.व.१३। वै.निघ.२भ.ज्वरचि.नवरत्नराजरुगाङ्के। नीलवर्णे। सारिकापक्षिणि। नीलवानरे। मे.। कृष्णकुशगुच्छके। कृष्णनिर्गुण्ड्याम्। वै.निघ.।

नीलकम्। क्ली। कृष्णलवणे। कांस्ये। जले। गन्धबीजे। वै.निघ.। कान्तलौहे। रा.नि.व.१३।

नीलकः। पुं। नीलभृङ्गराजे। रा.नि.व.४। नीलबीजे, नीलबीजासनवृक्षे। रा.नि.व.८। कृष्णसारमृगे। भल्लातकवृक्षे। वै.निघ.। वर्तुलकलायै।

नीलकणा। स्त्री। कृष्णजीरके। रा.नि.व.६। जीरके। वै.निघ.। [मयूरे। अम.।

नीलकण्ठकः। पुं। चातकपक्षिणि। वै.निघ.।

नीलकण्ठम्। क्ली। मूलके। मूला। प.मु.।

नीलकण्ठः। पुं। पीतशालवृक्षे। पियाशाल। र.मा.। मयूरे। अम.। शिग्रुवृक्षे। चाषपक्षिणि। खञ्जरीटे। दात्यूहे। कपोते। ग्राम्यचटके। हे.च.। सारसपक्षिणि। वै.निघ.। नीलेकदलपुष्पवृक्षे। लक्षणं यथा—"लक्षणाया अभावे तु नीलकण्ठशिखा मता॥" सु.टी.मधुमती। [११।

नीलकण्ठाह्वम्। क्ली। रुद्राक्षे। रा.नि.व.

नीलकन्दः। पुं। महिषीकन्दे। काल आलुविशेष। रा.नि.व.७। अस्य पर्य्यायाः,—सर्वाख्यः, वनवासा, विषकन्द, महिषीकन्दः। गुणाः—कटुः, उष्णः, रूक्षः, कफवातामय-मुखजाड्यनाशी च। सितस्तु महाविद्धिकरः।

नीलकपित्थकः। पुं। महाराजचूते। नीलवर्णकपित्थभेदे। रा.नि.व.११। See टङ्कः।

नीलकमलम्। क्ली। नीलपद्मे। नील पद्म। गुणाः—शीतलं स्वादु पित्तघ्नं सुगन्धि रूक्षं रसायने श्रेष्ठं दीपनार्द्धकरं कैशस्य च। रा.नि.व.१०।

नीलकलम्बी। स्त्री। (Ipomoea hederacea. Syn I. Coerulea.) स्वनामख्यातलतायाम्। नील कलमी। हिं कालदाना। अस्या बीजचूर्णं विरेचने हितम्। [नि.व.६।

नीलकाचोङ्गवम्। क्ली। काचलवणे। रा.

नीलकुरण्टकः। पुं। (Barlaria coerulea.) नीलझिण्टीचुपे, नीलाझाने। नील झाँटी। रा.नि.व १०। भैष.कुष्ठ-चि.।

नीलकुसुमा। स्त्री। नीलपुष्पझिण्टीचुपे। नील झाँटी। रा.नि.व.१०। See नीलाझानः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीलकेशी। स्त्री । नीलीचुपे । रा.नि.व.४ ।
नीलक्रान्ता। स्त्री । विष्णुक्रान्तायाम्। नील अपराजिता । रा.नि.व.५ ।
नीलक्रौञ्च। पुं । नीलवर्णक्रौञ्चपक्षिणि । नील बक । वै.निघ.। अस्य पर्य्यायाः —नीलाङ्गः, दीर्घग्रीवः, अतिजागरः ।
नीलगिरिकर्णिका। स्त्री । नीलापराजितायाम् । रा.नि.व.३ ।
नीलगिरिजा। स्त्री। (Clitoria Ternatea.) विष्णुक्रान्तायां । अपराजिता । हि. कवयेख्ढी वम्. गोकर्णी। आस्फोतायाम् । शंखपुष्पी। कोषान्तरम् ।
नीलङ्गः। पुं । कृमिविशेषे । कीटभावे । शृगाले । भ.डिकी. ।
नीलचर्म्म। क्ली । परूषकफले। रा.नि.व ११ ।
नीलच्छदः। पुं । हैपखर्ज्जूरवृक्षे । वै.निघ. ।
नीलच्छविः। पुं । कुकुभपक्षिणि। वै.निघ. ।
नीलजम्। क्ली । नीललौहे। रा.नि.व.१३ ।
नीलझिण्टी। स्त्री । नीलपुष्पझिण्टीचुपे । नील झाँटी । रा.नि.व.१० । See नीलाम्लानः ।
नीलतरुः। पुं। नारिकेलवृक्षे रा.नि.व.११ ।
नीलतालः। पुं। तमालवृक्षे। तमाल गाछ। वै.निघ.। हिन्तालवृक्षे। रा.नि.व.९ ।
नीलतुत्थम्। क्ली । तुत्थभेदे। वै.निघ.२भ.। तच्च चि शब्दे उदाहरणम् ।
नीलदूर्व्वा। स्त्री । हरितदूर्व्वायां। नील दूर्व्वा घास । सं नीलीहरियाली । क हसुगरुके । तं हरितदूर्व्वाल । तत्पर्य्यायाः,—हरिता, शाम्भवी, शत.मा. शीता, शतपर्व्विका, अमृता, पूता शतग्रन्थिः, अनुषत्रल्लिका, शिवा, शिवेष्टा, मङ्गला, जया, भूतघ्नी शतमूली, महौषधी. विजया, गौरी, शान्ता, रुहा, अनन्ता, भार्गवी शतवल्ली, शस्यं, सहस्रवीर्य्या, शीतकुम्भी, शीतला वामिनी । गुणाः—मधुरा तिक्ता शीतला रोचनी रक्तपित्ततिसारघ्नी कफवातज्वरघ्नी च । रा.नि.व.८ । कफपित्तास्रवीसर्पतृष्णादाहक्लमापहान्।" भा. ।
नीलद्रुमः। पुं । नीलबीजासनवृक्षे । रा.नि. व.९ ।
नीलधातुः। पुं । खटिकायां। नील खड़िमाटी । र.मा. । [रा.नि.व.९ ।
नीलध्वजः। पुं। तमालवृक्षे। तमाल गाछ।
नीलनिर्गुण्डी। स्त्री । (Gendarussa vulgaris. Syn. Justicia gendarussa.) नीलपुष्पसिन्धुवारवृक्षे। नील निर्गुण्डी। जगत् मादन। तं नल्लवविलि। वम्. कलअडुलसा। दा. कालिसुम्बालि। गुणाः—कटूष्णा तिक्ता रूक्षा कासघ्नी श्लेष्मशीफवायुप्रदराध्मानहरी। रा.नि.व.४ ।
नीलनिर्य्यासकः। पुं । नीलबीजासनवृक्षे । रा.नि.व.९ । See नीलबीजः ।
नीलपङ्कम्। क्ली । कृष्णवर्णकर्द्दमे ।
नीलपङ्कजम्। क्ली। नीलकमले। नील पद्म। रा.नि व.१० ।
नीलपत्रः। पुं । गुण्डतृणे। रा.नि.व.८ । नीलबीजासनवृक्षे। अश्मन्तवृक्षे। रा.नि.व.८। दाड़िम्बवृक्षे। रा.नि.व.११। क्ली । नीलपद्मे। शब्द.च.। [वै.निघ.।
नीलपत्रा। स्त्री। भूजम्बाम्। वन जाम।
नीलपत्रिका। स्त्री। नीलासनवृक्षे। नीलपत्र आसन गाछ। र.म. । कृष्णतालमूल्याम् । वै.निघ.। [४।
नीलपत्री। स्त्री । रूक्षनीलीचुपे। रा.नि.व.
नीलपद्मम्। क्ली । नीलकमले। नील पद्म। तत्पर्य्यायाः,—नीलाम्बूजन्म, नीलाब्ज, नीलोत्पलं, नीलपङ्कजं, नीलाब्ज। गुणाः,—शीतलं स्वादु, सुगन्धि, पित्तनाशि, रुच्यं, रसायनं, केशवर्द्धकं, देहदार्ढ्यकारि। रा.नि.व.१०। [रा.नि.व.११।
नीलपर्णम्। क्ली । परूषकफल। फल्सा।
नीलपर्णी। स्त्री । विदारीवृक्षे । र.मा. । वन्दाकवृक्षे। वै.निघ.।
नीलपिच्छः। पुं। रणशृङ्गे। शेन पाखी। रा.नि.व.१९ ।
नीलपिण्डम्। क्ली । वज्रलौहे।
नीलपिण्डीगुडो। स्त्री । वृक्षविशेषे। पीटोंजी इति लोके। वै.निघ.। [कल्प.८अ.।
नीलपीतः। पुं । महाविषवृश्चिकभेदे। सु.
नीलपुनर्नवा। स्त्री। नीलदलपुनर्नवायाम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिं नीलगदहपड़ोया। मं कालोयवेरुट। कं करियवेल्लडकिलु, करियगणलिले। तत्पर्य्यायाः,—नीला, श्यामा, कृष्णाख्या, नीलवर्षाभूः। गुणाः—तिक्ता कटूष्णा रसायनी हृद्रोगपाण्डुश्वयथुश्वासवातघ्नी। रा.नि.व.५।

नीलपुष्पः। पुं। नीलभृङ्गराजे। नीलझिण्टयां। रा.नि.व.४। विल्वन्तरवृक्षे। कृष्णनिर्गुण्ड्याम्। वै. निघ.। क्ली। यन्त्रिपर्ण्यां। भा.।

नीलपुष्पकः। पुं। नीलनिर्गुण्डीवृक्षे। वै.निघ.।

नीलपुष्पा। स्त्री। अपराजितायाम्। प.मु.। विष्णुक्रान्तायाम्, नीलापराजितायाम्। रा.नि.व. ५। नीलझिण्टीवृक्षे। नील झाँटी। रा.नि.व.१०। See नीलास्फान्तः। यन्त्रिपर्ण्याम्। कृष्णनिर्गुण्ड्यां। नील्याम्। वै.निघ.।

नीलपुष्पिका (ष्पी)। स्त्री। नीलपुष्पापराजितायाम्। नील अपराजिता। रा.नि.व.३। नीलवृक्षायाम्। नील बोणा। प.मु.। नील्याम्। रा.नि.व.४। अतसीवृक्षे। मशिनार गाछ। रा.नि.व.१६। [वै.निघ.।

नीलपृष्ठः। पुं। मत्स्यविशेषे। रुई माछ।

नीलपृष्ठा। स्त्री। नीलीवृक्षे। भा.म.१भ.।

नीलपौरः। पुं। कृष्णचौ। गुणाः—वातकरः कफपित्तघ्नः कषायः विदाही च। भा.। सु.सू.४५अ.।

नीलफला। स्त्री। जम्बूवृक्षे। जाम गाछ। रा.नि.व.११। वार्त्ताकुवृक्षे। वै.निघ.।

नीलभक्षः। पुं। पियालवृक्षे। पियाशाल। प.मु.। See अखट्टः। [वै.निघ.।

नीलभूमिमल्लचारः। पुं। खपरधातौ।

नीलभृङ्गराजः। पुं। नीलपुष्पभृङ्गराजे। नील केशुरिया। हिं भंगरिया। तत्पर्य्यायाः,—महाभृङ्गः, महानीलः, सुनीलकः, नीलपुष्पः, श्यामलः। गुणाः—तिक्तोष्णः चक्षुष्यः केशरञ्जनः कफामयीफश्चित्रघ्नः रसायनश्च। रा.नि.व.४। [अ.।

नीलमकुष्ठः। पुं। नीलवनमुद्गे। नकुल.११

नीलमञ्जरी। स्त्री। नीलनिर्गुण्ड्याम्। वै. निघ.।

नीलमणिः। पुं। खनामख्यातमणौ। नीलवर्ण मणि। तत्पर्य्यायः,—सौरिनीलाश्मा, नीलोत्पलः, तृणग्राही, महानीलः, सुनीलकः। गुणाः—तिक्तोष्णः कफपित्तवातघ्नः धारणात् शुभदश्च। रा.नि.व.१३।

नीलमण्डलम्। क्ली। परूषकफले। पुं। तद्वृक्षे। फलसा। रा.नि.व.११।

नीलमयूरः। पुं। मयूरभेदे। गुणाः—"मेधाबुद्धिं स्वीतसाञ्च करीत्युत्पाटनं शिखी। स वातलोऽतिबलकृत् पुनः किञ्चिद्रसायनः॥" अवि. २१अ.।

नीलमल्लिका। स्त्री। कपित्थवृक्षे। रा.नि. व.११। [वै.निघ.।

नीलमक्षिका। स्त्री। पृथुकृष्णमक्षिकायाम्।

नीलमाषः। पुं। राजमाषे। वर्बटी। प.मु.। कृष्णमाषे। काल कलाय।

नीलमौलिकः। पुं। खद्योते। भ.मा.।

नीलमृत्तिका। स्त्री। कृष्णमृत्तिकायाम्। पुष्पकासीसे। रा.नि.व.१३।

नीलमेहः। पुं। पित्तजन्यमेहरोगे। अत्र रोगी सफेनं स्वच्छं नीलञ्च मेहति। सु.नि.६अ.।

नीलयष्टिका। स्त्री। कृष्णेक्षौ। काजली ईक्षू। कृष्णकुटजे। वै.निघ.। [व.११।

नीलरत्न(क)म्। क्ली। नीलमणौ। रा.नि.

नीलराज्ञा। स्त्री। नीलपुष्पराज्ञायां। र.मा.।

नीलरूपकः। पुं। प्रपद्वृक्षे। वै.निघ.।

नीललोहम्। क्ली। वर्त्तलौहे, कृष्णलौहे। रा.नि.व.१३।

नीललोहितः। पुं। नीलरक्तमिश्रितवर्णे। बेगुनि रं।

नीललोहिता। स्त्री। भूजम्बूवृक्षे। मेटो जाम। भ.च.।

नीलवकः। पुं। नीलवर्ण-बके।

नीलवटी। स्त्री। नीलवल्ल्याम्। नीलवड़ि। चि.क्र.क.केशरञ्जने।

नीलवर्णम्। क्ली। रसाञ्जने। र.मा.। नीलमूलके। परूषकफले। वै.निघ.। [नि.व.५।

नीलवर्षाभूः। स्त्री। नीलपुनर्नवायाम्। रा.

नीलवला। स्त्री। वन्दायाम्। परगाछा।

नीलवल्ली। स्त्री। वन्दाके। वान्दड़ा। र.मा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीलवीजः। पुं। स्वनामख्यातासनवृक्षे। **नीलवीज आसनवृक्ष** । मं खोदिरबीया। कं कैपिन्नीने गुणः—वीजवृक्षो कटुः शीतो कषायो कृमिघ्नो सारको कण्डूदद्रुघ्नो। तयोरसित श्रेष्ठः। रा.नि.व.९। [प.मु.।

नीलवृक्षा। स्त्री। कृगलान्त्र्याम्। नील वोणा।

नीलवृक्षा। स्त्री। नीलवृक्षायाम्।

नीलवृन्तकम्। क्ली। तृणकाष्ठे। गूलि। रा. नि.व.९।

नीलवृषा। स्त्री। वार्त्ताकौ। रा.नि.व.७।

नीलवृक्षः। पुं। कीडणमालवयोः स्वनामप्रसिद्धे वृक्षे। तत्पर्य्यायाः,—नीलः, वातारिः, शीफनाशनः, नरनामा, नखवृक्षः, नखालुः, नरप्रियः। गुणाः—'नीलवृक्षस्तु कटुकः कषायोष्णो लघुस्मृधा। वातामयप्रशमनो नानाविषयुनाशनः॥' रा.नि.व.९।

नीलशिगुः। पुं। शोभाञ्जनवृक्षे। रा.नि.व.७।

नीलशिम्बिका। स्त्री। शिम्बीभेदे। वै.निघ.।

नीलशुकः। पुं। महाविषवृश्चिकजातिभेदे। सु.कल्प.८अ.। [वै.निघ.।

नीलशोधनी। स्त्री। नील्याम्। नील।

नीलषष्टिकः। पुं। षष्टिकशालिविशेषे। नीलवर्ण षेटे धान। गुणैः गौरषष्टिकाक्किञ्चिदूनः। रा.नि.व.१६। [याम्।

नीलसन्ध्या। स्त्री। नीलपुष्पापराजितालता-

नीलसस्यम्। क्ली। वाजरा इति ख्याते शस्ये। वाजरा। वै.निघ.।

नीलसहाचरः। पुं। नीलपुष्पझिण्ट्याम्। हिं नीलपुष्पकटसरैया। भा.म.४भ.सुखरी.चि.। "तुलाघृतं नीलसहाचरन्तु।" भैष.।

नीलसारः। पुं। नीलवीजासनवृक्षे। रा.नि. व.९। तिन्दुकवृक्षे।

नीलसिन्दुकः (का) (वारः)। पुं, स्त्री। नीलनिर्गुण्ड्याम्। नील निशिन्दा। रा.नि.व.४।

नीलसिन्दुवारः। पुं। नीलवर्ण सिन्दुवारवृक्षे। नीलनिसिन्दा। हिं नीलसिन्दु। तत्पर्य्यायाः,—सीतासहा, निर्गुण्डी, सिन्दुकः, कपिका, भूतकेशी, इन्द्राणी, नीलिका, नीलनिर्गुण्डी। गुणाः—कटुः, उष्णः, तिक्तः, कासश्लेष्मशीफहरः, वातार्शःप्रदराध्मानानाशी च।

नीलस्यन्दा। स्त्री। नीलापराजितायाम्। रा.नि.व.३।

नीला। स्त्री। नीलीवृक्षे। नकुल.१५अ.। नील-पुनर्नवायाम्। लाक्षायाम्। रा.नि.व. ५।६। सृक्कायाम्। कृष्णजीरके। वै.निघ.। तन्नामकाई-जवुगतमर्म्मभेदे। तत्स्थान कण्ठनाड़ी भवतः। सु.शा.६अ.। नीलमक्षिकायाम्। अम.।

नीलाख्यः। पुं। नीलमणौ। वै.निघ.।

नीलाङ्गः। पुं। नीलकौञ्चपक्षिणि। पाराबते। वै.निघ.। सारसपक्षिणि। चाषपक्षिणि। रा.नि. व.१९।

नीलाङ्गुः। पुं, स्त्री। गोमक्षिकायाम्। हि.। क्रिमौ। अम.।

नीलाञ्जनम्। क्ली। रसाञ्जने। तुत्थके। रा. नि.व.१३। सौवीराञ्जने। सफेद सुर्मा। र.मा.। गुणाः—उष्णं रसाञ्जनं तिक्तं कटु श्लेष्मसुखव्रणरोगव्रणदाहघ्नं भेदकञ्च। रा.नि.व.१३। तच्छोधनं —"नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितं। दिनैकमातपे शुष्कं भर्वेल्कार्थेषु योजयेत॥" र.सा. सं.। [जामरुल। वै.निघ.।

नीलाञ्जनच्छदा। स्त्री। जम्बूवृक्षे।

नीलाञ्जना। स्त्री। वीजवृक्षे। वै.निघ.।

नीलाञ्जनी। स्त्री। कालाञ्जन्याम्। नील कापास। रा.नि.व.४।

नीलाण्डकः। पुं। रोहितमत्स्ये। वै.निघ.।

नीलाद्रिकर्णी। स्त्री। नीलापराजितायाम्। रा.नि.व.३।

नीलापराजिता। स्त्री। नीलपुष्यापराजितायाम्। नील अपराजिता। मं नीलमूपली। कं नीलगिरिकर्णिके। तत्पर्य्यायः,—नीलपुष्पी, महानीली, नीलगिरिकर्णिका, गवादनी, व्यक्तगन्धा नीलसन्ध्या। गुणाः—शीतला तिक्ता ज्वरदाहरक्तातिसारघ्नी विच्छर्दिकीन्मादमदभ्रमश्वासातिकासघ्नी आमान्नघ्नी च। रा.नि.व.३।

नीलाब्जम्। क्ली। नीलकमले। रा.नि.व.१०।

नीलाभ्रम्। क्ली। कृष्णाभ्रे। नील अभ्र। रा.नि.व.१२। See अभ्रकम्। [व.६।

नीलाम्बरम्। क्ली। तालीशपत्रे। रा.नि.

नीलाम्बुजम् (न्म)। क्ली। नीलपद्मे। प.मु.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीलाम्लानः। पुं। नीलपुष्पभिण्टीवृक्षे। नील झाँटी। मं कालाकोरांट। कं करियगोरंटे। गुणाः—कटुः तिक्तः कफ-वात-शूलघ्नः कण्डू-कुष्ठ-व्रणघ्नः शीफत्वग्दोषघ्नश्च। रा.नि.व.१०।

नीलाम्लो। स्त्री। स्वनामख्यातफलवृक्षे। हिं नल्लचुक्कगुड़, कालीपिठालि। मं अजगन्धि। कं वेलियगिड्डु। सा श्वेतनीलभेदेन द्विधा। गुणाः—मधुरा रुच्या कफवातहरी च। रा.नि.व.४।

नीलालिः। पुं। भ्रमरे।

नीलालुः। पुं। नीलवर्णालुकविशेषे। नील आलू। मं नीलालु। कं करियगेणसु। तत्पर्य्यायौ,—असितालुः, श्यामालुकः। गुणाः—मधुरः शीतः पित्तदाहश्रमघ्नश्च। रा.नि.व.७।

नीलाशी। स्त्री। नीलनिर्गुण्ड्याम्। वै.निघ.।

नीलाश्मजम्। क्ली। तुत्थके। वै.निघ.।

नीलाश्मा। पुं। नीलमणौ। रा.नि.व.१३।

नीलासनः। पुं। नीलवीजासनभेदे। शिम्बी-शालविशेषः। तत्पर्य्यायः,—नीलवीजः, नील-पवः, सुनीलकः, नीलद्रुमः, नीलसारः, नील-निर्य्यासकः। गुणाः—कटुः शीतः कषायः कफकण्डू-दद्रुघ्नः सारकश्च। रा.नि.व.९। [निघ.।

नीलाह्वा। स्त्री। कृष्णापराजितायाम्। वै.

नीलाह्वः। पुं। हंसे। वै.निघ.।

नीलिका। स्त्री। कृष्णलौहे। विदूरीतिभाषा। नील्याम्। नील। रा.नि.व.४। नीलनिर्गुण्ड्याम्। वर्त्तलौहे। रा.नि.व.१३। क्षुद्ररोगविशेषे। लक्षणं —"कृष्णमेवंगुणं वक्त्रे गात्रे वा नीलिकां विदुः।" मा.नि.। "शोककोधादिकुपिताद्धातपित्तास्मुखे तनु। श्यामल मण्डल व्यङ्गं वक्त्रादन्यत्र नीलिका॥" वा.उ.३१अ.। लिङ्गनाशनामकपित्तिकदृष्टिरोगे। भा.। See काचः। इन्दीवरालतायाम्। वङ्गे। कालनीलौहे। वै.निघ.। वारिज्वरे। गजवै.।

नीलिनी। स्त्री। नील्याम्। च.सू.२अ.। नीलवृक्षायाम्। रा.नि.व.४। सु.सू.३९अ.। सि.यो. अ.मा.चि.पञ्चगव्यघृते। "नीलिनीं कटुरोहिणीम्।" च.द.ज्व.चि.। "नीलिनीमजगन्धाञ्च।" नीलपुनर्नवायाम्। रा.नि.व.५। वा.सू.१५अ.। "सुक्ष्मश्छिन्नोनीलिनीतिल्वकानि।" श्वेतबलायां। च.द.गुल्म-चि.। "सुशला नीलिनी वचा।" श्यामविदलतायां। अ.र.। सिंहपिप्पल्याम्। वै.निघ.।

नीलिनीफलम्। क्ली। नीलीबीजे। नीलेक्षु बीज। सु.सू.१अ.।

नीली। स्त्री। स्वनामख्यातवृक्षे। नील गाछ। रा.नि.व.४। See अल्पिका। नीलवृक्षायाम्। नील वोणा। तत्पर्य्यायः,—काला, क्लीतकिका, श्यामाणा, मधुपर्णिका, रञ्जनी, शीफली, तुत्या, तूणी, दोला, नीलिनी, दूली, दूलिका, द्रोणिका, अल्पीका, कुत्सला, मेघवर्णा, श्यामणी, श्यामिणी, नीलपुष्पिका, नीला, तूली, द्रोणी, मेला, तुच्छा, नीलपत्री, राज्ञी, नीलिका, नीलपुष्पी, काली, श्यामा, शोधनी, शीफला, श्याम्या, भद्रा, भारवाही, मोचा, कृष्णा, व्यञ्जनकेशी, महाफला, असिता, क्लीतनी, केशी, चारटिका, गन्धपुष्पा, श्यामलिका, रङ्गपत्री, महाबला, स्थिररङ्गा, रङ्गपुष्पी, कालकेशी। गुणाः—"नीलिनी रेचनी तिक्ता कैश्या मोहभ्रमापहा। तृष्णा हृल्लुदरप्लीह-वातरक्तकफानिलान्। आमवातहृदावर्त्तं मन्दञ्च विषमूढतम्॥" भा.। च.द.सन्निपातज्व.चि. अष्टादशाङ्गे। "नीली कृमिघ्नकं विद्यात्।" तन्नामकौषधौ, यस्याः क्षीरं नीलं पुष्पञ्चापि नीलम्। या चानेक-लताप्रतानवती भवति। च.चि.१अ.। नीलाञ्जनिकायां, शारदफलायां, सिंहपिप्पलीति डल्हणः। सु.चि.२५अ.। कालाञ्जन्याम्। काल कार्पास। वा.टी.हेमा.। शीफलिकायाम्। वेल गाछ। बृहदारके। "नीलीतुल्यं त्वगेलञ्च।" "चूर्णं श्यामा तृणनीली।" सु.सू.४अ.।

नीलीफलम्। क्ली। शीफले। सु.चि.१७अ.।

नीलीमाषः। पुं। राजमाषे। वर्बटी।

नीलोद्वृत्ताकृतिः। स्त्री। शरपुङ्खायाम्। शरपूङ्खा, वन नील। वै.निघ.।

नीलोत्पलम्। क्ली। (Nymphaea stellata or N. Caerulea.) नीलकमले। नील पद्म, नीलोत्पल। नीलकुमुदे। नील शुन्दि। हिं नीलोपर। मं नीलोत्पल। कं नेइदिलु। तें नल्लकुलुव। तत्पर्य्यायः,—उत्पलकं, कुवलयं, इन्दीवरं, कन्दोल्यं, सौगन्धिकं, सुगन्धं, कुड्मलकं, असितोत्पलं, कन्दोटं, इन्दिरावरं, इन्दीवारं, नीलपद्मम्। गुणाः—अतिस्वादु शीतलं सुरभि सुखकृत् पाकेऽतितिक्तं रक्तपित्तघ्नञ्च। रा.नि.व.१०। "नीलोत्पलमतिस्वादु शीतं सुखकरं मतं। पाके-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिक्तं सुरभि रक्तपित्तस्य नाशकम् ॥" द्रव्यगुणः। च.अर्श-चि.। तन्मूलगुणाः—गुरु विष्टम्भि शीतलञ्च। राज.२प.। पुं। नीलमणौ।

नीलोत्पलिनी (ली)। स्त्री। नीलकमलिन्यां। नीलपद्मের ঝাড়। कुमुदिन्यां। শুন্দী বা কুমুদফুলের ঝাড়। रा.नि.व.१०।

नीलोदरः। पुं। महाविषवृश्चिकजातिभेदे। सु.कल्प.८अ.।

नीलोपलः। पुं। नीलमणौ। नीलकान्तमणि। रा.नि.व.१३।

नीवरम्। क्ली। जले। वै.निघ.। पुं। पङ्के।

नीवारः। पुं। Wild variety of Oryza sativa. तृणधान्यविशेषे। উড়ি ধান। हिं तौलो। तें निवरिवट्टु। तत्पर्य्यायः,—तृणधान्यं, वनव्रीहिः, अरण्यधान्यं, मुनिधान्यं, तृणोद्भवं, अरण्यशालिः। गुणाः—मधुरः स्निग्धः लघुः पवित्रः पथ्यदश्च। रा.नि.व.१६। "नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत्। भा.धा.व.। तदन्नगुणाः—"नीवारभक्षी रुचिदो लघुर्दीपनकृद्गुरुः। वातकारी यकृच्छ्वासप्लीहामत्रणनाशनः॥" वै.निघ.। रक्तपित्ते हितः। सि.यो.र.पि.चि.। खड়্খাद्ये।

नीवारतुण्डिका। स्त्री। नीवारे। উড়ি ধান। रत्ना.।

नीहारः। पुं। हिमे। शिशिरे। तत्पर्य्यायाः,—निहारः, सिहिका, अवश्यायः, तुषारः, तुहिनं, हिमं, प्रालेयं, महिका, खजलं, निशाजलम्। स च कफ-वातवर्द्धकः। "शतांधिकः सनीहारः सविद्युत्स्तनयित्नुवान्। राज.२प.।

नुत्तः। पुं। क्षुद्रपनसवृक्षे। लकुचवृक्षे। वै.निघ.।

नूतनगुडः। पुं। अभिनवगुड়ে। নূতন গুড়। गुणाः—दाहघ्नः तापघ्नः रसनेन्द्रियतर्पणः शीतः सुमधुरश्च। रा.नि.व.१४।

नूदः। पुं। ब्रह्मदारुवृक्षे, अश्वत्थभेदे। गन्ना অশ্বত্থ। अम.।

नृदन्ता (न्ती)। स्त्री। महामेदायाम्। वै.निघ.।

नृपः। पुं। ऋषभके। ঋষভক। प.मु.। राजादनवृक्षे। খির্নী গাছ। वै.निघ.२भ.चन्दनादितैले। "चन्दनाम्बु नृपं वाप्यम्।" तगरपादुकायाम्। वै.निघ.।

नृपकन्दः। पुं। राजपलाण्डौ। লাল পেঁয়াজ। रा.नि.व.७।

नृपतरुः। पुं। आरग्वधवृक्षे। राजादनीवृक्षे। খির্নী। चि.क्र.क.४प.।

नृपद्रुमः (पादपः)। पुं। स्थूलारग्वधवृक्षे। বড় সোণালু। रा.नि.व.९। भा.वा.र.चि.विफलागुग्गुलौ। राजादनीवृक्षे। খির্নী। रा.नि.व.११।

नृपप्रियः। पुं। राजपलाण्डौ। रा.नि.व.७। रामशरे। রামশর। रा.नि.व.८। आम्रवृक्षे। रा.नि.व.११। सारसपक्षिणि। वै.निघ.। वंशभेदे। বেড়ু বাঁশ। श.च.। [व.७।

नृपप्रियफला। स्त्री। वार्त्ताकीवृक्षे। रा.नि.

नृपप्रिया। स्त्री। केतकीवृक्षे। কেয়া গাছ। रा.नि.व.१०। पिण्डीखर्জ্জুरे। शालिधान्ये। वै.निघ.।

नृपबदरः। पुं। राजबदरवृक्षे। रा.नि.व.११।

नृपमाङ्गल्यकम्। क्ली। आहुल्यचुपे। रा.नि.व.४।

नृपमाषः। पुं। राजमाषे। रा.नि.व.१६।

नृपवल्लभः। पुं। राजामवृक्षे। राजबदरे। रा.नि.व.११। ग्रहण्यां रसविशेषे। कज्जलिः८ तो. जातीफलं (জায়ফল) लवङ्गं (লবঙ্গ) मुस्ता (মুতা) गुड়ুলक् एला टङ्गणचारः (সোহাগার খই) जीरकं (জীরা) तेजपत्रं यमानी शुण्ठी सैन्धवलवणं लौहम् अभ्रं तालम् एषां प्र. ४ तो. मरिचं ८ तो. छागीदुग्धेन धात्रीरसेन वा मर्द्दयेत्। इदृत् यथा—पारदः गन्धकः लौहम् अभ्रं शीषकं चित्रकमूलं चित्रन्मूलं टङ्गणचारः जातीफलं हिङ्गु गुड়ুलक् एला मुस्ता लवङ्गं तेजपत्रं यमानीद्वयं शुण्ठी सैन्धवं मरिचं सौभ्यं प्र. १ तो. स्वर्णभस्म १२ रक्तिकं। आर्द्रकरसेन आमलकीरसेन वा भावयेत्। मात्रा माषकलायमिता। र.सा.सं।

नृपवल्लभघृतम् (तैलम्)। क्ली। नेवरीरोगे घृतं तैलञ्च। गव्यघृतं, तैलं वा ॥० अ. दुग्धं २अ.। कल्कार्थं—जीवकः (গুলঞ্চ) ऋषभकः (বংশলোচন) मेदा (অশ্বগন্ধা) द्राक्षा (किस्मिस्) माषपर्णी कण्टकारी बृहती यष्टिमधु बाल्यालकं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(बेलेड़ा) विड्ङ्गं मञ्जिष्ठा शर्करा (चिनि) राखा नीलोत्पलं गोचुरं पुष्करीकं (पुण्डरिया) पुनर्नवा सैन्धवं पिप्पली (पिपूल) प्रत्येकं ॥० तो०। तैलस्य घृतसेवनञ्च। भैष०। अथवा तैल-घृतयोः प्र० ४ भ० दुग्धं १६भ० कल्कद्रव्यं प्र० २ तो०। रस०र०।

नृपवल्लभा। स्त्री। केविकापुष्पवृक्षे। रा०नि० व०१०। महाराजचूतवृक्षे। वै०निघ०।

नृपवृक्षः। पुं। राजवृक्षे। सोन्दाल गाछ।

नृपात्मजः। पुं। महाराजचूतवृक्षे। रा०नि० व०११। आम्रातकवृक्षे। वै०निघ०। स्त्री (जा)। कटुतुम्ब्याम्। र०मा०।

नृपान्नम्। क्ली। शालिधान्यविशेषे, राजान्ने। गुणाः—विदोषघ्नं सुस्निग्धं मधुरं लघु दीपनं बल्यं पथ्यं कान्तिदं वीर्य्यवर्द्धनञ्च। रा०नि०व०१६।

नृपामयः। पुं। राजयक्ष्मणि, क्षयरोगे। रा०नि०व०२०।

नृपार्हम्। क्ली। शालिधान्ये। हैयङ्गवीन धान्य। प०मु०।

नृपावर्त्तः। पुं, क्ली। राजावर्त्तमणौ। रा०नि०व०१३।

नृपाह्वयः। पुं। राजावर्त्तमणौ। प०मु०। राजपलाण्डौ। रा०नि०व०७।

नृपेष्टः। पुं। राजपलाण्डौ। रा०नि०व०७। राजवदरवृक्षे। रा०नि०व०११। नीलीवृक्षे। वै०निघ०।

नृपोचितः। पुं। राजमाषे। वर्बटौ। प०मु०। रा०नि०व०१६। [पाण्डौ। रा०नि०व०१८।

नृप्राणम्। क्ली। पादात् ऊर्द्ध्वविस्तृतदोः।

नृसा(द)रः। पुं। निषादल इति ख्याते द्रव्ये। महादावकै।

नेता। पुं। सिन्धुवारवृक्षे। निर्गुण्डी। रा०नि० व०४। निम्बवृक्षे। रा०नि०व०९।

नेत्रम्। क्ली। दर्शनेन्द्रिये। चक्षुः। रा०नि०व० १८। नेत्रपरीक्षा यथा—वातेन रूक्षं धूम्ररुणञ्च। पित्तात् पीतरक्तहरितवर्णं सदाहञ्च। कफेन धवलं ज्योतिर्हीनञ्च। भा०। तदुक्तं—"विद्याद्वाङ्गुलबाहुल्यं साङ्गुलोदरसम्मितं। द्व्याङ्गुलं सर्व्वतः साई भिषङ्नयनबुद्बुदं। सुवृत्तं गोलनाकारं सर्व्वभूतगुणोद्भवम्। जलं भुवोऽग्नितो रक्तं वातान्न कृष्णसितं जलात्। आकाशादयुमार्गाच्च जायन्ते नेत्रबुद्बुदे। दृष्टिस्थाने तथा वक्ष्ये यथा ब्रूयादिशारदः। नेत्रायामविभागस्तु कृष्णमण्डलमुच्यते। कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः। मण्डलानि च सन्धीय पटलानि च लोचने।" सु०उ० १अ०। तरुमूले। गाछेर गोड़। रा०नि०व०२। च०द०वि०च०चि०। "दीर्घपक्ष्मकर्णाख्यनेत्रम्।" वस्तिगुलाकायाम्। गला इति लोके। यथा—नेत्राणि, सुवर्णरजततास्रायोरीतिदन्तशृङ्गसंघातसारमयानि श्लक्ष्णानि दृढानि गोपुच्छाकाराणि ऋजूनि गुटिकासुखानि। तदभावे नलबंशास्थिसम्भवा। नेत्रप्रणिधानदोषाः षट्, पार्श्वविपीडितमत्युच्छ्रितमवसन्नं तिर्य्यक्क्षिप्तं चलितं विवर्त्तितमिति। अतिस्थूलं कर्कशमवनतमणु भिन्नं सन्निकृष्टविप्रकृष्टकर्णिकं सूक्ष्मातिच्छिद्रमतिदीर्घमतिह्रस्वमित्येकादश नेत्रदोषाः। सु०चि०३५अ०। Sec अनुवासनवस्तिः।

नेत्रकर्म्म (प्रसाधनम्)। क्ली। सप्तविधनेत्रोपचारेषु। यथा—"सेक्याश्चोतसम्पिण्डी विड़ालस्तर्पणलेखा। पुटपाकोऽञ्जनं नेत्रे यथावस्थं प्रयोजयेत्॥" तोड़०। भा०। [अम०।

नेत्रच्छदः। पुं। नेत्रावरणे। चक्षेर पाता।

नेत्रजलम्। क्ली। अश्रुनि। चक्षेर जल।

नेत्रधावनम्। क्ली। चक्षुर्धावने। तस्य विधिः—"दन्तसूक्ष्मघृष्टा प्रातः सिञ्चेच्च लोचने। तोयपूर्णमुखस्तेन दृष्टिराशु प्रसीदति॥" राज०१प०।

नेत्रनैर्म्मल्यकारी। पुं। खपरखातौ। वै०निघ०।

नेत्रपर्य्यन्तः। पुं। अपाङ्गदेशे। रा०नि०व०१८।

नेत्रपाकः। पुं। चक्षुषः पाके। लक्षणं—"कण्डूपदेहास्रयुतः पक्वोदुम्बरसन्निभः। संरम्भी पच्यते यस्तु नेत्रपाकः स शोथजः॥" मा०नि०।

नेत्रपाषाणः। पुं। कटुकायाम्। र०मा०।

नेत्रपिण्डः। पुं। विड़ालि। नेत्रनीलके। हारा०।

नेत्रपुटम्। पुं। नेत्रच्छदे। [३।

नेत्रपुष्करा। स्त्री। रुद्रजटायाम्। रा०नि०व०

नेत्रबलम्। क्ली। रसाञ्जने। वै०निघ०।

नेत्रभूषणम्। क्ली। कृष्णाञ्जने। काल सुर्मा। वै०निघ०। [वै०निघ०।

नेत्रमङ्गलकारी (इन्)। पुं। खपरखातौ।

नेत्रमलम्। क्ली। पिचटे। पिचुटी। वै०निघ०।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेत्रमीला। स्त्री। युवतिकान्तलतायाम्। रा. नि.व.३।

नेत्ररञ्जनम्। क्ली। अञ्जने। काजल।

नेत्ररोगः। पुं। दृष्टिगतरोगे। चक्षुके रोग। तस्य निदानं—सन्तप्तदूरेक्षणरोदनकोपशोकाभिघातादिभिर्वातादयः कुपिता नेत्रविकारान् जनयन्ति। ते च रोगाः षट्सप्ततिः। यथा—वातजा दश, पित्तजा दश, कफजास्त्रयोदश, रक्तजाः षोडश, त्रिदोषजाः पञ्चविंशतिः, बाह्यौ द्वौ। ते च पुनः षट्सप्ततिप्रकारा अवयवभेदेन षट्सप्ततिर्भवन्ति। यथा—सन्ध्यास्थया नव, वर्त्मजा एकविंशतिः, शुक्लजा एकादश, कृष्णजास्त्रयोदशः सर्व्वस्थाः सप्तदश, दृष्टिजाः द्वादश, बहिर्जातौ द्वौ चेति। मा.नि.। अथास्य नेत्ररोगा यथा—"तोयस्रावः प्रसन्नाख्यो नक्तान्धस्तिमिरस्तथा। सुक्तकी सुक्तजालञ्च पटलञ्चाधिमन्थकः॥ पूयस्रावश्च काचाख्यो रक्तस्रावस्तथैव च। पिपिटी वर्त्मरोगश्च अभिष्यन्दस्तथैव च॥ वातपित्तकफैर्दुष्टैर्नेत्ररोगा भवन्त्यमी। लिङ्गं चिकित्सितं तेषां प्रवक्ष्याम्यनुपूर्व्वशः॥" ज.द.।

नेत्ररोगहा। पुं। हरिकाख्यां। विष्णुक्रान्ता। रा.नि.व.८।

नेत्ररोम। क्ली। नेत्रपक्ष्मणि। वै.निघ.।

नेत्रवती। स्त्री। पश्चिमदेशप्रसिद्धभारतवर्षीयनद्याम्। एतज्जलगुणाः—सुमधुर कान्तिजनकं हृद्यं पुष्टिकरं दीपनं पाचनं बल्यञ्च। रा.नि.व.१४।

नेत्रवर्त्म। क्ली। दृष्टौ, नेत्रे। वै.निघ.।

नेत्रवर्त्मबन्धः। पुं। नेत्ररोगविशेषे। वै.निघ.।

नेत्रवस्तिः। पुं। नेत्रे वस्तिदानप्रकरणे। "नेत्रं तच्च परित्यज्य सार्द्धञ्च हृयसङ्गुलम्। सर्व्वतश्चापि चमसीं जलं दत्त्वा प्रमृद्य च॥ तेन पिष्टं गालवालं दृढं सन्धिविवर्जितम्। कृत्वालवालं दृक्प्रान्ते शुक्लभागं द्रवेण वै। पूरयेत्तु यथापक्ष्म पूरितञ्चैव जायते। नेत्रे पक्ष्म प्रकुर्व्वीत विकासन्तु तथैव च॥ स्वस्थे कफे सन्धिरोगे मात्रा पञ्चगतं विदुः। कफे वाते क्षयरोगे मात्रा सप्तगतं मता। दृष्टिरोगेष्वष्टगतं अधिमन्थे सहस्रकम्। शुक्लेऽस्ति कुटिले क्रुद्धे स्यात् द्वादशगतो मता॥ पित्तरोगे नवगत सहस्रं वातरोगिणाम्। एकाहं वा द्व्यहं वापि पञ्चाहं चेष्यतेऽथवा॥ द्रवस्नापाक्तो नीत्वा नीलद्रव्यं विलोक्य च। सुखं निरीक्षयेत् पश्चात् नेत्रवस्तिविधिस्त्वयम्॥ निर्वृत्तिर्व्याधिशान्तिश्च क्रियालाघवमेव च। सम्यक् रोगे सुखसुप्तिर्वैशद्यं वर्णपाटवम्॥ शोकाद्युपातगुरुता स्नेग्धे स्यादतितर्पिते। रूक्षाविलं सरक्तञ्च नेत्रं स्याद्धीनतर्पितं॥ रूक्षे स्निग्धः क्रमश्चाव प्रयोज्यः सम्प्रदायतः।" तोड़.। See सु.उ.१८अ.।

नेत्रविभूषणम्। क्ली। नीलाञ्जने। वै.निघ.।

नेत्रवैमल्यकारी (रिन्)। पुं। खर्परधाती। वै.निघ.।

नेत्राभिष्यन्दः। पुं। नेत्रसर्व्वगतरोगे। नेत्रशूल वा चोक उठा। स चतुर्व्विधः वाताभिष्यन्दः, पित्ताभिष्यन्दः, कफाभिष्यन्दः रक्ताभिष्यन्दश्चेति। अयं रोगः प्रायेणाधिमन्थादिसर्व्वविधनेत्ररोगाणामाकरः। लक्षणं यथा—"प्रायेण सर्व्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः। वातात्पित्तात् कफाद्रक्ताद्विष्यन्दश्चतुर्विधः। प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः॥ निस्तोदनस्तम्भनरोमहर्षसङ्घर्षपारुष्यशिरोभितापाः। विशुष्कभावः शिथिरायुता च वाताभिपन्ने नयने भवन्ति॥ दाहप्रपाकौ शिथिराभिनन्दा धूमायनं वाष्पसमुच्चयश्च। उष्णायुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति॥ उष्णाभिनन्दा गुरुताच्छिशीफः कण्डूपदेहावतिशीतता च। स्रावो सुहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति॥ तास्रायुता लोहितनेत्रता च राज्यः समन्तादतिलोहितास्य। पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति॥" सु.उ.६अ.।

नेत्रामयः। पुं। नेत्ररोगे। रा.नि.व.२०।

नेत्रामयहरः। पुं, स्त्री। खर्परे। वै.निघ.।

नेत्राम्बु। क्ली। अश्रुणि। चक्षुके जल। अम.।

नेत्रारिः। पुं। स्नुहीवृक्षे। मनसा गाछ। रा.नि.व.८।

नेत्रार्म। क्ली। अक्षिजातार्मसि। तच्च वर्त्मावरोधः वेदनास्रावो दर्शननाशश्च। सु.नि.२अ.।

नेत्रास्थि। क्ली। नयनाधिष्ठाने धौताख्यास्थिद्वये। च.शा.७अ.।

नेत्री। स्त्री। नाभ्यां। श.र.।

नेत्रोदकम्। क्ली। नेत्रजले। अश्रु।

नेत्रोपमः। पुं। वातामे। वादाम। भा.।

नेत्रोपमफलः। पुं। वातामवृक्षे। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेत्रौषधी। स्त्री। अजशृङ्ग्याम्। तीत पूछी, कौंगा। प.मु.। र.मा.। क्ली। नेत्रहितौषधमात्रे। पुष्पकाशये। नीलाञ्जने। नील शीराकस। रा.नि.व.१३।

नेत्रयवर्गः। पुं। चक्षुर्हितकरद्रव्यगणे। यथा—"द्विधा रसाञ्जनम्मोक्षं विफला लोध्रकद्वयं। कुमारिका च विमला गणोऽयं नेत्रसंज्ञकः॥" अर्क चि.।

नेदिष्ठः। पुं। अङ्कोटवृक्षे। ढटा.।

नेपः। पुं। उदके। जल।

नेपा। स्त्री। नवमल्लिकायाम्। सेउती। रा. नि.व.१०। कलूर्य्याम्। वा.उ.५अ.। मनःशिलायाम्। वै.निघ. हिक्का.चि.धूमे।

नेपालः। पुं। छगणेचौ। वै.निघ.। [नि.व.१३।

नेपालकम्। क्ली। ताम्रधातौ। ताम्बा। रा.

नेपालनिम्बः। पुं। किराततिक्तके। चिरायता। चिरइता नेपालनिंबु, चिराइते इति च लोके। तत्पर्य्यायः,—नेपालः, तृणनिम्बः, ज्वरान्तकः, गाढ़ौतिक्तः, निदारिः, सन्निपातरिपुः, सन्निपाततुत्। गुणाः—"नेपालनिम्बः शीतोष्णो योगवाही लघुस्तथा। तिक्तोऽतिकफपित्तास्रशोफतृष्णाज्वरापहः।" रा.नि.व.९।

नेपालमूलकम्। क्ली। गजदन्ताकारे मूलकभेदे। भा.पू.१भ.शा.व.।

नेपालशृङ्गी। स्त्री। नेपालदेशीयशृङ्गीविषे। नेपालदेशीय मिठा विष। गुणाः—"नेपालशृङ्गी नैपाली हन्ति सा कफजान् गदान्। वातजान्निखिलांश्चापि सन्निपातोद्भवं ज्वरम्। आमवातं महाघोरं हृद्रोगरूपि दारुणम्।" अमि.।

नेपाली(ली)का। स्त्री। सोमलतायाम्। वै.निघ.। मनःशिलायाम्।

नेपालीयम्। क्ली। ताम्रे। वै.निघ.।

नेपालेक्षुः। पुं। पुण्ड्रेक्षौ। पूँड़ि ईख़। रा.नि.व.१४।

नेमिः (मी) (इन्)। पुं। शुक्लखदिरे। रा. नि.व.८। चक्रवाकपक्षिणि। च.इ.१अ.। तिनिशवृक्षे। अम.। र.मा.।

नेमिवृक्षः। पुं। श्वेतखदिरवृक्षे। रा.नि.व.८।

नैऋतवायुः। पुं। दक्षिणपश्चिम-कोणवाहिसमीरणे। तद्गुणाः—"नैऋतो न विदाहकृत्।"

नैकुम्भम्। क्ली। लेपालबीजे। सा.कौ.। पुं। लेपालवृक्षे।

नैगमेषः। पुं। पित्तग्रहसंज्ञके बालरोगे। तदादिष्टे लक्षणं यथा—"यः फेनं वमति विनश्यति च सद्यः क्रीडेगं बिलपति चौद्विग्नमीक्षमाणः। व्यथ्येत प्रततमधो वसासगन्धिर्निद्रो भवति हि नैगमेषजुष्टः॥" नगमेषस्तु पार्व्वत्या सृष्टो मेषाननो ग्रहः। कुमारधारी देवस्य गृह्यस्यात्मसमः सखा। सु.उ.३०अ.।

नैगमेषापहृतः। पुं। नागोदरे। नागोदर। सु.शा.१०अ.।

नैचिकी। स्त्री। उत्तमायां गवि। अम.।

नैचुलम्। क्ली। हिज्जलबीजे। च.सू.२अ वमन.।

नैदानिकः। त्रि। निदानशास्त्रकुशले।

नैपालः। पुं। नेपालनिम्बे। चिरेत। रा. नि.व.९। [मूला।

नैपालमूलकम्। क्ली। हस्तिमूलके। बड़ मूला।

नैपालिकम्। क्ली। ताम्रधातौ। रा.नि.व.१३।

नैपाली। स्त्री। मनःशिलाभेदे। नेपाली मनछाल। मे.। सु.चि.२अ.। मनःशिलायां। र.मा.। रा.नि.व.१३। नीलयां। शा.र.। नवमल्लिकायाम्। सेउती। वसन्ती नेवारीति लोके। भा.। रा.नि.व.१०। श्वेतापालिकायाम्। मे.। इक्षुभेदे, नेपालीचौ। गुणाः—वातकरः कफपित्तघ्नः कषायो विदाही च। सु.सू.४५अ.।

नैयग्रोधम्। क्ली। वटवृक्षफले। वटफल। अम.।

नैर्झरजलम्। क्ली। निर्झरवारिणि। झर्णेका जल। "शैलसानुस्रवद्वारिप्रवाहे निर्झरो झरः। स तु प्रस्रवणस्यापि तत्स्थं नैर्झरं सलम्।" भा.।

नैषधकः। पुं। निषधदेशीये शालिधान्यभेदे। गुणाः—शालिवत्। च.सू.२७अ.।

नोदयन्ती। स्त्री। नवमल्लिकायां। र.मा.।

नोमाली। स्त्री। नवमल्लिकायाम्।

न्यक्कारुः। स्त्री। विष्ठाकीटे।

न्यक्कारुका। स्त्री। पतङ्गविशेषे, विष्ठाकीटे। हारा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यग्रोधः। पुं। वटवृक्षे। वट गाछ। रा.नि. ब.२१।११। सु.सू.३८अ.न्यग्रोधादिः। श्रुतश्रेण्याम्. आखुकर्णीलतायाम्। मूषाकर्णी। रा.नि.व.२३। अमौवृक्षे। मे.। विषपर्ण्याम्। मोहनलामौषधौ। विश्व.। [विशेषे। श्र.मा.।

न्यग्रोधपरिमण्डला। स्त्री। सुन्दरीस्त्री-

न्यग्रोधपुटपाकः। पुं। वटकल्कादिसाध्य-पुटपाके। यथा—"न्यग्रोधादेश्च कल्केन पूरयेद्-गीरतित्तिरेः। निरस्थमुदरं सम्यक् पुटपाकेन तत्पचेत्॥" अस्य रसौ मधुना सर्व्वातिसारे हितः। शार्ङ्ग.म.ख.१अ.। [ईन्दूवर्कणी।

न्यग्रोधा। स्त्री। आखुकर्णीलतायाम्।

न्यग्रोधादिगणः। पुं। तदादिद्रव्यवर्गे। यथा—"न्यग्रोधपिप्पलसदाफलरीध्रयुग्मं जम्बु-द्वयार्जुन-कपीतन-सीसवल्क-प्लक्षाम्रवञ्जुल-पियाल-पलाशनन्दिकोलोकदम्बविरलामधुकं मधूकम्।" इति द्रव्याणि। अन्यः—"न्यग्रोधोदुम्बराश्वत्थप्लक्ष-मधूक-कपीतन-ककुभकोशाम्रचोरकपनसजम्बूद्वय-पियाल-मधूक-रोहिणी-वञ्जुल-कदम्ब बदरी-तिन्दुकी-शल्लकीरोधसावरीध्रभल्लातकपलाशनन्दिवृक्षाश्चेति। गुणाः—"न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्न-साधकः। रक्तपित्तहरो दाहमेदघ्नो योनिदोष-हृत्॥" वा.सू.३५अ.। सु.सू.३८अ.।

न्यग्रोधिका। स्त्री। आखुकर्णीलतायाम्। रा.नि.व.३।

न्यग्रोधी। स्त्री। द्रवन्त्याम्। वड़ मती। रा. नि.व.५। आखुकर्णीलतायाम्। श्रुतश्रेण्याम्। रा.नि.व.४। थुलकुड़ीति क्वचित्। अमभ.।

न्यङ्कुः। पुं। शम्बरमृगे। शाम्बर इति भाषा। हिं वराहशिक्षा। मांसगुणाः—स्वादु लघु बल्यं वृष्यं विदोषघ्नञ्च। भा.मांसव.। मणिविशेषे। मे.।

न्यङ्कुभूरुहः। पुं। आरग्वधवृक्षे। वै.निघ.। श्योणाकवृक्षे। शोणापाठौ। त्रिका.।

न्यच्छम्। क्ली। क्षुद्ररोगभेदे। तल्लक्षणं— "मण्डलं महदल्पं वा श्यामं वा यदि वा सितं। सहजं नीरुजं गात्रे न्यच्छमित्यभिधीयते॥" सु.नि.१३अ.।

न्यच्चः। पुं। गण्डके। गण्डार। वै.निघ.। मक्षिके। क्ली। घासे, तृणे। मे.।

न्याक्यम्। क्ली। भर्ज्जिततण्डुले। मूड़ि। श्र.च.।

न्याट। पुं। भोजने। आहारे। अम.।

न्युञ्जः। पुं। रोगे। व्यथायाम्। कुष्ठे। वै.निघ.। हे.च.। वि। कुब्जे। कुँजो। मे.। ऋजावग्रे। अम.। क्ली। कर्म्मरङ्गे। कामराङा। मे.।

न्यूनपञ्चाशद्भावः। पुं। जन्मन उन्मादयक्षे। पागल। का.पुराणं।

न्यूनाङ्गः। वि। हीनाङ्गे। खञ्जे। [श्र.चि.।

न्यूनेन्द्रियः। वि। असम्पूर्णेन्द्रिये, खञ्जादौ।

प

पः। पुं। वायौ। पर्णे। एकाक्ष. की.।

पक्करी। स्त्री। प्लक्षवृक्षे। पाकुड़ गाछ। वै.निघ.।

पक्क(क्त)पीड़ः। पुं। वर्हणवृक्षे। हिं पखौड़ा। तत्पर्य्यायाः,—पक्वक्रत्यः, पक्वरुचकः, वर्हणः। गुणाः—दुष्यञ्जनविधौ श्रेष्ठः कटुः जीर्णज्वरघ्नश्च। रा.नि.व.८।

पक्ता(क्तृ)। वि। स्वयं पाककर्त्तरि। पुं। अग्नौ।

पक्तिः। स्त्री। गौरवे। पाके। मे.। पाकशक्तौ। च.द.शिराव्यधे।

पक्तिशूलः। पुं, क्ली। परिणामशूलरोगे। रा. नि.व.२०। See अन्नद्रवशूलः।

पक्वः। वि। क्वथिते श्रृते वा (वस्तुनि)। र.मा। परिणते। पाका। अमभ.। क्ली। खिन्नतण्डु-लादौ। पुराणम्। [पाचके। वै.निघ.।

पक्वकृत्। पुं। निम्बवृक्षे। श्र.च.। वि.।

पक्वपात्रम्। क्ली। पक्वशरावे। वा.उ.५अ.।

पक्वमांसम्। क्ली। पाकसिद्धमांसे। पाक करा मांस। गुणाः—हितं बलवर्द्धनं वीर्य्यवर्द्धनञ्च। रा.नि.व.१७। वृहद्वदरे। मद.व.६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्करसः (सिकः)। पुं। मद्ये। अ.र.। तौक्ष्ण्यभेदे, शीधौ। गुणाः—बलवर्णकरः सरः शीफघ्नः वातघ्नः पाके मधुरः हृद्यः इन्द्रियबोधनश्च। सु.सू.४५अ.। "रोचनो दीपनो हृद्यः शीघ्रशीफार्शसां हितः। क्षेहश्लेष्मविकारघ्नो वर्ण्यः पक्करसो मतः॥" च.सू.२७अ.।

पक्कवारि। क्ली। उष्णजले। काञ्जिके। अ.च.।

पक्कशस्यसमोन्नतिः। पुं। राजकदम्बे। वै.निघ.। [द्रव्ये।

पक्कान्नम्। क्ली। पाचितान्ने। घृतादिपक्कभक्ष्य-

पक्काशयः। पुं। नाभेरधोभागे। पाकाशय। "पक्काशयो ह्यधो नाभेः।" रा.नि.व.१८। अपिच "नाभिस्तनान्तरं जन्तोराहुरामाशयस्त्वधः। आमाशयादधः पक्काशयादूर्ध्वन्तु पाकला। पक्काशयस्त्वधो नाभेरूर्ध्वमामाशयः स्मृतः॥" भा.।

पक्केष्टका। स्त्री। दग्धेष्टकायाम्। वै. संग्रहः।

पक्कौण्डः (पौड़ः)। पुं। पक्कपौड्रवृक्षे। पथेोड़। रा.नि.व.८।

पङ्कः। पुं। कर्दमे। कादा। गुणाः—पक्काम्लदाहनाशित्वं मलबन्धहितत्वं हिमत्वञ्च। राज.। शीघ्रघ्नत्वं सरत्वञ्च। भा.।

पङ्ककर्व्वटः। पुं। कोमलकर्दमे। थितन पलि। विका.। [पाखी। विका.।

पङ्ककीरः। पुं। कोयष्टिकपक्षिणि। टिटिर

पङ्ककीड़। पुं। ग्राम्यशूकरे। वै.निघ.।

पङ्कगड़कः। पुं। (Magrognathus.) पङ्कालमत्स्ये, क्षुद्रमत्स्यभेदे। पाँकान माछ। तत्पर्य्यायः,—गवाटी, पङ्कगतिः, ब्रह्मी। विका.।

पङ्कगतिः। पुं। पङ्कालमत्स्ये। अ.मा.।

पङ्कग्राहः। पुं। शिशुमारे। वै.निघ.। मकरे। हारा.।

पङ्कजम् (न्म)। क्ली। पद्मे। प.मु.।

पङ्कजातः। पुं। भृङ्गराजवृक्षे। भीमराज। वै.निघ.। [पद्मेर झाड़। वै.निघ.।

पङ्कजिनी। स्त्री। पद्मालये, कमलिन्याम्।

पङ्कपर्पटी। स्त्री। शुष्कपङ्कजाते पर्पटाकारे। सौराष्ट्रमृत्तिकाभावे इयं ग्राह्या। र.मा.।

पङ्कमण्डूकः। पुं। जलशूकौ। वै.निघ.। शम्बूके। शामूक। हारा.।

पङ्करुट् (हम्)। क्ली। पद्मे। रा.नि.व.१०।

पङ्कवारि। क्ली। काञ्जिके। वै.निघ.।

पङ्कवासः। पुं। कर्कटे। रा.नि.व.१९।

पङ्कशुक्तिः। स्त्री। शुक्तौ। झिण्टुक। विका.।

पङ्कशू(षू,सू)रणः। पुं। पद्मकन्दे। शालूक। विका.।

पङ्कारः। पुं। (Vallisneria, or Tropa bispinosa.) जलजवृक्षविशेषे, करटकसेवल्यां। काँटाशेउती। मे.।

पङ्किलः। वि। पङ्कमये। मलिने।

पङ्कीरः। पुं। टिट्टिभपक्षिणि। टिटिर पाखी। वै.निघ.।

पङ्केज(रुह)म्। क्ली। कमले। रा.नि.व.१०। पुं। सारसपक्षिणि।

पङ्क्तिकण्टकः। पुं। अपामार्गवृक्षे। रा. नि.व.४।

पङ्क्तिकन्दः। पुं। मालाकन्दे। रा.नि.व.७।

पङ्क्तिचरः। पुं। कुररपक्षिणि। रा.नि.व. १९। क्रौञ्चपक्षिणि। अ.चि.।

पङ्क्तिवीजः (कः)। पुं। वर्बूरकवृक्षे। बाव्ला गाछ। रा.नि.व.८। आरग्वधवृक्षे। कर्णिकारवृक्षे। शोन्दाल, चीनेर करवी गाछ। रा.नि.व.९।

पङ्क्तिशूलः। पुं, क्ली। परिणामशूले। निदानलक्षणे। "स्वैर्निदानैः प्रकुपितौ वातः सन्निहितौ यदा। कफपित्ते समावृत्य शूलकारी भवेद्बली। भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम्। तस्य लक्षणमप्येतत् समासेनाभिधीयते। आध्मानाटोपविष्मूत्रविबन्धारतिवेपनैः। स्निग्धोष्णोपशमप्रायं वातिकं तद्विदुर्भिषक्। तृष्णादाहरतिस्वेदकटूम्लवमथूत्तमम्। शूलं शीतशमप्रायं पैत्तिकं तद्विदुर्भिषक्। कफिहल्लासनष्ठीवस्वल्परुग्दीर्घसन्ततिः। कटुतिक्तोपशान्तौ च विज्ञेयञ्च कफात्मकम्॥" इत्यादि।

पङ्गुः। पुं। वातव्याधिविशेषे। "पङ्गुः सक्थ्नोर्यो वधात्।" सु.नि.१अ.।

पङ्गुर्व(ल्य)हारिणी। स्त्री। शिग्रुवृक्षे। रा.नि.व.४। [व्याधिः। शुक्लाख्ये।

पङ्गुलः। पुं। एरण्डवृक्षे। बा.सू.१५अ.विदा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पङ्गुत्वम्। क्ली। पङ्गुभावे। रा.नि.व.४।

पचतः। पुं। सूर्य्ये। अग्नौ।

पचत्पुटः। पुं। सूर्य्यमणि-पुष्पवृक्षे।

पचनम्। क्ली। पाके। पुं। अग्नौ। शु.च.। स्त्री (नी)। वनबीजपूरे। रा.नि.व.११।

पचम्पचा। स्त्री। दारुहरिद्रायाम्। प.मु.। भा.म.१भ.तन्द्रिकज्व.चि.। "मरिचकचपचम्पचा-वचारुक्।"

पचा। स्त्री। पाके। अम.।

पचिः। पुं। अग्नौ।

पचेलुकः। पुं। पाचके। त्रिका.।

पच्यमानज्वरः। पुं। ज्वरविशेष। परिणत ज्वर। लक्षणम्—"ज्वरवेगोऽधिकस्तृष्णा क्लम्यं तीसारविड्ग्रहाः। मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम्॥" मा.नि.।

पञ्चः। पुं। तिक्तपटोले। वै.निघ.।

पञ्चकट्टयम्। क्ली। जीवनपञ्चमूले क्षुद्रपञ्चमूले च। वा.सू.१५अ.।

पञ्चकन्दाः। पुं। पञ्चसिद्धौषधिविशेषेषु। ते च तैलकन्द-क्रोड़कन्द-सुधाकन्द-रुदन्ती-सर्पाक्ष्या-ख्याकाः। रा.नि.व.२२। See सिद्धौषधिः।

पञ्चकपित्थम्। क्ली। कपित्थस्य मूलत्वक्पत्र-फलपुष्पेषु। वा.उ.३८अ.।

पञ्चकर्म्म। क्ली। वमन-विरेक-नस्य-निरूहा-नुवासनेषु। वमनादि पाँचप्रकार क्रिया। "प्रथमं वमनं पश्चात् विरेकस्यानुवासनं। एतानि पञ्च-कर्म्माणि निरूहो नावनं तथा॥" भा.। तेषु न्यून-सप्ताब्दे अतीताशीत्यब्दे च नस्यं, ऊनद्वादशे धूमः, ऊनषष्ठे कवलः, ऊनदशमे अतिक्रान्तसप्ततौ च शोधनं, न्यूनषोड़शे सप्ततिवार्षिके च रक्तमोक्षणं न देयम्। एतानि दोषनिर्हरणार्थं यथाकालं प्रयोज्यानि। प.प्र.४ख.। विशेषास्तत्तच्छब्दे दृश्याः।

पञ्चकर्म्मेन्द्रियम्। क्ली। हस्तपादपायूपस्थ-जिह्वा चेति इन्द्रियपञ्चे।

पञ्चकषायः। पुं। वचावासापटोलप्रियङ्गु-निम्बात्मकद्रव्यवर्गे। भा.म.४भ.योन्या.चि.। "चूर्णैः पञ्चकषायजैः।" भैष.कर्णरो.चि.। महास्नानीय-पञ्चविधकषायद्रव्यसमूहे। "जम्ब्वाम्रलोध्रवाह्वाली वकुलं वदरं तथा। कषायाः पञ्च विज्ञेया देव्या प्रीतिकराः शुभाः॥"

पञ्चकीरः। पुं। जलकुक्कुभे। त्रिका.।

पञ्चकृत् (त्यः)। पुं। पर्कटीवृक्षे, पखौड़वृक्षे। रा.नि.व.८।

पञ्चकृष्णः। पुं। सौम्यकीटभेदे। सु.कल्प.८अ.। See कीटः।

पञ्चकोलम्। क्ली। पिप्पल्यादिपञ्चद्रव्यकृत-कषाये। पिपुल, पिपुलमूल, चई, चितामूल, शुँट समभाग। "पिप्पलीपिप्पलीमूलचव्यचित्रक-नागरम्। कोलमात्रोपयोगित्वात् पञ्चकोलक-संज्ञितम्॥" सि.यो.च.द.वा.कफज्व.चि.। गुणाः —रसे पाके कटुकं रूक्षं तीक्ष्णोष्णं पाचनं दीपनं वातकफघ्नं गुल्मप्लीहोदरानाहशूलघ्नं पित्त-कोपनञ्च। भा.पू.१भ.।

पञ्चकोलघृतम्। क्ली। गुल्मरोगे घृतम्। "पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः। पलिकैः सयवक्षारैः घृतप्रस्थं विपाचयेत्। क्षीरप्रस्थञ्च तत्सर्पिर्हन्ति गुल्मङ्कफात्मकम्॥" गव्यघृत ४श.। कल्कार्थ—पञ्चकोल यवक्षार प्रत्येक १प.। दुग्ध ४श.। च.चि.५अ.।

पञ्चगणः। पुं। विदारीकन्दः बृहती पृश्निपर्णी निदिग्धिका स्वदंष्ट्रा चेति गणविशेषे। भूँई-कुमड़ा, बृहती, चाकुले, कण्टिकारी, गोक्षुर। रा.नि.व.२२।

पञ्चगव्यम्। क्ली। समभागगोमूत्रगोमयदधि-दुग्धघृतेषु। गोमय, गोमूत्र, दधि, दुग्ध, घृत समभाग। "गोमूत्रङ्गोमयक्षीर गव्यमाज्यं दधीति च। युक्तमेतद्यथायोग पञ्चगव्यमुदाहृतम्॥" रा.नि.व.२२। अत्र दुग्धगोजलघृतानां प्र. १ प. गोमयं ३तो. दधि २प.। गारुड़म्।"पलमात्रं दुग्ध-भाग गोमूत्रं तावदिष्यते। घृतञ्च पलमात्रं स्यात् गोमयं तोलकत्रयं। दधि प्रसृतमात्रं स्यात् पञ्चगव्य-मिदं स्मृतम्॥" अथवा—"गोशृङ्गद्विगुणं मूत्रं पयः स्यात्तच्चतुर्गुणं। घृतं तद्द्विगुणं प्रोक्तं पञ्चगव्ये तथा दधि॥" अपिच—"पयः काञ्चनवर्णायाः श्वेतवर्णाया गोमयं। गोमूत्रं ताम्रवर्णाया नीलवर्णा-भवं घृतं। दधि स्यात् कृष्णवर्णाया दर्भोदक-समायुतम्॥"

पञ्चगव्यघृतम्। क्ली। अपस्मारे घृतम्। गव्यघृतं ४ श. गोमयरसः अम्लदधि दुग्धं गोमूत्रं प्र.४श. यथाविधि त्। बृहद्यथा—गव्यघृतं ४

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श. क्वाथार्थं—दशमूलं प्र.२प. विफला प्र. २ प. हरिद्रा दारुहरिद्रा कुटजत्वक् सप्तपर्णत्वक् अपामार्गमूलं नीलीमूलं कटुकी आरग्वधफलमज्जा काकोदुम्बरिकामूलं कुष्ठं दुरालभा च एषां प्र.२प. वारि ६४ श. शे. १६ श.। कल्कार्थं—भार्गीमूलं पाठामूलं चिकटु विडङ्गं हिज्जलबीजं गजपिप्पली तुवरीमूलं (अरहरमूल) मूर्व्वामूलं दन्तीमूलं भूनिम्बं चित्रकमूलं श्यामालता अनन्तमूलं मञ्जिष्ठा गन्धतृणं (रामकर्पूर) मदनफलम्, एषां प्र. २ तो. गोमयरसः गोमूत्रम् अम्लदधि दुग्धम् एषां प्र.४श. यथाविधि पचेत्। च.द.। च.चि.३५अ.।

पञ्चगुप्तः। पुं। कच्छपे। श.र.।

पञ्चगुप्ता (प्तिः, प्सा)। स्त्री। त्वक्कायाम्। पिड़िंग शाक। रा.नि.व.१२।

पञ्चजटा। स्त्री। पञ्चमूलि। च.द.। "पञ्चजटाश्रृतदुग्धजनस्यम्।"

पञ्चजनः। पुं। पुरुषे। वै.निघ.।

पञ्चतत्त्वम्। क्ली। चित्यग्नेजीमूतवह्नीमसु पञ्चभूतेषु। मद्यमांसमत्स्यमुद्रामैथुनेषु। तन्त्रम्।

पञ्चता (त्वम्)। स्त्री, क्ली। मृत्यौ। अम.।

पञ्चतिक्तः (क्तः)। पुं। पञ्चविधतिक्तद्रव्यगणे, तत्क्वाथे वा। तद्विधा—कण्टकारी गुडूची वृक्षी कुष्ठं किराततिक्तञ्च। च.द.पि.श्लेष्म.ज्व.चि.। अन्यः—निम्बमूलत्वक् पटोलपत्रं वासात्वक्कण्टकारी गुडूची चेति। भा.।

पञ्चतिक्तघृतम्। क्ली। कुष्ठाधिकारे घृतम्। गव्यघृतं ४ प्र.। क्वाथार्थं—निम्बमूलत्वक् पटोलपत्रं कण्टकारी गुडूची वासामूलम्, एषां प्र. १० प. वारि ६४ श.शे. १६ श.। कल्कार्थं—त्रिफला १ श. यथाविधि पचेत्। भैष.। अन्यत् विस्फोटाधिकारे—गव्यघृतं ४ श.। क्वाथार्थं—पटोलपत्रं सप्तपर्णमूलत्वक् निम्बमूलत्वक् वासामूलत्वक् गुडूची त्रिफला एषां प्र. ६ प. २ तो. वारि ६४ श. शे. १६ श.। कल्कार्थं त्रिफला १ श. यथावत्पाच्यम्। रस.र.।

पञ्चतिक्तघृतगुग्गुलुः। पुं। कुष्ठाधिकारे। गव्यघृतं ४ श.। क्वाथार्थं—निम्बत्वक् (निमछाल) गुडूची (गुलञ्च) वासामूलं (वासकमूल) पटोलपत्रं कण्टकारी, एषां प्र. १० प. जलं ६४ श. शे. ८श.। कल्कार्थं—आकनादीमूलं विड़ङ्गं देवदारु गजपिप्पली यवक्षारः सर्ज्जिक्षारः (साजिमाटी) गुडूची हरिद्रा गुलफा चव्यं (चई) कुष्ठं (कुठ) ज्योतिष्मती (लताकरंज) मरिचम् इन्द्रयवः यमानी चित्रकमूलं (चितामूल) कटुकी भल्लातकं (भेला भूटी) वचा पिप्पलीमूलं मञ्जिष्ठा अतिविषा (आतईच) त्रिफला वनयमानी, एषां प्र. २ तो. गुग्गुलुः ५ प.। (गुग्गुलोः पीठलं वचादीलायन्त्रेण कल्कैः सह घृतं पक्तव्यम्)। पाके सर्वि कल्कं छानयित्वा पुनर्गुग्गुलुना सह पक्वा गृहीतव्यम्। सा.कौ.।

पञ्चतृणम्। क्ली। कुशकाशशरदर्भेक्षुस्वल्पतृणपञ्चमूलि। "कुशः काशः शरो दर्भ इक्षुश्चैव तृणाह्वयम्। पञ्चतृणमिदं ख्यातं तृणजम्पञ्चमूलकम्॥" प.प्र.३ख.। अन्यच्च—"शालीक्षुकुशकाशौ स्यात् शरेण तृणपञ्चकम्। एषां मूलं तृणादाहृपित्तास्रश्वासकृच्छ्रहृत्॥" भा.।

पञ्चथः। पुं। कोकिले। वै.निघ.।

पञ्चदोर्घम्। क्ली। पञ्चशरीरावयव-दैर्घ्यजनित शुभलक्षणे। तद् यथा—"बाहू नेत्रेक्षणं कुक्षिर्मेढ्रं तथैव च। स्तनयोरन्तरञ्चैव पञ्चदोर्घं प्रपद्यते॥"

पञ्चनखः। पुं। व्याघ्रे। रा.नि.व.१९। कच्छपे। जटा.। गजे। विका.। व्याघ्र-शरभ-शार्दूल-गोधाकच्छपशरटसिंहेषु। भक्ष्यपञ्चनखाः—"शशकः शल्लको गोधा खड्गी कूर्म्मश्च पञ्चमः।" स्मृतिः।

पञ्चनखरः। पुं। गोधायाम्। गोसाप। वै.निघ.।

पञ्चनिदानम्। क्ली। रोगज्ञानस्य पञ्चविधोपायेषु। यथा—"निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा। सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥" मा.नि.।

पञ्चनिम्बम्। क्ली। समभागत्वक्पत्रफलपुष्पमूलरूपे निम्बपञ्चके। "निम्बस्य पञ्चत्वक्पुष्पफलमूलैर्विमिश्रितैः। पञ्चनिम्बं समाख्यातं तत्तिक्तं निम्बपञ्चकम्॥" रा.नि.व.२२।

पञ्चपचा। स्त्री। दारुहरिद्रायाम्।

पञ्चपटु। क्ली। पञ्चविधलवणभेदे।

पञ्चपत्रः। पुं। चण्डालकन्दे। रा.नि.व.७।

पञ्चपत्रिका। स्त्री। गोरक्ष्याम्। रा.नि.व.५।

पञ्चपर्णि(र्णी)का। स्त्री। गोरक्ष्यां, गोरक्षचिञ्चायाम्। रा.नि.व.५।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चपल्लवम्। क्ली। आम्रजम्बूकपित्थबीजपूरविल्वपल्लवेषु। आम, जाम, कयेत, टाबा ओ बिल्वपत्र। "आम्र-जम्बू-कपित्थानां बीजपूरकविल्वयोः। गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम्॥" प.प्र.३अ.।

पञ्चपित्तम्। क्ली। मत्स्यमहिषवराहमयूरच्छागपित्तेषु। माछ, महिष, शूकर, मयूर, छाग इहादेर पित्त। "वराहच्छागमहिषमत्स्यमायूरपित्तकं। पञ्चपित्तमिति ख्यातं सर्व्वेष्वेव हि कर्म्मसु॥" वै.संग्रहः। तेषां गुद्दि—मत्स्यादिपित्तं निम्बद्रावैर्विभावितं गुद्दिमायाति। सा.कौ.।

पञ्चप्राणाः। पुं। प्राणापानव्यानोदानसमानाख्येषु पञ्चविधदेहान्तर्वायुषु। सु.।

पञ्चबला। स्त्री। बलातिबलानागबलाराजबलामहाबलासु। वै.निघ.।

पञ्चबुद्धीन्द्रियम्। क्ली। पञ्चज्ञानेन्द्रियेषु। स्पर्शनं रसनं घ्राणं दर्शनं श्रोत्रञ्चेति। च.।

पञ्चभद्रम्। क्ली, पुं। गुडूचीपर्पटमुस्तकिरातविश्वभेषजेषु। गुलञ्च, क्षेत्पापड़ा, मुता, चिराता ओ शुँट। "गुडूचीं पर्पटं मुस्तं किरातं विश्वभेषजम्। पञ्चभद्रम्।" सि.यो.च.द.ज्व.चि.।

पञ्चभूतम्। क्ली। चित्यग्नेजोमरुद्धोमसु। च.।

पञ्चभृङ्गम्। क्ली। देवताड़ग्नीभङ्गातालीशनिर्गुण्डीषु। देवताड़ा, शाँइ, सिन्धि, तालीशपत्र ओ निशिन्दा। वै.निघ.।

पञ्चमम्। क्ली। मैथुने। तत्त्वम्।

पञ्चमकारम्। क्ली। मद्यमांसमत्स्यमुद्रामैथुनरूपे मकारपञ्चके। तन्त्रम्।

पञ्चमास्यः। पुं। कोकिले। श्र.र.। [व.१९।

पञ्चमुखः। पुं। सिंहे। पिङ्गलसिंहे। रा.नि.

पञ्चमुखी। स्त्री। वासकक्षुपे। वासक गाछ। रा.नि.व.४। जवापुष्पभेदे।

पञ्चमुष्टिः (किः) (ष्टी)। पुं, स्त्री। सान्निपातिकज्वरे यूषविशेषे। आहारद्रव्य विशेष। स च यववदरीफलकुलत्यमुद्गकाष्ठामलकानामेकैकां मुष्टिं गृहीत्वाष्टगुणतोये पक्वः। च.द.सन्निपातज्व.चि. "यवकोलकुलत्यानां मुद्गमूलकयूषयोः। एकैकमुष्टिमाहृत्य पचेदष्टगुणे जले। पञ्चमुष्टिकइत्येष वातपित्तकफापहः। यूषे प्रशस्यते युक्ते कासे श्वासे क्षये ज्वरे॥" ८ तोलके। वै.निघ.। भ.क्षय.चि.सूर्य्यप्रभायां। स्पृक्कायाम्। वै.निघ.।

पञ्चमूत्रम्। क्ली। मूत्रपञ्चके, तच्च गर्द्दभीगोमेषीछागीमहिषीजसम्मिश्रितमूत्रे। "गवामजानां मेषीणां महिषीणाञ्च मिश्रितम्। मूत्रेण गर्द्दभीनाञ्च तन्मतं मूत्रपञ्चकम्॥" रा.नि.व.२२। गुणास्तत्तच्छब्दे द्रष्टव्याः।

पञ्चमूलम् (ली)। क्ली,स्त्री। पञ्चानां मूलानां समष्टौ। तानि च बृहत्स्वल्पतृण-शतावरी-जीवनबला-गोक्षुर-गुडूच्यादिकानि नवविधानि प्रत्येकं पञ्चपञ्चमूलात्मकानि भवन्ति। १। "बिल्वश्योनाकगाम्भारीपाटलागणिकारिका।" इति बृहत्पञ्चमूलम्। च.द.। सु.सू.३८अ.। २। शालपर्णी पृश्निपर्णी बृहती कण्टकारिका गोक्षुरञ्च। स्वल्पपञ्चमूलम्। गुणाः—अग्नेरीक्षणम्। अल्पाग्निदीपनम्। अर्क.चि.। See लघुपञ्चमूलं। ३। कुशकासदर्भशरेक्षुमूलात्मकं तृणपञ्चमूलं पित्तकासक्षीरपाने ग्राह्यम्। सि.यो. कास-चि.श्रीकण्ठः। ४। शतावरीविदारीकन्द-जीवन्ती-विषाणी-जीवकात्मकं शतावर्य्यादिपञ्चमूलं। गुणाः—स्तन्यकरं गुरु हृद्यं बल्यं शीतलं कान्तिदमाग्नेयञ्च। ५। जीवकर्षभकमेदामहामेदाजीवन्तीषु। जीवकादिपञ्चमूलं। गुणाः—हृद्यं चक्षुष्यं धातुवर्द्धनं बल्यं दाहपित्तज्वरतृष्णाघ्नञ्च। ६। बलापुनर्नवैरण्डसुद्गपर्णीमाषपर्णीषु। बलादिपञ्चमूलं। गुणाः—भेदकं शोफघ्नं ज्वरघ्नञ्च। वै.निघ.। ७। गोक्षुरबदरीन्द्रवारुणीकासमर्द्दसर्षपेषु। गोक्षुरादिपञ्चमूलं। ८। गुडूचीभेषग्भृङ्गीशारिवाविदारीहरिद्रासु। वल्लीपञ्चमूलं। ९। करमर्द्दविकण्टकसैरीयक (झाँटी) शतावरीगृध्रनखीषु। इति कण्टकपञ्चमूलं। सु.सू.३८अ.। गुणाः—तत्तत्पर्य्याये द्रष्टव्याः।

पञ्चमूल्यादिः। पुं। ज्वरातिसारे कषायः। "पञ्चमूली-बला-बिल्व-गुडूची मुस्त-नागरैः। पाठाभूनिम्बशुण्ठीवेरकुटजत्वक्फलैः शृतम्॥" च.द.।

पञ्चरत्नम्। क्ली। स्वर्णमौक्तिकमाणिक्यहीरकराजपट्टेषु। अन्यच्च—"कनकं चीरकं नीलं पद्मरागञ्च मौक्तिकम्। पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्व्वदर्शिभिः॥" रत्नानाञ्चाप्यभावे तु स्वर्णं कार्षार्द्धमेव च। सुवर्णस्याभावे तु आज्यं ज्ञेयं विचक्षणैः॥" हेमा.।

पञ्चरसलोहम्। क्ली। वर्त्तलोहे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चरसा। स्त्री। हरीतक्याम्। मद.व.१। आमलक्याम्। हारा.।

पञ्चरत्नकः। पुं। पक्षीक्षुवृक्षे। रा.नि.व.८।

पञ्चराजिफलः। पुं। पटोललतायाम्। रा.नि.व.४।

पञ्चलवणम्। क्ली। काच-सैन्धव-सामुद्र-(कृत्रकच)-विड्सौवर्चललवणेषु समभागेषु। "काचसैन्धवसामुद्रविड्सौवर्चलैः समैः। स्यात् पञ्चलवणम्।" रा.नि.व.२२। "सौवर्चलं सैन्धवञ्च विड्सौद्भिदमेव च। सामुद्रेण सहैतानि पञ्च स्युर्लवणानि च॥" प.प्र.३अ.। तद्गुणाः—"मधुरं सृष्टविण्मूत्रं स्निग्धं सूक्ष्मं बलापहम्। वीर्य्योष्णं दीपनं तीक्ष्णं कफपित्तविवर्द्धनम्॥" भार्द्ध.स.६अ.।

पञ्चलक्षणः। त्रि। वातपित्तकफसन्निपातागन्तूनां लक्षणयुक्ते। व्रणस्य गन्धवर्णस्रावावेदनाकृतिरूपलक्षणयुक्ते। सु.चि.१अ.।

पञ्चलोह(क)म्। क्ली। सौराष्ट्रकलौहे। हे. च.। सुवर्णरजतताम्रवङ्गनागरूपेषु पञ्चसु धातुषु। "सुवर्णं रजतं ताम्रं त्रयमेतत्त्रिलोहकम्। वङ्गनागसमायुक्तं तत्प्राहुः पञ्चलोहकम्।" इति प्रथमम्। समभागस्वर्णरजततास्रवपुष्क्षायसेषु। "सुवर्णं रजतं ताम्रं त्रपु क्षायसं समम्। ग्रहाङ्कसिति वा द्रव्यं द्वितीयं पञ्चलोहकम्॥' इति द्वितीयम्। रा.नि.व.२२। वा.उ.३९अ.।

पञ्चवक्त्रः। पुं। पञ्चमुखरुद्राक्षे। स्मृतिः।

पञ्चवक्त्ररसः। पुं। रसौषधं सन्निपातज्वरे हितः। "गन्धेश-टङ्ग-मरिचं विषं धत्तूरजैर्द्रवैः। दिनं सम्मर्द्दितं शुष्कं पञ्चवक्त्रो रसो भवेत्। आर्द्रकस्य रसेनैष दातव्यो रक्तिकामितः॥" भा.।

पञ्चवटी। स्त्री। बिल्वाश्वत्थवटाशोकोदुम्बरेषु। वै.निघ.।

पञ्चवर्णकः। पुं। धुस्तूरकवृक्षे। वै.निघ.।

पञ्चवर्द्धनः। पुं। पक्षीक्षुवृक्षे। रा.नि.व.८।

पञ्चवल्कलम् / **पञ्चवेतसम्** } क्ली। वटाश्वत्थोदुम्बरप्लक्षवेतसवल्कलेषु। वट, अश्वत्थ, यज्ञडुम्बुर, पाकुड़ ओ वेतस छाल। "न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः। सर्व्वैरेकत्र मिलितैः पञ्चवेतसमुच्यते।" रा.नि.व.२२। शिरीषपिप्पलवटप्लक्षवेतसेषु। वा.उ.३६अ.। गुणाः—"त्वक्पञ्चकं हिमं ग्राहि व्रणशीर्षविसर्पजित्।" भा.। अपिच "न्यग्रोधोडुम्बराश्वत्थपारीषप्लक्षपादपाः। पञ्चैते चीरिणां वृक्षास्तेषां त्वक् पञ्चवल्कलम्। चीरवृक्षा हिमा वर्ण्या योनिरोगव्रणापहाः। रूक्षाः कषाया मेदोघ्ना विसर्पामयनाशिनः। शीफपित्तकफास्रघ्नाः स्तन्या भग्नास्थियोजकाः॥"

पञ्चबीजम्। क्ली। कर्कटीवपुषदाड़िमपद्मकपिकच्छुजेषु पञ्चबीजेषु। काँकुड़, शशा, दाड़िम, पद्म ओ आलाकुशीर बीज। राजिकाजमोदाजीरकतिलखस्खसेषु। राईशरिषा, यमानी, जीरा, तिल ओ पोस्त।

पञ्चबुद्धीन्द्रियम्। क्ली। चक्षुःश्रोत्रघ्राणजिह्वास्पर्शेन्द्रियरूपे इन्द्रियपञ्चके।

पञ्चशस्यम्। क्ली। धान्यतिलमुद्गयवश्वेतसर्षपेषु।

पञ्चशाखः। पुं। हस्ते। रा.नि.व.१८।

पञ्चशिखः। पुं। सिंहे। त्रिका.।

पञ्चशुक्लः। पुं। सौम्यकीटजातौ। सु.कल्प.८अ.। See कीटः।

पञ्चशूरणम्। क्ली। शूरणपञ्चके अत्यम्लपर्णीकाण्डीरमालाकन्दशूरणारण्यशूरणात्मके। "अत्यम्लपर्णीकाण्डीरमालाकन्दद्विशूरणैः। प्रोक्तो भवति योगोऽयं पञ्चशूरणसंज्ञकः॥" रा.नि.व.२२।

पञ्चशैरीषम्। क्ली। शिरीषवृक्षस्य फलपत्रत्वक्मूलपुष्पेषु समभागेषु। "शैरीषं कुसुमं मूलं फलं पत्रं त्वगित्यथ। कौटारिः कथितो योगः पञ्चशैरीषकाभिधः॥" रा.नि.व.२२।

पञ्चसर्षिणी। स्त्री। ओषधिविशेषे। लक्षणं—"मण्डलैः कपिलैश्चित्रैः सर्पाभा पञ्चसर्षिणी। पञ्चारत्निप्रमाणा।" सु.चि.३०अ.।

पञ्चसार(राज्य)पानकम्। क्ली, पुं। पानकभेदे। पानकविशेष। स चाभिनवसत्त्वावस्थः कदलीपनसमिश्रोऽम्लरसमिश्रश्च। तदुक्तं—"द्राक्षामधूकखर्ज्जूरकाश्मर्य्यैः सपरूषकैः। तुल्यांशैः कल्पितं पूतं शीतं कर्पूरवासितम्।" वा.सू.५अ.। काश्मीरमधुखर्ज्जूरसृद्वीकाफालसाफलं। तेषां जलं गृहीत्वा तु एकीकृत्य चिपेदमून्। चातुर्जातेन्दुमरिचशर्करायार्द्रकादिकान्। वस्त्रेण गालयित्वा तत् पञ्चसाराख्यपानकम्। गुरु द्रव्यं धातुकरं पित्तघ्नं श्रमदाहनुत्।" वै.द्रव्यगुणः।

पञ्चसाराम्बु। क्ली। खर्ज्जूराद्यम्बुनि। "मधु-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खर्ज्जूरमद्वीकापरूषकसिताम्भसा।" वा.चि.२अ.।

पञ्चसिद्धौषधी। स्त्री। पञ्चकन्दात्मकसिद्धौषधिषु। "तैलकन्द-सुधाकन्द-क्रीड़कन्द-रुदन्तिकाः। सर्पनेचयुताः पञ्च सिद्धौषधिक संज्ञकः॥" रा.नि. व.२२। See सिद्धौषधी।

पञ्चसुगन्धिकम्। क्ली। कर्पूरकङ्कोललवङ्गजातीफलपूगेषु। "कर्पूरकङ्कोललवङ्गपुष्पगुवाकजातीफलपञ्चकैन। समांशभागेन च योजितेन मनोहरं पञ्चसुगन्धिकं स्यात्॥" रा.नि.व.२२।

पञ्चक्षारम्। क्ली। यवपलाशसर्ज्जतिलसुष्ककजवारेषु। "यवसुष्ककसर्जानां पलाशतिलयोस्तथा। क्षारेश्च पञ्चभिः प्रोक्तं पञ्चक्षाराभिधो गणः॥" रा.नि.व.२२। पञ्चलवणे। वै.निघ.।

पञ्चक्षीरवृक्षः। पुं। वटाश्वत्थोदुम्बरपर्कटीगर्दभाण्डेषु। वट, अश्वत्थ, यज्ञडुम्बुर, पाकुड़, गर्दभाण्ड। सि.यो.यक्ष्म.चि.सर्पिर्गुड़े। अन्यः— उदुम्बरवटाश्वत्थवेतसप्लक्षेषु वर्त्तते। "उदुम्बरो वटोऽश्वत्थो वेतसः प्लक्ष एव च।" प.प्र.३अ.। See क्षीरवृक्षः।

पञ्चाङ्गम्। क्ली। योगविशेषः। स चैकस्य वृक्षस्य समभागमिलितत्वक्पत्रफलमूलपुष्पात्मकः। "त्वक्पत्रकुसुमं मूलं फलमेकस्य शाखिनः। एकत्र मिलितं तच्चेत् पञ्चाङ्गमिति संज्ञितम्॥" रा.नि. व.२२। पुं। कच्छपे। श.मा.।

पञ्चाङ्गगुप्तः। पुं। कच्छपे। त्रिका.।

पञ्चाङ्गिकपञ्चगणः। पुं। स्वल्पमहत्तृणवल्लीकण्टकसंज्ञकेषु पञ्चमूलेषु। सि.यो.तृष्णा.चि.।

पञ्चाङ्गीवन्धः। पुं। पश्चाङ्गुलाकारव्रणबन्धविशेषे। "चिबुके चापि पञ्चाङ्गी हनुसन्धौ विसन्धिते। स्वेदयित्वा स्थिते सन्धौ कुर्य्यात्पञ्चाङ्गुलाकृतिम्॥" सु.शा.ङ.। सु.चि.३अ.।

पञ्चाङ्गुलः। पुं। श्वेतैरण्डे। एरण्डवृक्षे। रा. नि.व.८। क्ली। तेजपत्रे। वै.निघ.।

पञ्चाङ्गुली स्त्री। तक्राह्वपे। रा.नि.व.४। ऊर्द्धजत्रुजव्रणस्य बन्धनविशेषे। सु.सू.१८अ.।

पञ्चाज्यम्। क्ली। छागदध्यादिपञ्चके। वै.निघ. २भ.जीर्णज्व.चि.।

पञ्चात्मा। पुं। शरीरान्तर्वायौ। यथा—"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः।" निदा.।

पञ्चाननः। पुं। शिवे। सिंहे। मे.।

पञ्चाननरसः। पुं। हृद्रोगाधिकारे रसः। पाठः—"सूतङ्गन्धौ द्रवैर्धात्रा मर्दयेद्भीलनीद्रवैः। यष्टिखर्ज्जूरसलिलैर्दिनं हृद्रोगजिद्रसः। धात्रीचूर्णं सिताक्षानु पिबेद्रोगापनुत्तये॥" रस.चि.।

पञ्चामृतम्। क्ली। दुग्धादिपञ्चविधद्रव्यसमवाये। गुड़ूचीगोक्षुरतालमूलीमुण्डिकाशतावरीणां मिलितसमभागे। "गुड़ूची गोक्षुरश्चैव मुषली मुण्डिका तथा। शतावरीति पञ्चानां योगः पञ्चामृताभिधः॥" गुलूञ्च, गोक्षुर, तालमूली, मूषाली, शतमूली। रा.नि.व.२२। इदमौषधं पञ्चामृतमुच्यते। द्वितीयं देवपूजनार्थम्। घृतमधुशर्करादधिदुग्धेषु। दुग्ध, दधि, घृत, चिनि, मधु।

पञ्चामृतपर्पटी। स्त्री। रसरसायनाधिकारे। गन्धकं ८ तो. रसः २ तो. लौहं १ तो. अभ्रं ४ मा. ताम्रं ४ मा. पर्पटीवत् पाकः। रस.र.।

पञ्चामृतपिण्डः। पुं। अश्वस्य बलपुष्टिकरपिण्डविशेषे। "कटुका च जयन्ती च भ्रमरी सुरसा घनः। पञ्चामृतमयः पिण्डः.....॥" नकुल. १३अ.।

पञ्चामृतयूषः। पुं। कुलत्थादिपञ्चद्रव्यकृतयूषविशेषे। कुलथ, मुग, अरहर, मांषकलाय, वर्वटी (वा राजशिम्बीर बीज)। यथा—"कुलित्थमुद्गाढ़कमाषकाणां निष्पावयुक्तस्य कृतोहि यूषः। सन्दीपनः पाचनधातुवृद्धिकरो लघुः स्यादरुचिप्रणाशः। ज्वरं बलासं क्षयमङ्गमर्दं जीर्येत पञ्चामृतयूषकोऽयम्॥" वै.निघ.।

पञ्चाम्लम्। क्ली। तदाख्य-द्रव्यपञ्चके। यथा— "अश्वत्थमेकं पिचुमर्दमेकं न्यग्रोधमेकं दश पुष्पजातीः। द्वे द्वे तथा दाड़िममातुलुङ्गे पञ्चाम्लवापी नरकं न याति॥"

पञ्चाम्ल(फल)म्। क्ली। १। समभागमिश्रितकोलदाड़िमतिन्तिड़ीचुल्लकाम्लवेतसेषु। कुल, दाड़िम, तेँतुल, चुल्लक, अम्लवेतस। २। समभागमिलितजम्बीरनारङ्गाम्लवेतसतिन्तिड़ीबीजपूरकेषु। गौड़ा, नारङ्ग, अम्लवेतस, तेँतुल, टाबालेबु। ३। "कोलदाड़िम्बवृक्षाम्लचुल्लकाः साम्लवेतसाः। फलम्यत्राम्लमुद्दिष्टमम्लपञ्चफलं स्मृतम्॥" ४। "जम्बीरनारङ्गसहाम्लवेतसैः सतिन्तिड़ीकैश्च सबीजपूरकैः। समांशभागेन तु सेवितैरिदं द्वितीयमुक्तञ्च फलाम्लपञ्चकम्॥" रा.नि.व.२२। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ । "कोलदाड़िमबृचाम्लचुक्रीकाचुल्लिकारसः । पञ्चाम्लकी सुखे लेपः सदा तृष्णां नियच्छति ॥" सा.कौ. ।

पञ्चारविन्दम् । क्ली । अरविन्दस्य मृणाल-विसकेसरपत्रबीजेषु । वा.उ.३९अ. ।

पञ्चालकः । पुं । अग्निप्रकृतिकीटविशेषे । सु. कल्प.८अ. । See कीटः ।

पञ्चावस्थः । त्रि । मृते ।

पञ्चाविकम् । क्ली । मेषीदधिदुग्धघृतमूत्र-मलेषु । वै.निघ.२भ.जीर्णज्व.चि. ।

पञ्चास्यः । पुं । सिंहे । अम. ।

पञ्चेन्द्रियम् । क्ली । इन्द्रियपञ्चके । चक्षुः, कर्ण, नासा, जिह्वा, त्वक् । वाक्पाणिपादपायू-पस्थेषु ।

पञ्चोपविषम् । क्ली । क्षुद्रार्ककरवीरलाङ्गलि-विषमुष्टिकेषु । मनसा, आकन्द, करवी, विषला-ङ्गलि, विषमुष्टि । 'क्षुद्रार्ककरवीराणि लाङ्गली विषमुष्टिकं । एतान्युपविषाण्याहुः ।' रा.नि.व.२२ ।

पञ्चोषणम् । क्ली । पञ्चकोले । पिप्पली-पिप्पलीमूलचव्यचित्रकशुण्ठीषु । वै.निघ. ज्व. चि. अर्कादिः ।

पञ्चोष्माणः । पुं । शरीरान्तःपञ्चविधपाच-काग्निषु । यथा—"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः । पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यमी । पार्थिवाः पार्थिवानेवं शेषाः शेषांश्च देहगान् ॥" सा.कौ. ।

पञ्जरः (लः) । पुं । पटोले । कोलकन्दे । रा.नि.व.७ । क्ली । शरीरे । शरीरास्थिसमूहे । रा.नि.व.७ । क्ली । शरीरे । शरीरास्थिसमूहे । त्रिका. ।

पञ्जरास्थि । क्ली । पञ्जरस्य चतुर्विंशत्यस्थिषु । च.शा.७अ. ।

पटम् । क्ली । भूतृणे । गन्धतृण । र.मा. । पुं । कार्पासे । वै.निघ. । प्रियालवृक्षे । मे. । रस.र. बाल.चि. ।

पटच्चरम् । क्ली । जीर्णवस्त्रे । वै.निघ. ।

पटदः । पुं, स्त्री (दा) । कार्पासवृक्षे । र.मा. ।

पटरकः । पुं । गुन्द्रतृणे । रा.नि.व.८ ।

पटरञ्जनम् । क्ली । पत्तङ्गे । वकमकाष्ठे ।

पटलः । पुं । कासमर्दवृक्षे । कार्पासवृक्षे । वै. निघ. । पटोलवृक्षे । त्वचि । त्वक् । भा. । क्ली । दृष्ट्यावरकच्छदिरूपे नेत्ररोगे, तिमिरादौ । मा. नि. । तच्चतुर्विधम् । तत्र प्रथमं वाच्यं पटलं रसरक्तमयम्, द्वितीयं मांसमयं, तृतीयं मेदः-संभवं, चतुर्थञ्च कालकास्थिसंभवम् । "अधस्तादुप-रिष्टाद्वा पटलं यस्य जायते । रुणद्धि नयने सद्यः ..... ॥" ज.द.३०अ. । See तिमिरः ।

पटवासः । पुं । पिष्टातके । आबीर ।

पटाकः । पुं । पक्षिभेदे ।

पटालुका । स्त्री । जलौकायाम् । त्रिका. ।

पटिः(का) । स्त्री । कुम्भिकावृक्षे । मे. । वस्त्रे ।

पटीरम् । क्ली । मूलके । भा.म.३भ.अग्न.चि. । चन्दने । प.मु. । पुं । खदिरवृक्षे । उदरे । उणा. । वंशलोचने । सन्धिवायौ । वै.निघ. ।

पटुः (कः) । पुं । पटोललतायाम् । प.मु. । कारवेल्लयां । ऊच्छे गाछ । रा.नि.व.३ । शिग्रौ । रा.नि.व.१८ । चीनकर्पूरे । चीरकनामगन्धद्रव्ये । रा.नि.व.१२ । लवणे । मे । क्ली । पटोलपत्रे । विश्व. । पांशुलवणे । प.मु. । जीरके । वचायां । वच । छिक्किन्याम् । हेँचेता । वै.निघ. । क्ली । (कं) पटोलविशेषे । त्रि । रोगमुक्ते । रा.नि.व.२० ।

पटुतूल (तृण) कम् । क्ली । लवणतृणे । रा.नि.व.८ ।

पटुत्रयम् । क्ली । लवणत्रये, विट्सैन्धवसौवर्च्चल-लवणेषु । वै.निघ.२भ.रुग्दृष्णाचि. ।

पटुपञ्चकम् । क्ली । लवणपञ्चके । पञ्चलवण । See पञ्चलवणम् ।

पटुपत्रिका । स्त्री । चीरिकायां । क्षुद्रक्षुद्रचुपे । रा.नि.व.४ ।

पटुपर्णिका । स्त्री । क्षीरिणीक्षुपे । शिरुई । रा.नि.व.४ ।

पटुपर्णी । स्त्री । स्वर्णक्षीर्य्याम् । सोणाशिरुई, शेयालकाँटा । अम. [व.६ ।

पटुभेदनिका । स्त्री । क्षणजीरके । रा.नि.

पटुलिका । स्त्री । नागवल्लीभेदे । पोटकुलि-केति आन्ध्रे । रा.नि.व.११ । See नागवल्ली ।

पटूत्तमम् । क्ली । सैन्धवलवणे । रा.नि.व.६ ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पटेरकम्। क्ली। सुखकटणे। वै.सं.।

पटोटजम्। क्ली। कुवाके। श.र.।

पटोलः। पुं। Trichosanthes dioica Roxb.) स्वनामख्यातफलशाकविशेषे। पलवा लता। हिं परवल। मं कहिपडवल, कतुपडोल। कं सीगवल्ली। तें कोम्मुपोटल। गुर्ज. चुरनिहारकपिलवर्णी। ता. कोव्वुपडलै। कान्यकुब्जे मोरट्टड़ी। तत्पर्य्यायाः,—कुलकं, तिक्तकः, पटुः, पटुकः, कर्कशदलः, कुलजः, वाजिमान्, लताफलः, राजफलः, राजपटोलः, वरतिक्तः, अमृतफलः, तिक्तभद्रकः, कटुफलः, कटुकः, कटुः, कर्कशच्छदः, राजनाभा, अमृतफलः, पाण्डुः, पाण्डुफलः, बीजगर्भः, नागफलः, कुष्ठारिः, कासमर्दनः, पञ्जरः, रानीफलः, जीवन्ती, कच्छुघ्नी। गुणाः—"पटोलः कटुतिक्तोष्णः रसपित्तवलासजित्। कफकण्डूतिकुष्ठास्रग्ज्वरदाहार्त्तिनाशनः॥" रा.नि.व.३। तन्मूलादिगुणाः—"पटोलस्य भवेन्मूलं विरेचनकरं सुखात्। नालं श्लेष्महरन्पत्तम्पित्तहारि फलं पुनः। दीपनत्वहरम्प्रोक्तं तद्वित्ता पटोलिका॥" भा.। फलं रक्तपित्तघ्नम्। सि.यो.र.पि.चि.। पत्रं पित्तघ्नं, नालं कफघ्नं, फलं विदोषघ्नं, मूलं विरेचनम्। रा.नि.व.७। क्ली। पाण्डुफले। पटोल। वा.सू.१५ अ.।

पटोलकः। पुं। शुक्लौ। श.मा.।

पटोलपत्रम्। क्ली। वल्लीशाकभेदे। पल्ता नति। रा.नि.व.७। See पटोलः।

पटोलादिः। पुं। पटोलचन्दनकुचन्दनमूर्व्वागुडूचीपाठाकटुरोहिणीकृते पञ्चद्रव्यकषाये। गुणाः—"पटोलादिर्गणः पित्तकफारोचकनाशनः। ज्वरोपशमनो बल्यः कृद्दि कण्डूविनाशनः॥" सु.। अन्यः—पटोलसारिवामुस्तपाठाकटुकरोहिणीसाधितकषाये। अयं सततकज्वरशमनः। वा.चि.१अ.। अन्यश्च—पटोलनिम्बविफलामद्वीकामुस्तवत्सककृते कषाये। अयं अन्येद्युष्के हितः। अपरः—पटोलरक्तचन्दनमूर्व्वातिक्तापाठाश्वगन्धासु। च.द.।

पटोलिका (ली)। स्त्री। स्वादुपटोलनामफलशाकविशेषे। स्वादुपटोल, पोरल, वा धुन्दुल। हिं झिङ्गीपोड़लि। तत्पर्य्यायाः,—ज्योत्स्ना, ज्योत्स्नी, जालौ। मे.। गुणाः—स्वादुः पित्तघ्नी रुचिकृत् ज्वरघ्नी बलकरी दीपनी पाचनी च। रा.नि.व.७। च.द.व्रण-चि.।

पट्टः। पुं। पेषणशिलायाम्। व्रणबन्धनद्रव्ये। पटी। सु.सू.५अ। पट्टशाके। पाटशाक। श.मा.।

पट्टर(ङ्ग)म् (रञ्जक[न,क]म्) (रागम्)। क्ली, पु। पत्राङ्गचन्दने। बकम काठ। रा.नि.व.१२।

पट्टशाकः। पुं। (Corchorus capsularis or C. olitorius.) शाकविशेषे। पाटशाक, नालितापाता। हिं पटुया। गुणाः—रक्तपित्तहरः विष्टम्भी वातकोपनश्च। भा.।

पट्टिकः। पुं। ताम्रवर्णरीध्रे। अ.टी.रा.।

पट्टिका (ख्यः)। स्त्री, पुं। ताम्ररीध्रे। रक्तवर्ण लोध। अम.।

पट्टिकारो(ल)ध्रः। पुं। स्वनामख्यातलोध्रे, रक्तरीध्रे। पाटिया लोध। तत्पर्य्यायाः,—क्रमुकः, लाक्षाप्रसादः, लाक्षाप्रसादनः, पट्टिका, पट्टिलोध्रः, पट्टिलोध्रकः, पट्टी, वल्कलीध्रः, बृहत्फलः, जीर्णवृक्षः, बृहद्वल्कः, शीर्णपत्रः, अक्षिभेषजः, शाबरः, श्वेतलोध्रः, गालवः, बहुलत्वचः, वल्कः, स्थूलवल्कलः, जीर्णपत्रः, बृहत्पत्रः। गुणाः—ग्राही लघुः पित्तरक्तपित्तातिसारशीथघ्नश्च। भा.। कषायः शीतलः वातकफरक्तविषघ्नः चक्षुष्यः। तत्र कल्कारीध्र एव श्रेष्ठः। रा.नि.व.६।

पट्टिलः। पुं। (Coesalpinia bonducella.) वृक्षविशेषे। पूतिकरञ्ज। जटा.।

पट्टिलोध्रः (कः)। पुं। पट्टिकालोध्रे। श.र.।

पट्टी (इन्)। पुं, स्त्री। लोध्रवृक्षे। अ.टी.भ.। रक्तरीध्रे। रा.नि.व.६।

पणः। पुं। कपर्द्दे। वै.निघ.२भ.मधुरज्व.चि. विष्णुचिकाकषाये। ५गुञ्जामाने। प.प्र.।

पणदा। स्त्री। पण्यान्नायाम्। रा.नि.व.२३।

पणसः (सः)। पुं। (Artocarpus integrifolia.) कण्टालुफलवृक्षे। काँटाल गाछ। हिं कटहर। मं फणस। कं हलसिन। तें उत्पणस। ता. पिल्ला। तत्पर्य्यायाः,—कण्टकिफलः, कण्टाकालः, आशयः, सुरजफलः, पलसः, फलसः, चम्पकालुः, चम्पाकीषः, चम्पालुः, रसालः, सदङ्गफलः, पानसः, महासर्ज्जः, फलिनः, फलवृक्षकः,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काण्डफलः, मूलफलदः, अपुष्पफलदः, पूतफलः। गुणः—फलं मधुरं पित्तघ्नं गुरु हृद्यं बलवीर्य्यवृद्धिकरं श्रमदाहशीघ्नं रुचिकरं याहि दुर्ज्जरञ्च। तद्बीजम् ईषत्कषायं मधुरं वातघ्नं गुरु तत्फलविकारघ्नं त्वग्दोषघ्नञ्च। बालपणसफलन्तु नीरसं हृद्यञ्च। मध्यपक्व तत् दीपनं रुचिद लवणादियुक्तञ्च। रा.नि.व.११। पक्वफलं रक्तवर्द्धकं मधुरं शीतलं दुर्जरं वातपित्तघ्नं श्लेष्मशुक्रबलकरञ्च। तद्बीजं रक्तपित्तघ्नं स्वादु फलतुल्यगुणञ्च। तदपक्वफलं कषायं स्वादु वातघ्नं शीतलञ्च। राज.। तन्मज्ज (ङ्गि) गुणः—गुरुकृमिदोषघ्नं विशेषेण गल्मिनां न हितम्। रा.नि.व.११। अस्य क्वाथः मांसग्रन्थिशोफे, तन्मज्ज (ङ्गि) अण्डवृद्धौ, कोमलपल्लवः चर्म्मरोगे च हितः।

पणास्थिकम्। क्ली। वराटके। कड़ि। चिका.। हे.च.।

पणिकावर्त्तः। पुं। राजावर्त्तमणौ। प.मु.। See आवर्त्तः।

पण्डः (कः)। पुं। नपुंसके। अम.।

पण्यविलासिनी। स्त्री। नखीनामगन्धद्रव्ये। रा.नि.व.१२।

पण्या। स्त्री। ज्योतिष्मतीलतायाम्। लताफट्कौ। वै.निघ.।

पण्यान्धः (न्धा)। पुं, स्त्री। स्वनामख्यातगणे। मं पणधे। कं हनजेमूरु। तत्पर्य्यायाः,—पणधा, पण्यन्धा, पण्यघा, कङ्गुणी। सा दीर्घा मध्या ह्रस्वा च इति त्रिधा। एतासु मध्यमा रसवीर्य्यविपाकेषु गुणाधिका। अपरद्वयं समवीर्य्यं, तिक्तं चारं सारणञ्च, तत्कालशस्त्रघातव्रणरोपणञ्च। रा.नि.व.८।

पतगः। पुं। पक्षिणि। अम.।

पतङ्गः (मः)। पुं। पक्षिणि। अम.। जलमधूकवृक्षे। रा.नि.व.१६। रक्तशालौ। मे.। वा.सू.६अ.। च.सू.२७अ.। क्ली। पारदे। मे.। पत्तङ्गचन्दने। वकम काठ। श.च.।

पतङ्गमः। पुं। पक्षिणि। व्याकरणम्।

पतङ्गिका। स्त्री। पुत्तिकानाममधुमक्षिकायाम्। अम.। तत्पर्य्यायौ,—पुत्तिका, पूत्तिका।

पतङ्गा। स्त्री। शालिधान्यभेदे।

पतत्रम्। क्ली। पत्रे। अम.।

पतत्रिः (त्री)। पुं। पक्षिणि। अम.।

पतत्रीकः। पुं। श्येनपक्षिणि। वाज। श.र.।

पतमः (सः)। पुं। पक्षिणि। पतङ्गे। उणा.।

पताका। स्त्री। चिह्ने। जटा.।

पतिः। पुं। मूले। गतौ। अम.।

पतिकाविरम्। क्ली। पित्तलाख्यमिश्रधातुभेदे।

पतिम्बरा। स्त्री। कृष्णजीरके। श.च.।

पतिश्यायः। पुं। प्रतिश्याये। हे.।

पतेरः। पुं। पक्षिणि। आढ़के। उणा.। गह्वरे।

पत्। पुं। पादे। रा.नि.व.१८।

पत्त(त्र)ङ्गम्। क्ली। Caesalpinia sappan.) रक्तकाष्ठविशेषे, पत्राङ्गे। वकम् काष्ठे। हिं पतङ्। तें ओकनुकट्टे। उत्. वकमी। गुर्ज्ज. पारस्य. ता. वट्टङ्गी। र.मा.। भा.उ.वाजी.। तत्पर्य्यायाः,—पत्राङ्ग, रक्तकाष्ठ, सुरङ्गद, पत्रान्य, पट्टरङ्ग, पट्टरङ्गक, भार्य्याह्वयः, रक्तकः, लोहितं, रङ्गकाष्ठ, रोगकाष्ठ, कुचन्दनं, पटुरञ्जनकं, सुरङ्गम्, रक्तसारं, रञ्जनं, पत्तूरम्। गुणः—"पत्तङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रजुत्। हरिचन्दनवद्धेयं विशेषाद्दाहनाशनम्। चन्दनानि च सर्व्वाणि सदृशानि रसादिभिः। गन्धेन तु विशेषोऽस्ति पूर्व्वः श्रेष्ठतमो गुणैः। भा.। रक्तचन्दने। श.र.। सु.चि.२१अ.। "पत्तङ्गं रक्तचन्दनम्।" भा.क्षुद्र.रो.चि.कुङ्कुमाद्यतैले। काष्ठक्वाथः रजोवाहुल्यकारी मलसंग्राही च। पुं। भृङ्गराजे। भीमराज। र.मा.। केशराजे। केशुते।

पत्तूरः (रा)। पुं, स्त्री। शालिशाके। र.मा.। च.द.सि.यो.क्रमि.चि.। सु.चि.१९अ.। जलपिप्पल्याम्। पर्कटीवृक्षे। वै.निघ.। शमीवृक्षे। भैष. ने.रो.चि.। क्ली। कुचन्दने। भा.। सु.सू.३९अ. वातशमने। पत्तङ्गे। वै.निघ.।

पत्रम्। क्ली। छदे। पाता। अम.। तेजपत्रे। रा.नि.व.६। सु.सू.३८अ.एलादिः। वा.चि.१अ.। "पत्रं कटुकरोहिणी।" पचिपत्रे। मे.।

पत्रकः। पुं। पलाशवृक्षे। रा.नि.व.२३।

पत्रकल्कम्। क्ली। गन्धद्रव्यार्थम् उष्ण एव सम्पिष्य पक्वतैले यत् कर्पूरसुगनाभ्यादिकं दीयते। गन्ध मशला देओया। "पक्वघृतेऽप्युष्ण एव सम्यग्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत् पेष्य वर्त्तितम्। दीयते गन्धवद्भार्थं पत्रकल्कं तदुच्यते॥" च.द.वा.व्या.चि.महासुगन्धितैले।

पत्रकेष्टः। पुं। शालिञ्चशाके।

पत्रगुप्तः। पुं। क्षुद्रोद्वभेदे। तेकाँटासिजू। श.च.।

पत्रघ(ध)ना। स्त्री। सातलायाम्, सेहुण्डे। मनसा गाछ। रा.नि.व.८।

पत्रजासवः। पुं। पटोलतालपत्रीत्यासवे। च.सू.२५अ.।

पत्रतण्डुला (ली)। स्त्री। यवतिक्तायाम्। रा.नि.व.७।

पत्रतरुः। पुं। विट्खदिरवृक्षे। रा.नि.व.८।

पत्रतालकम्। क्ली। वंशपत्रहरितालै। वै. निघ.।

पत्रदारकः। पुं। क्रकचे। करात। विका.।

पत्रद्रुमः। पुं। ताड़ीवृक्षे।

पत्रनाड़िका। स्त्री। ताम्बूलीशिरायाम्, पत्रशिरायाम्। जटा.।

पत्रनामकम्। पुं। तेजपत्रे। वै.निघ.।

पत्रपरशुः। पुं। अस्त्रविशेषे। छेनी।

पत्रपालः। पुं। वृक्षच्छुरिकायाम्। हे.च.।

पत्रपालो। स्त्री। अस्त्रविशेषे। काँचि। हला.।

पत्रपिशाचिका। स्त्री। वारिवायां। टोका, पेकेे। विका.। हारा.।

पत्रपुष्पः। पुं। Ocymum pilosum.) रक्ततुलसीवृक्षे। श.च.।

पत्रपुष्पकः। पुं। भूर्जवृक्षे। श.मा.।

पत्रपुष्पा। स्त्री। Ocymum Sanetum) तुलसीवृक्षविशेषे। श.मा.। क्षुद्रपत्रतुलस्यां। र.मा.।

पत्रभद्रा। स्त्री। वृद्धिजीवन्त्याम्।

पत्रमालः। पुं। वेतसवृक्षे। वै.निघ.।

पत्रयौवनम्। क्ली। नवाङ्कुरे। जटा.।

पत्ररथः। पुं। पक्षिणि। अम.।

पत्रलम्। क्ली। पत्रलदुग्धे। वै.निघ.। द्रग्धे। पातला दई। हे.च.।

पत्रवर्णः। पुं। सप्तपर्णवृक्षे। रा.नि.व.१२।

पत्रवल्ली। स्त्री। पत्ररचनायाम्। हे.च.।

रुद्रजटायाम्। पलाशीलतायाम्। रा.नि.व.३।

पत्रविषम्। क्ली। विषपत्रिकादौ। तानि च विषपत्रिकालम्बावरदारुककरञ्जसहाकरञ्जानीति पद्म। गुणा— 'जृम्भाङ्गीडेष्टनश्वासा ज्ञेया पत्रविषेण तु।" सु.कल्प.२अ। "जृम्भणं वेपन श्वासः तृष्णां पत्रविषैर्भवेत्।" भा.।

पत्रवृश्चिकः। पुं। तन्नामकाग्निप्रकृतिककीटे। सु.कल्प.८अ। See कीटः।

पत्रशङ्खः। पुं। सप्तपर्णवृक्षे। छातिम।

पत्रशाकः। पुं,क्ली। भक्ष्यशाकवृक्षभेदे। तच्च षड्विधम्। "पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा। शाकं षड्विधमुद्दिष्टं मुनिभिर्विद्यविचक्षणैः॥" राज.। पत्रशाकगणो यथा—काकमाचीकासमर्दपुनर्नवा-पूतिका पटोलपत्र मघनाद-शालिञ्च-हिलमोचिकापालङ्कनिषण्णकमिति। "हिर्वासूकं हिः पीतकौ चिर्मर्षलण्डुलीयकं। द्विधा पालक्यपि हेधा पट्या कालशाककम्। करवी लोणिका घोलो चुञ्चुशाङ्गेरिचुक्रिका। सुनिषण्णकगोजिह्वाद्रोणपुष्पीपटोलकम्। शतपुष्पा मेथिका च कुञ्जरस्तोक्षणकण्टकः। धान्यकं द्विपक्षवर्त्ती जीवन्ती काकमाचिका। पर्पटः कासमर्दश्च द्विधा राजगिरौतकः। .....द्विधा कोष्ठः पत्रशाकगणस्त्वयम्॥" अर्क.। [हारा.।

पत्रशिरा। स्त्री। पर्णनाड्यां। पाणेर शिरा।

पत्रशृङ्गी। स्त्री। मूषिककर्णिकायाम्। इन्दुरकाणी। वै.निघ.। [रा.नि.व.३।

पत्रश्रेणी। स्त्री। मूषिकपर्ण्याम्। द्रवन्त्याम्।

पत्रश्रेष्ठः। पुं। विल्ववृक्षे। रा.नि.व.११।

पत्रसुन्दरः। पुं। ग्रीष्मसुन्दरके। गीमाशाक।

पत्रसूचिः। पुं। कण्टकी। विका.।

पत्रहिमम्। क्ली। हिमे। दुर्दिने। विका.।

पत्राख्यम्। क्ली। तेजपत्रे। श.च.। तालीशपत्रे। रा.नि.व.६।

पत्राङ्गम्। क्ली। Soymida febrifuga or Caesalpinia Sappan. Syn. Swietenia febrifuga.) Rohan tree. स्वनामख्यातसप्तविधचन्दनान्यतमचन्दने। पत्तङ्ग। वकम्, रोहन्। हिं वम. पत्तङ्ग। तें चेवमनु। गुणाः—कटु-रूक्षाम्ल-शीतं वात-पित्त-ज्वरोन्माद-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विस्फोटकव्रण्ये । रा.नि.व.१२ । अस्य लक्षणादयः उदरामये रक्तातिसारे च परिणते हिताः । रक्तचन्दने । अम. । भूर्जपत्रे । पद्मकाष्ठे । मे. । See पत्तङ्गम ।

पत्राख्यम् । क्ली । तृणाख्यतृणे । गन्धतृणविशेषे । पर्णीतृणे । रा.नि.व.८ । पत्राङ्गचन्दने । रा.नि.व.१२ । पिप्पलीमूले । रा.नि.व.६ । वंशपत्रहरितालै । तालीशपत्रे । वै.निघ. ।

पत्राल्का । स्त्री । चुक्रिकायाम् । चूका पालङ्क । भा । See चुक्रा ।

पत्रालुः । पुं । इक्षुदर्भतृणे । रा.नि.व.८ । कासालौ । रा.नि.व.७ ।

पत्रावलिः (ली) । स्त्री । गैरिके । श.च. । ईश्वरीलतायाम् । वै.निघ. ।

पत्रिकम् । क्ली । तेजपत्रे ।

पत्रिका (ह्वा) । स्त्री । जातीपत्र्याम् । जटिलायाम् । वै.निघ.२भ.क्ष्मि.चि.सुवर्चिकादिचूर्णे ।

पत्रिकाख्यः । पुं । कर्पूरभेदे । रा.नि.व.१२ ।

पत्रिकापत्रम् । क्ली । तालीशपत्रे । वै.निघ. ।

पत्रिणी । स्त्री । नवाङ्कुरे । पल्लवे । श.च. ।

पत्री (इन्) । पुं । शालवृक्षे । रत्ना. । पचिणि । वृक्षे । श्येणपचिणि । मे. । स्त्री । दर्शनकक्षुपे । पत्रा । च.द.महासुगन्धतैले । गङ्गापत्र्याम् । रा.नि.व.१० । दुरालभायाम् । खदिरवृक्षे । तालवृक्षे । जातीपत्र्याम् । वै.निघ. । महातेजपत्रे । च.द.वा.व्या.चि.महाराजप्रसारणीतैले ।

पत्रैला । स्त्री । एलायाम् । वै.निघ. ।

पत्रोपस्करः । पुं । कासमर्दक्षुपे । हारा. ।

पत्राणः । पुं । श्येणाकवृक्षे । अम. । पीतलोध्रे । वै.निघ. । अशोकवृक्षे । क्ली । धौतकौशेये । अम. ।

पत्राभ्रासः । पुं । पुष्पकलिकायाम् । वै.निघ. ।

पथिका । स्त्री । कृष्णद्राक्षायाम् । रा.नि.व.११ ।

पथिद्रुमः । पुं । शुक्लखदिरे । रा.नि.व.८ । खदिरवृक्षे । जटा. ।

पथ्यम् । क्ली । पादाहारे । "पादाहारं पथ्यमाहुः" । रा.नि.व.२० । सैन्धवे । वै.निघ. । सामुद्रलवणे । हितभोजने । श.च. । पुं । हरीतकीवृक्षे । श.मा. । तण्डुलीयशाके । वै.निघ. ।

पथ्यकरी । स्त्री । कृकशालौ । रा.नि.व.१६ ।

पथ्यका । स्त्री । मेथिकायाम् । वै.निघ. ।

पथ्यकारी (इन्) । पुं । षष्टिकधान्ये । रा.नि.व.१६ ।

पथ्यभोजनम् । क्ली । हितभोजने । भा. ।

पथ्यशाकः । पुं । तण्डुलीयशाके । नटिया शाक । रा.नि.व.५ ।

पथ्यसुन्दरः । पुं । हरीतकीवृक्षे ।

पथ्या । स्त्री । हरीतक्याम् । भा.पू.१भ. । रा.नि.व.११ । च.द.विज्वरचातुर्थके । चिर्भटायाम् । वन्ध्याककर्कोटक्याम् । मृगादन्याम् । रा.नि.व.२३ ।

पथ्यापथ्यम् । क्ली । रोगाणां हिताहितद्रव्ये ।

पथ्यापथ्यविधिः । पुं । रोगाणां पथ्यापथ्यनिर्णयग्रन्थे । [वस्तुनि । मे. ।

पदन् । क्ली । पादे । रा.नि.व.१८ । वाक्ये ।

पदकम् । क्ली । निष्कमितस्वर्णे । वै.निघ. ।

पदगण्डीरः । पुं । श्लीपदरोगे ।

पदन्यासः । पुं । गोधुरक्षुपे । श.च. ।

पदरथी (इन्) । पुं । पादुकायाम् । त्रिका. ।

पदरोहिणी । स्त्री । वन्दाकें । वान्दरा । वै.निघ. । [याम । वै.निघ. ।

पदवी । स्त्री । भिण्टीक्षुपे । झाँटी । नागबला-

पदाकः । पुं । सर्पे । वै.निघ. ।

पदाङ्गी । स्त्री । रक्तलज्जालुकायाम् । वै.निघ. । हंसपाद्याम् । रा.नि.व.५ ।

पदारोही (इन्) । पुं । वटवृक्षे । मद.५व. ।

पदार्थः । पुं । द्रव्यगतरसवीर्यादौ । स पञ्चविधः—"द्रव्यं रसो गुणो वीर्यं विपाकः शक्तिरेव च । पदार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्वन्ति कर्म च ॥" भा. । "योऽर्थोऽभिहितः सूत्रे पदैर्वा स पदार्थः ।" सु.च.६५अ. ।

पदिका । स्त्री । रक्तलज्जालुकायाम् । हंसपाद्याम् । लज्जालुकायाम् । रा.नि.व.५ । [२७अ. ।

पदेन्द्राभः । पुं । विष्किरपक्षिविशेषे । च.सू.

पद्मम् । क्ली । पादशीतलायाम् । व्याक. ।

पद्मम् । पुं, क्ली । Nelumbium Speciosum, Salvadora Indica.) कमल । पद्म । रा.नि.व.१० । हिं कनेल । तें तम्मिपुव्वु । ता. अम्बल । तत्पर्य्यायाः,—नलिनं, अरविन्दं,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोत्पलं, सहस्रपत्रं, कमलं, शतपत्रं, कुशेशयं, पङ्केरुहं, तामरसं, सारसं, सरसीरुहं, विसप्रसून, वारिजं, राजीव, पुष्करं, अम्भोरुहं, कवारं, आस्यपत्र, वनशोभन, सरोरुह जलजन्म, जलरुट्, जलरुहं, सरीजं, सरीजन्म, सरोरुट, पङ्केज, पङ्कजं, अम्भोजं, अम्बूजं, सरसिज, श्रीवास, श्रीपर्णं, इन्दिरालयं, जलेजातं, अब्जं, कञ्जं, नलं, नालिकं, नालीकं, वनजं, अम्लानं, पुष्टकं, अब्जः। गुणाः—बीजं वान्तिहरं। पत्रशय्या शीतला ज्वरे दाहहरं। पुष्पं गुदभ्रंशहरं। "यत्र तु पद्ममित्युक्तं तत्र प्रायः पद्मकेशरं ग्राह्यम्।" सि. यो.पि.श्लेष्मज्व.चि.श्रीकण्ठः। सि.यो.सन्निपातज्व. अभ्यङ्गे। च.द.वा.पि.ज्व.चि.। See कमलम्। श्वेतकमले। च.सू.४अ.। शीषधातौ। रा.नि.व. १३। पुष्करमूले। रा.नि.व.६। मा.नि.। वै.निघ.२ भ.ज्व.चि.गुडूच्यादिः। जले। वै.निघ.। पद्मकाष्ठे। धरणि.। वै.निघ.अ.सा.चि.पद्मादिचूर्णे। भैष. कुष्ठ-चि.कन्दर्पसारतैले। धुलूरद्वये। पद्मकेसरे। च.द.गर्भाधिकारे मधुकादिः। पुं। गुग्गुलुविशेषे। "पद्मोमाणिक्यमभवः।" दर्वीकरसर्पभेदे। सु. कल्प.४अ.।

पद्मकम्। क्ली। पद्मकाष्ठे। पद्मकाष्ठे। धरणि.। हिं पद्माक। तैं एणुगुसदेवि। तत्पर्य्यायाः,—पद्मकाष्ठं, पीतं, पीतद्रु, मालेयं, शीतलं, हिमं, शुभं, केदारजं, रक्तं, पाटलापुष्प सन्निभं। गुणाः—'पद्मकं तुवरं तिक्तं शीतलं वातलं लघु। विसर्पदाहविस्फोटकुष्ठश्लेष्मासपित्तहृत्। गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत्॥' भा.। शीतलं तिक्तं रक्तपित्तघ्नं मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटघ्नञ्च। अपिच,—पद्मकं पद्मगन्धि स्यात् तथा पद्माह्वयं स्मृतं। पद्मकं तुवरं तिक्तं शीतलं वातलं लघु॥ विसर्पदाह विस्फोट-कुष्ठ-श्लेष्मास्रपित्तहृत्। गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत्॥ रा.नि.व.१२। तत्प्रशस्तं यथा—"पद्मकं सरलं भद्रं कौटदोषविवर्जितम्" भैष.। कुष्ठे। कूड़। रा.नि.व.१२। च.सू.४अ.। तन्नामकलूतादिकीटविषघ्नागदे। वा.उ.३७अ.।

पद्मकण्टकः। पुं। तन्नामकक्षुद्ररोगभेदे। पद्मकाँटा रोग। लक्षणम्—"ते पद्मकण्टका ज्ञेया ये पद्मिव कण्टकैः। चीयते नीरुजैर्यैते शरीरं कफवातजैः॥" वा.उ.३१अ.।

पद्मकन्दः। पुं। कमलकन्दे। पद्मेर गँड़ो वा शालूक। हिं कमलकन्द। तत्पर्य्यायाः,—शालुक, शालूकं, पद्ममूलं, कटाह्वयं, जलालुकं। गुणाः—कटुः विष्टम्भी रूक्षः रुच्यः कफघ्नः कषायः कासपित्तघ्नः तृष्णादाहहरश्च। रा.नि.व.१०। शालूकं शीतलं हृद्यं पित्तदाहास्रशुद्धिकृत्। दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम्। संग्राहि मधुरं रूक्षं भिषाग्भमपि तद्गुणम्॥" भा.। स्त्री (न्दा)। जलपत्रिविशेषे। वै.निघ.।

पद्मकर्कटः (टी)। पुं, स्त्री। कमलाखे। पद्मबीज। वै.निघ.। रा.नि.व.१०। [निघ.।

पद्मकर्णिका। स्त्री। कमलकर्णिकायाम्।

पद्मकादिगणः। पुं। पद्मकपुष्करह्रिबेरगर्द्धि शृङ्गाम्रतादृशजीवनसंज्ञकरूपे। गुणाः—स्तन्यकराः वातपित्तघ्नाः प्राणनादिगुणयुक्ताश्च। वा.सू.१४। १५अ.।

पद्मकाष्ठम्। क्ली। स्वनामख्यातसुगन्धकाष्ठे। पद्मकाष्ठे। रा.नि.व.१२।

पद्मकाह्वयम्। क्ली। पद्मकाष्ठे। च.द.वा.व्या. चि.एकादशग्रहतीमहाप्रसारणीतैले। "फलिनीद्विनिशाचौद्रसर्पिर्भिः पद्मकाह्वयम्।"

पद्मकिञ्जल्कः। पुं। पद्मकेसरे। वै.निघ.।

पद्मकी (इन्)। पुं। भूर्जवृक्षे। श.मा.।

पद्मकीटः। पुं। अग्निप्रकृतिकीटविशेषे। सु. कल्प.८अ.। See कीटः।

पद्मकेश(स)रः। पुं, क्ली। पद्मकिञ्जल्के। पद्मरेणु। रा.नि.व.१०। च.द.वा.पि.ज्व.चि.। "विफलां पद्मकेशरम्।" सु.सू.३८अ. प्रियङ्ग्वादिः। च.सू.४अ.। गुणाः—मलसंग्राहि शीतलं दाहघ्नम् अशसः स्रावहरञ्च। राज.। [भा.।

पद्मगन्धकम् (न्धि)। क्ली। पद्मकाष्ठे।

पद्मचारटी। स्त्री। स्थलकमलिन्याम्। स्थलपद्म। वै.निघ.। नवनीतखोय्यां। च.द.विष-चि.।

पद्मचारिणी। स्त्री। भार्य्यां। वागनहाटी। प.मु.। शमीवृक्षे। हरिद्रायां। लाक्षायां वृद्धौ। मे.। रा.नि.व.२३। (Hibiscus mutabilis.) स्थलपद्मायाम्। या उत्तरापथे स्वनाम्ना ख्याता। तत्पर्य्यायाः,—अव्यथा, अतिचरा, पद्मा, चारटी। गुणाः—"ब्रह्मानुष्णा कटुस्तिक्ता कषाया कफवातजित्। मूत्रकृच्छ्राश्मशूलघ्नी श्वासकासविषापहा।" भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्मतन्तुः। पुं। मृणाले। रा.नि.व.१०।
पद्मतीर्थम्। क्ली। पुष्करमूले। वै.निघ.।
पद्मदशनः। पुं। सर्ज्जरसे। वै.निघ.। श्रीवास। लोबान् इति भाषा। ग्र.च.।
पद्मनाड़िका। स्त्री। स्थलपद्मिन्यां। वै.निघ.।
पद्मनालम्। क्ली। कमलनाले। पद्मस्य डाँटी। रा.नि.व.१०। [१९।
पद्मनेत्रः। पुं। जलचरपक्षिभेदे। रा.नि.व.
पद्मपत्रम्। क्ली। आमगुडे। रा.नि.व.२३। पुष्करमूले। रा.नि.व.६। पद्मदले। पद्मस्य पाता। वै.निघ.।
पद्मपत्रा। स्त्री। स्थलपद्मिन्याम्। वै.निघ.। कर्पूर-हरिद्रायाम्।
पद्मपर्णम्। क्ली। पद्मपत्रे। वै.निघ.। पुष्कर-मूले। अ.टी.।
पद्मपुष्करजम्। क्ली। पुष्करमूले। रा.नि व.६।
पद्मपुष्पः। पुं। पारिभद्रवृक्षे। पिकाङ्गपक्षिणि। वै.निघ.। (Webera Corymbosa.) कर्णिकारवृक्षे। कलके फूल। ग्र.च.।
पद्मबन्धुः। पुं। भ्रमरे। सूर्य्ये।
पद्ममधु। क्ली। पद्मपुष्पाहृतमाक्षिके। पद्मस्य मधु। गुणाः,—अरविन्दाहृतः शीतो मकरन्दोऽतिवृंहणः। त्रिदोषशमनः सर्व्वनेत्रामयनिसूदनः॥
पद्ममुखी। स्त्री। कण्टकार्य्याम्। वै.निघ.। दुरालभायाम्। ग्र.च.।
पद्ममूलम्। क्ली। पद्मकन्दे। शालूके। रा.नि. व.१०। चि.क्र.क.गर्भ.चि.।
पद्मरक्ता। स्त्री। पद्मगन्धावृक्षे।
पद्मरजः। क्ली। पद्मकेसरे। वा.सू.३अ.प्रियङ्ग्वादिः। "पद्मादृजो योजनवल्ग्वनन्ता।"
पद्मरागः। पुं। रक्तवर्णे माणिक्यभेदे। See माणिक्यम्।
पद्मरेणुः। पुं। पद्मकेसरे। वै निघ.।
पद्मलाञ्छनः। पुं। सूर्य्ये। मे.।
पद्मवती। स्त्री। स्थलपद्मिन्याम। वै.नि.। कमलिन्यां। पद्मस्य झाड़। रा.नि.व.५।
पद्मवर्णः। त्रि। लोहितवर्णे। भा.४भ.। "पद्मवर्णो महापद्मः।"
पद्मवर्ण(क)म्। क्ली। पद्मकाष्ठे। वै.निघ.। पुष्करमूले। जटा.।
पद्मबीजम्। क्ली। कमलबीजे। पद्मस्य बीजि। हिं कमलगट्टा। पद्माच इति महाराष्ट्रकर्णाटयोः-ख्यातम्। तत्पर्य्यायाः,—पद्माक्षं गालीड्यं, कदली, भेण्डा, क्रौञ्चादनौ, क्रौञ्चा, श्यामा, पद्मकर्कटी। गुणाः—कटु स्वादु पित्तघ्नं कृमिकरं दाहरक्तश्रमनं पाचनं रुच्यञ्च। रा.नि.व.१०। "पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु। विष्टम्भि वृष्यं रुच्यञ्च गर्भसंस्थापकं परम्। कफवातकरं बल्यं याहि पित्तास्रजित्..... ॥" भा.।
पद्मबीजाभम्। क्ली। मखान्नफले। माखना इति भाषा। भा.।
पद्मिवृक्षः। पुं। पद्मकाष्ठतरौ। रा.नि.व.२३। नन्दीवृक्षे। रा.नि.व.१२।
पद्मशायिनी। स्त्री। जलचरपक्षिभेदे। वै.निघ.।
पद्मा। स्त्री। पद्मचारिण्याम्। स्थलपद्मे। रा. नि व २३। च.वि.८अ.। वा.सू.१५अ.। भार्य्यायाम्। वामनहाटी। च.सू.४अ.। चि.३अ.। च.द.गर्भस्रावे। भा.म.४भ. गर्भ-चि.। सु चि.२अ.। "समङ्गा रजनी पद्मा।" तन्नामकौषधौ। या पद्माकारा पद्मगन्धा पद्मवद्रक्ता च। 'पद्माकारा पद्मरक्ता पद्मगन्धा। च.चि.१अ.कन्दर्पसारतैले। मञ्जिष्ठायाम्। मृणाले। वै.निघ.। खवङ्गे। अम.। मनसादेव्यां। मे.। फञ्जिकायां। ग्र.र.। कुसुम्भपुष्पे। र.मा.।
पद्माकरः। पुं। तड़ागे। अम.।
पद्माटः। पुं। चक्रमर्दवृक्षे। चाकन्दा। अम.। भैष.मु.रो.चि.व्र.खदिरवट्यां। क्ली। तद्बीजे। महाभल्लातकगुड़े।
पद्मान्तरम्। क्ली। पद्मपत्रे। वै.निघ.।
पद्मालया। स्त्री। लवङ्गलतायाम्। अम.।
पद्मावती। स्त्री। स्थलपद्मिन्याम्। जटा.। मनसादेव्यां। ग्र.र.।
पद्माङ्क(य)म्। क्ली। पद्मकाष्ठे। भा.। वै. निघ.२भ.सर्व्वज्व.चि सुदर्शनचूर्णे। च.द.म.रो.चि. व्रहत्खदिरवट्यां। [नि.व.५।
पद्माह्वया (ह्वा)। स्त्री। स्थलपद्मिन्यां। रा.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्माक्षम्। क्ली। पद्मबीजे। रा.नि.व.१०।

पद्मिनी। स्त्री। पद्मपण्डे, कमलिन्यां। पद्मोत्पन्न झाड़। गुणाः—मधुरा तिक्ता कषाया शिशिरा पित्तघ्नी क्लमघ्नी शोषशान्तिभ्रान्तितापक्लान्तिहृच्च। रा.नि.व.१०। "मूलनालदलातफलफलैः सनृदिता पुनः। पद्मिनी प्रोच्यते।" भा.पू.व.। पद्मे। विश्व.। मृणाले। शब्दमा.। हस्तिन्यां। धरणि.।

पद्मिनीकण्टकः। पुं। क्षुद्ररोगे। पद्मकँटा। "कण्टकैराचितं वृत्तं कण्डूमत्पाण्डुमण्डलं। पद्मिनी कण्टकप्रख्यैस्तदाख्यं कफवातजम्॥" सु.नि.१३अ.

पद्मी (इन्)। पुं। गजे। अम.। [र.मा.।

पद्मोत्तम(र)विकासः। पुं। कुसुम्भपुष्पवृक्षे।

पद्मोत्तरः। पुं, क्ली। कुसुम्भवृक्षे तत्पुष्पे। रा.नि.व.४। स्त्री। कुसुम्भबीजे। वै.निघ.।

पद्मोद्भवा। स्त्री। मनसादेव्याम्। पुराणम्।

पनसः (सः)। पुं। वह्नि कण्टकमहाफलवृक्षे पणसवृक्षे। काँटाल गाछ। हिं कटहल। भा। तत्पर्य्यायाः,—कण्टकिफलः, कण्ठाकालः, श्राशयः, सुरजफलः, पलस, फलसः, चम्पकालः, चम्पकीषः, चम्पालः, रसालः, सदङ्गफलः, पानस, सक्षासज्जः, फलिनः, फलवृक्षकः, स्थूलः, कण्ठाफलः, मृल्लफलदः, अपुष्पफलदः, पूतफलः। गुणा—"पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहं। तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं गुरु॥ बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान्। आमं तदेव विष्टम्भि वातलं तुवरं गुरु। दाहकृन्मधुरं बल्यं कफमेदो विसर्पनं॥ पनसोद्भूतबीजानि हृद्यानि मधुराणि च। गुरूणि बद्धवर्चांसि सृष्टमूत्राणि संवदेत्। मज्जा पनसजो हृद्यो वातपित्तकफापहः॥ मण्डलिसर्पविषे। सु.कल्प.४अ.।

पनसतालिका। स्त्री। कण्टकीफलवृक्षे। काँटाल गाछ। शब्दमा.।

पनसा (सिका)। स्त्री। कर्णजक्षुद्ररोगभेदे। कानेर फोड़ा। लक्षणं—"कर्णस्याभ्यन्तरे जाता पिडकामरुवेदनाम्। स्थिरां पनसिकां तान्तु विद्याद्वातकफोत्थिताम्॥" भा.। [भै.

पन्नगः। पुं। सर्पे। पद्मकाष्ठे। औषधिविशेषे।

पन्नगकेशरः। पुं। नागकेशरवृक्षे। रा.नि.व.९।

पन्नगी। स्त्री। सर्पिण्याम्। मनसादेव्याम्। सर्पिणीचुपे। रा.नि.व.५। [च.। विका.।

पन्नद्धा (द्धी)। स्त्री। चर्म्मपादुकायाम्। हे.।

पन्नूरः। पुं। शालिधान्यके। वाचि.१अ.।

पपीता। स्त्री। (Carica Papaya.) खनामख्यातफलविशेषे। पेँपे। हिं पपीया। तं बप्पयि। ता. पप्पयो गुणाः,—मधुरा पाचनो हिमा वातानुलोमिनी प्रोक्ता।

पपुः। स्त्री। उपमातरि, धात्र्याम्। उणा.।

पमरा। स्त्री। सल्लकीनामगन्धद्रव्ये। राज.।

पयः। क्ली। जले। दुग्धे। मे.। बालके। बाला। भा.म.१भ.चित्तभ्रमज्व.चि। "पाठा पटोली पयः।'

पयःकन्दा। स्त्री। क्षीरविदार्य्यां। भूँई कुमड़ा। रा.नि.व.७।

पयःपालिनी। स्त्री। बालके। उशीरे। वै. निघ.२भ.वि.ज्व.चि.।

पयःपेटी। स्त्री। नारिकेले। प.मु.।

पयःप्रसादम् (दि)। क्ली। निर्म्मलीबीजे। निर्म्मला। भा.। [नि.व ५।

पयःफेना (नी)। स्त्री। दुग्धफेनीक्षुपे। रा.

पयःसात्म्यम्। क्ली। तक्रे। वै.निघ.।

पयस्यः। पुं। बिड़ाले। श.च.। क्ली। पयोविकारे घृतादौ। अम.।

पयस्या। क्ली। क्षीरकाकोल्याम्। रा.नि.व. २३। सु.सू.३९अ पित्तशमने। भा.। गर्भरो.चि. योनिरो.चि.। श्वेतविदारीकन्दे। शुक्ल भूँई कुमड़ा। च.सू.४अ. बृंहणे। सु.चि.१७अ.। कुटुम्बिनीक्षुपे। भा.४भ.पूतना.चि.। "नवा पयस्या गोलोमी।" स्वर्णक्षीर्य्याम्। मे.। च.वि.८अ.। अर्कपुष्प्याम्। र.मा.। सु.चि.१७अ.। दुग्धिकायां। मे.। आमिक्षायाम्। हे.च.।

पयस्वलः। पुं। छागे। रा.नि.व.१९।

पयस्विनी। स्त्री। राज्ञी। मे.। क्षीरकाकोल्याम्। पस.। रा.नि.व.३। दुग्धफेनीक्षुपे। रा. नि.व.५। क्षीरविदार्य्याम्। रा.नि.व.७। काकोल्याम्। रा.नि.व.३। जीवन्त्याम्। भा.। ज्योतिष्मतीलतायाम्। शुक्लालाव्याम्। सक्षिप्याम्। वै. निघ.। छाग्याम्। रा.नि.व.१९। दुग्धवत्याम्।

पयस्वी। स्त्री। क्षीरकाकोल्याम्। वै.निघ.।

पया। स्त्री। शुण्ठ्याम्। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पयोगतः
पयोघनः } पुं । करकायाम् । शिल ।

पयोदः । पुं । मुस्तके । भैष० ह्रद्रोगचि० । चन्दनगुलु०चि० । नारिकेलखण्डे ।

पयोधजः । पुं । समुद्रफेने ।

पयोधरः । पुं । स्तने । रा०नि०व०१८ । नागरमुस्तके । वृक्षौ । वै०निघ० । नारिकेलवृक्षे । कञ्जरौ । मे० ।

पयोधि(ब्धि)क्र[ज]म् । क्लौ । लवणे । "लवणन्तु पयोधिजम्" रा०नि०व०२३ । समुद्रफेने । वै०निघ० ।

पयोरः । पुं । खदिरवृक्षे । शब्दच० ।

पयोलता
पयोविदारिका(री) } स्त्री । क्षीरविदार्याम् । शुक्लभूँइकुष्माण्डे । रा०नि०व०७ ।

पयो(ष्टि)ष्णिः । पुं । पेचके । वै०निघ० ।

पयोष्णी । स्त्री । भारतवर्षीयनदीविशेषे । सा च विन्ध्याचलदक्षिणे प्रसिद्धा । जलगुणाः—सर्व्वरोगघ्नं रुच्यं पवित्रं लघु बलकान्तिजनकं पापघ्नं सुखदञ्च । रा०नि०व०१४ ।

पयोहेतु । क्लौ । दधनि । वै०निघ० ।

परक्कः । पुं । केशराजे । वै०निघ० ।

परग्रन्थिः । पुं । सन्धौ, सन्धिस्थाने, अङ्गुलिपर्व्वणि, पर्व्वबन्धौ । हारा० ।

परञ्जः । पुं । फेने । तैलनिष्पेषणयन्त्रे । घानि । क्षुरिकाफले । मे० ।

परट्टक् । पुं । काके । वै०निघ० । [वै०निघ० ।

परट्टव्यहा । स्त्री । यष्टिपर्णे । गँठेना ।

परपत्रिका । स्त्री । क्षुद्रचुञ्चुचुपे । रा०नि०व०४ ।

परपुष्टः । पुं । कोकिले । रा०नि०व०१९ ।

परपुष्टमहोत्सवः । पुं । आम्रवृक्षे । शब्दसा० ।

परपुष्टा । स्त्री । कोकिलायाम् । वै०निघ० । वन्दायाम् ।

परभृतः (त्) । पुं । कोकिले । काके । अम० ।

परमदः । पुं । सुरापानजन्यरोगभेदे । लक्षणम्—"श्लेष्मोक्लेदोऽङ्गगुरुता विरसास्यता च विष्मवसक्तिरथ तन्द्रिररोचकश्च । लिङ्गं परस्य च सदस्य वदन्ति तज्ज्ञाः तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥" मा०नि० ।

परमपूतिकः । पुं । अहिफेने । प०मु० ।

परमा । स्त्री । सुगन्धद्रव्यविशेषे, गन्धशठ्याम् । तदालेपनं ज्वरघ्नं रुचीप्रञ्च । राज० । च०द्र०व्या०, चि०महाराजप्रसारणीतैले ।

परमाणुः । पुं । रजसश्चिंशत्तमे भागे । "जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः । तस्य त्रिंशत्तमोभागः ॥" प०प्र०१अ० ।

परमान्नम् । क्लौ । क्षीरिकायाम्, पायसे । पायेस्, परमान्न । तत्साधनप्रणाली यथा—"शुद्धैर्ज्जीवकं दुग्धे तु घृताक्तास्तण्डुलान् क्षिपेत् । ते सिद्धा क्षीरिका दुग्धा बल्या धातुपुष्टिप्रदा गुरुः । विष्टम्भिनी हरत् पित्तरक्तपित्ताग्निमारुतान् ॥" भा० ।

परमायुः । क्लौ । जीवितकाले । यथा—"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह । परमायुरिदम्प्राक्तं नराणां करिणामिह ॥" श०सं० ।

परमयुधः । पुं । असनवृक्षे । शब्दच० ।

परमृत्युः । पुं । काके । त्रिका० ।

परमेश्वरः । पुं । पारदे ।

परमेष्टः । पुं । महानिम्बवृक्षे । र०मा० ।

परमेष्ठिनी । स्त्री । ब्राह्मीक्षुपे । वागनहाटी । रा०नि०व०४ ।

परुः । पुं । Eclipta prostrata.) नीलभृङ्गराजे । केशराज । त्रिका० । [रसे ।

परला । स्त्री । पटालवृक्षे । रस०र०कुष्ठश्लेन्द्र-

परलोकैषणा । स्त्री । परलोकस्य गवेषणायां । च०सू०११अ० ।

परवासिका (नी) । स्त्री । वन्दायाम् । परगाछा ।

परशम् । क्लौ । प्रस्तरविशेषे । पर्शु पाथर । पराणम् ।

परशुच्छिन्नः । पुं, स्त्री । कुठारिया इति ख्याते वृक्षे । कोदालने, कुड़ले । संग्रहः लौहचालने । कन्दगड़्च्याम् ।

परशुरामः । पुं । रसराजशिरोमणिकारे ।

परा । स्त्री । वन्ध्याकर्कोटक्याम् । हस्तिन्याम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पराक्पुष्पः (ष्पी)। पुं । धूलीकदम्बवृक्षे । रा.नि.व.९। श्वेतापामार्गे। रा.नि.व.४ ।

परागः। पुं । पद्मकेसरे। कर्पूररजसि। वै. निघ.। पुष्परेणौ। अम.। चन्दने। मे.।

परागपुष्पः। पुं । धूलीकदम्बे । वै.निघ.।

पराचीनः। त्रि । पराङ्मुखे। वा.उ.२८अ.।

पराञ्जः। पुं। तैलनिष्पीड़नयन्त्रे । फेने । शु.र.।

परात्ययः। उलुपवृक्षे । ऊलू । शु.च. । कासरोग । वं.निघ.।

परादिगुणाः। पुं । परापरत्वादौ। यथा— "परापरत्वे युक्तिश्च संख्या संयोग एव च। विभागश्च पृथक्त्वञ्च परिमाणमथापि च । संस्कारोऽभ्यास इत्येते गुणाः ज्ञेयाः परादयः॥" च ।

परानसा। स्त्री । औषधप्रयोगे, चिकित्सायां । शु.च.।

परान्नम्। क्ली । पलान्ने । पाकराजः ।

परापरम्। क्ली । परूषकफले । भा. ।

पराभिधम्। क्ली । कुङ्कुमे । वै.निघ. ।

परामृतम्। क्ली । वर्षाभूपले । विका. ।

पराहः। पु । कारवेल्लके । विका. ।

पराहकः। पुं । पाषाणे । विका. । [निघ. ।

पराडम्। क्ली। चन्दने। कुङ्कुमे। उशीरे। वै.

परावतम्। क्ली। परूषकफले। रा.नि.व.११।

परावरम्। क्ली। परूषकफले। रा.नि.व.११।

परावेदी। स्त्री । ब्रह्मण्याम् । व्याकुड़ । कोषान्तरम् । [तन्त्रकारः ।

पराशरः। पुं। तन्त्रमकायुर्व्वेदतन्त्रकारे। See

पराश्रया। स्त्री । साधवीलतायाम् । वै.निघ.। वन्दायां। परसाड़ा। शु.च.। [सु.सू.३३अ.।

परासङ्गः। पुं । अवरोधे । शोणितरोधे ।

परिकर्त्तनम्। क्ली । अधश्छेदे। सु.सू.९अ.। छेदनवदनुभवे। वा.टी.चि.१अ.।

परिकर्त्तिका। स्त्री । कर्त्तनवत्पीड़ायां। च. चि.३अ.। वमनविरेचनव्यापदिगेषे। सु.चि ३४अ.।

परिकर्म्म। क्ली । अभ्यङ्गे । परिचर्य्याकरणे। वै.निघ.। कुङ्कुमादिना कायप्रसाधने। अम.भ.।

परिकर्म्मी। त्रि । सर्व्वकर्म्मकर्तृषु, परिचारकेषु । सु.सू.५अ.।

परिक्रमसहः। पुं । क्वाथे। विका.।

परिगर्भिकः (भवः)। पुं । बालरोगविशेषे। एड़्या लागा। हिं अहाड़ोति लोके। "मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि। श्वासाग्निसादवमथुतन्द्राकासारुचिभ्रमैः। युज्यते कीटवद्वृद्ध्या च तमाहुः परिगर्भिकम्। रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम्॥" भा । [भ.।

परिग्रहः। पुं। स्त्रियाम्। मूले। कन्दे। अम.

परिघः। पुं । तन्नामकमूढ़गर्भविशेषे, यत्र गर्भः परिघ इव योनिमुखमाहत्य तिष्ठेत्। यथा— "योनौ स्थितः स परिघः परिघेन तुल्यः।" सु. नि.८अ.।

परिचरः। पुं। भृत्ये, सेवके। र.मा. ।

परिचरकर्म्म। क्ली । सेवाकार्य्ये।

परिचर्य्या। स्त्री । सेवायाम्। अम.। शु.र.।

परिचारकः। पुं । सेवके। अम.। लक्षणं —"स्निग्धो जुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे। वैद्यवाक्यकृदात्तो युज्यते परिचारकः॥" भा.।

परिच्छदः। पुं । परिधानवस्त्रे, आच्छादने। भागवते। परिवारे। हे.च.।

परिजातः। पुं । श्वेतजवाह्वे।

परिणतः। त्रि । परिपक्वे। अम.।

परिणामः। पुं। परिपाके। विकारे। वै.निघ.।

परिणामज(शूल)म्। क्ली। पक्तिशूले। रा. नि.व.२०।

परिणाहः। पुं । वर्त्तुलतायाम्। सु.सू.७अ.। विस्तारे। अम.।

परितापः। पुं । रोगे । वै.निघ.। कम्पे। विश्व.। उष्णतायाम्। च.।

परितिक्तः। पुं । निम्बवृक्षे । वै.निघ.।

परिदरः। पुं । दन्तमूलगतमुखरोगे। लक्षणं —"दन्तमांसानि शीर्य्यन्ते यस्मिंष्ठीवति चाप्यसृक्। पित्तासृक्कफजो व्याधिः ज्ञेयः परिदरो हि सः॥" सु.नि.१६अ.।

परिधूमायनम्। क्ली । धूमोद्गारे। चौंओया ढेकुर। सु.नि.९अ.।

परिपचनम्। क्ली । तैलपाचनिकायाम् । च.सू.१५अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिपाकः। पुं। परिणामे। भा.।
परिपाकिनी। स्त्री। विद्रतायाम्। श.च.।
परिपिष्ट(क)म्। क्ली। शीपके। रा.नि.व.१३।
परिपुटनम्। क्ली। पाककरणे। वै.निघ.।
परिपुष्करा। स्त्री। कर्कटीभेदे, गोडूम्बायाम्। राजगोमुक। श.च.।
परिपूतम्। क्ली। अपतुषधान्ये। मनुः। त्रि। पवित्रीकृते।
परिपेलम्। क्ली। कवर्त्तमुस्तके। प.मु.। वि.च.८अ.।
परिपेलवम्। क्ली। कुटन्नटे, जलमुस्तायाम्। केउट मूता। वा.सू.१५अ.रोध्रादिः। "पेलवाल-परिपेलवमोचाः।" सुस्तायां। ज.द.१२अ.।
परिपेल्लम्। क्ली। जलजातत्रणविशेषे, जलमुस्तायाम्। जलेर मूता, केउट मूता। नं जलमंडवी। कं वल्लिगड्ड। गुणाः—कटूष्णं कफवातघ्नं व्रणघ्नं दाहघ्नम् आमशूलघ्नं रक्तदोषघ्नञ्च। रा.नि.व.६।
परिपोटः (कः)। पुं। कर्णपालीगतरोगे। कानेर पोताय रोग। लक्षणं—"सौकुमार्य्याच्चिरोत्सृष्टसङ्गसाभिप्रवर्द्धिते। कर्णशोफी भवेत् पाल्यां सरुजः परिपोटवान्।" सु.चि.२५अ.। लग्नभेदे। वा.उ.२९अ.।
परिपोषणम्। क्ली। हिङ्गुनि। ज.द.१२अ.।
परिप्लुता। स्त्री। योनिरोगविशेषे। लक्षणं यथा—"परिप्लुतायां भवति ग्राम्यधर्म्मे रुजा भृशम्।" सु.। तथा—"पित्तलाया नृसंवासे क्षवथूद्गारधारणात्। पित्तसंमूर्च्छितो वायुर्योनिं दूषयति स्त्रियाः। शूलाः स्पर्शासहा सर्त्तिर्नीलपीतमसृक् स्रवेत्। शोणिवङ्क्षणपृष्ठार्त्तिज्वरार्त्तायाः परिप्लुता॥" च.। वा.उ.३३अ.। मदिरायाम्। हे.च.।
परिभवः। पुं। पारिगर्भिकरोगे। एँड़ेलांगा।
परिभाव्यम्। क्ली। कुष्ठौषधे। कूड़।
परिभाषा। स्त्री। वैद्यकमानादिविषयकग्रन्थे।
परिमण्डलः। पुं। मशकजातिभेदे। सु.कल्प.८अ.। See मशकः। त्रि। सम्यग्वर्त्तुले। भा.चुद्रीचि.। सु.सू.७अ.। [अम.भ.।
परिमलः। पुं। सुगन्धे। मैथुने। विमर्दने।
परिमाणम्। क्ली। माने। See मानम्।
परिमार्ज्जनम्। क्ली। खाद्यभेदे। मधुमस्तके। श.च.। परिष्करणे। मधुतैलपाके।
परिमोचः। पुं। मलोत्सर्गे।
परिम्लानः। पुं। रक्तभिगतौभेदे। वै.निघ.।
परिम्लायितिमिरः। पुं। पित्तजन्यापरतिमिररोगे। लक्षणं—"पित्तं कर्य्यात्परिम्लायि मूर्च्छितं पित्ततेजसा। पीता दिशस्तु खद्योतान् भास्करञ्चापि पश्यति। विकीर्य्यमाणान् खद्योतैर्ध्वांक्षैर्जोभिरेव वा॥" मा.नि.।
परिलेही। पुं। कर्णपालीरोगे। लक्षणम्—"कफासृक्कृमिसम्भूतः सविसर्पान्वितस्ततः लिह्यात् सशब्कुलीं पालीं परिलेहीति स स्मृतः॥" सु.चि. २५अ.।
परिवर्त्तनम्। क्ली। पार्श्वपरित्यागे। मा.नि.।
परिवर्त्तिका। स्त्री। शूकरीरोगे, मेढ्रजन्तुद्वरीरोगे। मूदो। लक्षणम्। "मर्दनात् पीड़नाच्चापि तथैवाल्पाभिघातनः। मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरन्। तदा वातोपसृष्टन्तु तच्चर्म्म परिवर्त्तते। सवेदनं सदाहञ्च पाकञ्च व्रजति क्वचित्। मणिरधस्तात् कीशस्तु ग्रन्थिरूपेण लक्ष्यते।" इत्यादि। सु. नि.१३अ.। [हे.च.।
परिवापः (पम्)। पुं, क्ली। मुण्डने। मे.।
परिवर्द्धितम्। क्ली। वृद्धौ। त्रि। परिवर्द्धिते।
परिवेषकः। पुं। परिवेषणकर्त्तरि। तल्लक्षणम्—"स्नातश्चन्दनचर्चितः सुवसनः सख्यौ प्रसन्नाननः स्पष्टात्मा सुभगः प्रसन्नहृदयः श्रीकान्तपूजारतः। स्वामिस्नेहपरः सुपाकनिपुणः प्रौढ़ो वदान्यः शुचिर्विप्रो वा परिवेषकस्तु कुलजश्चान्योऽपि वा भूपतेः॥" पाकराजः।
परिवेषणम्। क्ली। भोजनार्थं भोजनपात्रे अन्नादिदाने।
परिव्याधः। पुं। (Pterospermum acerifolium.) द्रुमोत्पले। ओलट कंवल। प.मु.। जलवेतसे। रा.नि.व.९। भा.। कर्णिकारवृक्षे। कनकें फूलेर गाछ। रा.नि.व.९। आरग्वधवृक्षे।
परिव्राजी। स्त्री। श्रावणीमहाक्षुपे। भूंईरो। रा.नि.व.५।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिशुष्क(मांस)म्। क्ली। पक्वमांसभेदे। मांसेर व्यञ्जन विशेष। "मांसं बहुघृतैर्भृष्टं सिक्तमेद्याम्बुना मुहुः। जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते। शु.च.। राज.। See मांसम्।

परिशृ(श्र)तम्। क्ली। सुरायाम्। वै.निघ.।

परिश्रमसहः। पुं। छागे। छागल।

परिषत्। स्त्री। सभायाम्। सा द्विधा ज्ञानवतो मूढपरिषच्चेति। पुनस्त्रिधा सुहृत्परिषत्, उदासीनपरिषत्, प्रतिनिविष्टपरिषच्चेति। च.वि. ८अ.।

परि(रौ)षेकः। पुं। स्नानादौ। शिरसि धारापातने। मूर्द्धतैलविधिभेदे। भा.। व्रणवेदनोपशमनार्थमुष्णक्वाथसेचने। सु.चि.१अ.। वा.चि.१अ.।

परिषेकस्वेदः। पुं। स्वेदविशेषे। यथा—"वातिकोत्तरवातिकानां पुनर्मूलफलयुक्तादीनामुत्क्वाथे: सुखोष्णैः कुम्भीवर्षुणिकाः प्रनाड़ीर्वा पूरयित्वा यथार्हस्निग्धस्वेदाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेत्॥" च.सू.१४अ.।

परि(री)सर्पः (सर्पणम्)। क्ली। वीसर्परोगभेदे। तन्नामकक्षुद्रकुष्ठभेदे। "अनैः शरीरे पिड़काः स्रवत्यः सर्पन्ति यास्तं परिसर्पमाहुः।" सु.नि.५अ.। पुं। दर्वीकरसर्पविशेषे। सु.कल्प.४अ.।

परिसर्य्या। स्त्री। सेवायाम्। वै.निघ.।

परिसिद्धिका। स्त्री। मण्डविशेषे। वै.निघ.। किट्टिकायाम्। वा.उ.३९अ.।

परिस्पन्दः (नम्)। पुं, क्ली। कम्पे। हे.च.।

परिस्यन्दः। पुं। चरणे, स्यन्दे। बिन्दुशः चरणे। चोआन। अम.भ.।

परिस्रावः। पुं। वमनविरेचनव्यापद्विशेषे। सु.चि.३४अ.। मुखस्रावे। नासास्रावे। गुदस्रावे। च.सू.१५अ.।

परिस्रावी (इन्)। पुं। कफजभगन्दरे। लक्षणं यथा—"कण्डूयनी घनस्रावी कठिनो मन्दवेदनः। श्वेतावभासः कफजः परिस्रावी भगन्दरः॥" मा. नि.। वि। निरन्तरस्रावशीले। भा.।

परिस्राव्युदरम्। क्ली। उदररोगभेदे। लक्षणं यथा—अल्पं यदन्नीपहितं तदल्पं भिनत्ति यस्यागतमन्यथा वा। तस्मात् चतात्त्रात् सलिलप्रकाशः स्रावः स्रवेद् गुदतस्तु भूयः। नाभेरधश्चीदरमेति हृद्धिं निस्तुद्यतेऽतीव विदह्यते च। एतत् परिस्राव्युदरम्।" सु.नि.७अ.।

परिस्रुतः। त्रि। बिन्दुशः चरिते। क्ली। मद्ये। वै.निघ.।

परिस्रुतदधि। क्ली। वस्त्रगालितदधनि। छाँका दही। गुणाः—वातघ्नं कफकृत् स्निग्धं बृंहणं पित्तघ्नञ्च। सु.सू.४५अ.।

परिस्रुता। स्त्री। द्राक्षामद्ये। वै.निघ.। वारुण्यां। ताड़ी। मे.।

परिस्रुत्। स्त्री। मद्यसामान्ये। रा.नि.व.१४।

परिहारः। पुं। तस्यैव दोषवचनस्य परिहरणे। यथा—"नित्यमात्मनि शरीरस्थे जीवितलिङ्गान्युपलभ्यन्ते। तस्य पुनरपगमान्नोपलभ्यन्ते। तस्मादन्यः शरीरादात्मा नित्यश्चेति।" च.वि.८अ.।

परिहार्य्यम्। क्ली। कुष्ठौषधे। कूड़। वै.निघ.।

परिक्षेपी (इन्)। पुं। वातपित्तजभगन्दरे। "वातपित्तात् परिक्षेपी परिक्षिप्य गुदं गतिः। जायते परितस्तच्च प्राकारपरिखेव च॥"

परोतिः। स्त्री। पुष्पाञ्जने। वै.निघ.।

परोरः। पुं। कारवेल्ले। क्ली। तत्फले। उणा.।

परोवर्त्तः। पुं। कच्छपे। वै.निघ.।

परोष्टिः। स्त्री। परिचर्य्यायाम्। मे.।

परुः। पुं। अङ्गुलिसन्धौ। रा.नि.व.१८। वंशग्रन्थौ। बाँशेर गाँइट। अयं निर्गुणः। रा.नि. व.६। परूषकवृक्षे। वै.निघ.। पर्व्वते। समुद्रे।

परुद्वारः। पुं। अर्श। श.मा.।

परु(रू)षः। पुं। परूषकवृक्षे। रा.नि.व.११। वंशग्रन्थौ। धामनवृक्षे। वै.निघ.। नीलझिण्ट्याम्। श.च.। तन्नामकवायव्यकीटे। सु.व.ल्प.८अ.। See कीटः। स्त्री (षा)। शतपदीभेदे। सु.कल्प. ८अ.। क्ली। परूषकफले। भा.। कर्व्वुरवर्णे। रूक्षे।

परु(रू)षकः। पुं। (Zylocarpus Granatum or Grewia Asiatica.) स्वनामख्यातफलवृक्षे। पेरूयफलेर गाछ, फलसा। हिं फलूहे, शुक्री, फरूषा। सं पपका। वेट्टहा। तें पुटिकी। स द्विधा वृक्षविटपभेदात्। सु.सू.३८ अ.परूषकादिः। वा.सू.१५अ.। तत्पर्य्यायाः—परूषकं, नागदलीपमं, गिरिपीलु, परावतं, नीलचर्म्म, नीलमण्डलं, परापरं, अल्पास्थि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणाः—अम्लकटुकं कफरोगहरं वातघ्नं पित्तकरम्। इत्यामपरूषगुणाः। पक्वं तत् मधुरं रुचिप्रदं पित्तघ्नं तर्पणं शीफहरञ्च। तत्फलं मेहपित्तसन्निवातघ्नम्। अवि.१७अ.। "परूषकङ्कषाम्लसमं पित्तकरं लघु। तत् पक्वं मधुरं पाके शीतं विष्टम्भि वृंहणम्। हृद्यं वृट्पित्तदाहास्रज्वरक्षयसमीरहृत् ॥" भा.। फलं मलसंग्राहि शैत्यकरं। पक्वं व्रणपिड़कादौ हितम्। त्वक्षषाया शीतला च। द्रव्यगुणान्तरम्।

परूस्। क्ली। परूषकफले। पक्व फल। रा.नि. व.११। गन्धौ। अम.।

परूषकादिः। पुं। तदादिगणकृतकषाये। स च परूषक-वरा-ट्राचा कट्फल-कतकाफल-राजाह्व-दाड़िम-शाकात्मकः तृष्णा-वात-सूतघ्नश्च। वा.सू.१५अ.।

परेष्टुका। स्त्री। बहुवत्सायां गवि। अम.।

परेधितः। पुं। कोकिले। श.मा.।

परोटः। पुं। घृतसिद्धरोटिकाभेदे। पराठा। वै.निघ.।

परोष्णी। स्त्री। तैलपाचिकायाम्। अम.।

पर्कटः। पुं। पशात्तापे। क्रौञ्चपक्षिणि। वै.निघ.।

पर्कटिः (टी)। स्त्री। प्लक्षवृक्षे। भा.।

पर्कटी (ट्टन्)। पुं। प्लक्षवृक्षे। पाकुड़ गाछ। तें जुव्विचेट्टु। प.मु.। र.मा.।

पर्जनी (न्या)। स्त्री। दारुहरिद्रायाम्। प. मु.। रा.नि.व.६। [अम.।

पर्ण्म्। क्ली। ताम्बूले। रा.नि.व.११। पत्रे।

पर्णः। पुं। पलाशवृक्षे। रा.नि.व.१०।

पर्णकः। पुं। सुनिषण्णशाके। भा.पू.१भ.शा.व.।

पर्णकारः। पुं। वारजीविनि। बारुई।

पर्णखण्डः। पुं। ताम्बूलखण्डे। वनस्पति-विशेषे। श.च.।

पर्णचोरकः। पुं। चीरनामकगन्धद्रव्ये। गेटेला। रा.नि.व.१२।

पर्णपिण्डीतः। पुं। मदनवृक्षे। वै.निघ.।

पर्णभेदिनी। स्त्री। प्रियङ्गुलतायाम्। रा.नि. व.१२।

पर्णभोजनः। पुं। छागपशौ। बिका.। त्रि। पत्रभोजिमात्रे।

पर्णमाचलः। पुं। (Averrhoa carambola.) कर्मरङ्गवृक्षे। श.मा.।

पर्णमूलम्। क्ली। ताम्बूलमूले। राज.३प.।

पर्णमृगः। पुं। वृक्षमर्कटिकायां, रूपोति लोके। वानरे। वृक्षमार्जारे। गेछो बिड़ाल। तद्गुण मद्गु,मूषिकवृक्षशायिकावकुशपृतिवासवानरप्रभृतिको भवति। तन्मांसं मधुरं गुरु वृष्यं चक्षुष्यं शोणितकरं कासार्शःश्वासनाशनं मूत्रपुरीषानुलोमकञ्च। सु. सू.४६अ.। "वनौकोवृक्षमार्जारवृक्षमर्कटिकादयः। एते पर्णमृगाः प्रोक्ताः।" भा.।

पर्णलता। स्त्री। नागवल्लीलतायाम्। रा.नि. व.११।

पर्णवल्ली। स्त्री। नागरदेशख्यात पलाशी-लतायाम्। रा.नि.व.३।

पर्णशिरा। स्त्री। ताम्बूलपत्रशिरायाम्। पाणेर शिर।

पर्णसिः। पुं। पद्मे। वारिगृहे। जलटुङ्गी। शाके। उणा.।

पर्णाकः। पुं। सुनिषण्णकशाके। वै.निघ.।

पर्णाशः (सः) (नः)। पुं। कृष्णार्जकवृक्षे। तुलसीविशेषे। अम.। च.द.सि.ती.हिक्काश्वास-चि.। पर्णासपक्वके। "व्याघ्री पर्णाससाधितम्।" पारसीकयमान्याम्। वै.निघ.।

पर्णासिः। पुं। कृष्णार्जके। वै.निघ.।

पर्णिका। स्त्री। स्थलपद्मायाम्। स्थलपद्म। रा.नि.व.५। पृश्निपर्ण्याम्। चाकुलिया। शाल-पर्ण्याम्। अग्निमन्थे। गणिरि। वै.निघ.।

पर्णिनी। स्त्री। शालपर्ण्याम्। वै.निघ.वि.ज्व. कल्याणघृते। पृश्निपर्ण्याम्। माषपर्ण्याम्। र.मा.।

पर्णिनीद्वयम्। क्ली। माषपर्णी मुद्गपर्णी चेति द्वये। सि.यो.रक्तातिसा.चि.कुटजादौ।

पर्णी (ट्टन्)। पुं। पलाशवृक्षे। आरग्वधवृक्षे। वै.निघ.। सप्तपर्णवृक्षे। वृक्षे। हे.च.। स्त्री। शाल-पर्ण्याम्। पृश्निपर्ण्याम्। चि.क्र.क.।

पर्णीचतुष्कम्। क्ली। शालपर्णीपृश्निपर्णीमुद्ग-पर्णीमाषपर्णीषु। च.द.वा.व्या.चि.मध्यमनारायण-तैले।

पर्णीरम्। क्ली। क्षीरेरे। बांना। वै.निघ.।

पर्णीत्थम्। क्ली। कर्पूरतैले।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्ह: (नम्)। अपानवायुत्यागे। वै.निघ.। केशसमूहे। उणा.। हे.च.।

पर्पम्। क्ली। नवहरणे। तृणाङ्कुरे। उणा.।

पर्पट: (क:)। पुं। (Oldenlandia Corymbosa. Syn. Oldenlandia beflora.) खनामख्याते क्षुद्रचुपे पत्रशाके वा। क्षेत्रपापड़ा। हिं दवनपापड़ा। मं वस्. पित्तपापड़ा। कं पर्पाटक। उत्. जड़पाँपुड़ा। तत्पर्य्याया:,—चियष्टि:, तिक्त:, चरक:, रेणु:, तृणारि:, वरक:, अरक:, शीत:, शीतप्रिय:, पांशु:, कल्पाङ्ग:, वर्ष्मकण्टक:, क्षुद्रशाख:, प्रगन्ध:, सुतिक:, रक्तपुष्पक:, पित्तारि:, कटुपत्र:, वक्र:। गुणा:—शीतत्व: पित्तश्लेष्मज्वरापह: रक्तदाहारुचिग्लानिमदविभ्रमनुत्त्व। रा.नि.व.५। सि.यो.पि.ज्व.चि.। "कर्कोटकं पर्पटकम्।" अपिच "पर्पटी हन्ति पित्तास्रश्रमतृष्णाकफज्वरान्। संग्राही शीतलस्तिक्तो दाहघ्नः वातलो लघु:॥" भा.। कुम्भीवृक्षे। रक्तगन्धबीले। वै.निघ.। चणकमुद्गादिकृतपिष्टकभेदे। पाँपर इति भाषा। तत्करणविधि:—"धूमसौरचिता: छिङ्गुहरिद्रालवणैर्युता:। जीरकस्वर्ज्जिकाभ्याञ्च तनुकृत्वा च वेल्लिता:। पर्पटास्ते सदाङ्गारभृष्टा: परमरोचका:। दीपना: पाचना रुच्या गुरव: किञ्चिदीरिता:। मौद्गाश्च तद्गुणा: प्रोक्ता विशेषाल्लघवो हिता:। चणकस्य गुणैर्युक्ता: पर्पटाश्चणकोद्भवा:। स्नेहभृष्टास्तु ते सर्व्वे भवेयुर्मध्यमा गुणै:॥" भा.। "क्षार: पर्पटक: प्रोक्तो यवक्षारसमो गुणै:।" वै.निघ.। वातपित्तज्वरे मन्दज्वरे च हित:।

पर्पट(टी)द्रुम:। पुं। कोङ्कणदेशप्रसिद्धकुम्भीवृक्षे। गुग्गुलुतरौ। रा.नि.व.९।

पर्पटादि:। पुं। पर्पटचन्दनोदीच्यनागरसिद्धकषाये। "एक: पर्पटक: श्रेष्ठ: पित्तज्वरविनाशन:। किं पुनर्यदि युज्यते चन्दनोदीच्यनागरै:॥" च.द. पि.ज्व.चि.। भा.।

पर्पटी। स्त्री। सौराष्ट्रमृत्तिकापरनामसुगन्धद्रव्ये। पक्षपर्पटी। हे.च.। पद्मावती, पपरी इति च उत्तरदेशप्रसिद्धे सुगन्धद्रव्ये। गुणा:—"पर्पटी तुवरा तिक्ता शिशिरा वर्णकृल्लघु:। विषव्रणहरी कण्डूकफपित्तास्रकृच्छ्रनुत्॥" भा.। पलद्वयमाने। प.प्र.। पिष्टकभेदे। पापर। उणा.।

पर्पटीरस:। पुं। श्लेष्मज्वरे रस:। रस: १ भा. गन्धक: २ भा. भृङ्गराजरसेन मर्द्य:। तास्रलौहं प्रं, रसगन्धयो: पादांशं दत्त्वा एकत्र सम्मर्द्य पर्पटीवत् पचेत्। अथ सच्चूर्ण्यं निर्गुण्ड्यादिरसेन ७दिनानि मर्दयित्वा अङ्गारै: स्वेदयेत्। रस.कौ.। र.सा.सं.।

पर्प(र्व्व)रोगम्। क्ली। पर्व्वणि। पार्व्। श.र.। पुं। पर्वान्तरसे। पर्वशिरायां। मे.। पत्रचूर्णरसे। श.र.।

पर्पिक:। पुं, स्त्री। खञ्जे। व्याक.।

पर्य्यग:। पुं। कटाहे। च.सू.१५अ.।

पर्य्यङ्क:। पुं। खट्वायाम्। अम.।

पर्य्यङ्कपादिका। स्त्री। कोलशिम्बयाम्। श्वेत आलाकुशी। भा.१भ.शा.व.।

पर्य्यणी। स्त्री। दारुहरिद्रायाम्।

पर्य्यय:। पुं। क्रमोल्लङ्घने, व्यतिक्रमे। अम.।

पर्य्यस्तिका (स्ती)। स्त्री। पर्य्यङ्के। चिका.।

पर्य्यागत:। त्रि। पक्वे। सु.चि.२१अ.।

पर्य्याप्त:। त्रि। यथेष्टे। क्लो। तृप्तौ। मे.।

पर्य्याप्ति:। स्त्री। तृप्तौ। वै.निघ.।

पर्य्याय:। पुं। क्रमे। अनुक्रमे। अम.।

पर्य्यायमुक्तावलि:। स्त्री। द्रव्याभिधानविशेषे।

पर्य्युषितम्। क्ली, पुं। शिलायाम्। वै.निघ.। त्रि। व्युष्टे। वासि।

पर्य्युषितान्नम्। क्ली। पूर्व्वदिवसज-जलसिक्तान्ने। पान्ता भात।

पर्व्व। क्ली। वंशग्रन्थौ। बाँशेर गिँट। अम.। अङ्गुल्यादिग्रन्थौ। अङ्गुलिर पाव। मे.।

पर्व्वकम्। क्ली। जानुप्रदेशे। आँटू। श्र.च.।

पर्व्वणिका (णी)। स्त्री। नेवसन्निजरोगे। लक्षणम्—"तासा तन्वी दाहशूलोपपन्ना रक्ताज्ञेया पर्व्वणी वृत्तशोफा।" सु.उ.२अ.। शाकविशेषे। सा च हस्तिशुण्डीति लोके। च.सू.२७अ.।

पर्व्वत:। पुं। वृक्षे। किराततिक्तके। वै.निघ.। शैले। शाकभेदे। मत्स्यभेदे। पाबदा माछ। मे.। तद्गुणा:—"पर्व्वतो वातहा स्निग्ध: शुक्रश्लेष्मबलवर्द्धन:।" राज.।

पर्व्वतकाक:। पुं। द्रोणकाके। हे.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्व्वतजा। स्त्री । गिरिजाम्लद्राक्षाविशेषे, यहारीति लोके। गुणाः—"द्राक्षा पर्व्वतजा लघ्वी साम्ला श्लेष्मास्रपित्तकृत्।" भा.।

पर्व्वतत्रणम्। क्ली। पर्व्वतजातत्रणाटानामत्रण विशेषे। हिं संड । तत्पर्य्यायाः,—त्रणाह्वं, पत्राह्वं, मृगप्रियम्। गुणाः—बलपुष्टिकरं रुच्यं पशूनां हितञ्च। रा.नि.व.८।

पर्व्वतनिम्बः। पुं । महानिम्बे।

पर्व्वतभेदः। पुं । करञ्जोड़िपाषाणभेदे। भा. म.३भ.मू.क्व.चि.।

पर्व्वतभेदी (द्दन्) । पुं। पाषाणभेदे। पाथरकुचि। च.द.मू.र.चि.। "पर्व्वतभेदिपथ्याद्यान्।"

पर्व्वतमोचा। स्त्री । गिरिकदल्याम्। वनकदल्याम्। बोचे कला। रा.नि.व.११।

पर्व्वतवासिनी। स्त्री । आकाशमांस्याम्। सूक्ष्मजटामांसी। रा.नि.व.१२।

पर्व्वताश्रयः। पुं । महासिंहे। रा.नि.व.१९।

पर्व्वताह्वयः। पुं । धाराकदम्बवृक्षे। वै.निघ.।

पर्व्वतोड्डवम्। क्ली, पुं। हिङ्गुलि। पारदे। वै. निघ.।

पर्व्वतोड्भूतम्। क्ली । अभ्रकधातौ। वै.निघ.।

पर्व्वपुष्पिका (ष्पी)। स्त्री । हस्तिशुण्ड्याम्। हातिशुँड़े। वा.सू.१५अ.। तच्छाकगुणः—वातपित्तहरः। च.सू.२७अ.। रामदूतीतुलस्याम्।

पर्व्वभेदः। पुं । सन्धिभङ्गरोगे। तथा सन्धिवेदनायाम् यथा चालने भङ्गाशङ्का जायते। च.द. ज्व.चि.।

पर्व्वमूला। स्त्री । श्वेतापराजितायाम्। अपराजिता। रा.नि.व.५।

पर्व्वयोनिः। पुं। इक्षौ। वेतसे। बंशे। हे.च.।

पर्व्वरोगम्। क्ली । पर्व्वणि। गाँटे। पुं। पर्व्वन्ते। पाणेर बाँटा।

पर्व्वरुट्। पुं । दाड़िमवृक्षे। विका.।

पर्व्ववल्ली। स्त्री । वल्लीदूर्व्वायाम्, मालादूर्व्वायाम्। दूर्व्वालता। रा.नि.व.८।

पर्व्वसन्धिः। पुं। अङ्गुलिसन्धौ। रा.नि.व.१८।

पर्व्वितः। पुं । (Silurus pobda.) पव्वेतमत्स्ये। पावदामाछ।

पर्शुका } स्त्री । पञ्चरास्थनि। अम.। सु.चि.
पर्शू } ३अ.। च.द.१०अ.।

पलम्। क्ली । मांसे। रा.नि.व.१७।१८। च. द.विष.चि.। "कर्कटपलहरितालं।" युक्तिदर्शे, ८ तो.। "युक्तिभ्याञ्च पलं श्रेयस्।" प.प्र.१ख.। कर्षचतुष्टये। अम.। पुं । पलाले। हे.च.। जटामांस्याम्। लाचायाम्। वै.निघ.।

पलक्या। स्त्री । पालङ्कीशाके। रा.नि.व.७।

पलङ्कः। पुं । निष्पावे। शिम्, वर्बटी। रा.नि. व.२३।

पलङ्करः। पुं । पित्ते। विका.।

पलङ्कषः। पुं । कणगुग्गुलौ। रा.नि.व.१२। निष्पावे। शिम्। प.मु.।

पलङ्कषा। स्त्री । श्वेतनिष्पावे। श्वेत शिम्। रा.नि.व.१६। गोदुग्धके। मे.। च.सू.४अ.संज्ञास्थापने। वै.निघ.अ.स्मा.चि.वचाद्यघृते। गुग्गुलौ। मे.। च.द.सि.यो.महापैशाचघृते। वि.ज्व.अष्टादशाङ्गधूपे, पलङ्कषाद्यघृते। पलाशबीजे। वै. निघ.२भ.क्षुमिचि.सविषवटके। लाचायाम्। प.मु.। वा.उ.६अ.महापैशाचघृते। क्षुद्रगोदुग्धके। वै.निघ.। मचिकायाम्। रा.नि.व.१९। राम्नायाम्। वै.निघ.२भ.अ.स्मा.चि.पलङ्कषातैले। कुम्भीर्य्याम्। मे.।

पलङ्कारम्। क्ली । रक्ते।

पलप्रियः। पुं । द्रोणकाके।

पलभिद्। पुं । पाषाणभेदे।

पललम्। क्ली। तिलकल्के। तिलकूटो। हिं तिलकुटि। रा.नि.व.१६। सु.चि.२०अ.। च.द. ह्रद्रोग.चि.। लक्षणं—"पललन्तु समाख्यातं सैन्धवं तिलपिष्टकं। पललं मलकृद्बल्यं वातघ्नं कफपित्तकृत्। ह्रद्रोगघ्नञ्च गुरु द्रव्यं स्निग्धं मूत्रनिवर्त्तकम्॥" भा.। मांसे। रा.नि.व.१७।१८। शुष्कमांसे। सु.सू.४३अ.। तिलपुष्पे। वै.निघ.। भृष्टतिलकल्के। वा.उ.३८ अ.। पङ्के। मे.।

पललज्वरः। पुं । पित्ते। हारा.।

पललप्रियः। पुं । द्रोणकाके। दाँड़काक।

पललाशयः। पुं । अजीर्णे। विका.। गण्डरोगे। ग.र.।

पलसः। पुं । पनसे। काँटाल।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पलाग्निः। पुं। पित्ते। हारा.।

पलाङ्गः। पुं। शिग्रुमारे। शुशोक। हारा.।

पलाण्डुः। पुं। Allium Cepa.) Onion. Fr. Ognon. मूलशाकविशेषे। पेँयाज। हिं पियाज, पियज। मं श्वेतकान्दा। कं उल्लि। तें नीरुल्लिचेट्टु। ता. वेङ्गयम्। वम्. कान्द। पारस्य. वुल्लिगड्डुलु। तत्पर्य्यायाः,—निकेतनः, नीचभोज्यः, लोहितकन्दः, तीक्ष्णकन्दः, उष्णः, मुखदूषणः, शूद्रप्रियः, दीपनः, क्रिमिघ्नः, सुखगन्धकः, बहुपत्रः, विश्वगन्धः, रोचनः, यवनेष्टकः, सुकन्दः, सुकन्दकः, सुकुन्दकः, सुकुन्दकः। रा.नि.व.६। स श्वेतहारिद्रवर्णभेदेन द्विधा। तयोर्हारिद्रो रक्तो वा राजपलाण्डुरित्युच्यते। गुणाः—कटुः बल्यः गुरुः कफपित्तघ्नः हृद्यः रोचनः स्निग्धः वान्तिघ्नश्च। रा.नि.व.७। "पलाण्डुस्तु बुधैर्ज्ञेयो रसोनसदृशो गुणैः। स्वादुः पाके रसेऽनुष्णः कफक्लन्नातिपित्तलः। हरते केवलं वातं बलवीर्य्यकरो गुरुः॥" भा.। "वातहरः स्नेहभावात्।" सु.सू.४०अ.। "पलाण्डुर्वातकफहा शुक्रलः शूलगुल्मनुत्।" अवि.१६अ.। बल्यः, ज्वरे उदरे शूले सञ्चितश्लेष्मकासे पामायां कर्णशूले वरटादिदंशे च हितः। द्रव्यगुणान्तरम्। "पलाण्डुर्नृपपूर्व्वः स्यात् शिशिरः पित्तनाशनः। कफहृद्दीपनश्चैव बहुनिद्राकरस्तथा॥" See राजपलाण्डुः।

पलान्नम्। क्ली। समांसवेशवारादिसिद्धभक्ते। पोलाउ। एतत्साधनविधिः यथा—छागमांसस्य शरावः तण्डुलस्य शरावः, घृतस्य शरावचतुर्थांशः लवंगलालवङ्गानां प्रत्येकं माषत्रयं मरिचतेजपत्रयोः प्रत्येकं तोलकद्वयं कुङ्कुमस्य माषकं, आर्द्रकधान्ययोश्च प्रत्येकं तोलकद्वयं लवणस्य षट्तोलकं द्राक्षायाश्च पलमिति। पाकराजेश्वरः।

पलापः। पुं। करिगण्डे। श.मा.।

पलापहा। स्त्री। नेत्राञ्जने। वै.निघ.।

पलार्द्धम्। क्ली। सुवर्णकद्वये। ४तो.। च.कल्प. १२अ.। [अम.।

पलालः। पुं। निःशस्यधान्यनाले। पोयाल।

पलालजशाकः। पुं, क्ली। पलालजातशाके। पोयाल् छातु। गुणाः—"स्वादुपाकरसा रुच्या दीपनास्तु पलालजाः।" राज.३प.।

पलालदोहदः। पुं। आम्रवृक्षे। श.मा.।

पलाशम्। क्ली। अंशुके। तेजपत्र। रा.नि. व.६। पर्णे। पाता। अम.।

पलाशः। पुं। किंशुके। शिमूल। सु.सू.३८अ. अम्बष्ठादिः। च.सू.३अ.यवागूप्रकरणे। (Butia frondosa.) Butia-gum. खनामख्यातमहातरुवर्गीयवृक्षे। पलाश गाछ। प.मु.। हिं धारा। मं पलस। कं सुत्तलु। तें। मोटुग। उत्. पराग्। वम्. खारकी। ता. परसन्। तत्पर्य्यायाः,—किंशुकः, पर्णः, वातपोथः, करकः, याज्ञिकः, त्रिपत्रकः, ब्रह्मपादपः, समिद्वरः, त्रिपर्णः, वक्रपुष्पः, पूतद्रुः, ब्रह्मवृक्षकः, ब्रह्मोपनेता, रक्तपुष्पकः, काष्ठद्रुः। गुणाः—कषायोष्णः क्रिमिघ्नः। तद्बीजं पामाकण्डूदद्रुलग्दीषघ्नं क्रिमिघ्नं लघूष्णं कटुपाकि रूक्षञ्च। भा.। तत्पुष्पम् उष्णं कटु कुष्ठघ्नञ्च। "कटुतिक्तकषायं स्वादुपाकि।" रा.नि.व.१०। भा.। स च रक्तपीतश्वेतनीलपुष्पभेदेन चतुर्विधः। किंशुकेन गुणसाम्येऽपि सिती विज्ञानदो भवति। तच्चैत्रं गान्धारीतैलगुरुं। भूमिकुष्माण्डे। पारीषवृक्षे। पलाश पिपुल। श्रव्यां। मे.। सु.चि.२०अ.।

पलाशकः। पुं। श्रव्यां। जटा.। लाचायाम्। रा.नि.व.२३। किंशुके। शिमूल। सु.सू.३८अ. सुश्रुतादिः। पलाशवृक्षे। श.र.। [निघ.।

पलाशगन्धजा। स्त्री। वंशलोचनभेदे। वै.

पलाशच्छदनम्। क्ली। तमालपत्रे। वै.निघ.।

पलाशतरुजः। पुं। कोमलपलाशपल्लवे। च.द.पि.ज्व.लेपे। "पलाशतरुजैर्दिहेत्।"

पलाशतरुशोणितम् } पुं। तरुनिर्य्यासे।
पलाशनिर्य्यासः } पलाशेर आठा।
गुणाः—"पलाशभवनिर्य्यासो ग्राही च त्रपयेद्ध्रुवम्। ग्रहणीं सुखजान् व्याधीन् कासान् स्वेदातिनिर्गमम्॥" केचित्। भैष.ने.रो.चि.।

पलाशनः। पुं। शारिकायां। चिका.।

पलाशपत्री (र्णी) (वल्ली)। स्त्री। अश्वगन्धायाम्। रा.नि.व.४। पलाशीलतायाम्। वै. निघ.। [नि.व.७।

पलाशलोहिता। स्त्री। चिल्लीशाके। रा.

पलाशवीजम्। क्ली। पलाशवीजे। पलाश

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाव्ड़ा। रा.नि.व.१०। गुणाः—अतीसारे शक्रद्रक्तहरम्। वा.चि.९अ.। See पलाशः।

पलाशा। स्त्री। गन्धशब्याम्। शय्याम्। प.मु.। कुमाण्डे। पलाशीलतायाम्। वै.निघ.।

पलाशाख्यः (ख्या)। पुं, स्त्री। नाड़ीहिङ्गौ। रा.नि.व.६।

पलाशान्ता। स्त्री। गन्धपलायाम्। रा.नि. व.१०।

पलाशाम्भा। स्त्री। यमानिकायाम् वै.निघ.।

पलाशिकम्। क्ली। ब्रह्मदारौ। पलाश-पिप्पुल।

पलाशिका। स्त्री। पलाशीलतायाम्। रा. नि.व.३। भूमिकुष्माण्डे। रा.मा.। शय्यां। लाचायाम्। रा.नि.व.२३। आम्रातके। कदली-वृक्षे। वै.निघ.।

पलाशी (इन्)। पुं। चीरीवृक्षे। खिरनि। प. मु.। वृक्षसामान्ये। विका.। स्त्री (शी)। नागरदेशे प्रसिद्धायाम् स्वनामख्यातलतायाम्, काश्मीरे शटीति ख्यातायाम्। उणा.। तत्पर्य्यायाः,—पत्रवल्ली, पर्णवल्ली, पलाशिका, सुरपर्णी, सुपर्णी, दीर्घवल्ली, विषादनी, अम्लपत्री, दीर्घपत्री, रसाम्ला, अम्लिका, अम्लातिका, काम्लिका। गुणाः—मधुराम्ला लघुः सुखदोषारोचकघ्नी पित्तकोपनी पथ्या च। रा.नि.व.३। लाचायाम्। रा.नि. व.२३।

पलिकांशम्। क्ली। पलपरिमाणे। ८ आठ तोला।

पलिक्नी। स्त्री। वृद्धायाम्। अम.। बाल-गर्भिण्यां। विका.।

पलिघः। पुं। काचकलसे। मे.।

पलितम्। क्ली। केशशुक्लतायाम्। रा.नि.व. १८।२३। निदान-लक्षणे—"क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः। पित्तञ्च केशान् पचति पलितं तेन जायते॥" सु.नि.१३अ.। श्वेतजे। रा.नि.व.२३। मरिचे। वै.निघ.। पुं। गुग्गुलौ। कपालरोगे। वै.निघ.। तापे। कर्दमे। मे.। केशपाशे। हे.च.। त्रि। वृद्धे। (ता) वृद्धायां। जटा.।

पलितग्रहः। पुं। पुष्पवृक्षविशेषे। तगर-फूलের গাছ। वै.निघ.।

पलिनी। स्त्री। क्षुद्रोदुम्बरे। काक् डुमুর। वै.निघ.।

पली। स्त्री। गृहमक्षिकायाम्। वै.निघ.।

पलोलः। पुं। पटोले।

पल्यङ्कनः। पुं। वृश्चिके। वै.निघ.।

पल्लः। पुं। पलाले। পোয়াল। च.चि.१९.अ. पिण्डासवे।

पल्लकः। पुं। मत्स्यभेदे।

पल्लवः। पुं, क्ली। किशलये। विका.। तेजपत्रे। भा.म.१भ.ज्व.चि.। "चन्दनपल्लवदारुसनाथः।" लाचारागे। वर्त्ते। विटपे। विका.। वलये। श.र.। अशोकपुष्पवृक्षे।

पल्लवकः। पुं। मत्स्यविशेषे। हला.।

पल्लवद्रुः। पुं। अशोकवृक्षे। रा.नि.व.१०।

पल्लवादः। पुं। हरिणमृगे। वै.निघ.।

पल्लवाधारः। पुं। शाखायाम्। श.च.।

पल्लवाह्वयम। क्ली। तालीशपत्रे।

पल्लवितम्। क्ली। लाचारङ्गे। मे.।

पल्लवी (इन्)। पुं। वृक्षे। श.मा.।

पल्लिका। स्त्री। सरटे। गोधायां। वै.निघ.। गृहगोधिकायाम्। रा.नि.व.१९।

पल्लिवाहः। पुं। ताम्रपत्रटणविशेषे। वम्.। पोकलगवत। गुणः—पशूनामबलदम्। "पल्लिवाही दीर्घटणः सुपत्रस्ताम्रवर्णकः। अदृढः शाकपत्रादिः पशूनामबलप्रदः॥" रा.नि.व.८।

पल्ली। स्त्री। गृहगोधायाम्। টিক্‌টিকী। रा. नि.व.१९।

पल्लूरम्। क्ली। शुष्कमांसे। पथ्यापथ्यम्।

पल्वः। पुं। राशौ। গাদা। च.चि.१अ.भल्ला-तकक्षीरे।

पल्वलम्। पुं, क्ली। स्वल्पसरोवरे। अम.। लक्षण यथा—"अल्पं सरः पल्वलं स्याद्यत्र चन्द्रार्कगे रवौ। न तिष्ठति जलं किञ्चित् तत्रत्यं वारि पल्वलम्॥ पल्वलं गुर्व्वभिष्यन्दि विष्टम्भि दोषलं परम्॥" भा.। See जलम्।

पल्वलावासः। पुं। कच्छपे। रा.नि.व.१९।

पल्वलोदकम्। क्ली। पल्वलजले।

पवः। पुं। वायौ। श.च.। निष्पावे, धान्यादीनां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्बुषीकरणे। वओला, पाछड़ान। अम.। क्ली। गोमये। श.च।

पवनः। पुं। वायौ। रा.नि.व.२१। पीतभृङ्गराजे। रा.नि.व.४। See मार्कवः। मज्जरहणे। रा.नि.व.८। क्ली। जले। श.मा.। आमघटादिपाकस्थाने। पोयान। मे.।

पवनद्विषः। पुं। गुग्गुलौ। वै.निघ.। निष्पावे। मे.।

पवनरिपुः। पुं। एरण्डवृक्षे। रा.नि.व.८।

पवनरिपुजटा। स्त्री। एरण्डमूले। वै.निघ. २भ.अभित्यासज्व.चि.।

पवनव्याधिः। पुं। वायुरोगे। विका.।

पवनालः। पुं। (Andropogon saccharatus.) देवधान्ये। देधान, जनार। हिं पुनेरा, कुहुल। तत्पर्य्यायः,—देवधान्यं चूर्णाङ्गः, जूर्णाङ्गः, जुहुलः, जुलनः, बीजपुष्पः, पुष्पगन्धः। गुणाः—हिमः स्वादुः लोहितः श्लेष्मपित्तकृत् बलप्रदः तुवरीरूक्षः क्लेदकृच्च। भा.पू.१भ.धान्यव.।

पवनाशः (नः)। पुं। सर्पे। हला.। अम.। शौषके। र.सा.सं.।

पवनाशनाशः। पुं। मयूरे। हे.निघ.। गरुड़े। हला.।

पवनाशयः। पुं। वाताशये।

पवनी। स्त्री। वनबीजपूरके। रा.नि.व.११।

पवनेन्द्रियः। पुं। गर्भविकारसम्भूतशुक्रहीनपुरुषविशेषे। कदाचिद्दुष्टो वायुः गर्भस्थस्य शुक्रस्थानं समूलं हत्वा तमशुक्रं करोति, स पवनेन्द्रियः। यथा—"शुक्राशयं गर्भगतस्य हत्वा करोति वायुः पवनेन्द्रियत्वम्।" च.शा.२अ.।

पवनेष्टः। पुं। निम्बवृक्षे। वातारीलेबू। वै.निघ.। महानिम्बे। र.मा.।

पवनाम्बुजः। पुं। परूषकवृक्षे। क्ली। तत्फले। श.च।

पवमानः। पुं। वायौ। रा.नि.व.२१।

पवारुः। पुं। कारवेल्ले। विका.।

पविः। पुं। वज्रे। शौरे। रा.नि.व.१३। स्रुचीवृक्षे। वै.निघ.२भ.चय चि.त्रैलोक्यचिन्तामणि रसे।

पवितम्। क्ली। मरिचे। रा.नि.व.६।

पवित्रम्। क्ली। मधुनि। घृते। रा.नि.व.१४। १५। तार्क्ष्ये। जले। भीमसेनोकर्पूरे। कुशे। मे.। घर्षणे। विश्व.।

पवित्रः (कः)। पुं। तिलवृक्षे। रा.नि.व.१६। पुत्रजीवकवृक्षे। रा.नि.व.९। (कः) दमनकवृक्षे। रा.नि.व.१०। उदुम्बरवृक्षे। अश्वत्थवृक्षे। रा.नि.व.११। शरपत्रदर्भे। रा.नि.व.८। हिज्जलवृक्षे। हरिद्रायाम्। तिलकवृक्षे। वै.निघ.। क्ली। जले। अम.। जाले। श.र.।

पवित्रधान्यम्। क्ली। यवे। रा.नि.व.१६।

पवित्रा। स्त्री। अश्वत्थिकायाम्। गया अश्वत्थ। रा.नि.व.११। तुलसीवृक्षे। श.मा.। हरिद्रायाम्। रा.नि.व.६। शमीवृक्षे। वै.निघ.।

पशुः। पु। जन्तुभेदे। अम.। उदुम्बरवृक्षे। यज्ञडुमुरेर गाछ। श.च.। छागे। विका.। स ग्राम्यारण्यभेदेन चतुर्दशविधः। गौरविरजोऽश्वोऽश्वतरः गर्दभः मनुष्यश्चेति सप्त ग्राम्याः। महिषवानरऋक्षसरीसृपपक्षिपृषतमृगाश्चेति सप्तारण्याः। मांसगुणाः—"लघवः शीतमधुराः सकषाया हिता नृणाम्।" राज.।

पशुक्रिया। स्त्री। मैथुने। हे.च.।

पशुगन्धा (न्धिका)। स्त्री। अजगन्धायाम्। वनतुलसी। वा.सू.३५अ.वत्सकादि.। "पशुगन्धा पञ्चकोलकं हन्ति।"

पशुपल्वलम्। क्ली। कैवर्त्तमुस्तके। श.च.।

पशुमोहनकारिका। स्त्री। चन्द्रसूरे। भा.।

पशुमोहनि (नी) का। स्त्री। कटुक्याम्। रा.नि.व.३।

पशुराजः (ट्)। पुं। सिंहे। श.च.।

पशुहरीतकी। स्त्री। आम्रातकफले। आमड़ा। विका.।

पश्चात्कर्म्म। क्ली। वलवर्णाग्निकार्य्ये। पेयाद्यन्नसंसर्जने। निवृत्तातङ्कस्यानुबन्धोपचरणाय यत् क्रियते तस्मिन् कर्म्मणि। सु.सू.५अ.।

पश्चाद्गुजः। पुं। बालानां व्रणरोगविशेषे। "दुष्टमन्नादिभिर्मातुः स्तन्यं सम्भवतः शिशोः। यदा प्रकुपितम्पित्तं गुदं समभिधावति। तदा सञ्जायते तत्र जलौकोदरसन्निभः। व्रणः सदाहश्चारक्तः ज्वरकार्श्यकरः परः। हरितं पीतकं वापि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्चसेन भवेद्ध्रुवम्। व्रणः पश्चाद्गुदो नाम व्याधिः परमदारुणः॥" रस.र.बाल.चि.।

पश्चिमवातः। पुं। पश्चिमदिग्भववायौ। पश्चिमे वातास। गुणाः—विषदो रूक्षपरुषः खरः स्नेहवलापहः। पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः। सद्यः प्राणक्षयकरः शोषणस्तु शरीरिणाम्॥" सु.चि.१अ.।

पच्छः। पुं, क्ली। विन्दुजाले। पक्षे। त्रिका.।

पच्छिका। स्त्री। वारिपर्ण्याम्। टोकापानी। श.मा.।

पच्छः। पुं। शरीरे। पिच्छे। हे.च.। पक्षतौ। डानां। अम.। पार्श्वे। पक्षदशाहीराचे। बली। चुल्लीरन्ध्रे। राजहलिनि। मे.। पक्षिणि। श.र.। गरुति। पाखी। भ.। केशपाशे। वै.निघ.।

पच्छघातः। पुं। पक्षवधरोगे। निदा.। See पक्षवधः।

पच्छचरः। पुं। हस्तिनि। मे.।

पच्छतिः। स्त्री। पक्षमूले। पाखना। अम.।

पच्छधरः। पुं। पक्षिणि। वै.निघ.।

पच्छपच्चः। पुं। सीमलतायाम्। वै.निघ.।

पच्छभागः। पुं। पार्श्वभागे। गजपार्श्वभागे। अम.।

पच्छमार्ज्जारः। पुं। पक्षविड़ाले। वै.निघ.।

पच्छमूलम्। क्ली। पक्षतौ। डानार मूलभाग। अम.।

पच्छवधः (वातः)। पुं। वातव्याधिविशेषे। पक्षाघात। निदा.। "गृहीत्वार्द्धं तनोर्यायुः शिराः स्नायुर्विशोष्य च। पक्षमन्यतरं हन्ति सन्धिबन्धान्विमोक्षयन्। कृत्स्नोऽर्द्धकायस्तस्य स्यादकर्म्मण्यो विचेतनः। एकाङ्गरोगं तङ्केचिदन्ये पक्षवधं विदुः॥" मा.नि.।

पच्छवान्
पच्छवाहनः} पुं। पक्षिणि। श.च.।

पच्छविन्दुः। पुं। क्रौञ्चपक्षिणि। कौंचबक। वै.निघ.।

पच्छसुन्दरः। पुं। लोध्रवृक्षे। हारा.।

पच्चालुः। पुं। पक्षिणि। श.च.।

पच्चिकः। पुं। पक्षिराजशाली। रा.नि.व.१६।

पच्चिणी। स्त्री। वनकार्पास्याम्। वै.निघ.। स्त्रीपक्षिणि।

पच्चिपातः। पुं। पतङ्गज्वरे। गजवै.।

पच्चिराजः। पुं। गरुड़े। मयूरे।

पच्चिराजशालिः। पुं। स्वनामख्यातशालिधान्यविशेषे। पक्षिराज धान। सं पांखियाशालि। रा.नि.व.१६। [नि.व.१६।

पच्चिलावण्यः। पुं। पक्षिराजशाल्यौ। रा.

पच्चिशाला। स्त्री। पक्षिकुलायें। त्रिका.।

पच्चिसिंहः। पुं। गरुड़े। त्रिका.।

पच्चिस्वामी (इन्)। पुं। गरुड़े।

पच्ची (इन्)। पुं। माक्षिकधातौ। स्वर्णमाक्षि। र.सा.सं.। विहङ्गमे। पाखी। हिं चिड़िया। तत्पर्य्यायाः,—खगः, विहङ्गः, विहङ्गमः, विहगः, विहायाः, शकुन्तः, शकुनः, द्विजः, पतत्री, पतगः, पतन्, पक्षरथः, अण्डजः, नगौकाः, वाजी, विकिरः, विष्किरः, पतत्रिः, नीड़ौकसः, गरुत्मान्, पिच्छिन्, नभसङ्गमः, नाड़ीचरणः, कण्ठाग्निः, पतङ्गः, अगौकाः, चञ्चुभृत्, कुरण्डः, सरण्डः, विपतिषुः, पक्षवाहः, द्युगः, कुलायस्थः, वृक्षालयः, चञ्चुमान्, जिह्मारदः, तरुशायी, नीड़जः, पतङ्गमः, पतमः, पतसः, विहायसः, यथेष्टाचारी, व्योमचारी। स चतुर्विधः विष्किरप्रतुदप्रसहप्लवभेदेन। तत्र विष्किरा लावतित्तिरकपिञ्जलादयः। कपोतपारावतादयः प्रतुदाः। काककङ्ककुररादयः प्रसहाः। हंससारसक्रौञ्चादयश्च प्लवा इति। एषां गुणादिकं स्वस्वपर्य्याये वक्ष्यम्। आनूपमांसगुणाः—"धान्याः कूलचरा ये तु तेषां मांसं लघूत्तमम्। आनूपस्थलकन्मांसं स्निग्धङ्गुरुतरं स्मृतम्॥" भा.पू.२भ.। स्थूलकायपक्षिमांसगुणाः—"गुरुभक्षा बहुभुजो ये चोपचितमेदसः। एकदेहेऽपि पूर्व्वार्द्धं मृगाणां पक्षिणां परम्॥" उत्तरोत्तरं तदङ्गगुरुत्वम्। यथा—"सर्व्वेषाञ्च शिरःस्कन्धोदरचर्म्मयकृद्धृदम्। पादपुच्छास्तु मस्तिष्कसुष्ककीड़ाः समेहनाः। धातवः शोणिताद्याश्च गुरवः स्युः परस्परम्॥" राज.।

पच्म। क्ली। पक्षे। अम.माला। पुष्पकेसरे। नेत्ररोमणि। अम.भ.।

पच्मकोपः। पुं। नेत्रवर्त्मगतरोगे। भौंवार रोग, कोतो। लक्षणं यथा—"पक्ष्माश्रयगता

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषा तीक्ष्णाग्राणि खराणि च । निर्वर्त्तयन्ति पक्ष्माणि तैर्जुष्टक्ष्वाचि दूयते ॥ उत्पाटितैः पुनः शान्तिः पक्ष्मभिश्चोपजायते । वातातपानलद्वेषी पक्ष्मकोपः स उच्यते ॥" सु.उ.३अ. ।

पक्ष्मघातः । पुं । पक्ष्मगतनेत्ररोगभेदे । पक्ष्मबधरोगे । निदा. ।

पक्ष्मयूका । स्त्री । पक्ष्मगतकीटे । वै.निघ. ।

पक्ष्मरोधः । पुं । पक्ष्मगतरोगविशेषे । "पक्ष्मीपरोधे सङ्कोचः वर्त्मनां जायते तथा । खरतान्तर्मुखत्वञ्च लोम्नामन्यानि वा पुनः । कण्टकैरिव तीक्ष्णाग्रैः दृष्टं तैरन्ति दूयते । उष्मते चानिलादिद्विड्लक्षणैः शान्तिरुद्धतैः ॥" वा.उ.८अ. ।

पक्ष्मशातः । पुं । पक्ष्मकोपरोगे । लक्षणं— "वर्त्म पक्ष्माश्रयगतं पित्तं रोमाणि पातयेत् । कण्डूं दाहञ्च कुरुते पक्ष्मशातं तमादिशेत् ॥" मा.नि. ।

पक्ष्मार्शः । क्ली । नेत्रवर्त्मार्शोरोगे । निदा. ।

पक्ष्मि (क्ष्मी) कः । पुं । आच्छुकवृक्षे । आँचफूल गाछ ।

पक्ष्मोत्सङ्गः । पुं । पक्ष्मशीथरोगे । निदा. ।

पांशवः । पुं । पांशुलवणे । पाँडा लवण । रा.नि.व.६ ।

पांशुः । पुं । पर्पटके । रा.नि.व.४ । भा.म.१ भ.चित्तभ्रमज्व.चि. । "पुरपाणिजपांशुभिः ।" भीमसेनीकर्पूरे । रा.नि.व.१२ । चारमृत्तिकायां । तालवृक्षे । पुन्नागवृक्षे । धूलौ । अम. । शालिधान्यविशेषे । गुणाः—शालिवत् । च.सू.२७अ. । श्रस्यार्थं रचितगीमये । सार । मे. ।

पांशुकम् । क्ली । कासीसे । हिरेकस् । रा.नि.व.१३ ।

पांशुका । स्त्री । रजस्वलायाम् । वै.निघ. ।

पांशुकासीसम् । क्ली । धातुकाशीशे । शीरेकस् । भा. ।

पांशुखुरः । पुं । अश्वस्य पादतलस्थरोगे । लक्षणम् यथा—"पांशुभिः शर्कराभिश्च पूर्य्यते यस्य कोटरम् । तले तस्य विजानीयात् रोगं पांशुखुरं भिषक् ॥" ज.द.३९अ. ।

पांशुचत्वरम् । क्ली । पांशुधाने । पाँशकुड़ । श्र.मा. । घनीपले । शिल ।

पांशुचन्दनः । पुं । शिवे । विका. ।

पांशुचामरः । पुं । क्षुद्रकर्कटिकायाम् । दूर्व्वामयप्रदेशे । मे. । पटभवने । जटा. ।

पांशुजम् । क्ली । पांशुलवणे । पाँडा लवण । रा.मा. । मृत्तिकालवणे । सोरा । [रणे ।

पांशुपटु । क्ली । पांशुलवणे । र.सा.सं.रसप्रक-

पांशुपत्रम् । क्ली । वास्तूके । बेतो शाक । श्र.मा. ।

पांशुभवम् । क्ली । मृत्तिकालवणे । वै.निघ. ।

पांशुभिक्षा । स्त्री । धातकीवृक्षे । धाईफूलेर गाछ । वै.निघ. । [क्षारा. ।

पांशुरः । पुं । खञ्जनपोटके । दंशके । डाँश ।

पांशुरागिणी । स्त्री । महामेदायाम् । रा.नि. व.५ ।

पांशुलः । पुं । शिवे । पूतिकरञ्जे । काँटाकरञ्ज । श्र.च. ।

पांशुलवणम् । क्ली । औद्भिदलवणे । फूला लवण, पाँडा लवण । तत्पर्य्यायाः—रौमकं, औद्भिज्जं, वसुकं, वसुपांशुः, ऊषरजं, औषरं, ऐरिणं, और्व्वं, सर्जं, ऊषं, औद्भिदं, पाक्यं, पांशुजं । प.मु. । गुणाः—"औद्भिदस्पांशुलवणं यज्जातं भूमितः स्वयम् । क्षारं गुरु कटु स्निग्धं शीतलं वातनाशनम् ॥" भा.पू.१भ. । तीक्ष्णम् अत्युष्णं कटु तिक्तं दीपनं दाहशीषकरं ग्राहि पित्तकोपनञ्च । रा.नि.व.६ । भेदकं पाचनं पित्तकरञ्च । राज. ।

पांशुला । स्त्री । केतकीवृक्षे । केया गाछ । रजस्वलायाम् । रा.नि.व.१०।१८।

पांशुवाप्यः । पुं । पांशुभूमिवापित-शालिधान्यविशेषे ।

पांशुक्षारः । पुं । क्षारमृत्तिकायां । सोरा । वै.निघ. ।

पांसवम् । क्ली । मृत्तिकालवणे । सोरा । वै.निघ. ।

पांसुः । पुं । धूलौ । उणा. ।

पांसुक(ज)म् । क्ली । पांशुलवणे । मृत्तिकालवणे । च.द.सन्निपातज्व.चि.कर्णमूलशोथे । "गैरिकं पांसुजं शुक्ती...।"

पांसुजक्षारः । पुं । मृत्तिकालवणे । सोरा । वै.निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पांसुलः। पुं । केतकवृक्षे । लावपक्षिणि । वै. निघ. । [लवण ।

पांसुलवणम्। क्ली । पांशुलवणे । पांडा

पांसुला। स्त्री । श्वेतकेतके । व्यभिचारिण्यां । वै.निघ. ।

पाकः। पुं । केशशोके । पेचके । मे. । चतसृभवे परिणामे । "करग्रीष्ठसुखनासानां पाकः ।" मा.नि. । मांसजातेशिशौ । रा.नि.व.१८ । पचने । पचा । अम. । रन्धने । स सप्तविधः—भर्ज्जनतलनस्वेदनपचनक्वथनतान्दूरपुटपाकभेदात् । तत्र भर्ज्जनं केवलपात्रे, तलनं स्नेहद्रव्ये, स्वेदनमग्न्युत्तापे, पचनं जले, क्वथनं सिद्धद्रव्यरसगृहणे, तान्दूरं द्वारवद्धतप्तयन्त्रे, पुटपाकः अधोर्द्धाग्नितापे च ज्ञेयः । पाकराज. । षष्टिकशालिधान्ये । षेटे धान । शोणितविकारे । द्रव्यपरिणतिजन्यरसे द्विविध एव पाकः, मधुरः कटुकश्च, तयोर्मधुराख्यो गुरुः कटुकाख्यो लघुरिति । तत्र पृथिव्यग्नेजोवायुाकाशानां द्वैविध्यं भवति गुणसाधर्म्यादुरुता लघुता च पृथिव्यापश्च गुर्व्व्यः शेषा लघवः, तस्माद्विविध एव पाकः । "द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः । निर्व्वर्त्तन्तेऽधिकास्तत्र पाको मधुर उच्यते ॥ तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु । निर्व्वर्त्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते ॥" सु.सू. ४०अ. । घृतादीनां पचनसाधने । फेणोपशमः घृतस्य पाकसिद्धिः । फेणोत्पत्तौ तैलस्य पाकसिद्धिः । तन्तुमत्ता स्नेहस्य पाकसिद्धिः । अप्सु मज्जनं पाकलक्षणम् । पाकश्च विविधः मन्दः चिक्कणः खरश्चेति । स्नेहपाकस्याङ्गुलिग्राह्यता मन्दपाकः । वा. कल्प.६अ. । स्थाल्याम् । पेचके । क्ली । सौवर्च्चललवणे ।

पाकक्षणः (-फलः)। पुं । पानीयामलके । रा.च. । करञ्जवृक्षे । वै.निघ. ।

पाकजम्। क्ली । परिणामशूले । रा.नि.व.२० । विड्लवणे । रा.नि.व.६ । कुष्ठौषधे । वै.निघ. ।

पाकतुण्डी। स्त्री । राजरीतौ । पितल विशेष ।

पाकनाड़ी। स्त्री । अन्नपाचकनाड्याम् ।

पाकपात्रम्। क्ली । इण्डिकादौ ।

पाकपुटी। स्त्री । कुम्भशालायां । पौंग्रान् । हे.च. ।

पाकफलः। पुं । पानीयामलके । रा.च. । अम्लकरञ्जे । अम. ।

पाकभाण्डम्। क्ली । पाकपात्रे ।

पाकमत्स्यः। पुं । अर्भकैः सह सञ्चरणशीले मत्स्यविशेषे । पेंकी माछ, लेठा, च्याः, शउल, गाँगुर प्रभृति । सु.कल्प.३अ. । अग्निप्रकृतिकीटविशेषे । सु.कल्प.८अ. । See कीटः । मत्स्यकृतव्यञ्जने । माछेर तरकारी । रा.च. ।

पाकरञ्जनम्। क्ली । तेजपत्रे । रा.च. ।

पाकलम्। क्ली । कुष्ठौषधौ । कूड़ । अम. । पुं । हस्तिज्वरे । मे. । प्रवृद्धमध्यहीनवातादिजसन्निपातज्वरे । तस्य निदानलक्षणे—"यस्य प्रवृद्धहीनैस्तु वातपित्तकफैस्त्रयः । तेन रोगास्तएवोक्ता यथा दोषबलाश्रयाः । मोहप्रलापमूर्च्छाः स्युः मन्यास्तम्भः शिरोग्रहः । कासः श्वासो भमस्तन्द्रा संज्ञानाशो हृदि व्यथा । खेभ्यो रक्तं विसृजति संरक्तस्तम्बनेचता । तवाप्येते विशेषाः स्युरर्व्वाक् सप्तरात्रिवासरात् । भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः ।" भा.म.१भ.ज्व.चि. । त्रि । व्रणादिपाककारिणि ।

पाकलिः (लो)। स्त्री । कर्कटिकायाम् । रा.मा. ।

पाकशाला। स्त्री । रन्धनशालायाम् । रसुई घर । जटा. । "प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि । सजालकं गवाक्षाढ्यम् आत्मवर्गनिषेवितं । विकचस्पष्टसंसृष्टं सवितानं कृतार्चनं । परीचितस्त्रीपुरुषं भवेत्तापि महानसम् । तत्राध्यक्षं नियुञ्जीत प्राज्ञो वैद्यगुणान्वितं । शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः । संविभक्ताः सुमनसः नीचकेशनखाः स्थिराः । स्नाता दृढं संयमिनः कृतीक्षणाः सुसंयताः । तस्य चाङ्गा विधेयाः स्युर्विविधाः परिकर्म्मिणः । आहारस्थितयश्चापि भवन्ति प्राणिनो यतः । तस्मान्महानसे वैद्यः प्रमादरहितो भवेत् । महानसिकवीदारः सौपौदनिकपौपिकाः । भवेयुर्वैद्यवशगा ये चाप्यत्रे च केचन ॥" सु.कल्प.१अ. ।

पाकशुक्लः (क्लम्)। पुं, स्त्री । कठिन्याम् । खड़ी । प.मु. ।

पाकस्थाली। स्त्री । पाकपात्रे । हाँड़ि ।

पाकात्ययः। पुं । सर्व्वगताचिरोगे । विदोषज-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेत्ररोगे। लक्षणं—"उष्णाश्रुपातः पिडका च कृष्णे यस्मिन् भवेत् कृष्णनिभञ्च शुक्लं। तदप्यसाध्यं प्रवदन्ति केचिदन्यच्च यत्तित्तिरपक्षतुल्यं। संछाद्यते श्वेतनिभेन सर्व्वदीर्घेण यस्यासितमण्डलन्तु। तमत्रिपाकात्ययमत्रिरोगं समुल्लिखं तीव्ररुजं वदन्ति।" सु.उ.६अ.।

पाकारिः। पुं। श्वेतकाञ्चने। प.मु.। र.मा.।

पाकिमः। वि। पक्वे। सु.चि.१९अ.। "लवणं त्वथ पाकिमं।"

पाकुकः। पुं। सूपकारे। उणा.।

पाक्यम्। क्ली। पांशुलवणे। फूली लवण। र.मा.च.वि.८अ.। सौवर्चललवणे। वि। शुचौ। वा.चि.१अ.। [अम.।

पाक्यः। पुं। यवक्षारे। यवक्षार, सोरा।

पाक्यजम्। क्ली। काचलवणे। रा.नि.व.६।

पाक्यक्षारः। पुं। यवक्षारे। प.मु.।

पाक्या। स्त्री। सर्जिक्षारे। यवक्षारे। सोरा। सौवर्चललवणे। मृत्तिकालवणे। वै.निघ.।

पाक्यापटु। क्ली। पाक्यलवणे। वै.निघ.।

पाक्याह्वः। पुं। यवक्षारे। वै.निघ.।

पागलः। पुं। वातुले। [सौम.।

पाङ्क्तः। पुं। सीमलताभेदे। सु.चि.२९। See

पाङ्गुल्यम्। क्ली। पङ्गुतायाम्। वै.निघ.।

पाचकः। पुं। अग्नौ। हला.। सूपकारे। पित्ते, तन्नामकाग्नौ, यो भुक्तं पचति। तच्च तिलप्रमाणं—"पाचकं तिलमाणं स्यात्।" वा.। तस्य स्थानं पक्वाशयमध्यस्थम्। सु.सू.२१अ.। स आहारं पचति, दोषरसमूत्रपुरीषाणि पृथक् करोति। भा.। "तत्रस्थमेव स्वशक्त्याग्नेयानां पित्तस्थानानां शरीरस्य चाग्निकर्म्मणानुग्रहं करोति, तस्मिन् पित्ते पाचकोऽग्निरिति संज्ञा॥" सु.सू.२१ अ.। See अग्निः।

पाचका। क्ली। कर्कटिकायाम्। वै.निघ.।

पाचकाशयः। पुं। अन्त्याशये। पक्वाशये।

पाचनम्। क्ली। आमपाचके अवक्लिक्लति द्रव्ये, नागकेशरचिवकादौ। पाचकद्रव्यवर्गः यथा—"पाषाणभेदो मरिचं यवानी जलशीर्षकम्। शुण्ठी चव्यं गजकणा शुक्लादिः पाचनो गणः॥" अर्क.। पाचककषाये। पाचन। "प्रयुक्तं पाचयेद्दामं यत्तत्पाचनमुच्यते।" वा.चि.१अ.। "दशरक्तिकमानेन गृहीत्वा कर्षकद्वये। दत्त्वाम्भः षोड़शगुणं ग्राह्यं पादावशेषितम्॥" प.प्र.१ख.। ज्वरे तस्य दानकालमाह चक्रपाणिः। "ज्वरितः षड़हेऽतीते लघुन्नप्रतिभोजितं। सप्ताहात्परतोऽस्त्रस्वे सामे स्यात् पाचनं ज्वरे॥" इति। च.द.ज्व.चि.। व्रणोपक्रमविशेषे। तच्च विरेचनादि। सु.। अर्द्धावशिष्टक्काथे। "पाचनीऽर्द्धावशेषस्तु।" रा.नि.व.२०।

पाचनः। पुं। अम्लतायाम्। अम्लरस। हे.च.। अग्नौ। मे.। रक्तैरण्डे। रा.नि.व.८। वि। पाचके। मे.। टङ्गणक्षारे।

पाचनकः। पुं। टङ्गणक्षारे। हे.च.।

पाचनी। स्त्री। हरीतक्याम्। मे.।

पाचलः। पुं। अग्नौ। श.र.। पाकशक्तौ। वायौ। श.र.। क्ली। पाचने। मे.।

पाची। स्त्री। स्वनामख्यातपत्रशाके। पाटी, पर्ण इति महाराष्ट्रादौ। तत्पर्य्यायाः,—मरकतपत्री, हरितलता, हरितपत्रिका, पत्री, सुरभिः मालारिष्टा, गरुत्मतपत्रिका। गुणाः—"पाची कटुस्निग्धोष्णा सकषाया वातदोषहन्त्री च। ग्रहभूतविकारकरी त्वन्दोषप्रशमनी व्रणेषु हिता॥" रा.नि.व.१०।

पाचीकुटकः। पुं। चिचकवृक्षे।

पाजः (स्)। क्ली। बले। उणा.। [मे.।

पाञ्चजन्यः। पुं। शङ्खे। मत्स्यभेदे। अग्नौ।

पाञ्चप्रसृतिकी। स्त्री। पेयाविशेषे। "सर्पिस्तैलं वसा मज्जा तण्डुलप्रसृतैः शृता। पाञ्चप्रसृतिकी पेया पेयास्नेहनमिच्छता॥" च.सू.१३अ.।

पाञ्चालः। पुं। देशविशेषे। "कुरुक्षेत्रात्पश्चिमे तु तयोत्तरभागतः। इन्द्रप्रस्थान्महीशानि दशयोजनकद्वये। पाञ्चालदेशः...।" शक्तिसङ्गमतन्त्रं।

पाञ्चाली। स्त्री। पिप्पल्याम्। वै.निघ.।

पाटः (कः)। पुं। विस्तारे। (कः) वितस्तौ।

पाटनम्। क्ली। छेदने।

पाटलः। पुं। नादेयमत्स्यभेदे। See मत्स्यः। हीनरक्तवर्णे। अम.। पुन्नागवृक्षे। पाटलवृक्षेऽपि। विका.। सु.सू.४६अ.। क्ली। तन्नामकपुष्पे। पाकुल फूल। अम.। रोहिषतृणे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाटलच्छदः (द्रुमः)। पुं। सुरपुन्नागवृक्षे। रा.नि.व.१०।

पाटल(ला)व्रीहिः। पुं। वर्षापाकिव्रीहिभेदे, आशुधान्ये। आउश धान। "पाटलः पाटलापुष्पवर्णकी व्रीहिरुच्यते।" भा.पू.१भ.धा.व.। गुणाः—"अत्यर्णो बहुनिष्यन्दी पाटलस्तु विदोषहृत्।" राज.३पं.। "बहुमूत्रपुरीषोमा विदोषघ्नश्च पाटलः।" च.सू.२७अ.।

पाटला ([ड़]लिः)। स्त्री, पुं। (Stereospermum suaveolens or Chelonioides. syn. Bignonia suaveolens.) खनामख्यातवृक्षे। पाकुल गाछ। अम.। हिं पदृ। मं पाड़ली। कं हादरि। तें कलगीरु, कलिगीट्टु चेट्टु। उत्. पाटुड़ि। ता. पदि। तत्पर्य्यायाः,—पाटलिः, असोघा, काचस्थाली, फलेरुहा, क्षणवन्ता, कुबेराक्षी, अम्बुवासिनी, कालवन्ता, तीयपुष्पी, कर्ब्बूरा, ताम्रपुष्पी, कुम्भिका, सुपुष्पिका, वसन्तदूती, स्थाली, स्थिरगन्धा, अम्बुवासी, कालवल्ली, कामदूती, कुक्षी, तीयाधिवासिनी, अग्निप्रिया। पाटला पीतपुष्पश्वेतपुष्पभेदेन द्विधा। सा. गुणाः—तिक्ता कटूष्णा कफवातघ्नी शोथाध्मानवमिश्वासन्निपातघ्नी च। रा.नि.व.१०। घण्टापाटलकाष्ठपाटलभेदेन च द्विधा। सा.। गुणाः—तुवरा तिक्ता शीतला विदोषहरा तथारुचिशीथरक्तकृच्छ्रर्द्दिहिक्कातृष्णाघ्नी। तत्पुष्पं कषायं मधुरं हिमं हृद्यं कफरक्तघ्नम्। तत्फलं पित्तातिसारघ्नं हिक्कारक्तपित्तघ्नञ्च। मधुसर्द्दितं हिक्काघ्नम्। भा.। सु.सू.३८अ.। च.द.सन्निपातज्व.चि.। "पाटला गणिकारिका:।" वा.सू.१५अ.आरग्वधादिः। "आरग्वधेन्द्रयवपाटलिकाकतिक्ताः।" श्वेतपाटलवृक्षे। वै.निघ.। रक्तलीध्रे। श.च.। सुष्ककवृक्षे। अम.। शालिधान्यभेदे। रा.नि.व.२३। विहिदानेति ख्याते पिच्छिलबीजविशेषे। "पाटला पिच्छिला प्रोक्ता सा स्निग्धा कासवारिणी। शिग्रुयोन्यीर्हरेद्दाहं व्रणदाहनिवारिणी॥"

पाटलादिः। पुं। बिल्वादिदशमूलकषाये। अयं शीथहरकषायः। च.सू.४अ.।

पाटलापुष्पः। पुं। सुरपुन्नागवृक्षे। छलना। वै.निघ.। [निघ.।

पाटलापुष्पवर्णकम्। क्ली। पद्मकाष्ठे। वै.

पाटलापुष्पसन्निभम्। क्ली। पद्मकाष्ठे। पद्मकाष्ठे। रा.नि.व.१२।

पाटलाभः। पुं। रक्तालुके। वै.निघ.।

पाटलिका। स्त्री। रक्तकरवीरवृक्षे। वै.निघ.।

पाटलिपिण्डिका। स्त्री। महाश्वेतकिणिहीवृक्षे। वै.निघ.।

पाटली। स्त्री। पाण्डुरफल्याम्। रा.नि.व.५। पाटलावृक्षे। कृष्णकटभीवृक्षे। कृष्णसुष्ककै। रा.नि.व.९। भूमिचम्पकवृक्षे। रक्तपाटलिवृक्षे। रक्तलीध्रे। वै.निघ.।

पाटलीकुसुमः (पुष्पः)। पुं। पुन्नागपुष्पवृक्षे। वै.निघ.।

पाटलोपमः। पुं। सर्जरसे। धूना। वै.निघ.।

पाटलोपलम्। क्ली। माणिक्ये। वै.निघ.।

पाटवम्। क्ली। आरोग्ये। रा.नि.व.२०। पटुतायाम्।

पाटहिका। स्त्री। गुञ्जायाम्। हारा.।

पाटितम्। क्ली। काष्ठभग्नास्थिभेदे। "पाटितमणुबहुविदारितं वेदनावच्च।" इति लक्षणम्। सु.नि.१५अ.।

पाटी (इन्)। पुं। पाठीनमत्स्ये। बोआल गाछ। वै.निघ.।

पाटी। स्त्री। बलायाम्। बेड़ेला।

पाटीरः। पुं, क्ली। वंशलोचने। वंशे। चन्दनवृक्षे। वायुरोगभेदे। वै.निघ.।

पाटेयकम्। क्ली। लवणविशेषे। च.चि.८अ.।

पाठ्यम्। क्ली। पट्टशाके। पाटिशाक। राज.।

पाठः। पुं। पाठायाम्। वै.निघ.।

पाठकः। पुं। चित्रकवृक्षे। वै.निघ.।

पाठमञ्जरी (शालिनी)। स्त्री। सारिकापक्षिणि। श.मा.।

पाठा। स्त्री। (Stephania hernandifolia. Syn. Cissampelos hernandifolia.) खनामख्यातविवृतकर्णीलतायाम्। ईषद्रौक्ष्मशा श्वेतपुष्पपुच्छा चेति ड.। चक्रपाठा इति देशविशेषे ख्याता। आकनादि, आखादि। हिं निसुका। तें पाठचेट्टु। उत्. अकानूविन्सि। तत्पर्य्यायाः,—अम्बष्ठा, अम्बष्ठीका, प्राचीना,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पापचेलिका, यूथिका, स्थापनी, श्रेयसी, विद्व-कर्णिका, एकाष्ठीला, कुचेली, दीपनी, वन-तिक्तका, तिक्तपुष्पा, ह्रस्वत्विक्ता, शिशिरा, हकी, मालती, वरा, दैवी, ह्रस्वपर्णी, तिक्ता, एकीशिका, हका, अम्बष्ठकी, वनतिक्ता, रसा, पापचेली, विद्वकर्णी, पटिका, अविद्धकर्णी, कुचेला। गुणाः—तिक्ता गुरुरुष्णा वातपित्तज्वरघ्नी भग्नसन्धानकरी पित्तदाहातीसारशूलघ्नी च। रा.नि.व.६। अपिच,—"अम्बष्ठा बालिका बाला शठाम्बा बालिकाम्बिका। अम्बा च माचिका चैव दृढ़वल्का मयूरिका॥ गन्धपत्री चित्रपुष्पी श्रेयसी सुखबाचिका। छिन्नपत्री भूरिमल्ली विश्रेया षोड़शाह्वया॥ अम्बष्ठा सकषायाम्ला कफकण्ठ-रुजापहा। वातामय-बलासघ्नी रुचिकृद्दीपनी परा॥" भा.।

पाठा(ठी)कुटः (टः)। पुं। चिबकवृक्षे। रा.नि.व.६।

पाठादशकम्। क्ली। स्तन्यशोधकगणभेदे। पाठागुडूचीदेवदारुमुस्तामूर्व्वागुडूचीन्द्रयवकिरात-तिक्तकटुरोहिणीसारिवा इति स्तन्यशोधनाः। च सू.४.अ.।

पाठादिकषायः। पुं। पाठोशीरबालककृते कषाये। गुणाः—दीपपाचनः ज्वरारोचकहरणा-मुखवैरस्यापकृन्नश्च। वा.चि.१अ। "पाठोशीरं सबालकम्।" अन्यः—कषायभेदे। "पाठेन्द्रयव-भूनिम्बमुस्तपर्पटकामृताः। जयत्यामसतीसारम्।" च.द.अ.सा.चि.।

पाठाद्यचूर्णम्। क्ली। गृहण्यां चूर्णम्। पाठा (आकनादि) बिल्वशलाटुः (बेलशुँट) चिबक-मूलं त्रिकटु जम्बूत्वक् (जाम फलेर आँटीर छाल) (जम्बूः जम्बूफलास्थिवल्कलम्। च.द.।) दाड़िमत्वक् धातुकीपुष्पं (धाई फूल) कटुकी (कटकी) अतिविषा (आतइच) मुस्ता दारु-हरिद्रा भूनिम्बं (चिरात्ता) इन्द्रयवः, प्र. चूर्णं समं समष्टितुल्यं कुटजत्वक्चूर्णम्। तण्डुलाम्बुमधुना पिबेत्।

पाठाद्यम्। क्ली। पाठापाटलयोः। आकनादि ओ पाकुल। वै.निघ. कास.चि.बृषणाद्यघृते।

पाठानः। पुं। गुग्गुलौ। मत्स्यभेदे। बोयाल माछ। वै.निघ.।

पाठासप्तकः। पुं। पाठादिसप्तद्रव्यसिद्धकषाये। स च किरातनागरमुस्तगुडूचीपाठोदीच्योशीरद्रव्य-साधितः। च.द.कफाधिकपि.श्लै.ज्व.चि.।

पाठिका। स्त्री। पाठायाम्। आकनादि। रा.नि.व.६।

पाठी (इन्)। पुं। चिबकवृक्षे। रा.नि.व.६। क्षत्रचिबके। व्रा॰चिता। श.च.।

पाठीनः। पुं। मत्स्यविशेषे। बोयाल माछ। गुणाः—श्लेष्मलः हृद्यः कुष्ठजनकोऽम्लपित्तकरश्च। सु.सू.४६अ.। "पाठीनः श्लेष्मली बल्यो निद्रालुः पिशितानिलं। दूषयेद्रुधिरं पित्तं कुष्ठरोगं करोति च॥" भा.पू.२भ.मांसव.। गुग्गुलौ। चिबक-वृक्षे। मे.।

पाड़िनी। स्त्री। मृद्भाण्डे। वै.निघ.।

पाणिः। पुं। हस्ते। कर्षपरिमाणे। २ तो.। कुलिहवृक्षे। प.प्र.।

पाणिजः। पुं। नखे। नखौ। रा.नि.व.१२। भा.म १भ.चित्तभ्रमज्व.चि.। "पुरपाणिजपांशुभिः।" नखे। नख। रा.नि.व.१८। [१ख.।

पाणितलः। पुं, क्ली। कर्षपरिमाणे। प.प्र.

पाणिनी। स्त्री। नीलापराजितायाम्। वै. निघ.।

पाणिन्धयः। त्रि। पाणिना पानकर्त्तरि।

पाणिपृष्ठम्। क्ली। करपृष्ठे। च.शा.७अ.।

पाणिभुक्। पुं। उदुम्बरवृक्षे। श.च.।

पाणिमणिका। स्त्री। मणिबन्धास्थनि। तानि संख्यया चत्वारि। च.शा.७अ.।

पाणिमन्थः। पुं। करञ्जवृक्षे। वै.निघ.२भ. कर्णकसन्निपातज्व.चि.। सु.चि.४अ.।

पाणिमर्दः (कः)। पुं। करञ्जवृक्षे। रा.नि. व.९।

पाणिमानिकः (का)। पुं। तीलकवृक्षे, कर्षे वा। प.प्र.१ख.।

पाणियालुः। पुं। स्वनामख्यातकन्दशाकविशेषे, रक्तालौ। पाणि आलू। गुणाः—विदोषघ्नः सन्तर्पणकरश्च। रा.नि.व.७।

पाणिरुहः। पुं। नखे। नखौनामगन्धद्रव्ये। रा.नि.व.१८,१२। [शृङ्गः।

पाणिशृङ्गः। पुं। क्षुद्रजातीय-शृङ्गभेदे। See

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाण्डीतलम्। क्ली। तीलकवृक्षे। श.मा.।

पाण्डीसर्य्या। स्त्री। वल्लजवृक्षे। उलू खड़। रा.नि.व.८।

पाण्डुरम्। क्ली। गैरिके। कुन्दपुष्प। श.च.। पुं। कुरुवकवृक्षे। वै.निघ.। कुटजवृक्षे। पाण्डुवर्णे।

पाण्डुरपुष्पिका। स्त्री। शीतलावृक्षे। श.च.। शिउली झोप।

पाण्डवः। पुं। अर्জ্জুनवृक्षे। वै.निघ.।

पाण्डविकः (का)। पुं, स्त्री। क्षणचटके। च.सू.२७अ.।

पाण्डिः। पुं। लौहविशेषे। रा.नि.व.१३।

पाण्डुः। पुं। पटोले। रा.नि.व.३। तन्नामकरोगे। पाण्डुरोग, पाण्डुशोथ। रा.नि.व.२०। निदानलक्षणे—"पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैः क्षयः। चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः। व्यवायमद्यं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णं। निषेव्यमाणस्य विदूष्य रक्तं कुर्व्वन्ति दोषास्त्वचि पाण्डुभावम्॥" सनिदानसंप्राप्तिः। पूर्व्वरूपं त्वक्स्फोटनादिकं भवति। वातजलक्षणं—"त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणात्मता। वातपाण्डामये कम्पतोदानाहश्रमादयः। पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः। भिन्नविट्कोऽति पीताभः पित्तपाण्डामयी नरः। कफप्रसेकक्षयजुतन्द्रालस्यातिगौरवैः। पाण्डुरोगी कफाच्छुक्लैः त्वङ्मूत्रनयनाननैः। ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः। पाण्डुरोगी विभिर्दोषैः त्याज्यः क्षीणो हतेन्द्रियः। मृत्तिकादनशीलस्य कृष्यत्यन्यतमो मलः। कषाया मारुतं पित्तमूषरा मधुरा कफम्।" मा.नि.। शालिधान्यभेदे। च.सू.२८अ.। परावते। मरुवकवृक्षे। वै.निघ.। पाण्डुरफली-वृक्षे। शुक्लपीतवर्णे। श्वेतवर्णे। स्त्री। माषपर्णीम्। श.च.। वनमुद्गे। लवलीवृक्षे। मा.।

पाण्डुकः। पुं। पाण्डुरोगे। श.र.। तिक्तपटोले। सर्जरसे। धूना। वै.निघ.। पाण्डुशालिधान्ये। सु.सू.४६अ.। अर्क.चि.। क्ली। अन्ने। वै.निघ.।

पाण्डुकण्टकः। पुं। अपामार्गे। रा.नि.व.४।

पाण्डुकम्बलः। पुं। प्रस्तरभेदे। मे.। [निघ.।

पाण्डुकर्कशा। स्त्री। औषधिविशेषे। वै.

पाण्डुकर्म्म। क्ली। क्षणानां पाण्डुवर्णतापादने। सु.चि.१अ.।

पाण्डुतरुः (द्रुमः)। पुं। धववृक्षे। धाओड़ा गाछ। रा.नि.व.९।

पाण्डुनागः। पुं। पुन्नागवृक्षे। श.र.। श्वेतहस्तिनि। श्वेतसर्षे।

पाण्डुपत्नीः(त्नी) (पुत्री)। स्त्री। रेणुकायाम्। रेणुक बीज। रा.नि.व.९।

पाण्डुपुच्छी (च्छिन्)। पलाण्डौ। पेयाज।

पाण्डुपुत्रा। स्त्री। कर्कटिकायाम्। वै.निघ.।

पाण्डुप्रहारिणी। स्त्री। शिग्रुवृक्षे। वै.निघ.।

पाण्डुफलम्। क्ली, पुं। पटोले। रा.नि.व.७। तिक्तपटोले। भा.पू.१भ.शा.व.।

पाण्डुफला। स्त्री। चिर्भिटायां। फूटी। रा.नि.व.५। वस्.कडुसेन्दार। [व.५।

पाण्डुफली। स्त्री। पाण्डुफलायाम्। रा.नि.

पाण्डुभूमिः। स्त्री। पाण्डुवर्णमृदि। रा.नि.व.२।

पाण्डुमत्स्यः। पुं। शुक्लमत्स्ये। See मत्स्यः।

पाण्डुमृत् (त्तिका)। स्त्री। पाण्डुवर्णमृत्तिकायाम्। रा.नि.व.२। खटिकायाम्। खड़ी। रा.नि.व.१३।

पाण्डुरः। पुं। धववृक्षे। धाओड़ा गाछ। रा.नि.व.९। धवलयावनाले। रा.नि.व.१६। पाण्डुरोगे। श.र.। कपोते। शुक्लवर्णे। मरुवकवृक्षे। शुक्लखड़िकायाम्। वके। वै.निघ.। क्ली। श्वेतकुष्ठरोगे। धवल। हला.।

पाण्डुरङ्गः। पुं। पटरङ्गे। पाटि रांडा। गुणाः—क्रमिश्लेष्मपित्तनाशित्वं तिक्तत्वं लघुत्वञ्च। राज.।

पाण्डुरच्छदः। पुं। केतकवृक्षे। प.मु.।

पाण्डुरद्रुमः। पुं। कुटजवृक्षे। कुड़चि गाछ। रा.नि.व.९। विका.।

पाण्डुरफली। स्त्री। स्वनामख्यातवृक्षे। मं पोटरफलमिति प्रसिद्धं। म. मणमरुं। कं पाण्डुरफालरे। तत्पर्य्यायाः,—पाण्डुः, धूसरा, क्षत्तबीजका, भूरिपलितदा, पाण्डुफली। गुणाः—शीतला गौल्या बल्या पित्तघ्नी हृद्या मूत्राघातघ्नी च। रा.नि.व.५।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाण्डुरा। स्त्री। माषपर्ण्याम्। माषाणी। रा.नि.व.३। शुक्लयूथिकवृक्षे। कर्कटिकायाम्। वै.निघ.।

पाण्डुरागः। पुं। दमनकवृक्षे। दना। रा. नि.व.१०।

पाण्डुरागप्रियः। पुं। वकुलवृक्षे। वै.निघ.।

पाण्डुरेक्षुः। पुं। श्वेतेक्षौ। रा.नि.व.१४।

पाण्डुलोमशा (मा)। स्त्री। माषपर्ण्याम्। जटा.र.मा.। [वैद्यकम्।

पाण्डुशर्करा। स्त्री। तन्नामकरोगविशेषे।

पाण्डुसूदनरसः। पुं। पाण्डुरोगघ्नरसविशेषे। 'रसं गन्धं मृतं ताम्रं जयपालञ्च गुग्गुलम्। समांशमाज्यसंयुक्तं गुडिकां कारयेन्मिताम्। एकैकां खादयेद्वैद्यः शीघ्रपाण्डुपनुत्तये। शीतलञ्च जलं चास्य वर्ज्जयेत् पाण्डुसूदने।' पारदः गन्धकः जारितताम्रं जेपालजीजं गुग्गुलुः प्र. समं। घृतेन वटी कार्य्या। रस.सं.। भैष.।

पातम्। क्ली। हरितालै। र.सा.सं.रस.प्र.।

पातनम्। क्ली। ऊर्द्धाधस्तिर्य्यग्रूपे त्रिविधे पारदनिष्काशनप्रकारे। प्रथमद्वये तत्तत्पर्य्यायं पश्य। शेषे पारदशब्दं पश्य।

पातयन्त्रम्। क्ली। पातनयन्त्रे। र.सा.सं.।

पाता (त्र)। पुं। गन्धपर्व्वे। बाबुई। श्र.च.।

पातालगरुड़ाह्वयः। पुं। पातालगरुड़ीलतायाम्। वै.निघ.।

पातालगरुड़ी। स्त्री। तिक्तालाव्याम्। तिरै नाउ। र.सा.सं.ब्रह्मरसे। छिलिहिरिवृक्षे। शिलिन्दा। हिं छेउड़ा। तें दूसरतीगे। तत्पर्य्यायाः,—वस्त्रादनी, सीमवल्ली, तिक्ताङ्गा, मोचकाङ्गा, मोचकाभिधा, तार्क्षी, सौपर्णी, गारुड़ी, दीर्घकाण्डा, दृढ़काण्डा, महावला, दीर्घवल्ली, दृढ़लता। गुणाः—"छिलिहिरिष्टः परं द्रव्यः कफघ्नः पवनापहः।" भा.पू.१भ.गु.व.। पातालगरुड़ी द्रव्या पित्तदाहरक्तदोषविषदोषघ्नी रुच्या सन्तर्पणी च। रा.नि.व.३। मद.।

पातालनृपतिः। पुं। शीषके। शीस। स.कौ.। भैष.वा.र.चि.ज्वादशायसे। रस.र.।

पातालयन्त्रम्। क्ली। भेषजपाकाय यन्त्रविशेषे। पाताल यन्त्र। लक्षणं यथा—ऊर्द्धमापस्तले वह्निर्मध्ये तु रजसंग्रहः। पातालयन्त्रमेतद्धि शीघ्रयेत् सूतकादिकम्।" रसयन्त्रः।

पातालवासिनी। स्त्री। नागवल्ल्याम्। वै. निघ.।

पातिकः। पुं। (Gangetic porpoise.) शिशुमारे। शुशोक। श्र.मा.।

पातितम्। क्ली। शरीरीत्पतितसद्यौव्रणे। वा. उ २६अ।

पात्रम् (पात्रापात्रम्)। क्ली। आढ़कपरिमाणे। ६४ प.। प.प्र.१खं.। च.चि.१अ.। शरीरे। भाण्डे। वै.निघ.।

पात्रटः। त्रि। क्षुद्राङ्गे। वै.निघ.। पुं। कर्पटके। श्र.र.।

पात्रटीरः। पुं। काके। श्र.र.। लौहकिट्टे। क्षौद्रपक्षिणि। वै.निघ.। कङ्कपक्षिणि। श्र.र.।

पाथम् (स्)। क्ली। वारिणि। मे.। रा.नि. व.४। बालके। बाला। भा.म.१भ. रक्तष्ठीवी ज्व.चि.। "मधुकनधूकपरूषकपाथः।"

पाथिस्। क्ली। लोचने। उणा.। पुं। समुद्रे।

पाथोजम् (रुहम्)। क्ली। कमले। पद्मे। रा नि.व.१०।

पादः। पुं। चरणे। रा.नि.व.१८। तरुमूले। रा.नि.व.२। चतुर्थांशे। अम।

पादगण्ड(ण्डी)रः। पुं। श्लीपदरोगे। पायेर गोद। विका.।

पादचत्वरः। पुं। काके। अश्वत्थवृक्षे। सैकते। मे.।

पादत्रधारणम्। क्ली। उपानद्धारणे। जूता पहरा। गुणाः—"पादरोगहरं द्रव्यं रुचीघ्नं प्रीतिवर्द्धनं। सुखप्रचारमौजस्यं सदा पादत्रधारणम॥" सु.चि.२४अ.।

पादत्राणम्। क्ली। उपानद्दादौ। जटा.।

पाददारिका (री)। स्त्री। पादगतक्षुद्ररोगे। पायेर तला फाटा रोग। लक्षणं—परिक्रमणशीलस्य वायुरत्यर्थरुक्षयोः। पादयोः कुरुते दारीं सरुजां तलसंश्रिताम्॥" सु.नि.१३अ.।

पाददाहः। पुं। पादरोगविशेषे। पा जोला। लक्षणं—"पादयोः कुरुते दाहं पित्तासृक्प्रकृतिः

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽनिलः। विशेषतश्चंक्रमणात् पाददाहं तमादिशेत्।" मा.नि.। सु.वा.व्या.चि.१अ.। "वातरक्तक्रमं कुर्य्यात् पाददाहे विशेषतः। मसूरविदलैः पिष्टैः घृतशीतेन वारिणा। चरणौ लेपयेत् सम्यक् पाददाहप्रशान्तये। नवनीतेन संलिप्तौ वह्निना परितापितौ। सुखिते चरणौ क्षिप्रं परितापात् सुदारुणात्॥" संग्रहः।

पादपः। पुं। द्रुमीत्पत्तौ। वै.निघ.। वृक्षे। अम.।

पादपरुहा। स्त्री। वन्दाकन्दुपे। रा.नि.व.५।

पादपुष्पकः। पुं। भूमिचम्पकवृक्षे। वै.निघ.।

पादपृष्ठम्। क्ली। पादपृष्ठभागे। ते च द्वे। च.शा.७अ.।

पादपोत्पलः। पुं। कर्णिकारवृक्षे।

पादप्रक्षालनम्। क्ली। पादधावने। पां धोयां। गुणाः—"पादप्रक्षालनं पादमलरोगश्रमापहम्। चक्षुःप्रसादनं हृद्यं रक्षोघ्नं प्रीतिवर्द्धनम्।" सु.चि.२४अ.।

पादमूलम्। क्ली। चरणाधोभागे। हे.च.।

पादरोगः। पुं। पादगतरोगे, चिप्पीपनखकुनखादौ। सु.नि.१३अ.।

पादरोह(हि)णः। पुं। वटवृक्षे। वटगाछ। रा.नि.व.११।

पादरोहिणी। स्त्री। वन्दायाम्। वै.निघ.।

पादरोही (इन्)। पुं। वटवृक्षे। वै.निघ.।

पादवल्मीकम्। क्ली। श्लीपदरोगे। रा.नि.व.२०।

पादविदारिका। स्त्री। अश्वस्य पादरोगविशेषे। लक्षणं—"पार्ष्णिजा पिण्डिका यस्य दृश्यते तीव्रवेदना। तस्य विद्याद्भिषग् व्याधिं घोरं पादविदारिकाम्॥" ज.द.३९अ.।

पादविरजा। स्त्री। चर्म्मपादुकायाम्। वै.निघ.।

पादवृक्षः। पुं। मेषशृङ्ग्राम्। वै.निघ.।

पादशलाका। स्त्री। शलाकावत्पादास्थनि। पायेर नलि। ते च द्वे। च.शा.७अ.।

पादशाखा। स्त्री। पादाग्रे। पायेर पाता। वै.निघ.।

पादशिष्टजलम्। क्ली। चतुर्थांशावशिष्टे पक्वजले। तद्गुणः विदोषनाशित्वम्। रा.नि.व.१४।

पादशृङ्गा। स्त्री। मेषशृङ्ग्राम्। वै.निघ.।

पादशोथः। पुं। पादगतशोफे। पादशोथ। यथा—"अनल्पोपद्रवकृतः शोथः पादसमुत्थितः। पुरुषं हन्ति नारीन्तु सुखजो गुरुजो द्वयम्॥" मा.नि.।

पादसुप्तिः। स्त्री। पादस्पर्शगुरुत्वता। पां असाड़ हওয়া। वै.निघ.।

पादस्फोटः। पुं। पादरोगविशेषे। पादस्फोटे। पां कुटिया याওয়া। रा.नि.व.२०। तत्पर्य्यायाः,—विपादिका, स्फुटिः। लक्षणं—"खिन्नस्यास्नाप्यमानस्य कण्डूरक्तकफोद्भवाः। कण्डूयनात्तत. क्षिप्रं स्फोटः स्रावश्च जायते।" सु.नि.१३अ.। पादगतक्षुद्रकुष्ठभेदे। लक्षणं—"कण्डूमती दाहरुजोपपन्ना विपादिका पादगतेयमेव।" सु.नि.५अ.।

पादहर्षः। पुं। तन्नामकपादरोगविशेषे। पायेर झिंझिनी। लक्षणं—"हृष्येते चरणौ यस्य भवतश्च प्रसुप्तकौ। पादहर्षः स विज्ञेयः कफवातप्रकोपजः। पादहर्षे तु कर्त्तव्यः कफवातहरो विधिः॥" सु.नि.वा.व्या.चि.१अ.।

पादहीनजलम्। क्ली। चतुर्थांशेन हीने पक्वजले। वातजरोगमात्रे हितम्। रा.नि.व.१४।

पादहीना। स्त्री। आकाशलतायाम्। आलोक लता। वै.निघ.।

पादाग्रम्। क्ली। प्रपदे। "पादाग्रं प्रपदं मतम्।" रा.नि.व.१८।

पादाभ्यङ्गः। पुं। पादयोस्तैलमर्दने। "स्रोतसां मार्दवकरः कफवातविनाशनः। धातूनां पुष्टिजननो सृजावर्णबलप्रदः॥ निद्राकरो देहसुखः स्वरव्यः पादरोगहा। पादत्वङ्मृदुकर्त्ता च पादाभ्यङ्गः प्रशस्यते॥" तौड़.।

पादिकन्दः। पुं। मालाकन्दे।

पादिनः (वर्गः)। पुं। कुम्भीरादिजलजन्तुषु। ते च कुम्भीरकूर्म्मनक्रगोधासकरशङ्करशिशुमारादयः। "कूर्म्मकुम्भीरकर्कटकक्रणकर्कटकशिशुमारप्रभृतयः पादिनः।" सु.सू.४६अ.। एतेषां मांसगुणाः—"पादिनोऽपि ये ते तु कीषास्थानां गुणैः समाः॥"

पादुका। स्त्री। चर्म्मकृतपादत्राणे। जूता। तद्धारणगुणाः—उपानद्धारणशब्दे मृग्याः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादूः। स्त्री । पादुकायाम्। अम.।
पादोत्पलः। पुं। द्रुमोत्पलवृक्षे। वै.निघ.।
पाद्। पुं । पादे। पा। जटा.।
पाद्यम्। क्ली । जले।
पानम्। क्ली । पीतौ, द्रवद्रव्यगलाधःकरण-व्यापारे। रा.नि.व.२०। प्राश्यवस्तुमात्रे। भाजने। मे.। पुं। निःश्वासे। हे.च.। शौण्डिके। जटा.।
पानकम्। क्ली । मत्स्याण्डिकादिमिष्टद्रव्यकृत-पानीये। परिमितशर्करानिस्वरसयुक्ते अन्यविधास्वरसयुक्ते वा पक्वरसे। पानां, शरवत्। गुणाः—"श्रमतृष्णट्क्लमहरं पानकं प्रीणनं गुरु। विष्टम्भि मूत्रलं हृद्यं पित्तघ्नं शीतलं तथा॥" वा.सू.।
पानकर्परः। पुं । खनामख्यातवृक्षे। पान-कर्पूर। वै.निघ.।
पानकी। स्त्री । पाण्डुरोगभेदे। लक्षणं—"सत्वापे भिन्नवर्चस्त्वं वहिरन्तश्च शीतता। पाण्डुता नेत्रयोर्यस्य पानकीलक्षणं भवेत्॥" मा.नि.।
पानगोष्ठिका। स्त्री । सुरापानालये। अम.।
पानपात्रम्। क्ली । सुरापानपात्रे। अम.।
पानबणिक्। पुं । शौण्डिके। हे.च.।
पानभाजनम्। क्ली। सुरापानपात्रे। त्रिका.।
पानमात्रा। स्त्री। सुरापाने प्रशस्तमात्रायाम्। यथा—"यावन्न चलते दृष्टिः यावन्न चीभते मनः। पानमात्रा परा तावत् विपरीता विषोपमा॥" शौनकः।
पानविभ्रमः। पुं । मदात्ययभेदे। लक्षणं—"हृल्लावतोदकफसंस्रवकण्ठधूमसूर्च्छावमिज्वरशिरीरुजनप्रदाहाः। द्वेषः सुरान्नविकृतेष्वपि तेषु तेषु तं पानविभ्रममुशन्त्यखिलेन धीराः॥" मा.नि.।
पानसम्। क्ली। पनसमद्ये। काँटालের মদ। জটা.।
पानाजीर्णः। पुं । तन्नामकरोगभेदे। लक्षणं यथा—"आध्मानसुप्तमधवोद्गिरणं विदाहः पाने त्वजीर्णमुपगच्छति लक्षणानि। ज्ञेयानि तत्र भिषजा सुविनिश्चितानि पित्तप्रकोपजनितानि च कारणानि।" मा.नि.।
पानात्ययः। पुं । मदात्यये रोगे। तस्य निदानम्—मदात्ययशब्दे दृश्यम्।
पानिलम्। क्ली । पानपात्रे। श.च.।
पानीयम्। क्ली । जले। रा.नि.व.४। See जलम्। पानके। পানা। अम्लिकापानीयं पित्त-वमिहरं। मधुरदाड़िमजं प्रतिश्यायकासघ्नं। अम्ल-दाड़िमजं जठरविकारे धारकं क्षुधावर्द्धकञ्च। निम्बूजं कृमि-हृल्लास-पित्त-ज्वरहरं सर्व्वाहार-पाचकञ्च। नागरङ्गपानीयं पित्तकासहरञ्च। पाकराजः।
पानीयकुक्कुटः। पुं । जलकुक्कुटे। ডাক্। वै.निघ.। [निघ.।
पानीयचूर्णिका। स्त्री । बालुकायाम्। वै.
पानीयतण्डुलम् (ली)। क्ली, स्त्री। कच्चट-शाके। কাঁচড়া দাম। वै.निघ.। [हे.च.।
पानीयनकुलः। पुं । जलविड़ाले। উদ্বিড়াল।
पानीयपृष्ठजः। पुं, स्त्री । कुम्भिकायाम्। টোকা পানা। प.मु.। र.मा.।
पानीयफलम्। क्ली । मखान्ने। পানফল। हिं मखाना। भा.मि.।
पानीयभक्तवटिका। स्त्री । ग्रहण्यधिकारे रसः। अभ्रभस्म शुद्धमण्डूरं विड़ङ्गं प्र. १ प. चव्यं विकटु फलत्रयं केशराजमूलं दन्तीमूलं सुस्ता पिप्पलीमूलं चित्रकमूलं घण्टाकर्णमूलं (घेटुमूल) मानमूलम् श्वेतमूलं शुक्लवृहतीमूलं सूर्य्यावर्त्तमूलं विष्णुमूलं पुनर्नवामूलं प्र. २ तौ. पारदः॥० तौ. गन्धः॥० तौ. आर्द्रकरसेन मर्द्या। संग्रहान्तरे (पत्रीदस्थाने यमानी, तथा सूर्य्यावर्त्तपुनर्नवयो-रग्रहणम्) एषामेकैकशोधितानां प्र. २ तौ. रस-गन्धकयोः प्र. ४ माषा जलेन (मतान्तरे आर्द्रक-रसेन) सम्पिष्य माषमिता वटी कार्य्या।
पानीयमूलकम्। क्ली । सीमराजबीजे। श.च.। [नि.व.४।
पानीयवर्णिका। स्त्री । बालुकायाम्। रा.
पानीयशारुः। पुं । पानीयकन्दभेदे। শোলা কচু। उत्. पाणिसारु। प.मु.।
पानीयशाला (लिका)। स्त्री । उदक-शालायाम्। জলছত্র। अम.। वै.निघ.।
पानीयशिरीषिका। स्त्री । जलशिरीषे। वै.निघ.।
पानीयाभा (भ्रा)। स्त्री । वल्लजायाम्। উলু। रा.नि.व.८।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पानीयामलकम्। क्ली। (Flacourtia cataphracta.) स्वनामख्यातवृक्षे। पानि आमला। र.सा.। हिं मानि अम्बरा। तें प्राचीनामलकम्। गुणाः—त्रिदोषघ्नं ज्वरघ्नञ्च। भा.। अम्लं स्वादु मलवर्द्धकं त्रिदोषज्वरघ्नं सुखशोधनञ्च। राज.।

पानीयाम्ला। स्त्री। वल्लजातृणे।

पानीयालुः। पुं। कन्दशाके। वनालू। वै.निघ.। तत्पर्य्यायाः,—जलालूः, वृपालुः, वालुकः। गुणौ—त्रिदोष-नाशित्वं सन्तर्पणकारित्वञ्च।

पापः। पुं। माषपर्ण्याम्। माषाणी। वै.निघ.। पापकर्म्माणि, अदत्तादानादौ। तच्च दशविधं यथा—"अदत्तानामुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतम्॥ पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः। असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधं॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनं। वितथाभिनिवेशश्च त्रिविधं मानसं स्मृतम्॥" च.द.दिनचर्य्या।

पापघ्नः। पुं। तिले। रा.नि.व.१६।

पापघ्नी। स्त्री। तुलसीवृक्षे। वै.निघ.।

पापचेलिकम् (**का**) (**ली**) (**चेला**)। क्ली, स्त्री। पाठायाम्। आकनादि मूल। प.मु.। रा.नि.व.६। शेष.। च.चि.३अ.।

पापनाशिनी। स्त्री। शमीवृक्षे। रा.नि.व.८। कृष्णतुलसीवृक्षे। वै.निघ.। [विका.।

पापरोगः। पुं। मसूरिकायाम्। वसन्तरोग।

पापशमनी। स्त्री। शमीवृक्षे। रा.नि.व.८।

पापोदकम्। क्ली। विष्ठाकृमिकीटादियुक्तजले। अत्रि। See जलम्।

पाम्ना। पुं। ज्वरे। रस.र.ज्व चि.बाड़वरसे।

पामघ्नः। पुं। गन्धके। र.सा.। [व.६।

पामघ्नी। स्त्री। कटुक्यां। कटकी। रा.नि.

पामनः। त्रि। कच्छूरोगिणि। खसो'। अम.।

पामन्। क्ली। पामरोगे। पाँचड़ा। अम.।

पामरोद्धारा। स्त्री। गुडूच्याम्। श.च.।

पामा (**न्**)। स्त्री। क्षुद्रकुष्ठरोगविशेषे। खोस्‌रोग, पाँचड़ा। लक्षणम्—"सूक्ष्मा वाह्याः स्रावबत्यः प्रदाहाः पामित्युक्ताः पिड़काः कण्डुमत्यः॥" मा.नि.। सु.नि.१३अ.।

पामाघ्नः। पुं। गन्धके।

पामाघ्नी। स्त्री। कटुकायाम्।

पामारिः। पुं। गन्धके। हे.च.। र.सा.सं.।

पाय(य्य)म्। क्ली। जले। विश्व.। परिमाणे। अम.। पाने। उणा.।

पायना। स्त्री। शस्त्रधारायाः मृदुमध्यतीक्ष्णीकरणप्रक्रियायाम्। पेनोनो। सा च क्षारोदकतैलनिमज्जनभेदेन त्रिधा। तत्र क्षारपायितं शल्यादिच्छेदने। उदकपायितं मांसादिपाटने। तैलपायितं शिराव्यधनादौ च। सु.सू.८अ.।

पायसः। पुं, क्ली। पयःसिद्धयवाग्वाम्। परमान्न। प.मु.। पायसपाकप्रकारगुणाः यथा—"अतप्ततण्डुलौ धौतः परिभृष्टौ घृतेन च। खण्डयुक्तेन दुग्धेन पाचितः पायसो भवेत्॥" पुराणम्। श्रीवासे। तार्पिणे। अम.।

पायुः। पुं। गुदे, मलद्वारे। रा.नि.व.१८। स गर्भस्थशिशोः सप्तमे मासि भवति। सुखबोधः।

पाय्यम्। क्ली। जले।

पारः। पुं। पारदे। अ.टी.सा.।

पारक् (**ज्**)। पुं। सुवर्णे। उणा.।

पारटीटः। पुं। प्रस्तरे। त्रिका.।

पारणः। पुं। मेघे।

पारतः। पुं। पारदे। हे.च.।

पारतन्त्र्यम्। क्ली। पराधीनतायाम्। मा.नि.।

पारदः। पुं। (Hydrargyrum.) स्वनामख्यातखनिजतरलधातुविशेषे। पारा। तत्पर्य्यायाः,—रसराजः रसनाथः महारसः रसः महातेजः रसलिङ्गः रसोत्तमः सूतराटः चपलः जैवः शिववीजं शिवः अमृतं रसेन्द्रः लोकेशः दुर्द्धरः प्रभुः रुद्रजः हरतेजः रसधातुः अचिन्तजः अवित्तजः खेचरः अमरः देहदः मृत्युनाशकः सूतः स्कन्दः स्कन्दांशकः देवः दिव्यरसः रसायनश्रेष्ठः यशोदः सूतकः सिद्धधातुः पारतः हरबीजं रजस्वलः मूर्त्तिः पारः शिवाह्वयः शिववीर्य्यः। स अन्तर्नीली बाह्यौज्ज्वलं औषधयोग्यः श्रेष्ठश्च। "असाध्येष्वपि दातव्यो रसोऽतः श्रेष्ठ उच्यते।" र.सा.सं.। केवलः पारदस्त्रिदोषघ्नः प्रधानतो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलदश्च । द्रव्यान्तरमिश्रितश्च स सर्व्वरोगघ्नो बलदायुष्यश्च । रोगभीचकत्वात्पारद उच्यते । तल्लक्षणं—"अन्तःसुनीलो बहिरुज्ज्वली यो मध्याह्नसूर्य्यप्रतिमप्रकाशः । श्लक्ष्णोऽथ धूमः परिपाण्डुरश्च चित्रो न योज्यो रसकर्म्मसिद्धौ ॥ रसदोषः यथा—"नागो बङ्गो मलो वङ्गिशाच्चल्यश्च विषं गिरिः । असह्याग्निर्महादोषा निसर्गात् पारदे स्थिता ॥ इति । दोषहीनो यदा सूतस्तदा स्यात्कुष्ठजरापहः । शुद्धोऽयमम्लतं साक्षात् दोषयुक्तो रसो विषम् ॥" र.सा.सं । "शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले । तद्हेसारजातत्वाच्छुक्लमभूच्च तत् ।" पारदभस्म चतुर्धा कृष्णश्वेतपीतरक्तभेदात् । तेषु रक्तभस्म रससिन्दूरं, कृष्णभस्म कज्जलिश्च प्रधानतो व्यवहार्य्यः, शुभोऽशुद्धः । "त्रैविध्येन विज्ञेयं शिववीर्य्यं चतुर्विधम् । श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ।.....श्वेतं श्लक्ष्णं रुजां नाशि रक्तं किल रसायनम् । धातुवादे च तत् शीतं खेगतौ कृष्णमेव च ॥" गुणाः—"योगवाही महाद्रव्यः सदा दृष्टिबलप्रदः । सर्व्वामयहरः प्रोक्तो विशेषात् सर्व्वकुष्ठनुत् । संस्कारहीनं खलु सूतराजं यः सेवते तस्य करोति बाधाम् । देहस्य नाशं विदधाति नूनं कष्टांश्च रोगान् जनयेन्नराणाम् ॥" भा.पू.१भ.घा.व. । धान्याम्लेन एतदभावे अत्यम्लारणार्लेन वा रसं खे दयेत् । द्वितीयं यथा—त्रिकटुलवणराजिकारजनीत्रिफलार्द्रकमहाबलानागबलामंघनादपुनर्नवामेषशृङ्गीचित्रकाणि समभागानि, समस्तानि व्यस्तानि वा पूर्व्वास्त्रैव पिष्ट्वा तेन कल्केनाङ्गुलमात्रं वस्त्रमालिप्य तन्मध्ये सूतं दत्त्वा बद्ध्वा च दिनत्रयं दोलायन्त्रेण काञ्जिके पचेत् । इति खेदः । रसमर्दनम्—इष्टकाचूर्णचूर्णाभ्यामादौ मर्द्यः । ततोदम्ना गुड़ेन सिन्धूत्थराजिकाग्निदग्धधूमैर्मर्द्यः ॥ अथवा हृतीकुमारिकाचित्रकरक्तसर्षपसाधितैः कषायैर्मर्द्यः । "रक्तेष्टकानिशाधूमसारोर्णाभस्मतुत्थिकैः । जम्बीरद्रवसंयुक्तैर्नागदोषापनुत्तये ।" र.चि.३अ. "त्रिफलाकन्यकातोयैः विषदोषोपशान्तये ।" अथ मूर्च्छना—"वृषणत्रिफलाबस्याकन्दैः क्षुद्राद्यान्वितैः । चित्रकीर्णानिशाखारकन्यार्कैकनकद्रवैः । सूतं क्षतेन यूषेण वारान्सप्ताभिमर्दयेत् । इत्थं संमूर्च्छितः सूतस्त्रयोऽपि कज्जुकम् ॥" इति । "अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् । तन्मध्ये क्षिपेत् सूतमलाबूदुग्धमिश्रितम् । द्रोणपुष्पीप्रसूनानि विड़ङ्गमरिमेदकः । एतच्चूर्णसमैर्भागैः दत्त्वा मुद्रां प्रदीयते । तन्मूलं स्थापयेत्सम्यक् सूक्ष्मधूषासंपुटे पचेत् । एवमेकपुटेनैव सूतकं भस्मतां व्रजेत् ॥" इति सूतभस्म । भा. । एतत्साधकानि ऊनविंशकर्म्माणि भवन्ति, तद्यथा—स्वेदन-मर्दन-मूर्च्छनोत्थापन-पातन-बोधन-नियमन-दीपनानुवासनगगनादियासप्रमाणचारणगर्भद्रुतिवाह्यद्रुतियोगजारणरञ्जनसारणक्रामणवेधभक्षणानि । ऊर्द्धपातनाधःपातने पर्य्यायै द्रष्टव्ये । "घटे रसं विनिक्षिप्य सजलं घटमन्यकम् । तिर्य्यङ्मुखं हयं कृत्वा तन्मुखं रोधयेत् सुधीः । रसाधो ज्वालयेदग्निं यावत् सूतो जलं विशेत् । तिर्य्यक्पातनमित्युक्तम्...॥" इति तिर्य्यक्पातनम् । "लवणेनाम्लपिष्टेन हण्डिकान्तर्गतं रसं । आच्छाद्याम्लजलं किञ्चित् चिक्षा स्वावेण रोधयेत् । ऊर्द्धं लघुपुटे दैयो लक्षश्वासो भवेद्रसः ॥" इति बोधनम् । "सर्पाक्षी चिञ्चिका कन्या भृङ्गारकनकाम्बुभिः । दिनं संस्वेदितः सूतो नियमात् स्थिरतां व्रजेत् ॥" इति नियमनं । "काशीसं पञ्चलवणं राजिकामरिचानि च । द्विश्चिग्रुबीजमेकत्र टङ्कणेन समन्वितम् । आलोड्य काञ्जिके दोलायन्त्रे पाकाद्दिनैस्त्रिभिः । दीपनं जायते सम्यक् सूतराजस्य जारणे ॥" इति दीपनम् । "दीपितं रसराजन्तु जम्बीररससंयुतम् । दिनैकं धारयेद्धर्म्मे स्वत्वे वासितो भवेत् ॥" इत्यनुवासनम् ॥ रसजारणाहि पातनगालनव्यतिरेकेण घनहेमादियासपूर्व्वकं पूर्व्वावस्थापन्नत्वम् । जारणा । र.चि. ३अ. । जारितरसगुणाः—"शुद्धगन्धेषु जीर्णस्तु शुद्धाच्छतगुणाधिकः । षड्गुणे गन्धके जीर्णो रसो भवति रोगहा । तस्माच्छतगुणो व्योमसत्त्वे जीर्णस्तु तत्समे । ताप्यखर्परतालादिसत्त्वे जीर्णो गुणावहः । हेम्नि जीर्णे सहस्रैकगुणसङ्ग्रहदायकः ।" इति । अथ यासयोग्यरसः—मूर्च्छाभ्यायोक्तषड्गुणबलिजीर्णपिष्टिकीक्षितो रसः खल्वेऽत्यन्तबुभुक्षितो घनहेमवज्रादि त्वरितमेव ग्रसति ॥ इति । मूर्च्छना यथा—व्यवहारिकतीक्ष्णकदयप्रमाणेनापि परिशुद्धो रसो मूर्च्छयितव्यः । मूर्च्छनाप्रकारस्तु बहुविधः । तत्र षड्गुणगन्धकजारणप्रक्रिया साधीयसी । रसगुणबलिजारणं विनायं न खलु रुजाहरणक्षमो रसेन्द्रः । न जलदकलधौतपाकहीनः स्पृशति रसायनतामिति प्रसिद्धिः ॥ तन्निमित्तकं सिकतायन्त्रहृदयं कथ्यते । यथा—निरवधिनिपीड़ितस्वच्छरावादि-परिलिप्तामतिकठिन-काचघटीमध्ये वक्ष्यमाणप्रकार-रसगर्भितगन्धमधस्तर्ज्जन्यङ्गुलि-प्रमाणितच्छिद्रायामनुरूपस्थालिकायामारोप्य परितश्चां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विचङ्गुलिमितेन निरन्तरालीकरणपुरःसरं सिक्ताभिरापूर्य्य वर्द्धमानक आरोपणीयम् । क्रमतश्चित्तुराणि पञ्च वापि वासराणि ज्वलज्ज्वालया पचनीयमित्येकं यन्त्रम् । र.चि.३अ. । रसभक्षणमात्रा—"गुञ्जामात्रं रसं देवि हेमजीर्णन्तु भक्षयेत् । द्विगुणं तारजीर्णस्य रविजीर्णस्य च त्रयम् । तीक्ष्णाभ्रकान्तमाक्षैका प्रायोमात्रेति कीर्त्तिता ।" र. चि. । (आभ्यन्तरिकप्रयोगे)—परिवर्त्तकः लालानिःसारकः रजोनिःसारकः पित्तनिःसारकः घर्म्मकारकः मूत्रकारकः विरेचकः अवसादकः शोषकः प्रदाहनाशकः । (बाह्यप्रयोगे)—परिवर्त्तकः लालानिःसारकः शोषकः पचननिवारकः प्रत्युग्रतासाधकः दाहकार्य्य ।

पारदबन्धनम् । क्ली । सारलौहे । वै.निघ. ।

पारवतः । पुं । कपोतपक्षिणि ।

पारशवम् । क्ली । लौहे । वै.निघ. ।

पारश्वयः । क्ली । सुवर्णे । वै.निघ. ।

पारसीकयमानी । स्त्री । तद्देशीययमानीविशेषे, खोरासानीयमान्यां । किरमानी ओम्बा इति महाराष्ट्रादौ । सि.यो.च.द.क्षमि.चि. । गुणाः—"पारसीकयमानी तु यमानीसदृशी गुणैः । विशेषात्पाचनी रुच्या ग्राहिणी मादिनी गुरुः ॥" भा. । "पारसीकयमानी तु तिक्तोष्णा कटुचोषणा । अग्निदीप्तिकरी हृद्या लघ्वी चैव प्रकीर्त्तिता । विदोषाजीर्णकृमिनुच्छूलामस्य च नाशिनी ॥". वै. निघ. ।

पारसीकवचा । स्त्री । श्वेतवचायाम्, खोरासानीवचायाम् । श्वेत वच । गुणाः—"हैमवत्युदिता तद्वत् वातं हन्ति विशेषतः ।" भा. ।

पारसीकाश्वः । पुं । तद्देशजघोटके ।

पारापतः । पुं । कपोते । अ.टी.र. ।

पारारुकः । पुं । प्रस्तरे । श.र. ।

पारावतम् । क्ली । परूषकफले । पक्व फल । पेयारा फल । गुणाः—"पारावतं सुमधुरं रुच्यमत्यग्निवातनुत् ।" सु.सू.४६अ. । "द्विविधं शीतसुगन्धञ्च मधुरञ्चाम्लमेव च । गुरु पारावतं ज्ञेयमरुच्यत्यग्निनाशनम् ॥" च.सू.२७अ. ।

पारावतः । पुं । कपोतजातिभेदे । गृहकपोते । पायरा । तें पारुवापिट्ट । तत्पर्य्यायाः,—भिक्षुकण्ठः पारवतः घरशिखः क्लेद्यकण्ठः कपोतः रक्तलोचनः कलध्वनिः पारापतः कलरवः अरुणलोचनः रुदनः काकुरवः कामी रक्तेक्षणः मदनमोहनः वाग्विलासी, कण्ठीरवः गृहकपोतः । तन्मांसगुणाः—स्निग्धं मधुरं गुरु शीतलं रक्तपित्तदाहघ्नं बल्यञ्च । रा.नि.व.१७ । विपाके मधुरं गुरु च । सु.सू.४६अ. । "तथा पारावतो ज्ञेयो वातश्लेष्मकरो गुरुः ।" अवि.२१अ. । See कपोतः । पर्षकवृक्षे । च.सू.२७अ. । लौहे । नीलाञ्जने । सारास्थि । वै.निघ. । वृक्षविशेषे । पेयारा । सु.सू.४६अ. । तिन्दुके । आबलूस, केन्दु । मे. । श. । मण्डलिसर्पविशेषे । सु.कल्प. ४अ. । [४६अ. ।

पारावतकः । पुं । व्रीहिधान्यविशेषे । सु.सू.

पारावतकलिका । स्त्री । महाज्योतिष्मतीलतायाम् । बड़ लताफट्की । वै.निघ. ।

पारावतपदी । स्त्री । ज्योतिष्मतीलतायाम् । लताफट्की । र.मा. । काकजङ्घायां । रा.नि.व.४ ।

पारावतशकृत् । क्ली । कपोतविष्ठायाम् । पायरार गु । गुणाः—ग्रथितरक्तरीधकम् । वा.चि.२अ. ।

पारावताङ्घ्रिः । स्त्री । ज्योतिष्मतीलतायाम् । लताफट्की । वन उच्छे । प.मु. । र.सा.सं । महाज्योतिष्मतीलतायाम् । रा.नि.व.३ । काकजङ्घायाम् । रा.नि.व.४ ।

पारावताङ्घ्रिपिच्छः । पुं । वन्देशीयपारावते । बोम्बादी पायरा । रा.नि.व.१९ ।

पारावती । स्त्री । खबलीफले । मे. ।

पारावरः । पुं । भूधामनवृक्षे । व.निघ. ।

पारि । क्ली । सुरापानपात्रे । त्रिका. ।

पारिगर्भिकः । पुं । कपोते । परिगर्भिकरोगे । वै.निघ. ।

पारिजातः । पुं । पारिभद्रकवृक्षे । पालते मान्दार । रा.नि.व.८ । र.मा.सु.चि.११अ. ।

पारिजातकः । पुं । श्वेतजवावृक्षे । सादा जवा । प.मु. । रोहितकवृक्षे । निम्बवृक्षे । सुरतरौ । वै.निघ. । करटकपारिजाते । पारिभद्र गाछ । सु.चि.११अ. ।

पारिजाता । स्त्री । तेजोवत्याम् । तेजबल । वै.निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पारिणामः। त्रि। वयःपरिणतिजन्ये। वा. उ.२९अ.। [हे.च.। विका.।

पारि(री)न्द्रः। पुं। सिंहे। अजगरसर्पे।

पारिपेलम्। क्ली। केवर्त्तमुस्तके।

पारिभद्रः। पुं। निम्बवृक्षे। रा.नि.व.९। वै.निघ.२भ.वा.व्या.चि. कण्टकनादेयादिकषाये। (Erithrina Indica.) The Indian coral tree. पारिजातवृक्षे। पालुते मान्दार गाछ। हिं फरहद। मं दा. पाङ्गरा, पञ्जीर। कं हरिबाल। तें मोदुग, बारिदेचेट्टु। ता. सुराक। तत्पर्य्यायाः,—रक्तपुष्पकः क्रिमिशत्रुः रक्तकुसुमः क्रिमिघ्नः बहुपुष्पः रक्तकेशरः। गुणाः—कटुष्णः कफवातघ्नः अरोचकघ्नः पथ्यः दीपनश्च। रा.नि. व.८। पित्तरोगघ्नः कर्णरोगघ्नश्च। भा.। प्लीपीडास्थ सन्धिवातघ्नः नेत्ररोगे च हितः। कज्जलं चक्षुष्यं। पत्रं बहिःप्रयोगात् सन्धिवेदनाघ्नञ्च। देवदारुणि। मे.। सु.सू.११अ.। सरलदेवदारौ। अ.च.।

पारिभद्रकः। पुं। पञ्चतनिम्बे। सि.यो.क्रमि-चि.। निम्बवृक्षे। रा.नि.व.९। वै.निघ.वा. व्या.चि.नारायणतैले। पारिभद्रवृक्षे। श्वेत आकन्द गाछ। राजार्कवृक्षे। देवदारौ। अम.। क्ली। कुष्ठौषधौ। कूड़। रा.नि.व.१२।

पारिभद्रकजटा। स्त्री। पालिधामूले। पालितामान्दारेर शिकड़। च.द.गुल्म.चि.। "व्याघ्रीकिंशुकपारिभद्रकजटा॥"

पारिभद्ररसः। पुं। दद्रुकुष्ठे हितः। "मूर्च्छितं सूतकं धात्रीफलं निम्बस्य चाहरेत्। तुल्यांशं खदिरक्काथैः दिनं मर्द्यञ्च भक्षयेत्॥" माधा। निष्कमिता। रस.चि.। [प.मु.।

पारिभ(भा)व्यम्। क्ली। कुष्ठे। कूड़।

पारिभः (सः)। पुं। अश्वत्थविशेषे। पलाश-पिपूल। हिं गजहण्ड। भा.। वै.निघ.। See पारीभः। [वै.निघ.।

पारिहार्य्यम्। क्ली। कुष्ठौषधौ। कूड़।

पारिच्छिः। पुं। ऋषिविशेषे। च.।

पारी। स्त्री। जातीपत्न्याम्। जयित्रीवै.निघ.। दोहन्याम्। पानपात्रे। विका.। परागे। विश्व.।

पारीवणः। पुं। कच्छपे।

पारीभः (षः)। पुं। (Thespesia populneoides, or populnea.) The tulip tree. प्लक्षवृक्षे। पाकुड़ गाछ। गर्दभाण्डवृक्षे। गाम्भीभाँट्। ह्रस्वप्लक्षभेदे। अश्वत्थविशेषे। गया अश्वथ। परेशपिपूल, पलाशपिपूल। गजदन्त-सहोरा इति च लोके। हिं परसपिपुल, पर्शिपु। तें गङ्गरय। वस्. मेन्दि। ता. पोरिश। गुणाः—"पारीषो दुर्जरः स्निग्धः क्रमिशुक्रकफप्रदः। फलेऽम्लो मधुरो मूले कषायस्वादुमज्जकः॥" भा.।

पारुः। पुं। अग्नौ। सूर्य्ये।

पारुली। पुं। पाटलावृक्षे।

पारुषः। पुं। नखे। वै.निघ.।

पारु(रू)षकतैलम्। क्ली। वातरक्ते तैलम्। तिलतैलं परुषकफलरसः द्राक्षारसः गाम्भारीरसः इक्षुरसः भूमिकुष्माण्डरसः, एषां प्र.४ अ. दुग्धं १६ अ.। पाच्यम्।

पारुष्यम्। क्ली। अगुरुणि। अ.च.।

पारेवतः। पुं, क्ली। फलवृक्षभेदे। पेयारा। उत्. प्याड़ा। वृक्षविशेषे, कामरूपे रैवात इति ख्याते, यस्य फलं महाकालफलवद्भवति। तच्च द्विविधं सामान्यं महापारेवतं स्वर्णपारेवतं चेति। सामान्यगुणाः—मधुरं कृमिहरं वातहरं हृष्यं व्रणाज्वरविदाहहरं हृद्यं मूर्च्छाभ्रमश्रमशोषहरं स्निग्धं रुच्यं बहुवीर्य्यकरञ्च। महापारेवतं गौल्यं बल्यं पुष्टिवर्द्धनं हृष्यं मूर्च्छाज्वरहरं पूर्व्वोक्तात् गुणाधिकञ्च। रा.नि.व.११। स्वादम्लं शीतल-सुषञ्च। वा.सू.। द्वीपान्तरखर्ज्जुरे। वै.निघ.।

पार्घटम्। क्ली। भस्मनि। छाई। हारा.।

पार्थः। पुं। अर्ज्जुनवृक्षे। पं.मु.। भा.हृद्रो.चि.।

पार्थकी। स्त्री। चीरशुक्लायाम्। पाँड़कुगड़ा। अ.चि.।

पार्थवल्कः। पुं। अर्ज्जुनत्वचि। अर्ज्जुनछाल। अर्ज्जुनवृते प्रयोज्यः।

पार्था। स्त्री। सुवर्चलायाम्। हुड़हुड़िया। सू.१५अ.वीरतर्वादिः। "भल्लूकसीरटकुररुटक-रम्भपार्थाः।" ब्राह्मीवृक्षे। वै.निघ.।

पार्थिवम्। क्ली। तगरपुष्पे। तगरपादुका। कीड़ाणि पिण्डीतगर। रा.नि.व.१०।२३। पुं। शरावे। शरा। घटादौ। विका.। अर्ज्जुनवृक्षे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वि। मृद्विनिर्म्मिते। पृथ्वीगुणभूयिष्ठे। सु.सू.४१अ.।

पार्थिवचूर्णम्। क्ली। धूली। धूला।

पार्थिवजम्। क्ली। अर्জ্জुनत्वचि। अर्জ্জुनछाल। च.द.छर्द्दो.चि.।

पार्थिवा (वी)। स्त्री। सौराष्ट्रमृत्तिकायाम्। पक्वपर्पटी। मनःशिलायाम्। वै.निघ.। वाजिदेहगतच्छायाविशेषे। "सुस्निग्धा पार्थिवी छाया नानाज्योतिःसमन्विता।" ज.द.३अ.।

पार्व्वणः। पुं। हरिणभेदे। श.च.।

पार्व्वतः। पुं। निम्बवृक्षे। प.मु.। महानिम्बवृक्षे। घोड़ानिम्। र.मा.। क्ली। हिङ्गुनि। शिलाजतुके। शीषके। वै.निघ.।

पार्व्वतपीलुः। पुं। अचीटवृक्षे।

पार्व्वती। स्त्री। क्षुद्रपाषाणभेदायाम्। छोट पाथरकुचा। रा.नि.व.५। सौराष्ट्रमृत्तिकायाम्। पक्वपर्पटी, वेङा गाटी। हे.च.। र.मा.। भैष. भग.चि.व्रणगजाङ्कुशे। पिप्पल्याम्। धातकीवृक्षे। सिंहपिप्पल्याम्। रा.नि.व.६। गजपिप्पल्याम्। रा.नि.व.२३। अतसस्याम्। भा.। शल्लकीवृक्षे। मे.।

पार्व्वतीयः। पुं। अचीटवृक्षे। आंश्रोटि गाछ। वै.निघ.। मशकजातिविशेषे। सु.कल्प.८अ.। शालिधान्यभेदे। अर्क.चि.। क्ली। नीलाञ्जने। वै.निघ.।

पार्व्वतीरजः (स्)। क्ली। गन्धके।

पार्व्वतीसम्भूतः। पुं। गन्धके। र.सा.सं. पार्व्वतीरसे।

पार्व्वतेयः। पुं। गजपिप्पल्याम्। प.मु.। चित्रकवृक्षे। रा.नि.व.६। सूर्य्यावर्त्तवृक्षे। हुड़हुड़िया। र.मा.। क्ली। सौवीराञ्जने। गुग्गुलु इति लोके। र.मा.श.च.। स्त्री। धातकीवृक्षे। जिङ्गिन्याम्। वै.निघ.।

पार्श्वः। पुं, क्ली। कक्षाया अधोभागे। पाँश। रा.नि.व.१८। क्ली। पार्श्वास्थिसमूहे। पाँजरार हाड़। मे.।

पार्श्वकम्। क्ली। पार्श्वास्थनि। पाँजरार हाड़। रा.नि.व.८।

पार्श्वपिप्पलम्। क्ली, पुं। हरीतकीभेदे, पारीषवृक्षे। गजहड़ इति पश्चिमदेशे। भा.म. ४भ.योनिरो. चि.क्ष.क.वन्ध्याप्रतीकारे।

पार्श्वशूलः। पुं, क्ली। शूलरोगभेदे, पार्श्वदेशस्थशूलरोगे। पार्श्ववेदना वा पार्श्वशूल। तस्य निदानलक्षणे—"कफं निगृह्य पवनः सूचीभिरिव निस्तुदन्। पार्श्वस्थः पार्श्वयोः शूलं कुर्य्यादाघातसंयुतम्। तेन श्वसिति वक्त्रेण नरोऽन्नञ्च न काङ्क्षति। निद्राञ्च प्राप्नुयादेव पार्श्वशूलः प्रकीर्त्तितः॥" भा.म.३भ.।

पार्श्वसंहतिः। स्त्री। पार्श्वभागे। भा.।

पार्श्वसन्धिः। स्त्री। जघनास्थ्यैगूर्द्धमधःपार्श्वान्तरप्रतिबद्धपृष्ठमर्म्मणि। सु.शा.६अ.।

पार्श्वाकृषः। पुं। बालरोगभेदे। वै.निघ.।

पार्श्वास्थि (का स्थि)। क्ली। चतुर्विंशतिपञ्जरास्थनि। रा.नि.व.१८। च.शा.७अ.।

पार्श्वोदरप्रियः। पुं। कर्कटे। हे.च.।

पार्षतः। वि। मृगसम्बन्धिनि। श्वेतबिन्दुहरिणसम्बन्धिनि। सु.कल्प.१अ.।

पार्ष्णिः। पुं, स्त्री। गुल्फस्याधोभागे। गोड़मूड़ा, गोड़ालि। रा.नि.व.१८। स गर्भस्यस्य मासद्वयेन भवति। सुखबोधः। पृष्ठभागे। हला.।

पार्ष्णिग्रस्थि। क्ली। गुल्फाधोभागास्थनि। ते च द्वे। च.शा.७अ.।

पालः। पुं। चिबुकवृक्षे। वै.निघ.। निष्ठीवनपात्रे। हे.च.।

पालकः। पुं, क्ली। चिबुकवृक्षे। रा.नि.व.६। गजज्वरे। गजवै.। कुष्ठे। कूड़। र.सा.सं.प्रदरारिरसे। हिङ्गुले। वै.निघ.।

पालकविषम्। क्ली। तन्नामकस्थावरकन्दविषे। सु.कल्प.२अ.। See कन्दविषं।

पालकाख्यः। पुं। गजवैद्यकप्रणेतरि ऋषौ। विका.।

पालकाप्यः। पुं। चरकोक्ते मुनिविशेषे। च.। धन्वन्तरौ। विका.।

पालक्या (ङ्गा)। पुं। वास्तूकाकारपालङ्कशाके। पालंग शाक। प.मु.। तत्पर्य्यायाः,—पलक्या मधुरा क्षुरपत्रिका सुपत्रा स्निग्धपत्रा ग्रामीणा ग्राम्यवल्लभा क्षुरिका। गुणाः—वातला शीता श्लेष्मला मेदिनी गुरुः विष्टम्भिनो मदघ्नी श्वासपित्तरक्तकफघ्नी च। "पालङ्क्या वास्तुकाकारा क्षुरिका चौरितच्छदा। पालङ्क्या वातला शीता

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्लेष्मला भेदिनी गुरुः ॥ विष्टम्भिनी मदश्वासपित्त-रक्त-कफापहा ॥" भा.पू.१भशा.व.। कफपित्त-वातविबन्धघ्नी रुचा च। राज.। कुन्दुरुखोटौ। अम.।

पालङ्कः (ङ्कः)। पुं, क्ली। (Beta bengolensis.) A sort of Beet root. खनाम-ख्यातपत्रशाके। पालक्यशाक इति दाक्षिणात्यभाषा। पालंग शाक। हिं पलकी। पालं शाक इति चिचकूटे प्रसिद्धम्। गुणाः—ईषत् कटुकं मधुरं पथ्यं शीतलं रक्तपित्तघ्नं यादि सन्तर्पणम्। रा.नि.व.७। शल्लकीवृक्षे। वाजिपक्षिणि। बाज पाखी। मे.।

पालङ्की। स्त्री। कुन्दुरी। कुन्दुरुखोटी। अ.टी.भ.। उपोदिकायाम्। पुँई। पालङ्के। पालंग शाक।

पालघ्नः (घ्नः)। पुं। छत्राके। छाता, कौंड़क। अम.। जलढणे, छत्रातिच्छत्रे। श.र.।

पालनम्। क्ली। नवप्रसूतायाः गोः दुग्धे। गौंजला दूध। श.च.।

पालनिका (ल[लि]नी)। स्त्री। वायमाणायाम्। वल्ली लता। रा.नि.व.५। वा.चि.१अ.।

पालाशम्। क्ली। तेजपत्रे। रा.नि.व.६।

पालाशी। स्त्री। चीरीवृक्षे। र.मा.।

पालासः। पुं। पलाशवृक्षे। वै.निघ.।

पालिंहिरः। पुं। मण्डलिसर्पभेदे। बोड़ासाप विशेष। सु.कल्प.४अ.।

पालिः (ली)। स्त्री। कर्णलतायभागे। मे.। जलौकायाम्। कल्पितभोजने। हे.च.। कर्णरोग-विशेषे। कानेर पोतार रोग। पाली पञ्चविधा। "परिपोटस्तथोत्पात उन्मन्थो दुःख-वर्द्धनः। पञ्चमः परिलेही च कर्णपाल्या गदाः स्मृताः॥" तेषां लक्षणानि तत्तत्पर्य्याये द्रष्टव्यानि। चिकित्सा—अभ्यङ्ग-परिषेक प्रदेह-रक्तमोक्षणानि। (ली) श्मश्रुयुक्तस्त्रियाम्। हारा.। पाकपात्रे। चित्रकवृक्षे। वै.निघ.। परिमाणभेदे। पालि। विका.। प्रस्थपरिमाणे। हे.च.। आलवाले। च.द.। "यवमाषमयीं पालीं।"

पालिका। स्त्री। पाल्याम्। श.च.।

पालिधा। स्त्री। परिभद्रवृक्षे। (जयमङ्गलरसे)।

पालिन्दः। पुं। कुन्दुरुखोटौ, सल्लकी-निर्य्यासे। वै.निघ.।

पालिन्दा (न्दिः,न्दी) (न्धा,न्धिः,न्धी)। स्त्री। श्यामालतायाम्। प.मु.। च.सू.४अ.। कृष्णविहृति। अम.। सु.कल्प.१अ.। कुन्दुरुखोटौ। रा.नि.व.१२। अम.। भार्य्याम्। बांगनहाटी। श्वेतापराजितायाम्। वायमाणालतायाम्। वल्ली लता। वै.निघ.। मालविकाविहृतायाम्। वा.उ.३८अ.। कारवेल्ल्यां। करला। सु.चि.१७अ.।

पाली(लो)शोषः। पुं। कर्णरोगविशेषे। लक्षणं—"शिरास्थः कुरुते वायुः पालीशोषं तदाह्वयम्।" वा.उ.१७अ.।

पालीकुटः। पुं। चित्रकवृक्षे। वै.निघ.।

पालेवतः। पुं। द्वीपान्तरखर्जूरीवृक्षे। वै.निघ.।

पावकः। पुं। रक्तचित्रके। चित्रके। रा.नि.व.६। मे.। वै.निघ.२भ.ज्व.चि.। शुक्लाञ्जने। सूर्य्य-कान्तमणौ। वै.निघ.। कुसुम्भवृक्षे। रा.नि.व.४। अग्निमन्थवृक्षे। भल्लातकवृक्षे। विड़ङ्गे। सदाचारे। मे.। वैद्युताग्नौ।

पावकमणिः। पुं। सूर्य्यकान्तमणौ। वै.निघ.।

पावकमन्थनः। पुं। अग्निमन्थवृक्षे। वै.निघ.।

पावकारणिः। पुं। अग्निमन्थवृक्षे। प.मु.।

पावकाह्वः। पुं। अग्निमन्थे। वै.निघ.।

पावकोषा (न्)। पुं। सूर्य्यकान्तमणौ। वै.निघ.।

पावनम्। क्ली। कुष्ठौषधे। कूड़। रा.नि.व.१२। रुद्राक्षे। रा.नि.व.११। जले। मे.। चन्दने। वै.निघ.। गोमये। श.च.। पुं। चित्रके। सिल्लके। शिलारसे। विश्व.। पीतभृङ्गराजे। रा.नि.व.४। शङ्खे। वै.निघ.।

पावनध्वनिः। पुं। शङ्खे। रा.नि.व.९।

पावनी। स्त्री। तुलसीवृक्षे। रा.नि.व.१०। हरीतक्याम्। विश्व.। गोरोचनायाम्। नाग-वल्लीलतायाम्। व.निघ.।

पावशालिः। पुं। सूक्ष्मशालौ। सरु धान।

पावासः। पुं। क्षुद्रपणसे। वै.निघ.।

पाशः। पुं। कक्षे। जाले। विका.। अस्त्रभेदे।

पाशवपालनम्। क्ली। घासे। श.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाशी (इन्) । पुं । वरुणवृक्षे । अम. । रत्न.र. उद.चि.वह्निभल्लातकरसे ।

पाशुपतः (कः) । पुं । श्वेतरक्तवकपुष्पवृक्षे । रा.नि.व.५ । मे. । अगस्तिपुष्पवृक्षे । प.मु. । रा. नि.व.१० । महाबकुलवृक्षे । वै.निघ. ।

पाश्चात्याकरसम्भवम् । क्ली । शाम्भरलवणे । र.मा. । तत्पर्य्यायाः,—रोमकं रामलवणम् ।

पाषाणः । पुं । गन्धके । प.मु. । करञ्जोड़ि-पाषाणभेदे । वै.निघ.२भ.अ.सा.चि. धातक्यादि-मोदके । च.द.अ.रस.चि. । प्रस्तरे । अम. ।

पाषाणकदली । स्त्री । कदलीभेदे । काष्ठ-कदली । वै.निघ. ।

पाषाणकुट्ट(न्द)कः । पुं । पाषाणभेदके । पाथरकुचा । वै.निघ. ।

पाषाणगर्दभः । पुं । हनुसन्धिजक्षुद्ररोगे । गालूटा । निदानलक्षणे—"वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः । स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः ॥" मा.नि. । भा.म.४भ. । "हनुसन्धौ समुद्भूतं शीघ्रमल्परुजं स्थिरं । पाषाणगर्दभं विद्यात् बलासपवनात्मकम् ॥" सु.नि.१३अ. ।

पाषाणगैरिकम् । क्ली । गिरिसृत्तिकायाम् । गिरिमाटी । वै.निघ. ।

पाषाणजतु । क्ली । शिलाजतुनि । भैष. श्वीपदचि.रास्नाभ्रमण्डूरे ।

पाषाणभित् । पुं । पाषाणभेदे । पाथरचूर । र.मा. । कुलत्थे । (एरण्डसप्तके) । करञ्जोड़ि-पाषाणभेदे । वै.निघ. ।

पाषाणभेदः (कः) (नः) (दी (इन्) । पुं । (Coleus amboinicus. Syn. Coleus aromaticus.) स्वनामख्यातक्षुपे । पाथर-चुनीति लोके । च.सू.४अ. । पाथरकुचा, हिमसागर । हिं पाथरचुर, लोहाचूर । मं कं पाषाणभेदि । तें पिंड़िचेट्टु । तत्पर्य्यायाः,—अश्म-भेदः अश्मभित् अश्मघ्नः शीलाभेदः अश्मभेदकः श्वेता उपलभेदी उपलजित् शिलागर्भजः नगभित् । सा त्रिधा वटपत्रीशिलावल्क्षुद्रभेदेन । सा. गुणाः —मधुरः तिक्तः मेहघ्नः तृड्दाहमूत्रकृच्छ्रघ्नः शीतलः अश्मरीघ्नश्च । रा.नि.व.५ । "अश्मभेदो हिमस्निग्धः कषायो वस्तिशोधनः । भेदनो हन्ति दोषार्शो-गुल्मकृच्छ्राश्महृद्रुजः । योनिरोगान् प्रमेहांश्च प्लीहशूलव्रणानि च ॥" भा.पू.१भ.हृ.व. । आमहरः सञ्चितश्लेष्मणि अपस्मारे आक्षेपके हितः वातग्लानि-करश्च । अवशिष्टयोर्गुणाः स्वस्वपर्य्याये स्तम्याः ।

पाषाणरोगः । पुं । अश्मरीरोगे । च.द. अश्म.चि. ।

पाषाणवज्रकरसः । पुं । अश्मर्य्यधिकारे रसः । पारदः १भ. गन्धकः २भ. श्वेतपुनर्नवारसैः दिनं मर्दयित्वा भूधरयन्त्रे पचेत् । उद्धृत्य श्लक्ष्णं चूर्णयेत् । तुल्येन पाषाणभेदचूर्णेन यथाबलं मात्रा देया । रस.र. ।

पाषाणविघम् । क्ली । दारुमोचभेदे । दार्मुज । प.मु. ।

पाषाणसम्भववल्ली । स्त्री । प्रवाले । प्रवाल । वै.निघ. ।

पाषाणान्तकः । पुं । अश्मन्तकवृक्षे । आपटा इति लोके । रा.नि.व.९ ।

पाषाणी । स्त्री । परिमाणवीधक-पाषाणखण्डे । बाटखारा ।

पाहाड़ः (तः) । पुं । ब्रह्मदारुवृक्षे । पलाश-पिप्पुल । श्र.च. ।

पिकः । पुं । कोकिले । स्त्री । कोकिलायाम् । कोकिल पाखी । अम. ।

पिकदेवः
पिकप्रियः } पुं । आम्रवृक्षे । वै.निघ. ।

पिकप्रिया । स्त्री । महाजम्बूवृक्षे । रा.नि.व. ११ । कोकिलायाम् ।

पिकबन्धुः । पुं । आम्रवृक्षे । चिका. ।

पिकभक्षिका (क्षा) । स्त्री । भूमिजम्बूवृक्षे । वन जाम । रा.नि.व.११ ।

पिकमहोत्सवः । पुं । आम्रवृक्षे । वै.निघ. ।

पिकरागः । पुं । आम्रवृक्षे । रा.नि.व.११ ।

पिकवल्लभः । पुं । आम्रवृक्षे । भा. ।

पिकाङ्गः । पुं । चातकपक्षिणि । श्र.च. ।

पिकानन्दः । पुं । वसन्तकाले ।

पिकाक्षः । पुं । कोकिलाक्षे । कुलिआखाड़ा । रा.नि.व.२३ । रोचनीवनस्पतौ । श्र.च. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिकी। स्त्री। कोकिलायाम्।

पिकुरसः। पुं। मद्ये। वै.निघ.।

पिकेक्षणा। स्त्री। कोकिलाचक्षुषि। कुलेथाड़ा। रा.नि.व.४।

पिक्कः। पुं। करिपोते। भ.मा.।

पिङ्गम्। क्ली। श्लेष्मपित्तले। वै.निघ.। बालके। बाला। हरितालै। पुं। वनमूषिकै। रा.नि.व. १०।१३।१९। त्रि। पिङ्गलवर्णे।

पिङ्गकपिशा। स्त्री। तैलपायिकायां। तेलापोका। हे.च.।

पिङ्गचक्षुः। पुं। कुक्कुरे। हे.च.।

पिङ्गभासः। पुं। गौधेरकजातिभेदे। सु.कल्प. ८अ.। See कीटः। [रा.नि.व.७।

पिङ्ग(ल)मूलम्। क्ली। गर्ज्जरे। गाजर।

पिङ्गलम्। क्ली। रीतौ। पितल। रा.नि.व. १३। हरितालै। पुं। नकुलै। स्थावरविषभेदे। हे.च.। पेचकै। कुटुरे पेँचा। रा.नि.व.१९। उशीरे। राज्ञायाम्। वै.निघ.। मण्डलिसर्पविशेषे। सु.कल्प.४अ.। वानरे। त्रिका.। अग्नौ। पिङ्गलवर्णे।

पिङ्गलनामकः। पुं। शिलारसे। वै.निघ.।

पिङ्गललोहम्। क्ली। रीतौ। पितल। रा. नि.व.१३।

पिङ्गलसारे। क्ली। हरितालै।

पिङ्गला। स्त्री। शिंशपावृक्षे। शिशु गाछ। र.मा.। गोरीचनायाम्। रा.नि.व.१२। नकुल. १४अ.। राजरीतौ। पितलविशेष। रा.नि.व. १३। ज्योतिष्मतीलतायाम्। वै.निघ.। निर्विषनलौकायाम्। सु.सू.१३अ.। पक्षिभेदे। पिङ्गला पाखी। रा.नि.व.१९। कर्णिकायाम्। नाड़ीविशेष। हे.च.। सा च दक्षिणाखाधःस्था धनुर्वक्रा दक्षिणनासान्तं गता। (सारदातिलके)। "पिङ्गला सितरक्ताभा दक्षिणं पार्श्वमाश्रिता।" योगार्णवः।

पिङ्गलाक्षः। पुं। पिङ्गलाक्षपक्षिणि। वै.निघ.।

पिङ्गलिका। स्त्री। वकपक्षिणि। जटा.। मक्षिकाविशेषे। सु.कल्प.८अ.। हरितालै।

पिङ्गवर्णकम्। क्ली। गर्जरमूले। गाजरमूल। वै.निघ.।

पिङ्गसारः। पुं। हरितालै। रा.नि.व.१३।

पिङ्गस्फटिकः। पुं। गोमेदमणौ। तत्पर्य्यायाः —गोमेदः, राहुरत्नं, तमोयोनिः, स्वर्भानवः, पिङ्गस्फटिकः। गुणाः,—अम्लत्वं उष्णत्वं दीपन-पाचनत्वं वातविकारनाशित्वं धारणे पापनाशित्वञ्च। रा.नि.व.१३।

पिङ्गा। स्त्री। वंशे। वंशलोचने। रा.नि.व.६। शमीवृक्षे। र.मा.। हिङ्गुनि। मे.। गोरीचनायाम्। रा.नि.व.१२। हरिद्रायाम्। रा.नि.व.२३। रक्तवाहिनाड्याम्। वै.निघ.।

पिङ्गाणः। पुं। काचे। वै.निघ.।

पिङ्गाक्षः। पुं। मत्स्यविशेषे। पाङ्गाश गाछ। क्ली। स्वर्णे। पाका सोणा। मे.।

पिङ्गाक्षी। स्त्री। नीलीवृक्षे। मे.।

पिङ्गाक्ष्यः। पुं। पिङ्गाक्षमत्स्ये। श.र.।

पिङ्गाक्षः। पुं। पक्षिविशेषे। वम्. कालवटपक्षी। वै.निघ.।

पिङ्गाक्षः। पुं। विड़ाले। वै.निघ.।

पिङ्गी। स्त्री। शमीवृक्षे। प.मु.।

पिच(चि)ण्डः। पुं। उदरे। रा.नि.व.१८। पशुपृष्ठभागे। हे.च.।

पिचव्यः (व्या)। पुं, स्त्री। कार्पासे। हे.च.।

पिचिण्डिका। स्त्री। इन्द्रवस्तौ। पायेर डिम। हे.च.।

पिचिण्डिलः। त्रि। लम्बोदरे। हे.च.।

पिचुः। पुं। कार्पासाम्। रा.नि.व.४। कार्पासतूलके। अम.। तीलकवृक्षे। प.प्र.१ख.। कुष्ठरोगभेदे। मे.। सूईतैलविधिभेदे तैलाक्तपिचुधारणरूपे। तैलाक्तं तूलफाहा इति। भा.म.४भ. यौनिरो.चि.। क्ली। तूले। तूल। सु.सू.५अ.।

पिचुकः। पुं। मदनवृक्षे। काँटा मयना। प.मु.। पक्वकरीरजफलकार्पासे। कर्णपुष्पाख्यमहापुष्पे। नीलीत्पले। सु.चि.७अ.। साकुरण्डवृक्षे। वै.निघ.। अश्वविशेषे। मदनवृक्षे। कार्पासाम्।

पिचुतु(तू)लम्। क्ली। कार्पासे। त्रिका.।

पिचुमन्दः (मर्दः)। पुं। निम्बवृक्षे। निम् गाछ। रा.नि.व.९। सि.यो.सन्निपातज्व.चि.।

पिचुलः। पुं। भ्रातुकवृक्षे। झाऊ गाछ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस.। कार्पासवृक्षे। जलकाके। तिलकवृक्षे। हिज्जलवृक्षे। मे.। तूले। अ.टी.सा.।

पिचुली। स्त्री। सूच्यायाम्।

पिचुवर्त्तिः। स्त्री। तूलवर्त्त्याम्। तूलार्द्र वर्त्तिः। च.द.आश्रीतादिकारे।

पिच्चक(ट)म्। क्ली। वङ्गे। राङ्। प.मु.। रा.नि.व.१३। शीषके। मे.। [मे.।

पिच्चटकः। पुं। नेचरोगे। पिचुटी रोगः।

पिच्चिटः। पुं। अग्निप्रकृतिकीटविशेषे। सु. कल्प.८अ.। See कीटः।

पिच्चितम्। क्ली। अस्थिभङ्गविशेषे। हाड़ चेप्‌टे यांওয়া। तच्च पृथुतां गतमल्पश्लीक्ष्णम्। सु. नि.१५अ.। सन्धीव्रणभेदे। "प्रहारपीड़नाभ्यान्तु यदङ्गं पृथुतां गतम्। सास्थि तत्पिच्चितं विद्यात् मज्जरक्तापरिप्लुतम्॥" सु.चि.२अ.।

पिच्छः(कः)। पुं। मीचरसे। अस.। लाङ्गुले। मे.। क्ली। मयूरपुच्छे। अस.।

पिच्छनम्। क्ली। अत्यन्तपीड़ने। च.सू.१८अ.।

पिच्छपादी। वि। तन्नामकपादरीगाक्रान्ते (अश्वे)। रीमान्तः शूयते यस्य समन्ताद्वैव पच्यते। क्लेदश्च पिच्छिली यस्य पिच्छपादीति तं विदुः॥" जन.द.३९अ.।

पिच्छभारः। पुं। मयूरपुच्छे। वै.निघ.।

पिच्छलः। पुं। मीचरसे। आकाशवल्ल्याम्। बहुवारवृक्षे। वै.निघ.।

पिच्छलच्छदा (दला)। स्त्री। उपोदिकायां। पूँই গাছ। वदरीवृक्षे। विका.।

पिच्छलत्वक्। पुं। नागरङ्गवृक्षे। स्त्री। नागरङ्गवल्कले। वै.निघ.। [वै.निघ.।

पिच्छलवोजः। पुं। वनपणसे। आनारस।

पिच्छला। स्त्री। शूलीलतायै। रा.नि.व.८। शाल्मलीवृक्षे। आकाशवल्ल्याम्। वै.निघ.। उपोदिकायां। विका.।

पिच्छवाणः। पुं। रणगृध्रे। श्येन पाखी। रा.नि.व.१९।

पिच्छा। स्त्री। मीचरसे। प.मु.। भैष. स्त्रीरो.चि.मधुकादिलेहः। वा.उ.३४अ.पुष्यानुगचूर्णे। शिंशपावृक्षे। श.च.। मस्तके। भक्तमस्तके। कीपे। पूगवृक्षे। कदलीवृक्षे। मे.। सर्पविषे। लालायाम्। शाल्मलीवृक्षे। घीले। वै.निघ.। अश्वपादरोगे। ज.द.। कतकवृक्षे। आकाशलतायाम्। वै.निघ.।

पिच्छावस्तिः। स्त्री। पिच्छिलवस्तौ। वा. चि.१अ.।

पिच्छाद्रुः। पुं। शाल्मलीवृक्षे।

पिच्छितिका। स्त्री। शिंशपावृक्षे। शिशु गाछ। श.च.।

पिच्छिलः। पुं। पिण्डालुके। प.मु.। बहुवारवृक्षे। भा.। क्ली। समस्तदधनि। वै.निघ.। सरसव्यञ्जनादौ। भ.। स्निग्धमूपादौ। भानुदत्तः। समस्तभक्ते। सजलव्यञ्जने। नीलकण्ठः। चि.। भक्तसमस्तयुक्ते। अस.रा.।

पिच्छिलकः। पुं। धन्वनवृक्षे। धामना गाछ। रा.नि.व.९। शाल्मलीवृक्षे। वै.निघ.।

पिच्छिलगुणकर्म्म। क्ली। पिच्छिलद्रव्यस्य गुणकर्म्मणि। तच्च बल्यं सन्धानं श्लेष्मलं गुरु। सु.।

पिच्छिलच्छदा। स्त्री। उपोदक्याम्। पूँইশাক। प.मु.।

पिच्छिलत्वक्। पुं। धन्वनवृक्षे। धामना गाछ। प.मु.। र.मा.। नागरङ्गवृक्षे। विका.।

पिच्छिलदला। स्त्री। वदर्य्याम्। कुल गाछ। उपोदिकायाम्।

पिच्छिलवस्तिः। स्त्री। निरूहवस्तिभेदे। "वदरैरावती शैलु-शाल्मलीपुष्पजाङ्कुराः। क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः। अजीरभेषजधिरैर्युक्ता देया विचक्षणैः। माचा पिच्छिलवस्तीनां पलैर्द्वादशभिर्मता॥" भा.।

पिच्छिलफलम्। क्ली। डिण्डिशफले। ढेँড়শ। तद्गुणाः—बलपुष्टिकारित्वं प्रमेहाश्मपित्तविषदोषनाशित्वञ्च।

पिच्छिलसारः। पुं। मीचरसे। रा.नि.व.८।

पिच्छिला। स्त्री। द्वयिकाख्यायाम्। विछाती। रा.नि.व.५। पीतशिंशपावृक्षे। शिशु गाछ। र.मा.। कच्वां। कचु। श.च.। अतस्यां। मशिना। रा.नि.व.१६। शाल्मलीवृक्षे। उपोदिकायाम्। मे.। शूलीलतायै। रा.नि.व.४। द्वचभेदे। विहिदाना इति केचित्। कौकिलाक्षे। कुलेखाड़ा। रा.नि.व.४।

पिच्छोड़कम्। क्ली। नेवपिच्छटे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिञ्जः। पुं। कर्पूरे। भीमसेनी कर्पूर। रा.नि.व.१२। क्ली। बले। मे.।

पिञ्जकम्। क्ली। हरितालै। र.सा.सं.।

पिञ्जटः। पुं। पिञ्चटरोगे। पिचुटी। भ.र.।

पिञ्जनम्। क्ली। तूलधनुषि। तूलो धोना। विका.।

पिञ्जरम्। क्ली। नागकेशरपुष्पे। रा.नि.व.९। अस्थिपञ्जरे। अ.टी.। श्यामाके। हरितालै। अम.। स्वर्णे। मे.। त्रि। पीतवर्णे।

पिञ्जरकम्। क्ली। अतस्याम्। मशिना। प.मु.। हरितालै। रा.नि.व.१३।

पिञ्जलम्। क्ली। हरितालै। प.मु.। कुशपर्वणि। धरणी.। पुं। जलवेतसे। वै.निघ.।

पिञ्जा। स्त्री। हरिद्रायाम्। तूलके। मे.।

पिञ्जानम्। क्ली। सुवर्णे। रा.नि.व.१३।

पिञ्जिका। स्त्री। तूलनालिकायां। पौंइज। विका.।

पिञ्जूलम्। क्ली। तूलवर्त्तिकायाम्। वै.निघ.।

पिञ्जूषः। पुं। कर्णगूथे। हे.च.।

पिञ्जेटः। पुं। नेचमले। पिचुटी। भ.र.।

पिटः(क)। पुं। विस्फोटके। मे.।

पिट(टि)का। स्त्री। पिड़कायाम्। रा.नि.व.२०। मसूरिकायाम्। वैद्यकम्।

पिटङ्काकी। स्त्री। कटुवृन्दावने। वै.निघ.।

पिटङ्काश्वः। पुं। मत्स्यभेदे, पर्व्वतीर्म्मिमत्स्ये। भ.कल्प.।

पिटङ्गोटिः (की)। स्त्री। इन्द्रवारुणीलतायाम्। प.मु.। [र.।

पिट्टकम् (का)। क्ली, स्त्री। दन्तकिट्टके। भ.

पिठः। पुं। पीड़ायाम्। देवनले। वै.निघ.।

पिठरम्। क्ली। नागरमुस्तके। मन्थनदण्डे। मे.। पुं। स्थाल्याम्। अम.। च.सू.१५अ.।

पिड़कः (का)। पुं, स्त्री। व्रणविशेषे। फुरकुणि। लक्षणं—"उत्पद्यतेऽल्परुक्शीफा चिप्रघाप्युपशाम्यति। पायुन्तदेशे पिड़का सा ज्ञेयान्या भगन्दरात्॥ भगन्दरा तु विज्ञेया पिड़काती विपर्य्ययात्। पायोः स्याद्व्यङ्गुले देशे गूढ़मूला सरुग्ज्वरा॥" सु.नि.४अ.। प्रमेहजन्यविस्फोटकभेदे, प्रमेहपीड़कायाम्। शराविकादौ। सा दशधा। See प्रमेहपिड़का। कुष्ठपिड़कायाम्, यवप्रख्यादौ। ताः पीड़श। मा.नि.। तासां लक्षणानि पर्य्याये द्रष्टव्यानि।

पिड़कालिका। स्त्री। नेचमले। च.र.पि.नि.।

पिड़िकापत्रः। पुं। वृक्षाम्लाके। पिड़िंशाक।

पिण्डः। पुं। गोपके। निशादल। प.मु.। गर्भे। करिगण्डमूले। अम.। शरीरे कर्दमे। विका.। देहे। जवाहचे। सिल्हके। बले। मे.। मदनवृक्षे। रा.नि.व.११। क्ली। लौहे। प.मु.। बीलनामगन्धद्रव्ये। गन्धबोल। रा.नि.व.९। शरीरे। रा.नि.व.८।

पिण्डकः। पुं। पिण्डमूलके। पिण्डालौ। रा.नि.व.७। गुणाः—"पिण्डकी वातलः श्लेष्मी ग्राही हृद्यो महागुरुः।" अत्रि.१६अ.। शिलारसे। अम.। क्ली। गन्धबीले। तीक्ष्णलौहे। रा.नि.व.१३। नवनीते। अन्ने।

पिण्डकन्दः। पुं। पिण्डालौ। रा.नि.व.७।

पिण्डका। स्त्री। मसूरिकायाम्। वै.निघ.।

पिण्डखर्ज्जूरः। पुं। खनामख्यातवृक्षे। पिण्डिखेजूर गाछ। प.मु.।

पिण्डखर्ज्जूरिका (री)। स्त्री। द्वीपादिविदेशजातपृथुमिष्टफलखर्ज्जूरीवृक्षे। पिण्डिखेजूर। तत्पर्य्यायाः,—राजजम्बूः पिण्डीफलमुद्गरिका दीर्घा सपिण्डा मधुरस्रवा फलपुष्पा स्वादुपिण्डा हयभक्ष्या। मे.। सा द्विधा पिण्डो राजपिण्डो चेति। तयोर्गुणाः—फलं गौल्यं हिमं स्वादु गुरु दाह-पित्त-श्वासघ्नं वीर्य्यवृद्धिकरम् अग्निमान्द्यकरं विषघ्नञ्च। रा.नि.व.११। See खर्ज्जूरी।

पिण्डगुड़ूचिका (ची)। स्त्री। कन्दगुड़ूच्याम्। रा.नि.व.३। [टी.र.।

पिण्डगो(ड़)सः। पुं। मत्स्यबीले। भा.। अ.

पिण्डतगरः। पुं। तगरपुष्पे। वै.निघ.।

पिण्डतैलम्। क्ली। वातरक्ताधिकारे तैलम्। "समधूच्छिष्टसञ्छिष्टं सस्यर्ज्जरसशारिवम्। पिण्डतैलं तदभ्यङ्गाद्वातरक्तरुजापहम्॥ कटुतैलं १ श. मम,-मञ्जिष्ठा, धूना, अनन्तमूल प्रत्येक १ छटाक्। रस.र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिण्डतैलकः। पुं। सिल्हके। शिलारस। रा.नि.व.१२।

पिण्डपादः(दः)। पुं। हस्तिनि। विका.।

पिण्डपुष्पम्। क्ली। अशोकपुष्पे। जवापुष्पे। वै.निघ.। पद्मपुष्पे। मे.। तगरपुष्पे। श.र.। पुं। दाड़िमवृक्षे। विका.। [श.मा.।

पिण्डपुष्पकः। पुं। शाकविशेषे, वास्तूके।

पिण्डफला। स्त्री। अलाव्याम्। प.मु.। सु.चि.१८अ.। "आलिपर्येत्यिण्डफलार्कभार्गीः।" कटुतुम्ब्याम्। त्रि२ला उ। जटा.।

पिण्डमुस्तकः (का)। पुं, स्त्री। नागरमुस्तायाम्। रा.नि.व.६।

पिण्डमूल(क)म्। क्ली। पञ्चविधमूलकान्यतममूलके। गर्जरमूलके। वाटुला मूला। तत्पर्य्यायाः,—गर्जरं गजाख्यं पिण्डकं। गुणाः—कटूष्णं गुल्मवातघ्नञ्च। रा.नि.व.७।

पिण्डयोनिः। स्त्री। योनिरोगभेदे। च.द. योनिरो.चि.।

पिण्डरोहिण(त)कः। पुं। विकङ्कतवृक्षे। वैंइचि गाछ। रा.नि.व.९।

पिण्डवीजः (कः)। पुं। (Oleander oborum.) कर्णिकारवृक्षे। रा.नि.व.९।

पिण्डशर्करा। स्त्री। खटीशर्करायां। फूलखड़ि। वै.निघ.।

पिण्डस्वेदः। पुं। पिण्डेन स्वेदे। वा.उ.२८अ.।

पिण्डहरिद्रा। स्त्री। ग्रन्थिहरिद्रायाम्। गिँठा हरिद्रा। वै.निघ.।

पिण्डा। स्त्री। कस्तूरीभेदे। मृगनाभिविशेष। सा कुलत्थिकायाः किञ्चित् स्थूला। रा.नि.व.१२। हरिद्रायाम्। वंशपत्रीवृक्षे। भा.। खर्जूरीवृक्षे। पिण्डीखेजुर। पिण्डायसे। पिण्डलोह। रा.नि.व.१३।

पिण्डाञ्जनम्। क्ली। अञ्जनविशेषे। वा.उ. १४ अ.।

पिण्डातः। पुं। सिल्हके। शिलारस। र.मा। गन्धरसे। रस.र. पिप्पल्याद्यलौहे।

पिण्डापा। स्त्री। नाड़ीहिङ्गौ।

पिण्डाभा। स्त्री। शर्करायां। वै.निघ.।

पिण्डाभ्रम्। क्ली। कर्कायाम्। श.मा.।

पिण्डामृता। स्त्री। कन्दगुडूच्याम्। वै.निघ.।

पिण्डाम्लम्। क्ली। चाङ्गेरीलिकुचाम्लवेतसजम्बीर-कर्पूर-नारङ्ग-फलषाड़वसमभागमिश्रिते। "चाङ्गेरीलिकुचाम्लवेतसयुतं जम्बीरकर्पूरकं नारङ्गं फलशाड़वस्त्विति तु पिण्डाम्लञ्च बीजाम्लकम्।" रा.नि.व.२२। [१३।

पिण्डायसम्। क्ली। तीक्ष्णलौहे। रा.नि.व.

पिण्डारः। पुं। विकङ्कतवृक्षे। वैंइचि गाछ। वै.निघ.२भ.ज्व.। वृक्षविशेषे। पिटुलि गाछ। मे.। कृष्णमदनवृक्षे। क्ली। (Trewia mudiflora.) फलशाकविशेषे। हिं पिण्डारा। फलगुणाः—"पिण्डारं शीतलं बल्यं पित्तघ्नं रुचिकारकं। पाके लघु विशेषेण विषघ्नालिकरं लघु॥" भा.पू.१भ.शा.व.ज्योतिष्मतीनस्ये।

पिण्डालः (लुः)। पुं। स्वनामख्यातकन्दशाकविशेषे। चुवड़ि आलु, गोल आलु, हाति-खोजा आलु। मं पेडालु। कं बिलियहेण्डल। उत्. घरा अलु। तत्पर्य्यायाः,—ग्रन्थिलः पिण्डकन्दः ग्रन्थिः रोमशः रोमकन्दः रोमालुः ताम्बूलपत्रः लालाकन्दः रोमालुः। गुणाः—मधुरः शीतः मूत्रकृच्छ्रघ्नः दाहशीर्षमेहघ्नः वृष्यः गुरुः सन्तर्पणः। रा.नि.व.७। "पिण्डालुकः श्लेष्मकरः शुक्रवृद्धिकरो मृदुः।" अवि.१६अ.। कन्दगुडूच्यां। रा.नि.व.३।

पिण्डालु(लू)कम्। क्ली। वृत्तालुके। गोल आलू। गोँ आलू। हिं सुथनी। गुणाः—गुरु कफघ्नं वातकोपनञ्च। राज.। शाकं सर्षपशाकगुणम्। च.सू.२७अ.।

पिण्डासवः। पुं। यवख्यासवविशेषे। तत्साधनविधिः—"प्रास्थिकीं पिप्पलीं पिष्ट्वा गुड़ं मध्यं विभीतकम्। उदकप्रस्थसंयुक्तं यवपक्वं निधापयेत्। तस्मात्पलं सुजातात्तु सलिलाञ्जलिसंयुत। पिबेत्पिण्डासवो ह्येषः.....।" च.चि. १९अ.। पिप्पलीकल्कः २ श. गुड़ः २ श. मधु २श. वारि ४ श. एकत्र कलसस्थं कृत्वा त्रिःसप्तकं मासं वा यवपक्वमध्ये स्थाप्यम्।

पिण्डाह्वम्। क्ली। तगरपादुके। र.सा.सं.।

पिण्डाह्वा। स्त्री। नाड़ीहिङ्गौ। रा.नि.व.६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिण्डिः। स्त्री। पिण्डिकायाम्। पायेर डिम। अ.टी.र.।

पिण्डिकः। पुं। तुरुस्कैतिख्याते गन्धद्रव्यभेदे। शिलारस।

पिण्डिका (ण्डी)। स्त्री। श्वेतास्थिकायाम्। रा.नि.व.४। इन्द्रवल्ली। "तन्मध्ये पिण्डिका तथा।" रा.नि.व.१८। तालवृक्षे। वै.निघ.। अलाबाम्। पिण्डीतगरे। पिण्डीखर्ज्जूरे। मे.। नेत्राभिष्यन्दरोगे नेत्रकर्म्मभेदे। तदुक्तं—"युक्तभेषजकल्कस्य पिण्डी कवलमात्रया। वस्त्रखण्डेन सम्बद्धा नेत्राभिष्यन्दनाशिनी। स्निग्धोष्णा पिण्डिका यावत् पित्तं सा शीतला मता। रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरुक्तो बुधैरयमिति॥" भा.। पिण्डे। सा.कौ.अभमारणे।

पिण्डिकोद्वेष्टनम्। क्ली। जान्वधो जङ्घा मांसपिण्डस्य दण्डादिपीड़नेनेव वेदनायां। पायेर डिमे वेदना। मा.नि.।

पिण्डितः (कल्कः)। पुं। शिलारसे। प. मु.। See सिल्हकः। रा.नि.व.१२। क्ली। कांस्यधातौ। वै.निघ.।

पिण्डितैलम्। क्ली। शिलारसे। वै.निघ.।

पिण्डिनी। स्त्री। गिरिकर्णिकायाम्। अपराजिता। रा.नि.व.२३।

पिण्डिरिका। स्त्री। मञ्जिष्ठायाम्। तण्डुलीयके। वै.निघ.।

पिण्डिला। स्त्री। कर्कटीभेदे, गोडुम्बायाम्। गोमूक। श्र.च.।

पिण्डी। स्त्री। पिण्डीतगरे। अलाबौ। पिण्डखर्ज्जूरे।

पिण्डीतकः। पुं। कृष्णमदने। कालमयना। सु.चि.१७.२५अ.। मदनवृक्षे। रा.नि.व.८। शि. यो.कृर्दि.चि.। भा.म.४भ.गर्भचि.। फणिज्झकवृक्षे। विश्व.। क्ली। पिण्डीतगरे। तगरपादुका। विश्व.।

पिण्डीतकफलम्। क्ली। कृष्णमदनफले। पाण्डुवर्णमदनफले। सु.चि.२५अ.। मरुवकफले। वै.निघ.।

पिण्डीतगरः (कः)। पुं, क्ली। तगरपुष्पविशेषे। तगरपादुका। कीड़ृशे पिण्डीतगरनाम्नि प्रसिद्धः। विका.। रा.नि.व.१०। रस.र.विष. चि.। [९।

पिण्डीतरुः। पुं। महापिण्डीवृक्षे। रा.नि.व.

पिण्डीपुष्पः। पुं। अशोकवृक्षे। रा.नि.व.१०।

पिण्डीरः। पुं। दाड़िमवृक्षे। विका.। समुद्रफेने। अ.टी.रा.। नकुल.१३अ.।

पिण्डोड्भवा। स्त्री। सुरायाम्। वै.निघ.।

पिण्डोलिः। पु। उष्ट्रे। वै.निघ.। चि। मुक्तसमुज्झिते। हे.च.।

पिण्या (का)। स्त्री। ज्योतिष्मतीलतायाम्। लता फट्‌की। वन उच्छे। प.मु.। वै.निघ.।

पिण्याकः। पुं, क्ली। तिलकल्के। खलि। तैलकिट्टे। तिलकुटो। रा.नि.व.१६। "तिलादीनां निष्पीड़ितः कल्क उद्धृततैलस्तिलादिपिण्डः।" हेमाद्रिः। च.सू.२७अ.तैलव्यापद्व्यवाय्याम्। गुणाः —ग्लानिकरो रूक्षः विष्टम्भी दृष्टिविकारकृच्च। वा.सू.६अ.। सिल्हके। शिलारस। रा.नि.व.१२। हिङ्गौ। कुङ्कुमे। तैलपर्ण्याम्। लवणखोटी। श्लीलकन्दे। च.द.ग्रन्थि.चि.।

पितामहः। पुं। सुञ्जवृक्षे। मूँज। पितुः पितरि। वै.निघ.।

पितृग्रहः। पुं। बालरोगभेदे। भूतोन्मादग्रहविशेष। तच्चिह्नलक्षणं—"प्रेतानां स दिशति संस्तरेषु पिण्डान् शान्तात्मा जलमपि चापसव्यवस्त्रः। सांसेषु स्निग्धगुड़पायसाभिकामस्तृप्तो भवति पितृग्रहाभिजुष्टः॥" मा.नि.। "रौमहर्षी सुहृर्भमिः।" वा.उ.३अ.।

पितृजः। त्रि। शरीरे पितुर्जातेषु केशश्मश्रुनखदन्तास्थिस्नायुधमनीषु। च.शा.३अ.।

पितृतर्पणम्। क्ली। तिले। रा.नि.व.१६।

पितृप्रसूः। स्त्री। सायङ्काले। अम.।

पितृप्रियः। पुं। मार्कवे। भीमराज। रा.नि.व.४। स्त्री। अगस्त्यवृक्षे। भृङ्गराजे। कालशाके। रा.नि.व.२३।

पितृभोजनः। पुं। माषे। माष कलाय।

पित्तम्। क्ली। गोरोचनायां। च.द.उन्मा.चि.। "सपित्तं स्थितमञ्जनं।" (Fel.) Gall or bile. पाचकाग्न्यपरनामकशरीरस्थतेजोधातौ। पित्त। हिं पीत् अफ्रा। तत्पर्य्यायाः,—मायुः,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पलाग्निः, पललज्वरः, तेजः, तिक्तधातुः, उष्मा, अग्निः, अमलः। पित्तस्य स्वरूपं यथा—"पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तमम्। सरं कटु लघु स्निग्धं तीक्ष्णमम्लन्तु पाकतः॥" भा.। प्रकोपगुणाः—"पित्तञ्च तिक्तास्लरसञ्च सारकं चोष्णं द्रवं तीक्ष्णमिदं मधौ बहु। वर्षात्यकाले शरदभ्रराचके मध्यन्दिनेऽन्नस्य जरे च कुप्यति॥" रा.नि.व.२१। "पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च। उष्णं कटुरसञ्चैव विदग्धाम्लमेव च। तदुष्णैरुच्चकाले च मध्यान्ते च विशेषतः। मध्याह्ने चार्द्धरात्रे च जीर्य्यत्यन्ने च कुप्यति॥" सु.सू.२१अ.। "सर्व्वं पित्तमपस्मारकुष्ठदुष्टव्रणापहम्। चक्षुष्यं कटुतीक्ष्णोष्णसुन्मादक्लमिनाशनम्॥" राज.। तच्च पाचकरञ्जकसाधकालोचकभ्राजकभेदेन पञ्चविधमधिष्ठानभेदतः यथाक्रमं अग्न्याशययकृत्प्लीहहृदयत्वक्चक्षुर्व्वशरीरेषु तिष्ठति। एतेषाञ्च कर्म्माणि—"पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम्। रसमूत्रपुरीषाणि विरेचयति नित्यशः। रञ्जकं नाम यत्पित्तं तदसं शोणितं नयेत्। यत्तु साधकसंज्ञं तत् कुर्य्याद्बुद्धिं धृतिं स्मृतिम्। यदालोचकसंज्ञं तत् रूपग्रहणकारणम्। भ्राजकं कान्तिकारि स्नेहपाभ्यङ्गादिपावकम्॥" भा.। पित्तं पञ्चात्मकं तच्च पक्वामाशयमध्यगं। पञ्चभूतात्मकत्वेऽपि यत्तेजसगुणोदयात्। त्यक्तं द्रवत्वं पाकादिकर्म्मणानलसंज्ञितं। पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा। तत्स्थमेव पित्तानां शेषाणामप्यनुग्रहं। करोति बलदानेन पाचकं नामतः स्मृतम्। आमाशयाच्चितं पित्तं रञ्जकं रसरञ्जनात्। बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात्। साधकं हृदृतं पित्तं रूपालोचनतः स्मृतम्। दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात्त्वचम्॥" वा.। See अग्निः। पित्तप्रकृतिलक्षणम्—अकाले केशशुक्लतागौरवर्णताघर्म्मादिषु। यथा—"गौरातिपिङ्गः सुकुमारमूर्त्तिः प्रीतः सुशीतो मधुपिङ्गनेत्रः। तीक्ष्णोऽपि क्रोऽपि चणभङ्गुरश्च वासी सदुर्गावमलोमकं स्यात्। गौल्यप्रियस्तिक्तरसानुभोजी द्वेषी च तीक्ष्णे च नवोष्णसेवी। स्तुतिप्रियो दन्तविगुद्धवर्णो ज्ञातः स पित्तप्रकृतिर्मनुष्यः॥" अत्रि.५अ.। "पित्तप्रकृतिकी लोकी याटशीऽथ निगद्यते। अकालपलितो गौरः क्रोधी खेदी च बुद्धिमान्। बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति। एवंविधो भवेद्यस्तु पित्तप्रकृतिको नरः॥" भा.पू.१भ.।

पित्तकफज्वरः। पुं। पित्तश्लेष्मज्वरे।

पित्तकरः (कृत्)। वि। पित्तजनकद्रव्ये, वंशकरीरादौ।

पित्तकासः। पुं। पित्तजन्यकासरोगे। लक्षणं—"वरी विदाहज्वरवक्त्रशीर्षैरभ्यर्दितस्तिक्तमुखस्तृषार्त्तः। पित्तेन पीतानि वमेत्कटूनि कासेन्न पाण्डुः परिदह्यमानः॥" मा.नि.।

पित्तघ्नम्। क्ली। घृते। मधुरतिक्तकषायद्रव्यमात्रे। वि। पित्तनाशके शीतमृदुपिच्छिलगुणत्वात्। सु.सू.४२अ.।

पित्तघ्नी। स्त्री। गुडूच्याम्। भ.च.।

पित्तज्वरः। पुं। पित्तजन्यज्वरे। लक्षणं—"वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः। कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते। प्रलापी वक्त्रकटुता मूर्च्छादाहौ मदस्तृषा। पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च॥" निदा.।

पित्तद्रावी (इन्)। पुं। मधुरजम्बीरवृक्षे। रा.नि.व.११। त्रि। पित्तद्रवकारिणि।

पित्तधरा। स्त्री। षष्ठ्यां शारीरकलायां, ग्रहण्याम्। ग्रहणी। "या चतुर्विधमन्नपानमुपयुक्तमामाशयात् प्रच्युतं पक्वाशयोपस्थितं धारयति। सु.शा.४अ.। एषैव ग्रहणीत्युच्यते। "षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता। पक्वामाशयमध्यस्था ग्रहणी परिकीर्त्तिता॥" सु.उ.४०अ.।

पित्तनाड़ी। स्त्री। दन्तमूलगतरोगे। पित्तजन्यनाड़ीव्रणे। उभयलक्षणम्—"पित्तात्तृष्णाज्वरकरी परिदाहयुक्ता पीतं स्रवत्यधिकसुष्णमहःसु चापि।" मा.नि.।

पित्तपाण्डुः। पुं। पित्तजन्यपाण्डुरोगे। लक्षणं—"पीतमूत्रशकृन्नेत्री दाह-तृष्णा-ज्वरान्वितः। भिन्नविट्कोऽतिपीताभः पित्तपाण्डुमयी नरः॥" मा.नि.।

पित्तप्रकृतिः। वि। पित्ताधिकधातुविशिष्टजन्तौ। स तु स्वेदनो दुर्गन्ध-पीत-शिथिलाङ्ग-स्रास्यनख-नयन-तालु-जिह्वोष्ठ-पानिपादतलो दुर्भगो वलीपलितखालित्यजुष्टो बहुभुग्गुणद्वेषी चिप्रकोपप्रसादी मध्यमबलोमध्यमायुश्च भवति। "मेधावी निपुणमतिः प्रकृष्टवक्ता तेजस्वी समितिषु दुर्निवारवीर्य्यः। सुप्तः सन् कनक-पलाश-कर्णिकारान् सम्पश्येदपि च हुताश-विद्युदुल्काः॥ न भयात्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रणमेदनतेष्वमृदुः प्रणतेष्वपि सान्त्वदानरुचिः । भवतीह सदा व्यथितास्य गतिः स भवेदिह पित्त कृतप्रकृतिः ॥ भुजङ्गीलूक-गर्ग्य-यक्ष-मार्जार-वानराः । व्याघ्रार्क्षनकुलोलूकाः पैत्तिका जन्तवः स्मृताः ॥"

पित्तप्रकोपी । त्रि । पित्तवर्द्धके पानेऽन्ने च, यथाक्रमं तक्रसुरादिके मांसादिके चेति । भा.अस्व. पि.चि. । "क्रोधशोकभयकामायासोपवासविदग्ध-मैथुनोपगमनकटूम्ललवणतीक्ष्णोष्णलघुविदाहितिल-तैलपिण्याककुलत्थसर्षपातसीहरितशाकगोधामत्स्या-जाविकमांस-दधि-तक्रकूर्चिका-मस्तु-सौवीरकसुरा-विकाराम्लफलकटूरार्कप्रभृतिभिः पित्तस्प्रकोपमाप-द्यते ।" सु.सू.२१अ. ।

पित्तप्रवर्त्तनम् । क्ली । ऊर्द्धाधोमार्गेण पित्त-निर्गमे ।

पित्तभेषजम् । क्ली । मसूरे । वै.निघ. ।

पित्तरक्तम् (शोणितम्) (त्तास्रम्) । क्ली । रक्तपित्तरोगे । रा.नि.व.२० ।

पित्तरेताः । त्रि । पित्तभूयिष्ठशुक्रे । रस.र. मू.घा.चि. ।

पित्तरोगः । पुं । पित्तकोपरोगे ।

पित्तरोहिणी । स्त्री । पित्तजन्यगलरोगे । लक्षणम्—"चिप्रोद्गमा चिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तता स्यात् ।" सु.नि.१६अ. ।

पित्तलम् । क्ली । हरितालं । प.मु. । भूर्जपत्रे । श.मा. । खनामख्याततास्यशब्दयोरुपधातौ । पितल, काँचा पितल । हिं पीतरी, काँची पीतरी । तत्पर्य्यायाः,—आरकूटं, रीतिः, रीती, पतिकावेरं, द्रव्यदारु, मिश्रं, आरः, क्षुद्रसुवर्णं, सिंहलं, पीतनकं, लोहितकं, पिङ्गलं, पिङ्गलोहं, पीतकं । राजरीति-ब्रह्मरीति-भेदात्तत् द्विविधं । "राजरीतिः ब्रह्मरीतिः कपिला पिङ्गलापि च । रीतिरप्युपधातुः स्यात् तास्रस्य यशदस्य च ॥ पित्तलस्य गुणा ज्ञेया स्वयोनिसदृशा जनैः । संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः ॥" गुणाः —"रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे । शोधनं पाण्डुरोगघ्नं कृमिघ्नं नातिलेखनम् ॥" भा.पू.१भ.धा.व. । अस्य मारणं शोधनञ्च तास्रवत् ज्ञेयम् । र.सा.सं. । त्रि । पित्तयुक्ते । पित्तला । स्त्री । शालपर्णाम् । रा.नि.व.४ । जलपिप्पल्याम् । नी. । पित्तजयोनिव्यापद्विशेषे ।

पित्तवर्गः । पुं । पञ्चविधपित्तेषु । तानि च मत्स्यागवाश्वरुरुवर्हिजानि । मतान्तरे वाराह-च्छागमाहिषमात्स्यमायूरजानि । "पित्तं पञ्चविधं मत्स्यागवाश्वरुरुवर्हिजम् ।" इति । र.सा.सं. । "वाराह-छाग-माहिष-मात्स्य-मायूरपित्तजमिति ।" मतान्तरम् । [निघ. ।

पित्तवल्लभा । स्त्री । कृष्णातिविषायाम् । वै.

पित्तविदग्धदृष्टिः । पुं । दृष्टिरोगविशेषे । लक्षणं यथा—"पित्तेन दुष्टेन गतेन दृष्टिं पीता भवेद्यस्य नरस्य दृष्टिः । पीतानि रूपाणि च तेन पश्येत् स वै नरः पित्तविदग्धदृष्टिः ॥ प्राप्ते तृतीयं पटलन्तु दोषे दिवा न पश्येन्निशि वीक्षते च । रात्रौ स शीतानुगृहीतदृष्टिः पित्ताल्पभावात् सकलानि पश्येत् ॥" मा.नि. ।

पित्तवि(वी)सर्पः । पुं । पित्तजन्यविसर्परोगे । भा. । लक्षणं—"पित्ताद्रुतगतिः पित्तज्वरलिङ्गो-ऽतिलोहितः ।" मा.नि. ।

पित्तव्याधिः । पुं । पित्तजन्यरोगे । भा. ।

पित्तशूलम् । क्ली । पित्तजन्यशूलरोगे । लक्षणं —"तृष्णादाहरतिस्वेदकटूम्लवमनोत्तरम् । शूलं शीतसमप्रार्थं पैत्तिकं लक्षयेद्बुधः ॥" मा.नि. । "पैत्ते तु शूले वमनं पयोऽम्बुरसैस्तथेक्षोः सपटोल-निम्बैः । शीतावगाहाः पुलिनाः सवाताः कांस्या-दिपात्राणि जलप्लुतानि ॥ गुडः शालिर्यवाः क्षीरं सर्पिःपानं विरेचनं । जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम् ॥" च.द. ।

पित्तश्लेष्मज्वरः । पुं । पित्तकफाधिक्यज्वरभेदे । लक्षणं—"क्लिष्टतिक्तास्यता तन्द्रा मोहः कासो-ऽरुचिस्तृषा । मुहुर्दाही मुहुः शीतं पित्तश्लेष्म-ज्वराकृतिः ॥" मा.नि. ।

पित्तश्लेष्मोल्वणः । पुं । पित्तश्लेष्माधिक-सन्निपातविशेषे । लक्षणं यथा,—पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति । अन्तर्दाही बहिःशीतं तस्य तृष्णा प्रवर्द्धते ॥ तुद्यते दक्षिणं पार्श्वं सुरः-श्लेष्मगलग्रहः । छर्दति श्लेष्मपित्तञ्च कृच्छ्रात् कण्ठस्य दूयते ॥ विड्भेदः श्वासहिक्काश्च वर्द्धन्ते सप्तमीलकाः । ऋषिभिर्भल्लुनामायं सन्निपात उदाहृत ।

पित्तसंशमनवर्गः । पुं । पित्तशान्तिकरद्रव्य-गणे । यथा—चन्दनकुचन्दनीशीरक्षीरवीरमञ्जिष्ठा-पयस्या-विदारि-शतावरी-गुन्द्राशैवालकह्लारकमुदी-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्पल-कदली-कन्दली-दूर्व्वा-सूर्व्वाप्रभृतीनि, काकोल्यादिर्न्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनोवर्गः। सु.सू.३९अ.।

पित्तस्रावः। पुं। नेत्रसन्धिगतरोगे। लक्षणं यथा—"पीतभासं नीलसृणं जलाभं पित्तस्रावं स स्रवेत् सन्धिमध्यात्।" सु.उ.२अ.। [निघ.।

पित्तघ्ना। पुं। पर्पटके। त्रि। पित्तघ्ने। वै.

पित्तहरः। पुं। काकोल्यादिगणे। स्त्री.ङीष्-चि.। च.द.ऋद्धि-चि.। उशीरे। वै.निघ.।

पित्तातिसारः। पुं। पित्तजन्यातिसाररोगे। See अतीसारः। [अ.।

पित्तानुबन्धः। पुं। पित्तानुबन्धे। वा.चि.३

पित्ताण्डः। पुं। अण्डस्य अण्डस्कन्दरोगे। जा. द.५.अ.।

पित्ताभिष्यन्दः। पुं। सर्व्वगताक्षिरोगभेदे। पित्तजन्य चोक् उठा। यथा—"दाही धूमायनं शोफः श्यावता वर्त्मनो बहिः। अन्तःक्लेदोऽथ पीतीष्णं रागः पीताभदर्शनम्। चारीचितत्वताचित्वं पित्ताभिष्यन्दलक्षणम्॥" वा.उ.१५अ.।

पित्तारिः। पुं। पर्पटे। क्षेत्रपापड़ा। रा.नि.व.५। लाक्षायाम्। लाख। रा.नि.व.६। वर्व्वरचन्दने। रा.नि.व.१२।

पित्तिका। स्त्री। शतपदीभेदे। केंचुई-विशेष। सु.कल्प.८अ.।

पित्तोत्क्लिष्टम्। क्ली। नेत्रवर्त्मव्यधरोगे। लक्षणं यथा—"सदाहक्लेदिनिस्रोतं रक्ताभं स्पर्शनाक्षमं। पित्तेन जायते वर्त्म पित्तोत्क्लिष्टमुशन्ति तत्॥" वा.उ.८अ.।

पित्तोदरम्। क्ली। पित्तजन्योदररोगे। तस्य लक्षणं यथा—"यत्तीक्ष्णतृष्णाज्वरदाहयुक्तं पीतं शिरा यत्र भवन्ति पीताः। पीताक्षिविण्मूत्रनखाननत्वं पित्तोदरं तत्त्वचिराभिवृद्धि॥" सु.नि.७अ.। पुं। मध्यविषवृश्चिकजातौ। सु.कल्प.८अ.।

पित्तोल्वणः। त्रि। पित्ताधिके। वा.चि.७अ.।

पित्तोल्वणसन्निपातः। पुं। आगुकारि-सन्निपातज्वरे। तस्य लक्षणं—"अतीसारो भ्रमो मूर्च्छा सुखपाकस्तथैव च। गात्रे च बिन्दवो रक्ता दाहोऽतीव प्रजायते। पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्॥" भा.म.१भ.।

पित्रर्हः। पुं। माषकलाये। मे.।

पित्रम्। क्ली। मधुनि। रा.नि.व.१४। पुं। माषे। माषकलाये। रा.नि.व.१६।

पित्सन्। पुं। पक्षिणि।

पिनसः। पुं। नासारोगे, अपीनसे। निदा.।

पिनाकः। पुं, क्ली। तन्नामकनीलाभ्रभेदे। वै.निघ.। See अभ्रम्।

पिन्यासः। पुं। हिङ्गुनि। जटा.।

पिपासा। स्त्री। तृषायाम्। रा.नि.व.२०। अत्र यवागूः सद्वीकादिसिद्धा प्रशस्ता। च.सू.२अ.।

पिपासुः। त्रि। तृषातुरे।

पिपिली। स्त्री। पिपीलिकायाम्। वै.निघ.।

पिपीलकः। पुं। कृष्णवर्णमहापिपीलिकायाम्। बड़ डेँगरा पिपड़े। हे.च.।

पिपीलिका (ली)। स्त्री। पिपिल्याम्। पिपड़ा। ताः षड्विधाः—स्थूलशीर्षा संवाहिका त्राक्षपिका अङ्गुलिका कपिलिका चित्रवर्णेति। ताभिर्दष्टे देशे शयथुरग्निस्पर्शवद्दाहश्चोफौ भवतः। सु.कल्प.८अ.।

पिप्पटा। स्त्री। शर्करायाम्। वै.निघ.। गुड़-शर्करायाम्। त्रिका.।

पिप्पलः। पुं। अश्वत्थवृक्षे। र.मा.। वा.सू. १५अ.न्यग्रोधादिः। पक्षिविशेषे। मे.। क्ली। जले। त्रिका.।

पिप्पलकः। पुं, क्ली। स्नायौ। मे.। च.शा. ८अ.। सोवनमृत्वे। मे.।

पिप्पलपर्णी। स्त्री। मेषशृङ्ग्याम्। वै.निघ.।

पिप्पलिः (ली)। स्त्री। (piper longum. Syn. Chavica Roxburghii.) Long pepper. स्वनामख्यातपण्यद्रव्ये। पिंपूल गांछ। हिं पीपर। मं पिप्पली। कं हिप्पली। तें पिप्पलिचेट्टु। वम्. वङ्गालिपिंपरि। ता. पिपिलि। तत्पर्य्यायाः,—कृष्णा उपकुल्या वैदेही मागधी चपला कृष्णा उषणा ऊषणा शौण्डी कोला कटी एरण्डा चञ्चला कोल्या मगधा तीक्ष्णतण्डुला कृष्णला कटुबीजा कीरङ्गी तिक्ततण्डुला श्यामा सूक्ष्मतण्डुला दन्तफला मगधोद्भवा। पिप्पली वनपिप्पली गजपिप्पली सिंहपिप्पली चेति बहुधा। गुणाः स्वस्वपर्य्याये वक्ष्याः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा गुणाः—ज्वरघ्नी हृद्या तिक्तोष्णा कटुः तिक्ता दीपनी मारुतश्वासकासश्लेष्मक्षयघ्नी च। रा.नि.व. ६। आर्द्रपिप्पली कफकरी स्निग्धा शीतला मधुरा गुरुः पित्तघ्नी च। शुष्का सा पित्तकोपनी। मधुना सा मेदोवह्निकफश्वासकासज्वरघ्नी मेधाग्निवह्निकरी च। गुडेन सा जीर्णज्वराग्निमान्द्यहरी। तत्र भागैकं पिप्पल्या भागद्वयञ्च गुडस्येति हृद्याः। भा. पू.१भ। कटुका पित्तं श्लेष्मयति मृदुशीतवीर्य्यत्वात्। सु.सू.४०।४६अ.। प्लक्षवृक्षे। मद.व.५। अश्वत्थिकायाम्। गया अश्वत्थ। रा.नि.व.११। कर्णगतरोगे। लक्षणं—"एकी नीरुगनेको वा गर्भे मांसाङ्कुरः स्थिरः। पिप्पली पिप्पलीमानः..... ...॥" वा.उ.१७अ.। [पाकुड़।

पिप्पलीका। स्त्री। क्षुद्रप्लक्षवृक्षभेदे। छोटे-

पिप्पलीखण्डः। पुं। See खण्डपिप्पली।

पिप्पलीद्वयम्। क्ली। पिप्पली गजपिप्पली चेति द्वये। च.द.कफज्व.चि.निम्बादिः।

पिप्पलीमूलम्। क्ली। स्वनामख्यातक्षुद्रलतामूले। पिप्पुलमूल। मं पिंपलीमूल। कं हिप्पलियवेरु। तें पिप्पलीदुम्प। तत्पर्य्यायाः,—ग्रन्थिकं चटिका चटकाशिरः चटिकाशिरः सर्व्वग्रन्थिकं षड्ग्रन्थिः शिरः मूलं कटुग्रन्थि कटूषणं कीलमूलं सर्व्वग्रन्थि पवाक्यं विरूपं शीर्षसम्भवं सुगन्धि ग्रन्थिलं। गुणाः—कटूष्णं श्लेष्मक्लमिघ्नं दीपनं वातरोगघ्नं रोचनं पित्तकोपनञ्च। रा.नि.व.६। रोचनं कटूष्णं लघु भेदि कफवातोदरघ्नम् आनाहघ्नीहगुल्मघ्नं श्वासक्षयहरञ्च। भा.। च.द.। "मृद्वीकापिप्पलीमूलचव्यचित्रकनागरैः।"

पिप्पलीरसायनम्। क्ली। मेधाकररसायनविशेषे। "तिसृष्विसप्तु पूर्व्वाह्णे भुक्तायै भोजनस्य च। पिप्पल्याः किंशुकक्षारभाविता घृतभर्ज्जिताः। प्रयोज्या मधु-सर्पिर्भ्यां रसायन-गुणैषिणा॥" च.चि.१अ.।

पिप्पलीवर्द्धमानम्। क्ली। रसायनविशेषे। यथा—प्रथमदिने दश पिप्पलीतण्डुलं दुग्धेनारभ्य प्रतिदिनं दश दश दशाहपर्य्यन्तं वर्द्धयेत्। अथ क्रमेण प्रत्यहं दश दश ह्रासयित्वा पुनर्नवाङ्किं यावत् पूर्व्ववत् दुग्धेन सेवेत, प्रतिदिनञ्च औषध पाके सति सघृतदुग्धं षष्टिकान्न भक्षयेत्। इति उत्तमस्य मात्रा। मध्यस्य षट्, हीनस्य वीणि च मात्रा। च.चि.१अ.।

पिप्पल्यादिकषायः। पुं। पिप्पल्यादिगणसिद्धे कफपाचनकषाये। सु.। १। पिप्पलीमूलगुडूचीविश्वभेषजसिद्धे कषाये वातज्वरे हिते। वा.चि.१अ.। २। पिप्पली शारिवा-द्राक्षा-शतपुष्पाहरेणुभिः कृते कषाये वातज्वरे हिते। च.द.।

पिप्पल्यादिगणः। पुं। गणोऽयं वातकफहरः दीपनश्च। "पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बमदनफलहिङ्गुभार्गीमूर्व्वातिविषावचाविडङ्गानि कुटुरोहिणी चेति।" सु.सू.३८अ.।

पिप्पल्याद्यघृतम्। क्ली। शूले घृतम्। गव्यघृतं ४ प्र.। क्वाथार्थं—पिप्पली ४ प्र. वारि ६४ प्र. शे. १६ प्र.। कल्कार्थं—पिप्पली १ प्र.। अन्यत्सन्निपातज्वरे—गव्यघृतं ४ प्र.। कल्कार्थं—पिप्पली रक्तचन्दनं तुलसम् उशीरं कटुकी इन्द्रयवः सूक्ष्मासलकी अनन्तमूलम् अतिविषा शालपर्णी द्राक्षा आमलकं बिल्वमूलत्वक् वायसाणा (वनाडुमूर) फटिकारी, एषां प्रति २ तो. वारि १६ प्र.। रस.र.।

पिप्पल्याद्यलेहः। पुं। हिक्कायां कासे च लेहः। "पिप्पल्यामलकीद्राक्षाकीलाख्यिमधुशर्करा-विड्भृङ्गपुष्करैर्युक्तो लेहो हन्ति सुदुर्ज्जयम्॥" रस.चि.। रस.र.। अन्यः उदरे—"पिप्पलीमूलपिण्डाभविकटत्रयेन्दुसैन्धवैः। योजितो नियतं हन्ति लेहः सर्व्वोदरामयम्॥" पिण्डाभः गन्धरसः। इन्दुः कर्पूरं। सर्व्वसमं लौहचूर्णं ग्राह्यम्। रस.र.।

पिप्पिका। स्त्री। दन्तमले। विका.।

पिप्लुः। पुं। जतुमणौ। जड़ुर। च.इ.१अ।

पिम्परिः। पुं। क्षुद्रप्लक्षे। रा.नि.व.११।

पियारकम्। क्ली। स्वनामख्यातफले। पेयाराफल। अर्क.।

पियालः। पुं। (Buchanania latifolia.) स्वनामख्यातमहातरौ। अस्य बीजं चिरौञ्जीति लोके। पियाशाल। हिं नियवेरु। मं चारोली। पञ्जा. चिरौंजी। उत्. चरू। ता. काटमरा। तत्पर्य्यायाः,—राजादनं धनुष्पटः राजातनं राजातनः सन्नः कटुः सन्नकटुः धनुः पटः क्षुसन्नकः धनुःपटः प्रियालः प्रियालकः खरस्कन्धः चारः बहुलवल्कलः तापसेष्टः। सु.सू.३८अ.। वा.सू.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५अ. न्यग्रोधादिः। बीजगुणाः—गुरु सरं दाह-ज्वरव्रणान्नं। रा.नि.व.११। मधुरं स्निग्धं बृंहणं वात पित्तघ्नञ्च। राज.। च.सू.२४अ.। तैलं विभीतकतैलगुणं। पियालमज्जा मधुरो हृद्यः वातपित्तघ्नश्च। सु.सू.४६अ.। अस्य निर्यासः उदरामयघ्नः ग्रीवामांसग्रन्थिशीफे च हितः। See अखट्टः।

पियालास्थिजः। पुं। पियालफलमज्जायाम्। पियाल आँटीर भेद। भैष.गुलचि.पूगखण्डे।

पिरजम्। क्ली। पेरीजेतिख्याते उपरत्नभेदे। See पेरीजम्।

पिलिपिच्छिका। स्त्री। शिशोर्नाभ्यादिकायग्रह-भेदे। या एकादशे दिने मासि वर्षे वा गच्छति। तेन बालस्य ज्वरगात्रभङ्गादिर्भवति। च.द.बाल-रोग.चि.।

पिलुकः। पुं। पीलुवृक्षे। श.र.।

पिलुनी (र्णी, त्नी)। स्त्री। सूर्व्वायाम्। मोरटायाम्। र.मा.।

पिल्लः। पुं। क्लिन्ननेत्ररोगे। अम.। वा.उ.१६अ.।

पिल्लिका। स्त्री। करेणुकायाम्। श.मा.।

पिशङ्गः। पुं। पिङ्गलवर्णे।

पिशाचः (चः)। पुं। भूतग्रहविशेषे। पिशाच-ग्रहलक्षणं यथा—"उच्चस्वः क्लेशपरुषोऽचिरप्रलापी दुर्गन्धो भृशमशुचिस्तथातिलोलः। वल्गाशी विजन-वनान्तरीपसेवी व्याचेष्टन् भ्रमति रुदन् पिशाच-जुष्टः॥" मा.नि.।

पिशाचघ्नः। पुं। श्वेतसर्षपे। प.मु.।

पिशाचद्रुः (द्रुः)। पुं। शाखोटवृक्षे। शेओड़ा गाछ। विका.। र.मा.।

पिशाचिका (ची)। स्त्री। सूक्ष्म-जटा-मांस्याम्। See आकाशमांसी।

पिशितम्। क्ली। मांसे। रा.नि.व.१८। स्त्री। जटामांस्याम्। रा.नि.व.१२।

पिशितरोहिणी। स्त्री। मांसरोहिण्याम्। वै.निघ.।

पिशितोदकम्। क्ली। कुङ्कुमे। वै.निघ.।

पिशिनी (ता), पिशी। स्त्री। जटामांस्याम्। रा.नि.व.१२।

पिशीतकः। पुं। गोधूमे। वै.निघ.।

पिशुः (ना)। स्त्री। त्वक्कायाम्। गन्धद्रव्य। रा.नि.व.१२। (ना) शल्लिपर्ण्याम्। गाँठेला। वै.निघ.।

पिशुनम्। क्ली। कुङ्कुमे। रा.नि.व.१२। मे.। पुं। तगरे। काके। कार्पासे। वै.निघ.। त्रि.। क्रूरे।

पिशूनः। पुं। काके। स्त्री। (ना) त्वक्कायाम्।

पिष्ट(क)म्। क्ली। शीषके। शीष। अस्थि-भङ्गविशेषे। सु.। पुं। नन्दिवृक्षे। वै.निघ.। तिलकल्के। तिलकुटो। रा.नि.व.१६। पुं, क्ली। श्लेष्मगतानिलरोगभेदे। लक्षणम्—"उत्सन्नः सलिल-निभोऽथ पिष्टगुल्मी विन्दूर्ध्वः स भवति पिष्टकः सुदुस्तः।" सु.उ.४अ.। "श्लेष्मसारुतकोपेन गुल्मे नांसं समुन्नतं। पिष्टवत् पिष्टकं विद्धि मलाक्त-दर्शसन्निभम्॥" भा.म.४भ.। तण्डुलचूर्णादिकृत-भक्ष्यद्रव्यविशेषे। पिटे। तत्पर्य्यायाः,—पूपः अपूपः आपूपः पिष्टः। सा. गुणाः—"पिष्टं प्राणकरं रुच्यं विदाहि गुरु दुर्जरम्।" शालि-तण्डुलपिष्टकगुणाः—"शालिपिष्टमयी भक्ष्याः कफ-पित्तविनाशनाः।" वैदलकृतपिष्टगुणाः—"वैदला गुरवो भक्ष्या विष्टम्भिसृष्टमारुताः।" गुड़ादिकृत-पिष्टगुणाः—"सगुड़ाः सतिलाश्चैव सचौद्रचौर-शर्कराः। भक्ष्या हृद्याश्च बल्याश्च गुरवो बृंहणाः पराः॥" स्नेहसिद्धगोधूमकृतभक्ष्यगुणाः—"सस्नेहाः स्नेहसिद्धाश्च भक्ष्या गोधूमसम्भवाः। गुरवस्तर्पणा हृद्या बलीपचयवर्द्धनाः॥" राज.३प.।

पिष्टका। स्त्री। पिष्टनिर्दले। डाईल बाँटा।

पिष्टपर्णी। स्त्री। पृश्निपर्ण्याम्। पिठाकरञ्जे ति-ख्याते करञ्जभेदे।

पिष्टपचनम् } क्ली। पिष्टकपचनपात्रे।
पिष्टपाकभृत् } तैलानी। अम.हे.च.।

पिष्टपाचकः। त्रि। पिष्टकपाककारिणि।

पिष्टपायसः। पुं, क्ली। क्षीरायाम्। खिरसा। प.मु.।

पिष्टपूरः। पुं। घृतभर्जितगोधूमकृतखाद्यद्रव्ये। पूरपिटे। वटके। वड़ा। विका.।

पिष्टमेहः। पुं। प्रमेहरोगविशेषे। अत्र नरः सपुलकं पिष्टरसतुल्यं मेहति। लक्षणं—"संहृष्ट-रोमा पिष्टेन पिष्टवद्बहलं स्मृतम्।" मा.नि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिष्टयोनिः। स्त्री। खर्परपोलिकायाम्। वै.निघ.।

पिष्टवर्त्तिः। पुं। सुद्गादिकृतपिष्टकभेदे। चमसी, क्रटी। हे.च.।

पिष्टवान्। त्रि। शुक्ले। भा.ने.री.चि.।

पिष्टवेक्षुतम्। क्ली। पिष्टान्ने। वै.निघ.।

पिष्टसौरभम्। क्ली। चन्दने। हारा.।

पिष्टातः। पुं। किङ्किराते। आबीर। विका.।

पिष्टिकम्। क्ली। तण्डुलजतवचीरे। आस्के। रा.नि.व.१६।

पिष्टिका। स्त्री। पिष्टकभेदे। डालपिटे। हिं पिवी। तत्करणविधिः—"दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका। शिलायां साधु संपिष्टा पिष्टिका कथिता बुधः॥" भा.पू.२भ.क्रतान्न.व.।

पिष्टो(ष्टी)ड़ी (ण्डी)। स्त्री। श्वेतास्त्रीक्षुपे। रा.नि.व.४।

पिस्तम्। क्ली। (Pistacia vera.) The pistachio nut tree. पेस्ता इति प्रसिद्धे काबेलदेशीयफले। पेस्ता। गुणौ—उष्णं दौर्ब्बल्यहरं। अस्य वल्कलं अजीर्णे हितम्।

पीचः। पुं। अधरचिबुके। चोयाल। वै.निघ.।

पीठः। पुं, क्ली। चित्रकवृक्षे। भा.। देवनले। यावनालादिचूर्णे। वै.निघ.। आसने। पिड़ि, चौकी, कुशासन। श.र.।

पीठसर्पी (इन्)। पुं। पक्षौ। खड्गे। हारा.।

पीड़नम्। क्ली। पीड़ायाम्। चांपन, टिपन। मा.नि.। वायुजन्यव्रणवेदनायाम्। सु.सू.२२अ.। व्रणस्य पूयनिर्गमार्थम् अङ्गुल्यादिना पीड़ायाम्। टिपा। सु.सू.७अ.।

पीड़ा। स्त्री। पीड़ने। अम.। शारीरादिबहुविधरोगे। सु.। सरलकाष्ठे।

पीड़ाभञ्जीरसः। पुं। शूलाधिकारे रसः। अभ्रभस्म ३ भ. पारदः १ भ. गन्धकः १ भ. जैपालबीजं २ भ. टङ्कणचारः ३ भ.। जम्बीररसेन मर्द्यम्। मात्रा कोलमिता। अनु. गुड़काञ्जिके। रस.चि.।

पीतः। पुं। वेतसलतायाम्। वेत गाछ। र.मा.। अङ्कोल्लवृक्षे। आँकोड़ गाछ। रा.नि.व.९। सरलद्रुमे। शाखोटवृक्षे। शाओड़ा गाछ। रा.नि.व.९। पुष्परागमणौ। रा.नि.व.१३। शालिधान्यविशेषे। नन्दिवृक्षे। सीमलतामेदे। पीतभिण्ट्यां। वै.निघ.। हरिद्रावर्णे। अम.। क्ली। पद्मकाष्ठे। रा.नि.व.१२। हरितालें। रा.नि.व.१३। पीतोशीरे। कुङ्कुमे। कुसुम्भे। प्रवाले। पद्मकेसरे। पीतचन्दने। वै.निघ.। पाने। मे.।

पीतकम्। क्ली। पीतचन्दने। कुङ्कुमे। काष्ठागुरुणि। पद्मकाष्ठे। रा.नि.व.१२। वर्ब्बूरभेदे। मधुनि। गर्ज्जरमूले। पीतजीरके। पीतलोध्रे। किराततिक्ते। चिरातो। वै.निघ.। सुवर्णे। रीतौ। पितल। स्वर्णमाक्षिके। रा.नि.व.१३। हरितालें। अम.। पुं। पीतशालवृक्षे। पिप्पलीमूले। र.मा.। पृथुशिग्रुवृक्षीणाकवृक्षे। हरिद्रुवृक्षे। रा.नि.व.९। चिरविल्वे। सु.सू.३८अ.। नन्दिवृक्षे। रा.नि.व.१२। व्रीहिभेदे।

पीतकचूर्णम्। क्ली। मुखरोगे चूर्णम्। "मनःशिला यवक्षारी हरितालं सशैन्धवं। दार्वीत्वक् चेति तच्चूर्णं माक्षिकेण समायुतं। सूर्च्छितं घृतमर्द्दितं कण्ठरोगेषु धारयेत्॥" च.चि.२६अ.।

पीतकटुकी। स्त्री। पीतरोहिण्याम्। पीतवर्णकटुकी। प.मु.।

पीतकदली। स्त्री। स्वर्णकदल्याम्। चाँपा कला। वै.निघ.।

पीतकद्रुः (मः)। पुं। हरिद्रुवृक्षे। रा.नि.व.९। [रा.नि.व.७।

पीतकन्दम्। क्ली,पुं। गर्ज्जरमूलके। गाजर।

पीतकरवीरः। पुं। पीतपुष्पकरवीरवृक्षे। पीतपुष्प करवीरवृक्ष। तत्पर्य्यायौ,—पीतप्रसवः सुगन्धिकुसुमः। गुणैः साधारणकरवीरतुल्यः। रा.नि.व.१०। See करवीरः।

पीत(ति)का। स्त्री। हरिद्रायाम्। प.मु.। दारुहरिद्रायाम्। रा.नि.व.९। भैषसुख.री.चि.। स्वर्णयूथिकायाम्। रा.नि.व.१०। कृष्णाखण्डे। घीषालतायाम्। वै.निघ.। स्फुक्कायाम्। पिड़िंशाक। वा.व्या.चि.हिमसागरतैले। शतपदीनामकीटभेदे। सु.कल्प.८अ। क्रच्छ्रसाध्यलूताविशेषे।

पीतकाञ्चनः। पुं। पीतपुष्पकाञ्चनभेदे। गुणाः—"पीतस्तु काञ्चनो ग्राही दीपनो व्रणरोपणः। तुवरो मूत्रकृच्छ्रस्य कफवाय्वोश्च नाशनः॥" वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीतकायता। स्त्री । पित्तजरोगे ।
पीतकावेरम्। क्ली । कुङ्कुमे । पित्तले । मे. ।
पीतकाष्ठम्। क्ली । पद्मकाष्ठे । पद्मकाष्ठे । पीतचन्दने । रा.नि.व.१२। पुं । हरिद्रुवृक्षे । रा.नि.व.९। [याम् । रा.नि.व.३ ।
पीतकीलका (ला)। स्त्री । आवर्त्तकीलतायाम् ।
पीतकुरवः (कः)। पुं । पीतझिण्टीवृक्षे । पीत झाँटी । रा.नि.व.१०। See किङ्किरातः ।
पीतकुष्माण्डम्। क्ली । वैदेशिककुष्माण्डे । विलाति कुम्ड़ा । गुणाः—"अपरं पीतकुष्माण्डं गुरु पित्तकरं परं । अग्निमान्द्यकरं स्वादु श्लेष्मघ्नं वातकोपनम् ॥" आचेयः ।
पीतकुसुमः। पुं । पीतझिण्टीवृक्षे । पीत झाँटी । रा.नि.व.१०। See किङ्किरातः ।
पीतगन्धम्। क्ली । पीतचन्दने । रा.नि.व.१२ ।
पीतगन्धकः। पुं । गन्धके । वै.निघ. ।
पीतघोषा। स्त्री । पीतपुष्पघोषालतायाम् । झिंङे । पीत घोषा । तत्पर्य्यायाः,—श्वेतफला कोषिफला कर्कोटकी श्वेतकी राजकः सहाजाली । प.मु. ।
पीतचन्दनम्। क्ली । कालस्कन्ध इति द्राविड़देशप्रसिद्धे पीतवर्णचन्दनकाष्ठे । मलेन्द्रौति मद. । तत्पर्य्यायाः,—पीतगन्धं कालेयं पीतकं साधवप्रियं कालेयकं पीतकाष्ठं वर्व्वरं कालीयकं कालीयं पीताभं हरिचन्दनं हरिप्रियं कालसारं कालानुसार्य्यकं । गुणाः—रक्तचन्दनतुल्यगुणं व्यङ्गनाशनम् । भा. । वातघ्नं । मद. । शीतलं तिक्तं कुष्ठकण्डूविचर्चिकादद्रुकृमिहरं कान्तिकरञ्च । रा.नि.व.१२ । कुङ्कुमे । दारुहरिद्रायाम् । हरिद्रायाम् । वै.निघ. ।
पीतचम्पकः। पुं । स्वर्णचम्पके । जटा. ।
पीतजातिः। स्त्री । स्वर्णजातिवृक्षे । वै.निघ. ।
पीतझिण्टी। स्त्री । पीतपुष्पझिण्टीवृक्षे । पीत झाँटी । क्षुरिकावृक्ष्यम् । रा.नि.व.४ ।
पीततण्डुलः। पुं । कङ्गुधान्ये । कांगनी धान । रा.नि.व.१६। सर्जतरौ । शालगाछ । वै.निघ. । स्त्री । क्षुरिकावृक्ष्याम् । रा.नि.व.४ ।
पीततण्डुलिका। स्त्री । सर्ज्जवृक्षे । शाल गाछ । व.निघ. ।
पीततुण्डः। पुं । पक्षिविशेषे, कारण्डवपक्षिणि । विका. ।
पीततैला। स्त्री । ज्योतिष्मतीलतायाम् । लताफट्‌की । रा.नि.व.३ । वा.सू.१५अ.अर्कादिः । "प्रत्यक्पुष्पी पीततैलीदकीर्य्या ।"
पीतदन्तता। स्त्री । पित्तजन्यदन्तरोगे ।
पीतदारुः। पुं, क्ली । दारुहरिद्रायाम् । रा.नि.व.९ । सु.चि.१९अ. । सरलायाम् । सरल काष्ठ । र.मा. । हरिद्रायाम् । वै.निघ. । देवदारुणि । र.मा. । हरिद्रुवृक्षे । रा.नि.व.९ । किरातितिक्तके । पूतिकरञ्जे । वै.निघ. । आच्छुकपुष्पवृक्षे ।
पीतदुग्धा। स्त्री । स्वर्णक्षीर्य्याम् । शेयालकाँटा । हिं चोक । चीरिण्याम् । थिकुई । रा.नि.व.५ । सातलायाम् । वै.निघ. ।
पीतद्रुः। पुं । देवदारुभेदे, सरले । प.मु. । दारुहरिद्रायाम् । रा.नि.व.९ ।
पीतद्रुमः। पुं । हरिद्रावृक्षे । वा.चि.६अ. । सरलदेवदारुणि । दारुहरिद्रायाम् । अम. ।
पीतनः (कः)। पुं । आम्रातकवृक्षे । आंगड़ा गाछ । प्लक्षवृक्षे । रा.नि.व.११।२३ । क्ली । कुङ्कुमे । हरितालें । पीतदारुणि । आम्रातकफले । वै.निघ. । [निघ. ।
पीतनखता। स्त्री । पित्तजन्यनखरोगे । वै.
पीतनाशः। पुं । क्षुद्रपर्णसे । आनारस । वै.निघ. ।
पीतनी। स्त्री । शालपर्ण्याम् । मद. ।
पीतनेत्रता। स्त्री । पित्तजनेत्ररोगे । भा. ।
पीतपरागः। पुं । पद्मकेसरे । वै.निघ. ।
पीतपर्णी। स्त्री । वृश्चिकाल्यां । बिछांती । श.च. । [चि.८अ. ।
पीतपाकी (इन्)। पुं । बाह्यालकभेदे । च.
पीतपाठी (इन्। पुं । चिबुकवृक्षे । वै.निघ. ।
पीतपादपः। पुं । पृथुशिम्बश्योणाकवृक्षे । बड़ शोणा गाछ । रा.नि.व.९ । पीतलोध्रवृक्षे । वै.निघ. । पाथी । हे.च. ।
पीतपादा। स्त्री । सारिकायाम् । शालिक

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीतपिष्टम्। क्ली। शीषके। वै.निघ.।

पीतपुष्पः। पुं। पीतभिण्टाम्। कण्टारीलुया इति लोके। क्षणपिण्डारी। मयनाविशेष। प.मु.। इक्षुदीवृक्षे। र.मा.। कर्णिकारवृक्षे। श. च.। काञ्चनारवृक्षे। रक्तकाञ्चन वृक्ष। चम्पकवृक्षे। रा.नि.व.१०। क्ली। आहुल्यचुपे। रा. नि.व.४। कुष्माण्डे। भा.पू.१भ.। पीतवर्णपुष्पमात्रे।

पीतपुष्पकः। पुं। वर्ब्बुरवृक्षे। वै.निघ.।

पीतपुष्पका। स्त्री। कर्कटीभेदे। वन काँकड़ो। वै.निघ.।

पीतपुष्पा। स्त्री। श्वेतवाव्यालके। प.मु.। इन्द्रवारुणीलतायाम्। रा.नि.व.३। कोषातकीलतायाम्। त्रिका.। प.मु.। पीतपुष्पवाव्यालके। पीत वेड़ेला। पीतभिण्टाम्। पीत झाँटी। र.मा.। भिञ्झिरीटायाम्। रा.नि.व.४। आढ़क्याम्। रा.नि.व.१६। पीतकरवीरे। स्वर्णयूथिकायाम्। गणिकारिकायाम्। वै.निघ.।

पीतपुष्पिका (प्पी)। स्त्री। महाबलायाम्। रा.नि.व.४। वपुष्याम्। शंखा। रा.नि.व.७। इन्द्रवारुणीलतायाम्। राखालशशा। शङ्खपुष्पी। श्वेत अपराजिता। महाकीप्रातक्याम्। रा. नि.व.३। पीतयूथिकायाम्। अतिबलायाम्। महाशणवृक्षे। वै.निघ.। [१२।

पीतपृष्ठा। स्त्री। वराटिकाभेदे। रा.नि.व.

पीतप्रसवः। पुं। पीतकरवीरवृक्षे। पीत करवी। रा.नि.व.१०।

पीतफलः (कः)। पुं। शाखोटवृक्षे। शेओड़ा गाछ। त्रिका.। धववृक्षे। धाओया गाछ। त्रिका.। कर्मरङ्गवृक्षे। कामरांङा गाछ। रा.नि.व.११।

पीतफेनः। पुं। अरिष्टकवृक्षे। रीठा गाछ। वै.निघ.।

पीतबलिः। पुं। गन्धके। वै.निघ.।

पीतबालुका। स्त्री। हरिद्रायाम्। त्रिका.।

पीतभद्रकः। पुं। देवदारुवृक्षे। वै.निघ.।

पीतभस्म। क्ली। भस्मीकरणेन पारदस्य पीतीकरणे। यत् सर्व्वाङ्गसुन्दर इति चन्द्रिकाकारः आह। तत्प्रकरणं—"मर्दयेत् रसगन्धौ च हस्तिशुण्डीरसैर्दृढं। भूधात्रीकरसैः पिष्टा पर्य्यन्तं दिनसप्तकं। विधृष्य बालुकायन्त्रे मूषायां सन्निवेशयेत्। दिनमेकं ददेदग्निं मन्दं मन्दं निशावधि। एवं निष्पद्यते पीतः शीतः सूतस्तु गृह्यते। पर्णखण्डेन तद्भुक्तां भक्षयेत् शूयतां मया। क्षुद्रोधं कुरुते पूर्व्वमुदराणि विनाशयेत्। ज्वराणां नाशनः श्रेष्ठः तद्वत् शोमुखकारकः। बलप्रदः सदा देहे जरानाशनतत्परः। अङ्गभङ्गादिकं दोष सर्व्वं नाशयति क्षणात्। एतस्मान्नापरः सूतो रसात् सर्व्वाङ्गसुन्दरात्।" र.सा.सं.।

पीतभृङ्गराजः। पुं। पीतपुष्पभृङ्गराजवृक्षे। हलदे भीमराज। केशुण्डे। तत्पर्य्यायाः,—स्वर्णभृङ्गारः हरिप्रियः देवप्रियः वन्दनीयः पावनः। गुणाः—तिक्तोष्णः चक्षुष्यः केशरञ्जनः कफामशोफघ्नः नीलपुष्पश्च रसायनः। रा.नि.व.४।

पीतमणिः। पुं। पुष्परागमणौ। रा.नि.व.१३।

पीतमण्डलदर्शनः। पुं। पित्तजन्यरोगे। निदा.।

पीतमण्डूकः। पुं। स्वर्णमण्डूके। सोणा ब्याङ्। वै.निघ.। स्वर्णचातकपक्षिणि।

पीतमस्तकः। पुं। हंसश्येनपक्षिणि। वै.निघ.।

पीतमाक्षिकम्। क्ली। स्वर्णमाक्षिके। रा. नि.व.१३।

पीतमुण्डः। पुं। हरिणभेदे। वै.निघ.।

पीतमुद्गः। पुं। सुवर्णमुद्गे। सोणा मूग। र.मा.।

पीतमूत्रता (त्वम्)। स्त्री, क्ली। पित्तजमूत्ररोगे। भा.।

पीतमूल(क)म्। क्ली। गर्जरमूलके। गाजर मूला। रा.नि.व.७।

पीतमूली। स्त्री। रेचकमूलविशेषे। रेउचिनि इति लोके। यथा—"गन्धिनी पीतमूली च बल्या सा मृदुरेचनी। हृत्यजीर्णमतीसारं वह्निमान्द्यमरोचकम्। विट्सङ्गं शीतपित्तञ्च दुष्टव्रणविरोहणी॥" (अर्व्वाचीनाः)।

पीतयूथो (थिका)। स्त्री। स्वर्णयूथिकायाम्। स्वर्ण युँई। रा.नि.व.१०।

पीतरक्तः (कः)। क्ली। पुष्परागमणौ। रा.नि. व.१३। पद्मकाष्ठे। वै.निघ.।

पीतरत्न(क)म्। क्ली। मणिविशेषे। पोखराज इति लोके। भा.पू.१भ.रत्न.व.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीतरम्भा। स्त्री। सुवर्णकदलीवृक्षे। चाँपा-कलार गाछ। रा.नि.व.११।

पीतरसः। पुं। कर्पूरे। केशुर। प.सु.। धूनराजे। पीतवर्णपारदभस्मे। क्ली। हरिद्रायाम्।

पीतरागम्। क्ली। सिक्थके। मग। पद्मकेसरे। रा.नि.व.१३। पुं। पीतवर्णे। वै.निघ.।

पीतरोहिणी। स्त्री। पीतकटुक्याम्। पीत-कटकी। प.मु.। काश्मर्य्याम्। गाँमार। भा.।

पीतल(क)म्। क्ली। रीतौ। पितल। रा.नि.व.१३। पुं। पीतवर्णे। वै.निघ.। हरितालै।

पीतलोहम्। क्ली। पित्तले। हे.च.

पीतवर्णः (कः)। पुं। स्वर्णमण्डूके। तालवृक्षे। कदम्बवृक्षे। हरिद्रुवृक्षे। काञ्चनवृक्षे। वै.निघ.। क्ली। मनःशिलायाम्। पीतचन्दने। कुङ्कुमे।

पीतवल्ली। स्त्री। आकाशलतायाम्। आलोक्-लता। वै.निघ.।

पीतविट्कता। स्त्री। पित्तविकारजरोगे।

पीतवीजा। स्त्री। मेथिकायाम्। रा.नि.व.६।

पीतवृक्षः। पुं। पृथुशिम्बयोणाकवृक्षे। वड़ शोणागाछ। रा.नि.व.९। पीतलोध्रवृक्षे। सरलदेवदारौ। रा.नि.व.१२।

पीतशा(सा)लः (कः)। पुं। असनवृक्षे। पियालवृक्षे। पियाशाल। हिं असन, अस्ना। सं विबला। तै महि। वम्. अइन्। अम.। तत्पर्य्यायाः,—प्रियकः बीजकः पीतशालकः पीतसालः पीतसारः वन्धूकपुष्पः सर्ज्जकः आसनः। अस्य त्वक्क्वाथः उदरामयघ्नः, प्रलेपः नाड़ीव्रणे हितः। एतद्बीजगुणाः—"बीजकः कुष्ठवीसर्प-श्वित्रमेहगुदक्रिमीन्। हन्ति श्लेष्मास्र-पित्तञ्च त्वचः कैश्यं रसायनः॥"

पीतशालिः। पुं। सूक्ष्मशाली। सरु धान। रा.नि.व.१६।

पीतसहाचरः। पुं। पीतझिण्टीम्। च.द. वा.व्या.महाराजप्रसारणीतैले।

पीतसारः। पुं। अङ्कोल्लवृक्षे। आँकोड़ गाछ। रा.नि.व.९। सिल्हके। शिलारस। रा.नि.व.१२। वै.निघ.ज्व.चि.चन्दनबलातैले। गोमेद-मणौ। मे.। क्ली। हरिचन्दने। प.मु.।

पीतसारकः। पुं। निम्बवृक्षे। निमगाछ। रा.नि.व.९। अङ्कोल्लवृक्षे। रा.नि.व.९। असनवृक्षे। वै.निघ.। [च.।

पीतसारि। क्ली। खीतीऽञ्जने। शुर्मा। श.

पीतस्कन्धः। पुं। शूकरे। वै.निघ.।

पीतस्फटिकः। पुं। पुष्परागमणौ। प.मु.।

पीतस्फोटः (टा)। पुं, स्त्री। पीतवर्णस्फोटके। वै.निघ.। पामायाम्। रा.नि.व.२०।

पीता। स्त्री। हरिद्रायाम्। प.मु.। वै.निघ. चय.चि.सूर्य्यप्रभायाम्। दारुहरिद्रायाम्। रा.नि.व.६। महाज्योतिष्मतीलतायाम्। वड़ लता-फटकी। रा.नि.व.३। गोरोचनायाम्। प्रियङ्गौ। रा.नि.व.१२। वनबीजपूरके। वन मातुलुङ्ग। रा.नि.व.११। कपिलशिंशपायाम्। रा.नि.व.९। अतिविषायां। आतइच। श.च.। स्वर्णकदल्यां। चाँपा कला। हरितालै। पीतजात्यां। पीत जाति फूलेर गाछ। धूनके। देवदारुणि। शालपर्ण्याम्। अश्वगन्धायाम्। आकाशलतायाम्। वै.निघ.।

पीताङ्गः। पुं। पृथुशिम्बयोणाकवृक्षे। वड़ शोणागाछ। रा.नि.व.९। पीतलोध्रवृक्षे। पीत-मण्डूके। सोणाबेङ्। नागरङ्गवृक्षे। स्त्री। हरिद्रायाम्। वै.निघ.।

पीताभः। पुं, क्ली। पीतचन्दने। वै.निघ.।

पीताभ्रम्। क्ली। पीतवर्णाभ्रभेदे। रा.नि. व.१३। See अभ्रकम्।

पीताम्लानः। पुं। पीतझिण्टीवृक्षे। पीत-झाँपि। रा.नि.व.१०। See किङ्किरातः।

पीतावलोकनः। पुं। पित्तजन्यदृष्टिरोगे।

पीताश्मा (न्)। पुं। पुष्परागमणौ। रा.नि. व.१३।

पीताह्वः। पुं। सर्ज्जरसे। धूना। वै.निघ.।

पीतिः। स्त्री। पाने। रा.नि.व.२०। पुं। अश्वे। अम.। करिगुण्डायाम्। श.च.।

पीतिका। स्त्री। हरिद्रायाम्। स्वर्णयूथीवृक्षे। दारुहरिद्रायाम्। सूद्राशब्दे। तद्गुणाः—"पीतिकारुणरागश्च सा स्यात् व्रणनिसूदनी॥"

पीतिनी। स्त्री। शालपर्णीवृक्षे। रा.नि.व.४।

पीती (इन्)। पुं। अश्वे। अम.।

पीथम्। क्ली। घृते। उषा.। जले। हे.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पौथिः (थौ इन्)। पुं। अश्वे। अ.टी.स्वा.।
पीनः। वि। स्थूले। मोटा।
पीनद्रुः। पुं। सरलवृक्षे। रा.नि.व.१२।
पीनसः। पुं। अपीनसनामनासारोगे। पीनस रोग। तत्पर्य्यायाः,—प्रतिश्यायः, अपीनसः, प्रतिश्यायः, नासिकास्रवः। रा.नि.व.२०। See अपीनसः। [व.७।
पीनसा। स्त्री। कर्कट्याम्। काँकुड़। रा.नि.
पीनसी (इन्)। वि। पीनसरोगिणि। निदा.।
पीनस्कन्धः। पुं। वनशूकरे। मेदिनि। वै.निघ.।
पीपरिः। पुं। क्षुद्रवृक्षे। छोटे पाकुड़। रा.नि.व.११। [स्वर्णे।
पीयुः। पुं। काके। पेचके। त्रिका.। क्ली।
पीयूषम्। क्ली। दुग्धे। रा.नि.व.१५। चि.क्र. क.सामरी.चि। अश्नुते। अम.। नवप्रसूताया गोः सप्तदिनाभ्यन्तरीणदुग्धे। गाँइला दूध। यथा—"आसप्तरात्रप्रभवं क्षीरं पीयूषमुच्यते।" गुणाः—मधुरं बृंहणं हृद्यं। सु.सू.४५अ.द.व.। च.सू. २७अ.।
पीयूषसिन्धुरसः। पुं। अर्शोऽधिकारे रसः। षड्गुणगन्धकैर्बालुकायन्त्रे भस्मीकृतपारदः स्वर्ण लौहभस्म अभ्रभस्म गन्धकम् एषां प्र. समभागः, शूरणं (ओल) दन्तीमूलं मुण्डी (मुण्डीरी) काकमाची भृङ्गराजः (भीमराज) अर्कः (आकन्द) चित्रकम् एषां रसेन ७धा मर्द्यः। रस.चि.।
पीयूषोत्था। स्त्री। (Eulophia campestris.) शालुन्निभि इति ख्याते द्रव्ये। इयं वल्या।
पोलकः। पुं। पिपीलिकायाम्। हे.च.।
पोला। स्त्री। पिपीलिकायाम्। वै.निघ.।
पीलुः। पुं। (Salvadora persica ; or S. Olesides, Syn. S. Indica.) Tooth-brush tree. कोङ्कनदेशे खनामख्यातफलवृक्षे। पीलू गाछ। हिं झल। मं पिलु। तें गोलुगुचेट्टु, पिन्नवरगोरु। वम्. कक्कुन्। ता. कोकु। भूमिजामि आखरोट इति लोके। तत्पर्य्यायाः—गुडफलः खंसी शीतसहः धानी विरेचनः फलशाखी श्यामः करभवल्लभः कलभवल्लभः। च.सू.२अ. शिरोविरेचने। फलगुणाः—"पीलु श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत्। स्वादु तिक्तञ्च यत्पीलु तन्नात्युष्णं विदोषहृत्॥" भा. अभव.। मेहपित्तसन्निवातघ्नम्। अवि.१७अ.। स्वादुतिक्तकटूष्णं कफवातहरञ्च। "तिक्तं पित्तकरं तेषां सरं कटुविपाकि च। तीक्ष्णोष्णं कटुकं पीलु सर्व्वहृत् कफवातजित्॥" सु.सू.४६।३९अ.शिरोविरेचने। अस्य तैलं मूलकतैलगुणं। कच्छुकण्डाके। शरपुङ्खपुष्पे। किङ्किरातवृक्षे। अक्षोटवृक्षे। करतले। वै. निघ.। अस्थिखण्डविशेषे। हस्तिनि। पुष्पे। मे.। परमाणौ। त्रिका.। पियालवृक्षे। च.सू.४अ.। क्ली। पीलुफले। च.सू.२अ.वमने। काञ्चनद्वीपीय-गिरिजाक्षोड़फले। च.सू.३अ.कुष्ठादिप्रलेपे।
पीलुनी। स्त्री। मूर्व्वायाम्। रा.नि.व.३। च. द.परिणामशूले। "पीलुनी चिह्नता यथा।" कच्छुकण्डाके। वै.निघ.।
पीलुपत्रः। पुं। अश्मन्तकवृक्षे। चालिता गाछ। रा.नि.व.९। मीरटायाम् लताकरञ्ज। रा.नि.व.३।
पीलुपत्रा। स्त्री। चीरमीरटायाम्। वै.निघ.।
पीलुपर्णिका (र्णी)। स्त्री। औषधिविशेषे। मे.। मूर्व्वायाम्। गुगरा। र.मा.। वै.निघ.२भ. अ.स्मा.चि.। तुण्डिकायाम्। तेलाकुचा। रा. नि.व.२३। मीरटे। लताकरञ्ज। तच्छाकगुणाः —गुरु रूक्षं विष्टम्भाजीर्णकरं मधुरं शीतं मल-भेदनञ्च। च.सू.२७अ.।
पीलूषणा। स्त्री। पीलुफले। वै.निघ.।
पीवरः। पुं। कच्छपे। जटा.। वि। स्थूले।
पीवरा (री)। स्त्री। शालपर्य्याम्। शाल-पाणि। भा.पू.१भ.। अश्वगन्धायाम्। रा.नि.व.४। रसरत्नसमुच्चयोक्तौषधे। शतावर्य्याम्। र.मा.। ओलटकम्बल इति ख्याते वृक्षविशेषे। तद्गुणाः— "पीवरी योषिणी सा स्यात् योनिव्यापद्विनाशिनी। रजोदोषप्रशमनी प्रदरार्शोनिवारिणी॥"
पीवा। स्त्री। जले। उणा.।
पुंजातुकः। पुं। जीवनवृक्षे। जीवन गाछ।
पुंध्वजः। पुं। मूषिके। वै.निघ.।
पुंलक्षणा। स्त्री। पुरुषलक्षणायाम् नपुंसक-स्त्रियाम्। वै.निघ.।
पुंलिङ्गम्। क्ली। शिश्ने। हे.च.।
पुंवत्सा। स्त्री। पुरुषप्रसवित्र्याम्। च.शा.८अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुंडषः। पुं। गन्धमूषिके। छुँचो। त्रिका.।
पुंश्चलः। वि। कच्छूरोगिणि। खजो'। मे.।
पुंश्चिह्नम्। क्ली। शिश्ने। त्रिका.।
पुंसवनम्। क्ली। दुग्धे। संस्कारविशेषे।
पुंस्वम्। क्ली। शुक्रे। हे.च.। पुं। भूतृणे। गन्धतृणे। रा.नि.व.८।
पुंस्वदा। स्त्री। लक्ष्मणाकन्दे। वै.निघ.।
पुंस्वनाशनः। पुं। तृणभेदे। वै.निघ.।
पुंस्वविग्रहः। पुं। भूतृणे। सुगन्धतृणविशेषे। रा.नि.व.८।
पुक्कसी। स्त्री। नील्याम्। श.र.। पुष्पकलिकायाम्। मे.।
पुङ्खः (कः)। पुं। शरमूले। (कः) शरपुङ्खामूले। वन नीलेर मूल। रस.चि.।
पुङ्खिका। स्त्री। शरपुङ्खायाम्। वै.निघ.।
पुङ्गवः। पुं। ऋषभके। रा.नि.व.५। वृषे।
पुच्छः। पुं, क्ली। लाङ्गूले। अम.। पिच्छे। उणा.।
पुच्छकः। पुं। मेषभेदे। दुम्बा।
पुच्छटी। स्त्री। अङ्गुलिमोटने। त्रिका.।
पुच्छदा। स्त्री। लक्ष्मणाकन्दे। रा.नि.व.८।
पुच्छफलः। पुं। बदरीवृक्षे। प.मु.।
पुच्छमूलम्। क्ली। पुच्छमूलतो मांसलभागे। ज.द.२अ.
पुच्छा (च्छिका)। स्त्री। माषपर्ण्याम्। गायाणी। वै.निघ.।
पुच्छाधोभागलोहितः। पुं। पेचके। वै.निघ.। पेँचा।
पुच्छी (च्छिन्)। पुं। अर्कवृक्षे। आकन्द गाछ। रा.नि.व.१०। कुक्कुटे। श.च.।
पुञ्जदलम्। क्ली। सुनिषण्णकशाके। प.मु.।
पुटम्। क्ली। परिपेल्लतृणे। रा.नि.व.८। जातीफले। रा.नि.व.१२। कैवर्त्तमुस्तके। नेत्रपक्ष्मणि। पात्रे। छादने। अ.टी.भ.। पत्रपुटके। पात्रद्वयीभवसुखसंयोजने। पुं। अश्वखुरे। श.र.। गुग्गुलौ। लुण्ठने। त्रिका.। औषधपाकयन्त्रभेदे। पूटपाकेर यन्त्र। तत्सप्तभेदं—महापुटगजपुटवराहपुटकौक्कुटपुटकपोतपुटगोवरपुटभाण्डपुटभेदेन। एषां विशेषाः स्वस्वपर्य्याये स्मृताः। "वृहद्भाण्डे तुषैः पूर्णे मध्ये मूषां विधारयेत्। चिञ्चाग्निं सुदयेद्भाण्डं तद्भाण्डं पुटमुच्यते॥" भा.।
पुटकम्। क्ली। पद्मे। श.र.। नासारोगविशेषे। लक्षणं—"पित्तश्लेष्मावरुद्धोऽन्तर्नासायां शीर्षयेन्मरुत्। कफं सशुष्कपुटतां प्राप्नोति पुटकन्तु तत्॥" वा.उ.१८अ.।
पुटकन्दः। पुं। कीलकन्दे। रा.नि.व.७।
पुटकिनी। स्त्री। पद्मिन्याम्। हे.च.।
पुटग्रीवः। पुं। तामकुण्डे। मे.। गर्गर्य्याम्।
पुटपत्री। स्त्री। पत्रशाकभेदे। भैष.उपदंशचि.
पुटपाकः। पुं। पत्रपुटेन स्वरसद्रव्यकल्कपाके। जम्बादिपत्रैः कुड़वमितद्रव्यकल्कं वेष्टयित्वा रज्वादिना बद्ध्वा द्व्यङ्गुलम् एकाङ्गुलं वा द्व्यङ्गुष्ठपर्य्यन्तं वा सप्तलेपं कृत्वा अग्नौ दहेत् लेपस्य रक्ततादर्शनपर्य्यन्तम्। शार्ङ्ग.म.१अ। "पुटपक्वस्य द्रव्यस्य स्वरसो गृह्यते यतः। अतोऽयं पुटपाकः स्यात् विधानं तस्य कथ्यते। द्रव्यमापीथितं जम्बूवटपत्रादिसम्पुटे। वेष्टयित्वा ततो बद्ध्वा दृढं रज्वादिना तथा। सप्तलेपं द्व्यङ्गुलं कुर्य्यादथवाङ्गुलिमात्रकम्। दहेत् पुटान्तरादग्नौ यावल्लेपस्य रक्तता।" प.प्र.१ख.। मात्रा—पलमिती रसः कर्षमितमधुना पेयः। "पुटेन पच्यते यस्मात् पुटपाकस्ततो मतः। सुपिष्टं कुड़वं द्रव्यं वारिणा काञ्जिकेन च। पुटकान्तर्गतं बद्ध्वं सान्द्रपङ्केन लेपितं। अङ्गुष्ठमानतः पश्चाच्छोषयेन्नाग्निना बुधः॥ सिन्दूरवर्णतां प्राप्तं ग्राहयेत्तद्रसं शुभम्। शीतलेन रसावाप्तिर्भवेदिति विनिश्चितम्॥ पुटपाकस्य पाकोऽयं वह्निरारक्तवर्णता। पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत्। कल्कचूर्णद्रवाद्यास्य देया स्वरसवद् बुधैः॥" नेत्रप्रसाधनभेदे। "हे बिल्वे स्निग्धमांसस्य परद्रव्यपलं मतम्। द्रव्यस्य कुड़वोन्मानं सर्व्वमेकत्र पेषयेत्। तदैकत्र समालोड्य पत्रैः सुपरिवेष्टितम्। पुटपाकविधानेन तत्पश्चात्तद्रसं बुधः। तर्पणोक्तेन विधिना यथावदवधारयेत्॥" भा.।
पुटरागम्। क्ली। पत्राङ्गचन्दने। वकम् काँठ। रा.नि.व.१२। [प.मु.।
पुटलौहम्। क्ली। रुचकलौहे। (विटरी)।
पुटस्रावः। पुं। नासास्रावरोगे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटस्वेदः। पुं। बालुकापुटकैः स्वेदे। पुटि-स्वेद। "बालुकापुटकैः स्वेदः..." ज.द.१८अ.।

पुटा (टिका)। स्त्री। एलायाम्। हारा.। कौपीने। उः।

पुटालुः। पुं। कोलकन्दे। रा.नि.व.७।

पुटोदकः। पुं। नारिकेलवृक्षे। हारा.।

पुण्ड्रः (कः)। पुं। तिलकवृक्षे। जटा.।

पुण्ड्राह्वः। पुं। पुण्ड्रीकवृक्षे। पूंडरिया। वै.निघ.।

पुण्ड्रा (ड्रन्)। पुं। पुण्ड्रीके। पूंडरिया। वै.निघ.।

पुण्ड्रीकम्। क्ली। A white lotus. श्वेतकमले। श्वेतपद्मे। मं पाण्ड्रे कमले। कं विलियतावरे। तें तेल्लतामरे। तत्पर्य्यायाः,—सिताम्भोजं श्वेतपद्मं महापद्मं सिताम्बुजं। गुणाः—हिमं तिक्तं मधुरं पित्तघ्नं दाहघ्नं श्रमघ्नं रक्तघ्नं पिपासाघ्नञ्च। रा.नि.व.१०। "पुण्ड्रीकं स्वादु शीतं तिक्तं रक्तरुजापहम्। कफं दाहं श्रमं पित्तं नाशयेत्..। द्रव्य.गु.। भा.म.१भ.ज्व.चि.सुदर्शन-चूर्णे। सु.सू.३८अ.उत्पलादिः। सहस्रदलश्वेत-कमले। च.सू.४अ.। शालितण्डुले। श्वेतच्छत्रे। मे.। पुं। दमनकवृक्षे। दना। रा.नि.व.१०। दर्व्वीकरसर्पभेदे। राजिमच्छर्पविशेषे। सु.कल्प. ४अ.। व्याघ्रे। रा.नि.व.१९। शर्करायाम्। आज्ये। रा.नि.व.२३। श्वेतकुष्ठरोगे, श्वित्रे। "तच्छ्वेतं रक्तपर्य्यन्तं पुण्ड्रीकदलोपमं। सरागञ्चैव सोत्सेधं पुण्ड्रीकं कफोल्वणम्॥" मा.नि.। गजज्वरे। शालपर्णीपत्रवृत्ते खनामख्यातवृक्षे। पूंडरिया गाछ। गुणाः—नेत्रहितत्वम्। आम्र-वृक्षे। हे.च.। इक्षौ। वै.निघ.। शालिधान्यभेदे। गुणा.—शालिवत्। सु.सू.४६अ.। व्याघ्रे। कीश-कारे। मे.।

पुण्ड्रीकमुखी। स्त्री। निर्व्विषजलौकाभेदे। जोंक। सु.सू.१३अ.। See जलायुका।

पुण्ड्रीकाक्षः। पुं। भ्रवजातीयजलपक्षिभेदे। मांसगुणाः भ्रवशब्दे द्रष्टव्याः। सु.सू.४६अ.।

पुण्ड्रीयकम्। क्ली। स्थलपद्मे। शा.मा.। प्रपौण्डरीकवृक्षे। पूंडरिया। रा.नि.व.१२।

पुण्ड्र्यम्। क्ली। प्रपौण्डरीके। पूंडरिया। रा.नि.व.१२। तत्पर्य्यायाः,—पुण्ड्रीकं पुण्ड्री-काह्वं पौण्ड्रीकं प्रपौण्ड्रीकं पौण्ड्र्यं चक्षुष्यं तालपुष्पकं सालपुष्पं दृष्टिकृतं स्थलपद्मं सालकं शीतं श्रीपुष्पं सुपुष्पं सानुजं अनुजं। गुणाः—मधुरं तिक्तं शीतलं कषायं शुक्रलं वर्ण्यं पाके मधुरं चक्षुष्यं कफपित्तरक्तव्रणज्वरदाहतृष्णानाशकञ्च।

पुण्ड्रः (कः)। पुं। तिलकवृक्षे। तिलगाछ। रा.नि.व.१०। अतिमुक्तके। माधवी लता। रा. नि.व.२३। इक्षुभेदवृक्षे। रा.नि.व.९। प्रपौण्ड-रीके। पूंडरिया। क्रिमिभेदे। मे.। चित्रवर्णे इक्षुविशेषे। पूँड़ो आक्, छाँचि ईक्षु। मं पुण्ड्राऊस्। कं वासरकवृ। तत्पर्य्यायाः,—पुण्ड्रः रसालः इक्षुवाटी यौनिः इक्षुयौनिः रसाली रसदालिका करङ्गशालिः। गुणा.—अतिमधुरः शीतलः कफकरः पित्तघ्नः दाहहरः श्रमहरः रुच्यः अतिसन्तर्पणश्च। रा.नि.व.१४।

पुण्ड्रकः। स्त्री। माधवीलतायाम्। तिलक-वृक्षे, शुक्लजातीपुष्पवृक्षे। वै.निघ.।

पुण्ड्रशर्करा। स्त्री। पुण्ड्रकेक्षुभवशर्करायाम्। पूँड़ि आकेर चिनि। गुणाः—स्निग्धा चक्षुष्या रोचकेऽरोचके च हिता। रा.नि.व.१४। पञ्चविधेक्षु-शर्करायाम्। वै.निघ.।

पुण्ड्रसाह्वः। पुं। पुण्ड्रीकवृक्षे। पूंडरिया। वै.निघ.।

पुण्यगन्धः। पुं। महानागकेशरचम्पकवृक्षे। वि.का.। स्त्री। स्वर्णयूथिकायाम्। वै.निघ.।

पुण्यतृणम्। क्ली। सितदर्भे। श्वेत कुश। रा.नि.व.८।

पुण्यदर्शनः। पुं। चाषपक्षिणि। नीलकण्ठ।

पुण्यफलः। पुं। उदुम्बरे। श.मा.।

पुण्यसागरः। पुं। पुष्करमूले। वै.निघ.।

पुण्या। स्त्री। अश्वगन्धायाम्। वै.निघ.। तुलसी-वृक्षे। श.मा.।

पुत्ति(त्रि)का। स्त्री। पिङ्गलवर्णपृथुमधुमक्षिका-विशेषे। पिङ्गलवर्ण मौमाछि। अम.। यथा—"अन्नजा मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः।" रा.नि.व.१४।

पुत्रः (कः)। पुं। दमनकवृक्षे। पुत्र। सिंह-भेदे। मे.। मूषिकभेदे। तद्दृष्टे—"पुत्रकेणाङ्ग-सादश्च पाण्डुवर्णश्च जायते। चीयते ग्रन्थिभिश्चाङ्ग-माखुशावकसन्निभैः। शिरीषेक्षुदकल्कन्तु लिह्यात्तव

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधिकम्।" सु.कल्प.६अ.। स्त्री। कन्यकायाम्।

पुत्रकन्दा। स्त्री। लक्षणाकन्दे। रा.नि.व.७।

पुत्रघ्नी। स्त्री। योनिरोगविशेषे। लक्षणं यथा—"स्रवितं स्रवितं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात्।" सु.उ.। "रौक्ष्यादायुर्यदा गर्भं जातं जातं विनाशयेत्। दुष्टशोणितजं नार्याः पुत्रघ्नी नाम सा मता॥" च।

पुत्रजननी। स्त्री। पुत्रदावीलतायाम्। वै. निघ.। लक्षणाकन्दे।

पुत्रजी(ञ्जी)वः (कः)। पुं। (Putranjiva Roxburghii. Syn. Nagera putranjiva.) कोलापुरदेशे तन्नाम्ना प्रसिद्धे वृक्षविशेषे। जिया-पूता, पूतजिया। हिं पितौंजिया, जितापुत्र, पुत्रजीव। बं जिवनपुत्र। तै कव्वरजुवि। वम्. जीवनपुतर। तत्पर्य्यायाः,—गर्भकरः, जीवपुत्रकः, श्रीपदापहः, कुमारजीवः, पवित्रः, गर्भदः, सूतजीवकः। गुणाः—हिमः वृष्यः गर्भजीवदः चक्षुष्यः पित्तशमनः दाहतृष्णाघ्नश्च। रा.नि.व.९। रूक्षः स्वादुः गुरुः कटुः पटुः वातश्लेष्मघ्नः सृष्टमलमूत्रश्च। भा.। तत्फलगुणाः—"पुत्रजीवफलमज्जा शीततोयेन पेषयेत्। भोजने चाञ्जने पाने लेपः सर्व्वविषापहः॥" रस.र.विष चि.।

पुत्रदा। स्त्री। वन्ध्याकर्कोट्याम्। लक्षणामूलि, पुत्रदावीलतायाम्। रा.नि.व.२३। श्वेतकण्टकारिकायाम्। जीवन्त्याम्। वै निघ.।

पुत्रदात्री। स्त्री। वन्ध्याकर्कोटिकायाम्। मालवदेशे स्वनाम्ना प्रसिद्धे लताविशेषे। पूजदांत्री, पूत्रदांत्री लता। तत्पर्य्यायाः,—वातारिः भ्रमरी श्वेतपुष्पिका वृत्तपत्रा अतिगन्धालुः वेणीजाता सुवल्लरी। गुणाः—कटूष्णा वातकफघ्नी सुरभिः सदा पथ्या वन्ध्यादोषहरी च। रा.नि.व.३।

पुत्रपिच्चटम्। क्ली। रङ्गे। राङ्। र.मा.।

पुत्रप्रदा। स्त्री। चुरिकावृक्षत्याम्। वन्ध्याकर्कटिकायाम्। वै.निघ.। [नि.व.३।

पुत्रभद्रा। स्त्री। वृक्षजीवन्तीलतायाम्। रा.

पुत्रमञ्जरिः (री)। स्त्री। पुत्रदावृक्षाम्। भा.म.४भ.योनि.रो.चि.। "पुत्रमञ्जरिमूलम्।"

पुत्रमार्ज्जारी। स्त्री। जीवपुत्रके। जीयापूता।

पुत्रशृङ्गी। स्त्री। अजशृङ्ग्याम्। मेढ़ाशिङी। रा.नि.व.९।

पुत्रश्रेणिका। स्त्री। भूम्यामलक्याम्। भुँई आमला। वै.निघ.।

पुत्रश्रेणी। स्त्री। कृष्णदन्तीवृक्षे। काल दन्ती। र.सा.। अजशृङ्ग्याम्। काँकड़ाशृङ्गी। रा.नि.व.९। सूषिकपर्ण्याम्। इन्दुरकर्णी। रा.नि.व.३। सु. कल्प.७अ.।

पुत्रिका। स्त्री। यावतूलके। आलूता।

पुत्रिणी। स्त्री। वन्द्यायाम्। मान्दरा। नकुल. १२अ.। प्रमेहपिड़काविशेषे। तस्या लक्षणं—"महत्यल्पाचिता ज्ञेया पिड़का सा तु पुत्रिणी।" सु.नि.६अ.।

पुन्नलम्। क्ली। गन्धतृणे। गन्धकृण, रामकर्पूर। रा.नि.व.८। पुं। शरीरे। आत्मनि। विका.।

पुनःखुरी (इन्)। पुं। अश्वस्य पादरोगभेदे। लक्षणं—"प्रसरन्ति खुरा यस्य अथवा पादुकोपमाः। पुनःखुरीति तं विद्यादश्वं विह्वलगामिनम्॥" ज.द.३९अ.।

पुनर्नवः। पुं। नखे। नख। रा.नि.व.१८।

पुनर्नवा। स्त्री। (Boerhaavia diffusa. Syn. Procumbens anderecta. or B. Diandra.) स्वनाम्ख्यातपत्रशाकभेदे। श्वेत पुनर्णा, गदापूर्णा। हिं शान्त। मं पाण्डरीघेण्टुलो, रक्तघेण्टुलो। कं बिलियदुवेल्लड़किलु, कॆंपिनवेल्लड़किलु। तै अतिकममेदि। ता. मुकरत्ते किरै। वम्. पुनर्नरा। च.सू.२८अ.। सा त्रिधा श्वेता रक्ता नीला चेति। श्वेतायाः पर्य्यायाः,—वृश्चीरा चिरोटिका वर्षाक्षी वर्षाह्वी विशाखः कण्टिल्लः शणिवाटिका पृथ्वी सितवर्षाभूः घनपत्रः कण्टिलकः। रक्तायाः पर्य्यायाः—शोथघ्नी वर्षाभूः प्राव्हषायणी कण्टिलकः रक्तपुष्पा। निलायाः पर्य्यायाः,—निलाटिका क्षुद्रवर्षाभूः वर्षकेतुः। तत्र श्वेतागुणाः—"श्वेता पुनर्नवा शीता तिक्ता कफविषापहा। कासहृद्रोगशूलास्रपाण्डुशोफानिलार्त्तिनुत्॥ रक्ता पुनर्नवा तिक्ता सारिणी शोफनाशिनी। रक्तप्रदरदोषघ्नी पाण्डुपित्तप्रमर्दिनी॥" रा.नि.व.५। "पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका। कटुः कषायोऽरुचिशूलःपाण्डुहृद्दीपनी परा। शोफानिलगरश्लेष्महरी ब्रह्मोदरप्रणुत्। पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः। वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी॥" भा.पू.। तच्छाकगुणाः—पुनर्नवा तु वीर्य्योष्णा भेदिनी च रसायनी।" राज. २

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प. । मूलक्वाथः मेदकः उदरामयघ्नः शीतलः विशेषेण श्वासे हितः अधिकमात्रया वान्तिकरः। पत्रप्रदेहः व्रणनाड्यां हितश्च।

पुनर्नवागुग्गुलुः। पुं। वातरक्ते गुग्गुलौ। शुक्लपुनर्नवामूलं १०० प. एरण्डमूलं १०० प. गुडूची १६ प. गुग्गुलुः ८ प. एकत्र कुट्टयेत्। क्वाथार्थं—जलं ३२ वा ६४ श. शे. ८ श.। गालयित्वा तत्र एरण्डतैलं ॥० श. दत्त्वा पुनः पचेत् पाकसिद्धे अवतार्य्य निहृच्चूर्णं ५ प. दन्तीमूलचूर्णं १ प. गुडूचीचूर्णं २ प. त्रिफला त्रिकटु चित्रक-सैन्धवभल्लातकविड्ङ्गानां प्र. चूर्णं १॥० प. स्वर्णमाक्षिकं २तो. पुनर्नवाचूर्णं १प. प्रक्षेप्यम्। श्वेत पुनर्नवा मूल १०० प. एरण्डमूल १००प. शुंठ १६प. गुग्गुलु ८प. एकत्र कुटिवे। क्वाथार्थ जल ३२ श. शे. ८ श.। छाँकिया एरण्ड-तैल ॥० श. दिया पुनः पाक करिवे। पाक शेष हइले नामाइया तेउड़ीचूर्ण ५ प दन्तीमूलचूर्ण १ प. गुलञ्चचूर्ण २ प. त्रिफला १॥० प. त्रिकटुचूर्ण १॥० प. चितामूलचूर्ण १॥० प. सैन्धव, भेला, विड़ङ्गचूर्ण प्रत्येक १॥० प. स्वर्णमाक्षिक २ तो. पुनर्नवामूलचूर्ण १ प. प्रक्षेप दिवे। भा.।

पुनर्नवाद्यघृतम्। क्ली। शोथाधिकारे घृतम्। पाठः—पुनर्नवाचित्रकदेवदारुपञ्चोषणचारहरीतकीनाम्। कल्केन पक्वं दशमूलतोये घृतोत्तमं शोथनिसूदनञ्च॥" दशमूलं मिलित्वा ६० प. जलं ५१२ प. शे. १२८ प. घृतं ३२ प.। कल्कार्थं—पुनर्नवामूलं चित्रकमूलं देवदारु पञ्चकोलं यवक्षारः हरीतकी प्र.८ तो.। रस.र.।

पुनर्नवाष्टकः। पुं। शोथे कषायः। पाठः—"पुनर्नवानिम्बपटोलगुडूचीत्रिफासप्तपादार्ब्बभया-कषायः। सर्व्वाङ्गशोथोदरपार्श्वशूलश्वासान्वितं पाण्डुगदं निहन्ति॥" भैष.शोथ.चि.।

पुनर्भवः। पुं। नखे। रा.नि.व.१८। रक्त-पुनर्नवायाम्। रा.नि.व.५।

पुनर्भूः। स्त्री। पुनर्नवायाम्। घीलै। वै.निघ.।

पुन्नागम्। क्ली। पुन्नागपुष्पे। देववल्लभे राज-चम्पकमिति लोके। सु.सू.३८अ.एलादिः। ङ.।

पुन्नागः। पुं। (Calophyllum inophyllum.) Alexandrian Laurel. स्वनाम-ख्यातपुष्पवृक्षे। दक्षिणापथे सुरपतिनाम्ना प्रतीतः। सु.सू.३८अ.एलादिः। पुनाग गाछ, राजचम्पक। हिं सुलतानचम्पक। मं पुन्नाग। कं सुरहोन्नेरभेद। तें सुरपोन्नचेट्टु। उत्. पुण्णा। वम्. ऊदि। ता. पिन्नय। तत्पर्य्यायाः,—पुरुषः तुङ्गः केशरः देववल्लभः अरुणकेशरः केसरी काम्बोजः नागपुष्पः कुम्भीकः रक्तकेशरः पाण्ड्रनागः पुन्नामा पाटलद्रुमः, रक्तपुष्पः रक्तरेणुः। गुणाः—कषायः कफरक्तघ्नश्च। राज.। मधुरः शीतः सुगन्धिः पित्तघ्नः भूतविद्रावणः। रा.नि.व.१०। वा.सू.१५अ.। जातीफले। शुक्ल-पद्मे। श्वेतहस्तिनि। मे.। तिलपुष्पवृक्षे।

पुन्नागकेशरम्। क्ली। पुन्नागपुष्पकिञ्जल्के। सु.सू.३८अ.एलादिः।

पुन्नागपुष्पम्। क्ली। पुन्नागकुसुमे। वै.निघ.।

पुन्नाटः (ड़ः)। पुं। चक्रमर्दे। रा.नि.व.४।

पुन्नामा (न्)। पुं। पुन्नागवृक्षे। रा.नि.व.१०।

पुप्पटः। पुं। दन्तपुटगतरोगे। तालुरोगे। निदा.।

पुप्फुलः। पुं। जठरवाते। निदा.।

पुप्फुसः। पुं। वामपार्श्वस्थमलाशये, कोष्ठे। फुस्फुस, फोँपड़ा, फुलघड़ा। शा.च.।

पुमान्। पुं। पुन्नागवृक्षे। रा.नि.व.१०। पुरुषे। जीवात्मा। च.।

पुरम्। क्ली। दाहागुरुणि। रा.नि.व.१२। शरीरे। रा.नि.व.१८। नागरमुस्तायाम्। र.मा.। चर्म्मणि। शा.र.। पुं। गुग्गुलौ। गुग्गुल। रा.नि.व.१२। च.द.ज्व.चि.अपराजिताधूपे, चन्द्र-प्रभागुग्ग्याम्। शल्लकीनिर्य्यासे। वै.निघ.। पीत-भिण्ड्याम्। शा.च.।

पुरच्छ(श्छ)दः। पुं। उलपे। उलू खड़। स्तनाग्रे। वै.निघ.।

पुरटम्। क्ली। सुवर्णे। विदग्धमाधवः।

पुरन्दरम्। क्ली। चविकायाम्। शा.च.। मरिचे। वै.निघ.।

पुरमथनवल्लभः। पुं। दाहागुरुणि। रा. नि.व.१२। [व.१२।

पुरा। स्त्री। सुगन्धद्रव्ये, सुरामांस्याम्। रा.नि.

पुराणः (तनः)। वि। प्राचीने।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुराणकिट्टम् । क्ली । खोहमले । मण्डूर । वै.निघ. । पाण्डु.चि. महिषसिंहमूत्रे ।

पुराणघृतम् । क्ली । दशाब्दिकगोघृते । र. मा. । गुणाः—"सदापस्मारमूर्च्छादिशिरःकर्णाक्षिजा रुजः । सर्पिः पुराणं जयति व्रणशोधनरोपणम् ॥" रा.नि.व.५ । "उद्यगन्धं पुराणं स्याद् दशवर्षस्थितं घृतम् ।" अन्ये पुनर्वर्षातीतं पुराणमुच्यते । "अल्पाभिष्यन्दि मधुरं बल्यं संवत्सरोषितं । अल्पक्लेदञ्च दीपानां पुराणं तत्प्रकीर्त्तितम् ।" सि.यो.उ.चि. ।

पुरातनगुडः । पुं । प्राचीनगुड़ । पुराण गुड़ । गुणाः—पित्तघ्नः वातरोगघ्नः विदोषघ्नः रुच्यः हृद्यः संयोगेन ज्वरहरः तापघ्नः विष्मूत्रशोधनः अग्निकरः पाण्डुप्रमेहघ्नः स्निग्धः स्वादुतरः लघुः श्रमघ्नः पथ्यश्च । रा.नि.व.१४ ।

पुरातनधान्यम् । क्ली । संवत्सरायुषिते धान्ये । पुराण धान । तच्च लघु अनभिष्यन्दि । उक्तञ्च "वर्षातीतं सर्व्वमन्नं परित्यजति गौरवम् ॥" वा.सू. ६अ.हेमाद्रिः शिम्बीधान्यवर्गे । [रा.नि.व.४ ।

पुरास (सि) णी । स्त्री । महाबलायाम् ।

पुराह्वयः । पुं । गुरुगुली ।

पुरीतत् । क्ली । अन्त्रे । रा.नि.व.१८ ।

पुरीमोहः । पुं । धुस्तूरवृक्षे । भ.मा. ।

पुरीषम् । क्ली । विष्ठायाम् । रा.नि. व.१८ । यथा—शेषं किट्टञ्च यत्तस्य तत् पुरीषं निगद्यते । समानवायुना नीतं तत्तिष्ठति मलाशये । सूक्ष्मोपस्थमार्गेण पुरीषं गुदमार्गतः । अपानवायुना क्षिप्तं वहिर्याति शरीरतः ॥" भा. ।

पुरीषकृमिः । पुं । विष्ठाजातकृमौ । मा.नि. ।

पुरीषणः । पुं । विष्ठायाम् । विका. ।

पुरीषधरा । स्त्री । तन्नामकपञ्चमकलायाम् । यान्तःकीष्ठे मलमभिविभजते पक्वाशयश्चा । सु. शा.४अ. ।

पुरीषधानम् (धाधारः) । क्ली, पुं । मलाधारनाड्याम् । मलाधाररूपकीष्ठाङ्गे । उण्डुके । च.शा.७अ. ।

पुरीषमः । पुं । माषे । माषकलाये । विका. ।

पुरीषवहस्रोतः । क्ली । मलवहनाड्याम् । तस्य मूलं पक्वाशयः स्थूलगुदश्च । च.वि.५अ. ।

पुरीषसङ्गः । पुं । मलरोधे । च.सिद्ध.२अ.

पुरीषोष्णता । स्त्री । पित्तजन्यरोगे । भा. ।

पुरुदम् । क्ली । स्वर्णे । मेघ.भग.चि.व्रणगजाङ्कुशे ।

पुरुदंशकः । पुं । हंसे । विका. ।

पुरुभोजाः (स) । पुं । सर्षे ।

पुरुषः । पुं । चेतनाधातौ । आकाशादिपञ्चकं चेतनाधातवश्चेति तन्मयः पुरुषसंज्ञः । चित्यादिचतुर्विंशतितत्त्वात्मकः पुरुषसंज्ञः । च.शा.१अ. । "अत्र कर्म्मफलञ्चैव ज्ञानञ्चैव प्रतिष्ठितं । अत्र मोहः सुखं दुखं जीवितं मरणं तथा । एवं यो वेद तत्त्वेन स वेद प्रलयोदयौ ॥" च. । "चेतनावान् निर्गुणः अप्रसवधर्म्मी बीजधर्म्मी मध्यस्थधर्म्मी चेति ।" भा.पू.१भ. । पुन्नागवृक्षे । पूनाङ् । रा.नि.व.१० । पारदे । रस.र.वृद्धि.चि.एकादशाध्याये । गुरुगुलौ । रस.र.व्रणगजाङ्कुशे । तिलके । चीरमोरटभेदे । वै.निघ. । कुम्भीरे । तुङ्गे । पञ्चमहाभूतशरीरिसमवाये । सु.सू.१अ. । चेतनायुक्तात्मनि । सु.शा.३अ. ।

पुरुषत्वम् । क्ली । पुंस्त्वे । मैथुनसामर्थ्ये ।

पुरुषदन्तिका । स्त्री । मेदायाम् । रा.नि.व.४ ।

पुरुषपुण्डरीकः । पुं । पुंव्याघ्रे ।

पुरुषव्याधिः । पुं । उपदंशे । भा. । [निघ. ।

पुरुषक्षीरमोरटः । पुं । मोरटायाम् । वै.

पुरुषाख्यः । पुं । पुन्नागपुष्पवृक्षे ।

पुरुहूतः । पुं । इन्द्रयवे । वै.निघ. ।

पुरोगतिः । पुं । कुक्कुरे । धरणिः ।

पुरोडास् (ड़ाश्) । पुं । घृते । विका. । पिष्टकचमस्याम् । सीमलतारसे । हे.च. । यवचूर्णनिर्म्मित-रोटिकायाम् ।

पुरोतो । स्त्री । खनामख्यातवृक्षभेदे । सुदर्शना ।

पुरोह्वा । स्त्री । महामेदायाम् । र.मा. ।

पुलकः । पुं । रोमाञ्चे । विका. । मणिदोषे । शिलाभेदे । हरितालै । मे. । सर्षपभेदे । वै.निघ. । क्ली । कङ्कुष्ठे । गिरिमाटीविशेषे । रा.नि.व.१३ ।

पुलकी (इन्) । पुं । धाराकदम्बे । केलिकदम्बे । रा.नि.व.९ ।

पुलाकः । पुं । तुषे । र.मा. । तुच्छधान्ये । आंगड़ा । अन्नसिक्थके । अम.भ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुलाकी (इन्) । पुं । वृक्षे । हे.च. ।

पुलिकिरः । पुं । सर्पे । वै.निघ. ।

पुलोमा । पुं । वचायाम् । वै.निघ. ।

पुलोमजो । स्त्री । अहिफेने । वै.निघ. ।

पुषा । स्त्री । लाङ्गलीवृक्षे । शा.च. ।

पुष्करम् । क्ली । पुष्करमूले । अभावे कुष्ठं यात्रां । सि.यो.सा.ज्व.अभ्यङ्गे । भा.म.ज्व.चि.विश्वादियोगे । जले । रा.नि.व.१४ । कुष्ठे । कुड़ । अम. । रसाञ्जने । कन्दविषभेदे । "पुष्करं पुष्पराकारं ।"

पुष्करः । पुं । पद्मकन्दे । वै.निघ. श्वास चि. शुण्ठ्यादिचूर्णे । सारसपक्षिणि । मे. । सर्पे । कुष्ठभेदे । वै.निघ. ।

पुष्करकम् । क्ली । पुष्करमूले । चि.क.क.१ स्तवकः ।

पुष्करजटा । स्त्री । पुष्करमूले । सि.यो.हि. श्वास.चि. । च.द.कास.चि. ।

पुष्करणी । स्त्री । क्षुद्रजलाशये, पल्वले । वै.निघ. । तज्जलगुणाः—"पाल्वलं गुर्व्वभिष्यन्दि विष्टम्भि दोषलं परम् ।"

पुष्करनाड़ी । स्त्री । स्थलपद्मिन्याम् । रा.नि.व.५ ।

पुष्करपर्णिका (र्णी) । स्त्री । स्थलपद्मिन्याम् । रा.नि.व.५ ।

पुष्करमूल(क)म् । क्ली । The root of Alpotaxis auriculata. कुष्ठभेदे । कूड़विशेष । च.सू.४अ. । पुष्करदेशे स्वनाम्ना प्रसिद्धे मूले । पातालपद्मिनीति ख्याते काश्मीरदेशप्रसिद्धे कन्दविशेषे । पूकरमूल । हिं पौहीकरमूली । तें पुष्करदेशंलोप्रसिद्धमैन औषधिविशेषमु । तत्पर्य्यायाः, —पद्मवर्णकं पद्मपर्णं पद्मपत्रकं मूलं पुष्करं पद्मपर्णकं पुष्करिणी वीरं पौष्करं पुष्कराख्यं पुष्कराह्वयं पुष्करसागरः पुष्करूहं काश्मीरं ब्रह्मतीर्थं श्वासारि मूलपुष्करं पुष्करजटा पुष्करशिफा । गुणाः—कटुतिक्तोष्णं कफवातज्वरापहं श्वासकासारोचकघ्नं शीफपाण्डुहरञ्च । रा.नि.ध.६ । "पुष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् । हन्ति शीघ्रारुचिश्वासान् विशेषात् पार्श्वशूलनुत् ।...पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥" भा.पू.१भ.ह.व. । वीजगुणाः रसपाकयोर्मधुरम् । च.सू.२७अ. । पद्ममूले । च.द. शठ्यादौ । च.द.गुल्म.चि.हिक्कादौ ।

पुष्करवीजम् । क्ली । पुष्करमूले । रा.नि.व.६ । पद्मवीजे ।

पुष्करव्याघ्रः । पुं । गजे । वै.निघ. ।

पुष्करशायिका । स्त्री । प्लवजातीयजलविहङ्गमभेदे । वै.निघ. ।

पुष्करशिफा । स्त्री । पुष्करमूले । रा.नि.व.६ ।

पुष्करसागरः । पुं । पुष्करमूले । वै.निघ. ।

पुष्करस्रजौ । पुं । अश्विनीकुमारयौ । शु.र. ।

पुष्कराङ्घ्रिज(क)म् । क्ली । पुष्करमूले । वै.निघ. ।

पुष्करा(ख्य)द्यम् । क्ली । पुष्करमूले । वै.निघ. ।

पुष्कराद्या । स्त्री । स्थलपद्मिन्याम् । रा.नि.व.५ ।

पुष्कराह्वम् । क्ली । पुष्करमूले । सि.यो.काश्म. चि.दशमूलघृते ।

पुष्कराह्वः (यः) । पुं । सारसपक्षिणि । अम. । च.सू.२७अ. । क्ली । पुष्करमूले । रा.नि.व.६ । (कम्) च.द.मद.व.११ ।

पुष्करिका । स्त्री । शूकरीरोगविशेषे । लक्षणं यथा—"पित्तशोणितसम्भूता पिड़का पिड़काचिता । पद्मपुष्करसंस्थाना ज्ञेया पुष्करिकेति सा ॥" सु.नि. १४अ. । वा.उ.३३अ. ।

पुष्करिणी । स्त्री । स्थलपद्मिन्याम् । स्थलपद्म । रा.नि.व.५ । पुष्करमूले । स्वल्पजलाशये । अम. । हस्तिन्याम् । पद्मिन्याम् । मे. ।

पुष्करूहम् । क्ली । पुष्करमूले । वै.निघ. ।

पुष्कलं । क्ली । अष्टकुञ्चि-परिमाणे ।

पुष्कलकः । पुं । गन्धमृगे । कस्तूरी-मृग । गन्ध गोकुल । मे. ।

पुष्टिः (दा) । स्त्री । अश्वगन्धायाम् । रा.नि. व.४ । हड्डी । वृद्धिनामक ओषधि । मे. । रा.नि. व.५ । (पुष्टिः) पोषणे ।

पुष्टिका । स्त्री । सुक्तायुक्तौ । कस्तूरी । रा.नि. व.१३ । र.सा.सं.रसकर्पूरे ।

पुष्प(क)म् । क्ली । कुसुमे । फूल । तत्पर्य्यायाः, —प्रसूनं कुसुमं सुमनसः सूनं प्रसवः सुमनः । नरशरीरे पुष्पगन्धरूपारिष्टचिह्ने । च.इ.२अ. । तिलकपुष्पे । पुष्परेणौ । पुष्पमधुनि । मदनकुसुमे । नागनाकेसर । पूगफले । वै.निघ. । नेत्ररोगभेदे । फूली । हे.च. । स्त्रीरजसि । तच्च शुद्धाशुद्ध-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वाद्विविधं—तयोः गुरुं फलति अगुरुश्च न फलति। तयोर्लक्षणे—"गुणाढ्यकप्रतिमं यत्तु यद्वा लाक्षारसोपमं। तदार्त्तवं प्रशंसन्ति यदासौ न विरञ्जयेत्। तदेवातिप्रसङ्गेन प्रवृत्तमनृतावपि। असृग्दरं विजानीयादतोऽन्यद्रक्तलक्षणात्।" "तथार्त्तवमपि विभिर्दोषैः शोणितचतुर्थैः पृथग्द्वन्द्वसमस्तैश्चोपसृष्टमबीजं भवति तदेव दोषवर्णवेदनादिभिर्ज्ञेयम्।" सु.शा.२अ.। "यस्या वातहतं पुष्पं फलं तस्या न विद्यते। अतः शुष्कश्च कृसुमं मेदोदूषसमन्वितं। कटीशूलं योनिशूलं बहुरक्तञ्च दृश्यते। यस्याः पित्तहतं पुष्पं फलं तस्या न विद्यते। जन्म फलसमञ्चोष्णं तस्या वहति शोणितं। कटीशूलं सहञ्चैव उदरे शूलमेव च। यस्याः श्लेष्महतं पुष्पं फलं तस्या न विद्यते। बहुलं पिच्छिलं स्निग्धं घनं स्रवति शोणितं। योनौ नाभौ तु शूलानि ऋतौ परमदारुणम्॥" इति। रस.र.। पुष्पाञ्जने। भैष. भग. चि. व्रणगजाङ्कुशे। रसाञ्जने। हे.च.। सु.सू.३६अ.। रस.र.व्रणगजाङ्कुशे। पुष्करमूले। वै.निघ.हिक्काचि.। लवङ्गे। वै.निघ.२भ.अ.च.चि. शुण्ठ्यादिचूर्णे। (कम्)। लौहकांस्ये। मे.। काशीसे। शिरेकम्। हे.च.। पुं (कः)। निर्विषसर्पविशेषे। सु.कल्प.४अ.। धान्यभेदे।

पुष्पकासीश(क)म्। क्ली। किञ्चित्पीतकाशीसे। शिरेकसविशेष, ईषत् पीतवर्ण शिरेकम्। तत्पर्य्यायः,—नयनौषधं कंसकं नेत्रौषधं वत्सकं मलीमसं क्षरं विषदं नीलसप्तिका। "द्वितीयं पुष्पकाशीषमसितञ्च सितञ्च तत्।" रा.मा.। "काशीशं धातुकाशीशं पांशुकाशीसमित्यपि। तदेव किञ्चित्पीतन्तु पुष्पकाशीशमुच्यते॥" गुणाः—"काशीसमम्लमुष्णञ्च तिक्तञ्च तुवरं तथा। वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत्। सूचक्षच्छाश्मरीश्वित्ननाशनं परिकीर्त्तितम्॥" भा.पू.१भ.घा.व.४भ. उपदंशचि.। "पुष्पकाशीषकं तिक्तं शीतं नेत्रामयापहं। लेपेनात्यामकुष्ठादिनानात्वदोषनाशनम्॥" रा.नि.व.१३।

पुष्पकीटः। पुं। भ्रमरे। त्रिका.।

पुष्पकेतुः। पुं। पुष्पाञ्जने। रा.नि.व.१३।

पुष्पगणः। पुं। पुष्पवर्गे। यथा—"चतुर्द्धा स्थलपद्मानि सेवती गुलदावती। नेपाली च गुलाबस्य गुलाबासस्य दक्षिणी। जाती यूथी राजवल्ली क्षुद्रयूथी त्रिधा मता। चम्पकी नागचम्पस्य वकुलस्य कदम्बकः। कुन्दस्य शिवमल्ली च द्विकुजः केतकी द्विधा। किञ्जिरातः कर्णिकारो द्वाणीकी बाणपुष्पकम्। कुरुण्टकस्तुर्धा च तिलकी सुचुकुन्दकः। बन्धूकस्य चतुर्धा स्याज्जपा द्विधा वसुन्धरी। अगस्तिर्दमनी मारुः पयरी बहुवर्णिका। द्विःपाटलः सूर्य्यमुखी द्वाशः पुष्पगणस्त्वयम्॥" अर्क.चि.।

पुष्पगन्धः। पुं। यवनालद्रुवे। वेतसद्रुवे। वै.निघ.।

पुष्पगन्धा। स्त्री। गुल्कयूथिकायाम्। वै.निघ.।

पुष्पगवेधुका। स्त्री। नागबलायाम्। वै.निघ.।

पुष्पघातकः। पुं। वंशे। श.मा.।

पुष्पचामरः। पुं। दमनकद्रुवे। त्रिका.। केतकद्रुवे। श.मा.।

पुष्पजः। पुं। पुष्पद्रवे। फूलेर रस, गोलाप जल आदि। रा.नि.व.१०। पुष्पमधुनि। स्त्री। पुष्पशर्करायाम्। वै.निघ.।

पुष्पजासवः। पुं। पद्माद्येकादशपुष्पोत्थासवेषु। च.सू.२५अ.। "पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्रसधूकप्रियङ्गुधातकीपुष्पदशमाः पुष्पासवा भवन्ति।"

पुष्पदः। पुं। द्रुवे। हे.च.।

पुष्पदर्शनम्। क्ली। रजोदर्शने। च.शा.८अ.।

पुष्पद्रवः। पुं। पुष्पजातरसे। फूलेर रस, गोलाप जल प्रभृति। तत्पर्य्यायः,—पुष्पसारः पुष्पस्वेदः पुष्पजः पुष्पाम्बुजः। गुणाः—सुरभिः शीतः कषायः गौल्यः दाह-श्रम वमि-मोह-मुखरोगघ्नश्च। रा.नि.व.१०। मधुनि।

पुष्पनिर्यासः (क.)। पुं। पुष्पोत्थद्रवे। फूलेर रस, गोलाप जल प्रभृति वा मधु। रा.नि.व.१०।

पुष्पनि(लि)क्षः। पुं। भ्रमरे। भ्रमर। श.च.।

पुष्पन्धयः। पुं। भ्रमरे। रा.नि.व.१०।

पुष्पपथः। पुं। योनौ, भगे। त्रिका.। [अ.।

पुष्पपाण्डुः। पुं। मण्डलिसर्पभेदे। सु.कल्प.४

पुष्पपिण्डः। पुं। अशोकद्रुवे। वै.निघ.।

पुष्पफलः। पुं। कपित्थद्रुवे। भा.। स्त्री। अर्ज्जुनद्रुवे। कुष्माण्डादौ। भा.पू.शा.व.।

पुष्पफलशाकः। पुं। पुष्पशाकफलशाकभावे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलाब्वादौ। गुणाः—"पित्तघ्नान्यनिलं कुष्माण्डयया मन्दकफानि च। सृष्टमूत्रपुरीषाणि स्वादुपाकरसानि च॥"

पुष्पफला। स्त्री। कुष्माण्डलतायाम्। वै.निघ.।

पुष्पफलोद्भवः। पुं। कुष्माण्डादौ।

पुष्पमञ्जरिका। स्त्री। इन्दीवरालतायाम्। नीलपद्मिन्याम्। वै.निघ.।

पुष्पमञ्जरी। स्त्री। घृतकरञ्जे। घोड़ाकरञ्ज। वै.निघ.।

पुष्पमासः। पुं। वसन्तसमये। रा.नि.व.२१।

पुष्पमृत्युः। पुं। देवनलवृक्षे। वै.निघ.।

पुष्परक्तः। पुं। सूर्य्यमणिवृक्षे। श.च.।

पुष्परजः। क्ली। मकरन्दे। पुष्पपरागे। वै.निघ.।

पुष्परसः। पुं। मधुनि। शहद। रा.नि.व.१४। च.द.कासचि. अगस्त्यहरीतक्याम्। मकरन्दे। अम.। [१४।

पुष्परसाह्व(य)म्। क्ली। मधुनि। रा.नि.व.

पुष्परसोद्भवम्। क्ली। मधुनि। वै.निघ.।

पुष्परागः। पुं। पीतवर्णस्फटिकविशेषे। पोखराज इति लोके। तत्पर्य्यायाः,—पुष्पराजः मञ्जुमणिः वाचस्पतिवल्लभः पीतः पीतस्फटिकः पीतरत्नः पीताश्मा गुरुरत्नं पीतमणिः। वै.निघ.२भ.चय.चि.नवरत्नराजसृगाङ्के। गुणाः—अस्त्रः शीतलः वातघ्नो दीपनः। धारणात् आयुः श्रियं प्रज्ञाञ्च करोति। रा.नि.व.१३। रसाञ्जने। रस.र. एकादशाध्याये।

पुष्परेणुः। पुं। पुष्परागे। श.र.।

पुष्परोचनः। पुं। नागकेशरवृक्षे। त्रिका.।

पुष्पवती। स्त्री। रजस्वलायाम्। अम.।

पुष्पवर्षिणी। स्त्री। निर्गुण्ड्याम्। वै.निघ.।

पुष्पवल्लभः। पुं। मल्लिकापुष्पवृक्षे। प.मु.।

पुष्पविट् (ड्)। पुं। भ्रमरे।

पुष्पविषम्। क्ली। वेत्रादिपञ्चसु। "वेत्रकादम्बवल्लिजकरञ्जमहाकरञ्जानीति पञ्च।" सु.कल्प. २अ.। गुणाः—छर्दिराध्मानं मूर्च्छनञ्च। "भवेत् पुष्पविषैश्छर्दिराध्मानं मूर्च्छनं तथा।" भा.म.४भ. विष.चि.। [कल्प.४अ.।

पुष्पशकली। पुं। निर्विषसर्पविशेषे। सु.

पुष्पशर्करा। स्त्री। पुष्पोद्भूतशर्करायाम्। फूलेर चिनि। गुणाः—स्वादुः हृद्या शीतला गुरुः पित्तरक्तघ्नी च। वै.निघ.।

पुष्पशून्यः। पुं। उदुम्बरवृक्षे। रा.नि.व.११।

पुष्पसमयः। पुं। वसन्तकाले। अम.।

पुष्पसाधारणः। पुं। वसन्तसमये।

पुष्पसारः। पुं। पुष्पद्रवे। फूलेर रस, गोलाप जल आदि, वा मधु। रा.नि.व.१०।

पुष्पसिता। स्त्री। सितशर्करायाम्। वै.निघ.।

पुष्पसौरभा। स्त्री। कलिकारिवृक्षे। विषलाङ्गुलिया। रा.नि.व.४।

पुष्पस्वेदः। पुं। पुष्पद्रवे। फूलेर रस, वा मधु। रा.नि.व.१०।

पुष्पहासा। स्त्री। ऋतुमत्यां स्त्रियाम्। श.च.।

पुष्पहीना। स्त्री। उदुम्बरवृक्षे। श.च.। रजःशून्यायाम्। हे.च.।

पुष्पा (ष्पा)। स्त्री। वृहच्छतपुष्पायाम्। शुल्फा। वै.निघ.। रा.नि.व.४।

पुष्पाख्यम्। क्ली। पुष्पकासीसे।

पुष्पाञ्जनम्। क्ली। कृत्रिमाञ्जने। गुणाः—"पुष्पाञ्जनं हिमं प्रीक्तं पित्तश्लिक्ष्मा प्रदाहनुत्। नाशयेद्दृष्टिकासार्त्तिं सर्व्वनेत्रामयापहम्॥" रा.नि. व.१३। वा.सू.१५अ.प्रियङ्वादि.व.।

पुष्पाण्डकम्। क्ली। अन्ने। तण्डुले। पुं। पुष्पसुकुमारतण्डुले, शालिधान्यभेदे। भा.पू.१भ. धा.व.।

पुष्पान्तकः। पुं। शालिधान्यभेदे।

पुष्पान्ता। स्त्री। धातकीवृक्षे। वै.निघ.।

पुष्पाभिकीर्णः। पुं। दर्वीकरसर्पविशेषे। सु.कल्प.४अ.।

पुष्पाम्बुजः। पुं। पुष्पद्रवे। मधु, फूलेर रस वा सार, गोलाप जल आदि। रा.नि.व.१०।

पुष्पाभ्रः (भ्रं:)। क्ली,पुं। सेवत्यादिपुष्पोत्थार्के। सेउती आदि फूलेर आरक। यथा—"सेवन्ती शतपत्री च वामन्ती गुलदावदी। चामला यूथिका चम्पा वकुलश्च कदम्बकः। क्वादयेत् केतकीपत्रैः ग्राह्योऽर्कौ गुरुमार्गतः। पुष्पार्क इति विख्याती मरिचैः सहितं पिबेत्। गुणाः—मस्तुलेकप्रयोगेण

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्लीबोऽपि पुरुषायते । रोगानीकन्तु यक्ष्माणं हन्यात् ।" अर्क.चि. ।

पुष्पासवम् । क्ली । मधुनि । पुष्पमद्ये । फूलेर मद । रा.नि.व.१४ ।

पुष्पिका । स्त्री । दन्तमले । हारा. । मूत्रमार्गे । रक्तार्कवृक्षे । र.मा. । लिङ्गमले । हे.च. ।

पुष्पिणी । स्त्री । धातकीवृक्षे । तूलके । स्वर्णतुलस्याम् । वै.निघ. ।

पुष्पितः । वि । पुष्पगन्धरूपारिष्टलक्षणयुक्ते । च.इ.२अ. ।

पुष्पिता । स्त्री । रजस्वलायाम् । रा.नि.व.१८ ।

पुष्पी । स्त्री । स्वर्णकेतकीवृक्षे । रा.नि.व.१९ । योनौ । [वै.निघ. ।

पुष्पेन्द्रा । स्त्री । सौवर्णे । माधवीलतायाम् ।

पुष्पेभः । पुं । नागकेशरवृक्षे । वै.निघ. ।

पुष्पोद्भवा । स्त्री । पुष्पशर्करायाम् । वै.निघ. ।

पुष्पलकः । पुं । कस्तूरीमृगे । मे. । गन्धमार्जारे । खटाश ।

पुष्यानुगचूर्णम् । क्ली । प्रदराधिकारे चूर्णौषधम् । पाठः—"पाठां जम्बाम्रयोर्मध्यं शिलोद्भेदं रसाञ्जनम् । अम्बष्ठकं मोचरसं समङ्गां पद्मकेशरं । वाह्लीकातिविषामुस्तं बिल्वं रीध्रं सगैरिकम् । कट्फलं मरिचं गुण्ठीं माचीकं रक्तचन्दनम् । कट्वङ्गवासकानन्ता (ग्रन्थिपर्णकवत्सकानन्ता, भैष.) धातकीमधुकार्जुनम् । पुष्येणोद्धृत्य तुल्यानि श्लक्ष्णचूर्णानि कारयेत् । तानि चौद्रेण संयोज्य पाययेत्तण्डुलाम्बुना ।...चूर्णं पुष्यानुगं नाम हितमाचेय भाषितम् ॥' शिलोद्भेदः । पाषाणभेदः । पाथरकुचि । अम्बष्ठकीति दाक्षिणात्ये ख्याता, तदभावे पाठा द्विगुणा । वाह्लीकं कुंकुमं । माचीकं देवदारु । रस.र. । अम्बष्ठकी लक्षणा । च.द. । च.चि.३०अ. । माचीकस्थाने मुद्गीकापि पाठः । आकनादि २ भ. जामের আঁটীর শস্য, আমের আঁটীর শস্য, পাথরকুচি, রসাঞ্জন, মোচরস, বরাক্রান্তা, পদ্মকেসর, কুঙ্কুম, আতইচ, মুতা, বেলশুঁট, লোধকাষ্ঠ, গিরিমাটী, কট্‌ফল, মরিচ, শুঁট, দেবদারু বা কিস্‌মিস্, রক্তচন্দন, শ্যোণাছাল, বাসক বা ইন্দ্রযব, অনন্তমূল, ধাইফুল, যষ্টিমধু, অর্জ্জুনছাল, প্রত্যেক চূর্ণ এক এক ভাগ। মধু ও চেলুনিজলসহ পান করাইবে।

पुस्तकशिम्बिका / **पुस्तकाख्या** । स्त्री । पुस्तशिम्ब्याम् । वै.निघ. ।

पुस्तमयः । वि । वस्त्ररचिते । सु.सू.९अ. ।

पुस्तशिम्बी । स्त्री । शिम्बीलतामेदे । See शिम्बिः ।

पुस्फुसः । पुं । फुस्फुसरोगे ।

पूग(फल)म् । क्ली । गुवाकफले । रा.नि.व.११ । गुणाः—"कफपित्तहरं रूक्षं वह्निक्लेदमलापहम् । कषायमीषन्मधुरं किञ्चित् पूगफलं सरम् ॥" सु.सू. ४६अ. । "कषायमधुरं भेदि पूगं पित्तकफापहं ।" अवि.१७अ. । "पक्वन्तु वातलं रूक्षं भेदनं कफनाशनं । गुर्व्वभिष्यन्दि मधुरं तीयदृक् वह्निनाशनम् । आदौ पूगं विषं घोरं द्वितीये भेदि दुर्जरं । तृतीयादिषु पातव्यं सुधातुल्यं रसायनम् ।" इति पूगस्य बालमध्यादिभेदगुणाः । राज.३५ ।

पूगः । पुं । क्रमुकवृक्षे । रा.नि.व.११ । See अंकोटः । पनसवृक्षे । श.र. । तूदवृक्षे । तुँए गाछ । भा. ।

पूगपोठम् । क्ली । निष्ठीवनपात्रे । विका. ।

पूगपुष्पिका । स्त्री । विवाहपुष्पे । विका. ।

पूगमण्डः । पुं । प्लक्षवृक्षे । पाकुड़ गाछ । व.निघ. ।

पूगरोटः (कः) । पुं । हिन्तालवृक्षे । हीताल गाछ । विका. । खर्জ্জুरविशेषे । একজাতি খেজুর । वै.निघ. । "-वीट" इत्यपि पाठो दृश्यते ।

पूगलकः । पुं । वल्लीके । উইটিপি ।

पूगवृक्षः । पुं । क्रमुकवृक्षे । গুপারি গাছ । रा.नि.व.११ । [स्त्री । गुवाके ।

पूगी (इन्) । पुं । गुवाकवृक्षे । मद.व.१ । (गौ)

पूगीफलम् । क्ली । गुवाके । वै.निघ. ।

पूजनी । स्त्री । चटकायाम् । চড়াই । भ. ।

पूज्यमानम् । क्ली । श्वेतजीरके । वै.निघ. ।

पूतः । पुं । सितदर्भे । শ্বেত কুশ । रा.नि.व.८ । विकङ्कतवृक्षे । বঁইচি গাছ । रा.नि.व.९ । प्लक्षवृक्षे । तिलकवृक्षे । शल्लकि । रा.नि.व.११।१३। १६ । क्ली । निर्वृषधान्ये । अम. ।

पूतगन्धः । पुं । वर्वरके । কাল বাবুই শাক । रा.नि.व.१० ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूतत्रणः (दर्भः)। पुं। सितदर्भे। श्वेत कुश। रा.नि.व.८।

पूतद्रुः। पुं। पलाशवृक्षे। रा.नि.व.१०।

पूतधान्यम्। क्ली। तिले। रा.नि.व.१६। यवे।

पूतनः। पुं। गुदकुन्दरोगे। वा.उ.२अ.। See गुदकुन्दः।

पूतना। स्त्री। गन्धमांस्यां। सुगन्धजटामांसी। रा.नि.व.१२। स्वल्पत्वचि हरीतक्याम्। रा.नि.व. ११। भा.पू.। च.द.। सि.यो.अ.स्मा.चि.महा-पैशाचघृते। द्वयं सिन्धुदेशजा लेपे ग्रस्ता च। राज.। बालग्रहविशेषे।

पूतनाकेशी। स्त्री। सुगन्धजटामांस्याम्। भूतकेशीति लोके। च.द.।

पूतनी। स्त्री। (Metha arvensis. Syn. M. Sativa.) Marshmint. खनामख्यात-सुगन्धशाके। पुदिना इति सर्व्वत्र। पुदिना शाक। प.मु.। गुणाः—कामलाहरी अरोचकघ्नी मूर्च्छाघ्नी वमिघ्नी। शुक्रकृत्। स्निग्धताकरः आग्नेयः उत्तेजकश्च। बालरोगविशेषे। पूतनाग्रह। लक्षणं यथा—"स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ विड्भिन्नं सृजति च काकतुल्यगन्धि। कृच्छ्रार्त्तो हृषिततनूरुहः कुमारः तृष्णालुर्भवति च पूतनागृहीतः॥" सु.उ.२७अ.। तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका। तया गृहीत-मात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति स्तन्यं न गृह्णाति दृष्टिं बध्नाति क्रन्दति ऊर्द्धं निरीक्षते च। च.द.।

पूतपत्री। स्त्री। तुलसीवृक्षे। रा.नि.व.१०।

पूतफलः। पुं। पनसवृक्षे। काँटाल गाछ। रा.नि.व.११।

पूतवृक्षः। पुं। उदुम्बरवृक्षे।

पूता। स्त्री। नीलदूर्व्वायाम्। रा.नि.व.८। तुलसीवृक्षे। वै.निघ.।

पूतिः। स्त्री। गन्धमार्जारायाम्। खाटाशी। भैष. वाजी. श्रीगोपालतैले। सि.यो.यक्ष्म.चि.चन्दनाद्य-तैले। क्ली। कुष्ठगे। गन्धतृण। रा.नि.व.८। दुर्गन्धे। अ.टी.रा.।

पूतिकम्। क्ली। पुरीषे। रा.नि.व.१८।

पूति(तो)कः। पुं। करञ्जविशेषे। नाटा करञ्ज। रा.नि.व.९। च.द.वा.व्या.चि.विष्णुतैले। हि.श्वास.चि. हिंस्राद्यघृते। वै.निघ.२भ.अ.सा.चि. पूतिकादिकल्के, कन्दर्पसारतैले। सु.कुष्ठ.चि.९ अ.। भा.४भ.कर्णकज्व.चि.। नैगमेषग्रहचि.। प्रसारण्याम्। सा.कौ.शालसारादिः। घृतकरञ्जे। वै.निघ.। गन्धमार्जारायाम्। खाटाशी। रा.नि.व. १९। क्ली। विष्ठायाम्। रा.नि.व.१८।

पूतिकजा। स्त्री। गन्धमार्जारायाम्। खाटाशी। वै.निघ.।

पूतिकण्टकः। पुं। इङ्गुदीवृक्षे। वै.निघ.।

पूतिकन्या। स्त्री। पूतिकायाम्। पुदिना शाक। प.मु.।

पूति(तो)करजः (ञ्जः)। पुं। (Guilandina Bonduc or Caesalpinia bonducella.) करञ्जवृक्षविशेषे। नाटाकरञ्जा गाछ। हिं कंटकरेजा। वम्. सागरगोटा। ता. पेद्दाक-कय। तत्पर्य्यायाः,—प्रकीर्य्यः पूतिकरजः पूतिकः पूतीकः कलिकारकः कलिमालकः कलहनाशनः कलिमारकः प्रकीर्णः रजनीपुष्पः सुमनाः पूति-कर्णिकः पूतिकाह्वः पूतिपर्णः कैडर्य्यः कलिमाल्यः। गुणाः—"करञ्जः कटुतिक्तोष्णः विषवातार्त्तिकृन्मतः। कण्डूविचर्चिकाकुष्ठस्पर्शक्लेदीषनाशनः॥" रा.नि. व.९। तत्पत्रगुणाः—"शीफघ्नमुष्णवीर्य्यन्तु पत्रं पूतिकरञ्जजम्।" सु.सू.। अस्य बीजं—बल्यम्। तन्मज्ज—ज्वरघ्नं बल्यं लेपनेन अण्डवृद्धौ हितं शीघ्रहरं रक्तस्रावरोधकम् उष्णं नीरसं कुष्ठघ्नञ्च। पत्रमपि तद्वत्। केचित्। कण्टकीकरञ्जे। काँटाकरञ्जा। च.द.श्वी.चि.।

पूतिकर्णः (कः) (र्णिकः)। पुं। पूतिकरञ्जे। नाटाकरञ्जा। रा.नि.व.९। कर्णरोगविशेषे, कर्णपाकेन पूतिगन्धकर्णरोगे। कांण पाका वा पचा। लक्षणं—"अवेदनो वाप्यथवा सवेदनो घनं स्रवेत् पूति स पूतिकर्णकः।" सु.उ.२०अ.। "कर्णविद्रधिपाकेन कर्णे वा वारिपूरणात्। पूयं स्रवति यत् पूति स ज्ञेयः पूतिकर्णकः।" भा. ४भ.। [वै.निघ.।

पूतिकर्णी। स्त्री। वाकुच्याम्। सोमराज।

पूति(तो)का। स्त्री। वाकुच्याम्। नाटा-करञ्जा। वै.निघ.२भ.सर्व्वज्व.चि.महाषट्पलकघृते। भैष.महारुद्रतैले। उपोदिकायाम्। पुँइगाछ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अ.टी.भ. । जवादिकसूरिकायाम्। खाटाशी। भैष.वा.व्या.चि.हिमसागरतैले।

पूतिकामञ्चिका। स्त्री । पृथुमधुमञ्चिका-विशेषे। डाँश माछि। वै.निघ.।

पूतिकामुखः। पुं । शम्बूके । श.मा.।

पूतिकाष्ठ(क)म्। क्ली । देवदारुणि। देव-दारु। रा.नि.व.१२। सरलकाष्ठे । श.च.।

पूतिकाह्वः। पुं । पूतिकरञ्जे । वै.निघ ।

पूतिकीटः। पुं । कीटविशेषे । पेदो पोका। भैष.कुष्ठ.चि.। "पूतिकीटविलेपनात्।"

पूतिकेसरः। पुं । गन्धमार्जारे। खाटासीति लोके। खाटाशी। चन्दनादितैले प्रयोज्यः।

पूतिगन्धः। पुं । इङ्गुदीवृक्षे । रा.नि व.८। गन्धके । क्ली । रङ्गधातौ । रा.नि.व.१३। सुगन्ध-तृणे। वै.निघ.।

पूतिगन्धा। स्त्री। सोमराज्याम्। प्रसारण्याम्। भादालियेति प्रयोगास्मृते मानकथने। "ता: पूति-गन्धास्मृत:।" [च्याम्। रा.नि.व.४।

पूतिगन्धिका। स्त्री । पूतिकायाम्। वाकु-

पूतिघसः। पुं । सुगन्धमार्जारे। गंधे गोकुल। सु.सू.४६अ.। अयं पर्णमृगगुणः। See पर्णमृगः।

पूतितैला। स्त्री । ज्योतिष्मतिलतायाम्। वन उच्छे। लता फुटकी। र.सा.सं। See पारा-वतपदी। भैष.ज्वरकुञ्जरपारीन्द्ररसे।

पूतिदः। पुं । तरुविड़ाले। गेछो विड़ाल, काष्ठ विड़ाल। वै.निघ.।

पूतिदला। स्त्री । तेजपत्रे। तेजपात। च.द.वा.व्या.चि.एलातैले।

पूतिनस्यम् (नासः)। क्ली, पुं । नासारोग-भेदे। लक्षणं यथा—"दोषैर्विदग्धैर्गलतालुमूले संवासितो यस्य समीरणस्तु। निरेति पूतिर्मुख-नासिकाभ्यां तत् पूतिनस्यं प्रवदन्ति रोगम्॥" सु.उ.२२अ.। "तालुमूले मलैर्दुष्टैर्मारुतो मुख-नासिकात्। श्लेष्मा च पूतिर्निर्गच्छेत् पूतिनासं वदन्ति तम्॥" वा.उ.१९अ.।

पूतिपत्रः। पुं । पृथुशिग्वश्योणाकवृक्षे। बड़ शोणा गाछ। रा.नि.व.९। पीतलोध्रे। वै.निघ.।

पूतिपत्रिका। स्त्री । प्रसारण्याम्। गन्ध-भाद्दलिया।

पूतिपर्णः। पुं । करञ्जवृक्षे। डहरकरञ्जा गाछ। रा.नि.व.९। इङ्गुदीवृक्षे। वै.निघ.।

पूतिपल्लवा। स्त्री । राजसुषव्याम्। गन्धा-करला। प.मु। [प.मु.।

पूतिपुष्पः। पुं । इङ्गुदीवृक्षे। जिया पुता।

पूतिपुष्पिका। स्त्री । मधुमातुलुङ्गवृक्षे। मो-टाबा। प.मु.।

पूतिफलः (ला) (ली)। पुं, स्त्री । सोम-राज्याम्। प.मु.। अम.।

पूतिमज्जा। स्त्री। इङ्गुदीवृक्षे। वै.निघ.।

पूतिमयूर(रि)का। स्त्री । अजगन्धायाम्। रा.नि.व.४। वन्यतुलस्याम्। वै.निघ.।

पूतिमारुतः। पुं । कर्कन्धौ। रा.नि.व.२३। बिल्ववृक्षे। वै.निघ.।

पूतिमांसम्। क्ली । दुर्गन्धमांसे, पर्य्युषितमांसे। गुणाः—सद्यः प्राणहरम्। राज.४प.।

पूतिमूषिका। स्त्री । कुकुन्दर्य्यां। वै.निघ.।

पूतिमेदः। पुं । अरिमेदे । विट्खदिरे। रा.नि.व.८। [वै.निघ.।

पूतियुग्दला। स्त्री । गन्धतृणे, रोहिषतृणे।

पूतियोनिः। पुं । उपप्लुतानामके योनिरोगे। च.द.।

पूतिरक्तः। पुं । नासारोगभेदे। निदा.।

पूतिवर्वरी। स्त्री । वनतुलस्याम्। वै.निघ.।

पूतिवातः। पुं । बिल्ववृक्षे। र.मा.।

पूतिवृक्षः। पुं । श्योणाकवृक्षे। प.मु.।

पूतिशाकः। पुं । वकवृक्षे। प.मु.।

पूतिशारिजा। स्त्री । गन्धखदासे। खाटाशी। विका.।

पूती। स्त्री । पूतीकरञ्जे । वा.उ.३अ.।

पूतीकद्वयम्। क्ली । करञ्जद्वये। करञ्जा, नाटाकरञ्जा। भैष.शोथ.चि.वृहच्छुक्रमूलाद्यतैले।

पूतीकपत्रम्। क्ली । करञ्जपत्रे। करञ्जा पाता। च.द.गुल्म.चि.।

पूतीकप्रवालः। पुं । करञ्जपल्लवे। करञ्जि-करञ्जपल्लवे। सु.सू.११अ.।

पूत्यखः। पुं । कस्तूरीमृगे। मे.। गन्धशौट। गँदोपोका। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूपः। पुं। पिष्टके। अम.। क्षुद्रपनसे। आनारस। वै.निघ.।

पूपला। स्त्री। पिष्टकविशेषे। बड़ा। हे.च.।

पूपलिका। स्त्री। पिष्टकविशेषे। पूलीविशेष। सा गुरुः पुष्टिकरी च। च.चि.२अ.। च.सू.२७अ.।

पूपालिका (ली) (पि[लि]का)। स्त्री। पिष्टकविशेषे। त्रिका.। हे.च.। सु.चि.२६अ.। रावणकृतकुमारतन्त्रे।

पूय(न)म्। क्ली। पुँजइतिख्याते क्लेदे। पूँज। श.च.। पूयकरगणः यथा—"तक्रान्तेर्नवधान्यादिर्योऽयं वर्ग उदाहृतः। दोषसंजननो ह्येषो विज्ञेयः पूयवर्द्धनः॥" सु.।

पूयरक्तः। पुं, क्ली। नासारोगविशेषे। तल्लक्षणं यथा—"दोषैर्दिग्धैरथवापि जन्तोर्ललाटदेशेऽभिहतस्य तैस्तु। नासा स्रवेत् पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगम्॥" सु.उ.२२अ.। "निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत्। तत्पूयरक्तमाख्यातं शिरोदाहरुजाकरम्॥" वा.उ.१९अ.।

पूयशोणितः। पुं। पूयरक्तरोगे।

पूय(या)स्रावः। पुं। नेत्रसन्धिगतरोगविशेषे। चक्षे पूँज पड़ा। तल्लक्षणं—"पाकः सन्धौ संस्रवेद्यश्च पूयं पूयास्रावी नैकरूपः प्रदिष्टः।" सु.उ.२अ.। अश्वस्य नेत्ररोगविशेषे। ज.द.३०अ.।

पूयारिः। पुं। निम्बवृक्षे। श्र.च.।

पूयालसः। पुं। नेत्रसन्धिगतरोगे। लक्षणं यथा—"पक्वः शोफः सन्धिजः संस्रवेद्यः सान्द्रं पूयं पूति पूयालसः सः।" सु.उ.२अ.।

पूयासम्। क्ली। पूये। वै.निघ.।

पूरः। पुं। मातुलुङ्गवृक्षे, बीजपूरवृक्षे। टाबा लेबुर गाछ। प.मु.। खाद्यद्रव्यभेदे। पूरा। त्रिका.। क्ली। दाहागुरुणि। रा.नि.व.१२।

पूरकः (काह्वः)। पुं। मातुलुङ्गवृक्षे। "मातुलुङ्गे तु पूरकः।" रा.नि.व.११।२३। वै.निघ.। क्ली। बीजपूरकफले। सि.यो.मदा.चि.।

पूरणम्। क्ली। वस्तिनेत्रप्रभृतिभिर्यन्त्रैः कर्णादौ तैलादिपूरणकर्म्मणि। सु.सू.७अ.। सुगन्धद्रव्ये। नागरमुस्तायाम्। श्र.मा.। पूरणार्थं पक्वतैले। वायुजन्यव्रणवेदनाविशेषे। सु.सू.२२अ.। पुं। पुनर्नवायाम्। रस.चि.८अ.। सिद्धिसारलौहे। विष्णुतैले। धरणि.।

पूर(रि)णी। स्त्री। शाल्मलीवृक्षे। अम.।

पूराम्लम्। क्ली। वृक्षाम्ले। तेँतुल। रा.नि. व.६।

पूरि(लि)का। स्त्री। पूरभरितापूपे। बड़ा, कचुरी प्रभृति। तत्साधनं यथा—"माषाणां पिष्टिकां युञ्ज्यात् लवणार्द्धं कहिङ्गुभिः। तया पिष्टिकया पूर्णा समिता कृतपोलिका। ततस्तैलेन पक्वा सा पूरिका कथिता बुधैः॥" गुणाः—रूक्षा स्वादी गुरुः स्निग्धा बल्या पित्तासृदूषिका। चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी। तथैव घृतपक्वापि चक्षुष्या रसपित्तहृत्॥" भा.पू.३भ.।

पूरितम्। क्ली। अन्ने। वै.निघ.।

पूरुषः। पुं। मनुष्ये, पुरुषे। वै.निघ.।

पूर्णकः। पुं। तामचूड़े। गोरंग। मे.।

पूर्णकोषा। स्त्री। यवपिष्टमयभक्ष्यद्रव्ये। पूरपूलि। सु.चि.१०अ.।

पूर्णकोष्टा (ष्ठा)। स्त्री। नागरमुस्तायाम्। रा.नि.व.६।

पूर्णगर्भा। स्त्री। पूरणपोलिकायाम्। पूरपिटे। वै.निघ.।

पूर्णचन्द्र(र्णाभ्र)रसः। पुं। ग्रहण्यां रसः। पाठः—"सूतङ्गन्धञ्चाभ्रगन्धां गुडूचीं यष्टीतोयैर्मर्द्दयेदेकयामम्। क्षुद्रं शुल्बं मौक्तिकं लौहकिट्टं भस्मीभूतं सूततुल्यञ्च दद्यात्। भूकुष्माण्डैर्वासरं तद्विमर्द्याङ्गोलङ्कृत्वा भूधरे तं पुटेत्तु। चूर्णङ्कृत्वा नागवल्लीरसेन दद्यादेवं मर्द्दयित्वैकमाषम्। मध्याज्याभ्यां पूर्णचन्द्रं रसेन्द्रम्.....॥" रस.चि.। अन्यः पूर्णचन्द्रोरसायने—कज्जलिः लौहं अभ्रं प्र. ८ तो. रौप्यभस्म २ तो. वङ्गं ४ तो. स्वर्णं ताम्रं कांस्यञ्च प्र. १ तो. जातीफलं लवङ्गं त्वक् एला जीरकं कर्पूरं प्रियङ्गुः मुस्तकं प्र. ३ तो.। कुमारीत्रिफलैरण्डरसैर्भावयित्वा एरण्डपत्रैरावेष्ट्य धान्यराशौ ३ दिनं स्थाप्यम्। वटी चणाभा। भैष.।

पूर्णपर्णी। स्त्री। पृश्निपर्ण्याम्।

पूर्णबीजः। पुं। मातुलुङ्गवृक्षे। रा.नि.व.११।

पूर्णिका। स्त्री। नासाच्छिनीपक्षिणि। त्रिका.।

पूर्य्यः (र्व्यः)। पुं। तूतवृक्षे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्व्वकर्म्म। क्ली। रोगोत्पत्तेः प्राक् तत्तद्व्याधिं प्रति यदादौ क्रियते कर्म्म तस्मिन्। विविधकर्म्माद्यकर्म्मणि। तानि च पूर्व्वपश्चात् प्रधानरूपाणि त्रीणि। तत्र शल्यतन्त्रे शस्त्रकर्म्म, कायचिकित्सायां लङ्घनादिरिरेकान्तं कर्म्म, संशोध्यस्य पाचनं स्नेहनं स्वेदनञ्चेति। सु.सू.५अ.।

पूर्व्वमारुतः। पुं। पूर्व्वदिग्भववायौ।

पूर्व्वरूपम्। क्ली। भाव्यामयसूचके न तु दोषविशेषसूचके चिह्ने। तच्च द्विविधं सामान्यविशेषभेदेन। "पूर्व्वरूपन्तु तद्द्वयेन विद्याद्भाविनमामयम्। सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितं। विशिष्टमौषधाक्तं स्यात् विशेषैश्च समन्वितम्। पूर्व्वरूपं विशिष्टं स्यात् व्यक्तं तल्लक्षणं स्मृतम्।" भा.। "प्रायूपं येन लक्ष्यते। उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः। लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम्॥" मा.नि.।

पूर्व्ववायुः। पुं। पूर्व्वदिग्भवमारुते। पूर्वे शोऽग्ना। गुणाः—"पूर्व्वः सुमधुरः स्निग्धो लवणश्चैव मारुतः। गुरुर्विदाहजननो रक्तपित्ताभिवर्द्धनः। चतानां विषजुष्टानां व्रणिनः श्लेष्मलाश्च ये। तेषामेव विशेषेण सदा रोगविवर्द्धनः। वातक्षतानां प्रशस्तश्च आत्तानां कफशोणितिनाम्। तेषामेव विशेषेण व्रणक्लेदविवर्द्धनः॥" सु.सू.२०अ.।

पूर्व्वसन्ध्या। स्त्री। प्रातःकाले।

पूर्व्वाग्रः (ग्रः)। पुं। लाजायाम्। खई। भ.चि.।

पूर्व्वाङ्गः। पुं, क्ली। अङ्गः पूर्व्वभागे, अयञ्च भागः वसन्तलक्षणसूचकः। सु.सू.६अ.।

पूर्व्वेद्युः (स्)। पुं। अव्य.। पूर्व्वदिने।

पूलकः। पुं। कटिप्रीथे। पौँदेर पेलो।

पूषः। पुं। पौषे मासि। व्रह्मदारुवृक्षे। तूँत गाछ। अम.।

पूषकः। पुं। पारिभद्रवृक्षे। तूँत, पलाशपिपूल। रा.नि.व.९।

पूषा। स्त्री। पाठायाम्। रा.नि.व.६।

पृक्का। स्त्री। पिडिङ्गनामकशाके। पिडिंशाक। प.मु.। हिं पुरी। उत्. फिरिकिशाक। तत्पर्य्यायाः,—मरुन्मला पिशुना देवी लता लघुः समुद्रान्ता वधूः कीटिवर्षा लङ्घापिका लङ्घायिका लङ्घारिका लतामरुत् ब्राह्मणी कुटिला देवपुत्रिका मनुः मालालिका मालानी लघ्वी पञ्चगुणिरसा समुद्रक्रान्ता मरुत् माला सृक्का कीटी वर्षा लङ्घीपिका वर्षालङ्घायिका तस्करः चोरकः चण्डः देवपुत्री। गुणाः—"पृक्का स्वादी हिमा हृद्या तिक्ता निखिलदोषनुत्। कुष्ठकण्डूविषस्वेददाहास्रज्वररक्तहृत्।" भा.पू.१भ.। सु.सू.३८अ. एलादिः। पृक्कापुष्पे। च.द.वा.व्या.चि. महाराजप्रसारणीतैले, अष्टादशगुणितिक्तप्रसारणीतैले। लताकस्तूर्य्याम्। वै.निघ.।

पृथक्छदः। पुं। अचोटवृक्षे। वै.निघ.।

पृथक्त्वचा। स्त्री। मूर्व्वायाम्। रा.मा.।

पृथक्पत्रः। पुं। सप्तपर्णवृक्षे। वै.निघ.।

पृथक्पर्णिका (र्णी)। स्त्री। पृश्निपर्णीवृक्षे। रा.नि.व.४। वै.निघ.२भ.जीर्णज्व.चि.। मूर्व्वायाम्। मूर्गा। रा.नि.व.३।

पृथगालुः। पुं। पिण्डालौ। चुवड़ि आलू। हांति खोजा आलू। प.मु.।

पृथग्बीजः। पुं। भल्लातकवृक्षे। रा.नि.व.११।

पृथाजः। पुं। अर्জ্জुनवृक्षे। रा.नि.व.९।

पृथिका। स्त्री। शतपद्याम्। भ.म.।

पृथिविः (वी)। स्त्री। कृष्णजीरके।

पृथिवीकन्दः। पुं। भूकन्दे। वै.निघ.।

पृथिवीगुणाः। पुं। अस्थित्वङ्नखमांसरोमसु। रस.र.ज्व.चि.।

पृथिवीपतिः। पुं। ऋषभकौषधे। मे.।

पृथिवीभवम्। क्ली। मृत्तिकाचारे। सोरा। वै.निघ.।

पृथुः। स्त्री। द्विदलपर्व्वायाम्। रा.नि.व.६। कृष्णजीरके। प.मु.भा.। स्थूलकृष्णजीरके। मोटा कृष्ण जीरे। गुणाः—कटुतिक्तोष्णा वातगुल्मघ्नी आध्मानहरी दीपनी च। पुनर्नवायाम्। मेदायाम्। धात्रीवृक्षे। रा.नि.व.२३। तरुबुद्धे। रा.नि.व.२। अहिफेने। भ.र.।

पृथुकः। पुं, क्ली। चिपिटके। चिड़े। हिं चूड़ा। प.मु.। "हरितधान्यानि निस्तुषभृष्टमुशलहतानि पृथुकाश्चिपिटसंज्ञाः।" अरुण.। "व्रीहयोऽप्यर्द्धपक्वास्तु तप्तास्ते पृथुकाः स्मृताः।" रा.नि.व.१६। गुणाः—बल्याः कफविष्टम्भकराश्च। वा.सू.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६अ.। स्वादवः स्निग्धा हृद्या कामवर्द्धनाश्च। रा. नि.व.१६। सदुग्धस्य तस्य गुणाः—"सचीरा हृंहणा हृद्या बल्या भिन्नमलाश्च ते।" भा.। एकवर्षीये शिशौ। अर्द्धवर्षीये शिशौ। ७ मासेर शिशु। रा.नि.व.१८।

पृथुकन्दकम्। क्ली। तृणविशेषे। गुण्ठतृण। वै.निघ.। विश्व.।

पृथुका। स्त्री। बालिकायाम्। हिङ्गुपत्र्याम्। अ.च.। भृष्टतण्डुलायाम्। चिड़े। वै.निघ.।

पृथुकालुकी। स्त्री। रक्तालुभेदे। लाल आलू। भा.पू.१भ.।

पृथुकृष्णः। पुं। जीरके। वै.निघ.।

पृथुकोलः। पुं। राजबदरे। रा.नि.व.११।

पृथुगन्धा। स्त्री। गन्धशठ्याम्। वै.निघ.।

पृथुच्छदः। पुं। शरपत्रकुशे। रा.नि.व.८। अचीटवृक्षे। वै.निघ.।

पृथुपत्रः (कः)। पुं। रक्तरसोने। रा.नि.व.७।

पृथुपलाशिका। स्त्री। शठ्याम्। रा.नि.व.६।

पृथुरोमा (न्)। पुं। मत्स्यभेदे। अर्क.चि.।

पृथुलः। पुं। दर्भे। गुन्द्रातृणे। वै.निघ.।

पृथुला। स्त्री। गुण्डासिनीतृणे। रा.नि.व.८। हिङ्गुपत्र्याम्। जटा.।

पृथुवीजः (कः)। पुं। मसूरे। मूषुरिकलायेे। प.मु.। रा.नि.व.१६। विकङ्कतवृक्षे। वै.निघ.।

पृथुशिम्बः (म्ब) (म्बी)। स्त्री। श्योनाकभेदे। रा.नि.व.९। पीतलोध्रे। असिशिम्ब्याम्। वै.निघ.। [अ.।

पृथुशिरा। स्त्री। कृष्णजलौकायाम्। सु.सू.१३।

पृथुशृङ्गकः। पुं। मेषविशेषे। दुम्बा। वै.निघ.।

पृथुस्कन्धः। पुं। वनशूकरे। रा.नि.व.१९।

पृथूदरः। पुं। मेषे। हारा.।

पृथ्वि(थ्वी)का। स्त्री। जीरके। मद.व.२। हिङ्गुपत्र्याम्। सु.चि.२अ.। स्थूलैलायाम्। रा. नि.व.२३। कृष्णजीरकभेदे। शुक्लपुनर्नवायाम्। रा.नि.व.६। कृष्णजीरके। च.सू.५अ.। च.द.र. पि.चि.। अर्कवृक्षे। एलायाम्। ह्रस्व.। आदित्यभक्तायाम्। हुड़हुड़िया। वै.निघ.। [व.१०।

पृथ्वीकुरवकः। पुं। श्वेतमन्दारार्के। रा.नि.

पृथ्वीजम्। क्ली। गड़लवणे। रा.नि.व.६।

पृदाकुः। पुं। हस्तिनि। वृक्षे। उणा.। सर्पे। अम.। हयिके। व्याघ्रे। मे.। अग्नौ। चित्रके।

पृश्निः (श्नी)। स्त्री। पृश्निपर्ण्याम्। चाकुलिया। अ.र.। सु.चि.१७अ.। वारिपर्ण्याम्। पानी।

पृश्निका। स्त्री। जलवृक्षविशेषे। अ.मा.। पृश्निपर्ण्याम्।

पृश्निपर्णिका (र्णी)। स्त्री। (Hemionites cordifolia. Uraria lagopoides. Syn. Doodia lagopodioides.) स्वनामख्यातत्रिकशाकवृक्षे। चाकुलिया। हिं पीठवन, पोतवन, पठौनी। मं सेवरा। कं नविथलवीने। तें कीलाकुपोन्ना। उत्. क्रष्टपर्णि। तत्पर्य्यायाः,—पृथक्पर्णी चित्रपर्णी अङ्घ्रिवल्लिका क्रोष्टुविन्ना सिंहपुच्छी सिंहलाङ्गलो कलशिः धावनिः गुहा तन्वी पुच्छिका क्रोष्टुकपिष्टपर्णी लाङ्गला क्रोष्टुपुच्छी क्रोष्टुपुच्छिका पुच्छिका क्रोष्टुकर्कशखला पूर्णपर्णी कलशी दीर्घा शृगालवृन्ता चित्रपर्णी सिंहपुच्छिका दीर्घपत्रा अतिगुहा वृष्टिला चित्रपर्णिका कोकलसिः कलसी कदला कङ्कशत्रुः चक्रकुल्या चक्रपर्णी शीर्णमाला महागुहा शृगालविन्ना धमनी मेखला लाङ्गलिका ब्रह्मपर्णी दीर्घपर्णी सिंहपर्णी पृष्टिपर्णी अङ्घ्रिपर्णी धावनी। सु.चि.८अ.। गुणाः—"...त्रिदोषघ्नी वृष्योष्णा मधुरा सरा। हन्ति दाहज्वरश्वासरक्तातिसारवृद्धवमीः। भा.पू.१भ.गु.व.। कटुः उष्णा कासातीसारघ्नी वातरोगज्वरदाहव्रणोन्मादघ्नी च। रा.नि. व.४। च.द.ज्व.चि.। एतद्वचनमेकाहिकज्वरे हितम्। च.द.ज्व.चि.। सु.सू.३८अ.।

पृषत्। पुं। हरिणे।

पृषतः। पुं। श्वेतबिन्दुहरिणविशेषे। तत्पर्य्यायौ,—रङ्कुः सरलपृष्ठकः। "पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् किञ्चिदल्पकः॥" एतन्मांसगुणाः—"स्वादु शीतलं धारकं लघु दीपनं रुच्यं श्वासज्वरविदोषघ्नम्।" भा.। रोहितमत्स्ये। मण्डलिसर्पविशेषे। सु.कल्प.४अ.। स्त्री। हरिणीभेदे। मे.।

पृषदाज्यम्। क्ली। दधिमिश्रितघृते।

पृषन्तिः। पुं। जलबिन्दौ। [द.चि.।

पृष्टिपर्णी। स्त्री। पृश्निपर्ण्याम्। चि.क्र.क.प्र-

पृष्ठम्। क्ली। तनुपश्चाङ्गे। रा.नि.व.८। [२०।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठग्रन्थिः। पुं। गण्डुरोगे। कूँज। रा.नि.व.

पृष्ठग्रहः। पुं। अश्वस्य वातव्याधौ। लक्षणं यथा—"खञ्जं पृष्ठोन्नतञ्चैव रन्ध्रौ चिपिटस्य यस्य च। तस्य पृष्ठग्रहं रोगमूर्ध्वगोवस्य निर्दिशेत्॥" ज.द.५५अ.।

पृष्ठचक्षुः। पुं। कर्कटे। वै.निघ.।

पृष्ठदृष्टिः। पुं। भल्लूके। रा.नि.व.१९।

पृष्ठमर्म्म। क्ली। पृष्ठवंशगतचतुर्दशमर्म्मसु। तद्यथा—कटीकतरुणे, कुकुन्दरे, नितम्बौ, पार्श्वसन्धौ, वृहती, अंसफलके, अंसौ। सु.शा.६अ.।

पृष्ठरुक्षम्। क्ली। मरिचे। वै.निघ.।

पृष्ठवंशः। पुं। मेरुदण्डे, पृष्ठास्थनि। पीठेर शिरदाँड़ा। हे.च.। सगर्भस्य शिशोः मासमात्रेण भवति। सुखबोधः।

पृष्ठशृङ्गः। पुं। आरण्यछागे। हे.च.।

पृष्ठशृङ्गी (इन्)। पुं। महिषे। शब्दर.। नपुंसके। मे.। मेषे। वै.निघ.।

पृष्ठत्वितिः। पुं। नन्दिवृक्षे। वै.निघ.।

पृष्ठास्थि। क्ली। कशेरौ। मेरुदण्ड। रा.नि.व.१८। तानि च ३५। च.शा.७अ.।

पृष्ठयः। पुं। अश्वे। अम.। क्ली। पृष्ठास्थिसमूहे। वै.निघ.।

पृष्णिः। स्त्री। पार्श्वभागे। उणा.।

पेचः (कः)। पुं। उलूकपक्षिणि। पेंचा। शब्दर.। अम.। तत्पर्य्यायाः,—उलूकः ऊलुकः वायसारातिः शक्राख्यः दिवान्धः वक्रनासिकः हरिनेत्रः दिवाभीतः नखाशी पीचुः घर्घरः काकभीरुः नक्तचारी निशावरः कौशिकः रूपनाशनः रक्तनासिकः भीरुकः आलुः भांचारातिः। See प्रसृहः।

पेचकी (इन्)। पुं। करिणि। शब्दर.।

पेचनी
पेचिका } स्त्री। कैसुकवृक्षे। केँउ गाछ।

पेचिलः। पुं। हिरदे। हांती। विका.।

पेचुः (कः)। पुं। सुचुकुन्दवृक्षे। मूचुकून्द गाछ। कैसुकवृक्षे। केँउ गाछ। र.मा.। नाड़ीचशाके। पेचुके। कचु। विका.।

पेचुका। स्त्री। पेचुके। कचुर शाक। कैसुके। केँउ। र.मा.।

पेचुनी (ली)। स्त्री। पेचुकशाके। कचुर शाक। विका.। कैसुके। केँउ। र.मा.।

पेटकः (टिका, टी)। पुं, स्त्री। (Abutilon Indicum.) कुवेराख्यायाम्। पेटारि। र.मा.। हिं कुङ्गनी। पारस्य.दरखते कैरा। आर. मस्तुलघौर। ता. टट्टी। भैष.बालचि.। च.द.। "पेटी पाठामूलात्।" पाटलाद्यवे। कैसुके।

पेड़म्। क्ली। घृते। अमरे। उणा.।

पेड़ा(ड़िका)। स्त्री। पेटिकायाम्। पेटारी। वनाशुके। वै.निघ.। पाटलाद्यवे।

पेत्वम्। क्ली। अमृते। घृते।

पेयम्। क्ली। अष्टविधान्नान्यतमान्ने। रा.नि.व. २०। जले। मे.। दुग्धे। शु.च.।

पेया। स्त्री। अल्पसिक्थपेयद्रव्ये। सा च पञ्चदशगुणैर्जलैः सिध्यति। गण्डविशेषः। "तोये पञ्चदशगुणे सिद्धा पेयाल्पसिक्थका।" प.मु.। सिक्थसमन्विता पेया। "पेया सिक्थसमन्विता।" प.प्र.२ख.। तण्डुलापेक्षया एकादशगुणे वारिणि सिद्धा। च.द.ज्व.चि.। "निर्द्रव्या प्राकृता पेया तक्रदाडिमतण्डुलैः।" इति च लक्षणम्। हेमाद्रिः। गुणाः—मलानुलोमनी पथ्या दीपनी पाचनी लघुः तृष्णाग्लानिदौर्ब्बल्यकृच्छ्रिरोगज्वरघ्नी च। वा.सू.१५अ.। "द्रवाधिका घना सिक्थ्या चतुर्दशगुणे जले। सिद्धा पेया बुधैर्ज्ञेया...।" "पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिदा।" प.प्र.२ख.। आर्द्रके। आदा। प.मु.। शतपुष्पायाम्। शु.च.। स्वच्छमण्डे। मे.। कषाये। वै.निघ.।

पेयु(यू)षः। पुं, क्ली। नवप्रसूतायाः गोः सप्तदिनाभ्यन्तरीणदुग्धे। गाँजला दुध। "आसप्तरात्रप्रसवात् क्षीरं पेयुषमुच्यते।" र.मा.। प्रत्यग्रघृते। वै.निघ.।

पेर(रो)जम्। क्ली। स्वनामख्यातोपरत्नविशेषे। पेरोजा इति पारस्ये। तच्च भस्माङ्गहरितभेदेन द्विविधम्। गुणाः—अतिकषायं मधुरम् अतिदीपनं शूलादिहरं तत्संयोगेन स्थावरजङ्गमोभयविषविषं हन्याच्च। रा.नि.व.१३।

पेलम्। क्ली। अण्डकोषे। होंल। हे.च.। सूक्ष्मांशे। वै.निघ.।

पेलो (इन्)। पुं। घोटके। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पेलुवासः। पुं। कालसरटे। वै.निघ.।

पेशः। पुं, क्ली। खर्णधातौ।

पेशस्कृत्। पुं। कीटविशेषे। कुमीरे पोका। वै.निघ.। पेशस्कृत् इति शब्दकल्पद्रुमः।

पेशिः। स्त्री। डिम्बे। अम.। आढकादिद्विदले। वै.निघ.। आम्रादिशलाटौ। आमचूर आदि। खण्डीकृतार्द्रकशलाटौ। "हरितार्द्रकस्य शस्त्रकृत्तान्त्वा दीर्घाकारा अवयवाः पेशयः उच्यन्ते।' वा.चि.७अ.।

पेशी (षी)। स्त्री। जटामांस्याम्। रा.नि.व. १२। मांसपिण्डाम्। मांसपेशी। साकल्येन पञ्च पेशीशतानि भवन्ति। तासां चत्वारि शतानि शाखासु। कीष्टे षट्षष्टिः, यौवां प्रत्यूढं चतुस्त्रिंशच्चेति। तत्र पादाङ्गुलिषु १५। पदे १०। पादोपरिकूर्चसन्निविष्टाः १०। गुल्फयोः १०। गुल्फजान्वन्तरे २०। जानुनि ५। ऊरौ २०। वङ्क्षणे १०। शतम् एवमेकस्मिन् सक्थनि भवन्ति। एतेनेतरसक्थिबाहू च व्याख्यातौ। पायौ ३। मेढ्रे १। सेवनौ १। वृषणयोः २। स्फिचोः १०। वस्तिशिरसि २। उदरे ५। नाभ्यां १। पृष्ठोर्ध्वसन्निविष्टाः ५×५। पार्श्वयोः ६। वक्षसि १०। अचकांसौ प्रति समन्तात् ७। हृदयामाशययोः २। यकृत्प्लीहोण्डुकेषु ६। यौवायां ४। हन्वोः ८। काकलक-गलयोः २। तालुनि २। जिह्वायां १। ओष्ठयोः २। घोणायां २। नेत्रयोः २। कर्णयोः २। गण्डयोः ४। ललाटे ४। शिरसि १। इत्येवमेतानि पञ्च पेशीशतानि। "शिरा स्नायुस्थिपर्व्वाणि सन्धयश्च शरीरिणां। पेशीभिः संवृतान्येव बलवन्ति भवन्त्यतः॥" स्त्रीणाञ्च विंशतिरधिकाः। दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च, यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रः तासां प्रसृतेऽभ्यन्तरतो हे सुखाश्रिते बाह्ये च प्रवृत्ते हे। गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। सु.शा.५अ.। "यथार्थसुषणा युक्तो वायुः स्रोतांसि दारयेत्। अनुप्रविश्य पिण्डितं पेशीर्विभजते तथा। स्त्रीणामपि भवन्त्येताः किञ्चिद्विंशतिरुत्तराः। गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि॥" भा.। पक्षिडिम्बे। पाखीर डिम। अम.।

पेशीकोषः। पुं। अण्डे। डिम। अ.टी.।

पेश्यण्डम्। क्ली। मांसगोलके। वै.निघ.।

पेषणः। पुं, क्ली। विधारसुद्दीपचे। उँकाँटो सिजू। खल्ले। क्ली। पीड़ने। चूर्णने। श.च.।

पेषणिः (णी)। स्त्री। पेषणशिलायाम्।

पेषिणी (षी)। स्त्री। जटामांस्याम्।

पेहिता। स्त्री। प्रसारण्याम्। गन्धभाद्दलिया। वै.निघ.।

पैङ्गिः। पुं। ऋषिविशेषे। च.।

पैज(ञ्जु)षः। पुं। कर्णे। हे.च.।

पैठरम्। क्ली। स्थालीपक्वमांसादौ। अम.।

पैत्तः (त्तिकः)। पुं। तिलवृक्षे। तिल गाछ। प.मु.। पित्तसम्भवे रोगे। रा.नि.व.२०।

पैत्तिकी। स्त्री। योनिव्यापद्विशेषे। लक्षणं यथा—"यथास्वैर्दूषणैर्दुष्टं पित्तं योनिमुपाश्रितम्। करोति दाह-पाकीषा-पूतिगन्ध-ज्वरान्विताम्। भृशोष्णभूरिकृष्णपनीलपीतासितार्त्तवाम्। सा व्यापत् पैत्तिकी॥" वा.उ.३३अ.।

पैष्टी। स्त्री। विविधधान्यविकारजाते अन्नभेदे। धेनो मद। एषा मादकत्वे हीनतमा। "पैष्टी पुनर्विविधधान्यविकारजाता ख्याता मदाधिकतयाव च पूर्व्वपूर्व्वा।" प्रस्तुतविधिर्यथा—"शक्तुलीमर्दसिद्धान्नमुशीदकसमन्वितं। वह्नौ सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयं॥ शीर्षेऽहनि तु संप्राप्ते शैवलं तत्र निःक्षिपेत्। शृङ्गवेरं मरिचञ्च मातुलुङ्गं तथैव च॥ एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्॥" गुणाः—कटूष्णा तीक्ष्णा मधुरा अतिदोषघ्नी च। रा.नि.व.१४। "पैष्टी सन्दीपनी रुच्या कफकृद्वातनाशिनी। पित्तला पाण्डुरोगाणां कारिणी बहुधा मता॥" अति. १९अ.।

पैष्टिकम्। क्ली। पैष्टीमद्ये। वि.र.।

पोगण्डः। पुं। अपोगण्डे। दशवर्षीय बालक। हेला.।

पोटगलः। पुं। नले। नल। रा.नि.व.८। खागड़े। खागड़ा। र.मा.। वदरवृक्षे। मत्स्यभेदे। मे.। वैकङ्कजातीयसर्पविशेषे। अयं राजिलेन गोनसां वैपरित्येन वा जातः। सु.कल्प.४अ.। काशतृणे। त्रिका.।

पोटा। स्त्री। स्त्रीपुंसलक्षणायां नार्य्याम्। हारा.। चुल्लिकायाम्। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पोटाच्छिका। स्त्री। गुञ्जायाम्। वै.निघ.।
पोटिकः। पुं। बिस्कीटके। कश्चित्।
पोडुः। पुं। कपालास्थितले। रा.नि.व.१८।
पोतः (कः)। पुं। शिशौ। वैमाषिकशिशौ। रा.नि.व.१८। दशवार्षिककरिणि। हे.च.।
पोतकी। स्त्री। उपोदिकायाम्। पूतौ, पूँई। भा.मि.४भ.गर्भ.चि.। श्यामाकपक्षिणि। रा.नि.व.१९।
पोताख्डः। पुं। अश्वस्य सुष्करोगभेदे। लक्षणं —"यूनो पक्वौ तुरङ्गस्य सुष्कौ यस्य सवेदनौ। विकस्वरेण युक्तस्य तस्य पोताख्डमादिशेत्॥" ज. द.५.अ.।
पोताधानम्। पुं। शिशुमीनपुच्छे। माछेर पोनार झाँक्। गुणाः—"पोताधःनन्तु सर्व्वेषां सुस्निग्धं लघु रोचनम्।" राज.३प.।
पोतासः। पुं। कर्पूरविशेषे। भीमसेनी कर्पूर। रा.नि.व.१२।
पोतिका। स्त्री। शताह्वायुषे। रा.नि.व.४। मालवारदेशीयोपोदिकाविशेषे। मूलपोतिकायाम्। रा.नि.व.७।
पोत्रम्। क्ली। वज्रे। शूकरमुखाग्रभागे। थोंप्ना। मे.।
पोत्रायुधः। पुं। शूकरे। रा.नि.व.१९।
पोत्रिदंष्ट्राजम्। क्ली। शूकरदन्तजरत्ने। वै. निघ.।
पोत्री (त्रिन्)। पुं। शूकरे। अम.।
पोथकी। स्त्री। बालानां नेववर्त्मजरोगविशेषे। लक्षणं—'कण्डूस्रावान्विता गुर्व्वी रक्तसर्षपसन्निभाः। पिड़काश्च रुजावत्यः पोथक्य इति संज्ञिताः॥" सु.उ.३अ.।
पोदिका। स्त्री। कलम्बीशाके। प.मु.।
पोलः (कः)। स्त्री। कटिप्रोथे। पाछार पेलो। अ.टी.भ.।
पोलिका (ली)। स्त्री। पिष्टकभेदे। पोल्ला रुटी। त्रिका.। यथा—"कुर्य्यात् समितयातीव तन्वी पर्पटिका ततः। स्वेदयेत्तप्तके तान्तु पीलिकां तां जगुर्बुधाः।" गुणाः—मण्डकवत्। भा.।
पोषः। पुं। पोषणे।
पोषयित्नुः। पुं। कोकिले। उणा.।
पोष्टा (ष्टृ)। पुं। पूतिकरञ्जे। शब्च.। (त्रि)। पोषके।
पौगण्डम्। क्ली। पौगण्डावस्थायाम्। तच्च षष्ठाब्दात् दशमाब्दपर्य्यन्तम्। "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि। वैशीरमापञ्चदशं यौवनञ्च ततःपरम्॥" रा.नि.व.१८।
पौण्डरीयः (कः)। पुं, क्ली। प्रपौण्डरीकवृक्षे। पूण्डरिया गाछ। रा.नि.व.१२।
पौण्डर्य्यम्। क्ली। प्रपौण्डरीके। पूण्डरिया।
पौण्ड्र (ण्ड्र) कः। पुं। पुण्ड्रके। पूँड़ि आख। रा.मा.। शब्मा.। लावपक्षिणि। वै.निघ.।
पौतवम्। क्ली। परिमाणे। अ.टी.भ.।
पौतिनासिक्यम्। क्ली। नासिकारोगे। पीनसे। पीनस रोग। निदा.।
पौ (त्ति) त्रिकम्। क्ली। पुत्रिकानाममक्षिकाभिरायोजिते घृतवर्णमधुनि। पौत्रिक मधु। जटा.। "अन्नजा मक्षिकाः पिङ्गाः पुत्रिका इति कीर्त्तिताः। तज्जातं मधु धीमद्भिः पौत्रिकं समुदाहृतम्॥" गुणाः—रूक्षम् उष्णं रक्तपित्तदाहघ्नं घृतवर्णञ्च। रा.नि.व.१४।
पौत्रिकशर्करा। स्त्री। पौत्रिकमधुकृतशर्करायाम्। गुणाः—तन्मधुतुल्याः। रा.नि.व.१४।
पौनर्णवः। पुं। सन्निपातज्वरभेदे। लक्षणं —"उत्क्षिप्य यः खमङ्गं क्षिपत्यधस्तात् नितान्तमुच्छ्वसिति। तं पौनर्णवजुष्टं विक्षिवकष्टं विजानीयात्॥" भल्लकीतन्त्रम्। [१अ.।
पौपिकः। त्रि। अपूपनिर्म्माणदक्षे। सु.कल्प.
पौरम्। क्ली। सुगन्धद्रव्ये। रामकर्पूर। अम.। पुं। बीले। नखीनामगन्धद्रव्ये। वै.निघ.।
पौरसः। पुं। नखीनामगन्धद्रव्ये। वै.निघ.।
पौरुषम्। क्ली। शुक्रधातौ। रा.नि.व.१८। मैथुने। सु.नि.१अ.। ऊर्द्ध्वविस्तृतदोःपाणिपुरुषपरिमाणे। त्रिका.। इह जगति कृते कर्म्मणि। "तत् पौरुषं यत्विह कर्म्म दृष्टम्।" च.शा.२अ.। रोहिषतृणे।
पौरुषः। पुं। नरे। पुन्नागवृक्षे। त्रिका.।
पौरोगवः। पुं। पाकशालाध्यक्षे। अम.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पौलिः। स्त्री । पौलिकायाम्। पाकावस्थागतयवादौ। अम.।

पौषः। पुं । वर्षस्य नवमे मासे। अम.।

पौष्करम्। स्त्री । पुष्करमूले । पुष्करमूल। कुष्ठभेदे। कूड़विशेष। रा.नि.व.६। मद.व.१। सि.यो.यक्ष्म.चि.वयोदशाङ्गगुग्गुलौ । "पौष्करातिविषे।" सि.यो.कफज्व.चि.निम्बादिः। "शटीभूनिम्बपौष्करम् ।" पद्ममूले। बृहज्जीरकाद्यमोदके । एरण्डमूले । वै.निघ.श्वास.चि.दशमूलयवाग्वाम्। स्थलपद्मे। वै.निघ.।

पौष्करमूलम्
पौष्कराह्वयम् } क्ली । पुष्करमूले। मद.व.१।

पौष्टिकम्। क्ली । पुष्टिकरौषधे। पुष्टिकरद्रव्यगणे। यथा—"चतुर्द्वा तु तुगाक्षीरी चन्द्रशूरीऽष्टवर्गकः। द्वीपान्तरवचा विल्वं त्वक् पत्रं नागकेशरम्। तालीशपत्रं त्वक्क्षीरी त्वचा गोक्षुररोहिणी। कपिकच्छूतीयवल्लीभूफलं पौष्टिकी गणः॥" अर्क.चि.। चौरकाले गात्राच्छादनवस्त्रभेदे । कावाई। गुणाः—आयुष्यत्वं धनचिक्कत्वं शुचित्वं रूपविराजनत्वञ्च। राज.।

पौष्पम्। क्ली ।। पुष्परेणौ। वै.निघ.।

पौष्प(ष्पि)कम्। क्ली । पुष्पाञ्जने। रा.नि.व.१३। वै.निघ.।

प्रकरम्। क्ली । अगुरुकाष्ठे । मे. ।

प्रकशो। स्त्री । शूकरीगे। निदानम्।

प्रकाण्डः। पुं । तरोः स्कन्धपर्य्यन्तभागे । गुँड़ि। रा.नि.व.२।

प्रकाण्ड(त)रः। पुं । वृक्षे । श.च.।

प्रकाश(क)म्। क्ली। कांस्ये । काँसा। हे.च.।

प्रकाश(क)च्छाता। पुं । कुक्कुटे। श.च.।

प्रकीर्णः। पुं,क्ली। पूतिकरञ्जे । नाटा करञ्जा। रा.नि.व.९। चामरे। त्रिका.। [मे.।

प्रकीर्णकम्। क्ली। चामरे। अम.। पुं। अश्वे ।

प्रकीर्य्यः (कः)। पुं, स्त्री । पूतिकरञ्जे । नाटा करञ्जा। र.मा.। वा.सू.१५अ.। "श्वेतवाहप्रकीर्य्या।" रीठाकरञ्जे । रिटा। रा.नि.व.९।१३। कण्टकीकरञ्जे । "कण्टकीविटपकरञ्जे।" सु.सू.३९अ.कफशमने। ड.। च.सू.१अ.फलिनीव.।

प्रकुञ्चः। पुं । पल्ले। ८ती.। प.प्र.१ख.।

प्रकुलम्। क्ली । सुन्दरदेहे। त्रिका.।

प्रकृतिः। स्त्री । शक्तौ । शिश्ने । योनौ। त्रिका.। आहारौषधद्रव्याणां स्वाभाविके गुर्व्वादिगुणयोगे। च.चि.१अ. । आकाशादिपञ्चतन्मात्रं बुद्धिः मूलप्रकृतिरहङ्कारश्चेत्यष्टमहाभूतसमुदायरूपे कारणे। च.शा.१अ.। अष्टरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम। महत्तत्त्वादयः सप्त महानहङ्कारः पञ्चतन्मात्राश्चेति। प्रकृतिर्महानहङ्कारः पञ्च तन्मात्राणीति अष्ट प्रकृतयः। प्रकृतिपुरुषसाधर्म्म्यम्—अनादित्वम् अनन्तत्वम् अलिङ्गत्वं नित्यत्वं सर्व्वगतत्वञ्च। वैधर्म्म्यं यथा—सा च अचेतना त्रिगुणा बीजधर्म्मिणी प्रसवधर्म्मिणी अमध्यस्थधर्म्मिणी चेति। पुरुषस्तु तद्विपरीतधर्म्मीति। तस्या गुणाः—सत्त्वरजस्तमांसीति । भा.पू.१भ.। स्वभावे। वातादिभेदेन प्रकृतयः सप्त। "शुक्रशोणितसंयोगे यो दोषस्तूत्कटो भवेत्। प्रकृतिर्जायते तेन.....॥" सु.शा.४अ. । "शुक्रास्रगर्भिणीभोज्यचेष्टागर्भाशयान्तरे। यः स्यादोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता॥" तेषु—जागरूकोऽल्पकेशश्च वातप्रकृतिः। अकालपलितादिः पित्तप्रकृतिः। श्यामकेशादिः श्लेष्मप्रकृतिः। एवं द्विरूपादिदर्शने द्विप्रकृतिः। वा.।

प्रकृतिभोजनम्। क्ली । स्वाभाविकाहारे । च.सू.१५अ.।

प्रकृतिवर्णः। त्रि । गात्रसवर्णे। च.सू.१८अ.।

प्रकृतिविघातः। पुं । प्रकृतेर्विकृतिजनकीपयोगे । स च कटुतिक्तकषायचारीणानां द्रव्याणामुपयोगरूपः। यच्चान्यदपि किञ्चित् श्लेष्मपुरीषप्रत्यनीकभूतं तत्स्यादिति। च.वि.७अ.।

प्रकोथः। त्रि । पूतिभावापन्ने । पचा। "प्रकोथोदकावगाहनात्।" सु.चि.२३अ.।

प्रकोपः (नम्)। पुं, क्ली । क्षोभे। चाञ्चल्ये। वै.निघ.। वातादीनां सङ्क्षोभहेतौ। ते च बहुधा तत्र वातस्य प्रकोपनं बलवद्विग्रहादि। पित्तस्य क्रोधशोकभयादि। कफस्य दिवास्वप्नादि। पित्तप्रकोपनमेव पित्तस्येति। ऋतुभेदे वातादिप्रकोपो यथा—"वर्षावायुः कुप्यतेऽन्तः शरत्सु लीनो वायुः कुप्यते पित्तरोगे। लीयेत् पित्तं शैशिरे श्लेष्मकुञ्जे हेमन्ते वा चीयमानस्तथापि। कोपं याति श्लेष्मरोगो वसन्ते तस्माच्छान्तिः श्लेष्मरोगस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चीणे। पित्तं याति कोपितां ग्रीष्मकाले दृष्टा शान्तिः पैत्तिकी वार्षिके च॥" अथ वायुप्रकोपः —"तथा वातमूत्रपुरीषस्य रोधात् कषायातिशीताऽन्निशाजागरेषु। व्यवायेऽध्व वाहयमादातिभुक्त्याध्वनि प्रायशो भाषणेनातिभीत्या। सुरुक्षैरतिचारतिक्तैः कटुभिस्तथा दोलाश्वकोष्ट्रकैर्यानभारे। रथे वा खरे कुञ्जरे गन्दिरे वा भवेन्मारुतस्य प्रकोपो नरस्य। सुशीते दिने दुर्दिने स्नानपीते पराह्णे निशाजागरे वासरे च। वर्षासु वे केवलं याति कोपं मरुत्सेवितो याति वै भुक्तजीर्णे। मसूराः कलायाश्च निष्पावकाश्च सहामाषशुभ्रा यवाश्यामलाः स्युः। सहा चामला कृष्णकाद्याः प्रदिष्टा हिमाः कङ्गुनीवाररक्ताश्च शाल्याः। तथा कोरदूषश्च श्यामाक एते: कृतं चौदनञ्च यवागूयुतं वा। कलिङ्गानि वास्तूक-चिल्लीकपूत्यः पलाण्डुस्तथा गृञ्जनं कन्दशाकम्। इमान् सेवितात्यर्थमेति प्रकोपं समीरस्य चोक्तः सुरासम्भवस्तु। अतो यत्नतो रक्षणीयं मनुष्यैः शुभं वेच्छसि त्वं सदा रोगशान्तिम्॥" अथ पित्तप्रकोपः —"अत्युष्णकटूम्लरूक्षैर्विदाहैः द्रव्यैः ससिन्धुसुरा-सेवनेन। घर्मेण क्रोधेन वा खेदनेन व्यवायेन वा याति कोपञ्च पित्तम्। कुलत्थाढकीयूषमूलार्कशिग्रु-शटीसर्षपाराजिकाशाकमेव। निशाजागरेष्वपि युद्धे श्रमे वा घनान्ते शरत्सु प्रकोपः प्रदिष्टः। अह्नेन वा चोष्णकाले शरत्सु शुभ्रं वासरे मध्यमे वा निशीथे। जीर्णे रसे भुक्तमात्रे प्रकोपः प्रदिष्टः कोविदैः स्यात्पित्तकोपः॥" अथ कफप्रकोपः— "निशाजागरे वासरे वातिनिद्रासुशीतोदकसेवने शीतले वा। पयःपानपीयूषेक्षुभिक्षिलैस्तु तथा गृञ्जनैः कन्दशाकैरथापि। अतिस्निग्धसंसेवने भोजने च प्रदिष्टः कफस्य प्रकोपो वसन्ते। दिनान्ते प्रभाते निशान्ते नरस्य प्रकोपः प्रदिष्टोऽपभुक्ते न जीर्णे। प्रदिष्टो बुधैः कोविदैरेव रोगः कफोत्पत्तिजन्यो हि कष्टप्रयुक्तः। सुशीतेऽथवा शीतकाले निशान्ते नरस्य प्रकोपः प्रदिष्टोऽपि भुक्ते। न जीर्णे प्रदिष्टः सुधी रोगवेगः निदानं कफस्येति चोक्तं सुधीभिः॥" अथ द्वन्द्वजप्रकोपः —"यदा विपर्य्यासगते ऋतौ च प्रकोपनं यस्य यथा प्रदिष्टं। तत्सेवमानस्य नरस्य रोगः स्याद्द्वन्द्वजो नाम विकारकारी। यस्मिन् ऋतौ वातविकार उक्तस्तस्मिन् यदि श्लेष्मविकोपनानि। संसेवते वा मनुजस्तदास्य भवेत् प्रकोपः कफपित्तयोश्च॥ यस्मिन् मरुत्कुप्यति सेवते यः पित्तस्य कोपप्रकराणि यानि। विपर्य्ययी वा ऋतुधान्ययोश्च स पित्त-वातप्रभवस्तदा स्यात्॥" अथ सन्निपातोत्पत्तिः— "विपर्य्यासागते काले रसे विपरिसेविते। तदा स्यात् सन्निपातो हि रोगोपद्रवकारकः॥" इति। अवि.५अ.।

प्रकोष्ठः। पुं। कूर्परपाणिसन्ध्यभागे। रा.नि.व. १८। कनुईयेर नीचे हस्ततल पर्य्यन्त।

प्रक्रिया। स्त्री। औषधादिक्रियायाम्। चिकित्सायाम्।

प्रक्लिन्नः। त्रि। अतिक्लेदयुक्ते।

प्रक्लिन्नवर्त्मा। पुं। नेत्ररोगविशेषे, क्लिन्नवर्त्म-रोगे। भा.।

प्रक्लेदः। पुं। आर्द्रतायाम्। भा.४भ.ना.रो.चि.। "प्रक्लेदमायाति च धूप्यते च।"

प्रक्वथितः। त्रि। पक्वे। प्रमथ्यारूपेण पक्वे। वा.चि.९अ.।

प्रखरः। पुं। सन्नाहे। विका.। कुक्कुरे। अश्व-तरे। मे.।

प्रगण्डः। पुं। कूर्परांससन्ध्यभागे। कनुई हईते बगल पर्य्यन्त। रा.नि.व.१८।

प्रगतजानुः (कः)। त्रि। दूरगतजानौ।

प्रगन्धः। पुं। पर्पटके। रा.नि.व.५।

प्रग्रहः। पुं। क्षारगन्धवहे। मे.। सु.कल्प.७ अ.। तुलासूत्रे। अम.। हस्ते। सुवर्णे। वै.निघ.। कर्णिकारवृक्षे। रा.नि.व.९।

प्रग्राहः। पुं। तुलासूत्रे। मे.।

प्रघणः। पुं। ताम्रपात्रे। लौहमुद्गरे। मे.।

प्रघनः। पुं। मुद्गजातिभेदे। वै.निघ.।

प्रचण्डः। पुं। शुक्लकरवीरे। मे.। त्रि। अत्युग्रे।

प्रचण्डमूर्त्तिः। पुं। वरुणवृक्षे। श.च.।

प्रचण्डा। स्त्री। श्वेतदूर्व्वायाम्। रा.नि.व.८।

प्रचयः। पुं। उच्चये। भा.।

प्रचलः। पुं। मयूरे। वै.निघ.। (कः)। सौम्यकीटविशेषे। सु.कल्प.८अ.।

प्रचला। स्त्री। सरटे। गिरगिटी। वै.निघ.।

प्रचलाकः। पुं। सर्पे। मयूरपुच्छे। मे.। सु. चि.१८अ.।

प्रचलाकी (इन्)। पुं। सर्पे। मयूरे। चिका.।

प्रचलाङ्गः। पुं। मयूरशिखायाम्। व.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रचलितः। पुं। सद्योव्रणविशेषे। वै.निघ.।

प्रचारः। पुं। अक्षस्य श्लैष्मिकाचिरोगे। लक्षणं —"प्रच्छादयति यद्दृष्टिं मांसं पर्य्यन्तवर्द्धितम्। प्रचारकाख्यं तं विद्यान्नेत्ररोगं कफान्वितम्।" ज.द.३०अ.।

प्रचेतसी। स्त्री। कट्फलवृक्षे। रा.नि.व.९।

प्रचेलम्। क्ली। पीतचन्दने। ग्र.च.। पीतमुञ्जे। वै.निघ.।

प्रचेलकः। पुं। अश्वे। ग्र.मा.।

प्रचेलुकः। पुं। मानभेदे। पालि। विका.।

प्रचोद(दि)नी। स्त्री। कण्टकार्य्याम्। अम.। दुरालभायाम्। वै.निघ.।

प्रच्छर्दनम्। क्ली। वमने। भैष.।

प्रच्छर्दिका। स्त्री। वान्तौ। हे.च.।

प्रच्छादनम्। क्ली। नेत्रच्छदे। ज.द.२अ.। उत्तरीयवस्त्रे। हे.च.।

प्रच्छानम्। क्ली। छेदने, रक्तस्रावे। सु.कल्प. १अ.। सु.चि.क्षुद्ररो.चि.,"प्रच्छानैर्वा जलौकाभिः।"

प्रजननम्। क्ली। गर्भधारणे। योनौ। मे.।

प्रजल्पः। पुं। अतिभाषणे। वै.निघ.।

प्रजा। स्त्री। सन्ततौ। जने। अम.।

प्रजाता। स्त्री। प्रसूतायाम्। अम.।

प्रजादा। स्त्री। पुत्रदात्रीलतायाम्। रा.नि.व.४।

प्रजादानम्। क्ली। रौप्ये। ग्र.च.।

प्रजाहितम्। क्ली। जले। ग्र.मा.। [१६।

प्रज्ञविप्रियः। पुं। षष्टिकधान्ये। रा.नि.व.

प्रज्ञापराधः। पुं। अहितसेवनातिव्यवायादौ। तदुक्तं—"धीधृतिस्मृतिविभ्रष्टः कर्म्म यत् कुरुतेऽशुभम्। प्रज्ञापराधं तं विद्यात् सर्व्वदोषप्रकोपनम्। कर्म्मकालातिपातश्च मिथ्यारम्भश्च कर्म्मणाम्। ज्ञातानां स्वयमर्थानामहितानां निषेवणम्।" च.।

प्रणा(ना)ल(ली)सः। पुं। जीवशाके। वास्तूके। प.मु.।

प्रणालिका (ली)। स्त्री। जलनिर्गममार्गे। द्वारा.। नस्यनलिकायाम्। नस्य दिवार नलि। च.द.नस्याधिकारे।

प्रततिः (ती)। स्त्री। लतायाम्।

प्रतना (नी)। स्त्री। गोजिह्वायाम्। गोजिया शाक। रा.नि.व.४। वाघ्याह्वे। वै.निघ.।

प्रतमकः। पुं। श्वासरोगभेदे। तमकश्वास। लक्षणं—"ज्वरमूर्च्छापरीतस्य विद्यात् प्रतमकन्तु तम्। उदावर्त्तैरजीर्णैक्लिन्नकायनिरीक्षणः। तमसा वर्द्धतेऽत्यर्थं श्लैष्मिश्याशु प्रशाम्यति। लब्धतमसोवास्य विद्यात् प्रतमकं तु तम्॥" मा.नि.।

प्रतरः (न्धिः)। पुं। ग्रीवोरुगतसन्धौ। स च ग्रीवापृष्ठदण्डयोः सन्धिः। भा.। सु.शा.५अ.।

प्रतलः। पुं। संहतविस्तताङ्गुलिकरे। हातेर तेलो। रा.नि.व.१८।

प्रतानवान्। पुं। सोमलतामेदे। सु.चि.२९ अ.। See सोमः।

प्रतानिका (निनी)। स्त्री। प्रसारण्याम्। गन्धभाद्दुलिया। शारिवायाम्। अनन्तमूल। रा.नि.व.५।१२।

प्रतापः (वान्)। पुं। अर्कवृक्षे। शुक्लार्के। रा.नि.व.१०।

प्रतापतपनः (रसः)। पुं। सन्निपातज्वराधिकारे रसः। "गन्धकं हिङ्गुलं सूतं तालकं लौहटङ्गणे। खर्परं साचिकाचारं मञ्जिष्ठां हिज्जलं समं। रसेन मर्द्दितम्पिण्डं निर्गुण्डीहस्तिशुण्डयोः। अष्टयामम्पचेत्कूप्यां निरुध्य सिकताह्वये। ततः सिद्धं समादाय रक्तिकामार्द्रकेण च। सेवेत ..... ॥" रस.कौ। [अम.।

प्रतापसः। पुं। श्वेतार्के। श्वेत आकन्द।

प्रतिकर्म्म। क्ली। प्रतिक्रियायाम्। उपाये। सु.कल्प.५अ.। प्रसाधने। अम.।

प्रतिका। स्त्री। जवापुष्पवृक्षे।

प्रतिकीर्णः। त्रि। मलादिव्याप्ते। च.इ.।

प्रतिखुरः। पुं। मूढगर्भभेदे। "निःसृतहस्तपादशिराः कायसङ्गी प्रतिखुरः।" सु.शा.८अ.।

प्रतिगन्धा। स्त्री। सोमराज्याम्। रा.नि.व.४।

प्रतिघः। पुं। मूर्च्छायाम्। ग्र.र.।

प्रतिघ्नम्। क्ली। अङ्गे। ग्र.च.।

प्रतिच्छाया। स्त्री। जलादर्शातपादिषु प्रतिफलितशरीरच्छायायाम्। प्रतिबिम्बित शरीरेर छाया। "प्रतिप्रमाणसंस्थाना जलादर्शातपादिषु।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छाया या सा प्रतिच्छाया या च वर्णप्रभाश्रया ॥" च.इ.७अ.।

प्रतिजिह्वा (ह्विका)। स्त्री। मूलजिह्वायाम्। आलजिह्वा। रा.नि.व.१८। त्रिका.।

प्रतिज्ञा। स्त्री। साध्यवचने। "प्रतिज्ञा नाम साध्यवचनं, यथा नित्यः पुरुष इति।" च.वि. ८ अ.।

प्रतिज्ञाहानिः। पुं। पूर्व्वप्रतिगृहीतायाः प्रतिज्ञायाः पर्य्यनुयोगेन परित्यागे। च.वि.८अ.।

प्रतितन्त्रसिद्धान्तः। पुं। सिद्धान्तविशेषे। See सिद्धान्तः।

प्रतितूणी। स्त्री। वातव्याधिविशेषे। लक्षणं —"गुदोपस्थोत्थिता सैव प्रतिलोमं विधाविता। वेगैः पक्वाशयं याति प्रतूणी चेह सोच्यते ॥" मा.नि.। "तूष्णाश्च प्रतितूष्णाश्च प्रशस्ताः स्नेहवस्तयः। पिबेद्वा स्नेहलवणं पिप्पल्यादिमथाम्बुना। उष्णेन रामठचारप्रगाढ़मथवा घृतम्॥" सु.नि. १ अ.।

प्रतिनिका। स्त्री। प्रसारण्याम्। शारिवायाम्।

प्रतिपत्रफला। स्त्री। क्षुद्रकारवेल्लिकायाम्। रा.नि.व.७।

प्रतिपर्ण(त्र)शिफा। स्त्री। द्रवन्त्याम्। दन्तीभेद। रा.नि.व.५।

प्रतिपिष्टः। त्रि। अस्थिद्वयपिष्टे, उत्पिष्टे। हाड़े हाड़े थेँतो हওয়া। भा.म.३भ.।

प्रतिबन्धकः। पुं। वृक्षे। गाछ।

प्रतिबला। स्त्री। अतिबलायाम्। चि.क्र.क. प्रद.चि.।

प्रतिमर्षः। पुं। शिरोवस्तिविशेषे। स चावालं प्रयोज्यः। "जन्मप्रभृति बालस्य प्रतिमर्षो विधीयते।" रत्नमालासंग्रहः। ईषदुत्सिहनात् स्नेहो यावद्वक्त्रं प्रपद्यते। नस्ये निषिक्तं विद्यात् प्रतिमर्षं प्रमाणतः। प्रतिमर्षश्च नस्यार्थं करोति न च दोषभाक्॥" प.प्र.४खं.। तत्र चत्वारः षट् अष्टौ वा बिन्दवः यथाबलं शिरोविरेकस्नेहस्य मात्रा। सु.चि.४०अ.वा.उ.२अ.। स चतुर्ष्वंशेषु कालेषूपादेयः। तद्यथा—"तल्पोत्थितेन प्रचालितदन्तेन गृहान्निर्गच्छता व्यायामव्यवायाध्वपरिश्रान्तेन मूत्रोच्चारकवलाञ्जनान्ते भुक्तवता छर्द्दितवता दिवास्वप्नोत्थितेन सायञ्चेति। तल्पोत्थितादौ यथाक्रमं गुणाः—तल्पोत्थितेनासेवितः प्रतिमर्षः रात्रावुपचितनासास्रोतोगतं मलमुपहन्ति मनःप्रसादञ्च करोति। प्रचालितदन्तेनासेवितः दन्तानां दृढ़तां वदनसौगन्ध्यञ्चापादयति। गृहान्निर्गच्छता सेवितः नासास्रोतसः क्लिन्नतया रजोधूमौ वा नाबाधते। व्यायामसैथुनात्परिश्रान्तेन सेवितः श्रममुपहन्ति। मूत्रोच्चारान्ते वा सेवितः दृष्टिगुरुत्वमपनयति। कवलाञ्जनान्ते दृष्टिं प्रसादयति। अभुक्तवता सेवितः स्रोतसां विशुद्धिं लघुतामापादयति। वान्तेनासेवितः स्रोतोविलग्नं श्लेष्माणमपोह्य भक्तकाङ्क्षामापादयति। दिवास्वप्नोत्थितेनासेवितः निद्रायिगं गुरुत्वं मलञ्चापोह्य चित्तैकाग्र्यं जनयति। सायञ्चासेवितः सुखनिद्राप्रबोधञ्चेति। सु.चि.४०अ.।

प्रतिमा (नम्)। स्त्री, क्ली। करिणी दन्तद्वयमध्यवर्त्तिगुरुभागे। गजदन्तबन्धे। त्रिका.।

प्रतिमूषिका। स्त्री। कुकुन्दर्य्याम्। वै.निघ.।

प्रतियत्नः। पुं। रचनायाम्। त्रिका.।

प्रतिरम्भः। पुं। रुन्तापे। निदा.।

प्रतिलोमः। पुं। विलोमे।

प्रति(ती)वापः। पुं। कषाये चूर्णादिप्रक्षेपे। र.चि.३अ.। कल्के। सु.चि.२३अ.। धातुभस्मीकरणे। गलितस्य धातोः द्रव्यान्तरेणावचूर्णने। अ.टी.खा.। पानीयौषधविशेषे। च.द.विद्र.चि.।

प्रतिविम्बदर्शकः। पुं। दर्पणे। वै.निघ.।

प्रतिविषा। स्त्री। अतिविषायाम्। आतईच। च.द.अ.सा.चि.। "हिङ्गुप्रतिविषाभयाः।"

प्रतिविष्णुकः। पुं। सुचुकुन्दवृक्षे। रा.नि. व.१०। चौरिणीभेदे। वै.निघ.।

प्रतिवीजम्। क्ली। तारनागाभ्रहेमकृतपारदनिष्यन्दद्रव्ये। "नागाभं वाहयेत्तारे हेम्नि च द्वादशे गुणे। प्रतिवीजमिदं श्रेष्ठं पारदस्य निष्यन्दनं॥" र.चि.३अ.।

प्रतिश्या (श्याय)। पुं। नासारोगविशेषे। तस्य निदानम्—"अवश्यायानिलरजोभाष्यातिस्वप्नजागरैः। नौचाल्युच्चोपधानेन पीतेनान्येन वारिणा। अत्यम्बुपानरमणच्छर्दिवाष्पग्रहादिभिः। क्रुद्धा वातोल्बणा दोषा नासायां स्थानतां गताः। जनयन्ति प्रतिश्यायं वर्द्धमानं क्षयप्रदम्। तत्र वातात् प्रतिश्याये सुखशीर्षो भ्रमक्षयः। घ्राणोप-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रीधनिस्रोददन्तशङ्खशिरोव्यथाः । कौटका इव सर्पन्ति मन्यते परितो भ्रुवौ। स्वरसादश्चिरात् पाकः शिशिराच्छकफस्रुतिः। पित्तात्तृष्णाज्वरघ्राण-पिटिकासम्भवभ्रमाः। नासायपाकी रूक्षीणस्रास्र-पीतकफस्रुतिः। कफात्कासोऽरुचिः श्वासो वमथु-र्गौरवम्। माधुर्य्यं वदने कण्डूः स्निग्धशुक्लघना स्रुतिः। सर्व्वजो लक्षणैः सर्व्वैरकस्माद्वृद्धिशान्ति-मान्। दुष्टं नासाश्रितं प्राप्य प्रतिश्यायं करोत्य-सृक्। उरसः सुप्तता तामनेत्रत्वं श्वासपूरिता। सर्व्व एव प्रतिश्याया दुष्टतां यान्त्युपेक्षिताः।" वा.उ.१९अ.। रस.र.हाल.चि.। "प्रतिश्यायश्वास-कासकैः।" भा.म.१भ.श्लीप.ज्व.चि.। "प्रतिश्यायो ऽरुचिः कासः।" पीनसरोगे। निदा.।

प्रतिष्ठा। स्त्री। जनीपादेयतयावस्थाने। च. सू.१अ.।

प्रतिष्ठापना। स्त्री। परप्रतिज्ञायाः प्रति-विपरीतार्थायाः स्थापनायाम्। यथा—अनित्यः पुरुषः इति। च.वि.८अ.।

प्रतिसमाधानम्। क्ली। रोगमुक्तकरणे। वै.निघ.। [निघ.।

प्रतिसरः। पुं। व्रणशुद्धौ। प्रभातकाले। वै.

प्रतिसारः (णम्)। पुं, क्ली। लवणैः कटु-चूर्णैश्च व्रणघर्षणे। "लवणैः कटुचूर्णैश्च घृष्यते यद्व्रणं बुधैः। प्रतिसारस्ततः प्रोक्तः..... ॥" ज.द. १२अ.। घर्षणे। सु.चि.२२अ.। दन्तजिह्वा-सुखानां चूर्णकल्कावलेहैरङ्गुल्या शनैः घर्षणे। "वैरस्यं मुखदौर्गन्ध्यं मुखशोषं तृषा तृषाम्। अरुचिं दन्तपीड़ाञ्च निहन्ति प्रतिसारणम्॥" भा.।

प्रतिसारी (इन्)। त्रि। सारकद्रव्यभावे। वै. निघ.।

प्रतिसूर्य्यः (कः)। पुं। सरटे। त्रिका.। विश्व.। तन्नामकगौधेरकजातौ। सु.कल्प.८अ.।

प्रतिसोमा। स्त्री। महिषवल्लीलतायाम्। रा. नि.व.३। लघुसोमलतायाम्। वै.निघ.।

प्रति(ती)हासः। पुं। करवीरवृक्षे। करवी गाछ। रा.नि.व.१०। अम.। शुक्लकरवीरे। वै. निघ.।

प्रतिच्छुत्। स्त्री। छिक्कायाम्। हाँचि। वै.निघ.।

प्रतीकः। पुं। शरीरावयवे। रा.नि.व.१८। पटोले। भा.पू.१भ.शा.व.। विलोमे। मे.।

प्रतीकारः। पुं। चिकित्सायाम्। श.मा.।

प्रतीनाहः। पुं। कर्णरोगे। लक्षणम्—"वातेन शोणितः श्लेष्मा स्रोतो लिम्पेत्ततो भवेत्। रुग्गौरवं विधानञ्च स प्रतीनाहसंज्ञकः॥" वा.उ.१७अ.। नासारोगभेदे। "उच्छ्वासमार्गन्तु कफः सवातो रुन्ध्यात् प्रतीनाहमुदाहरेत्तम्।" मा.नि.।

प्रतुण्डकः। पुं। जीवकशाके। वै.निघ.।

प्रतुदः। पुं। गृध्रश्येनकाकादिपक्षिजातौ। ते प्रतुद्य निष्कृष्य भक्षयन्तीति प्रतुदसंज्ञां प्राप्ताः। तन्मांसगुणाः—सद्यःस्वादु गुरूष्णं स्निग्धं बल्यं पित्तदाहरक्तकरञ्च। रा.नि.व.१७। एतदर्कगुणाः —"कफपित्तहरो ग्राही बह्विष्णूत्तको भवेत्।" अर्क.चि.।

प्रतूणी। स्त्री। प्रतितूणीनामरोगभेदे। See प्रतितूणी।

प्रतोली। स्त्री। ग्रीवामेदग्रीव्रणबन्धनभेदे। सु. सू.१८अ.। लक्षणं—"सुत्तीली पुटिका प्रोक्ता जालवद्बहुरन्ध्रका।" इति भानुमतीटी.। "कौपी-नाकारा मत्स्यधारणजलयन्त्रवत् बहुच्छिद्रा सुत्तीली प्रतोली वा।" वा.।

प्रत्यक्पर्णी। स्त्री। रक्तापामार्गे। भा.पू.१ भ.। द्रवन्त्याम्। रा.नि.व.५।

प्रत्यक्पुष्पी। स्त्री। अपामार्गक्षुपे। रा.नि.व. ४। सु.सू.४३अ.। च.सू.१४अ.। वा.सू.१५अ. अर्कादिः। "प्रत्यक्पुष्पी पीततैलोदकीर्य्या।" सूषिकपर्ण्याम्। दन्तीवृक्षे।

प्रत्यक्श्रेणी। स्त्री। दन्त्याम्। अम.। च.सू.१ अ.। श्रुतश्रेणीक्षुपे। रा.नि.व.४। द्रवन्तीक्षुपे। रा.नि.व.५। आखुकर्ण्याम्। इन्दूरकर्णी। शि मूषाकर्णी। रा.नि.व.३। क्षुद्रदन्तीक्षुपे। र.मा.।

प्रत्यग्गन्धा। स्त्री। स्वर्णयूथिकायाम् वै. निघ.।

प्रत्यङ्गम्। क्ली। अङ्गावयवेषु। तानि मस्तको-दरपृष्ठनाभिललाटनासाचिबुकबस्तिग्रीवाः इत्येता एकैकाः। कर्णनेत्रनासाभ्रुशङ्खांसगण्डकक्षस्तनहृषण-पार्श्वस्फिग्जानुबाहूरुप्रसृतयो द्वे द्वे विंशतिरङ्गलयः। एष प्रत्यङ्गविभागः। तस्य पुनः सङ्ख्यानम्। यथा—त्वचः कलाः धातवः मलाः दोषाः यकृत् प्लीहा फुस्फुसः उण्डुकः हृदयम् आशयाः अन्त्राणि हृक्कहृदयं श्रोतांसि कण्डराः जालानि कूर्चाः रज्जवः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेवन्य: सङ्घाता: सीमन्ता: अस्थीनि सन्धय: स्नायव: पेश्य: मर्म्माणि शिरा: धमन्य: योगवहानि च। विशेषा: पर्य्यायेषु स्मृता:। सु.शा.५अ.।

प्रत्यङ्गिरा। स्त्री। कण्टकशिरीषवृक्षे। "पिबति य: प्रत्यङ्गिराहभवम्।" च.द. भेष. विष.चि.। श्वेतपुनर्नवायाम्। कुलिकाहृक्षे।

प्रत्यञ्जनम्। क्ली। अञ्जनेन नेत्रप्रसाधने। चोखे काजल देओया। च.द.। [निघ.।

प्रत्यनीक:। वि। प्रतिकूले। असाध्ये। वै.

प्रत्यनुयोग:। पुं। अनुयोगस्यानुयोगे। यथा —"अनुयोगस्य पुन: को हेतु: इति।" च.वि.८अ.।

प्रत्यय:। पुं। हेतौ। भा.। रन्ध्रे। शब्दे। अस.। वि। स्वादौ। हे.च.।

प्रत्यवसानम्। क्ली। भोजने। र.मा.। रा. नि.व.२०।

प्रत्यश्मा (न्)। पुं। गिरिसत्तिकायाम्। गिरिमाटी। विका.।

प्रत्यष्ठीला। स्त्री। वातव्याधिविशेषे। लक्षणं यथा—"एतामेव क्रियायुक्तां वातविघ्नवरौषधीम्। प्रत्यष्ठीलामिति वदेत् जठरे तिर्य्यगुत्थिताम्॥" मा.नि.। सु.नि.१अ.। "प्रत्यष्ठीलाष्ठीलक्रियो: गुल्मेऽभ्यन्तरविद्रधौ। क्रियाहिङ्ग्वादिचूर्णञ्च शस्यते-ऽत्र विशेषत:॥"

प्रत्यक्षम्। क्ली। इन्द्रियग्राह्ये। अस.। तच्च षड्विधं चाक्षुषादिभेदेन। "प्रत्यक्षं नाम तदृयदात्मना पञ्चेन्द्रियैश्च स्वयमुपलभ्यते। तत्रात्मप्रत्यक्षा: सुखदु:खेच्छाद्वेषादय:। शब्दादयस्तु इन्द्रिय-प्रत्यक्षा:।" च.वि.८अ.।

प्रत्याध्मान:। पुं। वातव्याधिविशेषे। लक्षणम् —"विसृक्तपार्श्वहृदयं तदेवाध्मायितोत्थितं। प्रत्या-ध्मानं विजानीयात्कफव्याकुलितानिलम्॥" मा.नि.। सा. चिकित्सा—"प्रत्याध्माने समुत्पन्ने कुर्य्याद्वमन-लङ्घने। दीपनादि प्रयुञ्जीत पूर्ब्बवद्वस्तिकर्म्म च॥"

प्रत्यानाह:। पुं। आनाहवाते। निदा.।

प्रत्युद्गार:। पुं। वायुजन्यरोगभेदे। वै.निघ.।

प्रत्यु(त्यू)ष:। पुं, क्ली। प्रभाते। अ.टी.भ.।

प्रथमकुसुम:। पुं। शुक्लसरुवकवृक्षे। वै.निघ.।

प्रथमनवनीतम्। क्ली। प्रसवात् शतदिना-न्तरजातनवनीते। वै.निघ.।

प्रथितालुकी। स्त्री। रक्तालुभेदे। भा.।

प्रथुक:। पुं। चिपीटके। चिँड़े।

प्रदर:। पुं। (Fluor albus.) तन्नामक-स्त्रीरक्तादिस्रावरोगे। प्रदर, परदल। "रज: प्रदीर्य्यते यस्मात् प्रदरस्तेन स स्मृत:।" निदानादि यथा—"विरुद्धमध्याध्यशनादजीर्णाद्गर्भप्रपातादतिमैथु-नाच्च। यानाश्वगोकादतिकर्षणाच्च भाराभिघाता-च्छयनाद्दिवा च। तं श्लेष्मपित्तानिलसन्निपातैश्चतु:-प्रकारं प्रदरं वदन्ति।" इति। लक्षणं यथा— "असृग्दरं भवेत्सर्व्वं साङ्गमर्द्दं सवेदनम्। अश्नत् स्रवन्तीमास्रावं तृष्णादाहज्वरान्वितां। दुर्ब्बलां क्षीण-रक्ताञ्च तामसाध्यां विवर्ज्जयेत्॥" कफाद्यथा— आमं पिच्छं पाण्डुतुषोदकाभं स्रवति। पित्तात् पीतनीलगुडसुषणं सवेगं रक्तं स्रवति। वातात् रूक्षम् अरुणं फेनिलमल्पमल्पञ्च स्रवेत्। अन्यच्च— सक्षौद्रसर्पिर्हरितालवर्णं कृष्णं मज्जप्रकाशञ्च स्रवेत्। मा.नि.।

प्रदरान्तकलौहम्। क्ली। प्रदराधिकारे लौहे। "लौहं ताम्रं हरीतालं वङ्गमभ्रं वराटिका। त्रिकटु त्रिफला चित्रं विड़ङ्गं पटुपञ्चकम्। चविका पिप्पली शुण्ठी वचाहृषपाकलम्। शटी पाठा देवदारु एला च त्वदारकम्। एतानि समभागानि संचूर्ण्य वटिकां कुरु। शर्करामधुसंयुक्तं घृतेन भावयेत् पुन:। रक्तं शीतं तथा नीलं पीतं प्रदरदुस्तरम्...।" लौह, ताम्र, हरिताल, वङ्ग, अभ्र, कड़िभस्म, त्रिकटु, त्रिफला, चित्रामूल, विड़ङ्ग, पञ्चलवण, चई, पिपुल, शङ्खभस्म, वच, हवुषफल, कुड़, शटी, आकनादि, देवदारु, एलाईच, बीजताड़कर बीज, प्रत्येक चूर्ण समभाग, मधु ओ चिनि संयोगे घृतेर सहित भावना दिया बटी करिबे। रस.र.।

प्रदिग्धमांसम्। क्ली। पक्वमांसव्यञ्जनविशेषे। "मांसं बहुघृतैर्भृष्टं सिक्तं चीणाम्बुना मुहु:। जीरकाद्यै: समायुक्तं परिशुष्कं तदुच्यते। तदेव घृततक्राढ्यं प्रदिग्धं सविजानीयात्॥" See मांसम्।

प्रदीपन:। पुं। चित्रकवृक्षे। वै.निघ.२भ.अर्ग:-चि.राजवल्लभरसे। स्थावरविषभेदे। लक्षणं यथा —"वर्णतो लोहितो य: स्याद्दीप्तिमान्दहनप्रभ:। महादाहकर: पूर्ब्बै: कथित: स प्रदीपन:॥" भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रदीसा । स्त्री । लाङ्गलिकायाम् । विषलाङ्गूलिया । वै.निघ. ।

प्रदेशः । पुं । आरब्धस्यातीतेन सम्पादने । "प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः । यथा देवदत्तस्यानेन शल्यमुद्धृतं तस्मात्त्वयदत्तस्याप्ययमेव उद्धरिष्यतीति ।" सु.उ.६५अ. ।

प्रदेश(शि)नी । स्त्री । तर्ज्जन्यङ्गुली । रा.नि. व.१८ । शस्त्रविशेषे । सा च अग्रपर्व्वप्रदेशप्रमाणा मुद्रिका दशाङ्गुला च कर्त्तरीति कथ्यते । सु.सू. ८अ. ।

प्रदेहः । पुं । अनुलेपनाभ्यङ्गादौ । सु.सू.१८अ. ।

प्रधमनम् । क्ली । नस्यविशेषे । "षडङ्गुला द्विवक्त्रा सा नाड़ी चूर्णं तया धमेत् । तीक्ष्णक्षौलमितं वक्त्रयोः प्रधमनं हितम् ॥" भा. । "घ्राणमार्गेण यच्चूर्णम्प्रेर्य्यते सुखवायुना । प्रधमनं तदित्याहुः ।" ज.द.१२अ. । सु.सू.७अ.शूक्तीचि.विकटत्वादिनस्ये ।

प्रधानकर्म्म । क्ली । रोगोत्पत्तौ यत् क्रियते हितीयं कर्म्म तत्र । व्रणपाचनरोपणादौ वा । वमन विरेचनवस्तिनस्यशिरामोक्षणेषु वा । आतङ्कोत्पत्तौ यत् क्रियते कर्म्म तत्र वा । सु.सू.५अ. ।

प्रनाल(श)कः । पुं । वास्तुकशाके । जीवशाके । वै.निघ. ।

प्रपथ्या । स्त्री । हरीतक्याम् । रा.नि.व.११ ।

प्रपदम् । क्ली । पादाग्रभागे । "पादाग्रं प्रपदं मतम् ।" रा.नि.व.१८ ।

प्रपन्नाड़ः । पुं । चक्रमर्द्दवृक्षे ।

प्रपा । स्त्री । पानीयशालायाम् । जलेर घर । अम. ।

प्रपाकी (इन्) । पुं । गर्द्दभाण्डवृक्षे ।

प्रपाणम् । क्ली । उत्तरौष्ठे । "उत्तरौष्ठं प्रपाणं स्यात् ।" ज.द.२अ. ।

प्रपाणिः (कः) । पुं । करस्याधोभागे, पाणितले । हातेर तेलो । "करस्याधः प्रपाणिः स्यात् ।" रा.नि.व.१८ । च.वि.८अ. । (कः) मणिबन्धात्कफोणिपर्य्यन्ते करभागे । च.इ.८अ. ।

प्रपातः । पुं । भृगौ, प्रपतनस्थाने । सु.कल्प. ५अ. ।

प्रपादिकः । पुं । मयूरे । वै.निघ. ।

प्रपानकम् । क्ली । पाना इति शरवत् इति च ख्याते नानारसपेयद्रव्ये । यथास्रपानकादि । पाना, शरबत् । भा. । "आममामं जले स्निग्धं मर्द्दितं दृढ़पाणिना । सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम् । प्रपाणकमिदं श्रेष्ठं भीमसेनेन निर्म्मितं, सद्योरुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम् ।"

प्रपीड़नम् । क्ली । व्रणविदारण-पूयादिशोषणसाधने । तत्साधन-द्रव्याणि यथा—"द्रव्याणां पिच्छिलानान्तु त्वङ्मूलानि प्रपीड़नं । यवगोधूममाषाणां चूर्णानि च समासतः ॥"

प्रपुण्डरीकम् । क्ली । प्रपौण्डरीके । पूण्डरिया । च.चि.४अ. ।

प्रपुन्नटिः । पुं । चक्रमर्द्दवृक्षे ।

प्रपुना (न्न, न्न) टः) ड़ः, लः) । पुं । (Cassia Tora.) चक्रमर्द्दवृक्षे । चाकुन्दा । तें तगरिशचेट्टु । ता. उषित्तगरयी । दा. टरोट । रा.नि.व.४ ।

प्रपुन्नाटच्छदः । पुं । चणकवृक्षे । वै.निघ. । चक्रमर्द्दपत्रे ।

प्रपुराणघृतम् । क्ली । अतिपुरातनघृते । खूब पुराण घृत । "लाचारसनिभं शीतं प्रपुराणघृतः परम् ।" मि.यो.उन्माद.चि. ।

प्रपुराणधान्यम् । क्ली । पुराणधान्यके । अति पुरातन धान । च.चि.५अ. ।

प्रपूरिका । स्त्री । कण्टकार्य्याम् । श.च. ।

प्रपोटकः । पुं । अश्वस्य पादरोगभेदे । लक्षणं यथा—"प्रपोटकं विजानीयात् ग्रन्थिभिः कूर्चसम्भवैः । आमण्डकास्थिसङ्काशैः ग्रन्थिभिश्चातिकण्टकैः ॥" ज.द.३९अ. ।

प्रपौण्डरी(ण्ड्र)कम् । क्ली । (Root stock of nymphaea lotus.) शालपर्णीपत्रतुल्यपत्रे क्षुपविटपिनि । पूण्डरिया । हिं पुंड़रो । मं पुण्डरीक । तें पुंड़रीकमनुगेविध्यानमु । गुणः—मधुरं करिनरचक्षुष्यं तिक्तं शीतलं रक्तपित्तव्रणघ्नं ज्वरदाहतृष्णाघ्नञ्च । रा.नि.व.१२ । च.द.छागाद्यघृते । तन्नामककन्दविषे । सु.कल्प.२अ. । See कन्दविषम् ।

प्रबलः । त्रि । बलवति । पुं । पल्लवे । श.मा. । प्रसरे । स्त्री । प्रसारणीलतायाम् । वै.निघ. ।

प्रबला । स्त्री । प्रसारण्याम् । रा.नि.व.५ ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबलाकी (न्) । पुं । सर्पे । त्रि ।

प्रबालः । पुं, क्ली । स्वनामख्याते रत्नभेदे । पला, मूङ्गा । अम. । तात्पर्य्याया:,—विद्रुमः रक्तकन्दः रक्तकन्दलः अङ्गारकमणिः रक्ताङ्गः अब्धीधिरुद्भवः भौमरत्नं रक्ताकारः लतामणिः । गुणाः—मधुरः अम्लः कफपित्तादिदोषघ्नः स्त्रीणांश्लैष्मिकान्तिकरः धारणात् माङ्गल्यश्च । सूक्ष्मः घनः शिराहीनः वृत्तः—शुभकरः । गौरः क्षणरुचः स्निग्धः चक्रसूक्ष्मः—अशुभकरः । रा.नि.व.१३ सारकः शीतलः कषायः स्वादुः वान्तिकरः चक्षुष्यश्च । राज. । किंशुलये । मे. । शोधनप्रकारणविधिर्यथा—जयन्तीपत्रं आर्द्रीकृत्वा गजपुटे पचेत् ।

प्रबालचन्दनम् । क्ली । रक्तचन्दने ।

प्रबालफलम् । क्ली । रक्तचन्दने भा. ।

प्रबालिकः । पुं । जीवशाके । रा.नि.व.७ ।

प्रवेपकः (नः) । पुं । कम्पने ।

प्रबोध (धि) **नौ** । स्त्री । दुरालभायाम् रा.नि.व.४ ।

प्रबोधिका । स्त्री । कुक्कुट्याम् । कुकड़ी । वै. निघ. ।

प्रभञ्जनः । पुं । वायौ ।

प्रभद्रः (कः) । पुं । निम्बवृक्षे । निम गाछ । रा.नि.व.९ । पारिभद्रवृक्षे । पालिदा मान्दार गाछ । स्त्री । प्रसारण्याम् । गन्धभाद्दलिन्याम् । रा.नि.व.५ ।

प्रभवः । पुं । कारणे । जन्महेतौ । अम. । जन्मनि । शब्दर. ।

प्रभाकरः । पुं । अर्कवृक्षे । आकन्द गाछ ।

प्रभाकरक्षीरम् । क्ली । अर्कक्षीरे । आकन्द आठा । वै.निघ. २भ. कर्णकण्डूचि. ।

प्रभाकीटः । पुं । खद्योते । रा.नि.व.१९ ।

प्रभाञ्जनः । पुं । शोभाञ्जनवृक्षे । सजिना गाछ । चिका. ।

प्रभातम् । क्ली । प्रातःकाले । तत्र द्रष्टव्यं यथा —"वैद्यः पुरोहितो मन्त्री देवज्ञोऽत्र चतुर्थकः । प्रभातकाले द्रष्टव्यो नित्यं स्वस्तिमिच्छता ॥" राज.१प. ।

प्रभाभासः । पुं । काकविशेषे । वै.निघ. ।

प्रभावः । पुं । स्वभावे । सामर्थ्ये । "रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम् । दन्तीरसाद्य स्तुल्यापि विरेचने । मधूकस्य च मृद्वीका घृतं चौरस्य दर्पनम् ॥" इत्यादि । "क्वचित्तु केवलं द्रव्यं कर्म कुर्य्यात्प्रभावतः । ज्वरं हन्ति गिरीवद्धा सहदेवीजटा यथा ॥" भा. ।

प्रभुः । पुं । पारदे । रा.नि.व.१३ ।

प्रभूततीक्ष्णगन्धा । स्त्री । राजिकायाम् । सरिषा । वै.निघ. ।

प्रभृतिः । स्त्री । प्रकटायीकरणे । च.सू.१४अ. ।

प्रभेषजा । स्त्री । काकादुम्बरिकायाम् । रा. नि. व. ११ ।

प्रभ्रंशथुः । पुं । भंशथुनामनासारोगभेदे ।

प्रमत्तः । पुं । भासपक्षिणि । काकविशेषे । स्त्री । लाङ्गलीवृक्षे । विषलाङ्गूलिन्याम् । वै.निघ. ।

प्रमथः । पुं । घोटके । अ.रा. । स्त्री (था) । हरीतक्याम् । मद.व.१ । पीड़ायाम् ।

प्रमथनम् । क्ली । विलोड़ने । [रा.नि.व.१५ ।

प्रमथितम् । क्ली । नवनीते । निर्जलतक्रे ।

प्रमथ्या । स्त्री । मन्थभेदे "यूतः कषायो निर्य्यूहः क्वाथो यूषः कृतश्च यः । कृतयूषः प्रमथ्या च द्रव्यात्कल्ककृतात् मृता ॥" इति प्रमथ्यालक्षणम् वा.चि.१अ. । अरुण. । "प्रमथ्या प्रोच्यते द्रव्यं पलमात्रं सुकल्कितम् । किञ्चिदन्वेन संयुक्तमथवान्यविवर्जितम् । तोये चाष्टगुणे साध्यं पानमाहुः पलद्वयम् ।" शेषं मन्थवत् । तोड़लानन्दे । हारीतः । गुणाः—"प्रमथ्या मध्यदोषेभ्यो दद्याद्दोषनपाचनम् ।" वा. ।

प्रमदः । पुं, क्ली । हर्षे । धत्तूरवृक्षे, तत्फले च । शब्दर. च. । चि । मत्ते । स्त्री । नार्य्याम् । प्रियङ्गौ ।

प्रमदिनी । स्त्री । धातकीवृक्षे । वै.निघ. ।

प्रमाणम् । क्ली । परिमाणे । मे. । देहपरिमाणे । तच्च मध्यात्पमहदिदं त्रिधा भवति । च.इ.७ अ. । शास्त्रे । मे ।

प्रमाथी (न्) । त्रि । सूक्ष्मतीक्ष्णभावात् स्रावकपक्ष्मिणि । "स्रोतांसि दोषलिङ्गानि प्रमथ्य विवृणोति यत् । प्रविश्य सोष्मतैक्ष्ण्याच्च तत् प्रमाथीति संज्ञितम् ॥" रत्नमाल. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमार्জ্জনম्। क्ली। प्रोच्छने। बालाङ्गुलिवस्त्रैः अचिरजःशल्यादिषु प्रोच्छने। सु.सू.७अ.।

प्रमितः। त्रि। अन्यूनातिरिक्ते। वै.निघ.।

प्रमिताशनम्। क्ली। अत्यल्पमात्रभोजने। अत्याल्प भोजन। च.शा.८अ.।

प्रमीलकः। पुं। तन्द्रायाम्। शरीरालस्ये। शरीरेर आलस्य। भा.म.१भ.।

प्रमीला। स्त्री। तन्द्रायाम्। रा.नि.७.२०।

प्रमीलिका। स्त्री। तन्द्रायाम्। विसूच्यां शिरोरोगादौ। सि योविसूचि.वीक्षणम्।

प्रमुखः। पुं। पुन्नागवृक्षे। श्र.च.।

प्रमेहः। पुं। स्वनामख्यातरोगे। मेहरोग। निदान यथा—"आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसाः पयांसि। नवान्नपानं गुडवैकृतञ्च प्रमेहहेतुः कफकृच्च सर्व्वम्॥ मेदश्च मांसञ्च शरीरजञ्च क्लेदं कफो बस्तिगतः प्रदूष्य। करोति मेहान् समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि। चीणेषु दोषेष्वबलीकृष्य धातून् संदूष्य मेहान् कुरुतेऽनिलश्च॥ साध्याः कफोत्था दश पित्तजाः षट् याप्या न साध्याः पवनाच्चतुष्काः। समक्रियत्वाद्विषमक्रियत्वान्माहात्म्यतश्चा यथाक्रमं ते॥ कफः सपित्तः पवनश्च दोषा मेदोऽस्रशुक्राम्बुवसालसीकाः। मज्जा रसौजः पिशितञ्च दूष्याः प्रमेहिणां विंशतिरेव मेहाः॥ दन्तादीनां मलाढ्यत्वं प्रायूपं पाणिपादयोः। दाहश्चिक्कणता देहे तृट् स्वाद्वास्यञ्च जायते॥ सामान्यं लक्षणं तेषां प्रभूतविलमूत्रता। दोषदूष्यविशेषेऽपि तत्संयोगविशेषतः.....॥ अविपाकोऽरुचिश्छर्द्दिर्निद्रा कासः सपीनसः। उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम्॥ बस्तिमेहनयोस्तोदो मुष्कावदरण ज्वरः। दाहस्तृष्मालिका मूर्च्छा विड्भेदः पित्तजन्मनाम्॥ वातजानामुदावर्त्तः कम्पहृद्ग्रहलोलताः। शूलसुप्तिप्रतता शीर्षः कासः श्वासश्च जायते॥ यथोक्तोपद्रवारिष्टसंयुक्तमेव च। पिडकापीडितं गाढः प्रमेही हन्ति मानवम्॥" इत्यादि। मा.नि.।

प्रमेहपिड(पोटि)का। स्त्री। प्रमेहोक्ता जन्यस्फोटके। ता दश, यथा—"शराविका कच्छपिका जालिनी विनतालजी। मसूरिका सर्षपिका पुत्रिणी सविदारिका। विद्रधिश्चेति पिडका प्रमेहोपेक्षया दश॥" सु.नि.६अ.। आसां विशेषाः रूक्षपर्य्याये वक्ष्यन्ते।

प्रमेही (इन्)। पुं। नन्दिवृक्षे। त्रि। प्रमेहरोगिणि। "किञ्चिच्चाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत्।" सु.नि.६अ। [जटा.।

प्रमोचनी। स्त्री। गोडुम्बायाम्। गोमूक।

प्रमोदः (कः)। पुं। षष्टिकधान्ये। वै.निघ.। शालिधान्यविशेषे। सेटे धान। च.सू.२७अ.।

प्रमोदसृष्टकम्। क्ली। कृतान्नभेदे। यथा—"सान्द्रे दधि मरीचं पिप्पलिशुण्ठीलवङ्गकर्पूरम्। एषां चूर्णं साकं शर्करया सर्व्वं गुडवत्स्नेहेन॥ गालयित्वा क्षिपेत्तस्मिन् पक्वदाडिमबीजकं। प्रमोदसृष्टकं ह्येतद्वर्द्धमानगुणैः समम्॥" वै.निघ.द्रव्यगु.।

प्रमोदिनी। स्त्री। जिह्वायाम्। भा.।

प्रमोहः (कः)। पुं। मूर्च्छायाम्। इन्द्रियापटुत्वे। च.सू.२अ.।

प्रयत्नः। पुं। गुणविशेषे। स चात्मन इच्छाजन्या प्रवृत्तिर्द्वेषजन्या निवृत्तिश्च। च.सू.१अ.।

प्रयन्तम्। पुं। घृतचातुर्जातादिनासंस्कृतव्यञ्जने।

प्रयस्तः। त्रि। सुसंस्कृते। विका.।

प्रयोगवस्तिः। पुं। रसायने वाजीकरणे च प्रयोज्ये वस्तौ। स अष्टविधः। तद्विधिः यथा—आदौ कः स्नेहवस्ति, ततः त्रयो निरूहवस्तयः, ततश्चत्वारः स्नेहवस्तयः कार्य्याः। च.सिद्धि.१अ.।

प्रयोजनम्। क्ली। कार्य्ये। प्रयोजनं नाम यदर्थमारभ्यते आरभ्यते। यथा—"यद्यकालमृत्युरस्ति ततोऽहमात्मानमायुष्यैरुपचरिष्यामि नायुष्यैः परिहरिष्यामि कथं न मामकालमृत्युः प्रसहेतेति।" च.वि.८अ.। हेतौ मे.।

प्ररूढः। पुं। जठरे। मे.। त्रि। बद्धमूले। जाते। श्र.र.।

प्ररोहः। पुं। अङ्कुरे। रा.नि.व.२। स्त्री। सिध्मल्याम्। शिउलि छोप। प.मु.।

प्ररोही (इन्)। पुं। नन्दिवृक्षे। भा.।

प्रलम्बः। पुं। नारीस्तने। अङ्कुरे। तरुशाखायाम्। वङ्गे। वै.निघ.। लताङ्कुरे। मे.। तालाङ्कुरे। रा.नि.९अ.। तालरम्भे। ताळेर शाँठा। च.द्रव्याधिकारे। क्ली। द्रुपुषबीजे। शशार बीज। मे। भैषजाकी गुडकुष्माण्डे। [निघ।

प्रलम्बकः। पुं। सुगन्धतृणे। गन्ध खड़। वै.

प्रलम्बा। स्त्री। दीर्घालाबुफले।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रलम्बाण्डः। वि। लम्बमानकोषे। हे. च.।
प्रलयः। पुं। इन्द्रियस्थापे। रा.नि.व.२०। ध्वंसे।
प्रलापः। पुं। अनर्थकवचसि। मा.नि.। भा. म.१भ.ज्व.चि.। "प्रलापी वक्त्रकटुता" "स्वहेतु कुपिताद्वातादसम्बद्धं निरर्थकं। वचनं यन्नरो ब्रूते स प्रलापः प्रकीर्तितः॥" वै.निघ.।
प्रलापकः। (पो) (इन्)। पुं। तन्नामकसन्निपातज्वरे। लक्षणम्—"कस्यप्रलापपरितापनशीर्षपीड़ाप्रौढ़प्रभावपवमानपरीऽन्यचिन्ता। प्रज्ञाप्रणाशविकलप्रचुरप्रवादः क्षिप्रं प्रयाति पितृपालपद प्रलापी॥" वै.निघ.। खेदभमाङ्गमर्दः कम्पो दवथुर्वमी व्यथा कण्ठे। गात्रञ्च गुर्वतीव प्रलापिजुरस्य जायते लिङ्गम्॥" भा. आविकज्वरे।
प्रलापहा। (न्)। पुं। कुलत्थाक्षे। रा नि. व.१३। [नि.व.२०।
प्रलीनता। स्त्री। प्रलये। इन्द्रियस्थापे। रा.
प्रलेपः (कः)। पुं। जीर्णज्वरभेदे। लक्षणं—"प्रलिम्पन्निव गात्राणि घर्म्मेण गौरवेण च। मन्दज्वरविलेची च सशीतः स्यात् प्रलेपकः॥" गात्रलेपने।
प्रलेहः। पुं। मांस-व्यञ्जनविशेषे। कोर्मा। पाकराजः।
प्रलोभनी। स्त्री। बालुकायाम्। वै.निघ.। प्रलेहे। कोर्मा, दस्पीखता। पाकराजः।
प्रवगः (ङ्गमः)। पुं। वानरे।
प्रवटः। पुं। गोधूमे। वै.निघ.।
प्रवणः। पुं। उदरे। मे.।
प्रवयाः। पुं, स्त्री। वृद्धे। रा.नि.व.१८।
प्रवरम्। क्ली। अगुरुकाष्ठे। भा. पुं। खुड़ीवृक्षे। क्षणमुद्गे। वै.निघ। पिप्पिके।
प्रवरशस्त्रः। त्रि। प्रकृष्टसत्पुरुषे। "स्वल्पाऽपि श्री निजागन्तुनिमित्तासु महतीष्वपि पीड़ासु अत्यर्थी दृश्यते।" च.वि.८अ.।
प्रवरा। स्त्री। पलाशवृक्षे। वै.निघ.।
प्रवलाकी (न्)। पुं। सर्पे।
प्रवहः। पुं। वायौ।
प्रवातः। पुं, क्ली। प्रबलवायौ। गुणाः—प्रवातं रौक्ष्यवैवर्ण्यसङ्कोचकृद्वातपित्तनुत्। सु.चि.२४अ.।
प्रवातस्थापनम्। क्ली। प्रवातरक्षणेन जलस्य शीतीकरणोपाये। सु.सू.४५अ.। प्रवातरक्षणे।
प्रवालः। पुं, क्ली। See प्रबालः।
प्रवालकः। पुं। जीवशाके।
प्रवालफलम् क्ली। See प्रबालफलम्।
प्रवासिनी। स्त्री। तिलयासिनीशाकौ। रा. नि.व.१६।
प्रवाहः। पुं। जलस्रोते।
प्रवाहनम्। क्ली। कुन्थने। कोंथ देওয়া। सु.शा.१०अ.।
प्रवाहिका। स्त्री। यहणीरोगे। रा.नि.व.२०। अतीसारभेदे। आमाशय रोगे। निदानलक्षणे —"वायुः प्रद्वेषी निचितं बलासं गुदत्यधस्ताद्धिताशनस्य। प्रवाहतीऽल्पं बहुशो मलाक्तं प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः। प्रवाहिका वातकृता सशूला पित्तात् सदाहा सकफा कफाच्च। सशोणिता शोणितसम्भवा च ताः स्नेहरूक्षप्रभवा मतास्तु। तासामतीसारवदादिशेच्च लिङ्गं क्रमज्ञा सविपक्वताञ्च॥" मा.नि.। "स्रुते रक्ते पुरीषे च वायुना विड्विवर्जितं। प्रवाहिकेति विख्यातं यत् फेनाभं प्रवर्त्तते॥" इत्यपि लक्षणम्। वा.चि. ६अ.।
प्रवाही। स्त्री। बालुकायाम्। रा.नि.व.१३।
प्रवाहुः (कः)। पुं। कूर्परस्योर्ध्वभागे। प्रवाहिकायाम्। वै.निघ.।
प्रवाहोत्था। स्त्री। बालुकायाम्। वै.निघ.।
प्रविचारः। वि। प्रकृष्टसञ्चरणयोग्ये। च. सू.१५अ.।
प्रविरम्। क्ली। पीतवन्दने। श.च.।
प्रविलम्बि। क्ली। सन्धीक्षणभेदे। "प्रविलम्बि सन्धेरस्थ्नः।' वा.उ.२६अ.।
प्रविलयनम्। क्ली। द्रवीभावे। च.सू.१५अ.।
प्रविषा। स्त्री। अतिविषायाम्। अम.।
प्रवृत्तिः। स्त्री। प्रवर्त्तने। च.सू.१अ.। "प्रवृत्तिस्तु खलु चेष्टा कार्य्यार्थं सैव क्रिया कर्म्मयत्नः कार्य्यसमारम्भश्च।" च.वि८अ.।
प्रवेटः। पुं। यवे। त्रिका.।
प्रवेणी। स्त्री। आस्तरणे। अम.।
प्रवेल्लः। पुं। पीतमुद्गे। सोणा मुগ। हे च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवेष्टः। पुं। वाहौ। रा.नि.व.१८। बाहुनिम्नभागे। श.च.। करिदन्तमांसे। हारा.।

प्रव्रजिता। स्त्री। आषण्याम्। मुण्डीरी। रा.नि.व.५। जटामांस्याम्। मे.।

प्रशमः। पुं। शान्तौ, विरामे। मा.ज्व.नि.।

प्रशमनः। त्रि। शान्तिकरे। सु.।

प्रशस्तः। पुं। कर्क्योड्डियाषाणभेदे। वै.निघ.।

प्रशस्या। स्त्री। आढक्याम्। रत्न.। वै.निघ.।

प्रश्ना(षा,सा)ति[धि]कः। पुं, स्त्री (का)। रक्तशोधके च.द.र.पि.चि.। स्थलजतृणधान्यभेदे। झड़ी। गुणा—श्यामाकवत्। च.सू.२७अ.। अणुश्रीहिधान्ये। सरु धान। र.मा.। दीर्घधान्ये। नीवारे। उड़ि धान। भा.पू.१भ.धा.व.। "कीरदूषप्रसाधिकाः।"

प्रश्निः (श्नी)। स्त्री पृश्निपर्ण्याम्। चाकुलिया। द्विकीषः। कुम्भिकायाम्। चिका.।

प्रष्टा(ष्ठा) रुः। पुं। गुदकुन्दरोगे। वा.उ.२अ.।

प्रष्ठौही। स्त्री। प्रथमगर्भिण्यां गवि। भ.।

प्रसक्तम्। क्ली नूतनधान्ये। वै.निघ.।

प्रसङ्गः। पुं। प्रस्तावे। प्रकरणान्तरेण। समापने। सु.उ.६५अ.। सन्ततसेवायां। मैथुने। भा.म.कुष्ठ.चि.।

प्रसन्नः। त्रि। सन्तुष्टे। निर्मले।

प्रसन्ना। स्त्री। मद्यविशेषे, सुरामण्डे। सा च सुरामण्डोपर्य्यच्छो भागः। रा.नि.व१४। "सुरा मण्डः प्रसन्ना स्यात्।" प.प्र.३ख.। सा कौ. उदावर्त्ते। गुणाः—"प्रसन्ना कफवाताशोविबन्धानाहनाशिनी। पित्तलात्यकफा रूक्षा यवैषोत्प्रकोपनी॥" सु.सू.४६अ.। "प्रसन्ना स्यात्सुरामण्डः तस्मात्कादम्बरी घना। मद्यस्याद्यविभागोऽसौ प्रसन्ना प्रोच्यते बुधैः॥" तोड.ब्रह्म.सु.।

प्रसन्नान्धः। पुं। अन्धस्य नेत्ररोगविशेषे। लक्षणं यथा—गृह्णस्तु चक्षुषा रूपं नैव पश्यति योऽचिरम्। प्रसन्नान्धः स विज्ञेयो नैव शक्यश्चिकित्सितुम्।" ज.द.३०अ.।

प्रसन्नेरा। स्त्री। मद्यविशेषे। अ.टी.भ.।

प्रसभम्। क्ली। बलप्रयोगे।

प्रसरः। पुं. क्ली। एलवालुके। रा.नि.व.४। विसर्पे। अ.टी.भ.। वेगे। मे.। नाराचे।

प्रसरा। स्त्री। प्रसारण्याम्।

प्रसवः। पुं। रक्तास्फानवृक्षे। वृक्षझाँटी। रा.नि.व.१०। सर्ज्जतरौ। वै.निघ.। गर्भत्यागे। खोलास हउग्रा। अम.। तस्य मासः—नवमदशमैकादशान्यतमः। ततोऽन्यच्च विकारः। भा.। मतान्तरे—"नवमे दशमे मासि नारी गर्भं प्रसूयते। एकादशे द्वादशे वा ततोऽन्यच्च विकारतः॥" चर.। सुखप्रसवमन्त्रो यथा—"अस्ति गोदावरीतीरे जम्बूस्थानाम राक्षसी। तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्॥" अपत्ये। फले। पुष्पे। मे.।

प्रसवकः। पुं। पियालवृक्षे। श.मा.।

प्रसवबन्धनम्। क्ली। पुष्पवृन्ते। अम.।

प्रसवस्थली। स्त्री। मातरि। नाटकम्।

प्रसहः। पुं। आरेवतवृक्षे। सोनालु। प्रसह्यभक्षणशीलमृगपक्षिषु। "गोखरोष्ट्रतरीष्ट्राश्वहरीपिशिंहर्क्षवानराः। बकोलूकाग्रसरक्षुश्च बभुमार्जारमूषिकाः। लोपाकौ जम्बुकः श्येनो वान्तादश्चाषवायसौ॥ शशघ्नी मधुहा भासो गृध्रोलूककुलिङ्गकाः। धूमिकौ कुररश्चेति प्रसहा मृगपक्षिणः॥" च.सू.२७अ.। ते च प्रसह्य विनिहत्य भक्षयन्तीति तथोक्ताः। तन्मांसगुणाः—अर्शः-प्रमेहीदरामय-जाड्यहरम्। रा.नि.व.१७। एतन्मांसोष्णं गुदाग्नयसिंहादिभिस्तुल्यगुणाः, विशेषेण शीघ्ररोगे हिताः। सु.सू.४६अ.। "गुरुस्निग्धमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः।" राज.३प.।

प्रसहनः। पु। प्रसहपक्षौ। "येऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते। ते कीर्त्तिताः प्रसहना.—।" रा.नि.व.१९।

प्रसहा। स्त्री। लताविशेषे। रा.मा.।

प्रसादिका। स्त्री। अणुश्रीहौ। लाल उड़िधान।

प्रसादः। पुं। प्रसन्नतायाम्। अम.। स्वास्थ्ये। सुस्थता। मे.।

प्रसाकः। पुं। दीर्घधान्ये। देधान। वास्तुके। वेतो शाक। वै.निघ.।

प्रसादधातुः। पुं। गुर्व्वादिद्रवान्तगुणसमुदायेषु, रसादिशुक्रान्तद्रवधातुसमुदायेषु च। च. शा ६अ.।

प्रसादनम्। क्ली। अन्ने, भक्ते। त्रिका.। स्त्री। (ना) सेवायां, परिचर्य्यायाम्। हे.च.। (नी) मद्यावलायाम्। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसादनाञ्जनम्। क्ली। नेत्राञ्जनविशेषे। "मधुरखेहसम्पन्नमञ्जनन्तु प्रसादनम्" तीक्ष्ण।

प्रसादमन्त्रः। पुं। माहेश्वरमन्त्रे। यथा— ॐ ह्रीं ह्रीं हैं ह्रीं शिवाय स्वाहा रसरः विपरीतमञ्जतैलं।

प्रसाधनी। स्त्री। कङ्कतिकायाम्। अम.। भक्तायाम्। सिद्धि। मे.।

प्रसाधिका। स्त्री। नौवारे। उड़ीधान।

प्रसारः(णम्)। पुं. क्ली। विसर्पणे हे.च.। आकुञ्चनादि पञ्चविध कर्म्मान्यतमे करपादादिविस्तारे सु.सू.।

प्रसार(रि)णी। स्त्री। (Poederia foetida.) स्वनामख्याताललतायाम्। गन्धभाद्दलिया। हिं गान्धालि, गन्धालि, गन्धप्रसारणी। म चांदवेलि। कं हैसरणे। तें गोल्लिमगिरुचेट्टु, सविरिलचेट्टु। तत्पर्य्यायाः—मूरुसरा, सारिणी, प्रसरा, प्रहिता, चारुपर्णी, राजबला, सरा, भद्रपर्णी प्रतानिका, प्रतिनिका, प्रबला, राजपर्णी, चन्द्रपर्णी, भद्रबला, चन्द्रबल्ली, प्रभद्रा, प्रसारिणी, बल्या, प्रसानिनी, सरणी, सारणी, भद्रा, बला, कटभरी। गुणः—गुरुणा तिक्ता वातघ्नी अग्निश्वयथुघ्नी मलविष्टम्भहरी च। रा.नि.व.५। "प्रसारणी गुरुर्ग्राह्या बलवत्स्थानकारणात्। बोध्यौषधा वातहरा तिक्ता वातरक्तकफापहा॥" भा.। दीप्ताग्नौ। वै.निघ.। लज्जालुकायाम्। रा.नि.व.५।

प्रसितम्। क्ली। पूये। अ.च.।

प्रसुप्तिः। स्त्री। प्रगाढ़निद्रायाम्। नेत्रादीनां रूपदर्शनाऽसक्तितायाम्। "अतो नेत्रे प्रसुप्तिः स्यात्।" मा.ज्व.नि.। क्षुद्ररोगविशेषे। लक्षणं यथा —"वायुनोदीरितः श्लेष्मा त्वचं प्राप्य विसर्पति। ततस्तूद्गायते पाण्डु क्रमेण च विचेतना। अल्पकण्डूरविक्लेदा सा प्रसुप्तिः प्रसुप्तितः॥" वा.उ. ३१अ.। [घीटक्याम्। अम.।

प्रसूः। स्त्री। कदलीवृक्षे। लतायाम्। मे.।

प्रसूका। स्त्री। अश्वायाम्। रा.नि.व.१९।

प्रसूतम्। क्ली। पुष्पे। मे.। पु। पुत्रे।

प्रसूता। स्त्री। घीटक्याम्। कृतप्रसवायाम्। पोयाती। अम.।

प्रसूतिः(का)। स्त्री। उत्पत्तौ। अन्त्ये (का) प्रसवकारिण्याम्। अम.।

प्रसूनम्। क्ली। पुष्पे। फले। अम.। पुं। अर्कवृक्षे। अश्वस्य मुखरोगभेदे। ज.द.२९अ.।

प्रसूनरसस्रुग्धरा। स्त्री। पुष्पमर्करायाम्। वै.निघ.।

प्रसूना। पुं। मधुरिकायाम्। मउरी।

प्रसृतम्। क्ली। पलद्वये। प्र.र.१ख। पुं। अञ्जलौ। अम.वि। वेगिते। मे.। प्रवृद्धे। प्रसारिते। अम.।

प्रसृता। स्त्री। जङ्घायाम्। "जङ्घा तु प्रसृता ज्ञेया।" रा.नि.व.१८।

प्रसृतिः। स्त्री। पलद्वये। १ स्त्री.। "पलाभ्यां प्रसृतिर्ज्ञेया" प्र.र.१ख। मुष्टौ। मूठो। रा.नि.व.१८।

प्रसेकः। पुं। कफजन्यलालादिस्रावे। च.चि.८ अ.। सेके। मे.।

प्रसेवकः। पुं। अश्वखल्लपुटे। सु.सू.८अ.।

प्रस्कन्दनम्। क्ली। विरेचने। क्षोभणे। रा.मा.। पुं। अतीसारे। वै.निघ.।

प्रस्कन्दिका। स्त्री। संग्रहग्रहणीरोगे। निदा.।

प्रस्फुरः। पुं। अश्वस्य रोगविशेषे। लक्षणं— "गुरुर्यस्य भवेद्वक्षः स्तब्धगात्रपराक्रमः। कुब्जीभूतेन पृष्ठेन यो वाजी याति वक्रवत्॥" ज.द.४५अ.।

प्रस्तरः। पुं। पाषाणे। मणौ। मे.। पल्लवादिशय्यायाम्। अ.र.।

प्रस्तर(रि)णी। स्त्री। गोलोमिकायाम्। श्वेतदूर्व्वा। रा.नि.व.५। गोजिह्वायाम्। वै.निघ।

प्रस्तरभेदः। पुं। पाषाणभेदे। पाथरकुचि। भै.सुक्ल.चि चित्रकगुटिकाचूर्णे।

प्रस्तरस्वेदः। पुं। वातदोषस्वेदविशेषे। यूक्ष्मशमेधान्यपुलकानां वेशवार पार्श्वोत्कारिकादीनां वा प्रस्तरे कौषेयाविकीतरच्छदे पक्षाङ्गुलीकवृकाकपक्षच्छदे वा स्वभ्यक्तसर्व्वगात्रस्य शयानस्योपरि स्वेदने। च.सू.१४अ।

प्रस्तरोद्भूतम्। क्ली। प्रस्तरजले। वै.निघ.।

प्रस्तरोपलः। पुं। चन्द्रकान्तमणौ। पसु.।

प्रस्तर्य्यम्। क्ली। प्रस्तरोदके। वै.निघ.।

प्रस्तान्नम्। क्ली। पुरातनतण्डुले। वै.निघ.।

प्रस्तारः। पुं। शय्यायाम्। तृणवने। हे.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्तारि। क्ली। शुक्लभागगतनेत्ररोगविशेषे। लक्षणं यथा—"प्रस्तारि ग्रथितमिहार्मं शुक्लभागे विस्तीर्णं तनु रुधिरप्रभं सनीलम्।' सु.उ.४अ.।

प्रस्ता(स्थ्य)र्म्मम्। क्ली। शुक्लाभ्रगत नेत्ररोगभेदे। लक्षणं यथा—"समन्तात् विस्तृतः श्यावीरक्तो वा मांससञ्चयः। सन्निपातेन दीर्घाणात् प्रस्तार्य्यर्म्म तदुच्यते॥" सु.उ.४।

प्रस्थः। पुं। शरावद्वयपरिमाणे। २शरा। १२० तो.। 'शरावाभ्यां भवेत् प्रस्थः। वमनादौ सार्द्धद्वयं दशपलपरिमाणे। "दमने च विरेके च तथा —शीर्णितमीक्षणे। साईद्वयोदशपल प्रस्थमाहुर्मनीषिणः॥" प.प्र.ख.। पाल्यां। विका.।

प्रस्थकुसुमः। पुं। मरुवकवृक्षे। गन्धतुलसी। रा.नि.व१०। जम्बीरभेदे।

प्रस्थपुष्पः। पुं। श्वेतमरुवकवृक्षे। क्षुद्रपत्रकृष्णमरुवके। अम.। जम्बीरवृक्षे। अटौ भ।

प्रस्थवान्। पुं। पर्व्वते। रा.नि.व.२।

प्रस्थिका। स्त्री। आम्रातकवृक्षे। वै.निघ.। माचकायाम् पूर्णिमा। भा।

प्रस्फोटनम्। क्ली। पचने। हे.च.। सर्षे। अम.।

प्रस्रवः। पुं। दुग्धे। वै.निघ.।

प्रस्रवणम्। क्ली। सूवे। दुग्धे। प्रकर्षेण स्रावे। वै.निघ. पुं। घर्म्मे। विका.।

प्रस्रवणजलम्। क्ली। निर्झरसलिले। ऋतुणां जल। गुणाः—स्वच्छं मधुरं लघु रोचनं दीपनकृच्च। रा.नि.व.१४।

प्रस्रंसिनी। स्त्री। योनिरोगविशेषे। तल्लक्षणं यथा—"प्रस्रसिनी संसते च चीभिता दुष्टजायिनी।" मा.नि.।

प्रस्रावः। पुं। सूवे। रा.नि.व.१८।

प्रस्रुतदधि। क्ली। वस्त्रगालितदध्नि। वै.निघ.।

प्रस्वेदः। पुं। अतिघर्म्मे। वै.निघ.।

प्रहनेमिः। पुं। चन्द्रे।

प्रहरः। पुं। दिवसाष्टमभागे प्रहर। अम.।

प्रहरकुटुम्बी। स्त्री। कुटुम्बिनीचुपे। रा.नि. व.५।

प्रहर्ष(षि)णी। स्त्री। हरिद्रायाम्। हारा.।

प्रहसन्तिका (न्ती)। स्त्री। शुक्लयूथिकायाम्। विका। वासन्तीपुष्पवृक्षे। रा.नि.व१०।

प्रहस्तः। पुं। सहतविस्तृताङ्गुलिकरे। चपेटे। रा.नि.व१८।

प्रहारः। पुं। आघाते। [भा.।

प्रहारवल्ली (ल्लरी)। स्त्री। मांसरोहिण्याम्।

प्रहिः। पुं। कूपे।

प्रहिता। स्त्री प्रसारण्याम्। गन्धभाडुलिका। वै.निघ.।

प्रहीरजा। स्त्री कुटुम्बिनीचुपे। रा.नि.व.५।

प्रहृष्टकः। पुं। काके। वै.निघ।

प्रहेण(ल)कम्। क्ली। पिष्टकभे। हारा.। तत्पर्य्यायाः,—वाचनं, वाचनकं, व्रतीपायन।

प्रह्लादः। पुं। कामक्लमहर्षे। भा.म.१स.अतः कच्चि.। "प्रह्लादं चास्य विज्ञाय।"

प्रह्लादिनी (दी)। स्त्री। रक्तलज्जालुकायां वै.निघ। रा.नि.व.५।

प्रक्षालनम्। क्ली। धावने क्षोभः। सु.सू.७अ। मार्ज्जने।

प्रक्षेपः। पुं। कषायादौ चूर्णादिक्षेपणे। कल्के तस्य मात्रा कर्षमिता। "प्रक्षेप पाचिकः काथ्यात् स्नेहे कल्कसमो मतः। क्षीरेक्षुमद्यदधिभ वातपित्तकफक्षितिषु। क्षौद्रक्षाये दातव्यं विपरीतात् शर्करा। मात्रा क्षौद्रघृतादीनां स्नेहे क्वाथे च चूर्णवत्। माषिक हिङ्गु-सिन्धूत्थं जरणद्व्यास्तु शाणिकाः। परिभाषामिमामन्यः प्रक्षेपोऽप्यूचिरे परम्॥" पातव्यघृतटैलादिषु प्रक्षेप कल्कसमो मतः। च.प.प्र.१ख.। प्रक्षेपकालश्च - "अवतापे यदा दव्व्यां परिघ्रय्य पुनः पुनः। यदा पाणिसहो भूतो निक्षिपेद्दोषधत्तदा॥" योगरत्नाकरस्तुचिर्ये।

प्राकृतः। वि। प्रकृतिसम्पन्ने। सुखसाध्ये। मा.ज्व.नि.।

प्राकृतज्वरः। पुं। वसन्तशरदुद्भवे ज्वरे। "कालप्रकृतिमुद्दिश्य प्रोक्तं प्राकृतज्वरः।" च.चि. ३अ.। "वर्षाशरद्वसन्तेषु वातादेः प्राकृतः क्रमात्।" "प्राकृतश्चानिलोद्भव।" मा.नि.।

प्राकृतदोषः। पुं। प्रकृतिसम्पन्नवातादौ। यथा —वर्षाशिशिरयोर्वायुकोपः, ग्रीष्मशरदोः पित्तकोपः, हेमन्तवसन्तयोः कफकोपः। इति। च.सू.१०अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राक्चरणा। स्त्री। योनिरोगविशेषे। तल्लक्षणं यथा,—"मैथुनादतिबालाया पृष्ठजङ्घोरुलक्षणम्। रुजयन् दूषयेद् योनिं वायुः प्राक्चरणा हि सा।" च.चि.३०अ.।

प्राक्फलः। पुं। पणसवृक्षे। जटा।

प्राग्भागः। पुं। कायपूर्व्वभागे। वै.निघ.।

प्राग्घाटम्। क्ली। अघनदधनि। पोतला दही। विका.। [वाय।

प्राग्वातः। पुं। पूर्व्वदिग्भववायौ। See पूर्व्व-

प्राचिका। स्त्री। श्येनपक्षिण्याम्। वै.निघ.। वनमक्षिकायाम्। डाँश। अमभ।

प्राची। स्त्री। पानीयामलके। वै.निघ.।

प्राचीनपनसः। पुं। विल्लवृक्षे। विका.।

प्राचीना। स्त्री। पाठायाम्। रा.नि.व.६। रास्नायां। शा.च.।

प्राचीन करकः। पुं। मधुरजम्बीरवृक्षे। रा.नि.व.११।

प्राचीनामलकम्। क्ली। पानीयामलके। प.णि आम्ला। "प्राचीनामलकं लोके पानीयामलकं स्मृत। प्राचीनामलकं दोषत्रयजित् ज्वरघाति च॥" प.मु.। गुणः—गरदोषहरम्। सु.सू.४६अ.।

प्राचीबलः। पुं काकतुण्ड्याम्। केउँटी। काकजङ्घायां। नदीपिप्पल्यां। गण्डदूर्व्वायां। सु.सू.२८अ. सुरसादि। [शा.चि.।

प्राच्यकशेरुः (कः)। पुं। कशेरौ। केशुर।

प्राणः। पुं। तन्नामतद्देहस्थवायौ। "वायुर्यो वक्त्रसञ्चारी स प्राणीनाम देहधृक्। सोऽन्नं प्रवेश्य यत्यन्तः प्राण प्राप्यबलत्वते। प्रायशः कुरुते दृष्टी हिक्कायासादिकान् गदान्।' सु.नि.१अ.। जीवने। "अग्निः सोमो वायुः सत्व रजस्तमः पञ्चेन्द्रियाणि भूतात्मा इति प्राणा।" सु.सू.१५अ.। बीज। गन्धबोल। भा.।

प्राणकः। पुं। जीवकौषधौ। मे.। गन्धबोले।

प्राणथः। पुं। बलवति पुरुषे। वायौ। उणा.।

प्राणदः। पुं। जीवकचुपे। रा.नि.व.५। क्ली रक्तधातौ। जले। है च.।

प्राणदा (प्रदा)। स्त्री। कट्यौ। रा.नि.व.५। महाराष्ट्रीचुपे। जलपिप्पल्याम्। रा.नि.व.४ वै.निघ.२.मल्लिकाज्जाचि। हरीतक्याम्। रा.नि.व. ११। वाचि १अ.। "प्राणदामधुकै क्लता।"

प्राणदा (गुड़िका)। स्त्री। अर्शसि गुडिकायाम् पाठः—"त्रिपलमद्भवेरस्य चतुर्थं मरिचस्य च। पिप्पल्याः कुडवार्द्धञ्च चव्यायाः पलमेव च। तालीशपत्रस्य पलं पलार्द्धं कैशरस्य च। ह्रीपर्णी पिप्पलीमूलादर्द्धकर्षञ्च पचकात्। सूक्ष्मश्लक्ष्णकर्षकल्पं लवणस्यालयोः। गुडात् पलानि विंशच्च चूर्णमेकत्र कारयेत्। अत्रप्रमाणा गुडिका प्राणदेति च सा स्मृता पूर्व्वं भक्ष्याच्च व्याच्च भोजनस्य यथाबलं। सर्पिः सारसं यूषं क्षीरं तीव्रं पिबेदनु। कैशर नागवैशर, चतुर्थं पलमेकमित्यर्थः॥" च.द। शुंठि ७प. मरिच ४प. पिप्पुल २प चई १प. तालीशपत्र १प नागेश्वर ४तो. पिप्पुलमूल २प. तेजपत्र १तो. छोटएलाच २तो. गुड़त्वक् २ तो वेणार मूल २तो, पुरातन गुड़ ७०प.। एइ समस्त चूर्ण ओ गुड़ एकत्र माड़िया गुड़िका बान्धिबे। मा. ॥० तो.। अनुपान दुग्ध वा जल। बद्धकोष्ठतायं शुंठि ना दिया हरीतकी। पित्तार्शे गुड़ेर परिवर्त्ते चूर्णसमष्टिर ४गुण चिनि दिबे।

प्राणनम्। क्ली। जीवने। जटा.। पुं। गन्धे। शा.च।

प्राणना। स्त्री हरीतक्याम्। कट्यौ। वै.निघ.।

प्राणन्तः। पुं। रसायने उणा.। वायौ।

प्राणन्ती। स्त्री। हिक्कायाम् चवर्यो। उणा.।

प्राणपिण्डः। पुं। सुगन्धबीले। वै.निघ.।

प्राण(प्रदा)प्रिया। स्त्री। कट्यौ। पमु।

प्राणवहस्रोतः। क्ली। प्राणवायुनेतरि स्रोतसि। ते च द्वे तयोर्मूल हृदय। सु.शा.९अ। "हृदयं महास्रोतस।" च.व.५अ।

प्राणवायुः। पुं हृदयस्थवायौ। वै.निघ.।

प्राणसंरोधः। पुं। श्वासनिरोधे। वै.निघ.।

प्राणरुद्ध। क्ली। शरीरे। वै.निघ.।

प्राणहारकम्। क्ली। वत्सनाभे। रा.नि.व.६।

प्राणाचार्य्यः। पु। चिकित्सके। वै.निघ.।

प्राणापानौ पुं द्वि। अश्विनीकुमारयौ।

प्राणाभिसरः। चि। प्राणायतनेन्द्रियरोग निदानाद्यभिज्ञे। च.सू.२९अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणायतनम्। क्ली। नाभ्यादिषु प्राणश्चित्या-धारेषु। तच्च दश—"नाभिरोजो गुदं शुक्रं श्रोणितं शङ्खको तथा। मूर्द्धाशुक्रकण्ठहृदयं प्राणस्यायतनं दश॥" रत्न.र.ज्व.चि.।

प्राणायामः। पुं। प्राणवायुरोधे। [ब ४

प्राणिमाता। स्त्री। पुत्रदात्रीतुपे रा.नि.

प्राणिहिता। स्त्री। पाटलायाम्। विका.।

प्राणी (न्)। पुं। जन्तौ। वि। प्राणविशिष्टे। अम.।

प्राणेश्वररसः। पुं। सन्निपातज्वरे रसः। पाठः—"गुडसूतं तथा गन्धं सूताद्धं विषसंयुतम् समस्तं मर्द्दयेत्तालमूलीनीरेस्त्राद्धं बुधः। पूरयेत् कूपिकान्ते च सन्निरुध्य विशोषयेत्। सप्तभिर्वृत्ति कावस्त्वेवं दृढयित्वा तु शोषयेत्। पुटेत् कुम्भी प्रमाणेन साङ्गशीतं समुद्धरेत्। गृहीत्वा कूपिकामध्यान्मर्द्द-येच्च दिनत्रयम्। अजाजी जीरकं हिङ्गु सर्ज्जिका-टङ्कणैर्युतम्। गुञ्जासु पञ्चलवणं यवक्षारो यमा-निका। मरिचं पिप्पली चैव प्रत्येकञ्च समांशतः। एषां कषायेण पुनः भावयेत् सप्तधा तथा। मा-षवल्लीदलयुक्तं पञ्चगुञ्जं रसेश्वरम्। दद्यान्नवज्वरे तीव्रे कोष्णं वारि पिबेदनु.....॥" पारा, गन्धक प्रत्येक १ तो. मिठा ॥० तो. तालमूलीर रसে ৩ দিন মাড়িয়া কাচকূপীর মধ্যে ভরিয়া কূপীর মুখ রুদ্ধ করিয়া শুকাইবে। পরে সেই কূপী মৃত্তিকার সহিত সাতপুরু নেকড়া দ্বারা লিপ্ত ও শুষ্ক করিবে। পরে ঐ কূপী কুম্ভীপুটে পাক করিয়া, শীতল হইলে কূপী হইতে ঔষধ বাহির করিয়া ১ দিন মাড়িবে। পরে ঔষধ যত হইবে, কৃষ্ণজীরাদি সমভাগে তত লইয়া দশগুণ জলে অষ্টমাংশ ক্বাথ করিয়া, তদ্দ্বারা ৭ বার ভাবনা দিবে। ক্বাথের দ্রব্য—কৃষ্ণজীরা, জীরা, হিং, সাজি-মাটী, সোহাগা, গুগ্‌গুল, পঞ্চলবণ, যবক্ষার, যমানী, মরিচ, পিপুল। র.সা.সং।

प्राणेषणा। स्त्री। जीवनरक्षणोपायगवेषणा-याम्। सा च स्वस्थस्य स्वास्थ्यवृत्तिरूपा आतुरस्य च विकारप्रशमनेऽनवधानरूपा प्राणानुपालनस्य दीर्घायुष्ट्वाप्तेः। च.सू.११अ.।

प्राण्यङ्गम्। क्ली। प्राणिनो अङ्गभावे मांसा-स्थ्यादौ। सि.यो यक्ष्मा.चि।

प्रातः। क्ली। प्रभाते। अम.।

प्रातःकृत्यम्। क्ली। प्रातरनुष्ठेयकर्म्मणि। च.।

प्रातःस्नानम्। क्ली। प्राभातिकावगाहने।

प्रातरशनम्
प्रातराशः } क्ली, पुं। प्रातर्भोजने। विका.।

प्रातर्भोक्ता। पुं। काके। शब्च।

प्रातर्भोजनम्। क्ली। प्रातःकालेनभोजने। जटा.। विका.।

प्रातर्विकसत्ता। स्त्री। मल्लिकाभेदे, या प्रातर्विकसति, गुणैर्यूथिकातुल्या। रा.नि.व.१०।

प्रातिका। स्त्री। वार्त्ताकौ। जयापुष्पवृक्षे। रा.नि.व.१।

प्रदेयः। पुं। तर्জ্জन্যङ্গুষ্ঠযুতকরবিস্তারে। रा.नि.व.१८।

प्राधान्यम्। क्ली। स्वातन्त्र्यपारतन्त्र्यरूपे सम्भाव्यौपाधिकनानाभेदे। यथा—दोषवैषम्ये यः कोऽपि दोषः स्वहेतुभिः कुपितो रोगमुत्पादयेत् तस्यैव प्राधान्यं स्वतन्त्रता, तदधीनयोः प्रकुपितयोर्दोषयो-रप्राधान्यं पारतन्त्र्यमिति ज्ञेयम्। "स्वातन्त्र्य-पारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्।" मा. पञ्चनि.।

प्रापणत्वम्। वि। नेतृत्वे।

प्राप्तिः। स्त्री। प्रवृत्तौ। "प्राप्तिश्च विट्पित्त-कफानिलानाम्।" चद.विरेके।

प्राबोधिकः। पुं। जयाकाले।

प्राभृतम्। क्ली। उपढौकने। अम.। च.सू. १६ अ.।

प्रामद्यः। पुं। वासकवृक्षे। शब्च.।

प्रायः। क्ली। वयसि हे च.।

प्रायोगिकः। पुं। शमनधूमपाने। भा.। लौहिकधूमे वा.चि५अ.।

प्रालेयम्। क्ली। हिमे। अम.।

प्रावट्। पुं। यवे। जटा.। शूकशिम्बयाम्।

प्रावरणम्। क्ली। उत्तरीयवस्त्रे। उत्तरीयवस्त्रे हे.च.।

प्रावारः। पुं। उत्तरीयवस्त्रे। अम.।

प्राकारकोटः। पुं। कोटविशेषे। जटा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रावृज्ज:। पुं। पुनर्नवायाम्। र.चि.९अ.।
प्रावृट्। स्त्री। वर्षाकाले। "प्रावृण्मियुनकर्कटौ।" पुनर्नवायाम्। च.द. अमृतसारलौहे।
प्रावृड़त्यय:। पुं। शरत्समये। रा.नि.व.२१।
प्रावृतम्। क्ली। प्रकृष्टावरणे। भ.।
प्रावृषा। स्त्री। वर्षाकाले। त्रिका.।
प्रावृषायणी। स्त्री। रक्तपुनर्नवायाम्। प.सु.। कपिकच्छौ। आलांकुशी। अम.।
प्रावृषिक:। पुं। मयूरे। धरणि:।
प्रावृषेण्य:। पुं। कदम्बवृक्षे। र.मा.। कुटजवृक्षे। कुड़चि गाछ। धाराकदम्बे। केलि कदम। रा.नि.व.९। स्त्री। कपिकच्छौ। रा.नि. व.३। रक्तपुनर्नवायाम्। गोदापुन्ना। रा.नि.व.५।
प्राव्य:। पुं। कुटजवृक्षे। कुड़चि गाछ। धाराकदम्बे। केलि कदम। रा.नि.व.९। विकङ्कतवृक्षे। रा.नि.व.११। क्ली। वैदूर्यमणौ। रा.नि.व.१३।
प्राश:। पुं। अवलेहे। प.प्र.१ख.।
प्राशनम्। क्ली। भक्षणे। लेहने। अन्ने। रा.नि.व.२०।
प्राशित:। त्रि। भक्षिते। जटा.।
प्राष्य:। पुं। कशेरुके। केशुर।
प्रासादकुक्कुट:। पुं। कपोते। त्रिका.।
प्रासादमण्डना। स्त्री। हरितालै। वै.निघ.।
प्राह्ण:। पुं। प्रात:काले, पूर्व्वाह्णे। अम.।
प्रियंवदा। स्त्री। जातीपुष्पवृक्षे। वै.निघ.।
प्रिय:। पुं। जीवके (अभावे गुडूची)। रा.नि. व.५। वेतसलतायाम्। र.मा.। धाराकदम्बे। केलि कदम। रा.नि.व.९। ऋषभके (अभावे वंशलोचनम्)। हरितालै। प्रियङ्गौ। कदम्बवृक्षे। असनवृक्षे। दारुचिन्याम्। वै.निघ.। मृगविशेषे। जटा.। ऋद्धौ (अभावे बला)। मे.। सुदृगरवृक्षे।
प्रियक:। पुं। केलिकदम्बे, महाकदम्बे। प. सु.। तिन्दुकवृक्षे। तेँद गाछ। र.मा.। पीतशालवृक्षे। पियाशाल। र.मा.। च.सू.२५अ.। विलेशयमृगविशेषे। मे.। चित्र मृग। सु.चि.८अ.। अयं वाते पथ्य:। प्रियङ्गौ। भमरे। कुङ्कुमे। मे.। असनवृक्षे। रा.नि.व.९।
प्रियकाम्य:। पुं। पीतशालवृक्षे। वै.निघ.।
प्रियकोशल:। पुं। पियालवृक्षे, अक्लिकावृक्षे। प.सु.।
प्रियङ्ग(क)री। स्त्री। वृहज्जीवन्त्याम्। रा. नि.व.३। अश्वगन्धायाम्। श्वेतकण्टकार्य्याम्। रा.नि.व.४।
प्रियङ्गु: (ङ्गू:) (क:)। स्त्री, पुं। (Aglaia Roxburghiana.) स्वनामख्यातसुगन्धलतायां। प्रियङ्गु, गन्धप्रियङ्गु। हिं प्रियंग, मल्लप्रियंग, प्रियङ्गु। कं नेपिलंग। बम्.गहला। तें प्रेंकणपुचेट्टु। तत्पर्य्याया:,—श्यामा महिलाह्वया लता गोवन्दनी गुन्द्रा फलिनी विश्वक्सेना गन्धफला कारम्भा प्रियक: कटु: कान्ता कृष्णाङ्गी कृष्णपुष्पी सौवर्णभेदिनी गन्धफला प्रियवर्णी प्रियवल्ली फलप्रिया गौरी वृत्ता कङ्गु: कङ्गुनी भङ्गुरा गौरवल्ली सुभगा पर्णभेदिनी शुभा पीता मङ्गल्या श्रेयसी। गुणा:—शीतला तिक्ता दाहरक्तपित्तघ्नी वान्तिभ्रान्तिज्वरघ्नी सुखजाड्यहरी च। रा.नि.व.१२। तुवरा वातघ्नी रक्तातियोगदौर्गन्ध्यस्वेदगुल्मव्रणाविषमोहघ्नी च। भा.। "या किञ्चित्याच्छुरा श्यामा कीटदोषविवर्जिता। सा प्रियङ्गुर्मता भद्रा विपरीता तु निन्दिता॥" भैष.। च.सू.४अ.। च.द. पि.ज्व.दुरालभादि:। "पर्पटकप्रियङ्गु श्यामा।" वा.सू.१५अ.। भा.म.४भ.गर्भ.। "प्रियङ्गूत्पलसारिवा:।" धातक्याम्। वै.निघ. उन्मा. चि. कल्याणघृते। कटुक्याम्। कटुकी। धरणि.। वै.निघ.२भ.र.पि.चि.मृद्वीकादिचूर्णे। कृष्णसर्षपे। मे.। श्यामायाम्। वै.निघ.र.पि.चि.वासादिकषाये। राले। वै.निघ. र.पि.चि. उशीरादिचूर्णे। (क:) स्वनामख्यातव्रणधान्ये। कांगिनी धान। हिं कुंयाधान, प्रियङ्गु। मं वरगु। गुणा:—मधुर: कषाय: रुच: वातपित्तकृच्च। रा.नि.व.१६। प्रियङ्गुक: चतुर्धा स्यात् कृष्णरक्तपीतश्वेतभेदेन। ते च यथोत्तरं गुणाधिका: रुचा: कफघ्नाश्च। सु.सू. ४५अ.। वै.निघ. २भ.छर्दि. एलाद्यचूर्णे। See कङ्गु:।
प्रियङ्ग्वम्बष्ठादिवर्ग:। पुं। प्रियङ्गुपुष्पाञ्जनयुग्मपद्माम्भोजयोजनवल्लीनन्तामानद्रुममोचरससमङ्गापुन्नागशीतपाक्य:। अम्बष्ठामधुककनम्स्कारीनन्दिवृक्षपलाशकच्छुरालोध्रधातकिबिल्वपेशिकाकट्वङ्गकमलोत्पलवरजांसि च। गुणा:—पक्वातीसारघ्न:

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्धानीयः पित्ते हिती व्रणरोपणश्च । वा.सू.१५अ.।

प्रियजीवः (कः) । पुं । श्लीषाकवृक्षे । शोणा गाछ । रा.नि.व.९। लीध्रवृक्षे । वै.निघ.।

प्रियतमः । पुं । मयूरशिखायाम् । श.च.।

प्रियदर्शनः । पुं । चौरिकावृक्षे। शौनी। शुकपक्षिणि । जटा.। पीतशाले । पियाशाल । वै.निघ.।

प्रियदर्शनी । स्त्री । शारिकापक्षिणि । वै.निघ.।

प्रियदा । स्त्री । स्वर्णजात्याम् । वै.निघ.।

प्रियवर्णा (र्णी) । स्त्री । प्रियङ्गुलतायाम् । जटा.।

प्रियवल्ली । स्त्री । प्रियङ्गौ । रा.नि.व.१२।

प्रियषादिनी । स्त्री । शारिकायाम् । वै.निघ.।

प्रियवादी (दिन्) । पुं । शारिकानायके । चातके । च.इ.१२अ.।

प्रियशा(सा)लः । पुं । निम्बवृक्षे । प.मु.। असनवृक्षे । पियाशाल । रा.नि.व.९।

प्रियशा(सा)लकः । पुं । असनवृक्षे । रा.नि.व.९।

प्रियसखः । पुं । खदिरवृक्षे । श.च.।

प्रियसन्देशः । पुं । चम्पकवृक्षे । श.च.।

प्रिया । स्त्री । भार्य्यायाम् । हे.च.। वृद्धिनामौषधौ । वृद्धि । र.मा.। मल्लिकापुष्पवृक्षे । मल्लिका फूलेर गाछ । रा.नि.व.१०। वार्षिकीमल्लिकाभेदे । रा.नि.व.१० । प्रियङ्गौ । रा.नि.व.२३ । एलायाम् । श.च.। मदिरायाम् । रा.नि.व.१४ ।

प्रियात्मजः । पुं । खनामख्याते प्रसवजातीयपक्षिभेदे । च.सू.२७अ.।

प्रियाम्बुः । पुं । आम्रवृक्षे । आम गाछ । रा.नि.व११.। क्लो। आम्रफले ।

प्रियालः(कः) । पुं । प्रियङ्गौ । प.मु.। चारवृक्षे । पियाल गाछ । तत्पर्य्यायाः,—अखट्टः, ललनः, चारकः, बहुवल्कः, सन्नटुः, तापसप्रियः, स्नेहबीजः, उपवटः, मीचवीर्य्यः, टुसल्लकः । रा.नि.व.११ । अपिच "प्रियालस्तु खरस्निग्धशरीरबहुलवल्कलः । राजादनस्तापसेष्टः सन्नकटुर्घनपुष्पटः ॥ चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु । स्निग्धं सरं मरुत्पित्तदाहज्वरतृषापहम् । पियालमज्जा मधुरो बृष्यः पित्तनिलापहः । बृंहणोऽति दुर्ज्जरः स्निग्धो विष्टम्भी चामवर्द्धनः ।" भा.। क्लो। पक्वप्रियालफले । भा.म.१भ.ज्व.चि.। "द्राक्षादाड़िमखर्ज्जरप्रियालैः ।"

प्रियाला । स्त्री । द्राक्षायाम् । रा.नि.व.११ ।

प्रियाह्वा । स्त्री । कङ्गुणिकायाम् । काँनि । वा.उ.५अ.।

प्रीणनम् । क्लो । तृप्तिकरणे । अम.। [१९।

प्रीणनः । पुं । खड्गिमृगे । गण्डार । रा.नि.व.

प्रीतिः । स्त्री । तृप्तौ । अम.।

प्रीहा (न्) । पुं, स्त्री । प्लीहायाम् । वि.कोषः।

प्रुष्टम् । क्लो । दुग्धे । वै.निघ. ।

प्रेङ्खितम् । क्लो । कम्पिते । अम.।

प्रेतग्रहः । पुं । भूतग्रहविशेषे । लक्षणं—"प्रेताकृतिक्रियागन्धं भीतमाहारविद्विषं । तृषाच्छिदञ्च प्रेतेन गृहीतं नरमादिशेत् ॥" वा.उ.।

प्रेतजिह्वा । स्त्री । स्तब्धतादिलक्षणयुक्तायाम् जिह्वायाम्, अरिष्टलक्षणभेदे । यथा—"स्तब्धा निश्चेतना गुर्व्वी कण्ठकीपचिता भृशं । श्यावा शुष्काथवा शून्या प्रेतजिह्वा विसर्पिणी ॥' च.इ.८अ.।

प्रेतदेहः । पुं । सुमूर्षोः शरीरे।

प्रेतराक्षसी । स्त्री । सुरसायाम् । बाबुई तुलसी । प.मु.।

प्रेतलक्षणम् । क्लो । अरिष्टलक्षणे । च.इ.२अ.।

प्रेमपातनम् । क्लो । नेत्रजले । श.च.। रोदने ।

प्रेयोपत्यः । पुं । क्रौञ्चपक्षिणि । वै.निघ.।

प्रेषणम् । क्लो । प्रेरणे । पीड़ायाम् ।

प्रेष्ठा । स्त्री । जङ्घायाम् । श.च.।

प्रेक्षणम् । क्लो । चक्षुषि । श.र.।

प्रेक्षणकूटः । पुं । चक्षुर्गोलके । मा.नि. पाण्डौ ।

प्रेक्षा । स्त्री । तरुशाखायाम् । श.र.। दर्शने ।

प्रैषः । पुं । उन्मादे । पागल ।

प्रोज्झासनम् । क्लो । मारणे । हे.च.।

प्रोञ्छनम् । क्लो । लोपने । मोछा । तत्त्वम् ।

प्रोत्प(फ)लः । पुं । तालवृक्षभेदे । श.मा.। तत्पर्य्यायाः,—सिंहलास्थानः, कुटा, कुड़ी, पिका ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रोथः। पुं । प्रपाणीर्द्वभागे। थोंण। ज.द. २अ.। कव्याम्। मे.। स्फिचि। उणा.।

प्रोर्णुनावः। पुं । सन्निपातज्वरविशेषे। लक्षणं यथा—"उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्तान्नितान्तसुच्छ्वसिति। तं प्रोर्णुनावजुष्टं विद्यादकृतं विजानीयात्॥ भा.म.१भ.।

प्रोल्लाघितः। वि । रोगमुक्ते। वै.निघ.।

प्रोषः। पुं । सन्तापे। रा.नि.व.२०।

प्रोषितप्रिया। स्त्री। कुलकद्रवे। पीतघाँटी। रा.नि.व.२३। फलिन्याम्, प्रियङ्गौ। वार्षिकमल्लिकायाम्। रा.नि.व.२३।

प्रोष्ठः। पुं । प्रोष्ठीमत्स्ये। अ.टी.रा.।

प्रो(प्रौ)ष्ठपदः। पुं । भाद्रपदमासि। अम.।

प्रोष्ठी। स्त्री । (Cyprinus sophore.) क्षुद्रशफरीमत्स्ये। पूँटिगाछ। तत्पर्य्यायाः;—शफरः शफरी सफरी श्वेतकीलः श्वेष्टः। गुणाः—"प्रोष्ठी तिक्ता कटुः स्वादुः शुक्रला कफवातजित्।" राज.३प.।

प्रोहः। पुं । गजचरणपर्व्वणि। त्रिका.।

प्रौढ़ा। स्त्री । दृष्टार्त्तवस्त्रियि। रा.नि.व.१८। त्रिंशद्वर्षादूर्द्धं पञ्चपञ्चाशद्वर्षपर्य्यन्तवयस्कायाम्। "आषोड़शी भवेद् बाला तरुणी त्रिंशता मता। पञ्चपञ्चाशती प्रौढ़ा भवेद् वृद्धा ततःपरम॥ तत्सङ्गदोषा यथा—"बाला तु प्राणदा प्रौक्ता तरुणी प्राणधारिणी। प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणदा भवेत्॥"

प्लवः। पुं । सङ्घातचारिपक्षिभावे। ते च हंससारस क्रौञ्च-चक्रवाक-कुरर-कादम्ब-कारण्डव-जीवञ्जीवक-वक-बलाका-पुण्डरीक-प्लव-शरारिसुख-नन्दिमुख-मद्गूत्क्रोश-काचाच-मल्लिकाच-शुक्लाच-पुष्करशायि-काकीनालकाम्बुकुक्कुटिका-मेघराव-श्वेतचरणप्रभृतयः प्लवाः सङ्घातचारिणश्च। गुणाः—"रक्तपित्तहराः शीताः स्निग्धा वृष्या मरुज्जिताः। सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः॥" सु.सू. ४६अ.। कैवर्त्तमुस्तायाम्। हिं केवटीमोथा, गुड़तजी। भा.म.४भ.सु.रो.चि.। च.द.कृदिंचि. विष चि.। प्लवङ्गे। मद.व.५। गन्धतृणे। मे.। हंसिन्याम्। विकङ्कतवृक्षे। वै.निघ.। सारसपक्षिणि। मे.। च.सू.२७अ.। वकवृक्षे। च.। क्रौञ्चे। चुञ्चुशाकविशेषे। भेके। गजे। अग्नौ। कपौ। त्रिका.। जलकाके। मे.। गोपालकरम्भे। सु.चि.११अ.।

प्लवकः (गः)। पुं । प्लक्षवृक्षे। रा.नि.व.११। भेके। मे.। (गः)। वानरे। मे.। प्लवपक्षिणि। श.च.। शिरीषवृक्षे। रा.नि.व.९।

प्लवगतिः। पुं । भेके। श.च.।

प्लवङ्गः। पुं । वानरे। अम.। प्लक्षवृक्षे। रा.नि. व.११। सृगे। श.च.।

प्लवङ्गमः। पुं । वानरे। प.मु.। भेके। अम.।

प्लवधान्यम्। क्ली । परिपेलवधान्ये। रा.नि.व.८।

प्लवनम्। क्ली । सन्तरणे। सु.नि.१अ.।

प्लक्षः। पुं । (Thespesia populnea. Syn. Hibiscus populnes, or Ficus infectoria.) Waved-leaf fig tree. पर्कटीवृक्षे। पाकुड़गाछ। गाङ्कीभाँट। र.मा.। हिं पाकड़ि, पखर, गजदन्तसहोरा। तैं गङ्गरयजुव्वि। ता. पीरिश्रावि। तत्पर्य्यायाः;—पर्कटिः, पर्कटी, कन्दरालुः, कमण्डलुः, कमण्डलुतरुः, सुपार्श्वः, पीतनः, कपीतनः, दृढ़प्ररोहः, प्लवकः, प्लवङ्गः, महाबलः, गर्दभाण्डः, अवरोहशाखः, क्षीरीवृक्षः, प्लक्षा, जटिः, प्लीक्षा। सु.सू.३८अ. न्यग्रोधादिः। महाक्षत्वभेदेन द्वौ भेदौ। सा. गुणाः—कटुः कषायः शीतलः रक्तदोषजित् मूर्च्छाभ्रमप्रलापहरश्च। क्षुद्रोऽपि महतोगुणं लभते। रा.नि.व.११। व्रणघ्नः श्लेष्म-पित्त-शोष-शोथविसर्पघ्नश्च। मद.व.५। अश्वत्थवृक्षे। मे.।

प्लक्षा। स्त्री । प्लक्षवृक्षे।

प्लक्षेशः। पुं । गर्भभाण्डवृक्षे।

प्लावगः। पुं । मर्कटे। वै.निघ.।

प्लावनम्। क्ली । द्रवद्रव्यस्योर्द्धगतौ। उत्क्लान।

प्लावी (इन्)। पुं । पक्षिणि। वै.निघ.।

प्लाक्षम्। क्ली । प्लक्षफले। अम.।

प्लि(प्लौ)हः (हा)। पुं, स्त्री। जाठररोगविशेषे। पिलै। निदानलक्षणे—"वातः प्लीहानमुद्धत्य कुपितो यस्य तिष्ठति। शनैः परितुदन् पार्श्वे प्लीहा तस्याभिवर्द्धते॥" च.सू.१८अ.। स चतुर्विधः। "विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च। प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ प्लीहोत्थमेतज्जठरं वदन्ति। तद्वामपार्श्वे परिवृद्धिमेति विशेषतः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीदति चातुरोऽत्र । मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः ।" मा.नि. । "श्रमोभमोविदाहश्च वैवर्ण्यं गात्रगौरवम् । मोही रक्तोदरत्वञ्च ज्ञेयं रक्तजलक्षणम् ॥ सज्वरः सपिपासश्च सदाही मोहसंयुतः । पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते ॥ प्लीहा मन्दव्यथः स्थूलः कठिनो गौरवान्वितः । अरोचकयुतः शीतः प्लीहा कफज उच्यते ॥ नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीड़ितः । वेदनाभिः परीतश्च प्लीहा वातिक उच्यते ॥" भा. । [श्र.च. ।

प्लीहघ्नः । पुं । रक्तरोहितकवृक्षे । रक्तरोहेड़ा ।

प्लीहघ्नी । स्त्री । शरपुङ्खायाम् । बन नील ।

प्लीहशत्रुः । पुं । रोहितकवृक्षे । प.मु. । हवुषा वृक्षभेदे । रा.नि.व.४ ।

प्लीहहन्त्री । स्त्री । हवुषायाम् ।

प्लीहारिः । पुं । अश्वत्थवृक्षे । श्र.च. । शरपुङ्खायाम् । वै.निघ. ।

प्लीहोदरम् । क्ली । उदररोगविशेषे । लक्षणम् —"विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च । प्लीहाभिवृद्धिं सततं करोति प्लीहोदरं तत् प्रवदन्ति तज्ज्ञाः ॥" सु.नि.७अ. । अन्यच्च यथा—"वर्णान्यत्वं महत्त्वञ्च काठिन्यञ्च विशेषतः । प्लीहोदरे विज्ञानीयाद्धेहे च क्षपितां तथा ॥" ज.द.५२अ. ।

प्लीक्षा (न्) । पुं । प्लक्षवृक्षे । पाकुड़ गाछ ।

प्लुतगतिः । पुं । शशके । खरगोश । वै.निघ. ।

प्लुषः । पुं । अग्निदाहे । व्याकरणम् ।

प्लुष्टः । पुं । अग्निदग्धे । अम. ।

प्लुष्टिः । पुं । अग्नौ । आगुन ।

प्लोतः । पुं । कर्पटे । सु.सू.५अ. । कापड़ ।

प्लोषः । पुं । दाहे । अम. ।

प्सा । स्त्री । भक्षणे । भक्षे । हे.च. ।

प्सानम् । क्ली । भक्षणे । त्रिका. ।

फ

फः । पुं । जृम्भानिस्कारे । विश्व. । झञ्झावाते । झड़ । मे. ।

फञ्जिका । स्त्री । भार्य्यायाम् । बांमुनहाटी । प.मु. । सु.सू.३८अ. । दन्तीवृक्षे । वै.निघ. । देवताड़वृक्षे । दुरालभायाम् । श्र.च. । आखुकर्ण्यां म् ।

फञ्जिप(पु)त्रिका । स्त्री । आखुपर्ण्याम् । प.मु. । (पुत्रिका) । वनस्पतिभेदे । वै.निघ. ।

फञ्जी । स्त्री । भार्य्यायाम् । बांमुनहाटी । रा.नि.व.६ । च.द.सि.यो.हिक्काश्वास.चि. । एतत्पर्य्यायः कफघ्नम् । अवि. । वृद्धदारकविशेषे । रा.नि.व.३ । दन्तिवृक्षे । योजनवल्ल्याम् । वै.निघ. ।

फञ्जीकरः । पुं । फञ्जयाम् । वै.निघ. ।

फञ्जयादिपञ्चकम् । क्ली । फञ्जिका जीवनी पद्मा तर्कारी चुक्रुक इति वनजपत्रशाकवर्गे । गुणाः—वातहारित्वं ग्राहित्वं दीपनत्वं रुच्यत्वञ्च । भेण्डा कुणञ्जरः त्रिपुटश्च इत्यपि तद्वर्गमध्ये गण्यते । वर्गोऽयं दीपनः पाचनः रुच्यः बलवर्णकरश्च । त्रिदोषशमनः पथ्यः ग्राही वृष्यश्च । रा.नि.व.७ ।

फटः (टा) । पुं, स्त्री । अहिफणायाम् । अम. । जटा. ।

फटकी । स्त्री । स्फटिकाख्यायाम् । फट्‌किरि । वै.निघ.२भ.क्षय.चि. क्षयकेशरिरसे ।

फटिकारी । स्त्री । (Alumen.) Alum. स्वनामख्यातक्षारविशेषे । फट्‌किरि । हिं फिटुकरी । तें पतिकूराम । ता. पतिकारम । दा. फटक्री । गुर्ज. फर्करी । वम्. फटिकी । गुणाः—संग्राहिणी सङ्कोचकरी अपूतिकरी बालविसूच्याम् उदरामये नासारक्तस्रावे च हिता । "फटी च कटुका स्निग्धा कषाया प्रदरापहा । मेहकुक्ष्वमीशीर्षदोषघ्नी दृढ़रङ्गदा ॥" रा.नि.व.१३ ।

फड़िङ्गा । स्त्री । झिल्लीकीटे । फड़िङ् । श्र.च. ।

फणः (णा) । पुं, स्त्री । सर्पफणायाम् । अम. भ. । घ्राणमार्गसुभयतः स्रोतोमार्गप्रतिबद्धे मर्म्मद्वये । सु.शा.६अ. ।

फण(णा)क[ध]रः । पुं । सर्पे । श्र.र. ।

फणभृत् । पुं । सर्पे । हे.च. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फणाभरः (वान्)। पुं। सर्पे। हारा०। श.र.।

फणाशः। पुं। पनशवृक्षे। काँटाल गाछ।

फणिः। पुं। विषे। र.सा.सं.गदमुरारिरसे।

फणिका। स्त्री। क्षणीदुस्वरिकायाम्। वै.निघ०।

फणिके(श)सरम्। क्ली। नागकेसरपुष्पे। रा.नि.व.९।

फणिखेलः। पुं। लावपक्षिणि। वै.निघ.। भारतीपक्षिणि। भारुई पाखी। विका०।

फणिचम्पकः। पुं। वनचम्पकवृक्षे। वनज चाँपा गाछ। रा.नि.व.१०।

फणिजिह्वा। स्त्री। महासमङ्गायाम्। महाशतावर्य्याम्। रा.नि.व.४।

फणिजिह्विका। स्त्री। श्वेतशारिवायाम्। महाशतावर्य्याम्। वै.निघ.।

फणिज्ज(ज्झ)कः। पुं। क्षुद्रपत्रतुलसीभेदे, गन्धतुलस्याम्। रा.नि.व.१०। वा.सू.१५अ.। मधुरजम्बीरे। मइर इति लोके। च.सू.२अ.वि.८अ.। पलाशवृक्षे। भैष.ने.री.चि.। मरुवकवृक्षे।

फणिप्रियः। पुं। वायौ। श.र.।

फणिफेनः। पुं। अहिफेने। आफिम्। रत्ना०।

फणिभारिका। स्त्री। क्षणीदुस्वरवृक्षे। काकडुमूर। वै.निघ.।

फणिलता। स्त्री। नागवल्लीलतायाम्। पाण गाछ। रा.नि.व.११।

फणिवल्ली। स्त्री। नागवल्ल्याम्। पाण गाछ। रा.नि.व.११। वै.निघ.२भ.चय.चि.नवरत्नराजमृगाङ्के। [वै.निघ.।

फणिसम्भारा। स्त्री। क्षणीदुस्वरिकायाम्।

फणिहन्त्री। स्त्री। गन्धनाकुल्याम्। गन्धब्राह्मी। रा.नि.व.७। [निघ.।

फणिहारी (इन्)। पुं। कपिकच्छौ। वै.

फणिहृत्। स्त्री। क्षुद्रदुरालभायाम्। रा.नि.व.४।

फणी (इन्)। पुं। मरुवकवृक्षे, क्षुद्रपत्रतुलस्यां। श्वेतचन्दने। च.द.वा.व्या.चि.महासुगन्धतैले। सर्पे। स्त्री (नी)। सर्पिण्याम्। सर्पगन्धा। सर्पस्त्रियाम्। रा.नि.व.५।

फणीयम्। क्ली। पद्मकाष्ठे। वै.निघ.।

फणेडः। पुं। जठरे। पेट।

फत्कारी (इन्)। पुं। पक्षिणि। श.च.।

फम्फणः। पुं। सन्निपाते। वै.निघ.।

फरङ्गरोगः। पुं। See फिरङ्गरोगः।

फरेन्द्रः। पुं। जम्बूवृक्षे। वै.निघ.।

फर्फरी। स्त्री। करायें। पाँज्जा। वै.निघ.।

फलम्। क्ली। आम्रादौ प्रसिद्धम्। फल। "फलेषु परिपक्वं यत् गुणवत्तदुदाहृतम्। विल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम्। फलेषु सरसं यत् स्यात् गुणवत्तदुदाहृतम्। द्राक्षाविल्वश्रिवादीनां फलं शुष्कं गुणाधिकम्। फलतुल्यगुणं सर्व्वं मज्ञानमपि निर्दिशेत्।" भा.। इन्द्रयवे। रा.नि.व.९। वै.निघ.क्रमि.चि.सुस्तादिः। वा.सू.१५अ. वत्सकादिव.। विफलायाम्। मे.। सा.कौ. दूर्व्वायतैले। भैष. अरिमेदा. तैले। च.द.अजी.चि.। व्रणशत्रौ। अम.। स्त्रीरजसि। श.र.। जातीफले। विका.। र.सा.सं. सर्व्वतोभद्ररसे। भैष.वा.व्या.चि. गन्धद्रव्यकथने। च.द.योनिरो.चि.। भैष.मु.री.चि. खल्वखदिरवट्यां। शस्त्रे। अम.। कक्कोलके। काँक्‌ला। मे.। फाले। हे.च.। मदनफले। प.मु.। च.द.वमने। च.द.वा.व्या.चि.एकादशशतिकमहाप्रसारणीतैले। पुं। कुटजवृक्षे। श.र.।

फलकः। पुं। अस्थिखण्डे। जटा.। नागकेशरवृक्षे। श.च.। नितम्बे। क्ली। प्रसाधनार्थं जलरक्षणाधारविशेषे। कलसी बसाइबार घराङ्के। सु.सू.४५अ.।

फलकण्टकः। पुं। पर्पटके। क्षेत्पापड़ा। वै.निघ.। स्त्री (का)। इन्दीवरायाम्। वै.निघ.।

फलकर्कशा। स्त्री। वनबदरवृक्षे। संग्रह.।

फलकी (इन्)। पुं। मत्स्यविशेषे। चितल, फलुई माछ। विका.। तत्पर्य्यायौ,—फलिः फली। गुणाः,—स्वादुत्वं गुरुत्वं स्निग्धत्वं बलशुक्रवर्द्धनत्वञ्च।

फलकृष्णः। पुं। करञ्जवृक्षे। वै.निघ.। पानीयामलके। श.च.।

फलकेशरः। पुं। नारिकेलवृक्षे। जटा.।

फलकोशः (षः) (कः)। पुं। व्रणे। शिम्बे। विका.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलङ्कषा। स्त्री। महाश्यावपिकायाम्। रा. नि.व.५।

फलग्रहिः। पुं। फलितवृक्षे। अ.टी.भ.।

फलग्राही (ह्रिन्)। पुं। वृक्षे। धरणिः।

फलघृतम्। क्ली। पक्वघृतविशेषे। तत् योनिरोगमात्रे हितम्। अत्र मेदामहामेदयोरभावे शतावरी द्विगुणा, काकोलीक्षीरकाकोल्यभावे अश्वगन्धा द्विगुणा। काकोल्यौ इति द्वैगुण्यार्थप्रयोगः। जीवकर्षभकयोरभावे विदारीकन्दौ द्विगुणौ देयः। भा.म.४भ.यो.रो.चि.। पाठः—"मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला। मेदा पयस्या काकोली मूलञ्चैवाश्वगन्धजम्। अजमोदा हरिद्रे द्वे हिङ्गु कटुकरोहिणी। उत्पलं कुमुदं द्राक्षा काकोल्यौ चन्दनद्वयम्। एतेषां कार्षिकैर्भागैः घृतप्रस्थं विपाचयेत्। शतावरीरसः क्षीरं घृतादेयं चतुर्गुणम्।" च.द.योनि.व्या.चि.। अन्यच्च—"महाक्षीरे द्वे त्रिफलां गुडूचीं सपुनर्नवां। शुकनासां हरिद्रे द्वे रास्नां मेदां शतावरीं। कल्कीकृत्य घृतप्रस्थं पचेत् क्षीरचतुर्गुणं॥" च.द.योनि.व्या.चि.। जीवद्वत्सैकवत्साया गोः घृतं ४ श्र.। शतमूलीरसं १६ श्र. दुग्धं १६ श्र.। कल्कार्थं मेदा अभावे (गुडूची) मञ्जिष्ठा यष्टिमधु कुष्ठं त्रिफला शर्करा बला (वेलेड़ा) शुक्लभूमिकुष्माण्डः काकोली अश्वगन्धामूलं यमानी हरिद्रा दारुहरिद्रा हिङ्गु कटुकी उत्पलं (नीलशुन्दी) द्राक्षा क्षीरकाकोली चन्दनं रक्तचन्दनं एषां प्र.२तो.। अन्यत्—कल्कार्थं—श्वेतपीतभिण्टीमूलं त्रिफला गुडूची पुनर्नवा (श्वेतपूष्णा) चर्मचटकः (चामचिकै)। हरिद्रा दारुहरिद्रा रास्ना मेदा शतावरी एषां मिलित्वा १ श्र.। जीवद्वत्साघृतं ४ श्र.। दुग्धं १६ श्र.।

फलचमसम्। क्ली। वटवृक्षवल्कले। वै.निघ.।

फलचीरकः। पुं। चीरकनामगन्धद्रव्ये। रा. नि.व.१२। [श्र.र.।

फलजातिः (ती)। स्त्री। जातीफलवृक्षे।

फलत्रय(त्रिक)म्। क्ली। त्रिफलायाम्। रा. नि.व.२२। मिलितद्राक्षापरूषकाभ्रमर्थेतिफलत्रये।

फलत्रिकादिः। पुं। पाण्डौ कषाये। फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बजः। क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम्॥ रस.र.।

फलदः। पुं। वृक्षे। धरणिः।

फलद्रुमः। पुं। फलितवृक्षे। वै.निघ.।

फलपञ्चाम्लम्। क्ली। अम्लफलपञ्चके। रा. नि.व.२२।

फलपाकः। पुं। करञ्जवृक्षे। अ.टी.भ.। पानीयामलके। श्र.च.।

फलपाकान्ता। स्त्री। ओषध्याम्, धान्यादौ। अम.।

फलपाकी (ह्रिन्)। पुं। गर्दभाण्डवृक्षे। र.मा.।

फलपिप्पली। स्त्री। फलवीजे। सु.सू.४३अ.।

फलपुच्छः। पुं। कन्दशाकविशेषे, वरखाली। चिका.।

फलपुष्पा (ष्पी)। स्त्री। पिण्डीखर्ज्जूरीवृक्षे। रा.नि.व.११।

फलपूरः (कः)। पुं। मातुलुङ्गवृक्षे। प.सु.। मद.व.६। वै.निघ.२भ.आकल्पकादिचूर्णे। च.द. र.पि.चि.।

फलप्रियः। पुं। द्रोणकाके। रा.नि.व.१९।

फलप्रिया। स्त्री। प्रियङ्गौ। रा.नि.व.१२।

फलमत्स्या। स्त्री। गृहकन्यायाम्। घृतकुमारी। वै.निघ.।

फलमुख्या। स्त्री। अजमोदायाम्। वन योवानि। रा.नि.व.६.।

फलमुण्डः। पुं। नारिकेलवृक्षे। श्र.र.।

फलमुद्गरिका। स्त्री। खर्ज्जूरवृक्षभेदे। श्र.मा.।

फलयुग्मा। स्त्री। इन्दीवरायाम्। वै.निघ.।

फलराजः। पुं। खर्ब्बुजेति ख्याते फलशाके। खर्मूजा। वै.निघ.।

फलवर्गः। पुं। फलगणे। दाड़िमामलकबदरकोलकर्कन्धुसौवीरशिग्विति काफलकपित्थमातुलुङ्गास्रातक-करमर्द-पियाल-लकुच भव्य-पारावत-वेत्रफल-प्राचीनामलक-तिन्तिड़ीक-नीप-कोशाम्रास्रीकानारङ्गजम्बीरप्रभृतिषु। एषां गुणाः—स्वस्वपर्य्याये द्रष्टव्याः।

फलवर्त्तिः (र्त्ती)। स्त्री। मलशोधिन्यां वर्त्तौ। भैष.व.शूल.चि.। "घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा खाङ्गुष्ठसन्निभा। मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता॥" भा.।

फलवृन्तलः। पुं। तरम्बुजवृक्षे। रा.नि.व.७।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलवाटिका। स्त्री। काकीदुम्बरिकायाम्।
फलवान्। वि। फलिते। अम.।
फलविरेचनम्। क्ली। हरीतक्यादौ। तदुक्तं —"मृद्वीकाथ विड़ङ्गानि खर्ज्जूराणि परूषकम्। आरग्वधोऽथामलकं हरीतक्यो विभीतकम्। कम्पिल्लकीपचिवे च वपुषञ्च सुकूलकम्। नौलिका वकुलं पीलु भवेत् फलविरेचनम्॥" वा.चि.६अ. अरुण.।
फलविषम्। क्ली। यस्य फले विषं वर्त्तते। तच्च द्वादशविधम्—कुसुद्वती-वेणुका-करम्भ-महाकरम्भ-कर्कोटकरेणुकखद्योतकचर्म्मरीभगन्धासर्षपघातिनन्द-नसारपाकानीति। तद्वचणे—"सुष्कशीफः फलविषैः दाहोऽन्नद्वेष एव च।" सु.कल्प.२अ.।
फलवीजः। पुं। खर्ब्बुजेतिख्याते फलशाके।
फलवृन्ताकः। पुं। श्वेतवाकभेदे।
फलवृक्षः (कः)। पुं। पनसवृक्षे। कँटाल गाछ। रा.नि.व.११।
फलशाकम्। क्ली। फलप्रधानवृक्षवर्गे। यथा —"कूष्माण्ड-कालिङ्ग-कलिङ्ग-चिर्भटं पटोलयुग्मञ्च तथाच तुण्डी। वीनाख्यकर्कोटककारवेल्लं कोषातकी बालुफलानि चैव॥" अवि.१६अ.। एषां गुणादिकं पर्य्याये द्रष्टव्यम्।
फलशाखी (न्)। पुं। पीलुवृक्षे।
फलशाड़वः। पुं। दाड़िमवृक्षे। रा.नि.व.११। विका.।
फलशैशिरः। पुं। वदरवृक्षे। रा.नि.व.११।
फलश्रेष्ठः। पुं। आम्रवृक्षे। शब्दच.।
फलश्रेष्ठा। स्त्री। त्रिफलायाम्। वै.निघ.।
फलषाड़वः। पुं। दाड़िमे।
फलसः। पुं। पनसवृक्षे। अ.टी.भ.।
फलसम्वद्धः। पुं। उदुम्बरवृक्षे। वै.निघ.।
फलसम्भारा। स्त्री। कृष्णीदुम्बरिकायाम्। वै.निघ.।
फलस्नेहः। पुं। अचोटवृक्षे। रा.नि.व.११।
फला। स्त्री। इन्दीवरायाम्। झिञ्झिरीटाख्ये। रा.नि.व.४।
फलाढ्या। स्त्री। काष्ठकदल्याम्। वन कला। रा.नि.व.११।
फलात्मिका। स्त्री। कारवेल्याम्। करला, उच्छे। वै.निघ.।
फलादनः। पुं। शुकपक्षिणि। हे.च.। त्रि। फलभक्षके। [प.मु.।
फलाधमः। पुं। लकुचवृक्षे। गान्धार गाछ।
फलाध्यक्षः (क्षा)। त्रि। राजादनवृक्षे। थिर्नी। भा.।
फलानालुः। पुं। पानशारु इति प्रसिद्धे कन्दशाके। प.मु.। वृक्षाम्ले। रा.नि.व.६।
फलान्तः। पुं। वंशे। भ.मा.।
फलान्नम्। क्ली। फलोपकरणकृतान्ने। गुणाः —"फलान्नं स्याद्रुचिकरं गुरु फलसमं गुणैः।" वै.निघ.। वृक्षाम्ले। रा.नि.व.११। [२अ.।
फलाम्बु। क्ली। द्राक्षादिसिद्धजले। वा.चि.
फलाम्लः। पुं। अम्लवेतसे। रा.नि.व.६। च. चि.२अ.द्रव्यरसे। क्ली। अम्लरसविशिष्टफलमात्रे। च.चि.२अ. मातुलुङ्गरसदाड़िमरसादौ, महाषट्-कटूरतैले।
फलाम्लपञ्चकम्। क्ली। जम्बीरनागरङ्गाम्ल-वेतसचिञ्चामातुलुङ्गेषु। गोँड़ा, नारांगा, अम्ल-वेतस, तेँतुल, टाबा।
फलारिष्टः। पुं। अर्शोऽधिकारे अरिष्टभेदे। —"हरीतकीफलप्रस्थं प्रस्थमामलकस्य च। विशालाया दधित्थस्य पाठाचित्रकमूलयोः। द्वे द्वे पले समापीथ्य द्विद्रोणे साधयेदपां। पादावशेषे पूते च रसे तस्मिन् प्रदापयेत्। गुड़स्यैकां तुलां वैद्यः संस्थाप्य घृतभाजने। पचस्थितं पिबेदेनं गृहणन्नर्शोविकारवान्...॥" च.चि.९अ.।
फलालुः। पुं। आलूकभेदे। पांनीयालू। "फलालुः स्यात् ग्रन्थिफलस्तया चयफलः स्मृतः॥"
फलाशनः। पुं। शुकपक्षिणि। करञ्जवृक्षे।
फलासवः। पुं। द्राक्षा-खर्ज्जूरादि-फलोद्भव षड्विंशत्यासवेषु। च.सू.२५अ.।
फलास्थिः। पुं। नारिकेलवृक्षे। वै.निघ.।
फलाह्वौ। स्त्री। चीरिणीवृक्षे। वै.निघ.।
फलिः (लिः) (इन्)। पुं। मत्स्यविशेषे। फलुई गाछ। गुणाः—"फलिः स्वादुर्गुरुः स्निग्धः बलकृच्छुक्रवर्द्धनः।" राज.३प.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलिका। स्त्री । पारिषाश्वत्थे । निष्पावे । वर्ब्बटी । रा.नि.व.१६ । फलिमत्स्ये ।

फलितः। पुं । वृक्षे । धरणिः । स्त्री । रजस्वलायाम् ।

फलिनः। पुं । श्योणाकवृक्षे । पणसवृक्षे । रा.नि.व.११ । अरिष्टकवृक्षे । रीठा । वै.निघ. ।

फलिनी। स्त्री । प्रयोगे प्रशस्ततमफलायामुद्भिदि । च.सू.१अ. । सुषल्याम् । तालमूली । प्रियङ्गौ । रा.नि.व.१२ । लक्षणाकन्दे । रा.नि.व.७ वै.निघ.कल्याणघृते । गन्धप्रियङ्गौ । वा.सू.१५अ. एलादिः । वायमाणायाम् । वै.निघ. २भ.क्षयचिद्राचासवे । नखरञ्जकवृक्षे । मेइदी । व.निघ.२भ. दाह.चि.प्रलेपे । लाङ्गलीवृक्षे । विषलाङ्गुलिया । अम. । वै.निघ.२भ. वा.व्या.चि. विषगर्भतैले । श्योणाकवृक्षे । दुग्धिकायां । खिरुई । र.मा. । अग्निशिखायाम् । कटुतुम्ब्याम् । निष्पावीभेदे । वर्ब्बटी ।

फली। स्त्री । सुषल्याम् । तालमूली । प्रियङ्गुवृक्षे । प.मु. । शुकनासायाम् । चर्म्मकषा । वै.निघ. । आम्रातकवृक्षे । फलिमत्स्ये । ग्र.मा. ।

फलीग्रः। पुं । पारिग्रपिप्पले । अश्वत्थविशेष, पलाशपिप्पल । वै.निघ. ।

फलूषः। पुं । लताविशेषे । उणा. । [ग्र.र. ।

फलेग्राहिः (ही (इन्))। पुं । फलितवृक्षे ।

फलेन्द्रः। पुं, स्त्री । राजजम्बूवृक्षे । बड़ जाम । फलेन्द्रा जाम । भा. ।

फलेपाकी। स्त्री । गन्धसुखे । गन्धभाद्दुलिया विशेष । प.मु. ।

फलेपुष्पा। स्त्री । द्रोणपुष्प्याम् । घनघसा । भा. । [प.मु. ।

फलेरुहा। स्त्री । पाटलवृक्षे । पारुल गाछ ।

फलेलाडुः। पुं । जीवनवृक्षे । हारा. ।

फलोत्तमा। स्त्री । दुग्धिकायाम् । क्षीरुई । र.मा. । कपिलद्राचायाम् । किसमिस् । विफलायाम् । रा.नि.व.११ ।

फलोत्पत्तिः। पुं । आम्रवृक्षे । ग्र.च. ।

फलोनिः। स्त्री । स्त्रीयोनौ । वै.निघ. ।

फल्गुः। स्त्री । काकीदुम्बरिकायाम् । काकडुमूर । र.मा. । "तर्पणं वृंहणं फल्गु गुरु विष्टम्भि शीतलम् ।" च.सू.२७अ. । यज्ञडुम्बुरे । च.सू.४अ. । पुं । वसन्तर्त्तौ । पित्तश्लेष्मील्वणसन्निपातज्वरे । भा. । पटवासचूर्णे । आबिर । त्रि । अनर्थके । त्रिका. । [टी.भ. ।

फल्गुनः (नाख्यः)। पुं । फाल्गुनमासे । अ.

फल्गुनी। स्त्री । काकीदुम्बरिकायाम् । रा.नि.व.११ । च.चि.२अ. ।

फल्गुफलम्। क्ली । काकीदुम्बरिकाफले । सि.यो.र.पि.चि.सिद्धतमयोगे ।

फल्गुमूलम्। क्ली । काकीदुम्बरिकामूले । च.द.सि.यो.मूर्च्छा.चि.बृहत्पञ्चगव्यघृते ।

फल्गुवाटिका (टी)। स्त्री । काकीदुम्बरिकायाम् । रा.नि.व.११ ।

फल्गुवृन्तः (न्ता) (कः)। पुं, स्त्री । पीतलोध्रवृक्षे । श्योणाकविशेषे । रा.नि.व.९ ।

फल्यम्। पुं । पुष्पे । पुष्पकलिकायाम् । ग्र.च. ।

फल्लकिन्। पुं । मत्स्यविशेषे । फलूई माछ । ग्र.मा. ।

फाः। पुं । सन्तापे ।

फाटकी। स्त्री । स्फट्यां । फट्‌किरि । रा.नि.व.१३ ।

फाणिः। स्त्री । गुड़ । उणा. । करम्बे ।

फाणितम्। क्ली । अर्द्धावर्त्तितेक्षुरसे । गुड़विशेषे । झोलागुड़ । सु.सू.४४अ. । लक्षणम्— "इक्षो रसस्तु यः पक्वः किञ्चिद्गाढ़ो बहुद्रवः । स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ॥" गुणाः— "फाणितं गुर्व्वभिष्यन्दि वृंहणं कफपित्तकृत् । वातपित्तश्रमान् हन्ति मूववस्तिविशोधनम् ॥" भा. ।

फाण्टः (कः)। पुं । कषायभेदे । कल्कितद्रव्यपलं चतुष्पले उष्णतोये क्षिप्त्वा क्षणकालं शरावावृतं संस्थाप्य अथ मृदितं वस्त्रपूतञ्च फाण्ट उच्यते । कुट्टित द्रव्य १ प. ४ पल उष्ण जले मृत्पात्रे वा प्रस्तरपात्रे क्षिप्त करिया क्षणकाल ढाकिया परे मृदित ओ वस्त्रपूत करिबे । क्वाथद्रव्यस्य पलं पलचतुष्टयमितमुष्णोदकञ्च एकत्र स्रावयेत् । "क्वाथद्रव्यपलं सम्यक् जलमष्टगुणञ्क्षिपेत् । पादे चतुष्पलमितं ततस्तु स्रावयेज्जलम् । सोऽयं पूतो द्रव्यफाण्टः.....॥" प.प्र.१ख. । शार्ङ्ग. १अ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"फाण्टः सद्यो धृतो ज्ञेयः स्वल्पदोषस्त्वसाग्निषु। अष्टावंशेषिते ऽस्मिन्नले क्वथ्यपलं पेत् विमद्य पटपूतं तज्जलं फाण्ट इति स्मृतः। कुड़वश्च जलस्रोक्तं क्वथितं वह्निसन्निभम्।" अचि।

फालः। पुं। कार्पासवस्त्रे। मे।

फालाः। स्त्री। जम्बीरबीजे।

फालखला। स्त्री। भारतीपक्षिणि। त्रिका।

फाल्गुनः। पुं। अर्जुनवृक्षे। रा.नि.व.९। तन्नामकमासे। मे।

फाल्गुनप्रियः। पुं। अङ्के। शौंक। वै.निघ.।

फाल्गुनानुजः। पुं। वसन्तर्त्तौ। हारा।

फाल्गुनिकः। पुं। फाल्गुनमासे। अम।

फिङ्गकः। पुं। नक्रे। पक्षिविशेषे। फिङ्गा। ग्र.मा।

फिरङ्गः। पुं। स्वनामख्यातरोगे। भा।

फिरङ्गरोगः। पुं। आगन्तुज-संक्रामकरोगविशेषे, गन्धरोगे। स फिरङ्गदेशे एव बाहुल्येन जायते। "फिरङ्गसंङ्गके देशे बाहुल्येनैव यद्भवेत्। तस्मात् फिरङ्ग इत्युक्तः...॥" निदानं यथा—"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्। फिरङ्गिनोऽङ्गसंसर्गात् फिरङ्गिन्याः प्रसङ्गतः। व्याधिरागन्तुजो ह्येष दोषाणामस्य संक्रमः। भवेत्तं लक्षयेत्तेषां लक्षणैर्भिषजां वरः॥" रूपं यथा—"फिरङ्गस्त्रिविधो ज्ञेयो बाह्य आभ्यन्तरस्तथा। बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ब्रूवे। तत्र बाह्यः फिरङ्गः स्यात् विस्फोटसदृशोऽल्परुक्। स्फुटिती व्रणवद्वेद्यः सुखसाध्योऽपि स स्मृतः। सन्धिष्वाभ्यन्तरः स स्यात् आमवात इव व्यथां। शोथञ्च जनयेद्देष कष्टसाध्यो बुधैः स्मृतः॥" भा.म.४भ.।

फिरङ्गरोटी। स्त्री। रोटिकाभेदे। पाँउरुटी। सा तु तालस्याथवा खर्জ্জুরস্য রসেন মধুরিকাজলেন বা মিশ্রিতা গোধূমকণিকা অধিককালমুত্তমং সম্মর্দ্দিতা স্থূলগোলাকারেণ নির্ম্মিতা তন্দূরপাকেন নিষ্পাদিতা ভবতি। পাকরাজঃ।

फिरङ्गिणी। स्त्री। तद्देशीयस्त्रियां। फिरिङ्गि मेये। भा।

फुकः। पुं। पक्षिणि। ग्र.च।

फुटः। पुं। सर्पफणायाम्। हे.च।

फुप्फु(स्फु)सः। पुं। रोगविशेषे। शोणितफेनप्रभवे वामतो हृदयनाड़िकालग्ने स्वनामख्यातयन्त्रे। "हृदयाद्वामतोऽधश्च फुसफुसौ रक्तफेनजः॥" फुस्फुस, फुक्का, कांवासे। सु.शा.४अ.। "हृदुण्डुकः फुस्फुसश्च॥" भा.नि.। तद्विवरणं यथा,—फुप्फुसश्च द्विधा भिन्नो वाम-दक्षिणभेदतः। पेश्यां वक्षःस्थलस्थायां समासक्तोऽधोमुखः॥ अधो विशाखी बहुभिः कोषैरिव मधुक्रमः। दुष्टशोणितसंयुक्तिकोषोऽयं परिकीर्त्तितः॥ तरुणास्थिमयी नाड़ी जिह्वामूलात् प्रधाविता। अधःशाखाद्वयवती फुप्फुसद्वयमागता॥ ततः शाखाद्वयात् तस्मात् बह्वयः शाखा विनिःसृताः। कोषेषु फुप्फुसस्थेषु सूक्ष्मा समुपस्थिताः॥ नासासुखसमाकृष्टः पवनः श्वासकर्म्मणः। श्वासनाड्या तया सर्व्वान्तान् कोषान् प्रविश्यत्यसौ॥ [निघ।

फुल्लतुवरी। स्त्री। स्फटिकारिकायाम्। वै.

फुल्लफालः। पुं। सूर्पवाते। त्रिका।

फुल्लरोकः। पुं। सर्षे। उणा।

फुल्ललोचनः। पुं। हरिणविशेषे। ग्र.च।

फेणः (नः) (कः)। पुं। फेने। समुद्रफेने। प.मु। त्रिका। भैष.वा.र.चि. द्वादशाध्याये। अस्थिफेने। वार्षे। वै.निघ। (क) गोधूमचूर्णकृतपिष्टकविशेषे। थोक्षा। गुणाः—"फेनका लघवो रुच्या वृष्याः पित्तानिलापहाः।" राज.३प।

फेण(न)का। स्त्री। अरिष्टकवृक्षे। रीठागाछ। वै. निघ.। जलपक्वतण्डुलचूर्णे। आस्केपिटे। ग्र.च।

फेण(न)दुग्धा। स्त्री। दुग्धफेनीवृक्षे। रा. निघ.५।

फेण(न)मेहः। पुं। प्रमेहभेदे। तत्र रोगी स्तोकं स्तोकं सफेनं मेहति। सु.नि.६अ।

फेन(न)वाहौ। (इन्)। पुं। वस्त्रे। ग्र.मा।

फेणा (ना)। स्त्री। सातलावृक्षे। चर्म्मकशा। रा.नि.व.४। शैवदण्डभेदे। भा।

भूबदरी। स्त्री। क्षुद्रबदरीविशेषे। भुंवीरीति कोलापुरप्रान्त प्रसिद्धा। मेटो कुल। हिं झड़बेर। गुणाः—मधुराम्ला कफवातहरी रुच्या पथ्या दीपनी पाचनी किञ्चित्पित्तास्रजननी च। रा.नि.व.११। [व.११।

भूभुक्ता। स्त्री। भूमिखर्ज्जूरिकायाम्। रा.नि.

भूभृत्। पुं। पर्व्वते। रा.नि.व.२।

भूमण्डली। स्त्री। मल्लिकावृक्षे। वेल मल्लिका। वनस्पतिभेदे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमण्डिनी। स्त्री । मल्लिकायाम्। व.निघ.।
भूमयी। स्त्री । छायाम्।

भूमिः। स्त्री । जिह्वायाम्। उणा.। क्षितौ। भूँई। सा गुणतः पञ्चधा। काचित् स्वगुणभूयिष्ठा, काचिदम्बुगुणभूयिष्ठा, काचिदाकाशगुणभूयिष्ठा, काचिदग्निगुणभूयिष्ठा, काचिच्चानिलगुणभूयिष्ठा। तत्र १मा अश्मवती स्थिरा गुर्वी श्यामा कृष्णा वा स्थूलवृक्षगुल्मप्राया च। २या स्निग्धा शीतला स्वल्पोदका स्निग्धशस्यतृणकीमलवृक्षप्राया शुक्ला च। ३या मृदी समा स्वभवती अव्यक्तरसजला सर्व्वतोऽसारवृक्षा महापर्व्वतवृक्षप्राया श्यामा च। ४र्थी नानावर्णा लघुगुल्मवती प्रविरलाल्पपाण्डुवृक्षप्ररोहा च। ५मी रूक्षा भस्मरासभवर्णा तनुरूक्षकीटराल्परसवृक्षप्राया च। तत्राम्बुगुणभूयिष्ठायां विरेचनद्रव्याणि, अग्निगुणभूयिष्ठायाम् वमनद्रव्याणि, आकाशगुणभूयिष्ठायां शमनानि, उभयगुणभूयिष्ठायामुभयतो भागान् आददीत। भूमिः गन्धवर्णरसोपेतत्वात् षड्विधा। षड्रसयुक्तत्वाच्च स्वभावत एव सर्व्वबीजवती च। सु.सू.३७अ.।

भूमि(मी)कदम्बः। पुं । कदम्बविशेषे, भूकदम्बे । सं भूमिकदम्बु । कं नेलगडुवु। तत्पर्य्यायाः,—भूनीप, भूमिजः भृङ्गवल्लभः लघुपुष्पः वृत्तपुष्पः विषघ्नः व्रणहारकः। गुणाः—कटुष्णः हृद्यः दोषघ्नः हिमः कषायतिक्तः पित्तघ्नः वीर्य्यवर्द्धकश्च। रा.नि.व.९। (कः) अलम्बुषायाम्।

भूमिकदम्बिका। स्त्री। सुण्डीर्य्याम्, गोरचसुण्ड्याम् । भूँडौरी। रा.नि.व.५ ।

भूमिकालिका। स्त्री । गोधूमिकाशाके । व.निघ.।

भूमिकुष्माण्डः। पुं । विदारीकन्दे। भूँइकुमड़ा। प.मु.।

भूमिखर्ज्जु(र्ज्जू)रिका (री)। स्त्री । क्षुद्रखर्ज्जूरीवृक्षे, भूखर्ज्जूरिकायाम्। छोटे खेजूर। रा.नि.व.११। See खर्ज्जूरी।

भूमिगमः। पुं । उष्ट्रे। वै.निघ.।

भूमिचम्पकः। पुं । (Koemferia rotunda.) भूचम्पके। भूँइचाँपा। हिं चण्डमूल। तत्पर्य्यायाः,—तामपुष्पः सन्धिवस्त्रः दृढनः। गु.च.। अस्य मूलं व्रणपाककरम्।

भूमिच(चा)री। स्त्री । आखुकर्णीलतायाम्। मूषाकर्णी। रा.नि.व.३ । मार्कण्डिकायाम्। काँकरोल।

भूमिच्छत्र (त्रा)क। क्ली । भूस्थितच्छत्राके, सस्यजशाके । भूकुरुण्ड छाता। वै.निघ.। भा. पू.१भ.शा.व.।

भूमिजः। पुं । भूमिजकदम्बे । रा.नि.व.९। भूमिजगुग्गुलौ । भूनागे। शीषे। रा.नि.व.१२। १३। यवचारे। सोरा। वै.निघ.। क्ली। स्वर्णे। गौरसुवर्णशाके। रा.नि.व.७ १३।

भूमिजगुग्गुलुः। पुं । आशापुरगुग्गुलौ । महिषाक्षगुग्गुल । तत्पर्य्यायाः,—दैत्यसंदजः दुर्गाहः आशापुरसम्भवः। भूमिजगुग्गुलुः काशीदेशे प्रसिद्धः। गुणाः—सौरभ्यदः तिक्तकटूष्णः कफवातघ्नः भूतघ्नः मेध्यः सुगन्धिश्च। रा.नि.व.१२।

भूमिजम्बुः (म्बूः)। स्त्री । क्षुद्रजम्बूविशेषे। वनजाम, भूँइजाम। र.मा.। मं क्षुद्रजम्बू। कं किरुनेरिलु। तत्पर्य्यायाः,—नादेया काकजम्बुः नादेयिका शीतपत्रवा क्षत्रफला भृङ्गवल्लभा क्षत्रा भमरेष्टा शिंशिकभक्ष्या काष्ठजम्बुः। गुणाः—कषाया मधुरा श्लेष्मपित्तघ्नी क्षया संग्राहिणी क्षत्कण्ठदोषघ्नी वीर्य्यपुष्टिदा च। रा.नि.व.११।

भूमिजम्बूका। स्त्री । नागरङ्गवृक्षे। नारङ्गलेबू गाछ। क्षुद्रजम्बूवृक्षे। अम.।

भूमिदण्डा। स्त्री। मल्लिकापुष्पवृक्षे। वै.निघ.।

भूमिधात्री। स्त्री । भूम्यामलक्याम्। भूँई आमला।

भूमिनिम्बः। पुं । भूनिम्बे । चिरातो।

भूमिपिशाचः। पुं। तालवृक्षे। हारा.।

भूमिपुत्रः। पुं । श्योणाके। वै.निघ.।

भूमिमण्डः। पुं । आस्फोतकलतायाम्। अष्टपादिका इति लोके। मदनमाली, शंपरमाली। र.मा.। [याम्। रा.नि.व.१०।

भूमिमण्डपभूषणा। स्त्री । माधवीलता-

भूमिमण्डा। स्त्री। शारदमल्लिकायाम्। र.मा.।

भूमिरुहः। पुं । वृक्षे।

भूमिलग्ना। स्त्री । शुक्लगोकर्ण्याम्। शुक्लअपराजिता। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमिलता । स्त्री । शङ्खपुष्पीलतायाम् । वै.निघ । किच्चुलकायाम् । केँचो । भैष.वीर्य्यस्तम्भे । च.द. द्रव्य.चि. ।

भूमिलवणम् । क्ली । मृत्तिकालवणे । सोरा । वै.निघ. ।

भूमिलाभः । पुं । मृत्यौ ।

भूमिलेपनम् । क्ली । गोमये । हे.च. ।

भूमिवल्ली । स्त्री । मार्कण्डिकालतायाम् । भुँई आमला, काँकरोलविशेष । भा. । See मार्कण्डिका । [व.१९ ।

भूमिशयः । पुं । वनचटके । छातार । रा.नि.

भूमिशयवर्गः । पुं । बिलवासि जीवसमूहे । तद्यथा:,—"श्वेतः श्यामश्चित्रपृष्ठः कालकः काकलीमृगः । कुटिका चिल्लको भेको गोधा शल्यक-गण्डकौ ॥ कदली नकुलः श्वाविदिति भूमिशया: स्मृताः ॥"

भूमिषण्डः । पुं । शारदमल्लिकायाम् । काँठमल्लिका । रत्ना. ।

भूमिसम्पुटः । पुं । शरावादौ । वै.निघ. । कास.चि. ।

भूमिसरः । पुं । श्यामाकवृक्षे । वै.निघ. ।

भूमि(मौ)सहः । पुं । शाकवृक्षे । हिं भुंरसह । गुणौ—शीतलः रक्तपित्तघ्नः । "भूमीसही वारदातुर्वरदातुः खरच्छदः । भूमिसहस्तु शिशिरो रक्तपित्तप्रसादनः ॥" भा. ।

भूमिस्पृक् । पुं । मानुषे । मे. । अन्ने । खड्गे । श.र. ।

भूमिस्फोटः । पुं । भूच्छत्राके । भुँइछातू ।

भूम्याङ्गु(ङ्गु)ल्यम् । क्ली । खनामख्यातचुपे । हिं भुँइतखड् । कासवदा, एलहुड़ि इति देशविशेषे ख्यातम् । गुणाः—तिक्तरसं ज्वरकुष्ठामसिध्महरञ्च । रा.नि.व.४ ।

भूम्यामलकी (ली) स्त्री । भूधात्राम् । भुँइ आमला । हिं भद्र आंवरा । मद्रा भूयांवली । कं आरुनेल्लि । तत्पर्य्यायाः,—बहुपुष्पी लड़ा अध्यण्डा तालिः तामलकी अजटा सूक्ष्मफला क्षेत्रामलकी वितुन्नकः झटा अजझटा शिवा अफला अमला मला झाटा झाटामला झाटिका अमलजझटा तालो तमालिका तमालो उच्चटा दृढ़पादी वितुन्ना वितुन्निका भूधात्री चारटी हृष्या विषघ्नी बहुपत्रिका बहुवीर्य्या अहिभयदा विश्वपर्णी हिमालया अरुहा वीरा । गुणाः—कषायास्तिक्तमधुरा हिमा पित्तासमेहदाहतृष्णाकासकफपाण्डुमूत्राघातक्षतनाशिनी । रा.नि.व.५ । सुषल्याम् । तालमूली । प.मु. । [व.२३

भूम्याहुली । स्त्री । अपराजितायाम् । रा.नि.

भूम्याहुल्यम् । क्ली । खनामख्यातवृक्षभेदे । हिं भुञौतखड़ । तत्पर्य्यायाः,—कुष्ठकेतुः मार्कण्डीयं महौषधम् । गुणाः—कटुतिक्तत्वं ज्वरकुष्ठसिध्मानाशित्वञ्च ।

भूम्युदराश्रया । स्त्री । मूषिककर्णीलतायाम् । मूषाकर्णीलता । वै.निघ. ।

भूयुक्ता । स्त्री । भूमिखर्ज्जूर्य्याम् ।

भूरि । क्ली । सुवर्णे । अम. ।

भूरिगः (गः) । पुं । गर्द्दभे । रा.नि.व.१९ ।

भूरिगन्धा । स्त्री । सुरानामगन्धद्रव्ये । मूर्वा मांसी । रा.नि.व.१२ ।

भूरिचन्द्रः (तेजाः) । पुं । सुवर्णे । रा.नि.व. १३ ।

भूरिचला । स्त्री । अतिविषायाम् ।

भूरिदुग्धा । स्त्री । वृश्चिकालीवृक्षे । बिछाति गाछ । रा.नि.व.९ ।

भूरिधरः । पुं । गर्द्दभे । रा.नि.व.१९ ।

भूरिनिष्कम् । क्ली । स्वर्णे । रा.नि.व.१३ ।

भूरिपत्रः । पुं । ऊषरवृक्षे । ऊषरतृण । रा.नि.व.८ ।

भूरिपलितदा । स्त्री । पाण्डुरफलीवृक्षे ।

भूरिपुष्पा । स्त्री । शताह्वाचुपे । शुल्फा । रा.नि.व.४ ।

भूरिप्रेमा (न्) । पुं । चक्रवाकपक्षिणि । रा.नि.व.१९ ।

भूरिफली । स्त्री । पाण्डुरफल्यां । रा.नि.व.५ ।

भूरिफेना । स्त्री । चर्म्मकषायां । र.मा. । सागुवृक्षे । वै.निघ. ।

भूरिबला । स्त्री । अतिबलायाम् । रा.नि.व.४ ।

भूरिमञ्जरी । स्त्री । श्वेततुलसीवृक्षे । रा.नि. व.१० ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूरिमल्ली। स्त्री। अम्बष्ठायां। रा.नि.व.४।
भूरिमहो। स्त्री। गवि।
भूरिमायः (युः)। पुं। शृगाले। अम.। स्त्री। (या.युः)। शृगाल्याम्। रा.नि.व.१९।
भूरिमूलिका। स्त्री। अम्बष्ठायां। वै.निघ.।
भूरिरसः। पुं। इक्षुवृक्षे। भा.।
भूरिलग्ना। स्त्री। श्वेतापराजितायाम्। वै.निघ.।
भूरुण्डो। स्त्री। हस्तिशुण्डीवृक्षे। हातिशुँड़े। अम.। महाकरञ्जे। आदित्यभक्तायाम्। वै.निघ.।
भूरुहः। पुं। वृक्षे। शु.मा.। अर्जुनवृक्षे। शालवृक्षे। वै.निघ.। क्ली। मौक्तिके।
भूरुहा। स्त्री। मांसरोहिण्याम्। दूर्व्वायाम्। वै.निघ.। [चि.।
भूरोहः। पुं। किञ्चुलुके। केँचो। भेष.भग.
भूर्ज्जः (पत्रः, वृक्षः)। पुं। (Betula bhojpattra.) The birch. स्वनामख्यातवृक्षे। शाकपादः, फटक इति हिमाचलदेशे प्रसिद्धः। भुज्जिपत्र, भोजपत्र। हिं भूजपत्र। वम्. भूर्ज्जपत्र। तत्पर्य्यायाः,—कृदपत्रः वल्कदुमः भूर्ज्जपत्रः सुकर्म्मा चित्रत्वक् विन्दुपत्रः रक्तापत्रः विचित्रकः भूतघ्नः मृदुपत्रः मृदुचर्म्मि ग्रैवेन्द्रस्यः चर्म्मद्रुमः कृतपत्रः शिविः स्थिरच्छदः मृदुत्वक् दलनिर्म्मोकः पत्रकी विद्यादलः पत्रपुष्पकः भुजः बहुपटः बहुतकः मृदुच्छदः बहुवल्कलः भूजः चर्म्मी। र.मा.। गुणाः—कटुकषायोष्णः भूतरक्षाकरः विदीषघ्नः पथ्यश्च। रा.नि.व.९। कर्णरुक्पित्तरक्तघ्नः मेदोविषहरश्च। भा.।
भूर्ज्जग्रन्थिः। पुं। तद्वृक्षग्रन्थौ। च.सू.३अ.२ प्रदेहः। "ग्रन्थिश्च भौर्ज्जः।"
भूर्ज्जपत्रकः। पुं। शाखोटवृक्षे। शोंड़ागाछ। रा.नि.व.९।
भूर्भूरिका (री)। स्त्री। धूमस्याम्। डा'न बड़ी।
भूलग्ना। स्त्री। शङ्खपुष्प्यां। रा.नि.व.३।
भूलता। स्त्री। किञ्चुलुके। हे.च.।
भूवदरी। स्त्री। क्षुद्रकोल्याम्। शेत्राकुल। हिं झड़बेर। तत्पर्य्यायाः,—चित्रिवदरी वदरफली बदरवल्ली वल्लीबदरी बहुकलिका लघुबदरी सूक्ष्मबदरी। गुणाः,—मधुराम्ला रुच्या दीपनी पाचनी पथ्या कफवातनाशिनी रक्तपित्तवर्द्धिनी च।
भूशमी। स्त्री। क्षुद्रशमीवृक्षे। वै.निघ.।
भूशयः। पुं। बिल्वासिञ्जनुसावे, गोधानकुलादौ। गुणाः—गुरुः उष्णः मधुरः स्निग्धः वातघ्नः शुक्रलश्च। राजः.।
भूशेलुः। पुं। भूकर्बुदारे। भुँइचाल्ता। रा.नि.व.११। [वै.निघ.।
भूषणार्हम्। क्ली। स्वर्णे। मौक्तिके। प्रवाले।
भूषि(सु)ता। स्त्री। अङ्कोलवृक्षे। आँकोड़ गाछ। वै.निघ.।
भूस्तृणः। पुं, क्ली। गन्धतृणे। गन्धमाचेति सुक्ता.। गन्धतृण। "सौगन्धिकं भूस्तृणकः।" गुणाः—"भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रेचनं लघु। विदाहि दीपनं रुच्यमनेत्र्यं सुखशोधनम्। अहृद्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम्॥" भा.म. ३भ.मू.घा.चि.।
भूस्थः। पुं। गण्डूपद्याम्। मनुष्ये। वै.निघ.।
भूस्पृक्। पुं। मानुषे। हे.च.।
भूस्वेदः। पुं। घनाश्मना स्वेदविशेषे। प्रस्तरस्वेद। विधिः—शयानस्य प्रमाणेन घनाश्मश्लक्ष्णां शिलां। तापयित्वा मारुतघ्नैर्दारुभिः संप्रदीपितैः। अपोह्य सर्व्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा। तां शिलामथ कुर्व्वीत कौशेयाविकसंस्तराम्। तस्यां स्वभ्यक्तसर्व्वाङ्गः स्वपन् स्विद्यति ना सुखम्॥" च.सू.१४अ.।
भूच्चित्। पुं। शूकरे। त्रिका.।
भृकुटी। स्त्री। मण्डूकजातीयकीटे। सु.कल्प. ८अ.। See कौटः।
भृगु(ङ्ग)जा। स्त्री। भार्य्यां। रा.नि.व.६। वै.निघ.जीर्णज्व.चि.लवङ्गादिकषाये, श्वास.चि. सिंह्यादिकषाये।
भृगुभवा। स्त्री। भार्य्यां। रा.नि.व.६।
भृगूद्भवा। स्त्री। भार्य्यां। रा.नि.व.६।
भृङ्गम्। क्ली। लवणे। गुड़त्वक्। प.मु.। शि. यो.अर्श.चि.। भैष.बाल.चि.। "गुरुशीभृङ्गनिशाकरः।" अम्बके। रा.नि.व.१३। च.द.रा.य.चि. लवङ्गाद्यचूर्णे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भृङ्गः। पुं। भृङ्गराजे। भीमराज। रा.नि.व.६। च.द.बाल.रो.चि। र.सा.स.चुधावतीगुर्ब्या। भमरे। र.सा.। पक्षिविशेषे। फिङा वा भीमराज पाखी। रा.नि.व.२३। मांसगुणाः—मधुरं स्निग्धं कफ-शुक्रवर्द्धनञ्च। रा.नि.व.१७। भृङ्गरीले। भीमरूल। ग.र.।

भृङ्गकः। पुं। धूम्राटपक्षिणि। भृङ्गराजपक्षिणि। फिङा वा भीमराज पाखी। ग.र.।

भृङ्गचुल्लो। स्त्री। भृङ्गाह्वायाम्। मं भमरमालि। कं उष्णुवक्रे। गुणाः—कटूष्णा तिक्ता दीपनरोचनी च। रा.नि.व.७।

भृङ्गजम्। क्ली। अगुरुकाष्ठे। र.सा.।

भृङ्गजा। स्त्री। भार्ग्याम्। रा.नि.व.६।

भृङ्गपर्णिका। स्त्री। सूक्ष्मैलायाम्। ग.च.।

भृङ्गप्रियः। पुं। धूलीकदम्बे। रा.नि.व.९।

भृङ्गप्रिया। स्त्री। माधवीलतायाम्। रा.नि. व.२०। [निघ.।

भृङ्गबन्धुः। पु। कुन्दवृक्षे। कदम्बवृक्षे। वै.

भृङ्गमारिः (री)। स्त्री। कैविकापुष्पवृक्षे। रा.नि.व.१०। See कैविका।

भृङ्गमूलिका। स्त्री। भृङ्गाह्वायाम्। भ्रमर-मालौ रा.नि.व७।

भृङ्गमोही (ह्नि)। पुं। चम्पकवृक्षे। रा.नि. व.१०। स्वर्णचम्पके। वै.निघ.।

भृङ्गरजः (जाः)। पुं। भृङ्गराजे। भा.म.४ भ.कर्णरो.चि.। "प्रस्थं भृङ्गरजस्य च।" अ.टी.भ.।

भृङ्गरा। स्त्री। भृङ्गराजे। केशराजे। हिं भांरा। भा.२भ.।

भृङ्गराजः। पुं। (Wedelia calendulacea. Syn. C. Verbesina.) खनामख्यातपत्रशाकविशेषे। भीमराज। हिं भाङ्गरा, भेंगरिया। मं पिवलमाका। तें गुण्टकलगरचेट्टु। वम्. पिवलभांरा। तत्पर्य्यायाः,—भृङ्गः पत्रङ्गः मार्कवः मार्कः मार्कवः नागमारः पररुः भृङ्गसोदरः केशरञ्जनः केश्यः कुन्तलवर्द्धनः अङ्गारकः एकरजः करञ्जकः भृङ्गरजः भृङ्गारः अजागरः मर्करः भृङ्गाह्वः पितृप्रियः। गुणाः—कटुस्निक्तः रुच्यः उष्णः वातकफघ्नः केश्यः त्वच्यः कृमिश्वासकास-शोथामपाण्डुघ्नः रसायनो दन्त्यः बल्यः कुष्ठनेत्र-शिरोरोगघ्नश्च। भा.। भमरे। भीमराजपक्षिणि। मे.। अयं प्रतुदः कषायः मधुरः रुच्यो वातजनकश्च। सु.सू.४६अ.। केशराजे। केशराज। नीलभृङ्ग-राजे। धूम्राटपक्षिणि। फिङे। दारुचिनीति ख्याते सुगन्धद्रव्ये। वै.निघ.।

भृङ्गरि(री)टः। पुं। लौहे। रस.र.रसायने।

भृङ्गरोलः। पुं। कीटविशेषे। भीमरूल। विका.। तत्पर्य्यायाः,—विषसृक्का वरोलः तृणषट्पदः विषशूकः विषशृङ्गी।

भृङ्गवल्लभः। पुं। धाराकदम्बे। केलिकदम्बे। भूकदम्बे। कुकशिमा। रा.नि.व.९।

भृङ्गवल्लभा। स्त्री। भूमिजम्बूवृक्षे। वनजाम। रा.नि व.११। तरणीपुष्पवृक्षे। रा.नि.व.१०।

भृङ्गवान्तम्। क्ली। मधुनि।

भृङ्गवृक्षः। पुं। भृङ्गराजवृक्षे। भीमराज। भा.म.४भ.मुखमुण्डितिका.चि.। "खरसैर्भृङ्गवृक्षा-णाम्।"

भृङ्गसुहृत्। पुं। कुन्दपुष्पवृक्षे। वै.निघ.।

भृङ्गसोदरः। पुं। केशराजे। केशुर्ते। विका.। [वै.निघ.।

भृङ्गा। स्त्री। भृङ्गराजे। त्वचि। दारुचिनि।

भृङ्गानन्दा। स्त्री। यूथिकायाम्। श्वेतजूँई। रा.नि.व.१०।

भृङ्गापत्रः। पुं। कर्पूरे।

भृङ्गाभीष्टः। पुं। आम्रवृक्षे। क्ली। आम्रमुकुले। आम्रफले। रा.नि.व.११।

भृङ्गारम्। क्ली। लवङ्गे। स्वर्णे। रा.नि.व.१२। १३। पुं। भृङ्गराजे। जटा.। नालमुखजलपात्र-विशेषे। गाडू। च.सू.१५अ.।

भृङ्गारकः। पुं। भृङ्गराजवृक्षे। वै.निघ.।

भृङ्गारिः। स्त्री। कैविकापुष्पवृक्षे। भमरमारि-वृक्षे। रा.नि.व.१०। पुं। भृङ्गराजे। क्ली। लवङ्गे। [हे.च.।

भृङ्गारिका (री)। स्त्री। झिल्लीकीटे। अम.।

भृङ्गार्कः। पुं। भृङ्गराजवृक्षे। वै.निघ.।

भृङ्गाह्वः। पुं। भृङ्गराजवृक्षे। भीमराज। जीवके। रा.नि.व५। लवङ्गे। वै.निघ.।

भृङ्गाह्वा। स्त्री। मूलशाकविशेषे। मं भमर-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माली। कं उष्णुशके। अड़वीक्षीर इति कीर्त्तने। गुणाः—कटूष्णा तिक्ता दीपनरोचनी च। रा.नि. व.७।

भृङ्गिः। पुं। भृङ्गराजे। अतिविषायाम्। वै. निघ.२भ.अ.सा.चि.महारसे।

भृङ्गिका। स्त्री। इन्द्रगोपकीटे। वै.निघ.।

भृङ्गिणी। स्त्री। वटीवृक्षे। रा.नि.व.११।

भृङ्गि(ङ्गे)रिटिः। स्त्री। भृङ्गाम्। टिका.।

भृङ्गी। स्त्री। अतिविषायाम्। आतईच। वटीवृक्षे। रा.नि.व.११। भङ्गायाम्। भाङ्। वै.निघ.२भ.अन्तकज्व.वि. गुण्ठ्यादिः। तन्नामकमक्षिकायाम्। कुमिरे पोका। इन्द्रगोपकीटे। वै.निघ.। पुं। (इन्)। वटवृक्षे। रा.नि.व.११।

भृङ्गीगृहम्। क्ली। भृङ्गीमक्षिकागृहे। कुमिरे चाक। वै.निघ.२भ.र.पि.चि.नस्ये।

भृङ्गीफलः। पुं। आम्रातकवृक्षे। रा.नि.व.११।

भृङ्गोरिटिः। पुं। भृङ्गराम्, वटीवृक्षे।

भृङ्गेष्टः। पुं। आम्रवृक्षे। वै.निघ.।

भृङ्गेष्टा। स्त्री। घृतकुमार्य्याम्। रा.नि.व.५। भार्य्यां। रा.नि.व.६। काकजङ्घावृक्षे। रा.नि. व.११। तरणीपुष्पवृक्षे। रा.नि.व.१०।

भृज्जनः। पुं। भर्ज्जनपात्रे। भाजना खोला।

भृष्टिका। स्त्री। श्वेतगुञ्जायाम्।

भृशङ्गवः। पुं। नासारोगभेदे। लक्षणम्— "तीक्ष्णघ्राणीपयोगार्द्धरश्मिसूक्ष्मरजादिभिः। वातकोपिभिरन्यैर्वा नासिकातरुणास्थनि। विघट्टितेऽनिलः क्रुद्धो रुद्धः श्लेष्माटकं व्रजेत्। निहन्तः कुरुतेऽत्यर्थं क्षवथुं स भृशङ्गवः॥" वा.उ.१९अ.।

भृशपत्रिका। स्त्री। महानील्याम्। रा.नि.व.४।

भृषत्। पुं, स्त्री। पाषाणे। श.र.।

भृष्टः। वि। भर्ज्जिते। भाजा। हिं.च.।

भृष्टकुलत्थः। पुं। भर्ज्जितकुलत्थके। भाजा कुरति कलाय। स ज्वरे स्वेदोद्गमहरः। सा.को. ज्व.चि.।

भृष्टचणकः। पुं। भर्ज्जितचणके। छोला भाजा। मं फुटाभुंजा। कं हुरुकड़ले। गुणाः— रुच्यः वातघ्नः रक्तदोषकृत् वीर्य्योष्णः लघुः कफघ्नः श्लेष्मापहारकश्च। रा.नि.व.१६।

भृष्टतण्डुलः। पुं। भर्ज्जिततण्डुले। भाजा चाउल। गुणाः—"सुगन्धिः कफहा रुच्यः पित्तली भृष्टतण्डुलः।" राज.३प.।

भृष्टतण्डुलान्नम्। क्ली। भर्ज्जिततण्डुलस्यान्ने। भाजा चाउलेर भात। चालभाजा। मुड़ि। गुणाः—"भृष्टतण्डुलजञ्चान्नं लघु वह्निप्रदीपनम्।" राज.३प.।

भृष्टमत्स्यः। पुं। भर्ज्जितमत्स्ये। भाजा माछ।

भृष्टमांसम्। क्ली। घृतादिभर्ज्जितमांसे। भाजा मांस। गुणाः—विदाहि रक्तवातादिदोषकृच्च। रा.नि.व.१७।

भृष्टमृत्। स्त्री। अग्निभर्ज्जनेन दग्धमृत्तिकायाम्। पोड़ा माटी। च.सू.२अ.।

भृष्टयवः। पुं। भर्ज्जितयवे, धानायाम्। भाजा यव, छातु। चिपिटके। चिँड़े। प.मु.।

भृष्टान्नम्। क्ली। भृष्टतण्डुले। मुड़ि। श.च.।

भेकः। पुं। क्षणाभे। रस चि.३अ.। मण्डूके। व्याङ्। तत्पर्य्यायाः,—मण्डूकः वर्षाभूः शालूरः प्लवः प्लवगः प्लवङ्गमः दर्दुरः दर्दुरः वृष्टिभूः शालूरः व्यङ्गः शङ्खः नन्दनः गूढ़वर्च्चाः अजिह्वः अजिह्मः अलिम्बकः जिह्ममीक्षनः नन्दकः क्रतालयः रेकः अलिमकः मण्डः हरिः लूलकः लुलुकः शालूकः कटुरवः। तन्मांसगुणाः—सद्योबलकरं श्रमतृषादाहप्रमेहक्षयकुष्ठच्छर्द्दिघ्नञ्च। राज.। अपिच "मण्डूकः श्लेष्मलो नातिपित्तलो बलकारकः॥" भा.। [भ.हि.।

भेकटः। पुं। मत्स्यभेदे। भेटकी माछ।

भेकनिः (नी)। स्त्री। मत्स्यभेदे। भाङन माछ। मांसगुणाः—मधुरं शीतलं हृद्यं श्लेष्मकरं गुरु च। राज.।

भेकपर्णी। स्त्री। मण्डूकपर्ण्याम्। थूलकुड़ि। उत्. थालकुड़ि। सा.कौ. राज्ञादिलौहे। मञ्जिष्ठेति ह्वा:।

भेकभुक्। पुं। सर्पे। विश्वा।

भेकमूत्रम्। क्ली। मण्डूकमूत्रे। व्याङेर मूत। र.सा.स.वज्रशोधने।

भेकराजः। पुं। महाभेके। भृङ्गराजे। वै.निघ.।

भेकी। स्त्री। मण्डूकपर्ण्याम्। थूलकुड़ि। र.मा.। भेकपद्याम्। अम.।

भेटुलिः। पुं। वाममस्ये। सु.सू.७अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेड्रः। पुं। मेषे। त्रिका.।

भेड़ः (कः)। पुं। मेषे। हे.च.। पद्मबीजे। तन्नामकतन्त्रकारे। See तन्त्रकारः।

भेड़ा (ण्डा)। स्त्री। स्वनामख्यातवृक्षे। मं भेड़ु। कवंड़े। गुणाः—अक्षरसा उष्णा ग्राहिणी अर्शोविकारिणी च। रा.नि.व.४। पद्मबीजे। रा. नि.व.१०।

भेड़ी। स्त्री। मेष्याम्। भेड़ी।

भेदः। पुं। भञ्जने। भञ्जनवत्पीड़ायाम्। विदारणवद् व्यथायां। मा.नि.। विरेके। जोलाप।

भेदकः। त्रि। विरेचके। पुं। अम्लवेतसे। वै.निघ.।

भेदनम्। क्ली। छिद्रणे। रा.नि.व.६। वायुजन्यव्रणवेदनायाम्। सु.सू.२२अ.। त्रि। भेदके, अवद्धं बद्धं वा मलादिकं पिण्डितम् भित्वाधः पातयति, यथा कटुक्यादि। आशयावदारणे। च.सू. १८ अ.। पुं। अम्लवेतसे। प.मु.। रा.नि. व ६। शूकरे। रा.नि.व.२९। भल्लातके।

भेदन(नि)कः। पुं। जोरके। वै.निघ.।

भेदनीयवर्गः। पुं। भेदकमहाकषायवर्गे। यथा—"सुवर्चार्कौरुबूकाग्निमुखोचिवाचितकचिरबिल्वशाङ्गेष्टकुलादनाखर्पराश्चौरिण्य इति दशमानि भेदनीयानि भवन्ति।" तेऊड़ी, श्वेतार्क वा रक्तार्क, एरण्ड, विषलाङ्गलि, दन्ती, चित्रक, करञ्ज, श्वेतवूहा, कटुकी, सोणाथिरुई। च.सू.४अ.।

भेदाग्नी (इन्)। पुं। प्रतुदपक्षिविशेषे। गुणाः—"सर्व्वदोषकरस्तेषां भेदाग्नी मलदूषकः।" सु. सू.४६अ.।

भेदिज्वराङ्कुशः। पुं। ज्वराधिकारे रसः। "रसस्य द्विगुणं गन्धं गन्धतुल्यञ्च टङ्कणं। रसतुल्यं विषं योज्यं मरिचं पञ्चधा विषात्। कट्फलं दन्तिबीजञ्च प्रत्येकं मरिचान्वितं। ज्वराङ्कुशो रसो श्लेष्मः चूर्णयेद्यामसाचकं। वटिकां कारयेद्धीमान् एकगुञ्जाप्रमाणिकाम्।" रस.कौ.।

भेदिनी। स्त्री। कृष्णजीरके। रा.नि.व.६।

भेदी (इन्)। पुं। अम्लवेतसे। रा.नि.व.६। त्रि। भेदकारके। [रोगे)। सु.सू.५अ.।

भेद्यम्। क्ली। भेदार्हे, भेदनीये (विद्रध्यादौ

भेरुण्डम्। क्ली। गर्भधारणे। श.र.। त्रि। भयानके।

भेषजम्। क्ली। औषधे। रा.नि.व.२०। तच्च द्विविधं—"स्वस्थस्यौजस्करं किञ्चित् किञ्चिदार्त्तस्य रोगनुत्।" च.सू.१अ.। कृष्णजीरके। लाव-पक्षिणि। जटा.।

भेषजकल्पः। पुं। औषधयोजनायां। ते च कल्पा मदनादयः। वा.कल्प.६अ.।

भेषजाङ्गम्। क्ली। औषधानुपाने। श.च.।

भैमी। स्त्री। महाचञ्चाह्वे। भूतराजे।

भैरवीवचा। स्त्री। स्वनामख्यातवचायां। शुक्ल-वच। प.मु.।

भैषजम्। क्ली। औषधे। रा.नि.व.२०।

भैषज्यसारः। पुं। उपेन्द्रभिषक्कृतसंग्रहे।

भोगः। पुं। शालिधान्ये। प.मु.। सम्पूर्णाहारे। रा.नि.व.२०। अहिफणायाम्। सर्पशरीरे। पालने। त्रिका.। क्रीड़े। रा.नि.व.१८। सर्पे। देहे। माने। श.र.।

भोगगृहम्। क्ली। वासगृहे। हे.च.।

भोगधरः। पुं। सर्पे। वै.निघ.।

भोगपिशाचिका। स्त्री। क्षुधायाम्। हारा.।

भोगवती। स्त्री। शुक्लवचायाम्। वै.निघ.।

भोगवान्। पुं। सर्पे। मे.।

भोगावासः। पुं। वासगृहे। हारा.।

भोगिगन्धिका। स्त्री। सर्पगन्धायां। वै.निघ.।

भोगिभुक्। पुं। गरुड़े। मयूरे। वै.निघ.।

भोगिवल्लभम्। क्ली। श्रीखण्डचन्दने। प.मु.।

भोगी। स्त्री। सर्पिण्याम्। सर्पकङ्कालिका। रा.नि.व.५। गौ (इन्) पुं। सर्पे। अम.।

भोग्यम्। क्ली। धान्ये। रा.नि.व.१६।

भोग्यार्हम्। क्ली। शालिधान्ये। रा.नि.व.१६।

भोजनम्। क्ली। कठिनद्रव्यस्य गलाधःकरणे। अम.। पादोनाहारे। "पादोनं स्याद्भोजनम्।" रा.नि.व.२०। भोजनानन्तकर्त्तव्यता—"भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते। अचिरेणैव तद्वारि तिमिराणि व्यपोहति। भुक्त्वाचम्य करं वामं दत्त्वा कुक्षौ ततः पठेत्। भुक्तं माहेन्द्रहस्तेन वैश्वानरमुखेन च। गरुड़स्य च कण्ठेन समुद्रस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च वह्निना। वातापित्तभवितो येन पीतो येन मही-दधिः। यन्मया खादितं पीतं तदगस्त्यो जरिष्यते। सुखासीनः चणं तिष्ठेत् यावन्न लभते सुखं। भुक्ता पादशतं गत्वा वामपार्श्वेन संविशेत्। एवञ्चाधीगतं चान्नं सुखं तिष्ठति जीर्य्यति॥" राज.३प.। See आहारः, अन्नच्च।

भोजनकः। पुं। नदीभक्षातके। प.मु.।

भोजनपात्रम्। क्ली। स्वर्णादिनिर्म्मिताहार-पात्रे। पाकराजः।

भोजनार्हम्। क्ली। शालिधान्ये। प.मु.।

भोजनीयम्। क्ली। भोज्यद्रव्यमात्रे।

भोजराजः। पुं। अश्वशास्त्रकारे।

भोजराजशुल्कः। पुं। रससुधानिधिकारे।

भोज्यम्। क्ली। अष्टविधान्नान्यतमे अन्ने। रा. नि.व.२०।

भोज्यसम्भवः। पुं। शरीरस्थरसधातौ। शा.च.।

भोलिः। पुं। उष्ट्रे। विका.।

भौतिकम्। क्ली। सुक्तायां। रा.नि.व.१३।

भौमजलम्। क्ली। पृथ्वीजले। जाङ्गलानूप-साधारणभेदेन तेषां गुणाः जलशब्दे दृश्याः।

भौमरत्नम्। क्ली। प्रवाले। पला। रा.नि. व.१३।

भौमसर्पः। पुं। पृथ्वीजातसर्पे, दंष्ट्राविषे। सु.कल्प.३अ.।

भौमौषधम्। क्ली। पार्थिवौषधे। "सुवर्णं स-मलाः पञ्च लौहाः ससिकताः सुधा। मनःशिलालि मणयो लवणं गैरिकाञ्जने॥" च.सू.१अ.।

भौर्जग्रन्थिः। पुं। भूर्जग्रन्थौ। "ग्रन्थिश्च भौर्जः।" च.सू.३अ.।

भ्रंशः। पुं। वृक्षादिभ्यः पतने। भा.आगन्तु. ज्व.चि.।

भ्रमः। पुं। चक्रारूढस्येव ज्ञाने। भा.म.१भ. ज्व.चि.। "रजःपित्तानिलाद्भ्रमः।" वै.निघ. मूर्च्छा.चि.। मूर्च्छायाम्। भ्रान्तौ। कुन्दयन्त्रे। कूँद। विका.।

भ्रमणम्। क्ली। पर्य्यटने। हस्त्यादिभ्रमणगुणाः —वातकोपनत्वम् अङ्गस्थैर्य्यकरत्वं बलाग्निवर्द्धन-त्वञ्च। राज.।

भ्रमणी। स्त्री। जलौकायाम्। वै.निघ.।

भ्रमत्कुटी। स्त्री। तृणादिच्छदे। विका.।

भ्रमरः (कः)। पुं। भृङ्गे। अम.। बालमूषिके। इन्दुरछाना। मे.।

भ्रमरकीटः। पुं। कुम्भीरकीटे, अग्निप्रकृति-कीटे। सु.कल्प.८अ.।

भ्रमरच्छल्ली। स्त्री। भृङ्गच्छल्लीलतायाम्। रा.नि.व.७।

भ्रमरत्वचा। स्त्री। भ्रमरच्छल्याम्। वम्. भवरसाली। वै.निघ.।

भ्रमरप्रियः पुं। धाराकदम्बे। र.मा.।

भ्रमरबान्धवा। स्त्री। शुक्लजातीवृक्षे। वै. निघ.।

भ्रमरमारी। स्त्री। भ्रमरारिपुष्पवृक्षे। रा.नि. व.१०।

भ्रमरा। स्त्री। भृङ्गच्छल्लीलतायां। रा.नि.व.७।

भ्रमरातिथिः। पुं। चम्पकवृक्षे। चाँपा-गाछ। रा.नि.व.१०।

भ्रमरानन्दः। पुं। वकुलवृक्षे। रक्तास्फानवृक्षे। रक्तझाँटी। स्त्री। अतिशुक्लकपुष्पवृक्षे। रा.नि. व.१०।

भ्रमरारिः। पुं। पुष्पवृक्षविशेषे। भ्रमरमारी इति मालवे प्रसिद्धः। तत्पर्य्यायाः,—भ्रमरारिः भृङ्गमारिः भृङ्गारिः मांसपुष्पिका कुष्ठारिः भ्रमरी षष्ठीलता। गुणाः—तिक्तः वात(पित्त)श्लेष्मज्वरापहः श्वीथकण्डूकुष्ठव्रणविदोषघ्नश्च। रा.नि.व.१०।

भ्रमरालम्बः। पुं। भूतृणे। गन्धतृण। रा.नि.व.८।

भ्रमरी। स्त्री। जन्तुकायाम्। पुत्रदात्र्याम्। भ्रमर्य्याम्। गुडूचिकायाम्। रा.नि.व.२३। भ्रम-रारिपुष्पवृक्षे। रा.नि.व.१०।

भ्रमरेष्टः। पुं। पृथुशिम्बिशोणाकवृक्षे। बड़ सोंटा शोणा गाछ। रा.नि.व.९। स्त्री। भार्य्यायाम्। रा.नि.व.११।

भ्रमरोत्सवा। स्त्री। माधवीलतायाम्। रा. नि.व.१०।

भ्रमिः। स्त्री। मूर्च्छायाम्।

भ्रमिका। स्त्री। धातकीवृक्षे। वै.निघ.।

भ्रष्टगुदः। वि। गुदभ्रंशरोगिणि। च.द.।

भ्रस्थुः। पुं। नासारोगभेदे। निदा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्राजकः। पुं, क्ली। तन्नामकपित्ते। पित्तविशेष। शा.च.। तस्य स्थानं त्वक्। तस्य कर्म छायाप्रकाशकत्वम् अभ्यङ्गादिक्रियाणाञ्च पाचकत्वम्। सु.सू.२१अ.।

भ्रान्तः। पुं। पीतधुस्तूरवृक्षे। रा.नि.व.१०।

भ्रान्तिः। स्त्री। भमी। सा च रजःपित्तानिलजा भवति। "रजःपित्तानिलैर्भ्रान्तिः।" शार्ङ्ग. पू.६अ.।

भ्राम(मि)कः। पुं। सूर्य्यावर्त्ते। शृगाले। चुम्बकप्रस्तरे। मे.। कान्तलौहविशेषे। रा.नि.व.१३।

भ्रामरम्। क्ली। भ्रमराहृतमधुनि। नकुल.१३अ.। वृक्षसम्भवतलौहे। तदुक्तं यै स्निग्धाञ्जनगोलाभाः पुष्पासवपरायणाः। भ्रमरैर्जनितं तैस्तु भ्रामरं मधु भण्यते॥ गुणा.—मधुरं पित्तिघ्नं रुच्यं मुखजाड्यहरं श्वेतवर्णञ्च। रा.नि.व.१४। "शीतं कषायं मधुरं लघु स्यात् सन्दीपनं लेखनमेव शस्तं। संशोधनञ्च व्रणशोधनञ्च संरोपणं हृद्यतमञ्च वल्यं। त्रिदोषनाशं कुरुते च पुष्टिं कासे क्षये वा क्षतजे च कृच्छ्रे। हिक्काभ्रमे शीर्षगदीसनानां रक्तप्रदेहे सरलातिसारे। रक्तातिसारे च सपित्तरक्ते तृष्णोपहृत्पार्श्वगदेऽपि शस्तम्। नेत्रामये वा ग्रहणीगदे वा विषे प्रशस्तं भ्रमरैश्चितं यत्। भ्रामरं सघनं जाड्यभ्रमिघ्नं मधुरञ्च यत्। क्षौद्रं विशेषतो स्त्रीयं शीतलं लघु लेखनम्। भ्रामरं वृक्षसंस्थाने विटपे सारघं भवेत्। रन्ध्रे तु कीटरे वापि क्षौद्रं तत्र प्रशस्यते॥" अवि. १८ अ.। पुं। प्रस्तरभेदे। चुम्बक पाथर। मे.।

भ्रामरशर्करा। स्त्री। भ्रामरमधुकृतशर्करायाम्। गुणाः—भ्रामरमधुतुल्याः। रा.नि.व.१४।

भ्रामरी। स्त्री। पृथ्वीकदम्बलतायां। रा.नि.व.३। नकुल.१३अ.।

भ्रामितः। वि। रोगिणि। रा.नि.व.२०।

भ्रामिताक्षः। पुं। अक्षस्य वातव्याधिविशेषे। लक्षणं यथा—"वक्रः पक्ष्मिकायेन मण्डलैर्यो विचेष्टते। मन्दयाक्षस्य दीनस्य भ्रामिताक्षो रजोहतः॥" ज.द.५५अ.।

भ्राष्टः। पुं, क्ली। भर्ज्जनपात्रे। भाजनाथोला। अम.।

भ्राष्ट्रजा। स्त्री। खर्परपोलिकायाम्। वै.निघ.।

भ्रुकुटिः। स्त्री। भ्रुवि। वै.निघ.।

भ्रुकुटीमुखः। पुं। दर्व्वीकरसर्पविशेषे। सु. कल्प.४अ.। See सर्पः।

भ्रूः। स्त्री। भ्रुवि। भ्रूकुं। वै.निघ.।

भ्रूणः (कः)। पुं। बालके। गर्भे। अम। क्लीवेरे। वाला। रस.र.तिक्तकवृत्ते।

म

मः। पुं। ब्रह्मणि। एका. कोषः। विषे। मे.।

मकरः। पुं। मत्स्यविशेषे। मकर। "मत्स्यानां मकरः श्रेष्ठो दीपनो वातनाशनः। रुचिप्रदः शुक्रकरश्चाश्मरीदोषनाशनः॥" अवि.२२अ.। तन्नामकाग्निप्रकृतिकोटे। सु.कल्प.८अ.।

मकरध्वजः। पुं। रसायनाधिकारे औषधविशेषे। "स्वर्णस्य भागो वङ्गस्य मौक्तिकं कान्तलोहकं। जातीकोषफलं रूप्यं कांस्यकं रससिन्दुरम्। प्रवालं कस्तुरी चन्द्रमभ्रकञ्चैकभागिकम्। स्वर्णसिन्दूरतो भागाश्चत्वारः कल्पयेद्बुधः॥' सुवर्ण २ भ. वङ्ग १ भ. मुक्ता १ भ. लौह १ भ. जायफल १ भ. जयित्री १ भ. रूपा १ भ. काँसा १ भ. रससिन्दूर १ भ. प्रवाल १ भ. मृगनाभि १ भ. कर्पूर १ भ, अभ्र १ भ. स्वर्णसिन्दूर ४ भ. र.सा.सं। स्वर्णसिन्दूरे।

मकरन्दः। पुं। मधुनि। प.मु.। कुन्दपुष्पे। कुन्दफूलेर गाछ। पद्मकेसरे। रा.नि.व.१०। क्लीं। किञ्जल्के। रा.नि.व.१०। आम्रभेदे। कोकिले। वै.निघ.। पुष्परसे। भा.।

मकरन्दजम्। क्ली। क्षीवेरे। वाला। प.मु.।

मकरन्दवती। स्त्री। पाटलपुष्पवृक्षे। श.च.।

मकरन्दवासः। पुं। धूलीकदम्बे। धोलाकदम्ब। रा.नि.व.९।

मकराकरः। पुं। कण्टककरञ्जे। श.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मकरी। पुं। सन्निपातज्वरविशेषे। [च.। ग.र.।

मकुरः (लः)। पुं। वकुलवृक्षे। कीरके। हे.

मकु(कू)लकः। पुं। दन्तीवृक्षे। अ.टी.र.। च.सू.२७अ.।

मकुष्टः (ष्ठः) (क्कः)। पुं। (Phaseolus aconitifolius.) वनमुद्गे। वनमूग। हिं सुहट, मोट, सुगानी। तें वनमुद्गचेट्टु। मकुष्ठक इति मालवदेशे प्रसिद्धः। तत्पर्य्यायाः,—मकुष्टः मयष्टः राजमुद्गः वनमुद्गः क्रमीलकः अरुष्टः अरण्यमुद्गः वल्लीमुद्गः। गुणाः—कषायः मधुरः रक्तपित्तघ्नः ज्वरदाहघ्नः पथ्यः रुचिकृत् त्रिदोषहरश्च। रा.नि.व.१६। "मरुक्पित्तकफवातहन्ता चोष्णः कषायी मधुरः प्रदिष्टः। ग्राही सृशीतो गुदकीलगुल्मं मकुष्ठकः सर्व्वगदान् निहन्ति॥" अग्नि.१५अ.। तत्सूपगुणाः—"मकुष्ठमूषोऽल्पबलः पाचनो दीपनो लघुः। चक्षुष्यो हृंहणो हृद्यः पित्तश्लेष्मास्रशोषनुत्॥" द्रव्यगुणः।

मकेरुकः। पुं। कृमिरोगे, पुरीषजकृमिविशेषे। च.वि.७अ.।

मक्कलः (ल्लः)। पुं। वातजशूलरोगे। गर्भमोचनान्ते वातशोणितजशूलान्तिविशेषे। हेंतांल व्यथा। लक्षणं—"वायुः प्रकुपितः कुर्य्यात्कुक्ष्यो रुधिरं स्रुतम्। सूतायां हृच्छिरोवस्तिशूलं मक्कलसंज्ञकम्॥" मा.नि.।

मक्कुलम्। क्ली। शिलाजतुनि। ग.र.।

मक्कोलः। पुं। खटिकायाम्। खड़ि। "मक्कोलो वर्णलेखा च कठिनी कक्खटी खटी।" त्रिका.।

मखप्रभुः। पुं। ब्रह्मसोमलतायाम्। वै.निघ.।

मखान्नम्। क्ली। पद्मबीजसदृशबीजे। हिं मखाना। "मखान्नं पद्मबीजाभं पानीयफलमित्यपि।" गुणाः—"मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत्।" भा.।

मगधम्। क्ली। पिप्पलीमूले। वै.निघ.अरिचि सूतादिगुल्याम्।

मगधजा। स्त्री। पिप्पल्याम्। पिपूल गाछ। वै.निघ.विज्वरचि.।

मगधजाफलम्। क्ली। पिप्पल्यां। पिपूल। च.द.गुल्मचि.भार्गीषट्पलकघृते।

मगधा। स्त्री। पिप्पल्यां। प.सु.। वै.निघ.२ भ.कर्णकज्वरचि.।

मगधोद्भवा। स्त्री। पिप्पल्यां। रा.नि.व.६। सि.यो.अग्निमान्द्यचि.।

मघम्। क्ली। औषधे। पुष्पविशेषे। ग.र.।

मघा (घो)। स्त्री। औषधविशेषे। धरणिः। धान्यविशेषे। मे.।

मघोनी। स्त्री। पूर्व्वदिशि।

मङ्कुरः। पुं। मकुरे।

मङ्गल्यच्छदा (च्छायः)। स्त्री, पुं। क्षुपवृक्षभेदे। पाकुड़ गाछ। रा.नि.व.११।

मङ्गल्यप्रदा। स्त्री। हरिद्रायाम्। शमीवृक्षे। वै.निघ.।

मङ्गला। स्त्री। शुक्लदूर्व्वायां। ग.र.। हरिद्रायां। रा.नि.व.६। नीलदूर्व्वायां। रा.नि.व.८। कारञ्जभेदे। ग.च.। मङ्गलागुरुणि। रा.नि.व.१२। चण्डी। दुर्गा। वाद्यमाणायाम्। वै.निघ.।

मङ्गलागुरु। क्ली। मङ्गल्यागुरुणि। रा.नि.व.१२।

मङ्गल्यम्। क्ली। दधनि। अम्लदधनि। मे.। स्वर्णे। सिन्दूरे। रा.नि.व.१३। कृष्णागुरुकाष्ठे। प.सु.। श्वेतखण्डचन्दने। श्वेत चन्दन। रा.नि.व.१२। पु। बिल्ववृक्षे। र.मा.। मसूरके। रा.नि.व.१६। जीवकचुपे। रा.नि.व.५। नारिकेलवृक्षे। कपित्थवृक्षे। रा.नि.व.११। रीठाकरञ्जे। रा.नि.व.९। अश्वत्थवृक्षे। मे.। जलमधूकवृक्षे। वै.निघ.।

मङ्गल्यकः। पुं। मसूरकलायै। भा.पू.१भ.धा.व.।

मङ्गल्यकुसुमा। स्त्री। शङ्खपुष्प्याम्। भा.।

मङ्गल्यनामधेया। स्त्री। जीवन्तीवृक्षे। जटा.।

मङ्गल्यपुष्पी। स्त्री। शङ्खपुष्प्याम्। वै.निघ.।

मङ्गल्या। स्त्री। चीडानामदेवदारुभेदे। प्रियङ्गौ। मङ्गलागुरुणि। रा.नि.व.१२। हैमपुष्प्यां। मसूरे। मूर्व्वायां। मुर्गी। र.मा.। दुर्गायां रा.नि.व.५।२३। शमीवृक्षे। रा.नि.व.८।२३। अधःपुष्प्यां। चोर काँटकि। गोरोचनायां। हरिद्रायां। दूर्व्वायां। प.सु.। शुक्लवचायां। रा.नि.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व.८। माषपर्ण्यां। रा.नि.व.३।२३। जीवन्ती-लतायां। वचायां। ऋद्धौ। रा.नि.नि.व.३।५ ६।२३। महाबलायां। रा.नि.व.२३। मल्लिका-पुष्पवृक्षे। मुद्गपर्ण्याम्। वै.निघ.।

मङ्गल्यागुरु। क्ली। स्वनामख्ये केदारदेशे प्रसिद्धागुरुणि। गुणाः—शीतलं गन्धाढ्यं योग-वाहिकञ्च। रा.नि.व.१२।

मङ्गल्याह्वा। स्त्री। वायमाणालतायाम्। रा.नि.व.५।

मङ्गुरः। पुं। मत्स्यविशेषे। मांगुर माछ। वै.निघ.।

मङ्ग(ङ्गु)णम्। क्ली। जङ्घावाणे। जांघिया। हारा.।

मच्छः। पुं। मत्स्यसामान्ये। श.र.।

मज्जकृत्। क्ली। अस्थनि। हे.च.।

मज्जगतज्वरः। पुं। तदाश्रितज्वरविशेषे। मज्जागतज्वर। लक्षणं यथा—"तमःप्रवेशनं हिक्का कासः श्वैत्यं वमिस्तथा। अन्तर्दाही महाश्वासः मर्म्मच्छेदश्च मज्जगे। मज्जगुक्ते क्रिया नीक्ता मरणं तत्र भाषितम्॥" वै.निघ.।

मज्जदमनी। स्त्री। वन्याककोटक्याम्। वै.निघ.।

मज्जनम्। क्ली। स्नाने। जटा.। मज्जायां। श.च.।

मज्जफलम्। क्ली। माजूफलमिति प्रसिद्धे वणिग्द्रव्ये। भैष.वाजी.।

मज्जमेहः। पुं। मज्जगत-मेहरोगविशेषे। "मज्जाभं मज्जमिश्रं वा मज्जमेही प्रमेहति।" मा.नि.।

मज्जरः। पुं। तृणविशेषे। मांजूर तृण। मं पवना। कं नृले। गुणाः—मधुरः धेनुदुग्ध-करश्च। रा.नि.व.८।

मज्जसमुद्भवम्। क्ली। शुक्रे। हे.च.।

मज्जा (म्)। पुं, स्त्री। वृक्षादेरन्तःसारभागे। गांर। अम.। अस्थ्नः गुह्यस्नेहभागे। स च जान्वस्थिमध्यगः तस्य कर्म्म पूरणम्। "स्नेहोऽस्थ्नः शुचिरेव स्यात् स मज्जा कथितो बुधैः।" भा. पाददारीचि.। "अस्थि यत् स्नाग्निना पक्वं तस्य सारो भवेद्घनः। यः स्नेहवत् पृथग्भूतः स मज्जेत्य-भिधीयते॥" इति स्वरूपम्। मज्जस्थानं यथा—"स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः।" भा.। तत्रीया मेदोधरा नाम, मेदोहि सर्व्व-भूतानामुदरस्थमस्थिषु महत्सु मज्जा भवति। सु.शा.४अ.। अस्थिसारे। आँटिर शाँस। रा.नि.व.१८। गुणाः—"यस्य यस्य फलस्येह वीर्य्यं भवति यादृशं। तस्य तस्यैव वीर्य्येण मज्जानमपि निर्द्दिशेत्॥" सु.सू. ४६अ.। मज्ज-गुणाः—"बलशुक्ररसस्नेहमेदोमज्जविवर्द्धनः। मज्जा विशेषतोऽस्थ्नाञ्च बलकृत् स्नेहने हितः॥" च.। वातघ्नी पित्तकफबलकरी मांसतुल्यगन्धरूपा च। कुम्भीरमहिषमज्जगुणाः—मधुरा वृंहणी बल्या च। मज्जसत्त्वगुणौ—श्लैष्मसुखत्वञ्च। राज.।

मज्जा(नु)गतम्। क्ली। काण्डभग्नमांसास्थि-भङ्गरोगे। "अस्थ्यवयवोऽस्थिमध्यमनुप्रविश्य मज्जान-मुन्नह्यति।" सुनि.१५अ.।

मज्जाजः। पुं। भूमिजगुग्गुलौ। रा.नि.व.१२।

मज्जामेहः। पुं। मज्जगतप्रमेहे। निदा.।

मज्जारजाः। पुं। गुग्गुलौ। वै.निघ.।

मज्जावहस्रोतः। पुं। मज्जधातुवाहिन्यां नाड्याम्। तस्य मूलम् अस्थीनि सन्धयश्च। च.वि. ५अ.।

मज्जारसः (सारः)। पुं। शुक्रे। रा.नि.व. १८। सप्तलायाम्। मनसांविशेष। वै.निघ.।

मज्जासारम्। क्ली। जातीफले। रा.नि.व.१२।

मञ्जिका। स्त्री। लक्षणाकन्दे। वकस्तियाम्। वै.निघ.।

मञ्चकपत्री / मञ्चिपत्रम् (त्री) स्त्री, क्ली। सुरपत्र्याम्। रा.नि.व.१०। गुणाः—तिक्ता उष्णा पित्तला विषघ्नी कफवातज्वरकास-क्रमिघ्नी। वै.निघ.।

मञ्चकाश्रयः। पुं। मचिकायाम्। मत्कुणे। रा.नि.व.१९।

मञ्जरम्। क्ली। मुक्तायां। श.र.। तिलकवृक्षे। श.र.। मञ्जर्य्यां। विका.।

मञ्जरिः। पुं। वल्लर्य्यां। अम.।

मञ्जरी (कः)। स्त्री, पुं। गन्धतुलस्यां। प.मु.। मुक्तायां। तिलकवृक्षे। श.र.। तुलस्यां। रा.नि. व.१९। वेतसलतायाम्। अशोकवृक्षे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जरीनम्रः। पुं। वेतसे। वेत। रा.नि. व.९।

मञ्जा। स्त्री। द्रन्ते। क्ष्माम्। हे.च.।

मञ्जिः (ञ्जी)। स्त्री। सञ्ज्ञायां। विका.।

मञ्जिफला। स्त्री। कदलीवृक्षे। विका.।

मञ्जिष्ठः (ष्ठा,ष्ठिका)। पुं, स्त्री। (Rubia cordifolia. Syn. R. Manjishtha´.) Indian madder. स्वनामख्याततलतायाम्। मञ्जिष्ठा। प.मु.। हिं वम्. मञ्जीठ, जिङ्गिनि। तें मञ्जिष्ठतीटी, तामवल्ली। ता. मञ्जिट्टी। फा. रनास। तत्पर्य्यायाः,—रक्तयष्टिः विकसा जिङ्गिः जिङ्गी समङ्गा कालमेषिका मण्डुकपर्णी भण्डिरी भण्डी भण्डीरी योजनवल्ली मण्डुका लतायष्टिः हेमपुष्पी काण्डीरा काण्डीरी योजनपर्णी कालमेघी काला रक्ताङ्गी भण्डिः भण्डिमः भण्डिका भण्डीतकी रसायनी गण्डीरी वस्त्ररञ्जिनी हरिणी रक्ता गौरी योजनवल्लिका विप्रा रोहिणी चित्रलता चित्रा चित्राङ्गी जननी विजया मञ्जुषा रक्तयष्टिका चर्विणी रागाङ्गी रागाढ्या कालभण्डिका अरुणा ज्वरहन्त्री क्षुद्रा नागकुमारिका, भण्डीरलतिका वस्त्रभूषणा। गुणाः—मधुरा कषाया उष्णा गुरुः व्रणमेहज्वरश्लेष्मविषनेत्ररोगघ्नी च। चोलयोजनी कौञ्ची सिंहली चेति तद्भेदाः। एताः सर्व्वा विलीमेन गुणोत्तरा ज्ञेयाः। रा.नि. व.६। सू.चि.१७ अ.। च.द.वि.ज्व.चि.लाक्षादितैले। "मञ्जिष्ठा सेन्द्रवारुणी।" पञ्चाघातकासलासु हिता मूत्रस्रोतोविशोधनी च। फलं यक्ष्मदोषहरं मूलं चर्म्मविवर्णताहरं तिलकालकघ्नञ्च। कश्चिद्व्यगुणः।

मञ्जिष्ठमेहः। क्लो। पित्तजन्यप्रमेहरोगे। अत्र रोगी मञ्जिष्ठोदकप्रकाशं मेहति। सु.नि.६अ.।

मञ्जिष्ठाद्यघृतम्। क्ली। शरीरव्रणाधिकारे घृतं। "मञ्जिष्ठां चन्दनं मूर्व्वां पिप्पलीं सर्पिर्विपाचयेत्। सर्व्वेषामग्निदग्धानामेतद्रोपणमिष्यते॥" रस.र.।

मञ्जिष्ठाद्यतैलम्। क्ली। क्षुद्ररोगाधिकारे तैलम्। "मञ्जिष्ठा मधुकं लाक्षा मातुलुङ्गं सयष्टिकं। कर्षप्रमाणैरेतैस्तु तैलस्य कुडवं पचेत्। आजं पयस्तद्विगुणं श्लक्ष्णैर्मृद्वग्निना पचेत्। नीलिकापिडकाव्यङ्गानभ्यङ्गादेव नाशयेत्॥" तिलतैलं॥०ग्र.। कल्कार्थं—मञ्जिष्ठा मधुकपुष्पं (महुल फूल) लाक्षा (लाशा) मातुलुङ्गमूलं (टाबामूल) यष्टिमधु प्र. २ तो. छागदुग्ध १ग्र.। रस,र.।

मञ्ज्ञगमना। स्त्री। हंस्याम्। रा.नि.व.१९।

मञ्ज्ञघोषः। पुं। कपोते। वै.निघ.। [१९।

मञ्ज्ञपाठकः। पुं। शुकपक्षिणि। रा.नि.व.

मञ्ज्ञुलः। पुं। जलरङ्कपक्षिणि। मे.। तित्तिरपक्षिणि। हरिणभेदे। अञ्जीरवृक्षे। वै.निघ.। क्ली। अञ्जीरे। आँजीर। राज.। स्त्री। मञ्जिष्ठायाम्।

मञ्ज्ञूषा। स्त्री। मञ्जिष्ठायां। रा.नि.व.६।

मट्ट(ड़)कः। पुं। शस्यविशेषे। भाड़ुरा। जटा.।

मठः। पुं। नखनामक वटकाकारपिष्टकभेदे।

मणिः (णी)। पुं, स्त्री। स्फटिकादिरत्ने, मुक्तादौ। विका.। गुणाः—"मणिरत्नं सरं शीतं कषायं स्वादु लेखनं। चक्षुष्यञ्च .....।" राज.। अजागलस्तने। मे.। शिरायाग्रन्थौ। सि.यौ.मूर्च्छाचि.। अंशे, भागे। भा.म.३भ.सूतोत्पत्त्यङ्ग.चि.। मणिबन्धे। हे.च.। योन्यग्रभागे। शब्.र.।

मणिकण्ठः। पुं। चासपक्षिणि। वै.निघ.।

मणिकाननम्। क्ली। माने। कण्ठे। शब्.र.।

मणिच्छिद्रा। स्त्री। मेदायां। प.मु.। रा.नि.व.५। महामेदायाम्। मज्जायाम्। वै.निघ.। ऋषभकौषधे। मे.। [व.१९।

मणितारकः। पुं। सारसपक्षिणि। रा.नि.

मणितुण्डः। पुं। वृषायाम्। वै.निघ.।

मणिपूरम्। क्ली। आमाशयकुक्षौ।

मणिबन्धः। पुं। करमूले। हातेर कब्जी। रा.नि.व.१८। भा.मधुरी.चि.।

मणिभावरः। पुं। सारसपक्षिणि। वै.निघ.।

मणिमन्थम्। क्ली। सैन्धवलवणे। रा.नि.व.६। वै.निघ.वास.चि.शिलाद्यवलेहे।

मणिमन्दिरम्। क्ली। मुक्ताग्रहे। झिणुक। वै.निघ.।

मणिरत्नम्। क्ली। हीरके। वै.निघ.।

मणिराग(ज)म्। क्ली। हिङ्गुले। रा.नि. व.१३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मणिरामः। पुं। ग्रन्थरत्नमालाकर्त्तरि।
मणिवरः। पुं। हीरकमणौ। शीरे। भा.।
मणिवोजः। पुं। दाड़िमवृक्षे। रा.नि.व.११। हीरके। वै.निघ.।
मणीचकम्। क्ली। चन्द्रवर्णरौप्ये। चान्दि रूपा। विका.। पुं। चन्द्रकान्तमणौ। वै.निघ.। मन्मथरङ्गपक्षिणि। माछराङा पाखी। हारा.।
मणोवकम्। क्ली। पुष्पे। हे.च.।
मण्टपो। स्त्री। क्षुद्रोपोदिकायां। रा.नि.व.७।
मण्टूरम्। क्ली। मण्डूरे। मण्डुर। वै.निघ.।
मण्ठः (कः)। पुं। वटकाकारपिष्टकविशेषे। हिं माँड़ा। यथा—"समितां मर्द्दयेदाज्यं जलेनापि च सन्नयेत्। अस्यास्तु वटकङ्कृत्वा पचेत्सर्पिषि नीरसम्। एला-लवङ्ग-कर्पूर-मरिचाद्यैरलङ्कृते। मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत्। अयमकारः संसिद्धो मण्ठ इत्यभिधीयते॥" गुणाः—"मण्ठस्तु हृंहणो हृद्यो बल्यः सुमधुरो गुरुः। पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः॥" रा.नि.व.१७।
मण्डम्। क्ली, पुं। सारे। पिच्छे। दध्याद्यग्रसरे। माड़, दुग्धेर भाग। क्ली। मस्तुनि। मे.।
मण्डः। पुं। एरण्डवृक्षे। प.मु.। यवादि सावितसिक्थकरहितद्रव्यविशेषे। मण्ड, माड़। "सिक्थकैरहितो मण्डः।" स च चतुर्द्दशगुणाम्बु-सावितः सिद्धः अर्थात् तण्डुलपरिमाणापेक्षया ऊनविंशगुणजले सिद्धः। "मण्डश्चतुर्द्दशगुणे।" च.द.ज्व.चि.। "जले चतुर्द्दशगुणे तण्डुलानां चतुष्पले। विपचेच्छ्रावयेन्मण्डः सभक्तो मधुरो लघुः। नीरे चतुर्द्दशगुणे सिद्धो मण्डस्त्रसिक्थकः॥" प.प्र.२खं.। गुणाः—"तण्डुलानां सिक्थहीना पेया वाह्निप्रदीपनी। ग्राहिणी लघुशीता च पाचनी वातलोमनी। धातूनाञ्चैव नाड़ीनां मृदुत्वस्वेदकृन्मता। तृष्णाश्रमाम्लरोपित्तातिसारकफदोषहा॥" वै.निघ.। अष्टगुण-वारिसिद्धे मण्डे। स चाग्निमान्द्ये हितः। सि. यो.अग्निमा.चि.। गुणाः—"तृड्दोषघ्नो बस्तिविशो-धनश्च प्राणप्रदः शोणितवर्द्धनश्च। ज्वरापहारी कफपित्तहन्ता वायुं जयेदष्टगुणो हि मण्डः॥" राज.३प.। भेके। धूनके। शाकभेदे। मे.। मस्तुनि। सारे। पिच्छे। हे.च.।
मण्डकः। पुं। मण्ड। जातीपुष्पवृक्षे। पिष्टक विशेषे। हिं माड़ा। "वारिणा कोमलाङ्कृत्वा समितां साधु मर्द्दयेत्। हस्तचालनया तस्या लोष्टीं सम्यक् प्रसारयेत्। अधोमुखघटस्थैतां विस्तृताम्रचिपिटैहिः। मृदुना वह्निना साध्यः सिद्धो मण्डक उच्यते॥ दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः। अथवा सिद्धमांसेन सतक्रवटकेन वा...॥" गुणाः—"मण्डको हृंहणो हृद्यो बल्यो रुचिकरो भृशं। पाकेऽपि मधुरो ग्राही लघु-र्दोषत्रयापहः॥" भा.। लोष्टी—लेची।
मण्डनः। पुं। मधुमाधवीलतायाम्। वै.निघ. २भ.शैलूषादिचूर्णे।
मण्डपः। पुं। माधवीलतायाम्। वै.निघ.।
मण्डपा। स्त्री। निशाख्यां। रा.नि.व.१६।
मण्डपारोहः। पुं। सुखालौ। रा.नि.व.७।
मण्डपो। स्त्री। क्षुद्रपर्पोपोदक्यां। क्षुद्रपत्र पूँई। रा.नि.व.७।
मण्डयन्तः। पुं। अन्ने। उणा.।
मण्डयन्ती। स्त्री। नार्य्याम्।
मण्डरी। स्त्री। घुर्घुरिकायाम्। हारा.।
मण्डल(क)म्। क्ली। पिटकवन्मण्डलयुक्तचर्म्म-रोगे। चाका दाग। कोठरोगे। शीतपित्तरोगे। रा.नि.व.२०। मा.नि.। नखीनामगन्धद्रव्ये। ग्र.च.। पुं। उदर्दरोगे। सर्पभेदे। वृत्तेऽङ्गे व्रण-भेदे। "मण्डलं वेष्टनाकारं विदध्यादिति लक्षणं।" सु.सू.१८अ.। कुक्कुरे। विका.। अष्टचत्वारिंशद्दिवसेषु। ४८ दिन। "संख्याप्य मण्डलं पश्चादर्कं निष्काशयेत्ततः।" अथ.चि.।
मण्डलकुष्ठम्। क्ली। सप्तमहाकुष्ठान्तर्गत-कुष्ठरोगभेदे। तल्लक्षणम्,—"श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धसुप्तसमण्डलं। कृच्छ्रं अन्योन्य-संयुक्तं कुष्ठं मण्डलमुच्यते॥ मा.नि.।
मण्डलच्छदा। स्त्री। शुक्लपुनर्नवायाम्। वै.निघ.।
मण्डलपत्रिका। स्त्री। रक्तपुनर्नवायाम्। रा.नि.व.५। [सु.कल्प.८अ.।
मण्डलपुच्छकः। पुं। तन्नामकप्राणहरकीटे।
मण्डलशुक्लभाक्। पुं। आनारस तिन्द्र ख्याते वृक्षे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मण्डलमन्धिः। पुं। कण्ठहृदयनेत्रक्लोमनाड़ीषु मण्डलाकारसन्धौ। सु.शा.७अ.।

मण्डला। स्त्री। कुमार्य्याम्। घृतकुमारी। दूर्व्वायाम्। वै.निघ.।

मण्डलाग्रम्। क्ली। मण्डलमिवाग्रं यस्येति। खनामख्यातषड़ङ्गुलशस्त्रविशेषे। लक्षणं यथा—"षड़भागे मण्डलं दत्तङ्गुलसंस्थानमेव वा। मण्डलाग्रस्य जानीयात्प्रमाणन्तु षड़ङ्गुलम्॥ सु.सू.८अ.। उल्लेखः।

मण्डली (इन्)। पुं। वटवृक्षे। रा.नि.व.११। सर्पे। विषा.। गोनससर्पे। रा.नि.व.१९। कृष्णकृकलासे। हे.च.। विड़ाले। श.मा.। कर्कटे। भौमसर्पजातौ। "स्त्रिया मण्डलिनी भोगाः मण्डलैर्विविधैश्चिताः। प्रांशवो मन्दगमनाः—॥" वा. उ.३६अ.। वै.निघ.। तल्लक्षणादिः—आदर्शमण्डलश्चैत-मण्डलरक्तमण्डलचित्रमण्डलपृषतरौद्रपुष्पमिलिन्दक-गोनस-ब्रह्मगोनस-पनस-महापनस-वेणुपर्वक-गिरिगुड-बभ्रुकषायकलुषपारावतहल्लाभरणचित्रकैणीपदा-श्चेति। तद्दष्टलक्षणमाह—मण्डलिदष्टस्य प्रथमे वेगे रक्तं दुष्टं पीतोभवति। तेन च पीताङ्गता दाहश्च। द्वितीये श्वयथुः। तृतीये दंशपरिक्लेदादयः। चतुर्थे ज्वरो दाहश्च। पञ्चमे सर्व्वशरीरदाहश्च भवति। वा.उ.३६अ.। स्त्री (ली)। दूर्व्वायां। हारा.। घृतकुमार्य्याम्। गुड़ूच्याम्। वै.निघ.।

मण्डा। स्त्री। मेधिकायां प.मु.। मद्ये। हारा.। आमलक्याम्। मे.।

मण्डूकः। पुं। भेके। व्याङ्। स अष्टविधः—कृष्ण-सार-कुहक-हरित-रक्त-यववर्णाभ-भृकुटी-कोटिक्ष इति। तद्भेदे देशकच्छः पीतफेणागमय। सु.कल्प.८अ.। पृथुशिरस्त्र्यङ्गोणाकन्दे। वड़ शौंटा-श्योणागाछ। रा.नि.व.९। पुष्करीकन्दे। पूयवित्रा। वै.निघ.। मण्डूकपर्ण्याम्। थूलकुड़ि, भैष.अ.पि.चि.क्षुधावतीगुट्यां। अश्वस्य खुरतल-प्रदेशे। ज.द.।

मण्डूकता (तापः)। स्त्री, पुं। अश्वस्य पादरोगविशेषे। लक्षणं यथा—"मण्डूकतापो मण्डूक्यां व्रणेनाश्वस्य जायते। अभिघातसमुत्थेन दुष्टकर्दमकेन च॥" ज.द.३९अ.।

मण्डूकपर्णः। पुं। श्योणाकन्दे। अम.। पाटलाक्षे। वै.निघ.। श्योणके। मे.।

मण्डूकपर्णी। स्त्री। (Hidrocotyle Asiatica.) Asiatic Penny wort. खनाम-ख्यातशाके। थानकुड़ि, थूलकुनि। हिं खुल खुड़ि, ब्रह्ममण्डूकी। तै मण्डूकवम्मी। ता. वल्लारोवैरी। वम्. ब्रह्मी। "तत्पर्य्यायाः—भेक-पर्णी भेकी मूलपर्णी मण्डूकपर्णिका मण्डूक-पर्णिनी ब्रह्ममण्डूकिका मण्डूकी खाष्ट्री दिव्या महौषधी। रा.नि.व.२३। गुणैर्ब्राह्मीसदृशी। गुणाः—कासघ्नी स्वादुपाकरसा हिमा च। राज. ३प.। भैष.। महाभयव्या। अस्य पत्रं कुष्ठे उपदंशे च परमहितं। चर्म्मरोगे नाड़ीव्रणे च हितम्। दुष्टफलम्। मज्जिष्ठायां। रा.नि.व.९। २३। च.सू.४अ.। आदित्यभक्तायाम्। रा.नि.व. ४।२३। पृथुशिरस्त्र्यङ्गोणाकन्दे। বড় শোঁটা শ্যোণা গাছ। रा.नि.व.९। शालपर्ण्याम्। पाट-लायाम्। वै.निघ.। ब्राह्म्यां। ब्रह्मी शाक। भा. उ.रसायने। "मण्डूकपर्ण्याः स्वरसः। तद्भावि मज्जिष्ठा ग्राह्या।" ब्राह्मीभेदे। सु.चि.९अ.।

मण्डूकमाता। स्त्री। ब्राह्मीक्षुपे। ब्राह्मी-शाके। रा.नि.व.५।

मण्डूकिका। स्त्री। मज्जिष्ठायां। श.मा.। मण्डू-कपर्ण्यां। थूलकुड़ि। प.मु.। आदित्यभक्तायां। हड़हड़िया। रा.नि.व.४।

मण्डूकी। स्त्री। मण्डूकपर्ण्याम्। थूलकुड़ि। र.मा.। आदित्यभक्तायां। रा.नि.व.४। ब्राह्मी-क्षुपे। रा.नि.व.५। जलशुक्तौ। सु.चि.१अ.। अश्वस्य खुरतलभागे। ज.द.२अ.। भेकपर्ण्यां।

मण्डूरम्। क्ली, पुं। लौहमले। मण्डूर। तत्पर्य्यायाः,—शिल्पनं शूलघातनं लौहमलं लौहचूर्णं किट्टं अयोमलं लौहजं कृष्णचूर्णं लोष्टं। प.मु। अस्य मारणविधिः—"अचाङ्गारेर्धमेत् किट्टं लौहजं तद्भवां जलैः। सेचयेन्नवनीतञ्च सप्तवारं पुनः पुनः। चूर्णयित्वा ततः क्वाथैर्दिनैर्गुणैस्त्रिफलो-द्भवैः। आलोड्य भर्जयेद्भूमौ मण्डूरं जायते वरम्। यल्लौहे यद्गुणाः प्रोक्ता तत्किट्टे चापि तद्गुणाः। अतोऽतिमुत्तमं किट्टं मण्डूराशीतिवार्षिकम्। अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्॥" रस. चि.७अ.।

मण्डूरवटकः। पुं। पाण्डुरोगे औषधम्। "त्रिफला वृषणं मुस्तं विड़ङ्गं चव्यचित्रकौ। दार्व्वी लक् माक्षिको धातुः ग्रन्थिको देवदारु च। एता-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विपलिकान् भागान् चूर्णान् कुर्य्यात् पृथक् तथा। मण्डूरं द्विगुणं चूर्णात् गुडमञ्जनसन्निभं। गोमूत्रेऽष्टगुणे पक्वा तस्मिंस्तत्प्रक्षिपेत्ततः ; उदुम्बरसमान् कृत्वा वटकांस्तान् यथाग्निना। उपयुञ्जीत तक्रेण...।" च.चि.२०अ.।

मतङ्ग(रा)जः। पुं। हस्तिनि। अम.।

मतिः। स्त्री। बुद्धौ। अम.। इच्छायाम्। मे.। शाकविशेषे। शब्दकल्पे अजयपालः।

मतिदा। स्त्री। भिषग्बीजपुष्पे। रा.नि.व.४। ज्योतिष्मतीलतायाम्। रा.नि.व.२।

मतिविभ्रंशः। पुं। बुद्धिवैपरीत्ये। शा.र.।

मतिविभ्रान्तिः। पुं। उन्मादरोगे। रा. नि.व.२० ;

मत्कः। पुं। मत्कुणे। छारपोका। शा.म.।

मत्करणम्। क्ली। देहे।

मत्कुणः। पुं। कीटभेदे। छारपोका। रा. नि.व.१९। नारिकेले। अश्मश्रुपुरुषे। मे.। महिषे। वै.निघ.। स्त्री। केशरहितस्त्रीयोनौ। शा.र.। [शा.मा.।

मत्कुणारिः। पुं। शणवृक्षे। भङ्गायां। सिद्धि।

मत्तः। पुं। धुस्तूरवृक्षे। रा.नि.व.१०। कोकिले। महिषे। रा.नि.व.१९। त्रि। उन्मत्ते।

मत्तकाशिनी। स्त्री। उन्मत्तस्त्रियां। अम.।

मत्तकोशः। पुं। हस्तिनि। शा.मा.।

मत्तवारणम्। क्ली। पूगफलचूर्णे। शा.मा.। कुन्दवृक्षवृतौ। कुँदवृक्षका बेड़ा। मे.। पुं। मत्तहस्तिनि।

मत्ता। स्त्री। मद्ये। रा.नि.व.१४। विजयायाम्। सिद्धि। वै.निघ.।

मत्ताख्यः। पुं। कोकिले। वै.निघ.।

मत्स्यः (त्स्यः)। पुं। जलचरभेदे। मांछ। तत्पर्य्यायाः,—पृथुरोमा, झषः झषः. मीनः वैसारिणः अलजः विसोरः शकुनो शल्कली आत्मांशो सम्वरः मूकः जलेशयः कण्टकी शल्की मत्स्यः अनिमिषः स्थिरजिह्वः वारिचरः वल्कवान् शुल्की अण्डालुः जलवस्तुः। ते बहुविधा नानाजातीयाश्च। यथा—"रोहितो गर्गरो भौरुर्वालको वर्वरस्तथा। छागलो रक्तमत्स्योऽथ महिषश्च चिलीचिमः। वातूकः खलमोसा च ज्ञेया गर्भविषादयः।" तेषां विशेषाः पर्य्याये मत्स्याः। साधारणतो मत्स्यमांसगुणाः—स्निग्धम् उष्णं गुरु रक्तपित्तजनकं वातहरञ्च। "निःशल्का निन्दिता मत्स्याः सर्व्वे शल्कयुता हिताः। वपुस्थैर्य्यकरा वीर्य्यबलपुष्टिविवर्द्धनाः॥ ह्रदकुल्याजलनिधिनिर्झरतड़ागवापीजले च ये मत्स्याः। ते तु जड़ा, नादेया यथोत्तरलघूत्तरास्तु नादेयाः॥ क्षाराम्बुमत्स्या गुरवोऽस्रदाहदा विष्टम्भदाक्षी लवणाम्बुजाताः। तेनान्यजाः स्वादुजलस्थिता अपि ज्ञेया जड़ास्तेऽपि यथाश्रुतानिमान्॥" रा.नि.व.१७।" नादेया मधुरा मत्स्या गुरवो मारुतापहाः। रक्तपित्तकराश्चोष्णाः हृद्या स्निग्धाल्पवर्चसः। कषायानुरसास्तेषां शष्पशैवालभोजनाः। सरस्तड़ागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः। महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः॥" तेषामल्पानिलत्वाच्चौण्ड्रकौष्ठ्यौ गुणोत्तरौ। स्निग्धत्वात् स्वादुपाकत्वात्तयोर्वाप्या गुणोत्तराः। नादेया गुरवो ज्ञेया यस्मात् पुच्छास्थिधारिणः। सरस्तड़ागजानान्तु विशेषेण शिरो लघु। अदूरगोचरा यस्मात्तस्मादुत्स्रोदपानजाः। किञ्चिन्मुक्ता शिरोदेशमत्यर्थं गुरवस्तु ते। अधस्ताद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः। उरोविचरणात्तेषां पूर्व्वमङ्गं लघु स्मृतम्।" सु.सू.४६अ.

महामत्स्यगुणाः—"महाप्रमाणा गुरवः शुक्रला बद्धवर्चसः।" क्षुद्रमत्स्यास्तु लघवः ग्राहिणो ग्रहणीहिताः। क्षुद्रमत्स्या लघुस्निग्धा वातघ्ना वह्निवर्द्धनाः।" पाण्डुवर्णमत्स्यगुणाः—"पाण्डुरा दीपनाः स्निग्धा गुरवो भिन्नवर्चसः।" क्लिन्नशुष्कमत्स्यगुणाः—कथिता दीपना मत्स्याः शुष्का विष्टम्भिदुर्ज्जराः।" लवणयुक्तमत्स्यगुणाः—लवणेनाड़िता मत्स्याः कफपित्तकराः सराः॥" सामुद्रमीनगुणाः—"सामुद्रा गुरवो हृद्याः स्निग्धोष्णा वातनाशनाः। पित्तलास्तु विशेषेण मांसाश्चिलाहलावहाः। जम्बीररसयुक्तमत्स्यगुणाः—"दधिमत्स्यस्तु जम्बीररसाक्तो वातनाशनः। मधुरो रोचनो हृद्यो बृंहणो बलवर्द्धनः।" सन्तोलितमत्स्यगुणाः—"आर्द्रकैः कटुतैलेन सद्यः सन्तोलितो भवेत्। स स्वादुः कफवातघ्नः शुक्रलो बलवर्द्धनः।" मत्स्यव्यञ्जनगुणाः—"व्यञ्जनं शाकमत्स्याख्यं हृद्यं हृद्यञ्च पुष्टिकृत्।" मत्स्यघण्टगुणाः—"मत्स्यघण्टी बलकरी वातघ्नी रोचनः परः॥" राज.३प.।

मत्स्यग(घ)ण्टः। पुं। मत्स्यशल्की। समस्तव्यञ्जनभेदे। मांछेर घण्ट। शा.च.। See मत्स्य।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्स्यरः। पुं। मक्षिकायां। त्रिका.।

मत्स्यकालो (ष्ठो)। स्त्री। उपोदिकायाम्। वै.निघ.। [जटा.।

मत्स्यगन्धा। स्त्री। जलपिप्पल्यां। रा.नि.व.४।

मत्स्यगन्धिः। स्त्री। मत्स्याक्ष्यास्। ब्रह्मी शाक। (का)। शुकनासायास्। वै.निघ.।

मत्स्यगर्भः। पुं। मत्स्याण्डे।

मत्स्यघण्टः। पुं। व्यञ्जनविशेषे। माछेर घण्टे। शु.च.। See मत्स्यः।

मत्स्यण्डिका (ण्डो)। स्त्री। गुडकृतमिष्टद्रव्यभेदे। मिछिरि, नवात्। शर्करायां। रा.नि. व.१४। गाए गुड़। "इक्षो रसो यः संपक्वो घनः किञ्चिद्द्रवान्वितः। मन्दं यत् स्यन्दते तस्मात् तन्मत्स्याण्डो निगद्यते।" गुणाः—"मत्स्याण्डो भेदिनो बल्या लघ्वी पित्तानिलापहा। मधुरा ह्रद्या रुच्या रक्तदोषापहा स्मृता॥" भा.। मत्स्यण्डिका-खण्डशर्करा-विमलजाता उत्तरोत्तरं शीतस्निग्धगुरुमधुरतरा भवन्ति। सु.सू.४५अ.।

मत्स्यण्डफलितम्। क्ली। खटीशर्करायाम्। वै.निघ.।

मत्स्यनाशकः (नाशनः)। पुं। मत्स्यरङ्ग-पक्षिणि। माछराङा पाखी। कुररपक्षिणि। त्रिका.। हे.च.।

मत्स्यपित्तम्। क्ली। मीनपित्ते। माछेर पित्त। तच्छुद्धिः—"मत्स्यादिपित्तं संशुष्कं निम्बद्राक्षैर्वर्भावितं। दिनान्ते शुद्धिमायाति सत्यं गुरुवचो यथा॥" सा.कौ.।

मत्स्यपित्ता। स्त्री। कटुरोहिण्यां। कट्‌की। रा.नि.व.६।

मत्स्यपुटपाकः। पुं। पुटेन मत्स्यपाकभेदे। तत्साधनं दग्धमत्स्यतुल्यमेव।

मत्स्यभिन्ना। स्त्री। कटुक्यां। कट्‌की। रा.नि.व.६।

मत्स्यभेदिनो। स्त्री। कटुक्यां। रा.नि.व.६।

मत्स्यरङ्गः (ङ्गः, कः)। पुं। जलकाके। माछराङा। ढारा.।

मत्स्यराजः। पुं। रोहितमत्स्ये। त्रिका.। "शुद्धरा रोहितः श्रेष्ठः शकुलश्च विशेषतः। मत्स्यराज इति प्रोक्तः।" रस चि.८अ।

मत्स्यर्कः। पुं। शफरीमत्स्ये। च.शा.८अ.।

मत्स्यलम्। क्ली। मत्स्यसंयुक्तव्यञ्जने।

मत्स्यविन्ना। स्त्री। कटुकायाम्।

मत्स्यवेधनो। स्त्री। मीनरङ्गे। माछराङा। जटा.। वडिशे। श्र.र.।

मत्स्यशकलम्। क्ली। मीनशल्के। मत्स्यचर्मणि। भा.म.कुष्ठ.चि.। स्त्री। कटुक्यां। भा.म.१भ.चित्रभ.ज्व.चि.। "मक्षीकामरदारु-मत्स्यशकला।"

मत्स्यसङ्घातः। पुं। मत्स्यसमूहे।

मत्स्यसन्तानिकः। पुं। मत्स्याव्यञ्जनभेदे। यथा—"दग्धेऽङ्गारे सलवणो वेशवारैरुपस्कृतः। सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत्॥" शु.च.।

मत्स्या। स्त्री। कटुक्याम्। वै.निघ.।

मत्स्याङ्गो। स्त्री। गण्डदूर्व्वायाम्। रा.नि.व.८। छिलमोचिकायां। शिक्षे। त्रिका.।

मत्स्याण्डम्। क्ली। मीनाण्डे। माछेर डिम। गुणाः—"मत्स्यकूर्म्मखगाण्डानि खादुवाजीकराणि च। कटुपाकानि रूक्षाणि वातश्लेष्मकराणि च॥" राज.३५.।

मत्स्याण्डो। स्त्री। शर्कराभेदे। खाँड़ गुड़।

मत्स्यादनो। स्त्री। जलपिप्पल्यां। रा.नि.व. ४। सूर्म्मलायाम्। मत्स्याक्ष्यास्। शिक्षे। काकमाच्याम्। गण्डदूर्व्वायाम्। मण्डूक्याम्। रा.नि.व.२३। [त्रिका.।

मत्स्याशनः। पुं। मत्स्यरङ्गे। माछराङा।

मत्स्याक्षकम्। क्ली। ब्राह्म्याम्। पत्राङ्गचन्दने। भा.म.४भ.बाल.चि.। "मत्स्याक्षकं शङ्खपुष्पी। सु.शा.१०अ.। पत्तूरे। वा.उ.३९अ.।

मत्स्याक्षिका। स्त्री। गण्डदूर्व्वायाम्। वै.निघ.।

मत्स्याक्षी। स्त्री। छिलमोचिकायां। शिक्षे-शाक। हिं मछेछो, मछरिया। मं जलब्राह्मी। र.मा.। त्रिका.। सोमलतायाम्। गुणाः—शीतला रुच्या व्रणचक्षुष्या च। रा.नि.व.५। "मत्स्याक्षी ग्राहिणी शीता कुष्ठपित्तकफास्रजित्। खर्जुलिका कषाया च स्वादी कटुविपाकिनी॥" भा.गु.व.। काकमाच्यां। रा.नि.व.४। गण्डदूर्व्वायां। रा.नि.व.८।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्स्यी। स्त्री । जटामांस्यां । वै.निघ.२भ. वा.व्या.चि.शतावरीतैले । स्त्रीमत्स्यजातौ । व्याक. ।

मत्स्योदनम्। क्ली । मीनपक्वभक्ते । माछेर पोलाउ । गुणाः—"मत्स्योदनं कफकरं त्रिदोषकरणं तथा । अग्निर्मान्द्यकरं प्रोक्तं चतुर्थैर्मत्स्यभक्षकैः ॥" वै.निघ. ।

मथः (नः)। पुं । अग्निमन्थवृक्षे । गणियारी । मद. । र.मा. ।

मथितम्। क्ली । वस्त्रपूतनिर्ज्जलदधि । अम. । भा.म. । १भ.अ.सा.चि.गङ्गाधरचूर्णे । "चूर्णं मथितसमेतम् ।" केवलं मथितदधि । "तत् केवलन्तु मथितं सुनयो वदन्ति ।" प.प्र.२ख. । गुणाः —श्लेष्मवातघ्नं । रा.नि.व.१५ । कफपित्तघ्नं रोचनं धातुपुष्टिकरञ्च । राज.२प. ।

मथुरानाथः। पुं । वैद्यामृतलहरीनामसंग्रहग्रन्थकारे ।

मदः। पुं । मृगनाभौ । मृगनाभि । रा.नि.व.१२ । See कस्तुरी । च.द.वा.व्या.चि. अष्टादशशतिकप्रसारणे तैले । मत्ततायाम् । "पूगकीद्रव दुत्तूरभक्षणादिव मत्तता ।" भा.म.१भ.ज्व.चि. । "मूर्च्छादाहौ मदस्तृषा ।" मा.नि. । मद्ये । हे.च. ।

मदकटः। पुं । षण्ढे । षाँड़ ।

मदकरः। पुं । धुस्तूरवृक्षे । स्त्री (रा) । धातकीवृक्षे । (री) सुरायाम् । वै.निघ. ।

मदकारि। त्रि । मादकद्रव्ये । "बुद्धिं लुम्पति यद् द्रव्यं मदकारि तदुच्यते । तमोगुणप्रधानञ्च यथा मद्यं सुरादिकम् ॥"

मदक्कद्रुमः। पुं । तालवृक्षे । वै.निघ. ।

मदगन्धः। पुं । सप्तपर्णवृक्षे । छातिमगाछ । रा.नि.व.१२ । स्त्री । अतसीक्षुपे । मशिनागाछ । प.मु. । मद्ये । रा.नि.व.१४ ।

मदगमनः। पुं । महिषे । वै.निघ. ।

मदग्घी। स्त्री । उपोदिकायाम् । पुँइगाछ । प.मु. । नागदमन्याम् । रा.नि.व.५ ।

मदद्रुः। पुं । माढ इति कीर्त्तनदेशप्रसिद्धे वृक्षे । रा.नि.व.९ ।

मदनः (कः)। पुं । क्ली । (Randia dumetorum. Syn. Posoqueria dumetorum or R. longispina.) सुचकुन्दवृक्षे । स्वनामख्यातहीनगन्धवर्गीयवृक्षे । मयनागाछ । हिं मदनफल, करहर । सं वसन्तकुसुमिचेटु, मधुचेटु, मदनचेटु, उन्मत्तचेटु । उत्. पातर । ता. मडुकक्काय । तेपा. मैदल । पञ्जा. मिण्डकीङ्ग । सं मेणाहल । कं गेल । तत्पर्य्यायाः—पिचुकः सुचुकुन्दः कण्टकी वसनः करहाटकः शल्यः कण्डः रामच्छर्दनकः रामाच्छर्दनकः कैटर्य्यः धाराकलः तगरः । गुणाः—कटुतिक्तोष्णः कफवातव्रणघ्नः श्लीपघ्नः वामनश्च । रा.नि.व.८ । एतत्फलं वामनम् अर्थात् अपक्वपित्तश्लेष्माणौ ऊर्द्धं नयेत् । भमरे । जटा. । अङ्कोल्लवृक्षे । आँकोड़ गाछ । रा.नि.व.९ । वकुलवृक्षे । धुस्तूरवृक्षे । रा.नि.व.१०।२३ । भा. ४ख.जात्यादितैले । सिक्थके । रा.नि.व.१३ । काके । शल्ये । कीशमे । मानके । कुटजवृक्षे । रा.नि.व.२३ । कोशातक्याम् । सरलकाष्ठे । वै.निघ. । कुन्दपुष्पवृक्षे । (कः) दमनकवृक्षे । दोना । र.मा. । च.द.वा.व्या.चि. । "मांसीसुरामदन—।" चोरिणीवृक्षे । कपोते । वै.निघ. । मण्डलिसर्पविशेषे । सु.कल्प.४अ. । वसन्ते । मे. । माषे । हे.च. । खदिरवृक्षे । श.च. । [११।

मदनकाकुरवः। पुं । पारावते । रा.नि.व.

मदनकोद्रवः। पुं । तृणधान्यविशेषे । मदन शाँस । च.द.पाना.चि. । "मदनकोद्रवजम्" ।

मदनपाठकः। पुं । कोकिले । रा.नि.व.१९ ।

मदनफलम्। क्ली । मदनवृक्षफले । मयनाकुँड़ि ।

मदनमञ्जरी। स्त्री । जिह्वायाम् । वै.निघ. ।

मदनमृगः। पुं । कस्तूरीमृगे । वै.निघ. ।

मदनमोदकः। पुं । वाजीकरणाधिकारोक्तमोदकः । पाठः—"त्रैलोक्यविजयापत्यं सबीजं घृतभर्ज्जितं । त्रिकटु त्रिफला कुष्ठं शटी सैन्धवधान्यकं । शृङ्गी तालीशपत्रञ्च कट्फलं नागकेशरं । यमानी चाजमोदा च यष्टीमधुकमेव च । मेथी जीरकयुग्मञ्च गृहीत्वा भर्ज्जितं कियत् । यावत्यि तानि चूर्णानि तावदेव तदौषधं । तावत्येव सिता देया यावत्या याति बन्धनम् । घृतेन मधुना सिद्धं मोदकं परिकल्पयेत् । त्रिसुगन्धिसमायुक्तं कर्पूरेणाधिवासयेत् । स्थापयेद् घृतभाण्डे तु श्रीमन्मदनमोदकम् ॥" त्रिकटु, त्रिफला, कूड़,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मालुकः। पुं। क्षणार्ज्जके। काल बाबुई। ईषत्कृष्णराजहंसे। वै.निघ.।

मालुकाच्छदः (पत्रः)। पुं। अश्मन्तक-वृक्षे। वै.निघ.।

मालुधानः। पुं। मातुलाहिसर्पे। मालुग्रा साप। अम.। स्त्री (नी)। लतामेदे। वै.निघ.।

मालूकः। पुं। क्षणार्ज्जके। कृष्णपत्र क्षुद्र तुलसी। रा.नि.व.१०।

मालूरः। पुं। विल्ववृक्षे। प.मु.। कपित्थवृक्षे। कय्येत गाछ। रा.नि.व.११।

मालूरमूलम्। क्ली। विल्वमूले। भा.म.१भ. जिह्वकर्ज्ज. चि.। "मालूरमूलामयमधुद्रुता।"

मालेया। स्त्री। स्थूलैलायाम्। प.मु.।

माल्यम्। क्ली। पुष्पे। पुष्पमालायाम्। मे.।

माल्यकः। पुं। मदनवृक्षे। वै.निघ.।

माल्यपुष्पः। पुं। शणवृक्षे। शण गाछ। रा.नि.व.४।

माल्यपुष्पिका। स्त्री। शणपुष्प्याम्। वन शण। रा.नि.व.४।

माल्या। स्त्री। तृणभेदे। वै.निघ.।

माषः (कः)। पुं। क्षुद्ररोगविशेषे। उच्च तिल। तिलकान् उन्नतान्मापानाहुः। "माषांस्तानेव चोन्नतान्।" बा.उ.३१अ.। A sort of kidney bean. (phaseolus radiatus or P. Roxburghii.) स्वनामख्यात द्वीदलभेदे। मांषकलांग्र। प.मु.। हिं उरीद, तें मिनुमलु, तृणधान्यविशेषमु। तत्पर्य्यायाः,—वीजरत्नः वल्ली कुरुविन्दः धान्यधारः क्षपाकरः मांसलः बलाढ्यः पिवाः पित्तभोजनः। गुणाः—स्निग्धः मलकरः शोषणः श्लेष्मकरः वीर्य्योष्णः रक्तपित्तप्रकोपकरः वातघ्नः गुरुः बलकरः रोचनः स्वादुः अमसुखवतां नित्यं सेवनीयश्च। रा.नि.व.१६। "माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः। उष्णः सन्तर्पणो बल्यः शुक्रश्लेष्मकफप्रदः। भिन्नमूत्र-मलस्तन्यमेदःपित्तकफप्रदः। गुदकीलार्दितश्वास-पक्तिशूलानि नाशयेत्। कफपित्तकरा माषाः...॥" भा.पू.१भ.धा.व.। "स्निग्धोऽथ वृष्यो मधुरश्च बल्यो मरुत्कफानां परिबृंहणश्च। पाकेऽस्रकीर्णो विदितो हिमश्च माषोऽथ वृष्यः कथितो नरैश्च॥" अचि. १५अ.। माषयूषगुणाः—"घनं सवातं कफकृन्माषयूषश्च पित्तकृत्। अन्नपर्य्युषितं तच्च तैलपाने च शस्यते॥" अवि.१३अ.। "माषयूषो गुरुर्ब्रूष्य ईषत्पवनपित्तकृत्। अनल्पकं कफं कुर्व्वन् मलशुष्टिं विवर्द्धयेत्॥" द्रव्यगु.। परिमाणभेदे। माषा। तत्पर्य्यायाः,—मासः हेमः धामकः। स मागधमाने सुश्रुतमते च ५ पञ्चरक्तिकात्मकः। चरकमते ६।८ गुञ्जात्मकः। कालिङ्गमाने सुश्रुतमते ५७८ गुञ्जापरिमाणम्। भा.। चरके वैद्यकान्तरे च १० गुञ्जात्मकमानम्। १२ गुञ्जात्म-कोऽप्यस्ति। १२ धान्यात्मकः १८ माषात्मकोऽपि दृश्यते। अतएव स द्वाधिकः षड्विधः पञ्चगुञ्जा-त्मकः षड्गुञ्जात्मकः सप्तगुञ्जात्मकः अष्टगुञ्जात्मकः दशगुञ्जात्मकः द्वादशगुञ्जात्मकश्चेति। तत्र पञ्च-गुञ्जात्मको यः स नाम्ना कालिङ्गः सौश्रुतश्च षड्गुञ्जात्मकोऽपि कालिङ्ग इति कैश्चित्। दश-रक्तिकमाषः चरकसम्मतो गौड़माषक इत्युच्यते। स एव सर्व्वत्र व्यवहार्य्यः। यथा—"माषस्तु पञ्चभिः षड्भिस्तथा सप्तभिरष्टभिः। दशभिर्द्वादशभिश्च रक्तीभिः षड्विधो मतः। अत्र कालिङ्गमाषश्च पञ्च-गुञ्जः स सौश्रुतः। दशगुञ्जस्तु माषः स्यात् माषकः स च चारकः। सप्तगुञ्जस्तु कैश्चिदाहुः मानकं मान-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोविदाः। दशरक्तिकमानन्तु गौड़माचक्षतेऽत्र तु। दशरक्तिकमाषेण व्यवहारो भिषग्विदाम्॥" प्रयोगमानकथने। "दशगुञ्जात्मकं माषं प्रवदन्ति चिकित्सकाः।" तत्र श्रेष्ठमध्यादिभेदात् माषकादिप्रतिपत्तौ समाधानमूह्यम्। "माषैर्द्वादशभिर्धान्यैर्माषकः परिकीर्त्तितः। कषायादिनिरूहेषु द्रव्यमानविधावपि॥ ततोऽष्टादशभिर्माषैर्माषकः परिकीर्त्तितः। वस्त्रादिरक्तमोचेषु माने मूत्रवसादिषु॥ वसनादिषु योज्यस्य माषकस्याष्टरक्तिकः। लौहरत्नादिविषये दशरक्तिकमाषकः॥ वमने च विरेके च तथा शोणितमोक्षणे॥" माषी माषकलायः। क्वाथ्यत्वेयः।

माषकलायः। पुं। माषव्रीही। माषकलाय। अ.टी.भ.।

माषतैलम्। क्ली। वातव्याधौ तैलम्। "माषक्वाथे बलाक्वाथे रास्नाया दशमूलजे। यवकोलकुलत्थानां क्वाथमांसं भवेत् पृथक्। प्रस्थे च तिलतैलस्य क्षीरं दत्वा चतुर्गुणम्। रास्नात्मगुप्तासिन्धूत्थशताह्वैरक्षसम्मितैः। जीवनीयबलाव्योषैः पचेदक्षसमैर्भिषक्। क्वाथप्रस्थाः षड़ेवात्र विभक्त्यन्तेन कीर्त्तिताः॥" तिलतैल ४ श.। क्वाथार्थ—माषकलाय, वेड़ेला, रास्ना, दशमूल, यव, कुल, कुलथ, छागमांस प्रत्येक १६ प. जल १६ श. शे. ४ श.। कल्कार्थ—रास्ना, आलाकुशीमूल, सैन्धव, शुलफा, एरण्डमूल, मूर्वा, जीवक, ऋषभक, मेद, महामेद, ऋद्धि, वृद्धि, काकोली, क्षीरकाकोली, वेड़ेला, त्रिकटु प्रत्येक २तो.। ब्रह्मीदेशान्नखीप्रभृति यथासाध्यं दातव्यम्। इदं सप्तप्रस्थमाषतैलम्। सा.कौ.। भैष.ब्रह्ममाषतैलम्। स्वल्पं यथा—"माषप्रस्थं समावाप्य पचेत्सम्यक् जलाढ़के। पादशेषे रसे तस्मिन् क्षीरं दत्वा चतुर्गुणं। प्रस्थञ्च तिलतैलस्य कल्कं दत्वाचसम्मितं। जीवनीयानि यान्यष्टौ शतपुष्पां ससैन्धवाम्। रास्नात्मगुप्तामधुकं बलाव्योषं विकण्टकं।..... ऊर्द्धजत्रुगदापहं॥" माषकलाय १६ प. जल १६ श. शे. ४ श.। तिलतैल ४ श. दुग्ध १६ श.। कल्कार्थ—जीवक, ऋषभक, मेद, महामेद, ऋद्धि, वृद्धि, काकोली, क्षीरकाकोली, शुलफा, सैन्धव, रास्ना, आलाकुशीबीज, यष्टिमधु, वेड़ेला, त्रिकटु, गोक्षुरबीज प्रत्येक २ तो.। सा. कौ.। भैष.। महामाषतैलं यथा—"माषस्यार्द्धाढ़कं दत्त्वा तुलार्द्धं दशमूलतः। पलानि छागमांसस्य त्रिंशद्दीर्घेऽम्भसः पचेत्। पूते क्षीते कषाये च चतुर्थांशावशेषिते। प्रस्थञ्च तिलतैलस्य पयो दत्त्वा चतुर्गुणम्। आत्मगुप्तामृतकञ्च शताह्वा लवणत्रयम्। जीवनीयानि सञ्चिन्त्य चव्यचित्रकटफलम्। सव्योषम्पिप्पली मूल-रास्ना-सधुक सैन्धवम्। देवदार्व्वसुता-कुष्ठं वाजिगन्धा वचा शठी। एतैरक्षसमैः कल्कैः साधयेन्मृदुनाग्निना॥" तिलतैल ४ श.। क्वाथार्थ—माषकलाय ४ श. दशमूल ७।० श. छागमांस ३० प. एकत्र ७४ श. जले पाक करिया शेष १६ श. नामाइबे। दुग्ध १६ श.। कल्कार्थ—आलाकुशीमूल, एरण्डमूल, शुलफा, सैन्धव, विट्, सान्तारलवण, जीवनीयगण, मञ्जिष्ठा, चई, चितार मूल, कट्फल, त्रिकटु, पिप्पलमूल, रास्ना, यष्टिमधु, सैन्धव, देवदारु, गुलञ्च, कुड़, अश्वगन्धा, वच, शठी प्रत्येक २ तो.। रस.र.। भैष.।

माषपत्रिका। स्त्री। माषपर्णी। रा.नि.व.३।

माषप(व)र्णा (र्णी)। स्त्री। (Teramnus labialis. Syn. Glysine debilis. Rox.) स्वनामख्यातलतायाम्। माषाणी। हिं माषीणी, मासवणी। मं रानउड़दी। कं रालीडिंडु, काउट्टु। तत्पर्य्यायाः,—अश्वपुच्छी सिंहपुच्छी हयपुच्छिका हयपुच्छी काम्बोजी महासहा ऋषिप्रोक्ता कृष्णवृन्ता पाण्डुः पर्णिनी लोमशपर्णिनी पाण्डुलोमशा पाण्डुलोमा पाण्डुहा आर्द्रमाषा मांसमाषा हंसमाषा मङ्गल्या कल्याणी वज्रमूली शालीपर्णी विसारिणी आत्मोद्भवा बहुफला स्वयम्भूः सुलभा घना सिंहविन्ना विशाचिका। वा.सू.१५अ.। गुणाः—"माषपर्णी रसे तिक्ता हृद्या दाहज्वरापहा। शुक्रवृद्धिकरी बल्या शीतला पुष्टिवर्द्धनी॥" रा.नि.व.३। "माषपर्णी हिमा तिक्ता रुच्या शुक्रबलाश्रकृत्। मधुरा वाहिणी शोथवातपित्तज्वरास्रजित्॥" भा.पू.।

माषयोनिः। पुं। पापड़ इति ख्याते खाद्यद्रव्ये। पाँपर। वै.निघ.।

माषरा। स्त्री। अन्नभेदे। प.मु.।

माषरोटिका। स्त्री। माषविदलकृतरोटि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कायाम्। तत्पर्य्यायाः,—ऋर्ष्करी। गुणाः—वातकरी कफपित्तघ्नी च।

माषवटी। स्त्री। माषकृतवटकभेदे। तत्साधनविधिर्यथा,—माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंस्कृता। तया विरचिता वल्ली वटिकाः साधु शोषिताः। भर्ज्जितास्तप्ततैले ता अथवाम्बुप्रयोगतः। वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम्॥" भा.।

माषसूपः। पुं। सृष्टमाषकृतयूषे। भाजा माषकलाईयेर यूष। गुणाः—"माषसूपस्य कुल्माषः स्निग्धो वृष्योऽनिलापहः। उष्णः सन्तर्पणो बल्यः सुस्वादू रुचिकारकः॥" द्रव्यगु.।

माषादः। पुं। कच्छपे। श.र.।

माषान्नम्। क्ली। माषकृतान्ने। गुणाः—"माषान्नं दुर्ज्जरम्प्रोक्तं मांसवृद्धिकरं गुरु। वातनाशकरं वृष्यम्.....॥" वै.निघ.।

माषिकः। पुं। जीवशाके। वै.निघ.।

माषेक्षुरी। स्त्री। माषपिष्टविकृतौ। च.द. शूल.चि.।

मासः (कः)। पुं। पञ्चदये। अम.। माषपरिमाणे। मांषा। अ.टी.भ.।

मासकः। पुं, क्ली। तन्नामकक्षुद्ररोगविशेषे। आँचिल। लक्षणं—"अवेदनं स्थिरञ्चैव यद्वि गात्रे प्रदृश्यते। माषवत् कृष्णसुस्निग्धमनिलान्माषकन्तु तत्॥" मा.नि.।

मासङ्गः। पुं। हरिणविशेषे। वै.निघ.। दात्यूहपक्षिणि। श.र.।

मासद्योङ्गवः (वा)। पुं, स्त्री। षष्टिकधान्ये। गौरषष्टिके। रा.नि.व.१६।

मासनम्। क्ली। ओषधिबीजविशेषे। सोमराज। श.च.।

मासमानम्। क्ली। माषपरिमाणे। १ मांषा।

मासरः। पुं। काञ्जिके। वै.निघ.। भक्तसमुद्भवमण्डे। अम.।

मासवर्त्तिका। स्त्री। सर्षपीनामपक्षिविशेषे। श.मा.।

मासु(सू)रो। स्त्री। भेदनयोग्यवृद्धिपवनखशस्त्रादीनां तनुधाराविशेषे। सु.सू.८अ.। श्रमणी। हे.च।

माहा। स्त्री। स्त्री-गवि।

माहिषः (षी)। पुं, स्त्री। महिषे। कीषान्तरम्।

माहिषघृतम्। क्ली। महिषीक्षीरजातघृते। भैंसाघृत। घृतमिट तीक्ष्णकभस्मकादिरोगेषु हितम्। सि.यो.अग्निमा.चि.। वातश्लेष्मघ्नं बलकरं वर्णकरम् अर्शोग्रहणीहरं दीपनं चक्षुष्यञ्च। रा.नि.व.१५।

माहिषदधि। क्ली। महिषीदुग्धकृतदधनि। म'षेर दई। गुणाः—मधुरं स्निग्धं रक्तपित्तघ्नं श्लेष्मलं बलशोणितवर्द्धनं वृष्यं श्रमघ्नं शीधनञ्च। रा.नि.व.१५।

माहिषनवनीतम्। क्ली। महिषीदुग्धजातनवनीते। महिषे ननि। गुणाः—कषायं मधुरं शीतं वृष्यं बल्यं वाहि पित्तघ्नं पुष्टिदञ्च। रा.नि.व.१५। "माहिषीनवनीतेन स्तनपीड़ास्थिरा भवेत्।" रस.र.स्तनरो.चि.।

माहिषमूत्रम्। क्ली। महिषजले। म'षेर मूत्र। गुणाः—कटु उष्णम् आनाहशोथगुल्मरोगघ्नं कुष्ठकण्डूतिशूलोदररोगघ्नञ्च। रा.नि.व.१५।

माहिषवल्लरी (ल्लिका)। स्त्री। कृष्णवृहद्दारके। (ल्लिका) श्वेतवृहद्दारके। वै.निघ.।

माहिषवल्ली। स्त्री। लघुसीमलतायाम्। वै.निघ.।

माहिषाज्यः। पुं। महिषाजगुग्गुलौ। वै.निघ.।

माहेन्द्री। स्त्री। इन्द्रवारुणीलतायाम्। राखालशशा। रा.नि.व ३। गाभ्याम्।

माहेयः। पुं। प्रवाले। वै.निघ.।

माहेश्वरधूपः। पुं। ज्वरे हिते धूपे। ज्वरे व्यापरादिशेष। "हिङ्गुलं देवकाष्ठञ्च श्रीवेष्टं घृतमेव च। गव्यास्थीनि तथा ध्यामं निम्बपत्राणि पिच्छाहिङ्कुकन्तथा। मार्ज्जारविष्ठा गोग्रन्थं सदनस्य फलानि च। द्वे वचत्यौ वचा चैव कार्पासास्थि तुषास्तथा। छागगोमायुविट् चैव हस्तिदन्तस्तथैव च। एतत्सर्व्वं समाहृत्य छागमूत्रेण भावयेत्। उदूखलं तु सङ्गुह्य स्थापयेन्मृण्मये घटे॥" हिङ्गुल, देवदारु, सरलकाष्ठ, गवाघृत, गोहाड़, गन्धतृण, शिवनिर्म्माल्य, कटुकी, श्वेत सरिषा, निमपाता, मयूरपुच्छ, साँपेर खोलोस, विड़ालविष्ठा, गोशृङ्ग,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मयनाफल, बृहती, कण्टिकारी, वच, कापासबीज, तृष, छागविष्ठा, शृगालविष्ठा, ও হস্তিদন্ত প্রত্যেক সমভাগ। ছাগমূত্রে ভাবনা দিবে। ভৈষ.। "রুদ্রজটা গোशृङ्गं विड़ालविष्टीरगस्य निर्म्मोकः। मदनफलभूतकेश्यौ वंशत्वग् रुद्रनिर्म्माल्यम् ॥ घृत-यव-मयूरपुच्छ-छगलकलीमानि सर्षपाः सवचाः। हिङ्गुगवाक्षिमरीचाः समभागाः छागमूत्रसंपिष्टाः॥ धूपनविधिना शमयत्येते सर्व्वान् ज्वरान् नियतम् ॥" জটালঙ্কা, গোশৃঙ্গ, বিড়ালবিষ্ঠা, সাপের খোলোস, ময়নাফল, রুটামাংসী, মুরামাংসী, বংশত্বক্, শিবনির্ম্মাল্য (পুষ্পাদি), ঘৃত, যব, ময়ূরপুচ্ছ, ছাগরোম, সরিষা, বচ, হিং, গোহাড়, মরিচ প্রত্যেক সমভাগ; ছাগমূত্রে পেষণ করিয়া ধূপ দিবে। ভা.।

माहेश्वरी। स्त्री। अग्निनीवृक्षे। यवतिक्ता लता। रा.नि.व ३।

माक्षम्। क्ली। सौवर्च्चललवणे। प.मु.।

माक्षि(क्षी)कम्। क्ली। धातुमाक्षिके। रौप्य ও স্বর্ণমাক্ষিক। तत्पर्य्यायाः,—पीतकं धातुमाक्षिकं ताम्रिच्छं ताम्यं ताम्यकं आपीतं पीतमाक्षिकं आवर्त्तं मधुधातुः क्षौद्रधातुः माक्षिकधातुः कदम्बः चक्रनामा अजनामकम्। र.मा.। तच्च द्विविधं स्वर्णमाक्षिकं रौप्यमाक्षिकञ्चेति। "माक्षिकं द्विविधम्प्रोक्तं हेमाङ्गं तारमाक्षिकम्। भिन्नवर्णविशेषत्वाद्रसवीर्य्यादिकं पृथक्॥" र.सा.सं.। অপিচ,—"लेखनी माक्षिको धातुः सुवर्णरजतद्युतिः। जराजित् पाण्डुरोगघ्नः क्षयकुष्ठज्वरापहः॥ मधुरोऽम्लः कटुः पाके किञ्चिदुष्णोऽमृतोपमः॥" भा.। च.द.र.पि.चि.। "माक्षिकेन हृतस्य च।" तैलवर्णमधुविशेषे। तच्च कपिलवर्णातिस्थूल-वनमक्षिकाभिः नानापुष्पेभ्यः समाहृत्योत्पादितम्। "नानापुष्परसाहाराः कपिला वनमक्षिकाः। याः स्थूलास्ताभिरुत्पन्नं मधु माक्षिकमुच्यते॥" গুণাः—तैलवर्णं मधुरं रूक्षं लघु श्वासहरञ्च। रा.नि.व.१४। অপিচ—"माक्षिकं मधु श्रेष्ठं नेत्रामयहरं लघु। कामलार्शः-क्षत-श्वास-कास-क्षयविनाशनम्॥" भा.। सामुद्रलवणे।

माक्षि(क्षी)कजम्। क्ली। सिक्थके। मम। रा.नि.व.१३।

माक्षिकधातुः। पुं। धातुमाक्षिके। सि.यो. पाण्डु-क्षि.। कास.चि.मण्डूरवटके। "समैर्माक्षिकधातुना।" स्वर्णमाक्षिके। रा.नि.व.१३।

माक्षिकपाकः (फलः)। पुं। मधुनारिकेलवृक्षे। रा.नि.व.११।

माक्षि(क्षी)कशर्करा। स्त्री। मधुशर्करायाम्, माक्षिकमधुजनितशर्करायाम्। गुणाः—माक्षिकमधुतुल्याः। रा.नि.व.१४।

माक्षिकश्रेष्ठा। स्त्री। रूप्यमाक्षिके। प.मु.।

माक्षिकान्तम्। क्ली। साधवीमद्ये। वै.निघ.।

माक्षिकाश्रयम्। क्ली। सिक्थके। रा.नि.व.१३। [अ.।

माक्षिकी। स्त्री। सुवर्णमाक्षिके। नकुल.१६

मितङ्गमः। पुं। हस्तिनि।

मिताशनः। वि। परिमिताहारे, परिमितभोजिनि। च.।

मित्रम्। क्ली। अतिविषायाम्। वै.निघ.।

मित्रपञ्चकम्। क्ली। घृत-मधु-गुञ्जा-टङ्कण-गुग्गुलौ। तथाच—"मधु सर्पिस्तथा गुञ्जा टङ्कणं गुग्गुलुस्तथा। मित्रपञ्चकमेतत्तु गदितं धातुमेलने॥" र.सा.सं.।

मिथ्याचारः। पुं। शास्त्रोक्तविधिभ्रष्टाचारे। सु.नि.५अ.।

मिथ्यामतिः। स्त्री। भ्रमे।

मिथ्यायुक्तः। वि। अविधिप्रयुक्ते। भा.म.अ. सा.चि.।

मिथ्यायोगः। पुं। रूपादीनां विरुद्धयोगेषु। विषमस्थानाभिघातागुचि-भूतसंस्पर्शादिरूप-विरुद्धयोगेषु। यथा—वेगधारणादिः शारीरमिथ्यायोगः, परुषवचनादिः वाङ्मिथ्यायोगः, दुर्गन्धाद्यतिघ्राणादिः घ्राणमिथ्यायोगः, रुनितादिशब्दानामतिश्रवणं शब्दमिथ्यायोगः। इत्यादि। च.सू.१६अ.।

मिथ्याविहारः। पुं। वलवद्विरुद्धादौ। मा.नि.।

मिथ्याहारः। पुं। अनुचिताहारे, सात्म्यविपरीताहारे, दुग्धमीनादौ। सु.नि.५अ.।

मिथ्योपचारः। पुं। प्रवातादिसेवनरूपानुचिताचरणे। "मिथ्योपचारात्संक्लेशात्।" भा.।

मिन्मिनः। पुं। वातव्याधिविशेषे। अनुच्छभाषौ वा थोँना। निदानम् यथा—"आवृत्य वायुः सकफः धमनीः शब्दवाहिनीः। नरान् करोत्य-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कियत्कान् मूलकमिन्मिनगङ्गदान् ॥" सु.नि १अ.।

मिरा। स्त्री। मूर्व्वायाम्। रा.नि.व.३।

मिलपत्रः। पुं। अम्लवेतसे। वै.निघ.।

मिशिः (शी, शिका)। स्त्री। मधुरिकायाम्। मौरी। च.द.वा.व्या.चि.। शतपुष्पायाम्। शुल्फा। अ.टी.भ.। वा.सू १५अ.। जटामांस्याम्। शा.र.। वै.निघ.महाशाल्मलीवृक्षे। कासभेदे, महादर्भे। केसरविशेषे। गुणाः—मधुरशीतः पित्तदाहक्षयघ्नश्च। रा.नि.व.८। मेथिकायाम्। वै.निघ.।

मिश्रः। पुं। सन्निपाते। क्लो। चाणक्यमूलके। रा.नि.व.७। रक्ते। वै.निघ.।

मिश्रकम्। क्लो। औषरलवणे। रा.नि.व.६। यशदे। मूलके। वै.निघ.। वङ्गभेदे। भा.।

मिश्रकस्नेहः। पुं। गुल्मे औषधम्। पाठः—"त्रिवृतां त्रिफलां दन्तीं दशमूलं पलोन्मितं। जलं चतुर्गुणे पक्त्वा चतुर्भागस्थितं रसं। सर्पिरेरण्डजं तैलं क्षीरञ्चैकत्र साधयेत्। स सिद्धो मिश्रकस्नेहः सक्षौद्रः कफगुल्मनुत्। कफवातविबन्धेषु कण्ठश्लीपदरेषु च। प्रयोज्यो मिश्रकस्नेहः योनिशूलेषु चाधिकम्॥" तेउड़ी, त्रिफला, दन्तीमूल, दशमूल प्रत्येक १ प. जल १६ श. शे. ४ श.। घृत २ श. एरण्डतैल २ श. दुग्ध ४ श.। च.चि.५अ.।

मिश्रजः। पुं। खिसरे जीवे। रा.नि.व.१९। थच्चर।

मिश्रपुष्पा। स्त्री। मेथिकायां। रा.नि.व.६।

मिश्रवनफला। स्त्री। वार्त्ताक्यां। वेगुन। रा.नि.व७।

मिश्रवर्णः। पुं। पुण्ड्रेक्षौ। पूँड़ि ईक्षु। रा.नि.व.१४। क्लो। कृष्णागुरुणि। रा.नि.व.१२।

मिश्रवर्णफला। स्त्री। वार्त्ताक्याम्। वेगुन।

मिश्रशब्दः। पुं। खिसरे जन्तौ।

मिश्रा। स्त्री। कस्तूर्य्याम्। मृगनाभि।

मिश्रीतुत्थम्। क्लो। खर्परे। खापड़ा। वै.निघ.।

मिश्रेया। स्त्री। मधुरिकानामक्षुपे। मौरी गाछ। (Fœniculum valgare. F. Panmorium.) वनशुलुफायाम्। वन शुल्फा। हिं सौंफ, बरियाँफ। मं वनसउफ। कं कासव्वसिगे। ते पेद्दजिलकुरु। ता. सीद्दिकिरे। गुणाः—मधुरा स्निग्धा कटुः कफहरी वातपित्तोत्थदोषघ्नी प्लीहकृमिघ्नी च। रा.नि.व १३। मधूदकेन तच्छुद्धिः। [संग्रहः।

मिश्रोदनम्। क्लो। खिचरिकायाम्। खिचुड़ि।

मिषिः (मिः) (षी, सी)। स्त्री। मधुरिकायां। शा.च.। शतपुष्पायां। शुल्फा। रा.नि.व.४। जटामांस्याम्। शा.र.। अजमोदायाम। ब्राह्मी। मे.। उशीर्य्याम्। उशीरी। रा.नि.व.८

मिषिका। स्त्री। मधुरिकायां। शतपुष्पायाम्। शा.र.।

मिष्टः। त्रि। मधुररसे। भा.।

मिष्टनिम्बः। पुं। निम्बवृक्षभेदे। मिष्ठे निम्। वै.निघ.।

मिष्टनिम्बूः। स्त्री। मधुरजम्बीरे। मधुनिम्बुके। मिष्ठे लेबू। गुणाः—"मिष्टनिम्बूफलं स्वादु गुरु मारुतपित्तनुत्। गररोगविषघ्नं सि कफीत् क्लेशि च रक्तकृत्। शोषारुचिहृत्पार्श्वहृद्धरं बल्यञ्च हृद्यम्॥" भा.।

मिष्टपाकः। पुं। मिष्टान्ने। मधुररसविपक्वफलादौ। मोरब्बा। पाकराजः।

मिष्टरसः। पुं। स्वादुपाकरसे द्रव्ये। तद्गुणौ—श्लेष्मकृद् वातपित्तहरौ। सु.।

मिष्टान्नम्। क्लो। मधुरान्ने, परमान्नादौ। हला।

मिहिका। पुं। कर्पूरे। रा.नि.व.१२। नीहारे। शा.र.।

मिहिरः। पुं। अर्कवृक्षे। अम.। वै.निघ.२ भ.क्षय.चि.वैलोक्यचिन्तामणिरसे। क्लो। तारे। वै.निघ.।

मीनः। पुं। मत्स्यसामान्ये। अम.।

मीनकम्। क्लो। नयनाञ्जनविशेषे। उणा.।

मीनकाक्षः (नाक्षः)। पुं। शुक्लकरवीरे। वै.निघ.।

मीनगोधिका। स्त्री। वाप्याम्। सरोवर।

मीनघातो (इन्)। पुं। वकपक्षिणि। रा.नि.व.१९।

मीननेत्रा। स्त्री। गण्डदूर्व्वायां। रा.नि.व.८।

मीनपित्तम्। क्लो। कटुक्याम्। वै.निघ.। मत्स्यपित्ते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मौनरः। पुं। हारके। शाङ्गर। विका.।

मौनरङ्गः (ङ्गः)। पुं। मत्स्यरङ्गपक्षिणि। माछराङा पाथी। विका.। जलकाके। वै.निघ.।

मौनाण्डी। स्त्री। शर्करायां। रा.नि.व.१४।

मौनाम्त्रोणः। पुं। खञ्जरीटपक्षिणि। वै. निघ.। दर्दुरासे। मे.।

मौनाक्षी। स्त्री। ब्रह्मीशाकवृक्षे। रा.नि.व. ५। गण्डदूर्व्वायां। रा.नि.व.८। शर्करायाम्। वै.निघ.। सीमलतायाम्।

मौरः। पुं। पानीये। उणा.।

मौलकः। पुं। रोहितमत्स्ये। वै.निघ.।

मौलनम्। क्ली। नेत्रमुद्रणे। निदा.। व्याक.।

मौवा (न्)। स्त्री। उदरक्रमौ। शीकरे। सारे। उणा.।

मौशानः। पुं। महारग्वधवृक्षे। वै.निघ.।

मुकन्दः (कः)। पुं। पलाण्डौ। अ.टी.भ.। षष्टिकव्रीहिविशेषे। कुधान्यभेदे। भा.। सु.सू. ४६अ.। गुणाः कङ्कुवत्। च.सू.२७अ.।

मुकलः। पुं। आरग्वधे। वै.निघ.॥

मुकुन्दः (न्दुः)। पुं। कुन्दुरौ। कुन्दूरुकथोपौ। अम. अ.टी.भ.। श्वेतकरवीरे। उपोदिकायाम्। रत्नभेदे। पारदे। हे.च.। स्त्री। गाम्भारीवृक्षे। गामारगाछ। रा.नि.व.९।

मुकुरः। पुं। मल्लिकापुष्पवृक्षे। विश्व.। वकुलवृक्षे। आदर्शे। मे.। वदरवृक्षे। श.र.।

मुकुलः। पुं, क्ली। ईषद्विकसितकलिकायाम्। स्थूलकलिकायाम्। अम.। जैपालवृक्षे। 'पिस्ता' इति ख्याते फलवृक्षे। आत्मनि। शरीरे। धरणिः।

मुकुष्टः (कः)। पुं। वनमुद्गे। भूगानी। र. मा.। च.द.ज्व.चि.। "कुलत्थान् समुकुष्टकान्।" गुणाः—शीतलः ग्राही कफपित्तज्वरघ्नश्च। राज.।

मुकूलः। पुं। वकुलवृक्षे।

मुकूलकः। पुं। दन्तीवृक्षे। दन्ती गाछ। र.मा.। वा.चि.६अ.। [वै.निघ.।

मुक्तचण्डा। स्त्री। चिञ्चायाम्। तेँतुल।

मुक्तचक्षुः। पुं। सिंहे। श.मा.।

मुक्तपालेवतः। पुं। द्वैपखर्ज्जूरीवृक्षे। वै.निघ.।

मुक्तबन्धना (न्धा)। स्त्री। मल्लिकावृक्षे। वार्षिकीमल्लिकाभेदे। रा.नि.व.१०। See वार्षिका।

मुक्त(क्ता)माता। स्त्री। शुक्तौ। झिण्टुक। वै.निघ.।

मुक्तरसा। स्त्री। रास्नायाम्। र.मा.।

मुक्तवर्च्चाः (स्)। पुं। मुक्तवर्षीतिख्याते तृणविशेषे। भूक्तझूरी, भूक्तवर्षी। गुणाः—"मुक्तवर्च्चास्तथा रुद्रा वान्तिकृच्च विरेचनी। कासश्वासगरघ्नी च ज्वरहृत् कफवातनुत्॥ अस्य वै स्वरसः शीतः कफपित्तसारी च वामनः। पायुलेपान्मलोत्सारी कल्कीवालेषु प्रस्यते।

मुक्त(क्ता)वासः। पुं। शुक्तौ। झिण्टुक। श.च.।

मुक्तशृङ्गः। पुं। रोहीतकमत्स्ये। वै.निघ.।

मुक्तसारः। पुं। कदलीवृक्षे। वै.निघ.।

मुक्ता। स्त्री। मौक्तिके। प.मु.। मुक्+क्त, टाप्। हिं मति। तत्पर्य्यायाः,—मौक्तिकं शुक्तिजं शुक्तिबीजं शुक्तिमणिः शौक्तिकं शौक्तिकेयं हारी कुवलं सौम्या तारं तारा तौतिकं भौतिकं अन्तःसारं अम्भःसारं शीतलं नीरजं नक्षत्रं इन्दुरत्नं लक्ष्मी मुक्ताफलं शुक्तिका विन्दुफलं शशिप्रभं स्वच्छं हिमं हिमवलं सुधांशुभं सुधांशुरत्नं लक्षं शशिप्रियं हैमवतं भूरुहं। तद्योनिः यथा—"शुक्तिः शङ्खो गजक्रोडः फणी मत्स्यश्च दर्दुरः। वेणुरेते समाख्यातास्तज्जं मौक्तिकयोनयः॥" भा.पू.१भ.। गुणाः—सारका शीतला कषाया स्वादुः लेखनी चक्षुष्या च। राज.। अपिच,—"मुक्ता कषाया स्वादी च बलपुष्टिप्रदायिनी। दृष्या नेत्रहिता राजयक्ष्मघ्नी विषनाशिनी। स्त्रीणां कान्तिरतिकरी धारणात् ग्रहपापनुत्॥" भा.। रास्नायाम्। र.मा.। च.सू.४अ.वयःस्थापने।

मुक्तागारम्। क्ली। शुक्तौ। झिण्टुक। श.च.।

मुक्तापुष्पः। पुं। कुन्दपुष्पवृक्षे। कुन्द गाछ। रा.नि.व.१०।

मुक्ताप्रसूः। पुं। शुक्तौ। र.सु.।

मुक्ताफलम्। क्ली। कर्पूरे। लवलीफले। मे.। मौक्तिके। भा.।

मुक्ताभा। स्त्री। वृत्तमल्लिकायां। रा.नि.व.१०।

मुक्तामतो। स्त्री। शुक्तौ।

मुक्तायोनिः। स्त्री। शुक्तौ। मुक्ताजन्मस्थाने।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्ताशुक्तिः। स्त्री। मुक्तायोनिशुक्तौ, मुक्ताग्रहे। **मुक्तान्न**विणुक। मं मीतीशींप। कं मुक्तिनर्शिपु। गुणाः—"कटुः स्निग्धा श्वास-कृद्रोगहारिणी। शूलप्रशमनी रुच्या मधुरा दीपनी परा॥" रा.नि.व.१३।

मुक्ताश्फोटः (टा)। पुं, स्त्री। मुक्ताग्रहे। विणुक। अम.।

मुक्तिक्षा। स्त्री। मौक्तिके।

मुक्तिप्रदः। पुं। हारिद्रसुङ्गे। शारि मुग। वै.निघ.।

मुक्तिमुक्तः। पुं। शिलारसे। र.मा.।

मुखम्। क्ली। वदनविवरे। भा.। वदने। मूख। रा.नि.व.१८। तत्तु गर्भस्थस्य पञ्चभिः मासैर्भवति। सुश्रुतः। "ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च। गलो सुखादि सकलं समाङ्गं मुखमुच्यते।" भा। जीरके। पचिचञ्चौ। वै.निघ.। पुं। डङ्गके। ढेलो। श.च.।

मुखगन्धकः। पुं। पलाण्डौ। रा.नि.व.७।

मुखचोरः। पुं। जिह्वायाम्।

मुखचोरी। स्त्री, पुं (इन्)। पलाण्डौ। श.चि.। जिह्वायाम्। श.मा.।

मुखजः। पुं। दन्ते। वै.निघ.।

मुखदूषः (षः)। पुं। पलाण्डौ। रा.नि.व.७।

मुखदूषिका। स्त्री। मुखगतक्षुद्ररोगभेदे। वसन् फोड़ा। लक्षणं यथा—"श्लाक्ष्णैः कण्डूकप्रख्या कफमारुतशोणितैः। जायन्ते पिड़का युनां वक्त्रे या मुखदूषिकाः।" सु.नि.१३अ.।

मुखदूषी (इन्)। पुं। लशुने। रसुन। वै.निघ.।

मुखधावनम्। क्ली। मुखस्य प्रक्षालने। मूखधोवा। वा.चि.५अ.। See मुखप्रक्षालनम्।

मुखधौता। स्त्री। भार्य्यायाम्। वामूनशाटी। श.च.।

मुखपत्रः। पुं। तदाख्यशाकभेदे। तुन्दवचे।

मुखपाकः। पुं। अश्वस्य मुखरोगे। ज.द. २९अ.। मुखरोगभेदे। निदानलक्षणे यथा—"करोति वदनस्यान्तर्व्रणान् सर्व्वसरोऽनिलः। सञ्चारिणोऽरुषान् रुचान् ओष्ठौ तालौ चलत्वचौ। जिह्वा शीतासहा गुर्व्वी स्फुटिता कण्टकाचिता। विरुणीति च क्लच्छ्रेण मुखपाकी मुखस्य च। अधः प्रतिहतो वायुरर्शोगुल्मकफादिभिः। यात्यूर्द्धं वक्त्रदौर्गन्ध्यं कुर्व्वन्नूर्द्धं गदस्तु सः। मुखस्य पित्तजे पाके दाहोषौ तिक्तवक्त्रता। चारोचितचतसमा व्रणास्तद्वच्च रक्तजे। कफजे मधुरास्यत्वं कण्डूमत्-पिच्छिला व्रणाः। अन्तःकपोलमाश्रित्य श्यावपाण्डु, कर्फोऽर्बुदम्। कुर्य्यात्तत्पाटितं छिन्नं सुदितञ्च विवर्द्धते। मुखपाके भवेत्सार्त्तेः सर्वैः सर्व्वाकृतिर्नरैः।" वा.उ.२१अ.।

मुखपूरणम्। क्ली। गण्डूषे। च.।

मुखप्रसेकः। पुं। श्लेष्मजमुखव्याधौ। भा.।

मुखप्रक्षालनम्। क्ली। शीतोदकेन मुख-धावने। गुणाः—"नीलिकां मुखशोषञ्च पिड़कां व्यङ्गमेव च। रक्तपित्तकृतान् रोगान् सद्य एव विनाशयेत्।" सु.चि.२४अ.।

मुखप्रियः। पुं। नागरङ्गवृक्षे। भा.। स्त्री। कर्कटिकायाम्। काँकुड़। वै.निघ.।

मुखभङ्गः। पुं। श्वेतशिग्रौ। शोदा शजिना।

मुखभूषणम्। क्ली। ताम्बूले। निदा.।

मुखमण्डलकः। पुं। तिलकवृक्षे। तिलगाछ। रा.नि.व.१०।

मुखमाधुर्य्यम्। क्ली। श्लेष्मजमुखरोगे। मूखमिठि। भा.।

मुखमुखि(ण्डि)का। स्त्री। बालरोगभेदे। लक्षणं यथा—"सस्राङ्गः सुरुचिरपाणिपादवक्त्रः वक्त्राग्नौ कलुषशिराततोदरी यः। क्षीणेगो भवति च सूचतुल्यगन्धिः स ज्ञेयः शिशुरथ वक्त्रमुखि-काक्तः॥" सु.उ.२७अ.।

मुखमोदः। पुं। शीभाञ्जनवृक्षे। शजिना गाछ। रा.नि.व.७।

मुखरः। पुं। शङ्खे। काके। रा.नि.व.१९।

मुखरोगः। पुं। ओष्ठादिरोगे। ओष्ठद्वयदन्त-मूलदन्तनिह्वातालुगलरूपं समाङ्गं मुखम्, तत्रस्थो यो रोगः स मुखरोग इत्युच्यते। मुखरोगसंख्या —ओष्ठयोरष्टौ, एकादशेति वाभटः। दन्तमूले षोड़श, दन्तेषु अष्टौ, जिह्वायां पञ्च, तालुनि नव, कण्ठे अष्टादश, सर्व्वेषु वय इति समष्टिर्मुख-रोगाः साकल्येन भवन्ति। "ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च। गलो मुखानि सकलं समाङ्गं मुखमुच्यते। स्युरष्टावोष्ठयोर्दन्तमूले तु दश

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षट् तथा। दन्तेष्वष्टौ च जिह्वायां पञ्च स्युर्नव तालुनि। कण्ठ त्वष्टादश प्रोक्तास्त्वयः सर्व्वेषु च स्मृताः। एवं मुखामया: सर्व्वे समधिष्ठिर्मता बुधैः॥" भा.म.४भ.सु.रो.चि.। निदानं—"आनूपमांसादि-सेवनात् कुपिता दोषा मुखरोगानुत्पादयन्ति। तदुक्तं—"आनूपपिशितक्षारदधिक्षीरनिषेवनात्। मुखमध्ये गदान् कुर्य्युः क्रुद्धा दोषाः कफोत्तराः॥" इति। मा.नि.। "मात्स्यमाहिषवाराहपिशिता-मकमूलकं। माषसूपदधिक्षीरगुडक्षारसक्षणितम्। अर्वाक् शय्याञ्च भजतो द्विषतो दन्तधावनम्। धूमच्छर्दनगण्डूषानुचितञ्च शिराव्यधम्। क्रुद्धाः श्लेष्मोल्बणा दोषाः कुर्व्वन्त्यन्तर्मुखे गदान्। ओष्ठ-कोपे तु पवनात् स्फुटितौष्ठौ सहारुजौ। दाल्येते परिपाट्येते परुषासितकर्कशौ। पित्तात् तीक्ष्णा-सृष्टौ पीतौ सर्षपाकृतिभिश्चितौ। पिटकाभिर्महा-क्लेदावाशुपाकौ कफात्मकौ। शीतासहौ गुरू शूनौ रुवं पिटिकाचितौ॥ सन्निपातादनेकाभौ दुर्गन्धा-स्राव-पिच्छिलौ। अकस्मान् म्लान संशून-रुजौ विषमपाकिनौ॥ रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ। खर्ज्जूरसदृशं चात्र क्षीणे रक्तोऽर्बुदं भवेत्॥ मांसपिण्डोपमौ मांसात् स्यातां सूर्च्छत्कृभी क्रमात्। तैलाभस्रवयुक्तौ दौ सकण्डू मेदसा मृदू॥ चलजावबदीर्य्येते पाट्येते चासकृत्पुनः॥" वा.उ. २१अ.। अस्य यथा—"उपकुशस्तथा लिप्ती जिह्वास्तम्भस्तथैव च। अलाबुकः प्रसूनश्च दन्त-रोगी गलग्रहः॥ सुखपाकोऽधिदन्तश्च रोहिणी क्षीपजिह्विका। गण्डरोगौष्ठरोगौ च गलशालूक एव च॥ इत्येते वाजिनां रोगा मुखजाः परि-कीर्त्तिताः। एषां निदानं वक्ष्यामि चिकित्साञ्च यथाक्रमम्॥ समेभ्यो दन्तमांसेभ्यो यस्य निर्य्याति शोणितम्। चलदन्तस्य वाहस्य विद्यादुपकुशं भिषक्॥ चतुर्दशे यदा दन्ती भवत्यभ्यन्तराश्रयः। श्लीपेश इति तं विद्यात् श्लेष्मरक्तसमुद्भवम्॥ येनाश्वो दुर्म्मनास्त्यर्थं मन्दं पिबति खादति। जर्ज्जरं कासते चैव बलाच्च परिहीयते॥ शूना यस्य भवेज्जिह्वा वाजिनः स्फोटकैर्युता। प्रक्लिन्ना वापि यस्यैव जिह्वास्तम्भीति तं विदुः॥ सुखं दुर्गन्धिकञ्चैव तालुकः शूनको भवेत्। यासविद्वेषिणोऽश्वस्य रोगं विद्यादलाबुकम्॥ ओष्ठतालुवक्त्रे वा मन्दाहारे तथैव च। संशीर्णे दन्तमांसे च प्रशूनं व्याधिमादिशेत्॥ हन्वोश्चैव तथा गण्डे श्वयथुर्यस्य जायते। जिह्वामूले गले चापि तस्य विद्याद्गल-ग्रहम्॥ सक्तौष्ठतालुदंशेषु व्रणं यस्योपजायते। विवर्णन्तु मुखं दृष्ट्वा सुखपाकं तमादिशेत्॥ दन्तानामुपरिष्टात्तु यदा दन्तस्य सम्भवः। अधिदन्तः स विख्यातो मन्दाहारस्य वाजिनः॥ यस्य शूनाच्चिकूटस्य गले शीथः प्रलम्बते। यवसद्विषिणोऽश्वस्य रोहिणीरोगमादिशेत्॥ अधस्तादथ जिह्वायाः श्वयथुर्यस्य जायते। तं विद्यादुपजिह्विकां मुखरोगन्तु वाजिनाम्॥ अधिजिह्वाभिधानन्तु उपरिष्टाद्विनिर्दिशेत्। गण्डाभ्यन्तरगो गण्डो गण्डरोग इति स्मृतः॥ सव्रणः पिडकाकीर्णः ओष्ठ उच्छून एव च। स्फुटितः कठिनश्चैव ओष्ठरोगोऽभिधीयते॥ गलाभ्यन्तरशोथेन श्वासमुच्छ्वसते हयः। गलशालू-किनं विद्यात् कासार्त्तञ्च तुरङ्गमम्॥ सर्व्वेषां मुखरोगाणां सम्भवः श्लेष्मशोणितम्॥" ज.द. २९अ.।

मुखलाङ्गलः। पुं। शूकरे। जटा.।

मुखलिप्तता (लेपः)। पुं। मुखरोगे। मुख चट्चट् करा। भा.।

मुखवल्लभः। पुं। दाड़िम्बवृक्षे। श.मा.।

मुखवाचिका। स्त्री। अश्वष्ठायां। रा.नि.व.४।

मुखवासः। पुं। तरम्बूजलतायाम्। तरमूज गाछ। र.मा.। फुटी इति प्रसिद्धे फलशाक-विशेषे। गन्धतृणे। आम्बुदेशख्याते सुगन्धभूतृणे। रा.नि.व.८।

मुखवासनः। त्रि। सुखसुरभीकरणद्रव्य-मात्रे। अम.।

मुखविलुण्ठिका। स्त्री। छाग्याम्। श.र.।

मुखविष्ठा। स्त्री। तैलपायिकायाम्। तेला-पोका। हे.च.।

मुखवैदल्लः। पुं। तन्नामकवायव्यकीटे। तैर्दष्टानां वातनिमित्तजा विविधा रोगा भवन्ति। सु.कल्प.८अ.।

मुखव्यङ्गः। पुं। गण्डगतक्षुद्ररोगे। मेचेता। "क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः। मुख-मागत्य सहसा सण्डलं विसृजत्यतः। नीरुजं तनुकं श्यावं मुखव्यङ्गं तमादिशेत्।" मा.नि.। निदा.।

मुखशुद्धिः। स्त्री। मुखशोधने।

मुखशोधनम्। क्ली। त्वचि। गुड़त्वक्, दारुचिनि। रा.नि.व.६।

मुखशोधनः। त्रि। मुखशोधकद्रव्यमात्रे। पुं। कटुरसे। हे.च।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखशोधी (द्दन्) । पुं । जम्बीरवृक्षे । रा.नि. व.११ । खदिरे ।

मुखशोषः । पुं । गण्डास्यतायाम् । निदा. ।

मुखसम्भवम् । क्ली । पुष्करमूले । वै.निघ. ।

मुखसिञ्चनमन्त्रः । पुं । पीतविषस्य सुखसिञ्चनार्थजलस्य मन्त्रपूतकरणमन्त्रे । जलपड़ा । "ओं हर हर नीलकण्ठ अमृतं स्रावय स्रावय हुङ्कारेण विष ग्रस ग्रस क्ष्रौङ्कारेण हर हर ह्रौङ्कारेण अमृत स्रावय स्रावय हर हर नाशि विषम् उच्छिरे ।" अग्नि.३स्थान.५६अ. ।

मुखसुरम् । क्ली । तालसुरायाम् । ताड़ी । त्रिका. । अधरामृते ।

मुखसूची । स्त्री । आम्रातवृक्षे । वै.निघ. ।

मुखस्रावः । पुं । लालायाम् । रा.नि.व.१८ । बालकरोगभेदे । निदा. ।

मुखामयः । पुं । मुखरोगे । भा. ।

मुखामोदः (दा) । पुं, स्त्री । सल्लकीवृक्षे । रा.नि.व.११ । क्लाग्निग्रौ । वै.निघ. ।

मुखार्जकः । पुं । अर्जकवृक्षे । क्षुद्रतुलसी गाछ । रा.नि.व.१० ।

मुखालुः । पुं । स्वनामख्यातकन्दशाकविशेषे । मिष्ठे आलू । गुणाः—मिष्टः शीतः पित्तघ्नः रुच्यः वातलः दाहशोषहृणान्नघ्नश्च । रा.नि.व.७ ।

मुखास्रवः । पुं । मुखस्रावे । थूथूं ।

मुखास्त्रः । पुं । कर्कटे । काँकड़ा । त्रिका. ।

मुखिकः । पुं । शुष्ककवृक्षे । वै.निघ. ।

मुख्यधातुः । पुं । स्वर्णे ।

मुख्यलवणम् । क्ली । सैन्धवलवणे ।

मुगूहः । पुं । हरिणविशेषे । वै.निघ. । दात्यूहपक्षिणि । भूरि.प्र. ।

मुचकः । पुं । लाक्षायाम् । व.निघ. ।

मुच(चु)कुन्दः । पुं । (Pterospermum suber folium.) स्वनामख्यातवृक्षे । मूचुकुन्द फूलेर गाछ । र.मा. । कोङ्कणेऽपि मुचुकुन्द इति ख्यातः । हिं मेकचन्द । तें लोलगु । उत्. वद्दली । ता. टडडो । तत्पर्य्यायाः,—चक्रवृक्षः चिचकः प्रतिबिम्बुकः बहुपुत्रः सुदनः हरिवल्लभः सुपुष्पः अर्घ्यार्हः लक्षणकः रक्तप्रसवः । गुणाः—कटुः तिक्तः कफकासघ्नः कण्डूदोषहरः लघ्वीषच्छीतः शीर्णज्वरविनाशनः व्रणघ्नश्च । रा.नि. व.१० । पुष्पगुणाः—"मुचुकुन्दं शिरोऽतिजित् ।" राज.५अ. । क्रमुकमदने । सु.चि.१८अ. ।

मुचिलिन्दः (कः) । पुं । मुचुकुन्दवृक्षे । तिलकवृक्षे । (कः) राजादनवृक्षे । वै.निघ. ।

मुचुकः । पुं । पिचुके, सदनवृक्षभेदे । काँटामयना । प.मु. ।

मुचुटी । स्त्री । अङ्गुलिमोटने । आङ्गुल मटकान । ग.र. । मुटी । मुटो । हे.च. ।

मुञ्चकः । पुं । शुष्ककवृक्षे । रा.नि.व.११ । द्रव्यगे ।

मुञ्जः । पुं । (Saccharum munga.) स्वनामख्यातदृढतृणविशेषे । मुञ्जतृणमिति भागीरथीतीरे प्रसिद्धः । मूञ्ज । तें मुंजगडिड, अग्निस्फोटि । स द्विविधः भद्रमुञ्ज-मुञ्जभेदेन । तत्पर्य्यायाः,—इक्षुकाण्डः मुञ्जानकः मौञ्जीतृणाख्यः ब्रह्मेक्ष्वः तेजनाह्वयः वाणीरकः शीरी दर्भाह्वयः दूरमूलः दृढतृणः दृढमूलः बहुप्रजः रञ्जनः शल्लभङ्गः सुमेखलः । गुणाः—शीतवीर्य्यो मधुररसः कफपित्तघ्नः ग्रहरक्षादिरक्षासु पावनः भूतघ्नश्च । रा.नि.व.८ । "मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा । दाहतृष्णाविषर्षाममूवक्षच्छ्राचिरोगजित् । दीपनद्वयहरं द्रव्यं मेखलात्पयुज्यते ॥" भा. । शरतृणे । प.मु. ।

मुञ्जकः (जालम्) । पुं, क्ली । व्रणस्य क्लमिजन्यचिरोगे । "एकेन मुञ्जमाख्यातं बहुभिर्मुञ्जजालकं । क्लमिभिः पटलान्तःस्थं विद्यान्नेत्रजाद्वयमिति । प्रथमं तैलवर्णाभं द्वितीयं स्फटिकप्रभं । रक्ताभञ्च तृतीयञ्च चतुर्थं तैलमुच्यते । प्रथमं पटलं साध्यं द्वितीयञ्च तथा भवेत् । तृतीयं कृच्छ्रसाध्यं स्याच्चतुर्थं नैव सिध्यति ॥" ज.द ३०अ. ।

मुञ्जतृणम् । क्ली । मुञ्जे । मूञ्ज । रा.नि.व.८ ।

मुञ्जनकः । पुं । मुञ्जे । मूञ्ज । रा.नि.व.८ ।

मुञ्जमणिः । पुं । पुष्परागमणौ । भा. ।

मुञ्ज(ञ्जा)रम् । क्ली । शालूककन्दे । ग.मा. । मृणाले । वै.निघ. ।

मुञ्जवलयः । पुं । प्रसाधनार्थं जलरक्षणाधारविशेषे । सु.सू.४५अ. ।

मुञ्जवान् । पुं । सोमलतायाभेदे । सु.चि.२९अ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुञ्जातः (कः) । पुं । स्वनामप्रसिद्धे औत्तरापथिककन्दविशेषे । कस्तुरमुञ्जतृणे । एतद्भावे तालमञ्जा शाब्दे । वस्. मुञ्जाराकन्द । गुणाः—अतिस्वादुः हृष्यः पित्तानिलघ्नश्च । राज. । मुञ्जातपुष्पगुणाः—"मुञ्जातकं परं स्वादु हृष्यं पित्तानिलापहं ।" राज.३प. । सि.यो.अपस्मा.चि महाचैतसघृते । अश्वगन्धाघृते । सु.सू.३९अ.कफशमने । वनशूरणे ।

मुञ्जातकफलम् । क्ली । मुञ्जातकबीजे । च. द.हृष्य.चि.गोधूमाद्यघृते । एतद्भावे तालमस्तकं देयम् ।

मुण्डः । पुं । स्थाणुवृक्षे । मस्तके । रा.नि.व. १८ । क्ली । मुण्डलौहे । रा.नि.व.१३ । बीजे । रा.नि.व.६ ।

मुण्डक(ज)म् । क्ली । मुण्डलौहे । रा.नि.व. १३ । पुं (कः) । नापिते । हे.च. । माधवीलतायाम् ।

मुण्डकिट्टः । पुं, क्ली । मुण्डलौहभेदे । मण्डूरलौहे । र.सा.सं. ।

मुण्डचणकः । पुं । वृहच्चणके । बड़ छोला । प.मु. । कलाये । रा.नि.व.१६ ।

मुण्डजम् । क्ली । तीक्ष्णायसे । ईस्पात । ।

मुण्डनम् । स्त्री । वपने, केशच्छेदने । मोंथा मूड़ान । हे.च. ।

मुण्डनकः । पुं । शंतवटवृक्षे । वै.निघ. ।

मुण्डन(नि)का । स्त्री । (नका) निःशूकस्थूलशालिधान्ये, मुण्डशाली । बोरो धान । रा.नि. व.१६ । (निका) मुण्डितिकायाम् । भूँइकोहड़ा । रा.नि.व.५ ।

मुण्डफलः । पुं । नारिकेलवृक्षे । श.र. ।

मुण्डलौहम् । क्ली । लौहविशेषे । तच्च मृदुस्निग्धकठोरमिति त्रिधा । रा.नि.व.१३ ।

मुण्डशालिः । पुं । स्वनामख्यातनिःशूकशालिधान्ये । शूकशून्य धान, बोरो धान । मं निःशूकशालि । कं बोल्लनु । वस्. बीड़के भात । तत्पर्यायौ,—निःशूकः अशूकः । गुणाः—विदोषघ्नः मधुराम्लो बलप्रद. रुच्यः दीपनः पथ्यः सुखजाठरजाहरश्च । रा.नि.व.१६ ।

मुण्डा (ण्ड्या) । स्त्री । महाशावणिकायाम् । बड़ थूलकुड़ि । भूँइबेरी । रा.नि.व.५ । मे. । शार्ङ्गधरे महानीलकण्ठरसे ।

मुण्डायसम् । क्ली । मुण्डलौहे । रा.नि.व.१३ ।

मुण्डिका । स्त्री । गोरक्षमुण्ड्याम् । भूँइबेरी । रा.नि.व.२३ ।

मुण्डितम् । क्ली । खोहे । रा.नि.व.१३ ।

मुण्डितिका (निका, नी) । स्त्री । (Sphaeranthus Indicus. Syn. S. Hirtus.) मुण्डीर्य्याम् । भूँइबेरी, बड़ थूलकुड़ि । हिं मुण्डी, गोरखमुण्डी । तें बीड़सरपुचेट्टु । वस्. ता. कीड़क । तत्पर्य्यायाः,—अलम्बूषा श्रावणा श्रावणी पलङ्कषा कदम्बपुष्पा भूतघ्नी कुम्भला अरुणा मुण्डनिका मुण्डीरिका । च.द. सि.यो.र.पि.चि.खण्डखाद्यलोहे । "वृषमुण्डितिकाबला:।" गुणाः—"मुण्डितिका कटुः पाके वीर्य्येणोष्णा मधुरा लघुः । मेध्या गण्डापचीक्लेदकृमिश्वित्रविषापहुत् । श्लोपदारुच्यपस्मारप्लीहमेदोगदार्तिहृत् । महामुण्डी तु तत्तुल्या गुणैरुक्ता महर्षिभिः ॥" भा. ।

मुण्डिनी । स्त्री । कस्तूरीमृगे । वै.निघ. ।

मुण्डी (ण्डिन्) । पुं । मृगभेदे । तल्लक्षणम्:— "मुण्डी तु ज्वरकासास्रवमयश्वासापहो हिमः ।"

मुण्डी । स्त्री । मुण्डितिकायाम् । भूँइबेरी । हिं गोरखमुण्डी । प.मु. । जटा. । (पर्पटीरसे । वै.निघ.२भ.चय.चि.नवरत्नराजवृगाङ्के । रस.र. स्तनरो.चि.) । "मुण्डीमूलं दशपलं ।"

मुण्डीरिका (री) । स्त्री । मुण्डितिकायाम् । भूँइबेरी । अलम्बुषायाम् । प.मु. ।

मुण्डीवृक्षानुकारकः । पुं । सुचुकुन्दवृक्षे । प.मु. । See सुचुकुन्दः ।

मुत् (दा) । स्त्री । वृद्धौषधौ । रा.नि.व.५ ।

मुत्तोली । स्त्री । मूटिकायाम् । वा.कल्प.१अ. ।

मुदिरः । पुं । मेघे । उणा. । [११ ।

मुदिरफलः । पुं । विकङ्कवृक्षे । रा.नि.व.

मुदी । स्त्री । कृष्णगान्धारीवृक्षे । ज्योत्स्नायाम् । वै.निघ. ।

मुद्गः । पुं । (Phaseolus mungo.) स्वनामख्यातशमीधान्यभेदे । मुग इति खीके । मूग । हिं मूंग । मं मुग । कं हेसरुबेळ । तें पेसलु ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्वा. सूजि । तत्पर्य्यायाः—सूपयोनिः वर्ष्याहः रक्षीत्तमः मुक्तिप्रदः हयानन्दः सुफलः वाजिभोजनः हरिनामा । तद्भेदा यथा—"कृष्णमुद्गा महामुद्गा गौरा हरितपीतकाः । श्वेता रक्तास्तु निर्दिष्टा लघवः पूर्व्वपूर्व्वतः । प्रधाना हरितास्तत्र वन्यमुद्गास्तु मुद्गवत् ॥" राज.३५. । सा. गुणाः—"कषाय-मधुरौ रूक्षः शीतः पाके कटुर्लघुः । विशदः श्लेष्मपित्तघ्नः मुद्गः सूप्योत्तमो मतः ॥" च.सू. २७अ. । "मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः । स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तया । कृष्णमुद्गो महामुद्गो हरितः पीतकस्तथा । श्वेतो रक्तश्च तेषान्तु पूर्व्वः पूर्व्वो लघुः स्मृतः । सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः । चरकादिभिरप्युक्त एष एव गुणाधिकः ॥" भा.पू. १भ.धा.व. । "शीतः कषायी मधुरो लघुः स्यात् पैत्तास्रमूदीषहरः सरश्च । विषाकतोऽसौ कटुक-प्रधानो मुद्गस्तथान्यः कथितोऽतिरम्यः ॥" अवि. १५अ. । रक्तपित्ते पथ्यः । सि.यो.र.पि.चि. खण्डखाद्यलौहे । जलवायसे । हे.च. ।

मुद्गदला । स्त्री । मुद्गपर्ण्याम् । भूगांनी । चि.क्र.क.प्रद.चि. ।

मुद्गपर्णी । स्त्री । (Phaseolus Trilobus or P. Aconitifolius.) वनमुद्गे । भूगांनी । हिं माठभुगानी । मं राणमुग । कं काडिसरु । तें पिल्लपेसरचेट्टु । तत्पर्य्यायाः,—काकमुद्गा सहा शिम्बिपर्णिका शिम्बिपर्णी शिम्बी क्षुद्रसहा साञ्जारगन्धिका रिङ्गिनी क्रमा सूर्पपर्णी कुरङ्गिका कौशिला वनजा वनमुद्गा वनीद्भवा वन्या आरण्य-मुद्गा मुद्गदला करङ्किका । सु.सू.३८अ.काकोल्यादिः । वा.सू.१५अ. जीवन्त्यादिः । "भेदे द्वे मुद्गमाषपर्ण्यौ च । सा द्विधा सामान्या साञ्जार-गन्धा चेति । प.मु. । गुणाः—"मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला । चक्षुष्या चतथोष्णघ्नी ग्राहिणी ज्वरदाहनुत् । दीपवयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित् ॥" भा. । तद्यूषगुणाः—"आरण्यमुद्गयूषस्तु हृद्यो धातुविवर्द्धनः । रक्तपित्त-ज्वरतापपित्तकृच्छ्रविनाशनः ॥" द्रव्यगु. ।

मुद्गभुक् (भोजी) । पुं । घोटके । विका. । रा.नि.व.१९ ।

मुद्गमोदकः । पुं । पक्वान्नभेदे । मतिचूर । भूगेर लाडू । गुणाः—लघुः ग्राही त्रिदोषघ्नः चक्षुष्यः स्वादुः ज्वरघ्नः बल्यः शीतलः रुच्यश्च । तस्याधनविधिः यथा—"मुद्गानां घृतसौ सम्यक् गोलयेन्निर्म्मलाम्बुना । कटाहस्थघृतस्यार्द्धं भर्ज्जरं स्थापयेत्ततः । घृतसीन्तु द्रवीभूतां प्रक्षिपेत् भर्ज्जरी-परि । पतन्ति बिन्दवस्तस्मात् तान् सुपक्वान् समुद्धरेत् । सितापाकेन संयोज्य कुर्य्यात् युक्तेन मोदकान् ॥" भा. ।

मुद्गयूषः । पुं, क्ली । चतुर्भागावशेषसाधितमुद्गरसे । मूगेर झोल । तत्प्रस्तुतविधिर्यथा,—"मुद्गानां द्विदलं तोये घृतसद्दार्द्रकीन्मिते । पादस्थं सर्द्दितं पूतं दाड़िमस्य पलेन तत् ॥ युक्तं सैन्धव-विश्वाम्ल-धान्यकैः पादकान्वितैः । कणाजीरकयोर्युक्तं शनैर्लेशनावचूर्णितं ॥ संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्म-हरो मतः । मुद्गानामुत्तमो यूषो दीपनः शीतलो लघुः । ब्रह्मोऽयं जन्तु तृट्-दाह-कफ-पित्त-ज्वरासजित् ॥" भा. । प.सु. । स च पित्तपानात्यये वातपित्तज्वरे च हितः । सि.यो.पाना.चि. । च.द. ज्व.चि. । गुणाः—पित्तज्वरघ्नः लघुः सन्तापहरः अरोचकघ्नः रक्तप्रसादनः, सैन्धवयुक्तः सर्व्वरोगघ्नश्च । रा.नि.व.१६ । "शीतलं मधुरं मौद्गयूषं पित्तविकार-जित् । तच्च वातहरं प्रोक्तं ज्वराणां शमनं परम् ॥" अवि.१३अ. । "मुद्गयूषो लघुर्ग्राही कफपित्तहरो हिमः । स्वादुर्नेत्र्योऽनिलहरः क्लमाघः शुक्रवर्द्धनः । रक्तपित्तज्वरहरस्तुवरस्त्रसिकारकः । सन्निपातज्वर-हरो ग्लानिनाशकरः स्मृतः ॥" द्रव्य.गु. ।

मुद्गरः । पुं । स्वनामख्याते पुष्पवृक्षविशेषे । गन्धराज । तत्पर्य्यायाः,—गन्धसारः सुमनसः अतिगन्धः गन्धराजः प्रियः अलिष्टः सुगिष्टः । गुणाः—मधुरः शीतः सुरभिः सुखदः पित्तप्रकोप-घ्नश्च । रा.नि.व.१० । मल्लिकावृक्षे । मल्यविशेषे । मांगुर गाछ । कर्म्मरङ्गवृक्षे । कांगरांङा । रा.नि.व.११ । क्ली । मल्लिकापुष्पभेदे । मे. ।

मुद्गरकः । पुं । कर्म्मरङ्गवृक्षे । कांगरांङ्गा । गाछ । रा.नि.व.११ ।

मुद्गरफलः । पु । कर्म्मरङ्गवृक्षे । क्ली । तत्फले । वै.निघ. ।

मुद्गलम् । क्ली । रोहिषतृणे । रा.नि.व.८ ।

मुद्गवटकः । पुं । मुद्गकृतवटके । मूगेर बड़ा । गुणाः—मौद्गो वटो गुरू रूक्षो वातपित्तास्रदो मतः । श्लेष्मलः पुष्टिबलकृत् शुक्रलो बलदोऽल्प-वृट् ॥" वै.निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्गष्टः (क्टः)। पुं। वनमुद्गे। मूगानी। भा. र.। अम.।

मुद्गामलकयूषः। पुं। मुद्गामलकजन्ये यूषभेदे। गुणाः—'मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः।' सु.सू.४६ अ.। "मुद्गामलकयूषस्तु भेदी पित्तानिलापहः। लघुर्दाहश्रमतृष्णाशीतो मूर्च्छाक्लमप्रदापहः॥"

मुद्गार्द्रवटकः। पुं। वटकविशेषे। आदावड़ा। 'मुद्गपिष्टौ विरचितान् वटकांस्तेलपाचितान्। क्षौद्रेण चूर्णयेत् सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत्। शुष्कं हिङ्गार्द्रकं सूक्ष्मं मरिचं जीरकं तथा। निष्कुरसं यवानीञ्च युक्त्या सर्व्वं विमिश्रयेत्। मुद्गपिष्टौ पचेत्सम्यक् स्थाल्यामङ्गारकोपरि। तस्यास्तु गोलकं कुर्य्यात् तन्मध्ये पूरणङ्क्षिपेत्। तैले तान् गोलकान् पक्वा क्षौद्रितायां निमज्जयेत्॥" गुणाः—"मुद्गार्द्रवटका रुच्या लघवो बलकारकाः। दीपनास्तर्पणाः पथ्याश्चिरदोषेषु प्रपूजिताः॥" भा.।

मुद्गोलुब्धः। पुं। किञ्चिद्गृष्टमुद्गे। सु.चि. २३अ.।

मुद्र(द्रि)णी। स्त्री। लाचायाम्। रा.नि.व.६।

मुद्राशङ्खम्। क्ली। स्वनामख्यातस्वनिजपदार्थे। मुद्राशङ्ख। गुणौ—सङ्कोचनम् आवरकञ्च।

मुद्रिका। स्त्री। छेदनार्थं भेदनार्थञ्च दशाङ्गुलशस्त्रविशेषे। सा च प्रदेशिन्यग्रपर्व्वप्रदेशप्रमाणा कर्त्तरीति कथ्यते। सु.सू.८अ.।

मुनिः। पुं। दमनकवृक्षे। दौना। रा.नि.व. १०। वकवृक्षे। भैष.कुष्ठ.चि.। "मुनिगुञ्जाखुशीपयः।" पलाशवृक्षे। प्रियालवृक्षे। मदनवृक्षे।

मुनिका। स्त्री। ब्राह्मीक्षुपे। वै.निघ.।

मुनिखर्जु(र्ज)रिका। स्त्री। श्रेष्ठपिण्डीखर्जूरे। रा.नि.व.११।

मुनिच्छदः। पुं। सप्तपर्णवृक्षे। रा.नि.व.१९।

मुनितरुः। पुं। रक्तवकवृक्षे। लाल वकफूलेर गाछ। रा.मा.।

मुनिद्रुः (मः)। पुं। श्योणाकवृक्षे। प.मु.। पृथुशिम्बश्योणाकवृक्षे। बड़ शोणागाछ। रा.नि. व.९। अगस्त्यवृक्षे। वकफूलेर गाछ। रा.नि. व.१०।

मुनिधान्यम्। क्ली। नीवारधान्ये। उड़िधान। रा.नि.व.१६।

मुनिनिर्म्मितः। पुं। डिण्डिशवृक्षे। ढ्याँड़श गाछ। गुणाः—"डिण्डिशी रुचिकृद्दीपी पित्तश्लेष्मापहः स्मृतः। सुशीतो वातलो रुच्यो मूत्रलश्चाश्मरीहरः॥" भा.पू. भ.प्रा.व.।

मुनिपत्रः। पुं। दमनकवृक्षे। दना। वै.निघ.।

मुनिपादपः। पुं। वकवृक्षे। प.मु.।

मुनिपित्तलम्। क्ली। तास्रे। त्रिका.।

मुनिपुत्रः (क्त्रः)। पुं। दमनकवृक्षे। दना। भा.। (क्त्रः) खञ्जनपक्षिणि। त्रिका.।

मुनिपुष्पम्। पुं. क्ली। अगस्तिपुष्पे। वकफूल। शब्दकल्प.।

मुनिपूगः। पुं। पूगवृक्षभेदे। रामगुवा। त्रिका.।

मुनिप्रियः। पुं। पक्षिराजशालौ। रा.नि.व. १६। पिण्डखर्जूरवृक्षे। प्रियालवृक्षे। वै.निघ.। स्त्री (या)। तिलवासिनीशालौ। रा.नि.व.१६।

मुनिफलः। पुं। अगस्तिफलवृक्षे। वकफूलेर शोँटा। वै.निघ.।

मुनिभक्त(च्य)म्। क्ली। देवधान्ये, नीवारधान्ये। उड़िधान। वै.निघ.।

मुनिभेषजम्। क्ली। हरीतक्याम्। लक्षणे। वकवृक्षे। मे.।

मुनिभोजनम्। क्ली। श्यामाकधान्ये। शामाधान। नीवारे। वै.निघ.।

मुनिवरः। पुं। पुण्डरीकवृक्षे। पुण्डरिया। वै.निघ.कास.चि.पर्पटीरसे।

मुनिवल्लभः। पुं। प्रियालवृक्षे। पेयाशाल। वै.निघ.।

मुनिवृक्षः। पुं। अगस्तिवृक्षे। प.मु.।

मुनिशस्त्रम्। क्ली। श्वेतदर्भे। वै.निघ.।

मुनिसु(सू)तः। पुं। दमनकवृक्षे। भा.।

मुनिह्वयः। पुं। समष्ठिलचुपे। रा.नि.व.४।

मुनीन्द्रः। पुं। अगस्तिवृक्षे। लोध्रवृक्षे। वै. निघ.। [प.मु.।

मुनीष्टम्। क्ली। नीवारधान्ये। उड़िधान।

मुमूर्षा। स्त्री। मरणेच्छायाम्।

मुमूर्षुः। त्रि। मरणोन्मुखे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुरगण्डः। पुं। वरण्डे। वर्णक। जटा।

मुरङ्गिका। स्त्री। मूर्व्यायाम्। वै.निघ.।

मुर(रु)ङ्गो। स्त्री। कृष्णशिग्वी। वै.निघ.। रक्तपुष्पशोभाञ्जनवृक्षे। सु.सू.३८अ.शिरोरो.चि.। अत्र मुरङ्गीति डल्हणपाठः, तेन स एवार्थः। सु. चि.३अ.। काकमाच्याम्।

मुरजफलः। पुं। पनसवृक्षे। त्रिका.।

मुरलः। पुं। मत्स्यविशेषे। मउरल: माछ। गुणाः—बृंहणो हृष्यस्तन्यश्लेष्मकरश्च। सु.सू.४६अ.

मुरा (मांसी)। स्त्री। गुर्जरदेशे स्त्रीनामख्यातगन्धद्रव्ये। मुराया मांसी। मं मुरा। कं मुरे। तत्पर्य्यायाः,—तालपर्णी दैत्या गन्धकुटी गन्धिनी भूतगन्धा। सिद्धयो.च.यक्ष्मचन्दनादितैले। भा. म.१भ. चित्तविभ्रमजयेचि.। गुणाः—कटुः तिक्ता शीता कषाया कफपित्तहृत् श्वासरक्तविषदाहभ्रमतृष्णाघ्नी च। रा.नि.व.१२। "सुरा तिक्ता हिमा स्वादी लघ्वी पित्तानिलापहा। ज्वरास्रभूतरक्तघ्नी कुष्ठकासविनाशिनी॥" भा.पू.१भ.। "किञ्चित् पीता सुरा श्रेष्ठा मांसी पिङ्गजटाकृतिः।" भैष.।

मुर्भिणी। स्त्री। अङ्गारधानिकायाम्। श.च.।

मुर्म्मुरः। पुं। तुषाग्नौ। तुषेर आगुन। मे.।

मुशटी। स्त्री। श्वेतकन्दली। श्वेत कन्धुयान। हे.च.।

मुश(ष)लिका (ली)। स्त्री। (Curculigo orchioides or hypoxis orchioides.) तालमूलीनामकन्दशाके। तालमूली। हिं मुषली, काली मुषली, सिया। तें नेलतलि गड्डलि, नेलतादि। रा.नि.व.७। र.सा.सं.। शाल्यल्याम्। वा.उ.३२अ.। गुणाः—ध्वजभङ्गे अर्शसि प्रमेहे च हिता। See तालमूली। गृहगोधिकायाम्। श.र.।

मुश(ष)लोकन्दः। पुं। तालमूल्याम्। वै.निघ.।

मुषकः। पुं। मूषिके। वै.निघ.।

मुषा(षी)। स्त्री। स्वर्णादिगालनपात्रे। भूचि। अ.टी.रा.।

मुष्कः। पुं। अण्डकोषे। रा.नि.व.१८। मुष्कवृक्षे। घण्टापारुल। मे.। मांसले। हे.च.।

मुष्ककः। पुं। (Schrebera swietenioides.) घण्टापाटलवृक्षे। पलाशवत् पर्णवृक्षे। घण्टापारुल। हिं मीषा। मं मीवि। कं मीखदलाद। तें मीक्षपुचेट्टु, मुक्कतुनुडुचेट्टु। तत्पर्य्यायाः,—सुचक: मीचः मुष्कः मीचक: मोचक: मुञ्चक: गौलिक: कैहन: पाटली विषापहः जटालः वनवासी सुतीक्ष्णक: चारुदत्त: चारुपेष्टः। भा.। वा.सू.१५अ.। गुणाः—"मुष्कक: कटुकोऽम्लश्च रोचनः पाचनः परः। ग्रीहगुल्मोदरार्शांसि हिध्मा तुल्यगुणान्वितः॥" रा.नि.व.११।

मुष्ककादिवर्गः। पुं। मुष्ककसुष्कवराहीपिप्पलाशधवशिंशपा इति गणे। गुणाः—गुल्ममेहाश्मरीपाण्डुमेदार्शःकफगुल्मघ्नः। वा.सू.१५अ.। अपिच,—"मुष्कक-पलाश धव-चिरुक-मदन वृक्षक-शिंशपा-वञ्जुलास्त्रिफला चेति। मुष्ककादिर्गणोऽयं मेदघ्नः शुक्रदोषहृत्। मेहार्शः पाण्डुरोगघ्नः शर्करास्मरीनाशनः॥" सु.सू.३८अ.।

मुष्करः। पुं। महाखदीपमनुष्ये। कुकुरुण्डे। हे.च.।

मुष्कशून्य। पुं। षण्ढे। खोजा। श.मा.।

मुष्टः। त्रि। मर्दिते। मठोनि देओया।

मुष्टिः। पुं, स्त्री। अन्तर्नखमुष्टौ। मूठी। भा.म.३भ.कर्णरो.चि.। "अन्तर्नखमुष्टिमुखी यष्टीमधुककषाये।" सु.सू.४६अ.। संहतपिण्डिताङ्गुलिकरे। "मुष्टिर्भवेत् संहतपिण्डिताङ्गुला वाकुञ्चितोऽयं प्रसृतिः प्रकीर्त्तितः।" रा.नि.व.१८। पले। ८ तो.। प.प्र.१ख.। क्षुद्रौ। घण्टापाटलवृक्षे। र.मा.। र.सा.सं. यूथिवि.अग्निसुखरसे।

मुष्टिकः। पुं। बलिदानयोग्योपकरणविशेषे। वा.कुमारतन्त्रस्.।

मुष्टिन्धयः। पुं। बालके। त्रिका.।

मुष्टिप्रमाणबदरम्। क्ली। सेवफले। सेउ फल। भा.।

मुष्टियोगः। पुं। "उद्धृत्य मुष्टिनाच्छाद्य सगर्भं यन्निधापयेत्। तं मुष्टियोगमित्याहुर्विबुधा भिषगीश्वराः॥" इति परिभाषान्तरम्।

मुष्ठकः। पुं। राजसर्षपे। र.मा.।

मुसली। स्त्री। तालमूल्याम्। प.मु.महाभल्लातकगुडे। गृहगोधायां। टिकटिकि। अम.।

मुस्तः। पुं, क्ली। मुस्तके। हारा.। सु.कल्प.२अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च.द.पित्त.ज्व.चि.कलिङ्गादिः। "कलिङ्गं कटफलं मुस्तम्।" च.सू.४अ.। कन्दविषभेदे। प.सु.।

मुस्तकः। पुं, क्ली। (Cyperus rotundus. Syn. Hexastachyos. Roxb.) स्वनामख्यातगन्धद्रव्ये। मूता। हिं मोथा। तं तुगमुस्त। सकहतङ्गु विरु। ता.। कोरय। तत्पर्य्यायाः,—कुरुविन्दः मेघनामा मुस्ता अम्बुवाहः अम्बुमृत् तड़ित्वान् बलाहकः वारिवाहः स्तनयित्नुः तोयदः तोयधरः भद्रं भद्रमुस्तकं भद्रा श्रीभद्रा। गुणाः—तिक्तकषायं शीतं पाचनं पित्तज्वरघ्नं ग्राहि च। रा.नि.व.६। "अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते।" तत्रापि तु नागरमुस्तं वरम्। भा.। "द्विमुस्तं नूतनं पुष्टं गन्धाढ्यं परमं विदुः।" भैष.। (C. Pertenuis. Syn. Mariscus cyperus.) नागरमुस्तके। तच्छुद्धिर्यथा—"मुस्तकन्तु मनाक् तुष्णं काञ्जिके त्रिदिनोषितं। पञ्चपल्लवतोयेन मर्द्दयेच्चूर्णयेत्ततः। आजशीभाञ्जनजलैर्भावयेच्चेति शुध्यति॥" भैष.वा.व्या.चि.। पुं। स्थावरविषभेदे। र.मा.।

मुस्तकादिः। पुं। विषमज्वरे कषायभेदे। "मुस्तामलकगुडूचीविश्वौषधकराटकारिकाक्वाथः। पीतः सकणाचूर्णः समधुर्विषमज्वरं हन्ति॥" भैष.ज्व.चि.। [च.द वा.व्या.चि.महाप्रसारणीतैले।

मुस्तद्वयम्। क्ली। नागरमुस्तकैवर्त्तिमुस्तयोः।

मुस्ता। स्त्री। भद्रमुस्तायाम्। अम.। वा.सू.१५ अ.। "मुस्तावचाग्नि।"

मुस्ताकृतिः। स्त्री। शम्यां। वै.निघ.।

मुस्तादः। पुं। शूकरे। जटा.।

मुस्ताद्यगणः। पुं। मुस्ताद्यष्टादशद्रव्यगणे। तत्कृतकषायः सन्निपातज्वरे पित्तोत्तरसन्निपाते च हितः। "मुस्तपर्पटकोशीरदेवदारुसहौषधम्। विफला धन्वयासञ्च नीली कम्पिल्लकं विडत्॥ किरातितिक्तकं पाठा बला कटुकरोहिणी। मधुकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते॥" च.द.सा.ज्व.चि.। अयं मुस्ताद्यष्टादशाङ्ग इति संग्रहान्तरे। अपिच,— "मुस्ता-हरिद्रा-दारुहरिद्रा-हरीतक्यामलक-विभीतक-कुष्ठहैमवतीवचापाठा-कटुरोहिणी शार्ङ्गष्टातिविषा-द्राविड़ी-भल्लातकानि चित्रकश्चेति। एष मुस्तादिकोनाम्ना गणः श्लेष्मनिसूदनः। योनिदोषहरः स्तन्यशोधनः पाचनस्तथा॥" सु.सू.३८अ.।

मुस्ताभम्। क्ली। नागरमुस्तायाम्। र.मा.। तत्पर्य्यायाः,—कुटन्नटं पूरं वन्यं परिपेलवम्। See मुस्तकः।

मुहूर्त्तः। पुं। घटिकाद्वये। सु.सू.५अ.।

मुच्चकः। पुं। मुष्ककवृक्षे। अरुणः।

मूः (ऊ)। स्त्री। मूर्च्छायाम्।

मूकः। पुं। तन्नामकवातरोगविशेषे। बोबा। निदानलक्षणे—"आहत्य वायुः सकफो धमनीः शब्दवाहिनीः। नरान् करोत्यवचनान् मूकमिन्मिणगद्गदान्॥" सु.चि.१अ.। अन्धे।

मूढम्। क्ली। मूर्च्छायाम्। वि। जड़े। हे.च.।

मूढगर्भः। पुं। गर्भजरोगे। गर्भस्रावादि रोग। "तमेव कदाचिद्विदुष्टमसम्यगागतमपत्यपथमनुप्राप्तमनिवस्यमानमपानवैगुण्यसम्मोहितं गर्भं मूढगर्भमित्याचक्षते।" स चतुर्विधः—कीलः प्रतिखुरः वीजकः परिघ इति कैचित्। सुश्रुतस्तु अष्टविधमाह। सु.नि.८अ.। सु.शा.। एषां विशेषाः स्वस्वपर्य्याये मृग्याः। तस्य निदानं यथा—"भयाभिघातात्तीक्ष्णौषपानाशननिषेवणात्। गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत्॥ गर्भौऽधिघातविषमाशनपीड़िताया: पक्वं द्रुमादिव फलं पतति स्वयेन। मूढः करोति पवनः खलु मूढगर्भं शूलञ्च योनिजठरादिषु मूत्रसङ्गम्॥" मा.नि.।

मूढिः। स्त्री। मूर्च्छायाम्। रा.नि.व.२०।

मूत्रम्। क्ली। आहारस्य सारहीनसलद्रवे। प्रस्रावे। प्रस्राव, मृष्। रा.नि.व.१८। "शिराभिस्तज्जलं नीतं बस्तौ मूत्रत्वमाप्नुयात्।" शार्ङ्ग.१अ.। सा.मूत्रगुणाः—"मूत्रम् आलेपने प्रलेपे आस्थापने निरूहबस्तौ विरेचनेऽधोभागहरणे च।" च.सू.१ अ.। "मूत्रं तीक्ष्णोष्णलवणं पित्तक्षल्कटुकं लघु। रूक्षं क्रिमुदरानाहशोथार्शोविषकुष्ठनुत्॥" राज.३प.। तच्च दश—गोच्छागमेषमहिषगजाश्वोष्ट्रगर्द्दभनरनारीभूत्रभेदेन। विशेषाः तत्तत्पर्य्याये मृग्याः। "शूलगुल्मोदरानाहवातविच्छर्द्दनादिषु। मूत्रप्रयोगसाध्येषु मीमूत्रङ्कल्पयेद्बुधः॥" रा.नि.व.१५। "अजागवीगतं मूत्रं पाने शस्तं भिषग्वरैः। आविकं माहिषञ्चाज्ञं तैलपाके विधीयते॥" अवि.९अ.। अप्रसूतायाः प्रसूतायाश्च मूत्रगुणाः—"अप्रसूतायाघनं मूत्रं प्रसूतायाद्रवं लघु। न किं गुणविशेषः स्यात्समता पाकवीर्य्ययोः॥" अवि.९अ.। सु.सू. ३९अ शिरो.वि.। मूत्रपरीक्षा—"वातेन पाण्डुरं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूत्रं रक्तं नीलञ्च पित्ततः। रक्तमेव भवेद्रक्तात् धवलं फेनिलङ्कफात्॥" भा.।

मूत्रकृच्छ्रम्। क्ली। मूत्ररोधरोगे। मूत्रस्य कृच्छ्रेण महता दुःखेन प्रवृत्तौ। वि.र.। तच्चाष्टविधं—वातादिभेदेन चत्वारि, शल्यजपुरीषजशुक्रजाश्मरीजत्वाच्च चत्वारीति। तस्य निदानं—'व्यायामतीक्ष्णौषधरूक्षमद्यप्रसङ्गनित्यद्रुतपृष्ठयानात्। आनूपमत्स्याध्यशनादजीर्णात् स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ॥" लक्षणं—"पृथङ्मलाः स्वैः कुपिता निदानैः सर्व्वेऽथवा कोपमुपेत्य वस्तौ। मूत्रस्य मार्गं परिपीड़यन्ति यदा तदा मूत्रयतीह कृच्छ्रात्॥" मूत्रकृच्छ्रमूत्राघातयोरयं विशेषः—तत्र प्रथमे कृच्छ्रलक्षणमतिशयितम् ईषद्विबन्धस्य। द्वितीये विबन्धो बलवान् कृच्छ्रलक्षणमल्पमिति। वि.र.।

मूत्रकोशः। पुं। मूत्राशये। ज.द.२अ.।

मूत्रग्रन्थिः। पुं। मूत्राघातरोगविशेषे। लक्षणं यथा—"अन्तर्वस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत्। अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रयन्थिः स उच्यते॥" मा.नि.। अश्मर्य्यां पित्तादि कुप्यति अत्र तु रक्तमेवेति भेदः। वि.र.।

मूत्राग्रहः। पुं। अश्वस्य मूत्रसङ्गरोगे। लक्षणं यथा—"स्रोकं स्रोकं सफेणञ्च कृच्छ्रान्मूत्रं करोति यः। तस्य वातरसुत्थन्तु विद्यान्मूत्राग्रहं बुधः। दाहोच्छ्वासयुतः पित्तान्मूत्रौकः प्रजायते। वाजिनः पीतमूत्रस्य अथवा रक्तमूत्रिणः। कफजे मूत्ररोगे तु सान्द्रमूत्रं सपिच्छिलम्॥" ज.द.४७अ.।

मूत्रजठरः। पुं। मूत्राघातभेदे। तस्य लक्षणं—"मूत्रस्य वेगेऽभिहते तदुदावर्त्तहैतुकः। अपानः कुपितो वायुरुदरं पूरयेद्भृशम्। नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम्। तन्मूत्रजठरं विद्यादधोवस्तिनिरोधजम्॥" मा.नि.।

मूत्रदशकम्। क्ली। दशविधमूत्रेषु हस्तिमेषोष्ट्रगवाजमहिषघोटकगर्द्दभमानुषीमानुषजातिषु। "मूत्राणि हस्तिहरिणीष्ट्रगवाजकानां मेषाश्वराजभकमानुषमानुषीणाम्। यत्नेन यत्र मिलितानि दृशन्ति तानि शास्त्रेषु मूत्रदशकाह्वम्.....॥" रा.नि.व.२२।

मूत्रदोषः। पुं। प्रमेहरोगे। उदकमेहादौ। प्रस्रावेऽत्र दोषः। रा.नि.व.२०।

मूत्रनिरोधः। पुं। मूत्ररोधरोगे। निदा.।

मूत्रपञ्चकम्। क्ली। पञ्चविधमूत्रेषु। "गवामजानां मेषीणां महिषीणाञ्च मिश्रितम्। मूत्रेण गर्द्दभीनाञ्च तन्मतं मूत्रपञ्चकम्॥" रा.नि.व.२२।

मूत्रपतनः। पुं। गन्धमार्जारे। गन्धगोकुल। रा.नि.व.१९।

मूत्रपथः। पुं। योनौ। वै.निघ.। उपस्थे।

मूत्रपरीक्षा। स्त्री। मूत्रस्य वातादिदोषवाहुल्यनिश्चये। तल्लक्षणं यथा,—"वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः। रक्तमेव भवेद्रक्तात् धवलं फेनिलं कफात्॥"

मूत्रपुटम्। क्ली। वस्तौ, नाभेरधोभागे। "नाभेरधो मूत्रपुटी वस्तिर्मूत्राशयोऽपि च।" हे.च.।

मूत्रफला। स्त्री। कर्कट्याम्। कँकुड़। रा.नि.व.७। वपुषे। शमी।

मूत्रबीजकः। पुं। असनवृक्षे। वै.निघ.।

मूत्ररोधः। पुं। मूत्रकृच्छ्ररोगे, मूत्रसङ्गे। रा.नि.व.२०।

मूत्रलम्। क्ली। चपुषे। शमी। वि। वस्तिशोधने। श.च.। स्त्री। चिर्भटिकायाम्। कूटी। रा.नि.व.७। कर्कटिकायां। विका.।

मूत्रवर्गः। पुं। मूत्रदशकेषु।

मूत्रवहनाड़ी। स्त्री। या आमाशयाद्वस्तौ मूत्रं नयति। "पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः। तर्पयन्ति सदा मूत्रं सरितः सागरं यथा। सूक्ष्मत्वान्नोपलभ्यन्ते सुखान्यासां सहस्रशः। नाड़ीभिरुपनीतस्य मूत्रस्यामाशयान्तरात्॥" सु.नि.३अ.।

मूत्रवृद्धिः। स्त्री। मूत्रजनित-वृद्धिरोगे। लक्षणं—मूत्रसन्धारणशीलस्य मूत्रवृद्धिर्भवति सा गच्छतीऽम्बुपूर्णा इतिरिव क्षुभ्यति मूत्रकृच्छ्रवेदनां वृषणयोः शीघ्रं कोषयोः करोति च। मा.नि.।

मूत्रशुक्रम्। क्ली। मूत्राघातरोगविशेषे। लक्षणं "मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम्। स्थानाच्च्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते। भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते॥" मा.नि.।

मूत्रशोधनिका। स्त्री। चिर्भटिकायाम्। वनकर्कटीविशेषे। वै.निघ.।

मूत्रश्लेष्मजम्। क्ली। श्लेष्मजन्यमूत्ररोगे। भा.।

मूत्र(त्रौत्)सङ्गः। पुं। मूत्राघातभेदे। तस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षण—"वस्तौ वाप्यथवा नाभौ मणौ वा यस्य देहिनः। मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः। सवेच्छनैरल्पमल्पं सरुजं वाथ नीरुजम्। विगुणानिलजो व्याधिः स मूत्रौकसङ्गसंज्ञितः॥" मा.नि.।

मूत्रसादः। पुं। मूत्राघातभेदे। लक्षणं—"पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत्। क्लेक्ष्मान्मूत्रं तदा पीतं रक्तं श्वेतं घनं स्रवेत्। सदाहं रोचनाशङ्खचूर्णवर्णं भवेच्च तत्। शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम्॥" मा.नि.।

मूत्रक्षयः। पुं। मूत्राघातभेदे। "रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ। मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम्॥" मा.नि.।

मूत्राघातः। पुं। त्रयोदशविधमूत्ररोधरोगे। निदानादि—"जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश। प्रायो मूत्रविघातात्तैर्वातकुण्डलिकादयः॥" यथा—वातकुण्डलिका अष्ठीला वातवस्तिः मूत्रातीतः मूत्रजठरः मूत्रौत्सङ्गः मूत्रक्षयः मूत्रग्रन्थिः मूत्रशुक्रम् उष्णवातः मूत्रसादः विड्विघातः वस्तिकुण्डलः इति। मा.नि.। सुश्रुते द्वादश उक्ताः। एषां लक्षणानि स्वस्वपर्य्याये द्रष्टव्यानि।

मूत्रातिसारः। पुं। मूत्रबाहुल्यरोगे। सोमरोगे। बहुमूत्र।

मूत्रातीतः। पुं। मूत्राघातभेदे। तस्य लक्षणं—"चिरं धारयतो मूत्रं त्वरया न प्रवर्त्तते। मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते॥" मा.नि.।

मूत्राधिक्यम्। क्ली। श्लेष्मजन्यमूत्रबाहुल्यरोगे। मूत्रातिसार। भा.।

मूत्राशयः। पुं। नाभेरधो-वस्तिस्थाने। "वस्तिर्मूत्राशयः स्मृतः।" रा.नि.व.१८।

मूत्राष्ट(क)म्। क्ली। "गोऽजाविमहिषाश्वानां खरोष्ट्रकरिणां तथा। मूत्राष्टकमिति ख्यातं सर्व्वशास्त्रेषु सम्मतम्॥" प.प्र.३खं.। भा.म.४भ. बाल.चि.।

मूत्रिका। स्त्री। सप्तकीवृक्षे। वै.निघ.।

मूत्रोष्णता। स्त्री। पित्तजन्यमूत्ररोगे। भा.।

मूर्खः। पुं। वनमुद्गे। माषे। मायकलाये। त्रिका.। स्त्री (र्खा)। मूर्च्छायाम्। वै.निघ.।

मूर्च्छनम् (ना)। क्ली, स्त्री। पारदस्य संस्कारविशेषे। रस.चि.३अ.। See पारदः।

मूर्च्छा। स्त्री। सर्व्वथा ज्ञानशून्यतायां, रूपादिरज्ञाने। सा पित्तसमोद्भवा। भा.म.१भ.ज्व.चि.। "मूर्च्छा दाही मदस्तृषा।" रोगविशेषे। मूर्च्छा रोगः। तत्पर्य्यायाः,—कश्मलं मोहः सम्मोहः मूच्छनं मूर्च्छायः। निदानं—"क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः। वेगघातादभीघातात् क्षीणसत्त्वस्य वा पुनः। करणायतनेष्वग्र्या वाह्येष्वाभ्यन्तरेषु च। निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः। संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः। तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत्। सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत्। मोहीमूर्च्छेति तामाहुः षड्विधा सा प्रकीर्त्तिता। वातादिभिः क्षीणितेन मद्येन च विषेण च। षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते। हृत्पीड़ा जृम्भणं ग्लानिः संज्ञानाशो बलक्षयः। सर्व्वासां पूर्व्वरूपाणि यथास्वं तं विभावयेत्...॥" मा.नि.।

मूर्च्छालः
मूर्च्छितः } त्रि। मूर्च्छायुक्ते। अम.।

मूर्त्तिः (मत्)। स्त्री, क्ली। शरीरे। रा.नि.व.१८। त्वचायाम्। वै.निघ.।

मूर्द्धकर्णी (र्णो)। स्त्री। कृमे। हारा.।

मूर्द्धखोलः। पुं। जलवाणायाम्। टोका, पेकें। चिका.।

मूर्द्धजः। पुं, क्ली। केशे। रा.नि.व.१८। स्त्री (जा)। बालके। बाला। भा.म.१भ.चित्तविभ्रमज्व.चि.। "सुरामूर्द्धजमेघाह्व...॥"

मूर्द्धपुष्पः। पुं। शिरीषवृक्षे। श.मा.।

मूर्द्धरसः। पुं। अन्नफेने। भातेर फेन। श.च.।

मूर्द्धवेष्टनम्। क्ली। उष्णीषे। पागड़ी। हे.च.।

मूर्द्धा (न्)। पुं। मस्तके। रा.नि.व.१८।

मूर्व्वा। स्त्री। (Sansevieria zeylanica. Syn. S. Roxburghiana.) Bow string hemp. स्वनामख्यातचुपे। धनुर्गुणोपयोग्या कदलीसदृशस्वल्पविटपा दुधउड़, दुधीड़ इति च लोके। सु.सू.३८।३९अ.पित्तशमने। मूर्व्वा, मूर्गा, मूरहर, शूचमुखी, वोड़ाचक्र। हिं चूर्णहार। बं गीनसफण। ते चागचेट्टु, सग, चग। वम.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मीरबेल, सुहरसि । ता. मरुल । तत्पर्य्यायाः,—देवी मधुरसा मीरटा तेजनीखवा मधुलिका धनुःश्रेणी गोकर्णी पीलुपर्णी कर्म्मकरी दृढ़मूविका धनुर्गुणा धनुर्माला धनुःशाखा सुवा मूर्व्वी मधुश्रेणी श्रेणी धनुः सुरङ्गिका दैवश्रेणी पृथक्त्वचा मधुस्रवा अतिरसा पीलुपर्णिका दिव्यलता ज्वलिनी गोपवल्ली । गुणा.—"सरा गुरुः स्वादुस्निग्धा पित्तास्रमेहनुत् । विदोषदृष्णाच्छर्द्दीगुल्मकण्डूकुष्ठज्वरापहा ॥" भा. । मूलं राजयक्ष्महरम् । मूर्व्वाभावे पिप्पलीमूलं । सि.यो. कफजसंशमने ।

मूलम् । क्ली० । पिप्पलीमूले । पुष्करमूले । कुड़विशेष । रा.नि.व.६ । वै.निघ.वाव्या.प्रत्यष्ठीला. चि. । धा.उ.५अ. । तरुमूले । । रा.नि.व.२ । हेतौ । भा. । कारणे । च.सू.१अ. ।

मूलकम् । क्ली, पुं । (Raphauns sativus.) Radish. स्वनामख्यातमूलशाकविशेषे । मूला । हिं दा. मूली । मं कं ता. मूलंगि । तें मूलंगिचेट्टु । तत्पर्य्यायाः,—राजालुकः महाकन्दः करुकन्दकं हस्तिदन्तं हस्तिदन्तकं नीलकण्ठं सलाट्टं दीर्घपत्रकं दीर्घमूलकं सत्वचारं कन्दमूलं सितं शङ्खमूलं हरित्पर्णं रुचिरं दीर्घकन्दकं कुञ्जरचारमूलं । मूलकं पञ्चविधं—चाणक्यघट्टकनपिण्ड बालगर्ज्जरभेदेन । विशेषास्तत्तत्पर्य्याये द्रष्टव्याः । भावमिश्रेण मूलकस्य द्विभेदः कृतः बालं महच्चेति । कचि मूला ও पाका मूला । सा. गुणाः—"मूलकं कटुकमपि श्लेष्माणं संवर्द्धयति स्निग्धवीर्य्यत्वात् ।" सु.सू.४०अ. । तीक्ष्णम् उष्णं कटूष्णं ग्राहि दीपनम् अर्शोगुल्मच्छर्द्दीगहरं गुरु रुच्यं वातघ्नञ्च । रा.नि.व.७ । स्वर्य्यं श्वासाक्षिपीनसघ्नञ्च । शुष्कं तत् शीघ्रघ्नं लघु विदोषघ्नञ्च । तत्पुष्पं पित्तश्लेष्मघ्नं । फलं वातकफघ्नञ्च । मद.व.७ । लघु तत्—कटु उष्णं लघु पाचनं रुच्यं विदोषघ्नं स्वर्य्यं ज्वरश्वासघ्नं नासारोगघ्नं कण्ठरोगघ्नं नेत्रामयहरञ्च । महत्तत् रुचीष्णं गुरु विदोषजनकं । स्नेहसिद्धं तत् विदोषघ्नम् । तत्तैलगुणाः... तीक्ष्णं लघु उष्णवीर्य्यं कटु कटुविपाकं सरं वातकफकृमिकुष्ठप्रमेहशिरोरोगहरञ्च । सु.सू.४५अ. । तत्पत्रगुणाः..."पाचनं लघु रुचीष्णम् ।" "पत्रं मूलकजं नवम् । स्नेहसिद्धं विदोषघ्नमसिद्धं कफपित्तकृत् ॥" भा.पू.१भ.शा.व. । "मूलकं गुरु विष्टम्भि तीक्ष्णमामं विदोषकृत् । तदेव स्नेहपक्वं श्लेष्मघ्नं दीपनं हितपित्तजित् ॥" "बालमूलकपत्री तु रोचनी वह्निदीपनी ।" राज.३प. । तत्कृतयूषगुणाः—"मूलकयूषो हरति लालास्रावं गलग्रहं जृम्भिं । मेदोरोचकपीनसकासकफव्याधिनाशनश्चापि ॥" द्रव्यगु. । उशीरे । रा.नि.व.१२ । शिग्रुमूले । विषभेदे । हे.च. ।

मूलकच्छदः । पुं । कृष्णशिग्रौ । काल सजिना । वै.निघ. ।

मूलकपर्णी । स्त्री । शोभाञ्जनवृक्षे । सजिना गाछ । र.मा. ।

मूलकपोता । स्त्री । बालमूलके । कचि मूला । वा.चि.९अ. ।

मूलकपोतिका । स्त्री । अतिबालमूलके । अति कचि मूला । योगर.मध्यज्वरे । गुणाः—कटुतिक्तरसा उष्णवीर्य्या लघुपाका । प्रभावश्च सर्व्वदोषघ्नता रुचिजनकता च । "सर्व्वदोषहरा लघ्वी कण्ठ्या मूलकपोतिका ।" सु.सू.४६अ. । चाणक्यमूलके । वै.निघ. ।

मूलकबीजम् । क्ली । मूलकशस्ये । मूलाबिचि । भा. ।

मूलकमूला । स्त्री । चोरीशब्दवे । प.मु. । चौरकाकोल्याम् । वै.निघ ।

मूलकर्कटी । स्त्री । क्षणीदुस्वरे । वै.निघ. ।

मूलकविषम् । क्ली । कन्दविषभेदे । सु.कल्प. २अ. । See कन्दविषं ।

मूलकशाकः । पुं । मूलकपत्रे ।

मूलकक्षारः । पुं । शुष्कमूलकक्षारे । च.द. ग्रन्थि.चि. । [व.८।

मूलग्रन्थिः । स्त्री । वह्निदूर्व्वायाम् । रा.नि.

मूलजः । वि । यो मूलादुत्पद्यते । यथा पद्मादिकम् । हे.च. । क्ली० । आर्द्रके । आदा । रा.नि.व.६ ।

मूलजिह्वा । स्त्री । सूक्ष्मजिह्वाधोवर्त्तिजिह्वामूले । रा.नि.व.१८ ।

मूलपर्णी । स्त्री । मण्डूकपर्ण्याम् । थूलकुड़ि । प.मु. ।

मूलपुष्करम् । क्ली । पुष्करमूले । कुड़भेद । रा.नि.व.६ ।

मूलपोती । स्त्री । मालवे प्रसिद्धायां पोतिकायाम् । मं मालविरलि । कं तोंडदवसले ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्पर्य्यायाः,—क्षुद्रवल्ली पोतिका क्षुद्रपोतिका क्षुद्रोपदकनाम्नी वल्लीशाकटपोतिका। गुणाः—त्रिदोषघ्नी हृद्या बल्या लघुः कान्तिपुष्टिकरी रुच्या जठरानलदीपनी च। रा.नि.व.७। आरामवल्लिकायाम्। रा.नि.व.२३।

मूलफलः (ला)। पुं, स्त्री। पनसवृक्षे। वै. निघ.।

मूलफलदः। पुं। पनसवृक्षे। कँठाल गाछ। रा.नि.व.११।

मूलरसः। पुं। मीरटलतायां। र.मा.।

मूलविरेचनम्। क्ली। वृहतादिशिफारूपश्रेष्ठविरेचने। तदुक्तं—"सप्तला शङ्खिनी दन्ती द्रवन्ती गिरिकर्णिका। वृहच्छ्यामोदकीर्य्या च प्रकीर्य्या चीरिणी तथा। क्षुद्रलाङ्गी गवाची च कुचाची गिरिकर्णिका। मसूरविदला चैव भवेन्मूलविरेचनम्॥" वा.चि.६अ.।

मूलविषम्। क्ली। स्थावरविषाश्रयकरवीरादौ। गुणाः—उद्वेष्टनं मोहकरं प्रलापजनकञ्च। भा.म.४भ.विष.चि.। क्लीतकाश्वमारगुञ्जासुगन्धगर्गरककरघाटविद्युच्छिखाविजयानीति अष्टौ मूलविषाणि। "उद्वेष्टनं मूलविषैः प्रलापो मोह एव च।" सु.कल्प.२अ.। [व.१।

मूलवीरम्। क्ली। पुष्करमूले। कूड़। मद.

मूलवृक्षः। पुं। शाल्मलिवृक्षे। शिमूल गाछ रा.नि.व.८।

मूलशाकः। पुं। मूलप्रधानशाके। शूरणादौ। ते च शूरणगुणाः। राज.३प.।

मूलशो(सा)धनः। पुं। पुष्करीवृक्षे। पुँड़रिया। वै.निघ.।

मूला (लो)। स्त्री। गृहगोधिकायां। विका.। श्रतावर्य्यां। रा.नि.व.४।

मूलाधारः। पुं। गुह्यलिङ्गयोर्मध्ये अङ्गुलिद्वयमितस्थाने। तन्त्रम्।

मूलाह्वम्। क्ली। मूलके। मूला। रा.नि.व.७।

मूलिका। स्त्री। मूलके। मूलसमूहे। मूलौषधौ। रस.र.रसगीधने। चीरिकायाम्। वै.निघ.।

मूलिकामूलम्। क्ली। चीरिकामूले। वै. निघ.२भ.सर्व्वज्व.चि.।

मूलिनीवर्गः। पुं। प्रयोगे प्रशस्तमूलानासुद्विदां षोड़शगणे। "इक्षिदन्ती (नागदन्ती) हैमवती (श्वेतवचा) श्यामा त्रिवृदधीगुड़ा। सप्तला श्वेतश्यामा च प्रत्यक्श्रेणी गवाच्यपि। ज्योतिष्मती च विम्बी च शणपुष्पी विषाणिका। अश्वगन्धा द्रवन्ती च चीरिणी चाथ षोड़श॥" एषु शणपुष्पी हैमवती विम्बी च क्षुद्रेषु। श्वेता ज्योतिष्मती च शीर्षविरेचने। शिष्टा ११ विरेचने योज्याः। च. सू.१अ.। श्यामा श्यामात्रिवृत्। अधीगुड़ा वृद्धदारके। श्वेतनामा श्वेतापराजिता। प्रत्यक्श्रेणी मूषकपर्णी। गवाची गोडुम्बा। ज्योतिष्मती लताफटकी। शणपुष्पी घण्टरवा। विषाणिका मेषशृङ्गी।

मूलेरम्। क्ली, पुं। जटामांस्याम्। उणा.।

मूश(ष)ली। स्त्री। तालमूल्याम्। वै.निघ.।

मूषकः। पुं। तरुमूषिके। तैजसावर्त्तन्याम्। श.र.।

मूष (षि) ककर्णी (पर्णिका)। स्त्री। आखुकर्णीलतायाम्। मूषाकाणी। द्रवन्त्याम्। रा.नि.व.३।५।

मूषकमारी। स्त्री। श्रुतपर्णीलतायाम्। रा.नि.व.५।

मूषकयुग्मम्। क्ली। क्षुद्रदीर्घमूषाकर्णीद्वये। वै.निघ.शीतज्व.चि.तालकादिशीतारिरसे।

मूषकशत्रुः। पुं। विड़ाले। वै.निघ.।

मूषकश्र(श्रा)वणी। स्त्री। मूषिककर्ण्याम्। मूषाकाणी। वै.निघ.।

मूष(षि)का। स्त्री। आखुकर्ण्याम्। इन्दुरकाणी। र.मा.। मूषिकायाम्। श.र.।

मूषकाह्वया (ह्वा)। स्त्री। मूषिकपर्ण्याम्। इन्दुरमांस्री। आखुकर्ण्याम्। मूषाकाणी। दन्तीवृक्षे। वै.निघ.।

मूषा। स्त्री। गोचुरवृक्षे। वै.निघ.। देवताड़वृक्षे। मूषिकायाम्। धातुद्रावणपात्रविशेषे। मूचि।

मूषाक(प)र्णी। स्त्री। (Salvinia cucullata.) आखुकर्ण्याम्। मूषाकाणी। श.र.।

मूषातुत्थम्। क्ली। नीलतुत्थके। नील तुँतिया। हे.च.।

मूषिकः। पुं। विलेशयजन्तुविशेषे। इन्दुर। तन्मांसगुणाः—गर्हितं मान्द्यकरं गुरु दुर्ज्जरञ्च।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा.नि.व.१७। "स्निग्धो बलकरः शुक्रवर्द्धनोवृष्यमधुरो लघुः दुर्नामकृमिदोषघ्नो वातहारी च मूषिकः॥" अवि.२०अ.। ते अष्टादशधा यथा—लालनः पृथुकः कृष्णः हंसिरः चिक्किरस्तथा। कुकुन्दरोऽलसश्चैव कषायदशनोऽपि च। कुलिङ्गश्चाञ्जितश्चैव चपलः कपिलस्तथा। कोकिलोऽरुणसंज्ञश्च महाकृष्णस्तथोन्दुरः। श्वेतेन सहता सार्द्धं कपिलेनाखुना तथा। मूषिकश्च कपीताख्यस्तथैवाष्टादश स्मृताः॥ सु.कल्प.६अ.। "लालनश्चपलः पृथुः हंसिरश्चिक्किरोऽजिरः। कषायदन्तः कुलकः कोकिलः कपिलोऽसितः। अरुणः शबलः श्वेतः कपीतः पलितोन्दुरः। कुकुन्दरो रसालाख्यः दशाष्टौ चेति मूषिकाः॥" वा.उ.३८अ.। तेषां साधारणविषलक्षणानि यथाः,—"शुक्रं पतति यत्तेषां शुक्रघृष्टैः स्पृशन्ति वा। नखदन्तादिभिस्तस्मिन् गात्रे रक्तं प्रदूष्यति॥ जायन्ते ग्रन्थयः शोफाः कर्णिका मण्डलानि च। पिड़कीपचयश्चोग्रा विसर्पाः किटिमानि च॥ पर्व्वभेदो रुजस्तीव्रा ज्वरो मूर्च्छा च दारुणा। दौर्ब्बल्यमरुचिः श्वासो वेपथुर्लोमहर्षणम्॥" सु.कल्प.६अ.।

मूषिकाक(ष)र्णी। स्त्री। आखुकर्णीलतायाम्। इन्दूरकाणी लता। अम.।

मूषिकातैलम्। क्ली। योनिकन्दे तैलम्। तिलतैलं ४ प्र. मूषिकमांसं १ प्र. खण्डशः कृत्वा तैले पक्तव्यं, मांसे द्रवीभूते तैलसिद्धिः भवति। सा.कौ.।

मूषिकारुहा। स्त्री। मूषिकलोम्नि। सु.कल्प.१अ.।

मूषिका। स्त्री। कृष्णदन्तीवृक्षे। काल दन्ती। रा.मा.। आखुपर्ण्याम्। इन्दूरकाणी पाना। प.मु.। गोचरके। वै.निघ.। निर्विषजलौकायाम्। निर्विष जोंक विशेष। "मूषिकाकृति-वर्णा-निष्टगन्धा च मूषिका।" सु.सू.१३अ.।

मूषिकाद्यतैलम्। क्ली। गुदभ्रंशे तैलम्। पाठः—"मूषिकामांसकुड़वं दशमूलं पलोन्मितं। चित्रकं द्विपलञ्चाव क्वाथयाष्टगुणेऽम्भसि। पादावशेषकर्त्तव्यं तैलं पाच्यं पयः समं। जीवनीयैस्तु तत्पादैः पचेन्मृदग्निना भिषक्। अभ्यङ्गान्नाशयत्याशु गुदभ्रंशं सुदारुणम्॥" क्वाथ—मूषिकमांस ८ प. दशमूल प्रत्येक १ प. चित्रामूल २ प.। कल्क—जीवनीयगण मिलित तैलेर सिकि।

मूषिकारातिः। पुं। बिड़ाले। बिड़ाल। रा.नि.व.१९।

मूषिकारावुः। पुं। अर्कवृक्षे।

मूषिकारिः। पुं। मूषिकघ्नौषधविशेषे। छन्दिरमारी इति पश्चिमदेशे ख्यातः। गुणाः—"मूषिकारिस्तु कटुको नेत्रयोराखुविषापहः। व्रणदोष-नेत्ररोगं नाशयेदिति च स्मृतम्॥" वै.निघ.।

मूषिकाक्षयः। पुं। आखुकर्ण्याम्। इन्दूरकाणी पाना। द्रव्यां। रा.नि.व.५।

मूषी (का)। स्त्री। मूषिकै। छहुछुन्दुरे। गणेशेर इन्दूर। रा.नि.व.१९।

मूषोकः। पुं। मूषिकै। श.र.।

मूषोककर्णी। स्त्री। आखुकर्ण्याम्। इन्दूरकाणी। श.र.।

मृगः। पुं। पशुमात्रे। ते च हरिणादयः। ते तु द्रुतविलम्बितप्लवगतिभेदेन त्रिधा, तथाश्रयस्थानभेदेनापि विलस्थलजलाश्रयत्वेन त्रिविधाः भवन्ति। पुनश्च ते प्रसह्य-प्रतुद-विष्किर-भेदेन त्रिभेदाः, स्वभावतोऽपि त्रयो भेदाऋषिभिरुक्ताः। एवं मृगजातयो नवधा। तेषां लक्षणादिकं स्वस्वपर्य्याये मृग्यम्। शशहरिणादयः स्वयं द्रुतगमनाद्रुतसंज्ञकाः। तथा तदुदितमांसञ्च पथ्यं बल्यं लघु वीर्य्यमदप्रदञ्च। तथा गजखड्गमृगादयः स्वभावतो विलम्बितगतयः, श्रुति तथासंज्ञाः। तदुत्थं मांसञ्च पिच्छिलं कफकासवातघ्नं गुरु च। सारसहंसबलाकाचक्रक्रौञ्चादयो जलप्लवनात् प्लवसंज्ञकाः। तन्मांसं गुरूणां बलदञ्च। "यत्र स्थिता ये गतितोऽपि दैवादन्यत्र याता मृगपक्षिमुख्याः। स्वस्त्रीचितस्थानविवर्त्तनेन मांसेऽपि तेषां गुणपर्य्ययाः स्युः॥" रा.नि.व.१७। मृगनाभौ। मार्गशीर्षे मासि। अ.टी.भ.।

मृगखुरी। स्त्री। हरिणखुरे। वै.निघ.।

मृगगन्धा। स्त्री। सुद्गपर्ण्याम्। वै.निघ.।

मृगगामिनी। स्त्री। विड़ङ्गायाम्। विड़ङ्ग। रा.नि.व.९।

मृगघर्म्मजम्। क्ली। जवादिगन्धद्रव्ये, गन्धराजे। रा.नि.व.१२।

मृगचिर्भिटा। स्त्री। मधुचिर्भटिकायाम्। मधु फूटी। वै.निघ.।

मृगचेटकः। पुं। गन्धमार्জ্জারे। खाटाश। श.मा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृगजरसः। पुं। रक्तपित्ताधिकारे रसः। "सूतं सूतं सूतं तीक्ष्णं तुल्यं वामादवेर्दिनं। मर्द्दितं मासमात्रन्तु भक्षयेन्मृगजं रसं॥" रस.र.।

मृगजहुः। पुं। हरिणबालके। वै.निघ.।

मृगजा। स्त्री। कस्तुर्य्यां। मृगनाभि। वै.निघ.।

मृगजृम्भः। पुं। अश्वस्य वातव्याधिविशेषे। लक्षणं यथा—"मृगरोगी यदा वाजी जृम्भावान् जायते मुहुः। मृगजृम्भं तदा तस्य व्याधिं समुपलक्षयेत्॥" ज.द.५५अ.।

मृगदंशकः। पुं। कुक्कुरे। अम.।

मृगधूर्त्तकः। पुं। शृगाले। रा.नि.व.१९।

मृगनाभिः (जा)। पुं, स्त्री। कस्तुर्य्याम्। मृगनाभि। रा.नि.व.१२। See कस्तुरी।

मृगनाभ्याद्यवलेहः। पुं। स्वरभेदे हितः। मृगनाभिः सूक्ष्मैला लवङ्गं वंशलोचना समा. घृतमधुभ्यां लेह्यः। मृगनाभि, छोटि एलाच, लवङ्ग, वंशलोचन, समभागे घृत ओ मधुर सहित अवलेह करिबे। भा.।

मृगपतिः। पुं। सिंहे। रा.नि.व.१८।

मृगपालिका। स्त्री। कस्तुरीमृगे। वै.निघ.।

मृगप्रियम्। क्ली। भूतृणाख्यतृणे, पर्व्वततृणे। गुणाः—बल्यं रुच्यं पुष्टिकरं पथ्यहितञ्च। रा.नि.व.८। स्त्री (या)। जलकदल्याम्। प.मु.।

मृगप्रियकः। पुं। तदाख्यविशेषयजन्तुभेदे।

मृगभक्षा। स्त्री। जटामांस्यां। रा.नि.व.१२। इन्द्रवारुण्याम्। राखालशशा। वै.निघ.।

मृगभोनी। स्त्री। विशालायाम्। राखालशशा। सु.चि.१७अ।

मृगमदः (दा)। पुं, स्त्री। कस्तुर्य्याम्। मृगनाभि। रा.नि.व.१२।

मृगमदवासा। स्त्री। कस्तुरीमल्लिकायाम्। रा.नि.व.१०।

मृगमातृकः (का)। पुं, स्त्री। कस्तुरीमृगे। लघ्वीदरमृगे। च.सू.१५अ.। गुणाः—"शीतासृक्पित्तशमनी विज्ञेया मृगमातृका।" सु.सू.४६अ.।

मृगमालारसः। पुं। प्रमेहाधिकारे रसः। "मारुतं वपुषं शीर्षं सुदग्धं मृगशृङ्गकं। कार्पासबीजमज्जा च तुल्यमङ्गीबीजकम्। पेषयेन्मर्द्दितं पीतक्रे दिनैकं वटकीकृतं। माषद्वयं सदा खादेन्मृगमालाप्रमेहजित्। अत्रपाठाभयादार्व्वीकषायसनुपानकम्॥' रस.र.।

मृगयुः। पुं। शृगाले। मे.।

मृगरसा। स्त्री। महाबलायाम्। रा.नि.व४।

मृगराजः (ट्)। पुं। सिंहे। श.र.।

मृगराटिका। स्त्री। जीवन्त्याम्। रा.नि.व.७।

मृगरिपुः। पुं। सिंहे। रा.नि.व.१९।

मृगरोगः। पुं। मृगज्वरे। गज.वै.। मृत्युपद्रवजनके साङ्घातिकाश्वरोगविशेषे। लक्षणं —"नासासन्धानसंयुक्ता जायन्ते मृत्युपद्रवाः। नित्यं घासाभिलाषी च हीयते बलमांसयोः॥ मृगरोगः स विख्यातो व्याधिः कष्टचिकित्सितः। षण्मासाभ्यन्तरे वाथ परलोकम्प्रयाति च॥ बहुदुःखो भवेदश्वो मृगरोगप्रपीड़ितः। यावदुच्छ्वसते जन्तुस्तावत् कुर्य्यात् प्रतिक्रियाम्॥" ज.द.२६अ.। "सन्त्यासी चैव यः पूर्व्वं पुनः स्वस्थो मृगम्भवेत्। प्रस्विन्नाङ्गस्य तस्याशु मृगरोगं समादिशेत्॥" ज.द.५५अ.। [अ.।

मृगलण्डिका। स्त्री। फलविशेषे। च.सू.२५

मृगलोमजम्। क्ली। राङ्कवे। पशमेर कापड़। अम.।

मृगवल्लभः। पुं। कुन्दुरुतृणे। रा.नि.व.८।

मृगशृङ्गम्। क्ली। Hart's horn. हरिणशृङ्ग। हरिणेर शिं। एतद्भस्म हृद्रोगे विषमूलादौ शस्तम्।

मृगक्षीरम्। क्ली। मृगीदुग्धे। व्याक.।

मृगा। स्त्री। महाबलायाम्। रा.नि.व.४।

मृगाङ्कः। पुं। कर्पूरे। अम.।

मृगाङ्क(ङ्ग)जः। पुं। कस्तूर्य्याम्। र.सा.सं. बृहच्चूड़ामणिरसे।

मृगाङ्कमुकुटार्हः। पुं। देवकर्द्दमे। रा.नि. व.२२।

मृगाङ्करसः। पुं। राजयक्ष्माधिकारे रसः। "स्वादर्सेन समं हेम मौक्तिकं द्विगुणम्भवेत्। गन्धकस्तु समस्तेन रसपादस्तु टङ्कणः। सर्व्वं तन्नीलकङ्कृत्वा काञ्जिकेन विशोधयेत्। भाण्डे लवणपूर्णेऽथ पचेद्यामचतुष्टयं। मृगाङ्कसंज्ञको ज्ञेयो रोगराज-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निकृन्तनः । रसस्य भस्मना हेम भस्मीकृत्य प्रयोजयेत् । गुञ्जाचतुष्टयञ्चास्य मरिचैः सेवयेद्भिषक् । पिप्पलीदशकैर्वापि मधुना लेहयेद्बुधः । पथ्यं सुलघुमांसेन प्रायशोऽस्य प्रयोजयेत् ॥" पारा १ तो. स्वर्णभस्म १ तो. मुक्ताभस्म २ तो. गन्धक २ तो. सोहागा २ मासा एकत्र काँजिसह पेषण करिया गोलक करिबे। शुष्क हइले मूषाभ्यन्तरे पूरिया लवणयन्त्रे पाक करिबे। भैष। स्वल्पं यथा—"रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं हयं। पूर्ववदनुपानेन मृगाङ्कीयङ्गयापहः । छागदुग्धानुपानेन दग्धरक्तादिमाचया ॥" रस.चि.९अ.।

मृगाङ्गजा । स्त्री । मृगनाभी । र.सा.सं.ब्रह्मज्वरचूडामणिरसे । मधुचिर्भटिकायाम् । इन्द्रवारुणीलतायाम् । वै.निघ.।

मृगाजिनम् । क्ली । कृष्णमृगचर्म्मणि । वै.निघ.।

मृगाण्डजः (जा) । पुं, स्त्री । कस्तूर्य्याम् । मृगनाभि । रा.नि.व.१२।

मृगात् (दनः) । पुं । सिंहे । तरचौ । तेन्दो, नेकड़े, चीता बाघ । रा.नि.व.१९ ।

मृगादनी । स्त्री । महावलायाम् । गोरक्षचाकुलिया । रा.नि.व.४। इन्द्रवारुणीलतायाम् । राखालशशा । रा.नि.व३। सु.चि.२अ.। भा.म.४भ.खन्द.ग.चि.। "मृगादन्याश्च मूलानि ।" गोरचोमूलि । गोरक्षचाकुलियार मूल । कुष्ठ.चि. कन्दर्पसारतैले ।

मृगान्तकः । पुं । चित्रकव्याघ्रे । रा.नि.व.१९ ।

मृगारातिः । पुं । कुक्कुरे । श.मा.।

मृगारिः । पुं । रक्तशिग्रौ । रा.नि.व.७। सिंहे । व्याघ्रे । कुक्कुरे । रा.नि.व.१९ ।

मृगाक्षी । स्त्री । महाश्विस्वाम् । वृष्टाकलाम्र । प.मु.। महेन्द्रवारुणीलतायां । माकाल । अमृतफलायां । वै.निघ.। विशालायाम् । राखालशशा ।

मृगी । स्त्री । कस्तुरिकायाम् । वै.निघ. । पीतवर्णसितोदरवराटकभेदे । रा.नि.व.१३ । मृगस्त्रियां । दुग्धगुणः—छागीदुग्धगुणतुल्यम् । भा.। अपस्माररोगे ।

मृगेन्द्रः । पुं । सिंहे । अम.।

मृगेन्द्रकुटिलोद्भूतम् । क्ली । सिंहदंशनजन्यविषे । र.सा.सं.रसप्रयोगे ।

मृगेन्द्रचटकः । पुं । मृगयादनपक्षिणि । बाज पाखी । जटा ।

मृगेन्द्राणी । स्त्री । वकवृक्षे । रा.नि.व.४ । वासकवृक्षे ।

मृगे(गै)र्वारुः । स्त्री । श्वेतेन्द्रवारुणीलतायां । श्वेत राखालशशा । तत्पर्य्यायाः,—मृगादनी मृगाची मृगिचणा श्वेतपुष्पा बहुफली कपिलाची पथ्या चित्रफला चित्रवल्ली चित्रा विचित्रा मृगविभिटा लघुचिर्भिटा मरुजा कुम्भिनी देवी कटफला । प.मु.। सु.सू.३९अ.। गुणाः—फलं दुर्ज्जरं गुरु मन्दाग्निकरं रक्तपित्तहरञ्च । रा.नि. व.७ । श्वेतहरिणभेदे, गुहाशयजातीयमृगे । सु.सू.४६अ. । महेन्द्रवारुणीलतायाम् । बड़ राखालशशा । हिं बड़ीइन्द्रवारुणी । भा.म ४भ. शक्तिनिग्रहचि.।

मृगेष्टः । पुं । सुन्दरपुष्पवृक्षे । गन्धराज फूलेर गाछ । रा.नि.व.१० ।

मृगेक्षणा । स्त्री । मधुचिर्भटिकायाम् । मधुफूटी । रा.नि.व.७।

मृङ्क्षणम् । क्ली । दुग्धसरे । तैले । व्याक.।

मृड्क्षणः । पुं । बालके । उषा.।

मृड्रोकः । पुं । हरिणे । व्याक.।

मृणालम् । क्ली, पुं । ऊशीरे । गन्धवेणा । रा.नि.व.१२। च.द.मधुकादौ। अवि.रत्ना.२अ.। भैष.। वीरणमूले । वेणार मूल । प.मु.। घनवन्दनादिपाचने । सि.यो.वा.पि.स्व.चि. । "पाठोदीच्यमृणालैस्तु ।" च.द.वा.पि.ज्व.चि. । "पटुपकं मृणालञ्च ।" च.द.वा.चा.एलादितैले । कमलकीमलदण्डे । पद्मेर डाँटा । सं कमलतंतु । तें तामरतुंड, तामरतोगे । तत्पर्य्यायाः,—विशं विसं कीरकं कीमलं कीमलकं तन्तुरं पद्मतन्तुः पद्मनालं मृणालिनी बिसिनी नलिनीरुहं । सु.चि.१९अ.। गुणाः—शीतलं तिक्तं कषायं पित्तदाहघ्नं सूचक्रुच्छ्रघ्नं रक्तवान्तिघ्नम् । च.द.वा. व्या.अश्वगन्धाद्यतैले ।

मृणालकण्ठः । पुं । जलचरपक्षिविशेषे । च.सू.२७अ. ।

मृणालमूलम् । क्ली । पद्मकन्दे । श.र.। भा. पू.१भ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृणालाद्यतैलम्। क्ली। वातरक्ते तैलम्। तिलतैलं ४ श.। कल्कः—मृणालम् उत्पलं पद्मकन्दः अनन्ता क्षीवेरं कुङ्कुमं चन्दनद्वयं किरात-तिक्तं पद्मबीजं केशरकं पटोलपत्र कटुकी दुरालभा शरमूलं त्रेवपर्पटी वासामूल प्र. ४ती. दुग्धं ८श.। तैल ४ श.। मृणाल, उत्पल, शालूक, अनन्तमूल, बाला, कुङ्कुम, चन्दनद्वय, चिरेता, पद्मबीज, केशर, पटोलपत्र, कटकी, दुरालभा, शरमूल, क्षेत्रपापड़ा, वासकछाल प्रत्येक ४ तो. दुग्ध ८ श.। भा.।

मृणालिनी। स्त्री। कमलदण्डे। मृणाली। रा.नि.व.१०। पद्मिन्यां। जटा.।

मृणाली। स्त्री। मृणाले। पुं (इन्)। लाम-ज्जके, वीरणमूले। रा.नि.व.१०।

मृण्मरुः। पुं। पाषाणे। त्रिका.।

मृतकम्। क्ली। शवे। हे.च.।

मृतकान्तकः। पुं। शृगाले। हारा.।

मृतजीवः। पुं। तिलकचुपे। तिल गाछ। रा.नि.व.१०।

मृतजीवनी। स्त्री। } दुग्धिकायाम्।
मृतजीवी (इन्)। पुं। } थिकई। वै.निघ.।

मृतमत्तः। पुं। शृगाले। त्रिका.।

मृतवत्सा। स्त्री। मृतसन्ततिकायाम्। लक्षणं यथा—"गर्भसन्धानमात्रं वा पञ्चान्मासाच्च वत्स-रात्। म्रियते द्विचिवर्षाद्वा यस्याः सा मृत-वत्सका॥" प्रयोगा.मृतवत्सा.चि.।

मृतसञ्जीवनरसः। पुं। अतीसाराधिकारे रसः। पाठः—"शुद्धसूतं समङ्गन्धं मृतपादं विषं त्रिपेत्। सर्व्वतुल्यं मृतञ्चाभं मद्यं धुस्तूरजैर्द्रवैः। सर्पाख्याश्च द्रवैर्याममं कषायैश्चाथ भावयेत्। धात्री चातिविषाकुस्तागुडूचीबालकजीरकं। यमानी धातकी शुण्ठी पाठा पथ्या कणान्विता। कुटजस्य त्वचा बीजदाडिम्यं दाड़िमं तिक्ता:। प्रत्येकं कर्षमात्रं स्यात् कल्कितं क्षिपितं जले:। कल्काच्चतुर्गुणं तोयं क्वाथ्यं पादावशेषितं। अनेन त्रिदिनं भाव्यं पूर्व्वोक्तं मर्दितं रसं। रुद्धा तद्बालुकायन्त्रे चणं मृदग्निना पचेत्। मृतसञ्जीवनी नाम्ना रसो गुञ्जाचतुष्टयं। दातव्यमनुपानेन चासाध्यमपि साधयेत्। नागरातिविषामुस्ता देवदारुवचाकणाः। यमानो बालकं धान्यं कुटजस्य त्वचाभया। धातकीन्द्रयवाबिल्वपाठामोचरसं समं। चूर्णितं मधुना लेह्यमनुपानं सुखावहम्॥" रस.र.। रस.चि.।

मृतसञ्जीवनी (सुरा)। स्त्री। वाजीकरणा-धिकारे। नूतनगुड़: १०० प. वव्वूलत्वक् बदर-त्वक् पूगफलं प्र. १६ प. लोध्रं ४ प. आर्द्रकं २ प. वारि १५४ श.। हण्डिकायां प्रथमं गुड़ं गालयित्वा अथ आर्द्रकं बव्वूलत्वचं यथाक्रमं सम्मिश्र्य तदनु पूगं लोध्रञ्च प्रक्षिप्य हण्डिकामुख-मवरुध्य च २० दिनं स्थाप्यम्। तत् हण्डिकाया आग्नीतनयन्त्रे संस्थाप्य मन्दतापेन यदा ईषत्तप्तं भवेत् तदा तत पूगम् एलवालुकं देवदारु लवङ्गं पद्मकाष्ठं वीरणमूलं रक्तचन्दनं शुलुफा यमानी मरिचं जीरकद्वयं जटामांसी शटी त्वक् जातीफलम् एला सुस्ता मेथिका चन्दनं मेषशृङ्गी च प्र. ४ तो. एकत्र कुट्टयित्वा यन्त्रमध्ये प्रक्षिप्य तन्मुखमवरुध्य च यथाविधि सुरामाग्नीतयेत्। नूतन गुड़ १०० प. बावलाछाल, कुलछाल, शुपारि प्रत्येक १६ प. लोधकाष्ठ ४ प. आदा २ प. वारि १५४ श.। हाँड़িতে अग्रे गुड़ गुलিয়া, তাহার পর আদা ও বাবলাছাল যথাক্রমে মিশাইয়া, শুপারি ও লোধ দিয়া পাত্রের মুখ বন্ধ করিয়া ২০ দিন রাখিবে। ২০ দিনের পর চোয়াইযন্ত্রে ভরিয়া মন্দ মন্দ তাপে তপ্ত হইলে, তাহাতে শুপারি, এলবালুক, দেবদারু, লবঙ্গ, পদ্মকাষ্ঠ, বেণামূল, রক্তচন্দন, শুলফা, যমানী, মরিচ, জীরা, কৃষ্ণজীরা, জটামাংসী, শটী, গুড়ত্বক্, জায়ফল, এলাইচ, মুতা, মেতি, চন্দন, মেড়াশিঙে প্রত্যেক ৪ তো. একত্র কুটিয়া প্রক্ষেপ দিবে ও যন্ত্রমুখ বন্ধ করিয়া সুরা নিষ্কাশন করিবে। मैष.।

मृतसूतः। पुं। रससिन्दूरे। र.सा.सं.चूडा-मणिरसे।

मृतामदम्। क्ली। तुत्थके। श.च.।

मृता(त्ता)ल[क]म्। क्ली। गोपीचन्दने। सौराष्ट्रमृत्तिकायाम्। अम.। रा.नि.व.१३। भा.। आढ़कां। अरहर कलाय। अ.टी.भ.।

मृतोत्थापनरसः। पुं। सन्निपातज्वरे रसः। पाठः—"शुद्धसूतं द्विधा गन्धं शिला तु विषहिङ्गुलं। मृतकान्तञ्च ताम्रायस्तालकं माक्षिकं समम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अम्लवेतसजम्बीरचाङ्गेरीणां रसेन च। निर्गुण्डी-हस्तिगुण्ड्योश्च द्रवैर्मर्द्यं दिनत्रयम्। रुद्धा तु भूधरे पाच्यं दिनान्ते तं समुद्धरेत्। चित्रकस्य कषायेण भावयेत् प्रहरद्वयम्। माषमात्रं प्रदातव्यं हिङ्गु-व्योषार्द्रकद्रवैः.....॥" रस.कौ.।

मृत् (दा, द्)। स्त्री। मृत्तिकासामान्ये। रा. नि.व.२। अम.। सौराष्ट्रमृत्तिकायाम्। रा.नि. व.१३। सि.यो.र.पि.च.। च.सू.४अ.।

मृत्कपालम्। क्ली। भृष्टखर्परे। पोड़ामाटी, भाजा खापरा। च.स.ग्रहणीचिकित्सायाम्।

मृत्कांस्यम्। क्ली। शरावे। त्रिका.।

मृत्किरा। स्त्री। घर्घरिकायाम्। घुरघुरे पोका। त्रिका.।

मृत्खलिनी। स्त्री। चर्म्मकषायाम्। शा.च.।

मृत्तिका (त्तिः)। स्त्री। मृदि। माटी। रा.नि.व.२। सा पञ्चधा—'वल्मीकमृत्तिकाधूसगैरिकं चेष्टकं पटु।' इति। र.सा.सं.स्वर्णशोधने। सौराष्ट्रमृदि। अभावे क्षणपङ्कपर्पटी। च.द.वि. यो.र.पि.चि.स्नेहनयोगे। "प्रियङ्गुमृत्तिकाञ्जने।"

मृत्तिकालवणम्। क्ली। चारमृत्तिकायाम्। सोरा, खारीमाटी। वै.निघ.।

मृत्पाण्डुः। पुं। मृत्तिकाभक्षणजन्यपाण्डुरोगे। निदा.। [वालुचि.।

मृत्पिण्डः। पुं, क्ली। लोष्ट्रे। ढेला। रस.र.

मृत्फलो। स्त्री। कुष्ठौषधे। कूड़। हारा.।

मृत्या। स्त्री। व्याधौ। रा.नि.व.२०।

मृत्युः। पुं। व्याधौ। रा.नि.व.२०। ज्वरे। मरणे। स च एकोत्तरशतं शरीरे निवसति। तत्रैकः कालसंयुक्तः शेषा आगन्तवः। आगन्तव औषधजपहोमादिभिः साध्याः। कालकृतस्तु असाध्य एव। "एकोत्तरं शतं मृत्युरस्मिन् काये प्रतिष्ठितः। तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः।" भैष.।

मृत्युञ्जयरसः। पुं। रसौऽयं नवज्वरे हितः। पाठो यथा—"रसं गन्धं शिलां तालं माक्षिकं ताम्र-मेव च। समभागन्तु संगृह्य रसार्द्धविषदन्तिजैः। चित्रकस्य रसेनैव मर्द्दयेत्तामसंपुटे। निक्षिप्य वह्निना दग्ध्वा यावद्गन्धो भविष्यति। लेपनञ्च विषञ्चैव भागार्द्धं तत्र निक्षिपेत्। मर्द्दयेत् सम्यगे-तानि.....॥" रस.कौ.।

मृत्युनाशकः। पुं। पारदे।

मृत्युपुष्पः। पुं। द्रुमे। प.मु.। देवनले। स्त्री (ष्पा)। कदलीवृक्षे। वै.निघ.।

मृत्युफलः। पुं। महाकाललतायाम्। माकाल लता। स्त्री (ला)। कदलीवृक्षे। मे.।

मृत्युबीजः। पुं। वंशे। बाँश। त्रिका.।

मृत्युभृत्यः। पुं। रोगे। रा.नि.व.२०।

मृत्युवृक्षनः। पुं। दण्डकाके। बिल्लवृक्षे। मे.।

मृत्युसूतिः। स्त्री। कर्कटस्त्रियाम्। मादि काँकड़ा। वै.निघ.।

मृत्सः। त्रि। पिच्छिले। सु.नि.६अ.।

मृत्सा (त्स्ना)। स्त्री। सौराष्ट्रमृत्तिकायाम्। र.मा.। प्रशस्तमृत्तिकायाम्। रा.नि.व.२।

मृत्स्नः। त्रि। त्वगिन्द्रियसुखे। सु.सू.११अ.। क्ली। श्रोजसि।

मृत्स्नारम्। क्ली। मूलके। मूला। रा.नि.व.७।

मृदङ्गरः। पुं। हरितकपोते। हारीत पाखी, हरियाल। हे.च.।

मृदङ्गः। पुं। वंशे। श.मा.। वाद्ययन्त्रभेदे। पाखोयाज, खोल।

मृदङ्गफलः। पुं। पनसवृक्षे। काँटाल गाछ। श.र.। च.कल्प.६अ.।

मृदङ्गफलिनी। स्त्री। कीयातक्याम्। घोषा। रा.नि.व.३। [र.मा.।

मृदङ्गी। स्त्री। कीयातक्यां। श्वेत घोषा।

मृदाकरः। पुं। वीजे। बञ्जे। श.मा.।

मृदाह्वया। स्त्री। सौराष्ट्रमृत्तिकायां। हे.च.।

मृदितम्। क्ली। शूकरीगलक्षणविशेषे। "मृदितं पीड़ितं यत्तु संरब्धं वायुकोपतः।" सु.नि.१४अ.।

मृदिनी। स्त्री। मृत्स्नायाम्। गोपीचन्दन। वै.निघ.।

मृदुः। स्त्री। गृहकन्यायाम्। घृतकुमारी। रा.नि.व.५। शुभजातिपुष्पवृक्षे। श्वेत जाति फूलेर गाछ। त्रि। कोमले। तीक्ष्णाग्निगुण-भूयिष्ठे। सु.। दृंहणधूमपानविशेषे। अत्र धूमनाड़ी ३२ अङ्गुलिः, धूमद्रव्यञ्च सर्ज्जरसो देयः। भा.।

मृदुकण्टकः। पुं। श्वेतभिण्टायाम्। श्वेत काँटी। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृदुकण्टफला। स्त्री। कर्कटीलतायाम्। काँकुड़ गाछ। प.मु.।

मृदुकर्म्म। क्ली। कठिनस्य मृदुकरणे। सु.चि. १अ.। [व.१३।

मृदुकषायसम्। क्ली। सीसधातौ। रा.नि.

मृदुकोष्ठः। त्रि। स्वल्पौषधविरेचनयोग्ये कोमलकोष्ठे।

मृदुखुरः। पुं। अश्वस्य पादरोगविशेषे। लक्षणं —"मृदुखुरस्य विख्यातो मृदुर्यस्य खुरी भवेत्।" ज.द.२९अ.।

मृदुगमना। स्त्री। हंस्याम्। रा.नि.व.१९।

मृदुग्रन्थिः। पुं। मज्जरतृणे। रा.नि.व.८।

मृदुचर्म्मी (न्) । पुं। भूर्ज्जवृक्षे। रा.नि.व.९।

मृदुच्छदः। पुं। कीडणदंशप्रसिद्धे फीण्डालौ। रा.नि.व.७। नले। नल गाछ। रा.नि.व.८। श्वेतालवृक्षे। रा.नि.व.९। रक्तालज्जालुके। वै.निघ.। भूर्ज्जवृक्षे। हे.च.। आरण्याचीटे। जटा.। कुक्कुरदुमे। कुक्शिमा। रा.नि.व४। शिल्पिनीतृणे। पिण्डीखर्ज्जूरीवृक्षे। रा.नि.व.८।

मृदुच्छदा। स्त्री। भूमिखर्ज्जूरीवृक्षे।

मृदुतालः। पुं। श्वेतालै। रा.नि.व.९।

मृदुत्वक् (चः)। पुं। भूर्ज्जवृक्षे। अम.।

मृदुदर्भः। पुं। शुक्लकुशे। वै.निघ.।

मृदुद्रुमकम्। क्ली। स्वर्णे। श्.च.।

मृदुपत्रः। पुं। नले। नल गाछ। रा.नि.व.८। भूर्ज्जवृक्षे। रा.नि.व.९। शाकविशेषे। रक्तचिल्ली। वै.निघ.। क्ली। कोमलपर्णे।

मृदुपत्रा (त्री)। स्त्री। चिल्लीशाके। रक्तचिल्लीशाके। रा.नि.व.७।

मृदुपर्व्वकः (र्व्वा)। पुं। वेतसे। वेतवंशे। बेउड़ बाँश। रा.नि.व.७।

मृदुपुष्पः (कः)। पुं। शिरीषवृक्षे। शिरीष गाछ। र.मा.। रा.नि.व.९।

मृदुफलम्। क्ली। परूषकफले। वा.टी.अरुण.।

मृदुफलः। पुं। विकङ्कतवृक्षे। वँइचि गाछ। रा.नि.व.९। विकटकवृक्षे। मधुनारिकेलवृक्षे। रा.नि.व.११। परूषकवृक्षे। वै.निघ.। [वै.निघ.।

मृदुबीजः। पुं। विकङ्कतवृक्षे। वँइचि गाछ।

मृदुलम्। क्ली। अक्षीरफले। जले। श्.च.। त्रि। कोमले। स्त्री (ला)। सुलेमानीखर्ज्जूरीवृक्षे। सुलेमानी खेजूर। भा.।

मृदुलता। स्त्री। शूलीतृणे। रा.नि.व.८।

मृदुलोमकः (वान्)। पुं। शशके। हे.च.।

मृदुसारम्। क्ली। तूलकाष्ठे। पुं। पारिभाश्वत्थे। रा.नि.व.९।

मृदूत्पलम्। क्ली। नीलपद्मे। श्.च.।

मृद्गः। पुं। मत्स्यभेदे। उणा.।

मृद्गिलः। पुं। रोहितिकाकारमत्स्यभेदे। मिड़गेल माछ। तन्मांसगुणाः—"मृद्गिलस्तु गुणैर्न्न्यूनः प्रायो रोहितमत्स्यवत्॥"

मृद्वङ्गम्। क्ली। वङ्गधातौ। र.मा.। त्रिका.। पुं। वनवास्तुके। वै.निघ.।

मृद्वी (का)। स्त्री। द्राक्षालतायाम्। अम.। वा.चि.१अ.पटोलादौ। "मृद्वीकासुस्रवत्सकाः।" च.द.ज्व.चि.। "मृद्वीकापिप्पलीमूलचव्यचित्रकनागरैः।" च.द.पि.ज्व.चि.। "मृद्वीका मधुकं निम्बम्।"

मृद्वीकादिः। पुं। द्राक्षादिसिद्धकषाये। "मृद्वीका मधुकं निम्बं कटुकारोहिणी समा। अवश्यायस्थितं पाक्यमेतत्पित्तज्वरापहम्॥" च.द.पि.ज्व.चि.।

मृद्वीकादिकषायः। पुं। क्वेथोपगकषाये। "मृद्वीकामधुकमधुपर्णीमेदाविदारीकाकोलीक्षीरकाकोलीजीवकर्षभकजीवन्तीशालपर्ण्यः।" च.सू.४अ.।

मृद्वीकासवः। पुं। द्राक्षासवे।

मृद्वम्बरः। पुं। प्रस्तरे। पाथर।

मृषाध्यायी (न्)। पुं। वके। रा.नि.व.१९।

मृषालकः। पुं। आम्रवृक्षे। श्.च.।

मृष्टम्। क्ली। मरिचे। रा.नि.व.६।

मृष्टेरुकः। त्रि। मिष्टान्नभक्षके।

मेकः। पुं। छागे। रा.नि.व.१९।

मेखला। स्त्री। पृश्निपर्ण्याम्। चाकुलिया। रा.नि.व.४। गिरिनितम्बे। त्रिका.।

मेघः। पुं। मुस्तके। मूता। प.मु.। रा.नि.व.६। वै.निघ.२भ.अ.सा.चि.पाठादिः। तण्डुलीयशाके। काँटानटिया शाक। र.मा.। अभ्रके। अम.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघकफः। पुं। करकायाम्। हारा।

मेघचिन्तकः, **मेघजीवकः** } पुं। चातकपक्षिणि। श्र.च.।

मेघजीवनः। पुं। चातके। रा.नि.व.। तालवृक्षे। चाषपक्षिणि।

मेघनादः। पुं। तण्डुलीयशाके। प.मु.। रक्ततण्डुलीयके। मेघनादरसे। रस.र.स्तनरो.चि.। पलाशवृक्षे। श्र.र.। वै.निघ.२भ.अन्तकज्व.चि.। मृतसञ्जीवन्यां। मयूरे। विड़ाले। छागे। चिका.। वरुणवृक्षे। भैष.कुष्ठ.चि.। 'मेघनादाग्निलाङ्गला।'

मेघनादानुलासकः (लासी)। पुं। मयूरे। रा.नि.व.१९। अम.।

मेघनामा। पुं। मुस्तके। अम.। तण्डुलीयशाके। वै.निघ.।

मेघनीलकः। पुं। तालीशपत्रे। वै.निघ.।

मेघपुष्पः। पुं, क्ली। अजशृङ्गी। रा.नि.व.२३। मुस्तके। अभ्रे। नदीजले। मे.। जले। अम.।

मेघपुष्पी। स्त्री। वेतसे। जले। अम.। करकायाम्।

मेघप्रसवः। पुं। जले। रा.नि.व.१४।

मेघफलः। पुं। विकङ्कतफलवृक्षे। वैचिगाछ। रा.नि.व.११।

मेघभूतिः। पुं। वज्रे। श्र.र.।

मेघर(रा)वः। पुं। सञ्जातचरजलपक्षिणि। गुणाः—प्लववत्। च.सू.२७अ.। चि.क्र.क.बालचि.। मयूरे।

मेघवर्णा। स्त्री। भूमिजम्बूवृक्षे। नदीजम्बूवृक्षे। वै.निघ.। नीलीवृक्षे। श्र.च.।

मेघसारः। पुं। चीनकर्पूरे। रा.नि.व.१२।

मेघसुहृत्। पुं। मयूरे। हे.च.।

मेघस्कन्दी (इन्)। पुं। महासिंहे। वड़सिंह। रा.नि.व.१९। [नि.व११।

मेघस्तनितोद्भवः। पुं। विकङ्कतवृक्षे। रा.

मेघस्वनाङ्कुरः। पुं। वैदूर्यमणौ। प.मु.।

मेघाख्यम्। क्ली। मुस्तके। र.मा.।

मेघागमः। पुं। धाराकदम्बे। केलिकदम। रा.नि.व.९। वर्षाकाले। श्र.र.।

मेघागमप्रियः। पुं। धाराकदम्बे। वै.निघ.।

मेघानन्दः (न्दा)। पुं, स्त्री। मयूरे। बलाकायाम्। रा.नि.व.१९।२३।

मेघानन्दी (इन्)। पुं। मयूरे। रा.नि.व.१९।

मेघान्तः। पुं। शरत्काले। रा.नि.व.२१।

मेघाभः। पुं। धाराकदम्बवृक्षे।

मेघाभा। स्त्री। भूजम्बूवृक्षे। जाम गाछ। वै.निघ.।

मेघास्थि। क्ली। करकायां शिलां। विद्या.।

मेघाह्वः। पुं। अभ्रके। उशीरे। वै.निघ.२भ. चित्तभ्रमसन्निपातचि.। मुस्तायाम्।

मेचकः। पुं। मुस्तकवृक्षे। पीतशाले। कुन्दुरुखोटौ। वै.निघ.। पिच्छचन्द्रके। मे.। विचित्रवर्णे। कृष्णपीतरक्तवर्णे। मा.नि.अतिसा.चि.। मन्दविषवृश्चिकजातौ। सु.कल्प.८अ.। धूमे। शोभाञ्जने। श्र.र.। रुचकवर्णे। भा.। क्ली। सौवीराञ्जने। शुक्ले। प.मु.। श्वेतोऽञ्जने। मे.। सौवर्चललवणे। विड़लवणे। वै.निघ.।

मेचका। स्त्री। वनकार्पास्याम्। वन कार्पास। वै.निघ.।

मेचकाञ्जनम्। क्ली। कृष्णाञ्जने। काल अञ्जन। वै.निघ.।

मेचकाभिधा। स्त्री। वत्सादनीलतायाम्। पातालगारुड़ी। रा.नि.व.३।

मेटुला। स्त्री। आमलक्याम्। श्र.च.।

मेठः (ढ़ः)। पुं। मेषे। मेढ़ा। प.मु.।

मेढ़िका। स्त्री। क्षुद्रमेषशृङ्ग्याम्। क्षुद्र मेढ़ाशिङे। वै.निघ.।

मेढ्रः। पुं। शिश्ने। रा.नि.व.१८। सगर्भस्यस्य सप्तभिर्मासैर्भवति। सुखबोधः।

मेढ्रशृङ्गी। स्त्री। मेषशृङ्ग्यां। प.मु.।

मेढ्रास्थि। क्ली। लिङ्गास्थनि। च.शा.७अ.।

मेण्ढः (कः)। पुं। मेषे। श्र.र.।

मेथा। स्त्री। मेथिकायाम्। रा.नि.व.९।

मेथिः (का, थी)। स्त्री। Trigonella Foenum graecum.) Fenugreek. स्वनामख्यातगन्धद्रव्ये। मेति। हिं मं मेथी। कं मेथय। तें मेण्टुलु। ता. वेन्डयम्। सा द्विधा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेथी वनमेथीति। तत्पर्य्यायाः—मेथिनी दीपनी बहुपत्रिका वेधनी गन्धफला गन्धबीजा ज्योतिः वल्लरी चन्द्रिका मन्था मिश्रपुष्पा कैरवी कुक्षिका बहुपर्णी पीतबीजा। गुणाः—कटु, उष्णा रक्तपित्तकरी अरोचकघ्नी वातघ्नी दीपनी च। रा.नि.व.६। अन्या—"ततः स्वल्पगुणा वन्या वाजिनां सा तु पूजिता।" भा.। "मेथिका वातशमनी वेजिका वातला मता।" अचि.१६अ.।

मेथिनी। स्त्री। मेथिकायाम्। मेथि। रा.नि.व.६।

मेथौमोदकः। पुं। वाजीकरणाध्याये। पाठः—"चिकटुत्रिफलामुस्तजीरकद्वयधान्यकं। कट्फलं पौष्करं शृङ्गी यमानी सैन्धवं विड्। तालीशकेशरं पत्रं त्वगेला च फलं तथा। यावन्त्येतानि चूर्णानि तावदेव च मेथिका। संचूर्ण्य गुग्गुलङ्कार्य्यं पुरातनगुड़ेन तु। घृतेन मधुना मिश्रं खादेदग्निबलं प्रति॥" रस.र.।

मेदः। क्ली। शरीरस्थचतुर्थधातौ। मांसजस्नेहे। मांससारभूतधातौ। मेदधातुः। तत्पर्य्यायाः—वपा वसा मांससारः मांसस्नेहः। तत्स्वरूपादि—"यन्मांसं स्वाग्निना पक्वं तन्मेद इति कथ्यते।" गुणाः—"तदतीव गुरु स्निग्धस्वलकार्श्यतिवृंहणम्। मेदो हि सर्व्वभूतानामुदरेष्वस्थिषु स्थितम्। अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत्॥" भा.। पुं। अलम्बुषायाम्। रा.नि.व.५।

मेदःसारः। वि। मेदस्विनि। बलवर्णनेत्रकेशश्मश्रुनखदन्तौष्ठमूत्रपुरीषेषु विशेषतः स्नेहः मेदःसाराणां। सा सारता वित्तैश्वर्य्यसुखोपभोगप्रदानान्मार्द्दवं सुकुमारोपचारतामाचष्टे। च.वि.८अ.। स्त्री (रा)। मेदायाम्। मेदा। रा.नि.व.५।

मेदकः। पुं। जगलसुराया घनतरसुरायाम्। "मेदकी जगलाहनः।" प.प्र.३ख.। च.शा.८अ.।

मेदकोद्भवा। स्त्री। मेदायां। र.मा.।

मेदगज्वरः। पुं। तदाश्रितज्वरे। लक्षणम्—"भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्द्दिरेव च। दौर्गन्ध्यारोचकौ ग्लानिर्मेदस्थे चासहिष्णुता॥" मा.नि.।

मेदजः। पुं। भूमिजगुग्गुलौ। रा.नि.व.१२।

मेदपुच्छः। पुं। एड़के। दुम्बा मेष। तन्मांसगुणाः—"मेदपुच्छीभवं हृद्यमौरभ्रसदृशं गुणैः॥" सु.सू.४६अ.।

मेदभवः। पुं। मेदधातौ। वै.निघ.।

मेदसन्निभा। स्त्री। दुग्धफेणिकायाम्।

मेदसमुद्भवम्। क्ली। अस्थनि। स्त्री (वा)। वसायां। वै.निघ.।

मेदसमुद्भूता। स्त्री। मेदधातौ। वै.निघ.।

मेदस्कम्। क्ली। मांसे।

मेदस्कृत्। क्ली। मांसे। हे.च.।

मेदा। स्त्री। स्वनामख्यातलताजातशुक्लकन्दविशेषे। सा च मध्यदेशजाता लघुमेदा इति गौड़देशे प्रसिद्धा। तें ज्योतिष्मतीचेटु, शङ्खपुष्पचेटु। तत्पर्य्यायाः,—मेदःसारा मेदिनी मेदीवती मेदीद्भवा जीवनी श्रेष्ठा सनिच्छिद्रा विशानरी वसा स्वल्पपर्णिका स्नेहवती मधुरा स्निग्धा मेधा द्रवा साध्वी शल्यदा बहुरन्ध्रिका पुरुषदन्तिका। गुणाः मधुरा शीता पित्तदाहकासघ्नी राजयक्ष्मक्षयहरी वातला च। "मेदापि शुक्लकन्दः स्यात् मेदीधातुसिव स्रवेत्॥" रा.नि.व.५। See महामेदा।

मेदाद्वयम्। क्ली। मेदायां महामेदायाञ्च। वा.सू.१५अ.जीवन्त्यादिः। "जीवन्ती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च।"

मेदिनी। स्त्री। मेदायां। अजमोदायाम्। गाम्भारीवृक्षे। रा.नि.व.५।६।९। पृथिव्याम्।

मेदुरः। पुं। सल्लकीनिर्य्यासे। वै.निघ.। वि। अतिस्निग्धे। अम.। स्त्री (रा)। काकोल्याम्। काँकुलां। रा.नि.व.७।

मेदोगण्डः। पुं। गलरोगभेदे। निदा.।

मेदोगतज्वरः। पुं। तद्धातुगज्वरे। मा.नि.। See मेदगज्वरः।

मेदोगला। स्त्री। लज्जालुकाभेदे। वै.निघ.।

मेदोग्रन्थिः। स्त्री। मेदसः ग्रन्थौ। लक्षणं—"प्रवृद्धं मेदुरैर्मेदो नीतं मांसेऽथवा त्वचि। वायुना कुरुते ग्रन्थिं भृशं स्निग्धं मृदुश्चलम्। श्लेष्मतुल्याकृतिं देहक्षयवृद्धिक्षयोदयम्। स विभिन्नो घनं मेदस्तामासितसितं स्रवेत्॥" वा.उ.२९अ.।

मेदोजम्। क्ली। अस्थिधातौ। हाड़। रा.नि.व.१८। [ङ्खला तया दाहे। जा.द.१४अ.।

मेदोदाहः। पुं। पुरलाचादिभिर्वर्त्तिमष्टाङ्गला-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेदोज्ञवा। स्त्री। मेदायां। रा.नि.व.५।
मेदोधरा। स्त्री। देहे ततीयकलायाम्। "मेदो-हि सर्व्वभूतानामुदरस्थमन्तस्थिपु च महत्, च सज्ञा भवति।' सु.शा.४अ.।
मेदोरोगः। पुं। तद्दोषरोगे। निदा.।
मेदोरोहिणी। स्त्री। गलरोगविशेषे। निदा.।
मेदोऽर्व्बुदः। पुं। औष्ठरोगभेदे। क्ली। मेदोजार्व्बुदे। निदा.। See मेदोग्रन्थिः।
मेदोवती। स्त्री। मेदायां। रा.नि.व.५।
मेदोहृद्धिः। स्त्री। देहस्थौल्ये। अष्टहद्धौ। निदा.।

मेध्यः। त्रि। मेधोजन्ये। सु.नि.६अ.।
मेधा। स्त्री। मेदायां। रा.नि.व.५। धारणावत्यां बुद्धौ। अम.। सल्लकीवृक्षे। वै.निघ.।
मेधाकरी। स्त्री। शङ्खपुष्प्याम्। वै.निघ.। ब्राह्मीवृक्षे। वै.संग्रहः।
मेधाकृत्। क्ली। शितावरीवृक्षे। शुक्लनि शाकु। रा.नि.व.४। ब्राह्मीवृक्षे। वै.निघ.।
मेधाजननम्। क्ली। कृष्णसर्षपे। वै.निघ.।
मेधायुः। स्त्री। ब्राह्मीवृक्षे। वै.निघ.।
मेधावतो (विनो)। स्त्री। महाज्योतिष्मतीलतायां। रा.नि.व.३। शारिकायां। शालिक पाखी। वै.निघ.।
मेधावी (विन्)। पुं। शुकपक्षिणि। शारिकायां। त्रिका.। क्ली। सद्मे। रा.नि.व.१४।
मेधिः। पुं। धान्यमर्दनस्थाने पशुबन्धनार्थन्यस्तदारुणि। भ.।
मेधिका। स्त्री। तन्नामकवृक्षे। मेदो गाछ। वै.निघ.।

मेध्यः। पुं। खदिरवृक्षे। वर्करे। छागल। रा.नि.व.८।१९। यवे। प.मु.। स्त्री (ध्या)। रक्तवचायां, श्वेतवचायाम्। प.मु.। रा.नि.व.६।२३। महाज्योतिष्मतीलतायाम्। शङ्खपुष्प्याम्। रा.नि.व.३।२३। ब्राह्म्याम्। रा.नि.व.५।२३। शमीवृक्षे। रा.नि.व.८। केतकीवृक्षे। केया गाछ। रा.नि.व.१०। गोरोचनायाम्। रा.नि.व.१२। अपरानितायाम्। वृद्धौ। शर्करायां। रा.नि.व.२३। मण्डूक्याम्। रा.नि.व.५।

मेनादः। पुं। विड़ाले। छागे। मयूरे।
मेन्धिका (न्धी)। स्त्री। मेढ़दीति ख्याते वृक्षे। मेदो गाछ। कीपान्तरम्।
मेरुकः। पुं। मूषिके। वै.निघ.। यवधूपे। धूना। शा.च.।
मेरुपादजम्। क्ली। रौप्ये। वै.निघ.।
मेलकलवणम्। क्ली। सुतिकालवणे। रा.नि.व.६।

मेला। स्त्री। महानील्याम्। रा.नि.व.४। कृष्णाञ्जने। हे.च.।

मेलान्धुः। स्त्री। मद्याधारे। जटा.।
मेषः (कः)। पुं। पशुविशेषे। भेड़ा। तत्पर्य्यायाः,—मेढ्रः उरणः उरभ्रः ऊर्णायुः वृष्णिः एडः एडकः एलकः पृथूदरः बहुरोमा भेड़ः भेडुः शृङ्गिणः अविः लोमशः बली रोमशः फेड़कः मेषः हलुः मेहः सम्फालः। प.मु.। एरके। नैगमेये गुहे। भा.म.४भ.नैगमेयचि.। "कौमार-मूले मेषाय प्रचमूले निवेदयेत्।" मांसगुणाः— मधुरं शीतलं गुरु विष्टम्भि हृंहणञ्च। रा.नि.व.१९। पित्तश्लेष्मकरं कुसुम्भशाकेन सह त्याज्यञ्च। राज.। अण्डविहीनस्य मेषस्य मांसं किञ्चित् लघु। जीवशाके। रा.नि.व.७। मेषराशौ।
मेषकम्बलः। पुं। मेषलोमकृतकम्बले। अम.।
मेषकुसुमः। पुं। चक्रमर्दे। चाकन्दा। वै.निघ.।
मेषपुष्पा। स्त्री। मेषशृङ्ग्याम्। मेड़ाशिङे। वै.निघ.।
मेषमूत्रम्। क्ली। मेषीमूत्रे। See अवीमूत्रम्।
मेषलोचनः। पुं। चक्रमर्दवृक्षे। भा.।
मेषवल्ली। स्त्री। मेषशृङ्ग्याम्। भा.।
मेषविषाणिका। स्त्री। मेषशृङ्ग्याम्। मेड़ाशिङे। र.मा.। वै.निघ.२भ.क्षय.चि.श्लिवगुटी।
मेषशृङ्गम्। क्ली। मेषस्य शृङ्गे। भेड़ार शिङ्। रावणकृतकुमारतन्त्रं।
मेषशृङ्गः। पुं। स्वनामख्याततिक्तशाकगणौषधविशेषे। मेड़ाशिङे। प.मु.। कर्कटशृङ्गे। स च पुनर्नवासदृशतरुविशेषः। काँकड़ाशृङ्गी। सु.सू.३८अ.। पुनर्नवभेदे। सु.चि.२अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेषशृङ्गी। स्त्री। अजशृङ्ग्यां। मेढ़ाशिङ्गे। काँकड़ाशृङ्गी। तत्पर्य्यायाः,—नन्दीवृक्षः मेषविषाणिका मेषवल्ली चक्षुः चक्षुर्वल्लं मेढ़शृङ्गी गृहद्रुमा बहुलचक्षुः विषाणी अजशृङ्गिका। रा.नि.व.१९। सु.सू.३८।३९अ.। See अजशृङ्गी।

मेषा। स्त्री। सूक्ष्मैलायाम्। श.च.।

मेषाख्यः। पुं। बालग्रहविशेषे, नैगमेषे। वा. उ.३अ.।

मेषान्त्री। स्त्री। अजान्त्रीलतायाम्। छागलवेँटो। रा.नि.व३।

मेषालुः। पुं। वर्वरावनस्पतौ। श.च.।

मेषाह्वयः। पुं। चक्रमर्द्दवृक्षे। रा.नि.व.४।

मेषाक्षिकुसुमः। पुं। चक्रमर्द्दवृक्षे। र.मा.।

मेषिका। स्त्री। मेषपत्र्याम्। श.र.।

मेषी (इन्)। पुं। तिनिशवृक्षे। तिनिश, सादन। रा.नि.व.९। जटामांस्यां। रा.नि.व.१२। मेषपत्र्याम्। तत्पर्य्यायाः,—जालकिनी अविः अविला एड़का मेषिका क्रूररी रुजा वेणी। चिक्का। मेषशृङ्ग्याम्। मेढ़ाशिङ्गे। भैष.वाजी.।

मेहः। पुं। प्रमेहरोगे। रा.नि.व.२०। अक्षीरे। मूत्रे। हे.च.। मेघे। श.च.।

मेहकुलान्तकरसः। पुं। वसामेहे औषधम्। पाठः—"सृतं वङ्गं सृतञ्चाभं शुद्धपारदगन्धकं। भूनिम्बं पिप्पलीमूलं चिकटु त्रिफला त्रिवृत्। रसाञ्जनं विड़ङ्गाब्दं बिल्वगोत्तरदाड़िमम्। प्रत्येकं तोलकं ग्राह्यं शुद्धमश्मजतीः पलम्। गोपालकर्कटीमूलस्वरसैर्वटिकां कुरु।.....अनुपानं प्रयोक्तव्यं छागीदुग्धम्पयोऽथवा.....॥" भैष.।

मेहघ्नी। स्त्री। हरिद्रायाम्। प.मु.।

मेहनम्। क्ली। लिङ्गे। रा.नि.व.१८। भूवणे। वा.उ.६अ.। पुं। सुश्रुतवृक्षे। घण्टापाकृल। रा.नि.व.११। [हे.निघ.।

मेहनाशिनी। स्त्री। श्वेतापराजितायाम्।

मेहमुद्गरवटी। स्त्री। प्रमेहनाशकवटिकाभेदे। पाठः,—रसाञ्जनं विड़ं दारु बिल्वगोत्तरदाड़िमाः। भूनिम्बपिप्पलीमूलं चिकटुचिफलात्रिवृत्॥ प्रत्येकं तोलकं देयं लौहचूर्णन्तु तत्समम्। पलैकं गुग्गुलुं दत्त्वा घृतेन वटिकां कुरु॥ मात्रैका निर्म्मिता चेयं मेहमुद्गरसंज्ञिनी॥" भैष.।

मेहहररसः। पुं। प्रमेहाधिकारे रसः। पाठः—"गन्धेन सूतं द्विगुणं प्रगृह्य विमर्द्दयेत् गोत्तरनीरयुक्तं। शुष्कञ्च कृत्वाथ सुतप्रतामश्चक्रञ्च तस्योपरि विन्यसेच्च॥ चक्रे विलग्नञ्च ततः प्रगृह्य मूषोदरे भापय टङ्गणेन। संगृह्य चक्रे च निधाय गोलं त्रिःसप्तकान्मेहविमुक्तिरेति॥" रस.चि.९अ.।

मैत्रम्। क्ली। स्नेहे। मलमूत्रत्यागे। राज.।

मैत्रकर्म्म (न्)। क्ली। मलमूत्रत्यागे।

मैत्री। स्त्री। मित्रतायाम्। अनुराधायाम्। सर्व्वप्राणिष्वात्मबुद्धौ। च.सू.१अ.।

मैत्रीपरः। त्रि। मैत्रीप्रधाने। च.सू.चक्रद.टी.।

मैथुनम्। क्ली। स्त्रीपुरुषसङ्गमे। तत्पर्य्यायाः,—सुरतं सूरतं अभिमाणितं धर्षितं सम्प्रयोगः अनारतं अब्रह्मचर्य्यकं उपसृष्टं विभ्रमं रतिक्रिया सम्भोगनं क्रीड़ारत्नं महाद्रव्यं व्यवायः ग्राम्यधर्म्मः रन्तं निधुवनं रत रमणं यतिः योगमिथुनं सम्भोगः शृङ्गारः प्रसक्तिः रतिलक्षं मोहनं पशुक्रिया प्रसङ्गः स्त्रीसंसर्गः यातं स्त्रीसङ्गमः समीचकः। विवाहे। स्त्रीविशेषमैथुने तत्कालनिर्णयो यथा—"निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः। हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते॥" मैथुननिषेधो यथा—"नक्तं च षोड़शाद्वर्षात् सप्तत्याः परतो न च। आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति॥" सामान्यतो मैथुनकालनिर्णयः—"विभिस्त्रिभिरहोभिश्च सेवेत प्रमदां नरः। सर्व्वेष्वृतुषु शीतेषु पक्षान्मासात् व्रजेद्बुधः॥" परिमितस्य गुणाः—"स्मृतिमेधायुरारोग्यपुष्टीन्द्रियबलैः। अधिकानन्दजरसो भवन्ति स्त्रीषु संयुताः॥" अतिमैथुनदोषाः—"व्यवायो धात्वपचयं कुरुते रत्यल्पत्वदः। ग्लानिकम्पोरुदौर्ब्बल्य धालिन्द्रियबलक्षयः। क्षयवृद्ध्युपदंशाद्या जायन्तेऽतिव्यवायतः। अतिव्यवायाज्जायन्ते कासश्वासज्वरादयः॥" मैथुनाकरणगुणाः—"अशेषवनान्मेहमेदोयन्थिरग्नेश्च मार्द्दवम्।" राज.५प.।

मैरेयः। पुं, क्ली। सुराविशेषे। तच्च धातकीपुष्पगुड़धान्याम्लसन्धानेन कृतम्। "मैरेयं धातकीपुष्पगुड़धान्याम्लसंहितम्।" प.प्र.३अ.। यद्वा सुरासवयोः प्रत्येकं निष्पादितयोरेकीकृत्य पुनः सन्धानम्। तच्च मधु देयम्। "आसवस्य सुरायाश्च द्वयोरेकत्र भाजने। सन्धानं तद्विजानीयात् मैरेयमुभयात्मकम्॥" ब्रह्मशौनकात् चन्द्रिका।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"मैरेयं धातकीपुष्पगुड़धान्याम्लसाधितम्। सचातुर्जातकाजाजीमरिचौषणनागरम्॥" वाचस्पतिः। गुणाः—"तीक्ष्णः कषायो मदकृत् दुर्नामकफगुल्महृत्। कृमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः॥" सु.सू.४५अ.। इक्षवमद्ये। धान्याम्लवे। आसवे। अम.।

मैरेयाम्बु। क्ली। कांस्किकभेदे। मैरेयप्रमद्य। च.द.विद्रधि.चि.।

मैरेयी। स्त्री। सुराविशेषे। तत्प्रस्तुतविधिर्यथा, —"मालूरमूलं बदरी शर्करा च तथैव च। एषामेकत्र सन्धानात् मैरेयी मदिरा मता॥" गुणाः—"मैरेयी वातहृद् बल्या ज्वरघ्नी वह्निदीपनी।"

मैला। स्त्री। नीलीवृक्षे। वै.निघ.।

मोघपुष्पा। स्त्री। वन्ध्यायाम्।

मोघा। स्त्री। विड़ङ्गायाम्। रा.नि.व.६। च.शा.८अ.। वदर्याम्। कुलगाछ। मद.। पाटलवृक्षे। मे.।

मोचम्। क्ली। शाल्मलीवेष्टे। मोचरस। च.द.सि.यो.ग्रहणी.चि.बालचाङ्गेरीवृक्षे। मोचाफले। मोचा। अम.। भैष.पाददारी.चि.।

मोचः (कः)। पु। शोभाञ्जनवृक्षे। रा.नि.व.७। मुष्ककवृक्षे। घण्टापारुल। रा.नि.व.११। मोचरसे। च.द.बाल.चि.। वै.निघ.२भ.ग्रहणी.चि.औषधादिचूर्णे। कदलीवृक्षे। हे.च.।

मोचका (की)। स्त्री। शाल्मलीवृक्षे। शिमूल गाछ। सु.चि.२अ.।

मोचनम्। क्ली। मोक्षणे। विस्रावणे। भा.म.कुष्ठ.चि.। स्त्री (नी)। वस्त्रकाण्यीम्। जटा.।

मोचना। स्त्री। सन्दंशे। सँड़ाशि।

मोचनिर्यासः। पुं। मोचरसे। रा.नि.व.८।

मोचपुष्पा। स्त्री। वन्ध्यायां स्त्रियाम्। दाँजा मेये। रा.नि.व.१८। कदलीवृक्षे।

मोचरसः। पुं। स्वनामख्यातसारजवर्गीयद्रव्यभेदे, शाल्मलिवेष्टे। मोचरस, शिमूलेर आँटा। तत्पर्य्यायाः,—मोचनिर्यासः मोचस्रत् मोचसुत् मोचाक्षः मोचाङ्गः शाल्मलीनिर्य्यासः पिच्छलसारः सुरसः शाल्मलीवेष्टः पिच्छा शाल्मलिः शाल्मलीवेष्टकः। र.मा.। सु.सू.३८अ.प्रियङ्वादिः। गुणाः —कषायः कफवातघ्नः योगेन रसायनः बलपुष्टिवर्णवीर्य्यप्रज्ञायुर्देहसिद्धिकरः ग्राही च। रा.नि.व.८। वा.सू.१५अ.प्रियङ्वादिव.। "मानदुमोमोचरसः।"

मोचसारः। पुं। मोचरसे। रा.नि.व.८।

मोचस्रवः (स्रावः,वी (इन्), स्रुत्)। पुं। मोचरसे। रा.नि.व.८। वै.निघ.।

मोवा। स्त्री। शाल्मलिवृक्षे। शिमूल गाछ। रा.नि.व.८। वदलीवृक्षे। भा.। रा.नि.व.११। नीलीवृक्षे। नील गाछ। रा.नि.व.४। शल्लकीवृक्षे। वा.सू.१५अ.रोध्रादिः। "सैलबालुपरिपेलवमोचाः।"

मोचाख्यः। पुं। शाल्मलीवृक्षे।

मोचाटः। पुं। क्षणजीरके। अम.। कदलीवृक्षे। कदलीस्थाने थोड़। मे.। चन्दनवृक्षे। वै.निघ.। [वै.संग्रहः।

मोचाफलम्। क्ली। कदल्याम्। कला।

मोचारसः। पुं। कदलीस्वभञ्जले। "मोचारसेन सहितं।" भा.म.४भ.सन्निपा.चि.शीतलाधिकारे।

मोचास्रावः। पुं। मोचरसे। वै.निघ.।

मोचाह्वः। पुं। शाल्मलीवेष्टके। मोचरस। सिद्धौ.रक्तार्शः-चि.। "समङ्क्तीपलमोचाह्वतिरीटतिलचन्दनैः।" वै.निघ.।

मोचिका। स्त्री। मत्स्यभेदे। वै.निघ.। तन्मांसगुणाः,—मोचिका वातहृद् बल्या रूक्षा ह्रद्या दीप्ताग्नीनां हिता।

मोचिनी। स्त्री। कण्टकार्य्याम्। वै.निघ.।

मोचिलिन्दा। स्त्री। राजादनवृक्षे। वै.निघ.।

मोची। स्त्री। हिलमोचिकायाम्। हिंचे। र.मा.। See मोचा।

मोञ्छिकायन्त्रम्। क्ली। सुराद्रोणतनयन्त्रे। मदेर भाँटी। भैष.मृतसञ्जीवनीसुरा.।

मोटनम्। क्ली। आचेपे। निदा.।

मोटा। स्त्री। क्षुद्रबलाचुपे। छोट बेलेड़ा। रा.नि.व.४। जयन्त्याम्। चुकै। चूका पालङ। वै.निघ.।

मोणः। पुं। शुष्कफले। वै.निघ.। नक्के। मचिकायाम्। सर्पकरण्डे। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोथः। पुं। मुस्तके। कीषान्तरम्।

मोदः। पुं। आम्रवृक्षे। सुरभिगन्धे। वै.निघ.।

मोदकः। पुं। गुडः। यवासशर्करायाम्। रा. नि.व.१४। लड्डुके। लाड़ू। मे.। गुडशर्करादि-पाकेन अस्य पूर्णवीर्य्यं षण्मासं तिष्ठति। सुखबोधः। मोदकाद्यौषधमात्रादि यथा—"मोदको वटकः पिण्डो तन्मात्रा चूर्णवन्मता। मोदकेषु द्विगुणितो गुडः सिता चतुर्गुणा। पक्वेन वटकाः कार्य्या गुडेन सितयाथवा। परं हि वह्निसम्पर्काल्लघिमानं भजन्ति ते। चूर्णावलेहगुडिकाकल्कानामनुपानकम्। वातपित्तकफातङ्के द्विवे एकपलमाहरेत्॥" गोपुरः।

मोदकी। स्त्री। मूर्व्वायाम्। वै.निघ.२भ. वा. व्या. चि.षड्शीतिगुग्गुलौ। जिह्वायाम्।

मोददायिनी। स्त्री। जातीवृक्षवृक्षे। जाती-फूलेर गाछ। मु.।

मोदनम्। क्ली। सिक्थके। रा.नि.व.१३। पुं। मदनवृक्षे। मयना गाछ। (सौभाग्यगुग्गो-मोदके।)

मोदनी। स्त्री। यूथिकायाम्। श्वेत जूँई। वृत्तमल्लिकायाम्। रा.नि.व.१०। उपोदिकायाम्। पूँई गाछ। प.मु.।

मोदमोदिनी। स्त्री। जम्बूवृक्षे। जाम गाछ। रा.नि.व.११।

मोदयन्ती। स्त्री। त्रिपुरमल्लिकायाम्। नव मल्लिका, काठमल्लिका। तत्पर्य्यायाः,—खरस्वरा वृणशून्या भूपदी मोदयन्तिका। प.मु.। सु.चि. २५अ.। "पिष्ट्वा च सर्व्वं सह मोदयन्त्या।"

मोदा। स्त्री। शाल्मलिवृक्षे। शिमूल गाछ। र.मा.। अजमोदायां। वनयवानी। मद.व.२। रा.नि.व.६।

मोदाख्यः। पुं। आम्रवृक्षे। रा.नि.व.११।

मोदाढ्या। स्त्री। अजमोदायाम्, वनयमानीम्। रा.नि.व.६।

मोदिनी। स्त्री। यूथिकायाम्। मल्लिकापुष्पवृक्षे। मल्लिका गाछ। तत्पर्य्यायाः,—वटपत्री कुमारिका वृत्तमल्लिका। गुणाः,—कटुः उष्णा गन्धाढ्या व्रणघ्नी नेत्ररोगनाशिनी च। वृत्त-मल्लिकायाम्। रा.नि.व.१०। कस्तूर्य्याम्। मृगनाभि। वै.निघ.। अजमोदायां। रा.नि.व.६। मदिरायां। रा.नि.व.१४।

मोरट(क)म्। क्ली। प्रसवात् सप्तरात्रादनन्तरं यत् क्षीरं तन्मोरटमुच्यते। र.मा.। रा.नि.व.१४। "मधुरौ वृंहणौ वृष्यौ तद्वत् पीयूषमोरटौ।" सु. सू.४५अ.। (कम्) वृक्षमूले। भा.म.ख.४भ. मसूरि.चि.। हस्तिकर्णपलाशे। सु.सू.३८अ.। च.द.वीरतरादौ.। अङ्कोटपुष्प। आँकोड़ेर फूल। मे.।

मोरटः (कः)। पुं। लताकराड़ इति प्रसिद्धे वृक्षभेदे। प.मु.। क्षीरमोरटे वा। लताकराड़, क्षीरकराड़। तत्पर्य्यायाः,—शीतदुः सुदलः क्षीरकः क्षीरमोरटः क्षीरपुष्पः कर्णपुष्पः पीलुपर्णः मधुस्रवः घनमूलः दीर्घमूलः पुरुषः क्षीरबहुलः। गुणाः—सकषायमधुरः वृष्यः बल्यः पित्तदाहज्वर-घ्नश्च। रा.नि.व.३। अङ्कोल्लवृक्षे। आँकोड़ गाछ। सु.सू.३८अ.। खदिरभेदे। श्वेत खदिर। वै.निघ.।

मोरटा। स्त्री। मूर्व्वायाम्। मूर्गा। प.मु.। रा.नि.व.३। सु.सू.३८अ.। वा.सू.१५अ.वरुणादिः। भाखोटकवृक्षे। शेओड़ा गाछ। सु.सू.३८अ.।

मोरणम्। क्ली। तरुनिर्य्यासे। क्षीरनिर्य्यासे। दुग्धकूर्च्चिकायाम्। वै.निघ.।

मोर्व। पुं। मूर्व्वायाम्। वै.निघ.।

मोहः। पुं। विपरीतज्ञाने। भा.अध.अम्ल.पि. चि.। भा.। म.ख.४भ.विस्फोट.चि.। मूर्च्छायाम्। मा.नि.।

मोहकारी (इन्)। पुं। माड़ इति क्रीड़णे ख्याते वृक्षविशेषे। रा.नि.व.९।

मोहनः। पुं। धुस्तूरवृक्षे। रा.नि.व.१०। कृष्णसुष्ककवृक्षे। चित्तविभ्रमे। वै.निघ.। क्ली। सुरते। हे.च.।

मोहनभोगः। पुं। लम्बिकायाम्। हिं हालुया। See लम्बिका।

मोहनवल्ली। स्त्री। वन्दाके। वा.उ.५अ.।

मोहना (नी)। स्त्री। त्रिपुरमल्लिकायाम्। रत्ना.। वृत्तमल्लिकायाम्। रा.नि.व.१०। उपोदिकायाम्। रा.नि.व.७।

मोहनिका (हिनी)। स्त्री। त्रिपुरमल्लिकायां।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र.मं.। सु.चि.२८अ.। वृत्तमल्लिकायाम्। रा.नि.व.१०। शतदलमल्लिकायाम्। प.सु.। कट्फले। वटपत्रपाषाणभिदे। भङ्गायाम्। सिद्धि। मद्यविशेषे। उपोदिकायाम्। पूँई। वै.निघ.।

मोचः (कः)। पुं। पाटलवृक्षे। पाकुलगाछ। मे.। (कः) सुष्ककदले, पलाशवत्पर्णवृक्षे। घण्टापाकुल। भा.।

मौकुलिः (ली(इन्))। पुं। द्रोणकाके। दाँड़ काक। वै.निघ.। काके। हे.च.।

मौक्तिकम्। क्ली। अन्ने। वै.निघ.। मुक्तायाम्। मुक्ता। हिं मोती। गुणाः—मौक्तिकं शीतलं वृष्यं चक्षुष्यं बलपुष्टिकृत्। भा.पू.१भ.रत्नवर्गः। शोधनादिकं माणिक्यशब्दे द्रष्टव्यम्। तस्य लेपः शीघ्रादिहरः। वा.उ.३७अ। See मुक्ता।

मौक्तिकतण्डुलः। पुं। धवलयावनाले। श्वेत जनार। रा.नि.व.१६।

मौक्तिकप्रसवा। स्त्री। मुक्ताशुक्तौ। मुक्तार झिणुक। रा.नि.व.१३।

मौक्तिकयोनी। पुं। शुक्तिशङ्खादि मौक्तिकजनके। "शुक्तिशङ्खगजक्रोड़ः फणी मत्स्यश्च दर्दरः। वेणुरिते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः।"

मौक्तिकशुक्तिः। स्त्री। मुक्ताशुक्तौ। मुक्तार झिणुक। रा.नि.व.१३।

मौक्तिकसम्पुटः। पुं। मुक्ताशुक्तौ। प.सु.।

मौक्तिकसम्भवम्। क्ली। शुक्लाङ्गने। वै.निघ.।

मौक्तिकस्थानम्। क्ली। शुक्तिशूकरशङ्खसर्पभेकमत्स्यवेणुगजेषु। वैद्यकम्।

मौण्डिकः। पुं। प्लक्षवृक्षे। वै.निघ.।

मौञ्जितृणाख्यः। पुं। मुञ्जतृणे। मूज्। रा.नि.व.८।

मौञ्जीपत्रा (त्री)। स्त्री। वल्लजायां। उलू। रा.नि.व.८। मुञ्जतृणे। वै.निघ.।

मौद्यम्। क्ली। मीहे। हे.च.।

मौद्गदलम्। क्ली। मुद्गदाल्याम्। मूगेर दाल। वा.चि.६अ.। [विका.।

मौद्गलिः। पुं। द्रोणकाके। वै.निघ.। काके।

मौनम्। क्ली। मुक्तायाम्। अम.।

मौर्व्वी। स्त्री। मेषशृङ्ग्याम्। अजशृङ्ग्याम्। र.मा.। तीतुपुंखी इति प्रसिद्धौषधौ। प.सु.।

मौलकः। वि। मूलाकरजे (लवणे)। खनिज लवण। च.वि.८अ.।

मौलिः। पुं, स्त्री। मस्तके। रा.नि.व.१८। केशपाशे। अम.। पुं। कङ्कोलवृक्षे। त्रिका.। अशोकवृक्षे। मे.।

मौलिकाजाली। स्त्री। चौरिकायाम्।

मौषली। स्त्री। मुषल्याम्। तालमूली। वै.निघ.२भ.गुडूच्यादिमोदके।

मौहूर्त्तिकः। पुं। ज्योतिर्विदि। अम.।

म्रक्षणम्। क्ली। तैलघृताद्यभ्यङ्गे। तैल घृतादि माखा। रा.नि.व.१५। तैले। हे.च.।

म्रातनम्। क्ली। कैवर्त्तमुस्तके। शा.च.।

म्लाना। स्त्री। रजस्वलायाम्। रा.नि.व.१८।

म्लेच्छम्। क्ली। हिङ्गुले। रा.नि.व.१३। सा. कौ.विपुरभैरवरसे। वै.निघ.२भ.वा.व्या.चि.मृतसञ्जीवनीरसे। तामे। र.सा.सं.मृतसञ्जीवनीरसे।

म्लेच्छकन्दः। पुं। श्वेतरसोने। रा.नि.व.७।

म्लेच्छदारुकम्। क्ली। चीवचीनीति ख्याते द्रव्ये। तोपचिनि। वै.निघ.।

म्लेच्छफलम्। क्ली। काफीतिखाते फलविशेषे। गुणाः,—बल्यं निद्रातन्द्राकफनाशकं श्वासकासज्वरातिसारादीवभेदकहरञ्च।

म्लेच्छभोजनः। पुं। तृणगोधूमे। गोधूमे। गम्। रा.नि.व.१६। त्रिका.। क्ली। अर्द्धपक्वगोधूमे। यावके। शा.र.।

म्लेच्छमुखम्। क्ली। ताम्रधातौ। तामा। रा.नि.व.१२।

म्लेच्छास्त्रिका। स्त्री। पारसिकास्त्रफलविशेषे। गुणाः—रुच्यं रेचनञ्च।

म्लेच्छाशः। पुं। म्लेच्छभोजने। गोधूम। वै. निघ.। [र.मा.।

म्लेच्छास्यम्। क्ली। ताम्रधातौ। तामा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

य

यकृत्। क्ली। दक्षिणकुक्षेरधःस्थशरीरावयवविशेषे, कालखण्डाभिधरञ्जकपित्ताधारे। यकृ२। हिं जिगार। तत्पर्य्यायाः,—करण्डा कालकं कालखञ्जं कालखण्डं कालेयं महास्नायुः। रा.नि.व १८। तच्च रक्तजन्य। "गर्भस्थस्य यकृत्प्लीहानौ श्रोणितजौ।" सु.शा.४अ.। तत्स्वरूपं यथा—"अधो दक्षिणतश्चापि हृदयाद्दयाकृतस्थितिः। तत्तु रञ्जकपित्तस्य स्थानं श्रोणितजं मतम्। प्लीहामयस्य हेत्वादि समस्तं यकृदामये। किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः॥" भा।

यकृदात्मिका। स्त्री। तैलपायिकायाम्। तेलापोका। श.च.।

यकृद्दाल्युदरम्। क्ली। उदररोगभेदे। लक्षणं यथा—"वामे च पार्श्वे परिवृद्धिरेति विशेषतः सीदति चातुरोऽत्र। मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतो हीनबलोऽतिपाण्डुः। सर्व्वेतरस्मिन् यकृति प्रदुष्टे ज्ञेयं यकृद्दाल्युदरं तदेव॥" सु.नि.७अ.।

यकृद्दैरी (द्दन्)। पुं। रक्तरोहीतकवृक्षे। लाल रोहा, रक्तना। श.च.।

यजा। स्त्री। कृष्णतुलसीवृक्षे। वै.निघ.।

यज्ञज्ञाता (तृ)। पुं। महासीमलतायाम्। वै.निघ.।

यज्ञधूपः। पुं। सर्ज्जवृक्षे। धूनार गाछ, शाल। रा.नि.व.९।

यज्ञनेता (तृ)। पुं। महासीमलतायाम्। वै. निघ.।

यज्ञपशुः। पुं। घोटके। श.भा.। [भा.।

यज्ञपादपः। पुं। विकङ्कतवृक्षे। वँईचि गाछ।

यज्ञफलः। पुं। उदुम्बरवृक्षे। यज्ञडुमूर गाछ।

यज्ञभूषणः। पुं। सितदर्भे। श्वेत कुश। रा.नि.व.८।

यज्ञयोग्यः। पुं। उदुम्बरवृक्षे। रा.नि.व.११।

यज्ञवल्ली। स्त्री। सीमलतायाम्। रा.नि.व.३।

यज्ञवृक्षः। पुं। वटवृक्षे। नदीवटे। रा.नि.व. ११। विकङ्कतवृक्षे। वँईचि गाछ। भा.।

यज्ञश्रेष्ठा। स्त्री। सीमलतायाम्। रा.नि.व.३।

यज्ञसंस्तरः। पुं। शुल्कदर्भे। वै.निघ.।

यज्ञसाधनी। स्त्री। सीमलतायां। वै निघ.।

यज्ञसारः। पुं। यज्ञोदुम्बरवृक्षे। रा.नि.व.११।

यज्ञसूत्रम्। क्ली। यज्ञोपवीते।

यज्ञाङ्गः। पुं। उदुम्बरवृक्षे। यज्ञडुमूर। र.मा.। खदिरवृक्षे। रा.नि.व.८। भार्य्यासु। वामनहाटी। श.च.।

यज्ञाङ्गा। स्त्री। सीमलतायाम्। रा.नि.व.३।

यज्ञिकः। पुं। पलाशवृक्षे। जटा.।

यज्ञि(ज्ञी)यः। पुं। विकङ्कतवृक्षे। वँईचि गाछ। रा.नि.व.९। उदुम्बरवृक्षे। यज्ञडुमूर गाछ। रा.नि.व.११।

यज्ञियपत्रकः। पुं। सितदर्भे। श्वेत कुश। रा.नि.व.८। "घातकपत्रकः" इत्यपि पाठः पुस्तकान्तरे दृश्यते।

यज्ञोयब्रह्मपादपः। पुं। विकङ्कतवृक्षे। वँईचि गाछ। रा.नि.व.९।

यज्ञेष्टम्। क्ली। दीर्घरोहिषवृक्षे। रा.नि.व.८।

यज्ञोदुम्बरः। पुं। (Fycus glomerata.) उदुम्बरवृक्षे। यज्ञडुमूर गाछ। हिं गुलार, उमर। तें मयड़ीचेटु। ता. अट्टि। तत्पर्य्यायाः,—क्षीरवृक्षः जन्तुवृक्षः सदाफलः हेमदुग्धः क्रिमिफलः यज्ञाङ्गः शीतवल्कलः। गुणाः—हिमः रुचः गुरुः पित्तकफरक्तघ्नः मधुरः तुवरः वर्ण्यः व्रणशोधनः रोपणश्च। भा.। See उदुम्बरः।

यतिः। पुं। अगस्तिवृक्षे। वै.निघ.। जितेन्द्रिये। अम.।

यतु(तू)का। स्त्री। वास्तुकवृक्षे। वेतो शाकेर झाड़। श.र.।

यत्नसाध्यः। वि। यत्नेनारोग्यार्हे।

यथेष्टचारी (रिन्)। पुं। पक्षिणि। श.च.। त्रि.। स्वेच्छाचारिणि।

यन्त्रम्। क्ली। शल्यानामाहरणीपायभूतस्वस्तिकादौ। तच्च एकोत्तरशतं। तदुक्तं—"हस्तमेव प्रधानतमं यन्त्राणामवगच्छ। किं कारणं यस्माद्धस्तादृते यन्त्राणामप्रवृत्तिरेव तदधीनत्वाद्यन्त्रकर्म्मणाम्।" तानि च षट्प्रकाराणि—स्वस्तिक-सन्दंश-ताल-नाड़ी-शलाकोपयन्त्रभेदेन इति। "तत्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्विंशतिः स्वस्तिकानि, द्वे सन्दंशयन्त्रे, द्वे एव तालयन्त्रे, विंशतिर्नाड्यः, अष्टाविंशतिः शलाकाः, पञ्चविंशतिरुपयन्त्राणीति तानि प्रायशो लौहानि भवन्ति तत्प्रतिरूपकाणि वा तदलाभे। तत्र नानाप्रकाराणां व्याख्यानां मृगपक्षिणां मुखैर्मुखानि यन्त्राणां प्रायशः सदृशानि तस्मात् तत्सारूप्यादागमादुपदेशादभ्ययनदर्शनाद् युक्तितश्च कारयेत्। "समाहितानि यन्त्राणि खरश्लक्ष्णमुखानि च। सुदृढानि सुरूपाणि सुग्रहाणि च कारयेत्॥" सु. सू.७अ.। यन्त्रकर्माणि चतुर्विंशतिः निर्घातनपूरणादि। सु.सू.७अ.। एषां विशेषः स्वस्वपर्याये द्रष्टव्यः। औषधकर्मपात्रविशेषे। तत्र साधारणतः षड्विधं, बालुकादोलास्वेदनविद्याधरयन्त्राणीति। तेषां लक्षणं तत्तत्पर्याये द्रष्टव्यम्। पारदबन्धनोपायविशेषे। तदुक्तं—"यत्नयते पारदो यस्मात्तस्माद्यत्नमिदं स्मृतम्।" वै.निघ.।

यन्त्रगृहम्। क्ली। तैलनिष्पीडनयन्त्रगृहे। घानिघर। हे.च.।

यन्त्रगोलः। पुं। कलायभेदे। मटर। रा.नि.।

यन्त्रणम्। क्ली। बन्धने। रज्जौ। मे.।

यन्त्रणवासः। क्ली। चतादिबन्धनार्थं शाटके। बान्धिवार वस्त्र वा व्याण्डेज। वा.चि.८अ. अष्टाङ्गसंग्रहे च। "अथ यन्त्रणवाससा।"

यन्त्रणा। स्त्री। पीड़ायां। व्याक.।

यन्त्रापीड़ः। पुं। सन्निपातज्वरभेदे। लक्षणं—"येन मुहुर्ज्वरवेगाद् यन्त्रणेवापीड्यते गात्रम्। रक्तं पीतञ्च भवेत् यन्त्रापीड़ः स विज्ञेयः॥" भा. म.१भ.।

यमः। पुं। इन्द्रियनियहे। काके। डर्द। कङ्कपक्षिणि। मे.। कीनाशे। विका.।

यमकम्। क्ली। युगले। घृततैले। च.सू.२अ.। वा.चि.९अ.।

यमकबन्धः। पुं। यमलनामव्रणबन्धनभेदे। लक्षणम्—"बध्यते मण्डलाकारो यमलव्रणयोस्तु यः। बन्धं यमकनामानं भिषजो वर्णयन्ति तम्॥" सु.सू.१८अ.।

यमकोटः। पुं। भूकीटविशेषे। घूरघूरे पोका। विका.।

यमचिञ्चा। स्त्री। अत्यम्लचिञ्चायाम्। बांगा तेँतूल। र.मा.संग्रहः, रसाध्याये।

यमजः। वि। युग्मजाते। यमज सन्तान। पुं। जाके। मे.। दीर्घान्विते घोटके। "एकेनार्द्रेन हीनेन भिन्नेन च विशेषतः। यमजं वाजिनं विद्यात्.....॥" ज.द.३अ.।

यमदग्निः। पुं। ऋषिविशेषे। च.।

यमदूतकः। पुं। काके। श.र.।

यमदूतिका। स्त्री। तिन्तिड़ीवृक्षे। अम.।

यमद्रुमः। पुं। शाल्मलिवृक्षे। रा.नि.व.८।२३।

यमप्रियः। पुं। वटवृक्षे। श.र.।

यमरथः। पुं। महिषे। वै.निघ.।

यमलम्। क्ली। युग्मे। हे.च.।

यमलच्छदः। पुं। काञ्चनारवृक्षे। रक्तकाञ्चन गाछ। रा.नि.व.१०।

यमलपत्रकः। पुं। अश्मन्तकवृक्षे। कोविदारवृक्षे। रा.नि.व.९।

यमला (लो)। पुं। हिक्काभेदे। हिक्का.। लक्षणं—"चिरेण यमलैर्वेगैर्या हिक्का सम्प्रवर्त्तते। कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्दिशेत्॥" मा.नि.।

यमवाहकः। पुं। महिषे। विका.।

यमवृक्षः। पुं। शाल्मलिवृक्षे। रा.नि.व.८।

यमा(वा)निका(नी)। स्त्री। (Ligusticum ajwan or Carum copticum. Syn. Ammicopticum.) Ajava seeds. स्वनामख्यातपण्यद्रव्ये। योग्यान। हिं वम्. अजवाइन। सं उंवा। कं उंडु। ते ओममी। ता. अमन। तत्पर्य्यायाः,—अजमोदा ब्रह्मदर्भा चेवयमानिका भूतिकः यवनिका यवनी यवानी दीप्यः दीपकः दीपनी दीपनीयः यवजः यवसाह्वः यवसाह्वया यवायजः उग्रगन्धा वातारिः भूकदम्बकः शूलहन्त्री उग्रा तीव्रगन्धा। सा चतुर्धा—यमानीवनयमानीपारसीकखोरासानीभेदेन। गुणाः—लेखनी (देहस्थधातुमलान् विशीर्य्यील्लेखयेत्) पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः दीपनी तिक्ता पित्तला शुक्रशूलघ्नी वातश्लेष्मोदरानाहगुल्मप्लीहकृमिघ्नी च। भा.पू.१भ.। तच्छाकगुणाः—यवानीशाकमाग्नेयं रुच्यं वातकफघ्नं कटुतिक्तमुष्णं पित्तलं लघु शूलकरञ्च। भा.पू.शा.व.। "यमानी कटुतिक्तोष्णा वातार्शःश्लेष्मनाशिनी। शूलाध्मान-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृमिक्लेदिमर्दनी दीपनी परा ॥" रा.नि.व.६ । (Hyoscymus niger.) Henbane. खोरासानीयमान्यां । हिं वजरुल । तें कुरासानी-वमम् । गुणाः—खस्वपर्य्याये सङ्ग्याः ।

यमानीतैलम् । क्ली । यमानीसम्भव-तैले । गुणाः,—"यमान्यास्तैलमाग्नेयं शूलाजीर्णानिलान्त-कृत् । आध्मानाजीर्णदुर्नामग्रहणीदोषनाशनम् ॥"

यमानीद्वयम् । क्ली । यमान्यां वनयमान्याञ्च । वै.निघ.२भ.अभिन्नाम.चि. ।

यमिका । स्त्री । हिक्काभेदे, या द्विवारमायाति । यमलाहिक्का । मा.नि. ।

यमुना । स्त्री । भारतवर्षीयनदीविशेषे । तज्जल-गुणाः—पित्तदाहवमनश्रमघ्नं स्वादु वातजननं पाचनम् अग्निदीप्तिकरं रुचिजनकं बलकरञ्च । रा.नि.व.१४ ।

ययुः । पुं । घोटके । मे. ।

यवः (कः) । पुं । (Hordeum hexasti-chum.) Barley. खनामख्यातशूकधान्यभेदे । यव । हिं मं यव, युज । कं सुंड, जयवे । तें गोधुमलु यवलनेडुधान्यमु वार्लियम् । ता. वार्लिअरिसु । तत्पर्य्यायाः,—श्वितशूकः श्वीतशूकः सितशूकः हयप्रियः यवकः श्वेतशूकः प्रवेटः मेध्यः दिव्यः अचतः कच्छुकी धान्यराजः तीक्ष्णशूकः तुरगप्रियः तुरङ्गप्रियः शक्तुः हयेष्टः पवित्रधान्यम् । गुणाः—"रूक्षः शीतो गुरुः स्वादुः कषायी मधुरो यवः । हृष्यो ग्राही कफघ्नश्च स्यात् पित्तश्वासकास-नुत् ॥" कषायी मधुरः सुशीतलः प्रमेहजित् तिक्तः कफघ्नश्च । तथा अशुकसुखः यवः बलदः हृष्यः बहुवीर्य्यपुष्टिकरश्च । रा.नि.व.१६ । वर्षद्वयोपरि-स्थिता यवाः पुराणाः । तद्गुणाः—"पुराणा नीरसा रूक्षा न तथा गुणकारिणः । नवा हिताः..... ॥" भा. । इन्द्रयवे । वै.निघ.२भ. अर्शःचि.अग्निदीपनीवट्याम् । षष्टिकतण्डुले । अन्ने । भा.च.चि. । चतुर्धान्यमाने । ४ धान । षट्सर्षपमाने । ७ सरिषा । ग्र.च. । कालिङ्गे अष्ट-सर्षपमिते माने । ८ सरिषा । "यवोऽष्टसर्षपैः ।" प.प्र.१खं. ।

यवकः । पुं । शूकधान्यविशेषे, यवे । च.सू.५अ. ।

यवकण्टकः । पुं । पर्पटके । क्षेत्पापड़ा । वै.निघ. ।

यवकलशः । पुं । इन्द्रयवे । वै.निघ. ।

यवकाञ्जिकम् । क्ली । यवसंहितकाञ्जिके । यवेर काँजि । See यवाम्लम् ।

यवगण्डः । पुं । मुखव्रणे । वसन्तफोंड़ा । ग्र.र. ।

यवगोधूमसम्भवम् । क्ली । तन्मिश्रकाञ्जिके । वै.निघ. ।

यवचिञ्चा (त्रा) । स्त्री । चीरिण्याम् । थिकुई । रा.नि.व.५ ।

यवजः । पुं । यवक्षारे । र.मा. । च.द.ग.ग.चि. । यमानीक्षुपे । रा.नि.व.६ । गोधूमक्षुपे । वै.निघ. ।

यवजोद्भवम् । क्ली । यवक्षीरे ।

यवतिक्ता । स्त्री । श्वेतवुक्षायाम् । शल्लिनी यवेची इति लोके । श्वेतवोना । तत्पर्य्यायाः,—महातिक्ता दृढ़पादविसर्पिणी नाकुली नेचमीना शल्लिनी तण्डुली पवतण्डुली अचपोड़ा सूक्ष्मपुष्पी स्थूलपुष्पी यशस्विनी माहेश्वरी तिक्तफला यावी तिक्ता । गुणाः—तिक्ता अम्ला रूक्षा दीपनी कृमिकुष्ठविषामदोषघ्नी रेचनी च । रा.नि.व.३ । तण्डुलीयशाके । शल्लाण्डुल्याम् । मारिषे । रा.नि.व.२३ ।

यवतैलम् । क्ली । यवचूर्णादिसाधित-तैलविशेषे । तत्प्रस्तुतविधिर्यथा—"यवचूर्णाईकुड़वं मञ्जिष्ठार्द्ध-पलेन तु । तैलप्रस्थं शतगुणे काञ्जिके साधितं जयेत् ॥" ज्वरं दाहं महावेगमङ्गानाञ्च प्रहर्षणम् ॥"

यवनः । पुं । सिल्हके । सिलारस । रा.नि.व. १२ । गोधूमे । रा.नि.व.१६ । गर्ज्जरे । रा.नि.व.७ ।

यवनकः । पुं । गोधूमे । वै.निघ. ।

यवनदृष्टः । पुं । गुग्गुलौ । गुग्गुल । रा.नि.व.१२ ।

यवनप्रियम् । क्ली । मरिचे । हे.च. ।

यवनभोजनः । पुं, क्ली । मरिचे । चि.क्र.क. प्रद.चि. । "यवनभोजनधान्यशतावरी ।"

यवनालः । पुं । यावनालवृक्षे । कालजनार । प.सु. । दैवधान्ये । देधान । हे.च. । यावनाल-सामान्ये । जनार । रा.नि.व.१६ । यवदण्डे ।

यवनालजः । पुं । यवक्षारे । हे.च. ।

यवनी । स्त्री । यमान्यां । मे. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यवनेष्टम्। क्ली। गुञ्जने। गांजर। रा.नि.व. ७। मरिचे। रा.नि.व.६। सीसके। सीसां। रा.नि.व.१३। तालीशपत्रे। वै.निघ.। पुं। रक्त-रसोने। राजपलाण्डौ। पलाण्डौ। रा.नि.व.७। निम्बवृक्षे। निम् गाछ। रा.नि.व.९।

यवनेष्टा। स्त्री। खर्ज्जूरीवृक्षे। रा.नि.व.११। नखरञ्जन्याम्। मेइदी। वै.निघ।

यवपटोलः। पुं। ज्वरे कषायभेदे। यव-पटोल। गुणाः—लघ्वादाहहरः पित्तज्वरघ्नोऽयं कषायः समभागयवपटोलपवक्वतः। च.द.पि.ज्व. चि.। "पटोलयवनिःक्वाथो मधुना मधुरीकृतः।"

यवपल्लः। पुं। यवपलाले। यवशा इति लोके। यवेर पोयाल। सु.चि.६अ.।

यवप्रख्या। स्त्री। क्षुद्ररोगभेदे। यवाकार पिड़काविशेष। लक्षणं—"यवाकारा सुकठिना ग्रथिता मांससंश्रता। पिड़का श्लेष्मवातास्यां यवप्रख्येति सोच्यते॥" सु.नि.१३अ.।

यवफलः (ला)। पुं, स्त्री (ला)। अंशे। रा. नि.व.७। भा.म.४भ.रेवतीग्रहचि.। पलाण्डौ। इन्द्रयवे। व.निघ.। प्लक्षवृक्षे। ग्र.च.। कुटजवृक्षे। रा.नि.व.९। क्ली। वेणुबीजे। जटामांस्यां। मे.।

यवफलाङ्कुरः। पुं। वंशाङ्कुरे। बाँशेर कोँड़। रा.नि.व.७।

यवभस्म। क्ली। यवक्षारे। यवेर क्षार। च.द.सि.यो.अरीच.चि.। "क्षणाविड़ङ्गयवभस्म।"

यवभोज्यम्। क्ली। यवाहारे। नकुल.११अ.।

यवमण्डः। पुं। यवकृतमण्डे। वाय्यमण्ड इत्याच्युच्यते। यवेर मण्ड। गुणाः—"वाय्यमण्डो यवैर्मृष्टैर्मुनिभिः परिकीर्त्तितः। वाय्यमण्डो लघु-र्ग्राही शूलानाहविदोषनुत्। नवज्वरेऽपि पथ्योऽयं पटोलमगधान्वितः॥" वै.निघ.।

यवमद्यम्। क्ली। यवकृतमद्ये। यवेर मद। गुणाः—गुरु विष्टम्भदायकम्। रा.नि.व.१४।

यवयवागुका। स्त्री। यवकृतयवाग्वाम्। यवेर याउ। प.मु.।

यवयवागूः। स्त्री। यवसिद्धयवाग्वाम्। यवेर याउ। प.मु.।

यवरोटिका। स्त्री। यवचूर्णकृतरोटिकायाम्। यवेर रुटि। गुणाः,—"यवजा रोटिका रुच्या मधुरा विशदा लघुः। मलशुक्रानिलकरी बल्या हन्ति कफामयान्।" ना.।

यवलकः। पुं। पक्षिविशेषे। अयं मधुरलघु-शीतकषायः। सुसू.४६अ.।

यवलासः। पुं। यवक्षारे। श.र.।

यववर्णाभः। पुं। सविषमण्डूकजातीयकीटे। तद्दष्टे दंशकण्डूः पीतफेणागमश्च। सु.कल्प.८अ.।

यवविकृतिः। स्त्री। प्रमेहहिते यवकृतापूपादौ। यवेर पिठा पूलि आदि। वा.चि.१२अ.।

यवशक्तुः। पुं। भृष्टयवकृतचूर्णे। यवेर छातु। गुणाः—"यवानां शक्तवो रुच्या लेखना बह्नि-दीपनाः। वातलाः कफरोगघ्ना वातवर्चोऽनु-लोमनाः॥" राज.३प.।

यवशर्करा। स्त्री। सिद्धयवकृतशर्करायाम्। ग्याना, शिरखाण्डा। गुणाः—पित्तश्रमतृष्णाघ्नी हृद्या रेचनी विदाहमूर्च्छाभ्रान्तिघ्नी च। च.।

यवशाकः। पुं, क्ली। चिल्लीशाके, गौरवास्तुके। "प्रायशो यवमध्ये स्याद्यवशाकमतः स्मृतम्।" भा.पू.१भ.शा.व.। गुणाः—मधुरः रुचः विष्टम्भी शीतवीर्य्यो मलभेदनश्च। च.सू.२७अ.।

यवशूकः। पुं। यवक्षारे। तिका.। शि.यो. अरीच.चि.। "यवशूकविमिश्रितानि।" च.द. हिक्काश्वास.चि.। हृत्पाण्डुग्रहणीदोषप्लीहानाहगल-ग्रहान्। कासं कफजमर्शांसि यवशूकी व्यपो-हति॥" राज.३प.।

यवशूकजः। पुं। यवक्षारे। रा.नि.व.६।

यवशेता। स्त्री। यवशर्करायाम्। यवेर छातु। वै.निघ.।

यवसम्। क्ली। तृणे। घासे। अम.। नकुल. ११अ.।

यवसाह्वः। पुं। यमानीवृक्षे। रा.नि.व.६।

यवसाह्वया। स्त्री। यमान्याम्। भा.पू.। पारसीकयमान्याम्। वै.निघ.।

यवसुरम् (रा)। क्ली, स्त्री। यवमद्ये। गुणाः —"सुरा समण्डा रुचीष्णा यवानां वातपित्तला। गुर्वी जीर्य्यति विष्टभ्य..... ॥" च.सू.२७अ.।

यवसौवीरम्। क्ली। यवकाञ्जिके। वै.निघ.।

यवक्षारः। पुं। यवभस्मजक्षारे। यवक्षार। हिं यवक्षार, साजी, सीरा। तें यवाचारमु।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्पर्य्यायाः,—यवागजः यवलासः यवगूकं यवनालकः यवनालजः यवजः यवगूकजः यवाह्वः यवापत्यः यावशूकः पाक्यः सारकः रेचकः चारः तिर्य्यः तोक्ष्णरसः। गुणाः—कटुष्णः कफवातोदरघ्नः आमशूलाश्मरीविषघ्नः सरश्च। रा.नि.व.६। "यवचारो लघुः स्निग्धः सुस्निग्धो वह्निदीपनः। निहन्ति शूलवातामश्लेष्मश्वासगलामयान्। पाण्डुशोथग्रहणीगुल्मानाहप्लीहहृदामयान्॥" भा.।

यवक्षोदः। पुं। यवचूर्णे। मण्डा। हे च.।

यवागूः। स्त्री। डचितान्नचतुर्गुणतण्डुलचूर्णकृतषड्गुणवारिपक्वायां बहुसिक्थायाम् उष्णिकायाम्। याऊ, पातला भात। तत्पर्य्यायाः,—उष्णिका आणा विलेपी विलेपनी तरला। तेन द्रवसिक्थसमन्वितत्वं यवागूत्वम्। 'यवागूर्बहुसिक्था स्यात्।' सा विधा मण्डपेयाविलेपीभेदात्। तत्र सिक्थकरहितो मण्डः, ससिक्था पेया, विरलद्रवा च विलेपीति। तदुक्तं—"यवागूसुचिताङ्गैक्षाच्चतुर्भागकृता वदेत्। सिक्थकैरहितो मण्डः पेया सिक्थसमन्विता। यवागूर्बहुसिक्था स्याद्विलेपी विरलद्रवा॥" क्वाथसिद्धयवाग्वां क्वाथ्यद्रव्यस्याञ्जलिर्ग्राह्यः, वारिणः प्रस्थः, पादावशेषो ग्राह्यः। "क्वाथ्यद्रव्याञ्जलिं चूर्णं स्रावयित्वा जलं ततः। पादावशेषे तेनाथ यवाग्वाद्युपकल्पयेत्। यूषांश्च रसकांश्चैव कल्पनानेन साधयेत्॥" प.प्र.१ख.। "यवागूः षड्गुणे तोये सिद्धा स्यात् कृसरा घना। तण्डुलैर्मुद्गमाषैश्च तिलैर्वा साधिता हि सा। यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी॥" प.प्र.२ख.। गुणा—:"यवागूर्ज्वरतृष्णाघ्नी लघ्वी बस्तिविशोधनी। अतीसारे ज्वरे दाहे हिता वह्निप्रदीपनी॥" राज.३प.। "यवागूः षड्गुणे तोये संसिद्धा विरलद्रवा। यवागूर्ग्राहिणी तृष्णाज्वरघ्नी बस्तिशोधनी। पित्तश्लेष्मज्वरे देया मध्याह्ने सा प्रकीर्त्तिता। वातज्वरेऽपराह्णे सा गोधूमजलनिर्म्मिता॥" द्रव्यगुणः। यवागूर्मदात्ययादौ निषिद्धा—"मदात्यये मद्यनित्ये यौगे पित्तकफाधिके। ऊर्द्ध्वगे रक्तपित्ते च यवागूरहिता ज्वरे॥" च.द.ज्व.चि.।

यवाग्रम्। क्ली। यवतुषे। यवेर तूष, आगड़ा। वै.निघ.२भ.पाण्डु.चि.पञ्चकोलघृते।

यवाग्रजः। पुं। यवचारे। यवक्षार वा सोरा। च.द.अ.च.चि.। यमानीवृक्षे। रा.नि.व.६। क्ली। काञ्जिके। वै.निघ.।

यवान(क)म्। क्ली, पुं। यमान्याम्। वै.निघ.।

यवानिका (नी)। स्त्री। यमानीवृक्षे। रा.नि.व.६। यमान्याम्। भा.पू.१भ.। पारसीकयमान्याम्। वै.निघ.।

यवानीकः। पुं। यमानीभेदे। वा.चि.६अ.।

यवानीशाकम्। क्ली। यमानीदले। यमानेर शाक। हिं जवाइन। See यमानी।

यवान्नम्। क्ली। यवकृतभक्ते। यवेर भात। वै.निघ.।

यवापत्यम्। क्ली। यवचारे। रा.नि.व.६।

यवाम्लम्। क्ली। यवकाञ्जिके। यवेर काँजि। गुणाः—"जातं यवाम्लं कटुकं विपाके वातापहं श्लेष्महरं सरक्तं। पित्तप्रकोपं कुरुते सभेदि विदूषणं पित्तगदास्रजोश्च॥" अत्रि.११अ.।

यवाम्लजम्। क्ली। यवाम्ले, सौवीरकाञ्जिके। रा.नि.व.१५।

यवासः (कः)। पुं। (Alhagi maurorum. Syn. Hedysaram Alhagi) The camel's thorn. यासचुपे। जुवासभा। तें पिन्नरेगटिटुलगोंडि। तत्पर्य्यायाः,—कण्टकी बालपत्रः खदिरः अल्पकः यासः यासकः बहुकण्टकः क्षुद्रेक्षुदी रोदनीका विषघ्नः कण्टकालुकः विपर्णिका गाम्भारी अनन्ता। गुणाः—मधुरस्निग्धः बल्यः दाहतृष्णाघ्नः शीतपित्तकफच्छर्द्दिविसर्पारोगनाशकः। रा.नि.व.४। सि.यो. पित्तातिसारचि. कलिङ्गादौ। च.द.पि.श्व.मज्व.चि. कण्टकार्य्यादिः। च.द.ज्व.चि.वासाद्यघृते।

यवासशर्करा। स्त्री। यवासकृतशर्करायाम्। तवराज, स्याना, सौरखस्ता इति लोके। गुणाः—अतिमधुरा पित्तघ्नी श्रमघ्नी तृष्णाघ्नी हृद्या सरा मूर्च्छादाहभ्रमघ्नी च। रा.नि.व.१४। मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति। सु.सू.४५अ.इक्षुव.। अपिच—नार्य्याशापन्नसत्त्वाथाः दुर्ब्बलस्य तथा शिशोः रेचनार्थं प्रयोज्येयं चीणस्य स्थविरस्य च॥ [दुरालभायाम्। वै.निघ.।

यवासा। स्त्री। गुण्डासिनीवृक्षे। रा.नि.व.८।

यवाह्वः। पुं। यवचारे। सु.चि.२०अ.अलसचि.। यमान्याम्। स्त्री (ह्वा)। दुरालभायाम्। वै.निघ.२भ.उन्मा.चि.। यमान्याम्। यवचारे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यवोत्थम् । क्ली । काञ्जिके । सौवीरकाञ्जिके । रा.नि.व.१५ ।

यवोद्भवः । पुं । यवक्षारे । रा.नि.व.६ ।

यवोद्भवा । स्त्री । यवाससर्करायाम् ।

यवोद्भूता । स्त्री । यवशर्करायाम् । वै.निघ. ।

यव्यम् । क्ली । यवक्षेत्रे । रा.नि.व.२ ।

यशदम् । क्ली । (Zinkum.) Zink. धातुविशेषे । दस्ता । यशदं वङ्गसदृशं रीतिहेतुश्च तन्मतं । गुणाः—"यशदं तुवरं तिक्तं शीतलं कफपित्तहृत् । चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत् ॥" भा.पू.१भ.धा.व. ।

यशस्करी । स्त्री । बृहज्जीवन्तीलतायाम् । रा.नि.व.३ । शङ्खिन्याम् । वै.निघ. । ऋद्धौ ।

यशस्या । स्त्री । ऋद्धौ । ऋद्धि ओषधि । रा.नि.व.५ । जीवन्तीलतायाम् । रा.नि.व.३ ।

यशस्विनी । स्त्री । यवतिक्तालतायाम् । महाज्योतिष्मतीलतायाम् । रा.नि.व.३। वनकार्पास्याम् । श.र. ।

यशोदः । पुं । पारदः । रा.नि.व.१३ ।

यष्टिः । पुं, स्त्री । भार्य्यां । वामनशाटी । रा.नि.व ६ । वै.निघ.मधुरज्व.चि.मधुकादिः । यष्टिमधुके । मे. ।

यष्टि(ष्टी)कः । पुं, क्ली । यष्टिमधुनि । रा.नि.व.६ । च.सू.४अ. । टिट्टिभे । तित्तिर पक्षिणी । श.र. । स्त्री । भार्य्याम् । वामनशाटी । प.मु. । सञ्जिष्ठायाम् । सि.यो.षट्करञ्चतैले । यष्टिमधुनि । श.र. ।

यष्टिकाभ्रामणम् । क्ली । जलस्य शीतलीकरणोपाये । सु.सू.४५अ. ।

यष्टि(ष्टी)पुष्पः । पुं । पुन्नागवृक्षे । भा. ।

यष्टि(ष्टी)मधु (कम्) । क्ली । (Glycyrhiza glabra.) खनामख्यातमधुरकाष्ठे । यष्टिमधु । हला. । हिं जेठीमध । मुलहटी । तें मिष्टमूलविशेषमु । तत्पर्य्यायाः,—क्लीतकं मधुकं मधुयष्टिका यष्टिः यष्टीकं यष्टिका यष्ट्याह्वं यष्ट्याह्वा यष्ट्याह्वका यष्ट्याह्विका मधुवल्ली मधुस्रवा मधूकं मधुयष्टिकं यष्टिमधुका यष्टी यष्टिमधु । जलजस्थलजभेदेन द्विधा । "आनूपं स्थलजञ्चैव प्रत्येकं द्विविधं स्मृतम् ।" च.सू.१अ. । गुणाः—मधुरं किञ्चित्तिक्तं चक्षुष्यं शीतलं पित्तघ्नं शोषव्रणाव्रणापहम् । रा.नि.व.६ । सुश्रुतेऽस्य मूलस्य प्राशस्त्यं, किन्तु विरेचनं प्रति फलमेव प्रशस्तम् । च.सू.१अ.टी. । स्निग्धं शिथिलकारकञ्च कैश्चित् । अपिच,—"यष्टीमधु तथा यष्टी मधुकं क्लीतकं तथा । अन्ये क्लीतनकं तच्च भवेत्तोये मधूलिका ॥ यष्टी हिमा गुरु स्वाद्वी चक्षुष्या बलवर्णकृत् । सुस्निग्धा गुरुला कैश्या स्वर्य्या पित्तानिलासृजित् । व्रणशीर्षविषच्छर्दितृष्णाग्लानिच्छापहः ॥" भा. ।

यष्टिमधुका । स्त्री । यष्टिमधुनि । अम ।

यष्टिलता । स्त्री । भमरारिपुपत्रवृक्षे भमरमारीति मालवदेशे प्रसिद्धा । रा.नि.व.१० ।

यष्टी । स्त्री । यष्टिमधुनि । प.मु. । रा.नि.व.६ । रस.र. खनरी. चि. । वा.सू.१५अ. सारिवादिः । "यष्टी परूषकं हन्ति ।" च.द.ज्व.चि.गिरीलेपे । "यष्टीबदरकाञ्जिकम् ।" भैष.बृहत्खदिरवटी. ।

यष्टीकर्णः । पुं । तन्नामककर्णवन्धनाकृतौ । 'तदाकारः ग्रथितमांसस्नाय्वशिरातन्तुः सूक्ष्मपालिश्च ।' सु.सू.१६अ. ।

यष्ट्याह्वम् । क्ली । यष्टिमधुनि । रा.नि.व.६ । वा.सू.हरिद्रादिव. । सि.यो.र.पि.चि.मुस्तादि । अपस्मा.चि.कुष्माण्डकघृते ।

यत्तकर्दमः । पुं । कर्पूरादिकृतगन्धानुलेपने । स च समभागकर्पूरागुरुकस्तूरीकक्कोलात्मकः । "कर्पूरागुरुकस्तूरीकक्कोलैर्यत्तधूपकः । चन्दनागुरुकुरङ्गनाभिकाचन्द्रचन्दनसमांशसम्भृतम् । व्रतयज्ञपूजनपरैकगोचरं यत्तकर्दममिमं प्रचक्षते ॥" रा.नि.व.२२ ।

यत्तग्रहः । पुं । यक्षोन्मादे । रा.नि.व.४५ ।

यत्ततरुः । पुं । वटवृक्षे । रा.नि.व.११ ।

यत्तद्रुः । पुं । गर्ज्जनतैलवृक्षे ।

यत्तद्रुतैलम् । क्ली । गर्ज्जनतले । गुणाः—"यत्तद्रुतैलं चतहृत् कुष्ठामयविनाशनम् । कफघ्नं लेखनं कण्डूहरं जन्तुविषापहम् ॥" भा. ।

यत्तधूपः । पुं । सर्ज्जरसे । धूना । प.मु. । रा.नि.व.१२ । सर्ज्जतरौ । सरलनिर्य्यासे । तार्पिन तैल । हे.च. । यत्तकर्दमे । रा.नि.व.२२ ।

यत्तरसः । पुं । पुष्पसर्ज्जे । तिका । रा.नि.व.११ ।

यत्त(त्ता)वासः । पुं । वटवृक्षे । मद.व.५ ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यच्चामलकम्। क्ली। पिण्डीखर्जूरकफले। श.मा.।

यच्चोदुम्बरकम्। क्ली। अश्वत्थफले। विका.।

यच्चोन्मादः। पुं। यचाविशक्ते उन्मादविशेषे। लक्षणं—"तामाचः प्रियतनुरक्तवस्त्रधारी गम्भीरो द्रुतगतिरल्पवाक् सहिष्णुः। तेजस्वी वदति च किं ददामि कस्मै.....॥" भा.।

यच्मघ्नी। स्त्री। द्राक्षायाम्। श.मा.।

यच्मा (अन्)। पुं। तन्नामकरोगे। यक्ष्मारोगः। तत्पर्य्यायाः,—राजयच्मा राजजच्मा शीषः क्षयः जक्ष्मं जक्ष्मा रोगराजः रोगाधीशः गदाग्रणीः नृषामयः अतिरोगः उष्णा। यच्यते पूज्यत इति। तन्निदानं—"वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात्। त्रिदोषो जायते यच्मा गदो हेतुचतुष्टयात्॥" तन्निरुक्तिः—"वैद्यो व्याधिमतां यस्मात् व्याधिर्यच्मेन यच्यते।" भा.। See राजयच्म।

याचनकः। पुं। रक्तैरण्डवृक्षे। रा.नि.व.८।

याजः। पुं। अन्ने। सिक्तशुलान्न। हे.च.।

याज(ञ्ञि)कः। पुं। पलाशवृक्षे। रा.नि.व.१०। कुशतृणे। कुशः। श.र.। रक्तखदिरवृक्षे। रा.नि.व.८। अश्वत्थवृक्षे। रा.नि.व.११।

याजुषः (षोदरः)। पुं। तित्तिरपक्षिणि। वै.निघ.।

यातना। स्त्री। अतितीव्रवेदनायाम्। अम.।

यातयामः। पुं। वृद्धे। रा.नि.व.१८। त्रि। जीर्णे। अम.। उज्झिते। मे.।

यातुकः। पुं। पक्षशाकविशेषे। गुणाः—पीलुपर्णीवत्। च.सू.२७अ.। स्त्री (का)। मयूरशिखायाम्। वै.निघ.।

यातुघ्नः। पुं। गुग्गुलौ। रा.नि.व.१२।

यादः। क्ली। जलजन्तौ। अम.।

यादोनिवासः। पुं। जले। हे.च.।

यानम्। क्ली। गमने। हस्त्यादिभिर्भ्रमणे। गुणाः—"हस्त्यश्वरथदोलाद्यैर्भ्रमणं वातकोपनं। स्थिरीकरणमङ्गानां बल्यं वह्निविवर्द्धनम्। राज.२प.।

यापनवस्तिः। पुं। निरूहवस्तिभेदे। "चौद्राज्यचीरतैलानां प्रस्तुतं प्रस्तुतं भवेत्। वृषासैन्धवाचांगी वस्तिः स्याद् यापनः परः॥" भा.।

याप्यः। त्रि। दुःखसाध्ये। तल्लक्षणम्—"यापनीयन्तु तं विद्यात् क्रिया धारयते हि यम्। क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति॥" भा.। याप्यत्वमसाध्यत्वञ्च द्विधा प्रकृतित उपेक्षणाच्चेति। "याप्याः केचित् प्रकृत्यैव केचिद्याप्या उपेक्षया।" सारचन्द्रिका।

याभः। पुं। मथुने।

यामः। पुं। दिवाष्टमांशे, प्रहरे।

यामघोषः। पुं। कुक्कुटे। श.मा.। स्त्री (षा)। घटिकायन्त्रे। घड़ि। विका.।

यामनादी (इन्)। पुं। कुक्कुटे। वै.निघ.।

यामार्द्धम्। क्ली। प्रहरार्द्धे।

यामिनी। स्त्री। हरिद्रायाम्। रा.नि.व.६। रात्रौ।

यामिनीचरः। पुं। गुग्गुलौ। पेचके। वै.निघ.।

यामिनीपतिः। पुं। कर्पूरे। मे.। चन्द्रे। श.र.।

यासुन(नेय)म्। क्ली। सीतोऽञ्जने। उणा.। सौवीराञ्जने। रा.नि.व.१३।

यासुनेष्टकम्। क्ली। शीषधातौ। जटा.।

याम्यम्। क्ली। चन्दने। मे.। वै.निघ.चयरो.चि.चन्दनादितैले।

याम्यज्वरः। पुं। प्रहरद्वयहीनमध्यवातादिजनितसन्निपातज्वरे। लक्षणं—"हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुस्फुसाः। पच्यन्तेऽत्यर्थमूर्द्धाधः पूयशोणितनिर्गमः। शीर्णदन्तस्य मृत्युश्च तत्राप्येतद्विशेषतः। भिषग्भिः सन्निपातोऽयं याम्यो नाम्ना प्रकीर्त्तितः॥" भा.म.१भ.।

याम्यदिग्भवा। स्त्री। तमालपत्र्याम्। वै.निघ.।

याम्यद्रुमः। पुं। शाल्मलिवृक्षे। वै.निघ.।

याम्या। स्त्री। रात्रौ।

याम्योद्भूतः। पुं। क्रीडने प्रसिद्धे शीतालवृक्षे। रा.नि.व.९। [वै.निघ.।

यावः। पुं। अलक्तके। अम.। लाक्षायाम्।

यावकः। पुं। कुलत्थे। प.मु.। यवान्वाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यवेक्षु खाउ। हे.च.। च.चि.१अ.। मापि। मांस-कलाय्र। अम.। वीरीधान्यद्वये। माषाकारपर्वे, काश्मीरेषु तुलसीति ख्याते। सुभूतिः। अलकके। शा.र.। यवान्ने। सिद्ध यव। हे.च.। गुणाः—"यावकीऽतिगुरुः स्वादुर्वृष्यः स्निग्धः प्रकीर्त्तितः। गुल्मज्वरप्रतिश्यायकण्ठरुक्कासमेहहा॥" वै.निघ.।

यावनः (ल्कः)। पुं। शिलारसे। अम.।

यावनकः। पुं। रक्तैरण्डे। वै.निघ.।

यावनालः। पुं। (Zea mays.) स्वनामख्यातधान्ये। कांल जनार, जनार, जूंधारा। हिं भुट्टा, मक्का। तें मक्का जोन्नलु। वम्. मकइ, बुट, बन्ना। ता. मक्कशोलम्। तत्पर्य्यायाः,—शिखरी वृत्ततण्डूलाः दीर्घनालः दीर्घशरः चेवेत्नुः इक्षुपत्रकः। गुणाः,—गौल्यः बल्यः दुर्ज्जरः रूक्ष्यः वृष्यः विदोषजित् अर्शोघ्न्यश्चान्त्रगुल्मनाशकश्च। अस्य शरमूलम् ईषन्मधुरं रूक्षं शीतलं पित्तघ्नं तृष्णाहरं पशूनां दौर्ब्बल्यकरञ्च। रा.नि.व.१६।

यावनालनिभः (भा)। पुं। यावनाले। रा.नि.व.८।

यावनालरसजगुड़ः। पुं। तद्रसजातगुड़े। जनारेर गुड़। गुणाः—चारः कटुः सुमधुरः कफवातघ्नः पित्तलः नित्यसेवनेन कण्डूकुष्ठजननः रक्तदाहघ्नश्च। वै.निघ.।

यावनालशरः। पुं। यावनालस्य शरे। जनारेर शस्य, गरुमा। हिं जोहरली। तत्पर्य्यायाः,—नदीजः दृढ़त्वक् वारिसम्भवः खरपत्रः। गुणाः—ईषन्मधुरः रूक्षः शीतलः पित्ततृष्णाहरः पशूनामबलप्रदश्च। रा.नि.व.१६।

यावनालो (शर्करा)। स्त्री। यावनालगुड़कृतशर्करायां। जनारेर चिनि। तत्पर्य्यायाः,—हिमशर्करा हिमोत्पन्ना हिमानी क्षुद्रशर्करिका क्षुद्रा गुड़भा जलविन्दुजा। गुणाः—गौल्या उष्णा तिक्ता अतिपिच्छिला वातघ्नी सारका रूक्षा दाहपित्तास्रदा च। रा.नि.व.१४।

यावनी। स्त्री। करञ्जशालिनामिन्यौ। रा.नि.व.१४। रसालेन्यौ। वै.निघ.।

यावशूकः (जः)। पुं। यवचारे। च.द.सि.यो.कास.चि.कुलत्थाद्यघृते। "दाड़िमगुड़याव-शूकानाम्।" (लवङ्गादिचूर्णे)।

यावः (वी)। स्त्री। शल्किन्याम्। ध.निघ.। (वी)। यवतिकालतायाम्। रा.नि.व.३।

याविकः। पुं। यवनाले। कांल जनार। प.मु.।

याव्यः। पुं। यवचारे। वै.निघ.।

यासः (कः)। पुं। रक्तदुरालभायां। गुणाः—मधुरः तिक्तः शीतः पित्तदाहहरः बल्यः व्रणाकफ-च्छर्द्दिघ्नश्च। रा.नि.व.४। सि.यो.ज्व.चि.अष्टाङ्गावलेहे। "श्रीपर्णः सासश्च कारवी।" च.द.अभि-न्यासज्व.चि.। "यासभार्गीपुनर्नवाः।"

यासशर्करा। स्त्री। यवासशर्करायाम्। वै. निघ.।

यासा। स्त्री। मदनशलाकापिचिण्डि। श.मा.। सि.यो.कास.चि.। "मूर्वा तिक्ता निशा यासा।"

युक्तरथः। पुं। निरूहवस्तिभेदे। "एरण्डमूल-निक्वाथी मधुतैलं ससैन्धवं। एष युक्तरथो वस्तिः सवचापिप्पलीफलः॥" भा.।

युक्तरसा। स्त्री। गन्धरास्नायां। सामान्यरास्नायां। रा.नि.व.६। काँटा आमरुली इति भाषा। अमर.।

युक्तश्रेयसी। स्त्री। गन्धरास्नायां। रा.नि.व.६।

युक्ता। स्त्री। रास्नायां। वा.सू.१५अ.रोध्रादि। वृक्षभेदे। एलानीति लोके। र.मा.।

युक्तिव्यपाश्रयः। त्रि। या चेष्टा प्रत्यक्षं फलति तदौषधवाचके, संशोधनसंशमनौषधवाचके च। च.वि.८अ.।

युगम्। क्ली। ऋद्धौ। भेषजे। हस्तचतुष्टये। मे.। "युगमात्रदृक् विचरेत्।" च.सू.८अ.।

युगच्छदः। पुं। आपटा इति ख्याते वृक्षे। वै.निघ.उन्मा.चि.।

युगन्धरः। पुं। यावनाले। जनार। वै.निघ.।

युगन्धरभक्तम्। क्ली, पुं। यावनालभक्ते। गुणाः—"अप्रसाधितभक्तो युगन्धराणां भक्तस्य घनो विशदमधुरश्च। कफे विदोषशमने च कथ्यते कासे च श्वासात्मक एव स स्मृतः॥" अभि.२१अ.।

युगन्धरास्रम्। क्ली। यावनालकृतकाञ्जिक-विशेषे। गुणाः—"युगन्धरास्रं कफवातहन्तृ शूलामयानां जरणप्रकर्त्तृ। तीक्ष्णं तथास्रं श्रम-दोषहन्तृ मेहार्शसीः रक्तहितं मतञ्च॥' अभि. ११अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युगप(पा)त्रः (कः)। पुं। रक्तकाञ्चनवृक्षे। प.म.। अम.। अश्मन्तके। लोध्रे। वै.निघ.।

युगपत्रिका। स्त्री। शिंशपावृक्षे। सर्षपवृक्षे। त्रिका.।

युगपार्त्रिका। स्त्री। शिंशपावृक्षे। त्रिका.।

युगभृङ्गराजः। पुं। भृङ्गराजे केशराजे च। सयवः।

युगलाच्चः। पुं। बर्बूरकवृक्षे। बाबला गाछ। रा.नि.व.८।

युगाक्षिगन्धा। स्त्री। वृद्धदारकलतायाम्। बौजताड़क। प.मु.।

युग्वला। स्त्री। सुगन्धतृणे, रोहिषतृणे। वै. निघ.।

युग्मम्। क्ली। युगले।

युग्मकण्टका। क्ली। बदरीवृक्षे। कूल गाछ। मद.व.६।

युग्मपत्रः (कः)। पुं। रक्तकाञ्चनवृक्षे। र.मा.। भूर्जवृक्षे। सप्तपर्णवृक्षे। वै.निघ.।

युग्मपत्रिका। स्त्री। शिंशपावृक्षे। भ.र.।

युग्मपर्णः। पुं। रक्तकाञ्चनवृक्षे। रा.नि.व. १०। सप्तपर्णवृक्षे। रा.नि.व.१२। स्त्री (र्णी)। वृश्चिकालीवृक्षे। भ.चि.।

युग्मफला। स्त्री। इन्दीवरालतायाम्। रा. नि.व.३। वृश्चिकालीलतायाम्। विछाति गाछ। रा.नि.व.६।

युग्मफलिनी। स्त्री। दुग्धिकायां। धिकुई। प.मु.।

युग्माञ्जनम्। क्ली। अञ्जनद्वये। एकं स्त्रोतोञ्जनम् अपरं सौवीरमिति। अरुणः। वा.सू.१५ अ.प्रियङ्ग्वादिव.।

युग्या। स्त्री। ऋद्धौ। ऋद्धि। वृद्धौ। वृद्धि। वै.निघ.।

युजौ। पुं, द्वि.। अश्विनीकुमारौ। त्रिका.।

यु(सु)ज्ञातकः। पुं। वृक्षविशेषे। गुणाः— "बल्यः शीतो गुरुः स्निग्धस्तर्पणो बृंहणात्मकः। वातपित्तहरः स्वादुः पथ्यो युज्ञातकः परं॥" च.सू.२७अ.।

युतम् (कम्)। क्ली। हस्तचतुष्टये। सूर्पाये।

युत्सारः। पुं। अश्व। भ.च.।

युधिष्ठिरराजः। पुं। कङ्कपक्षिणि। काँक् पाथी। त्रिका।

युयुः। पुं। घोटके। हला.।

युयुक्वुरः। पुं। क्षुद्रव्याघ्रे। भ.च.।

युवगण्डः। पुं। पीगण्डे। त्रिका.। यूनो गण्डस्थव्रणे। वयस्फोंड़ा। भ.र.।

युवती। स्त्री। दृष्टार्त्तवायां स्त्रियि। रा.नि.व. १८। प्रियङ्गौ। च.चि.१अ.ब्राह्मरसायने। स्वर्णयूथिकायाम्। वै.निघ.। हरिद्रायां। भ.च.।

युवतोष्टा। स्त्री। स्वर्णयूथिकायाम्। हलुदे यूँई। रा.नि.व.१०।

युवा (न्)। पुं। षोड़शसारभ्य पञ्चाशत्पर्य्यन्तवयस्के। यूवा। रा.नि.व १८।

युवानपिड़का। स्त्री। यौवनकृतमुखव्रणे। वयसफोंड़ा। "युवानपिड़का यूनां विज्ञेया मुखदूषिका।" मा.नि.। भैष.क्षुद्ररो.चि.।

युवावस्थः। पुं। यूनि। रा.नि.व.१८।

यूः। स्त्री। सुङ्गादिद्विदलधान्यकृतयूषे। दाईलेर यूष। हे.च.।

यूकः। पुं। वकपुष्पवृक्षे। प.मु.। मत्कुणे। उकुण। जटा.। तत्पर्य्यायाः,—कीशकीटः स्वेदजः षट्पदा षट्पदी पालिः पानी बालक्रिमिः यूकः बहुपादा क्षुद्रा केशाश्रया। "तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः। बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः॥" मा.नि.। क्षुद्रोदुम्बरे। यमान्यां। वै.निघ.।

यूकाण्डः। पुं। लिक्षायां। लिखि। वै.निघ.।

यूकारी। स्त्री। लाङ्गलिकायाम्। विषलाङ्गलिया। वै.निघ.।

यूकावासः। पुं। शाखोटवृक्षे। शेओड़ा गाछ। रा.नि.व.९।

यूथपः। पुं। सुनिषण्णकशाके। वै.निघ.।

यूथा। स्त्री। पाठायां। आकनादि। वै.निघ.।

यूथिका। स्त्री। (Jasminum auriculatum.) खनामख्यातपुष्पवृक्षे। जूई। हिं यूही, स्वर्णयूही। मं पांड़रोजुइ। कं विलियमीलि। तत्पर्य्यायाः,—गणिका अम्बष्ठा मागधी यूथी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रहसन्ती शिखण्डिनी वासन्ती बालपुष्पी बालपुष्टिका बहुगन्धा भृङ्गानन्दा । यूथिका श्वेतवर्णभेदेन द्विधा । गुणाः—यूथिकायुगलं स्वादु शीतलं शर्कराढ्यं पित्तदाहहृत्कण्ठाग्नं सर्व्वत्वग्दोषघ्नञ्च । "सितपीतनीलभेदेन कुसुमेन यूथिकाः कथिताः । तिक्तहिमपित्तकफामयज्वरघ्नाः व्रणादिदोषहराः । इति साधारणगुणाः । सर्व्वासां यूथिकानान्तु रसवीर्य्यादिसाम्यता, स्वर्णयूथिकायान्तु सुरूपता सुगन्धता च विशेषतो वर्त्तते । रा.नि. व.१० । "यूथीयुगं हिमं तिक्तं कटुपाकरसं लघु । मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम् । व्रणास्रसुखदत्वाच्छिरोरोगविषापहम् ॥' भा. । पाठान्तरं । आकनादि । रा.नि.व.६ । अस्थानके । मे. ।

यूथिकापत्रः । पुं । तालीशपत्रं । वै.निघ. ।

यूथिकासुकुलानना । स्त्री । कर्णव्यधनार्थं सूचीभेदे । "व्यधने कर्णपाल्यां यूथिका सुकुलानना ।"

यूथी । स्त्री । यूथिकायाम् । शब्दर. । शुक्लयूथिकायाम् । स्वर्णयूथिकायाम् । वै.निघ. ।

यूनी । स्त्री । हरिद्रायाम् । युवत्याम् ।

यूपः (कः) । पुं । प्लक्षवृक्षे । मद.व. ।

यूपद्रुः (मः) । पुं । खदिरवृक्षे । त्रिका. । रक्तखदिरे । रा.नि.व.८ ।

यूपलक्ष्यः । पुं । पक्षिणि । शब्दमा. ।

यूषः । पुं, क्ली । मुद्गादिरसे । डाल, कलायादिर झोल । "भृष्टमुद्गदलानान्तु पलैकेन विपाचितः । पूतापनीतविदलः तनुर्यूषः कृताकृतः । द्वन्द्ववैद्याः पलं द्रव्यं याहयन्ति जलाढके । भेषजस्यातिबाहुल्यात्कदाचिदुचितम्भवेत् । पेया मण्डादियोगेषु भेषजं यत्प्रकीर्त्तितम् । तत्रैव प्रयोक्तव्यमरुचिर्न भवेत् यथा ॥" तोड़नानन्दोद्धृतनलात् । चतुर्भागाम्बुसाधितनिष्पीड़ितवैदलादिसम्भूतवारि यूष उच्यते । "वैदलान् वितुषान् भृष्टान् चतुर्भागाम्बुसाधितान् । निष्पीड्य तोयमेतेषां संस्कृतं यूष उच्यते ॥" प.मु. । "...यूषः किञ्चिद्घनः स्मृतः ।" गुणाः—"यूषो बल्यः स्मृतः कण्ठ्यः लघुपाकः कफापहः ।" प.प्र.२ख. । द्विदलादिरत्नजद्रवे । "रत्नजद्रवो यूषः ।" इति । सा.कौ. । मांसरसे । यूषो बहुविधः वैदलादीनां वैचित्र्यात् । विशेषाः स्वस्वपर्य्याये द्रष्टव्याः । पुं । ब्रह्मदारुवृक्षे । शब्दर. ।

योक्त्रम् । क्ली । यूकाहन्दे । सि.यो.क्रमि.चि. ।

योगः । पुं । औषधे । द्रव्ये । उपायें । त्रिका. । येन वाक्यं युज्यते स योगः । सु.उ.६५अ. । "यदौषधन्तु प्रथमं यस्य योगस्य कथ्यते । तन्नाम्नैव स योगो हि कथ्यतेऽत्र विनिश्चयः ॥" प.प्र.१ख. । वपुस्थैर्य्ये । मे. ।

योगचिन्तामणिः । पुं । चिकित्सासंग्रहविशेषे श्रीहर्षसूरिकृते ।

योगजम् । क्ली । अगुरुणि । काष्ठागुरुणि । अगुरु काठ । भा. ।

योगतरङ्गिणी । स्त्री । वैद्यकचिकित्सासंग्रहविशेषे विमलभट्टकृते ।

योगनाविकः । पुं । मत्स्यविशेषे । हारा. ।

योगरङ्गः । पुं । नागरङ्गवृक्षे । रा.नि.व ११ ।

योगरत्नाकरः । पुं । चिकित्सायन्थविशेषे ।

योगराजगुग्गुलुः । पुं । ऊरुस्तम्भाधिकारे, आमवाते च औषधम् । पाठः—"चित्रकं पिप्पलीमूलं यमानीं कारवीन्तथा । विड़ङ्गान्यजमोदाञ्च जीरकं सुरदारु च । चव्यञ्चैलं सैन्धवं रास्नां तथा गोक्षुरधान्यकं । त्रिफलां सुस्तकं व्योषं त्वगुशीरं यवाग्रजं । तालीशपत्रं पत्रञ्च श्लक्ष्णचूर्णानि कारयेत् । यावन्त्येतानि चूर्णानि तावन्मात्रन्तु गुग्गुलुं । सम्मर्द्य सर्पिषा गाढ़ं स्निग्धे भाण्डे निधापयेत् । ततो मात्रां प्रयुञ्जीत यथेष्टाहारवानपि । योगराजइति ख्यातः..... ॥" चितामूल, पिपुलमूल, यमानी, कृष्णजीरा, विड़ङ्ग, वनयमानी, जीरा, देवदारु, चई, एलाईच, सैन्धव, कुड़, रास्ना, गोक्षुर, धनिया, आमला, हरीतकी, बहेड़ा, मुता, शुंट, पिपुल, मरिच, गुड़त्वक्, वेणार मूल, यवक्षार, तालीशपत्र, तेजपत्र प्रत्येक समभाग चूर्ण समष्टि करिबे; सेई चूर्णसमष्टिर समान शोधित महिषाक्षगुग्गुल । गुग्गुल घृतेर सहित माड़िया परे ताहार सहित चूर्ण मिशाइबे । मात्रा ॥० तो. । रस.र. । भा. ।

योगवाही (हिन्) । पुं । सर्ज्जिकाचारे । पारदे मधुनि । हे च. । चारे । व.निघ. ।

योगशतकम् । क्ली । चिकित्सासंग्रहग्रन्थे लक्ष्मीदासकृते ।

योगसारः (कः) । पुं । नागरङ्गवृक्षे ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारङ्गानेवूर गाछ। मद.व.६।

योगा(गो)रङ्गः। पुं। नागरङ्गवृक्षे। नारेङ्गा गाछ। रा.नि.व.११।

योगिदण्डः। पुं। वेतवंशे। वेउड़ बाँश। रा.नि.व.७।

योगी(गि)ष्टम्। क्ली। शीषधातौ। सीसा। र.मा.। रा.नि.व.१३।

योगेश्वरी। स्त्री। बन्ध्याकर्कोटक्याम्। भा.। नागदमन्याम्। नागदना। वै.निघ.।

योग्यम्। क्ली। पुष्यकासीसे। रा.नि.व.१३। ऋद्धौ। वृद्धौ। अम.। चन्दने। वै.निघ.। स्त्री (ग्या)। ऋद्धौ। रा.नि.व.५। वृद्धौ। गोरीचनायाम्। वै.निघ.।

योजनगन्धा (न्धिका)। स्त्री। कस्तूर्याम्। मे.। अजयपालः।

योजनपर्णी। स्त्री। मञ्जिष्ठायाम्। प.मु.।

योजनमल्लिका। स्त्री। आस्फोतायाम्। शापरमाली। भैष.ज्व.चि.पानीयवटी।

योजनवल्लिका (ल्ली)। स्त्री। मञ्जिष्ठायाम्। रा.नि.व.६। वा.सू.१५अ.प्रियङ्ग्वादिव.। "पद्माद्रजी योजनवल्लयनन्ता।" सु.सू.३८अ.प्रियङ्ग्वादि.।

योनलः। पुं। यावनाले। जनाद्र। हे.च.।

योनिः। पुं, स्त्री। स्त्रीचिह्ने। तत्पर्य्यायाः,— भगं वराङ्गं उपस्थः स्मरमन्दिरं मदनालयः मदनायुधः रतिकुहरं रतिगृहं रतिमन्दिरं जन्मवर्त्म अधरं अवाच्यदेशः प्रकृतिः अपथं स्मरकूपः स्मरकूपकः स्मरगृहं स्मरध्वजं स्मरागारं रत्यङ्गं कलत्रं अधः कन्दर्पकूपः कन्दर्पगर्भः कन्दर्पसम्बाधः कन्दर्पसन्धिः स्त्रीचिह्नं प्रजननं पुष्पपथः स्मरच्छत्रं स्मरकूपिका। रा.नि.व.१८। सा तु गर्भस्थायाः सप्तभिर्मासैर्भवति। सुखबोधः। स्वरूपं यथा—"शङ्खनाभ्याकृतिर्योनिस्त्रावर्त्ता सा प्रकीर्त्तिता। तस्यास्तृतीये त्रावर्त्ते गर्भशय्या प्रतिष्ठिता॥" तत्शुभाशुभलक्षणं यथा,—शुभः कमठपृष्ठाभोगजस्कन्धोपमो भगः। वामोन्नतश्चेत् कन्यायाः पुत्रजो दक्षिणोन्नतः॥ आखुरीमा गूढमणिः सुश्लिष्टः संहतः पृथुः। तुङ्गः कमलवर्णाभः शुभाश्चत्यदलाकृतिः॥ कुरङ्गखुररूपी यश्चुल्लिकोदरः सन्निभः। रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः॥ शङ्खावर्त्तोभगो यस्याः सा गर्भमिह नेच्छति॥" उपस्थे। जले। कारणे। हे.च.। उत्पत्तिस्थाने। सा चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जभेदात्। च.शा.३अ.।

योनिकन्दः। पुं। स्त्रीरोगविशेषे। निदानादिकं कन्दशब्दे द्रष्टव्यम्।

योनिदोषः। पुं। उपदंशे। स्त्रीरोगे। योनिव्यापदि। निदा.।

योनिभ्रंशः। पुं। योनिबहिर्गमने। सु.नि. ८अ.।

योनिरञ्जनः। पुं। योनिदोषभेदे। निदा.।

योनिरोगः (व्यापत्)। पुं, स्त्री। उदावर्त्तादिस्त्रीरोगे। निदानं—"प्रवृद्धलिङ्गं पुरुषं यात्यर्थमुपसेवते। रूक्षदुर्बलबालायास्तस्या वायुः प्रकुप्यति। स दुष्टो योनिमासाद्य योनिरोगाय कल्पते। त्रयाणामपि दोषाणां यथास्वं लक्षणे न तु॥ विंशतिर्व्यापदो योनेर्निर्दिष्टा रोगसंग्रहे। मिथ्याचारेण ताः स्त्रीणां प्रदुष्टैर्नार्त्तवेन च। जायन्ते बीजदोषाच्च दैवाच्च शृणु ताः पृथक्॥ सर्व्वलिङ्गसमुत्थाना सर्व्वदोषप्रकोपना। चतसृष्वपि चाद्यासु सर्व्वलिङ्गोक्तयो भवेत्। पञ्चासाध्या भवन्त्येह योनयः सर्व्वदोषजाः॥" सु.उ.३८अ.। नामानि यथा—उदावर्त्ता बन्ध्या विप्लुता परिप्लुता वातला, वातदोषेण। लोहितचरा स्रंसिनी वामिनी पुत्रघ्नी पित्तला, पित्तदोषेण। अत्यानन्दा कर्णिनी अचरणा (चरणा वा) अतिचरणा श्लेष्मला श्लेष्मदोषेण। षण्ढी अण्डिनी (वा फलिनी) महती सूचीमुखी विदोषिणी, विदोषदोषेण। मा.नि.। अतिचरणा उदावर्त्ता (वृत्ता) जातघ्नी अन्तर्मुखी सूचीमुखी शुष्काख्या वामिनी षण्ढसंज्ञा महायोनिः रक्तयोनिः पैत्तिकी श्लैष्मिकी लोहितचया परिप्लुता उपप्लुता विप्लुता कर्णिनी सान्निपातिकी चेति। वा.उ.३६अ.। आसां लक्षणानि स्वस्वपर्य्याये द्रष्टव्यानि।

योनिशूलम्। क्ली। योनिरोगविशेषे। योनिपीड़ायां। निदा.।

योनिशूलघ्नी। स्त्री। शतपुष्पायाम्। शुलूफा। वै.निघ.।

योनिसंवरणम्। क्ली। गर्भजन्यरोगे, गर्भसङ्कोचे। तन्निदानलक्षणे यथा,—"वातलान्यन्नपानानि व्यायामधर्म्मं प्रजागरं। अत्यर्थं सेवमानायां गर्भिण्यां योनिमार्गतः॥ मातरिश्वा प्रकुपितो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योनिद्वारस्य संवृतिं। कुरुते ऊर्द्धमार्गत्वात् पुनरत्यर्गतोऽनिलः॥ निरुणद्धाशयद्वारं पीड़यन् गर्भसंस्थितिं। निरुद्धवदनोच्छ्वासो गर्भमाशु विपद्यते॥ वह्वा सत्यद्धहृदयां नाशयत्यचिरं गर्भिणीम्। सु.नि.८अ.। योनिसंवरणं विद्याद्व्याधिमेनं सुदारुणम्॥"

योन्यर्शः। क्ली। योनिकन्दरोगे। विका.। See कन्दः।

योषा (षिः)। स्त्री। हरिद्रायाम्। नार्याम्।

योषिणी। स्त्री। पीवर्य्याम्। ओलटकम्बल।

योषित्प्रिया। स्त्री। हरिद्रायाम्। भा.।

योषित् (ता)। स्त्री। हरिद्रायाम्। नार्याम्।

यौगन्धरान्नम्। क्ली। यावनालक्कतान्ने। जनारेर भात। गुणाः—"यौगन्धरं गुरु घनं कासश्वासप्रवृत्तिकृत्।" वै.निघ.।

यौतवम्। क्ली। परिमाणे। अम.।

यौवनम्। क्ली। यौवनावस्थायाम्। तच्च षोडशादूर्द्धमुच्यते। "कैशोरमाषोडशात् यौवनन्तु ततः परम्।" रा.नि.व.१८।

यौवनः। पुं। यावनाले। जनार। प.मु.।

यौवनकण्टकः। पुं, क्ली। युवगण्डरोगे। वयसफोँड़ा। शा.मा.।

यौवनपिड़का। स्त्री। युवकाले मुखजातपिड़कायाम्। वयसफोँड़ा। लक्षणं—"श्लाघ्मलीकण्टकप्रख्याः कफमारुतशोणितैः। जायन्ते पिड़का यूनां वक्त्रे या सुखदूषिकाः॥" सु.नि.१३अ.।

र

रः। पुं। अग्नौ। तीक्ष्णे।

रकः। पुं। सूर्य्यकान्तमणौ। वै.निघ।

रकणः। पुं। कीकिलाचक्षुषि। कुलेखाड़ार गाछ। रा.नि.व.४।

रकसा। स्त्री। क्षुद्ररोगविशेषे, कुष्ठरोगभेदे वा। लक्षणं—"कण्डूयिता या पिड़का शरीरे संस्रावहीना रकसेत्युच्यते सा।" सु.नि.५अ.।

रक्त(क्क)म्। क्ली। हिङ्गुले। रा.नि.व.१३। भा.म.१भ.ज्व.चि.त्रिपुरभैरवरसे। "द्युमणिरक्तकमार्द्रकमर्दितम्।" तास्रे। रा.नि.व.१३। वङ्गधातौ। रा.मा.। रक्तचन्दनभेदे। वकम काठ। सिन्दूरे। प.मु.। कुङ्कुमे। पद्मकाष्ठे। रा.नि.व.१२। पद्मे। रा.नि.व.१०। प्राचीनामलके। मे.। रक्तखदिरे। बीले। रक्तपद्मे। वै.निघ.। शरीरस्थसप्तधात्वन्यतमहितीयधातौ। रक्त। हिंलहु, खुन। तत्पर्य्यायाः,—रुधिरं असृक् लोहितं असं चतजं शोणितं पलङ्कारं रोहितं रङ्गकं कीलालं अङ्गजं रौधिरं स्वजं रसजं रस्यं रसतेजः वासिष्टं प्राणदं मांसकारि लग्जं शोणं लोहं चर्म्मजं रसभवं। रा.नि.व.१८। रक्तस्वरूपमाह—"रसस्तु हृदयं याति समानमारुतेरितः। रञ्जितः पाचितस्तत्र पित्तेनायाति रक्तताम्। रक्तं सर्व्वशरीरस्थं जीवस्याधारमुत्तमम्। स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत्॥" शार्ङ्ग.पू.६अ। रक्तस्थानम् यथा—यकृत् प्लीहा च रक्तस्य मुख्यस्थानम्। तस्य कर्म्म च जीवनम्। भा.। तत्रस्थमेव शोणितस्थानानामनुग्रहं करोति। सु.सू.२१अ.। तत्र च विसृताद्रवतारागचलनविलया इति भूम्यादिपञ्चभूतगुणाः सन्ति। शुद्धरक्तलक्षणं—"मधुरं लवणं किञ्चिदशीतोष्णमसंहतं। पद्मेन्द्रगोपहंसाविग्रशुकलोहितलोहितं। लोहितम्प्रभवः शुद्धं तनीस्नेव च स्थितिः॥" वा.सू.२७अ.। तस्मिंश्च दुष्टे सति शीथरक्तमण्डलादिबहवो रोगा जायन्ते। बहुं च रक्ताङ्गनेत्रवक्त्रशिरापूर्णतादयो जायन्ते। क्षीणे च तस्मिन् मूर्च्छादयो भवन्ति। रक्तं वातदूषितं फेनिलारुणपरुषरुचतनु, पित्तदूषिते पीतहरितनीलश्यावास्वादुविस्रोष्णं, कफदूषिते शीतलबहलस्निग्धादि च भवति। द्विदोषदुष्टं संसृष्टं त्रिदोषदुष्टञ्च पूतिगन्धं भवति। भा.। पुं। लोध्रवृक्षे। प.मु.। कुसुम्भवृक्षे। हिज्जलवृक्षे। रा.नि.व.७।८। रक्तग्रिगौ। रक्तपुनर्नवायाम्। अर्शोकदम्बे। रक्तैरण्ड। रक्तशोफीतके। मत्स्यविशेषे। वै.निघ.। सविषमण्डूकभेदे। महाविषहरिकभेदे। मन्दविषहरिकभेदे। सु.कल्प.८अ.। त्रि। रक्तवर्णे। रञ्जिते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तकः। पुं। लोहितवर्णे। मे.। बन्धुजीववृक्षे। वाङ्गलि गाछ। प.मु.। रक्तझिण्टायां। मे. रक्तशिग्रुवृक्षे। काल सजिना गाछ। प.मु.। रक्तैरण्डवृक्षे। वै.निघ.२भ.अिङ्गक.ज्व.चि.। प्रवाङ्गचन्दनवृक्षे। वकम्। रा.नि.व.१२। क्ली। छिङ्गुलि।

रक्तकङ्कुः। पुं। धूनके। वै.निघ.।

रक्तकण्टा। स्त्री। विकङ्कतवृक्षे। देईचि गाछ। वै.निघ.।

रक्तकदली। स्त्री। लोहितकदल्याम्। चाँपा कला। वै.निघ.।

रक्तकन्दः (कः)। पुं। राजपलाण्डौ। वड़ पेंयाज। रक्तपिण्डालुके। लाल आलू। रा.नि. व.७। प्रवाले। हे.च.।

रक्तकन्दलः। पुं। रक्तप्रवालद्रुमे। त्रिका.।

रक्तकमलम्। क्ली। रक्तवर्णपद्मे। रा.नि.व.१०।

रक्तकम्बलम्। क्ली। रक्तवर्णकम्बारे। रक्तकम्बल। तत्पर्य्यायाः,—कौकनदं अल्पपत्रं अलिप्रियं अलोहितं क्षणकन्दं रक्तवर्णं रक्ताम्भोजं अरुणकमलं चारुनालकं शोणपद्मं रक्तोत्पलं अरविन्दं रक्तवारिजं। तद्गुणाः—कटुतिक्तं मधुरं शिशिरं रक्तदोषहरं पित्तकफवातशमनं सन्तर्पणं वृष्यञ्च।

रक्तकरवीरकः। पुं। रक्तपुष्पकरवीरवृक्षे। लालकरवी गाछ। मं रक्तकरवीर। कं कैंगणलिगे। हिं लालकनेल। तत्पर्य्यायाः,—रक्तप्रसवः गणेशकुसुमः चण्डीकुसुमः क्रूरः भूतद्रावी रविप्रियः। श्वेतरक्तभेदेनायं द्विविधः। "करवीरः श्वेतपुष्पः शतकुन्दोऽश्वमारकः। द्वितीयो रक्तपुष्पश्च चण्डाली लगुड़स्तथा॥ करवीरद्वयं तिक्तकषायं कटुकञ्च तत्। व्रणलाघवक्रन्नेत्रकीपकुष्ठव्रणापहम्॥ वीर्य्योष्णं क्रिमिकण्डूघ्नं भक्षितं विषवन्मतम्॥" भा.। गुणाः—कटुः तीक्ष्णः शोधकः त्वग्दोषव्रणकण्डूकुष्ठघ्नः विषघ्नश्च। रा.नि.व.१०।

रक्तका। स्त्री। पानीयामलके। वै.निघ.।

रक्तकाञ्चनः। पुं। Bauhinia variagata or B. Purpurea.) Mountain ebony. काञ्चनारवृक्षे। रक्तकाञ्चन। हिं कचनार। प.मु.। See काञ्चनः।

रक्तकाण्डा। स्त्री। रक्तपुनर्नवायाम्। रक्तपुण्ड्यां वा गाधापुण्ड्यां। रा.नि.व.५।

रक्तकाष्ठम्। क्ली। पत्राङ्गचन्दने। वकम काष्ठ। रा.नि.व.१२।

रक्तकुमुदम्। क्ली। रक्तकैरवे। लाल हेला फुल, लालशुन्नि। जटा.।

रक्तकुरण्टकः। पुं। रक्तझिण्ट्याम्। लाल झाँटी। गुणाः—तिक्तो वर्ष्यः उष्णः कटुः शोथघ्नः ज्वरघ्नः, तथा वातरोगं कफं रक्तरोगं पित्तम् आध्मानं शूलं श्वासं कासञ्च नाशयेत्। वै.निघ.।

रक्तकुसुमः। पुं। पारिभद्रवृक्षे। पालते मान्दार गाछ। रा.नि.व.८। धन्वनवृक्षे। धामना गाछ। रा.नि.व.९। रक्तकाञ्चने। स्त्री (मा)। दाड़िम्बवृक्षे। वै.निघ.। [वै.निघ.।

रक्तकृमिजा। स्त्री। लाक्षायाम्। लाहा।

रक्तकेशरः। पुं। पारिभद्रवृक्षे। रा.नि.व.८। पुन्नागवृक्षे। र.मा.।

रक्तकैरवम्। क्ली। रक्तकुमुदे। जटा.।

रक्तकोकनदम्। क्ली। रक्तोत्पले। रक्तपद्मे। जटा.। [नकुल.१०अ.।

रक्तकोपः। पुं। शोणितप्रकोपे। रक्तविकारे।

रक्तखदिरः। पुं। रक्तवर्णखदिरवृक्षे। रक्तवर्ण खदिर गाछ। तत्पर्य्यायाः,—रक्तसारः ससारः आसनसारकः बहुशल्यकः याज्ञिकः कुठनीदनः यूपद्रुमः असनखदिरः। गुणाः—कटूष्णः तिक्तः कषायः गुरुः आमवातघ्नः वातरक्तहरः व्रणभूतज्वरघ्नश्च। रा.नि.व.८।

रक्तखाण्डवः। पुं। ईषखर्ज्जूरीवृक्षे। वै.निघ.।

रक्तगतज्वरः। पुं। रक्तधातुगतज्वरे। लक्षणं यथा—"रक्तानिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ। प्रलापः पिड़का तृष्णा रक्तप्राप्ते ज्वरे नृणाम्॥" मा.नि.।

रक्तगन्ध(न्धि)कम्। क्ली। बीलनामगन्धद्रव्ये। बोल। थुनथाराप्पी। रा.नि.व.९।

रक्तगन्धा। स्त्री। अश्वगन्धायाम्। वै.निघ.। स्वर्णयूथिकायाम्।

रक्तगर्भा। स्त्री। नखरञ्जनीवृक्षे। मेंहदी गाछ। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तगुञ्जा। स्त्री। रक्तवर्णगुञ्जायाम्। See गुञ्जा।

रक्तगुल्मः। पुं। आर्त्तवजन्यगुल्मे। निदान लक्षणे यथा—"नवप्रसूताहितभोजना या या चामगर्भं विसृजेद्दतौ वा। वायुर्हि तस्या परिगृह्य रक्तं करोति गुल्मं सरुजं सदाह। पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणञ्चाप्यपरं निबोध। यः स्पन्दते पिण्डितएव नाड्यैः चिरात्समूलः समगर्भलिङ्गः। स रौधिरः स्त्रीभव एव गुल्मी मासे व्यतीते दशमे चिकित्स्यः॥ भा.।

रक्तगैरिकम्। क्ली। स्वर्णगैरिके। वै.निघ.।

रक्तग्रन्थिः। पुं। रक्तलज्जालौ। लाल लज्जावती। रक्तजन्यग्रन्थिरोगे। लक्षणं—"सवल्मजस्रं रुधिरं प्रदुष्टमसाध्यमेतद्रुधिरात्मकं स्यात्।" सु. नि.११अ.। मूत्रग्रन्थि नाम मूत्राघातविशेषे। "रक्तं वातकफाद्दुष्टं वस्तिद्वारे सुदारुणम्॥ ग्रन्थिं कुर्य्यात् स कृच्छ्रेण सृजेन्मूत्रं तदाहृतम्। अश्मरीसमशूलत्वं रक्तग्रन्थिं प्रचक्षते॥" मा. नि.टी.।

रक्तग्रीवः। पुं। कपोते। पारेवा। वै.निघ.।

रक्तघ्नः। पुं। रोहितकवृक्षे। रोहा, रक्तना गाछ। जटा.। स्त्री (घ्नी)। गन्धिदूर्व्वायाम्। गाँठिया दूर्व्वा। श.च.।

रक्तचन्दनम्। क्ली। (Pterocarpus santalinus.) Red sandal wood. खनामख्यातसुगन्धिकाष्ठे। रक्तचन्दन। दा. हिं लालचन्दन। तें एर्रगन्धपुचेट्टु। ता. सेन्शाण्डनम्। फा. सण्डले सुर्ख। आ. सण्डल अह्मर्। तत्पर्य्यायाः,—तिलपर्णं पत्राङ्गं रञ्जनं कुचन्दनं कुसोदं रक्ताक्तं तामवृक्षः तामसारं तामसारक चन्दनं लोहितं ताम्राभं लोहितचन्दनं रक्तसारं रक्ताङ्गं क्षुद्रचन्दनं तिलपर्णिका पत्तङ्गं पत्रङ्गं रक्तबीजं। तत्त्रिधा—"आक्रष्णमुत्तमं नूनं रक्तच्छेदञ्च मध्यमम्। आरक्तमधमं विद्धि रक्तचन्दनकं त्रिधा॥" भैष.। गुणाः—शीतलं तिक्तं कफपित्तकासज्वरभ्रान्तिक्लमविनिहरणाहरम्। रा.नि.व.१२। एतच्चन्दनं कषायपानयोः प्रयोज्यं। तथा कषायलेपयोश्च ग्राह्यम्। वा.सू.१५अ.गुडूच्यादिः। "धानकारक्तचन्दनम्।"

रक्तचित्रकः। पुं। (Plumbago rosea or Coccinea, Syn. P. Rosea.) रक्तवर्णदण्डपत्रचित्रकवृक्षे। रक्तचित्रा। मं रक्तचित्रक। क कॆंपिनचित्रमूल। तें एर्रचित्र। ता. शिवप्पुचित्रिर। तत्पर्य्यायाः,—उषर्ब्बुधः कालः अत्यालः कालमूलः अतिदीप्यः माञ्जरः अग्निः दाहकः पाचकः चित्राङ्गः महाङ्गः। गुणाः—स्थौल्यकरः रुच्यः कुष्ठघ्नः रसनियामकः लौहवैधकः रसायनः चित्रकालराद्वृणाख्यश्च। रा.नि.व.६।

रक्तचिल्लिका। स्त्री। मधुरवास्तुके। मिठा बेतो। वै.निघ.।

रक्तचूर्ण(क)म्। क्ली। सिन्दूरे। लोहितचूर्णमात्रे। पुं। कम्पिल्लके। कमलागुड़ि। रा.नि. व.१३।

रक्तजक्रमिः। पुं। रक्तजन्यक्रमिरोगे। लक्षणं—"रक्तवाहिशिरास्थानरक्तजा जन्तवोऽणवः। अपादा वृत्ततामाश्च सौक्ष्म्यात् केचिददर्शनाः। केशादा रोमविध्वंसा रोमद्वीपा उडुम्बराः। षट् ते कुष्ठैककर्म्माणः सहसौरसमातरः॥" मा.नि.।

रक्तजन्तुकः। पुं। भूनागे। शीष। रा.नि.व. १३। लोहितप्राणिमात्रे।

रक्तजिह्वः। पुं। सिंहे। श.मा.।

रक्तझावुकः। पुं। (Tamarix dioica.) स्वनामख्यातवृक्षे। लाल झाउ। हिं लालझाउ। श.चि.।

रक्तझिण्टी। स्त्री। रक्तपुष्पझिण्टीवृक्षे। तत्पर्य्यायाः,—कुरुवकः झीणझिण्टिका झीणझिण्टी। अम.। See रक्तकुरुण्टकः।

रक्ततरम्। क्ली। स्वर्णगैरिके। वै.निघ.।

रक्ततुण्डः (कः)। पुं। सारसपक्षिणि। शुकपक्षिणि। रा.नि.व.१९। (कः) भूनागे। रा. नि.व.१३।

रक्तटणम्। क्ली। तृणविशेषे। वै.निघ.। स्त्री (णा)। गोमूत्रिकाख्ये। रा.नि.व.८।

रक्तत्रिवृत्। स्त्री। रक्तमूलत्रिवृति। लाल तेउड़ी। मं लोहिड़ी तियर। कं कॆंपिनेय तियड़े। तत्पर्य्यायाः,—कालिन्दी त्रिपुटा ताम्रपुष्पिका कुलवर्णा मसूरी असृता काकनासिका। गुणाः—तिक्ता कटूष्णा रेचनी ग्रहणी मलविटम्भहरी च। रा.नि.व.६।

रक्तदला। स्त्री। चिर्भिटिकायां। नलिकायाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा.नि.व.५। नलिकानामगन्धद्रव्ये। रा.नि.व.१२।

रक्तट्टक्। पुं, स्त्री। कपोते। जांगपायरा।

रक्तद्रुमः। पुं। रक्तबीजासनवृक्षे। पित्तपापड़ा गाछ। रा.नि.व.९।

रक्तधरा। स्त्री। मांसाभ्यन्तरे द्वितीयायाम् कलायाम्। "मांसस्याभ्यन्तरतस्त्वस्यां शोणितं विशेषतश्च शिरासु यकृत्प्लीहौ च भवति।" सु. शा.४अ.।

रक्तधातुः। पुं। गैरिकधातौ। गिरिमाटी। प.मु.। तासे। रा.नि.व.१३। रक्तवर्णधातुमात्रे।

रक्तनाड़ी। स्त्री। दन्तमूलगतरक्तजनाड़ीव्रणविशेषे। मा.नि.।

रक्तनालः। पुं। जीवशाकवृक्षे। रा.नि.व.७। जीवन्त्याम्। क्ली। कह्लारे। वै.निघ.।

रक्तनाशकः। पुं। कुटजवृक्षे।

रक्तनासिकः। पुं। पेचके। शु.र.।

रक्तनिर्यासः। पुं। रक्तबीजासनवृक्षे। रा.नि.व.९। See असनः।

रक्तनेत्रः। पुं। सारसपक्षिणि। कपोते। वै.निघ.। नकुले।

रक्तनेत्रत्वम्। क्ली। रक्तविकारजनेक्षरोगे। निदा.।

रक्तपत्रः। पुं। फीङ्गालौ। रा.नि.व.७।

रक्तपत्रा (त्रिका)। स्त्री। रक्तपुनर्नवायाम्। वै.निघ.। नाकुल्याम्। रा.नि.व.७।

रक्तपदः। पुं। शुकपक्षिणि। हंसे।

रक्तपदी। स्त्री। क्षुद्रवृक्षविशेषे। लज्जावती। "शमीपत्रा रक्तपदी समाङ्गाञ्जलिकारिका।" जटा.।

रक्तपद्मः। पुं, स्त्री। रक्तकमले। तत्पुष्पगुणाः —पद्मं कषाय-मधुरं शीतपित्त-कफास्रजित्। राज.५प.।

रक्तप(पा)दी। स्त्री। लज्जालुकायाम्। हंसपदीपरनामलज्जालुकायां। रा.नि.व.५।

रक्तपर्णः। पुं। रक्तपुनर्नवायाम्। वै.निघ.।

रक्तपल्लवः (कः)। पुं। अशोकवृक्षे। रा.नि.व.१०।

रक्तपा। स्त्री। जलौकायाम्। जोंक। मे.।

रक्तपाका (की)। स्त्री। लताविशेषतीक्ष्णपे। र.मा.।

रक्तपाची। स्त्री। जलौकायाम्। शु.र.।

रक्तपादः। पुं। शुकपक्षिणि। हे.च.। हंसे। वै.निघ.।

रक्तपायिनी। स्त्री। जलौकायाम्। रा.नि.व.१९। मत्कुणे। वै.निघ.।

रक्तपायी (यिन्)। पुं। मत्कुणे। छारपोका। व्याक.।

रक्तपारदम्। क्ली, पुं। हिङ्गुले। चिका.। जटा.। [वै.निघ.।

रक्तपाषाणः। पुं, क्ली। गिरिमृत्तिकायाम्।

रक्तपिण्डम्। क्ली। जपापुष्पवृक्षे। चिका.। रक्तालौ। वै.निघ.। चीनदेशीयगुलाबपुष्पे। शु.चि.।

रक्तपिण्डकः। पुं। रक्तवर्णपिण्डालौ। रा.नि.व.७। जपावृक्षे। चिका.।

रक्तपिण्डालुः। पुं। रक्तवर्णपिण्डालौ। लाल चुवड़ि आलू। मं रातालु। कं केंपिनहेड्ल। गुणाः—शीतः मधुरः अम्लः श्रमघ्नः दाहपित्तघ्नः हृद्यः गुरुः बलपुष्टिकरश्च। रा.नि.व.७।

रक्तपित्तम्। क्ली। तन्नामकरोगभेदे। निदानं—"घर्म्मव्यायामशोकाध्वव्यवायैरतिसेवितैः। तीक्ष्णोष्णचारलवणैरम्लैः कटुभिरेव च। पित्तं विदग्धं स्वगुणैर्विदह्यत्याशु शोणितम्। ततः प्रवर्त्तते रक्तमूर्द्ध्वाधो द्विधापि वा। ऊर्द्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः। कुपितं रोमकूपेभ्य समस्तेभ्यत् प्रवर्त्तते॥" इति निदानम्। "सदनं शीतकामित्वं कण्ठधूमायनं वमिः। लोहगन्धित्व निःश्वासो भवत्यस्मिन् भविष्यति॥" पूर्व्वरूपम्। वातिकादिलक्षणं—"सान्द्रं सपाण्डु सस्नेहं पिच्छिलञ्च कफान्वितं। श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम्। रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभं। मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम्। संसृष्टलिङ्गं संसर्गात् त्रिलिङ्गं सान्निपातिकम्। ऊर्द्धगं कफसंसृष्टमधोगं पवनानुगम्। द्विमार्गं कफवाताभ्यामुभाभ्यामनुवर्त्तते। ऊर्द्धं साध्यमधो याप्यमसाध्यं युगपद्गतं। एकमार्गं बलवती नातिवेगं नवोत्थितं। रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम्। एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते। यत्त्रिदोषमसाध्यं स्यात् मन्दाग्नेरतिवेगवत्॥" मा.नि.। अत्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथममपतर्पणम् ऊर्द्ध्वगे रेचनं ऊर्ध्वगे च वमनं शस्तम्। पुं। हारीतपक्षिणि। भा.।

रक्तपित्तहा। स्त्री। गन्धिदूर्व्वायाम्। गँटे दूर्व्वा। श.च.।

रक्तपित्तान्तकरसः। पुं। रक्तपित्ताधिकारि रस.। पाठः—"सताभं सततौच्चञ्च जातिकं रसतालकं। गन्धकञ्च भवेत्तुल्यं यष्टिद्राक्षासताद्रवैः। दिनैकं मर्दयेत् खर्ल्वे सिताक्षौद्रसमन्वितम्॥" मात्रा माषमात्रं। र.सा.सं.।

रक्तपोटिकादर्शनम्। क्ली। रक्तजविकारि। निदा.।

रक्तपोतफला। स्त्री। मधुरबिम्बिकायाम्। वै.निघ.।

रक्तपुनर्नवा। स्त्री। खनामख्यातपवशाकवृक्षे। गादापुरुण्य मं रक्तघेंटुलि। कं केंपिन वेल्लड़ाकलु। तत्पर्य्यायाः,—क्रूरा मण्डलगन्धिका रक्तकाण्डा वर्षकेतुः लोहिता रक्तपत्रिका वैशाखी रक्तवर्षाभूः शोफघ्नी रक्तपुष्पिका विकस्वरा विषघ्नी प्रावृष्येण्या सारिणी वर्षाभवः। गुणाः—तिक्ता सारणी शोथघ्नी रक्तप्रदरघ्नी पाण्डुपित्तघ्नी च। रा.नि.व.५।

रक्तपुष्पः। पुं। रक्तवकवृक्षे। लाल वकफूलेर गाछ। र.सा.। रक्त-करवीरवृक्षे। जटा.। रोहितकवृक्षे। श.सा.। दाड़िमवृक्षे। प.मु.। रक्त काञ्चनवृक्षे। बन्धूकवृक्षे। पुन्नागवृक्षे। रा.नि.व.१०। पर्पटके। शाल्मलीवृक्षे। पलाशवृक्षे। पारिभद्रवृक्षे। जवावृक्षे। रक्तार्कं। वै.निघ.।

रक्तपुष्पकः। पुं। पलाशवृक्षे। रोहितकवृक्षे। मन्दारवृक्षे। जटा.। पर्पटके। रा.नि.व.५। शाल्मलीवृक्षे। रक्तार्कवृक्षे। रा.नि.व.८।

रक्तपुष्पा। स्त्री। शाल्मलीवृक्षे। जटा.। कनक-कटलोहवृक्षे। चाँपाकला गाछ। प.मु.। नागदमन्याम्। नागदना। रा.नि.व.५।

रक्तपुष्पिका। स्त्री। सूपाटल्याम्। रक्त-पुनर्नवायाम्। रा.नि.व.५। लज्जालुकायाम्। श.च.। पाटलीवृक्षे। पाकुल गाछ। रा.नि.व.१०। मञ्जिष्ठायाम्। लाङ्गलिकायाम्। रक्त-शङ्खपुष्पयाम्। शाल्मलीवृक्षे। वै.निघ.।

रक्तपुष्पी। स्त्री। धातकीवृक्षे। र.मा.। पाटली वृक्षे। जटा.। जवापुष्पवृक्षे। रा.नि.व.१०। आवर्त्तकीलतायाम्। रा.नि.व.३। नागदमन्याम्। रक्तार्के। रक्तपुनर्नवायाम्। वै.निघ.। कीड्रण-देशीयकरवीपुष्पवृक्षे। उष्ट्रकाण्डीपुष्पवृक्षे। रा.नि.व.१०।

रक्तपूरकम्। क्ली। वृक्षाम्ले। तेँतुल। रा.नि.व.६।

रक्तपूर्व्वकः। पुं। रक्तापामार्गे। वै.निघ.।

रक्तपोस्तः। पुं। (Papaver Rhoeas.) Red poppy. रक्तखसखसवृक्षे। लाल पोस्त। हिं लालपुस्ता। तें एर्रगसगसलार्चेटु। ता. शिगप्पु पोस्तकाचेड़ि। कीपान्तरम्।

रक्तप्रतिश्यायः। पुं। दुष्टरक्तजप्रतिश्यायरोगे। लक्षणम्—"रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्त्तते। तस्माच्च भवेज्जन्तुः उरोघातप्रपीड़ितः। दुर्गन्धोच्छ्वासवदनो गन्धानपि न वेत्ति सः॥" मा.नि.।

रक्तप्रवृत्तिः। पुं। पित्तजरोगे। भा.।

रक्तप्रसवः। पुं। रक्तकरवीरे। सुचुकुन्दवृक्षे। भूचुकुन्द गाछ। रक्तास्फाने। रक्त झाँटी। रा.नि.व.१०।

रक्तफलः। पुं। वटवृक्षे। रा.नि.व.११। शाल्मलीवृक्षे। रा.नि.व.८। रक्तापामार्गे। स्त्री (ला)। बिम्बीलतायाम्। तेलाकुचा। प.मु.। स्वर्णवल्लयाम्। शोणालू। रा.नि.व.९। वार्त्ताकु-वृक्षे। वटवृक्षे। वै.निघ.।

रक्तफेनजः। पुं। फुस्फुसे, वामपार्श्वस्थक्लोम्नि। हे.च.। [सु.कल्प.८अ.।

रक्तबभ्रुः। पुं। प्राणघाति-महाहृद्धिकविशेषे।

रक्तबाल(लु)कम् (का)। क्ली, स्त्री। सिन्दूरे। हारा.। विका.।

रक्तबिन्दुः। पु। रक्तापामार्गे। रा.नि.व.४।

रक्तबिन्दुच्छदा। स्त्री। पुनदावृक्षे। शुक्ल-कण्टकाख्यायाम्। वै.निघ.।

रक्तबीजः। पुं। दाड़िमवृक्षे। रा.नि.व.११। रोठाकरञ्जे। रिठे। रक्तबीजासनवृक्षे। आसन गाछ। रक्तकुलत्थे। वै.निघ.।

रक्तबीजका। स्त्री। तरटीवृक्षे। तरुई गाछ। रा.नि.व.८।

रक्तभस्म। क्ली। रससिन्दूरादिकरणे। एतत्-साधनप्रणाली र.सा.संग्रहे मृग्या।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तमञ्जरः। पुं। वेतसलतायाम्। चिका.। निम्बवृक्षे। वै.निघ.।

रक्तमञ्जरी। स्त्री। रक्तकरवीरे। वै.निघ.।

रक्तमण्डलः। पुं। मण्डलिसर्पविशेषे। सु.कल्प. ४अ.।

रक्तमण्डलिका। स्त्री। रक्तलज्जालुकायाम्। लाल लज्जावती। वै.निघ.।

रक्तमण्डूकः। पुं। रक्तवर्णमण्डूकजातीयकीटे। तैर्दष्टस्य दंशकण्डूर्भवति पीतफेनागमश्च वक्त्रात्। सु.कल्प.८अ.।

रक्तमत्स्यः। पुं। रक्तवर्णमत्स्यविशेषे। लाल माछ। तल्लक्षणगुणाः—"यो रक्ताङ्गो नातिदीर्घो न चाल्पो नातिस्थूलो रक्तमत्स्यः स चोक्तः। शीतो रूक्षः पुष्टिकृद्दोषनाऽसौ नाग्नं धत्ते किंच दोषत्रयस्य॥" रा.नि.व.१७।

रक्तमरिचम्। क्ली। मरिचभेदे। लङ्कामरिच। हिं लालमरिच। वै.निघ.।

रक्तमातृका। स्त्री। रसधातौ। वै.निघ.।

रक्तमात्रौ। स्त्री। स्त्रीणां बाधकरोगविशेषे।

रक्तमिलातकः। पुं। रक्तास्थान-पुष्पवृक्षे। रक्तझाँटी। रा.नि.व.१०।

रक्तमुखः। पुं। रोहितमत्स्ये। षष्टिकधान्ये। वै.निघ.।

रक्तमूत्रता। स्त्री। रक्तप्रस्रावरोगे। निदा.।

रक्तमूर्द्धा (न्)। पुं। सारसपक्षिणि। वै.निघ.।

रक्तमूलकः। पुं। दीर्घसर्षपक्षुपे। रा.नि.व.९।

रक्तमूला (लो)। स्त्री। लज्जालुकालतायाम्। रा.नि.व.५।

रक्तमृत्। स्त्री। गैरिके। गिरिमाटी। वै.निघ.।

रक्तमेहः। पुं। रक्तस्रावविप्रमेहरोगे। लक्षणं —"विस्रमणं सलवणं रक्ताभं रक्तमेहिनः।" भा.।

रक्तमोक्षणम्। क्ली। जलौकावचारणे। जोँक धरान। शोणितबाहुल्यात् बहुविधरोग जनकत्वाच्च स्रावणस्यातीव प्रयोजनं भवति प्रयोजने च सञ्जाते जलौकालाबुकाभिरुपायैः शिरामोक्षैश्च तत्स्रावणं क्रियते। परन्तु क्षणातिव्याधिक्लीवादीनां न शिरामोक्षः कार्य्यः, जलौकावचारणन्तु ग्रस्तम्। विषदुष्टं वातादिदुष्टं वा गोग्रङ्गजलौकालाबुभिः ग्रस्तम्। भा.।

रक्तयष्टिः (ष्टी)। स्त्री। लज्जालुकायाम्। मञ्जिष्ठायाम्। प.मु.।

रक्तयष्टिका। स्त्री। मञ्जिष्ठायाम्। रा.नि.व.६।

रक्तयावनालः। पुं। तुवरयावनाले। लाल जनार। रा.नि.व.१६।

रक्तयोनिः। पुं। योनिव्यापद्भेदे। लक्षणम् —"रक्तयोन्याख्यासृगतिस्रुते।" वा.उ.३३अ.।

रक्तरङ्गा। स्त्री। मेदातिख्याते वृक्षे। वै.निघ.।

रक्तरजः। क्ली। सिन्दूरे। वै.निघ.।

रक्तरसः। पुं। रक्तासनवृक्षे। वै.निघ.।

रक्तरसा। स्त्री। राज्ञायाम्। वै.निघ.।

रक्तरसोनः। पुं। लोहितरसोने। लाल रशुन। सं लोहिताबोलुरसण। क कोंपिनवेल्लुल्लि। गञ्जनकी। गाजर। तत्पर्य्यायाः,—महाकन्दः पृथुपत्रः स्थूलकन्दः यवनेष्टः। गुणाः—मधुरः कटुः बलकरः। पत्रं तिक्तं। अस्थि सलवणञ्च। रा.नि.व.७। पत्रं मधुरं चारं नालो मधुरपित्तलः कषाय इति। भद.व.७।

रक्तराजालुकम्। क्ली। रक्तवर्णालुकभेदे। एतच्च किञ्चिदुष्णम् आग्नेयं वातकफहरञ्च। द्रव्यगुणः।

रक्तराजिः (जी)। स्त्री। सर्षपिकानामवायव्यकीटविशेषे। सु.कल्प.८अ.।

रक्तरेणुः। पुं। सिन्दूरे। भा.। पलाशकलिकायां। मे.। पुन्नागवृक्षे। रा.नि.व.१०।

रक्तरेणुका। स्त्री। पलाशकलिकायाम्। पलाशकुँड़ि। श.मा.।

रक्तरैवतकः। पुं। द्वीपान्तरखर्जूरीवृक्षे। रा.नि.व.११।

रक्तरोहितकः। पुं। (Rheum wightii.) रक्तरोड़ा। हिं रक्तरोहिड़ा।

रक्तलशुनः। पुं। रक्तरसोने। लाल रशुन। रा.नि.व.७।

रक्तला। स्त्री। काकादन्यां। कुँच गाछ। मूर्व्वालतायाम्। रा.नि.व.३।

रक्तलोचनः। पुं। कपोते। हे.च.। भा.।

रक्तलोध्रः। पुं। रक्तवर्णलोध्रवृक्षे।

रक्तवटी। स्त्री। मसूरिकायां। वसन्त। चिका.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तवरटी। स्त्री। मसूरिकायाम्। वसन्त। जटा.।

रक्तवर्गः। पुं। दाड़िमकिंशुककलाशाहरिद्रादारुहरिद्राकुसुम्भपुष्पसञ्जिष्ठावस्त्रेषु। "दाड़िमं किंशुकं लाक्षा वस्त्रञ्च निगद्यते। कुसुम्भपुष्पं मञ्जिष्ठा इत्येते रक्तवर्गकाः॥" रा.नि.व.२२।

रक्तवर्णः। पुं। इन्द्रगोपकीटे। लाल आषाढ़े पोका। रा.नि.व.१९। गोमेदमणौ। प्रवाले। कम्पिल्लके। वै.निघ.।

रक्तवर्त्तकः। पुं। विष्किरपक्षिविशेषे। लाल बटेर। च.सू.२७अ.।

रक्तवर्म्मा। पुं। कुक्कुटे। वै.निघ.।

रक्तवर्द्धनः। पुं। वार्त्ताकौ। श.च.।

रक्तवर्षाभूः। स्त्री। रक्तपुनर्नवायाम्। गदापूर्णा। रा.नि.व.५।

रक्तवल्ली। स्त्री। पीतपुष्पदण्डोत्पलौ। र.मा.। मञ्जिष्ठायां। नलुकायाम्। वै.निघ.।

रक्तवातः। पुं। वातरक्तनामरोगविशेषे। यो रोगः रक्तवस्त्रप्रवालहरणादुत्पद्यते। निष्कृतिश्च यस्मात् पद्मरागसहितं सवस्त्रं महिषं दानाद्भवति। "रक्तवस्त्रप्रवालानां हारो स्याद्रक्तवातवान्। सवस्त्रां महिषीं दद्यात् पद्मरागसमन्विताम्॥" कर्म्मविपाकः। नारिकेलमूलं छागीदुग्धेन पीतं वातरक्तं नश्यति। पुराणम्। See वातरक्तः।

रक्तवारिजम्। क्ली। कोकनदे। रक्तपद्म। रा.नि.व.१०।

रक्तवास्तुकः। पुं। शोणवास्तुकशाके। लाल बेतो शाक। वै.निघ.।

रक्तविकारः। पुं। रक्तजरोगे। निदा.।

रक्तविद्रधिः। पुं। रक्तजन्यविद्रधौ। लक्षणं —"कृष्णस्फोटावृतः श्यावः तीव्रदाहरुजाकरः। पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते॥" मा.नि.

रक्तविद्रुमः। पुं। प्रवाले।

रक्तवृन्ताकः। पुं। पुनर्नवायाम्। वै.निघ.।

रक्तवृन्ता। स्त्री। शेफालिकावृक्षे। शिउलि गाछ। प.मु.।

रक्तवेतसम्। क्ली। कम्पिल्लके। कमलागुँड़ि। वै.निघ.।

रक्तशालिः। पुं, स्त्री। (Oriza sativa.) रक्तधान्ये। दादखानि मिहि चाउल। प.मु.। तं एरंनिवर्णंगलधान्यमु। तत्पर्य्यायाः —तामशालिः शोणशालिः लोहितः। गुणाः—सुमधुरः लघुः स्निग्धः बलकरः रुचिकृद्दीपनः मुखजाड्यहरः पथ्यः। सर्व्वरोगघ्नः रुच्यः पित्तदाहवातरक्तघ्नः। रा.नि.व.१६। विदोषघ्नः चक्षुष्यः गुरुलः मूत्रलः तृष्णाघ्नः बल्यः स्वर्य्यः हृद्यः। राज.। विदोषघ्नी चक्षुष्या मूत्ररोगहा। अवि.१५अ.। वा.सू.६अ.। "रक्तो महान् सकलमः।" च.द.ज्व.चि.। "पेयां वा रक्तशालीनां पार्श्ववस्तिशिरोरुजि।" तन्मण्डगुणाः—रक्तशाल्युद्भवं मण्डं मधुरं ग्राहि शीतलं। प्रमेहानश्मरीं हन्ति वातलं पित्तहृद्धरम्॥" अवि. १२अ.।

रक्तशालुकः (का)। पुं, स्त्री। रक्तकमलकन्दे। रक्तपद्मेर गेँड़। वै.निघ.।

रक्तशाल्मलिः। पुं। रक्तपुष्पशाल्मलिवृक्षे। रक्तशिमूल। वै.निघ.।

रक्तशासनम्। क्ली। सिन्दूरे। हारा.।

रक्तशिग्रुः। पुं। रक्तशोभाञ्जनवृक्षे। लाल सजिना गाछ। मं रक्तहेगुया। कं केंपिनेवनुग्गि। तत्पर्य्यायाः,—कृष्णजीरकः गर्भपातकः रक्तकः मधुरः बहुलच्छदः सुगन्धः केशरी सिंहः सृगारिः। गुणाः—सहावीर्य्यः मधुरः सारकः रसायनः शोफाध्मानवातघ्नः पित्तश्लेष्मघ्नश्च। रा.नि.व.७।

रक्तशिम्बी। स्त्री। शिम्बीभेदे। लाल शिम्।

रक्तशीर्षकः। पुं। लवणखोड्याम्। प.मु.। सारसपक्षिणि। च.सू.२७अ.।

रक्तशृङ्गिकम्। क्ली। विषे। रा.नि.व.६।

रक्तशेखरः। पुं। पुन्नागवृक्षे। र.मा.।

रक्तश्रीखण्डकम्। क्ली। रक्तचन्दने। वै. निघ.२भ.वा.व्या.चि.महारास्नादौ।

रक्तश्वेतः। पुं। तदर्णमहाविषवृश्चिकभेदे। सु. कल्प ८अ.।

रक्तष्ठीविसन्निपातः। पुं। स्वनामख्यातसन्निपातविशेषे। तस्य लक्षणं—"रक्तष्ठीवी ज्वरवमिरुषामोहशूलातिसारहिक्काध्मानभ्रमशिरोदवधुश्वाससञ्जाप्रणाशः। श्यामा रक्ताधिकतररसना मण्डलोत्थानरूपा रक्तष्ठीवी निगदित इह प्राणहन्ता प्रसिद्धः॥" निदा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तसंज्ञम्। क्ली। कुङ्कुमे। त्रिका.।

रक्तसङ्कोचपिशुनम्। क्ली। कुङ्कुमे। त्रिका.।

रक्तसंवरणम्। क्ली। कृष्णाञ्जने। वै.निघ.।

रक्तसन्दंशिका। स्त्री। जलौकायाम्। जोंक। रा.नि.व.१९।

रक्तसन्ध्यकम्। क्ली। रक्तकह्लारे। रक्तकमल अम.। रक्तोत्पले। वै.निघ.।

रक्तसरोरुहम्। क्ली। रक्तपद्मे। अम.।

रक्तसर्षपः। पुं। (Brassica nigra.) रक्तवर्णसर्षपे। राई वा रक्तसरिषा। हि लालिराइ, माकड़ाराइ। बं. महुरी। कं सासिराइ। ते अवली। ता. कड़ुगो। तत्पर्य्यायाः,—राजी आसुरी रक्तिका रक्तसर्षपः तीक्ष्णगन्धा मधुलिका क्षवः क्षवकः क्षुतकः। गुणाः—कटुः तिक्तः उष्णः वातघ्नः श्लेष्मशूलघ्नः दाहपित्तकरः कफगुल्मकृमिव्रणघ्नश्च। रा.नि.व.१६। तत्तैलगुणाः,—तीक्ष्णं शिशिरं केश्यं कण्ड्घ्नं त्वग्दोषनाशि वातादिदोषनाशकञ्च। पत्रगुणाः,—कटु स्वादु उष्णं अग्निदीपनं क्रिमिवातकफकण्ठास्यहरञ्च।

रक्तसहा (ह्या)। स्त्री, पुं। रक्ताह्वानपुष्पवृक्षे। रक्तपुष्पझाँटी गाछ। रा.नि.व.१०।

रक्तसारम्। क्ली। रक्तचन्दने। प.मु.। रा.नि.व.१२। रस.र.च.द.मेह.चि.न्यग्रोधादिपञ्चके। पत्तङ्गचन्दने। वकमकाष्ठे। प.मु.। पुं। अम्लवेतसे। रा.नि.व.६। रक्तखदिरवृक्षे। रा.नि.व.८। सु.चि.९अ.। रक्तबीजासनवृक्षे। रा.नि.व.९। रक्तशिंशपायाम्। वाराहीकन्दे। वै.निघ.।

रक्तसूः। स्त्री। शरीरस्थरसधातौ। रसधातु रा.नि.व.१८।

रक्तसौगन्धिकम्। क्ली। रक्तकह्लारपुष्पे। जटा.।

रक्तस्थज्वरः। पुं। रक्तगतज्वरविशेषे। लक्षणं —"रक्तनिष्ठीवनं दाहो मोहस्कुर्दनविभ्रमौ। प्रलापः पिड़का दृष्टा रक्तप्राप्ते ज्वरे नृणाम्॥" मा.नि.।

रक्तस्रावः। पुं। अम्लवेतसे। जटा.। नेत्रसन्धिगतरोगे। निदा.। अश्वस्य रक्तजन्यनेत्ररोगे। लक्षणं यथा—"रक्ताभिष्यन्दिनोऽश्वस्य नेत्रं भवति लोहितं। सर्व्वं विभागमई वा स्रावरुग्दाहपीड़ितम्। रक्तस्रावोऽथवा यस्य वाजिनो लोचनाङ्गवेत्। रक्तस्रावाभिधानन्तु नेत्ररोगं तमादिशेत्॥" ज.द. ३०अ.।

रक्तस्रुतिः। स्त्री। रक्तस्रावे। व्याक.।

रक्तहरः। पुं। भल्लातके। भाँलया। वै.निघ.। त्रि। रक्तघ्नद्रव्यमात्रे।

रक्ता। स्त्री। गुञ्जायाम्। कूँच। रा.नि.व.३। सु. चि.३७अ., सु.कल्प.५अ.। लाक्षायां। मञ्जिष्ठायां। रा.नि.व.६।२३। शिम्बीभेदे। प.मु.। उष्ट्रकाण्डीनामपुष्पवृक्षे। रा.नि.व.१०। लक्ष्मणाकन्दे। वचायाम्। वै.निघ.। रक्तवर्णशतपद्मे। लाल केन्नूई। सु.कल्प.८अ.। कृच्छ्रसाध्यलूताविशेषे। कर्णशिराभेदे। वा.उ.१अ.।

रक्ताका(ङ्क)रः। पुं, क्ली। प्रवालद्रुमे। पलाश गाछ। रा.नि.व.१३।

रक्ताक्षम्। क्ली। रक्तचन्दने। जटा.। [निघ.।

रक्ताख्यातः (कः)। पुं। रक्तापामार्गे। वै.

रक्ताङ्गम्। क्ली। रक्तचन्दने। प.मु.। कुङ्कुमे। मे.। पुं। कम्पिल्लके। कमलागुँड़ि। प.मु.। प्रवालतरौ। रा.नि.व.१३। रक्तकुणे। छारपोका। रा.नि.व.१९।

रक्ताङ्गी। स्त्री। कटुकायां। कटकी। रा.नि. व.६। मञ्जिष्ठायाम्। भा.। जीवन्त्याम्। मे.। नलकायाम्। वै.निघ.।

रक्ताञ्जना। स्त्री। रक्ताञ्जनिकायाम्। रक्ताञ्जनिका। च.द.चारतैले।

रक्ताढ़की। स्त्री। रक्तपुष्पाढ़क्यां। लाल रहर। गुणाः—रूक्षा वल्या पित्ततापादिहरी च। रा.नि.व.१६।

रक्ताण्डः। पुं। अश्वस्य अण्डरोगभेदे। ज.द. ५०अ। See अण्डस्कन्दः।

रक्तातिसारः। पुं। सरक्तातिसाररोगे। तस्य सम्प्राप्तिः—"पित्तक्लान्ति यदात्यर्थं द्रव्याण्यम्लाति पैत्तिके। तदोपजायते ऽभीक्ष्णं रक्तातीसार उल्बणः॥" मा.नि.।

रक्ताधारः। पुं। चर्म्मणि। रा.नि.व.१८।

रक्तापराजिता। स्त्री। रक्तपुष्पापराजितायाम्।

रक्तापहम् (हा)। क्ली, स्त्री। बोलनामगन्धद्रव्ये। खूनथाराऽपि। रा.नि.व.६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तापामार्गः। पुं। स्वनामख्यातवृक्षे। लाल आपांङ्। हिं लालचिरचिरा। मं रक्तलटजीरा। कं वड्डाआघाड़ा। तें कैम्पियुत्तरणि। तत्पर्य्यायाः,—शिरीषपत्रफलः क्षुद्रापामार्गः आघट्टकः दुग्धिनिका रक्तविट् कल्यपत्निका। गुणाः—शीतः कटुः कफवातघ्नः व्रणकण्डूविषघ्नः संग्राही वान्तिघ्नश्च। रा.नि.व.४। वातविष्टम्भी कफकृत् शीतलः। भा.पू.१भ.।

रक्ताब्ज(क)म्। क्ली। रक्तकमले। वै.निघ.।

रक्ताभः (भा)। पुं, स्त्री। रक्तजपायाम्। लाल जवा। इन्द्रगोपकीटे। वै.निघ.।

रक्ताभिष्यन्दः। पुं। सर्व्वगतनेत्ररोगभेदे। यथा—"रक्ताश्रुराजी दृषीक-शुक्लमण्डलदर्शनम्। रक्तस्यन्दिन नयनं सपित्तस्यन्दलक्षणम्॥" वा.उ. १५अ.।

रक्ताभ्रम्। क्ली। रक्तवर्णाभ्रके। लाल अभ्र। रा.नि.व.१३।

रक्ताम्भोजम्। क्ली। कोकनदे। रक्तकमल। रा.नि.व.१०।

रक्ताम्रः। पुं। कीशमद्रुमे। जलपाई। रा.नि.व.११।

रक्ताम्लातकः } पुं। रक्तभिण्टीवृक्षे। लाल-
रक्ताम्लानः } बोंटी फूलेर गाछ। हिं लाल-कट्सरैया। मं वाणभाड़। कं वणदगिडु। तत्पर्य्यायाः,—रक्तप्रसवः रक्तसहः रागप्रसवः रागालिङ्गनकारकः अपरिम्लानः कुरुवकः वधूत्सवप्रसवः सुभगः भ्रमरानन्दः। गुणाः—उष्णः कटुः वातामयश्लीपघ्नः ज्वरघ्नः आध्मानशूलकासश्वासघ्नः वर्ण्यश्च। रा.नि.व.१०।

रक्तारिः। पुं। महाराष्ट्रीवृक्षे। प.मु.।

रक्तार्कः। पुं। अरुणार्कवृक्षे। लाल आकन्द गाछ। तत्पर्य्यायाः,—विश्वोरः महापुष्पो रूपिका आदित्यपुष्पिका दिव्यपुष्पिका। गुणाः—"अर्कक्षयश्लेष्मवातकुष्ठकण्डूव्रणान्। निहन्ति श्लीहगुल्मार्शो यकृत्प्लीहोदरकृमीन्॥" भद.व.१। रा.नि.व.१०।

रक्तार्त्तिः। स्त्री। शोणितामये। रा.नि.व.२०।

रक्तार्म्म (न्)। क्ली। नेत्ररोगभेदे। लक्षणं यथा—"पद्माभं मृदु रक्तार्म्म यन्मांसं चीयते सिते।" मा.नि.।

रक्तार्व्वदः। पुं। गुकरोगे। रक्तजन्यार्व्वदरोगे। See अर्व्वदः।

रक्तार्शः। क्ली। रक्तजन्यगुदजरोगे। लक्षणं—"तनु चारुणवर्णञ्च फेनिलञ्चासृगर्शसाम्। कण्डूगुदशूलञ्च दौर्ब्बल्यं यदि चाधिकम्। तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम्। शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलम्। यदार्शसां घनञ्चासृक् तन्मत्स्यास्रु पिच्छिलम्। गुदं सपिच्छं स्तिमितं गुरु स्निग्धञ्च कोरणम्। श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः॥" मा.नि.।

रक्ता(लता)। स्त्री। मञ्जिष्ठायां। सु.कल्प.५अ.।

रक्तालुः। पुं। (Dioscorea sativa.) Common Yam. रक्तपिण्डालुके। लाल पिण्ड आलू। हिं रक्तारु, रुनरुा, रक्तालु। ता. यामस्कोल्लं। तत्पर्य्यायाः,—रक्तकन्दः रक्तपिण्डकः रक्तपिण्डालुः लोहितः लोहितालुः। गुणाः—शीतलः मधुरः अम्लः भ्रमपित्त-दाहघ्नः हृद्यः बलपुष्टिकरः गुरुश्च। रा.नि.व.७। शालिधान्यविशेषे। प.मु। [३अ.।

रक्तावसेचनम्। क्ली। रक्तमोक्षणे। च.चि.

रक्ताश्वमारपुष्पम्। क्ली। रक्तकरवीरपुष्पे, रक्तकरवी फूल। सि.यो.विषमज्वरे। "रक्ताश्वमारपुष्पञ्च" [क्षते शृतके।

रक्ताश्वारिः। पुं। रक्तकरवीरवृक्षे। रावण-

रक्तास्रावः। पुं। रक्तजनेत्रसन्धिरोगे। लक्षणं यथा—"रक्तास्रावः शोणितोल्वः सरक्तं कीर्णं नाल्यं सस्ववेन्नातिसान्द्रम्।" सु.उ.२अ.।

रक्ताक्षः। पुं। महिषे। पारावते। चकोरे। मे.। सारसपक्षिणि। रा.नि.व.१९। रोहितमत्स्ये।

रक्ताक्षी। स्त्री। गुञ्जागुलौ। वै.निघ.२भ.असा.चि.।

रक्तिः। पुं। अष्टसर्षपमाने। च.कल्प १२अ.।

रक्तिका। स्त्री। गुञ्जायाम्। कुँच। र.मा। रा.नि.व३। रालिकायाम्। रा.नि.व.१६।

रक्तेक्षणः। पुं। कपोते। पाण्डरा।

रक्तेक्षुः। पुं। रक्तदण्डेक्षौ। काजला आक्। तत्पर्य्यायाः,—सूक्ष्मपत्रः शोणः उत्कटः मधुरः वृक्षमूलः लोहितः लोहितेक्षुः। गुणाः—पाके मधुरः शीतलः मृदुः पित्तदाहहरः हृद्यः तेजोबलवर्द्धनश्च। रा.नि.व.१४।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तोत्पलशर्करा। स्त्री। रक्तोत्पलकृतशर्करायाम्। गुणाः—पित्तघ्नी। रा.नि.व.१४।

रक्तेरण्डः। पुं। रक्तवर्णेरण्डवृक्षे। लाल भेरेण्डा। तत्पर्य्यायाः,—व्याघ्रः व्याघ्रतल हस्तिकर्णः कवुः ऊरुवुकः नागकर्णः चञ्चुः उत्तानपत्रकः करपर्णः पाचनः स्निग्धः रक्तकः चिरबाल्यः क्लैरेण्डः। अयं प्रायेण श्वेतवर्णः। विशेषस्तु श्लीपघ्नः लघुः अरोचकघ्नः कफश्वासघ्नः ज्वरघ्नः रक्तपाण्डुभ्रान्तिनाशनश्च। रा.नि.व.८। "रक्तेरण्डकस्तुबरी रसे कटुर्लघुः स्मृतः। तिक्तो वातकफश्वासकासकृम्यग्निबन्धहा। रक्तदोषपाण्डुरुजाभ्रान्त्यरोचकनाशनः। प्रायस्त्वन्ये गुणाश्चास्य श्वेतवच्च समीरिताः॥" वै.निघ.।

रक्तेर्वारुः। पुं। इन्द्रवारुणीलतायाम्। रा.नि.व.३।

रक्तोच्चटा। स्त्री। श्वेतगन्धायाम्। भा.।

रक्तोत्पलम्। क्ली। लघुरक्तपद्मे। कोकनदे। प.मु.। रा.नि.व.१०। सु.सू.३८अ। गैरिके। पुं, स्त्री (ला)। शालूकलीढचे। रा.नि.व.८।

रक्तोदरः। पुं। रोहितमत्स्ये। महाविष-मध्यविष-वृश्चिकविशेषे। "जन्मैतेषां सर्पकीयात् पतिष्टं दंष्ट्रेभ्यो वा घातितानां विषेण। एभिर्दष्टे सर्पवेगप्रवृत्तिः स्फोटोत्पत्तिर्भ्रान्तिदाहौ ज्वरश्च॥ खेभ्यः क्लेदः शोणितस्यापि तोदः तस्मात् प्राणैस्त्यज्यते शीघ्रमेव॥" सु.कल्प.८अ.।

रक्तोपलम्। क्ली। गिरिमल्लिकायाम्। हारा.।

रक्तोदनम्। क्ली। रक्तशाल्यादिभक्ते। अलक्तकरञ्जितभक्ते। च.द.बाल.चि.।

रघुनाथः। पुं। वैद्यविलासनामग्रन्थकारे।

रङ्कुः। पुं। मत्स्यरङ्के। वै.निघ.। शबलपृष्ठहरिणविशेषे। रा.नि.व.१९।

रङ्गम्। क्ली। रञ्जधातौ। घञ्। प.मु.। रा.नि.व.१३। पुं। टङ्गणे। सोहागा। रा.नि.व.९। खदिरसारे। रा.नि.व.८।

रङ्गकम्। क्ली। रक्ते।

रङ्गकाष्ठम्। क्ली। पत्तङ्गे। बकमकाष्ठे। रा.नि.व.१२।

रङ्गजम्। क्ली। सिन्दूरे। र.मा.।

रङ्गदः। पुं। खदिरसारे। रा.नि.व.८। टङ्गणचारे। रा.नि.व.९।

रङ्गदन्तिका। स्त्री। नागवल्लीलतायाम्। वै.निघ.। [भा.।

रङ्गदा। स्त्री। स्फटिकार्य्याम्। फट्‌किरि।

रङ्गदायकम्। क्ली। कङ्कुष्ठे। रा.नि.व.१३।

रङ्गदृढ़ा। स्त्री। स्फटिकार्य्याम्। रा.नि.व.१३।

रङ्गपत्री। स्त्री। नीलीवृक्षे। नील गाछ। रा.नि.व.४।

रङ्गपुष्पी। स्त्री। नीलीवृक्षे। रा.नि.व.४। जवावृक्षे। वै.निघ.।

रङ्गबीजम्। क्ली। कार्पासे। त्रिका.।

रङ्गमाणिक्यम्। क्ली। माणिक्यरत्ने। रा.नि.व.१३।

रङ्गमाता (त्का)। स्त्री। लाक्षायाम्। लाक्षा। रा.नि.व.९२३। त्रिका.।

रङ्गलता। स्त्री। (Helicteres Isora.) आवर्त्तकीलतायाम्। आएमोड़ा। हिं मरोर फली मेन्दु, कपासी। तें गुवादरर। वम्. मेरादफिं कैवान्। तत्पर्य्यायाः,—कल्याणी हेमपत्री रेचनी खर्परिका। गुणाः—अग्निमान्द्यरक्तपित्तप्लीहोदर-वह्निगुदाजीर्णविषमज्वर-पाण्डुकामला शूलघ्नी। कैचित्।

रङ्गलासिनी। स्त्री। शृगालिकावृक्षे। शिउलि फूलेर गाछ। शृ.च.।

रङ्गवीजम्। क्ली। कार्पासे।

रङ्गसट्टम्। क्ली। यष्टौ। दण्डा। भा.।

रङ्गसारः। पुं। टङ्गणसारे। सोहागार खई। वै.निघ.।

रङ्गा। स्त्री। जवावृक्षे। जवा गाछ। वै.निघ.।

रङ्गाङ्गा। स्त्री। फटिकारिकायाम्। फट्‌किरि। रा.नि.व.१३।

रङ्गारिः। पुं। करवीरवृक्षे। करवी गाछ। र.मा.।

रङ्गिणी। स्त्री। शतमूल्याम्। जटा.। कैवर्त्तिकायाम् केवटीभूता। रा.नि.व.९। हरिद्रायाम्। वै.निघ.।

रङ्गेष्टालुकम्। क्ली। स्वनामख्याते आलौ। राङा आलू। त्रिका.।

रजः। पुं। पर्पटके। क्षेत्पापड़ा। भा.म.१

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ.चित्तभ्रम.ज्व.चि.। "पथ्यापित्तरसाभिनकरजः।" भा.म.१भ.ज्वरे काम.चि.। "कलिङ्गदुफल रज.।' वै.निघ.दुर्बलज्व.चि.ज्ञानोदयरसे। क्ली। स्त्रीकुसुमे। श.र.

रजः (स्)। पुं, क्ली। स्त्रीपुष्पे। अमरदत्तः। श.र.। "पाचिताः पित्तताप्तेन रसाद्या धातवः क्रमात्। शुक्रान्तं यान्ति मासेन तथा स्त्रीणां रजो भवेत॥" शा.१.अ.। रुषणे। उद्रके। कालुष्ये। मतिभ्रमे। "रजोरुषणमुद्रेकः कालुष्यं मतिविभ्रमः।" रा.नि.व.२१। परागे। मे.।

रजःशयः। पुं। कुक्कुरे। श.मा.।

रजःसारम्। क्ली। कर्पूरे। नकुल.१२अ.।

रजःसारथिः। पुं। वायौ।

रजतम्। क्ली। रौप्ये। अम.। स्वर्णे। त्रि.च्व.चि.ज्वरकुञ्जरपारीन्द्रस्त्र। हस्तिदन्ते। ह.च.। शुक्लवर्णे। रक्तवर्णे। रक्ते।

रजतप्रभः। पुं। सोमलतायाम्। सोमलता। सु.चि.२९अ.।

रजतोपलम्। क्ली। रौप्यमाक्षिके। वै.निघ.।

रजनकः। पु। कम्पिल्लके। कमलागुँड़ि। वा.सू.१५अ.व्याभाषि.। "शिखरिरजनकच्छिन्नरूक्षाः करञ्जाः।" [अ.टी.।

रजनिः। स्त्री। वास्तुके। रावी। हरिद्रायाम्।

रजनिपुष्पम्। क्ली। हरिद्रापुष्पे। हलुदफूल। रस.र.नामार्ज्जुनचूर्णे।

रजनी। स्त्री। हरिद्रायाम्। रा.नि.व.६। सि.यो.पाण्डु.चि.। सु.सू.३८अ.क्षीरपक्वके। यतुकालतायाम्। रा.नि.व.३। नीलिन्याम्। नील। मे.। दारुहरिद्रायाम्। वास्तुके। वै.निघ.। रात्र्याम्। अम.।

रजनीगन्धा। स्त्री। (Polianthes tuberosa.) Tuberose. स्वनामख्यातपुष्पवृक्षे। वृजनीगंध। हिं गुलशब्बू। भूरिप्र.।

रजनीजलम्। क्ली। नीहारे। धारा.।

रजनीद्वयम्। क्ली। हरिद्राद्वये, हरिद्रादारुद्वये। च.द.विषमज्वरे।

रजनीपुष्पः। पुं। पूतिकरञ्जे। रा.नि.व.९।

रजनीहासा। स्त्री। शेफालिकापुष्पवृक्षे। श.र.।

रजस्वानुः। पुं। मनसि, हृदये। उणा.

रजस्वणः। पुं। पीतधुस्तूरके। वै.निघ.।

रजस्वलः। पुं। महिषे। विका.। पारदे। वै.निघ.। स्त्री ला। आर्तवजस्कायाम् स्त्रियि। रा.नि.व.१८। तत्स्वरूपं यथा—"द्वादशाब्दात्परतो दूर्ध्वमापञ्चाशत्समाः स्त्रियः। सासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत्। आर्त्तवस्रावदिवसाद्दुतः षोड़शरात्रयः। गर्भग्रहणयोग्यास्तु स एव समयः स्मृतः॥" रजःस्वलाकृत्यं— "आर्त्तवस्रावदिवसादहिंसाब्रह्मचारिणी। शयीत दर्भशय्यायां पश्येदपि पतिं न च॥" इत्यादि। भ.। ऋतुज्ञानानन्तरमादौ पतिमेव पश्येत्।

रज्जुः। पु। कैशविख्याते। दामनि। दड़ि। मांसरज्ज्वाम्। "पृष्ठवंशस्थोभयत्र मेदस्थौ मांसरज्जवः। चतस्रो मांसपेशीनां बन्धन तत् प्रयोजनम्॥" भा.।

रज्जकः। पुं। कम्पिल्लके। कमलागुँड़ि। रा.नि.व.१३। भल्लातकवृक्षे। वै.निघ.। तन्नामकजठराग्नौ। तस्य स्थान यकृतप्लीहामेध्यम्। स एवाहाररस रञ्जयति। सु.सू.२१अ.। क्ली। हिङ्गुले, हिङ्गुलविशेषे। रा.नि.व.१३। स्त्री (का)। नखरञ्जिन्याम्। मेहँदि गाछ। वै.निघ.।

रज्जनम्। क्ली। रक्तचन्दनभेदे। वकम काठ। र.मा.। रक्तचन्दने। मदन.व.१। हिङ्गुले। रा.नि.व.१३। स्वर्णे। जातीफले। वै.निघ.। पारदरञ्जनद्रव्ये। तारकर्म्मण्यस्य न तथा प्रयोगो दृश्यते। "केवलं निर्म्मलं ताम्रं वापितं रञ्जनेन तु। कुरुते चिगुणं जौर्ण्णं लाचारसनिभं रसम्॥" रस.चि.३अ.। पुं। सुञ्जतरौ। मूज। रा.नि.व.८। कम्पिल्लके। कमलागुँड़ि। वै.निघ.।

रज्जनकः। पुं। कट्फलवृक्षे। रा.नि.व.९।

रज्जनकेशी। स्त्री। नीलीवृक्षे। वै.निघ.।

रज्जनगणः। पुं। रञ्जनद्रव्यवर्गे। "चतुर्विधा हरिद्रा स्यात् पत्तङ्गं रक्तचन्दनं। नीलीकुसुम्भसञ्जिष्ठालाक्षामहिष्विंशुकम्॥" रा.नि.व.९।

रज्जनद्रुः (मः)। पुं। अच्छुकवृक्षे। आछ्फूलेर गाछ। श.चि.। धूनकवृक्षे। वै.निघ.।

रज्जु(ज्जि)नी। स्त्री। गुण्डारोचनिकायाम्। श.च.। नागवल्लीलतायाम्। वै.निघ.। नौल्याम्। रा.नि.व.४। जन्तुकालतायाम्। रा.नि.व.३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जिष्ठायाम्। शेफालिकायाम्। मे। हरिद्रायाम्। रा.नि.व.६। पर्पट्याम्। रा.नि.व.१३।

रक्तनीपुष्पः। पुं। पूतिकरञ्जे। नाटाकरञ्ज। रा.नि.व.९।

रणः। पुं। दुन्दुभिभेदे। दुन्दुभी। वै.निघ.।

रणघण्टासमाकृतिः। पुं। महाशणी। वै.निघ.।

रणपक्षी (इन्)। पुं। रणगर्भे। श्येन पाखी। वै.निघ.।

रणप्रियम्। क्ली। उशीरे। रा.नि.व.१२। पुं। श्येनपक्षिणि। रा.नि.व.१९।

रणमुष्टिः। पुं। विषमुष्टिभेदे। कुचिला इति भाषा। रा.नि.व.४।

रणमूर्द्धजा। स्त्री। कर्कटशृङ्ग्याम्। रा.नि.व.६।

रणरणः। पुं। भ्रमरे। मशके। मशा। त्रिका.। (कः) उत्कण्ठायाम्। हे.च.।

रणालङ्करणः। पुं। कङ्कपक्षिणि। काँक् पाखी। रा.नि.व.१९।

रण्डकः। पुं। अफलवृक्षे। रेंड़ा गाछ। श.च.।

रण्डा। स्त्री। मूषिककर्ण्याम्। अम.। प्रवृद्धत् सीमनाथरसे।

रतम्। क्ली। मैथुने। अम.। गुह्ये। मे.।

रतकोलः। पुं। कुक्कुरे। हे.च.।

रतज्वरः। पुं। काके। त्रिका.।

रतनारीचः। पुं। कुक्कुरे। वै.निघ.।

रतनिधिः। पुं। खञ्जनपक्षिणि। श.र.।

रतव्रणः। पुं। कुक्कुरे। त्रिका.। मे.।

रतशायी (इन्)। पुं। कुक्कुरे। हे.च.।

रताङ्गी। स्त्री। कुञ्झटिकायाम्। त्रिका.।

रतान्दुकः। पुं। कुक्कुरे। हे.च.।

रतामर्दः। पुं। कुक्कुरे। श.मा.।

रतिः। स्त्री। प्रीत्याम्। सुरते। गुह्यदेशे। मे.।

रतिकुहरम्। क्ली। भगे। त्रिका.।

रतिक्रिया। स्त्री। मैथुने।

रतिगृहम्। क्ली। भगे। त्रिका.।

रतिचर्य्या। स्त्री। स्त्रीसेवायाम्। वा.उ.४०अ.।

रतिमन्दिरम्। क्ली। योनौ। जटा.।

रतिरथः। पुं। नखे।

रतिलक्षणम्। क्ली। रतिक्रियायाम्।

रतिवल्लभमोदकः। पुं। वाजीकरणाधिकारे औषधम्। पाठः—'शक्राशनस्य बीजानि चूर्णितानि पलाष्टकं। कुड़वं हविषश्चैव खण्डप्रस्थं प्रगृह्य च। शतपुत्रीरसप्रस्थं प्रस्थं शक्राशनस्य च। गव्यमाजं पयः प्रस्थं दत्त्वा प्रस्थद्वयं पचेत्। धात्रीडिम्बीरवं सुस्तं त्वगेलापत्रकेशरं। आत्मगुप्ता चातिबला तालाङ्कुरकशेरुकं। शृङ्गाटकं विकटकं धान्याकं चित्रकं तथा। पथ्या द्राक्षा च काकोल्यौ खर्ज्जूरं क्षुरकं तथा। कटुका मधुकं कुष्ठं लवङ्गं सारसैन्धवं। यमानिका चाजमोदा जीवन्ती गजपिप्पली। प्रत्येकं कर्षमेकञ्च चूर्णितानि शुभानि च। मधुनः कुड़वार्द्धञ्च पाकशेषे तथा क्षिपेत्। मृगाण्डजं सकर्पूरं यथालाभं विनिक्षिपेत्। रतिवल्लभनामायं सेव्यमानो रसायनः॥" सिद्धिबीजचूर्ण ८ प. (मतान्तरे ५ प.) घृत ४ प. शर्करा २ श. शतावरीरसः गव्यदुग्धं छागदुग्धं प्र. ४ श.। प्रक्षेपः—आमलकी जीरकं कृष्णजीरकं सुस्ता त्वक् एला तेजपत्रं नागकेशरं कपिकच्छूबीजं (आलाकुशीर बीज) गोरक्षतण्डुला। (गोरक्षचाकुलिया) तालास्थिशस्यं कशेरुकं शृङ्गाटकं विकटु धान्यकं चित्रकं (मतान्तरे अभं वङ्गञ्च) हरीतकी द्राक्षा काकोली क्षीरकाकोली पिण्डखर्ज्जूरं कोकिलाक्षबीजं कटुकी यष्टिमधु कुष्ठ लवङ्गं सैन्धवं यमानी वनयमानी जीवन्ती गजपिप्पली प्र. २ तो. मधु २ प.। रस.र.भैष.।

रतिसत्वरा। स्त्री। पृक्कायाम्। पिड़िंग शाक। श.च.।

रतिसाधनम्। क्ली। शिश्ने। वै.निघ.।

रती। स्त्री। रक्तगुञ्जायाम्। वै.निघ.।

रताहः। पुं। कोकिले। श.मा.।

रत्नम्। क्ली। हीरके। रा.नि.व.१३। मुक्तादौ। रत्नानि नव—रत्नं गारुत्मतं (पान्ना) पुष्परागः माणिक्यं पद्मरागः इन्द्रनीलः मरकतः गोमेदः (वैदूर्य्यं) मौक्तिकं विद्रुमश्चेति विष्णुधर्म्मोत्तरे। तन्निरुक्तिः—"धनार्थिनो जनाः सर्व्वे रमन्तेऽस्मिन्नतीव यत्। ततो रत्नमिति प्रोक्तम्.....॥"

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भा.पू. १भ. रत्नव. रत्नसाधारणगुणाः—"रत्नानि भक्षितानि स्युर्मधुराणि सराणि च। चक्षुष्याणि च शीतानि विषघ्नानि घृतानि च। मङ्गल्यानि मनोज्ञानि ग्रहदोषहराणि च।" इति। माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगोः, माहेयस्य तु विद्रुमो निगदितः सौम्यस्य गारुत्मतम्। दैवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शनेः, नीलं निर्म्मलमन्ययोर्निगदिते गोमेदवैदूर्य्यके॥" भा.। तस्य धारणं प्रीतिवर्द्धनम्। सु.चि.२४अ.। "धन्यं साङ्ग्राम्यमायुष्यं भासद्दासनसूदनं। हर्षणं काम्यमोजस्यं रत्नाभरणधारणम्॥" राज.३प.।

रत्नकन्दलः। पुं। प्रवाले। पलां। श.र.।

रत्नगर्भपोट्टलिरसः। पुं। यक्ष्माधिकारे रसः। पाठः—"रसं वज्रं हेम तारं नागं लौहञ्च ताम्रकम्। तुल्यांशं मरिचं दद्यं सुक्ताविद्रुममाचिकं। शङ्खं तुल्यञ्च तुल्यांशं सप्ताहं चिवकद्रवैः (चार्द्रकद्रवैः) (भैष.)। मर्दयित्वा विचूर्ण्याथ तेन पूर्य्या वराटिकाः। टङ्कणं रविदुग्धेन मुखं लिप्ता निरोधयेत्। शङ्खाख्यौ तां निरुध्याथ सम्यग्गजपुटे पचेत्। आदाय चूर्णयेत् सर्व्वं निर्गुण्ड्या सप्त भावयेत्। आर्द्रकस्य रसः सप्त चिवकस्य च विंशतिः (चिवकस्यैकविंशतिः)। द्रवैर्भाव्यं ततश्चास्य देयं गुञ्जाचतुष्टयम्॥" र.सा. सं.। भैष.।

रत्नगिरिरसः। पुं। ज्वराधिकारे रसः। पाठः—"सूताभ्रस्वर्णताम्राणि गन्धचाङ्गिश्लौहकं। लौहार्द्धं मृतवैक्रान्तं मर्द्दयेद्दृङ्गजैर्द्रवैः। पर्पटीरसवत् पाच्यं चूर्णितं भावयेत् पृथक्। ग्निग्रुवासकनिर्गुण्डी गुडूच्युग्राग्निभृङ्गजैः। चन्द्रामुण्डीजयन्तीभिर्मुनिब्राह्मीषु तिक्तकैः। कन्यायाश्च द्रवैर्भाव्यं विभिर्वारं पृथक् पृथक्। ततो लघुपुटे पाच्यं खाङ्गशीतं समुद्धरेत्। मात्रा दत्तः कणाधान्ययुक्तश्चाभिनवज्वरे॥" रस, अभ्र, स्वर्ण, ताम्र, गन्धक प्रत्येक समान; लौह अर्द्ध भाग; वैक्रान्त लौहेर अर्द्ध भाग; भीमराजरसे माड़िया पर्पटीवत् पाक करिबे। परे सजिनादिर रसे भावना दिया लघुपुटे पाक करिबे। रस.चि.।

रत्नजातिः। स्त्री। श्वेत-रक्त-नील-पीतवर्णैः ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेषु।

रत्ननायकः। पुं। माणिक्ये। रा.नि.व.१२।

रत्ननिधिः। पुं। खञ्जनपक्षिणि। त्रिका.।

रत्नमाला। स्त्री। वैद्यकचिकित्साशास्त्रभेदे।

रत्नमुख्यम्। क्ली। हीरके। हे.च.।

रत्नराट्। पुं। माणिक्ये। रा.नि.व.१३।

रत्नाङ्कः। पुं। प्रवाले। रा.नि.व.१३।

रत्नावली। स्त्री। राधामाधवकृतद्रव्याभिधाने।

रत्निः। पुं, स्त्री। वद्धमुष्टिहस्ते। मुट्ठम हात। अम.।

रत्यङ्गम्। क्ली। योनौ। श.र.।

रथः। पुं। तिनिशवृक्षे। रा.नि.व.९। वेतसवृक्षे। अम.। काये। विश्वः। शकटे। गाड़ि। रथभ्रमणगुणाः—वातकोपनं शरीरदार्ढ्यकरं बल्यम् अग्निवर्द्धनञ्च। राज.।

रथचरणः। पुं। चक्रवाकपक्षिणि। श.र.।

रथद्रुः। पुं। तिनिशवृक्षे। वेतसवृक्षे। अम.।

रथपर्य्यायः। पुं। वेतसतायाम्। श.च.। तिनिशवृक्षे। रा.नि.व.९।

रथवृत्तः। पुं। वृद्धौ। वृद्धि ओषधि। वै.निघ.। तिनिशवृक्षे। अम.।

रथाङ्गः। पुं। चक्रवाकपक्षिणि। अम.।

रथाङ्गाह्वयनामकः। पुं। चक्रवाके। अम.।

रथाङ्गी। स्त्री। वृद्धौ। रा.नि.व.५।

रथाभ्रः। पुं। वेतसवृक्षे। अम.।

रथाभ्रपुष्पः। पुं। वेतसवृक्षे। अम.।

रथावर्त्ता। स्त्री। स्थलपद्मिन्याम्। वै.निघ.।

रधिकः (का)। पुं, स्त्री। तिनिशवृक्षे। सादन गाछ। रा.नि.व.९।

रथी (इन्)। पुं। चक्रवाके। वै.निघ.।

रथ्यः। पुं। अश्वे। अम.।

रदः (नः)। पुं। दन्ते। रा.नि.व.१८।

रदच्छदः। पुं। ओष्ठे। रा.नि.व.१८।

रदद्रुः। पुं। अश्वशाखोटवृक्षे। आस्शाओड़ा।

रदनच्छदः। पुं। ओष्ठे। रा.नि.व.१८।

रदनी (इन्)। पुं। हस्तिनि। हला.।

रदायुधः। पुं। शूकरे।

रदी (इन्)। पुं। हस्तिनि।

रदितम्। क्ली। सर्पदष्टभेदे। सु.कल्प.४अ.।

रन्तिदेवः। पुं। कुक्कुरे। श.र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रन्धनम्। क्ली। पाककरणे। ब्राह्मा। व्याक.।

रन्धितः। वि। पाचिते। क्ली। कृतरन्धनद्रव्ये। ब्राह्मजिनिस। तस्य पात्रान्तरे स्थापनविधिः—भक्तं खपाचे स्थाप्य न पात्रान्तरे, घृत काष्ठायसे पात्रे, मांसं तद्रसञ्च हैमे राजते लौहे काष्ठजे वा, पर्वादिशाकं काष्ठाश्मलौहजे पक्वान्नं पिष्टकादि कांस्यजे काष्ठजे वा, घृतचौरं मृण्मये दारुजे वा। पानीयं पायसं तक्रं मृण्मय एव, काचजे स्फाटिके वा रागषाड़वादीन् स्थापयेत् एवं सति तद्द्रव्यं रोगहरं भवेत्। पाकराजः।

रन्ध्रम्। क्ली। दूषणे। छिद्रे। मे.। शरीरे रन्ध्राणि नेत्रश्रवणनासानां द्वे द्वे रन्ध्रे भवतः। तथा सुखमेहनपायूनामेकैकमिति नव। दशमञ्च मस्तके। स्त्रीणाञ्च त्रीणि स्तनगर्भमार्गेषु। स च अश्वस्य उदरगह्वरे। ज.द.२अ.।

रन्ध्रकण्टः (कः)। पुं। ज्वालाबर्बुरकवृक्षे। रा.नि.व.८। [व.८।

रन्ध्रपत्रः। पुं। नले। नल गाछ। रा.नि.

रन्ध्रबभ्रुः। पुं। उन्दुरौ। इन्दुर। विका.।

रन्ध्रवंशः। पुं। छिद्रवंशे। फোঁफরা বাঁশ, বাঁশিনী বাঁশ। तत्पर्य्यायाः,—लक्सारः काचकाह्वयः मस्करः वादनीयः शुषिराख्यः। गुणाः—कषायः तिक्तः शीतलः गुल्मघ्नश्च। रा.नि.व.८।

रन्ध्रो (ध्रन्)। पुं। देवनले। वै.निघ.।

रभसः। पुं वेगे। पौर्व्वापर्य्यविचारे। अरुण्यः।

रमः। पुं। रक्ताशोकवृक्षे। मे.।

रमठम्। क्ली। हिङ्गुनि। हिङ्। उणा.।

रमठध्वनिः। पुं। हिङ्गुनि। हिङ्। श.च.। मैथुने।

रमणम्। क्ली। पटीलमूले। मे.। जघने। हे.च.। जघ्ने। श.र.। पुं। गर्दभे। हे.च.। वृषणे। श.च.। महारिष्टवृक्षे। घোড়ানিম্। कैटर्य्यनिम्ब। रा.नि.व.९।

रमणा (णी)। स्त्री। प्रियङ्गौ। नार्य्याम्।

रमतिः। पुं। काके। श.र.।

रमाप्रियम्। क्ली। पद्मे। श.च.। पुं। दाक्षीन त्रीतिख्याते मिष्टवचि। वै.निघ.।

रमावेष्टः। पुं। श्रीवासचन्दने। रा.नि.व.१२।

रम्भा। स्त्री। कदलीवृक्षे। कला গাছ। रा.नि.व.११।

रम्य(क)म्। क्ली। पटीलमूले। मे.। विका.। सु.सू.१८अ.श्यामादि। प्रधानधातौ। जटा.। पुं। स्वर्णचम्पकवृक्षे। চাঁপা গাছ। मे.। वकवृक्षे। वकफूलের গাছ। श.च.। वि। बलकरे। जटा।

रम्यकः। पुं। महानिम्बे। वै.निघ.।

रम्यकक्षीरः। पुं। महानिम्बे। ঘোড়ানিম্। रा.नि.व.९।

रम्यपुष्पः। पुं। शालालीवृक्षे। শিমুল গাছ। रा.नि.व.८।

रम्यफलः। पुं। कारस्करवृक्षे। কুচিলাগাছ। रा.नि.व.९।

रम्या। स्त्री। स्थलपद्मिन्याम्। रा.नि.व.५। रात्रौ। मे.। महेन्द्रवारुणीलतायाम्। মাকাল। रा.नि.व.३। लक्ष्मणाकन्दे। वै.निघ.।

रम्यामलो। स्त्री। भूधात्र्याम्। ভূঁই-আমলা। रा.नि.व.५।

ररटी। स्त्री। ललाटे। ললাট।

रल्लकः। पुं। कम्बले। अम.। मृगवृक्षे। मृग-विशेषे। अ.टी.रा.। पद्मनि। सुभूतिः।

रवणम्। क्ली। कांस्ये। पुं। उष्ट्रे। हे.च.। कोकिले। उणा.।

रवथः। पुं। कोकिले। उणा.।

रविः। पुं। अर्कवृक्षे। আকন্দ গাছ। रा.नि.व.१०। ताम्रे। पञ्चामृतरसे। अजीर्णचि. नित्योदितरसे।

रविकान्तः। पुं। सूर्य्यकान्तमणौ। रा.नि. व.१३। सूर्य्यावर्त्तचुपे। হুড়হুড়িয়া। वै.निघ.।

रविकीर्णः। पुं। अर्कवृक्षे। वै.निघ.।

रविग्रहः। पुं। अश्वस्य ग्रहविशेषे। तदाकृष्ट-लक्षणं यथा—"उद्वर्त्तिताक्षः खिन्नश्च संगृहीतवृनुश्च यः। कम्पमानश्च यो वाजी स रवियृहपीड़ितः॥" ज.द.।

रविजप्रियः। पुं। नीलकान्तमणौ। वै.निघ.।

रविजलम्। क्ली। अर्कमूलरसे। आकन्द-मूलের রস। वै.संग्रह.पञ्चामृतरसे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रविदुग्धम्। क्ली। अर्कक्षीरे। आकन्देर आठा। र.सा.सं.वैद्यकचिन्तामणिरसे।

रविद्रुमः। पुं। सदापुष्पवृक्षे। आकन्द गाछ। रा.नि.व.२३।

रविनाथः। पुं। बन्धूकवृक्षे। बान्धुलि गाछ। क्ली। पद्मे। श्र.च.।

रविनामकम्। क्ली। ताम्रे। ताम्र। वै.निघ.।

रविपत्रः। पुं। आदित्यपत्रवृक्षे। आकन्द गाछ। रा.नि.व.४।

रविप्रियम्। पुं। रक्तकमले। ताम्रे। रा.नि. व.१०.१३। पुं। आदित्यपत्रे। आकन्द गाछ। रक्तकरवीरे। रा.नि.व.४।१०। लकुचवृक्षे। श्र. मा.। नीलभृङ्गराजे। वै.निघ.।

रविप्रिया (प्रोता)। स्त्री। सूर्य्यावर्त्तवृक्षे। हुड़हुड़िया। र.मा.।

रविभक्ता। स्त्री। सूर्य्यावर्त्तवृक्षे। हुड़हुड़िया। र.सा.सं. रसमारणे।

रविमूलम्। क्ली। अर्कमूले। आकन्दमूल। र.सा.सं.ज्वरचूड़ामणौ।

रविरत्न(क)म्। क्ली। माणिक्ये। माणिक। रा.नि.व.१३। [१३।

रविलोहम्। क्ली। ताम्रे। ताम्र। रा.नि व.

रविवल्लभः। पुं। भृङ्गराजवृक्षे। वै.निघ.।

रविवल्ली। स्त्री। आदित्यभक्तायां। हुड़हुड़िया। ब्राह्मीवृक्षे। वै.निघ.।

रविसंज्ञकम्। क्ली। ताम्रे। श्र.च.।

रविसुन्दररसः। पुं। सर्व्वज्वराधिकारे रसः। "द्विभागतालेन हृतञ्च ताम्रं रसञ्च गन्धञ्च समानमात्रम्। विषञ्च सप्त द्विगुणञ्च ताम्रं त्रिसप्तवारञ्च खरातपे हि। विमर्द्य विश्वस्य रसेन चूर्णं गुञ्जैकदत्तं सितया समेतम्.....॥" रसकौ.। (समौनमायु। विषं समञ्च द्विगुणञ्च ताम्रं) इति भा. पाठः।

रविस्पर्शा। स्त्री। क्षुद्रमेषशृङ्ग्याम्। क्षुद्र मेढ़ाशिङे। वै.निघ.।

रवीन्दम्। क्ली। पद्मे। धरणिः।

रवीष्टः। पुं। नागरङ्गवृक्षे। रा.नि.व.११। स्त्री (टा)। आदित्यभक्तायाम्। हुड़हुड़िया। रा.नि.व.४।

रशः। पुं। वंशे। यष्टणी.चि.जातीफलावटी।

रशना। स्त्री। जिह्वायाम्। श्र.र.।

रशोलः। पुं। कर्म्मरङ्गवृक्षे। कामरांङा गाछ। प.मु.।

रश्मिः। पुं। पद्मरागे। किरणे। मे.।

रश्मिजातम्। क्ली। रौप्ये। वै.निघ.।

रश्मिपतिः। पुं। आदित्यपत्रवृक्षे। रा.नि.व.४।

रसम्। क्ली। बोले। निशादले। रसाञ्जने। रा.नि.व.६। प.मु.। पुं। हिङ्गुले। र.मा.। पारदे। रा.नि.व.१३। शिलारसे। प.मु.। सिन्दूरे। इक्षुरसे। रोगे। वै.निघ.। विषे। रागे। गुणे। मांसद्रवे। अम.। जले। स्वादे। चिका.। शुक्रे। अम.। किराततिक्तके। द्राक्षायां। वै.निघ.। शरीरस्थसप्तधातुषु प्रथमधातौ। **रसधातु।** तत्पर्य्यायाः,—रसिका स्वेदमाता वपुः स्रवः चर्म्माम्भः चर्म्मसारः रक्तसारः अश्रमालका आहारसम्भवः तेजःसम्भवः अग्निसम्भवः षड्रसासवः आचयः अष्टकरः धातुघनः मूलमहापरः धातुपः भोग्यसम्भवः। रा.नि.व.८। रसस्वरूपं—स चाहारसारभूतः। "आहारस्य रसः सारः।" भाव्यं.पू.६अ.। "सम्यक्पक्वस्य भुक्तस्य सारो निगदितो रसः।" गुणाः—सितः शीतः स्वादुः स्निग्धश्चलश्चेति। तत्कर्म्म—स धमनीर्गत्वा सर्व्वान् धातून् पुष्णाति। तदतु शीतस्निग्धपोषकत्वादिगुणैः शरीरं आप्नोति। तस्य स्थानम्—"सर्व्वदेहचरस्यापि स्थानं हृदयमेव च। रसस्तु हृदयं याति समानमरुतेरितः। स तु व्यानेन विक्षिप्तः सर्व्वान् धातून् विवर्द्धयेत्॥" भा.। खरसे क्वाथे वा। दृषदि सम्भिन्नद्रवद्रव्ये। रा.नि.व.२०। सि.यो.ज्व.चि.। तत्साधनं यथा —"कुड़वं चूर्णितं द्रव्यङ्क्षिप्तञ्च द्विगुणे जले। अहोरात्रात् स्थितं तस्माच्चतुर्थो रस उत्तमः॥ आदाय शुष्कं द्रव्यं वा स्वरसानामसम्भवे। जलेऽष्टगुणिते साध्यं पादशेषञ्च गृह्यते। निःशोषितञ्चाग्निसिद्धं पलमात्रं रसम्पिबेत्। सितामधुगुड़चारान् जीरकं लवणत्रयं। घृतं तैलञ्च चूर्णादीन् कोलमात्रान् रसे क्षिपेत्॥" भाव्यं.१भ.। रसनेन्द्रियग्राह्यवस्तुनि, मधुरादौ। मिष्टादि द्रव्य। स च कालसहायभूमिवियदनिलानलसम्पर्केण परिणामान्तरं प्राप्य षट्प्रकारो भवति। ते च षड्रसाः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रव्यमाश्रित्य तिष्ठन्ति—"रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः। षट् द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः॥" गुणाः—"तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम्। कषायतिक्तमधुराः पित्तमन्ये तु कुर्व्वते॥" भा.। तत्र पृथिव्यम्बुगुणभूयिष्ठो मधुरः, तीयाग्निगुणभूयिष्ठोऽम्लः, पृथिव्यग्निगुणभूयिष्ठो लवणः, वायुग्निगुणभूयिष्ठः कटुकः वायुाकाशगुणभूयिष्ठः तिक्तः, चित्यनिलगुणभूयिष्ठः कषायः। सु.सू.४२अ.। रसभेदविकल्पाश्च त्रिषष्टिः। सु.उ.६८अ.। सप्तपञ्चाशदिति। च.द.द्रव्यगुणे शिवदासः। "मधुरः कषायस्तिक्ताम्लकश्च चारः कटुः षड्रसनामधेयम्। इयं इयं वातकफप्रकोपनं इयं तथा पित्तकरं वदन्ति॥ चारः कषायः पवनप्रकोपी मधुरोऽथ तिक्तः कफकोपनश्च। कटुम्लकौ पित्तविकारकारिणौ कटुम्लकौ वातशमौ प्रदिष्टौ॥ पित्तस्य नाशी मधुरः सतिक्तः कटुः कषायः शमनः कफस्य। अन्योन्यमेतच्छमनं वदन्ति परस्परं दोषविवृद्धिमन्तः॥ मधुरकटुकावन्योन्यस्य प्रकर्षविधायिनौ, लवणविपरीतोऽम्लकः प्रोक्तो विशेषरसानुगः। अविकृतस्तथा तिक्तैर्युक्तः कषायरसो लघुर्भवति सुतरां स्वादुः श्रेष्ठो गुणं करोति तथा। कटुतिक्तकषायाश्च कोपयन्ति समीरणं। कटुम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफम्॥" अथ ये रसा यद्दोषविरुद्धास्तदाह—"समीरणे तु नो देयाः कटुतिक्तकषायकाः। पित्ते कटुम्ललवणाः स्वाद्वम्ललवणाः कफे॥" अथ ये रसा यद्दोषहराः—"स्वाद्वम्ललवणान् वाते तिक्तस्वादुकषायकान्। पित्ते कफे तिक्त-कटु-कषायान् योजयेद्रसान्॥ मधुराम्लौ चारकटुकौ तिक्त-कषायकौ चेत्येतावन्योन्यरसविरोधिनौ भवेताम्॥" अथ मधुररसवीर्य्यम्—"यः स्वादुः शमश्लेष्महारिबलक्लैव्यप्रदः पुष्टिदः, प्रह्लादी रसेन करोति तदनु श्लेष्मप्रवृद्धिं ततः। पित्तानां दमनः शमोपशमनो वृष्यो नराणां हितः। चौक्षाणां चितपाण्डु-नेत्ररुज-संहर्त्ता भवेन्माधुरः॥" अथ तिक्तरसवीर्य्यं—"यस्तिक्तो मधुरात्मकोऽल्पतसमः कुष्ठादिदोषापहः, शान्तः सर्व्वरुजापहो भमहरो रुच्यो न संक्लेदनः। जिह्वास्फोटकनाशनोऽथ भवति चौक्षचतानां हितो, वक्त्रोल्लासकरः प्रकृष्टकथितो निम्बादिकास्वादकृत्॥" अथ कटुरसवीर्य्यम्—"नेत्रं स्रावयते मुखं विदहते यः कर्णजाड्यं वहन्, वैभत्सं तनुते मुखं विकुरुते पित्तासृजः कोपनम्। अग्निं दूषयते घ्नं विदहते जीर्णो न श्लथो भवेत्, वातानाहरते कफांश्च कटुको दह्यत् महारौद्रकः॥" अम्लरसवीर्य्यम्—"जिह्वाक्लेदं जनयति तथा नेत्रनिर्म्मीलनञ्च, वैभत्सं वा जनयति सदा वातरोगापहारी। कण्डूकुष्ठचतरुजकरो नो हितः शौक्षिनः स्यादम्लः प्रोक्तो मारुतशमनोऽसृक्प्रकोपं तनोति॥" अथ कषायरसवीर्य्यम्—"जिह्वां कण्ठं ग्रसति नितरां ग्राहकश्चातिसारे, श्लेष्मव्याधेरुपशमकरः श्वासकासापहर्त्ता। हिक्काशूलं हरति नितरां शोधनः स्याद्व्रणानां, प्रोक्तश्चायं समधिकगुणः श्रेष्ठकाषायनामा॥" अथ चाररसवीर्य्यम्—"चारः क्लेदं जनयति मुखे स्वादुरुष्णो विदाही शूलश्लेष्मारुचिकरतृषामूत्रकृच्छ्रोषणश्च। आनाहस्वाजनयति पुनर्वह्निसन्धुक्षणः स्यात्, श्रेष्ठः प्रोक्तो रसवरमहान् सर्व्वतो योग्यभूतः॥" अचि.६अ.।

रसकः। पुं। निष्क्वाथमांसे। हे.च.। क्ली। स्फटिकार्य्याम्। फट्‌किरि। र.सा.सं. अञ्जनरसे। मांसरसे। च.द.शूल.चि.। खर्परीतुल्यके। वै.निघ.। २भ.चयचि.नवरत्नराजमृगाङ्के। "खर्परीतुल्यकं तुल्यादन्यत्तत् रसकं स्मृतम्। ये गुणास्तुल्यके प्रोक्तास्ते गुणा रसके स्मृताः॥" भा.पू.१भ. उपरसव.।

रसकर्पूरम्। क्ली। (Percloride of mercury.) स्वनामख्यातधातौ। रसकर्पूर। पारदस्य श्वेतभस्मीकरणे। चन्द्रिकाकारः। एतत्साधनप्रणाली—"पिष्टं पांशुपटु प्रगाढ़ममलं वज्राम्बुना नैकशः, सूतं धातुगतं खटीकबलितं तं संपुटे रोधयेत्। अन्तःस्थं लवणस्य तस्य च तले प्रज्वाल्य वह्निं दृढं, घस्रं याम्यमथन्दुकुन्दधवलं भस्मोपरिस्थं शनैः। तद्वल्लवितयं लवङ्गसहितं प्रातः प्रयुक्तं भजेत्॥" र.सा.सं.। गुणाः—फिरङ्गरोगघ्नं दीपनं पुष्टिकरं बलवीर्य्यकारकं कुष्ठघ्नं व्रणघ्नञ्च। द्रव्यगुणः। मतान्तरं यथा—गुडसूतं समं कुर्य्यात् प्रत्येकं गैरिकं सुधीः। इष्टिकां खटिकां तद्वत् स्फटिकां सिन्धुजन्म च॥ वल्मीकं चारलवणं भाण्डरन्ध्रकमृत्तिकां। सर्व्वाण्येतानि संचूर्ण्य वाससा चापि शोधयेत्॥ एभिश्चूर्णैर्युतं सूतं यावद्दृश्यं विमर्द्दयेत्। तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत्॥ तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत् समां। सवस्त्रकुट्टितमृदा मुद्रयेदनयोर्मुखं॥ संशोष्य मुद्रयेद् भूयो भूयः संशोष्य मुद्रयेत्। सम्यक् विशोष्य मुद्रां तां स्थालीचूल्यां विधारयेत्। अग्निं निरन्तरं दद्यात् यावद्दिनचतुष्टयं। अङ्गारीपरि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदृयन्त्रं रचेद् यत्राद्दहर्निशं ॥ शनैरुद्घाटयेत् यन्त्रमूर्ध्वस्थालीगतं रसं । कर्पूरवत् सुविमलं गृह्णीयात् गुणवत्तरं ॥ तदेव कुसुम चन्दन-कस्तुरी-कुङ्कुमैर्युतं खादन् । हरति फिरङ्गं व्याधिं सोपद्रवं सपदि । विदधाति वह्निदीप्तिं पुष्टिं वीर्य्यविपुलं। रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम् ॥"

रसकल्पलता। स्त्री । वैद्यकरसग्रन्थे ।

रसका। स्त्री । क्षुद्रकुष्ठभेदे । लक्षणम्— "कण्डून्विता या पिड़का शरीरे संस्रावहीना रसकीर्त्यते सा।" सु.।

रसकेशरम्। क्ली । कर्पूरे । हारा. ।

रसकेसरी (इन्) । पुं। अरीचके रसः। पाठः —"रसगन्धौ समौ गृह्णी दन्तीक्वाथेन मर्दयेत् । दिवपुष्पं वाणमितं रसपादं तयामृतम् । माषमात्रन्तु तत्सेव्यं नागरेण गुड़ेन वा ॥".....रस.कौ.।

रसक्रिया। स्त्री। द्रव्यस्य घनीभूतसारकरणे। पाक द्वारा द्रव्यस्य सारकरण। "क्वाथादीनां पुनः पाकात् घनभावे रसक्रिया । साचा रसक्रियायाश्च लिख्यात् पाणितलं बुधः ॥" सु.सू. ३६अ. । सु.चि.२१अ. ।

रसखर्परः। पुं । खर्परधातौ । (कासलक्ष्मी-विलासे)।

रसगतज्वरः। पुं । रसधातुगज्वरे । लक्षणं —"गुरुता हृदयोत्क्लेशः सदनं कर्बुरीचकौ । रसस्थे तु ज्वरे लिङ्गं दैन्यं चास्योपजायते ॥" मा.नि. ।

रसगन्धः (कः)। पुं । गन्धके । रा.नि.व.१३ । गन्धरसे । बीले । चिका. । क्ली । रसाञ्जने । रा.नि.व.६ । [सं.।

रसगन्धकसम्भूतम्। क्ली । हिङ्गुले । र.सा.

रसगर्भम्। क्ली । रसाञ्जने । भा.म.४भ.नेत्ररो. चि. । हिङ्गुलविशेषे । रा.नि.व.१३ ।

रसगुड़िका। स्त्री। कासाधिकारे रसः। पाठः —"रसभागौ भवेदेकौ गन्धकौ द्विगुणौ भवेत्। त्रिभागा पिप्पली पथ्या चतुर्भागा विभीतका। पञ्चभागा त्वामला च षड्भागा सप्तभागिका। भागैः सर्व्वमिदं चूर्ण्यं भाव्यं बव्वीलजद्रवैः। एकविंशतिवारञ्च मधुना गुड़िका कृता। विभीतक-प्रमाणेन प्रातरेकान्तु भक्षयेत् ॥" र.सा.सं.।

रसघा। स्त्री । तिक्तगुञ्जाकरञ्जे ।

रसघ्नः। पुं । टङ्कणे । सोहागा। रा.नि.व.६ ।

रसचन्द्रिकावटी। स्त्री । शिरोरोगे हिता। पाठः—"वेल्लोक्वविजयाबीजं बीजमुन्मत्तकस्य च। कण्टकारीबीजकञ्च ऐन्द्रकं बीजमेव च। बीजञ्च इक्षुदारस्य समौ गन्धकपारदौ। आर्द्रकैर्वटिका कार्य्या कलायपरिमाणतः। एषा तोयानुपानेन प्रातः खाद्या हिताशिना... ..॥" र.सा.सं.।

रसचूड़ामणिः। पुं । ज्वराधिकारे रसः। पाठः—"सूतभस्म विषं तासं जयपालं सगन्धकं। हेमतैलेन सम्मर्द्द्य ततो लघुपुटं दहेत्। भावयेत् कालकट्टावैरजामहिषमीनजैः। पित्तैः पृथक्सप्त-मितं विषधूमेन शोधयेत्। सप्तवारं त्रिवारं वा पथ्यादार्द्रेण भावयेत् । रसचूड़ामणिः सिद्धः साक्षात् श्रीभैरवो महान् ॥" मात्रा १ र.। आर्द्रकनिम्बुरसाभ्यां सेव्यः। रस.चि.।

रसजः। पुं। गुड़े । रा.नि.व.१४। सुराकिट्टे। हे.च.। क्ली। रक्ते। श.च.। रसाञ्जने। वै.निघ.। संग्रहणी.चि.पाठान्तरे ।

रसजातम्। क्ली । रसाञ्जने। रा.नि.व.१३।

रसज्ञा। स्त्री। जिह्वायाम्। रा.नि.व.१८।

रसज्येष्ठः। पुं। मधुररसे । हे.च. ।

रसतालकम्। क्ली। रसगन्धतालादिकृत-यन्त्र-पक्वौषधभेदे । यथा,—"रसो गन्धस्तालकञ्च रक्तशङ्खीसमागतं, सम्मर्द्द्य सिकतायन्त्रे पचेद् यामचतुष्टयम् ॥ पीताभं जायते पाकाद् रसतालक-संज्ञितम्। ज्वरघ्नं दीपनं वह्नेर्वीर्य्यस्तम्भनमुत्तमं ॥ हन्त्यष्टादश कुष्ठानि त्रिविधं वातशोणितं। बल्य-मायुष्करं मेध्यं परमेतद् रसायनम् ॥" भै.।

रसतालेश्वरः। पुं । कुष्ठाधिकारे रसः। र. सा.सं.।

रसतेजः (स्)। क्ली । रक्ते। हे.च.।

रसदा। स्त्री । श्वेतनिर्गुण्ड्याम् । श्वेत निर्गुण्डी। वै.निघ.।

रसदालिका। स्त्री । पुण्ड्रेक्षौ । पूँड़ी आख्। करङ्गशालिनामेचौ। रा.नि.व.१४।

रसद्रावी (इन्) । पुं। मधुरजम्बीरे । मिष्टनेबू। रा.नि.व.११ ।

रसधातुः। पुं । पारदे। रा.नि.व.१३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसनम्। क्ली। आस्वादने। रा.नि.व.२०। खप्परे। पुं। कफे। तस्य स्थानं कण्ठः, कर्म्म च रसनम्। भा.। स्त्री (ना, नी)। जिह्वायां। रा.नि.व.१८। राज्ञायाम्। रा.नि.व ६। वै.निघ.ज्व.चि.अर्कादिः। "अर्कानन्ताकिरातामरतरुरसना।" प्रसारण्याम्। सर्पगन्धायाम्।

रसनाथः। पुं। पारदे। रा.नि.व.१३।

रसनापदम्। क्ली। नितम्बे। रा.नि.व.१८।

रसनाभम्। क्ली। रसाञ्जने। रा.नि.व.१३।

रसनायकः। पुं। पारदे। श.र.। [विका.।

रसनालिट् (ड्)ः। पुं। कुक्कुरे। हे.च.।

रसनिगड़ः। पुं। रसनिगाड़े, रसनियामक-शृङ्खलरूपौषधे। पाठः—"ब्रह्मर्कसम्भवं क्षीरं ब्रह्मबीजञ्च गुग्गुलुः। सैन्धवं द्विगुणं सर्व्वं निगड़ोऽयं महौत्तमः॥" ब्रह्मबीजं पलाशबीजं, ब्रह्मीशाक-बीजं वा। द्विगुणमिति रसापेक्षया मिलितं सर्व्वं द्विगुणम्। र.सा.सं.।

रसनिर्य्यासः। पुं। रालवृक्षे। शाल गाछ। वै.निघ.।

रसनेत्रिका। स्त्री। मनःशिलायाम्। हे.च.।

रसनेष्टः। पुं। इक्षौ। प.मु.।

रसनेन्द्रियम्। क्ली। जिह्वायाम्। च.शा.७अ.।

रसपर्पटिका (टी)। स्त्री। ग्रहण्याद्यधिकारे औषधम्। पाठः—"यास्तपित्ते विधातव्या गुड़िका च सुधावती। तत्र प्रोक्तविधौ शुद्धौ समानौ रसगन्धकौ। सम्मर्द्य कज्जलाभौ तु कुर्य्यात्पात्रे दृढ़ाश्मनि। ततो बादरवह्निस्थलौहपात्रे द्रवीकृतं। गोमयोपरि विन्यस्तकदलीपत्रपातनात्। कुर्य्यात् पर्पटिकाकारमस्य रक्तिदयं क्रमात्। रक्तिद्वादशकं यावत् प्रयोगः प्रहरार्द्धतः॥".....र.सा.सं.। "मग्नं रसे जयन्त्या पश्चादेरण्डसम्भूते। आर्द्रकरसे च सूतं पचकरसे काकमाच्याश्च। मग्नमुदितानुपूर्व्व्या मर्दनशुष्कं करेण गृह्णीयात्। प्रस्तरभाजनमध्ये शुद्धिरियं पारदस्योक्ता॥ शुकपुच्छसमच्छायो नवनीतसमद्युतिः। मसृणः कठिनः स्निग्धः श्रेष्ठो गन्धक उच्यते। कृत्वा भद्रं गन्धकमतिकुशलः क्षुद्रतण्डुलाकारं। तद्भृङ्गराजरसैरनन्तरं भावयेत् पात्रे। तदनु च शुष्कं कुर्य्यात् धूलिसमानञ्च समधा रौद्रे। तदनु च शुष्कं चूर्णं कृत्वा विन्यस्य लौहिकामध्ये। निर्धूमबदरकाष्ठाङ्गारे न्यस्तं विलाप्य तैलसमं। पाचयित्वाभृङ्गराजरसमध्ये ढालयेन्निपुणः। तस्मिन् प्रविष्टमात्रं कठिनत्वं याति गन्धकचूर्णं। पुनरपि रौद्रे शुष्कं कैतकरजसा समानतां नीतं। शुद्धे सूते शोधितगन्धकचूर्णेन तुल्यता कार्य्या। तावन्मर्द्दनमनयोर्यावन्न कणोऽपि दृश्यते सूते। पश्चात् कज्जलसदृशं चूर्णं लौहीस्थितं यत्नेन। निर्धूमबदरकाष्ठाङ्गारे न्यस्तं विलाप्य तैलसमं। सद्यो गोमयनिहिते कदलदले ढालयेन्मृदुनि। लौहीस्थितमवशिष्टं कठिनं तन्न ग्रहीतव्यं। पश्चात् पर्पटरूपा पर्पटिका कीर्त्यते लोके॥" पारशोधन—वह्न्यादिदोषविशुद्ध लौहपात्रस्थ पाराके यथाक्रमे जन्तीपाता, एरण्डपाता, आदार रस, काकमाचीर पाताय रस ओ चितापाताय रसे डुबाइया, नियत माड़िया रौद्रे शुकाइया लइबे। गन्धक-शुद्धि—ऐरूप शुकपुच्छाभ नवनीताभ, मसृण, कठिन ओ स्निग्ध उत्तम गन्धकके तण्डुलेर न्याय खण्ड खण्ड करिया भीमराज-रसे ७ भावना दिया शुकाइबे; एवं धूलिवत् चूर्ण करिबे। परे ऐ चूर्ण लौहपात्रे कुलकाठेर आङ्गारे गलाइया गलाइया भीमराजरसे ढालिबे। कठिन हइले तुलिया शुष्क ओ चूर्ण करिबे। एइरूपे शुद्धपारद ओ शुद्धगन्धक समभागे लइया यथाविधि मर्द्दन करतः निश्चन्द्र कज्जलि करिबे। परे ऐ कज्जलि लौहपात्रे कुलकाठेर आङ्गारे गलाइया, तैलवत् हइले गोमयवेष्टित कलापातेर उपर ढालिया गोमयभरित कलापातार पुँटुलि द्वारा चापिया धरिया पर्पटी प्रस्तुत करिबे। पर्पटीर वर्ण चन्द्रकेर न्याय हइले ठिक पाक हइयाछे जानिबे। मात्रा २ रति हइते एक एक रति करिया दश रति पर्य्यन्त दिबे। परे ऐ नियमे क्रमे ह्रास करिया आनिबे। भैष.।

रसपाकजः। पुं। गुड़े। रा.नि.व.१४।

रसपाकजः। पुं। गुड़े।

रसपारिजातकः। पुं। वैद्यकरसग्रन्थभेदे।

रसपुष्पिका। स्त्री। ज्योतिष्मत्याम्। लता-फट्‌की। भैष.ज्व.चि.पानीयवटी। पूतिकायाम्। शतावर्य्याम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसप्रदीपः। पुं। रामचन्द्रकृते वैद्यकरसग्रन्थे।

रसफलः। पुं। नारिकेलवृक्षे। रा.नि.व.२३। आमलकीवृक्षे। वै.निघ.।

रसबन्धकरः। पुं। सीमलतायाम्। वै.निघ.।

रसभवम्। क्ली। रक्ते। रा.नि.व.१८।

रसभस्म। क्ली। पारदभस्मनि। पारादभस्म। तत्प्रकरणम्—"दिवदाली हंसपादी यमविच्चा पुनर्नवा। एभिः सूती विशुद्धस्य पुटनान्म्रियते ध्रुवम॥" र.सा.सं.। रससिन्दूरे।

रसभावः। पुं। रसधर्मे, स्निग्धतादौ। यथा—"मधुरो लवणाम्लौ च स्निग्धभावास्त्रयो रसाः। वातमूत्रपुरीषाणां प्रायो मोक्षे सुखा मताः। कटु-तिक्तकषायास्तु रूक्षभावास्त्रयो रसाः। दुःखा विमोक्षे दृश्यन्ते वातविण्मूत्ररेतसाम्। मधुरः श्लेष्मलः प्रायो जीर्णोच्छालियवादृते। सुद्गाढ्यूषतः क्षौद्रात् सिताया जाङ्गलामिषात्। प्रायोऽम्लः पित्तजननो दाड्डिमामलकादृते। अपथ्यो लवणः प्रायः चक्षुष्योऽन्यत्र सैन्धवात्। तिक्तः कटुश्च भूयिष्ठं हृष्यो वातप्रकोपनः। न पटोलकणामुस्तीवेत्रायलगुनामृताः॥" राज.४प.।

रसमञ्जरी। स्त्री। शालिनाथकृतरसग्रन्थे।

रसमञ्जरीभाष्यम्। क्ली। शिवचिन्तामणि-कृत-रसमञ्जरीभाष्ये।

रसमणिः। पुं। हरिहरकृतरसग्रन्थे।

रसमर्दुरम्। क्ली। परिणामशूले औषधम्। पाठः—"कुड़वं पथ्याचूर्णं द्विपलं गन्धाभ्रलौह-किट्टच्च। शुद्धरसस्यार्द्धपलं भृङ्गस्य केशराजस्य। प्रस्थोन्मितच्च दत्वा पात्रे लौहे च दृष्टसंघृष्टं। शुष्कं घृतमधुयुक्तं मृदितं स्थाप्यच्च भाजने स्निग्धे॥" रस.र.। भृङ्गराजकेशराजयोः प्रत्येकं रसप्रस्थम्।

रसमर्दनम्। क्ली। पारदस्य चूर्णीकरणे मारणे वा। See पारदः।

रसमाणिक्यम्। क्ली। कुष्ठाधिकारे औषधम्। पाठा—"तालकं वंशपत्राख्यं कृष्णाखलिलं क्षिपेत्। सप्तधा वा त्रिधा वापि दग्धाम्लेन च वा पुनः। शोधयित्वा पुनः शुष्कं चूर्णयेत्तत्खलाकृति। ततः शरावके पात्रे स्थापयेत् कुशली भिषक्। बदरीपत्रकल्केन सन्निलिप्य च कारयेत्। अरुणाभ-मधः पात्र तावज्ज्वाला प्रदीयते। साङ्गशीतं समुद्धृत्य माणिक्याभो भवेद्रसः॥" मात्रा २ र. घृतेन भार्गेण वा मधुना सेव्यम्। र.सा.सं.।

रसमारकद्रव्यम्। क्ली। See मारकवर्गः।

रसमारणम्। क्ली। मारणद्रव्यैः पारदस्य मर्द्दने। र.सा.सं.।

रसमुक्तावलिः। स्त्री। रसग्रन्थविशेषे।

रसमूर्च्छनम्। क्ली। पारदस्य मूर्च्छाकरण See पारदः।

रसमैत्री। स्त्री। मधुराम्लं, लवणाम्लं, कटु-तिक्तकं, कटुलवणं, तिक्तलवणश्चेति सोच्यते।

रसरञ्जनम्। क्ली। पारदस्य रक्ततापादने। "गन्धकेन हृतं नागं जारयेत्कमलीदरे। एतस्य विगुणं जीर्णं लाक्षाभो जायते रसः॥" रस.चि. ३अ.। [रसग्रन्थे।

रसरत्नसमुच्चयः। पुं। अश्विनीकुमारकृते

रसरत्नाकरः। पुं। नित्यनाथकृते रसग्रन्थे।

रसराजः। पुं। पारदे। रसाञ्जने। धातु-रसाञ्जन। रा.नि.व.१३।

रसराजरसः। पुं। वातव्याधौ रसः। पाठः—"पलैकं शुद्धसूतस्य व्योमसत्वच्च कार्षिकं। तदर्द्धं काञ्चनं दिव्यं कन्यारसविमर्दितम्। लौहं रूप्यं मृतं वङ्गं वाजिगन्धा लवङ्गकं। जातीकोषं तथा क्षीरकाकोलीच्च तदर्द्धतः। काकमाचीरसैः पिष्ट्वा पच्चगुञ्जामिता वटी। क्षीरच्च शर्करातोयमनुपानं प्रकल्पयेत्॥" रससिन्दूर ८ तो. अभ्र २ तो. स्वर्ण १ तो. घृतकुमारीरसे मर्द्दन। पत्रे लौह, रौप्य, वङ्ग, अश्वगन्धा, लवङ्ग, जैत्री, क्षीरकाकोली प्रत्येक ॥० तो. काकमाची-रसे माड़िवे। वटी ५ रति, अनुपान दुग्ध ও চিনির জল। भैष.।

रसराजशिरोमणिः। पुं। परशुरामकृते रसग्रन्थे। पाठः—"पलं शुद्धस्य सूतस्य पलं ताम्र-मयस्तथा। अभ्रं नागं पलं वङ्गं पलं गन्धकतालकं। पलं शुद्धविषं चूर्णं सर्व्वमेकत्र कारयेत्। मर्दयेत् काकमाच्याश्च आर्द्रकस्य रसेन च। मात्स्यवाराह-मायूर-च्छाग-माहिषपित्तकैः। मर्दयेद्दिनभिन्नच्च विकटोरम्बुभिस्तथा। सिद्धोऽयं रसराजेन्द्रः धन्वन्तरिसुसंस्कृतः॥" मात्रा १ र.। अनुपान तुलसीपत्ररसः। शुद्धपारा, ताम्रा, लौह, अभ्र, सीस, वङ्ग, गन्धक, हरिताल, विष प्रत्येक

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१ प. काकमाचीरस, आदार रस, पञ्चपित्त ओ त्रिकटुकाथे पृथक् पृथक् भावना दिया बटी करिबे। मात्रा १ रति। अनुपान तुलसी-पातार रस। र.सा.सं.।

रसललना। स्त्री। जिह्वायाम्।

रसले(लो)हः। पुं। पारदे। रा.नि.व.१३।

रसवती। स्त्री। पाकशालायाम्। रन्धनशाला। अम.।

रसवर्णकः। पुं। दाड़िमपुष्पादिद्रव्यगणे। दाड़िमपुष्पकिंशुकपुष्पलाक्षाबन्धूकपुष्पहरिद्राकुसुम्भपुष्पमञ्जिष्ठासु। "दाड़िमं किंशुकं लाक्षाबन्धूकञ्च निशाद्वयम्। कुसुम्भपुष्पं मञ्जिष्ठा इत्यसौ रसवर्णकः॥" रा.नि.व.२२।

रसवहस्रोतः। क्ली। रसनायकधमन्याम्। हृदयं मूलं। धमन्यश्च दश। च.वि.५अ.।

रसविरोधः। पुं। तिक्तमधुरौ लवणमधुरौ कटुमधुराविमे वंरूपविरुद्धरसतायाम्। सु.उ.।

रसवीर्य्यकृत्। पुं। सौमलतायाम्। वै.निघ.।

रसवेधकम्। क्ली। स्वर्णे। वै.निघ.।

रसशङ्करः। पुं। रसग्रन्थभेदे।

रसशब्दसरणिनिघण्टुः। पुं। वैद्यकनिघण्टुविशेषे।

रसशार्दूलः। पुं। सूतिकोपचारे रसः। पाठः—"अभ्रं तास्रं तथा लौहं राजपट्टं रसन्तथा। गन्धटङ्कमरीचञ्च यवक्षारं समांशकं। तथात्र तालकञ्चैव त्रिफलायाश्च तोलकं। तोलकञ्चामृतञ्चैव षड्भुङ्गा-प्रमिता वटी। श्लीपसुन्दरकस्यापि नागवल्ल्या रसेन च। भावयेत् सप्तधा हन्ति ज्वरकासाङ्गसंग्रहम्॥" र.सा.सं.।

रसशेषः। पुं। जीर्णेऽपि आहारे कदाचिदाहारसारो रसशेषः। सि.यो.अजीर्ण.चि.।

रसशेषाजीर्णम्। क्ली। रसशेषजन्याजीर्णरोगभेदे। See अग्निमान्द्यं।

रसशोणितसम्भवम्। क्ली। मांसधातौ। वै.निघ.।

रसशोधनम्। क्ली। टङ्कणे। सोहागा। हे.च.। पारदस्य सीसकादिदोषसंस्करणे। पारदशोधन। तच्च शोधनं बहुविधं रसेन्द्रसारसंग्रहकारेण दर्शितम्। तच्च प्रथमतो द्विधा—"व्याधौ रसायने चैव द्विविधा सा प्रकीर्त्तिता। या शुद्धिः कथिता व्याधौ सा नेष्टा हि रसायने। रसायने तु या शुद्धिः सा व्याधावपि कीर्त्तिता॥" इति। रसग्रहणपरिमाणम् १०० प. ५० प. २५ प. १० प. १ प. ४ वा २ तो. शोधनार्थम् औषधप्रयोगेषु यथालाभं ग्राह्यम्। "कुमारिका चिवकरक्तसर्षपैः क्लृतैः कषायैर्हृतीविभिश्रितैः। फलत्रिकेणापि विमर्द्दितो रसो दिनत्रयैः सर्व्वमलैर्विमुच्यते॥ एवं कदर्थितः सूतः षण्ढो भवति निश्चितम्.....॥" "शुद्धसूतस्य गन्धीयाद्विषग्भागचतुष्टयम्। शुद्धगन्धस्य भागैकं तावत् क्लृविमगन्धकम्। अथवा पारदस्यार्द्धं शुद्धगन्धकमेव हि। तयोः कज्जलिकां कुर्य्यादिनमेकं विमर्द्दयेत्। मृत्तिकां वाससा सार्द्धं कुट्टयेदतियत्नतः। तया वारत्रयं सम्यक्काचकूपीम्रलेपयेत्। मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकाङ्क्षिपेत्। तां कूपीम्वालुकायन्त्रे स्थापयित्वा रसम्पचेत्॥" भा.।

रससंरक्षणम्। क्ली। रसस्य शोधनमूर्च्छनबन्धनमारणरूपे कर्म्मचतुष्टये। र.सा.सं.।

रससंस्कारः। पुं। वैद्यकरसग्रन्थभेदे।

रससङ्केतकलिका। स्त्री। शतद्वयश्लोकात्मकरसग्रन्थे।

रससङ्ग्रहसिद्धान्तः। पुं। वैद्यकरसग्रन्थविशेषे।

रससम्भवम्। क्ली। रक्ते। वै.निघ.।

रससारः। पुं। वैद्यकरसग्रन्थविशेषे। मधुनि। नकुल.१२अ.।

रससिन्दूरम्। क्ली। रसगन्धकयोः सिन्दूरीकरणे। व्रससिन्दूर। र.चि.२अ.। भा.।

रससुधाकरः। पुं। वैद्यकरसग्रन्थविशेषे।

रससुधानिधिः। पुं। रसग्रन्थभेदे भोजराजकृते।

रससूः। पुं। रसधातौ। व्रस। वै.निघ.।

रसस्थज्वरः। पुं। रसगतज्वरे।

रसस्थानम्। क्ली। हिङ्गुलि। भ.च.। रसस्य आधारे। [चरणे।

रसस्रावः। पुं। अस्रवेतसे। वै.निघ.। रस-

रसा। स्त्री। मेदायां। प.मु.। रास्नायां। रा.नि.व.६। भा.म.१भ.ज्व.चि.लाक्षातैले। "वासा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसानिका।" कर्णकज्य.चि.। "कटुकारमाभिः।" शिलारसे। द्राक्षायाम्। काकोल्याम्। श.र.। पाठायां। शल्लकीवृक्षे। जिह्वायां। कङ्कुधान्ये। मे.। आम्रवृक्षे। वै.निघ.।

रसाखनः। पुं। कुक्कुटे। श.च.।

रसाग्रजम्। क्ली। रसाञ्जने। रा.नि.व.१३।

रसाग्रम्। क्ली। रसाञ्जने। पारदे। वै.निघ.।

रसाङ्गा। स्त्री। जिह्वायाम्। अलिजिह्विकायाम्। आलजिव।

रसाङ्गकः। पुं। श्रीवेष्टनामक-सुगन्धकाष्ठे। रा.नि.व.१२।

रसाज्ञानम्। क्ली। आस्वादाज्ञाने। "भुञ्जानस्य नरस्यान्नं मधुरप्रभृतीन् रसान्। रसना यन्न जानाति रसाज्ञानं तदुच्यते॥" वै.निघ.।

रसाञ्जनम्। क्ली। चतुर्विधाञ्जनान्यतमे स्वनामख्यातरसजधातौ। रसाञ्जन। प.मु.। हिं रसौत। तत्पर्य्यायाः,—रसगर्भं रसनार्भं रसराज: रसायजं रसोद्भवं तार्क्ष्यं तार्क्ष्यशैलं कतकं बालभैषज्यं दार्व्वीक्वाथोद्भवं वर्ष्याञ्जनं अग्निसारं। मतान्तरे तद्विविधं स्त्रीतोऽञ्जनं क्वणपाषाणाकृति धातुद्रव्यम्। अन्यत् दारुहरिद्राक्वाथेन कृत्रिमं पीतलीहितम्। सु.सू.३८अ.अञ्जनादिः, प्रियङ्ग्वादिः। गुणाः,—कटुतिक्तमधुरं शीतलं चक्षुष्यं रक्तपित्तविषच्छर्द्दिहिक्कागुल्मापस्मारनाशि च। तच्छुद्धिः—"नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितं। दिनैकमातपे शुद्धं भवेत् कार्य्येषु योजयेत्॥" र.सा.सं.। "दार्व्वीक्वाथसमं क्षीरम् पादं पक्वा यदा घनं। तदा रसाञ्जनाख्यं तत् नेत्रयोः परमं हितम्। गुणाः—"रसाञ्जनं कटु श्लेष्मविषनेत्रविकारनुत्। उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत्॥" भा.।

रसाञ्जनादिचूर्णम्। क्ली। ज्वरातिसारे औषधम्। पाठः—"रसाञ्जन सातिविषं कुटजस्य फलत्वचं। धातकीं शृङ्गवेरञ्च पिबेत् तण्डुलवारिणा॥" शुद्धरसाञ्जन, आतईच, इन्द्रयव, धाईफूल, शुँट प्रत्येक चूर्ण समभाग। रस.र.।

रसाढ्यः। पुं। आम्रातकवृक्षे। रा.नि.व.११।

रसाढ्या। स्त्री। राम्नायां। रा.नि.व.६।

रसादानम्। क्ली। रसशोषणे। हे.च.। रस ग्रहणे।

रसाधिकः। पुं। टङ्कणक्षारे। रा.नि.व.६।

रसाधिका। स्त्री। काकोलीद्राक्षायाम्। रा.नि.व.११। वेदाना आंगूर।

रसाधिकारः। पुं। हरिहरकृते वैद्यकरसग्रन्थे। [मा.नि.।

रसानुगः। त्रि। रसदूषके। रसानुसारिणि।

रसाभुग्नम्। क्ली। बोलनामगन्धद्रव्ये। रा.नि.व.६।

रसाभ्रगुड़िका। स्त्री। रसायनाधिकारे औषधम्। पाठः—"सहदेवा बला चैव सूर्य्यावर्त्ताऽथ सारिषः। अपामार्गोऽमृता चेति सम्यक् सम्पादयेद्भिषक्। एषां पलानि चत्वारि प्रत्येकं कुट्टयेत्ततः। अध ऊर्द्धञ्च तद्दत्वा मण्डूरं यत् पुरातनं। गोमूत्रेण पचेत्तावत् यावत् गोमूत्रशोषणम्। तस्मादुद्धृत्य तच्चूर्णं कुर्य्यात् पलचतुष्टयम्। त्रिकटु त्रिफला मुस्ता गुडूची चित्रकं त्रिवृत्। दन्ती विड्ङ्गसैकैकं कर्षमेषान्तु चूर्णयेत्। एकपत्रीकृतस्याथ वज्रकाभस्य यत्पलम्। वार्य्यिन्नाम्लिरावस्य वारिपर्णीरसाप्लुतम्। आतपे शोषयेत् तीव्रे दिनमेकं सुरक्षया। गूरणस्य रसैः पिष्ट्वा तच्च टङ्कणकस्य च। दत्त्वाष्टौ मापकांस्तत्र पुटपाकेन पाचयेत्। मृण्मये सुदृढ़े पात्रे मृदुना गोमयाग्निना। रसाद्दादशमासांश्च कर्षं गन्धकतः पृथक्। रसे मण्डूकपर्ण्याश्च मूर्च्छितौ कज्जलीकृतौ। घृतस्य मधुनश्चापि पृथक् पलचतुष्टयम्। तत्सर्व्वमेकतः कृत्वा स्निग्धे भाण्डे निधापयेत्। ततोऽष्टौ मासकान् खादेद्दश वा द्वादशैव च। कर्षं वापि तथा कुर्य्यात् यथा दोषबलाबलम्॥" रस.र.।

रसाभ्रवटी। स्त्री। ग्रहण्यधिकारे औषधम्। पाठः—"गुडसूतस्य कर्षैकं कर्षैकं गन्धकस्य च। द्वयोः कज्जलिकां कृत्वा तुल्यं व्योम प्रदापयेत्। केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चिकस्य च। शोषसुन्दरमण्डूकीजयन्तीद्राक्षरसस्य च। श्वेतापराजितायाश्च स्वरसं पर्णसम्भवं। रसतुल्यं प्रदातव्यं चूर्णञ्च मरिचोद्भवं। देयं रसार्द्धभागेन चूर्णं टङ्कणसम्भवम्। संमर्द्य वटिकां कुर्य्यात् कलायसदृशीं बुधः॥" र.सा.सं.।

रसाम्लतरसः। पुं। रक्तपित्ताधिकारे रसः। पाठः—"रसस्य हिगु गन्धं माक्षिकञ्च शिलाजतु। गुडूची चन्दनं द्राक्षा मधुपुष्पञ्च धान्यकम्॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुटजस्य त्वचं बीजं धातकी निम्बपल्लवकम् । यष्टीमधुसमायुक्तं मधुशर्करयान्वितम् । विधिना मर्दयित्वा तु कर्षमात्रन्तु भक्षयेत् ॥" र.सा.सं।

रसाम्लम्। क्ली। त्वचाम्ले। रा.नि.व.६। चुक्रनामकक्षाम्लिके। रा.नि.व.१५। पुं। अम्लवेतसे। रा.नि.व.६। स्त्री (म्ना)। पलाशीलतायां। रा. नि.व.३।

रसाम्ल(य)कः। पुं। तृणविशेषे। श.च.।

रसायनम्। क्ली। विषे। रा.नि.व.६। कटिदेशे। रा.नि.व.१८। तक्रे। हे.च.। जराव्याधिनाशकौषधे। मे.। "स्वस्थस्यौजस्करं यत्तु तद्दृष्यं तद्रसायनम्।" तेन च दीर्घायुष्ट्वादिलाभः। च.चि.१अ.। अपिच "यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्।" तत्फलं यथा—वयःस्थापनमायुर्मेधाबलकरं रोगापहरणसमर्थञ्च। सु.सू.१अ.। लक्षणं—"देहस्येन्द्रियदन्तानां दृढ़ीकरणमेव च। वली-पलित-खालित्यवर्जनेऽपि च या क्रिया। पूर्ब्बवैद्यप्रणीतं हि तद्रसायनमुच्यते ॥" वैद्यकसंग्रहः २ अ.। अपिच,—"दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः। देहेन्द्रियं बलं कान्तिं नरोविन्देद् रसायनात् ॥ तच्च द्विविधं कुटीप्रावेशिकम्, वातातपिकञ्च। वा.उ.३९अ.। वंशपत्रहरितालि। वै.निघ.। पुं। विड़ङ्गचुपे। मे.।

रसायनतन्त्रम्। क्ली। रसायनाधिकारे। "रसायनतन्त्रं नाम वयःस्थापनमायुर्मेधाबलकरं रोगापहरणसमर्थञ्च।" सु.सू.१अ.।

रसायनफला। स्त्री। हरीतकीवृक्षे। त्रिका.।

रसायनवरः। पुं। शुक्लरसोने। स्त्री (रा)। कङ्गुधान्ये। काकजङ्घायाम्। वै.निघ.।

रसायनश्रेष्ठः। पुं। पारदे। रा.नि.व.१३।

रसायनामृतलौहम्। क्ली। ज्वरातिसारे लौहम्। पाठः—"कर्षं गन्धकमर्द्धपारदसमे कुर्य्याच्छुभां कज्जलिम्, तावच्चूर्णयेच्च पल्लवणात् सार्द्धञ्च कर्षं पृथक्। सार्द्धार्द्धं त्रिफलं विचूर्ण्य सकलं श्लक्ष्णेन चाम्भोन्वितं भक्षयेत् ॥" मात्रा शाणमितम्। अनु.काञ्जिकम्। रस.र.। अन्यत् गुप्ते—त्रिफला २ श, क्वाथार्थजलं १६ श, शे. ४ श.। जम्बीररसः (गोंड़ालेबूर रस) १६ प, शर्करा १६ प, एकत्र पक्त्वा घनीभूते तत्र त्रिफलां त्रिकटु मुस्तां विड़ङ्गं जीरकं कृष्णजीरकं यमानीहृयं भूनिम्बं बिल्वं दन्तीमूलं निम्बत्वचं सैन्धवम् अभ्रं प्र. चूर्णं २ तो. लौहं २ प. घृतं ४ प. प्रक्षिप्य समालोड्य च स्थाप्यम्। भैष.।

रसायनी। स्त्री। गुड़ूचीलतायाम्। काकमाचीक्षुपे। गौरक्षदुग्धायाम्। रा.नि.व.३।४ भ। मांसरोहिणीभेदे। रा.नि.व.१२। करञ्जभेदे। शङ्खकरञ्ज। रा.नि.व.९। कर्णस्फोटिकायां। कर्णछिड़ा। प.मु.। शुकशिम्ब्यां। आलाकुशी। शुक्लविल्वतायां। शङ्खपुष्प्यां। नाड्यां। कन्दगुड़ूच्यां। मञ्जिष्ठायां। वै.निघ.।

रसालम्। क्ली। बीले। भा.। सिल्लके। शिलारसे। मे.।

रसालः (कः)। पुं। आम्रवृक्षे। रा.नि.व. ११।२३। इक्षौ। प.मु.। पुण्ड्रेक्षौ। रा.नि.व. १४।२३। पणसवृक्षे। काँठाल गाछ। श.र.। कुन्दुरौ। कुन्दुरु तृण। रा.नि.व.८। गोधूमे। रा.नि.व.१६।२३। अम्लवेतसे। सिल्लके। शिलारसे। वै.निघ.।

रसालशर्करा। स्त्री। रसालेक्षुरसकृतशर्करायाम्। गुणाः—स्निग्धा कान्तिकरी च। रा.नि. व.१४।

रसालसा। स्त्री। पुण्ड्रेक्षौ। गोधूमे। कुन्दुरुवृक्षे। नाड्यां। श.च.।

रसाला। स्त्री। दधिमिश्रितशर्करौ। शिखरिणीति लोके। प.मु.। तत्साधनविधिः—"वस्त्रे वस्त्राद्य गलितं दधि द्विप्रस्थमानकम्। तस्मिन् घृतं माक्षिकञ्च प्रत्येकञ्च पलम्पलम्। निक्षिप्य शर्करां तस्मिन् मानिकाद्वितयं तथा। नागकेशरमेलालवङ्गपत्त्वामलसंज्ञकम्। अर्द्धकर्षक्षिपेद्विज्ञां मरिचद्विपलं तथा। सर्व्वमेकीकृतं तत्तु भाण्डे कर्पूरवासिते। गृहीत्वा चैव वस्त्रेण सुखन्वस्राद्य गालयेत्। हस्तेनालोड्य यत्नेन सा रसालाभिधा स्मृता। गुणस्तुल्या मञ्जिकायाः शिखरिण्याः स्मृता बुधैः ॥" वै.निघ.। दूर्व्वायाम्। विदार्य्याम्। पुण्ड्रेक्षौ। रसनायाम्। मे.। द्राक्षायाम्।

रसालाम्रः। पुं। महाराजाम्रे। रा.नि.व.११।

रसालिका। स्त्री। सप्तलायाम्। सातला। वै.निघ.।

रसालिङ्गा। स्त्री। पृश्निपर्ण्याम्। चाकुलियां। श.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसाली (इन्) । पुं । क्षणचणकवृक्षे । प.मु. । स्त्री (ली) । करङ्गशालिनामेची । पुँड़ि इक्षु । रा.नि.व.१४ ।

रसालोला । स्त्री । जिह्वायाम् ।

रसालेचुः । पुं । करङ्गशालिनामेची । रा.नि. व.१४ ।

रसावेष्टः । पुं । औवेष्टनामक-सुगन्धद्रव्ये । रा. नि.व.१२ । [नि.व.३ ।

रसाश्वासा । स्त्री । पलाशीलतायाम् । रा.

रसाष्टकम् । क्ली । महारसाष्टके । पारददर-दाभ्रक-कान्तलौह विमल-माक्षिक-वैक्रान्त शङ्खेषु । वै.निघ. ।

रसास्वादी (इन्) । पुं । भ्रमरे ।

रसाह्वः । पुं । लवणक्षोद्याम् । र.मा. । स्त्री (ह्वा) । लताप्रतानवर्ष्याम् । राजाद्यम् । वै.निघ. ।

रसिकः । पुं । हस्तिनि । अश्वे । सारस्वतः । सारसपक्षिणि । रा.नि.व.१९ । गोधूमे । वै.निघ. । स्त्री (का) । रसालायां । इक्षुरसे । मे. । शरीरस्थ-रसधातौ । रा.नि.व.१८ । रसनायाम् । विश्व. । शारिकापक्षिणि । वै.निघ. । त्रि । प्रशस्तरसवति । वा.चि.५अ. ।

रसिकालुः । पुं । नीलालौ । वै.निघ. ।

रसुनः । पुं । लशुने । श्र.च. ।

रसेन्द्रः । पुं । पारदे । सि.यो.क्रमि.चि. । राजमाषवृक्षे । वन्यवटी । प.मु. ।

रसेन्द्रगुड़िका । स्त्री । कासे यक्ष्मणि वा रसविशेषः । पाठः—"क्रमार्द्धाः त्रिफलाचूर्णैः चित्रकस्य रसैः क्रमात् । शोधयित्वा पुनाराजौ-गृहधूमहरिद्रया । पक्वेष्टकारजोभिश्चालम्बूषक-रसेन च (वीक्षापत्ररसेन च इति २यः पाठः) । भृङ्गराजरसेनापि (शृङ्गवेररसेनापि । २यः पाठः) शोधयित्वा पुनः पुनः । प्रक्षालयेत् पुनः पश्चात् क्षालयेद्दसने घने । कर्षद्वयं रसेन्द्रस्य भावयेद्दिन-यादृवैः । शिलायां खल्वयेत्तापि यावत् पिण्डत्व-नागतम् । जलकर्षाकाकमाचीरसाभ्यां भावयेत् पुनः । सौगन्धिकपलं शुद्धमर्द्धं मरिचटङ्कणम् । माक्षिकञ्च शिखियीवमभ्रकं तालकन्तथा । एतांस्तु मिलितान्सर्व्वान् भावयेदार्द्रकद्रवैः ॥" मात्रा २ रत्तिः । पारा ४तो. घृतकुमारीरस,त्रिफलाचूर्ण, चित्तारस, सर्षपचूर्ण, धूल, हरिद्राचूर्ण, इष्टकचूर्ण, अलम्बुषारस (वा वोणापत्ररस), भीमराजरस (वा आदार रस) द्वारा यथाक्रमे पृथक् माड़िया कापड़े छाँकिबे। परे जन्तीपातार रस, काणछिँड़ार रस ओ काकमाचीर रसे पृथक् भावना दिबे ओ शुकाइबे। परे ऐ पारा ८ तो. भृङ्गराजरसशुद्धगन्धक ८ तो. मरिच, स्वर्णमाक्षिक, सोहागार खै, तुँते, हरिताल ओ अभ्र प्रत्येक ४ तो. आदार रसे माड़िया बटी करिबे। मात्रा २ रति। भैष. । रस.र. । द्वितीया द्रुतसंज्ञा—"कर्षं शुद्धरसेन्द्रस्य गन्धकस्याम्रकस्य च । तावत्य हरितालस्य लौहस्य च विषस्य च । मनःशिलायाः चाराणां बीजं धुस्तूरकस्य च । मरिचस्य च सर्व्वेषां समं चूर्णन्तु कल्पयेत् । जयन्ती चित्रकं माणं खण्डकर्णोऽथ मण्डुकी । शुक्लाग्नयं भृङ्गराज-ङ्गेयराजार्द्रसिन्धुकम् । एतेषां स्वरसेनापि कर्षमात्रेण मर्द्दयेत् ॥" मात्रा कलायमिता। अनु आर्द्रकरसः। पारा, गन्धक, अभ्र, तामा, हरिताल, लौह, विष, मनछाल, यवक्षार, साचिक्षार, सोहागार खै, शुद्धधुतूरार बीज, मरिच प्रत्येक चूर्ण २ तो. जन्ती, चित्रक, माण, बेँटकोल, थुलकुड़ि, सिद्धि, भीमराज, केशुण्ठे, आदा ओ निशिन्दापाता इहादेर प्रत्येकेर २ तोला रसे पृथक् भावना दिया कलायपरिमाण बटी करिबे। अनुपान आदार रस। र.सा.सं.। रस.र.। सा.कौ.। रस.कौ.। भैष.। अन्या खल्वसंज्ञा यथा—"कर्षं शुद्धरसेन्द्रस्य स्वरसेन जयार्द्रयोः । शिलायां खल्वयेत्तावत् यावत् पिण्डत्वमाप्नुयात् । जलकर्षा-काकमाचीरसाभ्यां भावयेत् पुनः । सौगन्धिक-पलैर्मर्द्दयेत्स्वरसेन सुभावितम् । चूर्णितं रससंयुक्त-मजाचीरपलद्वये । खल्वितं घनपिण्डन्तु गुड़ीं स्विन्नकलायवत्..... ।" शुद्धरस २ तो. जयन्तीपत्ररसे ओ आर्द्रकरसे माड़िया घन ओ पिण्ड करिबे। परे काणछिँड़ा ओ गुड़काभाइरसेर भावना दिबे; तत्परे ऐ पाराके भीमराजरसे भावित गन्धक १ पलेर सहित माड़िया कज्जलि करिया, २ प. छागदुग्धे माड़िया स्विन्नकलायवत् बटिका करिबे। सा.कौ.। भैष.। रस.कौ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसेन्द्रचिन्तामणिः। पुं। रामचन्द्रकृते प्राचीनरसग्रन्थे।

रसेन्द्रवेधकम्। क्ली। स्वर्णे। वै.निघ.।

रसेक्षुः। पुं। पुण्ड्रेक्षौ। रक्तेक्षौ। रा.नि.व. १४।

रसोत्तमः। पुं। सुवर्णुपे। रा.नि.व.१६। पारदे। रा.नि.व.१३। च.द.व्रणशोथ.चि.। रसाञ्जने। क्ली। घृते। रस.र.शा.व्रण.चि.। त्रि। श्रेष्ठरसे।

रसोदरम्। क्ली। हिङ्गुले। रा.नि.व.१३।

रसोद्भवम्। क्ली। हिङ्गुले, तद्विशेषे। रसाञ्जने। रा.नि.व.१३।

रसोद्भूतम्। क्ली। रसाञ्जने। रा.नि.व.१३।

रसोनः (कः)। पुं। (Allium sativum.) Garlic. खनामख्यातकन्दशाके। रसुन। हिं लसून। मं पांढराणसुण। कं बिलियवेल्लुल्लि। तें तेल्लवुल्लि। ता. वेल्लइपाण्डु। तत्पर्य्यायाः,—रसुनः महौषधः गृञ्जनं अरिष्टः महाकन्दः कटुकन्दः राहुच्छिष्टः राहुत्सृष्टः म्लेच्छकन्दः भूतघ्नः उग्रगन्धः यवनेष्टः। स द्विधा श्वेतलोहितभेदात्। सा. गुणाः—अस्यरसोनः पित्ततमी गुरुष्णः कफवातघ्नः। रा.नि.व.७। श्वेतगुणाः—"रसोन उष्णः कटुपिच्छिलश्च स्निग्धो गुरुः स्वादुरसोऽतिबल्यः। हृद्यश्च मेधास्वरवर्णचक्षुर्भग्नास्थिसन्धानकरः सुतीक्ष्णः॥ हृद्रोगजीर्णज्वरकुक्षिशूलविबन्धगुल्मारुचिकृच्छ्रशीफनुत्। दुर्नामकुष्ठानिलसादजन्तुकफामयान् हन्ति महारसोनः॥" इति रक्तरसोनविशेषगुणाः। रा.नि.व.७। तदुत्पत्तिस्तत्रैव—"यदामृतं वैनतेयो जहार सुरसत्तमात्। तदा ततोऽपतद्बिन्दुः स रसोनोऽभवद्भुवि। पञ्चभिश्च रसैर्युक्तो रसोनस्तेन वर्जितः। तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः। कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः। नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः। बीजेषु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः॥ मद्यं मांसं तथाम्लञ्च हितं लसुनसेविनाम्। व्यायाममातपं रोषमतिनीरम्ययो गुडम्। रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम्॥" भा.। "शीतयेल्लगुनं शीते वसन्तेऽपि कफीत्वणः। घनोदयेऽपि वातार्त्तः सदा वा ग्रीष्मलीलया॥" वा.।

रसोनपिण्डः। पुं। ज्वरस्नाधिकारे औषधं। पाठः—"रसोनस्य पलशतं तिलस्य कुडवस्तथा। हिङ्गु त्रिकटुकक्षारौ द्वौ पञ्च लवणानि च। शतपुष्पा तथा कुष्ठम्पिप्पलीमूलचित्रकौ। अजमोदा यमानी च धान्यकञ्चैव बुद्धिमान्। प्रत्येकन्तु पलञ्चैषां श्लक्ष्णचूर्णानि कारयेत्। घृतभाण्डे तथाचैतत् स्थापयेद्दिनषोडश। प्रक्षिप्य तैलमाणिञ्च प्रस्थार्द्धं काञ्जिकस्य च। खादेत्कर्षप्रमाणञ्च तोयं मद्यम्पिबेदनु॥"...इत्यादि। चारौ यवचारसर्জ্জिचारौ। यमान्या भागद्वयं। केचिदजमोदां फीफान्दीमिव गृह्णन्ति। मानी पलाष्टकं। रसोनं तिलञ्च निस्तुषकृत्वा पिष्ट्वा चूर्णादिना मिश्रयेत्। अथ भाण्डे कृत्वा आगुधान्यराशौ स्थापयेत्। दुग्धसिक्त रसुन १०० प. निस्तुषतिल ३२ तो. हिं, त्रिकटु, यवक्षार, साँचिक्षार, पञ्चलवण, शुल्फा, पिपुलमूल, चितामूल, रास्नुनी, यमानी, धने' प्रत्येक चूर्ण १ प. (किंवा यमानी २ प.) तिलतैल ८ प. काँजि ८ प. समस्त एकत्र करिया घृतभाण्डे धानेर राशिते १७ दिन राखिबे। अनुपान ईषत् उष्ण जल। सा.कौ.। इहद्यथा—"रसोनस्य शतं चुण्यं तदर्द्धं निस्तुषात् तिलात्। पात्रे गव्यस्य तक्रस्य पिष्टैर्द्रव्यैः समक्षिपेत्। त्रिकटु धान्यकं चव्यं चित्रकङ्गजपिप्पली। अजमोदा त्वगेला च ग्रन्थिकञ्च पलांशिकम्। शर्करायाः पलान्यष्टौ पलांशं मरिचस्य च। कृष्णाजाज्यास्य चत्वारि मधुनश्च गुडस्य च। आर्द्रकस्य च चत्वारि सर्पिषोऽष्टौ पलानि च। तिलतैलस्य तावन्ति शुक्तस्यापि च विंशतिः। सिद्धार्थकस्य चत्वारि राजिकायास्तथैव च। कर्षप्रमाणं दातव्यं हिङ्गु लवणपञ्चकम्। एकीकृत्य दृढे भाण्डे धान्यमध्ये निधापयेत्। द्वादशाहात्समुद्धृत्य प्रातः खादेद्यथाबलम्...॥" अनु. सुरासौवीरकादीनि। पाचं १६ प्र.। रसुन १०० प. निस्तुषतिल ५० प. गाओया घोल १२८ प. त्रिकटु, धनिया, चई, चिताय मूल, गजपिपुल, वनयमानी, गुड़त्वक्, एला, पिपुलमूल प्रत्येक १ प. शर्करा ८ प. मरिच १ प. कृष्णजीरा ४ प. मधु ४ प. आर्द्रक ४ प. घृत ८ प. तिलतैल ८ प. काँजि २० प. श्वेत सरिषा ४ प. राईसरिषा ४ प. हिं २ तो. पञ्चलवण

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्येक २ तो. एकत्र शुष्क करतः घृतकुम्भे राखिया, धान्येन मध्ये १२ दिन राखिवे। रस.र.। वातव्याधौ स्वल्पं यथा—गुडूरसीनं १॥० प. हिङ्गु जीरकं सचललवणं गुडी पिप्पली मरिचम् एषां प्र. १ मा. सर्व्वं विलोड्य स्थापयेत्। सा.कौ।

रसोनाष्टकम्। क्ली। वातव्याध्यधिकारे औषधम्। "रसोनपक्वकन्दस्य गुलिका निस्तुषीकृताः। पाटयित्वा च मध्यस्थं दूरीकुर्य्यात्तदङ्कुरम्। निग्धयुगन्धनाशाय दग्धा सन्नीय रचयेत्। ततः प्रचाल्य संशोष्य शिलायाम्परिपेषयेत्। कल्कस्य पञ्चमभागं चूर्णमेषां विनिःक्षिपेत्। सौवर्च्चलं यमानीञ्च भर्ज्जितं हिङ्गुसैन्धवम्। कटुत्रिकञ्जीरकञ्च समभागानि चूर्णयेत्। तिलतैलञ्च कल्कस्य तुर्य्यांशं तत्र मिश्रयेत्। खादेत्कर्षमितम्मात्रः किंवा दोषाद्यपेक्षया। अनुपानम्प्रकुर्व्वीत वारि च घृतमन्वहम्॥" भा.म.२भ.।

रसोपलम्। क्ली। सौक्तिके। त्रिका.।

रसौदनः। पुं। मांसरसेन सहौदने। स च अर्शादिज्वरे हितः। "अर्शोपवासानिलजे हितौ नित्यं रसौदनः। उपवासश्रमक्लान्ते ज्वरे वाताधिके तथा। दीप्ताग्निं भोजयेत्याशु नरं मांसरसौदनम्॥" च.द.ज्व.चि.।

रस्यम्। क्ली। मांसधातौ। पक्वलदधि। वै.निघ.। रक्ते। भा.च.।

रस्ना (ह्स्ना)। स्त्री। राज्ञायाम्। रा.नि.व.६। वा.सू.१५अ.। पाठायाम्। रा.नि.व.४।

रक्तगन्धः (कः)। पुं। श्वेतालौ। गुग्गुलौ। वै.निघ.।

रक्तघ्ना (घ्नी)रक्तः। पुं। सूचक्लक्ष्यरोगे। भा.र.।

रक्तणिः (णी)। स्त्री। वायसाण्डालतायाम्। रा.नि.व.५।

रक्ता। स्त्री। जतुनि। जौ। मे.। भस्मनि। भा.र.। गोरोचनायाम्। वै.निघ.।

रक्तापत्रः। पुं। भूर्ज्जवृक्षे। रा.नि.व.९। क्ली। भूर्ज्जत्वचि। श्वेतसर्षपे। वै.निघ.।

रक्ताबीजः। पुं। रोठाकरञ्जे। वै.निघ.।

रक्तारेणुत्करः। पुं। शुष्कगोमयभस्मचूर्णप्रलेपे। भा.म.४भ.मसूरिका.चि.शीतलाधिकारे। "रक्तारेणूत्करो हितः।"

रक्तिताफलम्। क्ली। सर्षपे। वै.निघ.।

रक्तोन्नम्। क्ली। कार्पासे। हे.च.। हिङ्गुनि। रा.नि.व.५। पुं। भल्लातकवृक्षे। त्रिका.। श्वेतसर्षपवृक्षे। रा.नि.व.१६। भैष.क्षुद्रो.चि.। नागरङ्गवृक्षे। मद.व.६। स्त्री (ङ्गी)। वचायाम्। प.मु.।

रक्तोभूतः। पुं। श्वेतसर्षपवृक्षे। प.मु.।

रक्तोहा (न्)। पुं। महिषाक्षगुग्गुलौ। रा.नि.व.१२।

राः। पुं, स्त्री। काञ्चने। भा.र.। अम.।

राका। स्त्री। दृष्टरजस्कायां कन्यायां। हारा.। पूर्णिमायां। कच्छूरोगे। मे.।

रागः। पुं। अरोचके यौगविशेषे, रागषाड्वे। च.सू.१८अ.। "सितारुचकसिन्धूत्थैः सद्दाडिमरसैर्युतः। जम्बूफलरसैर्युक्तो रागो राजिकयान्वितः॥" सि.यो.अरोच.चि.। अलक्तके। सिन्दूरे। वै.निघ.।

रागखा(षा)ड़[ण्ड]वः। पुं। खाद्यद्रव्यभेदे। आमेर मोरब्बा। तत्करणक्रमः—"आममांसं लचाछीन छित्त्वा खण्डित्वा ततः। भाष्टमाज्ये मनागत्र खण्डपाकेऽथ युक्तितः। सुपक्वञ्च समुत्तार्य्य मरीचैर्लेन्दुवासितं स्थापितं स्निग्धमृद्भाण्डे रागखाण्डवसंज्ञितः। पुष्टिदो बलदः पित्तवाताखारुचिनाशनः। स्निग्धोगुरुस्सर्पणश्च सुस्वादूरागखाण्डवः॥" द्रव्यगुणः। वा.चि.१२अ.। दाड़िमद्राक्षारसयुक्तसुद्गयूषे। "स तु दाड़िमसद्राक्षीकायुक्तः स्याद्रागषाड्वः।" गुणाः—"रुचिकृल्लघुपाकश्च दोषाणामविरोधकृत्।" राज.३प.।

रागचूर्णः। पुं। खदिरवृक्षे। मे.। फल्गुचूर्णे। भा.र.। लाचारसे। रा.नि.व.६।

रागदः। पुं। तेरणीवृक्षे। रा.नि.व.४। लाचारसे।

रागदालिः। पुं। मसूरे। रा.नि.व.१६।

रागट्ट(ष्ट)क्। पुं। माणिक्ये। रा.नि.व.१३।

रागपुष्पः। पुं। बन्धुजीवपुष्पवृक्षे। वान्धूलि गाछ। रक्ताम्लाने। रा.नि.व.१०।

रागपुष्पी। स्त्री। ओड्रपुष्पवृक्षे। जवा गाछ। रा.नि.व.१०।

रागप्रसवः। पुं। बन्धुजीववृक्षे। रक्ताम्लानपुष्पवृक्षे। झुमुझाँटी। रा.नि.व.१०।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रागयुक् (ज्)। पुं। माक्षिके।
रागलता। स्त्री। उपस्थे।
रागषाड़वः। पुं। दाड़िमद्राक्षारसयुक्तमुद्गयूषे। स तु दाड़िमन्तद्रीद्राक्षायुक्तः स्याद्रागषाड़वः।" तद्गुणाः,—"रुचिकृल्लघुपाकश्च दीपनामविरोधकृत्॥" राज.३प.।
रागसारा। स्त्री। मनःशिलायाम्। वै.निघ.।
रागसूत्रम्। क्ली। पट्टवस्त्रे। मे.। [नि.व.६।
रागाङ्गी (ङ्या)। स्त्री। मञ्जिष्ठायाम्। रा.
रागो (इन्)। पुं। तृणधान्यविशेषे। संज्ञायाम्। कं रविगुचने। ततपर्य्यायाः—लाङ्गुनः लाङ्गुनो बहुतरकनिशः गुच्छकनिशः। गुणाः—तिक्तो मधुरः कषायः शीतः पित्तासृग्नः बलदश्च। रा.नि. व.१६। अशोकवृक्षे। वै.निघ.। [१०।
रागो (तरुः)। पुं। अशोकवृक्षे। रा.नि.व.
रामोष्टम्। क्ली। सुगन्धरोहिषतृणे। वै.निघ.।
राघवः। पुं। तिमिङ्गिलमत्स्ये। मे.। बृहदाकारमत्स्यभेदे। राघववोयाल।
राङ्कवः। पुं। तरुकण्टके। गाछेर काँटा। हारा.।
राङ्कवम्। क्ली। पशुलोमजातवस्त्रादौ। "राङ्कवं मृगलोमजम्।" अम.।
राङ्कवम्। क्ली। रक्तव्रणपुष्पे। रक्तव्रण फूल। गुणाः—रक्तपित्तघ्नम्। राज.५प.।
राजकम्। क्ली। कृष्णागुरुणि। वै.निघ.।
राजकदम्बः। पुं। कदम्बविशेषे। जटा.।
राजकन्या। स्त्री। केवुके। केविकापुष्पवृक्षे। रा.नि.व.१०। वै.निघ.जौषज्व.चि.कलिङ्गादिः।
राजकर्कटी। स्त्री। चौनकर्कट्यां। रा.नि.व.७।
राजकशेरुः (कः)। पुं। भद्रमुस्तायां। रा. नि.व.६। [वै.निघ.।
राजकार्श्यः। पुं। शालवृक्षे। शाल गाछ।
राजकाष्ठम्। क्ली। पत्तङ्गचन्दने। बकम काठ। वै.निघ.।
राजकुलकः। पुं। पटोललतायां। पटोल गाछ। प.मु.।
राजकुष्माण्डः। पुं। वार्त्ताकौ। बेगुन गाछ। जटा.।
राजकोलः। पुं। राजबदरवृक्षे। नारकुले कुल। रा.नि.व.११।
राजकोषातकी। स्त्री। पीतघोषायाम्। झिङा। प.मु.। हिं घियातरुइ। तोरइ। मद.। तत्पर्य्यायाः,—हस्तिपर्णिका पीतपुष्पिका धामार्गवः कीर्त्तफला महाजाली सपीतकः। गुणाः—शीतला मधुरा कफवातला पित्तघ्नी दीपनी श्वासज्वरकासकृमिघ्नी च। भा.पू.१भ.शा.व.।
राजखर्जूरी। स्त्री। पिण्डखर्जूरे। बड़ पिण्ड खेजूर। तत्पर्य्यायौ—राजपिण्डी नृपप्रिया। गुणाः—गौल्या स्वादे हिमा गुरुः पित्तदाहघ्नी श्वासभ्रमघ्नी वीर्य्यकरी च। रा.नि.व.११।
राजगिरा (रिः,री)। स्त्री। शाकविशेषे। राजशाक। तत्पर्य्यायाः,—राजाद्रिः राजशाकनिका। लघुस्थूलभेदेन द्विधा। गुणाः—रूक्षा पित्तघ्नी शीतला च। स्थूला अतिशीतला अतिरूक्षा च। रा.नि.व.७। बृहज्जम्बूवृक्षे। वै.निघ।
राजग्रीवः। पुं। मत्स्यविशेषे। फलुई माछ। तत्पर्य्यायाः,—फलकी चित्रफला राजग्रीवः मदार्मदः। विका.।
राजघासः। पुं। तृणभेदे। कालाकर्पूर, कालघास। गुणाः,—"राजघासतृणपतिः सपित्तानिलदाहनुत्। हरेद् रक्तातिसारञ्च रक्तपित्तमसृग्दरम्। अर्शांसि षड्विधान्येव मूत्रकृच्छ्रञ्च दारुणम्॥"
राजचम्पकम्। क्ली। पुन्नागपुष्पे। पुनाङ् फूल। सु.सू.३८अ.एलादि.।
राजचिह्नकम्। क्ली। शिग्रौ। श.च.।
राजजम्बुः (म्बूः)। स्त्री। महाजम्बूवृक्षे। बड़ जाम गाछ। र.मा.। हिं फलेन्द्रा। तें राचनेरड़िचेट्टु। गुणाः—"राजजम्बुफलं स्वादु विष्टम्भि गुरु रोचनम्।" भा.। पिण्डीखर्जूरे। पिण्ड खेजूर। मे.।
राजजक्ष्मा। पुं। स्वनामख्यातरोगे। यक्ष्मा रोग, क्षय रोग। निदानम्—"वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात्। विदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात्॥" अस्य निरुक्तिः—"वैद्यो व्याधिमतां यस्माद्व्याधिर्यत्नेन यक्ष्यते। स यक्ष्मा प्रोच्यते लोके शब्दशास्त्रविशारदैः। राज-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्द्रमसी यस्मादभूदेष किलामयः। तस्मात्तं राजयक्ष्मेति प्रवदन्ति मनीषिणः। क्रियाचयकरत्वात्तु चय इत्युच्यते बुधैः। संशीषणाद्वलादीनां शीषइत्यभिधीयते ॥" सम्प्राप्तिः—"कफप्रधानदोषेषु रुद्धेषु रसवर्त्मसु। अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तराः। क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानवः ॥" पूर्व्वरूपं—"श्वासाङ्गमादकफसंस्रवतालुशोषवक्त्रग्निसादमदपीनसकासनिद्राः। शीघ्रं भविष्यति भवन्ति स चापि जन्तुः शुक्लेक्षणो भवति मांसपरो रिरंसुः। स्वप्नेषु काकशुकशुक्लकिनीलकण्ठगृध्रास्तथैव कपयः क्रव्यलासकाश्च। तं वाहयन्ति स नदीर्विजलाश्च पश्येत् शुष्कास्तरून् पवनधूमदवार्दितांश्च ॥" इति। विरूपक्षयलक्षणं —"अंसपार्श्वाभितापश्च सन्तापः करपादयोः। ज्वरः सर्व्वाङ्गगश्चैव लक्षणं राजयक्ष्मणः ॥" एकादशरूपस्य यथा—"स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चासपार्श्वयोः। ज्वरो दाहोऽतिसारश्च पित्तादूक्तस्य चागमः। शिरसः परिपूर्णत्वमभक्तच्छन्द एव च। कासः कण्ठस्य चोद्ध्वंसी विज्ञेयः कफकोपतः। एकादशभिरेतैर्वा षड्भिर्वापि समन्वितः। कासातिसारपार्श्वार्त्तिस्वरभेदारुचिज्वरैः। विभिर्वा पीड़ितं लिङ्गैर्ज्वरकासास्रगामयैः। लक्ष्याच्छीघ्रार्हितं... । महाग्निं क्षीयमाणमतीसारनिपीड़ितं। गूनसुप्तोदरञ्चैव यक्ष्मिणं परिवर्ज्जयेत्। ज्वरानुबन्धरहितं बलवन्तं क्रियासहं। उपक्रमेदात्मवन्तं दोषाग्निमक्षयं नरम् ॥" मा.नि.।

राजजीरकम्। क्ली। C.Tribocularis.) जीरकभेदे। वस्. कुरुचुण्टज। कीषान्तरम्।

राजतर(रु)णी। स्त्री। पुष्पविशेषे, महातरणीपुष्पवृक्षे। वड़ शेउती। सं राजतरुणी। कं हिरियचेवड़ि। तत्पर्य्यायाः,—महावृक्षा वर्णपुष्पः अम्लानः अम्लातकः सुपुष्पः सुवर्णपुष्पः। गुणाः—कषाया कफकरी चक्षुष्या हृद्या सुगन्धिश्च। रा.नि.व.१०।

राजतरुः। पुं। कर्णिकारवृक्षे। छोट शोणालू। रा.नि.व.९। आरग्वधवृक्षे। वड़ शोणालू। वै.निघ.।

राजतालः। पुं। गुवाकवृक्षे। विका.। नारिकेलवृक्षे। वै.निघ.।

राजतालेश्वरः। पुं। कुष्ठाधिकारे रसः। पाठः—"नागस्य भस्म शाणैकं तीलकं गन्धकस्य च। द्विनिष्कं गुडतालस्य समुद्धृतं गवां जलैः। विपचेत् षोड़शगुणैः पात्रे तास्रमये शनैः। घर्म्मे दिवस्रं जम्बीरकुमारीवज्रकन्दजैः। रसैर्मर्द्दनस्य चाम्लीभिर्युतं वल्लद्वयं भजेत् ॥" र.सा.सं.।

राजतिमिश्रः } पुं। चिल्लाने, सुखाग्नि।
राजतिमिषः } तरमुज। हारा.। विका.।
See कालिन्दः।

राजदन्तः। पुं। दशनानामग्रस्थदन्तचतुष्टये। विका.।

राजद्रुमः। पुं। किरमाले, आरग्वधवृक्षे। शोन्दाल गाछ। हिं धनवहेड़ा। भेष सु.री.चि.। सि.यो.च.द.कफारीचक.चि.। "राजद्रुमाम्बु मधुना।" भा.म.४भ.सुख.री.चि.। 'यद्राजद्रुमचन्दनेन।"

राजधत्तू(स्तू)रकः। पुं। वृहद्धुस्तूरके। रा.नि.व.१०। पीतधुस्तूरवृक्षे। कनकधुत्तूरा। वै.निघ।

राजधान्यम्। क्ली। राजान्ननामकशालिधान्ये, नृपान्ने। राजभोग हैमन्तिक धान्यविशेष। श्यामाके। श्यामाधान। रा.नि.व.६।

राजधु(त्तू)स्तूरकः। पुं। वृहद्धुस्तूरके। पीतधुस्तूरवृक्षे। रा.नि.व.१०।

राजधूर्त्तः। पुं। पीतधुस्तूरे। वै.निघ.। वृहद्धुस्तूरवृक्षे। तत्पर्य्यायाः,—महाशठः निस्तेषपुष्पिकः भ्रान्तः पीतधुस्तूरकवृक्षः। रा.नि.व.१०।

राजनगः। पुं। राजगिरिशाके। वै.निघ.।

राजनामा (न्)। पुं। पटोले। रा.नि.व.३।

राजनिम्बूकः। पुं। निम्बूविशेषे। कागजी नेबू। वै.निघ.।

राजनीलम्। क्ली। मरकतमणौ। शू.र.।

राजनीलिका। स्त्री। महानील्याम्। वड़ नील। रा.नि.व.४।

राजन्यः (न्या)। पुं, स्त्री। राजादनवृक्षे। क्षीरिणी गाछ। जटा.। भा.।

राजन्यावर्त्तः (कः)। पुं। राजावर्त्तमणौ। रा.नि.व.१३।

राजपटोलः। पुं। मधुरपटोले। र.मा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजपटोलिका (ली)। स्त्री । मधुरपटोल्याम् । रा.नि.व.३ ।

राजपट्टः। पुं, क्ली । कान्तपाषाणे । चुम्बूक पाथर । त्रिका. । र.सा.सं.वृहच्चूडामणिरसे ।

राजपट्टिका। स्त्री । चातकपक्षिणि । हारा. ।

राजपत्नी। स्त्री । पित्तले । वै.निघ. ।

राजपर्णी। स्त्री । प्रसारण्यां लतायाम् । गन्धभाद्दुलिया । रा.नि.व.५ ।

राजपलाण्डुः। पुं । रक्तपलाण्डौ । छोट पेयाज । सं कं रक्तकान्दा, लोहितवीजल्लि, कॆंपिनउल्लि, यावउल्लि । तत्पर्य्यायाः,—यवनेष्टः राजप्रियः राजेष्टः महाशूलः दीर्घपत्रः रोकः महाकन्दः नृपकन्दः नृपप्रियः नृपान्नयः नृपेष्टः रक्तकन्दः । गुणाः—शीतलः पित्तघ्नः कफघ्नः दीपनः बहुनिद्राकरश्च । तथाच—"वक्ष्यते नृपपलाण्डुलक्षणं चारतीक्ष्णमधुरो रुचिप्रदः । कण्ठशीर्षशमनोऽतिदीपनः श्लेष्मपित्तशमनोऽतिहृद्यः ॥" रा.नि.व.७ । बहुनिद्राकरश्च ।

राजपिण्डा। स्त्री । पिण्डखर्ज्जूरिकायाम् ।

राजपीलुः। पुं । महापीलुवृक्षे । रा.नि.व.११ ।

राजपुत्रः (कः)। पुं । चोरिकावृक्षे । महाराजचूतवृक्षे । भा. । रा.नि.व.११ ।

राजपुत्रिका। स्त्री । शरारिपक्षिणि । शराल पाखी । "शरारि-राटि-राड़िश्च हापुत्री राजपुत्रिका ।" जटा. । शुक्लयूथिकायाम् । पित्तले । वै.निघ. ।

राजपुत्री। स्त्री । कटुतुम्ब्याम् । तिरलाउ । रा.नि.व.३।२३ । रेणुकायाम् । रेणुक बीज । रा.नि.व.६ २३ । जातीपुष्पवृक्षे । चामेली फूलेर गाछ । रा.नि.व.१०।२३ । राजरीतौ । वेङापितल । रा.नि.व.१३ । कुकुन्दर्य्याम् । छुँचो । रा.नि.व.१९ । वनमल्लिकायाम् । वै.निघ. । मालत्याम् । जटा. ।

राजपुष्पः। पुं । नागकेशरवृक्षे । नागेश्वर गाछ । भ.च. । तत्पर्य्यायाः,—चाम्पेयः केशरः नागकेशरः कनकाह्वयः महौषधं राजपुष्पः फलकः खरघातनः ।

राजपुष्पी। स्त्री । कीकटदेशे करवीरुणीनाम्ना ख्याते पुष्पवृक्षे । रा.नि.व.१० । वनमल्लिकायाम् । जातीपुष्पवृक्षे । वै.निघ. ।

राजपूज्यम्। क्ली । स्वर्णे । वै.निघ. ।

राजप्रियः। पुं । राजपलाण्डौ । रा.नि.व.७ । करञ्जीपुष्पवृक्षे । वै.निघ. । स्त्री (या) । कीकटदेशे ख्याते करञ्जीपुष्पवृक्षे । रा.नि.व.१० । तिलवासिनीशालौ । रक्तकशालौ । रा.नि.व.१६ ।

राजफणिञ्झकः। पुं । नागरङ्गवृक्षे । भ.मा. ।

राजफलः। पुं । राजामवृक्षे । राजादनीवृक्षे । थिर्नी गाछ । रा.नि.व.११ । क्ली । पटोले । त्रिका. । स्त्री (ला) । राजजम्बूवृक्षे । बड़ जाम गाछ । रा.नि.व.११ ।

राजफल्गुः। पुं । क्षणीदुम्बरवृक्षे । काकडुमुर गाछ । वै.निघ. ।

राजबदरम्। क्ली । रक्तामलके । लवणे । मे. । पुं । उत्तमबदरवृक्षे । नारिकुले, पाटनाई प्रभृति बड़ ओ मिष्ट कुल । सं राजबीर । कं रायबरतरु । तत्पर्य्यायाः,—नृपबदरः नृपश्रेष्ठः राजकोलः राजवल्लभः पृथुकोलः तनूबीजः मधुरफलः । गुणाः—मधुरः शीतः दाहपित्तवातघ्नः हृद्यः वीर्य्यवृद्धिकरः श्लेष्मशमहरश्च । रा.नि.व.११ ।

राजबला। स्त्री । प्रसारण्याम् । गन्धभाद्दुलिया । रा.नि.व.५ ।

राजभक्तम्। क्ली । नृपभोज्यान्ने पानादौ च । राजार अन्न । तत्परीक्षा—"नृपभक्तादलिं न्यस्तं सविषम्भक्षयन्ति ये । तत्रैव ते विनश्यन्ति मक्षिकावायसादयः । हुतभुक् तेन चान्नेन भृशं चटचटायते । मयूरकण्ठप्रतिमो जायते चापि दुःसहः । दुष्टान्नं विषसंसृष्टं म्रियन्ते जीवजीवकाः । पृषतो विसृजत्यग्रु विष्ठां मुञ्चति मर्कटः ॥" सु.कल्प.१अ. ।

राजभट्टिका। स्त्री । हापुत्रीपक्षिणि । जटा. । "गीभण्डोरं पङ्कीरी हापुत्री राजभट्टिका ।

राजभद्रकः। पुं । पारिभद्रकवृक्षे । निम्बवृक्षे । कुष्ठे । कूड़ । कुन्दुरुके । रा.नि.व.२३ । राजार्के । श्वेत आकन्द । रा.नि.व.१२ ।

राजभावा। स्त्री । तिलवासिनीशालौ । रा.नि.व.१६ ।

राजभोगः। पुं । शालिधान्यविशेषे । राजभोग धान । राजनः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजभोग्यम्। क्ली। जातीफले। जायफल। पुं। प्रियालवृक्षे। भ.च.। त्रि। राजभोगार्हे।

राजमण्डूकः। पुं। महामण्डूके। बड़ बेङ, सोणाबेङ। रा.नि.व.१९।

राजमान्यम्। क्ली। पटोले। वै.निघ.।

राजमाषः। पुं। (Vigna catiang. Syn. Dolichos sinensis.) माषविशेषे। वरवटी। हिं लोबिया, रसे, बोड़ा। मं नीलउरीद। कं नीलउण्डु। तत्पर्य्यायाः,—वर्ब्बटः मरुत्करः द्विजग्रासः नीलमाषः नृपमाषः नृपोचितः सितमाषः। गुणाः—कफपित्तहरः रूक्षः वातलः बलकरश्च। रा.नि.व.१६। "राजमाषः सरो रूक्षः कफघ्नश्चास्रपित्तकृत्। स स्वादुर्वातलो रूक्षः कषायो विषदो गुरुः॥" च.सू.२७अ.। स श्वेतरक्तकृष्णभेदेन त्रिविधः। एषु यो महान् स एव गुणाधिक्यी ज्ञेयः। भा.पू.१भ.धा.व.। तत्सूपगुणाः—"राजमाषभवः सूपः स्वादुरूक्षः कषायकः। याही गुरुर्वातकरः स्वल्पकृद्रुचिकारकः॥" द्रव्यगुणः।

राजमृगः। पुं। मकुष्ठके। ভাল মুগ। हे.च.।

राजमृगाङ्कः। पुं। राजयक्ष्माधिकारि रसः। पाठः—"रसभस्म त्रयो भागा भागैकं हेमभस्मकं। सूततास्रस्य भागैकं शिलागन्धकतालकं। प्रति भागद्वयं गृह्यमेकीकृत्य विचूर्णयेत्। वराटिका तेन पूर्य्या आजचौरेण टङ्कण। पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तं निरोधयेत्। शुष्कं गजपुटे पाच्यं चूर्णयेत् साङ्गशीतलं। दशपिप्पलिकैः क्षौद्रैः मरिचैर्वा घृतान्वितैः॥" मात्रा ४ गुञ्जा। रस ७ तो. स्वर्ण १ तो. ताम्र १ तो. शुद्ध मनछाल, गन्धक, हरिताल प्रत्येक २ तो. एकत्र चूर्ण करिया बड़ बड़ कड़ির ভিতর पूरिया छागदुग्धे सोहागा माड़िया तद्द्वारा कड़ির मुख बन्ध करतः मृत्ताण्डे रुद्ध करिया गजपुटे पाक करिबे। शीतल हইলে तुलिया १०टी पिप्पल वा मरिच १०टी, वा १९टीর सहित घृत ও मधु अनुपाने सेव्य। मात्रा ४ रति। र.सा.सं.।

राजयक्ष्मा। पुं। See राजजक्ष्मा।

राजयोग्यम्। क्ली। चन्दने। वै.निघ.।

राजरक्तम्। क्ली। रजते। भ.र.।

राजराजिका। स्त्री। राजसर्षपे। রাই সরিষা। रा.नि.व.१६।

राजराजेश्वररसः। पुं। कुष्ठाधिकारि रसः। पाठः—"विफला खादिरं सारमभ्रं वा गुञ्जीफलं। आतपे मर्दयेत् सूतं गन्धकं समतामकं। सुश्लक्ष्णमर्दितं तावं यावच्च विलीयते। भृङ्गराजद्रवं दत्त्वा दिनमात्रं विमर्दयेत्। प्रत्येकं सूततुल्यं स्याच्चूर्णीकृत्य विमर्दयेत्। मध्वाज्याभ्यां लौहपात्रे कर्षाभ्यां भक्षयेत्ततः..." र.सा.सं.।

राजरीतिः। स्त्री। पित्तलविशेषे। বেঙা-পিতল। तत्पर्य्यायाः,—पाकतुण्डी राजपुत्री सहेश्वरी ब्रह्मरीतिः ब्रह्मणी कपिला पिङ्गला। गुणाः—तिक्ता शीता लवणरसा शोधनी पाण्डु-वातक्रिमिप्लीहपित्तघ्नी च। रा.नि.व.१३।

राजलक्ष्मीः। स्त्री। कदलीवृक्षे। কলাগাছ। रा.नि.व.११।

राजवर्त्तः। पुं। राजवर्त्तमणौ। हिं राइटी। भा.म.कर्णरो.चि.। "नीतकं राजवर्त्तम्।"

राजवल्लभः। पुं। राजान्ने। খাস আম। राजबदरे। राजादनीवृक्षे। श्वेर्णी গাছ। रा.नि.व.११। नारायणदासकृत-द्रव्यगुणग्रन्थविशेषे। गृहीत्वा रसः। पाठः—'जातीफललवङ्गाब्दत्वगेला-टङ्करामठं। क्षीरकं तेजपत्रञ्च यमानीविश्वसैन्धवं। लौहमभ्रं सतास्रञ्च रसगन्धकमेव च। मरिचं विहता रूप्यं प्रत्येकं तोलकोन्मितं। धात्रीरसे वटीं कुर्य्यात् डिगुञ्जाफलमानतः। हन्ति शूलं तथा गुल्ममामवातं सुदारुणम्॥" रस.र.।

राजवल्ली। स्त्री। कारवेल्लके। উচ্ছে। हिं करला। र.मा.।

राजवासनः। पुं। भृङ्गराजपक्षिणि।

राजवाहः। पुं। घोटके। भ.च.।

राजवृक्षः। पुं। आरग्वधवृक्षे। प.मु.। च.द.। मू.क.चि.परिषामशूले। र.सा.सं.। सु.सू.३९अ.। सु.चि.१०। पियालवृक्षे। मे.। लङ्कास्थायिवृक्षे। लङ्कासीजू। भ.च.। भा.यो.निरो.चि.। "पथ्या-पर्पटरालवृक्षकटुका।" श्लेष्मातकवृक्षे। सा.कौ.र. चि.वल्मीकरे। [गाछ। भ.मा.।

राजशणः। पुं। पाट इति ख्यातवृक्षे। পাট

राजशाकः। पुं। वास्तूकशाके। বেতো শাক। प.मु.। रा.नि.व.७।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजशाकिनी। स्त्री। राजगिरिनामपत्रशाके। राज शाक, बेतो शाक। गुणः—रूक्षा पित्तघ्नी शीतला च। रा.नि.व.७।

राजशालिः। पुं। राजभोग्यशालिधान्यविशेषे। राजभोग हैमन्तिक धान्य। प.मु.।

राजशिम्बी। स्त्री। श्वेतशिम्ब्याम्। निघण्टौ। वै.निघ.।

राजशुकः। पुं। पक्षिविशेषे। मयना पाखी। हिं राजशुगा। रा.नि.व.१९।

राजशूकजम्। क्ली। शालिधान्ये। हैमन्तिक धान्यविशेष। प.मु.।

राजशृङ्गः। पुं। मद्गुरमत्स्ये। हे.च.।

राजसफरः। पुं। इल्लिशमत्स्ये। इलिश। रा.।

राजसर्षपः। पुं। सर्षपविशेषे। राज सरिषा। चिका.। हे.च.।

राजसर्षपः। पुं। राजिकायां, कृष्णवर्णसर्षपे। राईसरिषा, काल सरिषा। हिं राइ। तत्पर्य्यायाः,—राजिका कृष्णिका सूरी सुषकः व्यष्टकः कटुकः चवः चुताभिजननः क्षुधाभिजननः कृष्णा तीक्ष्णफला राजी कृष्णसर्षपाख्या। गुणाः—तिक्तः कटुः उष्णः वातशूलघ्नः पित्तदाहजनकः गुल्मकण्डूकुष्ठव्रणघ्नश्च। रा.नि.व.१९।

राजसारसः। पुं। मयूरे। श.मा.।

राजसी। स्त्री। श्वेततुलस्याम्। वै.निघ.।

राजसुषवी। स्त्री। कारवेल्लभेदे। गन्धाकरला। प.मु.।

राजसैरेयकः। पुं। नीलझिण्ट्याम्। वम्. निलाकोरण्टा। वै.निघ.।

राजस्कन्धः। पुं। घोटके। चिका.।

राजस्वर्णः। पुं। राजधुस्तूरवृक्षे। कनकधुतूरा। रा.नि.व.१०।

राजहंसः। पुं। लोहितचञ्चुचरणश्वेतहंसे। राजहाँस। अम.। कदम्बवृक्षे। मे.।

राजहर्षणम्। क्ली। तगरपुष्पे। रा.नि.व.१०।

राजहासः (कः)। पुं। मत्स्यविशेषे। काँलामाछ। तत्पर्य्यायाः,—कातरः कातलः राजिवः। अ.र.। See कातलः।

राजक्षवः (कः)। पुं। राजसर्षपे। राई वा काल सरिषा। रा.नि.व.१९। तच्छाकगुणाः—"त्रिदोषशमनं लघु। याहि शस्तं विशेषेण गुल्मशूलविकारिणाम्॥" च.सू.२७अ.। छिक्किन्याम्। हेँचेता। वै.निघ.। दुग्धिकायाम्। च.सू.४अ.। हर्षणे।

राजा (न्)। पुं। छिक्किनीवृक्षे। हेँचेता। वै.निघ.।

राजाग्रः। पुं। राजगिरिशाके। वै.निघ.।

राजातनः। पुं। पीतशालवृक्षे। पेयाशाल। रा.नि.व.११।

राजात्यावर्त्तकः। पुं। राजावर्त्ते।

राजादनः। पुं। चीरिणीवृक्षे। क्षीरिणी। किंशुकवृक्षे। पलाशवृक्षे। प.मु.। पीतशालवृक्षे। रा.नि.व.११। क्ली। पीतशालफले। सु.सू.३८ अ.पटुपञ्चकादिः। किंशुकपुष्पे। मे.। चौरिकाफले। खिर्णीफल। प.मु.।

राजादनफलः। पुं। चीरिणीवृक्षे। खिर्णी गाछ। वै.निघ.।

राजादनी। स्त्री। (Mimusops hexandra.) स्वनामख्यातस्वादुफलवृक्षविशेषे। खिरणी इति गौर्জ্জरे प्रसिद्धा। खिरणी, क्षीरखेजूर। हिं चौरी। रायणी, रेवण इति महाराष्ट्रादौ। वम्. वैर्णी। ता. पल्ल। तत्पर्य्यायाः,—राजफलः राजवल्लभः कपोष्टः चौरवृक्षः चारी नृपद्रुमः निम्बबीजः मधुफलः माधवीद्रवः गुच्छफलः भूपिष्टः श्रीफलः दृढस्कन्दः चीरशुक्लः। गुणाः—मधुरा पित्तघ्नी गुरुः तर्पणी वृष्या स्थौल्यकरी स्निग्धा मेहघ्नी च। रा.नि.व.११। फलं गुरु स्निग्धं स्वादु कषायञ्च। सु.सू.४६अ.। मधुरं स्वादु च। अनि.१७अ.। अपिच,—राजादनः फलाध्यक्षो राजन्या चीरिकापि च। चीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु। तृष्णामूर्च्छा मदभ्रान्तिक्षयदीपक्षयापहम्॥ भा.। तिलवासिनीशाली। रा.नि.व.१६।

राजाद्रिः। पुं। राजगिरिशाकवृक्षे। वै.निघ.।

राजान्नम्। क्ली। कर्णाटदेशे प्रसिद्धे शालिधान्यभेदे। राजभोग, हैमन्तिक धान्यविशेष। तत्पर्य्यायाः,—नृपान्नं राजार्हं दीर्घशूककं धान्यश्रेष्ठं राजधान्यं राजेष्टं दीर्घकूरकं। गुणाः—त्रिदोषघ्नं सुस्निग्धं मधुरं लघु दीपनं बलकृत्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पथ्यं कान्तिदं वीर्य्यवर्द्धनञ्च । तच्च विविध सगुरुकश्चेतरकृष्णभेदेन, उत्तरोत्तरं रसाधिकञ्च । वैविध्याच्च तण्डुला हरितपीतलोहिताः सामान्यतो भवन्ति । गुणैश्च पूर्व्वपूर्व्वोत्तराः । सु. सू. । रा. नि.व १६ ।

राजाम्रः । पुं । आम्रविशेषे । सं राजांबा । कं रायमचु । तें राचमामिड़िचेट्टु । भा. । तत्पर्य्यायाः,—राजफलः स्मरास्रः कोकिलानन्दः काकिलीत्सवः कामेष्टः नृपवल्लभः कामाम्रः राजपुत्रकः । गुणाः—कोमलाः राजाम्राः—कटुम्लाः पित्तदाहकराश्च । सुपक्वास्तु—स्वादुमाधुर्य्याः बलपुष्टिवीर्य्यप्रदाश्च । तत्फलं विविधं बालमध्यपक्वभेदेन । विल्वेव राजाम्रेषु रसाधिक्यसाम्यं वर्त्तते । गुणाधिक्यन्तु उत्तरोत्तर ज्ञेयम् । किञ्च एषां बालफलं कफवातरक्तश्वासपित्तजनकं । मध्य फलं तादृशमेव गुणसम्पन्नं दीपबहुलं पर कषायाम्लञ्च । पक्वफलं मधुरं विदीपघ्न त्रणादाहश्रमश्वासारोचकहरं गुरु हिमञ्च । रा.नि.व.१० ।

राजाम्रातकः । पु । राजाम्रातकवृक्षे । वै.निघ.।

राजाम्लः । पुं । अम्लवेतसे । रा.नि.व.६ ।

राजार्कः । पुं । श्वेतार्के । श्वेत आकन्द । र.मा. । सं मन्दारः । कं बंदारयक्कै । गुणाः—कटु-तिक्तोष्णः कफमेदोविषघ्नः वात-कुष्ठव्रणघ्नः शोथकण्डूविसर्पघ्नः । रा.नि.व.१० ।

राजार्हम् । क्ली । अगुरुकाष्ठे । सं । कर्पूरे । त्रणागुरुकाष्ठे । वै.निघ. । शालिधान्यविशेषे । राजभोग्य धान । रा.नि.व.१६ । स्त्री (र्हा) । जम्बूवृक्षे । जाम गाछ । रा.नि.व.११ ।

राजालाबुः । स्त्री । स्वादुतुम्ब्यां । मिठा लाउ । तत्पर्य्यायाः,—तुम्बकः महातुम्बी मिष्टतुम्बी अलाबूनी मधरालाबूनी भक्ष्यालाबूः श्राकालाबूः । गुणाः—गुरुः हृद्या कफपित्तघ्नी च । मद. ।

राजालुकः । पुं । महाकन्दे । ब्रुन । हारा. ।

राजावर्त्तः । पुं । खनामख्याते उपरत्नभेदे । स्फटिकजातौ । हिं रेवटी । तत्पर्य्यायाः,—आवर्त्तः आवर्त्तमणिः नृपावर्त्तः राजात्यावर्त्तकः । गुणाः—मृदुः शीतलः कटुः स्निग्धः पित्तघ्नः सौभाग्यजनकश्च । लक्षण..."निगरितमसितं मसृणं नीलं गुरु निर्म्मल बहुच्छायम् । शिखिकण्ठसमं सौम्यं राजावर्त्तं वदन्ति जात्यमणिम ॥" रा.नि.व.१३ ।

राजाहिः । पुं । द्विमुखसर्पे । राज साप । तत्पर्य्यायाः,...द्विमुखाहिः विल्लवासी विषायुधः । विका. ।

राजाह्वम् । क्ली । कर्णिकारफले । कनिका फल वा चीनेर करवी फल । वा.सू.१५अ. । स्त्री (ह्वा) । राजादनीवृक्षे । श्वेतार्कवृक्षे । वै.निघ.।

राजिका । स्त्री । (Brassica juncea. Syn. Sinapis juncea or Brassica nigra.) श्वेतराजिकायाम् । गौरसर्षपे । श्वेत राई । राजसर्षपे । काल सरिषा, राई, कृष्ण राई । मे. । रक्तसर्षपे । राई । तत्पर्य्यायाः,—राजी आसुरी रक्तिका रक्तसर्षपः तीक्ष्णगन्धा मधूलिका चयः चवकः क्षुतकः । रा.नि.व.१६ । गुणाः—"राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत् । किञ्चिद्वातग्निदा कण्डूकुष्ठकीटकृमीन् हरेत् । अतितीक्ष्णा विशेषेण तद्वत्कृष्णापि राजिका ॥" भा. । राजिकातैलगुणाः—तीक्ष्णं वातादिदीपघ्नं शीतलं कटु पुंस्त्वघ्नं कैश्यं त्वग्दोषनाशनञ्च । रा.नि.व.१५ । तत्पत्रगुणाः—कटूष्णं कृमिवातकफघ्नं कण्डरोगघ्नं स्वादु दीपनञ्च । रा.नि.व.७ । षण्डरोग्यात्मके माने । "ताभिः षड्भिश्च राजिका ।" प.प्र. । क्षुद्रीदुस्वरे । कैदारे । मे. । क्षुद्ररोगभेदे । घामाचि । मा.नि. ।

राजिकाफलः । पुं । गौरसर्षपे । श्वेत सरिषा । रा.नि.व.१६ ।

राजिकाह्वा । स्त्री । तन्नामकक्षुद्ररोगभेदे । घामाचि । लक्षणं यथा..."धर्म्मस्वेदपरीतेऽङ्गे पिटिकाः सरुजो घनाः । राजिकावर्णसंस्थानप्रमाणा राजिकाह्वयाः ॥" वा.उ.३१अ. ।

राजिचित्रः । पुं । राजिमच्छर्पविशेषे । सु. कल्प.४अ. ।

राजिफला । स्त्री । चीनकर्कटीलतायाम् रा.नि.व.७ ।

राजिभः । पुं । दुण्डुभसर्पे । ढोंड़ासाप । वै.निघ. ।

राजिमत्फला । स्त्री । मधुकीषातक्याम् । झिंडे धुन्दुल । भा.पू.१भ.शा.व. ।

राजि(की)मान् । पुं । भौमसर्पभेदे । लक्षणं ..."राजीमन्तस्तु राजिभिः । स्निग्धा विचित्रवर्णाभिस्तिर्य्यगूर्द्धं विचिविताः ॥" तेन दष्टस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमे वेगे रक्तं दुष्टं पाण्डुतां गच्छति। द्वितीये अतिगात्रगुरुत्वं। तृतीये दंशविक्लेदादयः। चतुर्थे मस्तकगुरुत्वादयः। पञ्चमे गात्रभङ्गादयः। शेषयोः दर्व्वीकरवत्। वा.उ.३६अ.।

राजिलः। पुं। डुण्डुभसर्पे। टोंड़ा साप। अम.। पटोले। सर्पजातिविशेषे। तल्लक्षणं यथा... पुण्डरीकराजिचित्राङ्गुलराजिबिन्दुराजिकर्कटक तृणशीषकसंसर्पकश्चेति तण्डुलदर्भपुष्पचक्रकगोधूमक किल्कसादयेति। वा.।

राजिलफला। स्त्री। एर्व्वारुकभेदे। वै.निघ.।

राजी। स्त्री। रक्तसर्षपे। राईसरिषा। रा.नि.व.१६। वै.निघ.२भ.दुर्जलज्व.चि.गुरुप्रादिकल्के। वाकुच्याम्। सोमराज। तिक्तपटोले। मत्स्यविशेषे। वै.निघ.।

राजीफलः। पुं। पटोलतायाम्। भा.म.१ भ.चित्तभ्रम.ज्व.चि.। "राजीफलैः संयुताः।" तिक्तपटोले। तित्पलता। वै.निघ.।

राजीमती। स्त्री। स्त्रिङ्गनाम्नरोगस्त्रीपद्रव विशेषे। यथा—"राजीमतीष्ङ्निचिता श्यालिशूकाभराजिभिः।" वा.उ.१४अ.।

राजीलः। पुं। राजसर्षपे। राईसरिषा। वै.निघ.।

राजीवम्। क्ली। पद्मे। प.मु.। रा.नि.व.१०। तन्मूलं शूकरदंष्ट्रे हितम्। पुं। हरिणभेदे। हस्तिनि। चिका.। सारसपक्षिणि। अम.। नादेयमत्स्यविशेषे। मे.।

राजेन्द्रः। पुं। राजगिराशाके। वै.निघ.।

राजेयः। पुं। पटोले। भा.पू.१भ.शा.व.।

राजेष्टम्। क्ली। हृपान्ने, राजान्ने। राजभोग हैमन्तिक धान्यविशेष। रा.नि.व.१६। पुं। राजपलाण्डौ। रा.नि.व.७। स्त्री (ष्टा)। कदलीवृक्षे। रा.नि.व.११। पिण्डीखर्ज्जरे। वै.निघ.।

राजोद्वेजनसंज्ञकः। पुं। चवके, भूताङ्कुशवृक्षे। हेँचेता। रा.नि.व.९।

राज्यक्ता। स्त्री। पिष्टराजिकादधिलवणमिश्रितसूक्ष्मालाबूखण्डादिक्लृप्ते व्यञ्जनविशेषे। राँइता। "राज्यक्तयातिरोचिन्या पाचन्या तांस्तु भक्षयेत्।" भा.।

राज्ञी। स्त्री। नील्याम्। नील गाछ। रा.नि.व.४। कांस्ये। हे.च.। जातीपुष्पवृक्षे। पित्तले राजसर्षपे। कालसरिषा, राई। रा.नि.व.१६।

राटः (ठः)। पुं। मदनवृक्षे। मयना गाछ। रा.नि.व.८। र.सा.सं. उदावर्त्तलेपे। वा.उ.३७अ.।

राटिः (ड़िः)। पुं। शरारिपक्षिणि। शराल पाखी। अम.।

राडपुष्पम्। क्ली। मदनपुष्पे। वा.उ.२अ.।

रात्रिः। स्त्री। हरिद्रायाम्। रा.नि.व.६। वै. निघ.२भ.ग्रहणी.चि.। रजन्याम्।

रात्रिकः। पुं। उष्ट्रधूमकाख्ये उच्चिटिङ्गाख्ये वा हृश्चिकभेदे। "शिरीषपुष्पं सकरञ्जबीजं काश्मीरजं कुष्ठमनःशिलाश्च। एषोऽगदो रात्रिकहृश्चिकानां संक्रान्तिकारी कथितो जिनेन॥" वा. उ.३७अ.।

रात्रिजलम्। क्ली। कुड्मटिकायाम्। शब्दमा.।

रात्रिजागरः। पुं। कुक्कुरे। हे.च.।

रात्रिजागरदः। पुं। मशके। रा.नि.व.१९।

रात्रिनामिका। स्त्री। हरिद्रायाम्।

रात्रिपुष्पम्। क्ली। उत्पले। शुन्दिफूल, हेला फूल। रा.नि.व.१०।

रात्रिपुष्पिका। स्त्री। शुक्लजातीवृक्षे। श्वेत जाती गाछ। वै.निघ.।

रात्रिवियोगी (न्) । पुं। चक्रवाके। वै. निघ.।

रात्रिविश्लेषगामी (न्)। पुं। चक्रवाकपक्षिणि। रा.नि.व.१९।

रात्रिवेदः (दी(न्))। पुं। कुक्कुटे। चिका.।

रात्रिहासः। पुं। श्वेतोत्पले। शब्दर.।

रात्र्यन्धः। वि। तन्नामकदृष्टिरोगयुक्ते, काकादौ। रातिकाणा।

राधवङ्गः। पुं। करकायाम्।

राद्धः। वि। पक्वे। हे.च.। क्ली। द्यूतान्तरभुक्तौ, द्यूतान्तरभुक्ते या। त्रिका.।

राधा। स्त्री। विष्णुक्रान्तायां। आमलक्यां। मे.।

राधामाधवः। पुं। वैद्यरत्नावलीकारे।

रामम्। क्ली। तमालपत्रे। तेजपत्र। रा. नि.व.६। कुष्ठे। कूठ। रा.नि.व.१२। वासुके। मे.। पुं। अशोकवृक्षे। पक्षी। त्रिका.। घोटके। मे.। शुक्लवर्णे। कृष्णवर्णे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामकः। पुं। जलापामार्गे। वै.निघ.।

रामकन्दः। पुं। अमीहत्वे। प.मु.।

रामकर्पूरकः। पुं। कचूरे। गन्धकचूर, रामकर्पूर। भ.र.।

रामकाण्डः। पुं। रामशरे। रा.नि.व.८।

रामकोशा(षा)तकी। स्त्री। महाशुक्लकोशातक्याम्। वै.निघ.।

रामगुवाकः। पुं। रामपूगवृक्षे। राम सुपारि।

रामचन्द्रः। पुं। रसप्रदीपकारे। रसेन्द्रचिन्तामणिकारे।

रामच्छदनकः। पुं। मदनवृक्षे। भा.।

रामजननी। स्त्री। रेणुकायाम्।

रामठम्। क्ली। हिङ्गुनि। हिंग। र.मा.। रा.नि.व.६। मदनफले। च.द.वमनाधिकारे। पुं। अङ्कोटवृक्षे। र.मा.। जलापामार्गे। वै.निघ.।

रामठी। स्त्री। नाडीहिङ्गौ। रा.नि.व.६।

रामठः। पुं। पर्व्वतनिम्बवृक्षे, कैटर्य्यनिम्बे। तिन्दुकवृक्षे। रा.नि.व.९।

रामतरुणी। स्त्री। तरुणीपुष्पवृक्षे। श्वेतकेतकी फूलेर गाछ। रा.नि.व.१०।

रामदूतिका (ती)। स्त्री। नागदन्त्याम्। नागदनी। र.मा.। नागपुष्पायाम्। भा.। तुलसीविशेषे। तत्पर्य्यायाः,—पर्व्वपुष्पी विशल्या नागदन्तिका काण्डनी फणिज्झका सूक्ष्मपर्णी भरण्डाह्वा। भ.च.।

रामपूगः। पुं। गुवाकवृक्षविशेषे। तत्पर्य्यायाः, कामीनः मूनिपूगः सुवेरटः। त्रिका.।

रामभद्रा। स्त्री। गाम्भारीवृक्षे। वै.निघ.।

रामलवणम्। क्ली। शाकम्भरिलवणे। शाम्भरलवण। र.मा.।

रामवल्लभम्। क्ली। त्वचि। गुड़त्वक्। रा.नि.व.६।

रामवाणः। पुं। रामशरे। रा.नि.व.८।

रामवाणरसः। पुं। अजीर्णाधिकारे रसः। पाठः—"पारदाभ्रसलवङ्गगन्धकं भागयुग्मसरिचेन मिश्रितं। जातिकाफलमधार्द्धभागिकं तिन्तिड़ीफलरसेन मर्दितं। माषमात्रमनुपानयोगतः सद्य एव जठराग्निदीपनः॥" पारा, विष, लवङ्ग, गन्धक प्रत्येक १ तो. मरिच २ तो. जायफल ॥० तो. काँचा तेँतुलेर रसे भावना। वटी माषमात्रा। र.सा.सं.। रस.चि.भा.।

रामशरः। पुं। स्वनामख्यातशरवृक्षे, मुञ्जभेदे। रामशर, सरगील इति मालवदेशे प्रसिद्धः। रामशर। हिं रामशर, शरपत। तत्पर्य्यायाः,—रामकाण्डः रामेषुः अपर्व्वदण्डः दीर्घः नृपप्रियः। भा.। गुणाः—रसे अल्पकषायः पित्तकृत् वातकफघ्नश्च। एतन्मूलं ईषदुष्णं क्वचिदत्र। रा.नि.व.८।

रामशीतला। स्त्री। आरामशीतलायाम्। पत्रशाकविशेषे। रा.नि.व.१०।

रामशे (से) नः (कः)। पुं। भूनिम्बे। चिरेता। रा.नि.व.९। भा.म.१भ.चित्तभ्रमज्व.चि।

रामा। स्त्री। गृहकन्यायाम्। घृतकुमारी। रा.नि.व.६। हिङ्गुनि। मे.। हिङ्गुलि। भ.र.। अशोकवृक्षे। शातलायां। तमालपर्व्वे। वायमाणायाम्। रा.नि.व.१३। गोरीचनायां। रा.नि.व.१२। वासायाम्। गैरिके। भ.च.। श्वेतकण्टकार्य्याम्। रा.नि.व.४। आरामशीतलायां। रा.नि.व.१०।

रामाटरूषः। पुं। वासाभेदे। राम बासक। भैष.ज्व.चि दार्व्यादौ।

रामाप्रियः। पुं। त्वचि, दारुचीनीति प्रसिद्धे वल्कले। वै.निघ.।

रामालिङ्गनकामः। पुं। रक्तान्धानपुष्पवृक्षे। रक्तझाँटी। रा.नि.व.१०।

रामावक्षोजोपमः। पुं। चक्रवाके। रा.नि.व.९।

रामावामाङ्घ्रिघातकः। पुं। अशोकवृक्षे। रा.नि.व.१०।

रामेषुः। पुं। रामशरे। रा.नि.व.८।

रामोदुम्बरिकाफलम्। क्ली। अक्षीरफले। वै.निघ.।

रायणम्। क्ली। पीड़ायाम्। भ.र.।

रालः। पुं। (Mimosa rubicaulis.) सर्ज्जतरौ। धूनोर गाछ। हिं किलि। तें सर्ज्जरसमु, सर्ज्ज। पञ्जा. राल अर्थ। रा.नि.व.९। सर्ज्जरसे। धूना। तत्पर्य्यायाः,—सालः सालनिर्य्यासः सालरसः सलनः दैवेष्टः शीतलः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुरूपः सर्ज्जनिर्य्यासः सर्ज्जरसः सुरभीः यक्षधूपः सुरधूपः अग्निवल्लभः कल्कः कलकलः कललजः कलकलीद्भवः। गुणाः—शीतल. स्निग्धः कषायः तिक्तः संग्राही वातपित्तघ्नः स्फोटकण्डूतिव्रणघ्नश्च। पानलेपनगुणौ—शीतलः प्रदरघ्नश्च। रा.नि.व. १२। अपिच—"राली ग्राही हिमस्निग्धः कषायी ग्राहको हरेत्। दीपास्रक्श्वदंशपञ्चरव्रणविषापहः। ग्रहभग्नाग्निदग्धांश्च शूलातिसारनाशनः॥" भा.।

रालकार्य्यः। पुं। शालवृक्षे। रा.नि.व.९।

रालतैलम्। क्ली। सालवृक्षभव-तैले। गर्ज्जन तैल। गुणाः—तैलं सर्ज्जरसोद्भूतं विस्फोट-व्रणनाशनम्। कुष्ठपामाक्रिमिहरं वातश्लेष्मामया-पहम्।"

रालनिर्य्यासः। पुं। सालवृक्षे।

रालिका। स्त्री। धूनके। धूना। वै.निघ. २भ.अ.सा.पथ्या.ख्ये।

रावणः। पुं। वृक्षविशेषे। वम्. टेंसुरणी। वै. निघ.। अर्कप्रकाशनामवैद्यकग्रन्थकारे।

राशिः। पुं। द्रोणपरिमिते माने। प.प्र.१ख.। धान्यादिस्तूपे। ऋद्धौ। वृद्धौ। मात्रायाम्। च.वि.१अ.।

राषभी। स्त्री। कपिकच्छाम्। आलाकुशी। वै.निघ.। गर्द्दभ्याम्। श्र.र.।

राष्ट्रकम्। क्ली। वैदूर्य्यमणौ। प.सु.।

राष्ट्रिका। स्त्री। कण्डकार्य्याम्। प.सु.। वृक्षत्वां। रा.नि.व.४। र.मा.।

राष्ट्री। स्त्री। महाराष्ट्रीलतायाम्। काँचड़ा। प.सु.। रा.नि.व.२३।

रासः। पुं। शृङ्खलके। गांदा। क्रीडायाम्। त्रिका.।

रासना। स्त्री। रास्नायां। वै.निघ.कास.चि. विकटुकादिचूर्णे।

रासभः। पुं। गर्द्दभे। गांधा। अम.। (भी) स्त्री। गर्द्दभस्त्रियां। श्र.र। [च.।

रासभवन्दिनी। स्त्री। मल्लिकापुष्पवृक्षे। श्र.

रास्ना। स्त्री। (Vanda Roxburghii. Syn. Cymbidium tessaloides.) स्वनामख्याततरुलौषधौ केदारदेशे प्रसिद्धे। रास्ना। हिं रास्ना। तें किरम्मिचक्क। अन्तरद्दामर। तत्पर्य्यायाः,—द्रोणगन्धिका सर्पगन्धा पलङ्षा सुगन्धमूला सुगन्धा सुरसा गन्धनाकुली नकुलेष्टा नाकुली भुजङ्गाक्षी छत्राकी सुवहा श्रेयसी रसना रसा रसाख्या रस्या राम्निका अतिरसा सुक्तरसा रक्तरसा। सा त्रिधा—"रास्ना तु त्रिविधा प्रोक्ता मूलपत्रगणैस्तथा। ज्ञेयौ मूलदलौ श्रेष्ठौ तृणरास्ना च मध्यमा॥" रा.नि.व.६। सु.सू.३७अ. अर्कादिः। वा.सू.१५अ.निरूहणे अर्कादिः। "भार्गीं रास्ना वृष्टिकाली प्रकीर्य्या।" च.द.ज्व.चि.। "रास्ना वृक्षादनी दारु।" श्वेतकण्टकार्य्यास्। रा.नि.व.४।

रास्नागुग्गुलुः। पुं। वातव्याधौ औषधम्। पाठः..."रास्नायास्तु पलञ्चैकं कर्षान् पञ्च च गुग्गुलोः। सर्पिषा वटकं कृत्वा खादेद्वन्हिं च वर्द्धयेत्॥" रस.र.। अन्यः कर्णरोगे—"रास्ना-घृतैरण्ड सुराह्व-विश्वं तुल्यं पुरेणाथ विमर्द्य खादेत्।" भा.।

रास्नातैलम्। क्ली। वातव्याधौ तैलम्। पाठः—"रास्नाग्निरीषयष्ट्याह्वगुण्ठीसहचरामृताः। श्लेष्मातकदरूसम्पाका हयगन्धाचिकण्टकाः। एषां दशपलान् भागान् कषायमुपकल्पयेत्। ततस्तेन कषायेण सर्व्वगन्धैश्च कार्षिकैः। दध्यारणाल-माषाम्बुमूलकैक्षुरसैः शुभैः। पृथक् प्रस्थोन्मितैः सार्द्धं तैलप्रस्थं विपाचयेत्।" च.चि.२८अ.।

रास्नादशमूलम्। क्ली। वातव्याध्यादौ कषाये। पाठाः—"दशमूलास्थितेरण्ड-रास्ना नागर-दारुभिः। क्वाथो रुवुकतैलेन साधितं हन्त्यनिलं गुरुम्।" रस.र.।

रास्नादिः। पुं। रास्नावृक्षादनीदेवदारुसर-लैलवालुककृतकषाये। स क्षौद्रशर्करायुक्तो वातज्वरे हितः। चद.ज्व.चि.। "रास्नावृक्षादनीदारुसरलं सैलवालुकम्। कषायः शर्कराक्षौद्रयुक्तो वात-ज्वरापहः।" प्रयोगा.वात.ज्व.चि.। वृक्षादनी बन्दाकः (वान्दरा)।

रास्नादिलौहम्। क्ली। राजयक्ष्माधिकारे, श्वासकासे च लौहम्। पाठः—"रासाश्वगन्धार्कपूर-भेकपर्णीशिलाह्वयैः। त्रिकत्रयसमायुक्तैर्लौहं यक्ष्मा-न्तकं मतम्॥" र.सा.स.। (रास्नातालीशकर्पूर इति रसकौ.पाठभेदः।)

रास्नाद्यं (घृतं तैलञ्च)। क्ली। वातघ्नौषधम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठः—'रास्नाश्वगन्धाकपिकच्छुभूमिकुष्माण्डगोकण्टकशालपर्णी। छिन्नारुहैरण्डबलागुडूचीपुनर्नवानां विधिनोद्धृतानाम् ॥ प्रत्येकशः पञ्चपलं गृहीत्वा पचेद्दशेऽपां घृतपादशेषे। शृतावशेषं पूतं दद्याच्च पलषोड़शं। घृतप्रस्थं विपक्तव्यं तैलमेरण्डमेव वा। दत्वाष्टवर्गकल्कञ्च गुग्गुलोर्वा पलाष्टकं। सिद्धं घृतञ्च तैलं वा दद्याद् वातगदातुरे.....'' रस.र.।

रास्नापञ्चकः। पुं। ऊरुस्तम्भाधिकारे कषायः। पाठः—"रास्नां गुडूचीमेरण्डं देवदारु सहौषधम्। पिबेत् सर्व्वाङ्गके वाते खामे सन्धिस्थिमज्जगे।" अत्र भेदार्थमेरण्डतैलं प्रक्षिपन्ति वृद्धाः। रस.र.।

रास्नासप्तकम्। क्ली। ऊरुस्तम्भाधिकारे पाचनम्। पाठः..."रास्नामृतारग्वध-देवदारु-विकङ्कैरण्डपुनर्नवानां। क्वाथं पिबेन्नागरचूर्णमिश्रं जङ्घोरुपृष्ठविकपार्श्वशूली॥" रस.र.।

रास्निका। स्त्री। रास्नायाम्। भा.। षड्बिन्दुतैले। "रास्निकासैन्धवञ्च।"

राहुच्छत्रम्। क्ली। आर्द्रके। आदा। रा.नि.व.६।

राहुरत्नम्। क्ली। गोमेदके रत्ने। रा.नि.व.१३।

राहुच्छिष्टः। पुं। लशुने। रशुन। त्रिका.।

राहुत्सृष्टः। पुं। रशीने। हारा.।

राज्ञम्। क्ली। पर्कटीफले। अम.।

राज्ञसः। पुं। रोहीतकवृक्षे। रोंड़ा। वै.निघ.। निशाचर-हिंस्रप्राणिभेदे।

राज्ञसभोजनम्। क्ली। मांसे। राजसयहे। वा.उ.।

राज्ञसी। स्त्री। चण्डायां। चौरनामगन्धद्रव्ये। मे.। सुरामाख्यायाम्। रस.र.प्रमेह.चि.। दंष्ट्रायाम्। हे.च.।

राज्ञसीकन्दः। पुं। चण्डालकन्दे। वै.निघ.।

राज्ञा (ज्ञ्या)। स्त्री। ज्ञाचायाम्। नी। अम.।

रिङ्ग(ङ्गि)णम्। क्ली। खलने। अम.।

रिङ्ग(ङ्गि)णी। स्त्री। सुद्गपर्णीलतायाम्। मुगानी। रा.नि.व.३। कैवर्त्तमुस्तायाम्। केवटमूथा। कण्टकार्य्याम्। वै.निघ.श्वास.चि.वासादिकषाये।

रिठा (करञ्जः)। स्त्री, पुं। रीठाकरञ्जे। रीठा गाछ। कौ रिङ्गी। गुर्ज्जरिठा। वै.निघ.।

रिपुः। पुं। चौरनामगन्धद्रव्ये। गँटेला। रा.नि.व.१२। क्रीवादौ। शारीररिपुषट्के।

रिपुघातिनी। स्त्री। गुल्माधिकारे। छिं कुचाइ। "कुचिका बहुविस्रोणां कुचिका रिपुघातिनी।" शु.च.।

रिबुः। पुं। रक्तैरण्डे। वै.निघ।

रिमेदः। पुं। अरिमेदे। खदिरविशेष। रा.नि.व.८।

रिरी। स्त्री। पित्तले। हे.च.। [शु.र.।

रिश्यः (ष्यः)। पुं। हरिणविशेषे। त्रिका.।

रिष्टः। पुं। रीठाकरञ्जे। रिठा। रक्तभिण्टुवृक्षे। मे.। श्वेतरसोने। रा.नि.व.७।

रिष्टकः। पुं। रक्तभिण्टुवृक्षे। शु.र.। अवि. २अ.।

रिक्षा। स्त्री। निचायां। शूक्षायां। निकि, उकुनेर छाना। हे.च.।

रीठा (करञ्जः)। स्त्री, पुं। (Sapindus mukorossi or S. Trifoliatus. Syn.S. Setergens or S. Emerginta.) The soapnut tree. खनामख्यातोत्तरदेशीयकरञ्जवृक्षे। बड़ रिठा। हि रीठा। तें रीठाकरञ्जमनेचेट्टु। कुकुड़ुकयलु यम्. रिथा। ता. पोन्नान कोट्टइ। तत्पर्य्यायाः,—गर्भपातनः गुच्छकः गुच्छपुष्पकः गुच्छफलः रीठा अरिष्टः मङ्गल्यः कुम्भबीजः प्रकीर्य्या सोमवल्कः फेनिलः। गुणाः—तिक्त उष्णः कटुः स्निग्धः वातघ्नः कफघ्नः कुष्ठकण्डूघ्नः विषविस्फोटघ्नश्च। See अरिष्टकः।

रीढ़कः। पुं। पृष्ठास्थनि। पीठेर ढाँड़ा, मेरुदण्ड। हे.च.।

रीतिः (ती)। स्त्री। पित्तले। रा.नि.व.१३। लौहकिट्टे। मण्डूर। मे.। दग्धस्वर्णादिमले। धरणिः। [१३।

रीतिक(ज)म्। क्ली। पुष्पाञ्जने। रा.नि.व.

रीतिका। स्त्री। पित्तले। पुष्पाञ्जने। शु.च.।

रीति(का)कुसुम(पुष्प)म्। क्ली। पुष्पाञ्जने। रा.नि.व.१०।

रीतिहेतुः। पुं। यशदे। दस्ता। भा.।

रुक्। स्त्री। कुष्ठौषधौ। कूड़। मे.। भा.म.१भ.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्द्रिज्व.चि.। "मरिच-कच-पचम्यचा-वचा-रुक्।" व्याधौ। रा.नि.व.२०।

रुक्का। स्त्री। सुराविशेषे। "रुक्का सा ह्रतसारा च।" प.प्र.३ख.।

रुक्प्रतिक्रिया। स्त्री। रोगोपशमनोपाये, चिकित्सायाम्। रा.नि.व.२०।

रुक्मम्। क्ली। तीक्ष्णलौहे। विदरीति लोके। र.मा.। धुस्तूरे। प.मु.। सुवर्णे। रा.नि.व.१३। पुं। नागकेशरवृक्षे। रा.नि.व.९।

रुक्मलौहम्। क्ली। तीक्ष्णलौहे। विदरी। सि.यो. र. पि. चि.खण्डखाद्यलौहे। "पलद्वादशकं ज्ञेयं रुक्मलौहस्य चूर्णितम्।"

रुक्मवन्तौ। स्त्री। शालिधान्यविशेषे। हैमन्तिक धान्यभेद। गुणाः—"रुक्मवन्ती लघु-रुचि-बल-पुष्टिकरा मता।" अवि.१६अ.।

रुक्मिणी। स्त्री। स्वर्णचौरिण्याम्। शेयाल-काँटा। रा.नि.व.५।

रुक्षद्म (न्)। क्ली। मले। कश्चित्।

रुग्णः। त्रि। रोगिणि। रा.नि.व.२०।

रुग्दाहः। पुं। तन्नामकसन्निपातज्वरविशेषे। लक्षणम्—"प्रलापपरितापनप्रबलमोहमान्द्यश्रमः, परिश्रमणवेदनाव्यथितकण्ठमन्याहनुः। निरन्तर-तृषाकरः श्वसनकासहिक्काकुलः, सकष्टतरसाधनो भवति हन्ति रुग्दाहकः॥" वै.निघ.। भा।

रुग्मम्। क्ली। स्वर्णे। अमरे।

रुच(क)म्। क्ली। सर्ज्जिकारे। साजिमाटी। सौवर्चललवणे। सचललवणे। मे.। भा.पू.२भ. अर्शःचि.विड्ङ्गादिचूर्णे। वै.निघ.ग्रहणी-चि. रुचकादिचूर्णे। मूलके। मूला। गोरोचनायाम्। विड्ङ्गे। हे.च.। लवणे। हारा.। दशनास्थ्नि।

रुचकः। पुं। बीजपूरवृक्षे। मातुलुङ्गवृक्षे। रा.नि.व.११। श्वेतैरण्डे। ज.द.१२अ.। सर्षपे। दन्ते। कपोते। मे.।

रुचिः (च)। स्त्री। स्पृहायाम्। अमर.भ.। लक्षनेनामपाकात् सुखशीघ्रादिनाशे सुखस्य प्रकृतत्वे च। रोचा। गोरोचनायाम्। रा.नि.व.१२। क्षुधायाम्। हे.च.।

रुचिकरः। पुं। नागरङ्गवृक्षे। नारङ्ग लेबू। वै.निघ.।

रुचितः। त्रि। मिष्टवस्तुनि। उणा.।

रुचिप्रदा। स्त्री। मधुरविल्वग्राम्। कुन्दरुकौ। वै.निघ.। [भा.।

रुचिफलम्। क्ली। अम्लतफले। नाशपाति।

रुचिरम्। क्ली। मूलके। मूला। रा.नि.व.७। कुङ्कुमे। लवङ्गे। रा.नि.व.१२। रौप्ये। रा.नि. व.१३। पुं। शिग्रुवृक्षे। सजिना गाछ। त्रि। मधुरे। स्त्री। गोरोचनायाम्। रा.नि.व.१२। पालकाप्य(व्य)नामगजवैद्यककारजनन्याम्।

रुचिरफला। स्त्री। कुन्दुरौ। वै.निघ.।

रुचिराञ्जनः। पुं। शोभाञ्जनवृक्षे। शजिना गाछ। रा.नि.व.७।

रुचिरासुतः। पुं। पालकाप्य(व्य)नामगज-वैद्यककारे। त्रिका.।

रुचिष्यम्। क्ली। पियालबीजे। सौवर्चललवणे। जीरकभेदे। वै.निघ.। त्रि। मधुरे। उणा.।

रुच्यम्। क्ली। सौवर्चललवणे। सचल लवण। रा.नि.व.६। पुं। कतकवृक्षे। निर्म्मली गाछ। रा.नि.व.११। शालिधान्यभेदे। रा.नि.व.१६।

रुच्यकन्दः। पुं। शूरणे। ओल। रा.नि.व.७। जीरके। शालिधान्ये। वै.निघ.।

रुच्या। स्त्री। नालितायाम्। नालिताशाका। प.मु.। कृष्णजीरके। रा.नि.व.६।

रुजा। स्त्री। मेधिकायाम्। मेथि। हे.च.। कुष्ठे। कूड़। रा.नि.व.१२। व्याधौ। रा.नि.व. २०। भङ्गे। मे.। व्यथायाम्।

रुजाकरम्। क्ली। कर्म्मरङ्गफले। कामरांगा। शब्दच.। पुं। हिन्तालवृक्षे। हेँताल गाछ। वा.सू. १५अ. वरुणादिः। "बहुलपल्लवदर्भरुजाकराः।" रोगे। हे.च.।

रुजाप(स)हः। पुं। धन्वनवृक्षे। धामना गाछ। रा.नि.व.९।

रुज्या। स्त्री। खालित्यरोगे। टाक।

रुणशालिः। पुं। रक्तशाली। दादखानि चाउल। रा.नि.व.१६।

रुणालिः। पुं। रक्तशाली। दादखानि। रा.नि.व १६।

रुण्डकम्। क्ली। अगुरुकाष्ठे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुण्डी। स्त्री। कुन्दुरी। कुँदरूकि। रा.नि.व.८।

रुदथः। पुं। कुक्कुरे। उणा.।

रुदन्तिका (न्ती)। स्त्री। स्वनामख्यातलहा-चुपे। रुदन्तीति उत्कलादौ प्रसिद्धा। सं कं अलुगणि, रुदन्ती। तत्पर्य्यायाः,—स्रवन्तीया सञ्जीवनी अमृतस्रवा रोनाचिका महाभांसी चणपत्रो सुधास्रायी। लक्षणं—"चणपत्रसमं पत्रं तुपर्य्यंव तथाविधः। शैशिरे जलबिन्दूनास्रवन्तीति रुदन्तिका॥" गुणाः—कटुतिक्तोष्णा त्रयघ्नी कृमिघ्नी रक्तपित्तघ्नी मेहघ्नी जराव्याधिहरत्वात् रसायनी च। रा.नि.व.५।

रुद्रगुदः। पुं। निरुद्धगुदनामक्षुद्ररोगभेदे। लक्षणम्—"वेगसन्धारणाद्वायुरपानोऽपानसंज्ञयम्। अणूकरोति वाह्यान्तर्मार्गमस्य ततः शकृत्। कृच्छान्निर्गच्छति व्याधिरयं रुद्रगुदो मतः।" वा. उ.३१अ.।

रुद्रः। पुं। महादेवे। आदित्यपत्रवृक्षे। आकन्द गाछ। रा.नि.व.४।

रुद्रकः। पुं। महावकुलवृक्षे। वै.निघ.।

रुद्रजः। पुं। पारदे। रा.नि.व.१३।

रुद्रजटा। स्त्री। लताविशेषे, ईश्वरीलतायाम्। जटाधारी। जटाशङ्खी। तत्पर्य्यायाः,—रुद्रलता रुद्रा रुद्राणी रौद्री सौम्या सुगन्धपत्रा सुन्धा सुवहा सुपत्रा सुरभिः घना ईश्वरीलता शिवाह्वा पत्रवल्ली महाजटा जटा जटावल्ली जटारुद्रा नेत्रपुष्करा। भा.म.१भ.सप्तलादि.ज्व.चि.महेश्वर-धूपे। "रुद्रजटा गोशृङ्गं।" गुणाः—कटुरसा श्वासकासहृद्रोगहरी भूतविद्रावणी रुचिनिवर्हणी च। रा.नि.व.३। मधुरिकायाम्। मोरटी। श.टी.भ.।

रुद्रदारुः। पुं। तैलदेवदारौ। मलेक्ष्यौ देवदारु। वै.निघ.।

रुद्रनिर्माल्यम्। क्ली। शिवनिर्माल्ये, पुष्पादौ। भा.म.१भ.सप्तलादि-ज्व.चि.महेश्वरधूपे। "वंश-त्वक् रुद्रनिर्माल्यम्।"

रुद्रपत्री। स्त्री। अतसीक्षुपे। मसिना गाछ। र.मा.।

रुद्रपर्पटी। स्त्री। कासाधिकारे औषधम्। पाठः—"गुडसूतं द्विधा गन्धं द्रवैः पुनः पुनः पचेत्। वातारिरार्द्रकं भृङ्गो काकमाची विकर्णिका। दिनैकं मर्दयेत् खल्वे पाचयेत् पर्पटी यथा। त्रयीः पादं घृतं तासं गृहा सह्निना पचेत्। रक्तवर्णं भवेद् यावत् तावद्ग्राह्यं प्रचालयेत्। प्रक्षिपेत् कदलीपत्रेऽथवा स्निग्धपृष्टे पुनः। आच्छाद्य तेन योगेन ततश्चैव गोमयं। देयं विचूर्णयेत् पश्चात् चूर्णपादं क्षिपं क्षिपेत्.....॥" मात्रा २र.। रस.र.। पाठोऽयं न लगति।

रुद्रप्रियः। पुं। वकुलवृक्षे। रा.नि.व.८। रावणश्वशुरे अष्टमश्वशुरके। स्त्री (या)। हरीतक्याम्। श.र.।

रुद्रभट्टः। पुं। वैद्यजीवनग्रन्थकारे। सन्निपात-कलिकाकारे। [चि.।

रुद्रमाल्यः। पुं। बिल्ववृक्षे। वै.निघ.२भ.ज्व.

रुद्ररेताः (तस्)। पुं। पारदे। वै.निघ.।

रुद्रलता। स्त्री। रुद्रजटायाम्। जटाधारी। रा.नि.व.३। शुक्लवर्षासु। यूक्ताझुरि वा वर्षी।

रुद्रा। स्त्री। रुद्रजटायाम्। जटाधारी। रा.नि.व.३। लक्षिकानामगन्धद्रव्ये। रा.नि.व.१२।

रुद्राणी। स्त्री। रुद्रजटायाम्। रा.नि.व ३।

रुद्राक्षः। पुं। स्वनामख्यातवृक्षे। रुद्राक्ष गाछ। तत्पर्य्यायाः,...रुद्राक्ष्यः त्रणमेरुः अमरः पुण्यचामरः। क्ली। तत्फले। तत्पर्य्यायाः,... शिवाक्षं सर्व्वाक्षं नीलकण्ठाक्षं हराक्षं भूतनाशनं पावनं शिवप्रियं। गुणाः...अल्पसुखं वातघ्नं कफनाशनं शिरोवेदनाशमनं रुच्यं भूतग्रहविषनाश-नञ्च। रा.नि.व.११।

रुधिरम्। क्ली। कुङ्कुमे। रा.नि.व.१२। च.सू. ४अ.। रक्तधातौ। रक्त। रा.नि.व.१८। रस. कौ.अष्ट-वातरक्तचि.द्वादशाध्याये। गैरिके। गिरि-माटी। रा.नि.व.१३।

रुधिरचरा। स्त्री। लोहितचरानाम योनि-व्यापदि।

रुधिराख्यम्। क्ली। इन्द्रनीलतुल्यमणिभेदे। पुराणम्।

रुधिराशयः। पुं। यकृति। भोज्जि च।

रुपिका। स्त्री। आदित्यपुष्पिकायां। आकन्द र.मा.। अरुणार्कवृक्षे। रक्त आकन्द। प.मु.। श्वेतार्के। भैष.नाड़ीव्रणचि.। सु.चि.१७अ.।

रुमा। स्त्री। तन्नामकारसमुद्रे। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुमाभवम्। क्ली। रुमानदीभवलवणे, शाम्भर-लवणे। वै.निघ.।

रुरुः। पुं। कूलचर-मृगविशेषे। मांसगुणाः— गुरु स्निग्धं अग्निमान्द्यानाशनञ्च। रा.नि.व.१७। "रुरुमांसं सुमधुरं कषायानुरसं स्मृतम्। वात-पित्तोपशमनं गुरु शुक्रप्रवर्द्धनम्।" सु.सू.४६अ.। वनरोहीतके। वै.निघ.।

रुरुमाणः। पुं। वरुणवृक्षे। वै.निघ.।

रुवुः (वू)। पुं। एरण्डवृक्षे। प.मु.। रक्तै-रण्डे। रा.नि.व.८। च.द.वा.व्या.चि.रसोनपिण्डी।

रुवु(वू)कः। पुं। एरण्डवृक्षे। प.मु.। रक्तै-रण्डे। रा.नि.व.८। च.द.वा.व्य.चि.माषबलादिः।

रुवुक्। पुं। एरण्डवृक्षे। र.मा.।

रुवुबीजम्। क्ली। एरण्डबीजे। भैष.वातरक्तचि.।

रुष्करः। पुं। भल्लातकवृक्षे। भेला गाछ। वै.निघ.।

रुहकम्। क्ली। छिद्रे। श.च.।

रुहदर्भः। पुं। हरितकुशे। रा.नि.व.८।

रुहा। स्त्री। दूर्व्वायाम्। र.मा.। च.चि३अ.। मांसरोहिण्याम्। नकुल.१६अ.। महासमङ्गायाम्। लज्जालुकायाम्। रा.नि.व.५।

रुह्वा (न्)। पुं। वृक्षे।

रुक्षः। पुं। धामनवृक्षे। वै.निघ.। त्रि। शुष्क-द्रव्ये। उणा.।

रुक्षदधि। क्ली। निःस्नेहदधनि। वै.निघ.।

रुक्षपत्रः। पुं। शाखोटवृक्षे। रा.नि.व.९।

रूढ़कम्। क्ली। पिप्पलीमूले। वै.निघ.।

रूढ़मल्लिका। स्त्री। अङ्कोलवृक्षे। आँकोड़ गाछ। वै.निघ.।

रूपम्। क्ली। लक्षणे। व्यक्तीभूतपूर्व्वरूपे। "तदेव व्यक्तता यातं रूपमित्यभिधीयते।" मा.नि.।

रूपकम्। क्ली। रौप्यधातौ। रा.नि.व.१३।

रूपनाशनः। पुं। पेचके। श.र.।

रूपशङ्खः (शिखः)। पुं। वह्नौ। वै.निघ.।

रूपि(षि)का। स्त्री। महार्कवृक्षे। बड़ आकन्द। र.मा.। सु.सू.४३अ.। वा.उ.३८अ.। श्वेतार्के। चि.१७अ.। रस.र.च.द.। श्लीपद.चि.।

रूप्यमलम्। क्ली। रौप्यमाक्षिके। च.।

रूप्यमाक्षिकम्। क्ली। तारमाक्षिके। रौप्यमाक्षिक। प.मु.।

रूप्याह्वम्। क्ली। रौप्यमाक्षिके। वै.निघ.।

रूमामुस्तकी। स्त्री। (Pistacia lentiscus) Mastic tree. खनामख्यातवृक्षविशेषे, गुहावदरीवृक्षे। गुहावदरी। हिं रूमिमुस्तकी। भैष.। वाजी.चि.।

रूक्षकः। पुं। एरण्डवृक्षे। शु.मा.।

रूषकः। पुं। वासावृक्षे। वासक गाछ। जटा.।

रूषणम्। क्ली। रजोगुणे। रा.नि.व.२१।

रूषिका। स्त्री। अर्कवृक्षे। च.।

रूक्षः। पुं। धन्वनवृक्षे। धामना गाछ। रा.नि.व.९। प्रियङ्गु नामतृणधान्ये। रा.नि.व.१६। वृक्षे। हे.च.।

रूक्षगन्धः (कः)। पुं। गुग्गुलौ। रा.नि.व.१२। स्त्री (न्धा)। सर्पगन्धायाम्। गन्धरास्ना। प.मु.।

रूक्षगुणकर्म्म। क्ली। श्लेष्मार्दवकरत्वे बल-वर्णघ्नत्वे च। सु.।

रूक्षणात्मिका। स्त्री। क्षणचणकवृक्षे। कालछोला। लङ्घनामग्निक्ष्वीधान्ये। तेओड़ा। रा.नि.व.१६।

रूक्षदर्भः। पुं। हरिदर्भे, शरपत्रदर्भे वा। रा.नि.व.८।

रूक्षपत्रः। पुं। शाणीटवृक्षे। रा.नि.व.९।

रूक्षप्रियः। पुं। ऋषभौषधे। ऋषभक। रा.नि.व.५।

रूक्षस्वादुफलः। पुं। धन्वनवृक्षे। रा.नि.व.९।

रूक्षा। स्त्री। दन्तिवृक्षे। रा.नि.व.९।

रेकः। पुं। विरेचने। मे.। भा.आत्मादिव.। भेके। त्रिका.।

रेकणः। पुं। स्वर्णे। उणा.।

रेखा। स्त्री। स्वल्पे। उल्लेखे। चिह्ने। आभोगे। छन्दनि।

रेचकम्। क्ली। कटुष्ठे, मृत्तिकाविशेषे। रा.नि.व.१३। पुं। जेपालवृक्षे। प.मु.। यवचारे। त्रिका.। तिलकवृक्षे। तिलगाछ। रा.नि.व.१०। जलनिःक्षेपार्थे यन्त्रभेदे। पिचकारी।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेचनः। पुं। स्थूलारग्वधवृक्षे। वड़ शोणालु गाछ। रा.नि.व.९। तन्नामकधूमपानभेदे। भा.। त्रि। विरेचकद्रव्ये। क्ली। मलभेदने। र.सा.।

रेचनकः। पुं। कम्पिल्लके। रा.नि.व.१३।

रेचना (नी)। स्त्री। कम्पिल्लके। कमला गुँड़ि। ग.र.। रा.नि.व.१३। कालाङ्ख्यां। रा.नि. व.४। दन्तिवृक्षे। रा.नि.व.६। शुक्लचित्रवृति। श्वेत तेउड़ी। मे.। तिलकपुष्पे। वै.निघ.। स्वर्णपत्रिकायाम्। सोणामुखी।

रेचनीयः। त्रि। विरेचके।

रेचो। स्त्री। कम्पिल्लके। रा.नि.व.१३। अङ्कोल्लवृक्षे। आँकोड़ गाछ। रा.नि.व.९।

रेणुः (कः)। पुं। पर्पटके। क्षेत्पापड़ा। रा.नि.व.५। भा.ग्रहणी.चि.द्राक्षासवे। पांशौ। धूलौ। रेणुकाकाम्। रेणुक गाछ। रा.नि.व. ६। सु.चि.३७अ.। चि.क्र.क. १लवक.३प.। तज्जातिः—"रेणुकी सुद्गतुल्यो यो भद्रः स सम्मत सतां। स्थूली मरिचसङ्काशः गन्धकर्म्मणि गर्हितः। आनूपदेशसम्भूतः सुद्गवज्जातिशोभनः। सित्रिते मध्यमः प्रोक्तो जाङ्गलस्त्वधमो मतः॥" भैष.।

रेणुकम्। क्ली। तन्नामकफलविषभेदे। सु.कल्प. २अ.। रेणुकबीजे। च.द.यक्ष्म.चि.चन्दनादितैले।

रेणुकदम्बकः। पुं। धूलीकदम्बे। रा.नि.व.९।

रेणुका। स्त्री। (Hyduocarpus wightianum. or Piper aurantiacum. Syn. H. Inebrians.) मरिचाकृतिसुगन्धद्रव्ये। रेणुक। प.मु.। हिं सम्भालूकाबीज। बम. वेणुकबीज, कौन्ती। ता. येट्टो। तत्पर्य्यायाः, द्विजा हरेणुः हरेणुका क्षान्ता कौन्ती कपिला भस्मगन्धिका अभीष्टा कृतान्ता वरत्करी वरमखी वरा खरनादिनी नन्दिनी महिला राजपुत्री हिमा रेणुः पाण्डुपत्री पाण्डुपत्री सुपर्णिका शिशिरा क्षान्ता दत्ता हन्ता हैमगन्धिनी धर्म्मिणी कपिलासा हैमवती। गुणाः—कटुः शीता कण्डूतिघ्नी व्रणादाहविषघ्नी मुखवमत्यकरी च। रा.नि. व.६। अपिच—"रेणुका कटुका पाके तिक्तानुष्णा कटुर्लघुः। पित्तला दीपनी मेध्या पाचनी गर्भपातिनी॥ वलास वात-वैक्लव्य-त्वट्-कण्डू-विष-दाहनुत्॥ भा.।

रेणुदूषितः। पुं। गर्दभे। विका.।

रेणुवासः। पुं। भ्रमरे। विका.। [ग.र.।

रेणुसारः (कः)। पुं। कर्पूरे। विका.।

रेतः। क्ली। पारदे। मे.। शुक्रधातौ। रा.नि. व.१८। जले।

रेतजा। स्त्री। वालुकायाम्। वालि। भा.।

रेतनम्। क्ली। शुक्रे। ग.च.।

रेतोदोषः। पुं। शुक्रदोषे।

रेत्यम्। क्ली। पित्तले। अ.टी.नीलकण्ठः।

रेत्रम्। क्ली। शुक्रे। पारदे। मे.। पित्तले। पटवासचूर्णे। आबीर।

रेवटम्। क्ली। दक्षिणावर्त्तशङ्खे। शिग्रुतैले। कदलीफले। अजयपालः। पुं। शूकरे। वातुले। विषवैद्ये। अजयपालः। राजपूते। विका.। वंशे। वाँश।

रेवतः। पुं। जम्बीरवृक्षे। जाम्बीर। जटा.। आरग्वधवृक्षे। ग.र.। (कः) द्वीपान्तरखर्जूरे। रा.नि.व.११।

रेवतिका (ती)। स्त्री। वटपत्रपाषाणभेदे। वड़ पाथरकुचि। वै.निघ.। रावण. ९म शतके। बालरोगभेदे। लक्षणंयथा—"रक्तास्यो हरित-मलोऽतिपाण्डुदेहः श्यावो वा ज्वरमुखपाकवेदनार्त्तः रेवत्या व्यथिततनुश्च कर्णनासं सङ्घाति ध्रुवमभि-पीड़ितः कुमारः॥" सु.उ.२७अ.। तन्नाम-नक्षत्रे। मे.।

रेवतीभवः। पुं। शनैश्चरग्रहे। हे.च.।

रेवा। स्त्री। नौलीवृक्षे।

रैवतः। पुं। सोमलताभेदे। सु.चि.२९अ.। See सोमः। आरग्वधवृक्षे। मे.। क्ली। द्वीपा न्तरखर्ज्जूरिकायाम्। रा.नि.व.११।

रैवतकः। पुं। पारिवतवृक्षे।

रोकम्। क्ली। छिद्रे। अम.।

रोगः। पुं। अलक्तके। आलता। रा.नि.व.६। कुष्ठौषधे। कूड़। मे.। व्याधौ। रा.नि.व.२०। तत्पर्य्यायाः,—रुक् रुजा उपघातः उपतापः व्याधिः गदः अमः आमः आमयः अपाटवः आतङ्कः भयः भङ्गः अर्त्तिः तमोविकारः ग्लानिः क्षयः अनार्ज्जवः ऋतुप्रत्यः मान्द्यं आलस्यं विकरः विकारः विकृतिः दोषिकः शरीरजः। "रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता।"

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोगकाष्ठम्। क्ली। पलाङ्गचन्दने। वकम काट। रा.नि.व.१२।

रोगघ्न(ह्न)म्। क्ली। औषधे। भ.च.। वि। रोगहरे।

रोगघ्नः। पुं। वैद्ये। रा.नि.व.२०।

रोगपतिः। पुं। ज्वरे। वै.निघ.।

रोगप्रे(श्रे)ष्ठः। पुं। ज्वरे। रा.नि.व.२०।

रोगभूः। स्त्री। शरीरे। भ.च.।

रोगमार्गः। पुं। शाखादिरोगवर्त्मनि। स त्रिविधः शाखाः, मर्म्मास्थिसन्धयः, कोष्ठाश्चेति। तत्र शाखा रक्तादिधातवस्त्वक् च बाह्यरोगमार्गाः। मर्म्मास्थिसन्धिस्थानानि मध्यमरोगमार्गाः। कोष्ठा आभ्यन्तररोगमार्गाः। च.सू ११अ.।

रोगमुरारिः। पुं। नवज्वरे रसः। पाठः—"रसगन्धलिफणिलौहव्योषतास्राणि तुल्यान्यथ रसदल भागौ नाग एष प्रदिष्टः। भवति गदमुरारिश्चास्य गुञ्जार्द्धवारा..... ॥" पारा, गन्धक, विष, लौह, त्रिकटु, तामा प्रत्येक समभाग; सीस अर्द्धभाग। वटी २ रत्ति। अनुपान आदार्द्र रस। रस.कौ.।

रोगराजः (ट्)। पुं। राजयक्ष्मणि। यक्ष्मा रोग। रा.नि.व.२०।

रोगलक्षणम्। क्ली। रोगव्यञ्जकचिह्ने। रा.नि.व २०।

रोगविज्ञानम्। क्ली। येन येन रोगाणाम्। ज्ञानं भवति। तच्च विविधं—"दर्शनस्पर्शनप्रश्नै-र्व्याधिर्ज्ञानं त्रिधा मतम्। दर्शनान्मूत्रजिह्वायाः स्पर्शनान्नाड़िकादिभिः। प्रश्नैर्दूतादिवचनादिति चेधा समुच्यते ॥" भैष.।

रोगविनिश्चयः। पुं। माधवकृते रुग्विनि-श्चायकग्रन्थे।

रोगशान्तकः। पुं। चिकित्सके। भ.च.।

रोगशिला। स्त्री। मनःशिलायाम्। मनछाल। रा.नि.व.१३।

रोगशिल्पी (न्)। पुं। स्वर्णुलीवृक्षे। शोणालूगाछ। जटा.।

रोगहम्। क्ली। औषधे।

रोगहरद्रव्यम्। क्ली। मधुरादिरोगनाशक-द्रव्ये। रोगनाशकद्रव्य। धन्वन्तरिः।

रोगहारी (न्)। पुं। वैद्ये। र.नि.व.२०।

रोगहेतुः। पुं। रोगनिदाने। रा.नि.व.२०।

रोगाधीशः। पुं। राजयक्ष्मणि। रा.नि.व.२०।

रोगासनः। पुं। ज्वरे। वै.निघ.।

रोगाह्वयम्। क्ली। कुष्ठौषधे। कूड़। वै.निघ.।

रोगितरुः। पुं। अशोकवृक्षे। रा.नि.व.१०।

रोगिवल्लभम्। क्ली। औषधप्रलेपादौ। भ.च.।

रोगी (न्)। वि। रोगयुक्ते। अस। रोगि-परीक्षा—"दर्शनस्पर्शनप्रश्नैः परीक्षेदथ रोगिणम्। आयुरादि दृशा स्पर्शाच्छीतादेः प्रश्नतोऽपरम ॥" वा.। नेत्र-जिह्वा-मूत्रादि परीक्षाः स्वस्वशब्दे दृश्याः।

रोगोद्भवम्। क्ली। मलिनदुर्गन्धादियुक्ते रोग-जनकजले। See जलम्।

रोग्यम्। क्ली। रोगहिते। रोगयोग्ये। अपथ्ये। भ.च.।

रोचकः। पुं। राजपलाण्डौ। छोटे पेयाज। रा.नि.व.७। मातुलुङ्गवृक्षे। क्षुधायाम्। हे.च.। कदल्याम्। भ.र.। ग्रन्थिपर्णविशेषे। भटेउर इति नेपाले। भा.। विक। रुचिकारद्रव्ये।

रोचकद्वयम्। क्ली। लवणद्वये, विट्सैन्धवे। वै.निघ.ज्व.चि.चन्दनबलातैले।

रोचनः। पुं। पलाण्डौ। श्वेतसर्षपे। रा.नि.व.७। करञ्जवृक्षे। करञ्ज गाछ। अङ्कोल्लवृक्षे। आंकोड़ गाछ। रा.नि.व.९। दाड़िमवृक्षे। रा.नि.व.११।२३। निम्बवृक्षे। अम्बीरवृक्षे। मातुलुङ्गे। रा.नि.व.२३। व्यञ्जने। रा.नि.भ.२०। कूटशाल्मलीवृक्षे। अम.। आरग्वध-वृक्षे। शोन्दाल गाछ। रा.नि.व.११। स्त्री। गोरोचनायाम्। भा.। वंशरोचनायाम्। सु.चि. कदर-चि.। कृष्णशाल्मलीवृक्षे। रक्तकङ्कारे। मे.।

रोचनकः। पुं। अम्बीरवृक्षे। रा.नि.व.११।

रोचनफलः। पुं। मातुलुङ्गवृक्षे। बीजपूरे। रा.नि.व.११। स्त्री (ला)। चिर्भटिकायाम्। फूटी। रा.नि.व.७।

रोचनिका। स्त्री। वंशलोचनायाम्। रा.नि. व.६। गुञ्जारोचन्याम्। कमलागुँड़ि। हारा.।

रोचनी। स्त्री। दन्तिवृक्षे। रा.नि.व.६। आमलकीवृक्षे। रा.नि.व.११। गोरोचनायाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा.नि.व.१२ । श्वेतविद्धति । गुग्गारीचन्याम् । अम. । मनःशिलायाम् । हे.च. । चुक्रायाम् । **चुकापालः** । भा.पू.१भ.शा.व. ।

रोची । स्त्री । पवशाकविशेषे, छिल्लमोचिकायाम् । शिक्षे । ग.र. ।

रोटिका । स्त्री । गधूमसक्तुमाषादिकृतपिष्टकविशेषे । **रुटी** । तत्साधनविधिः—"शुष्कगोधूमचूर्णं न किञ्चित्पृष्टाच्च पोलिका । तप्तके खेदयेत्क्षात्वा भूयोऽङ्गारेऽपि तां पचेत् । सिद्धैषा रोटिका प्रोक्ता गुणानस्याः प्रचक्ष्महे ॥ रोटिका बलकृद्रुच्या हृद्या गुर्वी धातुवर्द्धनी । वातघ्नी कफकृद्गुर्वी दीप्ताग्नीनां प्रपूजिता ॥" भा. ।

रोदनम् । क्ली । बालरोगे । क्रन्दने । मे. ।

रोदनिका (नी) । स्त्री । यासक्षुपे । डुरालभा । रा.नि.व.४ । अम. ।

रोदिका । स्त्री । लज्जालुकायाम् । लज्जावती । स्त्रीपर्यायान्तरम् ।

रोदिनी । स्त्री । रक्तदुरालभायाम् । वै.निघ. ।

रोधनम् । क्ली । वायुजन्यव्रणवेदनायाम् । सु.सू.२२अ. ।

रोधनी । स्त्री । लज्जालुः । लज्जावती । वै.निघ. ।

रोध्र(क)म् । क्ली । लोध्रकाष्ठे । लोधकाष्ठ । वा.सू.१५अ. अम्बष्ठादिव. । "रोध्रं धातकिबिल्वपेशि" । पुं । लोध्रवृक्षे । लोध गाछ । प.सु. । वा.सू.१५अ.रोध्रादिः । "रोध्रशावरकरोध्रपलाशाः ।"

रोध्रपुष्पः (कः) । पुं । तन्नामकशालिधान्यभेदे । गुणाः शालिवत् । सु.सू.४६अ. । सर्पविशेषे । सु.कल्प.४अ. । मधूकवृक्षे । महुल गाछ । रा.नि.व.११ । [६ ।

रोध्रपुष्पिणी । स्त्री । धातकीवृक्षे । रा.नि.व.

रोध्रयुग्मम् । क्ली । लोध्रद्वये । एकः शावरः, अन्यः पट्टिकारोध्र । वा.सू.१५अ. । "न्यग्रोधपिप्पलसदाफलरोध्रयुक्तम् ।"

रोध्रशुकः । पुं । रोध्रपुष्पाकारशूकशाली । वा.सू.६अ. ।

रोध्रादिगणः । पुं । रोध्रशावरकरोध्रपलाशजिङ्गिनीसरलकट्फलयुक्ता कुत्सिताम्रः-कदली-गतशीकैलवालुपरिपेलवमोचासु । गुणाः—मेदःकफहरः योनिदोषहरः स्त्रीणां वर्ण्यः विषघ्नश्च । वा.सू.१५अ. ।

रोपः । पुं । रोपणे । मे. । क्ली । छिद्रे । हे.च. ।

रोपणः । पुं । पारदे । सधामनवृक्षे । वै.निघ. । चतादिपूरणे । अञ्जनभेदे । भा. ।

रोपणचूर्णम् । क्ली । नेत्ररोपणाञ्जनविशेषे । यथा—"शिलायां रसकं पिष्ट्वा सम्यगाज्याम्बुवारिणा । गृह्णीयात् तज्जलं सर्वं त्यजेच्चूर्णमधोगतम् । शुष्कं तच्च जलं सर्वं पर्पटीसन्निभं भवेत् । विचूर्ण्य भावयेत् सम्यक् त्रिफलारसैः । कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ॥" भा. ।

रोपणाञ्जनम् । क्ली । कषायसहितसंयुक्ताञ्जने । तोड. । तिक्तद्रव्यैरञ्जने । च.द.अञ्जनाधिकारे ।

रोपणीवर्त्तिः । पुं । कुसुमाभिधनेत्राञ्जनवर्त्तिभेदे । यथा—"अशीतिसिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः । जातीपुष्पाणि पञ्चाशन्मरिचानि च षोडश । सूक्ष्मं पिष्ट्वाम्बुना वर्त्तिः कृता कुसुमिकाभिधा । तिमिराक्षिरुजायुक्तानां नाशिनी ..... ॥" भा. नेत्ररो. ।

रोप्यशालिः । पुं । छिन्ने पुनरुप्ते शाली । रोओयाधान । गुणौ—रूक्षः मलवह्निकारकश्च । रा.नि.व.१६ ।

रोप्यातिरोप्यः । पुं । रोप्यशाली । रोओया शालि धान । गुणाः—लघुः आशुपाकः अदाही दीपनः बल्यः सुखवर्द्धनश्च । राज. ।

रोमम् । क्ली । पत्रे । तेजपत्र । मद.व.३ । जले । श.च. ।

रोमः (कः) । पुं । महानिम्बे । वै.निघ. ।

रोम (न्) । क्ली । तमालपत्रे । तेजपत्र । मद.व.३ । लोम्नि । रोंओया । रा.नि.व.१८ । तत्पर्य्यायाः,—लोम अङ्गज त्वगज चर्म्मज तनुरुट् तनुरुहं तनूरुहं । तत्तु गर्भस्य षष्ठे मासि सञ्जायते ।

रोमकम् । क्ली । शाम्भरलवणे । रुमावतीनद्यां जातलवणे इति । र.सा.सं टीका । शम्भरलवणं हि शाकम्भरि । गुणाः—तीक्ष्णम् अल्पोष्ण कटुतिक्तं दीपनं दाहशोषकरं यद्धि पित्तकोपनञ्च । रा.नि. व.६ । कान्तलौहभेदे । रा.नि.व.१३ ।

रोमकन्दः । पुं । पिण्डालौ । रक्तालौ । मौ आलू । रा.नि.व.७ ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोमकर्णः। पुं। शशके। वै.निघ.।

रोमकाख्यम्। क्ली। शाम्भरलवणे, मृत्तिकालवणे। काचलौहे। वै.निघ.।

रोमकूपः। पुं। रोमबिवरे।

रोमकेशरम्। क्ली। चामरे। त्रिका.।

रोमगुच्छ(क)म्। क्ली। चामरे। हे.च.। जटा.।

रोमतन्तुरी। स्त्री। अरीमस्त्रियाम्। रत्न.र. क्षुद्ररी.चि.।

रोमद्वीपः। पुं। क्रमी। वै.निघ.। रक्तजनितसूक्ष्मकृमिभेदे। "केशादा रोमविध्वंसा रोमद्वीपा उडुम्बराः। षट् ते कुष्ठैककर्म्माणः सहसौरसमातरः॥" मा.नि.।

रोमन्थः। पुं। पशूनां चर्व्वितचर्व्वणे। जाँवरकाटा। अम.। [निघ.।

रोमफला। स्त्री। डिण्डिशे। ट्याड़श। वै.

रोमभूमिः। स्त्री। चर्म्मणि। रा.नि.व.१८।

रोमलता। स्त्री। रोमराज्याम्। शु.च.।

रोम(क)लवणम्। क्ली। शाम्भरलवणे। सौवर्च्चललवणे। रत्न.।

रोमवल्ली। स्त्री। कपिकच्छौ। आलांकुशी। रा.नि.व.३।

रोमविकारः। पुं। रोमाघ्ने। हला.।

रोमशम्। क्ली। पत्रे। तेजपत्र। मद.व.३। पुं। पिण्डालुनामकन्दशाके। रा.नि.व.७। मेषे। भेड़ा। शु.च.। कीर्ष्णदेशप्रसिद्धे कुम्भीवृक्षे। रा.नि.व.९। मन्दविषवृश्चिकभेदे। सु.कल्प.८अ.। शूकरे। रा.नि.व.१९।

रोमशपत्रा। स्त्री। देवताड़वृक्षे। देवदाड़ा।

रोमशफलः। पुं। डिण्डिशवृक्षे। ट्याड़श। भा.पू.१भ.शा.व.। [निघ.।

रोमशमूलिका। स्त्री। हरिद्रायाम्। वै.

रोमशा। स्त्री। कीर्ष्णे कुरुहीति ख्याते दग्धानामवृक्षे। रा.नि.व.९। कर्कटिकायाम्। काँकुड़। त्रिका। अलगर्द्दनामसविषजलौकाभेदे। अलगर्द्दजोंक। सु.सू.१३अ.। मांसरोहिण्याम्। वै.निघ.।

रोमशातनम्। क्ली। रोम्णाम् उद्वंसने। वै. निघ.। तदौषधं क्षुरीचीरेण भल्लातकस्वेदः। सू.चि.१अ.। [भा.।

रोमशुकम्। क्ली। स्थौणेयके। गँठेला।

रोमहरणम्। क्ली। हरितालै। र.सा.सं.।

रोमहर्षः (कः)। पुं। रोमाञ्चे। मा.नि.। "रोमहर्षोऽनचित्तमः।" विभीतकवृक्षे। वै.निघ.।

रोमहर्षणम्। क्ली। रोमाञ्चे। अम.। पुं। विभीतकवृक्षे। मे.।

रोमाख्यम्। क्ली। शाम्भरलवणे। वै.निघ.।

रोमाञ्चः। पुं। रोमहर्षे। अम.।

रोमाञ्चिका। स्त्री। रुदन्तीनामसहाचुपे। रा.नि.व.५।

रोमान्तो। स्त्री। क्षुद्रमसूरिकारोगभेदे। हाम। "रोमकूपोन्नतिसमा रागिणः कफपित्तजाः। कासारोचकसंयुक्ता रोमान्त्यो ज्वरपूर्व्विकाः॥" मा.नि.॥ भैष.मसूरि.चि.।

रोमालो। स्त्री। रोमराजिकायाम्। वयःस्थौ। श्र.मा.।

रोमालुः। पुं। पिण्डालौ। रा.नि.व.७। कपिकच्छौ। आलांकुशी। रा.नि.व.३।

रोमालुविटपी (इन्)। पुं। कीर्ष्णदेशप्रसिद्धकुम्भीवृक्षे। रा.नि.व.९।

रोमावर्त्तः। पुं। तन्नामकसर्म्मस्थाने शिरासन्धिसन्निपातरूपे। सु.शा.६अ.।

रोमावली। स्त्री। नाभेरूर्द्धं रोमराज्याम्। हे.च.।

रोमाश्रयफला। स्त्री। भिक्षिरीटाचुपे। रा.नि.व.४।

रोमेश्वरः। पुं। वैद्यासतग्रन्थकारे।

रोलः। पुं। आर्द्रशुण्ठ्याम्। फलविशेषे, पानीयामलके। श्र.च.। तालीशपत्रे। कश्चित्।

रोलम्बः। पुं। भ्रमरे। त्रिका.।

रोषणः। पुं। परूषकवृक्षे। फलसा गाछ। पारदे। निकषोपले। मे.। ऊषरभूमौ। हे.च.।

रोषिणी। स्त्री। लज्जालुकायाम्। लज्जावती लता। वै.निघ.।

रोहः। पुं। अङ्कुरे। हे.च.। [व्याक.।

रोहणम्। क्ली। शुक्रे। रा.नि.व.१८। जन्मनि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोहणद्रुमः। पुं। चन्दनवृक्षे। मलयागुरुणि। वै.निघ.।

रोहत्पर्व्वा। स्त्री। वल्लिदूर्व्वायां। रा.नि.व.८।

रोहन्तः। पुं। वृक्षे। तरुविशेषे। उणा.।

रोहन्ती। स्त्री। लतामात्रे। लताविशेषे। उणा.।

रोहिः। पुं। वृक्षे। बीजे। उणा.।

रोहिकः। पुं। वनरोहिनामसृगे। वन रोहु। तस्मात् रोहिकी हितः बलकरः वातात्मकः श्लेष्मकरश्च। अवि २२अ.।

रोहिकाप्रियः। पुं। महाकरञ्जे। वै.निघ.।

रोहिणः। पुं। कट्फलवृक्षे। र.मा.। भूतृणे। गन्धतृणविशेष। रा.नि.व.८।२३। च.चि.३अ.। न्यग्रोधवृक्षे। वट गाछ। रा.नि.व.९। रक्तरोहीतके। रक्तरोढ़ा। रा.नि.व.८।

रोहिणिका(णी)। स्त्री। शरीरे षष्ठत्वचि। "व्रीहिप्रमाणा यन्त्यपच्यर्व्बुद-श्लीपद-गलगण्डाधिष्ठाना।" सु.शा.४अ.। कण्ठगते जिह्वामूलगते वा रोगविशेषे। रोहिणी रोग। निदानं—"वातपित्तकफा यस्य युगपत् कुपिताश्चयः। जिह्वामूलेऽवतिष्ठन्ते विदहन्तः समुच्छ्रिताः। जनयन्ति भृशं शोथं वेदनाश्च पृथग्विधाः। तं शीघ्रकारिणं रोगं रोहिणिकेति निर्दिशेत्। विरावं परमं तस्य जन्तोर्भवति जीवितम्॥" च.सू.१८अ.। तां पञ्च वातपित्तकफसन्निपातरक्तजभेदेन। "गलशालूकाधिजिह्वबलयालसकद्वन्द्वशतघ्नीगिलायु-गलविद्रधिगलौघस्वरघ्नसांसतानविदारिण्यश्च। सम्प्राप्तिः—"गलेऽनिलः पित्तकफौ च मूर्च्छितौ पृथक्समस्ताश्च तथैव शोणितम्। प्रदूष्य मांसं गलरोधिनोऽङ्कुरान् सृजन्ति यान् सोपहरा तु रोहिणी॥" सु.नि.१६अ.। अभ्रस्य मुखरोगभेदे। ज.द.२९अ.। कण्टकशिरीषे। काँटाशिरीष। र.मा.। मञ्जिष्ठायाम्। रा.नि.व.६। च.द.सि.यो. ज्वरातीसा.चि.वत्सकादिः। 'रोहिणी गजपिप्पली।' कटुक्याम्। कटकी। रा.नि.व.२३। च.सू.४अ.। भैष.कुष्ठ.चि.पञ्चतिक्तघृते। भा.ज्व.चि. लाचादितले। गाम्भारीवृक्षे। गाम्भार गाछ। रा.नि.व.९ २३। कट्फले। सु.सू.३८अ.न्यग्रोधादिः। मांसरोहिणीभेदे। मांसरोहिणी। रा.नि.व.१२। वन्दाके। वान्दरा। हरीतक्याम्। सुवृत्तत्वमस्या लक्षणं ज्ञेयम्। प्रतिष्ठानदेशीद्भवा च। हरिद्रायाम्। रा.नि.व.२३। स्त्रीरत्नाम्। च.चि.२अ.। तन्नामकशिरायाम्। वा.चि.०अ.। जलचरपक्षिविशेषे। च.सू.३७अ.।

रोहिणीफलम्। क्ली। कट्फले। गाम्भारीफले। सु.चि.१अ.।

रोहिणेयः। पुं। मरकतमणौ। रा.नि.व.१३।

रोहिण्याद्यघृतम्। क्ली। गुल्मे घृतम्। पाठः "रोहिणी कटुका निम्बमधुकं त्रिफलात्वचः। कार्षिका द्वायमाणा च पटोलत्रिवृते पले। द्विपलञ्च मसूराणां साध्यमष्टगुणेऽम्भसि। घृताच्चैषं घृतसमं सर्पिषश्च चतुष्पलं। पिबेत् संमूर्च्छितं तेन गुल्माः शाम्यन्ति पैत्तिकाः॥" च.चि.५अ.।

रोहित्। पुं। रोहितमत्स्ये। श्वेतखण्डचन्दने। त्रिका.। सूर्य्ये। वर्णभेदे। स्त्री। लतामेदे। मे.।

रोहितम्। क्ली। कुसुम्भपुष्पे। रक्ते। कुङ्कुमे।

रोहि(हो)तः (कः)। पुं। (Amoora Rohitaka, Syn. Andersonia Rohitaka.) दाड़िम्बपुष्पक-स्वनामख्यातवृक्षे। रोहिणीति लोके। रोढ़ा, रयना, कड़ार। तैं सुलुमीदुगचेट्टु। तत्पर्य्यायाः,—रोही रौही श्लीहशत्रुः दाड़िमपुष्पः रक्तान्नः रक्तपुष्पः मांसदलनः यकृद्वैरी चलच्छदः रोहिणः रोहितः रोहितेयः रोहीतकः सदापर्णः कृमिशत्रुः कूटशाल्मलिः शाल्मलिकः विरोचनः। र.मा.। भा.ज्व.चि. महाषट्तक्रतले। "मधुरस्वादुवाह्वरीहोतकैः। स्यैती रक्तश्च। तद्गुणाः—कटुस्निग्धौ कषायौ शीतलौ कृमिव्रणश्लीहनेत्रामयघ्नौ च। रा.नि.व.८। "रोहितकौ यकृत्प्लीहगुल्मोदरहरः स्मृतः।" राज.। सद्यहः। रोहीतकाद्यघृते। हरिणविशेषे। मे.। कुसुम्भवृक्षे। स्वनामख्यातमत्स्यविशेषे। रुई माछ। तैं एरमीनु। तत्पर्य्यायाः,—रोहित् रौहिषः मत्स्यराजः। तल्लक्षणं यथा—"कृष्णः शल्की श्वेतकुक्षिस्तु मत्स्यो यः श्रेष्ठोऽसौ रोहितो वृत्तवक्त्रः।" तन्मांसगुणाः—ईषदुष्णं बलकरं वातघ्नं स्निग्धं वीर्य्यकरञ्च। रा.नि.व.१७। रक्तोदरी रक्तमुखी रक्ताक्षी रक्तपक्षतिः। क्षयपक्षौ झषश्रेष्ठौ रोहितः कथितौ बुधैः। रोहितः सर्व्वमत्स्यानां वरो ह्यश्रोऽर्हितार्त्तिजित्। कषायानुरसः स्वादुः वातघ्नो नातिपित्तकृत्। ऊर्ध्वजत्रुगतान् रोगान् हन्याद् रोहितमुष्ककम्॥" भा.। "रोहितो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृंहणश्चैव विबन्धी दुर्जरो घनः । ज्वरिणां विषमाग्नीनामतीसारे न दास्यते ॥" अवि.२अ.। इति वनरोहितगुणाः ।

रोहिता । स्त्री । मञ्जिष्ठायाम् । वै.निघ. ।

रोहितिकः । पुं । रोहितकवृक्षे । रत्नकोषः ।

रोहिष(स)म् । क्ली । (Andropogon schoenanthus. Syn. A. Martini) The geranium grass. गन्धतृणे, कत्तृणे । वालकर्पूर । हिं अगियाघास, मिरचियागन्ध, रसघास । बम्. रोहिषे । उत्. पाल खरि । तत्पर्य्यायाः,—कत्तृणं रौहिषं दैवजग्धं सौगन्धिकं तथा । भूतिकं ध्यामपौरञ्च श्यामकं धूपगन्धिकम् ॥ गुणाः—रौहिषं तुवरं तिक्तं कटुपाकं व्यपोहति । हृत्कण्ठव्याधिपित्तास्रशूलकासकफज्वरान् ॥ भा. । रा.नि.व.८ । सि.यो.,च.द.अ.क्षा.चि.पञ्चगव्यघृते । भा.ज्व.चि. । "रक्तरोहिषधन्वयवासकवासाः ।" पुं । रोहिषमृगे । रक्तचित्रके । ज.द. ।

रोही (इन्) । पुं । रोहितकवृक्षे । रोहा, वयना गाछ । र.मा. । सु.चि.३७अ. । महाकरञ्जे । वै.निघ. । अश्वत्थवृक्षे । वटवृक्षे । मे. ।

रोहीतकलौहम् । क्ली । लौहाधिकारे लौहस् । पाठः—"रोहीतकसमायुक्तं विकचयगुतत्वयः । लौहानं हन्ति..... ॥" र.सा.सं. ।

रौद्रः । पुं । आतपे । मे. । तत्पर्य्यायाः,—घर्म्मः प्रकाशः द्योतः आतपः । गुणाः,—आतपः स्वेदमूर्च्छामपित्तदृष्णाक्लमश्रमान् । दाहंविवर्णतां कुर्य्यात् ॥ भा. । हेमन्तर्त्तौ । हे.च ।

रौद्ररसः । पुं । अर्व्बुदाधिकारे रसः । पाठः—"शुद्धसूतं समं गन्धं सर्व्वं यामचतुष्टयं । नागवल्लीरसैर्युक्तं मेघनादपुनर्नवैः । गोमूत्रपिप्पलीयुक्तं मर्द्यं रुद्धा पुटेत्पचु । चौद्रैः...॥" १ र. लिहेत् । र.सा.सं. ।

रौद्री । स्त्री । रुद्रजटालतायाम् । रा.नि.व.३ ।

रौप्यम् । क्ली । रजतधातौ । क्रपा । हिं चांदि । गुणाः—"रौप्यं शीतं कषायाम्लं स्वादुपाकरसं सरं । वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् । प्रमेहादिकरीगांश्च नाशयत्यचिरात् ध्रुवम् । तारं शरीरस्य करोति तापं विड्घं घनं यच्छति शुक्रनाशम् । वीर्य्यं बलं हन्ति तनोत्य पुष्टिं महागदान् पोषयति ह्यशुद्धम् ॥" "गुरु स्निग्धं मृदु श्वेतं दाहे क्लेदे घनत्वसं । वर्णाढ्यं चन्द्रवत् स्वच्छं रौप्यं नवगुणं शुभम् । कठिनं क्लविमं रूक्षं रक्तं पीतदलं लघु । दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥" भा.पू.१भ.धा.व. । अस्य यथा—"हरितकबलिसूतनिर्म्मितकज्जलसमसम्पिष्टं रूप्यदलं । सिकतायन्त्रे वा गजपुटाङ्गस्य भवति गाढाग्नौ । द्विभागगन्धकैकभागरसाभ्यां कज्जलिकां कृत्वा जम्बीरादिरसैरुप्यपत्रं लिप्त्वा गजपुटे पचेत् ॥" सा.कौ. । शोधनञ्चास्य स्वर्णवत् । तथा—"नागेन टङ्कणेनैव द्रावितं शुद्धिमिच्छति । रजतं दोषनिर्म्मुक्तं किं वा चारान्नपाचितम् ॥" येन केनचिदम्लरसेनैकभागेन हरितालं प्रहरं सम्मर्द्य द्विभागरौप्यपत्राणि विलिप्य मूषापुटे निरुध्य विशल्करौद्रैः चतुर्दृश पुटानि देयानि । भा. । रोप्यधातुमले ।

रौप्यमलम् । क्ली । रौप्यमाक्षिके । वै.निघ. । २भ.पाण्डु.चि.चिफलादिलिहे ।

रौप्यमाक्षिकम् । क्ली । स्वनामख्यातोपधातौ । रौप्यमाक्षिक । See तारमाक्षिकम् ।

रौम(क)म् । क्ली । रोमकलवणे, शाम्भरलवणे । अ.टी.रसा. ।

रौमलवणम् । क्ली । शाम्भरलवणे । र.मा. ।

रौहिट् । पुं । रोहिषमृगे । अ.टी.भ. ।

रौहिणः । पुं । रक्तचन्दने । चन्दनवृक्षे । त्रिका. ।

रौहिणेयम् । क्ली । मरकतमणौ । रा.नि.व.१३ ।

रौहिष(षेय)म् । क्ली । कत्तृणे, रौहिषतृणे । पु । रोहितमत्स्ये । मृगविशेषे । अम. । स्त्री (षी) । दूर्व्वायाम् । मृग्याम् । उणा. ।

रौही (इन्) । पुं । रोहितकवृक्षे ।

रौक्षम् । क्ली । रूक्षतायाम् । सु. ।

रौक्ष्यम् । क्ली । वायुगुणभूयिष्ठत्वे, स्नेहराहित्ये । रूक्षता । सु. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ल

लक्क(कु)चः। पुं। डहुकवृक्षे। मान्दार गाछ, डहुआ गाछ, डेलो गाछ। र.मा.। हि वडहर। लकुची डहुक इति। तत्पर्य्यायाः,—ऐरावतः अस्लकः निकुचः कषायी दृढ़वल्कलः डहुः कार्श्यः शालः शूरः स्थूलस्कन्धः यन्त्रिसत्फलः। र.सा.सं. हिङ्गुलशोधने। गुणाः—स्वरसे तिक्तः कषायोष्णः लघुः कफघ्नः दाही मलसंग्राहकश्च। रा.नि.व.९। "आमं लकुचसुष्णञ्च गुरु विष्टम्भकृत्तथा। मधुरञ्च तथाम्लञ्च दोषवितयरक्तकृत्। शुक्राग्निनाशनं वापि नेत्रयोरहितं स्मृतम्। सुपक्वं तत्तु मधुरमम्लञ्चानिल-पित्तहृत्। कफवह्निकरं रुच्यं हृद्यं विष्टम्भकञ्च तत्॥" भा.।

लक्तकः। पुं। जीर्णवस्त्रखण्डे। नेकड़ा। अम.। अलक्तके। आल्ता। शब्दर.।

लक्तकर्म्मा (न्)। स्त्री। रक्तवर्णलोध्रे। शब्दच.।

लगणः। पुं। नेत्रवर्त्मगतरोगविशेषे। लक्षणं —"अपाकः कठिनः स्थूलो यन्त्रिवर्त्मभवोऽरुजः। सकण्डूः पिच्छिलः कीलप्रमाणो लगणस्तु सः॥" सु.उ.३अ.।

लगुड़ः। पुं। करवीरवृक्षे। वै.निघ.। दण्डे। लाठी। अम.।

लग्निका। स्त्री। नग्निकायाम्। अटी.।

लघुः। त्रि। रोगमुक्ते। रा.नि.व.२०। आकाश-गुणभूयिष्ठे वायुग्निगुणबहुले च। तद्गुणाः,— लघु पथ्यं परं प्रोक्तं कफघ्नं शीघ्रपाकि च।" सु.। स्त्री। पृक्कायाम्। पिड़िंशाक। ए.सु.। च.द.वा.व्या.चि.एकादशशतिकमहाप्राणतैले। क्ली। खामञ्जके। शुक्लदर्भे। रा.नि.व.१२। वेणामूल कृष्णागुरुणि। मे.।

लघुकणः। पुं। शुक्लजीरके। वै.निघ.।

लघुकण्टका। स्त्री। लज्जालौ। लज्जावती। वै.निघ.।

लघुकर्कन्धुः। पुं, स्त्री (न्धूः)। भूमिबदरे। मेटो कुल। वै.निघ.।

लघुकर्णी। स्त्री। सूर्व्वायां। मूर्गी। वै.निघ.।

लघुकामः (यः)। पुं। छागे। त्रिका.। शब्दर.।

लघुकाश्मर्य्यः। पुं। कट्फलवृक्षे। रा.नि.व.९।

लघुगर्गः। पुं। गर्गरमत्स्ये। गांगर माछ। विकण्टकमत्स्ये। ट्याङ्ड़ा माछ। त्रिका.।

लघुगोधूमः। पुं। क्षुद्रगोधूमे। छोट गम। सं छोटागोहुं। गुणाः—स्निग्धः गुरुः हृद्यः कफघ्नः आमदोषकरः बलकरः मधुरः वीर्य्यपुष्टिदश्च। रा.नि.व.१६।

लघुचन्दनम्। क्ली। काष्ठागुरुणि। वै.निघ.।

लघुचिर्भटी (भिंटा,टिका)। स्त्री। चिर्भटी-विशेषे। छगेवारी। छोट काँकुड़ वा राँखाल शसा। रा.नि.व.७।

लघुचेतकी। स्त्री। बालहरीतक्यां। वै.निघ. २भ.रक्तातिसा.चि.।

लघुच्छदा। स्त्री। महाशतावर्य्याम्। वै.निघ.।

लघुज(ङ्ग)लः। पुं। लावपक्षिणि। त्रिका.।

लघुदन्ती। स्त्री। क्षुद्रदन्त्याम्। छोट दन्ती। तत्पर्य्यायाः,—विशल्या उड़ुम्बरपर्णी एरण्डफला शीघ्रा श्वेतवरटा घृणप्रिया वाराहाची निकुम्भः मकुलकः। गुणाः—दन्तीहयं सरं पाके रसे च कटु दीपनं। गुदाङ्कुराश्मशूलास्रकण्डूकुष्ठ-विदाहनुत्। तीक्ष्णोष्णं हन्ति पित्तास्रकफशीथोदर-क्रिमीन्॥ क्षुद्रदन्तीबीजगुणाः—रसपाकयोर्मधुरं शीतलं विष्मूत्रशोधकं गलशोथ-कफघ्नम्। "जयपाली दन्तिबीजं विख्यातं तिन्तिड़ीफलम्। जयपाली गुरुः स्निग्धो रेचो पित्तकफापहः॥" भा.।

लघुद्राक्षा। स्त्री। काकोलीद्राक्षायाम्। किस्मिस्। रा.नि.व.११।

लघुनाम (न्)। क्ली। अगुरुणि। शब्दच.।

लघुनिदानम्। क्ली। सुरजितकृत-संक्षिप्त-निदाने। ग्रन्थे।

लघुपञ्चमूलम् (ली)। क्ली, स्त्री (ली)। स्वल्पपञ्चमूल्याम्। शालपर्णीपृश्निपर्णीबृहतीकण्ट-कारीगोक्षुरकृतकषाये। रा.नि.व.१२। च.द.ज्व. चि.। गुणाः—"पञ्चमूलं लघु स्वादु बल्यं पित्ता-निलापहं। नात्युष्णं दीपनं ग्राहि ज्वरश्वासाश्मरी-प्रणुत्॥" भा.।

लघुपत्रः (कः)। पुं। गुण्ड़ारीचन्द्याम्। शब्दच.। भिंगुवृक्षे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुपञ्चफला। स्त्री । लघूदुम्बरिकायाम् । रा.नि.व.११ ।

लघुपत्री। स्त्री । अश्वत्थीवृक्षे । गया अश्वथ । रा.नि.व.११ ।

लघुपर्णिका (र्णी)। स्त्री । मूर्व्वायाम् । रा. नि.व.३ । शतमूल्याम् । रा.नि.व.४ ।

लघुपर्व्वा (न्)। पुं । उदुम्बरवृक्षे । यज्ञडुमूर । वै.निघ. ।

लघुपाकः। वि । पाकलघौ । स च वह्निविवृद्धितथा मारुतकोपेन च ज्ञेयः । सु.सू.४१अ. ।

लघुपाकी (इन्)। पुं । चीनधान्ये । चिनेधान । प.मु. ।

लघुपाण्डुरपुष्पकः। पुं । द्वीपान्तरखर्ज्जूरिकायाम् । वै.निघ. ।

लघुपिच्छिलः। पुं । भूकर्ब्बुदारवृक्षे । कांञ्चन गाछ । रा.नि.व.१० ।

लघुपुटम्। क्ली । औषधपाकार्थं कपोतपुटाख्ये पुटभेदे ।

लघुपुष्पः। पुं । भूमिकदम्बे । कुकुशिमे । रा.नि.व.९ । स्त्री (ष्पा) । स्वर्णकेतक्याम् । वै.निघ. ।

लघुफलः। पुं । लघूदुम्बरे । छोट डूमूर । वै.निघ. ।

लघुबदरः। पुं । क्षुद्रफलबदरवृक्षे । डेमा कूल, मेटो कूल । मं क्षुद्रबेरि । कं किरुयरतरु । तत्पर्य्यायाः,—सूक्ष्मपत्रः सूक्ष्मफलः बहुकरः दुस्पर्शः मधुरः । गुणाः—पक्वं मधुराम्लं रुच्यं कफवातघ्नं स्निग्धं कृमिकरम् ईषत्पित्तदाहघ्नञ्च । रा.नि.व.११ ।

लघुबदरी। स्त्री । भूबदर्य्याम् । मेटो कूल । रा.नि.व.११ ।

लघुब्राह्मी। स्त्री । क्षुद्रब्राह्मीवृक्षे । छोट ब्राह्मी शाक । मं बावि, किर्ब्राह्मी । तत्पर्य्यायाः, —जलोद्भवा सूक्ष्मपत्रा । गुणाः—तिक्तरसा उष्णा पित्तवातामशोफघ्नी च । रा.नि.व.५ ।

लघुभण्टी। स्त्री । चिच्चीटके । चेँच्‌को । वै.निघ. ।

लघुभूतद्रुमः। पुं । भूकर्ब्बूदारवृक्षे ।

लघुमन्थः। पुं । क्षुद्राग्निमन्थवृक्षे । छोट गणिरी । रा.नि.व.९ ।

लघुमांसः। पुं । तित्तिरिपक्षिणि । तितिर पाखी । विका. ।

लघुमांसी। स्त्री । सूक्ष्मजटामांस्याम् । गन्धमांसी । रा.नि.व.१२ ।

लघुमूलकम्। क्ली । क्षुद्रमूलके । नेपालमूलके । भा. ।

लघुलता। स्त्री । कारवेल्लके । उच्छे गाछ । अनन्तायाम् । अनन्तमूल । वै.निघ. । ज.द. ।

लघुलयम्। क्ली । वीरणमूले । वेणार मूल । अम. । पौतीशीरे । वै.निघ.वा.व्या.चि.एलादितैले ।

लघुशङ्खः। पुं । क्षुद्रशङ्खे । छोट शाँख । वै.निघ. ।

लघुशीतः। पुं । शिलुवृक्षे । वै.निघ. ।

लघुशेलुः। पुं । शिलुवृक्षे । वै.निघ. ।

लघुश्लेष्मातकः। पुं । शिलुवृक्षे । वै.निघ. ।

लघुसदाफला। स्त्री । लघूदुम्बरिकायाम् । छोट डुमूर । रा.नि.व.११ ।

लघुसोमवल्ली। स्त्री । लघुसोमलतायाम् । वम. तानसिरासङ्घौ । वै.निघ. ।

लघुहस्तः। वि । चिप्रकारिणि ।

लघुहिमदुग्धा। स्त्री । लघूदुम्बरिकायाम् । छोट डुमूर । रा.नि.व.११ ।

लघूदुम्बरिका। स्त्री । क्षुद्रोदुम्बरवृक्षे । छोट डुमूर । गुणः—रसवीर्य्यविपाकेषु उदुम्बरादीषद्धीनगुणा । रा.नि.व.११ ।

लघ्वानन्दरसः। पुं । पाण्डुधिकारे रसः । पाठः—"पारदं गन्धकं लौहं विषमश्चकमेव च । समांशं मरिचस्याष्टौ टङ्कणञ्च चतुर्गुणं । भृङ्गराजरसैः सप्त भावनाश्चाम्लवेतसैः ॥" गुञ्जाद्वयं मात्रा, पर्णेन सह देयः । र.सा.सं । वातव्याध्युक्ते अस्मिन् रसे भृङ्गरसैः पञ्च भावनाः, दाड़िमरसेन च वटीकरणमिति विशेषः ।

लघ्वारग्वधः। पुं । आरग्वधवृक्षविशेषे । छोट सोन्दाल ।

लघ्वी। स्त्री । इक्ष्विकीक्ष्याम् । जामकोली । मद.व.६ । पृक्कायाम् । पिड़ि । रा.नि.व.१२ ।

लङ्का। स्त्री । शिम्बीधान्यविशेषे । तेओड़ा । मं मटुराचपटा । कं लांक । तत्पर्य्यायाः,—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करालचिपुटा काण्डिका रूक्षणात्मिका। गुणाः—रूक्षा हिमा गौल्या गुरुः पित्तघ्नी वातकरी च। रा.नि.व.१६। स्पृक्कायाम्। कुमरिचे। लङ्कामरिच। वै.निघ.। शाखायां। मे.। क्षणचणके। प.मु.।

लङ्काधिपेश्वररसः। पुं। कुष्ठाधिकारे रसः। पाठः—"सूताभ्रगुल्वभस्मानि गन्धं तालं शिलाजतु। अम्लवेतसतुल्यांशं चाक्लेन मर्दयेत्ततः। मध्वाज्याभ्यां वटीं कार्य्या द्विगुञ्जं भक्षयेत् सदा.....। विफलानिम्बगुडूचिष्ठापटोलमूलकं वचा। कटुकी रजनी तुल्यं क्वाथोऽयमनुपानतः॥" रस.र.।

लङ्का(ङ्की)पि[यि,रि]का। स्त्री। वृक्षायाम्। पिण्डिं शाक। श.र.।

लङ्कास्थायी। पुं। स्नुहीभेदे। लङ्कासिजू। श.च.। "लङ्कास्थायी राजवृक्षो भद्रचूडो विशाकरः।"

लङ्केश्वररसः। पुं। कुष्ठाधिकारे रसः। पाठः—"भस्म सूतार्कलौहानां क्षणागन्धकटङ्कणम्। कुष्ठतुल्यकतुल्यांशं मर्दयेत् धुस्तूरजैर्द्रवैः। दिनकं तद्वटीं कुर्य्यात् माषमात्रञ्च भक्षयेत्। रसो लङ्केश्वरो नाम्ना प्रभूतमण्डलप्रणुत्॥" रस.र.।

लङ्घितम्। क्ली। अश्वस्य रोगभेदे। लक्षणं यथा—"लङ्घितं द्विविधं प्रोक्तं मुनिभिः शास्त्रकोविदैः। एकं वातादिभिर्दोषैः द्वितीयञ्चाभिघातजम्। उरसा बाहुना चाग्री जानुजङ्घाविकेण च। कूर्चेन च खुरायेण मण्डुक्या चापि लङ्घति॥" ज.द.३२अ.।

लङ्गूलम्। क्ली। लाङ्गूले। उणा.।

लङ्गेष्ठालुकम्। क्ली। रक्तेष्ठालौ। लाल आलू। त्रिका.।

लङ्घनम्। क्ली। लघुभोजने उपवासे वा। उपोषः। मे.। शरीरलाघवकरे द्रव्ये कर्म्मणि वा। सु.। कर्षणे। यथाह—"चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ। पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम्॥" लाघवकरे विधौ। सि.यो.अजीर्ण.चि.श्रीकण्ठः।

लजकारिका। स्त्री। लज्जालुकालतायाम्। श.मा.।

लज्जका। स्त्री। वनकार्पास्याम्। वै.निघ.।

लज्जरी। स्त्री। लज्जालुकायाम्। वै.निघ.।

लज्जा। स्त्री। श्वेतलज्जालुकायाम्। श्वेत लज्जावती लता। रा.नि.व.५। वराहक्रान्तायां। वराक्रान्ता। च.द.व्रणशोथ.चि.। भेष.बृहत्खदिरवटी। चपायाम्।

लज्जालु। पुं, स्त्री। (Mimosa pudica.) The sensitive plant. स्वनामख्यातक्षुपविशेषे। लज्जावती, लाजुक। सं लाजालु। तत्पर्य्यायाः,—कन्दिरी रक्तपादी शमीपत्रा स्पृक्का खदिर-पत्रिका सङ्कोचनी समङ्गा नमस्कारी प्रसारिणी सप्तपर्णी खदिरी गण्डमालिका लजकरिका लज्जा लज्जिरी स्पर्शलज्जा अक्षरोधिनी रक्तमूला। ताम्रमूला स्वगुप्ता अञ्जलिकारिका महाभीता वह्निनी महौषधिः। र.सा.सं.रसायने। गुणाः—कटुः शीता पित्तातिसारघ्नी शीफदाहश्रमश्वासव्रणकुष्ठकफास्रघ्नी च। अपिच—लज्जालुः शीतला तिक्ता कषाया कफपित्तजित्। रक्तपित्तमतीसारं योनिरोगान् विनाशयेत्॥ "लज्जालुर्विपरीतान्या स्वल्पक्षुपद्दृदला। वैपरीत्या तु लज्जालुर्ह्यभिधाने प्रयोजयेत्॥" "लज्जालुर्वैपरीत्या तु कटुरुष्णकफापनुत्। रसे नियामकश्चैव नानाविज्ञानकारकः॥" रा.नि.व.५।

लज्जालुका। स्त्री। वराहक्रान्तायाम्।

लज्जिका (नी)। स्त्री। लज्जालुकालतायां। लाजुका। रा.नि.व.५। र.सा.सं.।

लज्जिरी। स्त्री। लज्जालुकायां। रा.नि.व.५।

लञ्जः। पुं। पादशाखायाम्। कच्छ। हे.च.।

लटपर्णम्। क्ली। त्वचि। गुडत्वक्। रा.नि. व.१२।

लटपक्कः। पुं। प्रतुदपक्षिविशेषे। च.सू.२७अ.।

लट्टः। पुं। अश्वे। उणा.। स्त्री (ट्टा)। करञ्जभेदे। नाटाकरञ्ज। त्रिका.। कुसुम्भवृक्षे। हे.च.। ग्राम्यचटके। मे.। च.सू.३७अ.। भ्रमरे।

लठम्। क्ली। विष्ठायाम्।

लड्डुकः। पुं। मिष्टान्नभेदे। लाड़ू। गुणाः—"लड्डुकी दुर्जरः परः।" राज.३प.। "तैलेन हविषा पक्वं भवेत् चूर्णञ्च लड्डुकः।" श.च.।

लण्डम्। क्ली, स्त्री (ण्डा)। पुरीषे। ल्याड़्। भूरिप्र.।

लता। स्त्री। वल्ल्याम्, गुडूच्यादौ। लतां। लतापत्रगुणाः—कटूष्णं कफवातहरम्। तद्बीजं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीपनं पथ्यं शूलगुल्मविषघ्नञ्च । रा.नि.व.८ । लताकस्तूरिकायाम् । लताकस्तूरी । हिं मुषक्-दाना । भा.उ.वाजी.चि. । "लताकस्तूरिकापि च ।" च.द.वा.व्या.चि.महासुगन्धतैले । "कक्कोलका-गुरुलता ।" काष्ठसारिवायाम् । रा.नि.व.१२ । मञ्जिष्ठायाम् । च.सू.३अ. । च.द.गर्भाधिकारे । दूर्व्वायाम् । च.सू.४अ. । रस.र.आ.व्रण.चि. । "कालीयकलतामाख्यि ।" प्रियङ्गौ । अम । वा. उ.५अ. । च.द.गर्भाधिकारे । च.द.व्रण.शोथचि. । श्वेतसारिवायां । भा.पू.१भ. । See अनन्ता । ज्योतिष्मतीलतायां । लताफट्की । वा.व्या.दश-मूलादितैले । स्पृक्कायां । अम. । श्वेतयूथिकायाम् । जातीपुष्पवृक्षे । रक्तपाटलवृक्षे । वै.निघ. । माधवी-लतायां । मे. । वैवर्त्तशुक्लायां । रा.नि.व.६ ।

लताकरञ्जः । पुं । वल्लीकरञ्जे । लता-करञ्जा । वम. सागरगोटी । हिं कटकरेंज । तत्पर्य्यायाः,—दुस्पर्शः वीराख्यः वज्रबीजकः कुबेराक्षो धनदाक्षो कण्टफलः । गुणाः—"लता-करञ्जपवन्तु कटुष्णं कफवातनुत् । तद्बीजं दीपनम्पथ्यं शूलगुल्मव्यथापहम् ॥" रा.नि.व.८ ।

लताकस्तूरिका (री) । स्त्री । (Hibis-cus Abelmoschus. Syn. Abelmos-chus moschatus.) Musk mallow. खनामख्यातवृक्षे । लताकस्तूरी, काल कस्तूरी । हिं मुसुक्दाना । तैं तक्कोलफलसु, कर्पूरवेण्ड । ता. कटेकस्तूरी । दा. कस्तुरवेण्ड । तत्पर्य्यायौ, —कटुः दक्षिणदेशजा । गुणाः—"लताकस्तूरिका तिक्ता स्वादौ हृद्या हिमा लघुः । चक्षुष्या छेदनी श्लेष्मश्वासव्रणास्रदोषगुदहृत् ॥" भा. । शीतला वस्तिशोधनी च । सु.सू.४६अ. ।

लताङ्गी । स्त्री । कर्वटशृङ्ग्यां । काँकड़ाशृङ्गी । वै.निघ. ।

लताजिह्वः । पुं । सर्पे । अ.मा. ।

लतातरुः । पुं । तालवृक्षे । निम्बवृक्षे । अ.मा. । लताशालवृक्षे । विका. ।

लतातालः । पुं । हिन्तालवृक्षे । हेँतांल गाछ । रा.नि.व.९ ।

लतादुमः । पुं । लताशाले । र.मा. । तत्-पर्य्यायाः,—तार्क्ष्यः अश्वकर्णः कुम्भिकः वन्यः दीर्घः ।

लतापनसः । पुं । तरम्बुजलतायाम् । तरमुज गाछ । विका. ।

लतापर्णी । स्त्री । तालमूल्यां । मधुरिकायाम् । मउरी । वै.निघ. ।

लतापृक्का । स्त्री । स्पृक्कायाम् । पिड़िं शाक । अ.र. ।

लताप्रतानिनी । स्त्री । शाखाप्रत्ययवल्लता-याम् । अम. ।

लताफलम् । क्ली । पटोले । ब्रह्मवै. पु. ।

लताबृहतिका । स्त्री । बृहतीलतायाम् । बृहती । प.मु. ।

लताभद्रा । स्त्री । भद्रालीलतायाम् । गन्ध-भाद्दलिन्यां । अ.मा. ।

लतामणिः । पुं । प्रवाले । रा.नि.व.१३ ।

लतामरुत् । स्त्री । स्पृक्कायां । पिड़िं । अ.र. ।

लतामाधवी । स्त्री । माधवीलतायां । अ.र. ।

लतायष्टिः (ष्टी) । स्त्री । मञ्जिष्ठायां । अ.मा. ।

लतायावकम् । क्ली । तरुप्रवाले । छारा. ।

लतारसनः । पुं । सर्पे । छारा. ।

लतार्कः । पुं । हरित्पलाण्डौ । अम. ।

लतालकः । पुं । गजे । विका. ।

लतावृक्षः । पुं । शल्लकीवृक्षे । वै.निघ. ।

लताशङ्कुतरुः । पुं । लताशालवृक्षे । विका. ।

लताशङ्कुः । पुं । शालवृक्षे । अ.र. ।

लताशिरीषः । पुं । वल्लीशिरीषे । प.मु. ।

लतिका । स्त्री । यमकलतायाम् । व्याक. ।

लत्तिका । स्त्री । ज्येष्ठाम् । टिक्टिकी । गीधायां । उणा. ।

लपनम् । क्ली । मुखे । रा.नि.व.१८ । भाषणे ।

लप्सिका । स्त्री । खाद्यविशेषे । मोहनभोग । करणविधिः—"गोधूमपिष्टे साम्येन घृतं न्यस्य सुभर्ज्जयेत् । शर्करां पिष्टमानेन समां तत्रजलं न्यसेत् । लीड़यित्वा ततो वस्त्रपूतां पिष्टे विनि-क्षिपेत् । मन्दाग्नौ विपचेत्तावज्जलम्पीत्वा घृतङ्करेत् । शुष्कशौफलचूर्णमेलागुरुधीमरीचनिर्वौजाः । केतकी-फलखण्डांश्च क्षिप्त्वा दर्व्या विचालयेत् कुशलः ॥ पक्वा, च रक्ततां याते सिद्धोऽयं भोगमोहनः । शीतकाले तु भोक्तृणां परः प्रोक्तः सुखावहः ॥" वै.निघ. । अथवा,—समितां सर्पिषा सृष्टां शर्करां पयसि क्षिपेत् । तस्मिन् घनीकृते न्यसेत्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लवङ्गं मरिचादिकं ॥ सिङ्हेषा लम्पिका ख्याता गुणास्तस्या वशाम्यहम् । लम्पिका बृंहणी ह्रष्या बल्या पित्तानिलापहा । स्निग्धा श्लेष्मकरी गुर्व्वी रोचनी तर्पणी परम् ॥ भा. ।

लम्फः । पुं । उल्लम्फने ।

लम्बः । पुं । अङ्के । उणा. ।

लम्बकर्णः । पुं । अङ्कोलवृक्षे । आँकोड़ गाछ । रा.नि.व.९ । अजके । खरगोष । भा. । छागे । विका । श्येनपक्षिणि । रा.नि.व.१९ ।

लम्बदन्ता } स्त्री । सिंहलीपिप्पल्याम् । रा.नि.
लम्बबीजा } व.६ । See सिंहपिप्पली ।

लम्बनः । पुं । कफे । अ.च. ।

लम्बा । स्त्री । तिक्तलम्बायां । लम्बा तिएलाउ । दीर्घतिक्तालाबुसंज्ञा । वा.सू.१५अ.घा.व. । "लम्बां शुक्तनसां तथा ।" सु.चि.१९अ. । स्थावरविषान्तर्गतपत्रविषे । सु.कल्प.२अ. ।

लम्बिका । स्त्री । सूक्ष्मजिह्वायां । आलजिव । रा.नि.व.१८ । अ.र. ।

लम्बितम् । क्ली । मांसधातौ । मांस । वै.निघ. । [विका. ।

लम्बो(म्बी)ष्ठः । पुं । उष्ट्रे । रा.नि.व.१९ ।

लयम् । क्ली । उशीरे । वै.निघ. ।

ललज्जिह्वः । पुं । उष्ट्रे । कुक्कुरे । मे. । स्त्री (ह्वा) । महासमङ्गायाम् । रा.नि.व.४ ।

ललदम्बु । पुं । पुष्पभेदे । लिम्बाके । जटा. । क्ली । उदकविशेषे । वै.निघ.हिक्का.चि. ।

ललनः (ना) । पुं, स्त्री । सर्ज्जवृक्षे । धूनो शालेर गाछ । रा.नि.व.९।२३ । चारवृक्षे । पिय्राल गाछ । रा.नि.व.११।२३ । राले । धूनो । रा.नि.व.१२ । बालके । रा.नि.व.१९ । स्त्री । जिह्वायां । मे. । स्त्रियाम् ।

ललनाप्रियम् । क्ली । क्रौवेरे । बाला । रा.नि.व.१० । पुं । कदम्बवृक्षे । रा.नि.व.९ ।

ललाकः । पुं । शिश्ने । अ.च. ।

ललाट(क)म् । क्ली । भाले । गण्डदेश, कपाल । रा.नि.व.१८ । प्रशस्तललाटे । अ.र. ।

ललाटरेखा । स्त्री । दीर्घजीवनसूचककपालस्थरेखायाम् ।

ललाटास्थि । क्ली । कपालास्थिद्वये । च.शा. ७अ. । [बालधी । मे. ।

ललामम् । क्ली । अश्वे । गृङ्गे । चिह्ने ।

ललितः । पुं । तन्नाम्ना ख्याते अर्शोऽङ्कुरविशेषे । लक्षणं—"गुदद्वारात् पृष्ठदेशे जायन्ते पाण्डुराङ्कुराः । ललितास्ते.....॥" निदा. ।

ललिता । स्त्री । कस्तूर्य्याम् । मृगनाभि । रा.नि.व.१२ । लताकस्तूर्य्याम् ।

लवम् । क्ली । जातीफले । अ.च. । लामञ्चके । लवङ्गे । रा.नि.व.१२ । पुं । लावपक्षिणि । चतुर्थभागे । सिकि । भैष.र.सा.वसन्तकुसुमाकररसे । छेदने । लिंगे । विका. ।

लवङ्ग(क)म् । क्ली । (Caryophyllus aromaticus.) Cloves. स्वनामख्यातपरिचितद्रव्ये । मलक्कस द्वीपजवृक्षस्य पुष्पबन्धे । लवङ्ग । हिं लौङ् । मं कं लवङ्गकलिका । फा. लौंग, मेखक् । ता. किरम्बेर । तें लवङ्गलु । दा. लवङ् । तत्पर्य्यायाः,—देवपुष्पं श्रीपुष्पं श्रीसंज्ञं लवङ्गकलिका दिव्यं शेखरं लवं रुचिरं ग्रहणीहरं तोयधिप्रियं तीक्ष्णपुष्पं वारिपुष्पं चन्दनपुष्पं भृङ्गारं गौर्व्वाणकुसुमं दिव्यगन्धं । गुणाः—शीतलं तिक्तं चक्षुष्यं भक्तरोचनं विदोषघ्नं तीक्ष्णं शिरोरोगहरञ्च । रा.नि.व.१२ । कटुतिक्तं कफघ्नं लघु त्वपाग्नं सुखदौर्गन्ध्यघ्नञ्च । सु.सू.४६अ. । "आध्मानानाहशूलघ्नं लवङ्गं पाचनं लघु ।" राज. ३प. । "लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमं । दोषघ्नं पाचनं रुच्यं कफपित्तास्रनाशकृत् । तृष्णां छर्दिं तथाध्मानं शूलमाशु विनाशयेत् । कासं श्वासञ्च हिक्काञ्च क्षयं चपयति ध्रुवम् ॥" भा. ।

लवङ्गकन्दपत्रा । स्त्री । लघुतालीशपत्रे । वै.निघ. ।

लवङ्गकलिका । स्त्री । लवङ्गे । रा.नि. व.१२ ।

लवङ्गचतुस्समः । पुं । अतीसाराधिकारि योगः । पाठः—"जातीफलं विदशपुष्पसमन्वितञ्च जोरञ्च टङ्कणयुतं चरकैः प्रयुक्तं । चूर्णानि साचिकसितासहितानि लीढ्वा सामातिसारमखिलं गुरु हन्ति शूलम् ॥" रस.र. ।

लवङ्गतैलम् । क्ली । लवङ्गीत्वतैले । तद्गुणाः, दोषपुष्पीभवं तैलमग्निकृद्वातनाशनम् । दन्तवेष्टस्य चार्त्तिघ्नं गर्भिण्या वमनापहम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लवङ्गलता। स्त्री। पुष्पवृक्षविशेषे। लवङ्ग गाछ। जयदेवः।

लवङ्गादिचूर्णम्। क्ली। राजयक्ष्माधिकारे चूर्णौषधे। पाठः—"लवङ्गकक्कोलमुशीरचन्दनं नतं सनोलोत्पलजीरकं समं। त्रुटिः सकृष्णागुरु भृङ्गकेशरं कणा सविश्वानलदं महाम्बुदं। अहीन्द्र-जातीफलवंशलोचनासिताष्टभागं समशुल्लचूर्णितं। अरीचकं तर्पणमग्निदीपनं बलप्रदं ह्यतभं त्रिदोषनुत्॥" त्रुटिः एलाबीजं। अहीन्द्रम् अनन्तमूलं। महाम्बुदं मुस्तकं। भृङ्गं गुड़त्वक्। नलदं जटामांसी। वातपित्ताधिके वङ्गिबले सर्व्वचूर्णापेक्षया शर्करा अष्टगुणा। कफाधिके चाग्निमान्द्ये च एकभागापेक्षयाष्टगुणेति। अन्यत् ग्रहणाधिकारे—"लवङ्गातिविषामुस्तं बिल्वं पाठाथ ग्राह्मलौ। जीरकं धातकीपुष्पं लोध्रेत्र्यवबालकं। धान्यकं सर्ज्जकं शुङ्गी पिप्पली विश्वभेषजम्। समङ्गायावशूकञ्च सैन्धवं सरसाञ्जनं। समभागानि चैतानि भक्षयेत्प्रातरुत्थितः॥" रस.र.।

लवणम्। क्ली। चाररसद्रव्यविशेषे। लून। हिं निमक्। तत्पर्य्यायः,—पटुः। तत् पञ्चविधं—सौवर्चल-सैन्धव-विड्डौद्भिद-सामुद्रभेदेन। अस्य। सैन्धवसौवर्चलकाचविड्गाढ़सामुद्रद्रौणीयौषररोमक-भेदेन नवधा। रा.नि.व.२०। तद्गुणः—सामुद्र-सैन्धव विड् रौमक-सौवर्चल-चुल्लिकाभेदेन षट्। "लवणानि च कथ्यन्ते सामुद्रं सैन्धवं विड्। सौवर्चलं रोमकञ्च चुल्लिकालवणन्तथा॥" र.सा. सं.। तत्र सैन्धवं श्वेतरक्तभेदेन द्विविधं। गाढ़लवणं ग्राकम्बरदेशे प्रसिद्धं। एषां गुणाः स्वस्वपर्य्याये मृग्याः। सैन्धवलवणे। वा.सू.१५अ.। "कणलवण-चेला।" चारविशेषे। लोणार क्षार। च.द. गुल्म.चि.। "सलवणा दग्ध्वा जले पाचितं।" पुं। षड्रसान्यतमरसे। स च सैन्धवादौ दृश्यते। गुणाः "लवणो रुचिकृद्रसोऽग्निदायी पचनः स्वादुकरश्च सारकश्च। अतिसेवनतो जराच्च पित्तं शितिमानञ्च ददाति कुष्ठकारी॥" रा.नि.व.२०। अपिच—"लवणः क्लेदनस्तीक्ष्णः पाचनो दीपनः सरः। स्निग्धो रुचिकरः स्यन्दी दृष्टिशुक्रहरो लघुः॥ अपिच—लवणः शीघ्रनो रुच्यः पाचनः कफपित्तदः। पुंस्त्ववातहरः कायग्रन्थिश्लथ्यसृदुताकरः। सीतियुक्तोऽचिपाकास्रपित्तकीटक्षयापकृत्॥" राज.। योभक्तरुचिमुत्पादयति कफप्रसेकं जनयति माईव-मापादयति स लवणः। सु.सू.४२अ.। त्रि। लवणरसयुक्ते। मे.।

लवणकिंशुका। स्त्री। महाज्योतिष्मतीलतायाम्। बड़ लताफट्की। रा.नि.व.३।

लवणख (खा) निः। पुं। लवणाकरे। लवणेर खनि। हे.च.।

लवणतृणम्। क्ली। खनामप्रसिद्धे तृणविशेषे। लोणाघास। तत्पर्य्यायाः,—लोणतृणं तृणाम्लं पटुतृणकं अम्लकाण्डं। गुणाः,—चारास्लं कषायम् अम्लत्वम्। अश्वहृद्धिकरञ्च। रा.नि.व.८।

लवणत्रयम्। क्ली। विट्सैन्धवरूचकेषु। सैन्धव, विट्, सचल। "सैन्धवञ्च विड्चैव रुचकञ्चेति मिश्रितं। लवणत्रयमाख्यातम्.....॥" रा.नि.व.२२। च.द.ग्रहणीचि.।

लवणद्वयम्। क्ली। सौवर्चलसैन्धवलवणे। सचल ओ सैन्धव। च.सू.२अ.।

लवणनित्यः। त्रि। नित्यं लवणरसास्वादनशीले। च.।

लवणभेदः। पुं। लवणचारे। लोणार क्षार। वै.निघ.।

लवणमदः। पुं। लवणचारे। लोणार क्षार। रा.नि.व.६।

लवणमेहः। पुं। मेहविशेषे। अत्र रोगी विशदं लवणतुल्यं मेहति। सु.नि.६अ.।

लवणयन्त्रम्। क्ली। औषधपाकार्थलवणपूर्णयन्त्रविशेषे। "उर्द्धं तज्जलहीनं चत् यन्त्रं डमरुकाह्वयम्। तद्यन्त्रं लवणैः पूर्णं लवणाख्यमितीरितम्॥"

लवणवर्गः। पुं। लवणसमूहे। "लवणानि च कथ्यन्ते सामुद्रं सैन्धवं विड्म्। सौवर्चलं रोमकञ्च चुल्लिकालवणस्तथा॥"

लवणव्यापत्। स्त्री। अस्वस्थ अतिमात्रलवणभक्षणजन्यव्यापदि। "प्रभूतं लवणं यस्य भोजने वाजिनी भवेत्। केवलं वातजस्तस्य व्यापत् सुमहती भवेत्॥" ज.द.६०अ.।

लवणस्कन्धः। पुं। षड्विधास्थापनेषु लवणवर्गीयद्रव्यकृतास्थापनविशेषे। च.वि.८अ.।

लवणक्षारः। पुं। लोणारक्षारे। रा.नि.व.६।

लवणा। स्त्री। चुक्रिकायां। चूकापालंः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वै.निघ.२भ.वा. व्या.चि.। चाङ्क्ष्यां। आमकफल। लवणशाके। ज्योतिष्मतीलतायां। लताफट्‌की। रा.नि.व.३। लवणचारे।

लवणाब्धिजम्। क्ली। समुद्रजातलवणे। रा.नि.व.६।

लवणारम्। क्ली। लवणचारे। लोणार क्षार। रा.नि.व.६।

लवणारजम्। क्ली। लोणारचारे। रा.नि.व.६।

लवणो। स्त्री। आम्लव्यफल-जातीय-फलवृक्षे। लोना। तत्पर्य्यायः—ग्रीष्मजा अग्निमा।

लवणोत्तमम्। क्ली। सैन्धवलवणे। रत्ना। सि.यो.ज्व.चि.।

लवणोत्तमाद्यचूर्णम्। क्ली। अर्शोविनाशकं चूर्णम्। सैन्धवचित्रकेन्द्रयवकरञ्जमूलमहापिचुमर्द-मूलानां चूर्णं प्रत्येकं २ तो.। मात्रा ८ माषा। अनु. तक्रं। च.द.।

लवणोत्थम्। क्ली। लोणारचारे। रा.नि.व.६।

लवणोत्था। स्त्री। ह्रस्वज्योतिष्मतीलतायाम्। छोट लताफट्‌की। वै.निघ.।

लवणोदः। पुं। लवणसमुद्रे। अम.।

लवनो। स्त्री। छेदने। अम.। ग्रीष्मजफलभेदे। लोण। ग्र.च.।

लवली। स्त्री। फलवृक्षविशेषे। लोओग्राड़ गाछ। हिं हरफरी। तत्पर्य्यायाः,—सुगन्धमूला पाण्डुः कीमलवल्कला। फलगुणाः—"लवली-फलमग्न्याशः कफपित्तहरं गुरु। विशदं रोचनं रुच्यं स्वादम्ल तुवरं रसे॥" भा. आम्रव। "कषायं कफपित्तघ्नं किञ्चित्तिक्तं रुचिप्रदं। हृद्यं सुगन्धि विषद लवलीफलमुच्यते॥" सु.सू.४६अ.।

लशु(शू)नम्। क्ली, पुं। रसोने। रशुन। अम.। रा.नि.व.७।

लसा। स्त्री। हरिद्रायाम्। हारा। आम-हरिद्रायाम्। वै.निघ.।

लसान्द्रः। पुं। राजमाषे। वर्व्वटी। रत्ना.।

लसि(सी)का। स्त्री। इक्षुरसे। लालायाम्। ग्र.च.। वा.उ.२६अ.। भा.म.४भ.विसर्प.चि.। शर्कराविशेषे। फेणीगुड़। गुणाः—"लसीका फाणितगुड़ः खण्डमत्स्यण्डिका सिता। निर्म्मला लघवी ज्ञेयाः शीतवीर्य्या यथोत्तरम्। यथायथेषां नैर्म्मल्यं गुणवत् स्यात् तथा तथा॥" राज.३प.। तन्मांसान्तरगतरसविशेषे। "यत्तु मांसलगन्तरे उदकं तल्लसीकाशब्दं लभते।" च.।

लक्षम्। क्ली। मौक्तिके। मुक्ता।

लक्ष(क्ष्म)णम्। क्ली। चिह्ने। मे.। ग.र.। "लक्षणं चिह्नमाकृतिः।" मा.नि.पञ्चनिदाने। रोगस्य व्यक्ते विशिष्टपूर्व्वरूपे। "पूर्व्वरूपं विशिष्टं यद्व्यक्तं तल्लक्षणं स्मृतम्॥" मा.। रूपे। पुं। सारसपक्षिणि। ग्र.र.। सुचुकुन्दवृक्षे। रा.नि.व.१०। प्लक्षवृक्षे। पाकुड़ गाछ। प.मु.। लक्षणोत्सवनामग्रन्थकारे।

लक्ष(क्ष्म)णा। स्त्री। श्वेतकण्टकार्य्याम्। रा.नि.व.४। वै.निघ.उन्माद.चि.सारस्वतघृते। सारस-पक्ष्याम्। मे.। स्वनामख्यातकन्दे। लक्षणामूल। वस्.लक्षणाकन्द। वा.उ.१।१३अ.। तत्पर्य्यायाः,—पुत्रकन्दा पुत्रदा नागपत्नी नागाह्वा नागिनी तूलिनी मञ्जिका अक्षविन्दुच्छदा। लक्षणाजटा पुच्छदा। लक्षणं—"पुत्राकारकरक्काल्पविन्दुभि-र्लाञ्छिता सदा। लक्ष्मणा पुत्रजननी वस्तुगन्धा-कृतिर्भवेत्॥" भा.। गुणाः—मधुरा शीतला बल्या वृष्यादोषघ्नी रसायनी बल्या त्रिदोषघ्नी च। रा.नि.व.७। जवाह्वे। सुचुकुन्दवृक्षे। वै.निघ.।

लक्ष्मणाजटा। स्त्री। लक्ष्मणामूले। चि.क.क.बन्ध्याप्रतीकारे।

लक्ष्मीः। स्त्री। श्वेततुलस्याम्। रा.नि.व.१०। सुक्कानामगन्धद्रव्ये। पिड़िङ्। रा.नि.व.१२। प्रियङ्गौ। ऋद्धौ। वृद्धौ। मे.। पद्मचारिण्याम्। स्थलपद्म। रा.नि.व.१०। वा.सू.२८अ.। पद्मे। विष्णु.। शमीवृक्षे। हरिद्रायाम्। मुक्तायां। रा.नि.व.६।८।१३। मेषशृङ्ग्याम्। मेड़ाशिङे। वै.निघ.।

लक्ष्मीगृहम्। क्ली। रक्तोत्पले। त्रिका.।

लक्ष्मीतालः। पुं। श्वीतालवृक्षे। कीड़णे मलियादेशे च प्रसिद्धः। रा.नि.व.९।

लक्ष्मीदासः। पुं। योगशतकग्रन्थप्रणेतरि।

लक्ष्मीपतिः। पुं। लवङ्गवृक्षे। पूगवृक्षे। विश्व.।

लक्ष्मीपुत्रः। पुं। घोटके। मे.।

लक्ष्मीपुष्पः। पुं। पद्मरागमणौ। हे.च.।

लक्ष्मीफलः। पुं। विल्ववृक्षे। रा.नि.व.११।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्मीवान्। पुं। पणसवृक्षे। काँठाल गाछ। भ.मा.। श्वेतरोहितके। श्वेत रोहा। रा.नि. व.८। अश्वत्थवृक्षे। वै.निघ.।

लक्ष्मीविलासरसः। पुं। ज्वरे वातव्याधौ च रसः। पाठः—"पल कृष्णाभ्रचूर्णस्य तदर्द्धो रस-गन्धकौ। बला-नागबलाभोर-विदारीकन्दमेव च। कृष्णधुस्तूरनिचुलं गोक्षीरद्वन्द्वदारयोः। बीजं शुक्राश्मनस्यापि जातीकोषफले तथा। कर्पूरश्चैव कर्षांशं श्लक्ष्णचूर्णं पृथक् पृथक्। गृहीत्वा चाष्ट-मांशेन स्वर्णं पर्णरसेन च॥" वटिका स्निग्ध-चणकप्रमाणा। कृष्णाभ्रचूर्ण ८ तो. पारा, गन्धक प्रत्येक ४ तो. (मतान्तरे रस २ तो. गन्धक २ तो.) श्वेत बेड़ेला, गोरक्षचाकुलियामूल, शतमूली, भूमिकूष्माण्ड, काल धुतुरार बीज, हिजलबीज, गोक्षुरबीज, बिजताड़ेर बीज, सिद्धिबीज, जायफल, जयित्री, कर्पूर इहादेर चूर्ण प्रत्येक २तो. स्वर्णभस्म।० चारि आना; पाणेर रसे माड़िया बटी करिबे। मात्रा सिद्धचणकवत्। मतान्तरे जायफल, जयित्री एक एक तो. बीजताड़क प्रभृतिर बीज मिलित २ तो.। अन्ये महालक्ष्मीविलासः अग्निरोगे। पाठः—'लौहभस्म विषं मुक्तं फलत्रय-कटुत्रयं। धुस्तूरं द्वन्द्वदारुञ्च बीजमिन्द्राशनस्य च। गोक्षुरकद्वयञ्चैव पिप्पलीमूलमेव च। एतत्सर्व्वं समं ग्राह्यं रसे धुस्तूरकस्य च। भावयित्वा वटी कार्य्या द्विगुञ्जाफलमानतः॥" लौह, अभ्र, विष, मुक्ता, त्रिफला, त्रिकटु, धुतुराबीज, बीजताड़कबीज, सिद्धिबीज, छोट गोखुरा-बीज, बड़ गोखुरीबीज, पिपुलमूल समभाग। धुतुराबीजेर रसे भावना दिया बटी करिबे। मात्रा २ कुँच। र.सा.सं.। अन्यः कासि—वङ्गं लौहम् अभं ताम्रं कांस्यं पारदः हरितालं मनःशिला खर्परं प्र. १ प.। केशराजस्य कुलत्थस्य च क्वाथे प्र. दिनत्रयं भावयेत्। एला जातीफलं तेजपत्रं लवङ्गं यमानी जीरकं त्रिफला त्रिकटु तगरं गुडत्वक् वंशलोचना प्र. २ तो. तैन सह मिश्रयित्वा पूर्ववत् भावना देया। माषा चणकमिता। भैष.।

लक्ष्मीवेष्टः। पुं। श्रीवेष्टनामसुगन्धद्रव्ये, सरल-निर्य्यासे। रा.नि.व.१२।

लक्ष्मीश्रेष्ठा। स्त्री। स्थलपद्मिन्यां। वै.निघ.।

लागजोरः (कः)। पुं। शङ्खजोरके। वै.निघ.।

लाघरकः। पुं। हलीमकरोगे। सु.उ.४४अ.।

लाघवम्। क्ली। लघुत्वे। आरोग्ये। रा.नि.व.२०। [लिङ्गे। विका.।

लाङ्गलम्। क्ली। पुष्पभेदे। तालवृक्षे। मे.।

लाङ्गलकः। पुं। लाङ्गलाकारे भगन्दरच्छेदे। "कुटासहितहलाकारः पार्श्वद्वये यच्छेदः स सम्पूर्ण-हलाकारः।" वा.उ.२८अ.। "द्वाभ्यां समाभ्यां पार्श्वाभ्यां छेदी लाङ्गलको मतः।" सु.चि.८अ.। भा.म.४भ.भगन्दरचि.।

लाङ्गलकी। स्त्री। लाङ्गलीवृक्षे। विष-लाङ्गुलिन्यां। प.मु.। रस.र.अर्शःचि.।

लाङ्गलाख्या (ह्वया)। स्त्री। लाङ्गलिकायां। विषलाङ्गुलिन्यां। भैष.कुष्ठचि.। सु.सू.३६अ.।

लाङ्गलिः (लिका, ली)। स्त्री। लाङ्गली-वृक्षे। विषलाङ्गुलिन्यां। भ.र.। भैष.स्त्रीरोगचि.। गजपिप्पल्यां। रा.नि.व.२३। च.द.वा.व्या.पल-क्षघातैले। चव्ये। चई। भा.पू.१भ.। महाराष्ट्री-लतायाम्। काँचड़ादाम। भ.च.। रा.नि.व.४। सु.सू.३३अ.। पृश्निपर्ण्याम्। चाकुलिया। मञ्जिष्ठा-यां। ऋषभके। कपिकच्छ्वाम्। आलाकुशी। वै.निघ.।

लाङ्गलिकः। पुं। स्थावरविषभेदे। हे.च.।

लाङ्गलिकी (नी)। स्त्री। कलिकारिकायां। विषलाङ्गुलिन्यां। अम.। तत्पर्य्यायाः,—लाङ्ग लाख्या लाङ्गली गैरी दीप्ता हलिनी गर्भघातिनी अग्निज्वाला अग्निजिह्वा अग्निमुखी अग्निशिखा वह्निशिखा इन्द्रपुष्पा कलिकारी। तद्गुणः,—कुष्ठ-दुष्टव्रणनाशकः। सु.सू.३९अ.कफशोधने।

लाङ्गली (न्)। पुं। नारिकेलवृक्षे। रा.नि. व.११। सर्पे। भ.च.।

लाङ्गलीशाकः। पुं। जलजशाकविशेषे। काँचड़ा शाक। तत्पर्य्यायाः,—तीयपिप्पली जलाची पित्तला श्यामादनी। गुणाः—"लाङ्गली कफपित्तघ्नी रुचा वातविबद्धिनुत्।" राज.३प.।

लाङ्गुः। पुं। अग्नौ।

लाङ्गु(ङ्गू)लम्। क्ली। पुच्छे। लेज। अ.टी.। अग्नौ। मे.। पुं। शालिधान्यभेदे।

लाङ्गु(ङ्गू)ला (लिका, ली)। स्त्री। कपि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कच्छाम् । रा.नि.व.३ । पृश्निपर्ण्याम् । चाकुलिया । रा.नि.व.४ । पुं (स्त्री [ङीन्]) । ऋषभके । रा.नि.व.५ । वानरे ।

लाजम् । क्ली । उशीरे । वेणा । मे. । पुं । आर्द्रतण्डुले । मे. । पुं बहु.स्त्री(जा) । अचते । मे.।

लाजचूर्णम् । क्ली । खधिचूर्णे । वैद्यरत्नेन गुँड़ा ।

लाजतर्पणम् । क्ली । लाजसक्तुकृततर्पणविशेषे । भा.म.१भ.ज्व.चि. । "दाहवत्यर्हितं चात्र निरभ्रं तृणयान्वितम् । शर्करामधुसंयुक्तम् पाययेल्लाजतर्पणम् ॥"

लाजपेया । स्त्री । खधिकृतपेयायां । वैद्यरत्नेन मण्ड । वा.चि.१अ. । "लाजपेयां सुखजरां ।" च.द. । गुणाः—"पूर्ववच्च कृता लाजपेया लघ्वी स्मृता यतः । गुणैः प्रशस्ता विज्ञेया पूर्वोक्तायां गुणाधिका । विकटुसैन्धवैलाभिर्युक्तातिगुणदा मता ॥" देहिनः तृष्णाग्लानिदौर्ब्बल्यकुचिरोगविनाशिनी ॥" राज.३प. ।

लाजभक्तः । पुं । खधिभक्ते । गुणाः—"लाजभक्तो लघुः प्रीतश्चाग्निदीप्तिकरो मधुः । वृष्यो निद्रारुचिकरः कफपित्तविनाशकः । व्रणशोधनकारी स्यादृषिभिः परिकीर्त्तितः ॥" वै.निघ. ।

लाजमण्डः । पुं । खधिमण्डे । वैद्यरत्नेन मण्ड । गुणाः—अग्निजननो दाहतृष्णानिवारणः ज्वरातिसारशमनश्च । श्लेष्मल आमपाचनः मन्दाग्निविषमाग्निबालस्थविरयोषितां पेयश्च । राज.३प. ।

लाजवर्णा । स्त्री । असाध्यविषलूताविशेषे । सु.कल्प.८अ. ।

लाजशक्तुः । स्त्री । खधिचूर्णे । वैद्यरत्नेन छातू । शीतवीर्य्या अतः सान्निपातिके न हिता । सि.यो.ज्व.चि. ।

लाजाः । पुं बहु । खधिकायां । लाजा, खै । भृष्टव्रीहिमात्रे । 'ये केचिद्व्रीहयो भृष्टास्ते लाजाः ।' रा.नि.व.१६ । सतुषधान्यानि भृष्टस्फुटितानि लाजानाहुः । भा. । भृष्टधान्येषु । सि.यो.र.पि.चि. सिद्धतमयोगे । च.सू.४अ.क्षुद्यां । गुणाः—"लाजास्तुट्कृमितौसारमेहमेदःकफच्छिदः । कासपित्तामशमना दीपना लघवो हिमाः ॥" राज.३प. ।

लाचुलम् । क्ली । धान्ये । वै.निघ. ।

लाञ्छनम् । क्ली । रागिनामतृणधान्ये । रा.नि.व.१६ । तन्नामकक्षुद्ररोगे । लक्षणं—"कृष्णं सितं वा सहजं मण्डलं लाञ्छनं समम् ।" वा.उ.३१अ. । चिह्ने । मे. ।

लाटपत्रः (णः) । पुं । त्वचायाम् । दारुचिनी । वै.निघ. ।

लामज्ज(क्क)म् । क्ली । उशीरभेदे । गन्धवेणा । सु.सू.३८अ. । च.द.सि.ग्री.दाहचि. । "लामज्जेनाथ शुक्लेन चन्दनेनानुलेपयेत् ।" (Andropogon laniger.) The Juncus odoratus, उशीरवत्पातच्छिदविषविशेषे, सुगन्धवीरणे । हिं लामज्जक । तं तिल्लवट्टिवेरु । तत्पर्य्यायाः,—सुनीलं अमृणालं लघु लघु दृष्टकापथिकं शीघ्रं दीर्घमूलं जलाश्रयम् । अभावे उशीरं देयम् । भा.म.१भ.ज्व.चि.महालाचादितैले । "लामज्जकं चन्दनञ्च ।" च.सू.२५अ. । "लामज्जक यदा न स्यादुशीरं दीयते तदा ।" गुणाः—हिमं तिक्तं मधुरं वातपित्तघ्नं तृष्णादाहश्रममूर्च्छारक्तपित्तज्वरघ्नञ्च । रा.नि.व.१२ । अपिच—"लघु दोषत्रयस्रंसि । त्वगामयस्वेदकृच्छ्रदाहपित्तास्रशमनुत् ॥" भा. । "दीर्घमूलं दृढं सूक्ष्ममुत्तमं गन्धसंयुतं । देशे साधारणे जातं लामज्जं भद्रकं भवेत् ॥" भैष. ।

लालनम् । क्ली । पियालबीजे । वै.निघ. । पुं । मूषिकविशेषे । तद्दष्टे लालास्रावः हिक्का छर्द्दिश्च जायते । सु.कल्प.६अ. । वा.उ.३८अ. ।

लालसा । स्त्री । गर्भिणीदोहदे । साध. हे.च. ।

लालसोकम् । क्ली । पिच्छिले । शब्र. ।

लाला । स्त्री । मुखस्रावे । लाल । तत्पर्य्यायाः, क्ष्वेलिका क्ष्वेलीका स्यन्दिनी द्राविका मुखस्रावः पिच्छिला लसिका लासिका । रा.नि.व.१८ ।

लालामेहः । पुं । प्रमेहभेदे । लक्षणं—"लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् । प्रमेहति.....॥" निदा. ।

लालाविषः । पुं । लूतादौ । हे.च. ।

लालास्रावः । पुं । लालाचरणे । लालपड़ा । ऊर्णनाभौ । माकड़शा । हे.च. ।

लालिकः । पुं । महिषे । हे.च. ।

लावः (कः) । पुं । स्वनामख्यातस्थलचरपक्षिविशेषे । बटेर पाखी । त्रिका. । मं लावुगे, लावुकपिट्ट । तत्पर्य्यायाः,—लघुजङ्घलः लावकः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लवः । तन्मांसगुणाः—पथ्यं ग्राहि लघु च । रा.नि.व.७ । "पक्षिणाञ्च महाश्रेष्ठो लावकी लाङ्गलात्मकः । संग्राही दीपनः प्रोक्तः कषायो मधुरो लघुः । तथा विपाके मधुरः सन्निपातेऽतिपूजितः ॥" अवि.२१अ. । अपिच—"लावा विष्किरवर्गेषु ते चतुर्धा मता बुधैः । पांशुली गौरकोऽन्यस्तु पौष्ठ्कौ दर्भरस्तथा ॥ लावा वष्किराः स्निग्धा गरघ्ना ग्राहिका हिताः । पांशुलः श्लेष्मलरोषु वीर्य्योष्णनिलनाशनः । गौरो लघुतरो रुच्यो वष्किकारी विदोषजित् । पौष्ठ्कः पित्तकृत् किञ्चिल्लघुवातकफापहः । दर्भरीरक्तपित्तघ्नो हृदामयहरो हिमः ॥" भा. । लवङ्गे । च.द.वा.व्या.महासुगन्धितैले ।

लावणः (णिकः) । त्रि । लवणसंस्कृते । हे. च. । क्लो । नस्ये । र.सा.सं. ।

लावणिकतैलम् । क्लो । तैलविशेषे । च.सू. मात्राशितीय अ. ।

लावण्यम् । क्लो । लवणत्वे । लोणता । कान्तौ ।

लावण्या । स्त्री । ब्राह्मीवृक्षे । वै.निघ. ।

लावा । स्त्री । लावपक्षिणि । रा.नि.व.१९ ।

लावाक्षकः । पुं । व्रीहिधान्यभेदे । व्रीहेर्हीनगुणः । सु.सू.४६अ. ।

लावुः (वूः) (का) । पुं, स्त्री । अलाब्वाम् । लाउ । भ.र. ।

लासः । पुं । यूषे । झोल । भ.च. ।

लासकः । पुं । मयूरे । मे. ।

लासिका । स्त्री । सुखसावे । लाला ।

लास्फोटनी । स्त्री । आस्फोटन्याम् । वैद्यनिकायां । अ.टी.रा. ।

लाह्वा । स्त्री । पेचके । वै.निघ. ।

लाक्षा । स्त्री । (Coccus lacca.) Lac. स्वनामप्रसिद्धरञ्जकद्रव्ये । लाहा, गाला । हिं लाही । मं लाख । कं अरगु । तें लत्तुक, लक्क । तत्पर्य्यायाः,—राचा जतु जतुका जन्तुका यावः अलक्तः अलक्तकः गवधिका खदिरिका रक्ता रङ्गमाता पलङ्कषा क्रिमिजा क्रिमिहा द्रुमव्याधिः द्रुमामयः पलाशी सुद्रिनी दीप्तिः गन्धमादिनी नीला द्रवरसा पित्तारि कीटजा गराधिका चतुष्पा चतुष्पी रक्तमातृका । चि.द वि.ज्व.चि.षट्कतैले । "लाक्षानिशालोहितयष्टिकाभिः ।" गुणाः—तिक्ता कषाया श्लेष्मपित्तघ्नी विषघ्नी रक्तघ्नी विषमज्वरघ्नी च । रा.नि.व.६ । "लाक्षा च नूतना ग्राह्या मृत्तिकादिविवर्जिता ।" भैष. ।

लाक्षातरुः । पुं । पलाशवृक्षे । श.मा. ।

लाक्षादितैलम् । क्लो । बालरोगाधिकारे तैलम् । पाठः—"लाक्षारससमं सिद्धं तैलं मस्तु चतुर्गुणं । रास्नाचन्दनकृष्णाब्दवाजिगन्धानिशायुगैः । शताह्वादारुयष्ट्याह्वमूर्व्वातिक्ताहरेणुभिः । बालानां ज्वररक्षीघ्नमभ्यङ्गात् बलवर्णकृत् ॥" महालाक्षादितैलं यथा—"लाक्षारसाढके प्रस्थ तैलस्य विपचेद्भिषक् । मस्त्वाढकसमायुक्तं पिष्ट्वा चाच समावपेत् । शतपुष्पां हरिद्राञ्च मूर्व्वां कुष्ठं हरेणुकां । कटुकां मधुकं रास्नामश्वगन्धाञ्च दारु च । मुस्तकं चन्दनञ्चैव पृथगक्षसमानकैः । द्रव्यैरेतैस्तु तत्सिद्धम् अभ्यङ्गान्नाशयेत्यहम् । विषमाख्यान् ज्वरान्सर्व्वानाशु चैव प्रशमं नयेत्...॥" अत्र दोलायन्त्रविधानात् षड्गुणजलेन लाक्षामेकविंशतिवारान् परिस्राव्य लाक्षारसो ग्राह्यः । कुट्टितलाक्षा ३ श्र. वारि १८ श्र. २१ वारान् दोलायन्त्रे परिस्राव्य १६ श्र. ग्राह्यम् । अथवा लाक्षा ८ श्र. वारि ६४ श्र. पक्वा शे. १६ श्र. ग्राह्यम् । तिलतैलं ४ श्र. लाक्षारसः क्वाथो वा १६ श्र. दधिमस्तु १६ श्र. । कल्कार्थं—शुलफा हरिद्रा मूर्व्वामूल कुष्ठं रेणुकं कटुकी यष्टिमधु रास्ना अश्वगन्धा देवदारु मुस्तं रक्तचन्दनं प्र. २ तो. पाके सिद्धे कर्पूरं शिलारसः नखी प्र. २ तो. तैलं मिश्रयेत् । रस.र. ।

लाक्षादिवर्गः । पुं । लाक्षारेवतकुटजाश्वमारकट्फलहरिद्रादयनिम्बसप्तच्छदमालत्यः वायमाणा चेति । तद्गुणाः—कषायस्निग्धमधुरः कफपित्तार्त्तिनाशनः । कुष्ठक्रिमिहरश्चैव दुष्टव्रणविशोधनः ॥ सु.सू.३८अ. [ख्यातपुष्पवृक्षे । भा. ।

लाक्षापुष्पा । स्त्री । शतपत्र्याम्, गुलाव इति

लाक्षाप्रसादः । पुं । पट्टिकारीभ्रे । श्वेत लोध । अम. ।

लाक्षाप्रसादनः । पुं । रक्तलोध्रे । अम. ।

लाक्षारसः । पुं । लाक्षाजले क्वाथे वा । लाहार्द्र रस । सि.यो.य क्ष.चि. चन्दनादितैले । तत्साधनविधिः—"षड्गुणेनाम्भसा लाक्षा दोलायन्त्रे न्यु.पस्थिता । विसृतधा परिस्राव्य लाक्षारसमिमं विदुः ॥" प.प्र.२ख. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाचावृक्षः। पुं। कोशाम्रवृक्षे। जलपाई। रा.नि.व.११। पलाशवृक्षे। हारा.।

लिकुचम्। क्ली। चुक्रे। चुकापालङ्। रा.नि.व.७। क्षुद्रफणसे। डेलो। वै.निघ.। पुं। लकुचवृक्षे। डेलो गाछ, गान्दार गाछ। र.मा.। रा.नि.व.९।

लिकोच (ठ) कः। पुं। अङ्कोटवृक्षे।

लिक्का (क्या)। स्त्री। केशकीटभेदे। निकि। शु.र.। सूर्य्यकिरणान्तर्गतसूक्ष्मरजस्यतुदृश्यमाने। "वालाग्रान्तरगते भानौ यच्चानुदृश्यते रजः। तैश्चतुर्भिर्भवेल्लिक्ष्या लिक्ष्याषड्भिश्च मापकः॥" प.प्र.।

लिङ्गम्। क्ली। शिश्ने। रा.नि.व.१८। तत्पर्य्यायाः,—मेहनं शिश्नः शरस्तम्भः उपस्थः मदनाङ्कुशः कन्दर्पमुषलः विषकः शेफः सेफः मेढ्रः लाङ्गुः ध्वजः रागलता व्यङ्गः लाङ्गुलं साधनं कामाङ्कुशः नागलता नराङ्गं पुंलिङ्गं पुंचिह्नं राजचिह्नकं। तत्तु गर्भस्थस्य सप्तभिर्मासैर्भवति। चिह्ने। अम.। लक्षणे। रोगव्यापकहेतौ। "संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः।" मा.नि.।

लिङ्गकः। पुं। कपित्थवृक्षे। शब्दच.।

लिङ्गजा। स्त्री। लिङ्गिनीलतायाम्। शिवलिङ्गिनी। रा.नि.व.३।

लिङ्गनाशः। पुं। लिङ्गम् इन्द्रियशक्तिं दृष्टिं नाशयति। नीलिकाकाचापरनामके नेत्ररोगविशेषे। काचे उपेक्षिते तृतीयं चतुर्थं वा पटलं गते लिङ्गनाशो जायते। तिमिर, झाँपा। हिं नजूला। स वातजादिभेदेन षट्। ते च पुनर्वर्णभेदेन षड्विधा इति द्वादशधा। लक्षणं—"स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः। वातेन चापि रूपाणि भ्रमन्तीव च पश्यति। आविलान्यरुणाभानि व्याविद्धानीव मानवः॥" मा.नि.। "तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः। लिङ्गनाशं मलः कुर्व्वन् क्षादयेद्दृष्टिमण्डलम्॥" तत्र वातेन यथा—"स्पष्टारुणाभां वीक्षीर्णां सूक्ष्मां वा हतदर्शनां। स लिङ्गनाशः ..... ॥" पित्तजे यथा—"भृङ्गनीला निरालीका दृक्स्निग्धा लिङ्गनाशतः।" कफजे यथा—"लिङ्गनाशे तु लक्ष्यते ..... । मूर्त्तः कफो दृष्टिगतः स्निग्धो दर्शननाशनः। विन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः। उष्णे सङ्कोचमायाति क्षायायां परिसर्पति। शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा॥" रक्तजे यथा—"लिङ्गनाशेन ताम्रदृक् निष्प्रभा हतदर्शना।" सन्निपातजे यथा—"संसर्गे सन्निपातेषु विद्यान्मन्दीभूतलक्षणान्।" कफजं विना लिङ्गनाशान् असाध्यान् विदुः। वा.उ.१२अ.।

लिङ्गरोगः। पुं। उपदंशे। भा.।

विल्वजा । स्त्री । शालिधान्यविशेषे । सा च मागधीगुणैस्तुल्या । "विल्वजा मागधी पीता सामान्यात्ता गुणागुणैः । रुचिकृद्बलकृन्मूत्रदोषघ्नी च श्रमापहा ॥" अवि.१५अ. ।

विल्वतैलम् । क्ली । कर्णरोगाधिकारे तैलम् । "फलं विल्वस्य मूलेन पिष्ट्वा तैलं विपाचयेत् । एतत्कल्कस्यदाद्येव बाधिर्य्यं परमौषधम् ॥" रस.र. ।

विल्वपत्रम् । क्ली । विल्वदले । वेलपाता । रस.र.ग्रहणीकवाटरसे ।

विल्वपर्णी । स्त्री । वातघ्न-पत्रशाकविशेषे । च. सू.२७अ. ।

विल्वपेशि(षि)का (शी) । स्त्री । विल्वमज्जायाम्, विल्वश्लाटौ । वेलशुँटा । वा.सू.१५ अ. । चि.४अ । गुणाः—"कफवातामशूलघ्नी ग्राहिणी विल्वपेषिका ।" राज.३प. ।

विल्वमध्यम् । क्ली । विल्वमध्ये । वेलेर भाँस वा वेलशुँटा । सु.चि.३८अ. ।

विल्वा । स्त्री । छिङ्गुपत्र्याम् । रा.नि.व.६ ।

विल्वादिकषायः । पुं । विल्वादिपञ्चमूलैः गुड़ूच्याम लकधान्यकैश्च कृते कषाये । स वातज्वरे हितः । च.द.वा.ज्व.चि. । "विल्वादिपञ्चमूलीयगुड़ूचामलके तथा ।"

विल्वान्तरः । पुं । कण्टकिवृक्षविशेषे, ऊशीराख्यवीरतरौ । तें वेणुतरुचेट्टु । जाङ्गलदेशे नर्म्मदातटे चर्म्मखतीनदीसमीपे च । तल्लक्षणमुच्यते—"विल्वान्तरो जगति वीरतरुः प्रसिद्धः श्वेतासितारुणविलोहितपीतपुष्पः । स्याज्जातितुल्यकुसुमः शमिसूच्मपत्रः स्यात् कण्टकी विजलदेशज एष वृक्षः ॥" इति तल्लक्षणः । सु.सू.३८.३९अ. । सु.चि.१५अ. । "वीरतरुः उशीराख्यः ।" वा.सू. १५अ. । गुणाः—कटुरुष्ण आग्नेयः पथ्यः वातरोगघ्नः सन्धिशूलघ्नश्च । रा.नि.व.८ । "विल्वान्तरो रसे पाके तिक्तस्तूष्णः कफापहः । मूत्राघाताश्मजित् ग्राही योनिमूत्रानिलप्रणुत् ॥" भा. ।

विवर्णत्वम् । क्ली । म्लानगात्रत्वे । मा.नि. ।

विवर्त्तनम् । क्ली । कर्णवायोः निष्काशयितुमिष्टस्य कर्णलग्नस्य पुनर्विवर्त्तनरूपयन्त्रकर्म्मणि । यन्त्रस्य कर्णान्तरेव भ्रमणकर्म्मणि । सु.सू.७अ. ।

विवर्त्तितः । त्रि । परिवर्त्तिते । भा. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवर्त्तितसन्धिः। पुं। सन्धिमुक्त-भग्नरोग-भेदे। "विवर्त्तिते तु सन्धिपार्श्वापगमनादिषु-माङ्गता वेदना च।" सु.नि.१६अ.।

विवर्द्धनम्। क्ली। घृते। वै.निघ.। [अम.।

विवस्वान्। पुं। अर्कवृक्षे। आकन्द गाछ।

विविधविषापहा। स्त्री। निर्विषीवृक्षे। वै.निघ.।

विवृता (त्ता)। स्त्री। क्षुद्ररोगभेदे। लक्षणं —"विवृतास्यां महादाहां पक्वोदुम्बरसन्निभाम्। विवृतामिव तां विद्यात्पित्तोत्थां परिमण्डलाम्॥" सु.नि.१३अ.।

विवृताक्षः। पुं। स्थलचरपक्षिविशेषे। कुकुड़ा। विका.। गुणाः—"विवृताक्षस्त्रिदोषघ्नो वल्यः शुक्रविवर्द्धनः।" अचि.२१अ.।

विशम्। क्ली। रौप्ये। वै.निघ.। रूपार्ले। अ. टी.रा.। सु.चि.११अ.। पुं। मनुष्ये।

विशदम्। क्ली। काशीसे। हिराकस्। वै. निघ.। पुं। निर्म्मले, क्लेदनाशके। "क्लेदच्छेद-करः ख्याती विशदो व्रणरोपणः।" स्त्री (दा)। वृहत्यां। मद.।

विशर्द्धनम्। क्ली। गुदे कुत्सितशब्दकरणे। वायुत्याग। सु.नि.३अ.।

विशल्यकरणी। स्त्री। ओषधिविशेषे। निर्विषी, आम्रापान। रामायणम्। गुणाः,—"विशल्य-करणी वल्या व्रणसन्धानकारिणी। वातपित्त श्लेष्मिकसावं रक्तातिसारमुल्बणम्॥"

विशल्यकृत्। पुं। भूपलाशे, आसफोतके। हापरमाली। र.मा.।

विशल्या। स्त्री। गुडूच्याम्। रा.नि.व.३। विकङ्कतवृक्षे। वँईचि गाछ। लाङ्गलिकायाम्। विष-लाङ्गुलिन्या। रा.नि.व.४। वा.सू.१५ अ. अर्कादिव.। उ.६अ.। शाकभेदे। दन्तिवृक्षे। अम.। च.द.विषाधिकारे। विवृतायाम्। तेउड़ी। पाटलायाम्। पारूल। सु.चि.१८अ.। च.द. विषाधिकारे। नागदन्त्याम्। हातिशुँड़े। र.मा.। विपुटायाम्। मे.। अजमोदायाम्। रा.नि.व.६।

विशाकरः। पुं। ह्रस्वदन्त्याम्। रा.नि.व.६। हस्तिशुण्ड्याम्। हातिशुँड़े। प.मु.। पाटला-वृक्षे। पारूल गाछ। भा.म.४भ. गर्भ.चि.। भद्रचूड़वृक्षे। शङ्खाशिजू। ग.च.।

विशाखः। पुं। पुनर्नवायाम्। श्वेत पुर्नवा। रा.नि.व.५। स्कन्दापस्मारे। सु.उ.३७अ.।

विशाखग्रहः। पुं। विल्ववृक्षे। वेल गाछ। वै.निघ.। [गाछ। ग.च.।

विशाखजः। पुं। नागरङ्गवृक्षे। नारेङ्गानेबु

विशाखपत्रः। पुं। बालरोगभेदे। निदा.।

विशाखा(खका)। स्त्री। श्वेतरक्त-पुनर्न-वायाम्। वै.निघ.२भ.। रा.व्या.चि.षड़शीतिगुग्गुली। कृष्णापराजितायाम्। वै.निघ.। कठिल्लकवृक्षे। मे.। तन्नामनक्षत्रे। अम.।

विशाचिका। स्त्री। माषपर्ण्याम्।

विशारदः। पुं। वकुलवृक्षे। रा.नि.व.१०। स्त्री (दा)। क्षुद्रदुरालभायाम्। रा.नि.व.४। कपिकच्छ्वाम्। वै.निघ.।

विशालः। पुं। वृक्षविशेषे। पक्षिभेदे। मे.। मृगविशेषे। ग.र.।

विशालतेलगर्भः। पुं। आङ्कोटवृक्षे। आँकोड़ गाछ। रा.नि.व.९।

विशालत्वक्। पुं। सप्तपर्णवृक्षे। प.मु.।

विशालपत्रः। पुं। श्रीतालवृक्षे। रा.नि.व. ९। माणे। मानकचु। प.मु.।

विशालफलिका। स्त्री। निष्पाव्यां। वोरा-शिम। रा.नि.व.७।

विशाला। स्त्री। इन्द्रवारुणीलतायाम्। राखाल शशा, माखानड़ी। रा.नि.व.३। भा.म.४भ. ज्वरारि-चि., अर्श चि.पथ्यादिगुड़। वै.निघ.ज्व. चि.हारिद्राखण्डे। इन्द्रवारुणीफले। वा.सू.१५अ.। महेन्द्रवारुणीलतायाम्। माकाल गाछ। वै.निघ. जीर्णज्व.चि.कल्याणघृते। उपोदक्याम्। पूँई गाछ। रा.नि.व.३। सुरामांस्याम्। शाकभेदे। राजगिरा। वै.निघ.। गोरक्षकर्कट्याम्। राखालकाँकड़ी। च.द.पाण्डु.चि.। उन्मा.चि.।

विशालाक्षी। स्त्री। नागदन्त्याम्। रा.नि.व.६।

विशाली। स्त्री। अजमोदायाम्। राकुनी। रा.नि.व.६।

विशिखः। पुं। शरवृक्षे। रा.नि.व.१८। स्त्री (खा)। अपत्यमार्गे। सु.शा.२.अ.। कर्म्ममार्गे। सु.सू.१०अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशिखपुङ्खा। स्त्री। शरपुङ्खायाम्। भा.म. ४भ.। "सीतया विशिखपुङ्खया सह।" चि.क.क. बन्ध्याप्रतीकारे।

विशिष्टः। पुं। शीषके। वै.निघ.। [हारा.।

विशिष्टपत्रः। पुं। ग्रन्थिपर्णवृक्षे। गेँटेला।

विशीर्णपत्रः (र्णः)। पुं। निम्बवृक्षे। निम गाछ। रा.नि.व.९।

विशेषः। पुं। ज्ञात्रयोः प्रकृतिविकारयोः प्रवृत्तिनिवृत्तीय असामान्यदर्शने। च.शा.५अ.। पृथक्त्वकर्त्रे। व्यावृत्तबुद्धिकर्त्रे। च.सू.२अ.।

विशेषकः। पुं। तिलकवृक्षे। तिलगाछ। रा.नि.व.१०।

विशोकः। पुं। अशोकवृक्षे। रा.नि.व.१०।

विशोध(धि)नी। स्त्री। नागबलीलतायाम्। नौलीवृक्षे। वै.निघ.। नागदन्तायाम्। हातिशुँड़े। रा.नि.व.५। दन्तिवृक्षे। जयपाल। रा.नि.व.६।

विशोधनीबीजम्। क्ली। जेपालबीजे। वैद्यकम्।

विश्रामः। पुं। आयासापहरणे। गुणाः—"विश्रामो बलकृत् खेदश्रमनुत् खास्थ्यदः शुभः।" राज.२प.।

विश्लिष्टसन्धिः। पुं। अस्थिभङ्गविशेषे, सन्धिमुक्तभग्नरोगविशेषे। यथा—"विश्लिष्टेऽल्पशोफो वेदनासातत्यं सन्धिविक्रिया च।" सु.नि.१५अ.। See भङ्गम्।

विश्लेषणम्। क्ली। वायुजन्यव्रणवेदनायाम्। सु.सू.२२अ.। पृथक्करणे।

विश्वम्। क्ली। शुण्ठ्याम्। शुँठि। बोलनामगन्धद्रव्ये। निशादल। रा.नि.व.६। वै.निघ.२भ. ज्व.चि.विश्वादिकषाये। परिमाणभेदे। "विश्वं विंशपलं प्रोक्तम् दिव्यं कोटिगुणं हि तत्। सैव कोटिगुणा ब्राह्मी विश्वा शस्यादिसम्भवा।" शब्दकल्पे ज्योतिष्मतौ।

विश्वकद्रुः। पुं। शुनयानिपुष्पकुक्कुरे। अम.।

विश्वका। गङ्गाचिल्लाम्। गाँ चिल। हारा.।

विश्वक्सेना। स्त्री प्रियङ्गुलतायाम्। कश्चित्।

विश्वगन्धम्। क्ली बोलनामगन्धद्रव्ये। निशादल। रा.नि.व.६। पुं। पलाण्डौ। रा.नि.व.७। स्त्री (न्धा)। पृथिव्याम्। शब्.च.।

विश्वग्रन्थिः। स्त्री। हंसपादीलतायाम्। रक्तलज्जालुकायाम्। रा.नि.व.५।

विश्वग्वायुः। पुं। सर्व्वतोगामिवायौ। एलो मेलो बातास। गुणाः—"विश्वग्वायुरनायुष्यः प्राणिनां नैकदोषकृत्। सर्व्वधातुलिङ्गकी हन्ता कृत्योत्पातपुरःसरः॥" राज.।

विश्वचौ। स्त्री। तदाख्य-वातव्याधिविशेषे। See विश्वाची।

विश्वजा। स्त्री। शुण्ठ्याम्। सा.की.वा.ज्व.चि.।

विश्वतुलसी। स्त्री। (Ocymum basilicum. Syn. Pilosum.) Common sweet basil, तुलसीभेदे, मधुरतुलस्यां। बाबुई तुलसी। दा. हिं सब्जा। ते बब्बिजेड़। ता. तिरुनिरु। पञ्जा. बबरि। बम्. बाराइतुलसी। गुणाः—बीजं शीतलं। क्वाथः मेहघ्नः उदरामयघ्नः रक्तातिसारघ्नश्च। पञ्चरसः कृमिघ्नः सर्पदंशे हितश्च। कश्चित्।

विश्व(श्वे)देवा। स्त्री। गोरक्षतण्डुलायाम्। गोरक्षचाकुलिया। जटा.। रा.नि.व.४। सु.सू. ३८अ.। गाङ्गेरुकीति पूर्व्वदेशे, अन्ये सितकुसुमां बलाम्। सु.चि.८अ.। नागबलायाम्। र.मा.। रक्तकुसुमदण्डीबलायाम्। र.मा.। च.चि.८अ.।

विश्वपर्णी। स्त्री। भूम्यामलक्याम्। भुँई आमला। रा.नि.व.५।

विश्वभेषजम्। क्ली। शुण्ठ्याम्। शुँठि। भा. म.१भ.। रा.नि.व.६। च.द. वातपित्तज्व.चि. पञ्चभद्रे। "किरातं विश्वभेषजम्।"

विश्वमदा। स्त्री। अग्निजिह्वालतायाम्।

विश्वम्भरः। पुं। सौम्यकौटविशेषे। सु.कल्प. ८अ.। See कौटः। स्त्री (रा)। भूनिम्बे। चिरेता। भा.म.१भ.ज्वरातिसा.चि.। "विश्वम्भरानिम्बविषाः।"

विश्वरूपकम्। क्ली। क्षणागुग्गुलौ। रा.नि.व. १२। पुं। राजादनवृक्षे। क्षौद्रिणी गाछ। वै. निघ.।

विश्वरोचनः। पुं। पिचुके। कचु। विका.। नाड़ीचशाके। नालिते शाक।

विश्ववर्णा। स्त्री। भूम्यामलक्याम्। भुँई आमला। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वसारकम्। क्ली। विदारग्रन्थे। कृष्णि-मनसा। श.च.। नि.व.४।

विश्वंस्था। स्त्री। शतावर्य्याम्। शतमूली। रा.

विश्वा। स्त्री। शतावर्य्याम्। शतमूली। गुरुचाम्। शुंठ। अतिविषायाम्। रा.नि.व.६.२३। शङ्खिन्यां। वै.निघ।

विश्वाख्या। स्त्री। शतावर्य्याम्। रा.नि.व.४।

विश्वाघो। स्त्री। तन्नामकवातव्याधौ। लक्षणं —"तैलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः। बाह्वोः कर्म्मक्षयकरी विश्वाचीतोह सोच्यते॥" सा.नि, ॥ सु.नि.१अ.। "दशमूली बला सायक्काथं तैलाज्यमिश्रितं। सायं भुक्ता चरेन्नस्यं विश्वाघ्नाम-वबाहुके॥"

विश्वादिः। पुं। कषायविशेषे। "विश्वाम्बु-पर्पटोशीरघनचन्दनसाधितम्। दद्यात् सुशीतलं वारि तट्टर्द्धिज्वरदाहनुत्॥" च.द.पि.ज्व.चि.।

विश्वामित्रप्रियः। पुं। नारिकेलवृक्षे। श.र.।

विश्वाह्वा। स्त्री। गुरुच्यां। वै.सं.बाहुशालगुड़ी।

विश्वोरः। पुं। रक्तार्के। रा.मा.।

विश्वौषधम्। क्ली। गुरुचाम्। रा.नि.व.६।

विषम्। क्ली। जले। रा.नि.व.१४। पुं, क्ली। वत्सनाभे। काठविष। रा.नि.व.२३। बोले। रा.नि.व.६। पञ्चकेशरे। अ.टी.। स्वनामख्याते जीवितघ्नद्रव्यमात्रे। विष। तत्पर्य्यायाः,—चुण्डः आहेयं अमृतं गरदं गरलं कालकूटं कसाकूलं हारिद्रं रक्तशृङ्गिकं नीलं गरं गरः घोरं हलाहलं हालाहलं शृङ्गी भूगरं तौक्ष्णं रस. रसायनं जङ्गुलं जाङ्गलं जाङ्गुलं काकोलः वत्सनाभः प्रदीपनः शौक्लिकेयः ब्रह्मपुत्रः जीवनाधातः। तच्च द्विविधं— स्थावरं जङ्गमञ्चेत्यलक्षविभं विषम्। गरसञ्चकं लक्षविभं नाम। तत्र स्थावरं पञ्चपञ्चाशद्विधम्। जङ्गमसंख्यमिति। विशेषाः स्वस्वपर्य्याये वक्ष्यन्ते। सामान्यतः तस्योत्पत्त्यादि—"प्रजासिसिमात्मयोनि-र्ब्रह्मणः सृजतः क्षिल। अक्षरीदक्षरी विघ्नं कैटभौ नाम दर्पितः। ततः क्रुद्धस्य वै वक्त्राद्ब्रह्मणस्तेजसो निधेः। क्रोधो विग्रहवान् भूत्वा निपपाताथ दारुणः। सत्वं ददाह गर्जन्तमन्तकाभं महाबलम्। ततोऽसुरं घातयित्वा तत्तेजोऽवर्द्धताहुतं। ततो विषादं देवानामभवत्तं निरोक्ष्य वै। विषादजनन-त्वाच्च विषमित्यभिधीयते। ततः सृष्टा प्रजाः शेषं तदा तं क्रोधमीश्वरः। विन्यस्तवान् स भूतेषु स्थावरेषु चरेषु च॥" सु.कल्प.३अ.। मा. गुणाः— विषं हि नाम निखिलरसायनानामजस्रमखिल-व्याधिविध्वंसविधायकतामासादयति। रस.चि.। "विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च। आग्नेयं वातकफहृत् योगवाहि महावृषम्। तदेव युक्तियुक्तन्तु प्राणदायि रसायनम्। योगवाहि विदीपनं हृद्यं वीर्य्यवर्द्धनम्। ये दुर्गुणा विषेऽमुष्मिं ते स्युर्हीनाः विशोधनात्। तस्माद्विषमयोगेषु शोध-यित्वा प्रयोजयेत्॥" भा.। "तीक्ष्णोष्णरुचविषदं व्यवाय्यागकरं लघु। विकाशि सूक्ष्ममव्यक्तरसं विषमपाकि च। शोधनी विपरीतं तत् सोक्ष्माद्यै-रन्वितं गुणैः। वातपित्तोत्तरं नृणां सद्यो हरति जीवितम्। विषं हि देहं संप्राप्य प्राग्दूषयति शोणितम्। कफपित्तानिलांश्चानु समं दोषान् सहाशयान्। ततो हृदयमाक्रम्य दृष्टीर्च्छोदाय कल्पते॥" वा.उ.३५अ.। तच्छोधनं यथा—"गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुध्यति। तन्नवधा कालकूट-हालाहल - ब्रह्मपुत्र - वत्सनाभ-हारिद्रक-सक्तुक-प्रदीपन-सौराष्ट्रिक-शृङ्गकेषु। महाकूट-मूर्वी-सान्तुक यागगन्ध-मद्याभ-दुर्गन्धीनीति षट्। मतान्तरे शृङ्गी-कालकूट-सुस्तक-वत्सनाभ शृङ्गकर्णा-नीति पञ्च महाविषाणि। सुहीकरवीरार्कलाङ्गली-विषमुष्टीनीति उपविषाणि।

विषकङ्का(ङ्गी)लिका(ली)। स्त्री। वृक्ष-विशेषे। विषकाँकली। नकुल.१६अ.।

विषकण्टः। पुं। इङ्गुदीवृक्षे। रा.नि.व.८।

विषकण्टकः। पुं। यासवृक्षे। जुवासा। रा.नि.व.४।

विषकण्टका (किनी, की)। स्त्री। बन्ध्या-कर्कोटिकायाम्। रा.नि.व.३।

विषकण्टालिका (ली)। स्त्री। विषकण्टा-लीति प्रसिद्धवृक्षे। र.सा.सं.स्वच्छन्दभैरवरसे।

विषकण्ठी। स्त्री। बलाकायाम्। रा.नि.व.१९।

विषकन्दः। पुं। महिषकन्दे। नीलकन्दे। रा.नि.व.७। इङ्गुदीवृक्षे। वै.निघ.।

विषगन्धकः। पुं। ऋक्षसुगन्धतृणे। वै.निघ.।

विषगन्धा। स्त्री। कृष्णगोकर्ण्याम्। काल अपराजिता। वै.निघ.। [चि.बलाद्यघृते।

विषग्रन्थिः। पुं। वृक्षालपर्ण्याम्। च.द.यक्ष्म.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषधा। स्त्री। गुडूच्याम्। श.च.।

विषघातो (इन्)। पुं। शिरीषवृक्षे। श.मा.।

विषघ्नः। पुं। यवासपे। दुरालभाविशेषे। रा.नि.व.४। चम्पकवृक्षे। जटा.। भूकदम्बे। कुकसिमा। रा.नि.व.९। सुगन्धार्जके। वै.निघ.। तण्डुलीयवृक्षे। भा.पू.१भ.शा.व.। शिरीषवृक्षे। रा.नि.व.९। [वा.उ.६अ.।

विषघ्ना। स्त्री। अतिविषायाम्। आतइच।

विषघ्निका। स्त्री। श्वेतकिणिहीवृक्षे। श्वेतापामार्गे। वै.निघ.।

विषघ्नी। स्त्री। हिलमोचिकायाम्। हिंङ्चे। कटुकायाम्। विका.। रास्नायाम्। हृवुषाभेदे। हृवुष गाछ। रा.नि.व.४। इन्द्रवारुणीलतायाम्। राखालशशा। रा.नि.व.३। वनवर्वरिकायाम्। वनबाबुई। रा.नि.व.१०। भूम्यामलक्याम्। भुंई आमला। रक्तपुनर्नवायाम्। रा.नि.व.५। हरिद्रायाम्। रा.नि.व.६। हस्तिकाल्याम्। विछाती। प.मु.। महाकरञ्जे। रा.नि.व.९। दैवदाल्याम्। देयाताड़ा। प.मु.। रा.नि.व.३। पीतदैवदाल्याम्। देयाताड़ा। प.मु.। रा.नि.व.३। पीतदैवदाल्याम्। भा.। काष्ठकदल्याम्। श्वेतापामार्गे। वै. निघ.। [निघ.।

विषचक्रः (कः)। पुं। चकोरपक्षिणि। वै.

विषजिह्वः। पुं। दैवताड़वृक्षे। देयाताड़ा। र.मा.।

विषज्वरः। पुं। तन्नामकागन्तुज्वरे। तल्लक्षणम्—"श्यावास्यता विषक्लेदो दाहोऽतीसार एव च। भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया॥" निदानम्। श.र.।

विषण्डम्। क्ली। मृणाले। श.र.।

विषतन्त्रम्। क्ली। तन्नामसर्पादिविषोपशमनतन्त्रभेदे। यथा—"सर्पवृश्चिकलूतानाम् विषोपशमनी तु या। सा क्रिया विषतन्त्रञ्च नाम प्रोक्तं मनीषिभिः॥" वैद्य.सं.२भ.।

विषतरुः। पुं। कुचेलवृक्षे। कूँचिला गाछ। भैष. वातरक्तचि. विषतिन्दुकतैले।

विषतिन्दुः (कः)। पुं। (Diospyros montana.) विषदुमे। कूँचिला गाछ। हिं विषतेन्द। तें मचितनकी, माकडटेंडि। रा. नि.व.२३। भा.। वै.निघ. नवज्व. चि. विश्वतापहरणरसे। See कारस्करः।

विषतिन्दुकजम्। क्ली। मधुरतिन्दुकफले। र.सा.सं.वैलीक्याडम्बररसे। कारस्करफले। कूँचिला फल। गलत्कुष्ठारिरसे।

विषदम्। क्ली। पुष्पकाशीशे। रा.नि.व.१३।

विषदंशः (कः)। पुं। मार्जारे। वै.निघ.।

विषदंष्ट्रा। स्त्री। सर्पकङ्कालिकायाम्। प.मु.। र.सा.सं.। नागदमन्याम्। वै.निघ.।

विषदन्तः (कः)। पुं। विड़ाले। वै.निघ.। (कः) सर्पे। श.च.।

विषदमूला। स्त्री। बहुमूलसाकन्द्याम्। रा.नि.व.७।

विषदर्शनमृत्युकः। पुं। चातकपक्षिणि। हे.च.।

विषदाता (तृ)। पुं। विषप्रयोक्तृपुरुषे। लक्षणं यथा—"न ददात्युत्तरं पृष्टो विवक्षन् मीक्षमेति च। अपार्थं बहुसङ्कीर्णं भाषते चापि मूढवत्। स्फोटयत्यङ्गुलीर्भूमिमकस्माद्विलिखेदसित्। वेपथुर्जायते तस्य वक्त्रस्यान्योन्यमीक्षते॥" इत्यादि। सु. कल्प.१अ.।

विषद्रुमः। पुं। विषतिन्दुके। कूँचिला, माकड़ा गाछ। रा.नि.व.९।

विषधरः। पुं। सर्पे। अम.।

विषधर्म्मा। स्त्री। शुकशिम्ब्याम्। आलाकुशी। श.च.।

विषध्वंसी (इन्)। पुं। नागरमुस्तायाम्। वै. निघ.।

विषनाशनः। पुं। शिरीषवृक्षे। प.मु.। माणकै। मानकचू। प.मु.।

विषनाशिनी। स्त्री। सर्पकङ्कालिकायाम्। श.च.। वन्ध्याकर्कोटिकायाम्। वै.निघ.।

विषनुत्। श्योणाकवृक्षे। श.च.।

विषपत्रिका। स्त्री। पत्रविषभेदे। तच्च जैपालादिवीजमध्यस्थपत्रम्। सु.कल्प.२अ.।

विषपुष्पम्। क्ली। अतसीपुष्पे। रा.नि.व.२३। नीलपद्मे। श.मा.। [व.८।

विषपुष्पः (कः)। पुं। मदनवृक्षे। रा.नि.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषप्रशमनी। स्त्री। वन्ध्याकर्कोटिकायाम्। वै. निघ.। [दन्ती गाछ। रा.नि.व.६।

विषभद्रा (द्रिका)। स्त्री। भद्रदन्त्याम्।

विषभिषक्। पुं। विषवैद्ये। हे.च.।

विषभुजङ्गः। विषधरसर्पे। वैद्यकम्।

विषमः। वि। वन्धुरे। असमान। अनियतकालस्थायिनि। "वेपथुर्विषमो वेगः।" मा.नि.। पुं। कीलहचे।

विषमग्राहि। वि। एकदेशग्राहिणि। सु. सू.७अ.। [गाछ।प.मु.।

विषमच्छदः। पुं। सप्तपर्णवृक्षे। छातिम-

विषमज्वरः। पुं। ज्वरविशेषे। "यः स्यादनियतात् कालात् शीतोष्णाभ्यां तथैव च। वेगतश्चापि विषमः स ज्वरो विषमः स्मृतः॥" र.सा.सं.। रसरक्तास्थितज्वरे। एकद्वित्रिचतुर्थकज्वरेषु। निदानादि—"दोषोऽल्पोऽहितसंभूतो ज्वरोत्सृष्टस्य वा पुनः। धातुमन्यतमं प्राप्य करोति विषमज्वरम्। सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ। सन्ततो रसधातुस्थः सततो रक्तधातुगः। भिषजा स च विज्ञेयः सोऽन्येद्युः पित्तसंश्रयः। मेदोगतस्तृतीयेऽह्नि अस्थिमज्जागतः पुनः। कुर्याच्चतुर्थकं घोरमन्तकं रोगसङ्करम्। विदग्धोऽन्नरसे दोषे श्लेष्मपित्ते व्यवस्थिते। तेनार्द्रं शीतलं दृब्धमङ्गमुष्णं प्रजायते। काये दुष्टे यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः। तेनोष्णत्वं शरीरस्य शीतलं हस्तपादयोः॥" इत्यादि। मा.नि.।

विषमज्वराङ्कुशलौहम्। क्ली। विषमज्वरे औषधम्। पाठः—"रक्तचन्दनकौटेरपाठोशीरकणाग्निवाः। नागरोत्पलधात्रीभिस्त्रिमर्दन समन्वितम्। लौहं निहन्ति विविधान् समस्तान् विषमज्वरान्...॥" पुस्तकान्तरेऽस्य नाम चन्द्रनाहिलौहम्। रस.चि.।

विषमज्वरान्तकरसः। पुं। विषमज्वरे पुटपक्वम् औषधम्। पाठः—"हिङ्गुलसम्भवं सूतं गन्धकेन सुकज्जलम्। पर्पटीरसवत् पाच्यं सूताद्धिङ्गेमभागकम्। लौहं ताम्रभवक्वं रसस्य द्विगुणं तथा। वङ्गकं गैरिकञ्चैव प्रवालञ्च रसार्द्धकम्। मुक्ता शङ्खं शुक्तिभस्म प्रदेयं रसपादिकम्। सुक्ता गृहे च संस्थाप्य पुटपाकेन साधयेत्॥" इत्यादि। हिङ्गुलोत्थ पारा १ तो. गन्धक १ तो. एकत्र कज्जलि करिया पर्पटीवत् पाक करिबे। स्वर्णभस्म।० आना। लौह, ताम्र, अभ्र प्रत्येके २ तोला। वङ्ग, गिरिमाटी एवं प्रवाल प्रत्येक ॥० तोला। मुक्ता, शङ्खभस्म, शुक्तिभस्म प्रत्येक।० आना। समस्त एकत्र जले माड़िया उत्तम झिनुकेर भितर भरिया उहाते गोमयमृत्तिकार लेप दिबे। शुकाइले, १५।२० खानि घुंटेर पुट दिया लक्ष्य राखिबे, येमन गन्धकेर गन्ध बाहिर हइबे अमनि तुलिया लइबे। मात्रा २ रति। भैष.।

विषमभोजनम्। क्ली। विषमाशने। मा.नि.।

विषमर्द(र्हि)निका (नी)। स्त्री। गन्धनाकुल्याम्। गन्धरास्ना। रा.नि.व.७।

विषमवल्कलः। पुं। कदम्बनिम्बुके। नादनेबू। प.मु.।

विषमवेगः। पुं। न्यूनाधिकवेगे। मा.नि.।

विषमा। स्त्री। सौवीरबदरे। भा.।

विषमाग्निः। पुं। न समानाग्नौ। येन कदाचित् सम्यक् पच्यते कदाचिच्च न पच्यते। निदा.।

विषमाधुरम्। क्ली। गुडौषधे। भैष.ज्व.चि. पानीयवट्याम्।

विषमाधूकम्। क्ली। द्रव्यविशेषे। विगसा इति लोके। भैष.शिरो.रो.चि. किङ्किणीतैले।

विषमाशनम्। क्ली। अकाले बहुनि लोके वा भोजने। "बहुलोकमकाले वा तज्ज्ञेयं विषमाशनम्।" गुणाः—"आलस्यगौरवाटोपश्रम्दाश्च कुरुतेऽधिकं। क्षीनमांसं तनीः कार्श्यं करोति च बलक्षयम्।" भा.।

विषमाशुकरः। पुं। यव्यिपर्णमूले। गेँठेला। वै.निघ.। [वै.निघ.।

विषमुष्कः। पुं। मदनवृक्षे। मयना गाछ।

विषमुष्टिः। पुं। महानिम्बे। महानिम्। मदनवृक्ष। रा.नि.व.८।२१। राजनिम्बे, क्षुद्रक्षुपविशेषे। घोड़ानिम्। हिं विषदौड़ी, कड़सिङ्गे। तत्पर्य्यायाः,—कैटमुष्टिः सुमुष्टिः रणमुष्टिकः क्षुपाडोड़-मुष्टिः। गुणाः—तिक्तः कटुः दीपनः कफवातघ्नः कण्ठरोगघ्नः रुच्यः रक्तपित्तहरश्च। रा.नि.व.४। र.सा.सं. अग्नितुण्डीरसे। कुचेलायाम्। कँचले। वै.निघ. २भ. अर्शःचि. विषमुष्टिचूर्णे। लाङ्गलिकायाम्। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषमुष्टिकः (का) । पुं, स्त्री। विषमुष्टी। रा.नि.व.२३। सु.सू.१८अ. सुरसादिः। "तथाच विषमुष्टिका।" हृहदलम्बुषेति केचित्। फूलशोला। ककोंटी वा।

विषमूला । स्त्री। शिरामलके। प.मु.।

विषमृत्युः । पुं। जीवञ्जीवपक्षिणि। चकोर। त्रिका.। [शेखाकुल। वै.निघ.।

विषमोभयकण्टकः । पुं। घण्टाबदरे।

विषयः । पुं। इन्द्रियभोग्येषु रूपरसस्पर्शगन्धशब्देषु। रा.नि.व.१८। सुश्रुतोक्ते। भूमि। वै.निघ.।

विषयि । क्ली। इन्द्रिये।

विषयेन्द्रियम् । क्ली। शब्दादिग्राहकेन्द्रियेषु। रा.नि.व.१८।

विषरूपा । स्त्री। अतिविषायाम्। आतइच। रा.नि.व.६। महानिम्बुके। हृहदलम्बुषायाम्। ककोल्याम्। वा.सू.१५अ.सुरसादिः। अरुण्यः।

विषरोगः । विषजन्यरोगमात्रे।

विषलम् । क्ली। विषे। ग्र.च।

विषलता । स्त्री। इन्द्रवारुणीलतायाम्। राथालशर्शा। रा.नि.व.३।

विषलिप्तकम् । क्ली। विषसञ्चरणे। विषचर्या। वा.उ.३६.अ.।

विषवज्रपातः । पुं। रसे। रस.र.विष.चि.।

विषवर्त्म (न्) । क्ली। नेत्रवर्त्मगत-रोगविशेषे। तल्लक्षणं यथाः—"त्रयी दोषा वहिः शीघ्रं कुर्य्युश्छिद्राणि वर्त्मनीः। स्रवत्यत्यन्तमुदकं विषवद्विषवर्त्म यत्॥" भा.।

विषवल्ली । स्त्री। इन्द्रवारुणीलतायाम्। राथालशर्शा। रा.नि.व.३।

विषविद्या । स्त्री। विषघ्नमन्त्रभेदे। विषविज्ञानशास्त्रे। [प.सु.।

विषवृक्षः । पुं। उदुम्बरवृक्षे। यज्ञडुमूर।

विषवैद्यः । पुं। विषमन्त्राभिज्ञे वैद्ये। साँपेर ओझा। अम.।

विषसैरिणी । स्त्री। निर्विषायाम्। निर्विषी घास। रा.नि.व.६।

विषशालूकः । पुं। पद्मकन्दे। पद्मेर गेँड़ो। गुणाः—गुरुः विष्टम्भी शीतलश्च। राज.।

विषशूकः । पुं। भल्लातीले। भीमरुल। भूरिप्र.।

विषशृङ्गी (ङ्गिन्) । पुं। भल्लातीले। द्वारा.।

विषशोकापहः । पुं। तण्डुलीयवृक्षे। काँटा नटिया। वै.निघ.।

विषसंयोगः । पुं। सिन्दूरे। वै.निघ.।

विषसूचकः । पुं। चकोरपक्षिणि। हे.च.।

विषसूक्ष्मा (क्ष्मन्) । पुं। भल्लातीले। भीमरुल। त्रिका.। [भा.।

विषस्फोटः । पुं। स्फोटकभेदे। विषफोँड़ा।

विषहन्ता (न्तृ) । पुं। शिरीषवृक्षे। रा.नि.व.९।

विषहन्त्री । स्त्री। अपराजितायाम्। श्वेतापराजितायाम्। रा.नि.व.७। निर्विषायाम्।

विषहरः । पुं। गन्धिपर्णभेदे। त्रि। विषघ्नौषधादौ।

विषहरा (हा) । स्त्री। दैवदालीलतायाम्। देवताड़ा। रा.नि.व.३। निर्विषायाम्। रा.नि.व.६।

विषहरी । स्त्री। मनसादेव्याम्। ग्र.र.।

विषहरी(वर्त्तिः) । स्त्री। विषे हिता। पाठः—"जयपालभवां मज्जां भावयेन्निम्बुकद्रवैः। एकविंशतिवारन्तु ततो वर्त्तिं प्रकल्पयेत्। मनुष्यलालया घृष्टा ततोनेत्रे तयाञ्जयेत्...॥" रस.चि.।

विषहारकः । पुं। भूकदम्बे। वै.निघ.।

विषहारिणी । स्त्री। निर्विषायाम्। वै.निघ.।

विषा । स्त्री। अतिविषायाम्। आतइच। रा.नि.व.६। चि.क्र.क.प्रदर.चि.। "लोध्रं विषागैरिकम्।" वै.निघ.२भ.कण्ठकुल.च्च.चि.। "विषामलकपुष्करा:।" लाङ्गलिकायाम्। विषलाङ्गूलिन्या। वै.निघ.। कटुतुम्ब्याम्। कटुतराइ। रा.नि.व.३। काकोल्याम्। वा.उ.५अ.।

विषाख्या । स्त्री। शुक्लकन्दातिविषायाम्। श्वेत आतइच। वा.सू.१५अ. सुरसादिः। "भल्लातपाठाविफलाविषाख्या।" वा.उ.५अ.।

विषाङ्कुरः । पुं। शल्यास्थि। त्रिका.।

विषाणम् । क्ली। कुष्ठौषधे। कूड़। हस्तिदन्ते। पशुशृङ्गे। मे.।

विषाणिका । स्त्री। आवर्त्तकीलतायाम्। रा.नि.व.३। च.सू.१अ.। सु.चि.१८अ.। कर्कट-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृङ्गाम्। रा.नि.व.६। वै.निघ.२भ.वा.व्या.चि. षड्शीतिगुग्गुलौ। मेषशृङ्गाम्। मेढ़ाशिङ्गे। र.मा.। रा.नि.व.९। सु.सू.३९अ अधःशमने। वा.सू.१५अ.वरुणादिः। कृष्णभके। शृङ्गाटके। शातलायाम्। रा.नि.व.४।५.७। काकोल्याम्। वै.निघ.।

विषाणी। स्त्री। चीरकाकोल्याम् मे.। चर्म्मकषायाम्। अम.। आवर्त्तकीलतायाम्। रा.नि.व. ३। कदलीवृक्षे। रा.नि.व.११। तिन्तिड्यां। शु.च.। पुं (इन्)। कुञ्जरे। वृषे। रा.नि.व.२३। शृङ्गाटके। रा.नि.व.७। तिन्तिड्याम्। कृष्णभके। रा.नि.व.५।

विषादनी। स्त्री। पलाशीलतायाम्। शाल्पर्णीभेदे। रा.नि.व.३। इन्द्रवारुणीलतायाम्। राखालशशा। वै.निघ.।

विषानलः। पुं। सर्पे। शु.मा.।

विषान्नम्। क्ली। सर्षपादौ।

विषापहः। पुं। कृष्णसुष्ककवृक्षे। वट-पाकुल। रा.नि.व.११।

विषापहा। स्त्री। इन्द्रवारुणीलतायाम्। राखालशशा। रा.नि.व ३। निर्व्विषायाम्। रा. नि.व.६। नागदन्त्यां। नागदनी। भा.। अर्कपत्र्याम्। श्वेतेक्षु मूल। सर्पकङ्कालिकायाम्। र.मा.। त्रिपर्णीनाममहाकन्दे। रा.नि.व.७।

विषाभावा। स्त्री। निर्विषायाम्। रा.नि.व.६।

विषायुधः। पुं। सर्पे। शु.र.।

विषारः। पुं। सर्पे। शु.च.।

विषारातिः। पुं। कृष्णधुस्तूरवृक्षे। रा.नि.व.१०।

विषारिः। पुं। महाचुचुशाके। रा.नि.व.४। घृतकरञ्जे। रा.नि.व.९।

विषाला। स्त्री। मत्स्यविशेषे। तद्गुणः— "शकुली च विषाला च श्रेयौ वातकफात्मकौ।" अवि.२२अ.।

विषास्यः। पुं। सर्पे। शु.र.।

विषास्या। स्त्री। भल्लातकवृक्षे। शु.च.।

विषूचिका। स्त्री। रोगविशेषे, विसूचीरोगे।

विषौषधी। स्त्री। नागदन्त्याम्, हस्तिशुण्ड्यां। हातिशुड़ो। र.मा.।

विष्कलः। पुं। ग्राम्यवराहे। रा.नि.व.१९।

विष्कलनम्। क्ली। भोजने। त्रिका.।

विष्किरः। पुं। पक्षिविशेषे। कपोतकुक्कुट-तित्तिरादिषु। अम.। ते भूमिं विलिख्य नखरैर्दंश-यन्तीति विष्किरसंज्ञकाः। तन्मांसगुणाः—कषायं मधुरं वृष्यं शीतलं रुचिकरञ्च। एवं यथाक्रमं पक्षिणामपि गुणो ज्ञेयः। रा.नि.व.१७। दर्वी-करसर्पभेदे। सु.कल्प.४अ.।

विष्किरवर्गः। पुं। विष्किर-जातीय-पक्षि-समूहे। तद्यथा—"वर्त्तकालावबर्त्तीर-कपिञ्जलक-तित्तिराः। कुलिङ्ग-कुक्कुटाद्याश्च विष्किराः समुदाहृताः॥ विकीर्य्य भक्षयन्तीति यस्मात्तस्माद्वि विष्किराः॥" भा.। अपिच "चकोर-क्रकराद्याश्च विष्किराः समुदाहृताः॥" तद्गुणाः—"विष्किरा मधुराः शीताः कषायाः कटुपाकिनः। वल्या वृष्या-स्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः॥"

विष्टब्धाजीर्णम्। क्ली। वातविदग्धाजीर्णे।

विष्टम्भः। पुं। विबन्धरोगे। आनाहरोग। रा.नि.व.२०।

विष्टम्भी (इन्)। त्रि। मलरोधकद्रव्ये। विष्टब्धा-जीर्णकरपदार्थे।

विष्टरः। पुं। अर्कवृक्षे। आकन्द गाछ। रा.नि.व.१०। वृक्षे। त्रिका.।

विष्टरा। स्त्री। गुण्डासिनीवृक्षे। रा.नि.व.८।

विष्टिका। स्त्री। क्षुद्रशणपुष्पिकायाम्। रा. नि.व.४।

विष्ठा। स्त्री। पुरीषे। रा.नि.व.१८। तत्-पर्य्यायाः,—उच्चारः अवस्करः शमलं शकृत् गूथं पुरीषं पुरीषञ्च वर्च्चस्कं विट् वर्च्चः अमेध्यं दूष्यं कल्लं मलं गूः क्रिट्टं पूतिकं लटं लण्डं लेण्डं।

विष्ठाभुक् (ग्)। पुं। ग्राम्यशूकरे। वै.निघ.।

विष्ठारुहा। स्त्री। सुवर्णकेतक्याम्। रा.नि.व.१०।

विष्ठेष्टा। स्त्री। दरिद्रायाम्। वै.निघ.।

विष्णुकन्दः। पुं। कीड़ाख्ये स्वनामख्यातमहा-कन्दे। तत्पर्य्यायाः,—विष्णुगुप्तः सुपुटः बहु संपुटः लक्षवासः बृहत्कन्दः दीर्घपत्रः हरिप्रियः। गुणाः—मधुरः शीतलः पित्त-दाह-शीथघ्नः रुच्यः सन्तर्पणश्च। रा.नि.व.७।

विष्णुक्रान्ता। स्त्री। नीलापराजितायाम्। नील अपराजिता। मं विष्णुक्रान्ता। कं विष्णु-काके। तत्पर्य्यायाः,—हरिक्रान्ता अपराजिता

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीलकान्ता नीलपुष्पा सुनीली विक्रान्ता कृष्टिका। गुणाः—कटुः तिक्ता कफवातघ्नी च। रा.नि.व.५। कटुः मेध्या कृमि-व्रण-कफघ्नी च। मद. व.१। वाराहीकन्दे। वै.निघ.।

विष्णुगुप्तः। पुं। महामूलके। विष्णुकन्दे। रा.नि.व.७। क्ली। चाणक्यमूले। रा.नि.व.२३।

विष्णुगुप्तकम्। क्ली। चाणक्यमूले। रा.नि. व.२१। See चाणक्यमूलकं।

विष्णुतैलम्। क्ली। वातव्याधौ तैलम्। पाठः—"शालपर्णी पृश्निपर्णी बला गोरक्षतण्डुला। एरण्डस्य च मूलानि बृहत्याः पूतिकस्य च। शतावरी सहचरं पचेदेतैः पलोन्मितैः। तैलप्रस्थं पयो दत्त्वा गव्यं वाजं चतुर्गुणम्॥" इत्यादि। र.स.र.। तिलतैलं ४ प्र. गव्य. छागं वा दुग्धं १६ प्र.। कल्कार्थं—शालपर्णी, पृश्निपर्णी (चाकुलिया), बाल्यालकं, गोरक्षतण्डुली (गोरक्ष चाकुलिया) एरण्डमूलं, बृहती, कण्टकारी, पूतिकरञ्जमूलं (नाटाकरञ्ज मूल) शतमूली, भिण्टीमूलं प्र. १ प.। क्वाथान्तराभावात् कश्चित् क्षीरचतुर्गुणं वारि ददाति। "खरसक्षीरमाङ्ख्यैः पाको यत्रेरितः क्वचित्। तत्र चतुर्गुणं तत्र वैद्यैराधार्थमावपेत्॥" प.प्र. इति स्वल्पम्। बृहद्विष्णुतैलं यथा—"जलधरोऽश्वगन्धा च जीवकर्षभकौ शटी। काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका। देवदारु मधुरिका पद्मकाष्ठञ्च सैन्धवम्। मांसी चैला त्वक् कुष्ठं वचा श्वेतञ्जनं। मञ्जिष्ठा मृगनाभिश्च श्वेतचन्दनकुङ्कुमं (रेणुकं)। पर्णिन्यः कुन्दखोटिश्च ग्रन्थिकश्च नखौ तथा। एतेषां पलिकैर्भागैः तैलेष्वापि तथाढकं। शतावरीरससमं दुग्धञ्चापि समं भवेत्। विष्णुतैलवरं श्रेष्ठं सर्व्ववातविकारनुत्॥" इत्यादि। तिलतैलं १६ प्र.। शतमूलीरसः १६ प्र. दुग्धं १६ प्र. वारि ३२ प्र.। कल्कार्थं—मुक्ता अश्वगन्धा जीवकः ऋषभकः (अभावे गुडूची वंशरोचना) शटी काकोली क्षीरकाकोली जीवन्ती यष्टिमधु देवदारु मधुरिका पद्मकाष्ठं सैन्धवं जटामांसी एला गुडत्वक् कुष्ठं वचा श्वेतञ्जनं रक्तचन्दन मञ्जिष्ठा मृगनाभिः श्वेतचन्दनं कुङ्कुमं शालपर्णी पृश्निपर्णी मुद्गपर्णी माषपर्णी कुन्दुरुखोटिः ग्रन्थिपर्णं नखौ च प्र. १ प.। रस.र.।

विष्णुपदम्। क्ली। आकाशे। अम.। पद्मे। हे.च.।

विष्णुपर्णिका। स्त्री। पृश्निपर्ण्याम्। चाकुलिया। वै.निघ.।

विष्णुपर्णी। स्त्री। भूम्यामलक्याम्। वै.निघ.।

विष्णुप्रिया (हिता)। स्त्री। तुलसीवृक्षे। वै.निघ.। [पार्थी। विका.।

विष्णुलिङ्गी। स्त्री। वर्त्तिकापक्षिणि। वटेर

विष्णुवल्लभा। स्त्री। तुलसीवृक्षे। रा.नि.व. १०। अग्निशिखायाम्। विषलाङ्गूलिन्याम्। ग्र.च.।

विष्वक्पर्णी। स्त्री। भूम्यामलक्याम्। वै.निघ.।

विष्वक्सेनकान्ता (प्रिया)। स्त्री। वाराहीकन्दे। रा.नि.व.७। अम.। च.ग्रा.८अ।

विष्वक्सेना। स्त्री। प्रियङ्गुलतायाम्। अम.। भैष. कुष्ठ-चि.महाभल्लातकगुड़े।

विष्वग्वायुः। पुं। घूर्णितवाते। एलोमेलो वातास। गुणाः—"विष्वग्वायुरनायुष्यः प्राणिनां नैकदोषकृत्। सर्व्वत्रैलिङ्गको ज्ञेयो व्याप्त्यात्पुरःसरः॥" राज.२प.।

विसम्। क्ली। मृणाले। रा.नि.व.१०। च.द. वृद्धौ-चि.अर्दितवाते। [व.१०।

विसकुसुमम्। क्ली। कमले, पद्मे। रा.नि.

विसग्रन्थिः। पुं। पद्ममूले। पद्मस्य मूल। जलप्रसाधनद्रव्यमिदम्। सु.सू.४५अ.।

विसङ्कटः। पुं। इक्षुदीवृक्षे। रा.नि.व.८। सिंहे। ग्र.च.।

विसजम्। क्ली। पद्मे। ग्र.कल्प.। [विका.।

विसनाभिः। स्त्री। पद्मिन्यां। पद्मस्य झाड़।

विसप्रसूनम्। क्ली। पद्मे। अम.।

विसर्गः। पुं। मोक्षे। त्यागे। वर्षाशरद्धेमन्तकालेषु। मा.ज्व.नि.वि.र.। मलनिर्गमे। मे.।

विसर्पः। पुं। पाण्डुरोगे। रा.नि.व.२०। तदाख्यरोगविशेषे। तन्निदानलक्षणे—"लवणाम्लकटूष्णादिसंसेवाद्दोषकोपतः। विसर्पः सप्तधा ज्ञेयः सर्व्वतः परिसर्पणात्। पृथक् त्रयस्त्रिभिश्चैको विसर्पो द्वन्द्वजास्त्रयः। वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः। चत्वार एते वौसर्पा वक्ष्यन्ते द्वन्द्वजान्यः। आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः। यस्तु कर्दमको घोरः स पित्तकफसम्भवः। रक्तं ससोका त्वङ्मांसं दूष्यं दोषास्त्रयो मताः। विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्त

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धातवः ॥" मा.नि. । अन्यच्च—"त्वग्मांसशोणितगताः कुपितास्तु दोषाः सर्व्वाङ्गसारिणमिहास्थितमात्मलिङ्गम् । कुर्व्वन्ति ये विसृतमुन्नतमाशुशोफं तं सर्व्वतो विसरणाच्च विसर्पमाहुः ॥" यत्र वातात्मकोऽसितसदुपरुषत्वादिलक्षणः वर्ज्यः । पित्तात्मको द्रुतगतिर्ज्वरदाहपाकस्फोटप्रभेदबहुलः, श्लेष्मात्मकः मन्दसरः अशीघ्रपाकः स्निग्धः सितः, अल्पवेदन उपक्रमैः सर्व्वात्मकः सर्व्वलक्षणयुक्तोऽवगाढः पक्वश्च मांसशिरानाशात् न सिध्यति । इत्यादि । सु.नि.१०अ. ।

विसपद्मः । पुं । मधूच्छिष्टे । मोम् ।

विसर्पज्वरः । पुं । तज्जन्यागन्तुज्वरे । तच्च सर्पिःपानादिकं शस्तम् ।

विसर्पणम् । क्ली । कायौ सञ्चरणे । तन्तुव्रणविटपादेः विसर्पणे । भ. ।

विसर्पिः । पुं । विसर्परोगे । रा.नि.व.२० ।

विसर्पिणी । स्त्री । श्वेतवृक्षायाम्, यवतिक्षालतायाम् । रा.नि.व. ३ ।

विसलम् । क्ली । पल्लवे । त्रिका. ।

विसवर्त्म (न्) । क्ली । वर्त्मगतनेत्ररोगविशेषे । लक्षणं—"शूनं यदत्यं बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम् । विसमन्तर्गलं इव विसवर्त्मेति तन्मतम् ॥" सु.उ.२अ. ।

विसशालूकम् । क्ली । पद्मकन्दे । पद्मबीजे गँड़ो । गुणाः—गुरु विष्टम्भि शीतलञ्च । राज. ।

विसारः । पुं । मत्स्ये । अम. । रा.नि.व.४ ।

विसारिणी । स्त्री । माषपर्ण्याम् । माषाणी । रा.नि.व ३ ।

विसिनी । स्त्री । मृणाले । रा.नि.व.१० । पद्मिन्यां । अम. ।

विसुन्दलः । पुं । सिन्दुवारवृक्षे । निसिन्दा ।

विसूचिका (चो) । स्त्री । अजीर्णजातरोगविशेषे । ओलाउठाविशेष । निरुक्तिः—"सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिलः । यतोऽतोऽसौ विसूचीति निगद्यते ॥" तस्य निदानं यथा—"अजीर्णमामं विष्टब्धं विदग्धञ्च यदीरितम् । विसूच्यलसकौ तस्माद्वेद्यापि विलम्बिका । न तां परिमिताहारा लभन्ते विदितागमाः । मूढालामजितात्मानो लभन्तेऽग्नलसीमुपाः ॥" लक्षणं —मूर्च्छातिसारौ वमथुः पिपासा गूढं भ्रमोद्वेष्टनजृम्भदाहाः । वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः ॥" तदुपद्रवानाह—"निद्रानाशोऽरतिः कम्पो मूर्च्छाघातो विसंज्ञता । अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः ॥" तस्या अरिष्टं ग्रासवर्द्धनादि । इत्यादि । मा.नि. ।

विसृतः । त्रि । निर्गते । वा.उ.२६अ. ।

विस्तारी (रिन्) । पुं । वटवृक्षे । वै.निघ. ।

विस्तीर्णपर्णम् । क्ली । माणकन्दे । **माणकचू** । रा.च. ।

विस्फा(स्फु)रकः । पुं । वातोल्बणसन्निपातज्वरे । लक्षणं—"श्वासः कासो भ्रमो मूर्च्छा प्रलापी मोहवेपथुः । पार्श्वयोः वेदना जृम्भा कषायत्वं मुखस्य च । वातोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत् । एवं विस्फारको नाम्ना सन्निपातः सुदारुणः ॥" भा.म.१भ. ।

विस्फुरणी } स्त्री । तिन्दुकवृक्षे । **तेंदगाछ** ।
विस्फूर्जनी } वै.निघ. ।

विस्फुरितम् । क्ली । काण्डभग्नास्थिभङ्गभेदे । तेनास्थि लोकं विदीर्णं भवति । भा.म.३भ. ।

विस्फुलिङ्गः । पुं । विषभेदे । हे.च. ।

विस्फोटः । पुं । दुष्टस्फोटके । **विषफोड़ा** । तत्पर्य्यायाः—पिटिकं पिटकः पिटका विटकं विटकः विटका । रा.नि.व.२० । तस्य निदानपूर्व्वां सम्प्राप्तिमाह—"कटूष्णतीक्ष्णोषणविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च । तथर्त्तुदोषैर्विषमैश्च दुष्यन्ति दोषाः पवनादयस्तु ॥ त्वचमाश्रित्य ते रक्तं मांसास्थीनि प्रदूष्य च । घोरान् कुर्व्वन्ति विस्फोटान् सर्व्वान् ज्वरपुरःसरान् ॥" इत्यादि । भा. ।

विस्फोटज्वरः । पुं । तज्जन्यागन्तुज्वरे ।

विस्रम् । क्ली । चाणक्यमूलके । भा.पू.१भ.हरी.व. । वि । पूतिगन्धे, आमगन्धिनि । अम. ।

विस्रगन्धः(न्धा, न्धिः) । पुं, स्त्री । पलाण्डौ । पेँयाज । रा.नि.व.७ । गोदन्तहरितालै, हरितालै । हे.च. । हबुषायाम् । हबुष फल । रा.नि. व.४ । [नि.व.२३ ।

विस्रगन्धकः । पुं । गोदन्तहरितालै । रा.

विस्रसा । स्त्री । जरायाम् । अम. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विस्रा। स्त्री। दुष्टगन्धायाम्। हबुष फल। रा. नि.व.४। [वै.निघ.।

विस्रावः। पुं। अन्नमण्डे। भातेर माड़।

विस्रावणम्। क्ली। उत्थितस्य व्रणस्य वेदनी पशमार्थं पाकशमनार्थञ्चोपक्रमविशेषे। सु.चि.१ अ.। सु.सू.१४अ.।

विस्राव्यः। त्रि। विद्रधिकुष्ठादिविस्रावणार्हे। स्रावयोग्ये। सु.सू.५अ.।

विहगः (ङ्गमः)। पुं। पक्षिणि। अम.।

विहङ्गम्। क्ली। स्वर्णमाक्षिके। रस.कौ. ज्वरान्तकरसे।

विहङ्गमा। स्त्री। भारयष्टयाम्। वाँक्। शर.।

विहायसः। पुं। पक्षिणि। अ.टी.भ.।

विहायाः (स्)। पुं। पक्षिणि। क्ली। आकाशे। त्रिका.।

विहारः। पुं। चेष्टायाम्। भ्रमणे। मे.। विन्दुरेखकपक्षिविशेषे। शब्दच.।

विक्षतः। पुं। क्षतरोगे।

विक्षावः। पुं। क्षिक्कायाम्। हाँचि। वै.निघ.। कासे। भा.।

विक्षोरः। पुं। रक्तार्के। अर्कवृक्षे। आकन्दगाछ। रा.नि.व.१०।

विक्षेपः (णम्)। पुं, क्ली। वायुजन्यव्रणवेदनाविशेषे। सु.सू.२२अ.। हस्तादिचालने। मा.नि.। अवधूनने। वा.चि.४अ.।

वीकः। पुं। पक्षिणि।

वीक्षा। स्त्री। शुकशिम्बायाम्। आलाकुशी। हे.च.।

वीजम्। क्ली। अङ्कुरे। मे.। मज्जायाम्। शुक्रधातौ। रा.नि.व.१८। वीजसारे। पद्मवीजे। भा.म.३भ.अश्मरी.चि.। पुष्करमूले। रा.नि.व. ६। कारणे। अम.। अर्से। विटि। वीजानां शोधनं यथा—"वीजमादौ समादाय रौद्रयन्त्रे विशोषयेत्। ईषत्सैन्धवयुक्तेन द्रवेण यवतः सुधीः। अपामार्गकषायेण निम्बुवीजं विशोधयेत्। शिग्रुकार्पासवीजानि अपामार्गस्य वीजकम्। धर्म्मेण शोधनं तेषां न दद्यात् सैन्धवं ततः। तिक्तां कोषातकीं दन्तीं पटोलीं चेन्द्रवारुणीम्। कटुतुम्बीं देवदालीं काकतुण्डीञ्च शोधयेत्। धात्रीफलरसेनैव महाकालस्य शोधनम्। करञ्जयुग्मयोर्बीजं भृङ्गराजेन शोधयेत्। गुञ्जादिसर्व्ववीजानां नरसूवैः पटुं विना। नारिकेलाम्बुना शोध्यं वीजं भल्लातकीद्रवम्। गुडूचीं चिफलाक्वाथे क्षीरे चैव विशोधयेत्। पक्वा च खण्डशः शुद्धं गृह्णीयान्मृदुगुग्गुलम्। हृद्दारकवीजन्तु पक्वं दोलाकृतं पचेत्। दुग्धपूर्णेषु पात्रेषु ततः शुध्यति निश्चितम्॥" इत्यादि। र.सा.सं.।

वीजकः। पुं। प्रियालवृक्षे। पियाशाल। हिं विजयसार। प.मु.। तत्पर्य्यायाः,—"वीजकः पीतसारश्च पीतसालक इत्यपि। वन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः। गुणाः,—वीजकः कुष्ठवीसर्पश्वित्रमेहगदक्रिमीन्॥ हन्ति श्लेष्मास्रपित्तञ्च त्वक्यः कैश्चीरसायनः॥" भा.। See अक्षिका। रस.र.शिरोरो.चि.। "विकटु पुष्करवीजकः।" मातुलुङ्गवृक्षे। रा.नि.व.११। द्र.निघ.२भ.क्षय. चि.दशमूलासवे। मूढ़गर्भभेदे। "यस्तु निर्य्यच्छत्येकशिरीषुजः स वीजकः।" सु.नि.८अ.। श्वेतशिग्रौ। वै.निघ.। क्ली। वीजे।

वीजकरः। पुं। माषवीहौ। मासकलाये। वै.निघ.।

वीजकर्कटिका (टी)। स्त्री। दीर्घकर्कटिकायाम्। लम्बा काँकुड़। वै.निघ.।

वीजकसारः। पुं। प्रियालवीजे। सु.चि.२० अ.। भा.कुष्ठचि. महाभल्लातके। मातुलुङ्गसारे। रा.नि.व.११।

वीजका। स्त्री। कपिलद्राक्षायाम्। वै.निघ.।

वीजकाम्लः। पुं। मातुलुङ्गवृक्षे। वै.निघ.।

वीजकृत्। क्ली। वाजीकरणे। रा.नि.व.२०।

वीजकोशः (षः)। पुं। पद्मकर्णिकायाम् पद्मेर चाकि वा फोँपल। तत्पर्य्यायौ,—वराटकः कर्णिका। भा.। शृङ्गाटके।

वीजकोशकम्। क्ली। डुपणे। वै.निघ.।

वीजगर्भः। पुं। पटोले। रा.नि.व.३। भा.।

वीजगुप्तिः। स्त्री। धान्यादिकक्षुक्यां। धान्यादिर खोला। शिम्बायां। शीम्। रा.नि.व.१६।

वीजद्रुमः। पुं। असनवृक्षे। पियाशाल। रा.नि.व.२३।

वीजधान्यम्। क्ली। धान्यके। धनिया। रा नि.व.६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीजनः। पुं। पीतलीधे। वै.निघ.। जीव-ञ्जीवपक्षिणि। सारस्वतः।

वीजपादपः। पुं। असनवृक्षे। पियाशाल। वै.निघ.। भल्लातकवृक्षे। रा.नि.व.११।

वीजपुष्पः (कः)। पुं, क्ली। यवनालवृक्षे। जनार गाछ। रा.नि.व.१६। मदनवृक्षे। मरु-वकवृक्षे। मे.।

वीजपूरः (कः)। पुं। (Citrus medica.) The citron. क्षीलङ्गवृक्षे। टाबा नेबुर गाछ। हिं बीजौरा। तत्पर्य्यायाः,—अम्लकेशरः वीजपूर्णः पूर्णवीजः सुकेशरः वीजकः वीजफलकः केशरास्लः मातुलुङ्गः पूरकः फलपूरः सुपूरः रुचकः जन्तुघ्नः दन्तरुच्छदः रोचनफलः। प.मु.। सा.कौ.पि.ज्व.चि.। गुणाः—"वीजपूरफलमम्ल-कटूष्णं श्वासकासशमनं पवनघ्नं। कण्ठशीर्षधनपरं लघु हृद्यं दीपनं रुचिकृत् पवनघ्नञ्च॥" तथाच—बालं पित्तमरुत्कफासकरणं मध्यञ्च तादृग्विधं पक्वं वर्णकरञ्च हृद्यमथ तत् पुष्णाति पुष्टिं बलम्। शूनाजीर्ण-विबन्ध-मारुत-कफ-श्वासार्त्ति-मन्दाग्निजित् कासारोचकशोकशान्तिदमिदं...। अन्यच्च—"त्वक् तिक्ता दुर्ज्जरा स्यात् क्रमि कफ-पवनध्वंसिनी स्निग्धमुष्णं मध्यं शूलार्त्तिपित्तप्रशमनसहिला रोचकघ्नञ्च गौल्यं। वातार्त्तिघ्नं कटाम्ल जठर-गदहरं केसरं दीप्यमग्नं बीजं तिक्तं कफार्शः-शयथुशसकरं बीजपूरस्य पथ्यम्॥" रा.नि.व.११। तन्मज्जगुणाः—स्वादुपाकः आग्नेयः बलकृत् स्निग्धः पित्तघ्नश्च। सु.सू.४६अ.। फलगुणाः—रुच्यं रसाम्लं लघु दीपनं रक्तपित्तकरं कण्ठ्य स्निग्धाहृद्यं शीधनम्। मद.व.६। मधुरकर्कट्यां। शरवती नेबू। गुणाः—"बीजपूरीऽपरः प्रोक्तो मधुरोमधु-कर्कटी। मधुकर्कटिका स्वादी रोचनी शीतला गुरुः। रक्तपित्त-क्षय-श्वासकासहिक्काभमापहा॥" भा.।

वीजपूरमज्जा (न्)। पुं। मातुलुङ्गमज्जनि। टाबानेबुर बीचिर शाँस। रा.नि.व.११।

वीजपूरफलम्। क्ली। मातुलुङ्गफले। टाबा नेबू। हिं बीजौरा। मद.व.६।।

वीजपूर्णः। पुं। वीजपूरवृक्षे। प.मु.। मधुर-मातुलुङ्गे।। शरवती नेबू। वै.निघ.।

वीजपेशिका। स्त्री। वृषणे। अण्डकोष। रा.नि.व.व.१८।

वीजफलकः। पुं। मातुलुङ्गवृक्षे। मधुबीज-पूरे। टाबा नेबू, शरवती नेबू। रा.नि.व.११।

वीजमातृका। स्त्री। पद्मबीजे। "पद्माक्षं पद्मबीजञ्च कर्णिका वीजमातृका।" हारा.।

वीजरत्नः (वरम्)। पुं, क्ली। माषकलाये। हे.च.। [वीजरुहाः।" हे.च.।

वीजरुहः। पुं। शालिधान्यादौ। "शाल्यादयो

वीजरेचक(न)म्। क्ली। जेपालबीजे। रा.नि.व.६।

वीजवृक्षः। पुं। असनवृक्षे। पियाशाल। "असनौ वीजवृक्षकः।" रा.नि.व २३।९। भल्ला-तकवृक्षे। वै.निघ.।

वीजसारम्। क्ली, पुं। भल्लातकवृक्षे। विड़ङ्गे।

वीजस्नेहः। पुं। पलाशवृक्षे। वै.निघ.।

वीजाख्यः। पुं। जैपालवृक्षे। क्ली। तद्बीजे। जयपाल गाछ वा तत्फल। वै.निघ.।

वीजाम्लम्। क्ली। वृक्षाम्ले। रा.नि.व.२२। पिण्डाम्ले। रा.नि.व.२२।

वीजाविकः। पुं। उष्ट्रे। वै.निघ.।

वीजाह्वः। पुं। मातुलुङ्गवृक्षे। वा.चि.१६अ.।

वीजौ (इन्)। पुं। तण्डुलीयकवृक्षे। वै.निघ.।

वीजादकम्। क्ली। करकायाम्। मे.।

वीटिः (टिका, टी)। स्त्री। ताम्बुललतायां। पाण गाछ। सज्जिततास्बूले। पाणेर बौड़ा। शब्दकल्पद्रुमः।

वीतनः। पुं। कक्षपार्श्वयोः। कक्षरामध्य-भागेर पार्श्वद्वय। "कक्षन्तु कक्षरामध्यं कक्ष-पार्श्वौ तु वीतनौ।" हे.च.।

वीतशोकः। पुं। अशोकतरौ। शु.मा.।

वीतिः। पुं। घोटके। हे.च.। [वै.निघ.।

वीतिका। स्त्री। यष्टिमधुनि। नीलिकायाम्।

वीभत्सः। पुं। विकृतौ। विका.। वि। अश्रद्धा-जनके।

वीरम्। क्ली। (पवर्गीयमपि)। उशीरे। वीरण-मूले। वेणार मूल। रा.नि.व.१२। सिन्दूरे। प.मु.। मरिचे। रा.नि.व.६। शालपर्ण्याम्। च.चि.२अ. हंसीगुडिकायाम्। पुष्करमूले। पुष्कर-मूल। लौहे। वै.निघ.। काञ्चिके। रा.नि.व.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५। नले। मे.। आरुके। रा.नि.व.११। पुं। अर्ज्जुनवृक्षे। हे.च.। भल्लातकवृक्षे। अम.। वीरणे। शुक्लदर्भे। काकोल्याम्। वै.निघ.। पीतझिण्ट्याम्। एकवीरवृक्षे। ऋषभके। र.मा.। श्वेतकरवीरे। रा.नि.व.१०। लताकरञ्जे। रा.नि.व.८। वाराहीकन्दे। तण्डुलीयवृक्षे। काँटानटिया। रा.नि.व.७।

वीरकः। पुं। श्वेतकरवीरे। रा.नि.व.१०।

वीरणम् (मूलं, लिका)। क्ली, स्त्री। उशीरवृक्षे। वेणार मूल। हिं खस्। तें अवुरुगड्डि। उत.विणा, गन्दविणा। वम्. खस्वस्। ता. वेत्तिवेर। तत्पर्य्यायाः,—उशीरं विरणं कटाग्यनं वीरतरं वीरभद्रं दाहहरणं वीरं बहुमूलकं नलदं अमृणालं सेव्यं समगन्धिकं। रा.नि.व.१२। च.सू.४अ. स्तन्यजनने। भा. उ.वाजी.रतिवल्लभमोदके। गुणाः—"वीरणं पाचनं शीतं वान्तिदृष्णाघ्नं तिक्तकम्। स्तन्यं ज्वरघ्नं वान्तिमदजित् कफपित्तहृत्। तृष्णास्रविषवीसर्पक्लेदाहव्रणापहम॥" भा.। कुशादितृणगणे। यथा—"कुशः कासश्च दर्भश्च कत्तृणं भूहणं तथा। शैतदूर्व्वा नीलदूर्व्वा गण्डदूर्व्वेति वीरणम्॥" अर्कगुणाः—एतदर्कौ हरेच्छूलं सन्धुक्षयति चानलम्। क्षतसन्धानकृद्दृष्यं बलं कुष्ठादनेकधा॥" अर्क.चि.।

वीरतण्डुलनामा (न्)। पुं। तण्डुलीयशाकवृक्षे। कश्चित्।

वीरतरम्। क्ली। वीरणमूले। वेणार मूल। प.मु.।

वीरतरः। पुं। शरवृक्षे। शर गाछ। विल्वान्तरवृक्षे। रा.नि.व.८। महाशालो। भल्लातकवृक्षे। प.मु.। श्वेतकोकिलाक्षे। श्वेत कुलिआखाड़ा। र.मा.।

वीरतरुः। पुं। भल्लातकवृक्षे। विल्वान्तरवृक्षे। अर्जुनवृक्षे। रा.नि.व.११।८९। शरवृक्षे। शर गाछ। "अन्ये तु वीरतरुर्विल्वान्तर इति वदन्ति।" सु.सू.३८अ.। श्वेतकोकिलाक्षे। प.मु.। प्रियालवृक्षे। वै.निघ.।

वीरतर्व्वादिगणः। पुं। तदादिद्रव्यवर्गे। यथा—वीरतरुसहचरदयदर्भवृक्षादनीगुन्द्रानलकुशकाशाग्निमेदकाग्निमन्थमोरटावसुकवसिरभल्लूककुरुण्टकेन्दीवरकपीतवद्धाः खदंष्ट्रा चेति। गणोऽयं वातघ्नः अश्मरीशर्करामूत्रकृच्छ्राघातरुजाहरश्च। सु.सू.३८अ.। अन्यः—"वीरतरुः सहचरो दर्भो वृक्षादनी नलः। गुन्द्राकाशकुशावग्निमेदमोरटटुण्टुकाः। कुरण्टकोऽथ वशिरो वसुकः सारिमन्थकः। इन्दीवरो खदंष्ट्रा च तथा कापीतवल्लकः। वीरतर्व्वादिरित्येष गणो वातविकारनुत्॥" शर वा विल्वान्तर, पीत नील झाँटीवय, उलु, रास्ना वा वान्दरा, नल, गुन्द्र वा मूत, काश, कुश, पाषाणभेदमूल, इक्षुमूल, शोणाछाल, श्रीहस्तिनी, शुनिठा वा गजपिपुल, वकवृक्ष वा जाम-आँटी, आगस्त, चुक्रमूल, गोक्षुरो, काउ-आँटी। च.द.सू.घा.चि., अश्मरी.चि.।

वीरद्रुः। पुं। अर्जुनवृक्षे। रा.नि.व.९। विल्वान्तरवृक्षे। वै.निघ.।

वीरनायकः। पुं। उशीरे। वेणा। वै.निघ.।

वीरपत्रा (त्री)। स्त्री। विजयायाम्। सिद्धि। रा.नि.व.६। धात्रीनामसहाकन्दे। रा.नि.व.७।

वीरपर्णम्। क्ली। सुरपर्णाभिधसुगन्धपत्रे। रा.नि.व.१०।

वीरपादपः। पुं। विल्वान्तरवृक्षे। वै.निघ.।

वीरपुष्पा (ष्पी)। स्त्री। बाह्यालकभेदे, महाबलायाम्। वै.निघ.। सिन्दूरपुष्पीवृक्षे। रा.नि.व.१०।

वीरभद्रः। पुं। वीरणे। वेणा। मे.।

वीरभद्रकम्। क्ली। वीरणे। वेणा। जटा.।

वीरभद्ररसः। पुं। सन्निपातज्वरे रसः। पाठः—"वृषस्य पत्रं लवणं द्विचीरं जीरकद्वयं। चारद्वयं समांशेन चूर्णमेषां पलत्रयम्। शुद्धसूतं मृताभ्रञ्च गन्धकञ्च पलं पलम्। आर्द्रकस्य द्रवैः खल्वे दिनमेकं विमर्दयेत्। वीरभद्ररसः ख्यातो माषैकं सन्निपातजित्। चिर्चिकार्द्रकसिन्धूत्थमनुपानं जलेन च॥" रस.चि.।

वीररजः (स्)। क्ली। सिन्दूरे। रा.नि.व.१३।

वीरवती। स्त्री। मांसरोहिण्याम्। भा.।

वीरवल्ली। स्त्री। देवदाल्याम्। देवताड़ा वै.निघ.।

वीरवृक्षः। पुं। भल्लातकवृक्षे। अम.। महाशालो। देवधान्ये। मोटाधान, देधान। प.मु.। विल्वान्तरवृक्षे। रा.नि.व.८। अर्ज्जुनवृक्षे। हे.च.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीरवेतसः। पुं। अम्लवेतसे। रा.नि.व.६।

वीरशाकः। पुं। वास्तूकशाके। वेतो शाक। वै.निघ.।

वीरसिंहः। पुं। वीरसिंहावलोकनप्रवीणनरि।

वीरसिंहावलोकनम्। क्ली। वीरसिंहकृत-वैद्यकग्रन्थे।

वीरसेनः। पुं। आरुकवृक्षे। रा.नि.व.११।

वीरा। स्त्री। मद्यसामान्ये। रा.नि.व.१४। पृश्नि-पर्ण्याम्। चाकुलिन्याम्। च.द.उन्मा.चि.। ब्रह्मदण्डा-यास्। शतावर्याम्। तालमूल्याम्। कटुक्याम्। कृष्णातिविषायाम्। काकोल्याम्। रा.नि.व.२३। वा.उ.६अ.महापैशाचघृते। चोरकाकोल्याम्। मे.। रा.नि.व.३। च.चि.५च. वायमाणाघृते। प्रयोगा. अर्श:-चि. सुनिषण्णकचाङ्गेरीघृते। च.द.उन्मा.चि. सहाकल्याणघृते। आमलक्याम्। एलवालुके। रम्भायाम्। विदार्याम्। भूमिकुष्माण्ड। मे.वा.टी. हे.मा.वमनकल्पे। चोरविदार्याम्। शुक्ल भूमि-कुष्माण्ड। सुरामांस्याम्। मे.। महाशतावर्याम्। ब्राह्म्याम्। रा.नि.व.४। शिंशपावृक्षे। र.मा.। घृतकुमार्याम्। रा.नि.व.५। भूम्यामलक्याम्। रा.नि.व.५। वै.निघ. चय.चि. शिवगुटो। जटा-मांस्याम्। च.चद.रसायने। "ऋद्धियुगं ऋषभवीरा।"

वीराल्लकः। पुं। अर्जुनवृक्षे। वै.निघ.।

वीराह्वः। पुं। अम्लवेतसे। रा.नि.व.६।

वीरायतच्छदा। स्त्री। कदलीवृक्षे। वै.निघ.।

वीरारुकम्। क्ली। आरुके। रा.नि.व.११।

वीरास्रावः। पुं। कुमारीनिर्य्यासे। भूमिवृन्द। "तत्पर्य्यायः—सहासारः। गुणाः—"सहासारोऽ-ग्निजनन. पित्तनिर्व्हणीमतः। बलकृद् रेचनः पुंस-जननो गर्भपातनः॥ विट्सङ्गे क्रिमिरोगे च संन्यासे-ऽप्यस्मृतौ तथा॥"

वीरी। स्त्री। ब्रह्मरीतौ। पित्तलविशेषे।

वीरुत् (धा)। स्त्री। विस्तृतलतायाम्। अम.। प्र.र.।

वीरुपचिका। स्त्री। तुच्छुशाके। रा.नि.व.४।

वीरेश्वररसः। पुं। पित्तश्लेष्मज्वरे रसः। पाठः—"मृतसूताभ्रतीक्ष्णञ्च ताल गन्धकटङ्कणं। मेषशृङ्गी वचा गुरुची भार्गी पथ्या च बालकम्। धान्यकं मर्दयेत्तुल्यं पर्पटीत्यद्रवैर्दिनं। सर्वं माषं लिहेत् वीरेः.....। काकमाचीरसेनातु सैन्धवेन युतं पिबेत्॥" रस.कौ.।

वीर्य्यम्। क्ली। बले। प्रभावे। अम.। शुक्र-धातौ। रा.नि.व.१८। द्रव्यगतशक्तौ। "द्रव्याणि येन कुर्व्वन्ति तद्वीर्य्यम्।" सु.सू.४१अ.। "उष्ण-शीतगुणोत्कर्षात् वृधैर्वीर्य्यं द्विधा स्मृतम्। यत्सर्व्व-मग्निसोमीयं दृश्यते भुवनत्रयम्॥" भा.। अन्यच्च— तद्विविधं चिन्त्याचिन्त्यक्रियाहेतुत्वेन। तत्र चिन्त्य-क्रियाहेतुर्यो द्रव्यरसादीनां स्वस्वकर्म्मणि स्वभाव-सिद्धा शक्तिः। अचिन्त्यक्रियाहेतुश्च प्रभावापर-पर्य्यायः। द्रव्याणां रसायननुरूपकार्य्यकरणशक्तिः। तदुक्तं—"भूतप्रभावातिशयी द्रव्ये यादृक् रसे स्थितः। चिन्त्याचिन्त्यक्रियाहेतुर्वीर्य्यं धत्वन्तरं मतम्॥" शिव-दासः। वीर्य्यगुणाः—शीतोष्णस्निग्धरूक्षमृदुतीक्ष्ण-पिच्छिलविशदाः। तत्र शीतौ आग्नेयौ। शीत-पिच्छिलौ अम्बुभूयिष्ठौ। मार्दवस्य तोया-काशभूयिष्ठत्वं, रौक्ष्यस्य वायुभूयिष्ठत्वं वैशद्यस्य च क्षितिवायुभूयिष्ठत्वम्। सु.सू.४१अ.। तेजसि। मे.।

वीर्य्या। स्त्री। वीर्य्ये। अ.टी.भ.।

वीहा। स्त्री। वनकुलत्थे। वै.निघ.।

वीच्चः। पुं। वृद्धौ। व्याक.।

बृंहणम्। क्ली। बलवर्द्धने। घृततैलादिस्नेह-क्रियायाम्। सा.कौ.।

बृंहणः। वि। बलवर्द्धके। पृथिव्यम्बुभूयिष्ठे। सु.सू.४१अ.। तन्नामकधूपधाने। भा.। स्त्री। अश्वगन्धायाम्। कपिलद्राक्षायाम्। भूकुष्माण्डे। वै.निघ.। वराहमांससाधितयवान्नाम्। च.सू.२अ.।

बृंहणवस्तिः। पुं। निरूहवस्तिभेदे। "बृंहण-द्रव्यनिःक्वाथैः कल्कैर्मांधुरकैर्युताः। सर्पिर्मांसरसो-पेता वस्तयो बृंहणाः स्मृताः॥" भा.।

बृंहणीयवर्गः। पुं। बृंहणाय हिते कषाय-वर्गे। यथा—चोरिणीराजबलाकाकोली-चोरकाकोलीवाय्यानीभद्रौदनीभारद्वाजीपयस्या-ऋष्यगन्धा इति दशेमानि बृंहणीयानि। क्षीर-लता, थिकुई, वेलेड़ा, काकोली, क्षीर-काकोली, श्वेत वेलेड़ा, पीत वेलेड़ा, वनकापास, भूमिकुष्माण्ड, शुक्ल भूमिकुष्माण्ड। च.सू.४अ.।

बृकः। पुं। ईहामृगे। हि हुण्डार। घोष इति लोके। नाथो इति महाराष्ट्रादौ। तत्पर्य्यायः,—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीकः विरूक् गोवत्सादौ वत्सादनः छागभोजी छागलान्त्री जलाशनः वृहाक्षगः वृहाह्वकः। रा. नि.व.१९। काके। उणा.। शृगाले। हारा.। वकवृक्षे। शृ.र.। सरलनिर्यासे। भ.रभसः।

वृकदंशः। पुं। कुक्कुरे। हे.च.। [वै.निघ.।

वृकदन्ती। स्त्री। पाठायाम्। आकनादि।

वृकधूपः (कः)। पुं। बहुसुगन्धद्रव्यकृतकृत्रिमधूपे। अम.। सरलवृक्षे। तार्पिन्। अम.।

वृकधूर्त्तः। पुं। शृगाले। हारा.।

वृका। स्त्री। पाठायाम्। आकनादि। रा.नि.व.६। वै.निघ.२भ. ज्व.चि.। सूर्पद्वयपरिमाणे।

वृकारातिः (रिः)। पुं। कुक्कुरे। रा.नि.व.१९। शृ.मा.।

वृकाक्षी। स्त्री। विवृति। तेउड़ी। र.मा.।

वृकिः (की)। स्त्री। पाठायाम्। आकनादि। वै.निघ.२भ.वा.व्या.चि.महारास्नादौ।

वृक्कः। पुं। वक्षोगताशयभेदे। "मेदःश्लेष्मितयोः सारात् वृक्कयोर्युगलं भवेत्। तौ तु पुष्टिकरौ प्रोक्तौ जठरस्यस्य मेदसः॥"

वृक्का। स्त्री। नागदमन्याम्। महासमङ्गायाम्।

वृजनः। पुं। कैशे। उणा.।

वृजिनः। पुं, क्ली। कैशे। मे.। क्ली। शोणिते। रक्तचर्म्मणि। हे.च.।

वृतपत्रा। स्त्री। पुनर्नवालतायाम्। [शृ.र.।

वृतिङ्करः। पुं। विकङ्कतवृक्षे। वँईची गाछ।

वृत्तम्। क्ली। खनार्घे। रा.नि.व.१८। पुं। धवलयावनाले। श्वेत जनार। रा.नि.व.१६। गुग्गुलवृक्षे। रा.नि.व.८। अक्षीरवृक्षे। वै.निघ.। सप्तपर्णवृक्षे। प.मु.। कच्छपे। रा.नि.व.१९।

वृत्तकम्। क्ली। वेवे। वै.निघ.।

वृत्तकर्कटी। स्त्री। वर्त्तुलाकारकर्कट्याम्। गोल काँकुड़। रा.नि.व.७।

वृत्तका। स्त्री। उपोदक्यां। पूँई। वै.निघ.।

वृत्तकोशा। स्त्री। देवदाल्याम्। रा.नि.व.३।

वृत्तकोषः। पुं। पीतदेवदाल्याम्। पीत देवदाड़ा। भा.।

वृत्तगुण्ड्रः। पुं। गुण्ड्रवृक्षे। तत्पर्य्यायाः,—वृत्तः वृत्तदलं दीर्घनालः जलाश्रयः। गुणाः—मधुरः शीतलः कफपित्तघ्नः अतीसारदाहरक्तघ्नः। रा.नि.व.८।

वृत्ततण्डुलः। पुं। यावनालनामकशिम्बधान्ये। जनार, जूओयारि। रा.नि.व.१६।

वृत्ततुम्बी। स्त्री। वृत्तालाब्वां। गोल लाउ। वै.निघ.।

वृत्ततृणम्। क्ली। गुण्ड्रतृणे। वै.निघ.।

वृत्तनिष्पाविका। स्त्री। नखनिष्पाव्यां, शिम्ब्याम्। छोट मटर शुँटी। रा.नि.व.७।

वृत्तपत्रः। पुं। उत्तमशाकविशेषे। नटिया शाक। प.मु.। स्त्री(त्रा)। पुनर्नवायाम्। रा.नि.व.३।

वृत्तपर्णिका। स्त्री। अजान्त्रीलतायाम्। छागल वेँटे। रा.नि.व.३।

वृत्तपर्णी। स्त्री। पाठायाम्। आकनादि। रा.नि.व.६। महाश्रवणपुष्पिकायाम्। रा.नि.व.४।

वृत्तपत्रः। पुं। क्षुद्रशङ्खे। वै.निघ.।

वृत्तपुष्पः। पुं। कदम्बवृक्षे। शिरीषवृक्षे। मल्लिकावृक्षे। सुङ्गरवृक्षे। रा.नि.व.२३। जल-वेतसे। भूकदम्ब। रा.नि.व.९। स्त्री (प्पा) नागदमन्यां। नागदना। रा.नि.व.५। कीङ्गण देशप्रसिद्धकुलकपुष्पवृक्षे। रा.नि.व.१०।

वृत्तफलम्। क्ली। मरिचे। रा.नि.व.६। जौरके। वै.निघ.। सुरप्रियफले। काबाबचिनी।

वृत्तफलः। पुं। दाड़िमवृक्षे। डालिम गाछ। बदरवृक्षे। कुल गाछ। कपित्थवृक्षे। कयेत गाछ। रा.नि.व.११। रक्तापामार्गे। भा.पू.१भ.। करञ्जवृक्षे। तरस्विजे। तरमुज, खर्मुज। वै.निघ.।

वृत्तफला। स्त्री। वार्त्ताकीवृक्षे। वेगुन गाछ। रा.नि.व.७। शृङ्गाख्यायाम्। क्षेत्रकर्कटी। आमलक्यां। रा.नि.व.११। [शृ.च.।

वृत्तभोजनः। पुं। गण्डीरे। शमठ शाक।

वृत्तमल्लिका। स्त्री। श्वेतार्के। वै.निघ.। त्रिपुरमल्लिकायाम्। सं वाटीगरें। कं दुन्दुभिमल्लिका। वम्. वटमोगरी। तत्पर्य्यायाः,—वटपत्री कुमारिका मोहना त्रिपुरा हैमा मोहिनी। गुणाः—नेवरीगन्धी कटुः उष्णा व्रणघ्नी बहुगन्धा सुन्दरीगन्धी च। रा.नि.व.१०।

वृत्तयुग्मः। पुं। वातामवृक्षे। बादाम गाछ। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तबीजः। पुं। राजमाषे। वरबटी। रा.नि. व.१६। भिण्डाक्षुपे। रा.नि.व.४।

वृत्तबीजका (जा)। स्त्री। पाण्डुरफल्याम्। रा.नि.व.५। आढक्याम्। अरहर। रा.नि.व.१६।

वृत्ता। स्त्री। मांसरोहिण्याम्। प्रियङ्गुलतायाम्। रा.नि.व.१२। श्वेतनिष्पावे। श्वेत शीम। रा.नि. व.१६। झिण्टिरीटाक्षुपे। रा.नि.व.४। नागबलायाम्। नागदना। रा.नि.व.५। रेणुकायाम्। रेणुक। रा.नि.व.६। वै.निघ.२भ.वा.व्या.चि. वातारिरसे। हस्तिकीशातक्याम्। हस्तिघोषा। रा.नि.व.७।

वृत्तिः। स्त्री। जीवनोपाये। अम.।

वृत्तिस्थः। पुं। कृकलासे। रा.नि.व.१९।

वृत्तेर्व्वारुः। पुं। खर्मूजावृक्षे। खर्मूजा गाछ। रा.नि.व.७।

वृत्तभोजनः। पुं। गण्डीरशाके।

वृथार्त्तवा। स्त्री। वन्ध्यायां स्त्रियाम्। वन्ध्या। रा.नि.व.१८।

वृद्धम्। क्ली। शैलजनामगन्धद्रव्ये। शैलज। रा.नि.व.१२। पुं। एकपञ्चाशद्वर्षे वृद्धे, स्थविरे। रा.नि.व.१८। अपिच—"ततस्तु सप्ततेरूर्द्धं क्षीणधातुरसादिकः। क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने॥ वली-पलित खालित्ययुक्तः कर्म्मसु चाक्षमः। कासश्वासादिभिः क्लिष्टो वृद्धोभवति मानवः॥" वृद्धदारकलतायाम्। रा.नि.व.३।

वृद्धकण्टः (कः)। पुं। वृद्धदीक्षे। वै.निघ.।

वृद्धकर्णिका। स्त्री। पाठायाम्। रा.नि.व.६।

वृद्धकाकः। पुं। द्रोणकाके। दाँड़कौक। हे.च.।

वृद्धकोटरपुष्पी। स्त्री। नीलवृक्षायाम्। वृद्धदारके। [कल्प.४अ.।

वृद्धगोनसः। पुं। मण्डलिसर्पविशेषे। सु.

वृद्धतिक्ता। स्त्री। पाठायाम्। आकृनादि। वै.निघ.।

वृद्धत्वम्। क्ली। वार्द्धके। अम.।

वृद्धदारकः (रुः, कः)। पुं। (Gmelina asiatica or Rourea santaloides.) खनामख्यातलताविशेषे। बीजताड़क। छिंगार। तत्पर्य्यायः,—क्षत्यगन्धा क्षुगलाङ्गी ऋषभः क्षुगन्धा क्षुगलान्त्री आवेगी जुङ्गः जुङ्गकः जुङ्गा क्षुगला क्षुगली अम्बा श्यामः क्षत्यगन्धा दीर्घवालुका वृद्धः कोटरपुष्पी अजात्री वृद्धदारुः वृद्धकोटरपुष्पी। स द्विविधः श्वेतरक्तभेदेन। गुणाः—"वृद्धदारद्वयं गौल्यं पिच्छिलं कफवातहृत्। बल्यं कासामदोषघ्नं द्वितीयं स्वल्पवीर्य्यदम्॥" रा.नि.व.३। कृष्ण वृद्धदारके। वै.निघ.।

वृद्धदारकादिलौहम्। क्ली। ऊरुस्तम्भाधिकारे औषधम्। पाठः—"वृद्धदारचिरबृल्लीकरिकर्णाग्निमानकैः। विकचत्रयुतो लौह आमवातान्तको मतः॥" इदं योगरत्नाकरस्य। रस.र.।

वृद्धधूपः। पुं। शिरीषवृक्षे। शोवासवृक्षे। वै. निघ.।

वृद्धधूमा। स्त्री। श्वेतातकवृक्षे। वै.निघ.।

वृद्धनाभिः। वि। उच्चनाभौ। गोंड़ा। अम.।

वृद्ध(द्धि)बला। स्त्री। महाबलायाम्। बड़ लज्जालुका। रा.नि.व.४। महाबलायाम्। वै. निघ.।

वृद्धराजः। पुं। अम्लवेतसे। कयित्।

वृद्धरुहा। स्त्री। शतावर्य्याम्। च.सू.४अ.।

वृद्धवाहनः। पुं। आम्रवृक्षे। कयित्।

वृद्धविभीतकः। पुं। आम्रातकवृक्षे। आमड़ा गाछ। श.मा.।

वृद्धसूत्रकम्। क्ली। इन्द्रतूलके। शारा.।

वृद्धा। स्त्री। पञ्चाशोर्द्धं प्राचीनायाम्। बूढ़ि। "बालेति गीयते नारी यावद्वर्षाणि षोड़श। ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि॥ तदूर्द्धमधिरूढा स्यात् पञ्चाशद्वत्सरावधि। वृद्धा तत्परतो ज्ञेया सुरतोत्सव वर्ज्जिता॥ भा.। तत्सम्भोगे मरणं भवति। राज.। "बाला तु प्राणदा प्रोक्ता युवती प्राणधारिणी। प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत्॥" महाश्रावणिकायाम्। रा.नि.व.५। अङ्गुष्ठे। बूढ़ा आङ्गुल। श.र.।

वृद्धाङ्गुलिः। स्त्री। अङ्गुष्ठाङ्गुलौ। बूढ़ा आङ्गुल। श.र.।

वृद्धिः। स्त्री। आधिक्ये। च.सू.१अ.। खनामख्यातौषधौ। वृद्धि। तत्पर्य्यायाः,—योग्या ऋद्धिः सिद्धिः लक्ष्मीः पुष्टिदा वृद्धिदात्री मङ्गल्या श्रीः सम्पत् आशीः जनेष्टा भूतिः सुत् सुखं जीवभद्रा। एषा दक्षिणावर्त्तफला गौड़े प्रसिद्धा। "ऋद्धि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धिश्च कन्दौ द्वौ भवतः कीर्त्यामसंज्ञे। वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः। प्रयोगेष्वनयोरेकं यथालाभं प्रयोजयेत्॥" गुणाः—"वृद्धिर्गर्भप्रदा शीता हृद्या मधुरा स्मृता। क्षय्या पित्तास्रश्रमनी चतुष्कासक्षयापहा॥" भा.। मधुरा स्निग्धा तिक्ता शीतला रुचिमेधाकरी श्लेष्मकुष्ठक्रिमिघ्नी च। रा.नि.व.५। वा.सू.१५अ. पञ्चकादिः। रोगविशेषे। ता: सप्तविधाः—वातपित्तकफशोणितमेदोमूत्रान्त्रजाश्चेति। निदानादि—"क्रुद्धोऽनूर्ध्वगतिर्वायुः शोथशूलकरश्चरन्। सुप्तौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः। प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः। दोषासृमेदोमूत्रान्त्राः सप्त वृद्धिः समासतः॥" मा.नि.। तासां मूत्रान्त्रनिमित्ते वृद्धौ वातसमुत्थे, केवलमुत्पत्तिहेतुरन्यतमः। अधः प्रकुपितोऽन्यतमो हि दोषः फलकोषवाहिनीरभिप्रपद्य धमनीः फलकोषयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते। तासां भविष्यतीनां पूर्वरूपाणि वस्तिकोटीमुष्कमेढ्रेषु वेदना मारुतनिग्रहः फलकोशश्लीफर्यमिति। तत्र वातवृद्धिं वातपूर्णेतिमिव परुषां, पित्तवृद्धिं पक्वोदुम्बरसङ्काशां, श्लेष्मवृद्धिं कठिनामल्पवेदनां श्लोतां कण्डूमतीं, रक्तवृद्धिं क्षणस्फोटाततां पित्तवृद्धिलिङ्गां, मेदोवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनाञ्च जानीयात्। मूत्रवेगधारणशीलस्य मूत्रवृद्धिर्भवति। सु.नि.१२अ.।

वृद्धिका। स्त्री। अङ्कपुष्प्याम्। श्वेत अपराजिता। अर्कपुष्प्याम्। वै.निघ.। ऋद्धौ। श.मा.।

वृद्धिदः। पुं। जीवकनामकस्वनृपे। जीवक। रा.नि.व.५। वाराहीकन्दे। रा.नि.व.७।

वृद्धिदात्री। स्त्री। वृद्धौ। वृद्धि। रा.नि.व.५।

वृद्धिपत्रम्। क्ली। षडङ्गुलशस्त्रविशेषे छेदने भेदने च। सु.सू.८अ.। वृद्धेः पत्रमिव वृद्धिपत्रं। "वृद्धिपत्रं क्षुराकारं छेद-भेदन पाटने। ऋज्वग्रसुव्रते शीफे गम्भीरे तु तदन्यथा॥ नतायं पृष्ठतो दीर्घं ऋजुवक्त्रं यथाग्रयम्॥" तत् द्विविधं—ऋजुतायं प्रयतायञ्च। ते अपि सप्ताङ्गुलम् अर्द्धपञ्चाङ्गुलं वृत्तं सार्द्धाङ्गुलफलञ्च कार्य्यं। तयोः प्रथमं क्षुरमाह। सु.टी.ड.।

वृद्धिभाक्। स्त्री। वृद्धौषधौ। नकुल.१०अ.।

वृद्धैला। स्त्री। स्थूलैलायाम्। बड़ एलाचि। वै.निघ.।

वृधसानः। पुं। मनुष्ये। उणा.।

वृन्तम्। क्ली। प्रसूनबन्धने। वोंटा। अग्र कुचाग्रे। मे.।

वृन्ताकः। पुं। शाकवृक्षे। बटिया भांर रा.नि.व.२३। उपोदिकायाम्। पुँई। वार्त्ता वृक्षे। वेगुन गाछ। रा.नि.व.७। क्ली। फले। वेगुन। भा.नवज्व. चि.। "वृन्ताकः पथ्यमेतत् प्रदिष्टम्।" गुणाः—"वृन्ताकं स्तौक्ष्ण्यं कटुपाकसपित्तलम्। ज्वरवातश्लेष्म दीपनं शुक्रलं लघु तन्नालं कफपित्तघ्नं वृद्धं पित्तकरं लघु। वृन्ताकं पित्तलं किञ्चिदङ्गारपरिपाकतम्। कफमेदोऽनिलामघ्नमल्पग्रे लघु दीपनम् तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम् अपरं शृतवृन्ताकं कुक्कुटाण्डसमं भवेत्। तदर्शो विशेषेण हितं हीनञ्च पूर्ववत्॥" भा.पू.१भ.शा व

वृन्ताकी। स्त्री। वार्त्ताकीवृक्षे। रा.नि.व.९ वृहत्याम्। मद.।

वृन्तिका। स्त्री। कटुकायाम्। कटकी। श.च.

वृन्दः। पुं। वृन्दाचार्य्यकृतचिकित्सासंग्रहे। कण्ठ रोगभेदे। तल्लक्षणं यथा—"सुसृतं वृत्तसमं दाहं तीव्रज्वरं वृन्दमुदाहरन्ति। तत्रापि पित्त चतुर्जप्रकोपाद् क्रियं सतोदम् पवनात्मकन्तु॥" मा.नि.।

वृन्दा। स्त्री। तुलसीवृक्षे। श.र.। वृक्षोपरि जातलतायाम्। वै.निघ.।

वृवूकम्। क्ली। जले।

वृश्चः। पुं। वासकवृक्षे। वासक गाछ। श.र. भा.। उन्दुरौ। श.र.। स्त्री। वासायाम्। वासक वृक्षा.।

वृश्चिः। पुं। रक्तपुनर्नवायाम्। वै.निघ.का. चि.कण्टकारीवृक्षे।

वृश्चिकः। पुं। श्वेतपुनर्नवायाम्। रक्तपुनर्न यास्। वै.निघ.२भ.वा.व्या.चि. महाराजादं तन्नामककीटविशेषे। विछा। हिं विच्छू। विंचू। तद्विषगुणाः—"वृश्चिकस्य विषं तीक्ष्णमाद दहति वह्निवत्। ऊर्द्धमारोहति क्षिप्रं दंशे पञ्चतिष्ठति। दंशः सद्योऽतिरुक् श्यावस्तुद्यते स्फुटतो च॥" वा.उ.३७अ.। ते त्रिविधाः मन्दमध्य महाविषभेदेन। तत्र मन्दविषा गोशकृत्कीटसङ्का द्वादश, मध्यविषाः काष्ठेष्टिकाकीटवास्तव्यः, उत्तमा महाविषाः सर्पकीटजाः विषजाश्च पञ्चदश। ए

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिंग्रदृश्चिकजातयः। तेषां मन्दविषाः यथा—"कृष्णः श्यावः कर्बुरः पाण्डुवर्णो गोमूत्राभः कर्कशो सेचकश्च। श्वेतो रक्तो रोमशः शाद्वलाभो रक्तश्चेति मन्दवीर्या मताः तु। दष्टलक्षणानि—एभिर्दष्टे वेदना विषयुग्यं गावस्तम्भः कृष्णरक्तागमश्च। शाखादष्टे वेदना चोर्ध्वमेति दाहश्चेदो दंशशोफौ ज्वरश्च।" इति। मध्या यथा—"रक्तः पीतः कापिलोदरेण सर्व्वे धूम्राः पञ्चभिश्च विधिः स्मृतः। श्वेते मूत्रोच्चारपूत्यण्डजाता मध्या ज्ञेयास्त्रिप्रकारी रागागाणां। जिह्वाशोफो भोजनस्यावरोधो मूर्च्छा चोग्रा मध्यवीर्याभिदष्टे।" उत्तमा यथा—"श्वेतश्चित्रः श्यामलो लोहिताभो रक्तः श्वेतो रक्तनीलोदरो च। पीतो रक्तो नीलपीतोऽपरश्च रक्तो नीलो नीलशुक्लसंज्ञश्च। रक्तो बभ्रुः पूर्ब्बवर्च्चे कपर्वा यश्चापर्व्वा पर्व्वणी द्वे च यस्य। नानारूपा वर्णतश्चापि घोरा ज्ञेयास्त्वेते वृश्चिकाः प्राणचौराः। जन्मैतेषां सर्पकीटात् प्रदिष्टं दैवेभ्यो वा घातितानां विधेश्च। एभिर्दष्टे सर्पवेगप्रवृत्तिः स्फोटोत्पत्तिर्भ्रान्तिदाहौ ज्वरश्च। खेभ्यः कृष्णं शोणितञ्चारि तीव्रं तस्मात् प्राणैस्त्यज्यते शीघ्रमेव॥" सु.कल्प.८अ.। औषधिविशेषे। मे.। शुक्रकीटे। शुम्रापोका। अम.। मदनवृक्षे। कर्कटे। गोमयकीटे। गोबरे' पोका। भरतः।

वृश्चिकप्रिया। स्त्री। पूतिकायाम्। पूँइशाक। श.मा.।

वृश्चिकर्णी। स्त्री। आखुकर्णीलतायाम्। मूषाकर्णी लता। रा.नि.व.३।

वृश्चिकविषम्। क्ली। वृश्चिककीटस्य विषे।

वृश्चिकविषापहा। स्त्री। सहारास्तायाम्। नाकुल्याम्। व.निघ.।

वृश्चिका। स्त्री। क्षुद्रक्षुपविशेषे। मं चिञ्चुवा। कं इङ्गुलि। वस्. विञ्चुवा। तत्पर्य्यायाः,—नखपर्णी पिच्छिला अलिपत्रिका। गुणाः—पिच्छिला अम्ला अल्पवृद्धिघ्नी च। रा.नि.व.५। चि.क्रा.क.५प.। पृश्निपर्ण्याम्। चाकुलिया। श्वेतपुनर्नवायाम्। वै.निघ.।

वृश्चिकाली। स्त्री। (Fragia involucrata.) खनामख्यातक्षुपविशेषे। विछाती। हिं वर्हण्टा। मं वृश्चिकाली। कं हलिगुलु। तें डुलगोंड़ी। ता. कञ्चुरि। वम्. शेंढशिंगी। तत्पर्य्यायाः,—वृश्चिपत्री विषघ्नी नागदन्तिका सर्पदंष्ट्रा अमराकाली ऊर्ध्वसरपुच्छिका काली नैचरगन्धा ऊर्ध्वका अलिपर्णी दक्षिणावर्त्तकी कालिका आगमावर्त्ता दैवलाङ्गुलिका करभो भूदिदुग्धा कर्कशा व्रणदो युग्मफला चीर-विषाणिका विषाणी भास्वरपुष्पा। तद्गुणाः—कटुः तिक्ता हृद्यवक्त्रशोधनी रक्तपित्तघ्नी विबन्धारोचकघ्नी बल्या च। रा.नि.व.९। कासघ्नो वातघ्नी च। राज.। कण्टकितसर्षपगुल्मतुल्याकारफला। इति। सु.सू.३८ ३९अ.वातशमने। उष्णुष्णकसर्षपगुल्मघ्नात्। इति। वा.सू.१५अ.अर्कादिः। "भार्गी राला वृश्चिकाली प्रकौर्य्या।" कण्टकितसर्षपगुल्मतुल्याकारफला पाठापत्रा ईषद्रोमशा श्वेतपुष्पपुच्छा दक्षिणावर्त्तवल्ली सर्षपगुल्मीभेदः। सु.चि.८अ.। सि.यो.उन्मा.१७. च.द.चारगुड़े।

वृश्चिकाहिविषापहा। स्त्री। नाकुल्याम्। गरुडवाराही। वै.निघ.।

वृश्चिपत्री (र्णी)। स्त्री। वृश्चिकाल्याम्। विछाति। प.मु.। रास्ना. लघुसर्षपगुल्माम्। क्षुद्र मेढ़ाशिङ्गे। वै.निघ.।

वृश्वी। स्त्री। वृश्चीरक्षुपे। पुनर्नवा। वा.चि.३अ.।

वृश्वीद्वयम्। क्ली। वृश्चीरयुगले। श्वेतरक्तपुनर्नवयोः। चि.क.क.१स्त्र.३अ.।

वृश्वीरः (वः) (कः)। पुं। श्वेतपुनर्नवायाम्। शेवापुष्पा। प.मु.। च.सू.४अ.। रसोनुंचुधावतीगुण्यां नागबलातैले च। च.द.विच्चि.। "वृश्चीरविल्वपर्षाभ्।" वा.सू.१५अ. विदार्य्यादौ। च.द.कास.चि.बृहत्कण्टकारीघृते। च.द.वा.व्या.चि.एकादशशतप्रसारणीतैले। वा.र.णि.चि.अमृतायघृते।

वृषः। पुं। बलीवर्दे। बाँड़। अम.। तन्मूत्रगुणाः—"वृषमूत्रञ्च शोफघ्नं कृमिदोषविनाशनम्। कासलायहृषीपाण्डुनाशनञ्चाग्निदीपनम्॥" अवि.९अ.। ऋषभकौषधौ। रा.नि.व.५। दुरालभायाम्। रा.नि.व.२३। वासकवृक्षे। रा.नि.व.४। च.चि.३अ.। च.द.गुडघृते, कामदेवघृते। नदीभल्लातके। गोधूमे। प.मु.। मूषिके। मे.। क्ली। वासामूले। वहे। श.मा.।

वृषकर्णिका (र्णी)। स्त्री। सुदर्शनालतायाम्। सुदर्शन गुलञ्च, उरेति पूरेति। च.सू.४अ.। वा.सू.१५अ. सुरासादौ। "खरवृषवृषकर्णीकटफलं कासमर्दः।" अमालायाम्।

वृषगन्धा (न्धिका)। स्त्री। छगलान्त्रायाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छागलवैंटे । रा.नि.व.३ । अतिबलायाम् । पीत वेलेड़ा । वै.निघ. ।

वृषणः । पुं । अण्डकोशे । रा.नि.व.१८ । तदुत्पत्तिः—मांस-रुधिर-कफ-मेदसां सारांशात् वायुयोगेन भवति । सु.शा.४अ. ।

वृषणकच्छूः । पुं । चुदरोगविशेषे ।...चटो । निदानादि—"स्नानोत्सादनहीनस्य मलो वृषणसंश्रितः । प्रक्लिद्यते यदा स्वेदात् स कच्छूं जनयेत्तदा । तत्र कण्डूयनात् क्षिप्रं स्फोटः सावद्य जायते । प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजां ॥" सु.नि.१३अ. । मा.नि. ।

वृषदंशः (कः) । पुं । विड़ाले । विड़ाल । अम. । च.द.वात.चि. । "पयसा वृषदंशस्य शक्तून् ।" वा.उ.३अ. । [रा.नि.व.६ ।

वृषध्वाङ्क्षा (ङ्क्षी) । स्त्री । नागरमुस्तायाम् ।

वृषनाशनः । पुं । विड़ङ्गे । श.मा. ।

वृषपत्रिका । स्त्री । वस्त्रान्ध्राम् । छागलवैंटे । रा.नि.व.३ ।

वृषपर्णिका । स्त्री । ब्राह्मण्यष्टिकायाम् । वामनहाटी । च.सू.४अ.क्रमिघ्न-गणः ।

वृषपर्णी । स्त्री । आखुकर्णीलतायाम् । इन्दुरकाणी । पूर्वाती । प.मु. । क्षुण्णदन्त्राम् । र.म. ।

वृषपर्व्वा (न्) । पुं । कशेरौ । केशुर । विश्व. ।

वृषभः । पुं । वृषे । मे. । ऋषभके । उणा. ।

वृषभध्वजा । स्त्री । महादन्तीवृक्षे । बड़ दन्ती । वै.निघ. ।

वृषभपल्लवः । पुं । वासावृक्षे । वांसकवृक्ष । वै.निघ.२भ.चय.चि.वसन्तकुसुमाकररसे ।

वृषभाक्षी । स्त्री । इन्द्रवारुणीलतायाम् । राखालशशा । रा.नि.व.३ ।

वृषमूलम् । क्ली । वासामूले । वांसकमूल । वातरक्ते चि. रुदतैले ।

वृषलः । पुं । शूद्रजने । गांजड़ । घोटके । मे. ।

वृषलोचनः । पुं । मूषिके । हे.च. ।

वृषवीभत्सः । पुं । कपिकच्छूभेदे । वै.निघ. ।

वृषसारः । पुं । यष्टिवटे । देवकुभाख्यवृक्षभेदे । वै.निघ. । [शु.मा. ।

वृषस्कौ (न्) । पुं । भृङ्गरीजे । भीमकुल ।

वृषस्यन्ती । स्त्री । अतिकामुकायाम् । अम. ।

वृषा (न्) । पुं । घोटके । वृक्षे । हे.च. । कर्कटे । मे । स्त्री(षा) । लघुमूषिकपर्णीलतायाम् । पूर्वाती । रा.नि.व.३ । द्रव्यन्त्राम् । बड़ दन्ती । रा.नि.व.५ । इयम् एरण्डवत्पत्रविटपा, अलाभे दन्ती देया । भा.सन्निक-ज्व.चि. । अश्वगन्धायाम् । भा.सन्निक-ज्व.चि.वचादिः । महाज्योतिष्मतीलतायाम् । कपिकच्छौ । हे.च. । [मे. ।

वृषाकपायी । स्त्री । शतावर्य्याम् । जीवन्त्राम् ।

वृषाकरः । पुं । माषे । मासकलाये । रा.नि. व.१६ । [षण्ढे । मे. ।

वृषाङ्गः । पुं । पानीयभल्लातके । जलजभेला ।

वृषाणी (इन्) । पुं । ऋषभके । रा.नि.व.५ ।

वृषादनी । स्त्री । इन्द्रवारुण्याम् । राखालशशा । वै.निघ. ।

वृषायणः । पुं । चटकपक्षिणि । हारा. ।

वृषाहारः । पुं । विड़ाले । हारा. ।

वृषी (इन्) । पुं । मयूरे । श.मा. ।

वृष्टिः । स्त्री । जलवर्षणे । गुणाः—"वृष्टिर्निष्यन्दिनी शीता निद्राश्लेष्मबलप्रदा । मलापहारिणी वायुदायिनी वह्निवारिणी ॥" राज.२प. । वृष्टिजलं भूमिपतितमष्टविधं भवति । तद्यथा—श्रावणभाद्राश्विनकार्त्तिकभवजलानीति चतुर्विधमित्यष्टविधं वृष्टिजलम् । तच्च पुनर्दिवावृष्टिरात्रिवृष्टिदुर्दिनवृष्टिभवत्वेन भिन्नगुणं भवति । यथा—"निशाजलं कफकरं घनं शीतगुणात्मकं । सामुद्रतोयस्य समं विज्ञेयं वातकोपनम् । दिवा सूर्य्यांशुतप्ता च मेघा वर्षन्ति यत्पयः । तत् कफघ्नं पिपासाघ्नं लघु वातप्रकोपनम् । दुर्दिने वृष्टिसम्भूतं वातभूतं सवातलम् । कफकृच्छ्रोपहननं तर्पणं दोषकोपनम् ॥" अथ श्रावणवृष्टिजलगुणाः—"तथा श्रावणवृष्टिश्च दोषरोगकरी नृणाम् । कण्डूविदोषजननं पानीयं न प्रशस्यते ॥" अथ भाद्रवृष्टिजलगुणाः—"सघनं नाभसं नीरं श्लेष्मकृद्वातकोपनं । शमनं पित्तरोगाणां मधुरं रक्तदोषकृत् ॥" अथाश्विनवृष्टिजलगुणाः—"रूक्षं पित्तकरं चाम्लं गुल्म-रक्तविकारकृत् । चिरानुचरसम्भूतं खरं शस्त्रविदोषकृत् ।" अथ कार्त्तिकवृष्टिजलगुणाः—"कार्त्तिकवृष्टिसम्भूतं नातिसन्तापशीतलं । नाशनञ्च त्रिदोषाणां सर्व्वशस्त्रप्रवर्द्धनम् । शीतलं बलकृद्वयं त्रिदोषज्वरनाशनं ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचित् पुण्यतरे देशे शरद्वर्षति माधवम्। पित्तज्वरविनाशाय शस्यनिष्पत्तिहेतवे। अम्बरस्थं सदा पथ्यमस्तं स्वातिसम्भवम्। गगनाम्बु विदोषघ्नं गृहीतं यच्च भाजने। बल्यं रसायनं मेध्यं वल्या पैत्त्यं ततःपरं। अनार्त्तवं विमुञ्चन्ति जलं धाराधरास्तु यत्। पतितं तत् विदोषाय सर्व्वेषां देहिनामपि॥" इति चातुर्मासिकजलम्। अवि.७अ.। अन्यच्चतुर्विधं जलशब्दे दृश्यम्। अकालवृष्टिजलं शिल्पिरोगकरं न प्रशस्तञ्च।

वृष्टिका। स्त्री। आरण्यशणपुष्पयाम्। वुनो शण।

वृष्टिकालः। पुं। वर्षर्त्तौ। [शब्दच.।

वृष्टिघ्नी। स्त्री। क्षुद्रेलायाम्। गुजराटी एलाच।

वृष्टिजीवनः। पुं। चातकपक्षिणि।

वृष्टिभूः। पुं। भेकै। त्रिका.।

वृष्णिः (ष्णी) (इन्)। मेषे। अम.।

वृष्यम्। क्ली। मनोहर्षणे। "मनसो हर्षणं यच्च तत् सर्व्वं वृष्यमुच्यते।" यथा—वृष्यं मात्रापीतं हर्षणं भवति। "स्वस्थस्योजस्करं यच्च, तद्वृष्यम्।" च.चि.१अ.। पुं। इक्षुदण्डे। रा.नि.व.१४। माषे। माषकलाये। हे.च.। आमलकै। वि। शुक्रवर्द्धिकरे। भा.।

वृष्यकन्दका (न्दा)। स्त्री। विदार्य्यां। भूमिकूष्माण्ड। रा.नि.व.७। मूलके। वै.निघ.।

वृष्यगन्धा। स्त्री। वृद्धदारके। वीजदारक। शब्दर.। अजात्रीलतायाम्। छागलवेंटे। रा.नि.व.३। अतिबलायाम्। पीतवेलेड़ा। वै.निघ.।

वृष्यगन्धिका। स्त्री। अतिबलायाम्। पीतवेलेड़ा। रा.नि.व.४।

वृष्यचण्डी। स्त्री। महामूषिककर्ण्याम्। वड़ मूषाकर्णी। वै.निघ.।

वृष्यपर्णी। स्त्री। भूमिकुष्माण्डे। वै.निघ.।

वृष्यफला। स्त्री। आमलकीवृक्षे। वै.निघ.।

वृष्यवल्लिका (ल्ली)। स्त्री। भूमिकुष्माण्डे। रा.नि.व.७।

वृषा। स्त्री। कट्वी। र.मा.। शतावर्य्याम्। भूम्यामलक्याम्। रा.नि.व.५। आमलक्याम्। रा.नि.व.११। भूमिकुष्माण्डे। अतिबलायाम्। वृहद्वृत्त्याम्। वै.निघ.। शुक्लशिग्वाम्।

वृहच्चित्तः। पुं। फलपूरे। शब्दच.।

वृहच्चुञ्चुः। पुं। महाचुञ्चुशाके। रा.नि.व.४।

वृहच्छतावरीघृतम्। क्ली। असृन्दराधिकारे घृतम्। पाठः—"शतावरीरसप्रस्थं क्षीरद्विगुणितं भिषक्। घृतप्रस्थसमायुक्तं क्षीरद्विगुणितं भिषक्। अतः कल्कानिमान् दद्यात् स्थूलीडुम्बरसम्मितान्। जीवनीयानि यान्यष्टौ यष्टी चन्दनपद्मकौ। सृष्टा चात्मगुप्ता च बला नागबला तथा। शालपर्णी पृश्निपर्णी विदारी शारिवाद्वयम्। शर्करा च समा देया काश्मर्य्याश्च फलानि च। सम्यक्सिद्धञ्च विज्ञाय तद्घृतञ्चावतारयेत्॥" च.द.असृन्दर.चि.।

वृहच्छदः। पुं। अचीटवृक्षे। आकरोटे गाछ। वै.निघ.।

वृहच्छफरी। स्त्री। महाप्रोटीविशेषे। सरल-पूँटी। गुणाः—"स्निग्धास्वल्पकण्टरीगघ्नी श्रेष्ठा प्रोष्ठी प्रकीर्त्तिता।" राज.।

वृहच्छल्कः। पुं। चिक्कटमत्स्ये। चिंड़िमाछ। जटा.।

वृहच्छालपर्णी। स्त्री। (Flemingia congesta.) महाशालपर्ण्याम्। वड़ शालपानि। हिं वड़ शालपान, भालड़ कसन्द। वम्. तौड़ीला।

वृहच्छिम्बी। स्त्री। महाशिम्ब्याम्। वड़ शिम्। वै.निघ.।

वृहज्जीरकम्। क्ली। स्थूलजीरके। मोटा जीरा। भा.वाजी.चि.। "वृहज्जीरकमप्यत्र।"

वृहज्जीवन्ती। स्त्री। स्वनामख्यातौषधिविशेषे। वड़ जीवन्ती। तत्पर्य्यायाः,—पत्रभद्रा प्रियङ्करी यशस्करी मधुरा जीवपुष्टा। गुणाः,—वहुवीर्य्यकरी भूतविद्रावनी रसनियामिका च। रा.नि.व.३।

वृहज्जीवा। स्त्री। वृहज्जीवन्त्याम्। रा.नि.व.३।

वृहतिका (ती)। स्त्री। वार्त्ताक्याम्। वेगुण। र.मा.। (Solanum Indicum.) क्षुद्रवार्त्ताकी। व्याकुड़। हिं वाईगण्टा। वम्. डोरली विङ्गनी। तें कुकमाचि। ता. चेरुचुण्ट। तत्पर्य्यायाः—मदती क्रान्ता वार्त्ताकी सिंहिका सिंही कुली राष्ट्रिका स्थूलकण्टा भण्टाकी महीटिका महीटी वहुपत्री कण्टतनुः कण्टफला कण्टालुः डोरड़ी वनहन्ताकी प्रसहा रक्तपाकी हिङ्गुली लताहृतिका अक्रान्ता परावेदी क्षुद्रवार्त्ताकी क्षुद्रभण्टाकी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुष्प्रधर्षिणी। सा द्विधा चविका श्वेता चेति। गुणाः—"बृहती पाचनी रूक्षा ग्राहिणी वातनाशिनी।" राज.। "चविका बृहती तिक्ता कटु रूक्षा च तत्समा। युक्त्या द्रव्यविशेषेण धारासंस्तम्भसिद्धिदा। विज्ञेया श्वेतबृहती वातश्लेष्मविनाशिनी। रूक्षा चाञ्जनयोगेन नानानेत्रामयापहा॥" रा.नि. व.४। अपिच,—"बृहती ग्राहिणी हृद्या पाचनी कफवातहृत्। कटु-तिक्तास्य-वैरस्य-मलारोचक-नाशिनी॥ उष्णा कुष्ठज्वरश्वास-शूलकासाग्निमान्द्य-जित्॥" भा.। तत्फलगुणा.—"तथा बृहत्याः फलमेव श्रेष्ठं सन्दीपनं स्यात् कफवातनाशि। कण्डू-विसर्पज्वरकामलानां तथारुचौ श्रेष्ठमिदं वदन्ति॥" अमि.१६अ.। कण्टकार्य्याम्। अम.। च.द.कफ-ज्व.चि.तिक्तादिकषाये। ज्वर.चि.बलाद्यघृते। पृष्ठ-मर्म्मविशेषे। सु.शा.६अ.।

बृहतीकल्पः। पुं। चिकित्साकल्पभेदे।

बृहतीद्वयम्। क्ली। बृहती कण्टकारी चेति द्वये। सु.सू.३८अ.। च.द.वा.ज्व.चि. किरातादिः। "बृहतीद्वयगोक्षुरैः।" भा.मि.ज्वर.चि.। सूक्ष्म-फला स्थूलफला चेति बृहतीद्वये। सु.चि.८अ.।

बृहतीफलम्। क्ली। बृहत्या बीजे।

बृहत्कन्दः। पु। विष्णुकन्दे। रा.नि.व.७। गृञ्जने। र.मा.।

बृहत्कालशाकः। पुं। महाकासमर्दे। बड़ कालकाशन्दा। त्रिका.।

बृहत्काशः। पुं। खरशाड़ायाम्। षागड़ा। प.मु.।

बृहत्कुक्षिः। वि। तुन्दिले। अम.।

बृहत्कोशातकी। स्त्री। हस्तिकोशातक्याम्। धुन्दुल। रा.नि.व.७।

बृहत्खर्जूरिका। स्त्री। राजखर्जूरिकायाम्। पिण्डीखेजूर। वै.निघ.।

बृहत्गोधूमः। पुं। महागोधूमे। बड़ गोम्। See महागोधूमः।

बृहत्तालः। पुं। हिन्तालवृक्षे। रा.नि.व.९।

बृहत्तिक्ता। स्त्री। पाठायाम्। आकनादि। रा.नि.व.६।

बृहत्तृणः। पुं। वंशवृक्षे। श.च.।

बृहत्त्वक्। पुं। सप्तपर्णवृक्षे। छातिम गाछ। "बृहत्त्वक् सप्तपर्णे स्यात्।" रा.नि.व २३।

बृहत्त्वचः। पुं। निम्बवृक्षे। प.मु.।

बृहत्धुस्तूरकः। पुं। राजधुस्तूरे।

बृहत्पञ्चमूलम्। क्ली। बिल्वाग्निमन्थ श्योणाक(श्योनाक)पाठाकाश्मरीषु। सु.सू.३८अ.। "बिल्व-श्योनाकगाम्भारीपाटलागणिकारिकाः.....पञ्च-मूलमिदं महत्।" च.द.ज्व.चि.। गुणाः—"पञ्चमूलं महत्तिक्तं कषायं कफवातनुत्। मधुरं श्वासकासघ्नमुष्णं लघ्वग्निदीपनम्॥" भा.।

बृहत्पत्रः। पुं। हस्तिकन्दे। रा.नि.व.७। श्वेत-लोध्रे। मधुवास्तूके। मिठा वेतो। वै.निघ.।

बृहत्पत्रा। स्त्री। विषपर्णिकायाम्। रा.नि.व. ७। कासमर्दतुपे। वै.निघ.।

बृहत्पर्णः। पुं। गुक्करीवृक्षे। वै.निघ.।

बृहत्पर्णी। स्त्री। महाश्रावणपर्णीविशेषे। वन-शण। रा.नि.व.४।

बृहत्पाटलिः (ली)। पुं, स्त्री। धुस्तूरवृक्षे। त्रिका.।

बृहत्पादः। पुं। वटवृक्षे। श.च.।

बृहत्पारे(ले)वतम्। क्ली। महापारेवतफले। बड़ पेयारा। रा.नि.व.११।

बृहत्पालौ (न्)। पुं। वनजोरकचुपे। वन-जौरा। रा.नि.व.११।

बृहत्पीलुः। पुं। महापीलुवृक्षे। पाहाड़े आकरोट। रा.नि.व.११।

बृहत्पुष्पः। पुं। महाकुष्माण्डे। वै.निघ.। स्त्री। कदलीवृक्षे। वै.निघ.।

बृहत्पुष्पी। स्त्री। शणवृक्षे। प.मु.।

बृहत्फलम्। क्ली। कुष्माण्डे। भा.पू.१भ.शा. व.। पणसफले। कैंटाल। जम्बुफले। जाम। वै. निघ.। स्त्री (ला)। अलाब्वाम्। लाउ। प.मु.। कटुतुम्ब्याम्। तित्लाउ। रा.नि.व.३। महेन्द्र-वारुण्याम्। माकाल। कुष्माण्ड्याम्। कूमड़ा गाछ। रा.नि.व.७ राजजम्ब्वाम्। बड़ जाम। रा.नि.व.१०। र.मा.।

बृहत्यादिः। पुं। तदादिदशद्रव्यात्मककषाये। यथा—"बृहती पुष्करं भार्गी शटी शृङ्गी दुरालभा। वत्सकस्य च बीजानि पटोलं कटुरोहिणी। बृह-त्यादिर्गणः प्रोक्तः सन्निपातज्वरे हितः। कासादिषु च सर्वेषु देयः सोपद्रवेषु च॥" च.द.ज्व.चि.। अन्यच्च—"बृहती कण्टकारिका टङ्कफलं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुकञ्चेति ।" गुणाः—पाचनीयो बृंहण्यादिर्गणः पित्तनिलापहः । ककारीचक-हृल्लास-मुखक्लेद-रुजापहः ॥

बृहद्दन्तः । पुं । कर्म्मरङ्गवृक्षे । कामरांङा गाछ । श.च. ।

बृहद्देला । पुं । स्थूलैलायाम् । बड़ एलाच । रा.नि.व.६ ।

बृहद्बोलम् । क्ली । तरमुजे । तरमूज । श.च. ।

बृहद्बन्ती । स्त्री । एरण्डपत्रविटपदन्तीविशेषे । सैव द्रवन्तीत्युच्यते । गुणाः—"दन्तीद्वयं सरं पाके रसे च कटु दीपनम् । गुदाङ्कुराश्मशूलार्शःकण्डू-कुष्ठविदाहनुत् ॥"

बृहद्बलः । पुं । पट्टिकालोध्रे । शुक्ललोध । रा.नि.व.६ । सप्तपर्णवृक्षे । छातिम गाछ । वै. निघ. । हिन्तालवृक्षे । हेँताल गाछ । रा.नि. व.६ । रक्तारसोने । वै.निघ. । स्त्री । लज्जालुकायाम् । क्षुद्र लज्जावती । वै.निघ. ।

बृहद्बीजी । स्त्री । द्रोणीपरिमाणे । १२८ श. । प.प्र.१ख. ।

बृहद्बान्धवः । पुं । चिबेची । जनार गाछ । महाशालौ । प.मु. ।

बृहद्बदरम् । क्ली । महाकोलीफले । गुणाः—कफपित्तकरं गुरु सरञ्च । मद.व.६ ।

बृहद्बला । स्त्री । महाबलायाम् । पीत वेलेड़ा । "राज्ञेरण्डबृहद्बला ।" सि.यो.उन्मा.चि. चैतसवृते । शुक्लरोध्रे । लज्जालुकायाम् । लज्जावती लता । वै.निघ. ।

बृहद्भण्डी । स्त्री । चायमाणायतायाम् । बड़ गोमालिया । प्रयोग. कनकतैले ।

बृहद्भानुः । पुं । अग्नौ । चित्रकवृक्षे । अम. ।

बृहद्भावः (वी) (इन्) । पुं । क्षुद्रपेचके । रा. नि.व.१९ ।

बृहद्भर्णः । पुं । माक्षिकनामोपधातौ । स्वर्ण-माक्षिक । र.सा.सं. ।

बृहद्भल्कः (लः) । पुं । पट्टिकालोध्रे । रा.नि. व.६ । सप्तपर्णवृक्षे । वै.निघ. । [मद. ।

बृहद्भल्ली । स्त्री । कारवल्लाम् । करला, उच्छे ।

बृहद्भातः । पुं । देवधान्ये । देधान । अयं अग्रसरीहरः । र.मा. ।

बृहद्भारुणी । स्त्री । महेन्द्रवारुणीलतायाम् । बड़ माकाल । राखालशशा । रा.नि.व.३ ।

बृहद्भोजः । पुं । आम्रातकवृक्षे । आमड़ा गाछ ।

बृहन्नलः । पुं । महापीटगले । बड़नल गाछ । मे. ।

बृहन्निम्बः । पुं । महानिम्बे । वै.निघ. ।

बृहन्नीली । स्त्री । महानिलीवृक्षे ।

बृहन्मरीचः । पुं । मरीचे । वै.निघ. ।

बृहन्मोनी । स्त्री । लोनीशाकभेदे ।

बृहस्पतिः । पुं । अश्वस्य ग्रहभेदे । तद्गृहीते अश्वः शूनाचिकूटः रक्ताक्षः क्लमः सुहृस्खलनशीलश्च भवेत् । ज.द.५७अ. ।

वृक्षः । पुं । तरौ । गाछ । तत्पर्य्यायाः,—पुलाकी करालिकः कुठः पुष्पदः पल्लवी फलदः मूली भूमिरुहः महीरुहः शाखी विटपी पादपः तरुः अनोकहः कुटः साल: पलाशी द्रुः द्रुमः अगः अगच्छः आगमः विटपः महीरुहः स्थिरः कारस्करः नगः कुटारः कुटिः विटपः वनस्पतिः अद्रिः शिखरी कुजः कुल्लः चितिरुहः अङ्घ्रिपः भूरुहः भूजः महीजः धरणीरुहः चितिजः शालः । तस्य षट्-जातयः—"कुरुण्टाद्या अग्रबीजा मूलजास्तूत्पलादयः । पर्व्वयोनय इक्षाद्याः स्कन्धजाः सल्लकीमुखाः । शाल्यादयो बीजरुहाः संमूर्च्छाजास्तृणादयः । स्नुवनस्पतिकायस्य षड़ेते मूलजातयः ॥" हे.च. । लोध्रवृक्षे । लोध गाछ । रा.नि.व.६ । धववृक्षे । धाओया गाछ । र.मा. ।

वृक्षकः । पुं । श्वेतकुटजवृक्षे । कुड़चि गाछ । र.मा. । च.कल्प.५अ. । सु.सू.३७अ. । चि.२३अ. । ३८अ. । नन्दिवृक्षे । तृणगाछ । धन्वन्तरिः ।

वृक्षकबीजम् । क्ली । इन्द्रयवे ।

वृक्षचरः । पुं । वानरे । धनञ्जयः ।

वृक्षतपनः । पुं । कर्णिकारवृक्षे । कनिकार-फूलेर गाछ । वै.निघ. ।

वृक्षधूपः । पुं । श्रीवेष्टनामकगन्धकाष्ठे । सरल धूप । रा.नि.व.१२ ।

वृक्षधूमकम् । क्ली । शैवाले । शेओला । वै. निघ. ।

वृक्षनाथः । पुं । वटवृक्षे । श.च. ।

वृक्षपाकः । पुं । वटवृक्षे । श.च. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृक्षभक्षा। स्त्री। वन्दायाम्। बान्दड़ा। भा.।

वृक्षभेदी (दिन्)। पुं। वृक्षादने। बान्दड़ा। अम.। अश्वत्थवृक्षे। कश्चित्।

वृक्षमर्कटिका। स्त्री। काष्ठविड़ालिकायाम्। काटविड़ालि। कैचित्।

वृक्षमृङ्गः। पुं। जलवेतसे। श्र.च.।

वृक्षराजः। पुं। महासिदायाम्। द्वीपान्तरवचायाम्। तोपचिनि। वै.निघ.।

वृक्षरुहा। स्त्री। वन्दायाम्। बान्दड़ा, वन्ना। रा.नि.व.५। च.सू.४अ.। आकाशलतायाम्। आलोकलता, परगाछा। च.सू.४अ.। जन्तुकालतायाम्। रा.नि.व.३। विदारीकन्दे। र.मा.। अमृतसवालतायाम्। महासमङ्गायाम्। रा.नि.व.३।४। पुष्करमूले। वै.निघ.।

वृक्षवान्। पुं। पर्व्वते। रा.नि.व.२।

वृक्षवीजम्। क्ली। कुटजबीजे। इन्द्रयव।

वृक्षवीरा। स्त्री। भूम्यामलक्याम्। भूँइआमला। वै.निघ.।

वृक्षशायिकः। पुं। गोलाङ्गूलवानरे। मुखपोड़ा। अयं पर्णमृगगुणः। सु.सू.४६अ.।

वृक्षादनः। पुं। अश्वत्थवृक्षे। मे.। पियालवृक्षे। धरणिः। वन्दायाम्। मान्दड़ा। हिं नेचाली। अम.। मधूच्छिष्टे। मे.। स्त्री (नी)। वन्दायाम्। परगाछा। रा.नि.व.५। सु.सू.३७अ.। च.द.वा.ज्व.चि. रास्नादिः। "रास्ना वृक्षादनी दारु।" विदारीकन्दे। भूँइ कुमड़ा। मे। भैष. नेत्ररो. चि.।

वृक्षामयः। पुं। लाक्षायाम्। लाहा। वै.निघ.।

वृक्षाम्लम्। क्ली। तिन्तिड्याम्। तेँतुल। See तिन्तिड़ी। अ.टी.रा.। महादा इति अ.टी.भ.। अम्लकुटा इति प.मु.। चुका इति भानुदीक्षितः। हिं विषांबिल। च.द.अ.च.चि.। च.सू.४अ.। गुणाः—अम्लं कटुकं कषायं कफाग्निघ्नं दृष्यघ्नं वातघ्नं हृद्रोगघ्नमदरामयघ्नं गुल्मातिसारव्रणघ्नञ्च। रा.नि.व.६। अम्ललोण्यां। आमरुल। वृहदग्निमुखचूर्णे। च.सू.४अ.हृद्यगणे।

वृक्षाम्लः। पुं। आम्रातकवृक्षे। आमड़ा गाछ। श्र.च.। अम्लवेतसे। अम्लवेतस। वै.निघ.।

वृक्षायुर्वेदः। पुं। वृक्षरोपणपोषणादिशास्त्रं स आग्नेयपुराणे दृश्यः।

वृक्षारुहा। स्त्री। अमृतसवालतायाम्।

वृक्षार्हा। स्त्री। महासिदायाम्। रा.नि.व.५।

वृक्षाश्रयी (यिन्)। पुं। चुद्रोलूके। कूँठुरे पेँचा। रा.नि.व.१९। [४अ.।

वृक्षेशयः। पुं। निर्विषसर्पविशेषे। सु.कल्प.

वृक्षोत्पलः। पुं। वृक्षोत्पले। ओलटकम्बल। र.मा.। See वृक्षोत्पलः।

वेकटः। पुं। मत्स्यभेदे। भेट्‌कीमाछ। मे.।

वेगः। पुं। गुदेन मलनिर्गमप्रवृत्तौ। भ.। त्वरायाम्। वृद्धौ। प्रवृत्तौ। मा.नि.। महाकालफले। मे.। शुक्रे। हे.च.। स्त्री (गा)। महाज्योतिष्मतीलतायाम्। वड़ लताफट्‌की। वै.निघ.।

वेगधारणम्। क्ली। मलादीनां वेगनिरोधे। यथा—"न वेगान् धारयेद् धीरः कामादीनान्तु धारयेत्।" राज.१प.।

वेगनाशनः। पुं। श्लेष्मणि। श्र.र.।

वेगनिरोधः। पुं। वेगविधारणे। निदानम्।

वेगविघातः। पुं। मूत्रपुरीषादिवृत्तधारणे। "जलाभिरमणैर्वेगविघातैः।" भा.अ.सा.चि.।

वेगिहरिणः। पुं। शीकारिमृगे। रा.नि.व.१९।

वेगी (गिन्)। पुं। श्येनपक्षिणि। बाजपाखी। राज.। रा.नि.व.१९।

वेजानी। स्त्री। सोमराज्याम्। See सोमराजी।

वेट्टचन्दनम्। क्ली। श्रीखण्डचन्दनान्यतरे चन्दने। श्वेत चन्दन। सं वेट्टश्रीखण्ड। कं वेट्टपत्रेगन्ध। तच्च सार्द्रविच्छिदं। मलयाद्रिसमीपस्थ-वेट्टगिरिजत्वाद्वेट्टमित्युच्यते। "मलयाद्रिसमीपस्थाः पर्व्वता वेट्टसंज्ञिताः। तज्जातं चन्दनं यत्तद्वेट्टवाच्यं क्वचिन्मतम्॥" गुणाः—अतिशीतं दाह-पित्तघ्नं ज्वर-च्छर्दि-तृषा-कुष्ठ-तैमिरीक्लासहरं तिक्तञ्च। रा.नि.व.१२।

वेड्डम्। क्ली। सार्द्रविच्छिन्नचन्दने। श्वेत चन्दन। रा.नि.व.१२।

वेढमिका। स्त्री। रोटिकाविशेषे। यथा—"माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः। रचिता रोटिका सैव प्रोक्ता वेढ़मिका बुधैः। भवेद्वेढ़मिका बल्या हृष्या रुच्याऽग्निवर्द्धना। उष्णा सन्तर्पणी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुर्व्वी बृंहणी शुक्रला परम्। भिन्नमूत्रमला स्वन्य-मेदः-पित्त कफप्रदा। गुदकीलार्शि-श्वास-यक्ष्मच्छर्दि-लानि नाशयेत्॥" भा.।

वेणिः। स्त्री। देवदाल्याम्। पीत घोषा। वा.कल्प.१अ.। [विका.।

वेणिवेधनी। स्त्री। जलौकायाम्। जोंक।

वेणी। स्त्री। पीतदेवदाल्याम्। भा.। देव-दाल्याम्। प.मु.। घोषा। घराघरी वा वेणी च देवदाली च जौसूतम्।" अरुणः। मेष्याम्। भेड़ी। हे.च.। [व.१२।

वेणीग(मूलक)म्। क्ली। उशीरे। रा.नि.

वेणीफलम्। [क्ली। देवदालीफले। पीत घोषाफल। वै.निघ.२भ.कासलानस्ये।

वेणीरः। पुं। अरिष्टे। ग.ध.।

वेणुः। पुं। वंशे। बाँश। रा.नि.व.७।

वेणुकर्क्करः। पुं। करीरवृक्षे। विका.। [२अ.।

वेणुका। स्त्री। तन्नामकफलविषभेदे। सु.कल्प.

वेणुज(न)म्। क्ली। मरिचे। र.मा.।

वेणुजः (जन्मा[न्])। पुं। वेणुयवे। बाँशेर चाउल। रा.नि.व.१६। वा.चि.१५अ.।

वेणुनिःस्रुतः। पुं। सूचौ। वै.निघ.।

वेणुनिर्लेखनम्। क्ली। वंशलचि। बाँशेर छोल। सु.चि.१अ.।

वेणुपत्रकः। पुं। मण्डलिसर्पविशेषे। सु.कल्प. ४अ। [र.मा.।

वेणुपत्रिका (त्री)। स्त्री। नाड़ीहिङ्गौ।

वेणुयवः। पुं। वंशजधान्ये। बाँशेर धान। मं वेणुजव। कं विदरकी। तें वेदुरु विरयमु। तत्पर्य्यायाः,—वेणुकं वेणुजः वेणुबीजं वंशजः वंशतण्डुलः वंशधान्यं वंशाह्वः। गुणाः—शीतः कषायः मधुरः रूक्षः सूक्ष्मश्लेष्मविषघ्नः बलपुष्टि-वीर्य्यदः पित्तघ्नश्च। रा.नि.व.१६। "रूक्षः कषा-यानुरसो मधुरः कफपित्तहा। मेदःक्रिमिविषघ्नश्च बल्यो वेणुयवो मतः॥" च.सू.२७अ.।

वेणुवीजम्। क्ली। वेणुयवे। बाँशेर चाल।

वेतः। पुं। वेतसलतायाम्। रा.नि.व.७।

वेतनम्। क्ली। रौप्ये। ग.च.।

वेतसः (सा)। पुं, स्त्री। (Calamus rotong.) Common cane. खनामख्यात-शाकलतायाम्। **वेत गाछ।** मं वेडिसु। कं वेतसु। तें जोतपुरकुलो। तत्पर्य्यायाः,—रथः अम्बुपुष्पः विदुलः शीतः वानीरः वञ्जुलः प्रियः नलकः रञ्जनः गन्धपुष्पः रथाश्वः वेतसो निचुलः दीर्घपत्रकः कलमः मञ्जरी नलः सुषेणः गन्धपुष्पकः। गुणाः—कटुः स्वादुः शीतलः भूतघ्नः पित्तकोपनः रूच्यः दीपनः रक्तपित्तघ्नः कुष्ठघ्नश्च। रा.नि.व.९। तत्फलगुणाः—"फलं वेतसस्य वातघ्नमल्पपित्तबलास-कृत्।" राज.३प.। तत्शाकगुणाः—"वातलं कटु-तिक्ताम्लमधोमार्गप्रवर्त्तकम्।" च.सू.२७अ.।

वेतसपत्रकम्। क्ली। व्यधनार्थके शस्त्रविशेषे। सु.सू.८अ.। तल्लक्षणं यथा—"तीक्ष्णमङ्गुलविस्तारं चतुरङ्गुलमायतम्। अङ्गुलानि तु चत्वारि वृन्त-कार्य्यं विजानता॥" सु.टी.ड.भोजः।

वेतसाम्लः। पुं। अम्लवेतसे। रा.नि.व.९। र.सा.सं.यूलचि.अग्निमुखरसे। "वेतसाम्लं विषं स्यात्।"

वेतसी। स्त्री। वेतसवृक्षे। ग.र.।

वेतालग्रहः। पुं। भूतग्रहविशेषे। लक्षणं—"गन्धमाल्यरतिं सत्यवादिनं परिवेषिनम्। बहु-च्छिद्रञ्च जानीयात् वेतालेन वशीकृतम्॥" वा. उ.४अ.।

वेतालरसः। पुं। कुष्ठाधिकारे रसः। पाठः —"अभ्रकं मृतलौहञ्च शुद्धसूतं शिलाजतु। ताप्यं वाकुचिबीजानि त्रिफला मुषली समम्। सर्व्वौषं चूर्णितं लेह्यं मधुना निष्कमात्रकम्। सर्पिषं नाशयेत् सिध्म वेतालोऽयं महारसः॥" अन्यः सन्निपातज्वरे—"रसं गन्धं विषञ्चैव मरिचाब्दं समांशिकम्। शिलायाम् मर्द्दयेत्तावत् यावज्जायेत कज्जलम्। गुञ्जामात्रमयोक्तव्यं हरेद्दोषसंज्ञकं। साध्यासाध्यं निरूप्यात्र सन्निपातं सुदारुणम्॥" र.सा.सं.।

वेत्रः। पुं। वेतसवृक्षे। रा.नि.व.९। वंशविशेषे। बेउड़ बाँश। मं वेत। कं वेत। गुणाः—शीतलः कषायः भूतावेश-पित्तघ्नश्च। रा.नि.व.७। च.चि.३अ.।

वेत्रकः। पुं। रामशरे। वै.निघ.।

वेत्रमूला। स्त्री। शङ्खिन्याम्। वै.निघ.।

वेत्रविषम्। क्ली। तन्नामक-पुष्पविषभेदे। वेतेर फूल। सु.कल्प.२अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेलाग्रम्। क्ली। नाड़ीशाकविशेषे। वेतेर ऊगि, वेतागा। गुणाः—"वेलाग्रं दीपनं रुच्यं तिक्तं पित्तकफापहम्।" राज.३प.।

वेदना। स्त्री। चिकित्साथाम्। रा.नि.व.२०। व्यथायाम्।

वेदनाधिष्ठानम्। क्ली। मनोदेहेन्द्रियादौ। "वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः। कैश्चरोमनखायान्तमलद्रवगुणैर्विना॥" च.शा.१अ.।

वेदयिता। त्रि। मनसः प्रवर्त्तके। सु.शा.३अ.।

वेदारः। पुं। कक्षलासे। त्रिका.।

वेदिः। स्त्री। परिष्कृतभूमौ। अम.। क्ली। अग्निष्ठायाम्। श.च.।

वेदिकः (का)। पुं, स्त्री। श्वेतधुसूरके। वै. निघ.।

वेदिनी। स्त्री। तन्नामिका पञ्चमी त्वक् या व्रीहिपञ्चभागप्रमाणा कुष्ठविसर्पाधिष्ठाना च। सु. शा.४अ.।

वेधकम्। क्ली। धान्यके। रा.नि.व.६। पुं। कर्पूरे। त्रिका.। अम्लवेतसे। रा.नि.व.६।

वेधनिका। स्त्री। छिद्रकरणार्थास्त्रभेदे। भोमन्त्र। अम.।

वेधनी। स्त्री। मेथिकायाम्। मेति। रा.नि. व.६। कर्णिकर्णवेधनास्त्रे। त्रिका.।

वेधफलः। पुं। करञ्जवृक्षे। रा.नि.व.९।

वेधमुख्यः। पुं। गन्धमुख्याम्। गन्धशठी। रा.नि.व.६। स्त्री (ख्या)। कस्तूर्य्याम्। मृगनाभि। रा.नि.व.१२।

वेधमुख्यकः। पुं। गन्धमुख्याम्। प.मु.। हरिद्रायाम्। काँचाहलूद गाछ। अम.भ.।

वेधसम्। क्ली। अङ्गुष्ठमूले। श.च.।

वेधाः(स्)। पुं। श्वेतार्कवृक्षे। श.च.।

वेधिनी। स्त्री। मेथिकायाम्। रा.नि.व.६। जूकायाम्। जोँक। श.र.।

वेधो इन्। पुं। अम्लवेतसे। रा.नि.व.६।

वेध्यः। त्रि। वेधनार्हे, शिरादौ। अल्पमुखैः शस्त्रैः व्यधनीये। सु.सू.५अ.।

वेपथुः। पुं। कम्पने। रा.नि.व.२०। "वेपथुर्विषमो वेगः"। मा.नि.।

वेपनम्। क्ली। वातव्याधौ। कम्पे। रा.नि.व.२०।

वेरम्। क्ली। कुङ्कुमे। त्रिका.। वार्त्ताके। त्रिका.। शरीरे। मे.।

वेरकम्। क्ली। कर्पूरे। हारा.।

वेलनम्। क्ली। डिङ्गी। ज.द.।

वेला। स्त्री। रोगे। समयभोजने। समये। भोजने। त्रिका.। दन्तमांसे। हारा.। तटभूमौ।

वेलाजलपानम्। क्ली। वेलायां वारिपाने। तच्चातीव स्वास्थ्यकरं। तथाहि—"उष्णं क्वापि क्वापि शीतं क्वचीष्णं क्वापि क्वापि क्वाप्यशीतञ्च पाथः इत्थं नृणां पथ्यमेतत् प्रयुक्तं कालावस्थादेहसंस्थानुरोधात्॥" तथा—"अपनयति पवनदोषं दलयति कफमाशु नाशयत्यरुचिम्। पाचयति चाग्निमनलं पुष्णाति निशीथपीतसुधाम्भः॥ रात्रौ पीतं मलीमसदोषशमनं संशन्ति सामान्यतः पीतं वारि निशावसानसमये सर्व्वामयध्वंसनं। भुक्ता तूर्द्धमितं च पुष्टिजननं प्राक्चेदपुष्टिप्रदं रुच्यं जाठरवह्निपाटवकरं पथ्यञ्च भुक्तान्तरे॥" रा.नि.व.१४।

वेलाज्वरः। पुं। ज्वरविशेषे। लक्षणं—"शीकात क्रीधात्तथानीर्णात् सन्तापाद्बलहानितः। अन्तकाले च मर्त्यानां जायन्ते दारुणाः ज्वराः॥" ज्व.नि.।

वेलिभुक्प्रियः। पुं। सुगन्धास्थे। श.र.।

वेल्ल(क)म्। क्ली। विड़ङ्गे। अम.। च.द.शिरोव्यधे। वा.सू.१५अ.सूर्ब्बिरेके। "वेल्लापामार्गव्योष।" वै.निघ.२भ.ग्रहणी.चि. तालिशादौ। वा.व्या. अजमोदाद्यवटी। रस.र. बाल.चि. अष्टमङ्गलघृते। वा.उ.३९अ.।

वेल्लगिरिका। स्त्री। प्रियङ्गौ। वै.निघ.।

वेल्लजम्। क्ली। मरिचे। भा.पू.१भ.।

वेल्लनम्। क्ली। मरिचे। प.मु.। लुण्ठने। त्रिका.। रोटीवेलनार्थं वर्त्तुलकाष्ठे। वेलून। भा.।

वेल्लनी। स्त्री। वल्लीदूर्ब्बायाम्। रा.नि.व.८।

वेल्लन्तरः। पुं। विस्खान्तरवृक्षे। हिं वरवेला। तत्पर्य्यायः—वीरतरुः। "वेल्लन्तरो जगति वीरतरुः प्रसिद्धः श्वेतासितारुणविलोहितनीलपुष्पः। स्याज्जातितुल्यकुसुमः शमिसूच्यपत्रः स्यात् कण्टकी च जलदेशज एष वृक्षः॥" तद्गुणाः—"वेल्लन्तरी रसे पाके तिक्तक्षणाकफापहः। मूत्राघाताश्मजिद्ग्राही योनिमूत्रानिलार्त्तिजित्॥" भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेल्लन्तरादिगणः। पुं। तदादिद्रव्यवर्गः। स वातरोगघ्नः अश्मरीशर्करामूत्रकृच्छ्रमूत्राघातहरश्च। वा.सू.१५अ.।

वेल्लभवम्। क्ली। सरिचे। वै.निघ.कास.चि. त्रिकटुचूर्णे।

वेल्लरी। स्त्री। कृष्णद्रुदारके। काल शैल-ताड़क। वै.निघ.२अ.वा.व्या.चि. एरण्डपाके। वल्लीदूर्व्वायाम्। वै.निघ.।

वेल्लिः। स्त्री। लतायाम्। श.र.।

वेल्लिका। स्त्री। इन्दूपोदक्याम्। पूँईविशेष। रा.नि.व.२३।

वेल्लिकाख्या। स्त्री। विल्वशलाटौ। वेलशुँटा। श.च.। [४अ.।

वेल्लितकः। पुं। वैकरञ्जाख्यसर्पविशेषे। सु.कल्प.

वेश्मनम्। क्ली। त्रिदलचूर्णे। See वेसनम्।

वेश्मन्तः। पुं। क्षुद्रसरीवरे। अम.।

वेश्मरः। पुं। अश्वतरे। त्रिका.।

वेश्यवारः। पुं। रत्नोपकरणविशेषे। बाटना, मसला। गुणाः—"वेश्यवारी गुरुः स्निग्धो बलीपचयवर्द्धनः।" राज.३प.। वेश्यवारद्रव्यगणो यथा —अजाजी-सरिचयष्ठी ग्रन्थिक-धान्य-हरिद्रा-दारु-हरिद्रापिप्पलीदाड़िमेषु। "अजाजी सरिचं गुरुष्ठी ग्रन्थि-धान्य-निशाद्वयम्। पिप्पली दाड़िमचेति वेश्यवारगणो मतः॥" रा.नि.व.२२। पक्वमांसभेदे। यथा—निरस्थिपिष्टं स्विन्नं गुड़घृतयुक्तं पिप्पली-मरिचयुक्तञ्च मांसं वेश्यवार इत्युच्यते। "निरस्थि पिण्डितं पिष्टं स्विन्नं गुड़घृतान्वितं। कृष्णामरिच-संयुक्तं वेश्यवार इति स्मृतः॥" प.प्र.३अ.। गुणाः, —"वेश्यवारी गुरुः स्निग्धो बल्यो वातरुजापहः। प्रीणनः सर्व्वधातूनां विशेषान्मुखशोषिणाम्॥"

वेश्यवारीकृतः। त्रि। पिष्टे। वा.चि.५अ.।

वेश्योजाता। स्त्री। पुनर्नवालतायाम्।

वेश्मकलिङ्गः। पुं। चटकपक्षिणि। तन्मांसं सन्निपातहरम् अतिशुक्रलञ्च। राज.।

वेश्मकूलः। पुं। चचेण्डायाम्। चिचिङ्गा। मद.। रा.नि.व.७। [चिका।

वेश्मनकुलः। पुं। क्षुद्रुन्दर्य्याम्। छुँचो।

वेश्मरसः। पुं। मीचरसे। वै.निघ.।

वेश्या। स्त्री। पाठायाम्। आकनादि। श.च.।

वेश्याचार्य्यः। पुं। पीठमर्द्दवृक्षे। पीटुलि-गाछ।

वेषणः। पुं। कासमर्द्दवृक्षे। कासा।

वेषणा। स्त्री। वितुन्नकवृक्षे। धने'। र.मा.।

वेषवारः। पुं। वेश्यवारे। बाटना। अ.टी.रा.।

वेषिका। स्त्री। जातीपुष्पवृक्षे। वै.निघ.।

वेष्टः। पुं। औवेष्टनामकसुगन्धकाष्ठे। सरल-काष्ठे। रा.नि.व.१२। निर्य्यासे। आटा। श.मा.।

वेष्टकम्। क्ली। निर्य्यासे। आटा। श.मा.। उशीरे। श.र.। पुं। औवेष्टनामकसुगन्धकाष्ठे। रा.नि.व.१२। कुशाख्ये। खरा। सरलकाष्ठे। वल्कले। र.मा.।

वेष्टनम्। क्ली। गुग्गुलौ। श.च.। उशीरे। कर्णशष्कुल्याम्। मे.। स्त्री (नी)। खपरपोलिका-याम्। वै.निघ.। [वेऊड़ बाँश। श.च.।

वेष्टवंशः। पुं। कण्टककिणेल्यपरनामवंशभेदे।

वेष्टसारः। पुं। औवेष्टनामकसुगन्धकाष्ठ-निर्य्यासे। सरलकाष्ठेऽपि आटा। रा.नि.व.१२।

वेष्टा। स्त्री। हरीतक्याम्। वै.निघ.।

वेष्यः। पुं। पानीये।

वेसनम्। क्ली। त्रिदलचूर्णे। वेसन। यथा —"दालयश्चणकानान्तु निस्तुषा यत्नपेषिताः। तच्चूर्णं वेसनं प्रोक्तम्.....॥" तद्वटिका रुच्या विष्टम्भिनी बलपुष्टिकरी च। भा.।

वेसनमोदकः। पुं। वेसनकृत-लड्डुकभेदे। मदरवेश मेठाई। हिं बुन्दिका लाड्डु। तद्-गुणाः—"ते बल्या लघवः शीताः किञ्चिद्वातकरा-स्तथा। विष्टम्भिनो ज्वरघ्नाश्च पित्त-रक्त-कफा-पहाः॥" भा.।

वेसवारः। पुं। वेश्यवारे। बाटना। अम.।

वैकङ्कतः। पुं। शुवाह्वे। वँइचि गाछ। श.र.। क्ली। वैकङ्कतफले। वँइचि फल।

वैकर्तिकः। पुं। मणिकारे। हि.च.।

वैकरञ्जः। पुं। दर्व्वीकरादीनां सर्पाणां व्यति-करेण जाते सर्पजातिविशेषे। स माकुलिः पोट गलः स्निग्धराजिश्चेति त्रिविधः। सु.कल्प.४अ.।

वैकुण्ठः। पुं। अर्ज्जके। क्षुद्र तुलसी। "वैकुण्ठ-मर्ज्जके प्राहुः।" रा.नि.व.२३। सितार्ज्जके।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वेतपत्र-क्षुद्रतुलसी। रा.नि.व.१०। See अर्ज्जकः।

वैकुण्ठाश्रमी (न्) । पुं। वैद्यवल्लभनामग्रन्थकारे। [नि.।

वैक्लवः। त्रि। विक्लवसम्पन्ने। दुःसाध्ये। मा.

वैक्लवज्वरः। पुं। अप्रकृतकालजाते वातज्वरे। "प्रायेणानिलजो दुःखः कालेष्वन्येषु वैक्लवः। हेतवो विविधास्तस्य निदाने सम्प्रदर्शिताः॥" च.चि.२अ.। वर्षादिषु वातादयः क्रमाद् यो ज्वरः स प्राकृतः, वर्षासु वातिकः, शरदि पैत्तिकः, वसन्ते च श्लैष्मिकः, अतोऽन्यो वैक्लवः तथा वर्षासु पैत्तिक इत्यादि। मा.नि.।

वैक्रान्तम्। क्ली। खनामख्यात-मणिविशेषे। पोखराज। तत्पर्य्यायाः,—विक्रान्तं नीचवज्रं कुवज्रकं गोनासः क्षुद्रकुलिशं जीर्णवज्रं गोनसः। तच्च श्वेतनीलरक्तभेदेन त्रिधा। तन्निरुक्तिः—"वज्राकारतयैव प्रसह्य हरणाय सर्व्वरोगाणाम्। यद्विक्रान्ति धत्ते तद्वैक्रान्तं बुधैरिदं कथितम्।" तेषां साधारणगुणाः—रसवीर्य्यविपाकेषु वज्रसमं त्रयकृष्टविषघ्न पुष्टिकरं रसायनञ्च। अपिच—"वैक्रान्तं वज्रसदृशं वज्रवद्रसवीर्य्यकम्। तथाप्यभावे वज्रस्य ग्राह्यं वैक्रान्तमुत्तमम्॥" रा.नि.व.१३। तच्छोधनमपि हीरकवत्। See हीरकम्। वैक्रान्तं वज्रवत् ग्रीष्मं नीलं श्वेतञ्च लोहितम्। वज्रलवणसंयुक्त दाहघातासहिष्णु तत्। त्रयमूचेण तत् सिक्त्वा तप्त तप्त विसप्तधा। पञ्चाङ्गोत्तरवारुण्या लिप्तं मूषागतं पुटैः। कुञ्जराख्यैर्मृतिं याति वैक्रान्तं सप्तभिस्तथा। भस्मीभूतन्तु वैक्रान्तं वज्रस्थाने नियोजयेत्॥" अवि.७अ.।

वैगन्धिकः। पुं। गन्धके। वा.उ.३६अ.।

वैजननः। पुं। प्रसवमासे। अम.।

वैजपाणिः। पुं। ऋषिविशेषे। च.।

वैजयन्तिका। स्त्री। जयन्तीवृक्षे। जन्तिगाछ। अम.। अग्निमन्थवृक्षे। गणिरि। रा.नि.व.९।

वैजयन्ती। स्त्री। जयन्तीवृक्षे। र.मा.। सु.चि.११अ.। अग्निमन्थवृक्षे। गणिरि। हे.च.। सु.चि.१९अ.। वा.उ.३अ.।

वैजिकम्। क्ली। शिग्रुतैले। शजिनार तैल। मे.। पुं। सद्योजाताङ्कुरे। मे.। आत्मनि। श.मा.।

वैड़ालशकृत्। क्ली। विड़ालविष्ठायाम्। "वैड़ालं वा शकृद्ग्राह्यं वपमानस्य धूपने।" द.च्च.चि.धूपे।

वैणवम्। क्ली। वेणुयवे। वंशधान्य। अम.। पुं। उपनयने वेणुदण्डे। अम। स्त्री (वी) वंशलोचनायाम्। रा.नि.व.६। [अम.।

वैतंसिकः। पुं। मांसविक्रेतरि। कसाई।

वैतरणबस्तिः। पुं। निरूहबस्तिभेदे। यथा—"पलशुक्तिकर्कषकुड़वैरम्लीकासगुड़सिन्धुगोमूत्रैः। ईषत्तैलयुतो बस्तिः शूलानाहासवातहृत्। वैतरणः चारबस्तिः शुक्ते चापि प्रदीयते॥" च.द.निरूहबस्तौ। गोमूत्रं ८ प. पक्वतैलं १ प. मदनफलस्थैकं व्यवहारात्। एकपुटकस्थैयं मात्रा।

वैतसः। पुं। अम्लवेतसे। शटा.।

वैदर्भः। पुं। दन्तमूलगतसुखरोगे। "दुष्टेषु दन्तमूलेषु संरम्भो जायते महान्। भवन्ति च चलादन्तः स वैदर्भोऽभिघातजः॥" सु.नि.१६अ.।

वैदलः। पुं। दालिनिर्म्मितपिष्टकभेदे। दालपूरि। भ.च.। गुणाः—गुरुः भक्ष्यः विष्टम्भी दुष्टमारुतश्च। राज.।

वैदलवर्गः। पुं। द्विदलान्नसमूहे। तद्यथा—मुद्ग-वनमुद्ग-कुलाय-मकुष्टक-मसूर-माङ्गल्य-चणक-सतीनत्रिपुटहरेणुकाढ़कीप्रभृतयो वैदलाः। तत्साधारणगुणाः—"कषाया मधुरा शीताः कटुपाका मरुत्कराः। बद्धमूत्र-पुरीषाश्च पित्त-श्लेष्महरास्तथा॥ ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारिणः॥" **वैदलान्नम्**। क्ली। वैदलयुक्तभक्ते। खेलिया। तद्गुणाः—"वैदलान्नं रुचिकरं गुरु द्रव्यगुणैः समम्।" वै.निघ.।

वैदलिकशिग्रुः। पुं। वैदलिकशिग्वाम्। गुणाः—"रुचिप्रदाश्चैव सुदुर्जराश्च सर्व्वे स्मृता वैदलिकास्तु शिग्वाः।"

वैदारिकः। पुं। हीन-मध्य-प्रवृद्ध-वातादिजनितसन्निपातज्वरे। लक्षणं—"अल्पमूलं कटीतोदो मध्यदाहो रुजा भ्रमः। भृशं क्लमः शिरोवक्त्र-मन्या-हृदय-वाग्रुजः॥" प्रमीलकः श्वासहिक्का-कास-जाड्यं विसंज्ञता। प्रथमोत्पन्नमेतत्तु साधयन्ति कदाचन॥ एतस्मिन् सन्निवृत्ते तु कर्णमूले सुदारुणाः। पिड़का जायते जन्तोर्यया क्लृप्तेन जीवति॥ भा.म.१भ.। [निघ.।

वैदिका। स्त्री। भूमिजम्बूवृक्षे। वनजाम। वै.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैशि...म्। क्ली। वेतसमूले। सु.धि.१अ.।

वैशू...द्र(रत्न)म्। क्ली। विदूरभूमिजमणौ। **वैदू...**बालविशेष। तत्पर्य्यायाः,—बालवायज बालवालसूर्य्यक कैतुरत्न कैतव प्राह्यं अक्षरोह खराव्हाङ्कुर विदुरज विदुरव। रा.नि.व.१३। गुणाः—उष्णमम्ल कफ वातघ्न गुल्मघ्नं शुभावह केतु ग्रहवल्लभश्च। भा.। See माणिक्यम्।

वैदूर्य्यवर्णः। त्रि। कृष्णवर्णे। भा.।

वैदेहिका (ही)। स्त्र। पिप्पल्याम्। भा.पू. १भ.। रा.नि.व.६। भैष.ने.रो.चि.। "वैदेहीं श्वेतमरिचम्।" रोचनायाम्। मे.। भूनिम्बवृक्षे। वै.निघ.।

वैद्यः। पुं। अम्बष्ठाख्यब्राह्मणजातौ। चिकित्सावृत्तित्वात् तेषां वैद्यसंज्ञा। "रोगहार्य्यगदङ्कारी-ष्विषग्वैद्यौ चिकित्सके" अम.। तल्लक्षणं यथा,—"आयुर्व्वेदकृताभ्यासो धर्म्मशास्त्रपरायणः। अध्यायी-ऽध्यापनञ्चैव चिकित्सा वैद्यलक्षणम्॥" "वैदा-ज्जातौ हि वैद्यः स्यादम्बष्ठीब्रह्मपुत्रकः।" शब्दः। तदुत्पत्तिर्यथा,—"सत्यत्रेताद्वापरेषु युगेषु ब्राह्मणाः किल। ब्रह्म-क्षत्रिय-विट्-शूद्रकन्यका उपयेमिरे॥ तत्र वैश्यसुतायां ये जज्ञिरे तनया अमी। सर्व्वे ते मुनयः ख्याता वेदवेदाङ्गपारगाः॥ तेषां मुख्योऽ-मृताचार्य्यस्त्र्यौ अम्बाकुले हि तत्। अम्बष्ठ इत्यसावुक्तस्ततो जातिप्रवर्त्तनात्॥ परे सर्व्वेऽपि अम्बष्ठा वैश्याब्राह्मणसम्भवाः। जननीतो जनुलम्भा यज्जाता वेदसंस्कृतैः। अम्बष्ठास्तेन ते सर्व्वे द्विजा वैद्याः प्रकीर्त्तिताः॥" चन्द्रप्रभा। "वैश्यायाम् विधिना विप्राज्जातोऽम्बष्ठ उच्यते।" उशनाः। "विप्रात् मूर्द्धावसिक्तो हि क्षत्रियायां, विशः स्त्रियां। अम्बष्ठः, शूद्रां निषादो जातः पारशवोऽपि वा॥ वैश्यायाशूद्रायान्तु राजन्यात् माहिष्यायौ सुतौ स्मृतौ। वैश्यात् तु करणः शूद्रां वित्रास्वेष विधिः स्मृतः॥ याज्ञवल्क्यः.१अ.९२। "आनुलोम्येन वर्णानां यज्जन्म स विधिः स्मृतः। प्रातिलोम्येन यज्जन्म स ज्ञेयो वर्णसङ्करः॥" नारदः। अथ तेषां ब्राह्मणत्वं यथा—"सजातिजानन्तरजाः षट् सुताः द्विज-धर्म्मिणः। शूद्राणान्तु सधर्म्माणः सर्व्वेऽप-ध्वंसजाः स्मृताः॥" मनु.१०अ.४१श्लो.। "यथा चयाणां वर्णानां त्रयोरात्मास्य जायते। आन-न्तर्य्यात् क्षत्रियान्तु तथा वाह्येष्वपि क्रमात्॥" र.मनु.१०अ.२८। ऊढायां हि सवर्णायामन्यां वा कामसूदहेत्। तस्यासूत्पादितः पुत्रो न सवर्णात् प्रहीयते॥" व्यासः २अ.९.। "तिस्रो भार्य्या ब्राह्मणस्य द्वे भार्य्ये क्षत्रियस्य च। वैश्यः सुजात्यां विन्देत तास्वपत्यं समं भवेत्॥ अथवा ब्राह्मण्यात् ब्राह्मणाज्जातो ब्राह्मणः व्याङ्गसञ्ज्ञः। क्षत्रियायां तथैव स्यात् वैश्यायामपि चैव हि॥" सम्हा.अनु.४७अ.२८। "माता भस्त्रा पितुः पुत्रो येन जात स एव हि॥" विष्णुपु.१अ.२श्लो.४ अंशः। "अब्राह्मणन्तु मन्यन्ते शूद्रापुत्रमनैपुणात्। क्षिप्रं वर्णेषु जातो हि ब्राह्मणाद् ब्राह्मणो भवेत्॥" मेदिनी.१७—४७। अध्यापनाधिकारित्वादपि तेषां ब्राह्मणत्वं। यदुक्तं मनुना—"अधीयीरन् त्रयो वर्णाः स्वकर्म्मस्था द्विजातयः। प्रब्रूयाद् ब्राह्मणस्त्वेषां नेतरौ इति निश्चयः॥" मनुसं. १०अ. १। तेषां गोत्रादिर्यथा—"यस्य यस्य कुले योंयः सन्तानः स स एव हि। तत्तद्गोत्रादिना वेद्यः प्रशस्यान्तु स्वकर्म्मणा॥" चन्द्रप्रभा। "कश्यपो भरद्वाजो धरगर्म्मा पराशरः। मौद्-गल्यो दाशगर्म्मा च गुप्तशर्म्मा च काश्यपः॥ धन्वन्तरिः सेनशर्म्मा दत्तशर्म्मा पराशरः। शाण्डि-ल्यश्च चन्द्रशर्म्मा अम्बष्ठ-ब्राह्मणा इमे॥" उत्कल-कारिका। अद्याप्येवमुपाधिपरिचिता ब्राह्मणा उत्कल-मगध-नर्थरिटोया-गया-पञ्जाब-गोयालियर-काश्यादिप्रदेशेषु निवसन्ति बहवः। परन्तु बङ्गे केवलमेतेषां ब्राह्मणेतरजातिमर्य्यादा ग्रन्थवर्ज्जितो-पाधिपद्धतिश्च दृश्यते, नत्वन्यत्र। चिकित्सकः। "विप्रो वैद्यकपारगः शुचिरनूचानः कुलीनः क्षतो घोरः कालकलाविदास्तिकमतिर्दक्षः सुधीर्धार्म्मिकः। खाचारः समदृग्दयालुरखलो यः सिद्धमन्त्रक्षमः शान्तः कामलखोलुपः कृतयशा वैद्यः स विद्योतते॥" इति सद्वैद्यलक्षणम्। "अधीरः कर्कशस्त्रस्त्रः सरोगो न्यूनशिक्षितः। पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि॥" इति कुवैद्यलक्षणम। रा.नि.व.२०। अपिच—"व्याधेस्तत्त्वपरिज्ञानं वेदनायास्तु निग्रहः। एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः॥" इति वैद्यकर्म्म। भैष.। वैद्याः त्रिधा—कल्पचराः सिद्धसाधिताः गुणयुक्ताश्चेति। लक्षणानि यथा—"वैद्यभाण्डौषधेः पुत्रैः पत्रवैरव-लोकनैः। लभन्ते ये भिषक्शब्दमज्ञास्ते प्रति-रूपकाः। औषधज्ञानसिद्धानां व्यपदेशादतद्विधाः। वैद्यशब्दं लभन्ते ये ज्ञेयास्ते सिद्धसाधिताः॥ प्रयोगज्ञानविज्ञानसिद्धिसिद्धाः सुखप्रदाः। जीविता-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिषरा ये स्युर्वैद्यत्वं तेष्ववस्थितम्॥" च.सू.११ अ.। वासावृक्षे। श.च.।

वैद्यकम्। क्ली। वैद्यस्य कर्म्मणि। अष्टाङ्गचिकित्साशास्त्रे, दशाङ्गवैद्यशास्त्रे च। यथा—शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यागदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रञ्च। सु.। द्रव्याभिधानं रुग्विनिश्चयः कायसौष्ठवसम्पादनं शस्त्रविद्यापच्चाचरौप्रभावेण भूतनिग्रहः विषप्रतीकारः बालोपचारः रसायनं शालाक्यं वृष्यञ्चेति। वै.निघ.।

वैद्यचिन्तामणिः। पुं। वल्लभेन्द्रकृतवैद्यकग्रन्थे। [ग्रन्थे। रुद्रटकृते च।

वैद्यजीवनम्। पुं। लोलिम्बराजकृतवैद्यक-

वैद्यतोषसंग्रहः। पुं। भीमसेनकृतचिकित्सासंग्रहे। [टीकायाम्।

वैद्यत्रिंशष्टीका। स्त्री। चन्द्रटकृतत्रिंशच्छ्लोकी-

वैद्यदर्पणम्। क्ली। वैद्यकसंग्रहे।

वैद्यनाथवटी। स्त्री। ज्वरातिसारे औषधम्। पाठः—"रसस्य शाणं संगृह्य काञ्जिकेन तु शोधयेत्। चित्रकस्य रसे चापि त्रिफलायाश्च बुद्धिमान्। रसार्द्धं गन्धकं शुद्धं सूक्ष्मराजरसेन वै। द्वाभ्यां संमूर्च्छनं कृत्वा खरसैः शाणसम्मितैः। खल्वयेच्च शिलाखल्वे क्रमशो वक्ष्यमाणजैः। निर्गुण्डीमस्तुकोश्वेताकुचेलाग्नीषसुन्दरैः। भृङ्गाह्वकेशराजैश्च जयन्तीन्द्राशनोत्कटैः। सर्षपाभां वटीं कृत्वा दद्यात्तां गृह्णीगदे.....॥" रस.र.।

वैद्यबन्धुः। पुं। आरग्वधवृक्षे। सोन्दाल गाछ। श.च.।

वैद्यमनोरमा। स्त्री। वैद्यकग्रन्थभेदे।

वैद्यमाता। स्त्री। वासायाम्। बासक गाछ। अम.।

वैद्यरसायनम्। क्ली। रसायनग्रन्थविशेषे।

वैद्यवल्लभः। पुं। उदयरुचिकृतवैद्यकग्रन्थे।

वैद्यविनोदः। पुं। शङ्करकृतवैद्यकग्रन्थे।

वैद्यविलासः। पुं। रघुनाथकृतवैद्यकशास्त्रे।

वैद्यवृन्दः। पुं। नारायणकृतवैद्यशास्त्रे।

वैद्यसारः। पुं। हर्षकीर्त्तिरचितवैद्यके।

वैद्यसिंही। स्त्री। वासायाम्। बासक गाछ। श.र.।

वैद्यहितोपदेशः। पुं। श्रीकण्ठकृते तथा शिवपण्डितकृते च चिकित्साशास्त्रे।

वैद्या। स्त्री। काकोल्याम्। काँकला। श.च.।

वैद्यामृतम्। क्ली। नारायणदासकृते रामेश्वरकृते च वैद्यशास्त्रे। [ग्रन्थे।

वैद्यामृतलहरी। स्त्री। मथुरानाथकृते वैद्यक-

वैद्यावतंसः। पुं। लोलिम्बराजकृतवैद्यके।

वैधात्री। स्त्री। ब्रह्मीवृक्षे। रा.नि.व.५।

वैपरीत्यलज्जालुः। पुं, स्त्री। लघुलज्जालुकायाम्। "लज्जालुर्वैपरीत्याख्या स्वल्पचुपत्रहृल्लता।" गुणाः—कटुरुष्णः कफघ्नः रसनियामकः नानाविज्ञानकारकश्च। रा.नि.व.५।

वैपादिकम्। कुष्ठरोगभेदे। तल्लक्षणं—"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम्॥ मा.नि.।

वैरस्यम्। क्ली। सुखविरसतायाम्। "वैरस्यं नयनप्लवः।" मा.नि.।

वैराटः। पुं। इन्द्रगोपकीटे। हे.च.।

वैराटकः। पुं। तन्नामककन्दविषभेदे। गुणाः—"वैराटकेनातिदुःखं शिरोरोगश्च जायते।" सु.कल्प.२अ.। See कन्दविषम्।

वैरातङ्गः। पुं। अर्জ্জুনवृक्षे। रा.नि.व.९।

वैरोचनरसः। पुं। अजीर्णादौ रसः। पाठः—"सूतसूतं चतुर्भागं भागैकं सूतहेमकं। अष्टभागं शुद्धगन्धं दिनैकं चित्रकद्रवैः। भावितं शोधितं चूर्णं वराटीखेन पूरयेत्। टङ्कणेन मुखं रुद्धा भाण्डमध्ये निरोधयेत्। शुष्कं गजपुटे पच्यात् साङ्गशीतं विचूर्णयेत्। चतुर्गुञ्जा कणा चोद्यं खोहसग्निप्रदीपनम्.....॥" रस.र.।

वैल्वम्। क्ली। विल्वफले। अ.टी.। चि। विल्वभवे। विल्वीये। वा.चि.३अ.

वैवर्ण्यम्। क्ली। विवर्णतायाम्। मा.नि.।

वैवस्वतद्रुमः। पुं। कुष्ठवैरिवृक्षे। चालमूगरा। अवि.।

वैशाखः। पुं। मन्यनदण्डे। वर्षस्य प्रथमे मासि। अम.। रक्त-पुनर्नवायाम्। वै.निघ.। अश्वस्य तन्नामकग्रहे। लक्षणं—"लक्ष्येन गुरुणा चैव वेपमानेन पण्डितः। गात्रेण विद्याद्वाहन्तु वैशाखग्रहसेवितम्॥" ज.द.५७अ.। स्त्री (खी)। रक्तपुनर्नवायाम्। गादापूर्णा। रा.नि.व.५।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैश्रिको । स्त्री । वमन-विरेचनयोः चतुर्विंशतीषधानान्तमे । च.द.वमनाधिकारे । [नि.व.६ ।

वैश्रिजाता । स्त्री । पुनर्नवायाम् । रा.

वैश्या । स्त्री । हरिद्रायाम् । वै.निघ. ।

वैश्रवणालयः । पुं । वटवृक्षे । हे.च. ।

वैश्रवणावासः । पुं । वटवृक्षे । जटा. ।

वैश्रवणोदयः । पुं । वटवृक्षे । र.मा. ।

वैश्वानरः । पुं । चित्रकवृक्षे । अम. । पित्ते । अग्नौ । अम. ।

वैश्वानरचूर्णम् । क्ली । जरूत्सम्भवं चूर्णम् । पाठः—"माणिमन्थस्य भागौ द्वौ यमान्यास्तदर्द्धतु । भागास्त्रयोऽजमोदाया नागराद्भागपञ्चकं । दश द्वौ च हरीतक्याः शुण्ठीचूर्णीकृताः शुभाः । अनु. मस्तु कास्त्रिकं तक्रसुक्तोदकं वा...।" रस.र. ।

वैश्वानररसः । पुं । उदराधिकारे रसः । पाठः—"रसकं गन्धकं चाभ्रं शिलाजित्कान्तलौहकं । विकटुत्रिवकं कुष्ठं निर्गुण्डी सुषली विषम् । अजमोदा च सर्व्वेषां द्वौ द्वौ भागौ प्रकल्पयेत् । चूर्णीकृत्य ततः सर्व्वं निम्बक्वाथेन भावयेत् । भावयेदेकविंशच्च भृङ्गराजेन सप्तधा । मधुना गुडिकां शुष्कां रजन्यां तां प्रदापयेत् । वैश्वानराभिधो योगो जलोदरविशोषणः ।" रस.चि. ।

वैष्किरः । त्रि । विकीर्य्य भक्षणशीले, कुक्कुटादौ । वा.चि.६अ. ।

वैष्णवी । स्त्री । लघुशतावर्य्याम् । रा.नि.व.४ । तुलसीवृक्षे । भ.मा. । अपराजितायाम् ।

वैसारिणः । पुं । मत्स्ये । अम. ।

वोड़ः । पुं । गुवाकवृक्षे । भ.र. ।

वोड्रः । पुं । गोनससर्पे । वोड़ासाप । मत्स्यविशेषे । मे. ।

वोढ़ः । पुं । कदम्बवृक्षे । वै.निघ. ।

वोढ़ा (ऋ) । पुं । ऋषभके । वृषे । रा.नि.व.५ । स्त्री । क्षुद्राग्निकायाम् ।

वोण्टः । पुं । वृन्ते । वौंटा । भ.र. ।

वोदः । त्रि । आर्द्रे ।

दालः । पुं । मत्स्यविशेषे । वोआलमाछ । र । [प्रणेतरि ।

देवः । पुं । हृदयदीपकसिद्धमन्त्रभतन्त्रीकोरटः । पुं । कुन्दवृक्षे । कुन्द गाछ । विका. ।

वोरवः । पुं । तन्नामकव्रीहिधान्यभेदे । वोरो धान । गुणाः—"वोरवस्तु वृषः प्रोक्तः चिदोषस्य प्रकोपनः । मधुरश्चाल्पपाकेन व्रीहिः पित्तकरो गुरुः ।" राज.३प. ।

वोलम् । क्ली । (Balsamodendron Myrrh.) Myrrh. तन्नामकसारजद्रव्ये । गन्धरसे । गन्धद्रव्य, वोल, हिङ्गावोल, थुनथाराधी । हिं हा. बोल । मं कं वोल । तें वालिम्वोपोलम् । ता. वेल्लइप्पोलम् । वम्. रक्तावोल । तत्पर्य्यायाः,—रक्तापहं सुखं सुरसं पिण्डं पिण्डकं विषं निर्ल्लोहं वर्व्वरं सौरभं रक्तगन्धकं रसं रसगन्धं महागन्धं विश्वं शुभगन्धकं विश्वगन्धं गन्धरसं प्राणः व्रणारिः । वै.निघ.२भ.र.पि.चि.बोलपर्पटीरसे । च.द.कुष्ठ चि. । गुणाः—कटुतिक्तोष्णं कषायं रक्तदोषघ्नं कफपित्तरोगघ्नं प्रदरघ्नञ्च । रा.नि.व.६ । अपिच—"बोलं रक्तहरं शीतं मेध्यं दीपन-पाचनम् । मधुरं कटुतिक्तञ्च दाह-स्वेद-विदोषजित् । ज्वरापस्मार-कुष्ठघ्नं गर्भाशयविशुद्धिकृत् ॥" भा. ।

वोलपत्रम् । क्ली । तेजपत्रसदृश सुगन्धिपत्रे । च.द.वा.व्या.चि.महाराजप्रसारिणीतैले । "दिवपुष्पो वोलपत्रम् ।"

व्यक्तगन्धा । स्त्री । नीलापराजितायाम् । रा.नि.व.३ । स्वर्णयूथिकायाम् । रा.नि.व.१० । पिप्पल्याम् । वै.निघ. ।

व्यङ्गः । पुं, क्ली । तन्नामकगण्डरोगभेदे । तस्य लक्षणम्—"क्रोधायास-प्रकुपितो वायुः पित्तेन संयुतः । मुखमामल्य सहसा मण्डलं विसृजत्यतः । नीरुजं तनुकं श्यावं मुखव्यङ्गं तमादिशेत् ॥" मा.नि. । "परुषं परुषस्पर्शं व्यङ्गं श्यावञ्च मारुतात् । पित्तात्तामान्तमानीलं श्वेतान्तं कण्डुमत्कफात् । रक्ताद्रक्तान्तमाताम्रं शोणचिमचिमान्वितम् ॥" वा. उ.३१अ. ।

व्यजनम् । क्ली । तालवृन्ते । पाखा । तदायुगुणाः—"मूर्च्छा-स्वेद-तृषा-दाह-श्रमघ्नो व्यजनानिलः ।" तालव्यजनगुणाः—विदोषघ्नम् लघु च । वंशव्यजनगुणाः—रुचं उष्णं वात-पित्तकरञ्च । मयूरपुच्छ-वस्त्रव्यजनगुणाः—विदोषघ्नम् । बालव्यजनं तेजस्करं मक्षिकादिनिवारणञ्च । राज.३प. ।

व्यञ्जनम् । क्ली । सूपशाकादिमिष्टान्नेषु । व्यञ्जन, तरकारि । "व्यञ्जन सूप-शाकादि मिष्टान्नं तेमनं स्मृतम् ।" रा.नि.व.२०। शाकमस्यगुणाः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—"व्यञ्जनं शाकमत्स्याद्यं हृद्यं वृष्यञ्च पुष्टिदं। द्रव्येण येन येनेह व्यञ्जनं मत्स्यमांसयोः। तस्य तस्य तथैवैषां दोषैर्विभावयेत्॥" राज.३प.। श्मश्रुणि। दाढ़ि। वै.निघ.। लक्षणे। चिह्ने। व्यक्तीभूतपूर्वरूपे। "संस्थानं व्यञ्जनं लिङ्गम्।" मा.पञ्चनिदाने।

व्यञ्जनकेशी। स्त्री। नीलयाम्। रा.नि.व.४।

वाड़म्बकः (नः)। पुं। एरण्डवृक्षे। अम.। सं.कनकतैले।

वाड़ा। स्त्री। भूम्यामलक्याम्। भूँई आमला। वै.निघ.।

वातिक्रमः। पुं। क्रमविपर्य्यये।

वात्यासः। पुं। परस्परक्षेपणे। वा.चि.६अ.। "व्यत्यासेन शक्रद्रक्तम्।"

वाथा। स्त्री। वेदनायाम्। अम.।

वान्तरः। पुं। सर्पसङ्करजातौ। वा.उ.३६अ.।

वायवसायः। पुं। निश्चयबुद्धौ। यथा—वातिक एवायं व्याधिरिदमेवास्य भेषजमिति। च.वि.८अ.।

वायवहारिकः (का)। पुं, स्त्री। इङ्गुदीवृक्षे। सम्मार्जन्याम्। मे.।

वायवायः। पुं। स्त्रीसेवायाम्। अम.। क्लीं। तैलसि। मे.।

व्यवायशीषः। पुं। स्त्रीसेवाजन्यशीषरोगे। लक्षणं यथा—"व्यवायशीषः शुक्रस्य चयलिङ्गैरुपद्रुतः। पाण्डुदेही यथा पूर्वं क्षीयन्ते चास्य धातवः॥" सु.उ.४१अ.।

व्यवायी (यिन्)। त्रि। पाकात् प्राक् सर्व्वाङ्गविसृतिशीले विषादि-द्रव्ये। "पूर्वं वाप्याखिलं कायं ततः पाकच्च गच्छति। व्यवायि तदयथा भङ्गा फेनश्चाहिसमुद्भवम्॥" भा.।

व्याख्यानम्। क्लीं। अतिशयोपवर्णने। सु.उ.६५अ.। गूढ़ार्थस्फुटीकरणे।

व्याघ्रः। पुं। खनामख्यात-प्रसिद्धजातीयमृगे। बाघ। मांसगुणाः सिंहवत्। रा.नि.व.१९। करञ्जवृक्षे। मे.। रक्तैरण्डे। रा.नि.व.८।

व्याघ्रकरः। पुं। रक्तैरण्डे। वै.निघ.।

व्याघ्रखड्गः। पुं। व्याघ्रनखे। नखौविशेष। वै.निघ.।

व्याघ्रघण्टा (ण्टी)। स्त्री। कोङ्कणे प्रसिद्धलताविशेषे। वम.लघु वाघाण्टी। मं गोविन्दी। गुणाः—"व्याघ्रघण्टा पित्तलीणा रुच्या विषकफापहा। फलं चास्यास्तु तिक्तीणं त्रिसूचीकफवातनुत्। विदीषहारिणी प्रोक्ता वैद्यशास्त्रविशारदैः।" वै.निघ.।

व्याघ्रतरुः। पुं। रक्तैरण्डे। वै.निघ.।

व्याघ्रतलः (ला)। पुं। व्याघ्रनखे। नखौ। वै.निघ.। रक्तैरण्डे। ज.द.।

व्याघ्रदलः (ला)। पुं। रक्तैरण्डे। व्याघ्रनखे। नखौ। रा.नि.व.८।

व्याघ्रनखम्। क्लीं, पुं। नखीनामगन्धद्रव्ये। नखौविशेष। मं उत्. बाघनखा। तत्पर्य्यायाः, —व्याड़ायुधं करजं चक्रकारकं कूटस्थं नखाङ्गं नखी नख्यं व्याघ्रनखौ। तद्गुणाः—तिक्तीणाः कषायः वात-कफघ्नः कण्डू-कुष्ठ व्रणघ्नः वर्ण्यः सुगन्धश्च। रा.नि.व.१२। अपिच—नखं खल्यं नखी प्रोक्ता हनुहृद्दविलासिनी। नखहृद्यं गुरुश्लेष्मवातासञ्ज्वरकुष्ठहृत्। लघुणं शुक्लं वर्ण्यं स्वादु व्रणविषापहम्॥ अलक्ष्मी-सुखदौर्गन्ध्यहृत् पाकरसयोः कटु॥" भा.। सु.सू.३८अ.एलादिः। ससुद्रजः—वा.सू.१५अ.एलादिः। "शुक्ति-व्याघ्रनखः।" स्तुहीवृक्षे। मनसा गोछ। रा.नि.व.८।

व्याघ्रनखी। स्त्री। व्याघ्रनखे। भा.४म.प्रद.चि.। "शुक्तिस्थाने व्याघ्रनख्याः।"

व्याघ्रनायकः (सेवकः)। पुं। शालावृके। फेउ, शृगाल। रा.नि.व.१९।

व्याघ्रपात् (दः)। पुं। विकङ्कतवृक्षे। वैंइची गाछ। भा.। रा.नि.व.९। भेष.शिरोरो.चि. तप्तराजतैले। विकङ्कतवृक्षे। रा.नि.व.११।

व्याघ्रपुच्छः। पुं। एरण्डवृक्षे। अम.।

व्याघ्रपुष्पः। पुं। व्याघ्रनखे। वै.निघ.।

व्याघ्ररूपा। स्त्री। बन्ध्याकर्कट्याम्। वै.निघ.।

व्याघ्रहस्तः। पुं। रक्तैरण्डे। रा.नि.व.८।

व्याघ्राङ्घ्रिजः। पुं। व्याघ्रनखे। नखौविशेष। वै.निघ.।

व्याघ्राटः। पुं। भरद्वाजपक्षिणि। अम.।

व्याघ्रादनी। स्त्री। चिह्नतायाम्। प.मु.।

व्याघ्रायुधम्। क्लीं। व्याघ्रनखे। नखौविशेष। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याघ्रास्यः। पुं। विड़ाले। श.च.।

व्याघ्री। स्त्री। कण्टकार्य्याम्। प.मु.। रा. नि.व.४। च.द.ग्रन्थ.चि.जीवन्त्याद्यघृते। "व्याघ्री-गोक्षुरसाधिताम्।" च.द.ज्व.चि. "व्याघ्रीदुस्पर्श-गोक्षुरैः।" वराटिकाभेदे। कड़िविशेष। रा नि.व.१३। व्याघ्रपद्याम्। वाघिनी। व्याघ्र-नख्याम्। नखीविशेष। च.द.वा व्या.चि.।

व्याघ्रीयुक् (युगम्)। स्त्री, क्ली। बृहत्याम्, कण्टकार्य्याञ्च। चि.क्र.क.।

व्याड़ः। पुं। सर्पे। हिंस्रे। अम.।

व्याड़म्बः। पुं। रक्तैरण्डे। वै.निघ.। [अम.।

व्याड़ायुधम्। क्ली। नखीनामगन्धद्रव्ये। नखी।

व्याधभीतः। पुं। मृगे।

व्याधिः। पुं। रोगे। रोग। हिं बेमारी। — पुरुषदुःखसंयोगा व्याधयः। ते चतुर्विधाः शारी-रागन्तु-मानस-स्वाभाविकभेदेन। तत्रागन्तवोऽभि-घातजन्याः, शारीरास्त्वन्नपानमूलाः वातादिवैषम्य-मूलाश्च। मानसाः क्रोधादिका इच्छादिप्रभेदैर्भवन्ति। स्वाभाविकाः क्षुत्पिपासादिकाश्च। सु.सू.१अ.। तच्च दुःखं विविधम् आध्यात्मिकमाधिभौतिकमाधि-दैविकञ्चेति। तत्तु दुःखं सप्तविधे व्याधावुपनि-पतति। ते पुनः सप्त व्याधयः यथा—आदिबल-प्रवृत्ताः जन्मबलप्रवृत्ताः दोषबलप्रवृत्ताः संघातबल-प्रवृत्ताः कालबलप्रवृत्ताः दैवबलप्रवृत्ताः स्वभाव-बलप्रवृत्ताश्चेति। तत्रादिबलप्रवृत्ताः शुक्रशोणित-दोषान्वयाः कुष्ठार्शःप्रभृतयः। शेषाणां विशेषाः तत्तत्पर्य्याये मृग्याः। सु.सू.२४अ.। रोगः दोष-वैषम्यरूपः। "रोगस्तु दोषवैषम्यम्। रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते॥" ते च रोगाः केचित् स्वाभाविकाः केचिदागन्तवः केचिन्मानसाः केचित् कायिकाः केचित् कर्म्मजाः केचिद्दोषजाः केचित् साध्याः केचिदयाप्याः केचिदसाध्याश्च। तस्य च रोगस्य विज्ञानं पञ्चधा 'हेतुस्तदनु संप्राप्तिः पूर्व्वरूपञ्च लक्षणं। तथैवोपशयः पञ्च.....।" भा.। कुष्ठौषधौ। कूड़। अम.। रस.र.रत्नरो. चि.। See रोगः। [काले। मा.नि.।

व्याधिकालः। पुं। रोगाणां वृद्धिहानिहेतुभूते

व्याधिघातः (कः)। पुं। स्थूले आरग्वधवृक्षे। बड़ शोनाल गाछ। रा.नि.व.९। च.द.ज्व. चि.। "गजाह्वा व्याधिघातकः।"

व्याधिघ्नः (जित्)। पुं। आरग्वधवृक्षे। ज.द.।

व्याधितः। पुं। रोगिणि। रा.नि.व.२०।

व्याधिनाशनः। पुं। द्वीपान्तरवचायाम्। तोपचिनि। वै.निघ.।

व्याधिरिपुः। पुं। कर्णिकारवृक्षे। रा.नि.व.९।

व्याधिविपरीतः। पुं। रोगविपरीतौषधादौ। यथा—अतिसारे मलरोधके पाठादौ; ममूरादि-पथ्ये। उदावर्त्ते अधोवायुनिःसारके तथा देवगुरु-सेवादौ च। मा.नि.।

व्याधिहन्त्री (त्रा)। पुं। वाराह्यीनामकन्द शाके। शूकर आलू। रा.नि.व.७।

व्याध्यगदः। पुं। दामोदरकृतवैद्यकग्रन्थे।

व्यानः (वायुः)। पुं। देहस्थवायुविशेषे। व्यानवायु। "कृत्स्नदेहचरो व्यानः रससंवहनो यतः। स्वेदासृक्स्रावणो वापि पञ्चधा चेष्टय त्यपि। क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेह-गान्॥" सु.नि.१अ.।

व्यापत्। पुं। मृत्यौ। अधिकलवणादिभक्षण-जन्यरोगसङ्घटे। वैद्यकम्।

व्यापम्। क्ली। कुष्ठौषधौ। कूड़। अम.।

व्यामः। पुं। तिर्य्यग्विस्तृतबाह्वोर्यदन्तरं स व्यामः। एक दाँओ। "व्यामः सहस्रस्तु तथोर्द्धिर्य्यग्बाह्वो-र्यदन्तरम्।" रा.नि.व.१८।

व्यामग्नम्। क्ली। व्यामे। एक दाँओ।

व्यायामः। पुं। वेगकृद्व्यापारे। च.सू.१५अ.। अङ्गादिचालने। कुस्ति, मल्लश्रम। शरीरायास-जननकर्म्मणि। भा.म.४भ.शिरोरो.चि.। "शरीरा-यासजननं कर्म्म व्यायामसंज्ञितम्।" गुणादि— तत्कृत्वा तु सुखं देहं विमृद्नीयात्समन्ततः। शरी-रोपचयः कान्तिर्गात्राणां सुविभक्तता। दीप्ताग्नि त्वमनालस्यं स्थिरत्वं लाघवं मृजा॥" इत्यादि। सु.चि.२४अ.। "व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनां। स च शीते वसन्ते च तेषां पथ्य-तमो मतः। सर्व्वेष्वृतुषु सर्व्वैर्हि मर्त्यैरात्महिता-र्थिभिः। शक्त्यर्द्धेन च कर्त्तव्यो व्यायामो हन्त्यतो-ऽन्यथा। कक्षौ ललाटे ग्रीवायां यदा घर्म्मः प्रव-र्त्तते। शक्त्यर्द्धं तं विजानीयाद् यावदुच्छ्वासमेव च। लाघवं कर्म्मसामर्थ्यं स्थैर्य्यं क्लेशसहिष्णुता। दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते। व्यायामं कुर्व्वतो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नित्यं विरुद्धमपि भोजनम्। विदग्धमविदग्धं वा निर्दोषं परिपच्यते। वयो बलं शरीरञ्च देशं कालमथापि च। समीक्ष्य कुर्य्याद्व्यायामं युक्त्या युक्तश्च बुद्धिमान्। रक्तपित्ती क्षयी शोषी कासी श्वासी क्षतातुरः। भुक्तवान् स्त्रीषु च क्षीणो व्यायामं परिवर्ज्जयेत्। वातपित्तामयी बालो वृद्धो जीर्णश्च तं त्यजेत्। अतिव्यायामतः कासो रक्तपित्तप्रतानकौ। श्रमः क्लमः क्षयस्तृष्णा ज्वरस्तद्विद्य नायते॥" राज.२प.।

व्यायामशोषः। पुं। अतिव्यायामजन्यशोषरोगे। लक्षणं—"व्यायामशोषी भूयिष्ठमेभिरेवमुपद्रुतः। लिङ्गैरुरःक्षतसमैः संयुक्तश्च क्षतं विना॥" **व्यायोजिमः।** पुं। स्थूलाण्डसमविषमपालौ। सु.सू.१६अ.।

व्यालः। पुं। व्याघ्रे। दुर्दान्तगजे। रा.नि.व.१८। रक्तचित्रके। रा.नि.व.६। चित्रकवृक्षे। भा.पू.१ भ.। सर्पे। शापदे। अम.।

व्यालकरजः। पुं। व्याघ्रनखे। नखौषधिविशेषे। वै.निघ.।

व्यालखड्गः। पुं। व्याघ्रनखे। नखौषधिविशेषे। रा.नि.व.१२।

व्यालगन्धा। स्त्री। लाङ्गलीनाममहाकन्दशाके। विषलाङ्गुलिन्यां। रा.नि.व.७।

व्यालजिह्वा। स्त्री। महासमङ्गायाम्। रा.नि.व.४।

व्यालदंष्ट्रः। पुं। गोक्षुरक्षुपे। रा.नि.व.४।

व्यालनखः। पुं। व्याघ्रनखे। नखौषधिविशेषे। रा.नि.व.१२। सुषीवृक्षे। रा.नि.व.८।

व्यालपत्रः। पुं। एर्वारुकलतायाम्। क्षेत्रकाँकुड़। कश्चित्।

व्यालपत्रा (त्रिका, त्री)। स्त्री। कर्कटीभेदे। काँकुड़विशेषे। रा.नि.व.७।

व्यालपाणिजः। पुं। व्याघ्रनखाख्यगन्धद्रव्ये। नखौ। रा.नि.व.१२।

व्यालप्रहरणम्। क्ली। व्याघ्रनखे। नखौ। वै.निघ.। [व.१२।

व्यालबलः। पुं। व्याघ्रनखे। नखौ। रा.नि.

व्यालमृगः। पुं। चित्रकव्याघ्रे। चिता बाघ। भारतम्।

व्यालम्बः। पुं। रक्तैरण्डे। वैद्यकम्।

व्यालवल्लरी। स्त्री। नागवल्ल्याम्। पान गा वै.निघ.। [वै.निघ

व्यालवेणी। स्त्री। देवदाल्याम्। पीत घोषा

व्याघ्रायुधम्। क्ली। नखीनामगन्धद्रव्ये। टी.मथुरा.। पुं। व्याघ्रनखे। नखौ। रा.नि.व.१

व्यालोढ़(दष्टक)म्। क्ली। सर्पदंशनभेदे लक्षणं यथा—"एकं दंष्ट्रापदं हे वा व्यालोढ़ाख्यमशोणितम्।" वा.उ.३६अ.।

व्यालुप्त(दष्टक)म्। क्ली। सर्पदंशनभेदे लक्षणं—"दंष्ट्रापदे सरक्ते हे व्यालुप्तं...।" वा उ.३६अ.।

व्यावर्त्तः (कः)। पुं। चक्रमर्दे। चाकुन गाछ। रा.नि.व४। नाभिकण्टके। शु.च.।

व्यासः। पुं। परिमाणभेदे। वेध। शु.र.।—

व्यासदीपप्रजा। स्त्री। वन्ध्याकर्कव्याघ्री वै.निघ.

व्युष्टम्। क्ली। प्रभाते। पर्य्युषिते। फले। च.वि। ऊषिते। दग्धे। मे.।

व्यूहः। पुं। देहे। विका.।

व्योम। क्ली। जले। मे.। आकाशे। अम. अभ्रधातौ। रा.नि.व.१३। शूल.चि.पीड़ाभञ्जिरसे वै.निघ.वा.व्या.चि.वातविध्वंसरसे। भैष.स्त्री.रो चि.प्रदरारिरसे।

व्योमचारी(इन्)। पुं। पक्षिणि। मे.।

व्योमनासिका। स्त्री। भारतीपक्षिणि चिका.।

व्योमपूरम्। क्ली। सुगन्धतृणे। वै.निघ.।

व्योमवल्लिका (ल्ली)। स्त्री। आकाशवल्ल्याम् आलोकलतां। रा.नि.व.३।

व्योमोदकम्। क्ली। आकाशसलिले। रा.नि व.१४।

व्योषम्। क्ली। त्रिकटुनि। शुँठ, पिप्पल मरिच। भा.। एतच्च शिरोविरेचने प्रशस्तम्। मा मृ.१५अ.।

व्योषाद्यगुग्गुलुः। पुं। स्थौल्यरोगे गुग्गु पाठः—"व्योषाग्निविफलाभस्तुविड़ङ्गं गुग्गुलुं सम खादेत्.....॥" रस.र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्योषाद्यघृतम्। क्ली। अर्शसि घृतम्। पाठः —"व्योषगर्भं पलाशस्य त्रिगुणे भस्मवारिणि। साधितं पिबत सर्पिः पतत्यर्शांसि निश्चितम्॥" पलाशचारात् षड्गुणपरिस्रावितक्षारवारि ग्राह्यं।

व्योषाद्यचूर्णम्। क्ली। रक्तार्शसि रक्तातिसारे च हितम्। "व्योषाऽग्रारुष्करविड्ङतिलाभयानां चूर्णं गुड़ेन सहितन्तु सदीपयोज्यम्।" सर्व्वं समभागम्। अन्यत् ज्वरातीसारे—त्रिकटु, इन्द्रयव, निमछाल, चिराता, भीमराज, चिता, कट्‌की, आकनादि, दारुहरिद्रा, ও আতইচ প্রত্যেক সমভাগ, সর্ব্বসমান কুড়চিছালের চূর্ণ। মাত্রা ৪ মাষা। च.द.।

व्योषाद्यलौहम्। क्ली। विद्रध्यधिकारे लौहम्। लक्षणं—"व्योषं त्रिवृत्तिक्तकरोहिणी च सायीरजस्तु विफलारसेन। पीतं कफीत्थं शमयेत्तु शोथं गव्येन मूत्रेण हरीतकी च॥" रस.चि.।

व्रजभूः। पुं। कैलिकदम्बवृक्षे। शब्दच.।

व्रणः। पुं, क्ली। तन्नामकरोगे, क्षतादौ। व्रणरोग, घा। स द्विविधः शारीर आगन्तुश्चेति। तयोः शारीरः पवन-पित्त-कफ-शोणित-सन्निपातनिमित्तः। आगन्तुरपि पुरुषपशुपक्षिव्यालसरीसृपप्रपतन-पीड़न प्रहाराग्निचार-विषतीक्ष्णौषध शकलकपालशृङ्गचक्रेषु-परशुशक्ति-कुन्ताद्यायुधाद्यभिघात निमित्तः। तस्य लक्षणं द्विविधं सामान्य वैशेषिकञ्च। तत्र सामान्यं रुग्व्रणगात्रविचूर्णने व्रजतीति व्रणः। विशेषलक्षणं पुनर्वातादिलिङ्गविशेषः।" सु.चि. १अ.। स पुनः पञ्चदशविधः। पृथग्-दोषैस्त्रयः संसर्गजास्त्रयः सन्निपातेनैकः एवमूता रक्तसहितैः सप्त, एवं चतुर्दश, रक्तेन केवलेनैक इति पञ्च दश। "स पञ्चदशधा दोषैः सरक्तैस्तत्र मारुतात्। श्यावः कृष्णोऽरुणो भस्मकपोताम्भिनिभोऽपि च। मस्तुमांसपुलाकाम्बुतुल्यतन्वल्पसंस्रुतिः। निर्मांसस्रोदभेदाढ्यो रूक्षश्यटचटायते। पित्तेन चिप्रजः पीतो नीलः कपिलपिङ्गलः। मूत्रकिण्वकभस्माम्बुतैलाभोष्णबहुस्रुतिः। क्षारोचित-क्षतसमव्यथारागोष्मपाकवान्। कफेन पाण्डुः कण्डूमान् बहुश्लेष्मघनस्रुतिः। स्थूलोष्ठः कठिनः स्नायुशिराजालतमोऽल्परुक्। प्रवालरक्तो रक्तेन सरक्तं पूयमुद्गिरेत्। वाजिस्थानसमो गन्धे युक्तो लिङ्गैश्च पैत्तिकैः। द्वाभ्यां विभिद्य सर्वैश्च विद्यात्तल्लक्षणसङ्करात्।" इति। जिह्वाप्रभो मृदुः श्लक्ष्णः श्यावौष्ठ-पिटिकः समः। किञ्चिदुन्नतमध्यो वा व्रणः शुद्धोऽनुपद्रवः। इति। लगामिषगिरास्नायुसन्ध्यस्थीनि व्रणाश्रयाः। कीष्ठी मर्म्म च तान्यष्टौ दुःसाध्यान्युत्तरोत्तरम्। सुसाध्यो नवमांसाग्निवर्चोबलवति व्रणः। वृत्तोदीर्घस्त्रिपुटकश्चतुरस्राकृतिश्च यः। तथा स्फिक्-पायु-मेढ्रौष्ठ-पृष्ठान्तर्वक्रगण्डगः। क्लच्छ्रसाध्योऽक्षि दशन-नासिकापाङ्गनाभिषु। सेवनीजठरश्रोत्रपार्श्वकक्षास्तनेषु च।" इति। वा.उ.२५अ.। तथा— त्वङ्मांस-शिरास्नायुस्थि-सन्धि-कोष्ठ-मर्म्माणीति। तत्रायं त्वक्सुसन्निवेशो त्वग्भेदो व्रणः सूपचारः श्रेष्ठाः स्वयमवदीर्य्यमाणा दुरुपचाराः। तत्रायतश्चतुरस्रः वृत्तस्त्रिपुटक इति व्रणाकृतिसमासः श्रेष्ठा विकृताकृतयो दुरुपक्रमा भवन्ति। इति। व्रणवेदना तु बहुधा; तद्यथा—तोदनभेदनताड़नक्वेदनायमनमन्थनविक्षेपणचुमचुमायननिर्दहनावभञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधशूलविश्लेषणविकिरणपूरणस्तम्भनस्रावकुच्छनाङ्गुशिका भवन्ति। इति। सु.सू.२२अ.। व्रणबन्धनं चतुर्दशविधं तानि च कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डलच्छगिकायमकखट्वाचीनविबन्धवितानगोफणाः पञ्चाङ्गुलीति चतुर्दश। व्रणायतनविशेषेण तद्बन्धनानि विधा गाढ़समग्रिथिलानीति। सु.सू.१८अ.। वाभटस्तु उत्सङ्गं पञ्चाङ्गुलीस्थाने पञ्चाङ्गीति स्वीकरोति। विशेषाः स्वस्वपर्य्यायेषु द्रष्टव्याः।

व्रणकृत्। पुं। भल्लातवृक्षे। भेला গাছ। र.मा.।

व्रणकेतुः (घ्नो)। पुं, स्त्री। दुग्धफेन्याम्। रा.नि.व.५।

व्रणग्रन्थिः। पुं। रोगभेदे। ব্রণের গাঁটা। लक्षणं—"अरूढ़े रूढ़माने वा व्रणे सर्व्वरसाग्निजः। सान्द्रे वा बन्धरहिते गात्रे ऽस्राभिहते ऽथवा। वातासृमस्रुतं दुष्टं संग्रथ्य ग्रथितं व्रणम्। कुर्य्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः॥" वा.उ. २८अ.।

व्रणघ्नी। स्त्री। लघुकारवेल्लके। ছোট উচ্ছে। वै.निघ.।

व्रणजिता। स्त्री। मुस्तायाम्। মুণ্ডীরী। वै. निघ.।

व्रणदिट्। पुं। ब्राह्मणयष्टिकायाम्। বামনহাটী। शब्दच.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्रणधूपनः। पुं। तन्नामकधूपदानविधौ। यथा —"शरावसम्पुटे चिक्षा कल्कमङ्गारदीपितम्। छिद्रे नेत्रं निवेश्याथ व्रणं तेनैव धूपयेत्॥" अत्र व्रणनाड़िका दशाङ्गुलमिता कार्य्या। भा.।

व्रणरोपणरसः। पुं। क्षुद्ररोगाधिकारे औषधविशेषः। पाठः—"गन्धेशाहिफणातुल्यं व्योषं जम्बीरमर्दितं। कुमार्य्या नरमूत्रेण चित्रकेण च सिन्धुना। सौवर्चलेन च पृथक् युक्ता च विधुधे: क्रमात्॥" माधा ६ र.। अनु. मधु। रस.चि.।

व्रणशुक्रम्। क्ली। नेत्रतारकगतरोगविशेषे। "निमग्नरूपं तु भवेद्धि कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै। स्रावं स्रवेदुष्णमतीव चापि तत् सव्रणं शुक्रमुदाहरन्ति॥" भा.।

व्रणशोथः। पुं। व्रणनिमित्त-शोथभेदे। तस्य पूर्व्वरूपं शोथस्य कर्दशोत्थानम्। स षट् वातपित्तकफसन्निपातरक्तागन्तुभेदेन। यथा—"पृथक्समस्तदोषोत्था रक्तजागन्तुजौ तथा। व्रणशोथाः षड़ेते स्युः संयुक्ताः शोथलक्षणैः॥" मा.नि.।

व्रणशोधनः। पुं। कम्पिल्लके। कमलागुंड़ि। वै.निघ.।

व्रणशोषः। पुं। क्षतजन्यशोषरोगे। निदानं—"रक्तक्षयाद्दोषनाभिस्तथैवाहारयत्नणात्। व्रणस्य भवेच्छोषो स चासाध्यतमो मतः॥" मा.नि.।

व्रणस्थानम्। क्ली। व्रणवस्तुनि। व्रणेन्र स्थान। तानि च त्वक्मांसशिरास्नायुस्थिसन्धिकोष्ठमर्म्माणीत्यष्ट भवन्ति। सु.सू.२२अ.।

व्रणस्रावः। पुं। चतुर्द्दशविध-व्रण-निःस्रावे। तद् यथा—"लसीका जल-पूयासृक्-हरितारुणपिञ्जराः। कषाय-नील-हरित स्निग्ध-रुक्ष-सिताऽसिताः॥ इति वाहेः समुद्दिष्टैर्व्रणस्रावैश्चतुर्द्दश॥"

व्रणहः। पुं। एरण्डवृक्षे। अ.च.। स्त्री (हा)। गुड़ूच्याम्। अ.र.।

व्रणहरी। स्त्री। लाङ्गलिकौषधौ। विषलाङ्गूलिन्याम्। वै.निघ.।

व्रणहृत्। पुं। भल्लातकवृक्षे। भेला गाछ। कलिकारीवृक्षे। विषलाङ्गूलिन्याम्। रा.नि.व.४।

व्रणायामः। पुं। वातव्याधिविशेषे। लक्षणं —"मर्म्माश्रितं व्रणं प्राप्य वायुर्यः सम्प्रदृह्यते। वेगैरानाम्यते देहं व्रणायामन्तु तं त्यजेत्॥" मा.नि.।

व्रणारिः। पुं। बोलनामगन्धद्रव्ये। गन्धबोल। रा.नि.व.६। अगस्तिवृक्षे। बासना गाछ। रा.नि.व.१०।

व्रणोपक्रमः। पुं। व्रणचिकित्सायाम्। व्रणोपक्रमः षष्टिविधोऽपतर्पणादिभेदेन। यथा—अपतर्पणमालेपः परिषेकोऽभ्यङ्गः स्वेदो विस्रपानसुपनाहः पाचन विस्रावनं स्नेहो वमनं विरेचनं छेदनं भेदनं दारणं लेखनमेषणमाहरणं व्यधनं विस्रावनं सीवन सन्धानं पीड़नं शोणितास्थापनं निर्व्वापणमुत्कारिका कषायो वर्त्तिः कल्कः सर्पिस्तैल रसक्रियावचूर्णनं व्रणधूपनमुत्पादनमवगाहनं मृदुकर्म्म दारणकर्म्म क्षारकर्म्माग्निकर्म्म क्षणकर्म्म पाण्डुकर्म्म प्रतिसारणं रोमसंजननं लोमापहरणं वस्तिकर्म्मोत्तरवस्तिकर्म्म बन्धः पत्रदानं क्रमिघ्नं हृद्ग्रहणं विषघ्नं शिरोविरेचनं नस्यं कवल-धारणं धूमो मधुसर्पिर्यन्त्रमाहारो रक्षाविधानञ्चेति। सु.चि.१अ.।

व्रतम्। क्ली। ईप्सितकामनियमे। च.सू.१अ.।

व्रततिः (तौ)। स्त्री। लतायाम्। अम.।

व्रतादेशः। पुं। उपनयने। स्मृतिः।

व्रतोपायनम्। क्ली। प्रदेणकाख्य-पिष्टकभेदे।

व्रश्चनम्। क्ली। छेदने। पुं। स्वर्णादिच्छेदके अस्त्रे। छेनी। अम.।

व्रह्मा (न्)। पुं। विधातरि। तत्प्रादुर्भावः यथा —"विधाताथर्व्वसर्व्वस्वमायुर्व्वेदं प्रकाशयन्। स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम्॥" इत्यादि। भा.।

व्रीड़ा। स्त्री। वनकुलत्थिकायाम्। प.मु.। लज्जायाम्।

व्रीहिः। पुं। प्रावृट्कालजायुधान्ये। आशु धान्य। हैमन्तिकशूकधान्यमात्रे च। मे.। तस्य लक्षणम्—"वार्षिकाः कथिता शुक्ला व्रीहयश्चिरपाकिनः।" तद्भेदा यथा—"कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि। शालामुखी जतुमुख इत्याद्या व्रीहयः स्मृताः॥" गुणाः—"व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः। अल्पाभिष्यन्दिनो बहुवर्च्चस्काः षष्टिकैः समाः। कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे॥" भा.पू.१भ.धा.व.। "मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः।" च.सू. २७अ.। गौरो मधुरः शीतलः पित्तघ्नः कषायः स्निग्धो वृष्यः कृमिकफहरः तापरक्तहरश्च। तथा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्टिकरः श्रमघ्नः वीर्य्यबुद्धिकरो रुच्य आनन्दजनको वातजनकश्च। रा.नि.व.१६।

व्रीहिकाञ्चनः। पुं। मसूरवृक्षे। त्रिका.।

व्रीहितुण्डिका। स्त्री। दंवधान्ये। देधान। वै.निघ.। [निघ.।

व्रीहिधान्यम्। क्ली। षष्टिकादिधान्ये। वै.

व्रीहिपर्णिका (र्णी)। स्त्री। शालपर्ण्याम्। शालपाणि। रा.नि.व.४।

व्रीहिभेदः। पुं। चीनाकधान्ये। कांनीधान। र.मा.।

व्रीहिमुखम्। क्ली। व्यधनार्थं व्रीहिमुखाकारमुखशस्त्रे। सु.सू.८अ.। तत् षड़ङ्गुलायतं द्व्यङ्गुलवृत्तं चतुरङ्गुलफलञ्च कार्य्यम्, तन्मुखञ्च व्रीहिविस्तारं संमृढ़कुण्ठञ्च कार्य्यम्। इति सु.टी.ड. भोजः।

व्रीहिराजिकः। पुं। चीनाकधान्ये, कङ्गुधान्ये। कांनी धान। मे.।

व्रीहिश्रेष्ठः। पुं। शालिधान्ये। हेमन्तधान। रा.नि.व.१६।

व्रीह्यास्यम्। क्ली। व्रीहिमुखास्त्रभेदे। च.द.।

शंवः। पुं। सुषलायस्यलौहमण्डले। लोहार गुलो। धरणिः।

शंवरम्। क्ली। जले। अम.। रा.नि.व.१४।

शकटः। पुं, क्ली। धववृक्षे। धाओया गाछ। प.मु.। शरीरे। वै.निघ.। तिनिशवृक्षे। जाङ्गल गाछ। रा.नि.व.९।

शकटाख्यः (कः)। पुं। धववृक्षे। धाओया गाछ। र.मा.।

शकलम्। क्ली। त्वचि। गुड़त्वक्। रा.नि.व.६। आमलके। पद्मदण्डे। पद्मेर डाँटा। वै.निघ.। वल्कले। छाल। त्रिका.। शल्के। आँइश। पुं, क्ली। खण्डे। अंशे। अम.।

शक(कु)ली (न्)। स्त्री, पुं। नदगिलमत्स्ये। मिरगालमाछ। अम.भ.। गुणाः—वात-कफकरत्वम्। अवि.२२अ.। महाशकुलमत्स्ये। बड़ शउल, पिप्‌लेशोउल। गुणाः—"शकुली रोहिताकारा भूमौ प्रायश्चरत्यसौ। गुर्वी पाके च मधुरा भेदिनी दोषकोपनी॥" राज.३प.।

शकुनः। पुं। पक्षिणि। गृध्रे। शुकुनि। मे.। कृष्णचटके। श्यामा पाखी। वै.निघ.। क्ली। शुभसूचकनिमित्ते। सगुन्। मे।

शकुनग्रन्था। स्त्री। क्षुद्रगरुडगोधिकायाम्। क्षुद्र टिकटिकि। त्रिका.।

शकुनाहृतः (तं)। पुं। बालरोगविशेषे। शकुनिग्रह। मत्स्यविशेषे। वै.निघ.। शालिधान्यभेदे। भा.पू.१भ.शा.व.। गुणाः—शालिवत्।

शकुनिः। पुं। पक्षिणि। पाखी। अम.। कृष्णचटके। श्यामा पाखी। गृध्रे। रा.नि.व.१९। चित्रपक्षिणि। चील पाखी। हे.च.।

शकुनिप्रपा। स्त्री। पक्षिपानीयशालायाम्। पाखीर जलपानस्थान। धारा.।

शकुनी। स्त्री। तन्नामकबालग्रहविशेषे। लक्षणं —"सरूक्षाङ्गी भयचकिता विरुद्धगन्धिः संस्रावि-व्रणपरिपीड़ितः समन्तात्। स्फोटैश्च प्रततनुः सदाहपाकै र्विज्ञेयो भवति शिशुः शतः शकुन्या॥" सु.उ.२७अ.। श्यामाकपक्षिणि। श्यामा पाखी। रा.नि.व.१९।

शकुन्तः (न्तिः)। पुं। पक्षिणि। अम.। काकभेदे। कुक्कुटभेदे। वै.निघ.। भासपक्षिणि। उणा.। कीटविशेषे। मे.।

शकुन्दः। पुं। श्वेतकरवीरे। रा.नि.व.१०।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अकुलः। पुं। मत्स्यविशेषे। शोल माछ। गुणाः —"अकुली मधुरो ग्राही रुच्यः पित्तास्रजिद्गुरुः।" राज.३प.।

अकुलगण्डः। पुं। मत्स्यविशेषे। शोल माछ। त्रिका.।

अकुला। स्त्री। कटुरोहिण्याम्। कटकी। रा.नि.व.६।

अकुलादनी। स्त्री। कटुक्याम्। कटकी। रा.नि.व.६। च.सू.४अ. भेदनीये। जलपिप्पल्याम्, कच्चटशाके। काचड़ादाम। र.मा.। गजपिप्पल्याम। गण्डूपदे। केँचो। कट्फले। विश्वः।

अकुलाभकः। पुं। गड़कमत्स्ये। गरुई वा ल्याटा माछ। अम.।

अकुलाच्चकः (का)। पुं, स्त्री। श्वेतदूर्व्वायाम्। गण्डदूर्व्वायाम्। अम.।

अकुलाच्ची। स्त्री। गण्डदूर्व्वायाम्। गेँटे दूर्व्वा। रा.नि.व.८।

अक्तत्। क्ली। विष्ठायाम्। अम.।

अक्तत्करिः (री)। पुं, स्त्री। गोवर्त्से। त्रिका.।

अक्तत्कारः। पुं। मलत्यागकारके। व्याक.।

अक्तद्वारम्। क्ली। मलद्वारे। हे.च.।

अक्तद्रवः। त्रि। द्रवरूपे। भा.म.४भ. वायु-कफकृच्चि.।

अक्तद्रसः। पुं। गोमयरसे। गोबरेर रस। सु.सू.३८अ.।

अक्करः (रिः)। पुं। वृषे। हे.च.। त्रिका.।

अक्तवः। पुं। भक्ष्यवादिचूर्णे। छातू।

अक्तिकः। पुं। गन्धके। रस.र.रस.क्ली. भैष. वादशाये।

अक्तिपर्णः। पुं। सप्तपर्णवृक्षे। छातिम गाछ। जटा.।

अक्तुः। पुं, क्ली। भर्जितयवादिचूर्णे। छातू। "धान्यानि भाड़ृष्टानि यवे.....।" रा.नि.व. १६। "यत्तपिष्टानि अक्तवः।" भा.। "धाना भक्ष्यवे भूम्नि स्त्रियां पुं भूम्नि अक्तवः।" जटा.। यवअक्तुगुणाः,—यवजाः अक्तवः शीता दीपना लघवः सराः। कफपित्तहरा रुच्या लेखनाश्च प्रकीर्त्तिताः॥ ते पीता बलदा हृद्या हृद्दृष्टा भेदनास्तथा। तर्पणा मधुरा रुच्याः परिणामे बलावहाः॥ कफपित्तश्रमतृष्णाक्षयनेत्रमयापहाः। प्रशस्ता घर्म्मदाहाय व्यायामार्त्त-श्ररीरिणाम्। चणक-अक्तुगुणाः,—निस्तुषैश्चणकैर्भृष्टैस्तुल्यांशैश्च यवैः कृताः। अक्तवः शर्करासर्पियुक्ता ग्रीष्मे ति पूजिताः॥ शालि-अक्तुगुणाः,—अक्तवः शालि-सम्भूता वह्निदा लघवो हिमाः। मधुरा ग्राहिणी रुच्याः पथ्याश्च बलशुक्रदा॥ अक्तुभोजनविधियथा न भुक्ता न रदैश्चित्त्वा न निशायां न वा वहन्। न जलान्तरितानग्निः अक्तूनद्यान्न केवलान्॥ पृथक् पानं पुनर्हानं सामिष पयसा निशि। दन्तच्छेदन-सुश्चैव सप्त अक्तुषु वर्ज्जयेत्॥

अक्तुकः। पुं। तन्नामकविषभेदे। लक्षणं यथा —"यद्दशन्ति: अक्तुकैर्नैव पूर्णमध्यः स अक्तुकः।" भा.पू.१भ.विष.व.। क्ली। अक्तौ। छातू। सा. कौ.।

अक्तुपिण्डी। स्त्री। अक्तुकृतपिण्डाकारभोज्य-द्रव्ये। छातूर लाड़ू। गुणाः—"गुर्वी पिण्डी खरात्वर्थं लघ्वी सैव विपर्य्ययात्।" राज.३प.।

अक्तुफला (लो)। स्त्री। अमीहवे। शाँई गाछ। अम.। ग्र.र.।

अक्तुवलेहिका। स्त्री। अक्तुकृतावलेहिकायाम्। छातूर अवलेह। गुणाः—"अक्तूनामायुर्लोर्य्यंत मृदुत्वादवलेहिका।" राज.३प.।

अक्रः (कः)। पुं। कुटजवृक्षे। कुड़चि गाछ। प.मु.। च.द.मेह.चि.न्यग्रोधाद्यचूर्णे। रस.र. कच्चटावलेहे। अर्জ্জুनवृक्षे। मे.। इन्द्रयवे। भैष. च.द.बालरो.चि.।

अक्रगोपः। पुं। इन्द्रगोपकीटे। आषाढ़े' पोका। जटा.।

अक्रचापसमुद्भवा। स्त्री। अलाब्वाम्। वै. निघ.।

अक्रजः (जातः)। पु। काके। त्रिका.। ग्र.र.।

अक्रजा। स्त्री। इन्द्रवारुण्याम्। राँखालशशा। सू.चि.३८अ.।

अक्रदारुः। पुं। शालवृक्षे। तैलदेवदारुवृक्षे। वै.निघ.।

अक्रद्रुमः। पुं। वकुलवृक्षे। भा.म.१भ.ज्वरोक्त-द्रव्यचि. दार्व्यादिघृतक्वाथे। श्लीपाक-अक्रद्रुमे.।" तैलदेवदारौ। भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्रनेमी । स्त्री । क्षुद्रमेषशृङ्ग्याम् । शुक्रकुटज-वृक्षे । देवदारुवृक्षे । वै.निघ. ।

शक्रपर्य्यायः । पुं । कुटजवृक्षे । कुड़चि गाछ । प.मु. ।

शक्रपादपः । पुं । कुटजवृक्षे । कुड़चि गाछ । रा.नि.व.९ । देवदारुवृक्षे । अम. ।

शक्रपुष्पम् । क्ली । इन्द्रयवे । वै.निघ.जीर्णज्व. चि.लवङ्गादिकषाये ।

शक्रपुष्पा (ष्पी) । स्त्री । नागदमन्यां । नाग-दना । र.मा. । लाङ्गलीवृक्षे । विषलाङ्गुलिन्यां । अम. । [लाङ्गुलिन्यां । र.मा. ।

शक्रपुष्पिका । स्त्री । अग्निशिखावृक्षे । विष-

शक्रबीजम् । क्ली । इन्द्रयवे । रा.नि.व.९ ।

शक्रभूभवा । स्त्री । इन्द्रवारुण्याम् । राखाल-शशा । शु.च. ।

शक्रभूरुहः । पुं । कुटजवृक्षे । कुड़चि गाछ । वै.निघ. ।

शक्रमाता । स्त्री । भार्य्याम् । वामुनहाटी । रा.नि.व.६ ।

शक्रमूर्द्धा (न्) । पुं । वल्मीके । त्रिका. ।

शक्रयवः । पुं । इन्द्रयवे । वै.निघ.२भ.अ.सा. चि. । भैष. बालरो.चि. ।

शक्रवल्ली । स्त्री । इन्द्रवारुणीलतायाम् । राखालशशा । रा.नि.व ३ ।

शक्रबीजम् । क्ली । इन्द्रयवे ।

शक्रशाखी (इन्) । पुं । कुटजवृक्षे । भा. ।

शक्रशिराः । पुं । वल्मीके । रा.नि.व.१२ ।

शक्रसुधा । स्त्री । कुन्दुरुखोटौ । सरलेर आठा । शु.च. ।

शक्रसृष्टा । स्त्री । हरीतक्याम् । त्रिका. ।

शक्राख्यः । पुं । उलूके, पेचके । त्रिका. ।

शक्राणी । स्त्री । निर्गुण्ड्याम् । नीसिन्दा ।

शक्राशनम् । क्ली । भङ्गायाम् । भाङ्, सिद्धि । गुणाः—"शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठ-नाशनम् । बलमेधाग्निकृत् श्लेष्मदोषहारि रसाय-नम् ॥" राज. । पुं । विजयावृक्षे । सिद्धि गाछ । प.मु. । कुटजवृक्षे । कुड़चि गाछ । शु.च. । इन्द्र-यवे । वै.निघ.२भ.दुर्जलज्व.चि.ज्ञानोदयरसे ।

शक्राह्वः । पुं । इन्द्रयवे । रा.नि.व.९ । भा.म. १भ.सन्ततादिज्व.चि. । "शक्राह्वविफलाग्रतम् ।" स्त्री (ह्वा) । इन्द्रयवे । वा.उ.१अ. भूतरावघृते ।

शक्रेन्द्रः । पुं । इन्द्रगोपकीटे । आषाढ़े' पोका । वै.निघ.२भ.अर्शःचि.विफलागुग्गुलौ ।

शक्वरी । स्त्री । अङ्गुल्याम् । आङ्गुल । उणा. ।

शक्वा (न्) । पुं । गजे । उणा. ।

शङ्कर । पुं । श्वेतार्के । श्वेत आकन्द । भीम-सेनीकर्पूरे । कपीते । वै.निघ. । वैद्यविनोदव्यव-हारे । नाड़ीपरीक्षाकारे ।

शङ्करप्रियः । पुं । द्रोणपुष्प्याम् । धुतुरा । प.मु. । तित्तिरिपक्षिणि । शब्दकल्पद्रुमः ।

शङ्करमत(लोह)म् । क्ली । अर्शसि लौहम् । भा. । रस.चि.९अ. ।

शङ्करशुक्रम् । क्ली । पारदे । भा.ज्व.चि. कल्प-तरौ ।

शङ्करस्वेदः । पुं । आमवातहरे स्वेदविशेषे । "कार्पासास्थि-कुलत्थिका-तिल- यवैरेरण्डमूलातसी-वर्षाभूशणबीजकाक्षिकयुतैरेकीकृतैर्वा पृथक् । स्वेदः स्यात्..... ॥" भैष. । "शक्तता महिषाश्वानां गोमयेन तथैव च । अग्नितप्तेन यः स्वेदः शङ्कर-स्वेद उच्यते" ज्ञा.द.१८अ. ।

शङ्करा (री) । स्त्री । शमीवृक्षे । शाँई गाछ । रा.नि.व.८ । सञ्जिटायाम् । शु.र. ।

शङ्करादिः । पुं । शुक्लार्कवृक्षे । श्वेत आकन्द । रा.नि.व.१० ।

शङ्करावासः । पुं । भीमसेनीकर्पूरे । रा.नि. व.१२ ।

शङ्कराह्वया । स्त्री । क्षुद्रशमीवृक्षे । वै.निघ. ।

शङ्कितः । पुं । चोरकनामगन्धद्रव्ये । हिं चौरा । गँटेला । रा.नि.व.१२ ।

शङ्कुः । पुं । मत्स्यविशेषे, जलजन्तुविशेषे । शाँकोच इति भाषा । अर्क.चि.४र्थ शतके । अस्त्रे । कौलके । मे. । पक्षिराजाक्षे । पाताव शिव । मेंटे । हे.च. । नखीनामगन्धद्रव्ये । नखी । जटा. ।

शङ्कुकर्णः । पुं । गर्दभे । त्रिका. ।

शङ्कुचिः । पुं । मत्स्यविशेषे । शङ्कु माछ । शु.र. ।

शङ्कुतरुः (वृक्षः) । पुं । शालवृक्षे । शु.र. । र.मा. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शङ्कुफलिका (फली)। स्त्री। ह्रस्वशमी-वृक्षे। छोट शाँई गाछ। रा.नि.व.८।

शङ्कुमुखी। स्त्री। निर्विष-जलौकायाम्। निर्विष जोंक। सु.सू.१३अ.। See जलायुका।

शङ्कुला। स्त्री। यन्त्रिकायाम्। जाँति। शब्द-कल्प:। उत्पलपत्रायाम्। उणा.।

शङ्कोष: (चि:)। पुं। मत्स्यविशेषे। शाँकोच माछ। जटा.। श.र.।

शङ्ख:। पुं, क्ली। तन्नामकस्थावरविषभेदे। स अतिविषासदृश:। शृङ्गीविषे, दारुमीचभेदे वा। सेंको, दार्मुज। अमि.३स्थान.५६अ.। सामुद्र कीयस्थजन्तुविशेषे। शाँक। तत्पर्य्याया:,—कम्बु: कम्बू: कम्बोज: अब्ज: त्रिरेख: जलज: अर्णभव: पावमध्वनि: अन्त:कुटिल: शङ्कक: महानाद: श्वेत: पूत: सुखर: दीर्घनाद: बहुनाद: हरिप्रिय:। गुणा:—"शङ्खकूष्माद्य: स्वादुरसपाका मरुन्नुद:। शीता: स्निग्धा हिता: पित्ते वर्चस्या: श्लेष्मवर्द्धना:॥" सु.सू.४६अ.। कटु: शीत: पुष्टि-वीर्य्य-बलद: गुल्म शूल-कफ-श्वास-विषघ्नश्च। रा.नि.व.१९। "कङ्कुष्ठं गैरिकं शङ्खं काशीषं टङ्कणन्तथा। नीलाञ्जनं शुक्तिभेदा: चुक्षका: सवराटिका:। जम्बीरवारिणा स्विन्ना: चालिता: कीणवारिणा। गुडिमायान्त्यमी योज्या भिषग्भिर्योगसिद्धये।" इति शङ्खादिगुडि:। सा.कौ.। शङ्खनाभौ। शङ्खनाभि। र.सा.सं. प्रदरान्तकरसे। नखीनामगन्धद्रव्यं। नखी। रा. नि.व.१२। च.द. ज्वरातिसा.चि. कलिङ्गाद्यगुडि-कायाम्। कर्णसमीपदेशे। रा.नि.व.१८। भ्रुवो: पुच्छान्तयोरुपरि कर्णललाटयोर्मध्ये मर्म्मद्वये। तच्च सद्यीमारकम्। सु.शा.६अ.।

शङ्कक:। पुं। शङ्के। शाँक। मे.। नील-काशीषे। नीलहिराकस। वै.निघ.। शिरोरोगभेदे। तस्य लक्षणं—"रक्तपित्तानिला: दुष्टा: शङ्खदेशे विमूर्च्छिता:। तीव्ररुग्दाहरागं हि शीघ्रं कुर्व्वन्ति दारुणं। स शिरो विषवद्गो निरुध्याशु गलं तथा। विराचाज्जीवितं हन्ति.....॥" मा.नि.। च.इन्द्रिय.८अ.। अन्यविधौ यथा—"शङ्खाश्रितो वायुरुदीर्णवेग: कृतानुयात: कफपित्तरक्तै:। रुज: सुतीव्रा: प्रतनोति मूर्द्ध्नि विशेषतश्चापि हि शङ्ख-कन्तु॥ सुकष्टसेनं खलु शङ्खकाख्यं महर्षयो वेदविद: पुराणा:। व्याधिं वदन्त्युद्गतमृत्युकल्पं भिषक् सहस्रैरपि दुर्निवारम्॥"

शङ्खकन्द:। पुं। शङ्खालौ। शाँक आलू। प.मु.।

शङ्खकुसुमा। स्त्री। शङ्खपुष्प्याम्। श्वेत अपराजिता। रा.नि.व.३।

शङ्खचरी (चर्ची)। स्त्री। ललाटिकायाम्। त्रिका.। श.र.।

शङ्खचूर्णम्। क्ली। शङ्खभस्मकृतचूर्णे। शाँकेर चूण। गुणा:—पटु चारम् उष्णं परं कृमिघ्नञ्च। राज.३प.। See चूर्णम्।

शङ्खज:। पुं। पारावताण्डाकारस्थूलमौक्तिके। बड़ शङ्खमुक्ता। शब्दकल्प:।

शङ्खद्रावक:। पुं। श्लीहयकृद्दधिकारे द्रावक-विशेष:। शङ्खद्रावक। शङ्खादिद्रव्यसङ्करजातद्राव-कौषधे। पाठ:—शङ्खचूर्णं यवक्षारं सर्জिक्षारं टङ्कणं विट् सैन्धवं सौवर्चलं शाम्भरि कर्वचं फटिकारीं नृसारदं समभागं काचकूप्यां निधाय वारुणीयन्त्रेण साधयेत्। भैष.।

शङ्खद्रावी (न्)। पुं। अम्लवेतसे। अम्लवेतस। रा.नि.व.६।

शङ्खधरा। स्त्री। क्षिलमोचिकायाम्। हिंचे। भा.पू.१भ.शा.व.।

शङ्खधवला। स्त्री। शुक्लयूथिकायाम्। श्वेत जूँई। वै.निघ.।

शङ्खनख:। पुं। क्षुद्रशङ्खे। जोड़शंखा। अम. भ.। नखीभेदे। श.र.। बृहन्नख्याम्। र.मा.।

शङ्खनखा (खी)। स्त्री। बृहन्नख्याम्। र.मा.।

शङ्खनाभि:। स्त्री। सुगन्धद्रव्यविशेषे। शङ्ख-नाभि। इयं जम्बीररसेन भाविता गुडिमायाति। सा.कौ.। मा.उपदं.।

शङ्खनाम्नी। स्त्री। शङ्खपुष्प्याम्। श्वेत अपरा-जिता। वै.निघ.।

शङ्खपाल:। पुं। स्वनामप्रसिद्धे दर्वीकरसर्पे। सु.कल्प.४अ.।

शङ्खपुष्पिका। स्त्री। श्वेतयूथिकायाम्। श्वेता-पराजितायाम्। श्वेत जूई, श्वेत अपराजिता। सि.यो.कु.टी.उन्मा.चि.।

शङ्खपुष्पी। स्त्री। (Andropogon aci-cularum, or Canscora decussata.) लताद्रवविशेषे। शङ्खाहुलूई, डानकुनी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति कैचित् स्वर्णमारणे। प.मु.।वम्.शंखोनी। तत्-पर्य्यायाः,—चण्डा सुपुष्पी शङ्खाह्वा कम्बुमालिनी पीतपुष्पा कम्बुपुष्पा मेध्या मलविनाशिनी किरीटी शङ्खकुसुमा भूलग्ना। गुणाः—हिमा तिक्ता मेधा-स्वरकरी ग्रहभूतादिदोषघ्नी च। रा.नि.व.३। "शङ्खपुष्पी सरा मेध्या हृद्या मानसरोगहृत्। रसायनी कषायोष्णा स्मृति-कान्ति-बलाग्निदा। दोषापस्मार-भूतास-कुष्ठ-क्रिमि-विषप्रणुत्॥" भा.गु. व.। श्वेतापराजितायाम्। श्वेत अपराजिता।

शङ्खमालिनी। स्त्री। शङ्खपुष्पीलतायाम्। रा. नि.व.३।

शङ्खमुखः। पुं। कुम्भीरे। हे.च.।

शङ्खमूलम्। क्ली। श्वेतमूलके। हाँसा मूला। र.नि.व.७।

शङ्खयूथिका। स्त्री। शुक्लयूथ्यां। श्वेत जूई। वै.निघ.।

शङ्खवटी। स्त्री। अग्निमान्द्ये शूलाधिकारि च हिता वटी। पाठः—"चिञ्चाचारपलं पटुव्रजपलं निम्बूरसे कल्कितं तस्मिन् शङ्खपलं सुतप्तमस-क्लन्निर्वाप्य शीर्णावधि। हिङ्ग्वोषपलं रसामृत वलीन्निचिप्य निष्कांशिकान् वटा शङ्खवटी चयग्रह-ग्रिकारुक्-पक्तिशूलादिषु।" यावत् चूर्ण हईया ना याय, तावत् शङ्खके वारंवार पोड़ाईया नेवुर रसे फेलिवे, चूर्णवत् हईले तुलिवे। तेँतुलक्षार ८ तो. पञ्चलवण मिलित ८ तो. उक्त शङ्खचूर्ण ८ तो. हिङ्गु, शुँट, पिपुल ओ मरिच मिलित ८ तो. पारा, विष ओ गन्धक प्रत्येके अर्द्ध तोला, एकत्र नेवुर रस-सह माड़िया अम्लरस हईले वटी करिवे। रस.चि.। भेष.।

शङ्खविषम्। क्ली। (Arsenicum album. White arsenic. विषभेदे। सेँको। हिं दा. साम्बलचार, शन्वुलचार, शंखशुन्वुल। तें तेल्लपाषाणम्। ता. वेल्लइपाषाणम्। एतत्तु धातु-त्रिधं शुभ्रवर्णं स्वादगन्धहीनञ्च। गुणाः—रूक्षमुष्णं बल्यं वर्ण्यं पुष्टिदं ज्वर वमन-श्वास-कास-प्रदर-वातरोगघ्नञ्च।

शङ्खसङ्काशः। पुं। शङ्खालौ। शाँक आलू। वै.निघ.।

शङ्खाख्यः। पुं। वृक्षभेदे। वड़नखी। र.मा.।

शङ्खालुः (कः)। पुं। श्वेतालौ। शाँक आलू। वै.निघ.।

शङ्खावर्त्तः। पुं। शम्बूकावर्त्तनामभगन्दररोगे। See शम्बूकावर्त्तः। शीर्षशङ्खाटकेषु तन्नाम-काख्यिसन्धिभेदे। सु.शा.५अ.।

शङ्खास्थि। क्ली। मस्तकस्थास्थिद्वये। माथार खूलि। च.शा.७अ.। पृष्ठास्थनि। रा.नि.व.१८।

शङ्खाहुली। स्त्री। शङ्खपुष्प्याम्। श्वेत अपरा-जिता। रा.नि.व.३।

शङ्खाह्वया (ह्वा)। स्त्री। शङ्खपुष्पीलतायाम्। श्वेत अपराजिता। रा.नि.व.३। वै.निघ.२भ. कर्दि.चि.धान्यकयूषे।

शङ्खिका। स्त्री। चीरपुष्प्याम्। चोरहुली। श.च.।

शङ्खिनः। पुं। शिरीषवृक्षे। वै.निघ.।

शङ्खिनिका। स्त्री। ग्रन्थिपर्णवृक्षे। गेँठेना। वै.निघ.।

शङ्खिनी। स्त्री। चीरपुष्प्याम्। चोरहुली, ভাঁটুই इति पूर्ववङ्गे। प्रयो.गोविन्दधृते। "क्षुद्रक-कुटरुषा-शङ्खिनी-चर्म्मषाह्वा।" यवतिक्तायाम्। श्वेतवृक्षायाम्। रा.नि.व.३। प.मु.। सु.सू.३९अ.। च.सू.४अ.। वा.सू.१५अ.। चर्म्मकषायाम्। चामर-कषा। च.द.परिणामशूले। "सप्तला शङ्खिनी श्वेता।" श्वेतापराजितायाम्। वै.निघ.। शुक्ल-पुन्नागवृक्षे। विश्वः। श्वेतचुक्रायाम्। श्वेतचुका। श.र.।

शङ्खिनीफलः। पुं। शिरीषवृक्षे। रा.नि.व.९।

शङ्खिनीवासः। पुं। शाखोटवृक्षे। शाओड़ा गाछ। श.च.।

शङ्खोदधिमलः। पुं। समुद्रफेने। वै.निघ.।

शङ्खोदरी। स्त्री। व्रणविशेषे। वम्. गुलतुरा। गुणाः—उष्णा कफ वातघ्नी शूलाम वातनाशिनि च। वै.निघ.।

शची। स्त्री। स्पृक्कायाम्। पिड़िंग। वै.निघ.। शतावर्य्याम्। शतमूली। मे.।

शठः। त्रि। अक्षरसे। व्याक.।

शटिः (टी)। स्त्री। शठ्याम्। शठी, बन आदा। श.र.। च.सू.४अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शठ्कम्। क्ली। सघृतजलमिश्रितशालिचूर्णे। सत्वदार शटो। "शालिचूर्णं घृतं तोयं मिश्रितं शठ्कं भवेत्।" भा.।

शठम्। क्ली। तौक्ष्यलौहे। रा.नि.व.१३। तगरपुष्पे, तगरपादिके। **तगरपादुका।** रा.नि.व.१०। कुङ्कुमे। रा.नि.व.१२। पुं। धुस्तूरवृक्षे। रा.नि.व.२३। चित्रकवृक्षे। तालवृक्षे। स्त्री। आम्रातकवृक्षे। वै.निघ.। [नि.व.४।

शठाङ्गा (ङ्गी)। स्त्री। अम्बष्ठायाम्। रा.

शठिका (ठी)। स्त्री। (Curcuma gedoaria. Syn. Curcuma gerumbet.) Long and round gedoary. खनामख्यातमूले। गन्धशटीति च लोके। शटी। हिं. कचूर। बम्. कचोरा, कापुरकाचरी। तें किचलिएगड्डल। तत्पर्य्यायाः,—गन्धमूली षड्ग्रन्थिका पलाशः शठिका शठी षठी सटी कर्व्वुरः कर्व्वूरः कचुरः सुगन्धा गन्धमूलं गन्धमूलकः गन्धमूला गन्धीलिः गन्धशटी गन्धसटी गन्धवधूः गन्धपलाशी जीमूतमूलं कच्छीरा हिमजा हिमा हैमी षड्ग्रन्था षड्ग्रन्थी सुव्रता गन्धीली पलाशा पलाशिका पृथुपलाशिका शटिः अम्लनिशा सुगन्धमूला गान्धारी शटिका समुद्रा तृणी दूर्व्वागन्धा अम्लहरिद्रा सौम्या हिमोद्भवा बधूः। गुणाः—वात-श्लेष्म-श्वास-कास-ज्वर-विनाशिनी। राज.। "सुगन्धिः कटुपाका स्यात् कुष्ठार्शोव्रणकासनुत्। उष्णा लघुश्च..... ..। भा.। "शठी तिक्ता च कटुका कीर्णा तीक्ष्णाग्निदीपनी। सुगन्धी रुचिरा लघ्वी मुखस्वच्छकरी मता। कोपनी रक्तपित्तस्य गलगण्डादिरोगहा। कुष्ठार्शोव्रण-कासघ्नी श्वास-गुल्म-कफापहा। विदोष-कृमि-वातानां ज्वरघ्नीहादिनाशकृत्।" वै.निघ.। See कर्चूरः। आरण्यकार्द्रके। वन आदा। च.द. कफज्व.चि.निम्बादिः। "शठीमूनिम्बपौष्करम्।" च.द.ज्व.चि.किरातादौ। भा.म.१भ. कण्ठकूजज्व.चि.। "शठीकलिङ्गकिलिमाभयाः।"

शठीरूपा। स्त्री। कन्दगुडूच्याम्। वै.निघ.।

शठ्यादिः। पुं। त्रिदोषज्वरे कषायविशेषः। "शठीपुष्करमूलञ्च भार्गी शृङ्गी दुरालभा। गुडूचो नागरं पाठा किरातं कटुरोहिणी। एषः शठ्यादिको वर्गः सन्निपातज्वरापहः। कास-हृदयपार्श्वार्त्ति-श्वास तन्द्रासु शस्यते॥" च.द.ज्व.चि.।

शण। पुं। (Crotalaria juncea.) Indian hemp. खनामख्यातवृक्षे। शण गाछ। हिं शण। तें शणमनुवेल्ल, जेनपनर, रेल्लचेट्टु। ता. जेनप्पनर। दा. जनवकनर। तत्पर्य्यायाः,—माल्यपुष्पः वसनः कटुतिक्तकः निशावनः दीर्घशाखः लक्ष्मीरः दीर्घपल्लवः। प.मु.। गुणाः—अम्लः कषायी मलगर्भास्रपातनः वान्तिकृत् वातकफघ्नश्च। रा.नि.व.४। तत्पुष्पं रक्तपित्ते हितं मलरोधकञ्च। बीजं श्रोणितगुद्विकरम्। राज. ३प.। क्ली। शणे। हे.च.।

शणकन्दः। पुं। चर्म्मकषायाम्। चामरकषा। रस.र.उद.चि.वह्निभल्लातकरसे।

शणघण्टा (ण्टिका)। स्त्री। शणपुष्प्याम्। वन शणई। रा.नि.व.४.।

शणपर्णी। स्त्री। असनपर्ण्याम्। वृहत्र। ग.र.।

शणपुष्पिका। स्त्री। शणपुष्प्यां। आढक्याम्। वृहत्र। भा.पू.१भ.धा.व.।

शणपुष्पी। स्त्री। शणसदृशविटपे क्षुपे, महाशणे। झनझनिया, वन शण। हिं घागरी, शणइ, वनशणइ। शणझुली। तत्पर्य्यायाः,—बृहत्पुष्पी शणिका शणघण्टिः शणपर्णी शणघण्टिका पीतपुष्पी स्थूलफला लोमशा माल्यपुष्पिका। सु.सू. ३९अ.संशोधने। च.सू.१।४अ.। गुणाः—कषाया कफ-वातघ्नी अजीर्णज्वरघ्नी वामनी रक्तदोषघ्नी च। रा.नि.व.४। जवाक्षते। र.मा.।

शणमूलम्। क्ली। शणग्रन्थिकायाम्। सु.सू.३९अ.।

शणालः (लुकः)। पुं। आरग्वधवृक्षे। सोन्दाल वा शोणालू गाछ। ग.र.।

शणिका। स्त्री। शणपुष्प्याम्। वन शण। रा.नि.व.४। [सर्के। अम.।

शण्डम्। क्ली। पद्मिन्याम्। ग.र.। पुं। नपुंसके। अम.।

शण्ढः। पुं। क्लीवे। हिजड़े। अ.टी.भ.। वन्ध्यपुरुषे। जटा.। अन्तर्मर्दवल्लिके। खोजा। अम.।

शतकुन्दः। पुं। करवीरे। "शतकुन्दः करवीरे।" रा.नि.व.२३।

शतकुलीरकः। पुं। वायस्य-कीटविशेषे। सु.कल्प.८अ.। See कीटः।

शतकुसुमा। स्त्री। अवपुष्पायाम। शुलफा च.सिद्धि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतकोटि। क्ली। हीरके। रा.नि.व.१३। See वज्रम्।

शतकोभ्भ(क)म्। क्ली। स्वर्णे। वै.निघ.।

शतक्रतुद्रुमः। पुं। कृष्णकुटजवृक्षे। वै.निघ.।

शतक्रतुयवः। पुं। इन्द्रयवे। वै.निघ.।

शतखण्डम्। क्ली। सुवर्णे। श.च.।

शतग्रन्थिः। स्त्री। दूर्व्वायाम्। नीलदूर्व्वायाम्। रा.नि.व.८।

शतघ्नी। स्त्री। हस्तिकाल्याम्। विछाती। करञ्जवृक्षे। मे। गलरोगविशेषे। लक्षणं यथा—"वर्त्तिर्घना कण्ठनिरोधिनी या चितातिमात्रं पिशितप्ररोहैः। नानारुजोच्छ्रायकरी विदोषाज्ज्ञेया शतघ्नीव शतघ्नसाध्या॥" सु.नि.१६अ.।

शतच्छदः। पुं। काष्ठकुट्टपक्षिणि। काठठोकरा पाखी। चिका:।

शतजटा। स्त्री। शतमूल्याम्। चि.क्र.क.।

शतदन्तिका। स्त्री। नागदन्त्याम्। हाति-शुँड़े। रा.नि.व.५।

शतदलमल्लिका। स्त्री। स्वनामख्यातपुष्पवृक्षे। शतदलमल्लिका। प.मु.।

शतदला। स्त्री। शतपत्रीपुष्पवृक्षे। शेउति गोलाप। रा.नि.व.१०।

शतद्रुः। स्त्री। नदीविशेषे। तज्जलं शीतलं लघु स्वादु सर्व्वरोगहरं निर्म्मलं दीपनं पाचनं बुद्धि-मेधाबलकरञ्च। रा.नि.व.२४।

शतधा। स्त्री। दूर्व्वायाम्। श.च.।

शतधौतघृतम्। क्ली। यत् पुनः पुनः सलाघ्य शीताम्भसा निर्व्वाप्यते तथाविधसर्पिषि। शत-धौत घि। ईशानदेवः। "शतं वारान् शीततोयेन धौतं फेणितं घृतम्।" डल्लणः। सि.यो.दाह-चि.। तद्गुणाः—वातपित्तदाहक्षतनाशित्वम्।

शतनेत्रिका। स्त्री। शतावर्य्याम्। शतमूली। रा.नि.व.४।

शतपत्रम्। क्ली। कमले। पुष्पभेदे। रा.नि.व. २३। वा.उ.३२अ.। शतदलकमले। रक्तपद्मे। वा. च.सू.४अ.।

शतपत्रः (कः)। पु। मयूरे। मे। राजशुके। नूरी पाखी। अयं प्रतुदजातीयः। रा.नि.व. २६। हे.च.। सु.सू.४६अ.। (कः) काष्ठकुट्टक-पक्षिणि। अम.। काट-ठोकरा। च.सू.२७अ.। सारसपक्षिणि। मे.।

शतपत्रा (त्रिका, त्री)। स्त्री। शतदल-मल्लिकायाम्। श्वेत वा पाटलवर्ण गोलाप, शेउती गोलाब। हिं सेवती, गुलाब। मं सेवती। कं सेंवतिगे। तें चेमण्डिचेटु। तत्-पर्य्यायाः,—शतपत्री गन्धाढ्या सौम्यगन्धा शिवप्रिया सुगीता सुव्रता सुमनाः शतपत्रिका। गुणाः—शीतला तिक्ता कषाया कुष्ठघ्नी मुखस्फोटहरा रुच्या दाहपित्तघ्नी च। रा.नि.व.१०। "शतपत्री हिमा हृद्या ग्राहिणी गुरुला लघुः। दोषत्रयास्र-जित् वर्ण्या तिक्ता कटुी च पाचनी॥" भा.। नीलदूर्व्वायाम्। रा.नि.व.८।

शतपदी। स्त्री। शतमूल्याम्। शतमूली। रा. नि.व.४। कर्णजलौकायाम्। केन्नुई, कांणविछा, कांणकोटारि। हिं खान् खोजारा। हे.च.। सा चाटधा—परुषा कृष्णा चिवा कपिलिका पित्तिका रक्ता श्वेता अग्निप्रभा चेति। ताभिः दष्टे शीघ्रो वेदना दाहश्च हृदये भवति। सु. कल्प.८अ.।

शतपद्मम्। क्ली। श्वेतकमले। र.मा.।

शतपर्व्वा[न्](र्विका)। पुं.स्त्री। वंशे। बाँश। रा.नि.व.७। च.द.अश्म.चि.वरुणाद्यघृते। (र्विका) यवे। शु.र.। शतपोरनाम्नि इक्षुभेदे। हिं शत-पोरक। गुणाः—"शतपर्व्वा भवेत्किञ्चित्कीट-कारगुणान्वितः। विशेषात् किञ्चिदुष्णश्च सचारः पवनापहः॥" भा.। स्त्री (र्व्वा, र्व्विका)। दूर्व्वा-याम्। वचायाम्। वच। मे.। श्रीरुद्रतैले। प्रयोग.। श्वेतदूर्व्वायाम्। प.मु.। च.चि.३अ.। कटुकायाम्। कटुकी। रा.नि.व.६। नीलदूर्व्वा-यामम्। रा.नि.व.८। कलम्बीशाके। भा.पू.१भ. शा.व.। [कोटारी। जटा.।

शतपात् (द्)। स्त्री। शतपद्याम्। कांण-

शतपादकः। पुं। अग्निप्रकृतिक-कीटविशेषे। सु.कल्प.८अ.।

शतपादिका। स्त्री। काकोल्याम्। काँकुला। जटा.। कर्णजलौकायाम्। कांणकोटारी। शु.र.।

शतपादी। स्त्री। श्वेतकटभीवृक्षे। रा.नि.व. ९। See कटभी। नीलापराजितायाम्। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतपुत्री। स्त्री। ह्रस्वशतमूल्याम्। शतमूली। र.सा.सं.। लघुघोषायाम्। क्षुद्र घोषा। वै. निघ.।

शतपुष्पः। पुं। षष्टिकशालिधान्ये। षेटे धान। वै.निघ.। स्त्री (ष्पा, ष्पिका.। Pencedanum Sowa. P. Graveslons.) Drill Seeds. शताह्वायाम्। शुल्फा। भ.र.। रा.नि. व.४.। हिं सौंया। तें पेद्दसदापचेट्टु। तत्पर्य्यायाः,—सितच्छत्रा अतिच्छत्रा मधुरा मधुरिका अवाकपुष्पी कारवी शताची शताह्वा छत्रा शतपुष्पिका मिशि: मिशी मिषि: मिसि: माधवी घोषा तालपर्णी ताल्पर्णी शालेया शीतशिवा शालीना वनजा संहिता पुष्पिका सुपुष्पी सुरसा बल्या। गुणाः—"शतपुष्पा विदोषघ्नी मेध्या पथ्या रुचिप्रदा।" अचि.६अ.। "शतपुष्पा तु मधुरा वातपित्तहरा गुरुः।" राज.३प.। च.द.वा.ज्व. चि. पिप्पल्यादिः। अपि च—"शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः। उष्णा ज्वरानिलश्लेष्मव्रणशूलाविरोगहृत्॥ मिश्रेया तद्गुणा प्रोक्ता विशेषाद् योनिशूलनुत्। अग्निमान्द्यहरी हृद्या बद्धविट् क्रिमिशुक्रहृत्। रुचोष्णा पाचनी कासवमि-श्लेष्मानिलान् हरेत्॥" भा.। भिषिभेदे। गोत्री। गवेधुकायाम्। रा.नि.व.४। सु.सू.३९ अ.। च.सू.४अ.।

शतपुष्पादल(शाक)म्। क्ली। शताह्वापत्रे। शुल्फा शाक। मं सोउप। कं सव्वग्निगे। गुणाः—मधुरसुष्णं गुल्मशूलघ्नं वातघ्नं दीपनं पित्तकृत् रुच्यञ्च। रा.नि.व.७।

शतपोदः (कः)। पुं। शतपोनकनामभगन्दरविशेषे। शूकरीगे। कश्चित्।

शतपोनकः। पुं, क्ली। शूकरीगविशेषे। तच्च मेढ्रसमन्तादणुमुखच्छिद्रव्याप्तं वातशोणितजं भवति। सु.नि.१४अ.। वातजन्यभगन्दररोगे। निदानम्— "कषाय-रुचैरति-कोपितोऽनिलस्त्वपानदेशे पिड़कां करोति याम्। उपेक्षणात् प्राक्तमुपैति दारुणं रुजा च भिन्नारुणफेनवाहिनी। तत्रागमो मूत्रपुरीषरेतसां व्रणैरनेकैः शतपोनकं वदेत्॥" मा.नि.। "दीर्य्यतेऽणुमुखैश्छिद्रैः शतपोनकवत् क्रमात्। अस्रं स्रवद्विरास्रावमजस्रं फेणसंयुतम्। शतपोनकसंज्ञोऽयम्.....॥" वा.उ.२८अ.।

शतपोरकः (पोरः)। पुं। इक्षुविशेषे। गुणाः—वंशकेक्षुवत् ईषदुणः वातग्लानिकरश्च। सु.सू. ४५अ.।

शतप्रसूना। स्त्री। शताह्वायाम्। शुल्फा। रा.नि.व.४।

शतप्रासः। पुं। करवीरवृक्षे। अम.।

शतफलः। पुं। वंशे। बाँश।

शतबाहुः। पुं। वायव्यकोटिविशेषे। सु.कल्प. ८अ.।

शतभीरुः। स्त्री। मल्लिकापुष्पवृक्षे। अम.।

शतभेदकः (नः)। पुं। अम्लवेतसे। मद.व.६।

शतमानः। पुं। रूप्यमले। रूपार खाद। आढ़कमाने। अम.भ.।

शतमूला। स्त्री। नीलदूर्व्वायाम्। रा.नि.व. ८। महाशतमूल्याम्। शतमूली। रा.नि.व.४। वचायाम्। रा.नि.व.६।

शतमूलिका। स्त्री। द्रवन्त्याम्। दन्तीविशेष। रा.नि.व.५। महामूषिककर्ण्याम्। बड़ इन्दुरकाणी। वै.निघ.।

शतमूली। स्त्री। शतावर्य्याम्। शतमूली। रा.नि.व.४।

शतवल्ली। स्त्री। काकोल्याम्। काँकुला। र.मा.।

शतवीर्य्या। स्त्री। शतमूल्याम्। शतमूली। द्राक्षायाम्। किसमिस्। रा.नि.व.२३। महाशतावर्य्याम्। बड़ शतमूली। रा.नि.व.४। श्वेतदूर्व्वायाम्। श्वेत दूर्वा। र.मा.। दूर्व्वायाम्। ज.द.।

शतवेधनी। स्त्री। चुक्रिकायाम्। चुकापालं।

शतवेधी (धिन्)। पुं, क्ली। अम्लवेतसे। रा. नि.व.६। स्त्री (धी)। चुक्रे। चुकापालं। भा. पू.१भ.ग्रा.व.।

शतश्लोकी। स्त्री। वीपदेवकृते चन्द्रकलानामके द्रव्यगुणे।

शतश्लोकीटीका। स्त्री। कृष्णदत्तकृतशतश्लोकीटीकायाम्।

शतसुता। स्त्री। शतावर्य्याम्। रस.र.शिरोरो.चि.वरुणाद्यघृते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शता । स्त्री । शतावर्याम् । वै.निघ.२भ.वा.व्या. घि. एरण्डपाके ।

शताङ्गः । पुं । तिनिशवृक्षे । सादन, तिनिश । रा.नि.व.९ ।

शताङ्गुलः । पुं । तालवृक्षे । कश्चित् ।

शतायुषः । पुं । मनुष्ये । वै निघ. ।

शतारुः (स्) (रुषो) । क्ली, स्त्री । कुष्ठरोगभेदे । लक्षणं—"रक्तश्यावं सदाहर्त्तिं शतारुः स्याद्दुस्तरणम् ।" भा.कुष्ठ.चि. ।

शतावरी । स्त्री । (Asparagus racemosus, or Asparagus sarmentosus) स्वनामख्यातमधुरवर्गीयमूलविशेषे । शतमूली । हिं सफेदमुसली, शतावर, छोटी शतावरी । मं सानीकांटेसेरु । कं किरियखासड़ि । तें चल्ल, चल्लगड्डलु । वम्. शतावरी । तत्पर्य्यायाः,—बहुपत्री बहुसूता वरी इन्दीवरी ऋष्यप्रोक्ता नारायणी शतमूली शतमूलिका शतमूला अहैरुः अभीरुः अभीरुपत्री भीरुः भीरुपत्री महापुरुषदन्ता रुचिणी शतसुता द्वीपिशत्रुः द्वीपिशत्रुः ऋष्यगता काञ्चनकारिणी मदभञ्जिनी महाशौता शतपदी शता पीवरा पीवरी हृष्या दिव्या द्वीपिका दरकण्टिका सूक्ष्मपत्रा सूक्ष्मपत्रिका सुपत्रा बहुमूला शताह्वया शताह्वा स्वादुरसा लघुपर्णिका आत्मगुप्ता जटा मूला शतवीर्य्या महौषधी मधुरा कैशिका शतपत्रिका विश्वस्था वैष्णवी कार्ष्णी वासुदेवप्रियङ्करी दुर्ग्रसा तैलवल्ली । प.मु. । वा.सू.१५अ. वरुणादि: "शतावरीगुडूचीभ्याम् ।" गुणाः—हिमा हृद्या मधुरा पित्तघ्नी कफ-वातघ्नी तिक्ता मेहघ्नी रसायनी च । क्षुद्रमहाभेदेन द्विधा । गुणाः—"शतावर्यौ हिमे हृद्ये मधुरे पित्तजित्-परे । कफ वातहरे तिक्ते मेहघ्ने श्रेष्ठे रसायने । शतावरीद्वयं हृद्यं मधुरं पित्तजिद्धिमम् । महती कफवातघ्नी तिक्ता श्रेष्ठा रसायने ॥" रा.नि.व.४ । तथा शुक्रवृद्धिकरत्वात् शुक्रला । च.द. ।

शतावरीमण्डूरम् । क्ली । परिणामशूले मण्डूरम् । शुद्धमण्डूरं शतावरीरसः दधि दुग्धं प्र. ८ प. घृतं ४ प. एकत्र पचेत् । पिण्डेऽवतारयेत् । शोधितमण्डूर, शतमूलीर रस, दधि, दुग्ध प्रत्येके ८ प. घृत ४ प. पाक करिबे । हृद्दत् यथा—त्रिफलाक्वाथगुड-मण्डूरम् ८ प. । पाकार्थं—शतावरीरसः दुग्धं दधि आमलकीरसः प्र. ८ प. घृतं ४ प । पाकसिद्धौ मुक्तकपिप्पली-जीरक-धान्यक-हरीतकीत्वक्-तेजपत्रैलानां प्र चूर्णं ४ मा. प्रक्षिप्यालोड्यम् । रस.र. ।

शताह्वया । स्त्री । शताह्वायाम् । शुल्फा । शतावर्य्याम् । रा.नि.व.४ । वै.निघ.२भ.सर्व्वज्व.चि. आरग्वधादिनिरूहे । मधुरिकायाम् । गोद्री । रा.नि.व.२३ ।

शताह्वा । स्त्री । सुगन्धतृणविशेषे । शुल्फा गाछ । हिं सौफ । मं सौफ् । कं सव्वसिगे । वम्. वड़ी सौफ । च.द.अजी.चि.चन्दनबलातैले । गुणाः—कटुः तिक्ता स्निग्धा श्लेष्मातिसारघ्नी ज्वरघ्नी नेत्ररोगघ्नी वस्तिकर्म्मणि हिता च । रा. नि.व.४ । लघ्वीच्छा पित्तकृत् दीपनी कटुः उष्णा शूलाचिरोगघ्नी च । भा.पू.१भ. । शतमूल्याम् । रा.नि.व.४ । वै.निघ.अर्शःचि.लघुचव्यादिघृते, विजयाचूर्णे । अजमोदायाम् । वाकुची । रा. नि.व.२३ ।

शताह्वाद्वयम् । क्ली । शतपुष्पामधुरिकयोः । शुल्फा ओ गोद्री । च.सू.३अ. ।

शताह्वी । स्त्री । शताह्वायाम् । शुल्फा । राची । रात्रि । श्र.र. ।

शत्रम् । क्ली । बले । त्रिका. ।

शत्रिः(द्रिः) । पुं । गजे । उणा. ।

शत्रुकण्टकः (का) । पुं, स्त्री । घोण्टायाम् । शेम्राकुल । रा.नि.व.८ ।

शत्रुद्रुमः । पुं । अम्लवेतसे । कश्चित् ।

शत्रुभङ्गः । पुं । सुश्रुतर्षौ । मूँज । वै.निघ. ।

शत्रुभूमिजः । पुं । नीलाम्लवेते । वै.निघ. ।

शदः । पुं । आकफलादौ । व्याक. ।

शनकावलिः । पुं, स्त्री । गजपिप्पल्याम् । श्र.च. ।

शनपर्णी । स्त्री । कटुक्याम् । कटकी । श्र.च. ।

शनिप्रियम् । क्ली । नीलकान्तमणौ । शब्दकल्प: ।

शनीरुहः । पुं । महिषे । वै.निघ. ।

शनैर्मेहः । पुं । प्रमेहविशेषे । अत्र शनैः सकफं पिच्छिलं मेहति । सु.नि.६अ. । वि (ही) । शनैर्मेहनशीले ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शप्तः। पुं। तृणविशेषे। उलू। शब्च.।

शफः। पुं। नखीनामगन्धद्रव्ये। नखी रा.नि. व.१२। क्लीं। पशुखुरे। पशुर खूर। तरुमूले। गाछेर शिकड़। मे.।

शफरः। पुं। मत्स्यविशेषे। पूंटी माछ। अम.।

शफराधिपः। पुं। झल्लीशमत्स्ये। वि.रा.।

शफरी। स्त्री। अम्लवेतसिकायाम्। आमरूल-शाक। भा.पू.१भ.शा.व.। प्रोष्ठीमत्स्ये। पूंटी माछ। अम.। गुणाः—"श्लेष्मकरी तु शफरी।" भवि.२२अ.।

शबलः। पुं। चित्रकवृक्षे। चिता गाछ। सुगन्ध-तृणे। गन्धतृण। मूषिकभेदे। इन्दुरविशेष। वा.उ.३८अ.।

शब्दः। पुं। वर्णसमाम्नाये। यथा—"शब्दोनाम वर्णसमाम्नायः। स दृष्टार्थश्चादृष्टार्थश्च सत्यश्चानृत-श्चेति। तत्र दृष्टार्थः विभिर्हेतुभिः दोषाः प्रक्षु-प्यन्ति षड्भिरुपक्रमैश्च प्रशाम्यन्ति श्रोतादिसङ्गवे शब्दादिग्रहणमित्यदृष्टार्थः पुनरस्ति प्रेत्यभावोऽस्ति मोक्ष इति। सत्याः नाम सत्यायुर्वेदोपदिष्टाः। सत्युपायाः साध्यानां सत्यारम्भफलानीति सत्य-विपर्ययाज्ञानृतः।" च.वि.८अ.।

शब्दग्रहः। पुं कर्णे। अम.।

शब्दभेदी (दिन्)। पुं। मल्लहारे। शब्दकल्पः।

शब्दमालः। पुं। रज्जुवंशे। वै.निघ.।

शब्दरोचनम्। क्लीं। तृणे। वै.निघ.।

शब्दाह्वम्। क्लीं। श्रेष्ठकांस्यधातौ। भाल कांसा। वै.निघ.।

शब्दाधिष्ठानम्। क्लीं। श्रवणेन्द्रिये। वि.का.।

शमः। पुं। हर्षे। मनःस्थैर्ये। अम.टी.। उप-चारे। रा.नि.व.२०।

शमठः। पुं। शाकविशेषे। तूदभेदे। तूँद-विशेष। वै.निघ.।

शमनः। वि। समीकृतविषमदोषाणां समता-पादके। वा.चि.१अ.। अरुष.। क्लीं। अन्ने। वै. निघ.। "पित्तादिजिन्निरामस्य यत् स्यात्तत् शमनं मतम्।" चर्व्वणे। धरणिः। हिंसायाम्। हे.च.। पुं। शमभेदे। शब्च.। कलाये। मटर। रा.नि. व.१६। तन्नामकनिरूहवस्तौ। "प्रियङ्गुमधुकं सुरा तथैव च रसाञ्जनम्। सचौरः शस्यते वस्तिर्दोषाणां शमनः स्मृतः॥" धूमपानभेदे। अत्र धूमनाड्यां रोगिणश्चत्वारिंशाङ्गुला तथैलादिकस्य धूमद्रव्य भाव्यम्। भा.। स्त्री (नी)। रावौ। कषायभेदे। येन वमनादि विनैव वातादयः शाम्यन्ति। च.द.ज्व.चि.।

शमलम्। क्लीं। विष्ठायाम्। अम.।

शमिः। स्त्री। शिम्बाम्। छिमड़ा। हे.च.।

शमिका। स्त्री। महाशमीवृक्षे। वै.निघ.।

शमि(मी)जः (जा)। पुं, स्त्री। रक्तकुण त्थके। (जा) शिम्बीधान्ये। भा.पू.१भ.धा.व.।

शमि(मी)रः। पुं। क्षुद्रशमीवृक्षे। क्षुद्र शाँई गाछ। शब्र.। अम.।

शमिला। स्त्री। जातीपुष्पवृक्षे। चामेली। वै.निघ.।

शमी। स्त्री। (Prosopis spicigera.) स्वनामख्यातसकण्टकवृक्षे। शाँई गाछ। हिं छिकुर। मं शमी, खेरी। कं वनि, कावन्नि। उत्. शमी। तत्पर्य्यायाः,—शक्तुफला शक्तु-फलिका शक्तुफली सक्तुफला सक्तुफली शिवा काननारिः शान्ता तुङ्गा शुचिरिपुफला कैशमथनी ईशानी लक्ष्मीः तपनतनया इष्टा शुभकरी हवि-र्गन्धा मेध्या दुरितदमनी सप्तदा वह्निगर्भा समीरः ईशानः मङ्गल्या सुरभिः पापशमनी भद्रा शङ्करी कैशहन्त्री शिवाफला सुपत्रा सुखदा। सा द्विधा लघुमहाभेदेन। गुणाः—रूक्षा कषाया रक्त-पित्तातिसारघ्नी च। अपिच,—"शमी तिक्ता कटुः शीता कषाया रेचनी लघुः। कम्पकासश्रमश्वास-कुष्ठार्शः क्रिमिजित् स्मृता॥" भा.। तत्फलं स्वादु रुचम् उष्णं कैशघ्नञ्च। रा.नि.व.८। "शमीफलं गुरु स्वादु रुचीष्णं कैशनाशनम्।" सु.सू.४६अ.। रक्तपलाशशमीवृक्षे। सु.चि.१अ.। See अग्निगर्भा। शिम्बायाम्। शिम्। अम.। सोमराज्याम। सोमराज। मे.।

शमीधान्यम्। क्लीं। शिम्बीधान्ये, माषादौ, मुद्गराजमाषतिलकुलत्थादौ च। पुरातनादिगुणाः —"शूकधान्यं शमीधान्यं समातीतं प्रशस्यते। परतो वातलत्वं च प्रायेणाभिनवं गुरु। यवगोधूम-माषाश्च तिलाश्चापि नवा हिताः। पुराणा विरसा रूक्षा न तथार्थकरा मताः। अनार्त्तवं व्याधिहृत-मपर्य्यागतमेव च। अभूमिजं नवत्वाच्च न धान्यं गुणवत् स्मृतम्॥" राज.३५.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शमीपत्रा। स्त्री। लज्जालुकालतायाम्। लज्जावती। रा.नि.व.५।

शमीरकन्दः। पुं। वाराहीकन्दे। शुयार आलू। कोषान्तरम्।

शम्पदा। स्त्री। दूर्वा। वृद्धि ओषधि। वै.निघ.।

शम्पाकः। पुं। महारुखवृक्षे। बड़ शोणालू, सोन्दाल। अम.। मरिचाद्यतैले। रत्नमालासंग्रहे पित्तशोथचि.; विन्दुघृते च। तन्मज्जगुणाः—"स्वादुपाकीऽग्निबलकृत् स्निग्धः पित्तानिलापहः।" सु.सू.४६अ.। यावके। सम्यक्पाके। हे.।

शम्पातः। पुं। आरग्वधवृक्षे। शोणालू वा सोन्दाल गाछ। श.र.।

शम्ब(व)रः (लः)। पुं। लोध्रवृक्षे। लोध गाछ। अर्जुनवृक्षे। रा.नि.व.९। चित्रकवृक्षे। चिता गाछ। रा.नि.व.६। तालवृक्षे। रा.नि.व. २३। हस्ति। उणा.। मृगविशेषे। शम्बर मृग। विका.। मत्स्यभेदे। विश्व.। क्लो। जले। विका.।

शम्ब(व)रकन्दः। पुं। वाराहीकन्दे। शुयार आलू। रा.नि.व.७।

शम्ब(व)रचन्दनम्। क्लो। बर्बर-चन्दने। शंबर चन्दन। तत्पर्य्यायाः,—कैरातं कैरातकं बहुलगन्धं श्रेलगन्धं बल्यं गन्धकाष्ठं। गुणाः—तिक्तं शीतलं उष्णं श्लेष्मवातहरं श्रम-पित्तविस्फोट-पामादिकुष्ठहरणातापहरञ्च। रा.नि.व.१२।

शम्ब(व)रदेशजः। पुं। शुक्लरोध्रे। श्वेत लोध। वै.निघ.।

शम्ब(व)रपादपः। पुं। शुक्लरोध्रे। वै.निघ.।

शम्ब(व)राहारः। पुं। वनवदरे। बुनो-कुल। वै.निघ.।

शम्ब(व)री। स्त्री। आखुकर्णीलतायाम्। मूषाकाणी। रा.नि.व.२३। श्रुतश्रीवृक्षे। रा.नि. व.४। द्रवन्तीवृक्षे। बड़ दन्ती वा श्वेतवरा। रा.नि.व.५।

शम्ब(व)रोगन्धा। स्त्री। वनतुलस्याम्। वै. निघ.।

शम्ब(व)रोद्भवः। पुं। शुक्लरोध्रे। वा.उ. ३२अ.।

शम्बुः। पुं। शम्बूके। शामूक। दण्डचन्द्रः।

शम्बु(म्बू)कः। पुं। शम्बूके। शामूक। तत्-पर्य्यायाः,—जलडिम्बः शाम्बुकः शाम्बूकः दुश्चरः पङ्कमण्डूकः। See शङ्खः। प्राणनाशकक्रीट-विशेषे। सु.कल्प.८अ.। शङ्खे। शाँक। हे.च.। क्षुद्रशङ्खे। छोट शाँक। रा.नि.व.१९।

शम्बुकः। पुं। शम्बूके। शामूक। श.र.।

शम्बूकपुष्पी। स्त्री। शङ्खपुष्प्याम्। भा.पू.१ भ. चित्तभ्रम-चि। "शम्बूकपुष्प्याः पुष्पाः।"

शम्बूका। स्त्री। जलशुक्तौ। झिणुक। शम्बूके। शामूक। रा.नि.व.१९।

शम्बूकाद्यतैलम्। क्लो। कर्णरोगे तैलम्। पाठः—"शम्बूकमांसकल्केन कटुतैलं विपाचयेत्। अस्य पूरणमात्रेण कर्णनाड़ी प्रशाम्यति॥" द्वितीयं वृहत् यथा—"प्रस्थं शम्बूकमांसस्य कटुतैलञ्च तत्समम्। कुष्ठं भृङ्गी रजो वासा ह्यर्कपत्रं सुधी घनं। बिल्वं शालिञ्चपत्रञ्च केशरं नाग-केसरम्। द्राक्षा चातिविषा चैव यष्टीमधुकमेव च। शटी चैरण्डकार्पासभृङ्गकेशरजस्य च। एतेषां कर्षमादाय पचेत्तैलं भिषग्वरः। तस्य पूरण-मात्रेण कर्णनाड़ी प्रशाम्यति॥" रस.र.।

शम्बूकावर्त्तः। पुं। सन्निपातजभगन्दररोगे। तस्य लक्षणं यथा—"बहुवर्णरुजास्रावा पिड़का गोस्तनोपमा। शम्बूकावर्त्तवन्नाड़ी शम्बूकावर्त्तकी मतः॥" मा.नि.।

शम्भुः। पुं। श्वेतार्के। सादा आकन्द। भ.च.। रस.चि.३अ.। "वह्निरेकः शम्भुरेकः।"

शम्भुकेतनः। पुं। पीतलोध्रे। वै.निघ.।

शम्भुतेजः। क्लो। पारदे। र.सा.सं.।

शम्भुप्रिया। स्त्री। आम्रलक्ष्याम्। श.र.।

शम्भुबीजम्। क्लो। पारदे। भैष.ध्वजभङ्गचि.।

शम्भुवल्लभम्। क्लो। श्वेतकमले। रा.नि.व.१०।

शम्भोःकण्ठविभूषणम्। क्लो। विषे। कालि विष। भैष.पञ्चाननरसे। [निद्रायाम्। विश्वः।

शयः। पुं। हस्ति। रा.नि.व.१८। सर्पे। मे.।

शयथः। पुं। सर्पविशेषे। बराइ। मौने। मृत्यौ। उणा.। वि। गाढ़निद्रिते। हे.च.।

शयनम्। क्लो। निद्रायाम्। घुम। शय्यायाम्। बिछाना। अम.। मैथुने। मे.।

शयानकः। पुं। ककलासे। गिरगिटा। हे. च.। सर्पे। उणा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शयामूत्रम् । क्ली । शय्यामूत्रे । वै.निघ. ।

शयालुः । पुं । कुक्कुरे । विका. । शृगाले । त्रि । अलसे ।

शायितः । पुं । अजगरे । शैली । चालता । शब्दमा. । त्रि । निद्रिते । अम. ।

शयुः । पुं । अजगरनामसर्पजातौ । अम. ।

शय्या । स्त्री । आस्तरणी, तल्पे । विछाना । अम. । सुखशय्यागुणाः—"सुखशय्यासनं सेव्यं निद्रा-पुष्टिधृतिप्रदं । श्रमानिलहरं हृद्यं विपरीत मतोऽन्यथा ॥" भूशय्यागुणाः—"भूशय्याऽनिल-पित्तघ्नी हृद्या श्लेष्मविवर्द्धनी ।" खट्वापट्टशय्ययोर्गुणाः—"खट्वा तु वातला प्रोक्ता पट्टोरुचीऽतिवातलः ।" राज.पू.प. ।

शय्यामूत्रम् । क्ली । शिशोस्तन्नामकरोगे । भेजेजमोता । औषधं यथा—"कृतमूत्रार्त्ति-भूभागमृदं दग्ध्वा तु खोलके । संचूर्ण्य मधुसर्पिभ्यां लीढ्वा स्वप्ने न मूत्रयेत् ॥" रस.र.बाल.चि. ।

शरम् । क्ली । जले । से. ।

शरः । पुं, क्ली । (Saccharum sara.) Penreed grass. स्वनामख्याततृणे । शर गाछ । हिं कांड़ा, रामशर, शरपत । तें रेल्लु, काकिवेदुरु, गुन्द्र । शरण, अंवलिनगणे इति मालवे प्रसिद्धः । पद्मा. कंड़ । तत्पर्य्यायाः,—इषुः काण्डः बाणः सुद्मः तेजनः तेजनकः गुन्द्रकः चित्रपुङ्खः उत्कटः शायकः क्षुरः इक्षुप्रः क्षुरिका पत्रः विशिखः । स द्विविधः स्थूलसूक्ष्मभेदेन । तद्द्विविधगुणाः—मधुरं तिक्तम् हृष्यदुग्धं बलवीर्य-करं नित्यसेवनात् ईषद्वातकरं कफमान्द्यमदघ्नञ्च । अपिच,—"भद्रमुञ्जः शरोबाणस्तेजनश्चेक्षुवेष्टनः । मुञ्जो मुञ्जातकोबाणः स्थूलदर्भः सुमेखलः ॥ मुञ्जा-द्वयन्तु मधुरं तुवरं स्निग्धं तथा । दाहतृष्णा-विसर्पास्र-मूत्रवस्तिरुगजित् ॥ दोषत्रयहरं हृद्यं मेखलामूपयुज्यते ॥" भा. । काशभेदे । रा.नि. व.८ । बाणे । अम. । स द्विविधः कर्णी क्षुरप्रश्च । सु.सू.२६अ. । दग्धः अग्रभागे । दधिर माथा । मे. । महापिण्डीतरौ । रा.नि.व.९ ।

शरखड्गकः । पुं । खागड़तृणे । खागड़ा । प.मु. ।

शरजम् । क्ली । नवनीते । ननि । शब्दकल्प. । वैद्यकशब्दसिन्धौ । हे.च. ।

शरटः । पुं । कुसुमशाके । कुसुम गाछेर पाता । र.मा. । पूतीकरञ्जे । नाटा । प.मु. । कृकलासे । अ.टी. । स्त्री (टी) । खदिरपर्ण्याम् । लज्जावती । वै.निघ. जीर्णज्व.चि. ।

शरणा (णी) । स्त्री । प्रसारण्याम् । गन्धभाङ्-निम्बा । मद.व.१. । शा.र. । जयन्त्याम् । जयन्ती गाछ । शा.र. ।

शरण्डः । पुं । पक्षिणि । शा.र. । वृहद्गोधा-याम । टिक्‌टिकि । कृकलासे । काँकलास । मे. ।

शरत् (द) (दा) । स्त्री । वत्सरे । ऋतुभेदे । शरत्काल । अम. । शा.र. । तुलाद्वयस्थिते सूर्य्ये शरत् । "तुलाद्वयस्थिते सूर्य्ये शरत् ।" मतान्तरे भाद्राश्विनौ । तत्पर्य्यायाः,—शरदा घनात्ययः कालप्रभातः वर्षा वसानः मेघान्तः प्राड्वृषाव्ययः । गुणाः—"शरदुष्णा पित्तकर्त्री नृणां मध्यबलावहा ।" भा. । वक्र-पुष्पवृक्षे । सप्तपर्णवृक्षे । हंसे । सर्पे । पद्म पुष्पे । वत्सरे ।

शरत्कामी (न्) । पुं । कुक्कुरे । शब्दर ।

शरत्पद्मम् । क्ली । श्वेतकमले । रा.नि.व.१० ।

शरत्पुष्पः । पुं । आहुल्यचुपे । रा.नि.व.४ ।

शरदन्तः । पुं । शरे । हेमन्तकाले । रा.नि.व. २१ । See हेमन्तः ।

शरदा । स्त्री । वत्सरे । शरत्काले । [भागवतम् ।

शरदुदाशयम् । क्ली । शरत्कालिकसरोवरे ।

शरदुद्भवः । पुं । वृक्षपत्रशाकविशेषे । नटे शाक । र.सा.सं. ।

शरपुङ्खः (ङ्खा) । पुं, स्त्री । (Tephrosia purpurea.) स्वनामख्यातक्षुपविशेषे । शरपुङ्खेति लोके । वननील, शरपुङ्खा । हिं शरफोंका । बम्. दा. जंलिकुत्थि । कं वेरडुकोग्गि । सं उच्चलि । तें तेल्लवेंपलिचेट्टु । ता. कोल्लुक्कयवेलयि । तत्पर्य्यायाः,—काण्डपुङ्खी बाणपुङ्खी इषुपुङ्खा इषु-पुङ्खिका शायकः । सा श्वेतपीतभेदेन द्विधा । गुणाः—कटुरूक्षा कृमिवातघ्नी । श्वेतशरपुङ्खा तु गुणाढ्या रसायने प्रशस्ता च । रा.नि.व.४ । "शर-पुङ्खी यकृत्प्लीहगुल्मव्रणविषापहः । तिक्तः क्षषायः कासास्रश्वासज्वरहरी खगुः ।" भा. । तद्बीजं मूषिकविषहरम् । वा.उ.३८अ. । विशेषेण प्रमेहघ्नः रक्तपुष्पिकरश्च । अर्वाचीनाः ।

शरबीजम् । क्ली । शरधान्ये । शरेर बीचि । व.निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरभः। पुं। महासिंहे। रा.नि.व.१९। काश्मीरदेशीय-हरिणविशेषे। स उक्तो विशालशृङ्गश्च। एतन्मांसं कषाय-मधुरादिगुणयुक्तम्। शलभे। फड़िङ्गे। उष्ट्रे। जटा-करिणावके। वानरभेदे। मे.।

शरभूमिजः। पुं। गन्धके।

शरमल्लः। पुं। शारिकाभेदे, मयनभेदे। गोशालिक। श.च.।

शरलः। पुं। सरलवृक्षे। सरल गाछ। शब्दकल्प.।

शरलपृष्ठकः। पुं। पर्व्वतभेदे।

शरलकम्। क्ली। जले। श.च.।

शरला। स्त्री। सरलकाष्ठे।

शरलोमा। पुं। ऋषिविशेष।

शराटिः (ड़ि) (तिः)। पुं। आटिनामकपक्षिणि। शराल पाखी। श.र.। अ.टी.र.मा.।

शराटिका। स्त्री। शरारिपक्षिणि। शराल पाखी। खदिरपर्ण्याम्। लज्जावती। वै.निघ.।

शरादिपञ्चमूलम्। क्ली। शरादिपञ्चद्रव्यकृतकषाये। यथा—"शरेक्षुदर्भकाशानां शालीनां मूलमेव च" च.द.अग्नि.चि शरादिघृते।

शरादिपञ्चमूलाद्यघृतम्। क्ली। अग्निप्रधाने घृते। "शरादिपञ्चमूल्या वा कषायेण पचेद्घृतम्। प्रस्थं गोकुरकल्केन सिद्धमश्नात् सुखंकरम्॥" च.द.अग्नि.चि.।

शरारिः(रो)। पुं, स्त्री। स्वनामख्यातपक्षिजातीयपक्षिणि। शराल पाखी। तत्पर्य्यायाः,—आटिः आड़िः आड़िका आड़ी शराड़िः शरालिः शरालिका शरालो शराटिः शरातिः हापुत्री राजपुत्रिका। भैष.शिरोरो.चि.। तन्मांसगुणाः—वातघ्नं स्निग्धं हृष्टमलं हृद्यं रक्तपित्तहरं हिमञ्च। राज.३प.।

शरारि(रो)मुखः। पुं। शरारिपक्षिणि। शराल पाखी। सु.। क्ली। धवलस्कन्धशरारिनाम्नो दीर्घचञ्चुपक्षिणश्चञ्चुसदृशमुखे विस्रावणास्त्र। कर्त्तरीति संज्ञा लोके। काँचि, कांतारि। "तास्त्र दग्धाङ्गुलां चलत्पलाशां कुर्य्यात्।" सु.सू.८अ.।

शरालिः (का) (ली)। स्त्री। शरारिपक्षिणि। शराल पाखी। अम.।

शरावः। पुं। पलाटके, ६४ तो., १ प्र.। "शरावोऽष्टपलम्।" प.प्र.१खं.। मृण्मयपात्रभेदे। शरा। अम.। तत्पर्य्यायाः,—वर्द्धमानकः मार्त्तिकः सरावः शलाजिरं पार्श्विवं सृत्कांस्यम्।

शरावकुर्द्दः। पुं। वायव्यकीटविशेषे। सु.कल्प. ८अ.।

शरावार्द्धम्। क्ली। अर्द्धशरावपरिमाणे। ।॥० आध सेर, ३२ तोला। प.प्र.।

शरावित्ला। स्त्री। प्रमेहपीड़कामेदे। लक्षणम् यथा—"शरावमात्रा तदूपा निस्रसत्या शरावित्का।" सु.नि.६अ.।

शरितः। पुं। श्लेष्मान्तकवृक्षे।

शरिमा(न्)। पुं। प्रसवे।

शरी। स्त्री। कंघीतृणे। भा.। शरपुङ्खनलि।

शरीरम्। क्ली। देहे। देह। तत्पर्य्यायाः,—वर्ष्म तनुः तनूः रोगभूः आत्मा स्कन्धः भूः मूर्त्तिमत् करणं ग्रसम्। रा.नि.व.१८। शीर्य्यत इति शरीरम्। तच्च चेतनाधिष्ठानभूतम् आत्मभोगायतनं पञ्चभूतविकारात्मकञ्च। च.शा.१अ.। "पञ्चमहाभूतविकारात्मके आत्मनो भोगायतने।" च.सू.१अ.। च.द.। "गर्भो यदा हस्तपादादिभिरङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते। तच्च शरीरं षड़ङ्गं, शाखाश्चतस्रः, मध्यं पञ्चमं, षष्ठं शिरः" इति। सु.शा.५अ.। इह खलु शरीरमधिकृत्याष्टौ पुरुषा निन्दिता भवन्ति। अतिदीर्घश्चातिह्रस्वश्चातिलोमा चालोमा चातिकृष्णश्चातिगौरश्चातिस्थूलश्चातिकृशश्चेति। च.सू.२१अ.। तस्मिंश्च शरीरे त्रीणि षष्ट्यधिकानि शतान्यस्थां सह दन्तोलूखलनखैः। तद् यथा—द्वाविंशद्दन्तोलूखलानि, ३२ दन्ताय, २० नखाः, २० पाणिपादशलाकाः, ४ शलाकाधिष्ठानानि, ६० अङ्गुल्यस्थीनि, २ पार्ष्णयस्थिनी, २ कूर्चाधः, २ पार्ष्णीः मणिकाः, ४ पादयोर्गुल्फाः, ४ अरत्नीरस्थीनि, ४ जङ्घयोः, २ जानुनी, २ ऊर्व्वीः, २ बाहूः, २ अंसयोः, २ अक्षकौ बाहुसन्धिकीखकौ, २ तालुनि, २ श्रोणिफलके, १ भगास्थि, १ पुंसां मेढ्रास्थि, १ विकास्थि, १ गुदास्थि, ३५ पृष्ठास्थीनि, १५ पीवायां, २ जत्रुस्थिनी, १ हनुस्थि, २ हनुबन्धनास्थिनी, २ ललाटे, २ गण्डयोः, २ नासिकायाम्, २४ इयोः पार्श्वयोः, २४ पञ्जरास्थीनि, २४ पार्श्वकास्थीनि, २ शङ्खास्थीनि, ४ शिरःकपालास्थीनि, १७ वक्षसि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। अस्मिंश्च शरीरे—इन्द्रियाधिष्ठानानि त्वगादीनि ५, स्पर्शादीनि बुद्धीन्द्रियाणि ५, हस्तादि कर्मेन्द्रियाणि ५, चेतनाधिष्ठानं हृदयं १, प्राणायतनानि १०, कोष्ठाङ्गानि १५, नाभ्यादीनि जङ्घापिण्डिकादीनि प्रत्यङ्गानि ५६। नव स्नायुशतानि (९००), सप्त शिराशतानि (७००), द्वे धमनीशते (२००), पञ्च पेशीशतानि (५००) मर्म्मस्थानानि १०७, सन्धिस्थानानि च २००। अस्मिन् शरीरे आहारपरिणामजरसपरिमाणं ९ अञ्जलयः, रक्तस्य ८ अञ्जलयः, पुरीषस्य ७ अञ्जलयः, श्लेष्मणः ६ अञ्जलयः, पित्तस्य ५ अञ्जलयः, मूत्रस्य ४ अं., वसायाः ३ अं., मेदसः २ अं., मज्जायाः १ अं., मस्तिष्कस्य शुक्रस्य श्लेष्मौजसोश्च ॥० अं.। च. शा.७अ.।

शरीरजः। पुं। रोगे। धरणिः। वि। देहजे।

शरीर(परि)मार्ज्जनम्। क्ली। देहमार्ज्जने। गात्रमार्ज्जन। गुणाः—"दौर्गन्ध्यं गौरवं कण्डूं कक्षूं मलमरोचकं। स्वेदवीभत्सतां हन्ति शरीरपरिमार्ज्जनम्॥" राज.२प.। [६अ.।

शरीरविचयः। पुं। शरीरविज्ञाने। च.शा.।

शरीरसंस्कारः। पुं। देहस्य पवित्रीकरणे।

शरीरावरणम्। क्ली। त्वचि। चामड़ा। रा. नि.व.१८।

शरीरास्थि। क्ली। कङ्काले। अस्थिपञ्जर। रा.नि.व.१८।

शरीरी (रिन्)। पुं। जीवे। जटा.। तद्यथा—"गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकम्। प्रकृतिः सचिकारा च तत्सर्व्वं गर्भसंज्ञकं। कालेन वर्द्धितो गर्भो यदङ्गोपाङ्ग संयुतः। भवेत् तदा स मुनिभिः शरीरीति निगद्यते॥"

शरीष्टः। पुं। आसवृक्षे। जटा.।

शरोटिका। स्त्री। लज्जालुकायाम्। लज्जावती। वै.निघ.।

शरीरोपस्तम्भः। पुं। शरीरधारकस्तम्भे। स त्रिविधः आहारस्वप्नब्रह्मचर्य्यभेदेन। स्तभ्यमानं धार्य्यमाणम् उप समीपं गत्वा स्तम्भयति धारयतीति उपस्तम्भः धारकः। च.सू.११अ.।

शर्करकः। पुं। मधुरजम्बीरे। शब्दरत्नावली। रा.नि.व.११।

शर्करकन्दः। पुं। (Ipomoca batatas.) आलुकविशेषे। राङाआलू, शकरकन्द आलू। हिं शकरकन्द। ता. वुल्लिकिजङ्गु। Watts.

शर्करजा। स्त्री। मधुशर्करायाम्। मधुर चिनि। रा.नि.व.१४।

शर्कराक्षः। पुं। ऋषिविशेषे। च.।

शर्करा। स्त्री। खण्डविकारे। चिनि। सा. गुणाः—मधुरा शीता दाहपित्तश्रमघ्नी रक्तदोषघ्नी भ्रमघ्नी कृमिघ्नी च। रा.नि.व.१४। "सिता सुमधुरा प्रोक्ता दृष्या शुक्रविवर्द्धनी। तत्पायिनीगुणाः—"पित्तघ्नी मधुरा बल्या शर्करापायिनी नृणाम्।" शर्करान्या सुशीता च कासशूलसमुद्भवा। हिता पित्तासृजि शीते मूर्च्छाश्रमसमदापहा॥" अवि.१०अ.। "शर्करा ज्वरपित्तासृङ्मूर्च्छाच्छर्द्दितृषापहा।" राज.। 'सिता सुमधुरा रुच्या वातपित्तासृदाहजित्। मूर्च्छाच्छर्द्दिज्वरान् हन्ति सुशीता शुक्रकारिणी॥" भा.। सा च खण्डीपलाम्बुतोपलाक्षुद्रागौड़ीमलखण्डपौण्ड्रकशर्करेक्षुक्षीरेक्षुरसालेक्षुजपुष्पोद्भव-मधुशयवासशर्करा-भेदेन बहुधा। आसां विशेषाः पर्य्याये दृश्याः। मद्यविशेषे शर्करामद्ये। गुणाः—"हरति मलमिद्धं या दीपनी पाण्डुमेहान् लघुमधुरसुशीता रोचनी पित्तघ्नी। जरयति सकलं वा पीतमल्पातिमात्रं श्वसनरुधिरकासान् हन्ति वा कामलाञ्च।" अवि.१९अ.। विषे। विष। र.सा.सं. शीतारिरसे। बालुकायाम्। वालि। भा.म.४भ. क्षुद्ररो.चि. कदरलक्षणे। "शर्करीन्मथिते पादैः।" दन्तरोगभेदे, दन्तशर्करायाम्। तल्लक्षणं यथा—"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै। सा दन्तानां गुणघ्नी तु विज्ञेया दन्तशर्करा॥" सु.नि.१६अ.। स्वनामकवल्लिरोगे, अश्मरीशर्करायाम्। लक्षणं —"अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना। पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः। सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते।" सु.नि.३अ.।

शर्करार्बुदम्। क्ली, पुं। क्षुद्ररोगविशेषे। लक्षणम्—"प्राप्य मांसशिरास्नायुश्लेष्मेदांस्तथानिलः। ग्रन्थिं कुर्व्वन्ति भिन्नोऽसौ मधुसर्पिर्वसानिभम्। स्रवत्यासावमत्यर्थं तत्र वृद्धिं गतोऽनिलः। मांसं विशोष्य ग्रथितां शर्करां जनयेत् पुनः। दुर्गन्धं क्लिन्नमत्यर्थं नानावर्णं ततः शिराः। स्रवन्ति सहसा रक्तं तद्विद्याच्छर्करार्बुदम्॥" सु.नि.१३अ.। वा.उ.३१अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शर्करालेहः। पुं। रसायनाधिकारि लेहः। यथा—मेदा महामेदा ऋद्धिः वृद्धिः जीवकः ऋषभकः काकोली क्षीरकाकोली जीवन्ती यष्टिमधु एषाम् प्रति ४ तो॰ ५ माषा॰ ५ र॰। कुशमूलं काशमूलम् उलुमूलं शरमूलं इक्षुमूलम् एषाम् प्रति १प॰ जलं ३२ श॰ पृ॰ ८ श॰। नारिकेलजलं १२ श॰ घृतं ४ प॰। शर्करा १६ प॰। सिद्धे शीते प्रक्षेपार्थं एला तेजपत्रं धान्यकं जीरकं गुडत्वक् कृष्णजीरकं वंशलोचना नागकेशरम् एषां प्रति चूर्णं १ तो॰। रस॰र॰।

शर्करासवः। पुं। शर्करीत्यासवे। गुणाः—"सुखप्रियः सुखमदः सुगन्धिर्बस्तिरोगनुत्। जरणीयः परिणतो हृद्यो वर्ण्यश्च शार्करः॥" च॰सू॰ २७अ॰।

शर्करासुरभिः। पुं। शर्करासवे। वै॰निघ॰।

शर्करोदकम्। क्ली। सिताजले। चिनिर्‌ पानां, शरबत्। यथा—एलालवङ्गमरिचकर्पूरयुक्तशीतलजलगोलिता शर्करा शर्करोदकमुच्यते। गुणाः—शुक्रलं सरं शीतलं बल्यं रुच्यं खलु स्वादु वातपित्तहरणान्नं रक्तदोषहरं वमिमूर्च्छाज्वरदाहघ्नञ्च। भा॰।

शर्द्धः (नम्)। पुं, क्ली। मरुत्कारे। अपानवायौ। व्याकरणम्।

शर्द्धक्षहः। पुं। शिम्बादौ, माषे। व्याक॰। वि। मलद्वारेण वायुत्यागिनि।

शर्म्मणी। स्त्री। ब्राह्मीक्षुपे। वै॰निघ॰।

शर्म्मरा। स्त्री। दारुहरिद्रायाम्। धरणिः।

शर्म्माख्यः। पुं। मसूरे। भूसुरि। प॰सु॰।

शर्व्वरी। स्त्री। रात्रौ। अम॰। नार्य्यां। मे॰। सस्यायाम्। उषा॰। हरिद्रायाम्। रा॰नि॰व॰६। भा॰ तन्द्रिज्वर॰चि॰। "क्रमिहरनागरशर्व्वरी।" कण्ठकुब्जकज्वर॰चि॰। "कलिङ्गसिंहाननशर्व्वरीभिः।"

शर्व्वरीद्वयम्। क्ली। हरिद्रादारुहरिद्रयोः। भैष॰क्षुद्ररो॰चि॰।

शर्व्वाक्षम्। क्ली। रुद्राक्षे। रा॰नि॰व॰११।

शर्षपः। पुं। सर्षपे। सरिषा। See सर्षपः।

शलः। पुं, क्ली। तालहृक्षे। वै॰निघ॰। उष्ट्रे। हे॰च॰। शल्लकीकण्टके। शजारुकाँटा। अम॰।

शलकः। पुं। तालहृक्षे। शल्लकीकण्टके। वै॰निघ॰। मर्कटके। माकड़शा। त्रिका॰।

शलङ्गः। पुं। लवणविशेषे। उणा॰।

शलभः। पुं। पतङ्गे। फड़िङ्ग, पङ्गलपोका।

शलभोलिः। पुं। उष्ट्रे। हे॰च॰।

शललो। स्त्री। शल्लकीकण्टके। शजारुकाँटा। अम॰।

शलाका। स्त्री। मदनवृक्षे। मयना गाछ। शरे। शर। शारिकायाम्। शालिक पाखी। शल्लक्याम्। सजारु। मे॰। नलकास्थनि। नलाड़ हाड़। शु॰च॰। नेत्राञ्जनसाधनकाष्ठिकायाम्। अञ्जनेर शलाका। यथा—"दशाङ्गुला तनुर्मध्या शलाका सुकुलानना। अस्थिजा धातुजा वापि कलायपरिमण्डला। ताम्रलौहाग्रसञ्जाता शलाका लिखने मता। सुवर्णरजतोद्भूता शलाका स्नेहने मता।" तौड़॰वृद्ध॰सू॰।

शलाकाधिष्ठानास्थि। स्त्री। पाणिपादयोः शलाकाख्याधारभूते अस्थनि। नलकास्थिसमूहेर आधाराङ्गि। तानि ४। च॰शा॰७अ॰।

शलाकायन्त्रम्। क्ली। तदाकाराष्टाविंशतिविधयन्त्रेषु। तानि नानाप्रकाराणि, नाना प्रयोजनानि यथायोगपरिणाहदीर्घाणि च। यथा—गण्डूपदमुखं शरपुङ्खमुख सर्पफणमुखं वड़िशमुखञ्चेति हे हे एषणव्यूहनचालनाहरणार्थम्। मसूरदलमात्रमुखे हे किञ्चिदानताग्रे स्रोतोगतशल्योद्धरणार्थम्। त्रीणि दर्व्याकृतीनि खल्लमुखानि चारोपधप्रणिधानार्थम्। त्रीणि जाम्बवदनानि, त्रीण्यङ्कुशवदनानि अग्निकर्म्मार्थानि। षट् कार्पासकृतोष्णीषाणि प्रमार्ज्जनक्रियासु। एकं कोलास्थिदलमात्रमुखं खल्लतोत्क्षीणं नासार्बुदहरणार्थम्। एकमञ्जनार्थं कलायपरिमण्डलम् उभयतो मुकुलाग्रम्। मूत्रमार्गविशोधनार्थमेकं मालतीपुष्पदन्ताग्रप्रमाणपरिमण्डलमिति। सु॰सू॰७अ॰।

शलाकास्थि। क्ली। नलकास्थनि। नलार हाड़। तानि ४। च॰शा॰७अ॰।

शलाटः। पुं। शकटपरिमाणे, डिसहस्रपले। २००० पल। तुला पलशतं तासां विंशत्या भार आचितः। शकटः शाकटीनश्च शलाटस्तै दशाचितः॥" हे॰च॰।

शलाटुः। पुं। बिल्वहृक्षे। रा॰नि॰व॰२३। कोमलफले। फलेर शुँटो। अम॰। सु॰सू॰३८अ॰।

शलालु। क्ली। सुगन्धद्रव्यविशेषे। व्याक॰।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शलो। स्त्री। क्षुद्रशल्लकीमृगे। तन्मांसं गुरु स्निग्धं शीतलं कफपित्तघ्नञ्च। रा.नि.व.१७।

शल्कम्। क्ली। खण्डे। अम.। मत्स्यत्वचि। माछेर आँइष। कीषान्तरम्। वल्कले। अम.

शल्ककलम्। क्ली। मत्स्यशल्की। माछेर आँइष। तरुवल्कले। गाछेर छाल। व्याक.।

शल्ककी (ल्लकी)। पुं। मत्स्ये। शब्र.।

शल्पदा
शल्पपर्णिका } स्त्री। मेदायाम्।

शल्मलिः (ली)। पुं। शाल्मलिवृक्षे। शिमूल गाछ। (लिका:)। रक्तरोहीतकवृक्षे। लाल डयना गाछ। रा.नि.व.८।

शल्मलिकः। पुं। रक्तरोहितके।

शल्यः। पुं, क्ली। सर्व्वशरीरदुःखोत्पादकभावमात्रे, विभिन्नजीष्टकष्ठिकादौ।" "तत्शल्यमिति जानीयाज्जीष्टकष्ठिविभिन्नकम्।" वै.सं.२अ.। शारीरागन्तुभेदेन शल्यं द्विविधं। यत् सर्व्वशरीराबाधकरं शल्यं तदिहोपदिश्यत इत्यतः शल्यशास्त्रम्। ततः शारीरं नखरोमादिघातवीऽन्नलालादीषाय दुष्टाः। आगन्तु शारीरशल्यव्यतिरेकेण यावन्तो भावा दुःखमुत्पादयन्तीति ते वाष्याः ज्ञेया। सु.सू.२६अ.। विद्धशल्यमपि द्विविधमव वङ्मनवबद्धञ्चेति। अवबद्धशल्योद्धरणार्थे पञ्चदश हेतवो भवन्ति। यथा—स्वभाव-पाचनभेदनदारण-पीड़न प्रमार्ज्जन-निर्ह्रापन-वमन-विरेचन प्रचालन-प्रतिमर्द्द-प्रवाहणाचूषणाय स्नान्तर्धानेति। सु.सू.२७ अ.। अस्थनि। वंश-कन्विकायाम्। विश्वः। बाणे। मे.।

शल्यः (कः)। पुं। हरिद्वर्णीधाकारे तन्नामकमृगविशेषे। सजारु। तत्पर्य्यायाः,—श्वावित् शलाका शल्यः क्रकचपादः छेदारः शल्यमृगः वज्रशल्यः विलेशयः। तन्मांसगुणाः—गुरु स्निग्धं दीपनं श्वास-कासघ्नञ्च। रा.नि.व.१७। स्वादु पित्तघ्नं लघु शीतं विषघ्नञ्च। सु.सू.४६ अ.। मदनवृक्षे। मयना गाछ। अम.। श्वेतखदिरे। वै. निघ.। मत्स्यभेदे। शोलमाछ। रा.नि.व.१९। पोतलीभ्रे। वै.निघ.। विल्ववृक्षे। रा.नि.व.११। रक्तखदिरे। च.द.मेह.चि.। "विड्वराहदार्वीधवशल्यकानां।" शलाकायाम्। हे.च.।

शल्यकण्ठः। पुं। शल्लकीमृगे। सजारु। श.चा.।

शल्यकैटर्य्यः। पुं। मदनवृक्षे। मयना गाछ। रा.नि.व.८।

शल्यचिकित्सा। स्त्री। अस्त्रचिकित्सायाम्।

शल्यतन्त्रम्। क्ली। सौश्रुताष्टविधतन्त्रान्यतमे तन्त्रे। यथा—शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलीष्ठास्थि-बाल-नख-पूयास्रावान्तर्गर्भशल्योद्धारार्थं यन्त्र-शस्त्र-क्षाराग्निप्रणिधान-व्रणविनिश्चयार्थञ्च। सु.सू.१अ.।

शल्यदा। स्त्री। मेदायाम्। अभावे अश्वगन्धा। रा.नि.व.५।

शल्यपर्णिका (र्णी)। स्त्री। मेदायाम्। रा. नि.व.५।

शल्यमृगः। पुं। शल्लकीमृगे। शजारु।

शल्यलोम (न्)। क्ली। शल्लकीरोमणि। सजारुकाँटा। रा.नि.व.१९।

शल्या। स्त्री। मेदायाम्। रा.नि.व.५। विकङ्कतवृक्षे। नागबलीलतायाम्। वै.निघ.।

शल्योद्धरणम्। क्ली। विद्धशल्योत्पाटने। वं सं.२अ.।

शल्लम्। क्ली। वृक्षवल्कले। छाल। त्वचि। चामड़ा। श.र.।

शल्लः। पुं। भेके। श.र.।

शल्लकः। पुं। शालतरुविशेषे। शल्लकी वृक्ष। जटा.। शल्लकीमृगे। सजारु। हिं साहिल। गुणाः—"शल्लको वृंहणो बल्यः स्निग्धो वृष्यो रुचिप्रदः। वातश्लेष्महरो हृद्यो मधुरो धातुवर्द्धनः॥" भावि.२०अ.। क्ली। तरुवल्कले। श.र.।

शल्लकी। स्त्री। (Boswellia serrata) Indian olibanum. शालविशेषे। शलई, शालविशेष। हिं शालइ, शलग। सं शालयधूर्प। ता. कुंलि। तत्पर्य्यायाः,—गजभक्ष्या सुवहा सुरभिः सुरभी सुरभीरसा वसा कुन्दुरुकी ह्लादिनी गजप्रिया गजभक्षा गजाशना महारणा महिरणा महिरुहा ह्लादिनी शिल्लकी सल्लकी सिल्लकी सिल्लकी सिल्लभूमिका अश्वमूर्वी कुम्भी अस्त्रफला करका सुखसोदा सुगन्धा सुरभिस्रवा गजवल्लभा क्षुद्रा। गुणाः—"शल्लकी तुवरा शीता पित्तश्लेष्मातिसारजित्। रक्तपित्त-व्रणहरी पुष्टिकृत् ससुदीरिता।" भ.पू.१भ.वटादिव.। रा.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नि.व.११। See सल्लकी। शिलारस। शिलारस। च.सू.५अ। [सु.४अ.।

शल्लकीत्वक्। स्त्री। शिल्लकीवृक्षत्वचि। च.

शल्लकीद्रवः (रसः)। पुं। सिल्हके। कुन्दुरुकथोटी, शिलारस। जटा। च.द.वा.व्या.चि. अष्टादशप्रतीप्रसारणीतैले।

शल्ली। स्त्री। सल्लकीवृक्षे। सल्लकीवृक्षे। सजाड़। वै.निघ.।

शवम्। क्ली। लोहे। जले। मे.।

शवः। पुं, क्ली। मृतशरीरे। अम.।

शवकाम्यः। पुं। कुक्कुरे। शब्दर.।

शवरः। पुं। पानीये। हस्ते।

शवरलोध्रः। पुं। शावरलोध्रे।

शवलः। पुं। चित्रकवृक्षे। रा.नि.व.६। (ला, लो) स्त्री। शबलवर्णायाम् गवि। अ.टी.भ.। कर्बुरवर्णे।

शशः (कः)। पुं। बिलेशयस्तृगभेदे। शरगोश। सं खरहा। तें चिवुलपिल्लि। तत्पर्य्यायाः,—शूलिकः शूलीलोमकः वनाखुः लम्बकर्णः लोमकर्णः शूली। तन्मांसगुणाः—त्रिदोषघ्नम् दीपनम् श्रमकासघ्नञ्च। रा.नि.व.१७। शीतं लघु धारकं रूक्षं स्वादु कफपित्तघ्नम् वाते साधारणं ज्वरातीसारघ्नं सदा हितञ्च। भा.पू.१६। "शशको जाङ्गलश्चैव लघुर्व्यस्य दीपनः। रुचिकृत्तर्पणो बल्यस्त्रिदोषश्रमनो मतः। ज्वरे च पाण्डुरोगे च क्षये कासे गुदामये। राजयक्ष्मणि पाण्डौ च तथातीसारिणां हितः॥" अवि.२०अ. खोभ्रवृक्षे। खोले। गन्धबोल। मे.।

शशघातो (घ्नन्)। पुं। प्रसहजातीयपक्षिभेदे। बाज। सु.सू.४६अ.।

शशधरः। पुं। कर्पूरे। रा.नि.व.१२।

शशभृत्। पुं। कर्पूरे। हे.च.। भैष.का.व्या. गन्धद्रव्यकथने।

शशलोम (न्)। क्ली। शशकरोमणि। अम.।

शशशिम्बिका। स्त्री। जीवन्तीलतायाम्। रा.नि.व.३।

शशाङ्कः। पुं। कर्पूरे। रा.नि.व.१२।

शशाङ्कलेखा। स्त्री। सीमराज्यां। च.द.कुष्ठ.चि.। गुड़ूच्याम्।

शशाशङ्कुलिः (लो)। पुं। स्वनामख्यातफलशाकविशेषे। छिरकाँकुड़। तत्पर्य्यायाः,—बहुफला तण्डुली घूमा चेत्रसम्भवा क्षुद्रात्मा लोमशफला वृत्तफला। गुणाः—तिक्ता कटुः शीतला कटुरसयुक्ता कफापहा जरठा पाके अम्लमधुरा विदाहकृत् गुरुका रुचिकृत् दीपनी च। रा.नि.व.७।

शशादः (नः)। पुं। श्येनपक्षिणि। बाज। रा.नि.व.१९। अम.।

शशिकान्तः। पुं। चन्द्रकान्तमणौ। रा.नि.व.१३। क्ली। कुमुदे। श्वेत शुक्लि। रा.नि.व.१०।

शशिपर्णी। स्त्री। पठोले। वै.निघ.।

शशिपुष्पम्। क्ली। पद्मे। वै.निघ.।

शशिप्रभम्। क्ली। मुक्तायाम्। रा.नि.व.१३। कुमुदपुष्पे। नागकुल। शब्दमा.। स्त्री। ज्योत्स्नायाम्। जटा।

शशिप्रियम्। क्ली। कुमुदपुष्पे। मुक्तायाम्। वै.निघ.।

शशिरे(लि)खा। स्त्री। गुड़ूच्याम्। गुलञ्च। मे.। सीमराज्याम्। हाकुचबीज। भैष.कुष्ठ.चि.।

शशिवाटिका। स्त्री। पुनर्नवायाम्। प.मु.। रा.नि.व.५।

शशी (न्)। पुं। कर्पूरे। वै.निघ.२भ.चयरो. चि.लक्ष्मीविलासतैले।

शशोणम्। क्ली। शशकलोम्नि। अम.।

शष्कुलः। पुं। करञ्जवृक्षे। डहरकरञ्ज। शब्दर.।

शष्कु(स्कु)ली। स्त्री। कर्णरन्ध्रे। कर्णकूहर। शब्दर.। पिष्टकविशेषे। पूलिपिटे। च.चि.२अ.। तिलपिष्टके। तिलेर पिटे। गुणा.—गुरुः पुष्टिकरी। च.सू.२७अ.। मत्स्यभेदे। सोहारीति लोके। हिं सोरी। गुणाः—"शष्कुली ग्राहिणी हृद्या मधुरा तुवरा स्मृता।" भा.। तिलतण्डुलमाषकृतयवान्नाम्। शब्दच.। "सुधौतानां तण्डुलानां पिष्ठं सूक्ष्मं विधाय च। तत्प्रमाणं तत्र जलं स्थाप्यं चुल्ल्यां तु तत् पचेत्। अल्पमल्पं विकीर्य्याथ सेवयित्वा घनं पचेत्। घनीभूते तु उत्तार्य्यं तत्पर्पट्यां सुयुक्तितः। पूरयञ्च विधायाथ सिताश्रीफलदं तथा। विवृतप्रान्तामर्द्धचन्द्रसमानां कारयेत् सुधीः। एवं शष्कुलयः क्लाय्याः पाच्याः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खेदनयत्वके। एवच मोदका: कार्य्यास्ते हृष्या गुरवो मता:। वातपित्तप्रशमना: मलावष्टम्भकारका:। कफदा गुरव: प्रोक्तास्तथा तृप्तिकरा मता:॥" वै.निघ.। "पर्पटा लघवो रूक्षा शष्कुल्य: कफपित्तला:। मांसैरिक्षुविकारांश्च काश्मिकैश्चिल्लशष्कुलीम्। न भक्षयेत्.....॥" राज.।

शष्पम्। क्ली। बालतृणे। रा.नि.व.२३। नील दूर्व्वायाम्। वै.निघ.।

शस्त:। त्रि। प्रशस्ते। क्ली। शरीरे। त्रिका.।

शस्त्रम्। क्ली। तीक्ष्णलौहे। रा.नि.व.१२। भैष. क्षुद्ररो.चि. महानीलतैले। वै.निघ.२भ.अर्शश्चि. काञ्चनीलेपे। अस्त्रे। अस्त्र। शस्त्राणि विंशति: तदयथा—मण्डलाग्रं करपत्रं वृद्धिपत्रं नखशस्त्रं सुद्रिका उत्पलपत्रम् अर्द्धधारं सूचीकुशपत्रम् आटोमुखं शरारीमुखम् अन्तर्मुखं विकूर्चकं कुठारिका व्रीहिमुखम् आरामुखं वेतसपत्रं वड़िशो दन्तशङ्कु: एषणी चेति। एतानि छेद्याद्यष्टविधकर्म्मणि उपयुज्यन्ते। तत्र मण्डलाग्रकरपत्रे छेदने लेखने च, वृद्धिपत्रनखशस्त्रसुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च, सूचीकुशपत्राटीमुखशरारी-मुखान्तर्मुखविकूर्चकानि विस्रावणे। कुठारिका व्रीहिमुखारामुखवेतसपत्राणि सूची च व्यधने। वड़िशो दन्तशङ्कुश्चाहरणे। एषण्येषणे, आनुलोम्ये च। सूच्य: सेवने। इत्यष्टविधे कर्म्मणि उपयोगि: शस्त्राणां व्याख्यात:। सु.सू. ८अ.। एवां विशेषासत्त्वपर्य्यायेषु मृग्या:। शस्त्रसन्यत् यथा—सुयत्न-सुलोह-सुधार-सुरूपतादीनि। शस्त्रदोषा: - वक्रता-कुण्ठता-खण्डता-खरधारतातिस्थूलतातिदीर्घतातिक्षुद्रता इति। करपत्रस्ते अतो विपरीतगुणसादृश्यात्। शस्त्रधाराभेदा यथा—मासूरी, अर्द्धमासूरी, कैञ्चिकी, अर्द्धकैञ्चिकी चेति। तत्र भेदनानां मासूरी लेखनानामर्द्धमासूरी व्यधनविस्रावणानां कैञ्चिकी छेदनानामर्द्धकैञ्चिकी च। तेषां पाचनापि त्रिधा चारीदक तैलेषु। तेषां निशाणार्थं शुक्लशिला माषवर्णा धारसंस्थापनार्थं शाल्मलीफलकम्। सु.सू.८अ.।

शस्त्रकम्। क्ली। लौहे। प.मु.।

शस्त्रकर्म्म। क्ली। छेदने। काटा, छेंड़ा। तच्चाष्टविधं ज्ञेयम् भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यञ्चेति। शस्त्रपदञ्च महत्स्वपि पाकेषु द्राङ्मुखं व्राङ्मुखं वा भवेत्। सु.सू.५अ.।

शस्त्रकोषतरु:। पुं। महापिण्डीतकवृक्षे। रा.नि.व.९।

शस्त्रचूर्णम्। क्ली। लौहकिट्टे। मण्डूर। वै. निघ.।

शस्त्रप्रणिधानम्। त्रि। अस्त्रचालने, छेदनभेदनादिरूपौषधे। च.सू.११अ.।

शस्त्राङ्गा। स्त्री। चाङ्गेर्य्याम्। आमरुल शाक। रा.नि.व.५।

शस्त्रायसम्। क्ली। तीक्ष्णलौहे। ईस्पात। रा.नि.व.१३।

शस्त्री (इन्)। त्रि। शस्त्रधारिणि। स्त्री (स्त्री)। क्षुरिकायाम्। मे.।

शस्य(स्य)म्। क्ली। कोमलतृणे। नरम गाछ। अ.टी.भ.। वृक्षादिजातफलादौ। धान्यादौ। व्रीहियवादौ च। स्मृति:।

शस्यध्वंसी (इन्)। पुं। तुम्बुरुवृक्षे। तुँद गाछ। शब्दच.।

शस्यमञ्जरी। स्त्री। धान्यादिकणिशे। शस्येर शीश। अम.।

शस्यशूकम्। स्त्री। शस्यशूकायाम्। शस्येर शुँड़ा। अम.।

शस्यसम्बर: (रण:)। पुं। अश्वकर्णनामलतायाम्। लताशाल। रा.नि.व.९।

शस्यारु: (वन:)। पुं। वृक्षशमीवृक्षे। शब्दर.।

शाकम्। क्ली, पुं। पत्रपुष्पादौ। शाक। अम। तत् षड्विधम्—"पत्रं पुष्पं फलं नालं कन्दं संक्षेदजञ्चेति" राज.। तच्चतुर्विधमिति अवि:। "शाकञ्चतुर्विधं प्रोक्तं पत्रं पुष्पं फलं तथा। कन्दञ्चापि समुद्दिष्टं वक्ष्याम्येतत् पृथक् पृथक्।" अवि. १६अ.। तद्गुणा:—विष्टम्भित्वं गुरुत्वं रूक्षत्वं मलवर्द्धकत्वं पाकलघुत्वञ्च। च.द.। दोषा:—शाकं भिनत्ति वपुरस्रि निहन्ति नेत्रं वर्णं विनाशयति शुक्रमयासृजञ्च। प्रज्ञाक्षयञ्च कुरुते पलितञ्च नूनं हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञा:॥" "स्निग्धं निष्पीड़ितरसं हिंगु स्नेहादिसंस्कृतम्।" इति व्यवहारविधि:। राज.२प.। "शाकेषु सर्व्वे निवसन्ति रोगास्ते हेतवो देहविनाशनाय। तस्माद्बुध: शाकविवर्जनन्तु कुर्य्यात्तथान्नेषु स एव दोष:॥" भापू.१भ.शाक। प्राय: सर्व्वाणि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाकानि विष्टम्भीनि गुरूणि च। रूक्षाणि बद्धवर्चांसि सृष्टविण्मारुतानि च। पिण्डालुका बला भिण्डी चिच्चुकान्या वल्ला.....। एते श्लेष्मकराः शाका वातलाग्निप्रशान्तकाः। सर्व्वे शाका दृष्टिहरा वीर्य्यलात्तण्डुलीयकं। तथैव शातपुष्पा च ...न्ती कासमर्द्दकः। आनूपकञ्च वेवाय गृञ्जनी चापमर्द्दकः। किराततिक्तसहितास्त्रिफलाः पित्तहरा मताः।" अचि.१६अ.। सा. शाकपाकविधिर्यथा—"छिन्नजीरयुते तैले चिपेच्छाकं सुखस्थितं। लवणं चाम्लचूर्णादिसिद्धे छिन्नूदकं चिपेत्॥ इत्येवं सर्व्वशाकानां साधनोऽभिहितो विधिः॥" पुं। वृक्षविशेषे। सेगुन गाछ। रा.नि.व.९। "मसृणकर्कशोदरपृष्ठदलो वृक्षविशेषः।" सु.सू.१८अ.। शाकफले। शेगुनफल। "राजाहं दाडिमं शाकम्।" वा.सू.१५अ.।

शाकचुक्रिका। स्त्री। चिञ्चायाम्, तिन्तिड्याम्। तेँतुल गाछ। रा.नि.व.११।

शाकटः। पुं। श्लेष्मान्तकवृक्षे। चालता गाछ। रा.नि.व.११। धववृक्षे। धाओया गाछ। र.मा.।

शाकटमुखम्। क्ली। पटवासे। गन्धचूर्ण। वै.निघ.।

शाकटाख्यः। पुं। धववृक्षे। र.मा.।

शाकटीनः। पुं। २० तुलापरिमाणे। २००० पले। हे.च.प.प्र.।

शाकतरुः। पुं। शाकवृक्षे। शेगुन गाछ। श्र.मा.।

शाकद्रुमः। पुं। वरुणवृक्षे। वै.निघ.।

शाकपत्रः। पुं। शिग्रुवृक्षे। सजिना गाछ। रा.नि.व.७।

शाकपाकी (इन्)। पुं। सुनिषण्णके। शुशुनि शाक। वै.निघ.।

शाकफलम्। क्ली। तन्नामकवृक्षफले। शेगुन फल। सु.सू.३८अ.।

शाकमत्स्यम्। क्ली। मत्स्यव्यञ्जनभेदे। गुणाः—मत्स्यकशब्दे दृश्याः। राज.।

शाकवालेयः। पुं। ब्रह्मयष्ट्याम्। वामुनहाटी। श्र.र.।

शाकश्भरीभवम्। क्ली। रोमकलवणे। सांभर लवण। भा.।

शाकश्भरीयम्। क्ली। रोमकलवणे। तत्पर्य्यायाः,—रौमकं रौमं रौमकं रौमलवणं साम्भरं साम्बरं रसुकं। अपिच शाकम्भरीयं कथितं गड़ाख्यं रौमकं तथा। गुणाः—गड़ाख्यम् लघु वातघ्नमतृष्णं भेदि पित्तलं। सौम्यं व्यवायि सूक्ष्मवाभिष्यन्दि कटुपाकि च॥

शाकयोग्यः। पुं। धान्यके। धनिया। रा.नि.व.६।

शाकराजः (ट्)। पुं। वास्तूकवृक्षे। बेतो शाक। रा.नि.व.७। भा.।

शाकवरः। पुं। जीवशाके। प.मु.। वा.उ.३७अ.। स्त्री (री)। जीवन्तीशाके। वै.निघ.।

शाकवल्ली। स्त्री। लताकरञ्जके। वै.निघ.।

शाकविन्दः (ल्वः) (कः)। पुं। वार्त्ताकुवृक्षे। जटा.। विका.।

शाकवीजम्। क्ली। शाकतरुबीजे। शेगुनेर बिचि। "मधुकं शाकवीजञ्च।" भा.४भ. योनि.रो.गर्भचि.। मरुजतरुबीजे। च.द.गर्भाधिकारे। शाकबीजे। शाकेर बिचि।

शाकवीरः। पुं। वास्तूकवृक्षे। बेतो शाक। पुनर्नवायाम्। विका.। जीवशाके। रा.नि.व.७।

शाकवृक्षः। पुं। (Tectona grandis, Teak tree.) स्वनामख्यातवृक्षे। शेगुन गाछ। हिं शगुण। उत्. सिंगुरु। ता.टेक। वम्. खरपच। मं सीये। कं नैगु। तें टेकुचेट्टु। तत्पर्य्यायाः,—अनिलः अर्णः महापत्रः शाकतरुः शाकवृक्षः शाकाख्यः खरपत्रः अर्ज्जुनीपमः ककुभपत्रः खरपत्रः महीरुहः श्रेष्ठकाष्ठः स्थिरसारः गृहद्रुमः। गुणाः—सारकः पित्तदाहश्रमघ्नः सरः रूक्षश्च। तद्बल्कलं कषायम्। रा.नि.व.९।

शाकशाकट(किन)म्। क्ली। शाकक्षेत्रे। शाकेर क्षेत। रा.नि.व.२। हे.च.।

शाकशालः। पुं। महानिम्बे। महानिम। हिं बकाइन। वै.निघ.।

शाकश्रेष्ठः। पुं। वास्तुकवृक्षे। शरः। रा.नि.व.२३। स्त्री (ष्ठा)। लघुजीवन्तीलतायाम्। जीवन्ती। रा.नि.व.३। डोड़ीवृक्षे। लतावृहती। वार्त्ताकी। वेगुण गाछ। रा.नि.व.४। कुष्माण्डलतायाम्। कुमड़ा गाछ। तरस्वुजलतायाम्। हरबूज गाछ। वै.निघ.।

शाका। हरीतक्याम्। श्र.त्ल्यः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाकाख्यम्। क्ली। व्यञ्जनयोग्यफलमूलपत्रपुष्पादौ। वाञ्जनाई फल, मूल, पाता, फूल इत्यादि शाकपदवाच्य। अम.। "मूलपत्रकरीराग्रफलकाण्डाधिरूढ़कम्। त्वक् पुष्पं करकश्चैव शाकं दशविधं स्मृतम्" अ.टी.भ.। पुं। शाकवृक्षे। शेगुन गाछ। र.मा.।

शाकाङ्गम्। क्ली। मरिचे। रा.नि.व.६।

शाकान्नम्। क्ली। शाकयुक्तभक्ते। गुणाः—"शाकान्नं लेखनं चोष्णं रूक्षं वै दोषद्रावकम्।" वै.निघ.।

शाकाम्लम्। क्ली। वृक्षाम्ले। तेँतुल। रा.नि.व.६। चिञ्चाम्ले। तेँतुलेर अम्बल। रा.नि.व.११।

शाकाम्लभेदनम्। क्ली। चुक्रनामकक्षाङ्किकभेदे। रा.नि.व.१५। See सुक्तचुक्रम्।

शाकालावुः। स्त्री। राजालावुके। वड़लाउ गाछ। रा.नि.व.७।

शाकुनिकः। पुं। शकुनशास्त्रज्ञे। पक्षिमारके। पाखीमारा। अम.।

शाकुनेयः। पुं। पक्षिभेदे। डुण्डुल पक्षी। रा.नि.व.१९।

शाखा। स्त्री। पल्लवे। डाल। अम.।

शाखाकण्टः। पुं। क्षुद्रवृक्षे। मनशा गाछ। रा.नि.व.८।

शाखापित्तम्। क्ली। हस्तपादांसमूलदाहे। मुखताल्वोष्ठादिषु सदाह-दवथौ। हात पा ओ मुखादि जाला। "सदाहमुखताल्वोष्ठे दवथुश्चुरादिषु। पाणिपादांसमूलेषु शाखापित्तं तदुच्यते॥" रा.नि.व.२०।

शाखामृगः। पुं। कपौ। प.मु.।

शाखाम्ला। स्त्री। तिन्तिड़ीवृक्षे। रा.नि.व.६।

शाखारोगः। पुं। रक्तादिधातुजेषु त्वग्जेषु च वीसर्पगुल्मादिषु रोगेषु। च.सू.११अ.।

शाखालः। पुं। जलवेतसे। रा.नि.व.९।

शाखावातः। पुं। हस्तपदादिगतवातरोगे। वैद्यकम्।

शाखाशिफा। स्त्री। शाखाजातशिफायाम्। वटादिव नामाल। वै.निघ.।

शाखी (न्)। पुं। वृक्षे। प.मु.।

शाखोटः (कः)। पुं। (Streblus asper, स्वनामख्यातवृक्षे। शेओड़ा गाछ। हिं सहोरा, रसा सिओड़। कं आखोड़मरम। मं साहोड़। तें भारणिकैचेट्टु, वरन्की। वम् साहोर तत्पर्य्यायाः,—पिशाचद्रुः पीतफलः कर्कशपत्रः शल्लिनीवासः भूतवृक्षः सकटः अक्षधरः भूः करञ्जगवाची घूकावासः रूक्षपत्रः पीतः कैशिकः क्षीरनाशः। गुणाः—तिक्तोष्णः पित्तकरः वातघ्नश्च। रा.नि.व.९। एतद्बीजं श्वित्रहरं लेपनेनेति लोके। रक्तपित्तार्शोवातश्लेष्मातिसारजित्। भा.।

शाङ्करः। पुं। सोमलतायाम्। सु.चि.२९अ.। वृषे। त्रिका.। स्त्री (री)। शमीवृक्षे। वै.निघ.।

शाङ्गितः। पुं। शस्यिपर्णभेदे। छोला। वै.निघ.।

शाङ्कचो। स्त्री। शङ्कोचमत्स्ये। 'शाँकोच माछ। श.च.।

शाङ्कुष्टा। स्त्री। गुञ्जायाम्। र.मा.।

शाङ्खी। स्त्री। शालिञ्चशाके। रत्न.चि.९अ.।

शाटिका। स्त्री। शस्याम्। शठी। अ.टी.भ.।

शाड्वलः। पुं। नीलदूर्व्वायाम्। वै.निघ.।

शाणः। पुं। माषचतुष्टयमिते मानविशेषे। ४ माषा। "माषैश्चतुर्भिः शाणः स्यात्।" प.प्र.। "विन्दुभिश्चाष्टभिः शाणः प्रोक्तश्च भिषगुत्तमैः।" कषणप्रस्तरे। कष्टिपाथरे। अम.। लोहादिनिशाणचक्रे। शाण। मे.।

शाणिः। पुं। पटशाकवृक्षे। पाटशाक। श.मा.।

शाण्डिल्यः। पुं। बिल्ववृक्षे। रा.नि.व.११।

शातः। त्रि। क्षणिते। क्षणे। पुं। धुस्तूरवृक्षे। धूतुरागाछ। अम.।

शातकुम्भम्। क्ली। सुवर्णे। रा.नि.व.१३। पुं। धुस्तूरवृक्षे। अम.। करवीरवृक्षे। मे.।

शातकौम्भम्। क्ली। सुवर्णे। भ.वि.।

शातपत्रकः। पुं। चन्द्रप्रकाशे। श.च.।

शातभीरुः। पुं। मदनमालीनाममल्लिकावृक्षे। "शातभीरुर्भद्रवल्ली भूमिमण्डाऽष्टपादिका।" र.मा.।

शातला। स्त्री। स्वनामप्रसिद्धसेहुण्डभेदे। पीतसेहुण्डे। चर्म्मकषा इति लोके। मनसाभेद। गुणाः—"शातला कटुका पाके वातला शीतला लघु। तिक्ता शोथकफानाहपित्तोदावर्त्तरक्तजित्।" भा.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शादः। पुं। कर्दमे। कोमलतृणे। अम०।

शाद्वलः। पुं। दूर्व्यायाम्। वा.चि.२अ.।

शाद्वलाभः। पुं। मन्दविषव्यधिकभेदे। "एभिर्दष्टे वेदना वेपथुश्च गात्रस्तम्भः कृष्णरक्तागमश्च। शाखादष्टे वेदना चोष्मिति दाहस्वेदौ दंशशोफावरश्च॥" सु.कल्प.८अ.।

शानः। पुं। ४ माषके। ४ मांषा। "माषैश्चतुर्भिः शानः स्यात्।" प.प्र.१ख। ३ माषके च। ७ मांषा। अत्रि।

शानपादः। पुं। चन्दनपीठिकायाम्। चन्दन-पिड़ी। भारतं।

शानी। स्त्री। इन्द्रवारुण्याम्। राखालशशा। शब्दच०।

शान्तनुः। पुं। कुधान्यविशेषे। सु.सू.४६अ.। कर्कटिकायाम्। काँकुड़गाछ। र.मा.।

शान्ता। स्त्री। आमलक्याम्। रा.नि.व.११। See अकरा। नीलदूर्व्वायाम्। रेणुकायाम्। शमीवृक्षभेदे। तत्पर्य्यायाः,—शुभा भद्रा अपराजिता जया विजया। तद्गुणाः—शमीसदृशाः। रा.नि.व.८।

शान्तिः। स्त्री। भार्य्याम्। वामनहाटी।

शापटिकः। पुं। मयूरे। शब्दकल्प०।

शाबरवल्कलम्। क्ली। लोध्रत्वचि। वा.चि. ९अ.।

शामोलम्। क्ली। भस्मनि। छाई। मा.को.।

शाम्बरः (रिकः)। पुं। लोध्रवृक्षे। वै.निघ.।

शाम्बरी। स्त्री। मूषिकमार्य्याम्। इन्दुरमारी गाछ। वै.निघ.।

शाम्बु(म्बू)कः। पुं। शम्बूके। शब्दर०।

शाम्भवम्। क्ली। देवदारुणि। रा.नि.व.१२।

शाम्भवः। पुं। गुग्गुलौ। रा.नि.व.१२। विष-भेदे। शब्दच०। कर्पूरे। रा.नि.व.१२। शिवमल्लि-कायाम्। वरुणवृक्षे। रा.नि.व.१०।

शाम्भवी। स्त्री। धान्यादिकच्चुक्याम्। धान्या-दिर खोला। रा.नि.व.१६। नीलदूर्व्वायाम्। रा. नि.व.८।

शायकपुङ्खा। स्त्री। शरपुङ्खायाम्।

शायिका। स्त्री। निद्रायाम्।

शारङ्गः। पुं। हरिणे। चातके। गजे। मयूरे। अ.टी.भ.।

शारदम्। क्ली। शुक्लपद्म। रा.नि.व.१०। पुं। शरत्कालीन-शालिधान्यभेदे। अयं षष्टिकादीन-गुणः। च.सू.२७अ.। हरितमुद्गे, धूसरमुद्गे। वेसोमुग। रा.नि.व.१६। र.मा.। वकुलवृक्षे। रा.नि.व.२३। कृष्णमुद्गे। कालमुग। रा.नि.व. २३। सप्तपर्णवृक्षे। छातिम गाछ। अम.। च. द.मेह.चि.। "हयस्य शारदस्य च"। सरिफायाम्। महाराष्ट्रीलतायाम्। काँचड़ा। कासतृणे। रा. नि.व.२३। रोगे। वत्सरे। मे.।

शारदजलम्। क्ली। शरत्कालीनजले। See जलम्।

शारदमल्लिका। स्त्री। शरत्कालभव-मल्लिका-याम्। शारदमल्लिका। रत्ना.।

शारदमुद्गः। पुं। हरितमुद्गे। "कपित्थान् शारदान् मुद्गान्।" सि.यो.अ.ज्वा.चि.।

शारदयावनालः। पुं। शारदीय-यावनाले। गुणाः—श्लेष्मकरः पिच्छिलः गुरुः शीतलः मधुरः द्रव्यः बल-पुष्टिदश्च। रा.नि.व.१६।

शारदा। स्त्री। काष्ठशारिवायाम्। **अनन्तमूल**। रा.नि.व.१२। ब्रह्मीशाके। रा.नि.व.५।

शारदिकः। पुं। शरत्कालीनरोगे। व्याक.।

शारदी (दिन्)। पुं। सप्तपर्णवृक्षे। छातिमगाछ। अम.। कच्चटशाके। काँचड़ाशाक। र.मा.। अपराजितायाम्। ज.द.। स्त्री। (दी) जलपिप्प-ल्याम्। शारिवायाम्।

शारिः (का)। स्त्री। स्वनामख्यातपक्षिणि। शालिक, मयना। चिका.। शालिधान्यभेदे। च. सू. २७ अ.।

शारिवा। स्त्री। (Hemidesmus Indicus, Syn. asclipias pseudosarsa.) स्वनामप्रसिद्धलतायाम्। "जम्बूपत्रा दुग्धगर्भा वल्ली स्वनामख्याता।" सु.सू.३८अ.। **अनन्तमूल**। हिं अनन्तमूल, उपलसरी। उत्. गयापानमूल। को श्वेतवेल। तत्पर्य्यायाः,—गोपी श्यामा अनन्ता उत्पलशारिवा। सा द्विधा श्वेता कृष्णा चेति। भा.पू.१भ. काष्ठशारिका चेचुरापत्रे प्रसिद्धा। गुणाः—शारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु [illegible] श्यामाशारुचिकृच्छ्रास्रकासवि[illegible]पूयं विदोषघ्नं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तप्रदरज्वरातीसारनाशनञ्च । मद्.व.व.१ । मधुरे स्निग्धे भूतघ्नी कुष्ठकण्डूज्वरहरे दीपदुर्गन्धहरे च । रा.नि.व.१२ । शुक्रलं स्निग्धं स्वादु अग्निमान्द्यादिहरञ्च । भा.पू.१भ. । वै.निघ.सा.ज्व.चि.अर्कादि. दुरालभायाम् । पटोलादौ, वाय्यन्तादौ । वै.निघ. उन्मा.चि.सारस्वतघृते ।

शारी । स्त्री । कुशे, शरपत्रकुशे, मुञ्जतृणे । रा. नि.व.८ । शारिकायाम् ।

शारीरम् । क्ली । (Anatomy.) सुश्रुतादिवैद्यकसंहितासु शरीरमधिकृत्य कृते शरीरतत्त्वव्याख्याने अन्यतमे स्थाने । यत्र शुक्रशोणितशुद्धि-गर्भावक्रान्ति-गर्भ-शरीर संख्या मर्म्मशिरा-शिराव्यध-धमनीगर्भिणीव्याकरणानि कृतानि । सु.शा.च.शा. १अ. । पुं । हर्ष । मे. । See शरीरम् ।

शारीरकग्रन्थः । पुं । श्रीमुखविरचितशारीरशास्त्रे ।

शारीरगुणः । पुं । देहिकगुणसमष्टौ । सच विंशतिसंख्यकः, यथाः—लघु-गुरु-शीतोष्ण-स्निग्धरुक्ष-मन्दतीक्ष्ण-स्थिरसरमृदु-कठिन-विशद पिच्छिल-खर-सश्लक्ष्णस्थूलसूक्ष्मसान्द्रद्रवा इति । च.सू.१अ. ।

शारीरज्वरः । पुं । देहगतज्वरे । लक्षणं—"शारीरो जायते पूर्व्वं देहे मनसि मानसः । इन्द्रियाणाञ्च वैकृत्यं देहसन्तापलक्षणम् ॥" च.चि. ३अ. ।

शारीरव्रणः । पुं । शरीरसम्बन्धिवातादिदोषजनितव्रणे । स द्विविधः शारीरागन्तुभेदेन । यथा —"द्विधा व्रणः स विज्ञेयः शारीरागन्तुभेदतः । दोषैराद्यस्त्रयोरन्यः शस्त्रादि-क्षतसम्भवः । स्रव्यः कठिनसंस्पर्शी मन्दस्रावी महारुजः । तुद्यते स्फुरति स्रावी व्रणो मारुतसम्भवः । दहनामोहज्वरक्लेद-दाहदुष्टव्रदारणैः । व्रणं पित्तकृतं विद्याद्गन्धैः सावैश्च पूतिकैः । बहुपिच्छो गुरुः स्निग्धः श्लिमितो मन्दवेदनः । पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः । रक्तो रक्तसुतो रक्तात् द्विजिह्वः स्यात्तदन्वयैः । लङ्मांसजः सुखे देशे तरुणस्यानुपद्रवः । धौमतोऽभिनवः काले सुखे साध्यः सुखं व्रणः । गुणैरन्यतमैर्हीनस्ततः कृच्छ्रो व्रणः स्मृतः । सर्व्वैर्विहीनो विज्ञेयस्त्वसाध्यो भूर्य्युपद्रवः ॥" इत्यादि । मा.नि. ।

शार्क्करः । पुं । शर्करायाम् । चिनि । अ.र. ।

शार्कंकः । पुं । दुग्धफेने । शर्करापिण्डे । मे.

शार्कंरः । पुं । लोध्रवृक्षे । दुग्धफेने । मे. ।

शार्करमद्यम् (शीधुः) । क्ली, पुं । शर्करा-घातकीसिद्धमद्ये । लक्षणं—"शर्कराधातकीतोय-कथितैः शार्करी मता ।" इति । द्रव्यगुणमाल. गुणाः—शीतं वृष्यं दीपनं मोहनञ्च । रा.नि. १४ । अन्यः शर्कराजाततीक्ष्णमद्ये । गुणाः—म रुच्यः दीपनः वस्तिशोधनश्च । सु.सू.४५अ. ।

शार्करिलः । त्रि । शर्करान्वितभूमिजे । शर्करा भूयिष्ठे । व्याक. ।

शार्ङ्गम् । क्ली । आर्द्रके । आदा । रा.नि.व.६ ।

शार्ङ्गधरः । पुं । स्वनामख्यात-चिकित्सासंग्रहकारे । ज्वरविग्रहीकारे ।

शार्ङ्गधरदीपिका । स्त्री । आटमल्लकृते शार्ङ्गधरटीकाविशेषे ।

शार्ङ्गवेरिकः । पुं । गुण्डोसमानवर्णे स्थावरविषभेदे । अग्नि.३स्थान. ५६अ. ।

शार्ङ्गष्टा । स्त्री । काकजङ्घायां । काँटा गुड़ काँउलि । सु.चि.२३अ. । काकमाच्याम् । गुञ्जायाम् । सु.सू.३८अ. ।

शार्ङ्गी(ङ्गी)ष्टा । स्त्री । महाकरञ्जे । ऽहस्व करञ्ज । रा.नि.व.९ । वा.उ.२अ. । लताकरञ्जे काकमाच्याम् । वै.निघ. ।

शार्दूलः । पुं । व्याघ्रे । रा.नि.व.१९ । चित्रकवृक्षे । रा.नि व.६ । तदाख्य-पक्षिविशेषे । धरणि. । सरभे । मे. ।

शार्दूलकन्दः । पुं । अरण्यपलाण्डौ ।

शार्दूलजम् । क्ली । व्याघ्रनखे । नखी । वै.निघ. ।

शार्व्वरी । स्त्री । रात्रौ । अ.टी.भ. । रोध्रे । लोध्र । वै.निघ. ।

शालः । पुं । राले । धूना । रा.नि.व.१२ । हाले । मत्स्यभेदे । शाल माछ, गजाड़ । त्रिका. । वृक्षे । रा.नि.व.२ । लकुचवृक्षे । रा.नि.व.९ । (Shorea robusta.) स्वनामख्यातवृक्षे । शाल गाछ । हिं शाल, शालवा । तें एपचेट्टु । ता. कुङ्गिलियम् । गुजं. गल । गुणाः—..... कषायः स्यात् व्रणस्वेदकफकिमीन् । व्रध्नविद्रधिवार्धिर्य्य योनिकर्ण-गदान् हरेत् ॥" भा.पू.१भ. वटादिः । शल्की । सु.चि.९अ. । अर्ज्जुनवृक्षे । प्रियालवृक्षे । वै.निघ. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शालकम्। क्ली। नाड़ीशाके। पाटशाक। वै.निघ.।

शालकल्याणी। स्त्री। खनामख्यात पक्षशाकविशेषे। गुणाः—"शाकं गुरु च रूक्षञ्च प्रायो विष्टभ्य जीर्य्यति। मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम्॥" च.सू.२७अ.।

शालजः। पुं। शालमत्स्ये। शाल माछ। शब्दर.।

शालञ्चः। पुं। शालिञ्चशाके।

शालद। शालपीतशालयोः। शाल, पेय्राशाल। सा.कौ. शिलाजतुशोधने।

शालनम्। क्ली। हरितके। शाकशब्दि। वा. चि.७अ.।

शालनिर्य्यासः। पुं। राले। धूनो। रा.नि. व.१२। भा.म.४भ. पादस्फुटचि। सर्ज्जवृक्षे। रा. नि.व.९।

शालपत्र-समपत्री। स्त्री। शालपर्ण्याम्। शालपाणि। प.मु.। रत्ना.।

शालपर्णिका। स्त्री। सुरायाम्। एकाङ्गी, मूरा। वै.निघ.।

शालपर्णी। स्त्री। (Desmodium gangeticum. Syn. Hedysarum gangeticum.) खनामख्यातवृक्षे। शालपाणि। हिं सरिवन। तत्पर्य्यायाः,—सुदला सुपत्री स्थिरा सौम्या कुमुदा गुहा ध्रुवा विदारीगन्धा अंशुमती सुपर्णिका दीर्घमला दीर्घपत्रिका वातघ्नी पीतिनी तन्वी सुधा सर्व्वानुकारिणी शोषघ्नी सुभगा देवी शोथघ्नी नियला व्रीहिपर्णिका सुमूला सुरूपा शुभपत्रिका सुपर्णी शालिपत्री शालिदला विदारी सालपर्णी एकमूला अंशुमती शालानी शालिका दीर्घाङ्गिः दीर्घपत्रा। गुणाः—"शालपर्णी गरच्छर्द्दिज्वरश्वासातिसारजित् शोष दोषक्षयहरी बृंहण्युक्ता रसायनी॥ तिक्ता विषहरी स्वादुः क्षतकासक्रिमिप्रणुत्॥" भा.। रा.नि.व.४। See अंशुमती।

शालपर्ण्यादिः। पुं। तदादिद्रव्यगणे। यथा —शालपर्णी - पृश्निपर्णी बाट्याह्वालक बिल्वशलाटुषु। शालपाणि, चाकुले, वेलेड़ा, वेलशुँट। च.द.र.पि.चि. शालपर्ण्यादिः। "शालपर्णीबिलाबिल्वैः पृश्निपर्ण्या च साधिता। दाड़िमाम्ला हिता पेया पित्तश्लेष्मातिसारिणाम्॥"

शालमर्कटः (कः)। पुं। दाड़िमवृक्षे। वै.निघ.।

शालरसः। पुं। राले। धूनो। रा.नि.व.१२।

शालवः। पुं। लोध्रवृक्षे। शब्दर.।

शालवर्गः। पुं। शालसारादिवर्गे। भा.।

शालवेष्टः। पुं। शालनिर्य्यासे। धूनो। विका.।

शालशाकम्। क्ली। नाड़ीशाके। वै.निघ.।

शालसारः। पुं। शालवृक्षे। सु.सू.३८अ.। हिङ्गुवृक्षे। विश्वः।

शालसारादिः। पुं। तदादिद्रव्यगणे। यथा —"शालयुग्मं करञ्जौ द्वौ खदिरश्चन्दनद्वयम्। गर्द्दभाण्डोऽर्ज्जुनीभूर्जौलोध्रयुग्मधवास्तथा। शिरीषागुरुकालीयपूगपूतिककर्कटाः। शालसारादिरप्येष गणः श्लेष्मगदापहः॥" शालयुग्मं शालप्रियालौ। गर्द्दभाण्डो भाँटिरिति प्र.। पूतिकौ गन्धभादुलिः। सा.कौ.।

शाला। स्त्री। तरुशाखायाम्। गृहे। विका.।

शालाकिकूटकम्। क्ली। चाणक्यमूलके।

शालाकी (इन्)। पुं। अस्त्रवैद्ये।

शालाक्यम्। क्ली। आयुर्व्वेदस्य अष्टविधतन्त्राण्यतमे। तच्च ऊर्द्ध्वजत्रुगतरोगाणां श्रवणनयनाद्याश्रितरोगाणाञ्चोपशमनार्थम्। सु.सू.१अ.। "शिरोरोगा नेत्ररोगाः कर्णरोगा विशेषतः। मुखरूक्षकण्ठमन्यासु ये रोगाः सम्भवन्ति हि। तेषां प्रतीकारकर्म्म नासावर्त्त्यञ्जनानि च। अभ्यङ्गसुखगण्डूषक्रियाः शालाक्यनामकाः॥" वैद्य.सं.२अ.।

शालाङ्गारः। पुं। कर्म्मकारशालायाम्। कामार शालेर आगुन। रस.चि.९अ.। शालकाष्ठाङ्गारे।

शालाजिरः। पुं। शरावे। शरा। विका.।

शालाञ्चिः। पुं। शाकभेदे। शालिञ्चशाक। शब्दर.।

शालानी। स्त्री। विदार्य्याम्। शालपाणि। शब्दर.।

शालामर्कटकम्। क्ली। चाणक्यमूले। रा.नि. व.७। बालमूलके। भा.पू.१भ. शा.व.।

शालामुखः। पुं। कृष्णशूकतण्डुलव्रीहिधान्ये। "शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते।" भा. पू.१भ.धा.व.।

शालामृगः। पुं। शृगाले। हारा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शालावृकः। पुं। प्रसङ्गजातीय-शृगालविशेषे। केउ। विड़ाले। रा.नि.व.१९। वानरे। कुक्कुरे। अम.। मृगे। हरिणे। शब्दर.।

शालिः(धान्यम्)। पुं, क्ली। हैमन्तिकधान्ये। आमन धान्य, हैमन्तिक धान। दीर्घभेदेन तस्य नानाभेदा दृश्यन्ते। ते च यथा—शालिर्महाशालिः कलमः तूर्णकः शुकनाहृतः सारामुखः दीर्घशूकः रौद्रशूकः सुगन्धकः पतङ्गः तपनीयश्च। एते निर्दोषाः शालयः। गुणाः—बल्वाल्पवर्चसः स्वादुपाकरसाः स्निग्धा वृष्याः कषायानुरसा लघवः पथ्या मूत्रला हिमाश्च। वा.सू.६अ.। न मधुरा वीर्य्यतः शीता लघुपाका बलावहाश्च। सु.सू.२८ अ.। शालिः कलमः सुगन्धकः शुकनाहृतः महाशालिः शीतभीरुकः रौद्रपुष्पकः महिषमस्तकः कट्टमकः पाण्डुकः महादूषकः पुष्पाण्डकः पुण्ड्रौकः काञ्चनकः दीर्घशूकः हायनकः दूषकः महादूषकश्च। सु.सू.४६अ.। गुणाः—मधुराः शीताः लघुपाका बलकराः पित्तघ्नाः वातकराः स्निग्धाः बल्वाल्पवर्चसश्च। राज.। शालिसामान्यगुणाः—मधुरा रूक्षाः। राजनिघण्टुस्तु शालिधान्यस्य दशभेदानाह, राजान्नषष्टिकक्लक्षणरक्तमुण्डस्थूलाणुगन्धनिरापत्रोद्दय इति दश भेदाः। एषां विशेषाः स्वपर्य्याये द्रष्टव्याः। "राजान्नं दीर्घशूकः खरिपुदिवसजः षष्टिको वर्षतो द्वौ निःशूको मुण्डशालिः स्वगुणविशदितः स्वाभिधानास्त्वयोऽन्ये। मासैर्योऽन्यस्त्रिभिः स्यात् स भवति निरपो वापि दृष्टश्चसम्भूरेषः स्यादव्रीहिसंज्ञस्तदिति दशविधाः शालयस्तु प्रसिद्धाः॥ रा.नि.व.१६। हारीतस्तु शालीनामष्टादशभेदानाह। भा.। "रक्तशालिर्महाशालिः कलमः षष्टिकोऽपरः। खञ्जरीटापसाही च जीरकान्या कपिञ्जला। सौगन्धी शुकला चान्या विलवासी कचीरका। गुरुड़ा रक्तवल्ली च कलमान्या तथापरा। विल्वना मागधी पीता ता अष्टादश शालयः। देशे देशे विभिन्नानि नामानि परिलक्षयेत्। गुणैः समानैः सर्व्वांस्तान् भूमिभागोद्भवान् विदुः। शालयश्चिरारोहाश्च मूत्रला बल्ववर्चसः। श्लेष्मकालि सुपथ्याश्च मूत्रला वातला हिमाः।" अवि.१५अ.। लक्षणं यथा—"कण्डनेन विना शुक्ला हैमन्ताः शालयः स्मृताः।" गन्धसुगे। गन्धगोकुल। विका.। क्षणजीरके। रा.नि.व.६। रसालीलौ। वै.निघ.। [कुभड़ा। शब्दर.।

शालिका। स्त्री। पिटारिकायाम्। [ई-

शालिजः (जाहकः)। पुं। खट्टाशः। खाटाशी। च.द.वा.व्या.चि.।

शालिञ्चः (ञ्चो)। पुं, स्त्री। स्वनामख्यातशाक-भेदे। शालिञ्चा शाक, शाञ्चि शाक। तत्-पर्य्यायाः,—पत्तूरः पत्रकः शालञ्चः शाखाञ्चि शालिञ्चा शितशाकः सितसारः पत्रकेष्टः लोहमारकः। गुणाः—शालिञ्चो दीपनस्तिक्तः ग्लौहार्शः-कफपित्तजित्।" राज.३प.।

शालिदला। स्त्री। अंशुमत्याम्। शालपाणि। रा.नि.व.४।

शालिनाथः। पुं। रसमञ्जरीकारे।

शालिनी। स्त्री। पद्मकन्दे। रा.नि.व.१०। मेधिकायाम्। वै.निघ.।

शालिपर्णिका। स्त्री। सुरामांस्याम् वै.निघ.।

शालिपर्णी। स्त्री। अंशुमत्याम्। शालपाणि। रा.नि.व.४। च.द.ज्व.चि.। "शालिपर्णीपृश्निपर्णी।" माषपर्ण्याम्। माषाणी। रा.नि.व.३। मेदायाम्। पृश्निपर्ण्याम्। वै.निघ.।

शालिपिष्टम्। क्ली। स्फटिके। विका.।

शालिमूलम्। क्ली। हैमन्तिकधान्यमूले। च. चि.३अ.।

शालिराट्। पुं। महाशाली, राजशाली। शब्दर धान। प.मु.।

शालिशूकः। पुं। शालिधान्यशूकसङ्घे। गुणाः—"मधुरा लघवः शीताः शूकवः शालिसम्भवाः। ग्राहिणो रक्तपित्तघ्नाः तृष्णा-च्छर्द्दि-ज्वरापहाः॥" च.सू.२७अ.।

शालिहोत्रः। पुं। तन्नामकाश्वशास्त्रप्रणेतरि ऋषिविशेषे। घोटके। विका.।

शालिहोत्रम्। क्ली। नकुलकृते अश्ववैद्यक-विशेषे। अपरं भोजराजकृतञ्च।

शाली। स्त्री। कृष्णजीरके। रा.नि.व.६। मेधिकायाम्। शालपर्ण्याम्। दुरालभायाम्। वै.निघ.।

शालीना। स्त्री। मिश्रेयाख्यवृत्ते। मउरिगाछ। रा.नि.व.४।

शालु। क्ली। शालूके। शालूक। शब्दर.। पुं। भेके। हे.च.। चीरक-नामगन्धद्रव्ये। गोँठेला विशेष। मे.।

शालु(लू)कम्। क्ली। पद्मकन्दे। पद्मेर

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शालूकः, शालूक। रा.नि.व.२३। अम.। हिं कसेरु भसीड़ा। तें जालिकाय। तत्पर्य्यायाः,—पद्मशेरुणं शालुकं शालुकं शालूकः गीपभद्रं। गुणाः—शीतलं वृष्यं पित्तदाहास्रघ्नं गुरु दुर्जरं स्वादुपाकं स्तन्य-वात कफकरं संग्राहि मधुरं रुचञ्च। तत् बालम् अनार्त्तवम् जीर्णम् व्याधितम् कृमिभक्षितम् अग्रादिदूषितञ्च वर्ज्यम्। तथातिजीर्णम् अकालीत्यम् अतैलादिसिद्धं कर्कशमतिकीमलं व्यालादिदूषितं मूलकं विना शुष्कञ्च शाकं नाश्नीयात्। भा.पू.१भ.शा.व.। च.द.वा.व्या.चि. अश्वगन्धातैले। जातीफले। रा.नि.व.१२। वै.निघ.२भ.अ.च.चि. पिप्पल्यादिचूर्णे।

शालूकः। पुं। मत्स्यके। रा.नि.व.१९। पद्मादिमूले। विका.।

शालूरः। पुं। भेके। अम.। पद्मकन्दे। वै.निघ.।

शालूरकः। पुं। पुरीषजकृमिभेदे। च.वि.७अ.।

शालूरपर्णी। स्त्री। ब्रह्मीशाके। विष्णुशाक। "शालूरपर्णीमालूर।" भा.म.१भ.जिह्वाकल्प.चि.।

शालेयः। पुं। मधुरिकायाम्। रा.नि.व.४। च.सू.२७अ.। क्ली। शालिधान्यभेदे। रा.नि.व.२। बालमूलके। भा.पू.१भ.शा.व.। स्त्री। सिंह्यायाम्। मेति। रा.नि.व.४। शुलुफायाम्। शुल्फा। वै.निघ.।

शाल्मलः (कः)। पुं। मोचरसे। रा.नि.व.८। भैष.स्त्रीरोग.प्रदरारिरसे। शाल्मलीवृक्षे। शिमूल गाछ। ग्र.र.।

शाल्मलिः। पुं, स्त्री। (Bombax malabarica Syn. Salmalica malabarica.) स्वनामख्यातमहातरौ। शिमूल गाछ। हिं शेमल, शेमुर। उत् वीन्‌री। ता. पुला। मं शांवरि। प.सु.। तत्पर्य्यायाः,—पिच्छिला पूरणी मोचा स्थिरायुः तूलिफला दुरारोहा शाल्मलः शाल्मलकः अपूरणी निर्गन्धपुष्पी तूलिनी कुक्कुटी रक्तपुष्पा कण्टकारी मोचनी शीमूलः कदला चिरजीवी पिच्छिलः रक्तपुष्पकः तूलवृक्षः मोचाख्यः कण्टकद्रुमः कुक्कुटी रक्तोत्पलः रम्यपुष्पः बहुबीर्य्यः यमद्रुमः दीर्घद्रुमः स्थूलफलः दीर्घायुः। गुणाः—वृष्यो बल्यः स्वादुः शीतः कषायो लघुः स्निग्धः शुक्रश्लेष्मवर्द्धनश्च। तद्रसस्तद्गुण एव, ग्राही कषायश्च। तत्पुष्पफलमपि तत्समगुणमेव। रा.नि.व.८। तत्पुष्पं [illegible] सैन्धवसाधितं प्रदरघ्नं रसे पाके च मधुरं क[illegible] गुरु शीतलं ग्राहि वातलञ्च। भा.पू.१भ.शा.व.। कृमिमेहघ्नं रुचमुष्णं पाके कटु लघु वातकफघ्नञ्च। सु.सू.४६अ.। च.द.वृन्दन-ज्व.चि.। विफलादौ। "विफला शाल्मली रास्ना।"

शाल्मलिकः। पुं। रोहितकवृक्षे। रक्त रोड़ा। रा.नि.व.७। च.वि.८अ.।

शाल्मलिनी। स्त्री। शाल्मलिवृक्षे। अ.र.।

शाल्मलिपत्रकः। पुं। सप्तपर्णवृक्षे। छातिम गाछ। रा.नि.व.१२।

शाल्मली। स्त्री। शाल्मलिवृक्षे। शिमूल गाछ। अम.। मोचरसे। च.सू.४। शिंशपावृक्षे। विका.।

शाल्मलीकण्टकः। पुं। प्रसिद्धः। शिमूलकाँटा। अयं व्रणघ्नः। वा.उ.३२अ.।

शाल्मलीकन्दः। पुं। स्वनामख्यातमहाकन्दे। स भागीरथीतीरे प्रसिद्धः। शांवरीकन्द इति च महाराष्ट्रादौ ख्यातः। शिमूलगाछेर मूल। तत्पर्य्यायाः,—विज्वलः वनवासकः वनवासी मलघ्नः मलहन्ता। गुणाः—मधुरः मलसारणः शीतः पित्तदाहश्रीफसन्तापघ्नश्च। रा.नि.व.७।

शाल्मलीकल्पः। पुं। वैद्यशास्त्रान्तर्गतचिकित्साकल्पभेदे। ल.द.।

शाल्मलीफलः। पुं। तेजःफलवृक्षे। तेजबल। रा.नि.व.११।

शाल्मलीफलकम्। क्ली। चरादिशस्त्राणाम् धारासंस्थापनार्थाकर्कशकाष्ठपट्टके। सु.सू.८अ.।

शाल्मलीवेष्टः (कः)। पुं। मोचरसे। शिमूलगाछेर आटा। रा.नि.व.८। भा.म.१भ.ज्व.सा.चि समङ्गादिचूर्णे। "शाल्मलीवेष्टकी रौद्रः।"

शाल्मलीसत्त्वनिर्य्यासः। पुं। मोचरसे। भैष.ध्वजभ.चि.। रस.र.कामदीपकरसे।

शाल्वणस्वेदः। पुं। वातव्याधौ स्वेदविशेषे। यथा—"काकोल्यादिः सवातघ्नः सर्व्वाम्लद्रव्यसंयुतः। सानूपौदकमांसस्तु सर्व्वस्नेहसमन्वितः। सुखोष्णः स्पष्टलवणः शाल्वणः परिकीर्त्तितः। तेनोपनाहं कुर्वीत सर्व्वदा वातरोगिणाम्।" सु.चि.४अ.। वातघ्नी भद्रदार्व्वादिः काकोल्यादिश्च सौश्रुतः। मांसिनावौषधं तुल्यं यावदस्नेन चाप्लुता। पट्टौ स्यात् स्वेदनार्थञ्च काञ्जिकाम्लसमिश्रिते। चूर्णसैनकरञ्चरण्डयो[illegible] स्वेदं यतो भवेत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समस्तं वर्गमर्द्धं वा यथालाभमथापि वा। प्रयुञ्जीतेति वचनं सर्व्वत्र गणकर्म्मणि.....।" शाल्मणखदः। जीवनीयदशक, गुडूची, काँकड़ाशृङ्गी, वंशलोचना, पद्मकाष्ठ, ऋद्धि, वृद्धि, देवदारु, कुड़, हरिद्रा, वरुणत्वक्, मेषशृङ्गी, वाड़ियाला, गोरक्षचाकुलिया, आलाकुशी, शर, झाँटी, श्वेत-आकन्द, गुलञ्च, गोक्षुर, पाषाणभेद, रक्त-आकन्द, शतमूली, पुनर्नवा, वज्र-झाटी, धुतुरा, वामनहाटी, विछाति, यव, कुल, कुलत्थ एवं दशमूल, प्रत्येकं ९ माषा मिलित ८ पल। च.द.वा.व्या.चि.।

शिवः (कः)। पुं। शिशौ। रा.नि.व.१८।

शिवरः। पुं। शिवरलोध्रे। पाटिशालोध। मे.। भा.म.४भ.नेत्ररोगे। "अरिष्टदलशिवर...।"

शिवरकरोध्रः। पुं। अक्षिभेषजापरसंज्ञे खनामख्याते वृक्षे। पाटिशालोध। वा.सू.१५अ. रोध्रादौ।

शिवरभेदाख्य(क्ष)म्। क्ली। ताम्रे। हे.च.।

शिवरी। स्त्री। शुकशिम्ब्याम्। आलाकुशी। मे.। See कपिकच्छू।

शिष्कुलः। वि। मांसाशिनि। हे.च.।

शिंशपा। पुं। (Dalbergia sisu.) A Timber tree. खनामख्याततरौ। शिशु गाछ। हिं शीसव, शिशु, शीसइ। तें शिंशुकर्र। ता. जानुक्कुकट्टइ। पंशकेदर्। तत्पर्य्यायाः,—पिच्छिला अगुरु कपिला भस्मगर्भा अगुरुशिंशपा युगपत्रिका कृष्णसारा अगुरुसारा पिप्पला पिच्छला वीरा रालानुसार्य्यम् धूसिका। केषाञ्चिन्मते भस्मगर्भा कपिला-शिंशपायाः संज्ञा। यथा—"सा चेत् कपिलवर्णा स्यात् भस्मगर्भा निगद्यते॥" सा विधा कृष्ण-श्वेत-पीतभेदेन। सा. गुणाः—तिक्ता कटु रुक्षा कफ-वातघ्नी दीपनी शोथातिसारघ्नी च। "श्वेताशिंशपा तिक्ता शिशिरा पित्तदाहनुत्। कपिला शिंशपा तिक्ता शीतवीर्य्या व्रणापहा। वातपित्तज्वरघ्नी च कृमिदद्रिक्काविनाशिनी। शिंशपात्वितयं वर्ण्यं हिमं शीफविसर्पजित्। पित्तदाहप्रशमनं वर्ण्यं रुचिकरं परम्।" रा.नि.व.९।

शिकतावलम्बनम्। क्ली। जलस्य शीतलीकरणोपायविशेषे। सिकतारिकायाम्। भू १-

शिक्थ(क)म्। क्ली। मधूच्छिष्टे। मम। पर्य्यायाः,—सिक्थकं मोदनं मक्षिकामलं [illegible] पीतरागं काचं विघसं उच्छिष्टमोदनं [illegible] माक्षिकजं क्षौद्रजं द्रावकं मक्षिकाश्रयं मधूजं [illegible] सम्भवम् मधूत्थं मधूल्लिप्तं मधूच्छिष्टं मधुशिषम्। गुणाः—पिच्छिलं स्वादु कुष्ठवातरक्तघ्नं कटु स्वादु स्निग्धं लेपेन स्फुटिताङ्गविलीपनञ्च। रा.नि.व. १३। अपिच—".....भूतघ्नं व्रणरोपणम्। भग्नसन्धानकृद्वात कुष्ठ वीसर्प रक्तजित्॥" भा.।

शिक्यम्। क्ली। द्रव्यरक्षार्थं रज्जुकृताधारे। शिका। शब्दर.। जलप्रसादनार्थं पात्ररक्षणाधारविशेषे। सु.सू.४५अ.।

शिखण्डः (कः)। पुं। मयूरपुच्छे। अम.। काकपक्षे। जूनपि। मे.। शब्दर.।

शिखण्डिकः। पुं। कुक्कुटे। भा.। स्त्री। (का) गुञ्जायाम्।

शिखण्डिनी। स्त्री। गुञ्जालतायाम्। प.मु.र. सा.सं.रसप्रकरणे। यूथिकायाम्। र.मा.। मयूर्य्याम्।

शिखण्डी (ण्डिन्)। मयूरे। मयूरपुच्छे। मे.। कुक्कुटे। हे.च.। स्त्री। गुञ्जालतायाम्। रा.नि.व.२। स्वर्णयूथिकायाम्। रा.नि.व.१०।

शिखरम्। क्ली। पुलके। रोमाञ्चे। माणिक्य विशेषे। चिका.। कवे। मे.। लवङ्गे। हेचार्य्ये। पर्व्वतार्य्ये।

शिखरा। स्त्री। मूर्व्वायाम्। मूर्गा। शब्दच.।

शिखरिचरणम्। क्ली। अपामार्गमूले। वै. निघ.२भ.उन्मा.चि.।

शिखरिजः। पुं। अपामार्गे। आपांः। भैष. ने.रो.चि.भा.म.४भ.।

शिखरिणी। स्त्री। दधिजले। दाक्षान्तरे। रीतराज्याम्। मे.। रा.नि.व.२३। नवमल्लिकायाम्। रा.नि.व.१०।२३। तन्नामकसन्धानविशेषे। तत्र द्रव्याणि दधि ३२ पलं, खण्डस्याष्टपलानि, तत्परिमितं मरिचचूर्णं त्वगेलाचूर्णञ्च, मध्याज्ययोः प्रत्येकं पलचतुष्टयम्, एकत्र भाण्डे संस्थाप्य हिमवासिता शिखरिणीत्युच्यते। रा.नि.व.२२। एवं मज्जिकादयो बहुविधशिखरिण्यो ज्ञेयाः। मूर्व्वायाम्। शब्दच.।

शिखरिलोहितः। पुं। भूकदम्बे। कुकुरशाकां। शब्दच.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिखी (खिन्)। पुं। कुन्दुरो। कुन्दुरुखोटो। ...व.१२। सामान्यवनस्पतिः। जनार्द। रा.नि. ...शूरण सगविशेषे। तन्मांसं लघु हृद्यं बलप्रदञ्च। ...व.१७। अपामार्गे। रा.नि.व.४। चन्द्र. मा.सं. विसूचीयोगे। वा.सू.१५अ. श्यामादिः। भा.म.४भ. कर्णशोधि। वन्दाके। शोन्दरा। रा. नि.व.५। कर्कट-शृङ्ग्याम्। काँकड़ा शृङ्गी। रा.नि.व.६।

शिखा। स्त्री। चूचके। रा.नि.व.१८। मूर्व्वायां। शाखायाम्। चूडायाम्। मे.। मयूरशिखायाम्। विषलाङ्गलिन्यां। रा.नि.व.५। शिरीषमध्यकेशे। टिकि। अम.। स्मरज्वरे। शा.र.। तरुमूले। हे.च। तुलसीवृक्षे। जटामांस्याम्। वचायाम्। वै.निघ.। प्रपर्द, पदाये।

शिखाकन्दम्। क्ली। गृञ्जने। गाजर, शाल-गम। रा.नि.व.७।

शिखाच(व)लः। पुं। मयूरे। चिका.।

शिखाधरः(धारः)। पुं। मयूरे। चिका.।

शिखामूलम्। क्ली। गृञ्जने। गाजर-मूला। रा.नि.व.७।

शिखालः। पुं। मयूरे। वै.निघ.।

शिखालुः। पुं। मयूरशिखायाम्। रा.नि.व.५।

शिखावती। स्त्री। मूर्व्वायाम्। मूर्गी। शा.च.।

शिखावरः। पुं। पणसवृक्षे। काँठाल गाछ। शा.मा.।

शिखावला। स्त्री। मयूरशिखायाम्। रा.नि.व.५।

शिखावान्। पुं। चित्रकवृक्षे। अम.। भाव-प्रकाशे। वै.निघ.।

शिखावृक्षः। पुं। उच्चदीपाधारे। दीपगाछा वा डेल्‌को।

शिखिकण्ठम्। क्ली। तुत्थके। तूँते। रा. नि.व.१३।

शिखिकुन्दः। पुं। कुन्दुरुखोट्याम्। कुन्दुरु-खोटो। कश्चित्।

शिखिग्रीवम् (वा)। क्ली, स्त्री। तुत्थके। अम.। भा.म.१भ.ज्व.चि.। ज्वराङ्कुशरसे "दारु-मूषां शिखिग्रीवाम्।" (वम्)। कान्तपाषाणे, चुम्बके। र.सा.सं.। [वै.निघ.।

शिखिध्वजः। पुं। धूमे। चिका.। मयूरे।

शिखिनी। स्त्री। मयूरशिखायाम्। नीलकण्ठ फूलेर गाछ। रा.नि.व.५।

शिखिनीफलः। पुं। शिरीषवृक्षे।

शिखिपुच्छम्। क्ली। मयूरपुच्छे। शा.र.।

शिखिपुच्छभूतिः। स्त्री। पुच्छभस्मनि। च. दन्तिका.श्वास-चि.।

शिखिप्रियः। पुं। लघुबदरे। छोटकुल। रा.नि.व.११।

शिखिमण्डलः। पुं। वरुणवृक्षे। वरुण-गाछ। शा.र.।

शिखिमन्थः। पुं। गणिकारिकायाम्, गणिरि। रस.र. श्लोपदचि.।

शिखिमुखी। स्त्री। मयूरशिखायाम्। वै.निघ.।

शिखिमूलम्। क्ली। गृञ्जनमूले। गाजर मूला। रा.नि.व.७।

शिखिमोटा (टा)। स्त्री। अजमोदायाम्। राकूनी। रा.नि.व.९।

शिखियूपः। पुं। औकारिसर्गे। रा.नि.व.१९।

शिखिवर्द्धकः। पुं। कुम्भाण्डे। शा.र.।

शिखिवाड़वरसः। पुं। गुल्माधिकारे रसः। पाठः—"सारितं सूततासाभं गन्धकं साधितं समम्। मर्दयेच्चित्रकद्रावैः यवचारयुतं दिनम्। विगुञ्जं भक्षयेन्नित्यं नागवल्लीदलेन वा। वातगुल्महरः ख्यातो रसोऽयं शिखिवाड़वः॥" रस.र.।

शिखिविष्टी। स्त्री। महाबलावृक्षे। वै.निघ.।

शिखी (न्)। पुं। चित्रकवृक्षे। चिता गाछ। रा.नि.व.९। वै.निघ. कर्णक.ज्व.चि.बोजपूरलेपे। मयूरे। मेषिकायाम्। मेषे। रा.नि.व.२३। विषभेदे। प.मु.। सुनिषण्णशाके। भा.पू.१भ.शा. व.। अपामार्गे। आपाः। र.सा.सं.। घोटके। हे.च.। कुक्कुटे। वृक्षे। मे.। शुकशिम्ब्याम्। आलाकुशी। प.मु.। वकपक्षिणि। बिका.। पित्ते। वै.निघ.।

शिखोद्भवः। स्त्री। सितावरीवृक्षे। शुशुनि शाक। रा.नि.व.४।

शिगुड़ि। स्त्री। खनामख्यातवृक्षे। हिं चङ्गी-नी। गुणाः—कटुः उष्णा वातघ्नी पृष्ठशूलघ्नी योनेः रसायनी दीपनी च कफी च। रा.नि.व.४।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिग्रुः। पुं। (Moringa pterygosperma Syn. Hyperan-thera Moringa.) Horse-radish tree. खनामख्यातपत्रशाके, श्वेतमरिचे। शजिना गाछ। सु.सू.३८अ.। वम्. पीतसेगवा। हिं सोंहिञ्जना। दा.हिं सुरिंका झाड़। ता. मोरुङ्गा। तें सतुगचेट्टुसुनग। तत्पर्य्यायाः,—श्वेतमरिचः तीक्ष्णगन्धः अक्षिवः अक्षीवः मोचकः सोभाञ्जनः सौभाञ्जनः विदधिनाशनः मधुगुञ्जनः हरितशाकः शाकपत्रः शिग्रुकः उपदंशः चमार्टशः कोमलपत्रकः बहुमूलः दंशमूलः तीक्ष्णमूलः उग्रः कामिनीशः शोभनकः शोभाञ्जनः सुभाञ्जनः सुतीक्ष्णः वनपक्षः श्वेतमरिचः कटुकन्दः तीक्ष्णगन्धः गन्धकः काक्षीवकः सेचकः अक्षीवः शुभाञ्जनः स्त्रीचित्तहारी द्रविणनाशनः क्षणगन्धा मूलकपर्णी मोचः जलप्रियः सुखमोदः रुचिराक्षनः चाक्षुष्यः। गुणाः—कटु-तिक्तोष्णः तीक्ष्णः वातकफघ्नः मुखजाड्यहरः रुच्यः दीपनः व्रणनाशनश्च। शिग्रुश्चतुर्भेदः श्वेतपीतनीलरक्तभेदेन। रा.नि.व.८। विशेषास्तत्तत्पर्य्याये मृग्याः। शाके। श्वम.।

शिग्रुजम्। क्ली। शिग्रुपत्रे। शिग्रुबीजे, यत् श्वेतमरिचमित्युच्यते। श्वम.।

शिग्रुतैलम्। क्ली। शिग्रुबीजोद्भवतैले। सजिना बीजेर तैल। मं सेगुतेल। गुणाः—कटु उष्णं कफघ्नं वातघ्नं त्वग्दोषव्रणकण्डूतिश्वीफघ्नं पिच्छिलञ्च। रा.नि.व.१५।

शिग्रुपुष्पम्। क्ली। श्वेभाञ्जन-पुष्पे। सजिनार फूल। तद्गुणाः,—"शिग्रोः पुष्पञ्च कटुकं तीक्ष्णोष्णं वायुश्लेष्मघ्नुत्। क्रिमिकृत् कफवातघ्नं विद्रधि-प्लीहगुल्मजित्॥" भा.।

शिग्रुफलम्। क्ली। श्वेभाञ्जनफले। सजिनार थाड़ा। गुणाः—स्वादु कषायं अग्निदीपनं कफपित्तघ्नं शूल-कुष्ठ-क्षय-श्वास-गुल्मनाशनञ्च।

शिग्रुबीजम्। क्ली। श्वेतमरिचे। "श्वेभाञ्जनस्य यद्बीजं तत् श्वेतमरिचं स्मृतम्"। भ.च.। तद्गुणाः,—"चाक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्। अहृद्यं कफवातघ्नं तन्नस्यन्तु शिरोर्त्तिनुत्॥" भा.।

शिग्रुशाकम्। क्ली। प्रसिद्धं। सजिनाशाक। मं सेगुपत्र। कं हलियपने। गुणा.—रुच्यं वातकफघ्नं कटूष्णं दीपनं पथ्यं कृमिघ्नञ्च। रा.नि.व.७।

शिग्रुद्रवम्। क्ली। शिग्रुतैले। वै.निघ.।

शिङ्घाणकः। पुं। कफे। नासामले। पोटा। उष्मा.। वाजिनो नासागतरोग. ज.द.।

शिङ्घाणम् (णिका)। क्ली, स्त्री। कफपर्य्यायविकार.। लौहमले। मण्डूर। नासामले। शिकनि। मे.।

शिङ्घितः। वि। घ्राते। भ्र.र.।

शिङ्घिनी। स्त्री। नासिकायाम्।

शिण्डाकी। स्त्री। आसुतविशेषे। गुणाः—रोचनी लघ्वी च.सू.२७अ.। यथा—"शिण्डाकी रालिकायुक्ता स्यान्मूलकदलद्रवैः। सर्षपस्वरसैर्वापि श्लक्ष्णपिष्टक-संयुतैः। शिण्डाकी रोचनी गुर्व्वी पित्तश्लेष्मकरी स्मृता।" रा.नि.व.१४। भा.।

शितः। पुं। द्वेषे। क्ली। रजते। अने.ध्वनिः। वि। कृशे। विश्वः।

शितकरः। पुं। कर्पूरे। रा.नि.व.१२।

शितकर्णी। स्त्री। वासायाम्। वासक गाछ। रा.नि.व.४।

शितच्छत्रा। स्त्री। अम्लाम्लायाम्। वै.निघ.।

शितद्रुः। पुं, स्त्री। क्षीरमोरटे। क्षीरकराड़। र.मा.। शतद्रुनद्याम्। अक.।

शितनिर्गुण्डी। स्त्री। कृष्णनिर्गुण्ड्याम्। कालनिशिन्दा। रस.र.बाल.चि.।

शितपर्णः। पुं। क्षुद्रसुस्तके। वै.निघ.।

शितपुष्पः। पुं। शिरीषवृक्षे। रा.नि.व.९।

शितपुष्पकम्। क्ली। काशतृणे। रा.नि.व.८।

शितशाकः। पुं। शालिञ्चशाके। शालिञ्चशाक। प.मु.।

शितशिवम्। क्ली। सैन्धवलवणे। वै.निघ.। मिश्रेयायाम्। स्त्री। अम्लाम्लायाम्। वै.निघ.।

शितशिम्पा। स्त्री। श्वेत-शिंशपायाम्। शादाशिशु। रा.नि.व.९।

शितशूकः। पुं। यवे। यव। चिका.। गोधूमे। गोम। चिका.।

शितसारः। पुं। तिन्दुकवृक्षे। गाबगाछ। श्वम.।

शितार्द्रिकर्णी। स्त्री। श्वेतापराजितायाम्। रा.नि.व.२३।

वेद प्रकाश

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिम्बरः वरः (रो)। पुं, स्त्री। सुनिषण्णकः। शुकशिम्बिशाक। सोमराज्याम्। सोमराजी। वै.निघ.। रा.नि.व.४।

शिंशपः। पुं। भूर्जवृक्षे। भूर्जपत्रस्य गाछ। मे.। वि। शुभे। क्लीबे। मे.।

शितिकण्ठः। पुं। दात्यूहपक्षिणि। डाक-पाखी। विका.।

शितिचारः। पुं। सुनिषण्णके। शुकशिम्बिशाक। जटा.।

शितिच्छदः } पुं। हंसे। श्र.र.।
शितिपक्षः }

शितिमारकम्। क्ली। श्यालिञ्चशाके।

शितिमूलकम्। क्ली। उशीरे। वेणामूल। रा.नि.व.१२।

शितिवरः (वारः)। पुं। सुनिषण्णकशाके। शुकशिम्बिशाक। भा.पू.१भ.शा.व.।

शितिसारः (कः)। पुं। तिन्दुकवृक्षे। गाव गाछ। अम.।

शितिसिम्बिनी। स्त्री। श्यामालतायाम्।

शिथिलः। वि। पीड़नाचमे। शिथिलत्वञ्च स्खलितयन्त्रदोषः। सु.सू.७अ.।

शिपिः। चर्म्मनि।

शिफः। पुं। मूले। अ.टी.विद्याविनोदः।

शिफा। स्त्री। तरुमूले। शिकड़। अम.। शताह्वायाम्। रा.नि.व.४। हरिद्रायाम्। रा.नि.व.६। जटा.। मांस्याम्। मे.। पद्मकन्दे। वै.निघ.।

शिफाकः (कन्दः)। पुं। पद्ममूले। शालूक। श्र.च.। अम.।

शिफाधरः। पुं। शाखायाम्। श्र.च.। मयूरे।

शिफारुहः। पुं। वटवृक्षे। रा.नि.व.११।

शिम्बड़ी। स्त्री। खनामख्यातक्षुपे। हिं चङ्गीनी। तत्पर्य्यायाः,—मतिदा पङ्गुल्यहारिणी द्रवत्पवी वातघ्नी बल्या गुच्छपुष्पी। तद्गुणाः—कटुरुष्णा वातघ्नी पृष्ठशूलघ्नी योगेन रसायनी देहदार्ढ्यकरी च। रा.नि.व.४।

शिम्बः। पुं। चक्रमर्दवृक्षे। चाकन्दा। श्र.च.।

शिम्बा (म्बिः)। स्त्री। शिम्बिधान्ये। रा.नि.व.१६। कलायादिकोशे। शुँटी। छिमड़ा।

र.। खनामख्यातलतायाम्। शिम्ब गाछ। हिं शेंवि। वस. शेगा। तत्पर्य्यायौ,—बीजशृङ्गिः शिम्बी। सा तु शिम्बी पुनश्चशिम्बी भेदेन द्विविधा। गुणाः—शिम्बीद्वय रसे मधुरं पाके स्निग्धं गुरु बलकरं दाह करं श्लेष्मकरं वातपित्तहरञ्च। भा.पू.१भ.शा.व.। "शिम्बा तु विविधा रूक्षवातला स्वादु शीतला। विष्टम्भिनी कषायाग्निविट्शुक्रकफनाशिनी॥" राज. ३प.। शिम्बी रूक्षा कषाया च कोष्ठे वातप्रकोपनी। न च ह्रस्वा न चक्षुष्या विष्टभ्य च विपच्यते। शिम्बीजातिगुणाः—"गुर्व्वीऽथ मधुरा शीता बल्याः रूक्षगुणात्मिकाः। सर्व्वेषां बलिभिर्भोज्या विविधाः शिम्बिजातयः।" च.सू.२७अ.। श्वेतकृष्णपीतरक्त-भेदेन चतुर्धा। सा पुनर्द्विधा वल्लीजमूलजभेदेन। गुणाः—रसपाकयो. कटूष्णा। सु.सू.४६अ.। (म्बिः) एरकायाम्। भा.। सुश्रुते। वै.निघ.।

शिम्बिकः। पुं। कृष्णसर्षे। कालसर्ष। हे.च.।

शिम्बिका। स्त्री। शिम्बीग्राम्। श्र.र.।

शिम्बिजः। पुं। शिम्बिधान्ये। रक्तकुलत्थे। स्त्री। शिम्बीधान्ये। वै.निघ.। भा.।

शिम्बिनी। स्त्री। असिशिम्बीलतायाम्। वड़ श्वेतशिम्ब। रा.नि.व.७। कृष्णचटकायाम्। वै. निघ.।

शिम्बिपर्णिका (र्णी)। स्त्री। सुद्गपर्ण्याम्। मूगानी। प.मु.। श्र.च.।

शिम्बिरिङ्गणी। स्त्री। वनसुद्गे। वै.निघ.।

शिम्बिरोटिका। स्त्री। स्वर्णजीवन्त्याम्। वै. निघ.।

शिम्बी। स्त्री। धान्यादिकचुके। धान्यादिर खोला, शुँटी। रा.नि.व.१६। शिम्बीधान्ये। शिम्बा। शिम्। श्र.र.। सुद्गपर्ण्याम्। मूगानी, कपिकच्छौ। आलाकूशी। रा.नि.व.३।

शिम्बीधान्यम्। क्ली। शिम्बीनिगूढसुद्गमकुष्ट-कादौ। गुणाः—अतिगुरु हिमं विबन्धकरञ्च। रा.नि.व.१६। ".....मधुरं रूक्षं कषायं कटु-पाकि च। वातलं कफपित्तघ्नं बद्धमूत्रमलं हिमं। ऋते मुद्गमसूराभ्यामन्यदाध्मानकारि च।" भा. पू. १३। See धान्यम्।

शिम्बीफलम्। क्ली। आढ़कीचुपे। रा.नि.व.४।

शिम्बीवृक्षः। पुं। [illegible]। भा.पू.१भ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिरः। पुं, क्ली। मस्तके। रा.नि.ष.१८। पिप्पली-मूले। मे.।

शिरःकम्पः। पुं। मस्तककम्पने।

शिरःखण्डम्। क्ली। कपालास्थनि। वै.निघ.।

शिरःफलः। पुं। नारिकेलवृक्षे। त्रिका.।

शिरःशूलम्। क्ली। शिरोरोगे। माथार व्याम, माथाव्यथा। तदौषधं यथा—शुण्ठी पिप्पली श्वेतापराजितामूलञ्च समभागं पिष्ट्वा लेप्यम्।

शिरःस्नानम्। क्ली। शिरःपर्य्यन्तं सर्व्वाङ्गं जले मज्जयित्वा स्नाने। च.सू.१५अ.।

शिरजः। पुं। केशे। अ.र.।

शिरपीड़ा। स्त्री। शिरोरोगे। माथाव्यथा, माथाधरा। निदा.।

शिरसिजः (रोरुहः)। पुं। केशे। रा.नि.व. १८। अ.र.।

शिरस्तापः। पुं। वातज-शिरोरोगे। See शिरोरोगः।

शिरा। स्त्री। धमन्याम्। शिरा। रा.नि.व.१८। ताः सन्धिबन्धनकारिण्यो दोषधातुवहा नाभि-निबद्धाः समन्ततो धावन्ति। पुष्यन्ति च शरीर-प्रणालीभिरारामानिव प्रसारणाकुञ्चनादिभिः सत-तम्। तासु शिराः ७००। तासु तरुपत्र इव शरीरे वर्त्तन्ते। तच्चरासु पवनादयो यदा कुप्यन्ति तदा तज्जा विविधा रोगा जायन्ते। तेषु अरुणा वात-वहा नीलाः पित्तदुष्टा गौरवर्णासु कफदुष्टा ज्ञेयाः। तासां मूलशिराः ४०। तासाञ्च वातपित्तकफ-रक्तवाहिन्यो दश दश भवन्ति इति। तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतम्। तावत्य एव पित्तवाहिन्यः पित्तस्थाने, कफवाहिन्यश्च कफस्थाने, रक्तवाहिन्यश्च यकृत्-प्लीक्नोरेवमेतानि सप्त शिराशतानि। सु.शा.७अ.।

शिराजपिड़का। पुं। शुक्लगतनेत्ररोगे। लक्ष-णम् यथा—"शुक्लस्थाः सितपिड़काः शिराबृता-बाला विद्यादसितसमोपजाः शिराजाः।" सु. उ.४अ.।

शिराजालः। पुं। नेत्रशुक्लगतरोगे। लक्षणम् —"जालाभः कठिनशिरोऽरुणः शिराणां सन्तानो भवति शिराहिजालसंज्ञः।" मा.।

शिराग्रन्थिः। पुं। [illegible] रोगभेदे। लक्षणं—"यदातेस्तु, सङ्घातो गाढ़नात्। व्यायामाद्वा प्रतान्तस्य शिराजाल शोणितम्। वायुः सम्पीड्य सङ्कोच्य वक्त्रोक्त विशोष्य च। निस्फुरं नीरुजं ग्रन्थिं कुरुते सशि-राह्वयः॥" वा.उ.२९अ.।

शिराघ्नः। पुं। हिन्तालवृक्षे। हेँताल गाछ। रा.नि.व.९। कपित्थवृक्षे। कयेत गाछ। अ.च.।

शिराप्रहर्षः। पुं। सर्व्वगतशिरोरोगे। लक्षणं— "मोहाच्छिरोत्पात उपेक्षितस्तु जायेत रोगस्तु शिराप्रहर्षः।" मा.नि.।

श्वेयसी। स्त्री। हरीतक्याम्। भा.पू.१भ.। रा.नि.व.११। वै.निघ. कास.चि. चित्रकादिलेहे। गजपिप्पल्याम्। भा.पू.१भ. बृहत्सैन्धवाद्यतैले। अग्निमुखचूर्णे च। सि.यो.बृहत्यद्यगव्यघृते। सर्व्वज्वरहरलौहे। भैष.औषधि. औषधकालानलरसे। पाठायाम्। आकनादि। रा.नि.व.६। रास्नायाम्। विश्वः। च.सू.४अ.। भा.वातश्लेष्मज्व.चि. बृहत्पिप्पल्यादौ। "श्वेयसी सदुरालभा।" प्रियङ्गौ। रा.नि.व.१२।

श्वेतम्। क्ली। गोदुग्धे। त्रिका.। पुं। श्वेतखदिरे। प.मु.।

श्वेतकाष्ठः। पुं। शाकवृक्षे। शेगुन गाछ। रा.नि.व.९।

श्वेतमल्लिका। स्त्री। श्वेतदलमल्लिकायाम्। प.मु.।

श्वेतलवणम्। क्ली। सैन्धवलवणे। वै.निघ.।

श्वेतवृक्षः। पुं। वरुणवृक्षे। रा.नि.व.९। कृष्णागुरुवृक्षे। वै.निघ.। [वै.निघ.।

श्वेतवेधिका। स्त्री। कस्तूर्य्याम्। मृगनाभि।

श्वेतव्रीहिः। पुं। षष्टिकशाली। सेटे धान। वै.निघ.।

श्वेता। स्त्री। स्थलपद्मिन्याम्। स्थलपद्म। रा.नि.व.५। मेदायाम्। वै.निघ.२भ. अर्शः-चि.सूरणभोदके। विष्फलायाम्। वा.चि.१२अ.।

श्वेताम्बु। क्ली। तण्डुलोदके। चेलूनि जल। वा.उ.३७अ.।

श्वेताम्लम्। क्ली। वृक्षाम्ले। रा.नि.व.६।

श्वेणः। वि। खञ्जे। अम.। स्त्री (णा)। काञ्जिके। शब्दरत्न.।

श्वेणिः (णी)। स्त्री। नितम्बे। रा.नि.व. १८। सा गर्भस्य मासद्वयेन भवति। सुखबोधः। (णी) अग्निमन्थवृक्षे। गणिग्रारी। वै.निघ.।

श्वेणिफल (कं)म्। क्ली। वरस्त्रीणां प्रशस्तनितम्बे। नितम्बाभोग। रा.नि.व.१८। अम.।

श्वेणिफलकास्थि। क्ली। नितम्बाभोगास्थनि। तानि चत्वारि। च.शा.७अ.।

श्वोतः (स्)। क्ली। कर्णे। त्रिका.। इन्द्रिये। हे.च.। शिरायाम्। मु.।

श्वोतोजम्। क्ली। सौवीराञ्जने। रा.नि.व.१३।

श्वोतोञ्जवम्। क्ली। श्वोतोऽञ्जने। रा.नि.व.१३।

श्वोत्रम्। क्ली। श्रवणेन्द्रिये। रा.नि.व.१८।

श्वौत्रम्। क्ली। श्रवणेन्द्रिये, कर्णे। अम.।

श्वाद्यः। पुं। नवनीतखोद्याम्। च.सू.३अ. प्रदेहे। क्ली। कमले। शब्दकल्पः।

श्लक्ष्णः। वि। मसृणे, चिक्कणे। "श्लक्ष्णः स्नेहं विनापि स्यात् कठिनोऽपि हि चिक्कणम्॥"

श्लक्ष्णकम् (का)। क्ली, स्त्री। पूगफले। रा.नि.व.११। (का) कृष्णापराजितायां। वै.निघ.।

श्लक्ष्णत्वक्। पुं। अश्मन्तकवृक्षे। आपटा। रा.नि.व.९।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्लीपदम्। क्ली। पादरोगविशेषे। गोद। तत्पर्य्यायाः,—पादवल्मीकम् पदगण्डोरम् श्लीपदः श्लिलीपदः। निदानं यथा—"कुपितास्तु दोषा वात-पित्त श्लेष्माणोऽधःप्रपन्ना वङ्क्षणोरुजानुजङ्घास्वतिष्ठमानाः कालान्तरेण पादमाश्रित्य शनैः शोफं जनयन्ति, तत् श्लीपदमित्याचक्षते।" सु. नि.१२अ.। तस्य कारणं—"पुराणोदकभूयिष्ठाः सर्व्वर्तुषु च शीतलाः। ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः॥" लक्षणं यथा—"यः सज्वरो वङ्क्षणजो भृशार्त्तिः शोथो नृणां पादगतः क्रमेण। तत् श्लीपदं स्याक्करकर्णनेत्रशिरोष्ठनासास्वपि कैचिदाहुः॥" "वातजं क्लक्षरूक्षं हि स्फुटितं तीव्रवेदनम्। अनिमित्तरुजञ्चास्य बहुशो ज्वर एव च। पित्तजम्पीतसङ्काशं दाहज्वरयुतं भृशम्। श्लैष्मिकन्तु भवेत् स्निग्धं तथापाण्डुरमस्थिरम्। चीरुण्यैतानि जानीयात् श्लीपदानि कफोल्बणात्। गुरुत्वञ्च महत्त्वञ्च यस्मात् नास्ति कफं विना॥" मा.नि.। "पाणि-नासौष्ठ-कर्णेषु वदन्त्येके तु पादवत्। श्लीपदं जायते तच्च देशेऽनूपे भृशं भृशम्॥" वा. उ.२९अ.।

श्लीपदप्रभवः। पुं। आम्रवृक्षे। भ.मा.।

श्लीपदापहः। पुं। पुत्रञ्जीववृक्षे। विका.।

श्लीष्टः। पुं। आम्रवृक्षे। वै.निघ.।

श्लेष्मकः। पुं। कफे। भ.च.।

श्लेष्मकोष्ठः। पुं। अश्वरोगभेदे। स चाश्वस्य मन्दाहारिणामुपजायते। जा.द.४६अ.।

श्लेष्मघ्नः। त्रि। श्लेष्महरे द्रव्ये, तच्च लघुपाकद्रव्यमात्रम्। तीक्ष्णरूक्षविशदगुणभूयिष्ठत्वात् कटुतिक्तकषायद्रव्यमात्रम्। सु.सू.४१अ.।

श्लेष्मघ्ना (घ्नी)। स्त्री। विपुर-मल्लिकायाम्। त्रिका.। केतक्याम्। विश्व.। ज्योतिष्मतीलतायाम्। जटा.। त्रिकटौ। त्रिकटु। भ.र.।

श्लेष्मज्वरः। पुं। कफजन्यज्वरे। लक्षणं यथा—"स्तैमित्यं क्लिमितो वेगः आलस्यं मधुरास्यता। गुरुसूत्र-पुरीषत्वं स्वप्नस्तृप्तिरथापि च। गौरवं शीतमत्यङ्गैः.....॥" इत्यादि। निदा.॥

श्लेष्मणः। पुं। कफे। तस्य च स्थानं सन्धयः। "तस्य स्थानं सन्धयः, तत्कर्म्म च सन्धीनां संश्लेषणम्।" भा.।

सन्धिषु प्राणभृतां भवति सेत्युच्यते। सु.शा.४अ.।

श्लेष्मनाड़ी। स्त्री। दन्तमूलगतरोगे। दन्तनाली। "श्लेष्णाः कफाद् बहुघनार्जुन-पिच्छिलासाः स्रवाः सकण्डूरुजा रजनीप्रकाशाः।"

श्लेष्मपाण्डुः। पुं। श्लेष्मजन्यपाण्डुरोगे। See पाण्डुः।

श्लेष्मप्रकृतिः। त्रि। कफप्रकृतौ मनुष्ये। तल्लक्षणं—"स्निग्धवर्णः सितनेत्रदन्तः श्यामः सकेशो नखदीर्घरोमा। गम्भीरशब्दः श्रुतशास्त्रनिद्रातन्द्राप्रियः तिक्तकटूष्णभोजी। क्षमासलः स्निग्धरसप्रियश्च सगौरवाल्पातिसहिष्णुशीतः। व्यायामशीलोरतलालसोऽसौ भवेत् कफस्य प्रकृतिर्मनुष्यः॥" अवि. ५अ.। अपिच.— दृढ़शास्त्रमतिः स्थिरमित्रधनः परिगण्य चिरात् प्रददाति बहु। परिनिश्चितवाक्यपदः सततं गुरुमानकरश्च भवेत् स सदा॥ ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः। तार्क्ष्यहंससमानूकाः श्लेष्मप्रकृतयोनराः॥"

श्लेष्मलः। त्रि। श्लेष्मप्रकृतौ। अम.।

श्लेष्मलफलः। पुं। बहुवारवृक्षे। वै.निघ.।

श्लेष्मविसर्पः। पुं। कफजन्यविसर्पे। निदा.।

श्लेष्मसम्भूतः। त्रि। श्लेष्मजे। रा.नि.व.२०।

श्लेष्मस्रावः। पुं। पुं। नेत्रसन्निगतरोगविशेषे। लक्षणं—"श्वेतं स्रान्द्र पिच्छिलं यः स्रवेच्च श्लेष्मस्रावो नीरुजः स प्रदिष्टः।" सु.उ.२अ.।

श्लेष्महः। पुं। पनसवृक्षे। काँटाल गाछ। वै. निघ.। कट्फलवृक्षे। भ.च.।

श्लेष्महन्त्री। स्त्री। देवदालीलतायाम्। देशताड़ा। वै.निघ.।

श्लेष्मा (न्)। पुं। शरीरस्थकफे। स च माधुर्य्यस्नेहगौरवशैत्यपैच्छिल्यगुणलक्षणः। तस्य समानयोनिः मधुरो रसः स माधुर्य्यादिभ्यः माधुर्य्यादीनि वर्द्धयति। सु.सू.४२अ.। तस्य स्थानसमाश्रयः। गुणाः—श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च। मधुरस्त्वविदग्धः स्यादिदग्धो लवणः स्मृतः॥ तस्यामाशयः पित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वाद्दृढ़गतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतुर्विधस्याहारस्याधारः। स च तत्रौदकैर्गुणैराधारः प्रक्लिन्नो भिन्नसङ्घातः सुखजरश्च भवति। माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वाच्चथव च। रसाशये सम्भवति श्लेष्मा मधुरशीतलः। स तत्रस्थ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति। उरस्थः विक-सन्धीनामात्मवीर्य्येणान्नरससन्निहितेन हृदयावलम्बनं करोति। जिह्वामूलकण्ठस्थः जिह्वेन्द्रियस्य सौम्य-त्वात् सम्यग्रसज्ञाने वर्त्तते। शिरःस्थः स्नेहसन्त-र्पणाधिक्यतत्वात् इन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति। सन्धिस्थस्तु श्लेष्मा सर्व्वसन्धिस्नेहात् सर्व्वसन्ध्यनुग्रहं करोतीति॥ सु.सू.२१अ.। चतुर्थो श्लेष्मधरा नाम सर्व्वसन्धिषु प्राणभृतां भवति। "स्नेहाभ्यक्ते यथैवाक्षे चक्रं साधु प्रवर्त्तते। सन्ध्यग्नः साधु वर्त्तन्ते संश्लिष्टाः श्लेष्मणा तथा॥" सु.शा. ४अ.। "प्राकृतस्तु बलं श्लेष्मा वैकृतो मल उच्यते। स चैवोजः स्मृतः कायं स च पापोपदिश्यते॥" च.सू.२७अ.।

श्लेष्मातः (तः, कः, की)। पुं, स्त्री। श्लेष्मवृक्षे। चालता गाछ। हिं लसोरा। र.मा.। रा.नि.व.११। भा.। च.सू.४अ.। गुणाः—"गुरु श्लेष्मातकफलं कफक्लन्मधुरं हिमं।" सु.सू.४६अ.। च.सू.२७अ.।

श्लेष्माणा। स्त्री। वृक्षविशेषे। श्र.मा.।

श्लेष्मातकसदृशपत्रः। पुं। पनसवृक्षे। काँटाल गाछ। वै.निघ.।

श्लेष्मान्तकः। पुं। श्लेष्मवृक्षे। रा.नि.व.११।

श्लेष्माभिष्यन्दः। पुं। सर्व्वगताक्षिरोगभेदे। लक्षणं—"...स्यन्दे तु कफसम्भवे। जाड्यं शोफो महान् कण्डूर्निद्रानाभिनन्दनम्। सान्द्रस्निग्धबहु-श्वेतपिच्छाबद्धिकाश्रुता॥" वा.उ.१५अ.।

श्लेष्मारिः। पुं। पार्व्वत्यवृक्षभेदे। 'चा'। तत्पर्य्यायाः,—गिरिभित् यामपर्णी अतन्द्रा। गुणाः,—"श्लेष्मारिपत्रं कफवृक्षत् स्वेदन बलवर्द्धनम्। प्रतिश्यायहरं प्रोक्तं ज्वरघ्नं कामदीपनं॥ काम-संहरणं वह्नेर्दीपनं जाड्यनाशनम्॥ फाण्टस्य सितया युक्तः सेव्यो नैरुज्यमिच्छता॥"

श्लेष्मोल्वणः। त्रि। श्लेष्माधिके। वा.चि.७अ.।

श्लैष्मिकः। त्रि। श्लेष्मसम्भूते। रा.नि.व.२०।

श्लैष्मिकरक्तपित्तम्। क्ली। कफजन्यरक्तपित्ते। मा.नि.। See रक्तपित्तम्।

श्लैष्मिकी। स्त्री। श्लेष्मजन्ययोनिव्यापदि। लक्ष-णम्—"कफोऽभिष्यन्दिभिः क्लुद्धः कुर्य्याद् योनिम-वेदनाम्। शीतलां कण्डुलां पाण्डुपिच्छिलां त[illegible]ी। [illegible]दि धसृतिम्। सा व्यापत् श्लैष्मिकी.....॥" वा. उ.३३अ.।

श्वग्रहः। पुं। बालग्रहविशेषे। लक्षणं—"कफी वृषितरोमलं स्वेदयत्यनिमीलनं। बहिरायामनं जिह्वादंशोऽन्तःकण्ठकूजनम्। धावन विट्समत्वं क्षीणं श्वानवच्छुनि॥" वा.उ.१अ.।

श्वचिल्लो। स्त्री। कुक्कुरचिल्लीवृक्षे। कुकुर-शोंका। वै.निघ.।

श्वदंष्ट्रकः। पुं। गोक्षुरवृक्षे। गोखुरो। रा.नि. व.४।

श्वदंष्ट्रा। स्त्री। गोक्षुरे। गोखुरो। र.मा.। सु.सू.१८अ.। च.द.ज्व.चि. ज्वरातिसारे। "श्वदंष्ट्रा-कण्टकारीभ्यां।" च.सू.४अ.।

श्वधूर्त्तः। पुं। शृगाले। श्र.र.।

श्वनकः। पुं। कुक्कुरे। प.मु.।

श्वनिशम् (शा)। क्ली, स्त्री। मत्तकुक्कुरनिशा-याम्। जटा.।

श्वपुच्छः। पुं। वृश्चिके। बिछा। स्त्री (च्छा)। वृश्चिपर्य्याम्। चाकूलिया। वै.निघ.।

श्वफल्गः। पुं। चूर्णे। चूण। बीजपूरे। नेबू-गाछ। र.मा.।

श्वभीरुः। पुं। शृगाले। श्र.मा.।

श्वभ्रम्। पुं। क्ली। छिद्रे। अम.।

श्वयथुः। पुं। शीथरोगे। रा.नि.व.२०।

श्वयोचिः (चौ)। स्त्री। रोगे। पीड़ायाम्। व्याक.।

श्वसनम्। क्ली। निःश्वासे। मे.। पुं। मदन-वृक्षे। प.मु.। वायौ। अम.।

श्वसनाशनः। पुं। सर्पे। हारा.।

श्वसनेश्वरः। पुं। अर्जुनवृक्षे। श्र.च.।

श्वसनोत्सुकः। पुं। सर्पे। श्र.च.।

श्वसितम्। क्ली। निःश्वासे। हे.च.।

श्वसुनः। पुं। कासालौ। रा.नि.व.७। चतुष्प-वृक्षे। कुकुरशोंका। श्र.च.।

श्वा (न्)। पुं, (स्त्री, युनी)। कुक्कुरे। श्र.र.।

श्वादन्तः। पुं। कुक्कुरदन्ते। व्याक.।

श्वानः। पुं। कुक्कुरे। स्त्री (नी)। सारमेयायां। [illegible]ा.र.। [illegible]

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वानचिल्लिका (ल्ली)। स्त्री। शुनकचिल्लीशाके। वै.निघ.।

श्वावलिका। स्त्री। धन्याके। रा.नि.व ६।

श्वावित्। पुं। शशके। शल्लकीभेदे। सज्जारु। भा.। अयं विलिशयगुणः। सु.सू.४६अ.। शल्लकीवृक्षे। विका.।

श्वासः। पुं। स्वनामख्यातरोगविशेषे। हाँपानि। तस्य निदानं—"हेरेव कारणैर्हिक्का बहुभिः सम्प्रवर्त्तते। तैरेव कारणैः श्वासो घोरो भवति देहिनां। विहाय प्रकृतिं वायुः प्राणोऽयं कफसंज्ञितः। श्वासयत्यूर्द्धगो भूत्वा तं श्वास परिचक्षते॥" स पञ्चविधः। यथा—"महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदैश्च पञ्चधा। भिद्यते स महाव्याधिः श्वास एको विशेषतः॥" पूर्व्वरूपं यथा—"प्रागूपं तस्य हृत्पीड़ा शूलमाध्मानमेव च। आनाह्यो वक्त्रवैरस्यं शब्दनिस्तोद एव च। यदा स्रोतांसि संरुध्य मारुतः कफपूर्व्वकः। विष्वग्व्रजति सक्रुद्धस्तदा श्वासं करोति च॥" चिकित्सा—कफवातघ्नमुष्णं वातानुलोमनं भेषजं देयम्। भा.। अश्वस्य यथा—"सुखेन नासया चैव यः श्लेष्माणं विमुञ्चति। वातिकः शिशिरे काले तस्य श्वासं विनिर्दिशेत्। शरन्निदाघयोश्चैव श्वासः पित्तेन जायते। तृष्णादाहपरीतस्य खिन्नगात्रस्य वाजिनः। सुखेन नासया चैव कफो यस्य प्रवर्त्तते प्रावृट्काले वसन्ते वा श्वासस्तस्य कफात्मकः॥" ज.द.३५अ.।

श्वासकासः। पुं। प्रसिद्धरोगद्वये। हाँपानिकासि। निदा.।

श्वासभक्षः। पुं। वर्व्वरकवृक्षे। दावलागाछ। रा.नि.व.८।

श्वासहेतिः। स्त्री। निदायाम्। हे.च.।

श्वासारिः। पुं। पुष्करमूले, कुष्ठे। कूड़। रा.नि.व.६।

श्वित्रम्। क्ली। किलासे। श्वेतकुष्ठे। धवलरोगे। अम.। लक्षणं—"कुष्ठैकसम्भवं श्वित्रं किलासं वारुणं भवेत्। निर्दिष्टमपरिस्रावि विधातूष्मवसंश्रयम्। वातादुष्णारुणं पित्तात्ताम्रं कमलपत्रवत्। सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु। सकण्डुरं क्रमाद्रक्तमांसमेदःसु चादिशेत्। वर्णैर्नवैर्वेदगुणैर्लक्ष्यं तच्चोत्तरोत्तरं। अशुक्लरोमबहुलमसंश्लिष्टं [illegible] साध्यं श्वित्रं वर्ज्यमतोऽन्यथा। गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनं। वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता॥" मा.नि.।

श्वित्रघ्नी। स्त्री। वृश्चिकाल्याम्। विछाती। शु.च.।

श्वित्रारिः। पुं। बाकुचीभेदे। सोमराजीविशेष।

श्वित्री (त्रिन्)। त्रि। श्वित्ररोगिणि।

श्वेत(क)म्। क्ली। रौप्ये। विका.। श्वेतकांस्ये। भाल काँसा। वै.निघ.। पुं। कपर्दके। कड़ि। रा.नि.व.१३। श्वित्ररोगे।

श्वेतः। पुं। शुक्लार्के। श्वेत आकन्द। रा.नि.व.१०। महाविषशुभवृश्चिके, मन्दविषे च। सु.कल्प.८अ.। See वृश्चिकः। श्वेतशिग्रौ। श्वेतेक्षौ। श्वेतैरण्डे। कर्पूरे। चन्दनवृक्षे। मे.। श्वेतसर्षपे। श्वेतकाञ्चने। हंसे। वै.निघ.। शङ्खे। शाँक। रा.नि.व.१। कपर्दके। कड़ि। हे.च.। श्वेताभे। शु.र.। जीवके। जटा.।

श्वेतकटभी। स्त्री। शुक्लकटभीवृक्षे। वा.उ.३८अ.। श्वेतगुञ्जायाम्।। वा.उ.५५अ.।

श्वेतकण्टकः। पुं। श्वेतलज्जालुकायाम्। वै.निघ.।

श्वेतकण्टकारिका (री)। स्त्री। शुक्लपुष्पकण्टकार्य्याम्। श्वेत कण्टिकारी। रा.नि.व.४।

श्वेतकण्टारिका। स्त्री। शुक्लपुष्पकण्टकार्य्याम्। शादा कण्टिकारी। हिं श्वेतरिंगिनी, श्वेतभटकटैया। तें विलियनेलगुलु। तत्पर्य्यायाः,—सितकण्टकारिका सितकण्टा श्वेता चैचटूती लक्ष्मणा सितसिंही सितक्षुद्रा क्षुद्रवार्त्ताकिनी सिता सिक्ता कटुवार्त्ताकी वैजया कण्टेश्वरी निःस्नेहफला रामा महौषधी गर्द्दभी चन्द्रपुष्पा चन्द्रिका चान्द्री प्रियङ्करी नाकुली दुर्लभा राज्ञा। गुणाः—कटूष्णा कफवातघ्नी चक्षुष्या दीपनी रसघ्नी च। रा.नि.व.४।

श्वेतकन्दा। स्त्री। शुक्लातिविषायाम्। शादा आतइच। रा.नि.व.६।

श्वेतकपोतः। पुं। दर्व्वीकरसर्पविशेषे। सु.कल्प.४अ.।

श्वेतकमलम्। क्ली। श्वेतपद्मे। रा.नि.व.१०।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वेतकरवीरः। पुं। शुक्लपुष्पकरवीरवृक्षे। शादा करवीफुलेर गाछ। See करवीरः।

श्वेतकाकः। पुं। शुक्लकाके। शादा काक। रावणकृतकाग्निशमनके।

श्वेतकाञ्चनः। पुं। शुक्लपुष्पकाञ्चनवृक्षे। श्वेत काञ्चन। प.मु.।

श्वेतकाण्डा। स्त्री। श्वेतदूर्व्वायाम्। शादा दूर्व्वा। रा.नि.व.८।

श्वेतकापोती। स्त्री। स्वनामख्यातमहौषधौ। सु.चि.३०अ.।

श्वेतकाम्भोजी। स्त्री। श्वेतगुञ्जायाम्। शादा कुँच। रा.नि.व.३।

श्वेतकाष्ठा। स्त्री। श्वेतपाटलायाम्। शादा पाकुल। वै.निघ.।

श्वेतकिणिही। स्त्री। शुक्लकटभीवृक्षे। तत्पर्य्यायाः,—महालोकटभी सितालिकटभी गिरिकर्णिका शिरीषपत्री कालिन्दी शतपत्रा विषघ्निका महाश्वेता महाशोण्डी। गुणाः—क्षयकिणिघ्न्या अधिकतराः। रा.नि.व.९। See किनिही।

श्वेतकुम्भिका (भी)। स्त्री। शुक्लपाटलावृक्षे। वै.निघ.।

श्वेतकुरण्टकः। पुं। शुक्लझिण्ट्याम्। शादा झाँटी। गुणाः—तिक्तः केश्यः स्निग्धः मधुरः उष्णः तीक्ष्णः दन्तहितः वलिपलित कुष्ठवातरक्त दोषकफकण्डू विषघ्नश्च। वै.निघ.।

श्वेतकुशः। पुं। शुक्लदर्भे। शादा कुश। तत्पर्य्यायाः,—सितदर्भः क्षत्रकुशः क्षत्रदर्भः पूतः यज्ञभूषणः यज्ञीयपवकः वज्रः ब्रह्मपवित्रः तीक्ष्णः सूचीमुखः पुण्यलक्षणः पूतलक्षणः वर्हिः। मूलगुणाः—हिमं रुच्यं मधुरं पित्तरक्तज्वरघ्नं तृष्णाश्वासकामलानाशनञ्च। रा.नि.व.८।

श्वेतकुष्ठम्। क्ली। श्वित्ररोगे। धवल। निदा.।

श्वेतकुसुमा। स्त्री। श्वेतनिर्गुण्ड्याम्। श्वेत निशिन्दा। वै.निघ.।

श्वेतकृष्णा। स्त्री। कीटजातिभेदे। ताभिर्दष्टे दाहशोफक्लेदा भवन्ति। सु.कल्प.८अ.।

श्वेतकेशः। पुं। रक्तशिग्रौ। लाल सजिना। नटा.।

श्वेतकोलः। पुं। शूकरभक्ष्ये। शूँटी माछ। चिका.।

श्वेतखदिरः। पुं। शुक्लखदिरवृक्षे। पापड़ीवृक्षेरेर गाछ। प.मु.। मं पाढ़रा खैर। कं विलियतर्त्ति, पपरीखयेर। तें तेल्लचंड। तत्पर्य्यायाः,—कदरः श्वेतसारः कार्ष्मुकः कुलकण्टकः सोमवल्कः सोमवल्कः सोमसारः पवित्रद्रुमः। गुणाः—तिक्तः कषायः कटुः उष्णः कण्डूघ्नः कफवातव्रणघ्नश्च। रा.नि.व.८। ".....वर्ष्मी मुखरोगकफास्रजित्।" भा.।

श्वेतगण्डा। स्त्री। श्वेतदूर्व्वायाम्। वै. निघ.।

श्वेतगरुत्। पुं। राजहंसे। अम.।

श्वेतगुञ्जा। स्त्री। शुक्लगुञ्जालतायाम्। शादा कुँच गाछ। तत्पर्य्यायाः,—श्वेतकाम्बोजी भण्टिका काकपीलुः काकादनी चक्रभक्ष्या चूड़ाला चक्रिका चूड़ा दुर्म्भाषा। गुणाः—तीक्ष्णा उष्णा च। तद्बीजं वान्तिजनकम्। तन्मूलं शूलविषघ्नम्। तत्पत्रं वश्यकर्म्मणि शस्तम्। रा.नि.व.३।

श्वेतघण्टा। स्त्री। नागदन्त्यां। हांतिशुँड़। दन्त्याम्। रा.नि.व.५।६।

श्वेतघोषा। स्त्री। श्वेतकोषातक्याम्। शादा घोषा। वै.निघ.। [वै.निघ.।

श्वेतचणकः। पुं। शुक्लचणके। शादा छोला।

श्वेतचन्दनम्। क्ली, पुं। (Santalum album.) स्वनामख्यातचन्दनवृक्षे। सादाचन्दनेर गाछ। प.मु.। See चन्दनम्।

श्वेतचरणः। पुं। भूचर-जलज पक्षिविशेषे। सु.सू.४६अ.।

श्वेतचामरः (पुष्पः)। पुं। काशवृक्षे। केशे घास। वै.निघ.।

श्वेतचिल्लिः (ल्लिका) ल्ली। स्त्री। शुक्लवास्तुकशाके। श्वेतचिल्लीति भागीरथीतीरे प्रसिद्धा। शादा वेतो। मं वाथुवा। कं विलियचिल्लिकि। वम्. लवुचाकवत। तत्पर्य्यायाः,—वास्तुकी सुपक्या उपचिल्ली सितचिल्ली ज्वरघ्नी क्षुद्रवास्तुकी। गुणाः,—मधुरा चारा ग्निग्निरा विदोषघ्नी पक्या ज्वरघ्नी च। रा.नि.व.७।

श्वेतच्छदः। पुं। गन्धपत्रे। बाबुई तुलसी। शु.च.। हंसे। हला।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वेतजयन्ती। स्त्री। शुक्लजयन्तीवृक्षे। श्वेत अपराजिता। भैष. कुष्ठ.चि.।

श्वेतजरणः। पुं। शुक्लजीरके। शादा जीरा। वै.निघ.।

श्वेतजलजम्। क्ली। कुमुदे। श्वेतकुमुद। वै.निघ.।

श्वेतजीरकः। पुं। गौरजीरके। शादा जीरा। सं पांढरे जीरे। वं विलियजिरिगे। गुणाः—हिमो रूक्षः कटुः मधुरो दीपनः कृमिघ्नः विषघ्नः चक्षुष्यः उदरांध्मानहरश्च। रा.नि.व.६।

श्वेतटङ्कक(ण)म्। क्ली। स्फटिकारिकायाम्। फटकिरि। प.मु.। टङ्कणचारभेदे। सोहागा, शादा सोहागा। तत्पर्य्यायाः,—लोहितसिन्धु सिन्धुकरं मालतीतीरसम्भवं शिवं द्रावकरं शीतक्षारं टङ्कणम्। तद्गुणाः—स्निग्धं कटु उष्णं कफवातघ्नम् आम-क्षय-श्वास-विष-कास-मलघ्नञ्च। रा.नि.व.६।

श्वेततण्डुलमण्डम्। क्ली,पुं। आतपतण्डुलसिद्धमण्डे। आलो चा'लेर मण्ड। गुणाः—"मधुरं शीतलं किञ्चित् श्लेष्मलं शोषनाशनम्। अग्निरोगेहसंक्लृप्तिं वातघ्नं श्वेततण्डुलम्॥" अजि. १२अ.।

श्वेततुलसी। स्त्री। शुभ्रपत्रतुलसीवृक्षे। प.मु.।

श्वेतचित्रक। स्त्री। शुक्लमूलचित्रके। शादा चित्रा। हिं श्वेतनिशोत्तर। गुणाः—"श्वेता चित्रक रेचनी स्यात् स्वादुरुष्णा समीरहृत्। रुच्या पित्तज्वरश्लेष्मपित्तशीतोदरापहा॥" भा.।

श्वेतदण्डा (ण्डी)। स्त्री। श्वेतदूर्व्वायाम्। वै.निघ.।

श्वेतदन्ता। स्त्री। नागदन्त्यां। वै.निघ.।

श्वेतदर्भः। पुं। शुक्लदर्भे। वै.निघ.।

श्वेतदूर्व्वा। स्त्री। शुक्लदूर्व्वायाम्। प.मु.। वम्. पाढरीहरियालो। कं विलियकुरुके। तें शुक्लदूर्व्वालु। तत्पर्य्यायाः,—गोलोमी सिताख्या चण्डा भद्रा भार्गवी दुर्म्मरा गौरी विघ्नेशानकान्ता अनन्ता श्वेता विद्या श्वेतकाण्डा प्रचण्डा सहस्रकाण्डा सहस्रपर्व्वा सहस्रवीर्य्या सुरवल्लभा शुभा सुपर्व्वा सितच्छदा खच्छा कल्पागुरुहन्ता। गुणाः—शीतला मधुरा वान्तिपित्तघ्नी आमातीसारकासघ्नी रुच्या कषाया स्यात् स्वादी व्रण्या च जीवनी। तिक्ता हिमा विसर्पासृक्पित्तकफदाहहृत्॥" भा.।

श्वेतद्रुमः। पुं। वरुणवृक्षे। वरुण गाछ। वै. निघ.।

श्वेतधातुः। पुं। दुग्धपाषाणे। कुलथड़ि। रा.नि.व.१२।

श्वेतधामा(न्)। पुं। कर्पूरे। समुद्रफेने। मे.।

श्वेतधूनकम्। क्ली। शुक्लधूनके। रस.र.ज्वरादि. चि. गृहधूमकपाटरसे।

श्वेतनाड़ी। स्त्री। खटिकायाम्। कुलथड़ि। वै.निघ.। श्वेतापराजितायाम्। श्वेत अपराजिता। च.सू.२अ.।

श्वेतनामा। स्त्री। श्वेतापराजितायाम्। वै. निघ.।

श्वेतनिष्पावा। स्त्री। श्वेतपुष्पनिष्पावे। श्वेत शिम्। गुणाः—सुरुच्या मधुरा अल्पकषाया शीतला वातला बल्या आध्मानकरी पुष्टिकरी च। रा.नि.व.१६।

श्वेतपटलम्। क्ली। यशदधातौ। दस्ता-विशेष। वै.निघ.।

श्वेतपद्मम्। क्ली। श्वेतकमले। रा.नि.व.१०। वा.उ.५अ.। पुं। श्वेततुलस्याम्। प.मु.। राजहंसे। दुःस्वदर्भे। क्षुद्र शादा कुश। वै.निघ.। स्त्री (द्मा)। श्वेतशिग्रुपायाम्। शादा शिशु गाछ। रा.नि.व.६।

श्वेतपद्मम्। क्ली। शुक्लकमले। तत्पर्य्यायाः, —सिताम्भोजं दृशीपमं सिताज पुष्कर सेव बारिज हरिनेत्र शरत्पद्म शारदं शम्भुवल्लभम्। गुणाः,—मधुरं तिक्तं शीतल पित्तासृदाहतृष्णाभ्रम नाशकञ्च। रा.नि.व.१०। See पुण्डरीकम्।

श्वेतपर्णः। पुं। श्वेतार्जके। प.मु.। स्त्री(र्णी)। वारिपर्ण्यां। पानी। र.मा.।

श्वेतपर्णासः। पुं। श्वेततुलस्याम्। तत्पर्य्यायाः,—अर्ज्जकः गन्धपत्रः कुठेरकः। प.मु.।

श्वेतपाटला। स्त्री। शुक्लपुष्पपाटलावृक्षे। जटा.।

श्वेतपारावतः। पुं। शुभ्रकपोते। शादा पायरा। वै.निघ.।

श्वेतपाषाणः। पुं। शुभ्रप्रस्तरे। शादा पाथर। रा.सा.सं.रसप्रकरणे। स्फटिके। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वेतपिङ्गः (लः) । पुं । सिंहे । त्रिका. ।

श्वेतपिण्डितकः । पुं । महापिण्डीतरौ, शुक्लमदने । श्वेत मयना गाछ । रा.नि.व.९ ।

श्वेतपुङ्खा । स्त्री । शुक्लशरपुङ्खायाम् । रा.नि. व.४ । शोभा वनगोज ।

श्वेतपुनर्नवा । स्त्री । शुभ्रपुनर्नवायां । श्वेत-पुनर्नवा । गुणाः—"कटुः कषायागुरसा पाण्डुघ्नी दीपनी परा । शोफानिलगरश्लेष्महरी ब्रध्नोदर-प्रणुत् ॥" भा.पू.र. ।

श्वेतपुष्पः । पुं । श्वेतसिन्धुवारवृक्षे । शोभा निशिन्दा । जटा. । महाश्रवणपुष्पे । शण । रा.नि. व.४ । सेवन्तीपुष्पवृक्षे । शेउती । वै.निघ २भ. जीर्णज्व.चि.सेवन्तीपाके । वरुणवृक्षे । अर्कवृक्षे । वै.निघ. । क्ली । शुक्लपुष्पे ।

श्वेतपुष्पकः । पुं । करवीरवृक्षे । रा.नि.व.१० । श्वेतकासे । वै.निघ. ।

श्वेतपुष्पा । स्त्री । कीयातकीलतायाम् । शोभा घोषा । र.मा. । श्वेतश्रवणे । शोभा शण । श्वेता-निर्गुण्ड्यां । शोभा निशिन्दा । श्वेतशुकर्णिकायां । शोभा अपराजिता । वै.निघ. । नागदन्त्याम् । कैकिड़ी । रा.नि.व.५ । मृगेक्षारौ । रा.नि.व ७ ।

श्वेतपुष्पिका (प्पी) । स्त्री । पुनर्दावीलतायाम् । रा.नि.व.२३ । महाश्रवणपुष्पिकायाम् । बड़ शोभा शण । रा.नि.व.४ ।

श्वेतपूरिका । स्त्री । खाद्यद्रव्यभेदे । यथा—"गोधूमसत्वे च घृतं यावत् पिण्डत्वमाप्नुयात् । तावद्दत्वा जलेनाथ मर्दनीयं प्रयत्नतः । तस्यैव पूरिकाः कार्याः घृते पाच्याश्च ताः स्मृताः । शर्करा-सहिता जाड्या दुर्जरा धातुवर्धकाः । स्निग्धाश्च गुरवः पित्तवातनाशकरा मताः ॥" वै.निघ. ।

श्वेतप्रसूनकः । पुं । शाकवृक्षे । शेशुन गाछ । अ.मा. ।

श्वेतफला । स्त्री । शुक्लपुष्प-वृक्षायाम् । शोभा व्याकुड़ । रा.नि.व.४ ।

श्वेतभण्टिका । स्त्री । शुक्लवार्ताकौ । वै.निघ. ।

श्वेतभण्डा । स्त्री । श्वेतापराजितायाम् । शोभा अपराजिता । र.मा. ।

श्वेतभृङ्गराजः । पुं । (Heliotropium brevipolium.) शुक्लपुष्प-भृङ्गराजे । शोभा भीमराज । हिं शफेद भांरा । See भृङ्गराजः ।

श्वेतमक्षरी । स्त्री । चुक्चुपी । वै.निघ. ।

श्वेतमण्डलः । पुं । मण्डलीसर्पविशेषे । सु. कल्प.४अ. ।

श्वेतमन्दारः (कः) । पुं । श्वेतार्कवृक्षे । श्वेत आकन्द गाछ । वम. श्वेतमन्दार । कं विलिय सन्दारम् । तत्पर्य्यायाः,—पृथुकरवकः दीर्घा-युष्यः दीर्घालर्कः सितालर्कः सिताह्वयः । गुणाः—अल्पगुणः तिक्तः मलशोधनः सुवक्त्रकृमिघ्नश्च । रा.नि.व.१० ।

श्वेतमरिचम् । क्ली । Seeds of Hyperanthira moringa. शोभाञ्जनबीजे । सजिनार बीज । र.मा. । मं पांढरे मिरियें । कं विलियमेणसु । तं तेल्लमिरियालु । गुणाः—कटूष्णं विषघ्नं भूतघ्नं दृष्टिरोगघ्नं युक्त्या रसायनमपि भवति । रा.नि.व.९ । "सैन्धवं श्वेतमरिचम् ।" च.द.ज्व.चि.नस्ये । पुं । श्वेतसर्षपे । रा.नि.व.७ ।

श्वेतमहोटिका । स्त्री । श्वेतवृहत्याम् । शोभा वृहती । रा.नि.व.४ ।

श्वेतमूलः (ला) । पुं, स्त्री । श्वेतपुनर्नवायाम् । वै.निघ. ।

श्वेतमृगः । पुं । भूम्यमृगविशेषे । च. ।

श्वेतयूथिका । स्त्री । शुक्लयूथिकायाम् । शोभा यूंई । वै.निघ. ।

श्वेतरञ्जनम् । क्ली । शौषके । शब्दकल्प. ।

श्वेतरत्नम् । क्ली । स्फटिके । प.मु. ।

श्वेतराजिः (जी) । स्त्री । चिचिण्ड । चिचिङ्गा । भा.पू.१भ.शा.व. ।

श्वेतराजिका । स्त्री । श्वेतपीतसर्षपे, राजिकायाम् । राई । रा.नि.व.१६ ।

श्वेतरास्ना । स्त्री । श्वेतपुष्परास्नाविशेषे । भूरिप्र. ।

श्वेतरो(लो)ध्रः । पुं । पट्टिकारोध्रे । शुक्ल लोध । वै.निघ. २भ.ज्व.चि. । रा.नि.व.९ ।

श्वेतरोहितः । पुं । शुक्लपुष्परोहितकवृक्षे । शोभा रोहा, रोहना । तत्पर्य्यायाः,—सितपुष्पः सिताह्वयः सितपुष्पः श्वेतरोहितः लक्ष्मीवान् शुभ्र-पुष्पनकशेखरश्च ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्लभः। गुणाः—कटुः स्निग्धः कषायः शीतलः कृमिदोषघ्नः व्रणघ्नः प्लीहरक्तनेत्ररोगनाशकश्च। रा.नि.व.८।

श्वेतलक्ष्मणा। स्त्री। श्वेतकण्टकार्य्याम्। शादा कण्टिकारी। वै.निघ.।

श्वेतवचा। स्त्री। शुक्लवचायाम्। शादा वच। प.मु.। मं पांड़रे वेखण्डा। कं बिलियवज्जे। तत्पर्य्यायाः,—मेध्या षड्ग्रन्था दीर्घपत्रिका तीक्ष्णगन्धा हैमवती मङ्गल्या। गुणाः—हृद्या मति मेधायुःकफघ्नी भूत-वात-कृमिघ्नी दीपनी च। अपिच—"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा। हैमवत्युदिता तद्वत् गुणं हन्ति विशेषतः॥" अतिविषायाम्। आतईच। रा.नि.व.६।

श्वेतवर्णकम्। क्ली। श्वेतरक्तचन्दने। वै.निघ.।

श्वेतवर्णा। स्त्री। वराटकभेदे। शादावर्ण कड़िविशेष। रा.नि.व.१३। श्वेतपुष्पपाटलवृक्षे। श्वेत पारुल गाछ। वै.निघ।

श्वेतवर्वरकम्। क्ली। वर्वरचन्दने। रा.नि.व.१२।

श्वेतवर्वरिका। स्त्री। शुभतुलस्याम्। श्वेत कुलजो। रा.नि.व.१०। रावणकृतसप्तमश्लोकके।

श्वेतवल्कलः। पुं। उदुम्बरवृक्षे। यज्ञडुमूर गाछ। बटा।

श्वेतवल्ली। स्त्री। शुक्लवास्तुके। वै.निघ.।

श्वेतवारिजम्। क्ली। श्वेतपद्मे। शादा पद्मफूल। रा.नि.व.१०।

श्वेतवार्त्ताकिनी (की)। क्ली। श्वेतबृहत्यां। रा.नि.व.४।

श्वेतवाहः (नः)। पुं। अर्ज्जुनवृक्षे। अर्ज्जुन गाछ। "श्वेतवाहः प्रकौरव्यः।" वा.सू.१५अ.असनादिः।

श्वेतविट्कता। स्त्री। कफाधिक्यजन्यशुक्लपुरीषतायाम्। वै.निघ.।

श्वेतवोजः। पुं। श्वेतकुलत्थे। श्वेत कुरति कलाय। रा.नि.व.१६।

श्वेतवृक्षा। स्त्री। स्वनामख्यातलतताविशेषे। "श्वेतवृक्षा कपोतस्तु वनतिक्ता विसर्पिणी। शङ्खिनी काकचिञ्चा च गिरिजा धमरञ्जदा॥" शादा [illegible]।

श्वेतवृन्ताकः। पुं। शुक्लवार्त्ताकौ। वै.निघ.।

श्वेतवृहती। स्त्री। शुक्लपुष्पक्षुद्रबृहत्यां। शादा बृहती। कं बिलियगुलु। वम. पांड़री डोरली। तत्पर्य्यायाः—श्वेतमहौटिका श्वेतसिंही श्वेतफला श्वेतवार्त्ताकिनी श्वेता। गुणाः—वातश्लेष्मघ्नी रूक्षा अञ्जनयोगेन नानानेत्ररुजापहा। रा.नि.व.४।

श्वेतवृक्षः। पुं। वरुणवृक्षे। वरुण गाछ। प.मु.।

श्वेतवेतसः। पुं। जलवेतसे। वै.निघ.।

श्वेतशरपुङ्खा। स्त्री। शुक्लपुष्पशरपुङ्खायाम्। शरपूंखा। हिं श्वेतशरफोंका। तत्पर्य्यायाः,—श्वेतपुङ्खा शुभपुङ्खा सितशायिका सितपुङ्खा। गुणाः—कटूष्णा वातरोगकृमिघ्नी च। रा.नि.व.४।

श्वेतशा(सा)रिवा। स्त्री। शारिवाभेदे। अनन्तमूल। सा च दुग्धगर्भा व्रततिः। भा.पू. १भ.। गुणैः कृष्णशारिवासदृशी। गुणाः—"श्वेता तु शारिवा शीता मधुरा शुक्ला गुरूः। स्निग्धा तिक्ता सुगन्धिश्च कुष्ठकण्डूज्वरापहा। दृष्टदौर्गन्ध्याग्निमान्द्यश्वास-कासारुचीहरा। आमविदोषविषहृत् रक्तरुक् प्रदरापहा। कफातिसार-तृड्दाहरक्तपित्तहरा परा॥" वै.निघ.। See अनन्ता।

श्वेतशाल्मलिः। पुं। (Eriodendron anfractuosum.) White cotton tree. शुक्लपुष्पकिंशुकवृक्षे। श्वेत शिमूल गाछ। हिं सेनिवल हतियान। ता. इलवम्। Watts.

श्वेतशिंशपा। स्त्री। श्वेतपत्रशिंशपावृक्षे। शादा शिशु गाछ। मं वम. पांड़रा शिंशपा, शिसव। कं बिलिय इवीडु। तत्पर्य्यायाः,—श्वेतपत्रा श्वेतचिल्लिका सितशिंशपा। गुणाः—तिक्ता शीतला पित्तदाहहरी च। रा.नि.व.९।

श्वेतशिग्रुः। पुं। श्वेतपत्रपुष्पशिग्रुवृक्षे। श्वेत शजिना गाछ। मं वम. पांड़रा सेगवा। कं बिलियनुग्गि। तत्पर्य्यायाः,—सुतीक्ष्णः सुखभङ्गः सिताह्वयः सुमूलः श्वेतमरिचः रोचनः मधुशिग्रुकः। गुणाः—कटुः तीक्ष्णः श्लीपानिलघ्नः अङ्गव्यथाहरः रूक्षः दीपनः मुखजाड्यहरश्च। रा.नि.व.७।

श्वेतशिम्बा(म्बिः,म्बी)कः। स्त्री, पुं।

वेद प्रकाश

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजशिग्व्याम्। श्वेत शिम्। र.मा.। भा.पू.१भ. धा.व.। See निष्पावः।

श्वेतशिला। स्त्री। श्वेतपाषाणभेदे। श्वेत पाथरकुचा। गुणाः—हिमा स्वादुः मेहकफच्छर्दी मुखरोधाग्निसादीशूलत्रयपित्तघ्नी च। रा.नि.व.८।

श्वेतशुङ्गः। पुं। यवे। जटा.।

श्वेतशूकः। पुं। यवे। रा.नि.व.२१।

श्वेतशूरणः। पुं। वनशूरणनाम-कन्दशाके। वुनो ओल। सं वम्. पांड़रा शूरण। कं विलिय शूरण.। गुणाः—रूक्षः कटूष्णः क्लेदिघ्नः गुल्मशूलघ्नः अरोचकघ्नश्च। रा.नि.व.७।

श्वेतशेफालिका। स्त्री। शुक्लशेफालिकावृक्षे। संग्रहः।

श्वेतश्रेष्ठः। पुं। चन्दनवृक्षे। वै.निघ.।

श्वेतसर्जः। पुं। श्वेतधूनके। श्वेत धूना। गुणाः—आमातिसारनाशनः प्रलेपात् व्रणघ्नः पाददारिनिवारणश्च। संग्रहः।

श्वेतसर्षपः। पुं। शुक्लसर्षपे। श्वेत सरिषा, राई। प.मु.।

श्वेतसारः। पुं। श्वेत खदिरे। रा.नि.व.८।

श्वेतसिंही। स्त्री। श्वेतवृक्षत्याम्। रा.नि.व.४।

श्वेतसुरसा। स्त्री। श्वेतनिर्गुण्ड्याम्। अम.। श्वेतपुष्पतुलसीवृक्षे। श्वेत तुलसी गाछ। सु.सू. सुरसादिः। "सुरसा श्वेतसुरसा।" श्वेतशेफालिकायाम्। च.सू.शिरोविरेचने।

श्वेतसुरा। स्त्री। सुराभेदे। धेनो मद्य। राज.।

श्वेत(ता)स्यन्दा। स्त्री। श्वेतापराजितायाम्। रा.नि.व.३।

श्वेतहनुः। पुं। राजिमत्सर्पविशेषे। "तद्विषेण त्वगादीनां शुक्लत्वं शीतज्वरो रोमहर्षः स्तब्धत्वं गात्राणामदंशश्चोक्तः सान्द्रकफप्रसेकः कृद्दीरभीक्ष्णमच्छीः कण्डूः कण्ठे श्वयथुर्घुर्घुरक उच्छ्वासनिरोधः तमःप्रवेशः स्तब्धाश्च कफवेदना भवन्ति। सु. कल्प.४अ.।

श्वेतहरः। पुं। महाशालवृक्षे। वै.निघ.।

श्वेता। स्त्री। शरीरे तन्नामकतृतीयत्वचि। सा द्वौहस्तादशभागप्रमाणा चर्मदलाजगल्लीमशकाधिष्ठाना। सु.शा.४अ.। शर्करायाम्। [illegible] रा.नि.व.१४। स्फटिकारिकायाम्। फट्‌किरि। भा.। दूर्वा। आख्। मध्यखण्ड्याम्। शाँड़ गुड़। रा.नि.व.२७। श्वेतवचायाम्। श्वेत वच। सु.सू. ३८अ.। श्वेतकाञ्चने इति व्रह्मः, वै.निघ. उन्मा.चि.। श्वेतदूर्व्यायाम्। रा.नि.व.८। लताभिरीषे। अतिविषायाम्। आतइच। प.मु.। कारपाटलायाम्। काँटाशिरीष। र.मा.। वराटिकायाम्। कड़ि। मे.। गान्धारीवृक्षे। गामार गाछ। रा.नि.व.९। अपराजितायाम्। भा.म.४भ.सु.रो.चि.। श्वेतवृहत्याम्। श्वेतकण्टकार्य्यां। पाषाणभेदे। रा.नि.व.४पू.। श्वेतापराजितायां। श्वेत अपराजिता। रा.नि.व.३। च.द.उन्मा.चि.। लताभेदे। झाँकड़शाविशेष। शर्कराजातसुरायां। सा श्वेतपुनर्नवादि शालिपिष्टकप्रभवा। भा.। गुणाः—"कासार्शोग्रहणीश्वासप्रतिश्यायविनाशिनी। श्वेता मूत्रकफस्तन्यरक्तमांसकरी सुरा।" सु.सू.४६अ.। वंशरोचनायां। रा.नि.व.६। शुक्लविदलतायां। श्वेत तेउड़ी। शुक्लगुञ्जायाम्। शादा कुँच। श्वेतसारिवायां। अनन्तमूल। वै.निघ.।

श्वेताञ्जनम्। क्ली। शुक्लाञ्जने। शादा आँजन, शादा सुर्मा। इदं सौवीरगुणम्। वै.निघ.।

श्वेताढकी। स्त्री। श्वेतपुष्याढक्याम्। शादा रहर। गुणाः—दीपदा। रा.नि.व.१६।

श्वेतान्विदत्। स्त्री। शुक्लमूलविदति। श्वेत तेउड़ी। तत्पर्य्यायाः,—विभण्डी विदता विपुटा सर्व्वानुभूती सरला निर्गोवा रेचनी। गुणाः—मधुरा उष्णा रूक्षा रेचनी वातपित्तश्लेष्मोदरनाशिनी च। भा.।

श्वेताद्रिकर्णिका। स्त्री। शुक्लगिरिकर्णिकायां। वा.उ.५अ.।

श्वेतापराजिता। स्त्री। शुक्लपुष्यापराजितायाम्। शादा अपराजिता। सं वम्. पांड़री सुपली। कं विलिय गिरिकर्णिके। तत्पर्य्यायाः,—श्वेता श्वेतभर्त्रा दधिपुष्पिका सितपुष्पी श्वेतस्यन्दा श्वेताभद्रा। गुणाः—हिमा तिक्ता पित्तोपद्रवहरी चक्षुष्या विषघ्नी च। रा.नि.व.३।

श्वेताभद्रा। स्त्री। श्वेतगोकर्ण्यां। शादा अपराजिता। वै.निघ.।

श्वेताभ्रम्। स्त्री। श्वेतवर्णाभ्रे। शादा अभ्र। रा.नि.[illegible]

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वेताम्ब(ब)रः। पुं। सुनिषण्णशाके। रा. नि.व.४।

श्वेतास्थिः (का)। स्त्री। पीठोंड़ोति प्रसिद्ध वृक्षविशेषे, अस्थिकायां। मं पीठोंड़ी। कं विलिय हुलि। तत्पर्य्यायाः,—अस्थिका पिठोडी पिण्डिका। गुणाः—हृद्या मधुरा पित्तघ्नी बलप्रदा च। रा. नि.व.४।

श्वेतायुग्मम्। क्ली। अपराजितायुग्मे। एकाकिणिद्विसंज्ञा, अन्या महाश्वेता पालिन्दीसंज्ञा च। "श्वेतायुग्मं तापसानाञ्च वृक्षः।" वा.सू.१५ च.अरुणः।

श्वेतारिरसः। षतकुष्ठघ्नो रसः। पाठः—"शुद्धसूतं समं गन्धं त्रिफला भृङ्गवाकुची। भल्लातकी तिलः कृष्णो निम्बबीजं समं समं। मर्दयेद्भृङ्गजद्रावैः शोष्यं पेष्यं पुनः पुनः। वट्यं कुर्य्यात्तिलप्रस्थं रसः श्वेतारिको भवेत्॥" अनु. धृतमधुनो। रस.चि.।

श्वेतार्कः। पुं। शुभ्रपुष्पार्कवृक्षे। श्वेत आकन्द। तत्पर्य्यायाः,—तपनः प्रतापः शीतार्कः शुक्लपुष्पः श्वेतः काण्डीलः गणरूपकः वसुकः मन्दारः सदापुष्पः वृत्तमल्लिका वेधाः शम्भुः। See शुक्लार्कः।

श्वेतालुः। पुं। शुक्लवर्णालुके, महिषकन्दे। गुणाः—कटुः उष्णः कफवातघ्नः मुखजाड्यहरः रुच्यश्च। रा.नि.व.७।

श्वेतावलोकनः। पुं। शुक्लनेत्रतारूप-कफजन्यरोगविशेषे। निदा.।

श्वेताश्वः। पुं। कैटर्य्ये। घोड़ाशुटी। प.मु.।

श्वेताह्वा। स्त्री। शुक्लगोकर्ण्याम्। वै.निघ.। सितपाटलायां। श्वेत पारुल। रा.नि.व.१०।

श्वेताक्षः। पुं। सोमलतामेदे। सु.चि.२९अ.। See सोमः।

श्वेताक्षुद्रा। स्त्री। श्वेतकण्टकार्य्याम्। वै.निघ.।

श्वेतेक्षुः। पुं। श्वेतवर्णेक्षौ। शादा आख। वम्. पांढरा उंस। कं विलिय कब। तत्पर्य्यायाः,—सितेक्षुः काण्डेक्षुः वंशपर्वकः सुवेशः पाण्डुरेक्षुः। गुणाः—कठिनः रूक्षः गुरुः कफमूत्रकृत दीपनः पित्तदाहघ्नः विपाके च कीर्णः। रा.नि.व.१४। वात-पित्तप्रशमनः हृद्यः अन्तर्विदाही कफकृत्। अवि.१०अ.।

श्वेतैरण्डः। पुं। शुक्लैरण्डवृक्षे। शादा रेड़ि। हिं शफेद एरण्ड। मं पांढरे एरंडु। गुणाः—"कटुकः श्वेत एरण्डस्तीक्ष्णोष्णो गुरुः स्मृतः। वातोदावर्त्तकफहृज्ज्वरकासोदरापहः। शोथ-शूलकटीवस्तिशिरोरुङ्नाशनः स्मृतः। श्वासानाहकुष्ठव्रणगुल्मप्लीहामपित्तहा। प्रमेहौषमवातरक्त मेदान्ववर्द्धनप्रणुत्॥" वै.निघ.।

श्वेतोत्पलम्। क्ली। शुक्लकुमुदपुष्पे। शादा हेलाफूल।

श्वेतोदरः। पुं। दर्वीकरसर्पविशेषे। "तद्विषेण त्वगादीनां कृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदना कटी-पृष्ठ-ग्रीवादौर्ब्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जड़ता मुष्कोद्धारः कासश्वासौ हिक्का वायोरूर्द्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं क्षीतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति।" सु.कल्प.४अ.।"

श्वेतोन्मत्तः। पुं। शुक्लपुष्पधुस्तूरवृक्षे।

श्वेत्यम्। क्ली। श्वित्ररोगे। धवल। अ.टी.।

ष।

षः। पुं। कैशे। एका.।

षटिः (टी)। स्त्री। शण्याम्। शटी। वा.चि.१अ.।

षट्कम् (कटु)। क्ली। त्रिकटु-चव्य-चित्रक-पिप्पलीमूलेषु। वै.निघ.२भ.वा व्या.प्रत्यष्ठीला.चि.।

वेद प्रका

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षट्कनिघण्टुः। पुं। वैद्यकनिघण्टुभेदे।

षट्कोणम्। क्ली। हौरके। वै.निघ.।

षट्चरणः (पदः)। पुं। भ्रमरे। हला.। यूकायां। रा.नि.व.१९।

षट्चरणयोगः। पुं। षड्धरणयोगे। सि.यो. वा.व्या.चि.।

षट्पदघातो (इन्)। पुं। स्वर्णचम्पके। वै. निघ.।

षट्पददलः (प्रियः)। पुं। सुरपुन्नागवृक्षे। पूमाङ् गाछ। वै.निघ.। नागकेसरपुष्पवृक्षे। भ. मा.। स्त्री (या)। वनमल्लिकायां। वै.निघ.।

षट्पदमोदिनी। स्त्री। वर्ब्बूलवृक्षे। बाबूला गाछ। वै.निघ.।

षट्प(पा)दा (दी)। स्त्री। कीटभेदे। गन्धा फड़िं। ह.च.। "आपाण्डुवर्णा कपिला हरिता च प्रजायते। महीदरा च षट्पाद्यो सूक्ष्मवक्त्रोत्तमाङ्गिका। षट्पदी नाम..... ॥" ज.द.।

षट्पदातिथिः। पुं। आम्रवृक्षे। त्रिका.। स्वर्णचम्पके। वै.निघ.।

षट्पदाधारः। पुं। कदम्बवृक्षे। कदम गाछ। वै.निघ.।

षट्पदानन्दवर्द्धनः। पुं। देववर्बूरके। वै. निघ.। किङ्किरातवृक्षे। अशोक गाछ। रा. नि.व.१०।

षट्पदानन्दा। स्त्री। वार्षिकीमल्लिकायाम्। वेलमल्लिका। भा.।

षट्पदालयः। पुं। सुरपुन्नागवृक्षे। वै.निघ.।

षट्पदीभक्षः। पुं। गङ्गापतङ्गभक्षणजन्यास्य-रोगे। लक्षणं यथा—"ग्रासमभ्यगतं बाढा ये भक्षन्ति सुदारुणम्। तेषां शीर्षश्च मूर्च्छा च भ्रमः श्वासश्च जायते ॥" ज.द.।

षट्भद्रिका। स्त्री। बालरोगघ्नं औषधम्। पारसीय यमानिका-घन-कणा-शुण्ठी-विड़ङ्गा रुणानां चूर्णं। वा.।

षट्लवणम्। क्ली। सप्तलवणोपेते पञ्चलवणे। "काचसैन्धवसामुद्रविडसौवर्चलैः समैः। स्यात् पञ्चलवणं तच्च सप्तलोपेतं षड़ाह्वयम् ॥" रा.नि.व.२२ (ख)। दि.

षट्लोहसम्भवम्। क्ली। शिलाजतुनि। वै. निघ.।

षड़गः। पुं। मण्डलिसर्पविशेषे। सु.कल्प.४।

षड़ङ्गः। पुं। गोवृषभे। गोधूरी। वै.निघ। क्ली। दृश्ये षड़वयवे। तद् यथा—"जङ्घ बाहु शिरो मध्यं षड़ङ्गमिदमुच्यते।" षड़विध-गव्य-द्रव्ये। यथा—"गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना। षड़ङ्गमेतन्माङ्गल्यं पवित्रं सर्व्व गवां ॥"

षड़ङ्गघृतम्। क्ली। अतिसारे घृतम्। यथा: —"वत्सकस्य च बीजानि दार्व्याश्च त्वच उत्पलाः। पिप्पली शृङ्गवेरञ्च लाजा कटुशरीरिणी। षड़भि-रेभिर्घृतं सिद्धं पेयं मण्डावतारितम् ॥" च.द.। इदं चतुर्गुणजले: पाच्यम्।

षड़ङ्गयूषः। पुं। षड़ङ्गपानीये। तच्च मुस्तपर्प-टकोशीरचन्दनोदीच्यनागरैः समभागैः प्र. २ तो. वारि ४ प्र शे. २ प्र.। मुता, क्षेत्पापड़ा, वेणार मूल, रक्तचन्दन, बाला, शुंठ वा हरी-तकी। भैष.।

षड़ूषणम्। क्ली। समरिचपञ्चकोले। "पञ्च-कोलं समरिचं षड़ूषणमुदाहृतम्।" च.द.। गुणाः —पञ्चकोलसमं रुच्यमुष्णं विषघ्नञ्च। भा.पू.१भ.।

षड़्गुणबलिजारित-मकरध्वजः। पुं। षड़्गुणगन्धकजारितरसेन साधिते मकरध्वजे। षड़्गुण-बलिजारण विधिर्यथा,—सूतप्रमाणं सिक-ताख्ययन्त्रे दत्त्वा बलिम् मृद्घटितैरल्पभाण्डे। तेनाग्निषेऽव रसं निदध्यात् भस्माङ्कायं प्रविलोक्य भूयः॥ आषड़्गुण्यं गन्धकमल्पमल्पं क्षिपेदसौ— जीर्णबलिर्बली स्यात्। रसेषु सर्व्वेषु नियोजितो-ऽयमसंशयं हन्ति गदं जवेन ॥"

षड़्ग्रन्थः। पुं। करञ्जवृक्षे। काँटाकरञ्ज। अम.। स्त्री (न्था)। महाकरञ्जवृक्षे। डहरकरञ्ज। रा. नि.व.९। शुक्लवचायाम्। ग्रन्थ्याम्। शंठी। रा.नि. व.६। वचायाम्। वच। भा.। "ब्राह्मी-कुष्माण्ड-षड़्ग्रन्थाः।" भा.म.१भ.। वै.निघ.२भ.गुडूच्यादि. चन्दनाद्यवृते। पिप्पलीमूले। वै.निघ.२भ.च्य.चि. दशमूलकषाये।

षड़्ग्रन्थिः। , त्र । पिप्पलीमूले। चि.क.क.। [illegible] निघ.२भ. [illegible] (श्री) वचायां। ग्र.र.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षड्ग्रन्थिका। स्त्री। श्यामहरिद्रायाम्। शटी। अम०।

षड्धरणः। पुं। वातव्याधौ योगविशेषे। "चित्रकेन्द्रयवा-पाठा-कटुकातिविषाभयाः। वात-व्याधिप्रशमनो योगः षड्धरणः स्मृतः॥" सु.चि. ४अ.। पलदशमांशोऽयं योगः पञ्चगुञ्जासार्द्धेन प्रत्यादेयः।

षड्भुजा (रेखा)। स्त्री। खर्मूज इति ख्याते फलशाके। थूहरभेदे। तत्पर्य्यायाः,—मधुफला षड्रेखा षण्मुखा वृत्तकर्कटी तिक्तफला तिक्ता मधुपाका वृत्तैर्श्वारुः षण्मुखा। फलगुणाः—तिक्तं बाल्ये तदनु मधुरं किञ्चिदम्लञ्च पाके निष्पक्वं चेत् तदमृतसमं तर्पणं पुष्टिदायि। हृद्यं दाहश्रमवि-शमनं मूत्रगुद्धिं विधत्ते पित्तोन्मादापहरकफदं षड्भुजं वीर्य्यकारि॥" रा.नि.व.७।

षड्रसः। पुं। मधुराम्ललवणतिक्तकटुकषायेषु। रा.नि.व.२०। गुणाः स्वस्वपर्य्याये दृश्याः।

षड्रसनिघण्टुः। पुं। वैद्यकग्रन्थविशेषे।

षड्रेखा। स्त्री। षड्भुजायाम्। थूहरभूक्षां।

षड्विन्दुतैलम्। क्ली। शिरःपीड़ायां तैलम्। तिलतैलं ४ प्र. छागदुग्धं ४ प्र. भृङ्गराजरसः १६ प्र.। कल्कार्थं- एरण्डमूलं तगरपादुका शुलुफा जीवन्ती राना सैन्धवं गुड़त्वक् विड़ङ्गं यष्टिमधु शुण्ठी प्र.६ ती. ३ मा. २ र.। भैष.।

षण्ढः (क्लः)। पुं। योनिरोगविशेषे। लक्षणम् —"योनौ वातोपतप्तायां स्त्री गर्भं बीजदोषतः। नृदेषिण्यस्तनी च स्यात् षण्ढसंज्ञानुपक्रमा॥" वा.उ.३३अ.। नपुंसके। षण्ढौ द्विविधः—सरेता अरेताश्च। तयोः सरेतोलक्षणं—"यो भार्य्यायां सतौ मोहादङ्गनेव प्रवर्त्तते। तनः स्त्रीचेष्टिता-कारो जायते षण्ढसंज्ञितः॥" हषभे।

षण्डालः (ला, लो)। पुं, स्त्री। तैलमान-भेदे। छटाँक्। स्त्री। सारस्यां। कामुक्यां। विका०।

षण्ढः। पुं। नपुंसके। हे.च.। हषभे।

षण्मुखा। स्त्री। खर्मूज इति ख्याते फलशाके। थूहरभूक्षा। वै.निघ.।

षष्टिः (क्तिः)। पुं. स्त्री। षष्टिदिनपक्वशालि-धान्यविशेषे। साठे धान। तत्पर्य्यायाः,— षष्टिः षष्टिकः षष्टिका षष्टिशालिः स्निग्धतण्डुलः। तस्य लक्षणं—"गर्भस्था एव ये पाकं यान्ति ते षष्टिका मताः।" सा द्विधा गौरनीलभेदात्। गुणाः—"गौरी नीलः षष्टिकोऽयं द्विधा स्यादाद्यो रूक्षः शीतलो दोषहारी। बल्यः पथ्यो दीपनो वीर्य्यवृद्धिं दत्ते चास्मात् किञ्चिदूनो द्वितीयः॥" षष्टिशालिर्मागधदेशेप्रसिद्धः। रा.नि.व.१६। च. सू.४अ.। पुनः तद्भेदाः—"षष्टिकः शतपुष्पश्च प्रमोदकसुकुन्दकौ। महाषष्टिक इत्याद्याः षष्टिकाः समुदाहृताः॥" भा.। षष्टिक कङ्कुक सुकुन्दक-पीतकप्रमोदककाकलकासनपुष्प-महाषष्टिक चूर्णक-कुरवककेदारकप्रभृतयः षष्टिकाः। सु.सू.४६अ.। गुणाः—"षष्टिका मधुराः शीता लघवो बद्धवर्च्चसः। वातपित्तप्रशमनाः शालिभिः सदृशा गुणैः॥" भा. पू.१भ.धा.व.। शीतो गुरुस्त्रिदोषघ्नः मधुरश्च। अद्वि.१५अ.। यौगिकषष्टिकः पित्तघ्नः। राज. ३प.। विशेषाः पर्य्याये दृश्याः।

षष्टिकान्नम्। क्ली। षष्टिकभक्ते। गुणाः— "षष्टिकानाञ्च शालीनामिदं दीपनं मतं। बल्यं नेत्रं पाचनञ्च विदोषप्रशमनं मतम्। क्षयरोगं विषञ्चैव नाशयेदिति कीर्त्तितम्॥" वै.निघ.।

षष्टिजः। पुं। षष्टिकशालौ। रा.नि.व.१६।

षष्टिवासरजः। पुं। षष्टिकशालिधान्ये। रा. नि.व.१६। [रा.नि.व.१६।

षष्टिशालिः। पुं। षष्टिकशालौ। साठे धान।

षष्टिहायनः। पुं। षष्टिकशालौ। हस्तिनि।

षष्ठालुकाखकम्। क्ली। द्यन्तरव्यन्तरभुक्ते। विका.।

षाड़वः। पुं। रसे। रागे। विका.। मधुराम्ल-संयोगविशेषे। च.द.छर्दि.चि.। See खाड़वः।

षाण्ढ्यम्। क्ली। षण्ढतायाम्। लिङ्गानुत्थाने। च.द.व्यं.चि.।

षोड़शाङ्घ्रिः। पुं। कर्कटे। कँकड़ा।

षोड़शावर्त्तः। पुं। शङ्खे।

षोड़शिका (शी)। स्त्री। पलपरिमाणे। ८तो.। च.कल्प.१२अ.। तोलकद्वयमाने। प.प्र.१ख.।

ष्ठी(ष्ठ)वनम्। क्ली। मुखनोद्गिरणे। छेव फेलां। मा.नि.।

वेद प्रका

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स ।

सः । पुं । सर्पे । पक्षिणि ।

संज्ञम् । क्ली । पीतकाष्ठे, भावुकादिसमपीतकाष्ठे । श्र.च. । वि । सङ्कुचितजानौ । अ.टी.भ. । स्त्री (ज्ञा) । चैतन्ये । नास्ति । अ.टी.भ ।

संयः । पुं । अस्थिकङ्काले । अस्थिपञ्जर । श्र.च. ।

संयमः । पुं । भये । भा.म.४भ.नि.रो.चि. ।

संयमनम् । क्ली । निरोधे । मे. ।

संय(या)वः । पुं । घृतक्षीरादिपक्व-गोधूमे । पेराकीति लोके । स च मधुमस्तकः सधुनोपलिप्तः । भा.म.४भ.शि.रो.चि. । "मधुमस्तक-संयाव-घृतपूपी विशेषतः । समितामम्बुदुग्धेन खण्डेलामरिचार्द्रकैः । घृतपक्वां चिपेत् खण्डे संयावो ह्यंहणी गुरुः ॥" राज.३प. । करञ्जिकायां । लताकरञ्ज । वै.निघ. ।

संयुक्ता । स्त्री । आवर्त्तकीलतायाम् । रा.नि.व.३ ।

संयोगः । पुं । द्वयोर्बहूनां वा द्रव्याणां संहतौ । च.वि.१अ. ।

संयोगविरुद्धः । वि । संयोगेन विपरीतफलकारके, पयोमांसादौ । तच्च नानारोगहेतुः यथा —"राजमस्य-वोसर्प-दकीदराणां विस्फोटकीन्मादभगन्दराणां । मूर्च्छामदाध्मानगलग्रहाणां पाण्डामयश्यामविषस्य चैव । किलासकुष्ठव्रणगौदराणां श्वीघातिसारज्वरपीनसानां । सन्तानदोषस्य तथैव मृत्योर्विरुद्धमन्नं प्रवदन्ति हेतुम् ॥"

संयोजनम् । क्ली । मैथुने । संयोगे ।

संरब्धः । वि । विशालमूले । सु.चि.१अ. ।

संरम्भः । पुं । शोके । भा.म.४भ.नि.रो.चि. । आयतौ । क्रोधे । आटोपे । विका. ।

संरम्भी (न्) । वि । आयते । सु.नि.४अ. ।

संलपनम् । क्ली । प्रलापे । सु.सू.२५अ. ।

संलयः । पुं । निद्रायाम् । हे.च. ।

संवरः । पुं । सञ्चये । मत्स्यभेदे । हरिणभेदे । शम्बर मृग । क्ली । जले । शब्दकल्पः ।

संवरणः । पुं । वपुषलतायाम् । शंशा गाछ । वै.निघ. ।

संवर्णम् । क्ली । शिक्यानके । शिकनि, पौंटा ।

संवर्त्तः (कः) । पुं । विशीतकवृक्षे । रा.नि. व.११ । मुस्तके । च.चि.३अ. ।

संवर्त्तिः (का) । स्त्री । पद्मस्य केशरसमीपस्थदले । पद्मेर कचि पाड़ी । "संवर्त्तिका नव दलम् ।" अम. । भा. ।

संवर्द्धकः (नः) । वि । वृद्धिकारके । दीपने । हे.च. । व्याक. ।

संवर्हनम् । क्ली । शरीरमर्दने । वा.चि.७अ. ।

संवाटिका । स्त्री । शृङ्खाटके । पानिफल । जटा. ।

संवाहः (कः) । पुं । शरीरमार्जके । जटा. । विका. ।

संवाहनम् । क्ली । अङ्गमार्ज्जने, अङ्गमर्द्दने । गा टेपा । मे. । वा.चि.१अ. । गुणाः —"संवाहनं सांसरक्लमश्रमापहरं सुखम् । प्रीतिनिद्राकरं हृद्यं कफवातक्षयापहम् ॥" सु.चि.२४अ. । भारादिवहने । मे. ।

संवाहिका । स्त्री । पिपीलिकाविशेषे । सु. कल्प.८अ. ।

संवितिकाफलम् । क्ली । सेवफले । सेओफल । वै.निघ. ।

संवित्तिः । स्त्री । चेतनायाम् । श्र.र. ।

संविषा । स्त्री । अतिविषायाम् । श्र.च. ।

संवीतः । पुं । श्वेतकिणिह्याम् । वै.निघ. ।

संवृतः । पुं । जलवेतसे । वै.निघ. ।

संवृतकोष्ठः । वि । बद्धकोष्ठे । च.सि.२अ. ।

संवेदनः । पुं । छिक्किकायाम् । हेंचेता । वै.निघ. ।

संवेशः । पुं । निद्रायाम् । अम. ।

संवेशकः । वि । शयनादिकारके । च.सू.१५अ. ।

संवेशनम् । क्ली । अनियतशयनस्थाने । च.सू. १५अ. । सुरते । हे.च. ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संव्यूहिमः। वि। चार-दल्यादि-द्रव्यप्रक्षेपेण सहिते। सु.सू.११अ.।

संशमनम्। क्ली। सम्यक् शमयतीति संशमनम्। आकाशगुणभूयिष्ठद्रव्ये। पञ्चदुष्टदोषस्य सम्यग् निर्हरणपूर्व्वकं शान्तिकरणे, अदुष्टस्यानुदीरणे च। व्याधि-संशमनः प्रस्तुत-व्याधेः शमनम्। अप्रस्तुतव्याधेरनुदीरणम्। तदुक्तं—"न शोधयति यद्दोषान् समान्नीदीरयत्यपि। शमीकरोति च क्षुद्वान् तत् संशमनमुच्यते॥" ङ.। सङ्गो यथा—भद्रदारुकुष्ठहरिद्वावरुणमेषशृङ्गी-बलातिबलार्त्तगल कच्छुरासन्नकीकुवेराक्षीरतरु-सहचराग्निमन्थवत्-सादन्येरण्डाग्निभेदकालर्कार्कशतावरीपुनर्नवावासुक-वसिर-काञ्चनक-भार्गीकार्पासीहस्तिकालोपकुञ्चिकादर्भ-यवकोलकुलत्थप्रभृतीनि। सु.सू.३९अ.।

संशयः। पुं। उभयकोटिस्पर्शिज्ञाने। यथा—तलहृदयाभिघातः प्राणहरः, पाणि-पादच्छिन्नमप्राणहरमिति। सु.उ.४५अ.। सन्दिग्धेष्वर्थेषु अनिश्चये। यथा—किमकालमृत्युरस्ति नास्तीति। च.वि.८अ.।

संशयशमहेतुः। पुं। संशयच्छेदनहेतौ। च.वि.८अ.।

संशुद्धिः। स्त्री। सम्यक्शोधने। शरीरमार्জ্জने।

संशोधनम्। क्ली। यत् शरीरे दोषं सम्यक् शोधयति। संशोधनवर्गः—मदनकुटजजीमूतकैल्वाकु-धामार्गवकृतवेधनसर्षपविड्ङ पिप्पलीकरञ्ज-प्रपुन्नाड़-कोविदार-कर्व्वदारारिष्टाग्र्यत्यगन्धाविदुलबन्धुजीवक-श्वेताग्रपुष्पी-विम्बीवचा-मृगेर्व्वारु-चित्राग्र्येत्यूर्द्धभाग-हराणि। तत्र कोविदारपूर्व्वाणां फलानि कोविदारादीनाञ्च मूलानि ग्राह्याणि। सु.सू.३९अ.।

संशोषी (इन्)। पुं। सन्निपात-ज्वरविशेषे। लक्षणं—"मेचकवपुरतिमेचकलोचनयुगली मलोत्सर्गात्। संशोषिणि सितपिड़कामण्डलयुक्तो ज्वरे नरो भवति॥" भा.म.१भ.।

संश्यानः। वि। शीतेन सङ्कुचिते। व्याक.।

संसर्गः। पुं। संश्लेषे। सन्निपाते। मा.नि.।

संसर्गजः। वि। सान्निपातिके। मा.ज्व.नि.।

संसर्जनम्। क्ली। संशोधने। विरेकादि द्वारा शोधन। र.मा.। च.चि.१अ.। विरेकादनन्तरं पेयादिक्रमे। वा.चि.१अ.।

संसारः। पुं। विटखदिरे। रा.नि.व.८।

संस्कारः। पुं। गुणान्तराधाने। दत्तगुणाश्च तोयाग्निसन्निकर्षशौचमन्थनदेशकालादिभिः काल-प्रकर्षभाजनादिभिश्चाधीयन्ते। च.वि.१अ.।

संस्कारवाहः। पुं। गर्भवायुविकारजातविकार-जन्यपुरुषभेदे। यथा—"शुक्राशयद्वारविघट्टनेन संस्कारवाहं हि करोति वायुः।" च.शा.२अ.।

संस्कालः। पुं। मेषे। त्रिका.।

संस्था (नम्)। स्त्री, क्ली। व्यक्तीभूतपूर्व्वरूपे। "संस्थानं व्यञ्जनं लिङ्गम्।" मा.नि.पञ्चनिदाने। आकृतौ। च.इ.७अ.।

संस्पर्शः। पुं। सम्यक्स्पर्शे। मा.नि.। स्त्री (र्शा)। जलीनामगस्त्यद्रव्ये। अम.।

संस्वेदः। पुं। अतिघर्म्मे।

संस्वेदज-शाकम्। क्ली। शिलिन्ध्रके। भूँई-छाता वा वेङ्छाता। "उक्तं संस्वेदजं शाकं भूमिच्छत्रं शिलिन्ध्रकं। क्षिति-गोमय-काष्ठेषु वृक्षा-दिषु तदुद्भवेत्॥" गुणाः—"सर्व्वे संस्वेदजाः शीताः दीपनाः पिच्छिलाश्च ते। गुरवश्छर्द्यतीसार-ज्वर-श्लेष्मामयप्रदाः॥ श्वेताः शुचिश्च काष्ठ-वंश-गोव्रणसम्भवाः। नातिदोषकरास्ते स्युः शेषास्तेभ्यो विगर्हिताः॥" भा.।

संहतपत्रिका। स्त्री। शतपुष्यायां। शुल्फा। वै.निघ.।

संहननम्। क्ली। शरीरे। रा.नि.व.१८।

संहर्षः। पुं। आह्लादे। बायौ।

सहर्षा। स्त्री। चेवपर्ण्यां। धन्वन्तरिकोषः। च.वि.८अ.।

संहितच्छत्रिका। स्त्री। शतपुष्यायाम्। सिध्येयायाम्।

संहितपुष्पिका। स्त्री। सिध्येयाञ्चुपे। मउरि गाछ। रा.नि.व.४। शतपुष्यायाम्।

सकटः। पुं। शाखोटवृक्षे। शाओड़ा गाछ। शब्दकल्पः।

सकण्टकः। पुं। शेवाले। श.च.। पूतिकरञ्जे। र.मा.।

सकण्डूकः। पुं। कर्णपालीगतरोगे। सु.उ. १६अ.।

सकलम्। क्ली। रोहिषतृणे। गन्ध तृण। अखि-लतौ। वि। सम्पूर्णे। वै.निघ.।

वेद प्रक

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सकलप्रियः। पुं। चक्रवर्त्तके। छोला गाछ।
सकललक्षणम्। क्ली। शालनिर्य्यासे। धुना, रञ्जन। वै.निघ.।
सकुकुण्डः। पुं। गुर्जरदेशे तन्नाम्ना प्रसिद्धे वृक्षे। साकूकुण्ड वृक्ष। वम्. साखुरंड। गुणा— कषायः क्वचित्तु दीपनः श्लेष्मवातघ्नः वस्त्ररञ्जनः लघुश्च। रा.नि.व.६।
सकुलः(लो [ल्])। पुं। शोलमत्स्ये। शोल माछ। भ.र.। अ.म.।
सकुलादनी। स्त्री। महाराष्ट्रीलतायाम्। पीन शिउली। रा.नि.व.४। कटुक्यां। कटुकी। ज.द. वृश्चिके। स्त्री। काकवन्ध्यायाम्। सिंह्याम्। रा. नि.व.२३।
सकृत्। पुं। काके। वै.निघ.। विष्ठायां। अ टी.।
सकृत्पजः (जा)। पुं, स्त्री। काके। अम.। वृश्चिके। स्त्री। काकवन्ध्यायाम्। सिंह्याम्। रा. नि.व.२३।
सकृत्फला। स्त्री। कदल्याम्। कलागाछ। रा.नि.व.११।
सकृद्गर्भः। पुं। अश्वतरे। खच्चर। रा.नि. व.१९।
सकृद्वीरः (र्य्यः)। पुं। एकवीरवृक्षे। रा.नि. व.८। See एकवीरः।
सक्तुः (क्तुः)। पुं। यवतण्डुल लाजादिचूर्णे, क्वातु इति लोके। "यवतण्डुललाजादिचूर्णं सक्तुः प्रकीर्त्तितः।" प.सु.। तन्नामकविषे। छातारिविष। हे.च.।
सक्तुपिण्डी। स्त्री। शक्तुकृतपिण्डाकारभक्ष्यद्रव्ये। छातुर लाड़ु। See शक्तुपिण्ड।
सक्तुफला (ली)। स्त्री। शमीवृक्षे। अम.। भ.र.।
सक्थि। क्ली। जरुदेशे। ऊरुः। रा.नि.व.१८।
सक्थिमर्म्म। क्ली। ऊरुमर्मणि। तस्य स्थानानि एकादश, यथा—क्षिप्र-तलहृदय-कूर्च-कूर्चशिरो-गुल्फेन्द्रबस्तिजानवाख्यवीलोहितानीति विटपञ्चेति। सु.शा.६अ.।
सक्थ्यम्। क्ली। पले। मेद.अ.पि.चि.। सङ्कारितायाम्।
सगन्धा। स्त्री। सुगन्धशालौ। रा.नि.व.१६।
सगिधः। स्त्री। सहभोजने। अम.।
सङ्कटाक्षः। पुं। धववृक्षे। धाओड़ा गाछ।
सङ्कटी। स्त्री। उपोदिकायाम्। पुँई शाक। वै.निघ.।
सङ्करः। पुं। सन्निपाते। वै.निघ.।
सङ्काशिग्रहः। पुं। अश्वस्य दृष्टग्रहभेदे। अश्वः सहसा कुद्धः खगावं खादति। ज.द.५७अ.।
संक्लेदः। पुं। आर्द्रतायाम्, क्लिन्नतायाम्।
सङ्कोचम्। क्ली। कुङ्कुमे। पुं। आकुञ्चने। सुश्रुते। सत्यभेदे। शाँकोच माछ। मे.।
सङ्कोच(चि)नी। स्त्री। लज्जालुकायाम्। र.मा.।
सङ्कोचपिशुनम्। क्ली। कुङ्कुमे। भा.।
संक्रामकरोगः। पुं। संसर्गजरोगे। छोँयाचे रोग। लक्षणं—"प्रसङ्गादगात्रसंस्पर्शान्निःश्वासात् सहभोजनात्। सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्। कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च। औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्॥" मा.नि.।
सङ्क्लिन्नः। त्रि। पूतिनि। पचा। सु.नि.९अ.।
सङ्क्लेदः। पुं। आर्द्रतायां। व्याक.।
सङ्खपुष्पी। स्त्री। धातकीवृक्षे। सं.।
सङ्खिनी। क्ली। चीरपुष्याम्। च.सू.४अ.।
सङ्ख्या। स्त्री। गणनायाम्। येन विशेषेण संप्रातिभेदवती क्रियते। यथा—अष्टौ ज्वरा इति। मा.पञ्च.नि.।
सङ्ख्यानिदानटीका। स्त्री। संख्यानिदानस्य टीकायाम्।
सङ्गः। पुं। अप्रवृत्तौ। निरोधे। निदा.।
सङ्गरः। पुं। विषे। मे.। क्ली। शमीवृक्षफले। मे.।
सङ्गमः। पुं। मैथुने। मिलने।
सङ्गिनी। स्त्री। चीरपुष्याम्।
सङ्गृहकः। त्रि। भिन्नमलसञ्चारके। च.सू.४अ.।
सङ्ग्रहणी। स्त्री। संग्रहग्रहण्याम्। निदा.। See ग्रहणी।
सङ्ग्राहकः। त्रि। अनिलगुणभूयिष्ठद्रव्ये। अनिलस्य शोषणात्[illegible]। सु.सू.४१अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्ग्राही (ह्रिन्) । पुं । कुटजवृक्षे । कुड़चि गाछ । रा.नि.व.९ । त्रि । धारके । सङ्ग्राहके ।

सङ्घचारी (ह्रिन्) । पुं । मत्स्यभेदे । हे.च. ।

सङ्घट्टा । स्त्री । लतायाम् ।

सङ्घपुष्पी । स्त्री । शतपुष्पायाम् । शुल्फा । रा.नि.व.४ । धातकीवृक्षे । धाईफूलेर गाछ । रा.नि.व.९ ।

सङ्घर्षा । स्त्री । अलक्तके । रा.नि.व.९ ।

सङ्घाटिका । स्त्री । शृङ्खाटकलतायाम् । पानिफलेर लता । मे. । घ्राणे । विश्वः ।

सङ्घातः । पुं । कफे । रा.नि.व.२१ ।

सङ्घातपत्रिका । स्त्री । शतपत्रायाम् । शुल्फा । रा.नि.व.४ ।

सङ्घातबलप्रवृत्तः । पुं । आधिभौतिकागन्तुकरोगविशेषेषु । दुर्ब्बलस्य बलवद्रिपुवृत्तेऽपि विधा शस्त्रकृता व्यालादिकृताश्च । सु.सू.२४अ. ।

संङ्घिमः । पुं । तन्नामककर्षाकृतिविशेषे । अयं शुष्कशष्कुलिरसत्रपालिरितरात्पालिश्चेति विधा असाध्यश्च । सु.सू.१६अ. । [भिषाने ।

सङ्क्षेपरत्नावली । स्त्री । श्यामलालकृतद्रव्या-

सचरः । पुं । श्वेतभिण्ट्याम् । वै.निघ. ।

सचिक्कः । त्रि । कुदर्शने । क्लिन्नचक्षुषि । पेंचूटो चक्षु । शब्.र. ।

सचिवः । पुं । कृष्णधुस्तूरे । रा.नि.व.१० ।

सचिवामयः । पुं । पाण्डुरोगे । विसर्पे । रा.नि.व.२० ।

सचेष्टः । पुं । आमड़ावृक्षे । शब्.मा. । त्रि । चेष्टान्विते ।

सच्छरा । स्त्री । हरिद्रायाम् । शब्.च. ।

सच्छरः । पुं । शरीरे । हे.च. ।

सच्छलम् । क्ली । सौवर्चललवणे । सचल नवण ।

सच्छलनम् । क्ली । कम्पने । शब्दकल्पः ।

सच्छानः । पुं । श्लेनपक्षिणि । शिकरेपाखी । शब्दकल्पः ।

सच्छारिका । स्त्री । घ्राणे । मे. ।

सच्छारिणी । स्त्री । हंसपादीलतायाम् । गोधानिघ्ना लता । रा.नि.व.५ । रक्तलज्जालुकायाम्

सच्छारी (ह्रिन्) । पुं । स्फोटके । फोड़ा । रा.नि.व.२० । धूपे । विका. । वाथी ।

सच्छाली । स्त्री । गुञ्जायाम् । शब्दकल्पः ।

सच्छिद्रा । स्त्री । सूचिकाकर्ष्याम् । सूचाकाणी । शब्.र. ।

सच्छा । स्त्री । छायायाम् । शब्.र. ।

सच्छीवनम् । क्ली । दुग्धे । वै.निघ. ।

सच्छीवनागदः । पुं । सर्पदष्टे अगदविशेषे । "लाक्षा हरेणुर्नलदं प्रियङ्गु शिग्रुद्वयं यष्टिकपृथ्विकाश्च । चूर्णीकृतोऽयं रजनीविमिश्रो वर्त्ती निधेयो मधुसर्पिषाक्तः । शृङ्गे गवां पूर्ब्ववदापिधानस्थतः प्रयोज्योऽञ्जन-नस्य-पानैः । सच्छीवनो नाम..... ॥" सु.कल्प.५अ. ।

सच्छीवनी । स्त्री । उत्कलप्रसिद्धे वृक्षभेदे । रा.नि.व.५ ।

सच्छ्वरः । पुं । सन्तापे । रा.नि.व.२० ।

सटा । स्त्री । जटायाम् । केशरे । मे. । क्ली । जटायाम् । शब्.र. ।

सटिः । स्त्री । शठ्याम् । शठी । शब्.र. ।

सटि(ठि)का (टी, ठी) । स्त्री । आरण्यार्द्रके । वन आदा । खनामख्यातपत्रद्रव्ये । शठी । मं आंविहलद । कं हुलिअरसिव । बम्. कचोरा । कोङ्कणे प्रसिद्धा । तत्पर्य्यायाः,—शठी शठिका षटी गन्धमूलो षड्ग्रन्थिका पलाशः कर्व्वूरः कर्व्वुरः कचुरः सुगन्धा गन्धमूलम् गन्धमूलकः गन्धमूला गन्धोलिः गन्धशटी गन्धसटी गन्धबधूः गन्धपलाशी कौमूतमूलं कच्छीरा हिमजा हिमा हैमी षड्ग्रन्था षड्ग्रन्थी सुव्रता गन्धोली पलाशा पलाशिका पृथु-पलाशिका शटिः अम्लनिशा सुगन्ध-मूला गान्धारी समुद्रा तृणी दूर्व्वा गन्धा अम्लहरिद्रा सौम्या हिमोद्भवा वधूः । गुणाः—तिक्ता अम्लरसा लघुः उष्णा रुच्या ज्वरघ्नी कफास्रकण्डूव्रणघ्नी च । रा.नि.व.९ । गन्धपलाशाम् । भा.म.१भ.ज्व.चि. । "कटुपालिङ्किका सटी ।"

सट्टकम् । क्ली । विकटुदाड़िमजीरकादियुक्तस्नेहदधनि । अन्यत्—"शालिचूर्णं घृतं तोयं मिश्रितं सट्टकं भवेत् ।" भा. ।

सण्ढः । पुं । नपुंसके । अ.टी. ।

सण्डिशः । पुं । सन्दंशे । शाँड़ाशी । शब्दकल्पः ।

वेद प्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सततः। पुं। कफे। वै.निघ.।

सतत(क)ज्वरः। पुं। आमाशयस्थकफकृतज्वरे। स च प्रतिदिनं कालद्वयानुवर्त्तनात् किञ्चिन्नूनः। सु.नि.। "अहोरात्रे सततकः द्वौ कालावनुवर्त्तते।" मा.नि.।

सतसा। स्त्री। नागबलीभेदे। एक प्रकार पान गाछ। वम्। सातसीपर्ण्य। रा.नि.व.११। See नागबली।

सतित्तका। स्त्री। चुचुग्राके। भा.पू.१भ. शा.व.। See चुचुः।

सतो। सौराष्ट्रदेशे। हे.च.। (अभावे षड्-पपटो द्रष्टव्यः।)

सतोनः (कः)। पुं। कलायभेदे। मटर। रा.नि.व.१६। गुणाः—मलवर्द्धिकरः। सु.सू.४६ अ.। सु.चि.३अ.। च.द.गुणा.चि.। माषवीद्धौ। माषकलाय। हरेणौ। अवरुद्र। खण्डिके। थेँशारि। अ.टी.भ.। "कलायस्त्रिपुटः प्रोक्तः सतीनो वर्त्तुलो मतः।"

सतीलः (कः)। पुं। वंशे। झारा। सतीनके। रा.नि.व.१६। स्त्री (ला)। विष्णुक्रान्तायां। अपराजितां। रा.नि.व.५ कलायभेदे। तेउड़ा। "सतीला निष्ठिका तिक्ता।" श्र.च.। तद्गुणाः—"सतीला वातला रुच्या वात-पित्त-विषापहा। अत्युष्णा सा तु तिक्ता च वातघ्नी श्लेष्मपित्तला॥"

सतुषम्। क्ली। धान्ये। धान। शब्दकल्पः।

सतेरः। पुं। तुषे। उणा.।

सत्कदम्बः। पुं। कैलिकदम्बवृक्षे। कैलिकदम्ब। श्र.च.। "कैलिवृक्षः सत्कदम्बः व्रजभूः शिशुपालकः।"

सत्काञ्चनारः। पुं। रक्तकाञ्चने। "सत्काञ्चनारः कामालुः।" श्र.च.।

सत्काण्डः। पुं। श्येनपक्षिणि। बाजपाखी। श्र.च.।

सत्त्वम्। क्ली। आयुषि। धरणि.। मनसि। "सत्त्वसंज्ञे मनसि।" च.सू.१अ.। बले। स्वभावे। मे.। मनोविकारे। "सत्त्वं मनोविकारे स्यात्तदा यत्ता तथा स्थितिः।" रा.नि.व २१। प्राणिमात्रे। अम.। कृमौ। कृमि। सु.चि.९अ.। सारे। रस.। धरणि.। "आतस्य निर्गतः सारः सत्त्वमित्यभिधीयते।" गुणभेदे। तत् त्रिविधं गुद्धराजसतामस भेदेन। च.शा.४अ.।

सत्त्वः। पुं, क्ली। जन्तौ। अम.।

सत्त्वशुद्धिः। स्त्री। धातुसारस्य निर्म्मलीकरणे। रस.चि.३अ.।

सत्त्वावजयः। वि। शरीरस्थाहितकरकृपादिभ्यः मनोवृत्तिव्यावर्त्तके औषधे। च.सू.११अ.।

सत्त्वादिस्थानम्। क्ली। हृदये। च.।

सत्पत्रम्। क्ली। पद्मस्य कोमलदले। श्र.च.।

सत्फलः। पुं। दाड़िमवृक्षे। श्र.च.।

सत्फलदः। पुं। बिल्ववृक्षे। रा.नि.व.११।

सत्यः। पुं। अश्वत्थवृक्षे। रा.नि.व.११।

सत्यकर्म्मा (न्)। पुं। बिल्ववृक्षे। बेल गाछ। वै.निघ.।

सत्यनामा (म्नी)। स्त्री। ब्राह्म्याम्। ब्रह्मी शाक। वै.निघ.। आदित्यभक्तायाम्। हुड़्हुड़िया। वै.निघ.।

सत्यफलः। पुं। बिल्ववृक्षे। रा.नि.व.११।

सत्यवती। स्त्री। शमीवृक्षे। ब्राह्म्याम्। ब्रह्मी-शाक। वै.निघ.।

सत्यवाक्। पुं। काके। चिका।

सत्याह्वा। स्त्री। ब्राह्म्याम्। ब्रह्मी शाक। वै.निघ.।

सत्वक्। स्त्री। शिरायाम्। रा.नि.व.१८।

सत्सारः। पुं। वृक्षविशेषे। सत्सार गाछ। शब्दकल्पः।

सत्सुकन्दकः। पुं। अष्टविधस्थावरविषान्यतमे, विषे। स च पीतवर्णः। अग्नि.३१८अ.५६अ.।

सत्सुत्कारम्। क्ली। सुत्कारसहितवचने। हे.च.।

सदंशकः। पुं। कर्कटे। काँकड़ा। रा.नि. व.१९।

सदंशवदनः। पुं। कङ्कपक्षिणि। काँकपाखी। रा.नि.व.१९।

सदञ्जनम्। क्ली। पुष्पाञ्जने। श्र.च.।

सदनम्। क्ली। अवसादे। मा.नि.। जले। मे.।

सदाकुसुमम्। क्ली। घातकीपुष्पे। वै.निघ.। च.क्र.क.अ.सा.चि.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदागतिः। पुं। वायौ। अम०। सर्व्वे। मे.।

सदागतिशत्रुः। पुं। एरण्डवृक्षे। चि.क्र.क. स्त्री.रो.चि. अपरापातने।

सदातोया। स्त्री। एलापर्ण्याम्। काँटा अमरूलो। ग्र.च.।

सदानर्त्तः। पुं। खञ्जनपक्षिणि। ग्र.च.।

सदापुरः। पुं। कैवर्त्तमुस्तायाम्। केओट मूता। वै.निघ.।

सस्यम्। क्ली। फले। अ.टी.भ.। धान्यके। धान। हे.च.। शूकधान्य शमीधान्यसमूहे।

सस्यमारी (ह्यन्)। पुं। महामूषिके। मेटो इंदुर। रा.नि.व.१९। [सल्लकीवृक्षे। वै.निघ.।

सस्यसंव(स्व)रः। पुं। लघुप्रालेयवृक्षे। अम.।

सस्यसंवरणः। पुं। अश्वकर्णवृक्षे। रा.नि.व.९।

सहम्। क्ली। बले। मे.। मार्गशीर्षमासे। हे.च.। पांशुलवर्णे। रा.नि.व.६।

सहकारः। पुं। अतिसौरभयुक्ते आम्रवृक्षे। प.मु.। रा.नि.व.११। अम.।

सहचरः। पुं। झिण्टीवृक्षे। झाँटी गाछ। मे.। पीतझिण्ट्यां। पीतझाँटी। र.मा.। वा.सू.१अ. वेल्लन्तरादिव.। "गोकर्णकोकट-सहाचरवाण-काशाः।" नीलझिण्ट्याम्। प.मु.। सु.सू.१९अ. संशोधने।

सहचरद्वयम्। क्ली। नील पीतझिण्टीद्वये। कण्टकारीद्वये। सु.सू.३८अ.उल्लेखः।

सहचरा (री)। स्त्री। पीतझिण्ट्यां। र.मा.। वै.निघ.। सन्धिक.ज्व.चि.वचादिः। नीलझिण्ट्यां। प.मु.।

सहजकृति। क्ली। सुवर्णे। वै.निघ.।

सहजरसः। पुं। स्वरसे। रस.चि.१अ.।

सहडुकम्। क्ली। मांसकृत व्यञ्जनविशेषे। यथा—"छागादिमांसं सूक्ष्माद्यैः कुट्टितं खण्डितं पुनः। शुद्धमांसविधानेन पचेदेतत् सहण्डुकम्। सहण्डुकं गुणयन्ये शुद्धमांसगुणं स्मृतम॥" भा.।

सहदेवा (वी)। स्त्री। (Sonchus arvenois. Syn. S. Orixensis.) बलायाम्। वेलेड़ा। वनबालड़े। वन पालट्। हिं सहदेवी बरी। मं सहदेवी। पञ्जा. भारा। पीतपुष्पबलायाम्। काङ्कसोति लोके। पीत वेलेड़ा। तत्पर्य्यायाः,—सहाबला जोरबला कटभरा केशरूहा केसरिका मृगादनी वर्षपुष्पा केशवर्त्तिनी परासिनी देवबला सारिवी पीतपुष्पी देवाह्वा गन्धबलरी। गुणाः—बल्या हृद्या विषमज्वरवातार्शीहृद्रोगशीफनाशिनी। सर्पाख्यायाम्। शारिवायाम्। मे.। नीलपुष्पबलायाम्। सु.सू. ३८अ.। चि.८अ.। महाबलायाम्। गोरक्षकाकुलिन्यां। रा.नि.व.४। भा.सन्ततादि. ज्व.चि.। पीतदण्डोत्पलायाम्। पीत डानकुनी। र.मा.। भैष.ज्व.चि.पानीयभल्लातक्याम्। दण्डोत्पलायाम्। डानकुनी। हिं चिवड़ी। च.द. शूल.चि. एरण्डादशके। च.वि.८अ.। प्रियङ्गौ। महानील्याम्। वै.निघ.।

सहडुकम्। क्ली। सहण्डुकमांसे।

सहपानम्। क्ली। एकत्रपाने। हे.च.।

सहभादली। स्त्री। प्रसारण्याम्। गन्धभादुलि। भैष.आमवातचि. लेपे।

सहभोजनम्। क्ली। एकत्रभोजने। अम.।

सहरसा। स्त्री। मुद्गपर्ण्याम्। मूगानी। श.र.।

सहसानुः। पुं। मयूरे। उणा.।

सहस्यः। पुं। पौषे मासि। अम.।

सहस्रकाण्डा। स्त्री। श्वेतदूर्व्वायाम्। शादा दूर्वा। रा.नि.व.८।

सहस्रजित्। स्त्री। कसूर्य्याम्। मृगनाभि। वै.निघ.।

सहस्रदंष्ट्रः। पुं। महापाठीनमत्स्ये। बोयाल माछ, चितल माछ। अम.।

सहस्रदंष्ट्री (ष्ट्रिन्)। पुं। मत्स्यविशेषे। बोयाल माछ। श.र.।

सहस्रधौतः। त्रि। सहस्रवारं क्षालिते घृतादौ। शतवारवार धोओया घृतादि। वा.चि.१अ.।

सहस्रनुत्। पुं। अस्त्रवेतसे। भा.पू.१भ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहस्रपत्रम्। क्ली। कमले। पद्मकुल। रा. नि.व.१०।

सहस्रपर्व्वा। क्ली। श्वेतदूर्व्वायाम्। रा.नि.व.८।

सहस्रपादः। पुं। कारण्डवपक्षिणि। मादस पाखी। मे.।

सहस्रभित्। क्ली। अस्रवेतसे। भा.।

सहस्रमूली। स्त्री। द्रवन्त्याम्। रा.नि.व.३। आखुकर्ण्याम्। मूषाकर्णी। वै.निघ.।

सहस्रवत्सा। स्त्री। क्षुद्रपर्ण्याम्। मूगानी। शा.र.।

सहस्रवीर्य्या। स्त्री। दूर्व्वायाम्। र.मा.। च. चि.४अ.। नीलदूर्व्वायाम्। च.शा.८अ.। महाशतावर्य्याम्। रा.नि.व.३। श्वेतदूर्व्वायाम्। रा. नि.व.८। च.सू.४अ.।

सहस्रवेध(धि)म्। क्ली। चुक्रनामकक्षाङ्किकभेदे। रा.नि.व.१५। हिङ्गुनि। हिङ्ग्। मे.। भा.।

सहस्रवेधपाषाणः। पुं। हिङ्गुप्रस्तरे। वै. निघ.२भ.मधुरज्व.चि.।

सहस्रवेधिका। स्त्री। मृगनाभौ। वै.निघ.।

सहस्रवेधी (धिन्)। पुं। अस्रवेतसे। हिङ्गुनि। रा.नि.व.६। मृगनाभि। मृगनाभि। रा.नि.व.१२। चुक्रे। टंकपालः। प.मु.। स्त्री। ताम्रपुष्पायाम्। घातक्याम्। पाटलायाम्। श्यामालतायाम्। चित्रतायाम्।

सहस्रांशी
सहस्राङ्गी } स्त्री। क्षुद्रपीलुवृक्षे। वै.निघ.।

सहस्रा (स्रो)। स्त्री। अम्बष्ठायां। भा.। मयूरशिखायाम्। वै.निघ.।

सहस्राङ्घ्रिः। पुं। मयूरशिखायाम्।

सहाः (स्)। पुं। हेमन्तकाले। मे.। अयहायणमासे। अम.। स्त्री (हा)। घृतकुमार्य्याम्। प.मु.। माषपर्ण्यां। मांषाणी। च.द.शाल.चि.सहादिलाने। मुद्गपर्ण्याम्। मूगानी। सु.सू.३८अ.। सर्पकङ्कालिकायाम्। शा.च.। शुक्लभिण्टायां। शा.च.। राजायां। र.मा.। स्वर्णचीर्य्याम्। शेयालकाँटा। प.मु.। पीतदण्डोत्पलायाम्। पीत डानकुनी। र.मा.। तरुणीपुष्पवृक्षे। रा.नि.व.१०। देवताड़वृक्षे। देवदाड़ा। रा.नि.व.२। सेवतीपुष्पजातौ। भा.पू.खण्डे गुडूच्यधिकारे। "[illegible] दूरी च तासाम्।" नखरञ्जकमिषजे। मेहँदी। मे.।

सहाचरः। पुं। नीलपीतभिण्टयोः। नील ও पीतभाँटा। शा.र.। वा.सू.१५अ.। "नीलपीत कीलिटसहाचरवाणकाशाः।" सु.चि.३०अ.।

सहाह्वयम्। क्ली। क्षुद्रपर्ण्यां माषपर्ण्यां च। सु.मधुरजीवनीयगणे।

सहायः। पुं। चक्रवाकपक्षिणि।

सहारः। पुं। आम्रवृक्षे। उणा.।

सहासारः। पुं। वीरसाले। भूरसाल।

सह्यम्। क्ली। खाद्ये। सहिष्णुतायाम्। सम धुरे। शा.र.।

सह्योरा। स्त्री। चीरिणीवृक्षे। खिरनै वा खिरौंजी। वै.निघ.।

साकु(खु)रुण्डः। पुं। स्वनामख्यातवृक्षे। संकुरण्ड इति गुर्ज्जरे ख्यातः। तत्पर्य्यायाः,— गन्धिफलः विकटः वल्लभूषणः कुरण्डः कर्ञ्जूरफलः सकुरण्डः। गुणाः—कषायः रुचिकरः दीपनः सारकः श्लेष्मवातघ्नः वस्त्ररञ्जनः लघुश्च। रा.नि. व.६। वै.निघ.२भ.च.सा.चि.साखुरण्डचूर्णे।

साक्तुकम्। क्ली। शक्तुसमूहे। यवे। व्याक.।

सागरकम्। क्ली। सामुद्रलवणे। वै.निघ.।

सागरगामिनी। स्त्री। मूर्व्वालतायां। छोटि एलाच। रा.नि.व.६।

सागरजम्। क्ली। लवणे। वै.निघ.।

सागरजमलः। पुं। समुद्रफेने। वै.निघ.।

सागरफेनः। पुं। समुद्रफेने।

सागरोत्थम्। क्ली। सामुद्रलवणे। कदरुच। रा.नि.व.६।

सागरोद्भूतः। पुं। शङ्खे। शाँक। वै.निघ.।

साङ्कृत्यः। पुं। ऋषिविशेषे। च.।

साङ्कुष्ठा। स्त्री। गुञ्जालतायाम्। र.मा.।

साङ्गातिकः। त्रि। सारात्मके।

साचिवाटिका। स्त्री। पुनर्नवायाम्। र.मा.।

साचिचारः। पुं। खञ्जिकाचारे। साजिमाटी।

साञ्जनः। पुं। गवेधुकायाम्। कुकलासे। काँकलास। शा.च.।

सात्मजा। स्त्री। चर्म्मकषायाम्, पीतदुग्धसेहुण्ड-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेदे। मनशाविद्ध[illegible]स. वड़िलसीनुत्री कं हिरियचटकनख। तत्पर्य्यायाः,—समला अमला सारी बिन्दु विमला विपुला बहुफेना चर्म्मकषा पंना दीप्ता विषालिका स्वर्णपुष्पी पवयना। गुणाः —कफपित्तघ्नी लघुः तिक्ता कषाया विसर्पकुष्ठ-विस्फोटव्रणघ्नी च। रा.नि.व.४। अपिच,— "सातला कटुका पाके वातला शीतला लघुः। तिक्ता शीथ-कफानाह पित्तोदावर्त्त रक्तजित् ॥" भा।

सातीलकः। पुं। कषायभेदे। मेदिनी। अ. टी.रा।

सात्म्यम्। क्ली। यदद्यस्य सेवितं सुखाय सम्पद्यते तत् तस्य सात्म्यम्। तच्च द्विविधं चेष्टाख्यमाहाराख्यञ्च। चेष्टाख्यञ्च कायवाङ्मनोभेदात्त्रिविधम्, आहाराख्यञ्च रसभेदात् षड्विधम्। सु.सू.२०अ. ङ.। औषधादिजनित-सुखानुबन्धे, व्याधिगुण विपरीते आहारविहारादौ। "हेतुव्याधिविपर्य्यस्त-विपर्य्यस्तार्थकारिणाम्। औषधान्नविहाराणामुप योगं सुखावहम्। विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतम्॥" मा.नि.। सात्म्यं नाम तत् यदात्मन्युपशेते। तच्चित्रविधं प्रवरावरमध्यविभागेन। तत्र सर्व्वरसं प्रवरम् एकरसमवरं मध्यन्तु प्रवरावरमध्यस्थम्। च.वि.१अ.।

सादः। पुं। अवसाने। क्लान्तायाम्। वै.निघ.। कर्दमे।

सादनी। स्त्री। कटुरोहिण्याम्। कटुकी। रा.नि.व.६।

साद्दश्यः। पुं। कुरङ्गमृगे। त्रिका.।

साधकम्। क्ली। तन्नामकपित्ते। भा.। See पित्तम्। पुं। तन्नामकवृक्षस्याग्नौ, येन मनोऽभिलाषः सिध्यति। सु.सू.२१अ.। दमनकवृक्षे। वै. निघ.।

साधनम्। क्ली। अग्नौ। रा.नि.व.१७। पुत्रजीववृक्षे। वै.निघ.। द्रव्ये। अम.।

साधारणदेशः। पुं। जाङ्गलानूपोभयदेश-लक्षणयुक्ते प्रदेशे। लक्षणं यथा—"उभयगुणयुतं वा नातिरुक्षं न स्निग्धं न च खरबहुलत्वं चाभितः कण्टकाढ्यं। भवति च जलकौर्णं नाति शीतं नचोष्णं समप्रकृतिसमेतं विद्धि साधारणञ्च॥" अग्नि. ४अ.। "मिश्रचिह्नन्तु यो देशः स हि साधारणः स्मृतः। तस्मिन् देशे यदुद्भूतं तत्तु साधारणं स्मृतम्॥" अपिच,—समाः साधारणे यस्माच्छीतवर्षोष्मसारुताः। दोषाणां समता तस्मात् साधारणो मतः॥"

साधारणमृगः। पुं। जाङ्गलानूपोभयदेश-चारिणि जन्तौ, शूकरादौ, यथा—"शूकरा मृग-शल्लाद्याः सलिलाशयमाश्रिताः। मकराद्याश्च गण्डाका गवयाश्च तथापरे। महिषाद्याश्च ये चैव ते च साधारणा मताः" अग्नि. २०अ.।

साधिका। स्त्री। सुषुम्नी। हे.च.।

साधुः (कः)। पुं। दमनकवृक्षे। वै.निघ.। साधुवृक्षे। रा.नि.व.९।

साधुपुष्पम्। क्ली। स्थलपद्मे। स्थलपद्म। श.सा.।

साधुरसा। स्त्री। मदिरायाम्।

साधुवृत्तः। वि। हिताहारविहारकारिणि।

साधुवृक्षः। पुं। कदम्बवृक्षे। कदम्ब गाछ। श.च.। वरुणवृक्षे। वरुण गाछ। रा.नि.व.९।

साध्यः। वि.। साधनीये विषये।

साध्वसम्। क्ली। भये। अम.। लज्जायाम्।

साध्वी। स्त्री। मेदायाम्। रा.नि.व.५। दुग्ध-पाषाणे। फूलखड़ि। प.मु.।

सानन्दः। पुं। गुल्फकरञ्जे। रा.नि.व.९।

सानसिः। पुं। सुवर्णे। उणा.।

सानुजः। पुं। तुम्बुरुवृक्षे। रा.नि.व.११। पुष्करीकवृक्षे। पूंइरिया गाछ। रा.नि.व.१२। स्त्री। चायमाणायाम्। वलाडूमूत्र।

सानुबाधनः। वि। कालान्तरप्राणहरे। च.सू.१अ.

सानुमानकः। पुं। पुष्करीकवृक्षे। पूंइरिया गाछ। वै.निघ.।

सान्द्रष्टिकम्। क्ली। तालकालिकफले। वै.निघ.।

सान्द्रम्। क्ली। तक्रे। घोल। वै.निघ.। वि। स्निग्धे। स्निग्ध।

सान्द्रपुष्पः। पुं। विभीतकवृक्षे। श.च.।

सान्द्रप्रसादमेहः (हो[ह्न्])। पुं। कफज-मेहविशेषे। लक्षणं यथा—"यस्य संहन्यते मूत्रं किञ्चिल्लिङ्गात् प्रसीदति। सान्द्रप्रसादमेहीति तमाहुः श्लेष्मकोपतः॥" च.नि.४अ.।

सान्द्रमेहः। पुं। मेहरोगभेदे। अत्याविलं सान्द्रञ्च मेहति। सु.नि.६अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सान्ध्यकुसुमा। स्त्री। विसन्धिपुष्पवृक्षे। यत्र पुष्पं विकालमेव विकसति। रा.नि.व.१०।

सान्नाय्यम्। क्ली। घृते, हविषि। त्रिका.।

सान्निपातिकः। पुं। त्रिदोषजरोगे। रा.नि. व.२१। त्रि। त्रिदोषसम्बन्धिनि।

सान्निपातिकी। स्त्री। सन्निपातजन्ययोनिरोगे। लक्षणं यथा—"...त्रिभिर्दोषैः योनिगर्भाशयाश्रितैः। यथास्वैपद्रवकरैर्व्यापत् सा सान्निपातिकी॥" वा.उ.३३अ.।

साब्दो। स्त्री। द्राक्षाविशेषे। शब्दकल्प.।

सामजः (योनिः)। पुं। गजे। मे.।

सामलयम्। क्ली। हरीतक्यां गुरुत्वी-गुडूचीषु। वै.निघ.।

सामवातः। पुं। आमयुक्तवातरोगे। लक्षणं —"वायुः सामो विबन्धाग्निसाद-तन्द्रान्तकूजनैः। वेदना-शोथ-निस्तोदैः क्रमशोऽङ्गानि पीडयेत्॥" भा.। आमवातास्यरोगे। तल्लक्षणम् यथा,— "अङ्गमर्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः। अपाकः शूलताङ्गानामामवातस्य लक्षणम्॥ कष्टः सर्व्वरोगाणां यदा प्रकुपितो भवेत्॥ इत्यादशिरोगुल्फविकृजानूरुसन्धिषु। करोति सानुजं शीघ्रं यत्र दोषः प्रपद्यते॥ इत्यादि। मा.नि.।

सामान्यम्। क्ली। एकत्वबुद्धिकरजातौ। यदनेकासु भिन्नदेशकालासु गवादिव्यक्तिषु अयं गौरयं गौरित्यादिप्रकारा एकाकारा बुद्धिः तत् सामान्यम्। च.सू.१अ.।

सामिचन्द्रः। पुं। योनिरन्त्यावरणे सतीच्छदाख्यचर्म्मणि। "अधस्तात् योनिरन्त्यस्य तनुश्चन्द्रार्द्धसन्निभः। कौमारे प्रायशः सामिचन्द्रो नारीषु दृश्यते॥"

सामुद्गकः। पुं। संपुटे। वा.उ.३९अ.।

सामुद्गसन्धिः। पुं। शीर्षोरुगतसन्धिषु। भा.। अंसपीठगुदयोनिनितम्बेषु सन्धौ। सु.शा.५अ.।

सामुद्रम्। क्ली। समुद्रज-लवणे। कचकच, पाङा। हिं पांगा। तत्पर्य्यायाः,—वासरं विकटं कडकं सामुद्रं सामुद्रकं शिवं वशिरं सारोत्थं अच्छोदं लवणाब्धिजं। गुणाः— लघु हृद्यं पलितजनकं पित्तकरं दीपनं रुच्यञ्च। रा.नि.व.६। समुद्रफेने। रस.र.हरिद्रलवङ्गादिचूर्णे। नारिकेले। दीपान्तरवचायाम्। तोपचिनि। वै.निघ.। पुं। मत्स्यविशेषे। सु.कल्प.८अ.।

सामुद्रमत्स्यः। पुं। तिमितिमिङ्गिलकुलिशपाकमत्स्यादिषु। तन्मांसगुणाः—गुरु स्निग्धं मधुरं नातिपित्तलं वातहरमुष्णं हृद्यं श्लेष्मवर्द्धनञ्च। सु.सू.४६अ.।

सामुद्राद्यचूर्णम्। क्ली। उदराधिकारे चूर्णम्। साम्भरिलवण, सचललवण, सैन्धवलवण, वनयमानी, यवक्षार, विड्ङ्ग, हिङ्गु, पिप्पली, चित्रामूल, शुंठि, प्रत्येक चूर्ण समभाग। घृत दिना सेवन करिबे। सा.कौ.।

सामुद्रिका। स्त्री। सविषजलाधुकायाम्। सविष जोंक। सु.सू.१३। See जलायुका।

साम्ब(म्भ,न्धा)रम्। क्ली। गार्दलवणे। साम्भरिलवण। रा.नि.व.६।

साम्भरी। स्त्री। रक्तशीधुवृक्षे। शब्दच.।

साम्राणिकर्द्दमम्। क्ली। जवादिनामगन्धद्रव्ये। रा.नि.व.१२। See जवादिः।

साम्राणिजम्। क्ली। महापारिवतफले। रा नि.व.११।

सायकः। पुं। शरे। रा.नि.व.८।

सायकपुङ्खा। स्त्री। शरपुङ्खायाम्। शरपूंख। रा.नि.व.४।

सायङ्कालः। पुं। सायाह्ने।

सायोद्विदुरा। स्त्री। मल्लिकाविशेषे। यः सायं विकसति। गुणैर्वार्षिकीतुल्या। रा.नि.व.१०।

सारः। पुं। सज्ञायां। शाँस। नकुल. १२अ.। अश्व। दाड़िम्बवृक्षे। वै.निघ.२भ.। पियालवृक्षे। वट्टे। सुक्षे। धूर्ते। क्रोधे। वै.निघ.। वज्रचारे। रा.नि.व.६। रोगे। धरणिः। वले। अम.। हरिद्वरे। वैद्यक्रे माथा। शब्दच.। कर्पूरे। रा. नि.व.१२। नकुल. १२ अ.। नीलीवृक्षे। वै.निघ.२ भ.वा.व्या. प्रत्यष्ठीलाचि.। काष्ठान्तर्भूतपरिणतनिर्यासे। शुकना आठा। "खती निर्गतवेष्टकं लाक्षा-सर्जरस मोचरसादिकम्।" च.सू.१अ.। सालसारे। सु.चि.१८अ.। लौहे। भा.। नवनीते। रा.नि.व.१५। पानके। पाना, शरबत। दृढान्तर्गतस्थिरपदार्थे, स चाष्टविधः—यथा त्वग्रक्तमांसमेदोऽस्थि-मज्जा-शुक्र-सत्वानि। तत्र स्निग्धश्लक्ष्ण-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदृप्रसन्नमूर्ध्नी...सारसुकुमारलोमा सप्रभेश्च च तत्सारार्थी। सा च सारता सुखसौभाग्यादीनि आचष्टे। कर्णाक्षिमुखनिष्ठानासौष्ठ पाणिपादा दीनि स्निग्धरक्तानि शोभन्ति भाजिष्णूनि रक्त सारार्थी। सा सारता सुखसुदयतां मेधां सन खिलसौकुमार्यादीन्याचष्टे। मांससारार्थी शङ्ख-ललाटकक्षाटिकाचिबुकगण्डादीनि स्थिरशुभमांसोप चितानि भवन्ति। सा सारता चमाधृतिविद्या सुखारोग्यबलप्रभृतीनि आचष्टे। मेदःसारार्थी बलवर्णनेचकेशलोमनखदन्तौष्ठमुखपुरीषेषु विशेषतः स्नेहः। सा च सारता वित्तस्त्रीसुखोपभोगप्रदा नान्यार्जवं सुकुमारोपचारतामाचष्टे। अस्थिसाराः पार्ष्णि-गुल्फ-जान्वरत्निजत्रु-चिबुकशिरः-पर्व्वस्थूलाः स्थूलास्थि-नख-दन्ता सन्दोस्राहादयो भवन्ति। मज्जसाराः तन्वङ्गा बलवन्तः स्निग्धवर्णस्वराः स्थूल दीर्घवृत्तसन्धयः दीर्घायुषो बलवन्तश्च। श्रुतविज्ञान-वित्तापत्यसम्मानभाजश्च सौम्याः सौम्यप्रेक्षिणश्च वीर पूर्णलोचना इव प्रहर्षबहुलाः स्निग्धवृत्तसार-समसम्मत-शिखर-दशनाः प्रसन्न-स्निग्ध-वर्ण-स्वरा भाजिष्णवो महास्निग्धश्च शुक्रसारास्ते स्त्रीप्रियाः स्त्रीप्रियोपभोगा बलवन्तश्च। सुखैश्वर्यारोग्यवित्त-सम्मानापत्यभाजः स्मृतिमन्तः भक्तिमन्तः कृतज्ञाः प्राज्ञाः शूरयो महोत्साहा दक्षा धीरा समर-विक्रान्तयोधिनः स्थलसाराः।" च वि.८अ.। क्ली। जले। छग। मे.।

सारकः। पुं। जेपालवृक्षे। प.मु.। वै.निघ. २भ.चित्तविभ्रम.चि.। पीतसङ्गे। धान्यके। वै. निघ.। यवचारे। त्रि। विरेचके।

सारखदिरः। पुं। दुःखदिरे। शुक्ले दोषघ्ने। रा.नि.व.८.।

सारगन्धः। पुं। चन्दनवृक्षे। श्र.च.।

सारघम्। क्ली। सरघाकृतमधुनि। माक्षिकमधु। जटा.। गुणाः—"तस्माल्लघुतरं रूक्षं सारघं नाति-शीतलं। कासे क्षये प्रशस्तं स्यात् कामलार्शो-विनाशनम्। नातिशीतं नातिरूक्षं दीपनं बल-कृन्मतं। अतीसारे नेत्ररोगे क्षते वा क्षतजे हितम्।" अत्रिः १८ अ.।

सारङ्गः। पुं। मृगविशेषे, चित्रमृगे। हरिण विशेषः। मे.। श्र.र.। तन्मांसगुणाः—जाङ्गल स्निग्धं मधुरं लघु हृद्यञ्च। रा.नि.व.१७। विष्किर-जातीय चातकपक्षिणि च.नि.व.१९। सु.सू. ४६अ.। हस्तिनि। वै.निघ.। कर्बुराश्वे। "सारङ्गः कर्बुरः स्मृतः।" नकुल.३अ.। कुष्ठे। राजहंसे। मे.। सिंहे। कोकिले। मयूरे। कोकिले। कर्पूरे। स्त्री। पद्मे। चन्दने। शङ्खे। पक्षिणि। स्वर्णे। अनेकार्थधोषः।

सारजम्। क्ली नवनीते। नवनि। श्र.च.।

सारजासवः। पुं। आम्र-चन्दनादि सारीत्य-विंशतिविधासवेषु। च.सू.२५अ.।

सारणः। पुं। भद्रबलायाम्। गङ्गाभाटुलिन्यां। धरणिः। आसातकवृक्षे। श्र.च.। अतीसाररोगे। हे.च.। नवनीते। क्ली। गन्धभेदे। धरणिः।

सारणा। स्त्री। रसस्य संस्कारविशेषे। रस. चि.३अ.। रसशोधनार्थे यन्त्रभेदे। तद् यथा—"मूषा तु निर्मिता मूषा सरन्ध्रा सूतशोधनी। गम्भीरा सारणा नाम्ना यन्त्रं तत् कथ्यते बुधैः॥"

सारणिः (णी)। स्त्री। प्रसारख्याम्। गङ्गा-भाटुलिन्यां। उणा.। रा.नि.व.५। भट.व.१। नकुल.१३अ.। प्रसारणायाम्। वै.निघ.।

सारण्डः। पुं। सर्पाण्डे। सर्पाण्डिश्च। जटा.।

सारतरुः। पुं। कदलीवृक्षे। धनञ्जयः। खदिर-वृक्षे। वै.निघ.।

सारतैलम्। क्ली। सुश्रुतोक्त क्षुद्ररोगहरतैले, शिंशपागुरुसरलदेवदार्व्वादितैले। सु.चि.२०अ.।

सारद्रुमः। पुं। खदिरवृक्षे। रा.नि.व.८।

सारपाकम्। क्ली। तन्नामकफलविषभेदे। सु. कल्प.२अ.। See फलविषम्।

सारपादपः। पुं। धामनवृक्षे। श्र.र.।

सारफलः। पुं। सारास्रे। वै.निघ.।

सारबन्धका। स्त्री। मेथिकायाम्। वै.निघ.।

सारभाण्डम्। क्ली। कस्तूरीमृगाण्डे। शब्द-कल्प.।

सारमण्डूकः। पुं। मण्डूकजातीयकीटे। सु. कल्प.८अ. See कीटः।

सारमूषिका। स्त्री। देवदालीलतायाम्। वेत्राताड़ा। रा.नि.व.३। See अगरी।

सारमेयः। पुं। कुक्कुरे। प.मु.। स्त्री। कुक्कुर्य्यां। श्र.र.।

सारलोहम्। क्ली। लौहसारे। ईम्पात्। तस्य लक्षणम्—"चमाभच्छि खराकाराश्चक्राल्य-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नेन लिप्यते। लोहं स्यर्शेव सन्नाणि तन्मारमभिधीयते॥" गुणाः—"लोहं सारात्र्यं छेदनात् ग्रहणीमतिसारकम्। अर्शसर्व्वाङ्गजं वातं गुल्मञ्च परिणामजम्। कृमिञ्च पीनसं पित्तं श्वासमाशु व्यपोहति॥" भा.पू.१भ. धा.व.।

सारवर्गः। पुं। चीरवृक्षवर्गे। भा.म.३भ. प्रमेह-चि.।

सारवृक्षः। पुं। धामनवृक्षे। वै.निघ.।

सारशल्यः। पुं। श्वेतखदिरे। वै.निघ.।

सारसम्। क्ली। कमले। रा.नि.व.१०। सरोजले। मे.। गुणाः,—'सारसं सलिलं वल्यं तृष्णाघ्नं मधुरं लघु। रोचनं तुवरं रूक्षं वह्निमूलमलं स्मृतम्॥"

सारसः। पुं। प्लवजातीयोभचर-पक्षिविशेषे। सारस पाखी। सन्मांसगुणाः—मधुरमम्लं कषायं महातीसारघ्नं पित्तहरं गुरुस्निग्धञ्च। रा.नि.व.१७। तद्वच्च कण्ठजाद्यगुणजननी ह्यौतिरूच्चौ गुरुत्व। अवि.२२अ.। स्त्री। सारसपक्ष्याम्। हे.च.।

सारसंग्रहः। पुं। वैद्यकग्रन्थभेदे चक्रपाणिकृते।

सारसंग्रहनिघण्टुः। पुं। वैद्यकनिघण्टुभेदे।

सारसजलम् } क्ली। सरोवरजले। वै.निघ.।
सारसाम्बु }

सारसैन्धवम्। क्ली। सैन्धवे। च.द. रतिवल्लभमोदके।

साराः। स्त्री। कृष्णतिक्ततायाम्। काल तेउडी। भ.र.। सातलायाम्। पीतदुग्धा मनसा। वै.निघ.। दूर्व्वायाम्। भ.च.। अंशुमत्फलायाम्। कलाशाछ। रा.नि.व.११।

सारामुखः। पुं। स्वादुपाकरसयुक्ते कृष्णयूकधान्ये। वा.सू.६अ. हेमा.।

सारान्लम्। क्ली। निम्बुभेदे। गोंड़ानेबू। गुणाः—अम्लं पित्तलं गुरु वातघ्नं कफवर्द्धकञ्च। वै.निघ.।

सारालः। पुं। तिले। भ.च.।

सारिका। स्त्री। पक्षिविशेषे। शालिक पाखी, मयना। अम.।

सारिणी। स्त्री। कार्पासे। कापास गाछ। रा.नि.व.४। महाबलायाम्। रा.नि.व.४। कपिलशिग्रुपायाम्। कापिलवर्ण[illegible]। रा.नि.व.६। रक्तपुनर्नवायां। रा.नि.व.५। [illegible]लभायां। रा.नि.व.४। प्रसारण्यां। गन्धभाद्दुलिन्यां। रा.नि.व.५।

सारितम्। क्ली। कृष्णाञ्जने। काल सुर्मा। वै.निघ.।

सारिवा। स्त्री। अनन्तायाम्। अनन्तमूल। हिं गोरियासाउ। मं वम्. उपलसरी। "अम्बुपर्वा दृग्धगर्भा वल्ली स्वनामप्रसिद्धा।" सु.चि.८अ.। वा.सू.१५अ.। सारिवोशीरकाश्मर्य्येति चक्रदत्तः। शाली। शालिधान्य। वै.निघ.। कृष्णसारिवायां। सा इन्द्रलम्बूवत्यवा सुगन्धा कलघण्टेति ख्याता। श्यामलता। हिं करियसाउ। ee अनन्ता, शारिवा।

सारिवादिगणः। पुं। सारिवोशीरकाश्मर्य्यचन्दनद्वयपटोपरूषककृते कषाये। स दाहपित्तासलटज्वरघ्नश्च। वा.सू.१५अ.। अपिच—सारिवामधुक-चन्दन कुचन्दन-पद्मक-काश्मरीफल-मधूकपुष्पाख्युशीरेति।" गुणाः—सारिवादिः पिपासाघ्नो रक्तपित्तहरो गणः। पित्तज्वर-प्रशमनो विशेषाद्दाहनाशनः॥" सु.सू.३८अ.।

सारिवाद्वयम्। क्ली। श्यामानन्तयोः। श्यामलता, अनन्तमूल। च.द. वातपित्तज्व. चि.। "मधुकं सारिवे द्राक्षा।"

सारी। स्त्री। सप्तलायाम्। तेकाँटा मनसा। रा.नि.व.८ शारिकापक्षिणि। भ.र.।

सारोदकम्। क्ली। सालसारोदके। च.चि.६अ.।

सारोद्धारः। पुं। वैद्यकग्रन्थविशेषे।

सारोष्ट्रिकः। पुं। सौराष्ट्रदेशजविषे। च.टी.भ.।

सार्ङ्गवेरम्। क्ली। गुण्ठ्याम्। रा.नि.व.६।

सार्जः। पुं। सर्जरसे। धूनो। र.मा.।

सार्द्रः। वि। आर्द्रे। भिजा। अम.।

सार्व्वगुणम्। क्ली। औषरलवणे। रा.नि.व.६।

सार्व्वभौमः। पुं। गजे। हाती। त्रिका.।

सार्व्वसहम्। क्ली। मृत्तिकालवणे। सोरा। व.निघ.।

सार्षपः। वि। सर्षपसम्बन्धीये, शाकतैलादौ। पुं श्वेतसर्षपे। वै.निघ.।

सार्षपतैलम्। क्ली। सर्षपजतैले। See सर्षपः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सार्षपशाकम्। [illegible] सर्षपशाके। शर्षिशाक। अचि:—[illegible]See सर्षपः।

सालः। पुं। वृक्षे। मे.। शिंशपावृक्षे। वरुणवृक्षे। विका.। मत्स्यविशेषे। शाल माछ। अ.टी.भ.। शाकवृक्षे। शेगुन गाछ। कुणपे। वै.निघ.। राले। धूनो। रा.नि.व.१२। सर्जवृक्षे। रा.नि.व.९। खनामख्यातवृक्षभेदे। शाल गाछ। हिं खसुया। भं सानरा। कं सज्जर दामर। तत्पर्य्यायाः,—अश्वकर्णकः अश्वसञ्जयः उपसित: दीर्घशाखः जलदाश्मनः लतातरुः लताशङ्कुः शङ्कुतरुः शङ्कुवृक्षः सर्ज्जः सर्जरसः कलः कलजोद्भवः वल्लीवृक्षः चीरपर्णः रालकार्य्यः अजकर्णकः वसकर्णः कषायी खलनः गन्धवृक्षकः वंशः रालनिर्य्यासः दिव्यसारः सुरेष्टकः शूरः अग्निवल्लभः यज्ञधूपः सिद्धकः अश्वसञ्जरणः। गुणाः—कटुः तिक्तः उष्णः हिमः स्निग्धः अतीसारपित्तदोषघ्नः कण्डूकुष्ठविस्फोटकवातघ्नश्च। रा.नि.व.९। अपिच ——"अश्वकर्णः कषायः स्यात् व्रण-स्वेद कफक्रिमीन्। व्रध्न-विद्रधि-बाधिर्य्य-योनि-कर्णगदान् हरेत्॥" भा.।

सालजः (कः)। पुं। सर्जरसे। धूनो। प.मु.। सर्जतरौ। धूनोवृक्षे गाछ। रा.नि.व.९।

सालनिर्य्यासः। पुं। सर्जरसे। धूनो। र.मा.।

सालपर्णी (र्णिका)। स्त्री। अंशुमत्याम्। शालपानि। श.र.।

सालपुष्पम्। क्ली। स्थलपद्मपुष्पे। श.र.। प्रपौण्डरीके।

सालरसः। पुं। शालनिर्य्यासे। धूनो। रा.नि.व.१२।

सालवेष्टः। पुं। सर्जरसे। धूनो। शब्दकल्पः।

सालसारः। पुं। शालभेदे। "शालः शङ्कुः सस्य सारः।" इति उणादिः। सु.सू.३८अ.।

सालसारादिगणः। पुं। सुश्रुतोक्तगणभेदे। तद्यथा—"सालसारज - कर्ण - खदिर- कदरकालस्कन्ध-क्रमुक-भूर्ज्ज - मेषशृङ्गी तिनिश-चन्दनकुचन्दन-शिंशपा शिरीषाश्वन - धवार्জ্জুन - तालशाक-नक्तमाल-पूतिकाश्वकर्णगुरुणि कालीयकश्वेति। गुणाः—सालसारादिरित्येष गणः कुष्ठविनाशनः। मेहपाण्डामयहरः कफमेदोविशोषणः॥" सु.सू.३८अ.।

सालावृकः। पुं। कुक्कुरे। शृगाले। शब्दकल्पः।

सालिमकन्दः। पुं। कावेलदेशीयकन्दभेदे। शालमिछरि। गुणाः—उष्णवीर्य्यः मधुरः हृद्यः धातुवर्द्धकः तिक्तः गुरुः रसायनः पुष्टिकरः क्षयमेहपित्तरक्तविकारघ्नश्च। वै.निघ.।

सालूरः। पुं। भेके। श.र.।

सालेयः। पुं। मधुरिकायाम्। मउरी। अटी.भ.।

साल्विकः। पुं। पक्षिविशेषे। शालिक पाखी। श.च.।

सावरः। पुं। लोध्रविशेषे। श्वेत लोध। श.र.। लोध्रे। रस.र.समुच्चि. चि. काश्मीराद्यवृत्ते। तदाख्य-मृगभेदे। सावर हरिण। तन्मांसगुणाः, —"सावरं पललं स्निग्धं शीतलं गुरु च स्मृतम्। रसे पाके च मधुरं कफदं रक्तपित्तहृत्॥"

सावरलोध्रः। पुं। श्वेतलोध्रे। "श्वेतः स्थूलत्वक्।" सु.सू.३८अ. अम्बष्ठादिः।

सावरिका। स्त्री। निर्विष-जलौकायाम्। निर्विष जोंक। सु.सू.१३ अ.। See जलायुका।

सावर्णलच्यम्। क्ली। चर्म्मणि। श.र.।

सावित्रः। पुं। गर्भे। श.र.।

सावित्री। स्त्री। आमलकीवृक्षे। वै.निघ.।

साश्रयन्दकः। पुं। गृहगोधायाम्। टिकटिकि। शब्दकल्पः।

साशूकः। पुं। कच्छले। झारा।

साश्वितास्त्राङ्गम्। क्ली। कांस्ये। काँसा। विका.।

सास्ना। स्त्री। गोगलकम्बले। अस.। रासायाम्। वै.निघ.।

सास्रावः। त्रि। अश्रुयुक्ते, स्रावयुक्ते। मा.नि.।

साहसम्। क्ली। बलवद्विग्रहादिके।

सिंहः। पुं। रक्तशिग्रौ। लाल सजिना। रा.नि.व.७। पशुराजे। अयं विशिष्यः। सिंह। हिं सेर। तन्मांसगुणाः—मधुरं गुरु स्निग्धम् बल्यं वातघ्नम् उष्णवीर्य्यं नैचरीणां अर्शसि च हितम्। सु.सू.४६अ.। वकुलवृक्षे। वै.निघ.।

सिंहकेश(स)रः। पुं। वकुलवृक्षे। सिंहजटायाम्। सिंहेर जटा। विका.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिंहचिचा। स्त्री। माषपर्ण्याम्। माषाणी। वै.निघ.।

सिंहच्छदा। स्त्री। श्वेतदूर्व्यां। रा.नि.व.८।

सिंहतुण्डः। पुं। सिंहमुखवृक्षे। सुदीवृक्षे। मनसा गाछ। रा.नि.व.८।

सिंहनादगुग्गुलुः। पुं। आमवाते औषधम्। क्वाथार्थं—त्रिफला प्र. ३ प. चतुर्गुणे वारिणि क्वाथयित्वा पादशेषः काथ्यः। गुग्गुलुः ८ तो. नवनीतसारगन्धकं १ श. एरण्डतैलं १ श. एकत्र पाच्यः। क्वाथार्थं—आमला, हरीतकी, बहेड़ा प्रत्येक ७ प. जल चतुर्गुण (७६ प.), शेष चतुर्थांश (१ प.)। गुग्गुल ८ तो. नवनीतसारगन्धक ६४ तो. एरण्डतैल ६४ तो. सकल एकत्र करिया पाक करिबे। सा. कौ.। रस. र.।

सिंहनादिका। स्त्री। दुरालभायाम्। श.च.।

सिंहपत्रा। स्त्री। माषपर्ण्याम्। माषाणी। वै. निघ.।

सिंहपर्णी (र्णी)। स्त्री। वासकवृक्षे। बाकस् गाछ। रा.नि.व.४।

सिंहपिप्पली। स्त्री। सैंहलीपिप्पल्याम्। रा.नि.व.६। See सैंहली।

सिंहपुच्छिका (च्छी)। स्त्री। कदम्बीपर्व-सदृशदीर्घपर्वपृश्निपर्णीविशेषे, काटवासिंहपुच्छीति ख्याते। छोटि चाकुले। र.मा.। रा.नि.व.४। "सिंहपुच्छी चुरालिका।" च.द.शूल.चि. एरण्ड-द्वादशके। माषपर्ण्याम्। माषाणी। प.मु.।

सिंहपुष्पी। स्त्री। पृश्निपर्ण्याम्। चाकुले। रा.नि.व.४।

सिंहमुखः। पुं। वासकवृक्षे। वै.निघ.।

सिंहमुखी (वदना)। स्त्री। वासकपुष्पवृक्षे। बाकस गाछ। रा.नि.व.४। वै.निघ. श्वास.चि. सिंह्यादिकषाये। (नवरत्न-राजमृगाङ्के)। माष-पर्ण्याम। माषाणी। चारमृत्तिकायाम्। खरि-माटी। वै.निघ.।

सिंहल(क)म्। क्ली। राजरीती। ভাল পিতল। रा.नि.व.१३। वङ्गे। हे.च.। त्रिचि। गुड़त्वक्। रा.नि.व.६।

सिंहलम्बा। स्त्री। [illegible] पिप्पल्याम्। रा. नि.व.६।

सिंहलस्थानः। पुं। वालतरुसदृशतरौ। छटा वृक्ष। "प्रौत्फलः सिंहलास्थानच्छड़ो पिन्ना छटापि च।" भ.मा.।

सिंहलाङ्गुली। स्त्री। पृश्निपर्ण्याम्। चाकुले।

सिंहवदना। स्त्री। सिंहमुख्याम्। वासक।

सिंहवल्लभा। पुं। आटरूषवृक्षे। बाकस् गाछ। वै.निघ.।

सिंहविक्रान्तः। पुं। अश्वे। घोड़ा।

सिंहविन्ना (न्ता)। स्त्री। माषपर्ण्याम्। माषाणी। वै.निघ.। रा.नि.व.३।

सिंहा। स्त्री। इष्टकायाम्। व.निघ.। नाड्याम्। रा.नि.व.१८।

सिंहाणम्। क्ली। लौहमले। मण्डूर। प.मु.। नासामले। पोंटा, सिक्नी। भ.र.।

सिंहाननः। पुं। वासकवृक्षे। बाकसगाछ। भा.म.१भ.कण्ठकुलज्व.चि.। "कलिङ्गसिंहानन-शर्ब्बरीभिः।"

सिंहास्यघृतम्। क्ली। अर्शसि घृतम्। पाठः—"पचेद्वारिचतुर्द्रोणे कण्टकार्य्यस्ताशतम्। तवाग्निविफलाश्चीषपूतिकत्वक्लिञ्जकैः। सकाश्मर्य्य-बिड़ङ्गैस्तु सिद्धं दुर्नामनेहनुत्॥" कण्टकार्य्य-स्तयोः प्रत्येकं शतं पलं मिलित्वा वा। जलं २५६ श. शे. ६४ श.। पूतिकत्वक्—करञ्जत्वक्। काश्मर्य्य—गाम्भारीफलम्। च.द.।

सिंहालो। स्त्री। सिंहलीपिप्पल्याम्। सिंह-पिप्पुल। वै.निघ.।

सिंहासनम्। क्ली। लौहकिट्टे। मण्डूर। वै.निघ.।

सिंहास्यः। पुं। वासकवृक्षे। बाकस गाछ। र.मा.। वै.निघ.२भ.सिंह्यादिकषाये। भैष. स्त्रीरो.चि.कुष्ठ.चि.।

सिंहास्यदलम्। क्ली। वासकपत्रे।

सिंहास्यादिः। पुं। शोथे कषायविशेषः। "सिंहास्यामृतभण्टाकीक्वाथं कृत्वा समाचिकम्।" भैष.शोथ.चि.।

सिंहिका (हो)। स्त्री। इष्टकायां। रा.नि.व.४। प.मु.। वासकवृक्षे। बाकस। रा.नि.व.४। कण्ट-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्य्याम् । कर्म्म[मार्] व.निघ.जीर्णज्व.चि. लवङ्गादिकषाये । [illegible] गुणाः—"जरा तु सिंहिका प्रोक्ता सातीसारे प्रशस्यते।" भवि.१६अ.। (ङी) वार्त्ताक्यां। वृश्चती। विका.। कण्टकार्य्याम्। प.मु.। वै.निघ.जिह्मक.ज्व.चि. कास.चि. सिंहास्यादिः। हस्तिकण्टकार्य्याम्। हिं वडीकटेया। भा.म.१भ.ज्व.चि.श्वास.चि.। "सिंही व्याघ्री तालमूली।" शिरायाम्। नाड्याम्। रा.नि.व.२८। स्वर्णवराटिकायाम्। सुद्गपर्ण्याम्। मूगानी। रा.नि.व.३।

सिंहीफलम्। क्ली। हस्तीफले। च.द.हृद्व्याधिकारे भस्मगन्धाहृते।

सिंहीलता। स्त्री। लतास्तृत्यां। भा.। सुद्गपर्ण्याम् रा.नि.व.३।

सिकटी। स्त्री। स्वनामप्रसिद्ध लताभेदे।

सिकता। स्त्री। लोष्टिकायाके। वन शूनिशोक। प.मु.। बालुकायाम्। रा.नि.व.१३। शर्करायाम्। वै.निघ.।

सिकतामेहः। पुं। कफजनित प्रमेहभेदे। यत्र रोगी बालुकानुविद्धं सरुजं मेहति। सु.नि. ६अ.। "मूत्तांशून् सिकतामेही सिकतारुपिणो मलान्।" मा.नि.।

सिकतारूपम्। क्ली। शौंड़। भा.।

सिकतिलः। पुं। सिकतामयभूमौ। रा.नि.व.२।

सिक्कासिः। पुं। उल्कासिकायाम्। प्रयोगाश्वास.चि.।

सिक्ता। स्त्री। बालुकायाम्। वै.निघ.। श्वेतकण्टकार्य्याम्। वि। आर्द्रायाम्।

सिक्थ(क)म्। क्ली। सिक्थके। मम, सिटी। रा.नि.व.१३। नील्याम्। नील। हे.च.।

सिङ्घ(ङ्घा)ण[क]म्। क्ली। काचपात्रे। घारा.। नासिकामले। पोंटा, सिकनि। रा.नि.व.१८। नासारोगभेदे। निदानादि—"कफः प्रवृद्धो नासायां रुद्धा स्रोतांस्यपीनसम्। कुर्य्यात् सघुर्घुरं श्वासं पीनसाधिकवेदनम्। अवेरिव स्रवत्यस्य प्रक्लिन्ना तेन नासिका। अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम्॥" वा.उ.१९अ। अस्य रोगविशेषे लक्षणं—"वातिके पैत्तिके चैव श्लैष्मिके सान्निपातिके। सिङ्घाणके प्रवक्ष्यामि लक्षणं भेषजं तथा॥ तनुस्रावं सफेनञ्च वातिकं तत्प्रकीर्त्तितम्। रक्तपीतासितैः सावैर्विद्यात् पित्तसमुद्भवम्॥ घनेन दधिवर्णेन कफजञ्चैव निर्द्दिशेत्। नानावर्णेन जानीयात्साध्यं सान्निपातिकम्॥" भा.पू.। लोहकिट्टे। मण्डूर। वै.निघ.।

सिङ्घानः। पुं। कुरण्डवृक्षे विका।

सिङ्घिनी। स्त्री। नासिकायाम्। रा.नि.व.१८।

सिञ्चिता। स्त्री। पिप्पल्याम् भ.च.।

सिञ्चितिका। स्त्री। स्वनामख्याते फले। सेऽफल। सा च द्विधा क्षुद्रबृहद्भेदेन। क्षुद्रफलगुणाः—वृष्यं गुरु धातुवर्द्धकं पाके रसे च शीतं कफकरञ्च। महत् शीतं कषाय क्षुद्रसमगुणञ्च। बदरफले। वै.निघ.।

सितः। पुं। भूर्जवृक्षे। स्थूलजीरके। प.मु.। धववृक्षे। धाओया गाछ। र.मा.। क्ली। रौप्ये। रङ्गे। रा.नि.व.१३। मूलके। मूली। रा.नि.व.७। चन्दने। र.मा.। श्वेततिले। वै.निघ.।

सितकङ्कुः। स्त्री। सर्ज्जरसे। धूनो। वै.निघ.। क्ली। श्वेत-कङ्कुधान्ये।

सितकटभी। स्त्री। श्वेतकटभीवृक्षे। रा.नि.व.९। See कटभी।

सितकण्टकी | स्त्री। श्वेतपुष्प-कण्ट
सितकण्टा(रिका) | कार्य्याम्। रा.नि.व.४।

सितकण्ठः। पुं। दालुहपक्षिणि। डाहुकपाखी। भ.र.।

सितकरः। पुं। भीमसेनीकर्पूरे। भीमसेनी कर्पूर। रा.नि.व.१२। स्त्री (रा)। नीलदूर्व्वायाम्। वै.निघ.।

सितकर्णिकः। पुं। वासकवृक्षे।

सितकर्णी। स्त्री। वासकवृक्षे। वासक गाछ। रा.नि.व.१०।

सितकल्याणघृतम्। क्ली। स्त्रीरोगाधिकारे घृतम। घृत ४ प्र. गव्यदुग्ध १६ प्र.। कल्कार्थ—कुमुदपुष्प पद्मकाष्ठं वीरणमूल गोधूमः रक्तशालिः सुद्गपर्णी क्षीरकाकोली गाम्भारीबीजं यष्टीमधु वाट्यालकं गोरक्षतण्डुलामूलम् उत्पल तालमज्जा भूकुष्माण्ड शतावरी शालपर्णी जीरकं विफला गोडुम्बाबीजम् आमलकदलौ च प्र. ४ तो. जलं ८ प्र. एकत्र पाच्यम्। घृत ४ श. दुग्ध ७ श.। कल्कार्थ—कुमुदकुल, पद्मकाष्ठ, वेणार मूल,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गम, दादखानि चाउल, मुगानी, क्षीरकाँकला, गामारबीज, यष्टिमधु, श्वेत वेलेड़ा, गोरक्षचाकुलियार मूल, नीलोत्पल, तालमज्जा भूँइकुमड़ा शतमूली, शालपाण, जीवा, त्रिफला, गोमकबीज, काँचा कला प्रत्येक ४ तो. जल ८ श. पाक करिबे।

सितकाञ्चनः। पुं। श्वेतपुष्पकाञ्चनवृक्षे। रत्ना।

सितकारिका। स्त्री। क्षुद्रवाट्यालके। क्षुद्र वेलेड़ा। वै.निघ.।

सितकुम्भी। स्त्री। श्वेतपाटलायाम्। श्वेतपुष्प पाकुल। रा.नि.व.१०।

सितगुञ्जा। स्त्री। श्वेतगुञ्जायाम। रा.नि.व.२३।

सितचन्दनम्। क्ली। श्वेतखण्डचन्दने। सार-चन्दन। च.द.खदिरवटी।

सितचिल्ली। स्त्री। श्वेतवास्तुके। छुद्र वेतो। वै.निघ.।

सितचिल्लः। पुं। (Lacerta seincus.) वल्लीगोधकमत्स्ये। वेलेगुड़गुड़ि माछ। हारा।

सितच्छत्रा। स्त्री। शतपुष्पायाम्। शुल्फा। अम.।

सितच्छदः। पुं। रक्तपुष्पशोभाञ्जने। लाल सजिना। वै.निघ.। हंसे। हे.च.। स्त्री (दा)। श्वेतदूर्व्वायाम्। रा.नि.व.८।

सितजः। पुं। मधुशर्करायाम्। मधुर चिनि। रा.नि.व.२३।

सितजफलः। पुं। मधुनारिकेलवृक्षे। रा.नि.व.११।

सितजलजम्। क्ली। श्वेतपद्मे। वै.निघ.।

सितजा। स्त्री। मधुशर्करायाम्। रा.नि.व.१४।

सितजाम्बुकः। पुं। बहुरसालावृक्षे। रा.नि.व.११।

सितजाशर्करा। स्त्री। मधुजात-शर्करायाम्।

सितजीरकम्। क्ली। शुक्लजीरके। श्वेतजीरा। भैष. वाजीचि.।

सितदर्भः। पुं। श्वेतकुशे। श्वेत कुश। नं पाढ़रीकुशो। कं विलियवुड़कुशि। गुणः—तन्मूलं हिमं मधुरं रुच्यं पित्तघ्नं रक्तज्वरतृष्णाश्वास-कासनाशनञ्च। एतदभावे साधारणकुशो ग्राह्यः। रा.नि.व.८।

सितदीप्यः। पुं। श्वेतयमान्याम्। श्वेतजोरके। सा-जीरा। रा.नि.व.६।

सितदूर्व्वा। स्त्री श्वेतदूर्व्वायाम्। प.मु.।

सितद्रुः (मः)। पुं। मोरटमेदे। लता-कड़ाइ। रत्ना। अर्জ্জুনवृक्षे। वै.निघ.।

सितधातुः। पुं। खटिकायाम्। खड़िमाटी। रा.नि.व.१३।

सितपद्मम्। क्ली। श्वेतपद्मे। वै.निघ.।

सितपर्णी। स्त्री। अर्कपुष्पिकायाम्। रत्ना।

सितपक्षः। पुं। शुक्लपक्षे। (अव्यक्तशब्दः)। हंसे। शब्दर.।

सितपाटला (लिका)। स्त्री। शुक्लपुष्पपाटल-वृक्षे। श्वेत पाकुल। सं श्वेतपाड़लि। कं विलियइादरि। तत्पर्य्यायाः,—सितकुम्भी फलि-नृहा सितानीघा कुबेराक्षी श्वेताह्वा कांठपाटला धवलपाटली। गुणाः—तिक्ता उष्णा गुरुः वातघ्नी हिक्काश्वासिकफघ्नी शोषघ्नी च। रा.नि.व.१०।

सितपुङ्खा। स्त्री। श्वेतपुष्प-शरपुङ्खायाम्। रा.नि.व.४।

सितपुष्पम्। क्ली। कैवर्त्तमुस्तके। जटा। पुं। श्वेतपुष्परोहितके। श्वेत रोहा। रा.नि.व.८। कामलतायां। केसेवास। तगरवृक्षे। रा.नि.व.८। शब्दर.। द्वीपान्तरखर्জ্জूरीवृक्षे। पिण्डी-खेजुर-गाछ। शिरीषवृक्षे। वै.निघ.। स्त्री (ष्पा)। मल्लिकायाम्। मल्लिका फूलेर गाछ। शब्दर.। (ष्पी) श्वेतापराजितायाम्। रा.नि.व.३। नाग-दन्त्याम्। हातिशुँड़े। रा.नि.व.५। नागवल्ली-लतायाम्। पानलता। वै.निघ.।

सितमरिचम्। क्ली। श्वेतमरिचे, तच्च शोभा-ञ्जनबीजमिति हड्डाः। रा.नि.व.६।

सितमाषः। पुं। (Dolichos catjang.) राजमाष। हारा।

सितमोघा। स्त्री। श्वेतपाटलवृक्षे। श्वेत पाकुल गाछ। वै.निघ.।

सितरजः। क्ली। कर्पूरे। वै.निघ.।

सितरागः। पुं। रौप्ये। वै.निघ.।

सितलता। स्त्री। चित्रकूटे ख्याता-अमृतसवा-लतायाम्। [illegible]स्त्री। रा.नि.व.३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सितशुनः। पुं। शुक्लरसोने। वै.निघ.।

सितला। स्त्री। अमृतस्रवालतायाम्।

सितवर्णा। स्त्री। चोरिणीवृक्षे। प.मु.।

सितवर्षा। स्त्री। चोरिणीवृक्षे।

सितवर्षाभूः। पुं। श्वेतपुनर्नवायाम्। रा. नि.व.६।

सितवल्करी। स्त्री। भूमिजम्बूवृक्षे। वनजाम। प.सु.।

सितवल्लि(ल्ली)जम्। क्ली। श्वेतमरिचे। रा. नि.व.६।

सितवारः (कः)। पुं। शालिषष्टिशाके। र.मा.।

सितवारिकः। पुं। सिंहली पिप्पल्याम्। वै.निघ.।

सितशर्करा। स्त्री। धवलशर्करायाम्। चिनि। वै.निघ. चयचि. लघुशिवगुट्यां।

सितशा(सा)यका। स्त्री। श्वेतपुष्पशरपुङ्खायाम्। रा.नि.व.४।

सितशिंशपा। स्त्री। श्वेतपुष्पशाक्षवृक्षे। श्वेत शिमूल। श्वेतशिंशपायाम्। श्वेत शिशु। वै.निघ. रा.नि.व.९।

सितशिम्बिकः। पुं। गोधूमे। गम। हे.च.।

सितशिम्बी। स्त्री। श्वेतशिम्बयाम्। वै.निघ.।

सितशि(सि)वम्। क्ली। सैन्धवलवणे। वै. निघ। स्त्री। ऋद्धौवृक्षे। प.सु.।

सितशूकः। पुं। यवे। प.सु.। रा.नि.व.१६।

सितशु(सू)रणः। पुं। श्वेतसूरणे। श्वेत ओल वा वन ओल। रा.नि.व.७।

सितसर्षपः। पुं। गौरसर्षपे, सिद्धार्थे। रा. नि.व.१६।

सितसारः (कः)। पुं। शालिषष्टिशाके। रा. नि.व.८। च.द.सू.क्र.चि.। "तक्रेण युक्तं सितसारकस्य।"

सितसिंहिः (ही)। स्त्री। श्वेतकण्टकार्यां। रा.नि.व.४।

सितसूर्या। स्त्री। शुक्लसूर्यावर्त्ते। वै.सं.सू.क्र.चि.।

सितत्वारः। पुं। श्वेतटङ्गणे। श्वेत सोहागा। वै.निघ.।

सितच्छद्रा। स्त्री। श्वेतकण्टकार्य्याम्। रा.नि. व.४।२३।

सितांशुः। पुं। कर्पूरे। (शब्दकल्प:)।

सितांशुतैलम्। क्ली। कर्पूरतैले। रा.नि.व.१५। See कर्पूर-तैलम्।

सिता। स्त्री। शर्करायाम्। चिनि। गुणाः— "सिता सुमधुरा रुच्या वात-पित्तास-दाहहृत्। मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी॥" रा.नि.व.१४। "धात्रीद्राक्षासितानां वा।" च.द. व्व.चि.। च.सू.४अ.। वचायाम्। वच। सोमराज्याम्। सोमराजी। सिंहल्याम्। शिउलिछोप। प.सु.। आमलक्यां। आमला। गोरीचनायाम्। गोरोचना। हल्दी। सुरामेदे। रा. नि.व.२३। रौप्ये। शुक्लविहतायाम्। श्वेतउँड़ी। विसन्धिपुष्पवृक्षे। श्वेतपुनर्नवायाम्। वै. निघ.। आस्फोतके। हापरमाली। गिरिजापराजितायाम्। र.मा.। मल्लिकापुष्पचुपे। श्वेतपाटलिकायाम्। श्वेत पाकुल। रा.नि.व.१०। श्वेत-कण्टकार्य्याम्। रा.नि.व.४। विदार्य्याम्। भूँई कुमड़ा। रा.नि.व.७। श्वेतदूर्व्वायाम्। प. सु.। सु.सू.३६अ.। च.सू.४अ.। श्वेतशिम्बयाम्। श्वेत शिम्। रा.नि.व.१६। See श्वेतनिष्पावः। कुटुम्बिन्याम्। रा.नि.व.५। वायमाणालतायाम्। वलालता। गोहालिया। तेजन्याम्। लताफट्की, मूर्व्वा। रा.नि.व.३।

सिताखण्डः। पुं। मधुजशर्करायाम्। मधुर चिनि, माशथण्डी। तत्पर्य्यायाः—खण्डकः सितजाशर्करा माधुरी मधुशर्करा माचीकशर्करा। गुणाः—अतिमधुरः चक्षुष्यः कुष्ठच्छर्दिव्रणकफश्वासहिक्कापित्तास्रदोषघ्नश्च। रा.नि.व.१४।

सिताख्यः (ख्या)। पुं। श्वेतमरिचे। वै निघ.। श्वेतदूर्व्वायाम्। रा.नि.व.८।

सिताग्रः। पुं। कण्टके। काँटा। हारा.।

सिताङ्गः। पुं। वालुकागड़मत्स्ये। वेलेगुड़ि माछ। हारा.।

सिताङ्गः। पुं। श्वेतरोहितकवृक्षे। श्वेत रोहा गाछ। रा.नि.व.८।

सिताजाजिः (जी)। स्त्री। श्वेतजीरके। शादा जीरे। रा.नि.व.६।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सितात्रयम् । क्ली । त्रिशर्करायाम् । "गुडोत्पन्ना हिमोत्पन्ना मधुरा चेति सितं । ...सितात्रयम् ॥" रा.नि.व.२२ ।

सितादिः । पुं । गुड़ । रा.नि.व.१४ ।

सितानन: । पुं । बिल्ववृक्षे । वै.निघ. ।

सितापाङ्ग: । मयूरे । त्रिका. ।

सिताफलम् । क्ली । (A nona squamosa.) The custard apple. खनामख्यातफले । आता, लोणा । हिं सिताफल । ता. सिता । तत्पर्य्याया:,—आतप्यफलं, गण्डगात्रं, बहुबीजं । गुणा:,—खादु शीतलं हृद्यं तृप्तिकरं बलपुष्टिदं रक्तवर्द्धकं श्लेष्मकृत् वान्तृत्क्लेशतृषा-दाह-वात-पित्तरक्तदोषघ्नम् ।

सिताब्जम् । क्ली । श्वेतकमले । रा.नि.व.१० ।

सिताभ: । पुं । कर्पूरे । अ.टी.रा. ।

सिताभा (सा) । स्त्री । तक्राङ्गायाम् । पञ्चाङ्गुलिवृक्षे । रा.नि.व.४ ।

सिताभ्र: (क:) । पुं । कर्पूरे । अम. ।

सिताम्बु(म्भो)जम् । क्ली । श्वेतकमले । अम. ।

सितार्क: (क:) । पुं । श्वेतार्कवृक्षे । श्वेत आकन्द गाछ । रा.नि.व.१० ।

सितार्ज्जक: । पुं । श्वेतपत्रक्षुद्रतुलस्याम् । छोटि श्वेत तुलसी । हिं श्वेताज्वला । मं पांढरा आजवला । तत्पर्य्याया:,—वटपत्र: कुठेरक: वैकुण्ठ: जम्बीर: गन्धबहुल: सुमुख: कटुपत्र: कटुपत्रक: । गुणा:—कटूष्ण: कफवातनेत्ररोगघ्न: रुच्य: सुखप्रसवकरश्च । रा.नि.व.१० ।

सितालता । स्त्री । अमृतसत्त्वालतायाम् । रा.नि.व.३ । श्वेतदूर्व्वायाम् । र.मा. । च.सू.४अ. ।

सितालर्क: (र्की) । पुं, स्त्री । श्वेतमन्दारार्के । श्वेत ओ रक्त आकन्द । रा.नि.व.१० ।

सितालिकटभी । स्त्री । श्वेतकिण्विहीवृक्षे । रा.नि.व.९ ।

सितालिका । स्त्री । पङ्क्तिगतौ । झिंगुरे । हारा. ।

सितावर: । पुं । सुनिषण्णके । शुशुनीशाक । गुणा:—संग्राही कषाय उष्ण: त्रिदोषघ्न: मेधारुचिकर: रसायन: दाहज्वरहरश्च । रा.नि.व.४ । See सुनिषण्ण: ।

सितावरी । स्त्री । [illegible] सोमराजे । रा.नि.व.४ ।

सिताश्मजम् । क्ली । पाषाणीदूर्वे । शिलारुहे । वै.निघ. ।

सितासित: । त्रि । श्वेतकृष्णसिश्रवर्णे ।

सितासिता । स्त्री । वाकुच्याम् । सोमराजे । वै.निघ. ।

सिताह्वय: । पुं । श्वेतमिर्ची । श्वेत मरिचा । रा.नि.व.७ । श्वेतरोहितके । श्वेत रोहा । रा.नि.व.८ । श्वेतमन्दारकवृक्षे । श्वेतमाली । काल धान । कश्चित् ।

सिताह्वया । स्त्री । श्वेततुलस्याम् । रा.नि.व.१० । श्वेतपाटलवृक्षे । वै.निघ. ।

सिताह्वा । स्त्री । सितपाटलीवृक्षे । शादा पाकुल गाछ । रा.नि.व.१० ।

सिति: । पुं । सुनिषण्णकशाके । वै.निघ. । वि । श्वेतवर्णे । कृष्णवर्णे ।

सितिकण्ठ: । पुं । दात्यूहपक्षिणि । डाकपाखी ।

सितिवार: (क:) । पुं । कुटजवृक्षे । सुनिषण्णकशाके । भा. ।

सितिसारक: । पुं । शाखिवृक्षशाके । च.द. अग्नि.चि. ।

सितेतर: । पुं । कृष्णशालौ । कुलत्थके । रा.नि.व.१६ ।

सितेक्षु: । पुं । श्वेतेक्षौ । रा.नि.व.१४ ।

सितेरण्ड: । पुं । श्वेतेरण्डे । रा.नि.व.८ ।

सितोच्चटा । स्त्री । श्वेतगुञ्जायाम् । वै.निघ. ।

सितोत्पलम् । क्ली । श्वेतोत्पले । वै.निघ. ।

सितोदरा । स्त्री । वराटिकामिदे । कड़ि विशेष । रा.नि.व.१३ ।

सितोद्भवम् । क्ली । श्वेतचन्दने । (शब्दकल्प:) ।

सितोपलम् । क्ली । शुक्लखड़िकायाम् । कूलखड़ि । त्रिका. । पुं । स्फटिके । रा.नि.व.१३ । स्त्री (ला) । शर्करायाम् । चिनि । सत्यखण्डिकायाम् । मिछरि । हे.च. । सु.सू.४४अ. ।

सितोपलादिलेह: । पुं । राजयक्ष्माधिकारे लेह: । "सितोपला तुगाचीरी पिप्पली बहुला

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वच:। अन्य[illegible]तं लेहयेत् क्षौद्रसर्पिषा ॥" गुडत्वक्चूर्ण १ ड. एलाचूर्ण २ ड. पिप्पलीचूर्ण ४ ड. वंशलोचन ८ ड. मिश्रिम १६ ड.। रस.र.।

सिद्ध:। पुं। गुड़। रा.नि.व.१४। क्षणधुसूरे। रा.नि.व.१०। ह्रास्वरं तास्वरं वा भोजने। त्रिका.। क्षणनिर्गुण्ड्याम्। काल निशिन्दा। श्वेतसर्षपबीजे। वै.निघ.। क्ली। सैन्धवलवणे। रा.नि.व.६। त्रि। अभ्यासतप्तलौ। वा.उ.३२अ.।

सिद्धक:। पुं। सिन्धुवारवृक्षे। निशिन्दा गाछ। रा.नि.व.४। शालवृक्षे। रा.नि.व.९।

सिद्धखण्ड:। पुं। तवराजोक्तखण्डे। See तवराजखण्ड:।

सिद्धजलम्। क्ली। काञ्जिके। छारा.। पक्वजले।

सिद्धधातु:। पुं। पारदे। त्रिका.।

सिद्धनामक:। पुं। अम्लकवृक्षे। आबुटा, पाथरकुचि। वै.निघ.।

सिद्धपुष्प:। पुं। श्वेतपुष्प-करवीरवृक्षे। रा.नि.व.१०।

सिद्धप्रयोजन:। पुं। श्वेतसर्षपे। रा.नि.व.१६। See सिद्धार्थ:।

सिद्धप्राणेश्वर:। पुं। ज्वरातिसारे औषधम्। पाठ:—गन्धे गन्धं पृथग्वेदभागमत्यन्त भागिकम्। सर्ज्जिटङ्कणवक्षारा: पञ्चैव लवणानि च। वराड्यो वेन्द्रबीजानि द्विजीराग्नियमानिका:। सहिङ्गु बीज सारञ्च शतपुष्पा सुचूर्णिता। सिद्धप्राणेश्वर: सूत:..... ॥ मा. १ माषा। गन्धक, पारा, अभ्र प्रत्येक ४ तो. साजिमाटी, सोहागार खै, यवक्षार, पञ्चलवण, त्रिफला, त्रिकटु, इन्द्रयव, जीरा, कृष्णजीरा, चितामूल, यमानी, हिङ्गु, विड़ङ्ग, शुल्फा प्रत्येकेर चूर्ण १ तो. जले मर्दन, वटी १ माषा। रस.चि.भैष.।

सिद्धमन्त्रप्रकाश:। पुं। बोपदेवकृतमन्त्रशास्त्रे।

सिद्धमोदक:। पुं। तवराजखण्डे। मालपुओ विशेष। रा.नि.व.१४।

सिद्धयोगशतकम्। क्ली। वृन्दकृते प्रसिद्धवैद्यकसंग्रहभेदे।

सिद्धरस:। पुं। पारदे। शब्दकल्पे अजयपाल:। खनिजधात्वाद्यौ। मे.।

सिद्धवस्ति:। पुं। वस्तिभेदे। "पञ्चमूलस्य निःक्वाथैस्तैलं मागधिका मधु। ससैन्धव: सयष्ट्याह्व: सिद्धवस्तिरिति स्मृत: ॥" भा.।

सिद्धसलिलम्। क्ली। काञ्जिके। छारा.।

सिद्धसाधन:। पुं। सिद्धार्थे। श्वेत सर्षपे। रा.नि.व.१६।

सिद्धा। स्त्री। चण्डी। रा.नि.व.५।

सिद्धान्त:। पुं। निर्णये, निश्चये। "सिद्धान्तो नाम य: परीक्षकैर्बहुविधं परीक्ष्य हेतुभि: साधयित्वा स्थाप्यते निर्णय:, स सिद्धान्त:। स चोक्तयतुर्विध:—सर्व्वतन्त्रसिद्धान्त:, प्रतितन्त्रसिद्धान्त:, अधिकरणसिद्धान्त:, अभ्युपगमसिद्धान्त: इति। तत्र सर्व्वतन्त्रसिद्धान्तो नाम सन्ति निदानानि सन्ति व्याधय: सन्ति सिद्ध्युपाया: साध्यानामिति। प्रतितन्त्रसिद्धान्तो नाम यस्मिंस्मिन् तन्त्रे तत्तत् प्रसिद्धं—यथान्यत्राष्टौ रसा: षड्न्यत्र; पञ्चेन्द्रियाणि यथान्यत्र षडिन्द्रियाणि .....। अधिकरणसिद्धान्तो नाम यस्मिन्नधिकारे संस्तूयमाने सिद्धान्यान्यपि अधिकरणानि भवन्ति। यथा—"न सृक्क: कर्म्मानुबन्धिकं कुरुते निस्पृहत्वादिति प्रस्तुते सिद्धा: कर्म्मफल-मोक्ष-पुरुषप्रेत्यभावा भवन्ति। अभ्युपगमसिद्धान्तो नाम यमर्थमसिद्धमपरीक्षितमनुपदिष्टमहेतुकं वा वादकाले अभ्युपगच्छन्ति भिषज:॥" च.वि.८अ.।

सिद्धार्थ: (क:)। पुं। (Cruciferae, sinapis.) खनामख्यातसर्षपे। श्वेत सर्षपे। हिं राजिका। तें नल्लमर्रिचेट्टु, तेल्लावारु। तत्पर्य्याया:,—गौर: अनर्घ्य: गौरसर्षप: भूतनाशन:। कटु: स्नेह: कण्डूघ्न: राजिकाफल: गुरुघ्न: ग्रहघ्न: तीक्ष्णक: दुराधर्ष: रुचोघ्न: कुष्ठनाशन: सिद्धप्रयोजन: सिद्धसाधन: सितसर्षप:। सु.सू.३९अ. शिरोविरेचने। वा.सू.१५अ.। गुणा:—कटुतिक्तोष्ण: वातरक्तघ्न: ग्रहदोषघ्न: त्वग्दोषहर: रुच्य: विष-भूत-व्रणघ्नश्च। रा.नि.व.१६। नदीवटे। रा.नि.व.११। [गौरसर्षपे च। वा.उ.५अ.।

सिद्धार्थयुग्मम्। क्ली। पीतगौरसर्षपे, कृष्ण-

सिद्धि:। पुं। चण्डी। ऋद्धि। रा.नि.व.५। साध्यसाधनज्ञाने। च.सू.१अ.। प्रशमनोपाये। यथा—रोगसिद्धि:। वा.कल्प.६अ.। वृद्धौ। वृद्धि। मे.। मेषशृङ्ग्याम्। मेढ़ाशिङ्गे। वै.निघ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिन्दिदः। पुं। प्रव्रजीवृक्षे। शिग्रापुत्री। रा.नि.व.८। महाशालवृक्षे। वै.निघ.।

सिन्दिली। स्त्री। क्षुद्रपिपीलिकायाम्। शब्दकल्प.।

सिन्दिसाधकः (नः)। पुं। श्वेतसर्षपे। रा.नि.व.१६। दमनकवृक्षे। वै.निघ.।

सिन्दिस्थानम्। क्ली। चरकोक्तान्तिमस्थाने।

सिन्दोदकम्। क्ली। काञ्जिके। काँजि। शब्दर.।

सिन्दौषधिः। पुं। ओषधिवर्गभेदे। तेलकन्दसुधाकन्दरुदन्तीसर्पाक्षीषु। "तेलकन्दः सुधाकन्दः क्रौञ्चकन्दो रुदन्तिका। सर्पनेचयुताः पञ्च सिन्दौषधिकसंज्ञकाः॥" रा.नि.व.२२।

सिन्धम्। क्ली। क्षुद्रकुष्ठभेदे। लक्षणं यथा—"कण्डूचितं श्वेतमपाधि सिन्ध विद्यात्तनु प्रायशः जाईकाये।" सु.नि.५अ.। "श्वेतं ताम्रं तनु च यत् रजो घृष्टं विमुञ्चति। प्रायशोरसि तत् सिन्धमलाबुकुसुमोपमम्॥" मा.नि.। किलासरोगे। छुनि। है.च.।

सिन्धपुष्पिका। स्त्री। सिन्धरोगभेदे। सा त्वग्गता अलाबुपुष्पवत् शुक्ला च। वि.र.।

सिन्धलः। त्रि। सिन्धकुष्ठार्त्ते। किलासरोगिणि। विका.।

सिन्धला। स्त्री। शुक्लमीने। शुट्‌की माछ। विका। कुष्ठरोगिण्याम्। वै.निघ.। मत्स्यविक्रतौ। मे.।

सिन्धवान्। त्रि। सिन्धरोगिणि। वै.निघ.।

सिन्धा। स्त्री। किलासरोगे। धवल, छुनि। है.च.।

सिन्धः। पुं। वृक्षे। उणा.।

सिन्धका। स्त्री। सौध इति ख्याते वृक्षविशेषे।

सिनः। पुं। यासे। (व्याक.)। क्ली। शरीरे। उणा.। त्रि (नी)। एकनेत्रे। शब्दकल्प.।

सिन्दुकः। पुं। क्षुपजातौ। सिन्धुवारवृक्षे। रा.नि.व.४।

सिन्दूरम्। क्ली। सिन्दूरे। वै.निघ.।

सिन्द(न्धु)वारः। पुं। (Vitex trifolia.) निर्गुण्ड्याकार-शुक्लपुष्पवृक्षे, श्वेतनिर्गुण्डीवृक्षे। इछुर गाछ। भाषा निर्गुण्डी। हिं शम्भालु। मं सिंधुर। तें वविलि। बम्. निर्गुण्डी। ता. निर्नोचि। तत्पर्य्यायः—सिन्धुकः इन्द्रसुरसः इन्द्रसुरसः निर्गुण्ड. शीर्षका इन्द्राणी सिन्दुकः सिन्दुवारिका पीलोमी शक्राणी कासनाशिनी सुरसा गुरुपृष्ठकः विसुन्धकः सुरसः सिन्दुवारितः श्वेतपुष्पः स्थिरसाधनकः अनन्तः सिन्धुकः अर्थसिद्धकः। श्वेतगुणाः—कटुः तिक्तः कफवातव्यापहः कण्डूकुष्ठव्रणशूलकासव्रणश्च। रा.नि.व.४। विषश्लेष्मव्रणकृमिक्षयव्रणः। राज.। नीलगुणाः—"सिन्धुवारदलं तच्च वातश्लेष्महरं लघु।" "सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः। कैश्यो नेत्रहितो हन्ति शूलशोथान्-मारुतान्। कृमिकुष्ठारुचिश्लेष्मचरान्... ..॥" भा.।

सिन्दु(न्धु)वारच्छदा। स्त्री। वननिर्गुण्ड्याम्। वै.निघ.।

सिन्दु(न्धु)वारिका। स्त्री। निर्गुण्ड्याम्।

सिन्दु(न्धु)सहा। स्त्री। कृष्णनिर्गुण्ड्याम्। काल निशिन्दा। वै.निघ.।

सिन्दूरम्। क्ली। (Plumbi oxidum rubrum.) Read lead. शोषकस्योपधातौ। सिन्दूर। हिं दा. सिन्दूर। तें चेन्दुरलु। ता. चेन्दूरम्। पारस्य. सिरिन्ज्। तत्पर्य्यायाः,—नागेज्ञं नागगर्भं नागरक्तं नागरेणु नागसम्भवम् रङ्गजं वङ्गजं शृङ्गारभूषणं रक्तं रक्तचूर्णं रक्तबालुका रक्तबालुकं रक्तशासनं भालदर्शनं सौमन्तकं शोणं वीररजः गणेशभूषणं सन्ध्यारागं शृङ्गारकं सौभाग्यं अरुणं मङ्गल्यम्। गुणाः—"सौसोपधातुः सिन्दूरं गुणैर्धात्वौषधोत्तमैः। संयोगजप्रभावेन तस्माच्चन्द्रे गुणाः स्मृताः। सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम्। भग्नक्षतानलजननं व्रणशोधनरोपणम्। दुग्धाज्ययोगतस्तस्य विगुणैर्गदिता बुधैः॥" भा.पू. १भ.धा.व.। पुं। पुष्पवृक्षविशेषे। मे.।

सिन्दूरकारणम्। क्ली। शोषधातौ। है.च.।

सिन्दूरतिलका। स्त्री। नार्य्याम्।

सिन्दूरपुष्पी (ष्पी)। स्त्री। स्वनामख्यातपुष्पवृक्षे। हि सिन्दरिया। मं शेंद्री। तत्पर्य्यायाः,—सिन्दूरी वीरपुष्पी व्रणपुष्पी करञ्छदा शोणपुष्पी। गुणाः—कटुका तिक्ता कषाया वातश्लेष्मघ्नी शिरोरोगघ्नी भूतघ्नी च। रा.नि.व.१०। "सिन्दूरी विषपित्तास्र-व्रणा-वान्तिहरी हिमा।" भा.। (री) रोचन्याम्। धातक्याम्। रक्तचित्रिकायाम्। मे.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिन्दूर रस [illegible]सिन्दूरे।

सिन्दूरा। स्त्री। श्वेतनिर्गुण्डाम्। शादा इक्षुर। वै.निघ.।

सिन्दूरी। स्त्री। सिन्दूरपुष्पाम्। गुण्डारीच्याम्। धातक्याम्।

सिन्धुः। पुं। पाञ्चालदेशीयनदे। तज्जलं सुरद्रि-सलिलतुल्यगुणम्। रा.नि.व.१४। नीलसिन्धु-वारवृक्षे। नील निर्गुन्दी गाछ। सैन्धवलवणे। च.द.ख. भेदचि. गर्भाधिकारे। वान्तौ। वमि। मे. सिन्धुवारवृक्षे। शादा निर्गुन्दी। भ.च.। श्वेत-टङ्कणे। रा.नि.व.६।

सिन्धुकः। पुं। नीलसिन्धुवारवृक्षे। रा.नि.व.४। श्वेतसिन्धुवारवृक्षे। भ.च.।

सिन्धुकफः। पुं। समुद्रफेने। भ.र.।

सिन्धुकरम्। क्ली। श्वेतटङ्कणे। शादा सोहागा। रा.नि.व.६।

सिन्धुजम् (न्म)। क्ली। सैन्धवलवणे। अम.। जटा.।

सिन्धुजः। पुं। पारदे। टङ्कणे। रा.नि.व.२३। (जा) स्त्री। मुक्तायुक्तौ। वै.निघ.।

सिन्धुजातम्। क्ली। मुक्तायाम्। वै.निघ.।

सिन्धुदेशजम्। क्ली। सैन्धवलवणे।

सिन्धुपर्णी। स्त्री। गाम्भारीवृक्षे। वै.निघ.।

सिन्धुपुत्रः। पुं। मर्कटेन्दुवृक्षे। बाकड़ा गाछ।

सिन्धुपुत्री। स्त्री। मौक्तिकशुक्तौ। वै.निघ. २भ.कणक.ज्व.चि.।

सिन्धुपुष्पः। पुं। अम्बे। शोंथा। भ.च.। कदम्ब-वृक्षे। बकुलवृक्षे। रा.नि.व.२३।

सिन्धुफलः। पुं। अग्निजारवृक्षे।

सिन्धुमन्थजम्। क्ली। सैन्धवलवणे। र.मा.।

सिन्धुरः। पुं। इक्षिनि। हे.च.। निर्गुण्डी-वृक्षे। निर्गुन्दी गाछ। र.सा.सं. जातीफलायाम्।

सिन्धुरद्वेषी (ष्टृ)। पुं। सिंहे। व्याक.।

सिन्धुलताग्रम् } क्ली। प्रवाले। पला। हे.
सिन्धुवल्लग्रम् } निघ.।

सिन्धुलवणम्। क्ली। सामुद्रलवणे, सैन्धव-लवणे। र.मा.।

सिन्धुवारः (कः) (रितः)। पुं। सिन्दुवार-वृक्षे, निर्गुण्डाकारशुक्लपुष्पवृक्षे। श्वेत निर्गुन्दी गाछ। भ.र.। च.द.विषाधिकारे विषतैले। च.सू. ४अ.। वा.उ.३६अ.।

सिन्धुवारदलम्। क्ली। निर्गुण्डीपत्रे। निर्गुन्दी पाता। च.द. कफज्व.चि.। "सिन्धुवार-दलक्वाथः।"

सिन्धुवारिका। स्त्री। सिन्दुवारवृक्षे।

सिन्धुवेषणः। पुं। गाम्भारीवृक्षे। भ.च.।

सिन्धुसम्भवम्। क्ली। फटिकारिकायाम्। फट्‌किरि। प.मु.। सैन्धवलवणे।

सिन्धूत्पवः। पुं। अग्निजारवृक्षे। वै.निघ.।

सिन्धूद्भवम् } क्ली। सैन्धवलवणे। प.मु.। वै.
सिन्धूद्भूतम् } निघ. २भ. वा.श्वा.चि.।

सिन्धूपलम्। क्ली। सैन्धवलवणे। हारा.।

सिप्रः (व्रः)। पुं। घर्मे। खेदे। मे.। स्त्री (प्रा)। महिष्याम्।

सिब्बा (ब्बिः)। स्त्री। शमीधान्ये। भ. हि-कपकी.। शिम्बां। शुंटी। भ.। नखीनामगन्ध-द्रव्ये। रा.नि.व.१२।

सिब्बिजा। स्त्री। सिम्बिधान्ये। भा.।

सिब्बितिका। स्त्री। सेववृक्षे। सेद गाछ। सु.सू.४६अ.।

सिब्बितिकाफलम्। क्ली। सेवफले। सेउ-फल। "सेवं समीर-पित्तघ्नं हृद्दाहं कफकृद्गुरु। रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत्॥" भा.। गुणाः—कषायं स्वादु संग्राहि शीतलञ्च। सु.सू.४६अ.

सिम्बी। स्त्री। निष्पाव्याम्। रा.नि.व.७। सा द्विधा सिम्बी पुष्पकशिम्बी चेति। शिम्बीद्वयं मधुरं रसे पाके हिमं गुरु दाहकं बल्यं श्लेष्मापित्त वातपित्तहरञ्च। भा.। मुद्गपर्ण्यां। रा.नि.व.३। पुस्तकान्तरे सिंहीपाठः।

सिरः। पुं। पिप्पलीमूले। हे.च.।

सिरा। स्त्री। नाड्याम्। हे.च.। See शिरा।

सिरामातृका। स्त्री। तन्नामकीर्ध्वजत्रुमर्म्मणि। तत् स्थानं ग्रीवाया उभयपार्श्वे। सु.शा.६अ.।

सिराहत्तम्। क्ली। खीसके। सीसा। रा.नि. व.१३।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिराव्यधः। पुं। See शिराव्यधः।

सिरिण्टिका। स्त्री। कुटुम्बिनीवृक्षे। See कुटुम्बिनी।

सिरी। स्त्री। लाङ्गलिकालतायाम्। विषलाङ्गूलिन्यां। वै.निघ.।

सिली। स्त्री। गण्डूपद्याम्। केँचो। पुं। शिलिन्ध्रमत्स्ये।

सिलीन्ध्रः। पुं। मत्स्यविशेषे। छिलिन्दे माछ। वै.निघ.।

सिल्लकी। स्त्री। सल्लकीवृक्षे। अ.टी.भ.।

सिविका। स्त्री। सेवफले। सेउफल। वै. निघ.।

सिवितिकाफलम्। क्ली। सेवफले। सेउ फल। भा.। गुणाः—कषायं स्वादु संग्राहि शीतञ्च। सु.सू.४६अ.।

सिह्लो। स्त्री। सिउलिक्षीप इति ख्याते द्रव्ये। पाताड़ि। प.मु.।

सिहुण्डः। पुं। सुहीवृक्षे। वनसा गाछ। अम.।

सिह्नः (कः)। पुं। स्वनामख्यात-गन्धद्रव्ये। शिलारस। सं पिण्डतल। गुणाः—सुरभिः तिक्तः कटुः स्निग्धः कुष्ठघ्नः कफ-पित्तास्रमरी-सूवाघात-भूतज्वरघ्नश्च। रा.नि.व.१२। "निर्मलः कपिलः स्वच्छः सिह्लकोऽतितरां नवः। मध्याभो मल-संयुक्तः वर्ज्जितो गन्धकर्म्मणि॥" भेष.।

सिह्लकी। स्त्री। सल्लक्याम्। शीलविशेष। श.र.।

सिह्लभूमिका। स्त्री। सल्लक्याम्। श.र.।

सिह्लसारः। पुं। शिलारसे। वै.निघ.।

सिह्लहासः। पुं। सिह्लके। शिलारस। रा. नि.व.१२।

सिह्वारः। पुं। गर्भतैले, शिलारसे। वै.निघ. २भ.वा.व्या.चि.विषगर्भतैले।

सिह्व्यः। पुं। स्फटिके। शब्दकल्पः।

सीतः। पुं। वेतसवृक्षे। वै.निघ.।

सीतजाम्बः। पुं। महाजम्बूवृक्षे। वै.निघ.।

सीतफेणः (नः)। पुं। रीठाकरञ्जे। वै.निघ.।

सीता। स्त्री। म[illegible]। रा.नि.व.४। मदिरायाम्।

सीताफलम्। क्ली। आतप्याख्ये फलविशेषे। आता। गुणाः—मधुरं शीतलं हृद्यं बल्यं कफकरं स्वादु पुष्टिकरं पित्तघ्नञ्च। वै.निघ.।

सीतोलकः। पुं। सतीलके, शिम्बीधान्यविशेषे। अ.टी.रा.।

सीतोत्थम्। क्ली। श्वेतमरिचे। रा.नि.व.६।

सीत्यम्। क्ली। धान्ये। शस्ये। हे.च.।

सीद्यम्। क्ली। आलस्ये।

सीधुः (धूः)। पुं, स्त्री। पक्वापक्वेक्षुरसकृत-मद्ये। रा.नि.व.१४। च.वि.८अ.। गुड़ासवे। च.द.सात्म्यविधिः। "आमेन शीतरसिकः सीधुः पक्वरसोद्भवः।" इक्षुयोनिकात्। गुणाः,—"सीधुः पक्वरसः श्रेष्ठः स्वराग्नि-बल-वर्णकृत्। वातपित्त-करः सद्यः श्लेष्मणो रोचनो हरेत्। विबन्ध-मेदः-शोफार्शः-शोथोदर-कफामयान्। तस्मादल्पगुणः शीतरसः संलेखनो स्मृतः॥" See शीधुः।

सीधुगन्धः। पुं। वकुलवृक्षे। रा.नि.व.१०।

सीधुपर्णी। स्त्री। गाम्भारीवृक्षे। रा.नि.व.९।

सीधुपुष्पः। पुं। वकुलवृक्षे। रा.नि.व.१०। कदम्बवृक्षे। रा.नि.व.९। स्त्री (ष्पी)। धातकी-वृक्षे। रा.नि.व.९।

सीधु(धू)रसः। पुं। आम्रवृक्षे। रा.नि.व.११।

सीधुराज्ञः। पुं। मातुलुङ्गवृक्षे। वै.निघ.।

सीधुराज्ञिकम्। क्ली। काशीसे। हिरेकस्। वै.निघ.।

सीधुवृक्षः। पुं। सुहीवृक्षे। वै.निघ.।

सीधु(धू)संज्ञः। पुं। वकुलवृक्षे। रा.नि.व.१०।

सीधूकफाणितम्। क्ली। मधूकपुष्पीत्यफाणिते। वै.निघ.।

सीधूरसा। स्त्री। आमलक्याम्। वै.निघ.।

सीधुसंज्ञः। पुं। वकुलवृक्षे।

सीध्रम्। क्ली। पायौ। मलद्वारे। शब्दकल्पः।

सीमन्तः। पुं। अस्थिसङ्घातविशेषे। ये: सङ्घाताः सीव्यन्ति ते सीमन्ता उच्यन्ते। ते चास्थि-सङ्घातवद्गणनीया यतस्तेषुक्ता अस्थिसङ्घाताः। सु.शा.५अ.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमन्तकम्। [illegible] । रा.नि.व.१२ ।
सोमा (मन्) । पु. [illegible] । जटा ।
सोमिकः। पुं । सूक्ष्मकृमौ । क्षुद्र कृमि । सूक्ष्मकीटे । हृच्चिकित्सिते । उणा ।
सोमोकः। पुं । हृच्चिकित्सिते । शब्दकल्प ।
सोरः। पु । अर्कवृक्षे । अम ।
सोरकः। पुं । शिग्रुसारके । श.मा । शुण्ठक ।
सोरी (इन्) । पु । स्थूलदर्भे । स्त्री (री) । लाङ्गलिकायाम् । वै.निघ ।
सोल(न्द)म्बः। पुं । मत्स्यभेदे । शिलिन्दा माछ ।
गुणाः—"श्लेष्मलः वृष्य, विपाके मधुरः गुरुः वातपित्तहरः हृद्य आमवातकफकरश्च ।" भा ।
सोवनम्। क्ली । सूचीकर्म्मणि । सेलाई । अम । स्त्री (नी) । सीवनकर्म्मणि । सेलाई ।
सा चतुर्धा—वेल्लितं गोफणिका तुन्नसीवनी ऋजु यन्त्रिवेति । सु.सू.२५अ । लिङ्गसम्बन्धसूत्रे । हे.च ।

सो-नः। त्रि गोफणिकादिसीवनार्हे । सु.सू.५अ ।
सोषपत्रकम्। क्ली । सोसधातुपत्रे । सोसेर पात । हे.च ।
सोषभस्म (न्) । क्ली । (Plumbi carbonas.) White lead. सफेदा । हिं दा. सफेदा । तें सीसभस्मम् । तद्गुणः—चतन्नम् ।
सोस(क)म्। क्ली । (Plumbum.) Lead, sulphate of lead. खनामख्यातधातौ । सीसा । हिं सीषक, शीषा । तें शिषमु । दा. शिश् । तत्पर्य्यायाः,—नागं वप्रं योगेष्टं वङ्गं गण्डूपदभवं सिन्दूरकारणं खर्णारि यवनेष्टं सुवर्णकं चीरं वप्रं दप्रकं पिच्छटं सुवर्णारिः वपु वपुः महावलं यावनेष्टकं बहुमलं चीनं चीनपिष्टं चीनरङ्गं पिष्टं श्वेतरङ्गनं जड़ं भुजङ्गमं उरगं कुरङ्गं परिपिष्टकं मृदुकृष्णायसं पद्मं तारगुडिकरं शिराहृत्तं वयोरङ्गं । गुणाः—"सीसं रङ्गगुणं क्षेयं विशेषान्मेहनाशनम् ।" "नागस्तु नागशततुल्यबलं दधाति व्याधिं विनाशयति नीवितमातनोति । वह्निं प्रदीपयति कामबलं करोति मृत्युञ्च नाशयति सन्ततसेवितः सः ॥" सङ्कोचकः अवसादकरः शुक्रकारकः वेदनाहरः रक्तरोधकश्च । तथा—"पाकेन शीतो किल वङ्गनागौ कुष्ठानि गुल्मांश्च तथातिकष्टान् । पाण्डुप्रमेहानिलसादशोथभगन्दरादीन् कुरुतः प्रभूतौ ॥" भा.पू.१भ.धा.व । सारघं—"मनःशिलायुतो नागो वासारसविमर्द्दितः । त्रिभिर्गजपुटैर्भस्म भवेत्तन्मेहरोगजित् । तारस्य रञ्जको नागो वातपित्तकफापहः ॥" इति । सा.कौ । तथा—"कृत्वाऽथचिञ्चालकचूर्णं चतुर्थांशेन निःक्षिपेत् । मृत्पात्रे विदुते नागे लौहदर्व्या च चालयेत् । यामैकेन भवेद्भस्म तत्तुल्याश्च मनःशिलाम् । काञ्जिकेन दृषच्छिष्टा पचेद्दृढ़पुटेन च । साङ्गशोतं पुनः पिष्टा शिलया काञ्जिकेन च । पुनः पुटेच्छराशाभ्यामेवं षड्भिः पुटैर्मृतिः । नागः सिन्दूरवर्णाभो जियते सर्व्वकार्य्यकृत् ॥" मृतस्य गुणाः—"मृतिको मधुरो नागो मृतो भवति भस्मसात् । आयुः कीर्त्तिं बीर्य्यवृद्धिं करोति सेवनात्सदा । रोगान् हन्ति मृतो नागो वङ्गवद्गुणकारकः ॥" र.सा.सं । "जम्भाम्बुसा सैन्धवसंयुतेन सगन्धकं स्थापयेत् शुल्वपत्रम् । पक्वायभानं पुटयेत् सुयुक्त्या वान्त्यादिकं यावदुपैति शान्तिम ॥" रस.चि.६अ ।

सोसजम्। क्ली । सिन्दूरे ।
सोसपत्रकम्। क्ली । सीसके ।
सोसोपधातुः। पुं । सिन्दूरे । भा ।
सोहुण्डः। पुं । सेहुण्डवृक्षे, सुहीवृक्षे । अम ।
सुकटुः। पुं । शिरीषवृक्षे । वै.निघ ।
सुकण्टका। स्त्री । घृतकुमार्य्याम् । रा.नि.व.५ । पिण्डीखर्জ্জूरवृक्षे । वै.निघ ।
सुकण्डुः। पुं । कण्डूरोगे । चुलकना । श.र ।
सुकन्दः (कः)। पुं । कशेरौ । केसूड़ । रा.नि.व.८ । पलाण्डौ । पेँयाज । अम । वाराहीकन्दे । सुखालौ । धरणीकन्दे । रा.नि.व.७ ।
सुकन्दकरणः। पुं । श्वेतपलाण्डौ । शोभा पेँयाज । वै.निघ ।
सुक(कु)न्दनः। पुं । वेजयन्तीतुलस्याम् । वै.निघ । वर्ब्बरके । बाबुई । रा.नि.व.१० ।
सुकन्दा। स्त्री । लक्ष्मणाकन्दे । रा.नि.व.७ । बन्ध्याकर्कोटक्याम् । वै.निघ ।
सुकन्दी (इन्) । पुं । शूरणे । रा.नि.व.७ ।
सुकर्णकः। पुं । हस्तिकन्दे । रा.नि.व.७ ।
सुकर्णा। स्त्री । आखुकर्णीलतायाम् । भूषाकर्णी । रा.नि.व.३ ।

CC-0. Gurukul Kangri Collection, Haridwar

